

Almira 3
Shelf 3
9

अथनिर्णयसिंध्वनुक्रमणिकाप्रारंभोयम्.

श्रीगणेशायनमः॥ अथनिर्णयसिंधोःप्रथमपरिच्छेदस्यानुक्रमणिकाप्रारभ्यते ॥ छ ॥

१ मंगलाचरणम्
१ षोढाकालभेदः
१ अब्दः पंचधा
१ चांद्रोऽब्दःषष्टिभे·
१ संवत्सरनामानि
१ संवत्सरप्रवृत्तिः
१ अयनस्वरूपं
१ अयनयोर्विनियो·
१ तत्रदेवताप्रतिष्ठानिर्णयः
१ दक्षिणायनेपिप्रतिष्ठा ऋतुमासभेदाः
२ संक्रांतिनिर्णयः
२ सर्वसंक्रांतिषुदाना·
२ संक्रांतौउपवासनिर्णयः
२ संक्रांतौकेषुचिदुपवासनि·
२ संक्रांतौश्राद्धम्
२ विष्णुपदादिस्वरूपम्
३ षडशीत्याख्यम्
३ विषुवलक्षणम्
३ कुत्रचित्पिंडरहितंश्राद्धम्
३ कुत्रचिद्रात्रौस्नानं
३ जन्मर्क्षेसंक्रांतिश्चेत्तर्हितवस्नानेविशे·
३ कुत्रचित्सायंसंध्यानिषेधः
३ चांद्रादिमासभेदाः
३ ब्राह्मणादीनांमासनिर्णयः
४ क्षयमासनिर्णयः
४ मलमासेकार्याकार्यनिर्णयः
६ क्षयमासेकार्याकार्यनिर्णयः
६ गुरुशुक्रास्तादौवर्ज्यम्
६ सिंहस्थेवर्ज्यविना·
६ क्वचित्सिंहस्थेऽभ्यनुज्ञा
गुरुशुक्रयोर्बालवृद्धत्वम्
७ अतिचारगतेजीवे·
७ अस्तस्यदेशपरत्वव्यवस्था.
७ अस्तादेरपवादः
७ मलमासव्रतम्
७ पक्षनिर्णयः
७ तिथिनिर्णयः
७ वेधनिर्णयःतिथेः
७ सायंप्रातर्वेधलक्ष·
७ तिथिविशेषेवेधविशेषः
८ कर्मकालव्यापिनीतिथिः
८ युग्मवाक्यलक्षणंद्वैधेनिर्णयः
८ सामान्यतोदशमी
८ त्रयोदशी
८ प्रतिपदा
८ खर्वदर्पादिलक्षणं
८ एकभक्तं
८ कालःपंचधा
८ अथनक्तं
८ प्रदोषलक्षणम्
८ प्रदोषेनिषेधपदार्था
८ संध्यालक्षणम्
९ यतिनक्तंविधवानक्तं
९ विधुरनक्तंतल्लक्षणं

१

९ सौरनक्तं
९ हरिनक्तं
९ नक्तेधर्माचरणं
९ अयाचितनिर्णयः
९ नक्षत्रव्रतकालः
९ व्रतपरिभाषा
९ तदधिकारिणः
९ शूद्रवैश्यवर्णधर्माः
९ स्त्रीणामनुज्ञैव
९ स्त्रीणांस्नानविशे
९ व्रतग्रहणप्रकारः
९ व्रतारंभकालः
१० भद्रानिर्णयः
१० भद्रापुच्छनिर्णयः
१० भद्रासर्पिणीवृश्चिकी
१० दिनभद्रारात्रिभद्रा
१० व्रतारंभेविशेषः
१० खंडतिथिलक्षणं
१० व्रतारंभेधर्माः
१० व्रतस्थधर्माः
१० व्रतेब्राह्मणभोजनं
१० सहस्रभोजनेविशे
१० द्विभियजमानकर्तृ-
१० शूद्रस्यविप्रद्वारा व्याहृतिहोमः
१० प्रतिमास्वरूपं
१० अनादेशद्रव्येआज्यं
१० अनादेशमंत्रेसमस्तव्याहृतिभिः
१० अनादेशेदेवताप्रजापतिः
१० ग्रहादिपूजायांहोमसंख्या
१० अनुक्तसंख्यायांनिर्णयः
१० व्रतोद्यापनानुक्तौ
१० व्रतोद्यापनाशक्तौ
१० वृथाविप्रवचनग्रह-
१० दक्षिणानिर्णयः
१० रजतदक्षिणानिषे-
१० परान्नभोजननिषे
१० क्षारपदार्थनिषेधः
१० क्षाररूपनिर्णयः
१० गोधूमप्रतिप्रसवः
१० व्रतेग्राह्यधान्यानि
१० कूष्मांडादिनिषेधः प्रतिपदादिषु
१० हविष्यपदार्थाः
११ गृहीतव्रतत्यागेप्रायश्चित्तम्
११ उपवासप्रत्याम्नायाः
११ व्रतेनियमाः
११ स्त्रीव्रतेविशेषः
११ विधवाविशेषः
११ एकादश्यांतांबूलनिषेधः
१२ अश्रुपातादिनिषे-
१२ सूतकादौनिर्णयः
१२ जाताशौचेनिर्णयः
१२ मृताशौचेनिर्णयः
१२ क्षतजाशौचनिर्ण-
१२ गर्भिण्यादीनांव्रतेप्रतिनिधिः
१२ पूर्वसंकल्पितव्रते
१२ रजस्वलास्र
१२ प्रतिनिधयः
१२ स्त्रीशूद्रयोर्व्रतादौनिषेधः
१२ ब्राह्मणस्यहीनवर्णकर्मकरणेनिषेधः
१२ कुत्रचित्प्रतिनिधिनिषेधः
१२ व्रतादिसन्निपाते
१३ शिवरात्रौप्रातःपारणम्
१३ मृताहश्राद्धेदिवाभोजननिषेधः

१३ संक्रांत्यादौरात्रिभोजननिषेधः
१३ चांद्रायणेएकादश्यांभोजनंकार्यम्
१३ प्रतिपदादितिथिनिर्णयः
१३ सर्वतिथिषुवर्ज्यानि
१३ द्वितीयादिनिर्णयः
१३ तृतीयानिर्णयः
१३ चतुर्थीनिर्णयः
१४ पंचमीनिर्णयः
१४ षष्ठीनिर्णयः
१४ सप्तमीनिर्णयः
१४ अष्टमीनिर्णयः
१४ नवमीनिर्णयः
१४ दशमीनिर्णयः
१४ एकादशीनिर्णयः
१५ एकादशीनित्यकाम्यउपवासनिषेधेफलाहाराद्यनुज्ञानिर्ण॰
१७ एकादश्याःअष्टादशभेदाः
१८ एकादशीव्रतोपयुक्तधर्माः
१८ एकादशीव्रतेअधिकारिणः
१८ एकादशीव्रताकरणेप्रायश्चित्तम्
१८ काम्यव्रतविधिः
१८ दशमीनियमः
१८ व्रतघ्नानिनस्यप्राय॰
१९ एकादश्यांश्राद्धप्राप्तौ
१९ अव्रतघ्नानि
१९ सर्वव्रतेषुनियमाः
१९ उपवाससंकल्पः
१९ द्वादश्यांवर्ज्यपदार्थाः
१९ द्वादश्यांनिवेदनमंत्रः
२० रजस्वलायाएकाद॰
२० अष्टौमहाद्वादश्यः
२० अथद्वादशीनिर्ण॰
२० आह्निकापकर्षः
२० प्रदोषादिसंकटेनि॰
२० हरिवासरलक्षणं
२० उपवासातिक्रमे
२० द्वादशीनिर्णयः
२० त्रयोदशीनिर्णयः
२० चतुर्दशीनिर्णयः
२० पूर्णिमामावास्यानि॰
२१ अमावास्यासोमवारादि॰
२१ योगेसंयोगलक्षणोव्यतीपातः
२१ अथेष्टिकालः
२१ इष्ट्याद्यारंभःपौर्णमास्यामेव
२२ अमायांविशेषः
२२ मलमासादौनप्रथमारंभइष्टेः
२२ मतांतरेकर्तव्या॰
२२ अथविकृतिः
२२ आग्रयणेविशेषः
२२ पशुयागकालः
२२ आधानकालः
२२ आधाननक्षत्राणि
२२ सोमयागकालः
२३ अमावास्याश्राद्धका॰
२३ पिंडपितृयज्ञकालः
२४ पिंडपितृयज्ञाकरणेप्रायश्चितम्
२५ वैश्वदेवाकरणेप्रा॰
२५ पतितान्नभोजनेप्रा॰
२५ निरग्निकस्यअमानिर्णयः
२५ साग्निकस्यामानिर्ण॰
२५ स्त्रीशूद्राणाममानि॰
२५ श्राद्धांतरसन्निपाते
२५ सिनीवालीलक्षणं
२५ कुहूलक्षणम्
२५ कुतुपकाललक्षणं

२५ तुलादानम्
२५ अमाश्राद्धातिक्रमेप्रा
२५ ग्रहणनिर्णयः
२५ वेधनिर्णयः
२५ चंद्रग्रहणेविशेषः
२५ चंद्रग्रस्तोदये
२५ चंद्रसूर्यग्रस्तास्ते
२६ ग्रहणेसंध्याहोमादौ
२६ बालवृद्धातुराणां
२६ भुक्तान्ननिषेधः
२६ तक्रघृतपाचितानां-
निर्णयः
२६ वेधेभोजनादिशाय-
२६ ग्रहणकालेभोजने
प्रायश्चित्तम्
२६ उपवासीग्रहणेकैः
कार्यः
२६ पुत्रवतउपवासनिर्णः
२६ ग्रहणचूडामणियो
२६ स्नानदानादिकाल-
निषेधः
२६ मुक्तिस्नानाकरणेदो·
२७ ग्रहणस्नानेतीर्थानि·
२७ उष्णोदकस्नानेतारत·
२७ तीर्थविशेषेदानवि·
२७ ग्रहणेश्राद्धविधिः
२७ ग्रहणेश्राद्धभोजने
दोषः
२७ सूतकेग्रहणेच
२७ कर्तव्यविशेषः
२७ रजस्वलास्नानं
२८ राश्यादिपश्चाद्धादि
२८ चंद्रग्रहणंदिवाचेत्
२८ ग्रहणादिनेवार्षिक
श्राद्धंमासिकेचेत्
२८ तत्रमंत्रदीक्षाकाल
जन्मराश्यादौग्रह०
२८ ग्रहणेदृष्टानिष्टफ·
२८ नागबिंबदानेमंत्रः
२९ ग्रहशांतिरुक्ता.
२९ ग्रहणेहोमादिकर्त
व्यता
२९ होमाशक्तौचतुर्गुणो
जपः
२९ गर्भिण्याग्रहणावलो
कननिषेधः
२९ मंगलकृत्येषुवेधवि·
२९ मंत्रदीक्षाहोमतर्प·
३० कुरुक्षेत्रेप्रतिग्रहेप्रा·
३० पूर्वसंकल्पितद्रव्यो
पग्रहणेविशेषः
३० मेघाच्छादनेअंधादी
नाम्
३२ इतिग्रहणनिर्णयः
अथसमुद्रस्नानं
भृगुभौमवारेसमु
द्रस्नाननिषेधः
अपर्वणिस्नाननिषे·
३२ सेतुबंधादौननिषेधः
३२ समुद्रस्नानविधिः
३२ समुद्रार्घ्यमंत्रः
३२ समुद्रतर्पणम्

अथद्वितीयपरिच्छे
दानुक्रमणिकाप्रार
भ्यते
१ अथसंवत्सरप्रतिपः
१ मीनसंक्रांतिनिर्ण·
१ अथतिथिनिर्णयः
१ अपितुसंवत्सरारंभः
१ अस्यामेवनवरात्रारं
२ अन्नप्रदानम्
२ कुंभदानम्
२ चैत्रशुक्लतृतीयायां
गौरीदोलोत्सवः
२ अत्रैवसौभाग्यश
यनव्रतम्
२ इयंमन्वादिः

२ प्रसंगात्सर्वमन्वादिनिर्णयः
२ अत्रैवश्राद्धमुक्तंमात्स्ये
२ चैत्रशुक्लतृतीयायांमत्स्यजयंती
२ अत्रैवप्रसंगाद्दशावतारजयंत्यः
३ जन्माष्टम्यादौविशे·
३ तत्रैवशुक्लपंचमीकल्पादिः
३ चैत्रशुक्लाष्टम्यांभवान्युत्पत्तिः
३ अत्रभवानीयात्रा
३ अत्रैवअशोककलिकाप्राशनम्
३ चैत्रशुक्लनवमीरामनवमी
४ चैत्रशुक्लैकादश्यांदोलोत्सवः
४ चैत्रशुक्लद्वादश्यांदमनोत्सवः
५ अथागमोक्तदीक्षावतांदमनारोपणवि
५ चैत्रशुक्लत्रयोदश्यामनंगव्रतम्
५ चैत्रशुक्लचतुर्दशीपूर्वाग्राह्या
६ चैत्रशुक्लपूर्णिमा
६ अत्रविशेषोनिर्णयामृते
६ अत्रसर्वदेवानांदमनपूजोक्ता
६ इयंमन्वादिः
इतिचैत्रः
६ अथवैशाखः
६ मेषसंक्रमः
६ अथवैशाखस्नानं
७ एवंसंपूर्णस्नानाश·
७ वैशाखशुक्लतृतीयाअक्षय्यतृतीया
७ इयंयुगादिरपि
७ अत्रश्राद्धमुक्तंमात्स्ये
८ अत्रदानविशेषस्तत्रैवभविष्ये
८ अत्ररात्रिभोजनेशा·
८ अत्रश्राद्धाकरणेशा
८ अत्रसमुद्रस्नानप्रशं·
९ इयमेवतृतीयापरशुरामजयंती
९ वैशाखशुक्लसप्तम्यांगंगोत्पत्तिः
९ वैशाखशुक्लद्वादश्यांयोगविशेषः
९ वैशाखशुक्लचतुर्दशीनृसिंहजयंती
९ अथात्रविशेषः
१० वैशाखपौर्णमास्यांविशेषोपरार्के
१० अत्रकृष्णाजिनदानं
इतिवैशाखः
१० अथज्येष्ठः
१० वृषसंक्रांतौपु·
१० ज्येष्ठशुक्लतृतीयायांरंभाव्रतम्
१० ज्येष्ठशुक्लदशमीदशहराख्या
१० अत्रविशेषःकाशीखंडे
११ अस्यामेवसेतुबंधरामेश्वरपूजा
११ ज्येष्ठशुक्लैकादशीनिर्जला
११ ज्येष्ठपौर्णमास्यांसावित्रीव्रतम्
१२ इयंमन्वादिरपि
इतिज्येष्ठः
अथाषाढः

११ मिथुनसंक्रांतौ पराः
१२ आषाढशुक्लदशमी
१२ पौर्णमासीचमन्वा·
१२ अत्रैवविष्णुशयनोत्सवः
१२ आषाढशुक्लैकादशी
१२ अत्रैवचातुर्मास्यारं·
१५ अथनदीनांरजोदोष
इत्याषाढः
१६ अथश्रावणः
१६ श्रावणशुक्लतृतीया
मधुस्रवा
१६ श्रावणशुक्लचतुर्थी
१६ श्रावणशुक्लपंचमी
१६ नागपंचमी
१६ अत्रविशेषोहेमाद्रौ
भविष्ये
१६ अत्रैवविष्णोःपवित्रारोपणं
१७ श्रावणशुक्लचतुर्दशी
पूर्वयुता
१७ अथोपाकर्म
२१ अत्रैवहयग्रीवोत्पत्तिः
२१ श्रावणपौर्णमास्यां
श्रवणाकर्म
इतिश्रावणः
२१ अथभाद्रपदः
२१ सिंहे पराःषोडश
२१ अत्रगोप्रसवेद्भुतसारेनारदः
२२ भाद्रकृष्णतृतीयाकज्जलीसंज्ञा
२२ भाद्रकृष्णचतुर्थीबहुलसंज्ञा
२२ अत्रगोःपूजा
२२ अथजन्माष्टमी
२६ भाद्रकृष्णामावस्या
कुशाग्रहणं
२६ भाद्रशुक्लतृतीयाहरितालिका
२६ भाद्रशुक्लचतुर्थीवरदचतुर्थी
२६ अत्रचंद्रदर्शननिषिद्धम्
२६ भाद्रशुक्लपंचमी
ऋषिपंचमी
२६ भाद्रशुक्लषष्ठीसूर्यष·
२६ भाद्रशुक्लाष्टमीदुर्वाष्टमी
२७ अत्रैवज्येष्ठापूजोक्ता
२७ भाद्रशुक्लद्वादश्यां
पारणम्
२९ इयमेवश्रवणद्वादशी
२९ वामनावतारनिमित्तोपवासव्रतम्
३० भाद्रशुक्लचतुर्दश्यामनंतव्रतम्
अथागस्त्यार्घः
३१ भाद्रपदपौर्णमास्यां
प्रपितामहात्परांस्त्रीनुद्दिश्यश्राद्धम्
इतिभाद्रपदः
३१ अथाश्विनः
३१ कन्यासंक्रमेपराःषो·
३१ अथमहालयाः
३४ कपिलाषष्ठी
३५ इयमेवचंद्रषष्ठी
३५ अष्टम्यांमहालक्ष्मी
३५ नवम्यामन्वष्टका
३६ अथत्रयोदशीश्राद्धं
३७ अथचतुर्दशी
३८ अमायांविशेषमाह
३८ आश्विनशुक्लप्रतिपद्दौहित्रश्राद्धम्
३८ इतिमहालयनिर्ण·
३८ अथाश्विनप्रतिपदि
नवरात्रारंभः
४१ अथपूजाविधिः

४३ आश्विनशुक्लपंचम्यामुपांगललिताव्रतम्
४३ सरस्वतीस्थापनम्
४३ अथषष्ठी
४४ अस्यामेवदेवीत्रिरा·
४५ अथसप्तमीपूजावि·
४५ अथमहाष्टमी
४६ महानवमी
५० अथबलिदानम्
५० अथसहस्रचंडी
५१ अथनवरात्रपारणं
५२ विजयादशमी
५३ आश्विनपौर्णमासी
५३ कोजागरी
५३ अत्रैवाश्वयुजीकर्म
इत्याश्विनमासः
५३ अथकार्तिकः
५३ तुलासंक्रमे पराः षो·
५३ अथकार्तिकस्नानं
५४ अथमालाधारणं
५५ आकाशदीपः
५५ कार्तिकशुक्लचतुर्थी
करकचतुर्थी
५५ कार्तिककृष्णद्वादशी
गोवत्सपूजा
५५ कार्तिककृष्णचतुर्दशीनरकचतुर्दशी
५७ कार्तिकामावास्यामाश्वयुजीकर्म
५७ तत्रैवभीष्मव्रतम्
५७ कार्तिकशुक्लप्रतिपद्गोक्रीडा
५७ बलिप्रतिपत्
५८ मार्गपालीबंधनम्
५९ यमद्वितीया
५९ कार्तिकशुक्लनवमी
युगादिः
५९ अत्रैवविष्णुत्रिरात्रं
५९ कार्तिकशु·कादश्यां भीष्मपंचकव्रतम्
६० कार्तिकशुक्लद्वादश्यां रेवतीयोगरहितायां पारणंकार्यम्
६० अस्यामेवदेवोत्थापनमुक्तम्
६० चातुर्मास्यव्रतसमा·
६० वाराहोक्तोबोधिनीविधिः
६० कार्तिकशुक्लद्वादशी
पौर्णमासीचमन्वादिः
६० वैकुंठचतुर्दशी
६० कार्तिकव्रतोद्यापनं
६१ कार्तिकपौर्णमासीपरा
६१ अत्रत्रिपुरोत्सवः
६१ अत्रवृषोत्सर्गोतिप्रशस्तः
६१ अत्रकार्तिकेयदर्शनं
६१ इतिकार्तिकः
अथमार्गशीर्षः
६१ वृश्चिके पूर्वाः षोडश
६१ मार्गकृष्णाष्टमीकालाष्टमी
६१ अत्रकालभैरवपूजा
६१ मार्गशीर्षशुक्लपंचम्यानागपूजा
६१ मार्गशीर्षशुक्लषष्ठी चंपाषष्ठी
६२ इयमेवस्कंदषष्ठी
६२ मार्गशीर्षपूर्णिमायां दत्तोत्पत्तिः
इतिमार्गशीर्षः
६३ अथपौषः
६३ धनुःसंक्रमे पराः षोड·
६३ पौषशुक्लैकादशीमन्वा·
६३ पौषामावास्यायांअर्धोदयः
६३ अत्रदानविशेषः
इतिपौषः

६३ अथमाघः
६३ माघस्नानम्
६५ मकरसंक्रांतौ परतश्च
त्वारिंशद्घटिकाः पुण्य·
६५ मकरेदानविशेषः
६५ माघामायां योगविशे·
६५ माघकृष्णचतुर्दश्यां
यमतर्पणम्
६५ माघशुक्लचतुर्थीति
लचतुर्थी
६५ इयमेवकुंदचतुर्थी
६५ माघशुक्लपंचमी
श्रीपंचमी
६५ रथसप्तमी
६७ अत्रदानविशेषः
६७ इयंमन्वादिः
६७ माघशुक्लाष्टमीभी
ष्माष्टमी
६७ माघशुक्लद्वादशी
भीष्मद्वादशी
६७ माघीपूर्णिमा
इतिमाघः
६७ अथफाल्गुनः
६७ कुंभेषोडश
६७ फाल्गुनकृष्णाष्टम्यां
विशेषः
७० फाल्गुनपूर्णिमाहोलि·
७० अस्यामेवग्रहणेविना·
७० इयंमन्वादिः
७० चैत्रकृष्णप्रतिपदि
वसंतोत्सवः
७१ अत्रविशेषोहेमाद्रौ
७१ अत्रचूतकुसुमप्राश
नमुक्तम्
७१ चैत्रामावास्यामन्वा·
इतिफाल्गुनः
इ· द्वि· प· च्छेदः समा·

अथतृतीयपरिच्छे
दः प्रारभ्यते
१ मंगलाचरणम्
१ प्रथमरजोदर्शने
१ दुष्टतिथ्यादयः
१ दुष्टवाराः
१ नक्षत्रफलम्
१ लग्नफलम्
१ वस्त्रफलम्
१ रुधिरबिंदुफलम्
१ प्रथमर्तौदोषःस्त्री
गमने
२ योगफलम्
२ दुष्टप्रथमर्तौशांतिः
२ प्रथमर्तौविशेषः
२ प्रथमर्तौप्राक्स्त्री
गमनेनिषेधः
३ ऋतौगमनेदिनसंख्या
३ ऋतौगमनेतिथ्या
दिनियमाः
३ आन्ध्रादौस्त्रीगमनेनि·
३ अनेकभार्यस्यतुग·
३ ऋतावगमनेदोषः
४ गर्भाधानविध्यकर·
४ मलमासशुक्रास्ता· का·
४ स्त्रीगमनेरुढिमाह
४ रात्रावाशौचेरजसि
४ सप्तदशादिनमध्येर
जसिचेत्
४ रोगजेरजसि
४ रजस्वलानामन्यो
न्यस्पर्शे
४ सवर्णानांविशेषः
४ रजस्वलायाश्चांडा
लादिस्पर्शे
४ रजस्वलायानैमित्ति
कस्नानम्
४ रजस्वलायारजसि
ज्वरोत्पत्तौ
४ रजसोज्ञाने

नि·सिं
५

४ पुंसवनानवलोभनं
५ पुंनक्षत्राणि
५ पुंसवनेतिथ्यादि
५ अनवलोभनम्
५ सीमंतोन्नयनं
५ तत्रपतिगर्भकर्तव्य
५ सीमंताभावे
५ भोजनप्रायश्चित्तं
५ गर्भिणीतत्पतिधर्माः
६ पत्न्याःश्राद्धभोजननि-
६ सूतिकागृहप्रवेशाः
६ जातकर्म
६ वृद्धिश्राद्धेआमहेम
विचारः
६ आशौचांतरपातवृ-
द्धिश्राद्धेविचारः
७ जन्मदुष्टकालगंडां-
तस्नानं
७ आश्लेषाफलं
७ ज्येष्ठाफलं
७ मूलफलं
७ मूलवृक्षः
७ लग्नभेदात्फलं
७ विशाखाफलं
७ चित्राफलम्
८ व्यतीपातादिफलं
८ विकृतांगसहदंतजा-
तफलं
८ पितृभ्रात्रैकनक्षत्र
जाते
८ ग्रहणजननेशांतिः
८ अकालप्रसवस्त्री
युगलक्षणं
८ उपरिदंतजनने
९ त्रिकशांतिःबालत्र-
यजनने
९ षष्ठीपूजा
९ दत्तपुत्रपरिग्रहवि-
९ स्त्रीशूद्रयोर्दत्तकेवि-
९ शूद्रकर्तृकहोमेवि-
९ दत्तकेविशेषः
१० यमयोर्ज्येष्ठकनिष्ठवि-
चारः
१० सूतिकास्नानम्
१० नामकर्मतत्कालवि
११ खट्वारोहःप्रेंखारोहः
११ दुग्धपानम्
११ तांबूलभक्षणम्
११ निष्क्रमणम्
१२ अथोपवेशनम्
१२ अन्नप्राशनं
१२ अब्दपूर्तिःउष्णीद
कस्नाननिषेधः
१३ कटिसूत्रम्
१३ चौलम्
१३ मातरिगर्भिण्यांनिषे-
१३ ज्वरोत्पत्तौमातृरजसि
१३ संकटेमुंडनोत्तरवि-
१३ सोदरयोराशौचं
१४ शिखाविचारः
१४ चौलभोजनेप्रायश्चि-
१४ चौलंचौलशास्त्रार्थ
श्च
१४ विद्यारंभः
१४ धनुर्विद्या
१४ अनुपनीतस्यविशेषः
१४ उपनयनेशिष्यलक्षणं
१५ उपनयनेगौणकालः
१५ जन्ममासादि
१५ उपनयनेगुरुबलम्
१५ गलग्रहाःनैमित्तिकाः
१५ ज्येष्ठमासादिविचारः
१५ अक्षय्यतृतीयादौपु-
नरुपनयनम्
१६ सोपपदाःतिथयः
१६ प्रदोषस्वरूपम्
१६ भूकंपादौ
१६ शाखाधिपाः

अ·प·
३

५

१६ प्रातःसंध्यागर्जिते·
१६ सायंसंध्यागर्जेशां·
१६ उपनयनेनक्षत्राणि
१७ उपनयनाधिकारिणः
१७ षंढमूकादीनांविशेषः
१७ कुंडगोलकयोःगायत्र्युपदेशः
१७ भिक्षायांविचारः
१७ संस्कारलोपेप्रायश्चि·
१७ अतीतसंस्काराणां युगपत्
१७ उपनीत्यासहचौलक·
१७ युगपत्संस्कारेनांदीश्राद्धम्
१७ उपनयनाग्निः
१७ उपनयनेमध्यान्हसं·
१७ ब्रह्मयज्ञारंभः
१८ ब्रह्मचारीधर्माः
१८ गुरूच्छिष्टं
१८ मेखला
१८ दंडाः
१८ अजिनम्
१८ यज्ञोपवीतं
१८ तत्संख्या
१८ ब्रह्मचारीधर्मलोपे
१९ अग्निकार्यलोपे
१९ संध्यालोपे
१९ उपवीतनाशे
१९ पुनरुपनयनं
२० अनध्यायाः
२१ महानाम्न्यादिव्रतम्
२१ समावर्तनम्
२१ बटोःपूर्वमृतानांत्र्यहाशौचम्
२२ स्नातकव्रतानि
२२ छूरिकाबंधः
२२ अश्वविवाहः
२२ सापिंड्यनिर्णयः
२३ त्रिगोत्रात्सपेविशेषः
२४ मातुलकन्यापरिणयः
२५ जीवत्पित्रादित्रिक
सपिंडाकन्यासापिंड्यं
सापत्नमातासहकुले
२६ दत्तकस्यसापिंड्यं
२६ अनाचारः
२६ गोत्रप्रवरनिर्णयः
२७ द्विगोत्राद्यज्ञाते
३० मातृगोत्रनिर्णयः
३० कन्याविवाहकालः
३० गुर्वर्कबलम्
३१ बृहस्पतिशांतिः
३१ शुक्रास्तादिनिमित्तं
३१ सिंहस्थगुरोरपवा
३१ कन्यादातारः
३१ भ्रातृणांसंस्कृतानां
३१ स्वयंवरेनांदीश्राद्धं
३१ मातुर्दातृत्वेनांदीश्रा
३१ परकीयकन्यादानं
३२ गौर्यादिदानफलम्
३२ मासनिर्णयः
३२ ज्येष्ठमासनिर्णयः
३२ दशादोषाः
३२ गुर्वतिचारे
३२ घातचंद्रे
३२ अकालवृष्ट्यादौ
३२ भूकंपादौ
३३ नांदीश्राद्धेभूकंपादेरप·
३३ कन्यावैधव्ययो
३३ कुंभविवाहादि
३३ विष्णुमूर्तिदानमुक्तकार्यम्
३३ प्रतिकूलादि
३३ पित्रादौमृतेविशेषः
३३ तत्रविनायकशांतिः
३४ प्रतिकूलापवादः
३४ मातृरजोदर्शने
३४ नांदीश्राद्धानंतरम्
३४ एकमातृकयोःक्रिया

३४ श्रीपूजनम्
३४ तदपवादः संकटेवि·
३४ विवाहमध्येश्राद्धमंड·
३४ मुंडनविचारः
३४ मासिकापकर्षः
३५ भिन्नमातृजयोर्विवा·
३५ प्रत्युद्वाहे विधिनिषे·
३५ कन्यारजोदर्शने·
३५ तत्रप्रायश्चित्तम्
३५ तद्विवाहे वरस्यप्रा·
३५ गांधर्वादिविवाहाः
३६ बलादपहरणे कन्यायाः
३६ आशौचे विवाहमध्ये
३६ आशौचे नांदीश्राद्धवि·
३६ अन्नादौ विशेषः
३६ धर्मार्थं विवाहकरणे·
३६ कन्यागृहे भोजने
३६ नूतनवस्त्रधारणे
अदोषः
३६ स्त्रियासह भोजने अ·
३७ विवाहनक्षत्राणि
३७ विरुद्धनक्षत्रेदानानि
३७ विवाहमंडपहरिद्राले·
३७ विवाहवेदिका
३७ चुल्यर्थं मृत्तिकाहरणं
३७ वरवरणम्
३७ वाग्दानम्
३७ वाग्दानोत्तरं वरमृतौ
३७ वरस्य देशांतरगते
३७ वाग्दानोत्तरं मरणे वर·
३७ दोषसत्वे अनेकेभ्यो वरे
भ्यो दत्ताचानिर्णयः
३८ द्वितीयविवाहे नांदी·
३८ लग्नघटिकास्थापनमु
क्तम्
३८ मधुपर्केऽर्च्यशाखी
यः कार्यः
३८ दातरिनिर्णयं विष्टरल·
३८ कन्यादानविधिः
३८ गृहप्रवेशनीयहोमेवि·
३८ औपासने विशेषः
३८ देवकोत्थापनं
३८ नांदीश्राद्धोत्तरं सर्वे
षां सपिंडानां नियमं
३९ स्पृष्टास्पृष्टदोषाभावः
३९ उपनयनविवाहोत्तर
स्नानम्
३९ अपूर्वतीर्थयात्रानि·
३९ प्रथमवर्षे वध्वा पितृ
गृहे
३९ गोपीचंदनधारणनि·
३९ उपनयनविवाहोत्तरं
मुंडननिषेधः
३९ भर्तृगृहे मासनिषे-
धः
३९ विवाहोत्तरं पिंडदानं
३९ तिलतर्पणनिषेधः
३९ वधूप्रवेशे वर्षनियमाः
३९ मासदिवसनियमाः
३९ प्रतिशुक्रविचारः
३९ गुरुशुक्रास्तविचारः
३९ मांगलिके प्राप्तश्राद्धं
द्विनाचरेत्
३९ द्विरागमनम्
३९ पुनर्विवाहे कारणम्
४० स्त्रीबाहुल्ये धर्माधि
कारः कस्या आह
४० पुनर्विवाहे अग्निः
४० पुनर्विवाहे निषिद्धका·
४० अग्निद्वयसंसर्गः
४० तृतीयविवाहनिषेधः
४० अर्कविवाहकालः
४१ आधानेतन्नक्षत्रादि
४१ उदितानुदितलक्षणं
४१ अग्निहोत्रकालः
४१ आवसथ्याधानम्
४१ ज्येष्ठभ्रातरिपितरि
४२ वासाग्निके कनिष्ठस्या

न्यथाभावेनदोषः
४२ आधानंज्येष्ठेअकृताधानेकार्यं
४२ परिवेत्रादिविचारः
४२ परिवेत्राद्यपवादः
४२ शूद्रस्यसंस्कारः
४३ अथरुद्रकालाः
४३ जलाशयस्यकालः
४३ कूपदेशाः
४३ कूपस्योत्सर्गविधिः
४३ वृक्षारोपणम्
४३ मूर्तिप्रतिष्ठा
४३ प्रतिष्ठासामाः
४३ प्रतिष्ठातिथयः
४३ प्रतिष्ठानक्षत्राणि
४३ प्रतिष्ठावाराःस्थानानिच
४४ प्रतिष्ठाधिकारिणः
४४ शूद्रादिस्थापनंलिंगादीनाम्
४४ स्त्रीशूद्रैर्विष्णुशिवपूजनंनकार्यम्
४५ प्रतिमाकस्यपदार्थस्यकार्या
४५ प्रतिमायांप्राणप्रति॰
४५ लिंगभेदेनार्चा
४५ लिंगंकस्यपदार्थस्यकार्यम्
४५ अथपंचसूत्रीनिर्णा
४५ गृहेलिंगशालग्रामादिकाःकतिपूजनी॰
४६ स्त्रीभिःशिवविष्णुस्पर्शोनकार्यः
४६ ब्राह्मणादिभिःकतिसंख्याप्रतिमाःपू॰
४६ नवधाद्रव्यस्यप्रति
४६ शालग्रामशिवनाभिपरीक्षा
४६ अथपार्थिवपूजा
४६ अमुकदेवेअमुकवाद्यनिषेधः
४७ शिवस्यपुष्पादिकमर्पणीयम्
४७ त्रिपुंड्रधारणंरुद्राक्षधारणंच
४७ रुद्राक्षमहिमा
४७ रुद्राक्षाभिमंत्रणं
४७ कतिरुद्राक्षाणांमाला
४७ रुद्राक्षमालादानम्
४७ रुद्राक्षमालाधारणं
४७ शिवमहास्नानंपंचामृतम्
४७ विष्ण्वादौमहास्नानंपंचामृतस्य
४७ विष्वक्सेनादीनांनैवेद्यविभागः
४७ पंचायतनस्थापनम्
४८ केशवादिमूर्तीनांल॰
४८ लिंगप्रतिष्ठाकेशवादिमूर्तीनांप्रतिष्ठा
४९ सर्वतोभद्रदेवतास्था॰
५२ पुनःप्रतिष्ठा
५२ अथजीर्णोद्धारः
५३ मूर्तिप्रासादभेदने
५३ अथतुलसीग्रहणं
५३ अथपुष्पादेःपर्युषित
५४ शिवनिर्माल्यनिर्णयः
५६ अथश्मश्रुकर्म
५६ अथेंधनसंग्रहः
५६ अथनवान्न
५६ नवभोजनपात्रम्
५६ अथनवपर्णफलादिभक्षणम्
५६ अथहोमेआहुतिपातः
५६ अथशांतिरुक्ता
५७ अथज्वरादौफलम्
५७ अत्रशांतिः
५७ अथभेषजम्
५७ अथारोग्यस्नानं

५७ अथदंतधावनम्
५७ प्रोषितभर्तृकानिय·
५७ अथामलकस्नानं
५७ अथतैलस्नाननिषे·
५८ अथगृहारंभः
५९ अथगृहप्रवेशः
५९ अथकलिवर्ज्यानि
इतिनि·तृ·प·पू·स·

---

१ अथश्राद्धनिर्णयः
१ श्राद्धलक्षणं
२ श्राद्धभेदाः
२ घृतश्राद्धं
२ अथश्राद्धदेशाः
२ गयाश्राद्धं
२ गयाशिरःप्रमाणं
२ सप्तगोत्राणि
२ एकोत्तरशतंकुलं
३ अथनिषिद्धदेशाः
३ परगृहेश्राद्धंनिषिद्धं
३ अथश्राद्धकालः
३ अथनवान्नश्राद्धम्
३ शंखपद्मादियोगाः
४ प्रतिकृष्णपक्षश्राद्धं
४ व्यतीपातेश्राद्धं
४ तिथिविशेषेश्राद्धं
४ नक्षत्रश्राद्धंयोगश्रा·
५ अथश्राद्धाधिकारि
५ द्वादशपुत्रभेदाः
६ अनुपनीतस्यपुत्रोऽ
धिकारी
६ अपुत्रस्यक्रियादि
६ भगिनीतत्सुतयोर्वि·
६ ब्राह्मणस्यान्यक्रिया
निषेधः
६ दत्तक्रीतकृत्रिमपुत्रा
णांश्राद्धादि
६ पत्न्यादेःसपिंडनादा
वधिकारः
६ सपिंडनाधिकारिणः
८ पुत्रक्रियाकरणेपि
श्राद्धेरनधिकारः
८ ब्रह्मचारिणःपित्रोः
श्राद्धाधिकारः
८ विभक्तानांभ्रातृणां
विचारः
९ जारजानांविशेषः
९ धर्मार्थेश्राद्धकरणे
९ गयायामपितत्रैव
९ अन्यस्त्रीशूद्राणाम
मंत्र·
१० शूद्राणांगोत्राभावेका·
श्यपगोत्रम्
१० राजकार्यनियुक्तादी
नांश्राद्धनिर्णयः
१० यवनादीनांश्राद्धनि·
इतिश्राद्धाधिकारिणः
११ अथपितरः
११ पितॄणांश्राद्धार्थंय
थाउपतिष्ठंति
११ वसुरुद्रादित्यानांस्व·
११ ब्राह्मणादिवर्णपराः
पितरः
११ अथविश्वेदेवाः
११ श्राद्धेक्रतूदक्षौदेवौ
११ नांदीमुखश्राद्धेसत्यौ
११ नैमित्तिकश्राद्धेकामका·
११ काम्यश्राद्धेधूरिलोच
११ पार्वणेपुरूरवार्द्रवौ
११ श्राद्धंत्रिविध
१२ विश्वेदेवापवादमाह
१२ अथविप्राः
१२ द्वयोर्घ्योरेकश्राद्धे
१२ भोजनेनिषिद्धं
१२ अथप्रश्नाः
१३ अत्रविशेषः
१३ अथवर्ज्याः
१४ लंबकर्णलक्षणं

१४ सप्तविधाषंढाः
१४ कुष्ठिकाणादेरपवादः
१४ गयास्थब्राह्मणस्तु
१४ विप्रनिमंत्रणं
१५ विप्रसंख्या
१५ ब्राह्मणाभावेएको
ब्राह्मणः
१५ एकविप्रेस्याग्रेविशे·
१५ ब्राह्मणाभावेचदर्भा·
१६ श्राद्धकर्तृभोक्तृनि·
१६ निमंत्रितातिकरणे
१६ गृहीतामंत्रणत्यागे
१६ श्राद्धभोजनेप्राय·
१६ अमायांनिषिद्धम·
१६ वनस्पतिगतस्वरूः
१७ कर्तुरशक्त्याप्रतिनि
१७ स्त्रियोनियमानाह
१७ पिंडदानात्प्राक्स्वगृ
हेबालानांभोजनेनि·
१७ अथश्राद्धवस्तूनि·
१७ तत्रदर्भग्रहणप्रका·
१७ पवित्रदर्भसंख्या
१७ दर्भग्रहणेमंत्रः
१७ दशदर्भाः
१७ निषिद्धदर्भाः
१७ स्वर्णपवित्रंश्रेष्ठं
१७ अथहविः
१८ शाकादिवस्तूनि
१९ श्राद्धेमांसग्रहणंम
धुन
१९ श्राद्धेमांसनिषेधः
१९ कालदेशाचारतोव्य
१९ क्षीरादौविशेषमाह
२० अथवर्ज्यवस्तूनि
२२ ताम्रपात्रस्थंवर्ज्यं
क्षीरादि
२२ अथजलंवर्ज्यम्
२२ शूद्राहृतंजलंवर्ज्यं
२२ श्राद्धेतिलादिकुतुपाः
२२ दौहित्रलक्षणमुक्तं
२२ श्राद्धदेशंवर्ज्यानि
२२ अथश्राद्धदिनकृत्यं
२३ श्राद्धपाकःकेनकार्यः
२ श्राद्धेपाकभांडानि
२३ अथपाकाग्निः
२४ श्राद्धोपक्रमः
२४ वस्त्रेविशेषः
२४ ऊर्ध्वपुंड्रादिधारणं
२४ कर्तुर्भोक्तुरूर्ध्वपुंड्रानि
२४ गृहेरंगवल्लीनिषेधः
२४ तिलककरणसमये
दर्भधारणंनिषिद्धं
२४ श्राद्धारंभकालः
२४ श्राद्धपरिभाषा
२४ जानुपातनं
२४ गोत्रनामोच्चारःकु
त्रकर्तव्यः
२५ संबंधगोत्रोच्चारणप्र·
२५ सकारांतोगोत्रोच्चारः
२५ गोत्रापरिज्ञानेकाश्यप
२५ नामोच्चारणेविशेषः
२५ पुत्रादिनामज्ञाने
२५ विभक्तिविचारः
२५ अनुपनीतस्त्रीशूद्रा
देरुत्तरीयेणसव्याप
सव्यम्
२५ सव्यापसव्यविचारः
२५ आचमनविचारः
२५ दानाध्ययनादिवर्ज्यं
२६ पिंडदानात्प्राक्
२६ देवानांनैवेद्यःपूर्वं
२६ विश्वदेवपितॄणांपू
जनंकथंकार्यं
२६ दर्भविसर्जनंकतिधा
२६ मंत्रोहविचारः
२६ वृद्धौविशेषः
२६ आपस्तंबानांतु
२७ मंडलादिपाद्यंकर्तव्यं

२७ कस्यागोगेमियंश्रा·
२७ विप्रनियमाः
२७ आसनानिकीदृशानि
२८ अर्घ्यपात्रम्
२८ उत्तमान्यर्घ्यपात्राणि
२८ अधमान्यर्घ्यपात्राणि
२९ विश्वेदेवावाहने
२९ ऊर्ध्वपुंड्रनिषेधः
३० तुलसीनिषेधः
३० पुष्पाणिग्राह्याणि
३० वर्ज्यानिपुष्पाणि
३० धूपउत्तमः
३० वर्ज्यधूपाः
३० अथदीपः
३० वस्त्रम्
३० यज्ञोपवीतम्
३० दीपिकादिदानम्
३० स्त्रीश्राद्धे
३० कमंडल्वादिदानम्
३१ स्वर्णादिभोजनपात्रं
३१ वंदीग्रहस्थमोचनेफ·
३१ पित्र्यकांडेअर्चा
३१ अथार्घ्यदानम्
३२ अर्घ्येसव्यापसव्यं
३२ अर्घ्यपात्रस्थाप
नम्
३२ मंडलानिपात्राणिच
३२ भोजनेकांस्यपात्रमा·
३३ श्राद्धेकांस्यपात्रनिषे·
३३ श्राद्धेभोजनेपवित्रप·
३३ कदलीपत्रनिषेधः
३३ भस्ममर्यादा
३३ अग्नौकरणम्
३४ पाणिहोमश्राद्धेमहा·
३४ तीर्थश्राद्धेपाणिहो·
३४ विधुरस्यपाणिहोमः
३५ पाणिहोमेप्रश्नादि
३५ पित्र्यविप्रकरेहुतंस
र्वंपितृपात्रेषुनिक्षेपः
३५ आपस्तंबानामग्नौकः
३६ अथपरिवेषणम्
३६ नस्वयंभार्ययाकार्यं
३६ आयसपात्रनिषेधः
३६ पवित्रपत्राणि
३६ पंक्त्यांविषमान्नदा·
३६ भोजनपात्रेतिलपत्त
नंनिषिद्धम्
३६ हस्तेनस्नेहलवणा
दिनदेयं
३६ घृतपात्रस्थापनम्
३६ पात्रालंभनं
३६ अंगुष्ठनिवेशनं
३७ आपोशनम्
३७ श्राद्धान्नसंकल्पः
कर्तव्यः
३७ चित्राहुतिनिषेधः
३७ भोजनलवणादिन
पृच्छेत्
३७ अभिश्रवणम्
३७ भोक्तृनियमाः
३८ ब्राह्मणप्रार्थना
३८ ब्राह्मणपरस्परस्पर्शे
३८ विप्राणांगुदस्रावे
३८ विप्राणांवमने
३८ एवंविप्रोजपःपुनः
श्राद्धंच
३९ तृप्तिप्रश्नः
३९ पिंडदानात्प्राग्वमने
३९ विकिरम्
३९ उच्छिष्टपिंडः
३९ हस्तप्रक्षालनंगंडूषक
रणंकुत्रकर्तव्यं
४० अथपिंडदानं
४० पिंडदानंकुत्रकर्तव्यं
४० अष्टांगःपिंडः
४० पिंडेषुमाषावर्ज्याः
४० अथपिंडप्रमाणं
४० एकोद्दिष्टेपिंडप्रमाणं

४० सपिंडीकरणेपिंडप्र·
४० प्रत्यब्देपिंडप्रमाणं
४० मासिकेपिंडप्रमाणं
४० तीर्थेपिंडप्रमाणं
४० दर्शेपिंडप्रमाणम्
४० महालयेपिंडप्रमाणं
४० पत्न्यापिंडःकरणीयः
४१ पित्रादीनांनामगोत्राज्ञानेकथमूहःकार्यः
४१ मात्रादीनांपिंडदेशाः
४१ महालयश्राद्धेसर्वेषांपिंडादेयाः
४१ पश्चिमेदर्भलेपादि
४१ पिंडपूजनादि
४१ पिंडानांसर्वान्नस्थनैवे·
४२ उच्छिष्टपात्रचालनं
४२ उच्छिष्टपात्राणिकैर्निष्काशनीयानि
४२ पिंडप्रवाहनंकुत्रकार्यं
४२ पिंडविसर्जनं
४२ पिंडप्रतिपत्तिः
४३ पिंडोपघातेप्रायश्चि·
४३ पिंडनिषेधकालः
४३ महालयादौपिंडदानं
४३ क्षयाहेविशेषः
४३ उच्छिष्टोद्वासनम्
४४ श्राद्धदिनेवैश्वदेवादि
४४ अथनित्यश्राद्धम्
४४ नित्यकर्मरात्रौकार्यं
४४ पात्राभावे
४५ श्राद्धशेषभोजनं
तन्निषेधः
४५ विप्रस्यश्राद्धावशेषभोजननिषेधः
४५ कुत्रचिच्छ्राद्धावशेषभोजननिषेधः
४५ श्राद्धदिननियमाः
४५ शूद्रस्यश्राद्धान्नशेषंनदेयम्
४५ इतिपार्वणश्राद्धम्
४५ श्राद्धानुकल्पः
४५ विप्राभावेदर्भबटुः
४५ आमश्राद्धंद्विजानां
४५ शूद्रस्यामश्राद्धं
४६ आमंकियत्परिमितंदे·
४६ कुत्रचिदामश्राद्धानि
४६ आमश्राद्धेऊहःकथंकर्तव्यः
४६ आमश्राद्धेपिंडाःकथंकर्तव्याः
४६ आमश्राद्धेनिषिद्धप·
४६ आमश्राद्धेशूद्रैःकथंकर्तव्यम्
४६ आमश्राद्धेपूर्वाण्हेकथंकार्यम्
४६ एकोद्दिष्टंमध्यान्हेका·
४६ पार्वणमपराण्हे
४६ वृद्धिश्राद्धंप्रातः
४६ शूद्राणामपराण्हेकाः
४६ हेमश्राद्धम्
४६ हेमश्राद्धेकस्मिन्स्थलेकार्यम्
४७ हेमश्राद्धेपिंडाःकथंकार्याः
४७ हेमश्राद्धेपिंडनिषे·
४७ हेमश्राद्धेनिषिद्धप·
४७ शूद्रवेश्मनिभोजनादिनिषिद्धम्
४७ शूद्रगृहाद्ब्राह्मणगृहेआमंसमागतंचेच्छुचि
४७ पात्रांतर्गतंदुग्धंशुचि
४७ सांकल्पश्राद्धम्
४७ सांकल्पश्राद्धेकिंका·
४७ द्रव्याभावेद्विजाभावेनुकल्पः
४८ अथश्राद्धभोजनेप्रा·
४८ अथक्षयाहश्राद्धंतद्रूपंच

५९ अकरणेदोषमाह
५८ तत्रैकोद्दिष्टंपार्वणंच
५९ श्राद्धेदेशधर्मविशेष
५९ अमायांप्रेतपक्षेचेत्तत्स·
५९ संन्यासिनःकिंकार्यं
५९ संन्यासेमृतानांकदाश्रा·
५९ ज्येष्ठभ्रातुःकनिष्ठेनक
थंकार्यं
५९ ज्येष्ठेनकनिष्ठस्यकथं
५९ अपुत्रस्यपितृव्यस्यकिं
५९ पत्न्याःकर्तृत्वेप्राप्ते
५९ अपुत्राणांकिंकार्यं
५० एकोद्दिष्टंकेषांकार्यं
५० अथक्षयाहद्वैधेनि·
५० एकोद्दिष्टेतिथिनिर्ण·
५० पार्वणेतिथिनिर्ण·
५० आब्दिकेतिथिनिर्ण·
५१ मृताहातिक्रमेदोष
माह
५१ अपुत्राणांरात्रौकार्यं
५१ अधिकमासमासेश्रा·
द्धनिर्णयः
५१ एकदिनेदर्शश्राद्धक्ष
याहश्राद्धंचेन्निर्णयः
५१ वृषोत्सर्गकालः
५१ अथशुद्धिश्राद्धं
५१ प्रथमवर्षादारभ्यवर्ष
त्रयपर्यंतंश्राद्धभोज·
५२ क्षयाहाज्ञाने
५२ क्षयेदिनमासाज्ञाने
५२ श्राद्धविघ्नेनिर्णयः
५२ श्राद्धादिप्रारंभेनदो·
५२ श्राद्धभोजनसमये
दातुराशौचंचेत्
५२ दातृभोक्त्राशौचंचेत्
तत्रभोजनेप्रायश्चित्तं
५३ आशौचमध्येश्राद्धे
५३ अथभार्यारजोदर्श·
५४ अंतरितश्राद्धं
५४ अन्वारोहणनिर्णयः
५५ एकसमयेमृताःस्वामि
सेवकास्तुस्त्रीभिःस
हगमनंभर्तुराशौचम·
५५ स्त्रीगमनंचेदनुगमनं
५५ देशांतरेभर्तृमरणंस्त्रु·
त्वासहगमनंचेत्
५६ सुवासिनीभोजनं
५६ अथश्राद्धसंपातेनि·
५६ गृहदाहादिनायुगप·
न्मरणे
५६ एकस्मिन्दिनेश्राद्धत्र·
५६ अन्यदेवताभेदेअपवा·
५७ श्राद्धांगतर्पणं
५७ तिलतर्पणनिषेधका·
५७ पित्रोर्वार्षिकेनित्यतर्प
णेतिलनिषेधः
५७ श्राद्धदिनेपिनित्यतर्प
णंकार्यमत्यंजलिमंत्राः
५८ अथतर्पणनिषेधः
५८ अथवृद्धिश्राद्धं
६० अत्राधिकारिणः
६१ जीवत्पितृकस्यवृ
द्धिश्राद्धं
६१ द्वितीयविवाहेवृद्धि
श्राद्धंकेनकर्तव्यं
६२ वृद्धिश्राद्धेइतिकर्तव्य·
६२ वृद्धिश्राद्धेदर्भस्थानेदू·
६२ वृद्धिश्राद्धेविप्राभावे
६२ नांदीश्राद्धकरणेक्रमः
६२ वैश्वदेवःकदाकर्तव्यः
६३ जीवत्पितृकश्राद्धं
६४ जीवत्पितृकस्यगयायां
६४ जीवत्पितामहश्राद्धं
६५ विभक्ताविभक्तनिर्ण·
६५ अविभक्तानांवैश्वदे·
६६ विभक्तानांवर्षपर्यंतं
श्राद्धनिर्णयः
६६ अथतीर्थश्राद्धं

६६	विधवायाःपुत्राद्यनु	६८	यतीनांगयायांविशे	३	सदंतमृताशौचंदाहे		चक्रियाविधिः		पुत्रयोश्च		तिचेदाशौचं
६६	तीर्थयात्राविधिःकृथं			४	शूद्रबालाशौचं	५	चतुर्वर्णेषुदशाहादि	७	ऊढकन्याप्रसवमरणे	९	क्रियाकृर्तुदशाहादि
६७	यात्रामध्ये आशौचे	१	अथजननाशौचं	४	पितृवेश्मनिकन्याआ	६	महागुरवः		श्वशुरमातुलादीनां	९	युद्धे मृते आशौचं
६७	यात्रामध्येतीर्थांतरप्रा	१	स्रावाशौचं		नूढारजस्वलामृताचेत्	६	सपिंडलक्षणं		पितृमरणेकन्यानामा	९	शवस्पर्शे आशौचं
६७	वाणिज्यार्थंगतेसति	१	पाताशौचं	४	अथानुपनीते	६	सोदकलक्षणं	८	भ्रातृभगिन्योःकन्या	१०	दंष्ट्रिकाभिर्मृतश्चे
६७	मार्गेनदीप्राप्तौ	१	पूर्णाशौचं	५	त्र्यहाशौचेपिंडदानवि	६	गोत्रजलक्षणं		परस्परं	१०	निर्हाराद्याशौचम्
६७	प्रथमंतीर्थप्राप्तेप्रार्थना	१	जाताशौचेविप्रादीनां	५	नाम्नःपूर्वंखननं	६	दत्तक्रीतपुत्राणामा	८	मातामहादिमृतौ	१०	प्रेतालंकरणेकृते
६७	तीर्थप्राप्तोउपवाससुं		सूतिकायाविशेषः	५	गर्भपातेसति	६	व्यभिचारिणीमृतौ	८	स्वगृहेपरमृतौ	१०	अनाथप्रेतहरणे
६७	वर्षमध्येपुनस्तीर्थप्रा	१	कन्यापुत्रप्रसवेआशौ	५	शिशुलक्षणं	७	अनौरसेषुपुत्रेषु	८	बंधुत्रयमृतौ	१०	ब्रह्मचारिणोनिर्हे
६७	जीवत्पितृकस्यमुंड	२	प्रथमषष्ठदशमदिने	५	बाललक्षणं	७	पुनर्भूषुस्त्रीषु	९	जामातृमृतौ		रणे
६८	तीर्थप्राप्तोसूतकर्त्तव्य	२	अथमृताशौचम्	५	कुमारलक्षणं	७	दत्तस्यपूर्वपित्रोः	९	श्वशूद्रपतितद्विजगृ	१०	समोल्लंघ्यानुगमने
६८	तीर्थश्राद्धेअर्घ्यादिव	२	दशाहमध्येबालोमृत	५	पौगंडलक्षणं	७	दत्तकस्यसापिंड्यं	९	हेमृतौगृहशुद्धिः	१०	हीनवर्णस्यदाहादौ
६८	पिंडाःसक्त्वादिभिःका	३	अदंतमृताशौचंदाहे	५	बालानामनुपनीतानां	७	पूर्वापरभर्तृपत्न्योः	९	ग्राममध्येशवस्तिष्ठ	१०	रोदनेआशौचं

११ आशौचान्नभक्षणे
११ दासीदासाशौचम्
११ दास्याविशेषः
११ दासभेदाःपंचदश
११ राज्ञीजननमरणे
१२ अतिक्रांताशौचं
१२ देशांतरेअतिक्रांता॰
१२ दशदिनमध्येश्रुतं
१२ दशाहमध्येमासत्रय
१२ षण्मासमध्येश्रुतंचेत्
१२ नवमासमध्येश्रुतंचेत्तदूर्ध्वंश्रुतंचेत्
१२ जननेअतिक्रांताशौचंश्रुतंचेत्
१२ देशांतरलक्षणंचेत्
१२ मातापित्रोर्विशेषः
१२ स्त्रीपुत्रयोःपरस्परमाशौचं
१२ सापत्नमातुराशौचं
१२ आशौचसन्निपाते
१३ जननेजननाशौचम्
१३ मरणेमरणाशौचं
१३ जननाशौचेमरणाशौ
१३ मरणाशौचेजननाशौ॰
१३ स्वल्पाशौचमध्येदीर्घाशौचम्
१३ दीर्घाशौचमध्येस्वल्पाशौचम्
१३ जननाशौचस्यगुरुत्वं
१४ दशमेह्न्याशौचांतरपा॰
१४ पित्राशौचमध्येमात्राशौचम्
१४ मात्राशौचमध्येपित्राशौचम्
१५ अन्वारोहणेविशेषः
१५ भर्तुराशौचोत्तरमन्वारोहणे
१५ आशौचापवादःपुत्रजननादिप्राप्ते
१५ अथाशौचापवादः
१५ यत्यादीनामाशौचाभावः
१६ ब्रह्मचारिणामातापित्रोरौर्ध्वदैहिकंकार्यं
१६ संध्यादिलोपाभावश्च
१६ समावर्तनोत्तरंत्र्यहाशौचं
१६ आपद्गतस्यसूतकाभा॰
१७ आशौचेआकस्मिकतीर्थप्राप्तौ
१७ सूतकिनःपूजाधिका॰
१७ श्रौतकर्मणिविशेषः
१७ श्राद्धादौविशेषः
१८ गृह्याग्निहोमेआशौचेसंध्यादीनामपवादः
१८ आशौचेसतिग्रहणेश्रा॰
१८ भोजनेआशौचश्रवणे
१८ लवणादिद्रव्येआशौचाभावः
१८ सर्वेआमान्नेदोषाभा॰
१८ विवाहेसूतकंचेत्
१९ पुस्तकशुद्धिः
१९ आत्मघाते
१९ प्रमादमरणे
१९ चांडालादिभ्योमरणे
१९ पतितानांक्रियानास्ति
१९ आहिताग्नेर्विशेषमाह
१९ आहि॰ग्नेःप्रमादमरणे
२० सर्पहतेविशेषः
२० दुर्मरणेदानादि
२० वैधव्यमरणे
२० तीर्थमरणे
२१ अनशनविधिः
२१ पतितानांविशेषः
२२ आत्मघातप्रायश्चि॰
२२ नारायणबलिः
२३ पतितोदकविधिः
२३ नारायणबलिप्रयो॰

२३ उदकमृतानांविशेषः
२४ सर्पहतेनागपूजनं
२४ क्षुच्छिन्नमृतेविशे·
२४ संन्यासिमृतासंस्का·
२४ अपरोनारायणबलि
विधिः
२५ कृतजीवच्छ्राद्धेमृतेस
२५ कृतजीवच्छ्राद्धेजीव
२५ आहिताग्नेप्रोषितमृ·
२५ पालाशविधिरस्या
भावे
२५ पालाशविधिसामग्री
२५ प्रोषितस्यकालविचा
२५ प्रोषितसंस्कारेकालः
२६ प्रेतसंस्कारेकालः
२६ आशौचमध्येसंस्का
२६ अस्यापवादमाह
२६ निषिद्धकालेदाहेदा
नानिहृतौर्ध्वदेहिके
जीवन्नागच्छेत्
२६ अमृतस्यदाहादि
स्त्रीसहगमने
२७ सर्पसंस्कारविधिः
२७ नागबलिविधिः
२७ घटस्फोटविधिः
२७ पतितसंस्कारविधिः
२८ कृतघटस्फोटस्यापि
पुनःसंस्कारविधिः
२८ पतितानांचरितव्रता
नांप्रत्यकुद्धारः
२८ अन्त्यक्रियाविधिः
२८ तत्राधिकारिणः
२८ धर्मपुत्रः
२८ योऽग्निदःसदशाहपर्य·
२८ मोक्षधेनुदानमंत्रः
२८ ऋणधेनुदानमंत्रः
२८ पापधेनुदानमंत्रः
२८ मरणस्यपुण्यकालः
२९ वैतरणीधेनुः
२९ उत्क्रांतधेनुः
२९ दशदानानि
२९ तिलपात्रदानं
२९ मरणसमयेपुण्यसं·
श्रादिश्रवणं
२९ अष्टदानानि
२९ क्रियाकर्तुरधिकारस्था·
२९ मुमूर्षोर्मधुपर्कदानं
२९ दुर्मरणप्रायश्चित्तं
२९ अस्पृश्यस्पर्शनेप्रा·
२९ रात्रौप्रेतदाहनिर्ण·
२९ रात्रौवपननिषेधः
३० प्रेतस्यवपनक्रिया
३० आशौचांतेपुनर्वपनं
३० शय्यूषितेप्रेतेप्राय·
३० साग्नेर्विशेषः
३० प्रेताधानं
३० वर्षादिनाअग्निनाशे
पत्नीपरमरणे
३० प्रथमभार्याजीवत्यां
द्वितीयायांमृतायां
प्रेताग्नितद्दाहः
३० द्विपत्न्योर्मध्येप्रथममृ
तस्यवैताग्निभिर्दाहः
३० पश्चान्मृतस्यलौकि
काग्निनादाहः
३१ अपत्नीकस्याधानं
३१ विधुरस्याग्निस्तस्य
नाशः
३१ ब्रह्मचारीयत्योर्दाहेग्नि·
३१ उत्तपनाग्नेर्लक्षणं
३१ निषिद्धाग्निः
३१ साग्नेःपात्रन्यासादि
३१ शवनिर्हरणेदिङ्नय
३२ शवनिर्हरणप्रकारः
३२ शवसंस्कारविधिः
३२ शवेग्निदानमंत्रः
३२ शवस्यषट्पिंडदा
नसु·
३२ शवस्यस्नानाद्यलंका·

३२ नग्नःप्रेतोनदाह्यः
३२ अग्निनाशे
३२ पर्णशरदग्धेनदेहला·
३२ दंपत्योरेकदामृतौ
३३ उदकदानविधिः
३३ प्रातस्नानेविशेषः
३४ क्लीबादिभिर्नोदकंदे·
३४ आशौचेनियमाः
३४ प्रेतदाहानंतरंगृहंआगत्यकिंकर्तव्यं
३४ क्रीतलब्धमन्नंभक्ष·
३४ प्रत्यहंजातिभोजनंका·
३४ मृतकस्थानेप्रत्यहंबलि
र्भवेत्
३४ नग्नप्रच्छादनश्राद्धेदाना·
३४ अथप्रेतपिंडाः
३५ वर्णभेदेनपिंडदानसं·
३५ उत्तरीयशिलापात्रं
३५ कर्तृद्रव्यविपर्यये
३५ क्रियाकर्तुर्नाशे
३५ असंस्कृतानांपिंडःकुत्रदेयः
३५ येनकेनापिक्रियाकु·
३५ पुत्रादिभिःपुनःकु·
३५ पिंडःकेनद्रव्येणकु·
३६ दशपिंडैर्देहोत्पत्तिः
३६ दशादिनपर्यंतंपात्रद्वयेउदकंदेयं
३६ मृतस्थानेतैलदीपः
३६ ओदनपिंडोदेयः
३६ दशाहमध्येदर्शश्चेत्मातापित्रोस्तुविं·
३६ अथास्थिसंचयं
३६ वर्णपरमस्थिसंचयनं
३७ अस्थिसंचयनेश्राद्धत्रयम्
३७ चतुर्थदिनेश्मशानयागंतद्विधिश्च
३७ तीर्थेअस्थिक्षेपः
३७ परस्यास्थिनयनेदो·
३७ अस्थिक्षेपांगहेमश्रा·
३७ अथास्थिशुद्धिः
३८ अथनवश्राद्धं
३८ नवश्राद्धकरणेदोषः
३८ अत्रशाखाभेदाद्व्यव
३८ प्रेतश्राद्धेअष्टादशपदार्थावर्ज्याः
३९ प्रेतश्राद्धेअंनादि
३९ अन्वारोहणेविशेषः
३९ आशौचांत्यदिनेकृत्यं
३९ दशमदिने
३९ एकादशाहः
४० विप्रादीनामेतैःपदार्थैःशुद्धिः
४० आद्यश्राद्धमेकादशेन्हि
४० विघ्नेगौणकालः
४१ अग्नौएकोद्दिष्टंविप्राभा·
४१ अथवृषोत्सर्गः
४१ नीलवृषलक्षणं
४१ मृदादीनांवृषोत्सर्गः
४१ पतिपुत्रवत्यास्त्रियान·
४१ सूतकप्राप्तौइदंकर्मका·
४२ पददानंपदलक्षणं
४२ शय्यादानं
४२ ललाटास्थिभोजनेदो·
४२ उदकुंभदानं
४३ अन्नदानंदीपदानंच
४३ अथमासिकानि
४३ त्रिपुष्करलक्षणं
४४ षोडशश्राद्धानि
४४ ऊनमासिकानि
४४ एककालेषोडशश्राद्धा·
४४ ऊनमासिकानिच
४४ वृद्धिश्राद्धेसतिमासिकापकर्षः
४५ अथसपिंडीकरणं
४५ सपिंडीकरणंसाग्निकनिरग्निक·

४६ अंतरितसपिंडीकरणनक्षत्रं
४७ सपिंडीकरणेअष्टौकालाः
४७ सपिंडीकरणेज्येष्ठस्याधिकारः
४७ वर्षांतेसपिंडीकरणं
४७ पितरिदेशांतरेमृतेसतिकिंपुत्रैःकार्यं
४७ सपिंडीकरणेकनिष्ठस्याधिकारः
४७ पुनःसपिंडीकरणेवि
४८ व्युत्क्रमसमृतौसपिंडनेगोत्रादेः
४८ सपिंडनाधिकारः
४८ स्त्रीसपिंडनेविशेषः
४९ आसुरादिविवाहेसपिंडनं
४९ कोकिलमतानुसारि
५० अपुत्राणांसपिंडनंतद्विधिश्च
५० ब्रह्मचारिणामनपत्यानांस्त्रियासपिंडनंकार्यं
५० यतिमृतौपार्वणं
५० सपिंडीकरणविधिः
५० ततःपुण्याहवाचनंवृद्धिश्राद्धंच
५० पितृमृतौप्रथमाब्देनिषिद्धानि
५० दैवपित्र्यकर्मणिअशुचिःसंघातमरणे
५१ पितुरब्दमाशौचं
५१ मातुःषण्मासमाशौचम्
५१ भार्यायास्त्रैमासमाशौचं
५१ भ्रातृपुत्रयोःसार्द्धमासमाशौचं
५१ प्रथमाब्देगयाश्राद्धनिषेधः
५१ पंचकमृतेविधानं
५२ त्रिपादृक्षमरणे
५२ पंचरत्ननामानि
५२ त्रिपादृक्षाणि
५२ श्मशानाज्जीवन्पुनरागमने
५२ ब्रह्मचारिमृतौ
५३ कुष्ठिमृतौ
५३ कुष्ठिलक्षणान्यष्टौ
५३ अष्टौमहारोगाः
५३ रजस्वलामरणे
५३ सूतिकामृतौ
५३ गर्भिणीमृतौ
५४ अन्वारोहणे
५४ अन्वारोहणप्रयोगः
५४ वायनमंत्रश्च
५४ पंचरत्नानिमुखादिस्थाने
५४ ततोग्निप्रार्थना
५४ पृथक्चितिरोहणेनिषेधः
५४ पृथक्चितिःक्षत्रियस्त्रियाः
५४ पत्यौदेशांतरमृतेगमनविधिः
५४ अस्थिदाहेपलाशदाहेपृथक्चितिदोषः
५५ उदक्यान्वारोहणे
५५ चितिभ्रष्टायांप्रायश्चित्तम्
५५ अन्वारोहणेगर्भिण्यादीनांनिषेधः
५५ सहगमनेरजस्वलाशुद्धिः
५५ विधवाधर्माः
५५ विधवायास्तर्पणवि-
५५ वृषारोहणकंचुकीनि-

५६ अथसन्यासः
५६ ब्राह्मणस्याधिकारः
५६ सन्यासश्चतुर्धा
५६ कुटीचकःएकस्तल्लक्षणं
५६ बहूदकएकस्तल्लक्ष०
५६ एकस्त्रिदंडीतल्लक्ष·
५६ संन्यासविधिः
५६ तत्रादौप्रायश्चित्तवि·
५६ अष्टौश्राद्धानिनांदि·
५६ संन्यासग्रहणेफलं
५६ आतुरसंन्यासः
५६ आतुरसंन्यासप्रयोगः
५६ आतुरेअप्सुहोमः
५६ विरजाहोमंकर्तुमशक्तश्चेन्नहि
५६ इष्टदेवताहोमः
५६ समाधिसंस्कारादि
५७ संन्यासग्रहणेसामग्री
५७ पूर्वेषांदीक्षाश्राद्धंकार्यं
५७ साग्नेर्निरग्नेश्चसंन्या०
५७ नवश्राद्धषोडशश्राद्धसपिंडनानि
५७ संन्यासग्रहणसंक·
५७ ततोग्निसिद्धिः
५८ विरजाहोमादि
५८ अथयतिधर्माः
५९ अथभिक्षा
५९ यतिभिक्षादानेफ·
५९ यतीनांषट्कर्माणिनिषिद्धानि
५९ यतीनांषट्कर्माणि
पतनहेतवः
५९ अन्यानिषट्बंधकराणि
५९ यतिपात्राणि
५९ यतीनांनिषिद्धानि
५९ यतीनांपुत्रादिनिधनेआशौचाभावः
५९ अथयतिसंस्काराः
५९ कुटीचकस्यदहनं
५९ बहूदकंपूरयेत्
५९ हंसस्यजलेनिक्षेपः
५९ परमहंसंपूरयेत्
५९ पलाशमूलेनदीतीरेपूरणम्
५९ यथास्थानंदंडादिदानम्
५९ ततःप्रोक्षणस्नानं
५९ ततःशंखेनमस्तकभेदनं
५९ ततःलवणेनगर्तापूरणम्
५९ कुटीचकस्यदहनविधिः
५९ अस्थीनांतीर्थेनिक्षे·
५९ अस्थ्यस्तकंन
५९ एकादशेन्हिपार्वणं
६० द्वादशेन्हिनारायणबलिः
६० वर्षांतेपार्वणश्राद्धंकार्यम्

इतितृतीयपरिच्छेदस्यानुक्रमणिका
समाप्ता.

अथनिर्णयसिंधौप्रथमपरिच्छेदः प्रारभ्यते



श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः अविघ्नमस्तु कारुण्यैकनिकेतंरामंसीतालतायुक्तं विश्वामित्रान्ववायव्रततिसमालंबिशाखिनंवंदे १ लक्ष्मीसहायंकल्पद्रुतलरंजितगोकुलं बर्हापीडंघनश्यामंमहःकिंचिदुपास्महे २ वेदार्थधर्मरक्षार्थंयेमायामानुषरूपिणम् पितामहंहरिंवंदेभट्टनारायणाह्वयं यत्पादसंस्मृतिःसर्वमंगलप्रतिभूर्मता तान्भट्टरामकृष्णाख्यान्श्रीतातचरणान्नुमः ४ सर्वकल्याणसंदोहनिदानंयत्पदद्वयम् द्युनदीसोदरींबालामुमाख्यांनौमिसादरं ५ बिंदुमाधवपादाब्जरोलंबीकृतविग्रहं ज्यायांसंभ्रातरंभट्टदिवाकरमुपास्महे ६ हेमाद्रिमाधवमतंप्रविचार्यसम्यगालोच्यतत्वमथतीर्थकृतांपरेषाम् श्रीरामकृष्णतनयःकमलाकराख्यःकालंयथामतिविनिर्णयमातनोति ७ संतियद्यपिविद्वांसस्तन्निबंधाश्चकोटिशः तथाप्यसुष्ठुवैदग्धींकेचिद्विज्ञातुमीशते तत्रसंक्षेपतःकालःषोढा अब्दोयनमृतुर्मासःपक्षोदिवसइति तत्राब्दोमाधवमतेपंचधा सावनःसौरश्चांद्रोनाक्षत्रोबार्हस्पत्यइति गुरोर्मध्यमराशिभोगेनबार्हस्पत्यः सचज्योतिःशास्त्रेप्रसिद्धः हेमाद्रिस्त्वंत्ययोर्धर्मशास्त्रेऽनुपयोगात्तिस्रएवविधाआह तत्रवक्ष्यमाणैःसावनादिद्वादशमासैस्तत्तदब्दम् मलमासेतुषष्टिदिनात्मकएकोमासइतिद्वादशमासत्वमविरुद्धम् तथाचव्यासः षष्ट्यातुदिवसैर्मासःकथितोबादरायणैरिति तत्रचांद्रोब्दःषष्टिभेदः तदाहगार्ग्यः प्रभवोविभवःशुक्लःप्रमोदोथप्रजापतिः अंगिराश्रीमुखोभावोयुवाधातेश्वरस्तथा बहुधान्यःप्रमाथीचविक्रमोऽथवृषस्तथा चित्रभानुःसुभानुश्चतारणःपार्थिवोव्ययः सर्वजित्सर्वधारीचविरोधीविकृतिःखरः नंदनोविजयश्चैवजयोमन्मथदुर्मुखो हेमलंबोविलंबोथविकारीशार्वरीप्लवः शुभकृच्छोभनःक्रोधीविश्वावसुपराभवो प्लवंगःकीलकःसोम्यःसाधारणविरोधकृत् परिधावीप्रमादीचआनंदोराक्षसोनलः पिंग

लःकालयुक्तश्चसिद्धार्थीरौद्रदुर्मती दुंदुभीरुधिरोद्गारीरक्ताक्षीक्रोधनःक्षयइति यद्यपिज्योतिषेगुरोर्मध्यमराशिभोगेनप्रभवादीनां
माघादौप्रवृत्तिरुक्ता तथापिप्रभवादीनांचांद्रत्वमप्यस्ति चांद्राणांप्रभवादीनांपंचकेपंचकेयुगेइतिमाधवोक्तेः तेनचांद्रप्रभवादि-
श्चैत्रसितेप्रवर्तंते बार्हस्पत्यस्तुमाघादौ तयोर्विनियोगोज्योतिर्निबंधेब्रह्मसिद्धांते व्यावहारिकसंज्ञोऽयंकालःस्मृत्यादिकर्मसु यो
ज्यःसर्वत्रतत्रापिजैवोवानर्मदोत्तरे आर्ष्टिषेणः स्मरेत्सर्वत्रकर्मादौचांद्रसंवत्सरंसदा नान्यंयस्माद्वत्सरादौप्रवृत्तिस्तस्यकीर्तितेति अ
यनंतुसौरर्तुत्रयात्मकं सौरर्तुत्रितयंप्रदिष्टमयनमितिदीपिकोक्तेः तद्द्विविधम् दक्षिणमुत्तरंचेति कर्कसंक्रांतिर्दक्षिणायनं मकरेत्वयम्
अनयोर्विनियोगमाहमदनरत्नेसत्यव्रतः देवतारामवाप्यादिप्रतिष्ठोदङ्मुखेरवौ दक्षिणाशामुखेकुर्वन्नतत्फलमवाप्नुयात् वैखानसः
मातृभैरववाराहनरसिंहत्रिविक्रमाः महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायने वैशब्दोप्यर्थेनतुदक्षिणायनएवेतिनियमः पूर्ववच
नेदक्षिणायनेनिषिद्धायादेवप्रतिष्ठायादेवविषयेप्रतिप्रसवमात्रात् रत्नमालायाम् गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वम्
सौम्यायनेकर्मशुभंविधेयंयद्गर्हितंतत्खलुदक्षिणेचेति अस्यापवादः काशीखंडे सदाकृतयुगंचास्तुसदाचास्तूत्तरायणम् सदा
महोदयश्चास्तुकाश्यांनिवसतांसतां इत्ययनं ऋतुर्मासद्वयात्मा मलमासेतुमासद्वयात्मकएकोमासस्तेन मासद्वयात्मकत्व-
मविरुद्धम् सद्वेधाचांद्रःसौरश्च चैत्रारंभोवसंतादिश्चांद्रः मीनारंभोमेषारंभोवासौरः मीनमेषयोर्मेषवृषयोर्वावसंतइति बौधायनो
क्तेः अनयोर्विनियोगमाहत्रिकांडमंडनः श्रौतस्मार्तक्रियाःसर्वाःकुर्याच्चांद्रमसर्तुषु तदभावेतुसौरर्तुष्विति ज्योतिर्विदांमतम् सद्विवि
धोपिषोढा वसंतोग्रीष्मोवर्षाःशरद्धेमंतःशिशिरः इत्यृतुः मासश्चतुर्धा सावनःसौरश्चांद्रोनाक्षत्रइति त्रिंशद्दिनःसावनः अर्कसंक्रां

तेः संक्रांत्यवधिः सौरः यद्यपिहेमाद्रिमाधवकालादर्शाद्यालोचनेनमेषसंक्रांत्यासमामासामावास्यकत्वंचैत्रत्वमितिलक्षणात्त्वमेषसंक्रांतेश्चैत्रत्वंप्रतीयते तथापिमेषसंक्रमेदर्शद्वयेसतिवैशाखस्यैवाधिक्यात्तत्पूर्वभावित्वेनमीनस्यैवचैत्रत्वं युक्तं एवंमेषादयोवैशाखाः अतोमीनसंक्रांत्यामध्यस्यपौर्णमासिकत्वम् आद्यतिथिकत्वंवाचैत्रत्वमितिलक्षणात् मीनएवसौरश्चैत्रः एवंवैशाखादयोपिमेषाद्याज्ञेयाः सौरमासप्रसंगात्संक्रांतिनिर्णयउच्यते तत्रपूर्वतोपिपरतोपिसंक्रमात्पुण्यकालघटिकास्तुषोडशेतिसामान्यतःपुण्यकालः सर्वसंक्रः विशेषस्तूच्यते अत्रमासकाः संग्रहश्लोकाः प्रागूर्ध्वोदशपूर्वतःषडवनिस्तद्वत्पराःपूर्वतस्त्रिंशत्षोडशपूर्वतोथपरतःपूर्वाःपरास्तुदश पूर्वाःषोडशचोत्तराऋतुभुवःपश्चात्खवेदाःपुनःपूर्वाःषोडशचोत्तराःपुनरथोपुण्यास्तुमेषादितः अस्यार्थः मेषेप्रागूर्ध्वंचदशघटिकाःपुण्यकालः वृषेपूर्वाःषोडश मिथुनेपराःषोडश कर्केपूर्वास्त्रिंशत् सिंहेपूर्वाःषोडश कन्यायांपराःषोडश तुलायांप्रागूर्ध्वोदश वृश्चिकेपूर्वाःषोडश धनुषिपराःषोडश मकरेचत्वारिंशत्पराः इदंचहेमाद्रिमतेनोक्तम् माधवमतेत्वत्रपराविंशतिःपुण्याः कुंभेपूर्वाःषोडश मीनेपराःषोडशेति याप्युत्तरापुण्यतमामयोक्तासायंभवेत्सायदिसापिपूर्वा पूर्वातुयोक्तायदिसाविभातेसाप्युत्तरारात्रिनिषेधतःस्यात् अर्वाङ्निशीथाद्यदिसंक्रमःस्यात्पूर्वेन्हिपुण्यंपरतःपरेन्हि आसन्नयामद्वयमेवपुण्यंनिशीथमध्येतुदिनद्वयंस्यात् कर्केझषेप्येवमितिस्मुवाचहेमाद्रिस्तुरिस्थतयापरार्कः झषःप्रदोषेयदिवार्धरात्रेपरेन्हिपुण्यंत्वथकर्कटश्चेत् प्रभातकालेयदिवानिशीथेपूर्वेन्हिपुण्यंत्वितिमाधवार्यः

अत्रमूलवचनानिमाधवापरार्कहेमाद्र्यादिषुद्रष्टव्यानि सर्वासुसंक्रांतिषुदानविशेषोहेमाद्रौदानकांडउक्तः विश्वामित्रः मेषसंक्रमणेभानोर्मेषदानंमहाफलं वृषसंक्रमणेदानंगवांप्रोक्तंतथैवच वस्त्रान्नपानदानानिमिथुनेविहितानितु घृतधेनुप्रदानंचकर्कटेपिविशिष्यते

सस्फवर्णंछत्रदानंसिंहेपिविहितंसदा कन्याप्रवेशेवस्त्राणांवेश्मनांदानमेवच तुलाप्रवेशेतिलानांगोरसानामपीष्टदं अन्नकीचलितेभानौदीपदानंमहाफलं अन्नकीवृश्चिकः धनुःप्रवेशेवस्त्राणांयानानांचमहाफलं झषप्रवेशेदारूणांदानमग्नेस्तथैवच कुंभप्रवेशेदानंतुगवांबुतृणस्यच मीनप्रवेशेस्थानानांमालानामपिचोत्तममिति अत्रोपवासमाहहेमाद्रावापस्तंबः अयनेविषुवेचैवत्रिरात्रोपोषितोनरः स्नात्वायस्त्वर्चयेद्भानुंसर्वकामफलंलभेत् अशक्तौतुवृद्धवसिष्ठः अयनेसंक्रमेचैवग्रहणेचंद्रसूर्ययोः अहोरात्रोषितःस्नात्वासर्वपापैःप्रमुच्यते अत्रोपवासःसंक्रमदिने दानादितुपुण्यकालदिनइत्याचार्यचूडामणिः विधिलाघवात्पुण्यकालदिनएवाभ्यर्थमिति वृद्धाः इदंचपुत्रिगृहस्थातिरिक्तविषयं आदित्येहनिसंक्रांतौग्रहणेचंद्रसूर्ययोः उपवासोनकर्तव्यःपुत्रिणागृहिणातथेति जैमिनिवचनात् अत्रश्राद्धमुक्तंहेमाद्रौविष्णुधर्मे श्राद्धंसंक्रमणेभानोःप्रशस्तंपृथिवीपते अपरार्केपिविष्णुः आदित्यसंक्रमणंविशेषेणायनद्वयंजन्मभमभ्युदयश्च एतांस्तुश्राद्धकालान्वैकाम्यानाहप्रजापतिरिति द्वादशादिदिनैर्वागयनांशप्रवृत्तावपिपुण्यंवक्तुमयनग्रहणम् अन्यथासंक्रमेणसिद्धेरयनग्रहणंव्यर्थंस्यादित्यपरार्कः हेमाद्रावपिगालवः अयनांशकतुल्येनकालेनैवस्फुटंभवेत् मृगकर्कादिगेसूर्येयाम्योदगयनेसति तदासंक्रांतिकालेस्युरुक्ताविष्णुपदादयइति अयनांशच्युतिरूपेसंक्रांतिकालेपिविष्णुपदादयःप्रवर्तंते तेनतत्प्रयुक्तंपुण्यकालादितत्रापिज्ञेयमितिसएवव्याचख्यौ तच्चमेषायनंवृषायनमित्यादिसर्वत्रज्ञेयं माधवीयेपिजाबालिः संक्रांतिषुयथाकालस्तद्वीयेप्ययनेतथा अयनेविंशतिःपूर्वामकरेविंशतिःपरेति मकरायणेपूर्वाः विंशतिघटिकाःपुण्याः मकरसंक्रांतौतुपश्चाद्विंशतिःपुण्याः अन्यत्रायनेतत्संक्रांतिवदित्यर्थः विष्णुपदादिस्वरूपंचदीपिकायामुक्तम् हर्यंघ्रिर्वृषसिंह

वृश्चिकघटेष्वर्कस्य यः संक्रमः कन्यामीनधनुर्नृयुक्षु षडशीत्याख्यं तुलामेषयोः प्रोक्तं तद्विषुवं झषेयनमुदक् कर्कटके दक्षिणमिति हर्यंगालिर्विष्णुपदम् नृयुक् मिथुनं अत्र च पिंडरहितं श्राद्धं कुर्यात् तथा चापरार्के मात्स्ये अयनद्वितये श्राद्धं विषुवद्वितये तथा संक्रान्तिषु च सर्वासु पिंडनिर्वपणादृते इति श्राद्धं शूलपाणिस्त्वस्य निर्मूलत्वात् समूलत्वेपि ततः प्रभृति संक्रान्तावुपरागादिपर्वसु त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टमृताहनीति मात्स्योक्ते ग्रहणाग्रहणवद्विकल्प एवेत्याह तन्न अस्य पार्वणानुवादकत्वेन पिंडविधायकत्वात् पिंडो व्यक्तिः अन्यथैकपदे पिंडानुवादे त्रित्वविधौ च षद्कृतुः प्रथमभक्षवद्वैरूप्यापत्तेः तथा चोभयसमूलत्वे पिंडरहितं पार्वणं कर्तव्यमित्युभयवचनयोरर्थः त्रिपिंडशब्देनैकोद्दिष्टव्यावर्तनमात्रं संगच्छत्येषु विशेषमाह ज्योतिर्निबंधे नारदः त्याज्याः सूर्यस्य संक्रान्तेः पूर्वतः परतस्तथा विवाहादिषु कार्येषु नाड्यः षोडश षोडशेति एतत् पुण्यकालोपलक्षणं भानोः संक्रान्तिभागश्च कुलिकश्चार्धयामक इति ज्योतिःप्रकाशवर्ज्येषु परिगणनात् अयनव्यतिरिक्तासु दशसु संक्रान्तिषु रात्रौ स्नानश्राद्धादि न कार्यं अन्हि संक्रमणे कृत्स्नमहः पुण्यं प्रकीर्तितं रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः अर्धरात्रादधस्तस्मिन् मध्यान्हस्योपरि क्रिया ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात् प्रहरद्वयं पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति वृद्धवसिष्ठादिवचनैरहः पुण्यत्वोक्त्या रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियां पूर्वस्मात् परतो वापि प्रत्यासन्नस्य तत्फलमिति वसिष्ठवचनाच्चार्धरात्रौ स्नानादिनिषेधप्रतीतेः यानि तु विवाहव्रतसंक्रान्तिप्रतिष्ठाऋतुजन्मसु तथोपरागपातादौ स्नाने दाने निशा शुभेति राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु चेत्यादीनि विष्णुगोभिलादिवचनानि तानि मकरकर्कसंक्रान्तिविषयाणि मुक्त्वा मकरकर्कटाविति तयोर्दिवानुष्ठान-

स्यपर्युदस्तत्वादितिहेमाद्रिमाधवादयः वस्तुतस्तुप्रागुक्तवचनेनतयोर्दिनद्वयपुण्यत्वादेरेवपर्युदासान्मकरकर्कटयोरपिस्नानंदानंपरेहनीत्यादिभिरहःपुण्यत्वोक्तेः अहःपुण्यत्वानुपपत्त्याकल्प्यरात्रिनिषेधस्यचप्रत्यक्षरात्रिविधिनाबाधात्सर्वसंक्रांतिषुरात्रावनुष्ठानविकल्पः सचदेशाचाराद्व्यवतिष्ठतइतियुक्तःपंथाः अयनयोस्तुवक्तव्योविशेषः श्रावणमाघेचवक्ष्यते ज्योतिर्निबंधे गर्गः यस्यजन्मर्क्षमासाद्येरविसंक्रमणंभवेत् तन्मासाभ्यंतरेतस्यवैरक्लेशधनक्षयाः तगरसरोरुहपत्रैरजनीसिद्धार्थलोध्रसंयुक्तैः स्नानंजन्मर्क्षगतेरविसंक्रमणेनृपाशुभदं हेमाद्रौ अह्निचेद्रात्रियुग्मस्याद्रात्रौचेद्वासरद्वयं संक्रांतिःपक्षिणीज्ञेयादानाध्ययनकर्मसु यत्तुगौडाः संक्रांत्यापक्षयोरंतेद्वादश्यांश्राद्धवासरे सायंसंध्यांनकुर्वीतकुर्वंश्चपितृहाभवेदिति कर्मोपदेशिन्यांव्यासोक्तेः सायंपुण्यकालेसंध्यानिषेधमाहुस्तन्निर्मूलं अन्यच्चबहुवक्तव्यंविस्तरभीतेर्नोच्यते इतिसंक्रांतिनिर्णयः पक्षयुगजश्चांद्रोमासः सद्वेधा शुक्लादिरमांतः कृष्णादिः पूर्णिमांतश्चेति तथाचत्रिकांडमंडनः चांद्रोपिशुक्लपक्षादिः कृष्णादिर्वेतिचद्विधेत्युक्त्वादेशभेदेनव्यवस्थामाह कृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचन येपीच्छंतिनतेषामपीष्टोविंध्यस्यदक्षिणेइति विंध्यस्यदक्षिणेकृष्णादिनिषेधादुत्तरतोद्वयोरप्यनुज्ञागम्यते तत्रापिशुक्लादिर्मुख्यः कृष्णादिर्गौणः शास्त्रेषुचैत्रशुक्लप्रतिपद्येवचांद्रसंवत्सरारंभोक्तेः तदुक्तंदीपिकायां चांद्रोब्दोमधुशुक्लगप्रतिपदारंभइति नहियेकृष्णादिमन्यंतेतेषांवत्सरारंभोभिद्यते अतःशुक्लादिर्मुख्यः कृष्णादिनामलमासासंभवाच्च चांद्रस्यसर्वनक्षत्रभोगेननाक्षत्रोमासः सावनादीनांव्यवस्थोक्ताहेमाद्रौब्रह्मसिद्धांते अमावास्यापरिच्छिन्नोमासःस्याद्ब्राह्मणस्यतु संक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्ययोः अत्रब्राह्मणादीनांयत्रकर्मविशेषवचनांतरेणवसंतेब्राह्मणोग्नीनादधीतेत्यादिवन्मासउक्तस्तत्रदर्शांतत्वा

मात्रंनियम्यते नतुसर्वकर्मसुदर्शंतिएवेति वृत्याद्यर्थंसौभरे हीषादिनिधननियमवाङ्घिलाघवात् त्रैवर्णिकानांसर्वकर्मसुमासविशेषविधेःसा
वनादीनांशूद्रानुलोमादिपरत्वापत्तेश्चेतिगुरुचरणाः ज्योतिर्गर्गः सौरोमासोविवाहादौयज्ञादौसावनःस्मृतः आब्दिकेपितृकार्येचचांद्रोमा
सःप्रशस्यते ऋष्यशृंगः विवाहव्रतयज्ञेषुसौरंमानंप्रशस्यते पार्वणेत्वष्टकाश्राद्धेचांद्रमिष्टंतथाब्दिके स्मृत्यंतरे एकोद्दिष्टविवाहादौ
ऋणादौसौरसावनौ ज्योतिर्गर्गः आयुर्दायविभागश्चप्रायश्चित्तक्रियातथा सावनेनैवकर्तव्याशत्रूणांचाप्युपासना विष्णुधर्मे नक्षत्रस-
त्राध्ययनानिचांद्रेर्मासेनकुर्याद्गणात्मकेनेति ब्राह्मे तिथिकृत्येचकृष्णादिंव्रतेशुक्लादिमेवच विवाहादौचसौरादिंमासंकृत्येविनिर्दि
शेत् अथमलमासः तत्रैकमात्रसंक्रांतिरहितः सितादिश्चांद्रोमासोमलमासः एकमात्रसंक्रांतिराहित्यमसंक्रांतत्वेनसंक्रांतिद्वयव
त्वेनचभवतीतिमलमासोद्वेधा अधिमासःक्षयमासश्चेति तदुक्तंकाठकगृह्ये यस्मिन्मासेनसंक्रांतिःसंक्रांतिद्वयमेववा मलमासः
सविज्ञेयोमासःस्यात्तुत्रयोदशइति सत्यव्रतोपि राशिद्वयंयत्रमासेसंक्रमतेदिवाकरः नाधिमासोभवेदेषमलमासस्तुकेवलमिति
अधिकमासस्यकालनियममाहवसिष्ठः द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा घटिकानांचतुष्केणपतत्यधिकमासकइति एत
च्चसावनादिमानेनसंभवार्थंनतुनियमार्थम् अन्यथाषोडशदिनाधिकद्वात्रिंशन्मासानंतरंकृष्णपक्षनियमेनशुक्लादित्वभंगापत्तेः
तेनन्यूनाधिककालेमलमासपातेपिनदोषः अतएवोक्तंमाधवीये मासेत्रिंशत्तमेभवेदिति क्षयस्यापिज्योतिःशास्त्रे असंक्रांतिमा
सोधिमासःस्फुटंस्याद्द्विसंक्रांतिमासःक्षयाख्यःकदाचित् क्षयःकार्तिकादित्रयेनान्यतःस्यात्तदावर्षमध्येधिमासद्वयंच एकःक्षयात्पूर्वप
तश्चैकइत्यधिमासद्वयंभवेतीत्यर्थः अत्रविशेषमाहजाबालिः मासद्वयेब्दमध्येतुसंक्रांतिर्नयदाभवेत् प्राकृतस्तत्रपूर्वःस्यादधिमासस्तथोत्तरइति

उत्तरएवकालाधिक्यंनपूर्वस्मिन्नित्यर्थः यत्तुब्रह्मसिद्धांते चैत्रादर्वाङ्नाधिमासःपरतस्त्वधिकोभवेदिति तन्नचैत्रात्पूर्वंअसंक्रांतत्वे-
पूर्वोनाधिकः किंतुपरइत्यर्थः यच्चज्योतिःसिद्धांते घटकन्यागतेसूर्येवृश्चिकेवाथधन्विनि मकरेवाथकुंभेवानाधिमासोविधीयतेइ-
ति तद्वृश्चिकादिचतुष्टयेमलमासेसतिपूर्वम् तुलाकन्यागतेसूर्येक्षयात्पूर्वकालाधिक्यनिषेधार्थंनत्वधिकमात्रस्य दशाना फाल्गुना-
दीनांमाघोमाघस्यच क्वचित् नपुंसकत्वंभवतीत्येषशास्त्रविनिश्चयइतिहेमाद्रौविष्णुधर्मविरोधात् मलमासेष्टकादिनिषेधानुपपत्तेश्च
मकरेवाथकुंभेवेतिदृष्टांतार्थप्राप्त्यभावाच्च क्षयस्यागमनकालउक्तः सिद्धांतशिरोमणौ गतोब्ध्यद्रिनंदैर्मितेशाककालेतिथीशैर्भविष्यत्य-
ङ्गाक्षसूर्यैः गजाद्र्यग्निभूभिस्तथाप्रायशोयंकुवेदेंदुवर्षैःक्वचिद्गोकुभिश्चेति अब्धयश्चत्वारः अद्रयःसप्त नंदाःनव एषांप्रातिलोम्येनग-
ते ९७४ तैर्मितेवर्षेकश्चित्क्षयमासः पूर्वंजातइत्यर्थः तिथयः पंचदश १५ ईशाएकादश ११ १५ एवंमितेयातेकश्चिद्भविष्यतीत्यर्थः अं-
गा ६ क्ष ५ सूर्याः १२ एकत्र १२ ५६ गजाः ८ अद्रयः ७ अग्नयः ३ भूः १ एकत्र १३७८ कुः १ वेदाः ४ इंदुः १ एकत्र १४१ गावः ९ कुः १
एकत्र १९ एतैर्मितेवर्षेयातेकश्चिद्भविष्यतीत्यर्थः अथमलमासेकार्याकार्यंनिरूप्यते तत्रजाबालिः नित्यनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लु-
चे तिथिनक्षत्रवारोक्तंकाम्यंनैवकदाचन अयंचकाम्यनिषेधः आरंभसमाप्तिविषयः असूर्यानामयेमासानतेषुममसंमतः व्रतानांचैवय-
ज्ञानामारंभश्चसमापनमितितेनैवोक्तत्वात् असूर्याअधिकमासाइत्यर्थः तत्रमंडलंतपतेरविरितिवचनात् कारीर्यादेःकाम्यस्यत्वारंभस-
मासीभवतएवेत्यादिरत्यन्यत्रविस्तरः काठकगृह्येपि मलेऽनन्यगतिंकुर्यान्नित्यांनैमित्तिकींक्रियामिति तानिनैमित्तिकानिदीपिकायामु-
क्तानि यन्नैमित्तिकमग्निनश्यनुगताग्न्याधानमर्वाक्स्ववासंस्कारादिविलोपनेसतिपुनःप्रोक्तंप्रतिष्ठादिकमितिगत्यंतरसुतंतुसोमादिहेयमेव ५

तत्रकर्तव्यान्युक्तानिकालादर्शे द्वादशाहसपिंडांतंकर्मग्रहणजन्मनोः सीमांतेपुंसवेश्राद्धंद्वावेतौजातकर्मच रोगेशांतिरलभ्येचयोगेश्राद्धंव्रतानिच प्रायश्चित्तनिमित्तस्यवशात्पूर्वंपरत्रच अब्दोदकुंभमन्वादिमहालययुगादिषु श्राद्धंदर्शेप्यहरहःश्राद्धमूनादिमासिकं मलिम्लुचान्यमासेषुमृतानांश्राद्धमाब्दिकं श्राद्धंतुपूर्वदृष्टेषुतीर्थेष्वेवयुगादिषु मन्वादिषुचयद्दानंदानंदैनंदिनंचयत् तिलगोभूहिरण्यानांसंध्योपासनयोःक्रिया पर्वहोमश्चाग्रयणंसाग्नेरिष्टिश्चपर्वणि नित्याग्निहोत्रहोमश्चदेवतातिथिपूजनं स्नानंचस्नानविधिनाप्यभक्ष्यापेयवर्जनं तर्पणंवानिमित्तस्यनित्यत्वादुभयत्रचेति एतौपुंसवनसीमंतौ एतच्चगर्भाधानाद्यन्नप्राशनांतसंस्कारोपलक्षणंतदुक्तंदीपिकायां गर्भाधानसुरवंचचौलविधितःप्राग्जातयागंविनाक्लृप्तेष्वाग्रयणंगजेंदुपुरतश्छायामघानंगयोः तीर्थेंदुक्षययोश्चापित्र्यमधिकेमास्येवमाद्यान्चरेदिति अलभ्ययोगेर्धोदयपद्मकादौकाम्यान्यपिव्रतादीनिकार्याणीत्यर्थः पूर्वंपरत्रमलेशुद्धेचेत्यर्थः महालयशब्देनमघात्रयोदश्युच्यतइतिमाधवः दर्शश्राद्धंमलेपिकार्यं यत्तुकृष्णशृंगः संवत्सरातिरेकेणमासोयःस्यान्मलिम्लुचः तस्मिंस्त्रयोदशेश्राद्धंनकुर्यादिंदुसंक्षयइति तत्काम्यदर्शश्राद्धविषयं काम्यंनैवकदाचनेतिवचनात् दर्शेचकाम्यश्राद्धंकन्याकन्यावेदिनश्चेत्यादिनायाज्ञवल्क्येनोक्तं नित्यंतुमलेपिभवत्येव दर्शेप्यहरहःश्राद्धदानंचप्रतिवासरं गोभूतिलहिरण्यानांमासेपिस्यान्मलिम्लुचेइतिमात्स्योक्तेरितिहेमाद्र्यादयः दिवोदासीयेपि अनिंदुर्यदृपूर्णाचहरिवारेबुधाष्टमी नाधिमासेपरित्याज्याःसीमंतान्नाशनेशिशोरिति अनिंदुर्दर्शः द्विविधमप्यमाश्राद्धंनकार्यमित्यपरार्कः अत्रयदाहितकर्मउत्तरमासिकारयेदित्युक्तेः षष्ठ्यातुदिवसैर्मासैरितिशुद्धमासकरणेपिशास्त्रार्थोपपत्तेर्दर्शश्राद्धंमलेनकार्यमितिप्राचीनगौडाः शूलपाणिश्चसंवत्सरप्रदीपेपि एकराशिस्थितेसूर्येयदादर्शद्वयंभवेत् दर्शश्राद्धंतदादौस्यान्नपरत्रमलिम्लुचे अत्रापिप्राग्वद्व्यवस्था य

द्यापिकालादर्शे सर्ववार्षिकंमासद्वयेकार्यमित्युक्तं तथापिहेमाद्रिमाधवापरार्कादिमतात्प्रथमाब्दिकंत्रयोदशेमलमासेद्वितीयाद्याब्दिकंतुशु
द्धमासएवकार्यं असंक्रांतेपिकर्तव्यमाब्दिकंप्रथमंद्विजैः तथैवमासिकंश्राद्धंसपिंडीकरणंतथेतिहारीतोक्तेः आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलि
म्लुचे चतुर्दशेतुसंप्राप्तेकुर्वीतपुनराब्दिकमितिस्मृत्यंतरोक्तेश्च पुनराब्दिकंद्वितीयादिवार्षिकंत्रयोदशेमासेऽतीतेचतुर्दशाद्यदिनेकुर्यादि
त्यर्थः यत्तुसत्यव्रतः वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि मलमासेनतत्कार्यंव्याघ्रस्यवचनंयथेतितद्द्वितीयादिवार्षिकविषयं आब्दि-
कंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचेइतिपूर्वोक्तवचनात् यत्रद्वादशमासिकंशुद्धमासेभवतितत्रत्रयोदशोधिकएवाद्याब्दिककार्यं यत्र
त्वधिकमध्येद्वादशमासिकंतत्रतस्याद्विरावृत्तिंकृत्वाचतुर्दशेशुद्धएवप्रथमाब्दिकमितिनिष्कर्षः तेनद्वितीयादिशुद्धमासएव पृथ्वीचंद्रोदयेदि
वोदासीयेमदनपारिजातेचैवं मलमासमृतानांतुयदासएवाधिकःस्यात्तदातत्रैवकार्यं यथापैठीनसिः मलमासेमृतानांतुश्राद्धंयत्प्रतिव
त्सरं मलमासेपिकर्तव्यंनान्येषांतुकथंचनेति हेमाद्रौव्यासोपि मलमासमृतानांतुसौरंमानंसमाश्रयेत् सएवदिवसस्तस्यश्राद्धपिंडोद
कादिषु अत्राधिकमृतस्यनद्वितीयाद्यब्देपिसौरविधिः द्वितीयादावन्याधिकेयापूर्वनियमविधिवैरूप्यात् किंतुप्रथमाब्दिकस्यमले
नियमात् सत्यव्रतेनतद्भिन्नस्यसर्वस्याधिकेप्रतिप्रसवमात्रंलाघवात् अतोनद्वितीयादौसौरमासप्रसंगः चांद्रमिष्टंतथाब्दिकेमासपक्ष
तिथिस्मृतेइत्यादिविरोधाच्च यत्तुवृद्धवसिष्ठः श्राद्धीयाहनिसंप्राप्तेअधिमासोभवेद्यदि मासद्वयेपिकुर्वीतश्राद्धमेवंनमुह्यति यच्चव्यासः
उत्तरेदेवकार्याणिपितृकार्याणिचोभयोरितितन्मासिकादिविषयं योगादिकंमासिकंचश्राद्धंचापरपक्षिकं मन्वादिकंतैर्थिकंचकुर्या-
न्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः तैर्थिकंतीर्थश्राद्धं तच्चमासद्वयेपिकार्यमितित्रिस्थलीसेतौभट्टाः केचित्तुप्रतिमासंमृताहेच्छ्राद्धंय

त्प्रतिवत्सरं मन्वादौचयुगादौचतन्मासोरुभयोरपीतिमरीचिवचनात् वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि मासद्वयेपितत्कुर्याद्व्याघ्र
स्यवचनंयथेतिगालवोक्तेश्च प्रत्याब्दिकंमासद्वयेकार्यमित्याहुः तत्तुच्छं प्रतिमासंमृताहेक्रियमाणंमासिकं प्रतिसंवत्सरंक्रियमाणंकल्पा
दिश्राद्धमितिमरीचिवचसोमदनरत्नेनव्याख्यानात् गालवीयस्यचमासद्वयात्मकेक्षयमासइतिमाधवेनव्याख्यानात् यच्चकेश्चिदुक्तम्
प्रथमाब्दिकंमासद्वयेकार्यं आब्दिकंप्रथमंयस्यात्तत्कुर्वीतमलिम्लुचे त्रयोदशेचसंप्राप्तेकुर्वीतपुनराब्दिकमिति यमोक्तेरितितदपिचिंत्यं
पुनराब्दिकंद्वितीयादिवार्षिकंत्रयोदशोऽतीतेचतुर्दशेकुर्यात् अन्यथा सांवत्सरंनवर्धेतश्राद्धंतत्रमृतेहनीतिपैठीनसिविरोधःस्यादिति हेमा
द्रौपृथ्वीचंद्रोदयेच एतेननवर्धेतनछिंद्याच्छ्राद्धेपिकुर्यादेवेत्यनंतभट्टव्याख्यामानाभावात् परास्ता पूर्वव्याख्यायांतुहारीतीयेप्रथमग्रह
णमवमानंयदपिनिर्णयामृतेपूर्वोक्तकालादर्शवचनात् मलमासेश्राद्धदिनस्यबंध्यत्वनिरासार्थंपित्रुद्देशेनब्राह्मणान्भोजयित्वाशुद्धमासेसपिंडकंश्राद्धंकुर्यात् पिंडवर्जमसंक्रांतेसंक्रांतोपिंडसंयुतं प्रतिसंवत्सरश्राद्धमेवंमासद्वयेपिचेतिवृद्धपराशरोक्तेरिति तदपि
चिंत्यम् पूर्वोक्तवचनस्यक्षयपूर्वभाव्यधिकमासविषयत्वात् तत्रहिमासद्वयेश्राद्धमुक्तं तदाहसत्यतपाः एकएवयदामासःसंक्रांतिद्व
यसंयुतः मासद्वयगतंश्राद्धंमलमासेपिशस्यतइति मासद्वयगतंपूर्वासंक्रांतिगतंक्षयगतंच मलमासेक्षयमासे अपिशब्दात्पूर्वाधिमा
सेचेतिहेमाद्रिः दीपिकायामपि तत्प्राक्संगत्यधिमासकोयदिभवेत्तत्रत्यसांवत्सरंतस्मिन्नच्छुद्धतयाक्षयेचवचनात्कुर्याद्द्वयोःकोविदइति
कालादर्शेप्येतद्विषयएवेत्यलंबहुना मलमासेवर्ज्यान्युक्तानिकालादर्शे अनित्यमनिमित्तंचदानंचमहदादिकं अग्न्याधानाध्वरापूर्वतीर्थया
त्रामरेक्षणं देवारामतडागादिप्रतिष्ठामौंजिबंधनं आश्रमस्वीकृतिःकाम्यवृषोत्सर्गश्चनिष्क्रमः राजाभिषेकःप्रथमश्चूडाकर्मव्रतानिच अन्न

प्राशनमारंभोगृहाणांचप्रवेशनं स्नानंविवाहोनामातिपन्नंदेवमहोत्सवः व्रतारंभसमाप्तीचाकाम्यंकाम्यंचपाप्मनाम् प्रायश्चित्तंतुसर्वस्यमलमासेविवर्जयेत् उपाकर्मोत्सर्जनंचपवित्रदमनार्पणम् अवरोहश्चहेमंतःसर्पाणांबलिरष्टकाः ईशानस्यबलिर्विष्णोःशयनंपरिवर्तनं दुर्गेंद्रस्थापनोत्थानेध्वजोत्थानंचवज्रिणः पूर्वत्रप्रतिषिद्धानिपरत्रान्यच्चदैविकमिति अत्रमूलवचनानिहेमाद्रिमाधवादिष्वोज्ञेयानि दिवोदासीयेपि यात्रोत्सवंचदेवादिशपथादिव्यमेवच मलमासेनकुर्वीतव्याघ्रस्यवचनंयथोर्जि अथनिर्णयःक्षयमासेपिज्ञेयः रविसंक्रमहीनेयोवर्ज्यावर्ज्यविधिःस्मृतः सएवतुद्विसंक्रांतेमलमासेप्युदीरितइतिकाठकगृह्योक्तेः क्षयमासमृतानामप्याब्दिकेविशेषोहेमाद्रौ तिथ्यर्धेप्रथमेपूर्वोद्वितीयेर्धेतथोत्तरः मासावितिबुधैश्चिंत्यौक्षयमासस्यमध्यगौ आब्दिकवर्धापनेपिज्ञेयं यन्मलमासेवर्ज्यमुक्तं तच्छुक्रगुर्वोरस्तादिष्वपिज्ञेयं तदाहबृहस्पतिः बालेवायदिवावृद्धेशुक्रेवास्तंगतेगुरौ मलमासइवैतानिवर्जयेद्देवदर्शनमिति अनादिदेवतां दृष्ट्वाशुक्रचःस्मृतेष्टभार्गवे मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत् आवृत्ततीर्थेदोषाभावमात्रंनतुफलमितिवाचस्पतिमिश्राः तन्न असतिबाधकेफलहेतुत्वास्तेः लल्लोपि नीचस्थेवक्रसंस्थेप्यतिचरणगतेबालवृद्धास्तगेवासन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधस्तुदीक्षा मौंजीबंधोंगनानांपरिणयनविधिर्वास्तुदेवप्रतिष्ठावर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेचेति दीक्षायागदीक्षाआगमदीक्षाच तथा उद्यानचूडाव्रतबंधदीक्षाविवाहयात्राचवधूप्रवेशः तडागकूपत्रिदशप्रतिष्ठाबृहस्पतौसिंहगतेनकुर्यात् दिवोदासीये गुर्वादित्येगुरौसिंहेनष्टेशुक्रेमलिम्लुचे गृहकर्मव्रतंयात्रांमनसापिनचिंतयेत् अस्यापवादः तत्रैवब्राह्मे मुंडनंचोपवासश्चगोतम्यांसिंहगेगुरौ कन्यागतेतुकृष्णायांनतुतत्तीरवासिना तथा आद्यासौगौतमीगंगाद्वितीयाजान्हवीस्मृता सर्वतीर्थफलंस्नानाज्ञेतस्यांसिंहगेगुरौ संहितायदी

पे स्यात्सप्तरात्रं गुरुशुक्रयोश्च बालत्वमन्त्यं दशकं च वार्धकम् वृद्धोऽस्मितेज्यावशुक्रौ शिशुक्लेशास्तौ यतस्तावुपचीयमानौ वसिष्ठः अतिचारगते जीवे वर्जयेत्तदनंतरं व्रतोद्वाहादिकार्येषु अष्टाविंशतिवासरान् बाल्यादिलक्षणमुक्तं ब्रह्मसिद्धांते रविणासति रन्येषां ग्रहाणामस्त उच्यते ततोऽर्वाग्वार्धकं प्रोक्तमूर्ध्वं बाल्यं प्रकीर्तितमिति बाल्यादिपरिमाणं च वृत्तशते बालः शुक्रो दिवसदशकं पंचकं चैव वृद्धः पश्चादन्त्यं त्रितयमुदितः पक्षमैंद्र्यां क्रमेण जीवो वृद्धः शुक्रवदपि तथा पक्षमन्यैः शिशुस्तो वृद्धो भक्तौ दिवसदशकं चापरैः सप्तरात्रम् पश्चिमतउदये दश दिनानि बालः अस्ते पंच दिनानि वृद्धः पूर्वतो दिनत्रयं बालः पक्षं च वृद्ध इत्यर्थः जीवो गुरुः अन्यत्र त्वन्यथोक्तं प्राक्पश्चादुदितः शुक्रः पंचसप्तदिनं शिशुः विपरीतं तु वृद्धत्वं तद्वद्देवगुरोरपीति एषां च पक्षाणां व्यवस्थामाह मिहिरः बहवो दर्शिताः कालाये बाल्ये वार्द्धके पि वा ग्राह्यास्तत्राधिकाः शेषा देशभेदादुतापदीति देशभेदश्च मदनरत्ने गार्ग्यः शुक्रो गुरुः प्राक् च परात्त्व बालो विंध्ये दशावंतिषु सप्तरात्रम् वंगेषु हूणेषु च षट् च पंच शेषे च दशत्रिदिनं वदंतीति अस्तादेरपवादः काशीखंडे न ग्रहास्तोदयकृतो दोषो विश्वेश्वरालये त्रिस्थलीसेतोवा य वीये गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये क्रूराक्रूरगुरूणां च मौढ्यदोषो न विद्यते ग्रहणद्वये तन्निमित्तक कुरुक्षेत्रयात्रादानादाविस्यर्थः तदाह त्रिस्थलीसेतौ लल्लः उपप्लवे शीतलभानुभान्वोरर्धोदये वैकपिलाख्यषष्ठ्यां क्रूराक्रूरेज्यास्तमये पि तीर्थयात्राविधिः संक्रमणे च शस्तः न मूढदोषो न च रात्रिदोषो न चाधिमासो न मृतिर्न सूतिः एवमप्युत्तरार्द्धं पठंति इत्यलं बहुना मलमासे च व्रतविशेष उक्तो हेमाद्रौ पाद्मे अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने साज्यानि गुडमिश्राणि अधिमासे नृपोत्तम अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः उद्दिश्यापूपदानेन पृथ्वीदानफलं लभेत् त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च सघृतं

सहिरण्यंचब्राह्मणायनिवेदयेत् विष्णुरूपीसहस्रांशुः सर्वपापप्रणाशनः अपूपान्नप्रदानेनममपापंव्यपोहतु नारायणजगद्बीजभास्करप्रतिरूपक व्रतेनानेनपुत्रांश्चसंपदंचाभिवर्धय यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनं शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु कलाकाष्ठादिरूपेणनिमेषघटिकादिना योवंचयतिभूतानितस्मैकालात्मनेनमः कुरुक्षेत्रमयंदेशःकालःपर्वद्विजोहरिः पृथ्वीसममिदंदानंगृहाणपुरुषोत्तम मलानांचविशुद्ध्यर्थंपापप्रशमनायच पुत्रपौत्राभिवृद्ध्यर्थंतवदास्यामिभास्कर मंत्रेणानेनयोदद्यात्त्रयस्त्रिंशदपूपकान् प्राप्नोतिविपुलांलक्ष्मींपुत्रपौत्रादिसंपदइति इतिनिर्णयसिंधौमलमासनिर्णयः पक्षनिर्णयस्तु देवेमुख्यःशुक्लपक्षःकृष्णःपित्र्येविशिष्यतइतिमाधवेनोक्तः अथतिथिनिर्णयः तत्रतिथिर्द्वेधा शुद्धाविद्धाच दिनेतिथ्यंतरसंबंधरहिताशुद्धा तद्सहिताविद्धा तत्रशुद्धायामसंदेहाद्विद्धानिर्णीयते तत्रसामान्यतोवेधमाहमाधवीयेपैठीनसिः पक्षद्वयेपितिथयस्तिथिंपूर्वांतथोत्तरां त्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधिःस्मृतइति हेमाद्रिमदनरत्नादौतुद्विमुहूर्तोप्युक्तः उदितेदैवतंभानौपित्र्यंचास्तमितेरवौ द्विमुहूर्तात्रिरह्नश्चसातिथिर्हव्यकव्ययोरिति विष्णुधर्मोक्तेः द्विमुहूर्तत्वंचानुकल्पः द्विमुहूर्तापिकर्तव्यायातिथिर्वृद्धिगामिनीतिदक्षेणापिशब्दोक्तेः अयंवेधःप्रातरेव सायंतुत्रिमुहूर्तोवेधएव यांतिथिंसमनुप्राप्ययात्यस्तंपद्मिनीपतिः सातिथिस्तद्दिनेप्रोक्तात्रिमुहूर्तैवयाभवेदिति स्कांदोक्तेः दीपिकापि त्रिमुहूर्तगातुसकलासायेति यानितु व्रतोपवासस्नानादौघटिकैकापियाभवेत् उदयेसातिथिर्ग्राह्याविपरीतातुपैतृक इत्यादीनिस्कांदादिवचनानितानिवेश्वानराधिकरणन्यायेनावयवस्तुत्यात्रिमुहूर्तप्रशंसापराणि तिथिविशेषेवेधविशेषःस्कांदे नागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा भूतोष्टादशनाडीभि-

दूषयत्युत्तरांतिथिमिति अयंचोपवासातिरिक्तविषयइतिवक्ष्यते इतिनिषेधः तत्रसर्वातिथिर्यदहः कर्मकालव्यापिनीसैवग्राह्या कर्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिः तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणमितिविष्णुधर्मोक्तेः दिनद्वयेतद्व्याप्तावेकदेशव्याप्तौवायुग्मवाक्यान्निर्णयः तस्यपूर्वोक्तबाधेनोपपत्तेः कर्मकालस्यप्रधानांगत्वाच्च युग्मवाक्यंतुनिगमः युग्माग्नियुगभूतानांषण्मुन्योर्वसुरंध्रयोः रुद्रेणद्वादशीयुक्ताचतुर्दश्याचपूर्णिमा प्रतिपद्यप्यमावास्यातिथ्योर्युग्मंमहाफलं एतद्व्यस्तंमहादोषंहंतिपुण्यंपुराकृतमिति अत्ररंध्रांताःशब्दाः द्वितीयादिनवम्यंततिथिवाचकाः रुद्रएकादशीद्वितीयातृतीयायुतासाचद्वितीयायुतेतिसप्तयुग्मानीत्यर्थः इदंचशुक्लपक्षे अमाप्रतिपद्युग्मस्यपूर्णिमायाश्चतत्रैवसत्वादितिकेचित् नत्वमावास्याप्रतिपद्युग्मात्कृष्णपक्षलिंगात्पक्षद्वयपरमिदंतत्तद्विशेषवाक्यैःकृष्णातिथिविशेषेबाध्यतइति दशमीतूक्तापुराणसमुच्चये संपूर्णेदशमीकार्यापिमिश्रितापूर्वयाथवेति संपूर्णेशुक्लपक्षेत्रयोदशीतुसंमतानोनका त्रयोदशीतुकर्तव्याद्वादशीसहितामुनेइति कृष्णपक्षेत्वापस्तंबः प्रतिपत्सद्वितीयास्याद्द्वितीयाप्रतिपद्युता चतुर्थीसंयुतायाचसातृतीयाफलप्रदा पंचमीचप्रकर्तव्याषष्ठ्यायुक्तातुनारद कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी पूर्वविद्धाप्रकर्तव्यापरविद्धानकुत्रचित् दशमीचप्रकर्तव्यासदुर्गाद्विजसत्तम षष्ठ्यष्टमीअमावास्याकृष्णपक्षेत्रयोदशी एताःपरयुताःपूज्याःपराःपूर्वेणसंयुताइति यत्तुव्यासः खर्वोदर्पस्तथाहिंसात्रिविधंतिथिलक्षणम् खर्वदर्पौपरौपूज्यौहिंसास्यात्पूर्वकालिकीति खर्वःसाम्यम् दर्पोवृद्धिः तयोःपराहिंसाक्षयस्तत्रपूर्वेत्यर्थः एतच्छ्राद्धादिविषयम् द्वितीयादिषुयुग्मानांपूज्यतानियमादिषु एकोद्दिष्टादिवृद्ध्यादौह्रासवृद्ध्यादिचोदनेतिव्यासोक्तेः नियमादिषुव्रतदानादिकर्मसु एकोद्दिष्टादौतिथिवृद्ध्यादावित्यर्थः

कर्मकालव्याप्त्यभावेतु कर्मोपक्रमकालगैवग्राह्या कर्मोपक्रमकालगातुह्यतिथिर्ग्राह्यानयुग्मादरइति दीपिकोक्तेः यानितु यांतिथिं-
समनुप्राप्य उदयंयातिभास्करः सातिथिः सकलाज्ञेयादानाध्ययनकर्मस्वित्यादीनितानित्रिमुहूर्तादिस्तुतिपरानीतिनिर्णयदीपे अथैकभक्त
तत्कालः पाद्मे मध्यान्हव्यापिनीग्राह्याएकभक्तेसदातिथिरिति मध्यान्हश्चपंचधाविभक्तदिनतृतीयांशः तेनयद्यपिद्वादशदंडानंत
रंप्राप्यतेतथापिदिनार्धसमयेतीतेभुज्यतेनियमेनयत् एकभक्तमितिप्रोक्तंमतस्तस्याद्दिवैवहीति स्कांदोक्तेः षोडशसप्तदशादिदंडा
मुख्यःकालः दीपिकायांतु मध्यान्हात्यदलेत्रिभागदिवसेस्यादेकभक्तमिति ततःसूर्यास्तपर्यंतंगौणः दिवैवहीत्यस्यवैयर्थ्यापत्त्येतत्
परत्वात् अत्रपूर्वेद्युर्व्याप्तिः परेद्युरुभयेद्युर्व्याप्तिस्तदभावोंशव्याप्तिस्तत्रापिसाम्यंवैषम्यंचेतिषट्पक्षाः तत्राद्ययोरसंदेहएव तृतीयेतुपूर्वेन्हि-
गौणमुख्ययोःसत्वात्पूर्वेतिमाधवः युग्मवाक्यान्निर्णयइतिहेमाद्रिः चतुर्थपक्षे पूर्वैवगौणकालव्याप्तेःसत्वात् वैषम्येणांशव्याप्तौयाधि
कासाग्राह्या साम्येपूर्वा अयंचस्वतंत्रैकभक्तनिर्णयः अन्यांगउपवासप्रतिषेधेतदनुसारेणनिर्णयः अथनक्तं तच्चदिनानशनपूर्वंरा-
त्रिभोजनं तत्रप्रदोषव्यापिनीग्राह्या प्रदोषव्यापिनीग्राह्यातिथिर्नक्तव्रतेसदेतिवत्सोक्तेः प्रदोषस्तु त्रिमुहूर्तंप्रदोषःस्याद्भानावस्तंगतेसति
नक्तंतत्रतुकर्तव्यमितिशास्त्रविनिश्चयइतिमदनरत्नेव्यासोक्तेः तत्रापित्रिदंडोत्तरंकार्यं सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतइतिस्कां
दोक्तेर्दंडत्रयस्यसंध्यात्वात्तत्र चत्वारीमानिकर्माणिसंध्यायांपरिवर्जयेत् आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमिति मार्कंडेयेनभोजन
निषेधात् मुहूर्तोनंदिनंनक्तंप्रवदंतिमनीषिणः नक्षत्रदर्शनान्नक्तमहंमन्येगणाधिपेतिमाधवीयभविष्योक्तेश्च गौडास्तु प्रदोषास्तमयादूर्ध्वंघटिकाद्व
यमिष्यतइतिवत्सोक्तेःप्रदोषः संध्याचदिनरात्र्योःसंधौमुहूर्तः अर्धास्तमयात्संध्याव्यक्तीभूतानतारकायावत् तेजःपरिहाणिवशाद्भानोरर्धोदयंयाव

८

दितिवराहोक्तेरित्याहुः तन्न अस्यसंध्यावंदनानध्यायादिपरत्वात् अतएवतत्रखंडमंडलस्यसंध्यात्वमुक्तंविज्ञानेश्वरेण यच्चमदनरत्ने नक्तस्यवैधत्वाद्रागप्राप्तभोजनगोचरोनिषेधइत्युक्तं तन्न विधिनिषेधाविरोधात् अन्यथाकपिंजलानित्यत्रत्रिभ्योधिकानांहिंसनंस्यात् सायंकालेनक्तंतुदिनद्वयेप्रदोषस्पर्शेज्ञेयं अनथात्वपरत्रस्यादस्तादर्वाग्यतोहिसेतिजाबालिवचनात् प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते आत्मनोद्विगुणाछायामंदीभवतिभास्करे तन्नक्तंनक्तमित्याहुर्ननक्तंनिशिभोजनमिति स्कांदाच्च यत्यादीनामपिसायान्हे नक्तंनिशायां कुर्वीतगृहस्थोविधिसंयुतः यतिश्चविधवाचैवकुर्यात्तत्सदिवाकरमिति तत्रैवस्मृत्यंतरात् इदमपुत्रविधुरोपलक्षणं पुत्रवतस्तुरात्रावेव अनाश्रमोप्याश्रमीस्यादपत्नीकोपिपुत्रवानिति संग्रहोक्तेः सौरनक्तंतुदिवैव त्रिमुहूर्तेस्पृगेवान्हिनिशिचेत्तावतीतिथिः तस्यांसौरंभवेन्नक्तमहन्येवतुभोजनमिति स्मृत्युक्तेः हरिनक्तेविशेषः कालादर्शेस्कांदे उदयस्थासदापूज्याहरिनक्तव्रतेतिथिरिति अन्यनक्तंतुसंकल्पादावपिरात्रावेव निषेधस्यरागप्राप्तभोजनगोचरत्वेनवैधाबाधकत्वात् दिनद्वयव्याप्तौपरा उभयोर्यदिवातिथ्योःप्रदोषव्यापिनीतिथिः तत्रोत्तरत्रनक्तंस्यादुभयत्रापिसायतइति कालादर्शेजाबालिवचनात् अन्यपक्षेतुएकभक्तवन्निर्णयः अत्रविशेषोमदनरत्नेगारुडे हविष्यभोजनंस्नानंसत्यमाहारलाघवं अग्निकार्यमधःशय्यांनक्तभोजीषडाचरेत् अग्निकार्यंव्याहृतिहोमः इतिनक्तं अयाचितेतुविशेषवचनाभावात्पक्षेउपवासेप्राप्तेउपवासवन्निर्णयः अथनक्षत्रव्रतकालनिर्णयः विष्णुधर्मे उपोषितव्यंनक्षत्रंयस्मिन्नस्तमियाद्रविः युज्यतेयत्रवातारानिशीथेशशिनासहेति माधवीयेस्कांदे तत्रैवोपवसेदृक्षंयन्निशीथादधोभवेत् उपवासेयदृक्षंस्यात्तद्दिनेनक्तैकभक्तयोः अथव्रतपरिभाषा तत्राधिकारिणोमदनरत्नेभविष्ये अनग्नयस्तुयेविप्रास्तेषांश्रेयोविधीयते व्रतोपवासनियमैर्नानादानैस्तथानृ

प अनग्निग्रहणमुपवासविषयम् अतएवदेवलः आहिताग्निरनड्वांश्च ब्रह्मचारीच तेत्रयः अश्नंतएवसिध्यंति नैषांसिद्धिरनश्नतां एकादश्या
दौतुवचनात् भवतीतिवक्ष्यामः शूद्रस्याप्यधिकारः शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेतिव्या
सोक्तेः माध्यास्तुवैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधः वैश्याःशूद्राश्चयेमोहादुपवासंप्रकुर्वते त्रिरात्रंपंचरात्रंवातेषांव्युष्टिर्नविद्यते
चतुर्थभक्तक्षपणंवैश्येशूद्रेविधीयते त्रिरात्रंतुनधर्मज्ञैर्विहितंब्रह्मवादिभिरिति हेमाद्रौवचनादित्याहुः यावदुक्तनिषेधइत्यन्ये तत्व
तुनिर्मूलमितिप्रकरणान्महातपोविषयइतियुक्तम् एवंस्त्रीणामपि यत्तुस्कांदे नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणम् भर्तृशु-
श्रूषयैवतालोकानिष्टान्व्रजंतिहि यद्देवेभ्योयच्चपित्रादिकेभ्यः कुर्याद्भर्त्रभ्यर्चनंसत्क्रियांच तस्यार्धंवैसाफलंनान्यचित्तानारीभुंक्ते-
भर्तृशुश्रूषयैव आदित्यपुराणे नारीखल्वननुज्ञाता भर्त्रावापिस्रुतेनवा विफलतद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकमिति और्ध्वदेहिकं
पारलौकिकंतद्भर्त्रननुज्ञाविषयं भार्यापत्युर्मतेनैवव्रतादीनाचरेत्सदेति कात्यायनोक्तेः अत्रविशेषोहरिवंशे स्नानंचकार्यंशिरसस्ततः
फलमवाप्नुयात् स्नात्वास्त्रीप्रातरुत्थायपतिंविज्ञापयेत्सती तथा गृहीत्वोदुंबरंपात्रंसकुशंसाक्षतंतथा गोशृंगंदक्षिणंसिंच्यप्रगृह्णीया
च्चतज्जलं औदुंबरंताम्रमयं ततोभर्तुःसतीदद्यात्स्नातस्यप्रयतस्यच आत्मनश्चाभिषेक्तव्यंततःशिरसितज्जलं उपवासेषुकर्तव्यमेतद्धि
व्रतकेषुचेति सर्वव्रतेषुसंकल्पविधिश्चभारते गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः उपवासंतुगृह्णीयाद्यद्वासंकल्पयेद्बुधः हस्तेनैवेत्यर्थः
अथव्रतारंभकालः मदनरत्नेगार्ग्यः अस्तगेचगुरौशुक्रे बालेवृद्धेमलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेत् रत्नमालायां सोमसौ
म्यगुरुशुक्रवासराः सर्वकर्मसुभवंतिसिद्धिदाः भानुभौमशनिवासरेषुच प्रोक्तमेवखलुकर्मसिध्यति तथा विरुद्धसंज्ञाइहयेचयोगा

स्तेषामनिष्टःखलुपादआद्यः सर्वेधृतिस्तुव्यतिपातनामासर्वोप्यरिष्टःपरिघस्यचार्धं तिस्रस्तुयोगेप्रथमेसवज्रेव्याघातसंज्ञेनवपंचशूले गंडेः
तिगंडेचषडेवनाड्यःशुभेषुकार्येषुविवर्जनीयाः संग्रहे कृष्णाग्निदिश्योरूर्ध्वंसप्तमीभूतयोरधः शुक्लेवेदेशयोरूर्ध्वंभद्राभागवसुपूर्णयोः
श्रीपतिः नसिद्धिमायातिकृतंचविष्ट्यांविषारिघातादिकमत्रसिद्धं व्यवहारसमुच्चये दशम्यामष्टम्याप्रथमघटिकापंचकपरंहरिद्युः स
सम्यांहिदशघटिकांतेत्रिघटिकं तृतीयाराकायांस्वयमघटिकाभ्यः परभवंशुभंविष्टेःपुच्छंशिवतिथिचतुर्थ्योस्तुविरमे तत्रैव सर्पिणीतु-
सितपक्षेकृष्णेचैवतुवृश्चिकी सर्पिण्यास्तुमुखंत्याज्यंवृश्चिक्याःपुच्छमेवच माधवीये विष्टिर्यदाहनितिथेरपरार्धजातापूर्वार्धजानिशितदा
शुभदाचपुच्छे ब्रह्मयामले दिनभद्रायदारात्रौरात्रिभद्रायदादिवा नत्याज्याशुभकार्येषुप्राहुरेवंपुरातनाः श्रीपतिः षट्पौष्णतोद्वादश
शांकराच्चपौरंदराद्धानिनवक्रमेण पूर्वार्धमध्यापरभागयुंजिचिरंतनंज्योतिषिकैःस्मृतानि व्रतारंभेचविशेषः मदनरत्नेसत्यव्रतेनोक्तः उ
दयस्थातिथिर्याह्निनभवेद्दिनमध्यभाक् साखंडानव्रतानांस्यादारंभश्चसमापनमिति देवलः अभुक्त्वाप्रातराहारंस्नात्वाचम्यसमाहितः
सूर्यायदेवताभ्यश्चनिवेद्यव्रतमाचरेत् मदनरत्नेभविष्ये क्षमासत्यंदयादानंशौचमिंद्रियनिग्रहः देवपूजाग्निहवनंसंतोषस्तेयवर्जनं
सर्वव्रतेष्वयंधर्मःसामान्योदशधास्मृतः अग्निहोमस्तुहेवत्यः व्याहृतिहोमोवेतिवर्धमानः यत्तुतेनोक्तं सर्वपदमेतत्पुराणोक्तप्रकृतव्रत
परं व्रतांतरेतुविध्यंतरसत्वेहोमोऽन्यथान अतएवैकादश्यांशिष्टानांहोमानाचरणमिति तन्न जपोहोमश्चेतिवक्ष्यमाणैकवाक्यत्वेना-
स्यकाम्यव्रतसमाप्तिपरत्वात् तत्वंतुसाप्तदश्यस्यपशुगणित्राविंदादिप्रकरणस्थेनैवतत्तद्व्रतविशेषहोमविधिभिरस्योपसंहारइति विष्णु
धर्मे तज्जाप्यजपनंध्यानंतत्कथाश्रवणादिकं तदर्चनंचतन्नामकीर्तनश्रवणादयः उपवासकृतामेतेगुणाःप्रोक्तामनीषिभिः कौर्मे व

बहिर्ग्रामांत्यजान्सूतिंपतितंचरजस्वलां नस्पृशेन्नाभिभाषेतनेक्षेतव्रतवासरे पृथ्वीचंद्रोदयेअग्निपुराणे स्नात्वाव्रतवतासर्वव्रतेषुव्रतमूर्तयः पूज्याःसुवर्णमय्याद्याःशक्त्यावैभूमिशायिना जपोहोमश्चसामान्यंव्रतांतेदानमेवच चतुर्विंशद्द्वादशवापंचवात्रयएववा विप्राभोज्यायथाशक्तितेभ्योदद्याच्चदक्षिणां अत्रविप्राइतिपुल्लिंगनिर्देशात्पुमांसएवभोज्याः नतुस्त्रियः एवंसहस्रभोजनादावपि विरूपैकदेशस्यप्रमाणांतरंविनायुक्तत्वात् अतएवद्वयोर्यजमानयोःप्रतिपदंकुर्यात् बहुभ्योयजमानेभ्यइत्यादौविरूपैकशेषायोगात् पत्न्यभिप्रायंद्वित्वबहुत्वंवानसंभवतीत्युक्तमाचार्यैः पार्थसारथिनाच एतेनैकस्यब्राह्मणस्यावृत्त्याभोजनंपरास्तं बहुत्वस्यैकपदश्रुत्याब्राह्मणान्वितत्वेनभोजनान्वयाभावादित्यन्यत्रविस्तरः शूद्रस्यतुप्रतिष्ठादिवह्निमद्द्वाराव्याहृतिहोमइतिवर्धमानः व्रतमूर्तयोव्रतदेवताप्रतिमाः प्रतिमास्वरूपंचमदनरत्नेभविष्ये अनुक्तद्रव्यतत्संख्यादेवताप्रतिमान्नृप सौवर्णीराजतीताम्रीवृक्षजामार्तिकीतथा चित्रजापिष्टलेख्यास्यान्निजवित्तानुरूपतः आमाषात्पलपर्यंतंकर्तव्याशाठ्यवर्जितैः तत्रैवब्राह्मे आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते मंत्रस्यदेवतायाश्चप्रजापतिरितिस्थितिः मंत्रानुक्तौसमस्तव्याहृतिरूपोमंत्रः प्रजापतिश्चदेवतेतिकल्पतरुः वर्धमानधृतदेवीपुराणे होमोग्रहादिपूजायांशतमष्टाधिकंभवेत् अष्टाविंशतिरष्टौवायथाप्राप्तिविधीयते मदनरत्ने अनुक्तसंख्यायत्रस्याच्छतमष्टोत्तरंस्मृतं वर्धमानधृतवृद्धशातातपः उपवासंद्विजःकृत्वाततोब्राह्मणभोजनं कुर्यात्तेनास्यसगुणउपवासोऽभिजायते व्रतोद्यापनानुक्तौपृथ्वीचंद्रोदयेनंदिपुराणे कुर्यादुद्यापनंतस्यसमाप्तौयदुदीरितं उद्यापनंविनायत्तुतद्व्रतंनिष्फलंभवेत् यदिचोद्यापनंनोक्तंव्रतानुगुणतश्चरेत् वित्तानुसारतोदद्याददनुक्तोद्यापनेव्रते गामेवकांचनंदद्याद्व्रतस्यपरिपूर्तये अशक्तौनारदीये सर्वेषामप्यलाभेतुयथोक्तकरणंविना विप्रवाक्यस्मृ

तंशऋद्धं व्रतस्यपरिपूर्तये यथाविभवचोयस्तुगृह्णातिमनुजः शऋणं अदत्वादक्षिणांपापः सयातिनरकंध्रुवं भारते वेदोपनिषदेचैवसर्वकर्मऋदक्षिणा सर्वक्रतुमयोहृष्टा भूमिर्गावोथकांचनं बैजवापः शिवनेत्रोद्भवंयस्माद्रजतंपितृवल्लभं अमंगलंतद्यत्नेनदेवकार्येषुवर्जयेत् टोडरानंदे देवीपुराणे व्रतेचतीर्थेध्ययनेश्राद्धेपिचविशेषतः परान्नभोजनाद्देवियस्यान्नंतस्यतत्फलं पृथ्वीचंद्रोदयेग्निपुराणे नित्यस्नायीमिताहारोगुरुदेवद्विजार्चकः क्षारंक्षौरंचलवणंमधुमांसंचवर्जयेत् क्षारास्तुतत्रैवोक्ताः तिलमुद्गादृतेशैब्यंसस्यंगोधूमकोद्रवौ धान्यकंदेवधान्यंचशमीधान्यंतथैक्षवम् स्विन्नधान्यंतथापण्यंमूलंक्षारगणः स्मृतः गोधूमानांतुतत्रैवप्रतिप्रसवः व्रीहिषष्टिकमुद्गाश्चकलापःसतिलंपयः श्यामाकाश्चैवनीवारागोधूमाद्याव्रतेहिताः कूष्मांडालाबुवार्ताकपालंकीज्योत्स्निकास्त्यजेत् चतुर्भैक्षंसक्तुकणाः शाकंदधिघृतंमधु श्यामाकाः शालिनीवारायावकंमूलतंडुलं हविष्यव्रतनक्तादावग्निकार्यादिकेहितं मधुमांसंविहायान्यद्व्रतेवाहितमीरितमिति शमीधान्यंमाषादि पालंकीमध्यदेशेपोईइतिप्रसिद्धा ज्योत्स्निकाकोशातकी मिताक्षरायांगोतमः चतुर्भैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानिहवींष्युत्तरोत्तरंप्रशस्तानि पयोदधिघृतंचगव्यमिति अन्येचविशेषाएकादशीचातुर्मास्यादिप्रकरणेवक्ष्यंते गृहीतव्रतत्यागेतुमदनरत्नेछागलेयः पूर्वंव्रतंगृहीत्वायोनचरेत्काममोहितः जीवन्भवतिचांडालोमृतःश्वाचाभिजायते तत्रप्रायश्चित्तमुक्तंपृथ्वीचंद्रोदयेअग्निगारुडपुराणयोः क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि दिनत्रयंनभुंजीतमुंडनंशिरसोथवेति प्रायश्चित्ताम्नानादतिक्रांतव्रतानुष्ठानंनास्तीतिगम्यते यत्तु प्रायश्चित्तंततःकृत्वापुनरेवव्रतीभवेदितिवचनात् यच्चातिक्रांतमपिव्रतंकार्यमेवेतिशूलपाणिः तन्मध्येलोपव्रतशेषसत्वेज्ञेयं एतच्चशक्तविषयं अशक्तौतुकालहेमाद्रौपुराणांतरे उपवासासमर्थश्चेदेकंविप्रंतुभो-

जयेत् तावद्दानादिवादद्यादुक्तस्याद्विगुणंतथा अशक्तः कृतभोजनः ब्राह्मणभोजनंविनेतिशेषः सहस्रसंमितांदेवींजपेत्प्राणसंयमान् कुर्याद्द्वादशसंख्याकान्यथाशक्त्यातुरोनरइति शक्तिस्त्वेमात्स्ये उपवासेष्वशक्तानांनक्तंभोजनमिष्यते मदनरत्नेवायवीये द्रव्यदातोपवासस्यफलप्राप्नोत्यसंशयं तथापरार्केदेवलः ब्रह्मचर्यंतथाशौचंसत्यमामिषवर्जनं व्रतेष्वेतानिचत्वारिवरिष्ठानीतिनिश्चयः मात्स्ये नस्मात्कृतोपवासेनस्नानमभ्यंगपूर्वकं वर्जनीयंप्रयत्नेनरूपघ्नंतत्परंनृप अन्येचनियमास्तत्रतत्रान्वेषणीयाः अथस्त्रीव्रतेषुविशेषउच्यते तत्रहेमाद्रौव्रतकांडेगारुडे गंधालंकारतांबूलपुष्पमालानुलेपनं उपवासेनदुष्यंतिदंतधावनमंजनमिति इदंचसभर्तृकोपवासविषयं अंजनंचसतांबूलंकुंकुमंरक्तवाससी धारयेत्सोपवासापिअवैधव्यकरंयतः विधवायतिमार्गेणकुमारीवायदृच्छयेतितत्रैवभविष्योक्तेः तथाविष्णुधर्मे सर्वेषुतूपवासेषुपुमान्वाथसुवासिनी धारयेद्रक्तवस्त्राणिकुसुमानिसितानिच विधवाशुक्लवसनमेकमेवहिधारयेत् भर्तुरपि पुष्पालंकारवस्त्राणिगंधधूपानुलेपनं उपवासेनदुष्यंतिदंतधावनमंजनम् मदनरत्नेव्यासः दंतधावनपुष्पादिव्रतेष्वस्यानदुष्यतीति यद्यपीदंसर्वोपवासविषयंप्रतीयतेतथापिशिष्टाचारात्सौभाग्याद्यर्थंक्रियमाणनवरात्रत्रिरात्राद्युपवासविषयमेव नत्वेकादश्यादिविषयं असकृज्जलपानाच्च सकृत्तांबूलचर्वणात् उपवासःप्रणश्येतदिवास्वापाच्चमैथुनादिति परार्केदेवलेनतन्निषेधात् नचास्यपुंविषयत्वेनसावकाशत्वात्स्त्रीणांतांबूलादिप्राप्नोतीतिवाच्यम् तांबूलादिप्रापकस्यैवैकादशीतरविषयत्वेनवैपरीत्यस्यापिसुवचत्वात् यत्तुहरिवंशे अंजनंरोचनंचैवगंधान्सुमनसस्तथा व्रतेचैवोपवासेचनित्यमेवविवर्जयेत् शिरसोभ्यंजनंसौम्यनैवमेतत्प्रशस्यते नपादयोर्नगात्रस्यस्नेहेनेतिस्थितिःस्मृतेतितत्तत्रैवोक्तपुण्यकव्रतविषयं नतुसर्वत्र पूर्वोक्तविरोधादिति मदनरत्नेउक्तं तत्रैव अस्तु

प्रपातोरोषश्चकलहस्यकृतिस्तथा उपवासाद्व्रताद्वापिसद्योभ्रंशयतिस्त्रियं स्त्रियमित्युपलक्षणं मदनरत्नेशिवधर्मे दानव्रतानिनियमा
ज्ञानंध्यानंहुतंजपः यत्नेनापिकृतंसर्वंक्रोधिनस्याद्वृथाभवेत् अथसूतकादौनिर्णयः तत्रशावसूत्याशौचयोः सर्वस्मार्तकर्मनिवृत्तिर्निबंधे-
षुस्पष्टैव गौडास्तुक्षतनाशौचादावपितामाहुः जातूर्ध्वक्षतजेजातेनित्यकर्मनचाचरेत् नैमित्तिकंचतदधःस्रवद्रक्तोनवाचरेत् लोतकेचस
सुलान्नेज्वरकर्मणिमैथुने धूमोद्गारेतथावान्तौनित्यकर्माणिसंत्यजेत् द्रव्येषुक्तेत्वजीर्णेचनैवभुक्त्वापिकिंचन कर्मकुर्यान्नरोनित्यंसूतके-
मृतकेतथेतिकालिकापुराणात् वस्तुतस्तुशर्वदेवीपूजोपक्रमात्तन्मात्रविषयत्वमस्येतियुक्तंप्रतीमः तथाहेमाद्रौपाद्मे गर्भिणीसूतिकादिश्च
कुमारीवाथरोहिणी यदाशक्तानदान्येनकारयेत्प्रयतास्वयमिति पुंसोप्येषविधिः लिंगस्याविवक्षितत्वात् तेनयस्मिन्व्रतेयत्पूजाद्युक्तं
तदन्येनकारयेत् शारीरनियमान्स्वयंकुर्यादितिहेमाद्रिर्व्याचख्यौ नव्रतिनांव्रतइतिविष्णूक्तेश्च आरंभस्तुनभवत्येव शुद्धितत्वेविष्णुः
बहुकालिकसंकल्पोगृहीतश्चपुरायदि सूतकेमृतकेचैवव्रतंतन्नैवदुष्यति एतत्काम्यपरंनित्यंत्वनारब्धमपिकार्यमितिगौडाः मदनरत्ने पू-
र्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः तत्कर्तव्यंनरैःशुद्धंदानार्चनविवर्जितं माधवीयेकौर्मे काम्योपवासेप्रक्रांतेत्वंतरामृतसूतके तत्रका
म्यव्रतंकुर्याद्दानार्चनविवर्जितमिति एतेनसांगेधिकाराद्व्रतांगदेवपूजादिकार्यमितिवर्धमानोक्तिःपरास्ता प्रारब्धपूजादिकार्यमेव तत्रा
त्रेतुतत्रैवविशेषंवक्ष्यामः एवंरजस्वलापि यत्तुसत्यव्रतः प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् नतत्रापिव्रतस्यस्यादुपरोधःकथंचने
ति तत्प्रतिनिधिनाकारयेदितिचेतन्नपरं तदुक्तंमदनरत्नेमात्स्ये अंतरातुरजोयोगेपूजामन्येनकारयेदिति प्रतिनिधयश्चनिर्णयामृतेपै-
ठीनसिः भार्यापत्युर्व्रतंकुर्याद्भार्यायाश्चपतिर्व्रतं असामर्थ्ये परस्ताभ्यांव्रतभंगोनजायते स्कांदेपि पुत्रंवाविनयोपेतंभगिनींभ्रातरंतथा

निंसि
१२

प॰
१

एषामभावएवान्यंब्राह्मणंवानियोजयेत् कात्यायनः पितृमातृभ्यांनृपतिगुर्वर्थेचविशेषतः उपवासंप्रकुर्वाणःपुण्यंशतगुणंलभेत् माताम
हादीनुद्दिश्यएकादश्यामुपोषणे कृतेनतुफलविभाःसमग्रंसमवाप्नुयुः मदनरत्नेप्रभासखंडे भर्तापुत्रःपुरोधाश्चभ्रातापत्नीसखापिच
यात्राधर्मकार्येषुजायतेप्रतिहस्तकाः एभिःकृतंमहादेविस्वयमेवकृतंभवेत् तत्रैववायवीये स्वयंकर्तुमशक्तश्चेत्कारयीतपुरोधसा इदं
चसर्ववर्णसाधारणं अविशेषात् यत्तुकश्चिन्महोक्षआह शूद्रस्यब्राह्मणादिरेवप्रतिनिधिर्युक्तोनशूद्रः जपस्तपस्तीर्थसेवाप्रव्रज्यामंत्रसा
धनम् विप्रैःसंपादितंयस्यसंपन्नंतस्यतत्फलमिति मरीचिवचनादिति तत्तुच्छम् प्रव्रज्यादीनांशूद्रेऽसंभवाद्विषयेभायदर्शनादितिन्या
येनास्यब्राह्मणादिगोचरत्वात् यदापिउपवासोव्रतहोमस्तीर्थस्नानजपादिकमितिपूर्वार्धेपाठस्तदापिसएवदोषः स्त्रीशूद्रपतनानिष-
डितिमानवीयेजपनिषेधात् वस्तुतस्तु संपूर्णतावाचनमात्रमत्रोच्यतइतिप्रतिनिधेः कावार्तेत्यलं अत्रविशेषमाहत्रिकांडमंडनः का
म्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसः काम्येप्युपक्रमादूर्ध्वंकेचित्प्रतिनिधिंविदुः नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु सदेशका
लयोर्नास्तिनारणेरग्निरेवसा नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित् हिरण्यकेशिसूत्रेपि नस्वामित्वस्यभार्यायाःपुत्रस्यदेशस्यकाल
स्याग्नेर्देवतायाःकर्मणःशब्दस्यचप्रतिनिधिर्विद्यतेइति अथव्रतादिसन्निपातेनिर्णयः तत्रतिथिद्वयसन्निपातेतत्रोक्तेदानहेमादिकर्मसे
णानुष्ठेयं अविरोधात् इदंत्वविरोधेएव एकमध्येन्यकाम्यकर्मारंभस्तुनभवत्येवगुणफलादेते यस्ययज्ञेप्रततेनरायज्ञस्तायतेतंय
ज्ञंनिर्ऋतिर्गृह्णातीतिराणकधृतश्रुतेः यज्ञःव्रतादिकर्ममात्रं अनंगेनव्यवधानदोषस्यसर्वत्रसाम्यात् शिष्टास्तुमाघकार्तिकस्नानादिम १२
ध्येलक्षहोमतुलाभारतप्तवणाद्याचरंतितन्नित्यमध्येतु काम्यमध्येतुनित्यम् यत्तुनक्तैकभक्तादौविरोधस्तत्रप्रायश्यादेकभक्तंकार्यम्

नक्तं तु परेद्युस्तत्तिथौ गौणकाले कार्यम् समकालीनविरुद्धव्रतादौ त्वेकं स्वयं कृत्वान्यद्भार्यादिना कारयेदिति माधवः यत्तु शिवरात्र्यादौ तिथिमध्ये पारणायाऽन्हि भोजनं प्राप्तं भूताष्टम्योर्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेदिति तन्निषेधश्च तत्र पारणायाः सेधत्वाद्दिवैव भोजनम् निषेधस्तु रागप्राप्तभोजनविषयः एवमष्टम्यादिनक्तव्रते संक्रान्त्यादौ रवेः संक्रमे चतुर्थ्यां च रात्रौ भोजनम् यत्र त्वष्टम्यादौ दिवाभुजिनिषेधः संक्रमे च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः यद्यपि पुत्रिण उपवासो निषिद्धस्तथाप्युपवासनिषेधे तु भक्ष्यं किंचित् प्रकल्पयेदिति वचनात्किंचिद्भक्षयित्वोपवासः कार्यः चान्द्रायणमध्ये एकादश्यादौ तु भोजनं कार्यमेव चान्द्रायणस्य काम्यत्वेन नित्यबाधकत्वात् अबाधेन गत्यसंभवाच्च एकादश्यामेकान्तरोपवासादिपारणायां जलपारणां कृत्वोपवसेत् आपो वा अशितमनशितं चेति श्रुतेः एवं द्वादश्यां मासोपवासश्राद्धदोषादिषु ज्ञेयं एवं काम्यनैमित्तिकनित्यत्वादिकृतं बलाबलं स्वयमूह्यमिति दिक् इति कमलाकरभट्टकृते निर्णयसिन्धौ परिभाषा समाप्ता अथ प्रतिपदादिनिर्णयः शुक्लप्रतिपदपराण्हव्यापिनी पूर्वा ग्राह्या युग्मवाक्यात् प्रतिपत्संमुखी कार्या या भवेदपराण्हिकीति स्कान्दोक्तेः शुक्लास्यात्प्रतिपत्तिथिः प्रथमतश्चेत्सापराण्हे भवेदिति दीपिकोक्तेश्च अपराण्हश्च पंचधा भक्ते दिने चतुर्थो भागः तदभावे सायान्हव्यापिनी ग्राह्या तदभावे तु सायान्हव्यापिनी परिगृह्यतामिति माधवोक्तेः कृष्णा तु परा कृष्णा तूत्तरतो विलेति दीपिकोक्तेः कृष्णापि पूर्वैवेत्यनन्तभट्टः सर्वतिथिषु वर्ज्यान्युक्तानि मुहूर्तदीपिकायां कूष्मांडं बृहती फलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चामलकं दिवं भ्रमणता शीर्षकपालान्त्रकम् निष्पावांश्च मसूरिकान्फलमथो वृन्ताकसंज्ञं मधु द्यूतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेवमाषोडश शीर्षं नारिकेलम् कपालं अलाबु अंत्रं पटोलकं भूपालः

कूष्मांडंबृहतीक्षारंमूलकंपनसंफलम् धात्रीशिरःकपालांत्रंनखचर्मतिलानिच क्षुरकर्मांगनासेवांप्रतिपत्प्रभृतित्यजेत् नखंशिवी चर्ममसूरिका द्वितीयातुकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः कृष्णाद्वितीयादिमापूर्वापहेयदिसासितातुपरतः सर्वेतिदीपिकोक्तेः माधवानंतभट्टमतेतुसर्वापिद्वितीयापरा तथाचमाधवः पूर्वेद्युरसतीप्रातः परेद्युस्त्रिमुहूर्तगा साद्वितीयापरोपोष्यापूर्वविद्धाततोन्यथेति तृतीयातुसर्वमतेरंभाव्यतिरिक्तापरैव तेनयुग्मवाक्यंरंभाव्रतविषयं रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम अन्येषुसर्वकार्येषुयुगयाद्युक्ताप्रशस्यतइतिब्रह्मवैवर्तात् गौरीव्रतेतुविशेषमाहमाधवः मुहूर्तमात्रसत्त्वेपिदिनेगौरीव्रतंपरे शुद्धाधिकायामप्येवंगणयोगप्रशंसनादिति चतुर्थ्यपिसर्वमतेगणेशव्रतातिरिक्तापरैव युग्मवाक्यात् एकादशीतथाषष्ठीअमावास्याचतुर्थिका उपोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुताइतिमाधवीये बृहद्वसिष्ठोक्तेश्च नागचतुर्थीतुमध्यान्हव्यापिनीपंचमीयुताचग्राह्येतिनिर्णयामृतेमाधवीयेचोक्तं युगंमध्यंदिनेयत्रतत्रोपोष्यफणीश्वरान् क्षीरेणाप्याय्यपंचम्यांपूजयेत्प्रयतोनरः विषाणितस्यनश्यंतिनतान्हिंसंतिपन्नगा इतिमाधवीयेदेवलोक्तेः युगंचतुर्थीपूर्वत्रमध्यान्हव्याप्तौपूर्वा अन्यपक्षेषुपरैवपंचम्यांपूजोक्तेः गणेशव्रतेतृतीयायुतैवचतुर्थी चतुर्थीतुतृतीयायांमहापुण्यफलप्रदा कर्तव्याव्रतिभिर्वत्सगणनाथस्तोषिणीति हेमाद्रौब्रह्मवैवर्तात् माधवीयेतुगणेशव्रते मध्यान्हव्यापिनीमुख्या चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्यान्हव्यापिनीचेत्स्यात्परतश्चेत्परेहनीति बृहस्पतिवचनात् प्रातःशुक्लतिलैःस्नात्वामध्यान्हेपूजयेन्नृपेति तत्कर्मभिधानाच्च तेनपरदिनेतत्वेपरा अन्यथापूर्वेत्युक्तं वस्तुतस्तु यत्रभाद्रशुक्लचतुर्थ्यादौगणेशव्रतविशेषमध्यान्हपूजोक्तातद्विषयाण्येवप्रागुक्तवचनानि नतुसार्वत्रिकाणि संकष्टचतुर्थ्यादौबहूनांकर्मकालानांबाधा

पत्तेः तेनसर्वत्रगणेशव्रते पूर्वैवेतिसिद्धं संकष्टचतुर्थीतुचंद्रोदयव्यापिनीग्राह्या दिनद्वयेतत्त्वेमातृयोगस्यसत्त्वात्पूर्वेतिकेचित् अन्येतुदिनेमुहूर्तत्रयादिरूपस्यतृतीयायोगस्याभावात् परदिनेमाधवोक्तमध्याह्नव्यापिसत्त्वात्संपूर्णत्वाच्च परेत्याचक्षते दिनद्वयेतदभावेतुपरैव गौरीव्रतेतुपूर्वैव गणेशगौरीबहुलाव्यतिरिक्ताःप्रकीर्तिताः चतुर्थ्यः पंचमीविद्धादेवतांतरयोगत इतिमदनरत्ने ब्रह्मवैवर्तात् पंचमीतुमाधवमतेसर्वापिपूर्वा चतुर्थीसंयुताकार्यापंचमीपरयानतु दैवेकर्मणिपित्र्येचशुक्लपक्षेतथासितेतिहारितोक्तेः हेमाद्रिमतेतुकृष्णापूर्वासितापरा कृष्णापूर्वयुतासितापरयुतास्यात् पंचमीतिदीपिकोक्तेः वस्तुतस्तुहारीतोक्तिरुपवासविषया प्रतिपत्पंचमीचैवसावित्रीभूतपूर्णिमा नवमीदशमीचैवनोपोष्याःपरसंयुताइतिब्रह्मवैवर्तात् यत्तु पंचमीतुप्रकर्तव्याषष्ठ्यायुक्तातुनारदेत्यापस्तंबीयं तत्स्कंदव्रतपरम् स्कंदोपवासेस्त्रीकार्यापंचमीपरसंयुतेतिवाक्यशेषादितिमाधवः तन्नागपूजाविषयमित्यनंतभट्टनिर्णयामृतादयः चमत्कारचिंतामणौच पंचमीनागपूजायांकार्याषष्ठीसमन्विता तस्यांतुतुषितानागाइतरासुचतुर्थिकेति तेननागपूजादौपरैव यत्तुमदनरत्नादिवोदासीययोः श्रावणपंचम्यतिरिक्तापूर्वेत्युक्तं श्रावणेपंचमीशुक्लासंप्रोक्तानागपंचमी तांपरित्यज्यपंचम्यश्चतुर्थीसहिताहिताइतिसंग्रहोक्तेः गणेशस्कंदयोगाप्यांक्रमान्नागःशुभाशुभः मित्रामित्रेतयोःपत्रेनागानामाखुबर्हिणाविति षट्त्रिंशन्मताच्च श्रावणपंचम्यतिरिक्तायाःनागपंचम्याश्चतुर्थीयुतत्वमुक्तं तदुपवासादिविषयं पत्रेवाहनेषष्ठीसर्वमतेस्कंदव्रतातिरिक्तापरैव युग्मवाक्यात् नागविद्धानकर्तव्याषष्ठीचैवकदाचनेतिस्कांदाच्च निर्णयामृते षष्ठीचसप्तमीचैववारश्चेदंशुमालिनः योगोयंपद्मकोनामसूर्यकोटिग्रहैःसमः सप्तमीपूर्वैवयुग्मवाक्यात् षष्ठ्या[illegible]स्कांदाच्च अष्टमीतु[illegible]कृष्णापूर्वासितापरा व्रतमात्रेष्टमीकृष्णापूर्वाशुक्लाष्टमीपरेतिमाध

वोक्तेः परयुक्शुक्लाष्टमीपूर्वयुक्कृष्णेतिदीपिकोक्तेश्च शिवशक्त्युत्सवेच कृष्णाप्युत्तरा पक्षद्वयेप्युत्तरैवशिवशक्तिमहोत्सवइतिमाधवोक्ते
दिवोदासीयेभविष्ये यदायदासिताष्टम्यांबुधवारोभवेत्क्वचित् तदातदाहिसाग्राह्याएकभक्ताशनेनृप संध्याकालेतथाचैत्रे –
प्रसुप्तेचजनार्दने बुधाष्टमीनकर्तव्याहंतिपुण्यंपुरातनं अंत्यंपद्यंहेमाद्रौनधृतं नवमीतुसर्वमतेपूर्वा युग्मवाक्यात् नकुर्यान्नवमींता
तदशम्यांतुकदाचनेतिस्कांदाच्च दशमीतुपूर्वा परावेतिहेमाद्रिः कृष्णापूर्वोत्तराशुक्लादशम्येवंव्यवस्थितेतिमाधवः वस्तुतस्तुमुख्या
नवमीयुतैवग्राह्या दशमीतुप्रकर्तव्यासदुर्गाद्विजसत्तमेत्यापस्तंबोक्तेः यत्तु संपूर्णादशमीकार्यापूर्वयापरयाथवेत्यंगिरसोक्तं तन्नव
मीयुक्तालाभेऔदयिकीग्राह्येत्येवंनेयम् अथैकादशी तत्रैकादश्युपवासोद्वेधा निषेधपरिपालनात्मकोव्रतरूपश्च तत्राद्यः नशंखे
नपिबेत्तोयंनखादेत्कूर्मसूकरौ एकादश्यानभुंजीतपक्षयोरुभयोरपीतिकौर्मदेवलाद्युक्तेः अग्निपुराणेपि गृहस्थोब्रह्मचारीचआहिता
ग्निस्तथैवच एकादश्यांनभुंजीतपक्षयोरुभयोरपीति नचात्रपर्युदासेनव्रतविधिस्तद्धेतुव्रतादिशब्दाभावात् व्रतरूपस्तुब्रह्मवैवर्ते प्राप्ते
हरिदिनेसम्यग्विधायनियमंनिशि दशम्यामुपवासस्यप्रकुर्याद्वैष्णवव्रतमिति इदंचशिवभक्तादिभिरपिकार्यं वैष्णवोवाथशैवोवाकुर्या
देकादशीव्रतमितिशिवधर्मोक्तेः वैष्णवोवाथशैवोवासौरोप्येतत्समाचरेदितिसौरपुराणाच्च सोपिद्वेधानित्यःकाम्यश्च उपोष्यैकादशीनित्यं
पक्षयोरुभयोरपीतिगारुडोक्तेः पक्षेपक्षेचकर्तव्यमेकादश्यामुपोषणमितिनारदोक्तेश्चनित्यता यदीच्छेद्विष्णुसायुज्यंश्रियंसंततिमात्म
नः एकादश्यांनभुंजीतपक्षयोरुभयोरपीतिकौर्मादिषुफलश्रुतेश्चकाम्यता उभयैकादशीव्रतंगृहस्थातिरिक्तानामेवनित्यं गृहस्थस्य
तुशुक्लायामेवव्रतंनित्यंनकृष्णायाम् एकादश्यांनभुंजीतपक्षयोरुभयोरपि वनस्थयतिधर्मोयंशुक्लामेवसदागृहीतिदेवलोक्तेः

नचानेननिषेधपालनमेववनस्थयतिविषयेउपसंह्रियतेनतुव्रतमितिवाच्यं अस्यपर्युदासेनव्रतविधिपरत्वात् अन्यथापूर्वोक्ताग्निपुराणवचनेनिषेधपालनेगृहस्थस्याधिकारोक्त्याविरोधःस्यात् निषेधस्यनिवृत्तिमात्रफलत्वेनविशेषानपेक्षणादुपसंहारायोगात् अभावस्यधर्मत्वाभावाच्च तस्मादनेनसर्वेषामेकादशीव्रतविधायिनांसामान्यवाक्यानांवनस्थयतिविषयेउपसंहारान्नगृहस्थस्यकृष्णायांनित्यव्रतप्राप्तिः कथंतर्हि संक्रांत्यामुपवासंचकृष्णैकादशिवासरे चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृहीतिनारदादिवचनेषुकृष्णानिषेधःप्राप्त्यभावादितिचेत् श्रूयतां शयनीबोधिनीमध्येयाकृष्णैकादशीभवेत् सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेतिपाद्मे गृहस्थस्य आषाढीकार्तिकीमध्यस्थायाकृष्णाविहितासापुत्रवतोनिषिध्यते अन्यकृष्णायांतुनविधिः सर्वविधीनांवनस्थयतिषूपसंहारान्ननिषेधःप्राप्त्यभावात् शयन्यादिवाक्यंत्वपुत्रगृहिगोचरमित्यनंतभट्टहेमाद्र्यादिग्रंथाः दीपिकापि असितातुशयनीबोधांतरस्थाप्यथोनस्यात्साप्रजिनोपीति मदनरत्नेभविष्ये यथाशुक्लातथाकृष्णाद्वादशीमेसदाप्रिया शुक्लागृहस्थैःकर्तव्याभोगसंतानवर्धिनी मुमुक्षुभिस्तथाकृष्णानतेतेनोपदर्शितेति निषेधपालनंकाम्यव्रतंचसर्वकृष्णायांसर्वगृहिणांभवत्येव पुत्रवांश्चसभार्यश्चबंधुयुक्तस्तथैवच उभयोःपक्षयोःकाम्यव्रतंकुर्यात्तुवैष्णवमिति नारदोक्तेः एतच्चसर्वंकालादर्शेउक्तं विधवायावनस्थस्ययतेश्चैकादशीद्वये उपवासोगृहस्थस्यशुक्लायामेवपुत्रिणः भुजेर्निषेधःकृष्णायांसिद्धिस्तस्यनतोव्रतेइति प्राच्यास्तुवैष्णवगृहस्थानांकृष्णापिनित्या नित्यंभक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः पक्षेपक्षेचकर्तव्यमेकादश्यामुपोषणं सपुत्रश्चसभार्यश्चस्वजनोभक्तिसंयुतः एकादश्यामुपवसेत्पक्षयोरुभयोरपीतिनारदोक्तेरित्याहुः पुत्रशब्दश्चापत्यमात्रवचनः नारायणवृत्तौ पुमांसएवमेपुत्राजायेरन्नित्यत्रापत्यमात्रवाचित्वोक्तेः जनयद्बहुपुत्राणीतिलिंगात्

पौत्रीमातामहस्तेनेतिमनूक्तेः पुत्र्याअपत्यमित्यर्थेतुस्त्रीभ्योढगितिपौत्रेयइत्यापत्तेः पुमान्पुत्रोजायतेइतिच उपवासनिषेधेविशेषोवायवीयेउक्तः उपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेत् नदुष्यत्युपवासेनउपवासफलंलभेत् भक्ष्यंचतत्रैवोक्तं नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचाज्यं यत्पंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेत्यलं तत्रदशमीवेधोद्वेधा अरुणोदयवेधःसूर्योदयवेधश्चेति आद्योगारुडे दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमिति अरुणोदयस्वरूपंचमाधवीयेस्कांदे उदयात्प्राक्चतस्रस्तुघटिका अरुणोदयइति यदपि उदयात्प्राग्यदाविप्रमुहूर्तद्वयसंयुता संपूर्णैकादशीनामतत्रैवोपवसेद्गृहीतिगारुडसौरधर्मादिवचनं यच्चभविष्ये आदित्योदयवेलायाःप्राङ्मुहूर्तद्वयान्विता एकादशीतुसंपूर्णाविद्धान्यापरिकीर्तितेति तदप्युपसंहारन्यायेनदंडचतुष्टयपरमेव हेमाद्रावप्येवं यत्तुब्रह्मवैवर्ते चतस्रोघटिकाःप्रातररुणोदयनिश्चयः चतुष्टयविभागोत्रवेधादीनांकिलोदितः अरुणोदयवेधःस्यात्सार्धंतुघटिकात्रयं अतिवेधोद्विघटिकःप्रभासंदर्शनाद्रवेः महावेधोपितत्रैवदृश्यतेर्कोनदृश्यते तुरीयस्तत्रविहितोयोगःसूर्योदयेबुधैरिति तदप्यवयवद्वारारुणोदयवेधविशेषपरमेवेति माधवीयमदनरत्नेच अंत्यस्तूदयवेधः तथान्येपिवेधाः हेमाद्रौमाधवीयेचगारुडे उदयात्प्राक्त्रिघटिकाव्यापिन्येकादशीयदा संदिग्धैकादशीनामवर्ज्येयंधर्मकांक्षिभिः उदयात्प्राङ्मुहूर्तेनव्यापिन्येकादशीयदा संयुक्तैकादशीनामवर्ज्येयंधर्मवृद्धये हेमाद्रौ रात्रेरंत्योष्टमोभागोप्यरुणोदयउक्तः निशःप्रांतेतुयामार्धेदेववादित्रवादने सारस्वतानध्ययनेचारुणोदयउच्यतइतिस्मृतेः अन्येके एषांसर्वपक्षाणांमुहूर्तद्वयेनक्रोडीकारान्निशःप्रांतइतिवचनाच्चरात्रिमानवशात्सार्धत्रिदं-

डादयोनेकेऽरुणोदयाः तदाहहेमाद्रिः सार्धघटिकात्रयोत्करष्टाविंशतिघटीमितरात्रिविषया महत्तरास्तुरात्रीरपेक्ष्यचतस्रोघटिकाइत्युक्तमितीत्याहुः तन्न अरुणोदयशब्दस्यानेकार्थत्वापत्तेः नचमुहूर्तद्वयमर्थः दंडद्वयैकमुहूर्तादिवेधानांतथात्वानुपपत्तेः नहितेषां यामार्धत्वमरुणोदयत्वंचास्ति मुहूर्तद्वयस्ययामार्द्धस्यचचतस्रोघटिकाइत्यनेनोपसंहाराच्चनतदर्थः नचसार्द्धंतुघटिकात्रयमित्यनेनापितदापत्तिः शंक्यातेनचतुर्दंडवेधस्यैवोक्तेः चतुर्दंडेर्धघटीदशमीसत्त्वेहिवेधस्तदर्थः द्विघटिकादौतदयोगाच्च यत्तुमतम् कियतारुणोदयवेधइत्यपेक्षायांसार्द्धघटिकात्रयनियमादरुणोदयेर्धघटिकातोन्यूनदशमीसत्त्वेनदोषइति तत्तुच्छम् द्विदंडादावपितदापत्तेः दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमिति गारुडेभविष्येचयोगमात्रनिषेधात् नारदीयेपि लववेधेपिविप्रेंद्र दशम्यैकादशींत्यजेत् सुरायाबिंदुनास्पृष्टंगंगांभइवनिर्मलं स्कांदेपि कलाकाष्ठादिगत्यैवदृश्यतेदशमीविभो एकादश्यांनकर्तव्यंव्रतंराजन्कदाचनेति माधवोप्याह सोऽयंकलादिवेधोऽरुणोदयवेधेसूर्योदयवेधेचसमानइति निगमेपि सर्वप्रकारवेधोऽयमुपवासस्यदूषकइति अतएवमाधवेन अरुणोदयाद्यदंडेऽल्पदशमीस्पर्शेसंसृष्टाकृत्स्नघटीयोगेसंदिग्धा मुहूर्तव्याप्तौसंयुक्ताउदयेसंकीर्णेत्युक्तौ अरुणोदयवेलायांदशमीयदिसंगता संपृक्तैकादशीतांतुमोहिन्यैदत्तवान्प्रभुरिति गोभिलाद्युक्तेः पूर्वोक्तगारुडादेश्च सामान्यतोविशेषतश्चारुणोदयवेधोनिषिद्धः यत्त्वष्टमभागोरुणोदयइतिहेमाद्रिणोक्तं यच्चमहत्तरारात्रीरितितत्परमतंत्वयमेवदूषितं अंतेप्युक्तं वेधतारतम्यंचदोषतारतम्यादुपपद्यतइति दोषतारतम्यंचप्रायश्चित्ततारतम्यादवगम्यते तच्चोक्तंहेमाद्रौस्मृत्यंतरे अज्ञानाद्यदिवामोहात्कुर्वन्नेकादशींनरः दशमीशेषसंयुक्तांप्रायश्चित्तमिदंचरेत् कृच्छ्रपादंनरश्चीर्त्वागांचदद्यात्सव-

त्सकाम् सुवर्णस्यार्धकंदेयंतिलद्रोणसमन्वितम् विधानांतरंतत्रैव ब्राह्मणान्भोजयेत्त्रिंशत्गांचदद्यात्सवत्सकां धरणस्यार्धकंदेयंतिलद्रोणमथापिवेति अत्रवेधतारतम्याद्व्यवस्थेतिहेमाद्रिः त्रिशःप्रांतइत्यपिदोषाधिक्यार्थमेव तस्माच्चतुर्घटिकात्मकएवारुणोदयइतिसिद्धम् तेनषट्पंचाशद्घटिकानंतरंदशमीप्रवेशेरुणोदयवेधउक्तोभवति अंत्योपितत्रैवकपर्दिनोक्तः उदयोपरिविद्धातुदशम्येकादशीयदि दानवेभ्यःप्रीणनार्थंदत्तवान्पाकशासनइति स्मृत्यंतरेपि दशम्याःप्रांतमादाययदोदेतिदिवाकरः तेनस्पृष्टंहरिदिनंदत्तंजंभासुरायतदिति तत्रारुणोदयवेधोवैष्णवविषयः तद्वाक्येषुवैष्णवग्रहणात् तत्स्वरूपंतुमाधवीयेस्कांदे परमापदमापन्नोहर्षेवासमुपस्थिते नैकादशींत्यजेद्यस्तुयस्यदीक्षास्तिवैष्णवी विष्णवर्पिताखिलाचारःसहिवैष्णवउच्यतेइति यद्यपिपित्रादेरागमदीक्षायांतन्मात्रस्यवैष्णवत्वंनतुपुत्रादेस्तथापिस्वपारंपर्यप्रसिद्धमेववैष्णवत्वंस्मार्तत्वंचमन्यंतेशिष्टाः तत्वसागरेभविष्ये यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा तुल्येतेमन्यतेयस्तुसवैवैष्णवउच्यते केचित्तुदशम्यानवमीवेधमपित्यजंतितत्रमूलंमृग्यम् उदयवेधस्तुपरिशेषात् स्मार्तगोचरः तदाहमाधवः अरुणोदयवेधोत्रवेधः सूर्योदयेयथा उक्तौद्वौदशमीवेधौवैष्णवस्मार्तयोःक्रमात् हेमाद्रिस्तुकेषांचिदर्धरात्रेपिदशमीवेधमाह अर्धरात्रेतुकेषांचिद्दशम्यावेधउच्यते कपालवेधइत्याहुराचार्यायेहरिप्रियाः नतन्ममसमतम् यस्मात्क्रियामारात्रिर्भविष्यतइति ब्रह्मवैवर्तात् अस्यार्थः अनद्यतनेलङ् इत्यत्रातीतायाःरात्रेःपश्चिमयामद्वयमागामिन्याःरात्रेःपूर्वयामद्वयंदिवसश्चसकालएषोद्यतनः सकलइत्युक्तंमहाभाष्ये सएषवर्तमानःकालएकादश्यहोरात्रउपोष्यः तन्मध्येदशमीप्रवेशेविद्धासात्याज्या अतएवहेमाद्रौ दशम्याःसंगदोषेणअर्धरात्रात्परेणतु वर्जयेच्चतुरोयामान्संकल्पार्चनयोःसदेतिदोषउक्तः चतुरोयामान्दिवसस्येत्यर्थः स्वम

त्तु रात्रेस्त्रियामत्वात्प्रहरत्रयंपूर्वशेषः तेनचतुर्थप्रहरएववेधोयुक्तः सोप्यरुणोदयएव सूर्योदयंविनानैवस्नानदानादिकःक्रमइति मार्कंडेयपुराणात् प्रत्यूषोहःर्मुखंकल्यमइतिकोशादरुणोदयमारभ्यसूर्यांशप्रवृत्तेस्तत्रैवनिषेधः तेनमतभेदाद्व्यवस्थेतिकेचित् कैमुतिकन्यायेनारुणोदयवेधस्यैवेयंस्तुतिरितितुमाधवः यस्तुदिक्पंचदशाभिस्तथेतिवेधः सउपवासातिरिक्तविषयइतिमाधवः सर्वप्रकारवेधोयमुपवासस्यदूषकः सार्धसप्तमुहूर्तस्तु योगोयंबाधतेव्रतमितिनिगमादित्यलम् अत्रमाधवमतेवैष्णवैररुणोदयविद्धात्याज्या यदात्वेकादश्येवशुद्धासतीवर्धतेद्वादशीवाउभयंवातदापरोपोष्या एकादशीद्वादशीवाधिकाचेत्त्यज्यतांदिनम् पूर्वेग्राह्यंतूत्तरंस्यादितिवैष्णवनिर्णयः इतिमाधवोक्तेः स्मार्तैस्तु सूर्योदयविद्धात्याज्या यदात्वेकादशीशुद्धासतीवर्धतेद्वादशीत्वसमान्यूनावातदागृहस्थैःपूर्वायतिभिरुत्तराकार्या प्रथमेहनिसंपूर्णाव्याप्याहोरात्रसंयुता द्वादश्यांचतथातातदृश्यतेपुनरेवच पूर्वाकार्यागृहस्थैश्चयतिभिश्चोत्तराविभोइतिस्कांदोक्तेः वर्धमानोप्येवमेवाह उभयवृद्धौतुशुद्धाविद्धावासर्वेषांपरैव संपूर्णैकादशीयत्रप्रभातेपुनरेवसा सर्वैरेवोत्तराकार्यापरतोद्वादशीयदीतिनारदोक्तेः द्वादशीमात्रवृद्धौतुशुद्धायांपूर्वैव नचेदेकादशीविष्णोर्द्वादशीपरतःस्थिता उपोष्यैकादशीतत्रयदीच्छेत्परमंपदमितिनारदोक्तेः द्वादशीमात्रवृद्धौतुशुद्धाविद्धेव्यवस्थिते शुद्धापूर्वोत्तराविद्धास्मार्तनिर्णयईदृशइतिमाधवोक्तेश्च मदनरत्नेप्येवम् यत्तु विद्धाप्यविद्धाविज्ञेयापरतोद्वादशीनचेत् अविद्धापिचविद्धास्यात्परतोद्वादशीयदीति हेमाद्रौपाद्मे वचनंतदेकादश्यावृद्धौज्ञेयम् तदुक्तंमाधवेन एकादशीद्वादशीचेत्क्रमश्च वर्द्धेतेयदा तदापूर्वदिनंत्याज्यंस्मार्तैर्ग्राह्यंपरंदिनमिति विद्धैकादश्यांद्वादशीमात्रवृद्धौचसर्वेषांपरैवतत्रैवैकादशीमात्रवृद्धौ स्म-

ह्निणः पूर्वायतेरुत्तरा पूर्वोक्तपाद्मोक्तेः एकादशीविद्धाचेत्सुकृतघ्नी विशेषतः उत्तरांतुयतिःकुर्यात्पूर्वामुपवसेद्गृहीतिप्रचेतसोक्तेः एतच्छुद्धाविद्धातुल्यमितिमाधवः त्रयोदश्यांनलभ्येतद्वादशीयदिकिंचन उपोष्यैकादशीतत्रदशमीमिश्रितापिचेतिस्कांदात् अविद्धानिनिषिद्धैश्चनलभ्यंतेदिनानितु मुहूर्तैःपंचभिर्विद्धा ग्राह्यैवैकादशीतिथिरित्यृष्यशृंगोक्तेश्च मुहूर्तपंचकमरुणोदयमारभ्यज्ञेयम् अन्यथोत्तरेऽन्हिएकादश्यभावासंभवात् यदपिहेमाद्रिणा शुद्धसमाशुद्धन्यूनावाअधिकद्वादशिकाचेत्सर्वेषांपरैवेत्युक्तं तदपिवैष्णवविषयं स्मार्तानांतुपूर्वैवेत्यविरोधः हेमाद्रिमतंतूच्यते तत्र शुद्धाविद्धाद्वयीनंदात्रेधान्यूनसमाधिकैः षट्प्रकाराःपुनस्त्रेधाद्वादश्यूनसमाधिकैरित्यष्टादशैकादशीभेदाः तत्रशुद्धाधिकन्यूनद्वादशिकाशुद्धाधिकसमद्वादशिकाचसकामैःपूर्वानिष्कामैरुत्तराकार्या प्रथमेहनिसंपूर्णेति पूर्वोक्तस्कांदात् ऊनद्वादशिकायांतुविष्णुप्रीतिकामैरुपवासद्वयंकार्यम् संपूर्णैकादशीयत्रप्रभातेपुनरेवसा लुप्यतेद्वादशीतस्मिन्नुपवासःकथंभवेत् उपोष्येद्वेतिथीतत्रविष्णुप्रीणनतत्परैरिति वृद्धवसिष्ठोक्तेः शुद्धन्यूनाशुद्धाधिकाशुद्धसमाविद्धन्यूनाविद्धसमाचाधिकद्वादशिकाचेत्सर्वेषांपरैवेतिहेमाद्रिः मदनरत्नेतुशुद्धाधिकापरा संपूर्णैकादशीयत्रेतिपूर्वोक्तेः अन्यापूर्वा शुद्धायदासमाहीनासमाहीनाधिकोत्तरा एकादशीमुपवसेन्नशुद्धांवैष्णवोऽपीतिस्कांदात् शुद्धाएकादशीउत्तराद्वादशी नचेदेकादशीविष्णोर्द्वितनारदोक्तेश्च यत्तु अविद्धापिचविद्धास्यादितिपाद्मंतच्छुद्धाधिकापरम् यत्तु संपूर्णैकादशीत्याज्यापरतोद्वादशीयदि उपोष्याद्वादशीशुद्धाद्वादश्यामेवपारणमित्यादितद्वैष्णवपरम् स्मार्तानांतुपूर्वैवेत्युक्तं विद्धन्यूनासमद्वादशिकातुमुमुक्षूणांपुत्रवतांचपरा अन्येषांपूर्वा पुत्रवतोपिपूर्वेतिमदनरत्ने विद्धन्यूनान्यूनद्वादशिकासैवसर्वैःकार्येतिहेमाद्रिः

मुमुक्षूणांपरान्येषांपूर्वैतिमदनरत्ने विद्धसमासमद्वादशिकोनद्वादशिकाचमुमुक्षुभिःपराऽन्यैःपूर्वाकार्या दशमीमिश्रितापूर्वाद्वादशीयदिलुप्यते शुद्धैवद्वादशीराजन्नुपोष्यामोक्षकांक्षिभिरितिव्यासोक्तेः मोक्षकांक्षिगृहणादन्येषांपूर्वैव सर्वत्रैकादशीकार्याद्वादशीमिश्रितानेरैः प्रातर्भवतुवामावायतोनित्यमुपोषणमिति पाद्मोक्तेः विद्धाधिकासमद्वादशिकाचसर्वेषांपूर्वैव पारणाहेनलभ्येतद्वादशीकलयापिचेत् तदानींदशमीविद्धाप्युपोष्यैकादशीतिथिरितिऋष्यशृंगोक्तेश्च माधवमतेतु अत्रगृहिणःपूर्वायतेरुत्तरा विद्धाधिकन्यूनद्वादशिकामोक्षपापक्षयविष्णुप्रीतिकामैःपराकार्या गृहस्थेनतुनक्तंकार्यम् एकादशीद्वादशीचरात्रिशेषेत्रयोदशी उपवासंनकुर्वीतपुत्रपौत्रसमन्वितइति कौर्मेदिनक्षये उपवासनिषेधात् दशम्येकादशीविद्धाद्वादशीचक्षयंगता क्षीणासाद्वादशीज्ञेयानक्तंतुगृहिणःस्मृतमितिवृद्धशातातपोक्तेश्च गृहिणःपूर्वत्रोपवासः एकादश्याः शुद्धन्यूनत्वेशुद्धसमत्वेवाद्वादश्याः न्यूनसमत्वयोरेकादश्यामुपवासः यानितु दशम्यनुगताहंतिद्वादशद्वादशीफलम् धर्मापत्यधनायूंषित्रयोदश्यांतुपारणमिति कौर्मादीनि दशमीवेधत्रयोदशीपारणयोः निषेधकानितानिविहितभिन्नपराणि अत्रमूलवचनानितद्व्यवस्थाचाकरेज्ञेया यत्तुकालहेमाद्रौ बहुवाक्यविरोधेनसंदेहोजायतेयदा द्वादशीतुतदाग्राह्यात्रयोदश्यांतुपारणमिति मार्कंडेयोक्तेः संदिग्धेषुचवाक्येषुद्वादशींसमुपोषयेत् तथा विवादेषुचसर्वेषुद्वादश्यांसमुपोषणम् पारणंचत्रयोदश्यामाज्ञेयंमामकोमुने इतिपाद्मोक्तेश्च वेधसंदेहेज्योतिर्विदामप्रतिपत्तौवापराकार्येत्युक्तं तद्वैष्णवविषयमित्यलंबहुना अथात्रोपयुक्तंकिंचिदुच्यते तत्रदशम्यामेकादशीयोगेदशमीमध्येएवभोजनंकार्यं एकादश्यांनभुंजीतेतितस्याएवनिमित्तत्वात् निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षतेइतिदेवलोक्तेश्च

किंतुएकादशीव्रतांगत्वेनपूर्वेद्युरेकभक्तविधानाद्विधिस्पृष्टेचनिषेधानवकाशान्नकाम्यव्रतांगेभोजननिषेधःप्रवर्तते तेनैकादशीमध्येपि पूर्वदिनेभोजनमित्याहुः अत्राधिकारीमाधवीयेकात्यायनोक्तः अष्टवर्षाधिकोमर्त्योह्यशीतिन्यूनवत्सरः एकादश्यामुपवसेत्पक्षयोरुभयोरपीति भविष्येब्रह्मचारीचनारीचशुक्लामेवसदागृहीति यत्तुविष्णुः पत्यौजीवतियानारीउपोष्यव्रतमाचरेत् आयुष्यंहरतेभर्तुर्नरकंचैवगच्छतीति तद्भर्त्रननुज्ञाविषयमितिप्रागुक्तम् उपवासासामर्थ्येतुमार्कंडेयकौर्मयोः एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनदानेननद्वादशिकोभवेत् अत्र एकभक्तेनयोमर्त्यउपवासव्रतंचरेदित्येकभक्तादिषूपवासशब्दस्तद्धर्मातिदेशार्थः तेनतत्प्रयुक्ताः सर्वेधर्माःसंकल्पमंत्रेचैकभक्तादिपदेनोह्यःकार्यइतिमदनरत्ने तथाऽसामर्थ्येप्रतिनिधिनाकारयेदितिप्रागुक्तं व्रताकरणेप्रायश्चित्तमाहमाधवीयेकात्यायनः अर्केपर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेदिति अथकाम्यव्रतविधिः लघुनारदीये दशम्यादिमहीपालत्रिदिनंपरिवर्जयेत् गंधतांबूलपुष्पादिस्त्रीसंभोगंमहायशाः तत्रदशम्यांविधिःकौर्मे कांस्यंमांसंमसूरांश्चचणकान्कोरदूषकान् शाकंमधुपरान्नंचत्यजेदुपवसन्स्त्रियम् तथा शाकंमांसंमसूरांश्चपुनर्भोजनंमैथुने द्यूतमत्यंबुपानंचदशम्यांवैष्णवस्त्यजेत् मदनरत्नेनारदीये अक्षारलवणाःसर्वेहविष्यान्ननिषेविणः अवनीतल्पशायिनाःप्रियासंगमवर्जिताः व्रतस्थान्याहहेमाद्रौदेवलः असकृज्जलपानाच्चसकृत्तांबूलचर्वणात् उपवासःप्रणश्येतदिवास्वापाच्चमैथुनात् अशक्तौतुमदनरत्नेदेवलः अत्ययेचांबुपानेननोपवासःप्रणश्यति अत्ययेकष्टे विष्णुरहस्ये गात्राभ्यंगंशिरोभ्यंगं तांबूलंचानुलेपनं व्रतस्थोवर्जयेत्सर्वंयच्चान्यन्ननिराकृतं एषुप्रायश्चित्तमुक्तंनिर्णयामृते संग्रहे स्तेनहिंसकयोःसख्यंकृत्वास्ते

स्यंचहिंसकं प्रायश्चित्तंव्रतीकुर्याज्जपेन्नामशतत्रयं मिथ्यावादेदिवास्वापेबहुशोंबुनिषेवणे अष्टाक्षरंव्रतीजप्त्वाशतमष्टोत्तरंशुचिः ॐनमोनारायणायेत्यष्टाक्षरः तत्रैवपैठीनसिः तांबूलचर्वणेस्त्रीसंभोगेमांसानिषेवणे व्रतलोपेनचेत्कुर्यात्कृष्णावद्भुजिवर्जनमिति कृष्णैकादशीवद्भोजननिषेधमात्रपरिपालनेतु तांबूलचर्वणादावपिनदोषइत्यर्थः संभोगोऋतुकालादन्यत्र रेतःसेकात्संसंभोगस्मृतेऽन्यत्रक्षयःस्मृतइतिकात्यायनोक्तेः हेमाद्रौवसिष्ठः उपवासेतथाश्राद्धेनकुर्याद्दंतधावनं दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलं काष्ठग्रहणान्मृल्लोष्ठाद्यनिषेधइति हेमाद्रिः विष्णुरहस्ये श्राद्धोपवासदिवसेखादित्वादंतधावनं गायत्र्याशतसंपूतमंबुप्राश्यविशुध्यति निर्णयामृतेव्यासः वर्जयेत्पारणेमांसंव्रताहेप्यौषधंसदेति एकादश्यांश्राद्धप्राप्तौमाधवीये कात्यायनआह उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् उपवासंतदाकुर्यादाघ्रायपितृसेवितं मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदि अभ्यर्च्यपितृदेवांश्चआजिघ्रेत्पितृसेवितमिति हेमाद्र्यादिसर्वनिबंधेष्वेवं एतेनएकादशीनिमित्तकंश्राद्धंद्वादश्यांकार्यमितिवदंतः परास्ताः किंचमहालये सपक्षःसकलःपूज्यःश्राद्धषोडशकंप्रतीतिश्रुतंषोडशत्वं पौषैकादश्यांचमन्वादिश्राद्धंक्षयाहापरिज्ञानेचनतत्पक्षैकादश्यांविहितंश्राद्धंबाधितमेवस्यात् यदपिस्मृतिचंद्रिकास्थंपठंति अन्नाश्रितानिपापानितद्भोक्तुर्दातुरेवच मज्जंतिपितरस्तस्यनरकेशाश्वतीःसमाइति तस्यापिरागप्राप्तभुजिगोचरस्यैवेदंश्राद्धंगोचरयतांमहत्साहसमित्यलम् यापिअहृतश्राद्धनिचयाजलपिंडविनाकृताइतिलघुनारदीये एकादश्यांश्राद्धादिनिषेधः समातापितृभिन्नविषयः पूर्ववाक्येतद्ग्रहणात् निचयःप्रतिग्रहः अव्रतघ्नान्याहमदनरत्नेदेवलः सर्वभूतभयंव्याधिःप्रमादोगुरुशासनं अव्रतघ्नानिपठ्यंतेसकृदेतानिशास्त्र

तः स्कांदेपि अष्टैतान्यव्रतघ्नानि आपोमूलंफलंपयः हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधं इदंचातिसंकटविषयं नारदीये अनु
कल्पोनृणांप्रोक्तः क्षीणानांवरवर्णिनि मूलंफलंपयस्तोयमुपभोग्यंभवेच्छुभे नत्वेवभोजनंकेचिदेकादश्यांबुधैःस्मृतमिति
अस्यापवादः शयनेचप्रदुत्थानेमत्स्यार्ध्यपरिवर्तने नरोमूलफलाहारीहृदिशल्यंसमार्पयेत् एतेचाविरोधिनोनिर्णयाः सर्वव्रते-
षुज्ञेयाः तत्रैकादश्यांसंकल्पः गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः उपवासंतुगृण्हीयाद्यद्वावार्येवधारयेदिति माधवीयेवाराहो
क्तेः मंत्रस्तुविष्णूक्तः एकादश्यांनिराहारःस्थित्वाहमपरेह्नि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युतेति शैवादीनांतुहे
माद्रौसौरपुराणे सावित्र्याप्यथवानाम्ना संकल्पंतुसमाचरेत् शिवादिगायत्र्योयजुर्वेदेप्रसिद्धाः वाराहे इत्युच्चार्यततोवि
द्वान्पुष्पांजलिमथार्पयेत् ततस्तज्जलंपिबेत् अष्टाक्षरेणमंत्रेणत्रिर्जप्तेनाभिमंत्रितं उपवासफलप्रेप्सुःपिबेत्पात्रगतंज
लमितिकात्यायनोक्तेः मध्यरात्रेउदयेवादशमीवेधेरात्रौसंकल्पइतिमाधवः दशम्याःसंगदोषेणअर्धरात्रात्परेणतु वर्जयेच्चतुरोयामान्सं
कल्पार्चनयोस्तदा विद्धोपवासेनश्वस्तुदिनंत्यक्त्वासमाहितः रात्रौसंपूजयेद्विष्णुंसंकल्पंचतदाचरेदितिनारदीयोक्तेः तत्रैवपूजामभिधा
य देवस्यपुरतःकुर्याज्जागरंनियतोव्रती द्वादश्यांनिवेदनमंत्रउक्तःकात्यायनेन अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसीदसुमुखो
नाथज्ञानदृष्टिप्रदोभवेति नारदीये ब्राह्मणान्भोजयेच्छक्त्यादद्याद्वैदक्षिणांततः स्कांदेपि कृत्वाचैवोपवासंतुयोश्नीयाद्द्वाद-
शीदिने नैवेद्यंतुलसीमिश्रंहत्याकोटिविनाशनं द्वादश्यांचवर्ज्यान्याहबृहस्पतिः दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने क्षौद्रंकां
स्यामिषंतैलंद्वादश्यामष्टवर्जयेत् हेमाद्रौब्रह्मांडपुराणे पुनर्भोजनमध्वायोभारआयासमैथुने उपवासफलंहन्युर्दिवानिद्राचपं

चमी स्कांदे परान्नं कांस्य तांबूले लोभं वितथभाषणम् वर्जयेद्दिनशेषः विष्णुधर्मे असंभाष्यान्हि संभाष्य तुलस्यत्तसिकादलं आमलकयाः फलं वापि पारणे प्राश्य शुद्ध्यति बृहन्नारदीये रजस्वलां च चांडालं महापातकिनं तथा सूतिकां पतितं चैव उच्छिष्टं रजकादिकं व्रतादिमध्ये शृणुयाद्यद्येषां ध्वनिमुत्तमः अष्टोत्तरसहस्रं तु जपेद्वै वेदमातरं एतद्व्रतं सूतकेपि कार्यं सूतके मृतके चैव न त्याज्यं द्वादशीव्रतमिति विष्णूक्तेः तत्र त्यक्तं दानादि सूतकांते कार्यं सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं दानं दत्वा विधानेन व्रतस्य फलमश्नुत इति मात्स्योक्तेः रजोदर्शनेपि कार्यम् एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति पुलस्त्योक्तेः यदा द्वादश्यां श्रवणर्क्षं तदा शुद्धामप्येकादशीं त्यक्त्वा तत्रैवोपवासः कार्यः शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता तयोरेवोपवासः स्यात् त्रयोदश्यां च पारणमिति नारदीयोक्तेः एते च नियमाः काम्यव्रते नियताः नित्यव्रते सति संभवे कार्याः शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणमिति कात्यायनोक्तेः अशक्तौ तु माधवीये ब्रह्मवैवर्ते इति विज्ञाय कुर्वीतावश्यमेकादशीव्रतं विशेषनियमाशक्तो ऽहोरात्रं भुजिवर्जित इति अथाष्टौ महाद्वादश्यः तत्र शुद्धाधिकैकायुता द्वादशी उन्मीलिनी संज्ञा द्वादश्येव शुद्धाधिका वर्धते चेत्सा वंजुली वासरत्रयस्पर्शिनी त्रिस्पृशा अथ पर्वणः संपूर्णाधिकत्वे पक्षवर्धिनी पुष्यर्क्षयुता जया श्रवणयुता विजया पुनर्वसुयुता जयंती रोहिणीयुता पापनाशिनी एताः पापक्षयमुक्तिकाम उपवसेत् अत्र मूलं हेमाद्रौ ज्ञेयं एकादशीद्वादश्योरेकत्वे तत्रैवोपवासः पार्थक्ये तु शक्तस्योपवासद्वयं एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्यात् अशक्तौ तु द्वादश्यामेव एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति तत्रैवोक्तेः यदा त्वल्पा द्वादशी तदुक्तं मात्स्ये यदा भवति अल्पापि द्वादशी पारणादिने उषःकाले द्वयं कुर्यात् प्रातर्मध्याह्निकं तदा नारदीयेपि अल्पायामथ वि

प्येवंद्वादश्यामकृणोदये स्नानार्चनक्रियाःकार्यादानहोमादिसंयुताइति संकटेतुमाधवीयेदेवलः संकटेविषमेप्राप्तेद्वादश्यांपारयेत्कथं अद्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृदिति संकटेत्रयोदशीप्राप्तप्रदोषादौ अत्रकेचिदाहुः अपकर्षवाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनांश्रौतत्वेनापकर्षायोगादिति द्वादश्यांचप्रथमपादमतिक्रम्यपारणंकार्यं द्वादश्याःप्रथमःपादोहरिवासरसंज्ञितः तमतिक्रम्यकुर्वीतपारणंविष्णुतत्परइतिनिर्णयामृतेमदनरत्नेचविष्णुधर्मोक्तेः अत्रकेचित्संगिरंते यदाभूयसीद्वादशीतदापिप्रातर्मुहूर्तत्रयेपारणंकार्यं सर्वेषामुपवासानांप्रातरेवहिपारणमितिवचनादिति अस्मद्गुरवस्तु बहूनांकर्मकालानांविनाकारणंबाधापत्तेः प्रागुक्तवचनेनच अल्पद्वादश्यामेवापकर्षविधानादपराह्णएवकार्यम् प्रातःशब्दस्तुसायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमितिवदपराह्णवाचित्वेप्युपपन्नः नचवाक्यवैयर्थ्यंपुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः प्रमादेनएकादश्युपवासातिक्रमे अपरार्केवाराहे एकादशीविप्लुताचेद्द्वादशीपरतःस्थिता उपोष्याद्वादशीतत्रयदीच्छेत्परमंपदमिति केश्चित्तुविष्णुनाचेदितिपठितम् अत्राविरोधिनोनियमाः सर्वव्रतेषुबोद्धव्याः अन्येचनवरात्रेवक्ष्यंतेइतिदिक् इतिश्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृतेनिर्णयसिंधौएकादशीनिर्णयः ७

द्वादशीतुपूर्वैवयुग्मवाक्यात् द्वादशीतुप्रकर्तव्याएकादश्यायुताप्रभोइतिस्कांदाच्च त्रयोदशीतुसर्वमतेशुक्लापूर्वाकृष्णोत्तरा त्रयोदशीतिथिःपूर्वःसितोऽथाऽसितःपश्चादितिदीपिकोक्तेः शुक्लात्रयोदशीपूर्वापराकृष्णात्रयोदशीतिमाधवाच्च चतुर्दशीसर्वमतेकृष्णापूर्वाशुक्लोत्तरा उपवासेतुद्वयमपिपरेतिमदनरत्ने पौर्णमास्यमावास्येतुसावित्रीव्रतंविनापरेग्राह्ये भूतविद्धेनकर्तव्येदर्शपूर्णेकदाचन वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात् अमायांयोगविशेषमाहाऽपरार्केशातात

पः अमावास्यांप्रपेद्वारोयदाभूमिसुतस्यवै जान्हवीस्नानमात्रेणगोसहस्रफलंलभेत् अमावैसोमवारेणरविवारेणसप्तमी चतुर्थीभौमवारेणविषुवत्सदृशंफलं तत्रैवव्यासः सिनीवालीकुहूर्वापियदिसोमदिनेभवेत् गोसहस्रफलंदद्यात्स्नानंवैमौनिनाकृतम् हेमाद्रौब्रह्मन्मनुः श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके यद्यमारविवारेणव्यतीपातःसउच्यते नागदैवतंआश्लेषा मस्तकोमृगशिरः प्रथमपादइत्यन्ये सचसर्वेषां अथेष्टिकालः गोभिलः पक्षान्ताउपवस्तव्याःपक्षाद्योऽभियष्टव्याइति उपवासोन्वाधानम् तत्र मध्यान्हेतत्पूर्वंवापर्वप्रतिपत्संधौतदह्नियागः पूर्वाण्हेऽथवामध्यान्हेयदिपर्वसमाप्यते उपोष्यतत्रपूर्वेद्युस्तदहर्यागइष्यतइतिलौगाक्षिवचनात् तत्रद्वेधाविभागः आवर्तनात्तुपूर्वाण्होह्यपराण्हस्ततःपरः मध्यान्हस्तुतयोःसंधिर्यदावर्तनमुच्यतइति मदनरत्नेवचनानु मध्यान्हादूर्ध्वंसंधौमाधवमतेपरेऽन्हियागः अपराण्हेऽथवारात्रौयदिपर्वसमाप्यते उपोष्यतस्मिन्नहनिश्वोभूतेयागइष्यतइति लौगाक्षिणोक्तेः हेमाद्रिस्त्वपराण्हसंधावपिपरदिनेप्रतिपच्चतुर्थांशेचंद्रोदयेचसतिद्वितीयादिघट्यंतक्षयेसतिपूर्वेद्युर्यागः पर्वणोंशेद्वितीयेतुयष्टव्यंतुद्विजातिभिः द्वितीयासंहितंयस्मादृषयस्त्वाश्वलायनाइति द्वितीयेत्वितिकैमुतिकन्यायेनतुर्यांशपरम् तुरीयेतित्रिशूलपाणौ पाठःस्पष्टार्थएव तथा भूतापञ्चदशीपूर्णाद्वितीयाक्षयगामिनी चरुरिष्टिरमायांस्यात्कृतेकव्यादिकीक्रियेतिबोधायनवचनाच्चेत्सूचितवान् मदनरत्नेपि चतुर्दशीचतुर्थांशाअमावास्यानदृश्यते श्वोभूतेप्रतिपच्चेत्स्यात्पूर्वांतेनैवकारयेदिति यत्तुमाधवः यस्तुवाजसनेयीस्यात्तस्यसंधिदिनात्पुरा नक्वाप्यन्वाहितिःकिंतुसदासंधिदिनेहिसेत्याह यच्चकालादर्शेप्युक्तं आवर्तनादधः संधिर्यद्यन्वाधायतदह्नि परेद्युरिष्टिरित्याहुर्विप्रावाजसनेयिनइति यच्चमदनरत्ने मध्यंदिनात्स्यादहनीहयस्मिन्प्राक्पर्वणःसं-

धिरियंतृतीया सावर्विकावाजसनेयिमत्यान्तस्यास्तुपोष्याथपरेद्युरिष्टिरिति एतत्पौर्णमासीपरमितितत्रैव आवर्तनोर्ध्वंसर्वांगस्तद्वा
श्रौवासमासेद्दे मध्यान्हादर्वाक्समाप्तातृतीयेत्यर्थः तत्कर्कभाष्यदेवजानीश्रीअनंतभाष्यादिसकलतच्छाखीयग्रंथविरोधात्तृच्छा-
नादरान्नोपेक्ष्यम् पौर्णमास्यांविशेषमाहकात्यायनः संधिश्चेत्संगवादूर्ध्वंप्राक्पर्यावर्तनाद्रवेः सापौर्णमासीविज्ञेयासद्यस्कालवि
धौनरैः अमायांविशेषमाहबोधायनः द्वितीयात्रिमुहूर्ताचेत्प्रतिपद्यापराण्हिकी अन्वाधानंचतुर्दश्यापरतःसोमदर्शनात् कात्या
यनस्य यजनीयेऽन्हिसोमश्चेद्वारुण्यांदिशिदृश्यते तत्रव्याहृतिभिर्हुत्वादंडंदद्याद्द्विजातयइति एतच्चबोधायनवाजसनेयिविषयं
तैत्तिरीयसूत्रेतुचंद्रदर्शनेऽपियागउक्तः एषावैसुमनानामेष्टिर्यमद्येजानन् पश्चाच्चंद्रमाअभ्युदेत्यस्मिन्नेवास्मैलोकेऽर्धुकंभवती
ति श्रुत्यंतरेऽपि यदहःपश्चाच्चंद्रमाअभ्युदेतितदहर्यजन्तिमांल्लोकानभ्युदेतीति इदंबह्वृचापस्तंबविषयं मदनरत्नेप्येवम् आ
पस्तंबभाष्यार्थसंग्रहेप्येवम् अतःपक्षद्वयस्यस्वस्वसूत्राद्व्यवस्थेतितत्त्वम् दूषयंस्त्वाश्वलायनाइतितुपूर्वापहसंधिविषयमितिमाध
वः शेषपर्वणीष्टौविशेषमाहमाधवीयेगार्ग्यः प्रतिपद्यप्रविष्टायांयदिचेष्टिःसमाप्यते पुनःप्रणीयकृत्स्नेष्टिःकर्तव्यायागवित्तमैः
गृह्याग्नेर्नायंनियमइतिमदनपारिजातः एवंपर्वांत्यांशःप्रतिपदस्त्वाद्योंऽशोयागकालःउक्तः क्वचित्प्रतिपत्तुर्यांशोऽपियागः संधिर्य
द्यपराण्हेस्यात्तद्यागंप्रातःपरेऽहनि कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यतीतिवृद्धशातातपोक्तेः एतत्पूर्णिमापरमितिमदनरत्ने पर्वणि
प्रतिपदःक्षयस्यवृद्धेश्चार्द्धंप्रक्षिप्यसंधिर्ज्ञेयः तदाहमाधवः वृद्धिःप्रतिपदोयास्तितदर्धंपर्वणिक्षिपेत् क्षयस्यार्द्धंतयाक्षिप्त्वासं
धिर्निर्णीयतांसदेति कात्यायनोपि परेऽन्हिघटिकान्यूनास्तथैवात्यधिकाश्चयाः तदर्धंकृत्वापूर्वस्मिन्ह्रासवृद्धीप्रकल्पयेदिति

एवंस्मार्तस्थालीपाकेपिज्ञेयम् तत्रेष्टिस्थालीपाकावाधानगृहप्रवेशनीयहोमानंतरभाविन्यांपौर्णमास्यांप्रारंभणीयोनतुदर्शे यद्यारंभेमलमासपौषमासगुरुशुक्रास्तादिभवतितदाप्यारंभः कार्यः यानितु उपरागोधिमासश्च यदिप्रथमपर्वणि तथामलिम्लुचेपौषेनान्वारंभणमिष्यते गुरुभार्गवयोर्मौढ्येचंद्रसूर्यग्रहेतथेतिसंग्रहवचनानितानि आलस्यादिनातिक्रांतशुद्धकालप्रारंभविषयाणि नामकर्मचदर्शेष्टिंयथाकालंसमाचरेत् अतिपातेसतितयोः प्रशस्तेमासिपुण्यभ इत्यपरार्केगर्गवचनादितिप्रयोगपारिजाते उक्तंचैतत्प्रयोगरत्नेभट्टैः कालादर्शेतु नामकर्मचजातेष्टिर्मितिपाठः याज्ञिकास्तु आधानानंतरापौर्णमासीचेन्मलमासगा तस्यामारंभणीयादीन्नकुर्वंतिकदाचनेतित्रिकांडमंडनवचनाच्छुद्धकालएवविकृतीष्टिंकृत्वारंभंकुर्यादित्याहुः कालादर्शेस्मृतिसंग्रहेपि आरंभंदर्शपूर्णेष्ट्योरग्निहोत्रस्यचादिमं प्रतिष्ठाःपंचकूर्माद्यामलमासेविवर्जयेदिति अथविकृतीष्टिः तत्रापस्तंबः यदीष्ट्यायदिपशुना यदिसोमेनयजेत सोमावास्यायांपौर्णमास्यांचेति अत्रप्रकृतितः कालेसिद्धेपिसद्यस्कालताविधेयातृतीयायांसांगत्वेनोक्तेः अत्रपौर्णमास्यमावास्याशब्दाभ्यांतदत्यक्षणोगृह्यते तेनतदत्यहोरात्रइत्यर्थमाहरामांडारः माधवोपि इष्ट्यादिविकृतिःसर्वापर्वण्येवेतिनिर्णयइति अत्रविशेषमाहत्रिकांडमंडनः कात्यायनश्च आवर्तनात्प्राग्यदिपर्वसंधिः कृत्वातुतस्मिन्प्रकृतिंविकृत्याः तदैवयागः परतोयदिस्यात्तस्मिन्विकृत्याःप्रकृतेःपरेद्युरिति धूर्तस्वाम्यादयोप्येवमाहुः यइष्ट्येतिसांगायाविकृतेःपर्वकालत्वादावर्तनात् प्राक्संधौसंधिमभितोयजेतेतिप्रकृतेःप्रतिपदिसमाप्तिनियमात्प्रकृत्यनंतरंप्रतिपदिविकृत्ययोगात्पूर्वेद्युर्विकृतिरित्युक्तं तंत्ररत्नेपार्थसारथिना यद्यपिप्रकृतेःपूर्वत्वादपूर्वमंतेस्यादित्यापस्तंबेनोक्तं तथापिहेतुवादेनश्रुतिमूलत्वाभावादंगवासमभिव्या-

हारादीति वदप्रामाण्यमितितदाशयः आग्रयणेतुविशेषंवक्ष्यामः अन्वारंभणीयातुचतुर्दश्यांकार्येतिहिरण्यकेशिसूत्रे।आग्निदत्तीये अन्येषांपर्वण्येव पशौसोमेचकालांतरमप्याहबौधायनः आमावास्येनवाहविषेष्ट्वानक्षत्रेचेति शुक्लपक्षेकृत्तिकादिविशाखांतेषुदेवनक्षत्रेष्विति केशवस्वामीव्याचख्यौ चातुर्मास्येष्वपिद्वादशाहयथाप्रयोगपक्षयोर्नक्षत्रेष्वप्यारंभः यावज्जीवसांवत्सरप्रयोगयोस्तु फाल्गुन्यांचैत्र्यांवारंभः पशौतुविशेषमाहकात्यायनः अर्धादन्होभवतिनियतंपर्वसंधिः परस्तात्तत्कृत्वातस्मिन्नहनितुपशुःसद्यएवह्यहर्वा आरभ्याथप्रकृतिरथचेत्पर्वसंधिः पुरस्तात्तत्कृत्वातस्मिन्प्रकृतिमथतुस्यात्सपशुःसद्यएव अधिकारपशुस्त्वग्नीषोमीयेणसवनीयेनवासमानतंत्रोवाकार्यइतित्रिकांडमंडनः सोमेत्वाहापस्तंबः अमावास्यायांदीक्षायजनीयेवामावास्यायायजनीयेवासुत्यमहः पौर्णमास्यांदीक्षायजनीयेवापौर्णमास्यांयजनीयेवासुत्यमहरिति लाट्यायनसूत्रेपि पूर्वपक्षस्यप्रथमेहनिदीक्षेतहस्तावानक्षत्रयोगेचेति पूर्वपक्षः शुक्लपक्षः नक्षत्रयोगेचेत्यस्ययमर्थः चैत्र्यादिपूर्णिमायाश्चित्रानक्षत्रयोगेदीक्षेतेति आधानंतुपर्वणिनक्षत्रेषुचोक्तम् तत्रपर्वनक्तंगार्हपत्यमादधीतेत्यादिकर्मकालव्यापिग्राह्यम् दिनद्वयेतत्वेपरंग्राह्यं संकल्पस्यपर्वणिलाभात् पूर्वनक्षत्रयोगेतदेवग्राह्यम् यत्रत्रीणिसन्निपतितान्यृतुर्नक्षत्रंचपर्वतत्समृद्धंविप्रतिषेधऋतुर्नक्षत्रंचबलीयइति हिरण्यकेशिसूत्रात् ऋतुर्वसंतेब्राह्मणोग्नीनादधीतेत्यादिः रेणुकारिकायांतु माघादिपंचमासेषुश्रावणेवाश्विनेतथा मार्गशीर्षेशुक्लपक्षेआधानमथकारयेदित्युक्तं अत्रमूलंमृग्यम् आधाननक्षत्राणित्वापस्तंबसूत्रेकृत्तिकारोहिणीमृगशीर्षपुनर्वसुपुष्यपूर्वोत्तरापूर्वाषाढोत्तराषाढाहस्तचित्राविशाखाऽनुराधाश्रवणोत्तराभाद्रपदाइति सोमपूर्वाधानेविशेषमाहापस्तंबः सोमेनयक्ष्यमाण

आदधानोनर्तून्नसूक्षेन्ननक्षत्रमिति अत्रप्रकरणादाधानकालबाधः तेनसोमस्यवसंतकालतानबाध्यतइति रुद्रदत्तवृत्तौनारायणवृत्तौचोक्तम् तंत्ररत्नेवार्त्तिकेच तवाएतेउभयेअपहतपाप्मानोऋतवः एषवाउद्यन्नादित्यएषांपाप्मनोपहंता यदेवैनंकदाचनयज्ञमुपनमेत्तथादधीतेत्यत्रोत्तरायणरूपंदैवंदक्षिणायनरूपंचपित्र्यमित्युभयमृतुत्रयंसोमाधानेशतपथेनिषिद्धंविहितम् तदेकवाक्यतयाशाखांतरेनर्तून्नसूक्षेदित्यत्रसोमकालबाधएव आधानकालबाधस्य यदेवैनंश्रद्धोपनमेत्तदादधीतेत्यस्याशाखायांवाक्यांतरेणसिद्धत्वात्सोमकालबाधार्थमेवेदमित्युक्तं धूर्तस्वामीतु सोमस्यापियऋतुस्तस्यापिनसूक्षेदितिलिखनादुभयकालबाधंमन्यते श्रीरामांडारस्तु कालांतरविधानंवासर्वकालानादरोवेति पक्षद्वयमुक्तवान् तत्राद्येकृत्तिकादिकालांतरस्ययथाधानेवसंताद्यबाधेनविधानम् तथासोमेप्युदगयनपूर्वपक्षपुण्याहसन्निपातेयज्ञकालोनादेशइति छंदोगसूत्रोक्तोदगयनबाधेनसोमाभिसंधिरूपकालांतरविधानादुदगयनंत्वपेक्षतइत्युक्तम् द्वितीयपक्षेतु यदेवैनंयज्ञउपनमेदिति सर्वकालानादरउक्तइतिभरद्वाजसूत्रात्सर्वशब्दस्यचविश्वजित्सर्वपृष्ठइतिवद्बहुत्वारम्भयोगात् सर्वकालबाधइति तेनदक्षिणायनेपिभवतीत्युक्तम् षड्गुरुभाष्येदैवत्रातभाष्येतंत्ररत्नेच षट्स्वपिऋतुषुभवतीत्युक्तमितिदिक् श्राद्धेत्वमावास्यात्रेधाविभक्तदिनतृतीयांशेयोऽपराण्हभागस्तद्व्यापिनीसाग्निकेग्राह्या पिंडान्वाहार्यकंश्राद्धंक्षीणेराजनिशस्यते वासरस्यतृतीयेंशेनातिसंध्यासमीपतइति कात्यायनोक्तेः दर्शश्राद्धंतुयत्प्रोक्तंपार्वणंतत्प्रकीर्त्तितम् अपराण्हेपितॄणांचतत्रदानंप्रशस्यतइति शातातपोक्तेश्च दिनद्वयेतत्सत्त्वेसर्वापराण्हव्यापीदर्शोग्राह्यः यद्युभयेद्युरेषविहितःसर्वापराण्हास्थ्यतइतिदीपिकोक्तेः यत्तुकार्ष्णाजिनिः

भूतविद्धाममावास्यांमोहादज्ञानतोपिवा श्राद्धकर्मणियेकुर्युस्तेषामायुःप्रहीयतेइति तदपराण्हेचतुर्दशीवेधपरमिति श्राद्धहेमाद्रिः
अपराण्हव्याप्तिपरमितिमाधवः दिनद्वयेऽपराण्हव्याप्त्यभावेंशतोव्याप्तौचतिथिक्षयेपूर्वेतिहेमाद्रिः यदाचतुर्दशीयामंतुरीयमनुपूर
येत् अमावास्याक्षीयमाणातदैवश्राद्धमिष्यतइतिकात्यायनोक्तेः चतुर्दश्याश्चतुर्थेयामंदर्शःपूरयेत् चतुर्दशीयामंयत्रसस्यादि
त्यर्थः क्षीयमाणापरदिनेऽपराण्हव्यापिनीनेत्यर्थः व्यतिरेकमाह वर्धमानाममावास्यांलक्षयेदपरेहनि यामांस्त्रीनधिकान्वापि
पितृयज्ञस्ततोभवेत् ततःश्राद्धंच दिनद्वयेऽपराण्हव्याप्त्यादौतिथिद्वैधेच हारीतः त्रिमुहूर्ताचकर्तव्यापूर्वाखर्वाचबह्वृचैः कुहूर
ध्वर्युभिःकार्यायथेष्टंसामगीतिभिः त्रिमुहूर्ताभावेतुपूर्वानेत्यर्थः पिंडपितृयज्ञस्तुकात्यायनैर्यागदिनात्पूर्वेद्युःकार्यः पूर्वोयाग-
लात्पिंडपितृयज्ञइतितत्सूत्रात् व्याख्यातंचैतत्कर्काचार्यैः पूर्वएवदर्शात्पिंडपितृयज्ञोनपश्चात् कुतः अंगत्वात् तथाचश्रुतिः
तस्मात्पूर्वेद्युःपितृभ्यःक्रियतउत्तरमहर्देवान्यजंतइति पूर्वेद्युःपितृभ्योयज्ञंनिष्टणीयप्रातर्देवेभ्यःप्रतनुतइतिचेतेनतन्मतेअंगमे
वासौ तदुक्तम् अंगवासमभिव्याहारादिति तेनकर्कमतेचतुर्दशीयुक्तदर्शेपिंडपितृयज्ञइति श्रीअनंतभाष्येतुपरेद्युरित्युक्तम्
अत्रद्वैधाप्याचारोदृश्यते आपस्तंबानांतुपरदिनेमुहूर्तमपिदर्शसत्वेतत्रैवपितृयज्ञः तदाहआपस्तंबः अमावास्यायांयदहश्चंद्रम
संनपश्यंतितदहःपिंडपितृयज्ञंकुरुतइति अस्यरुद्रदत्तीयाव्याख्यापिंडैर्युक्तःपितृयज्ञःपिंडपितृयज्ञःसचकर्मांतरंनतुदर्शशेषः यथावक्ष्य
ति पितृयज्ञःस्वकालविधानादंगस्यादिति तंचयदहश्चंद्रमसंनपश्यतिपंचदश्यांप्रतिपदिवातदहःकुरुते यदहस्तयोःसंधिरत-
दहरित्यर्थइति रामांडारोप्याह पिंडपितृयज्ञस्तुपर्वसंधिमहोरात्रापराण्हइति अतःपर्वसंधिदिनेपितृयज्ञः शतपथश्रुतिरपि

यदेवैषनपुरस्तान्नपश्चाद्दृश्यतेथपितृभ्योददातीति पूर्वसंधिदिनेहिपूर्वतः पश्चाद्वाचंद्रोनदृश्यतएवेत्यर्थः सत्याषाढोपि पितृयज्ञंप्रक्रम्यदृश्यमानेत्वपोह्यश्वोभूतेयजतइत्याह हेमाद्रिस्तु अमावास्याशब्दस्तिथिवचनएव पूर्वोक्तापस्तंबसूत्रेयदुक्तम् नपश्यंतीतितत्रक्षयोभिप्रेतः अतश्चतुर्दश्यांचंद्रमसश्चक्षीणत्वात्तदुक्तंदर्शेपितृयज्ञः पितृयज्ञंतुनिर्वर्त्यविप्रश्चंद्रक्षयेऽग्निमानितिमनूक्तेः यदुक्तंयदहस्त्वेवदर्शनंनैतिचंद्रमाः तत्क्षयापेक्षयाज्ञेयंक्षीणेराजनिचेत्यपीति यदुक्तंदृश्यमानेपितच्चतुर्दश्यपेक्षयेतिचकात्यायनोक्तेः दृश्यमानेप्येकइतिगोभिलोक्तेः तस्यांसंध्यागतःसोमोमृणालमिवदृश्यते अपराण्हेक्षयस्तस्यापिंडानांकरणंध्रुवमितिहारीतोक्तेश्च चंद्रक्षयकालश्चोक्तःकात्यायनेन अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचंद्रमाः अमावास्याष्टमेंशेतुपुनःकिलभवेदणुरिति तेनपूर्वेद्युरेवपितृयज्ञइत्यूचिवान् कर्काचार्यैरपि अपराण्हेपिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायामितिकात्यायनसूत्रेऽदर्शनेनक्षयएवोक्तः तस्मिन्क्षीणेददातीतिश्रुतेः अतस्तन्मतेचतुर्दशीयुक्तदर्शेपितृयज्ञेसतिपरदिनेयागोर्थात्सिद्धः तदेतत्सर्वोत्कृष्टमपिहेमाद्रिकर्कादिव्याख्यानमापस्तंबैरनभ्युपगमात्कातीयबौधायनादिविषयम् आश्वलायनानामपिशेषपर्वणिपिंडपितृयज्ञः तथाचसूत्रम् अमावास्यायामपराण्हेपिंडपितृयज्ञइति अत्रनारायणवृत्तिः अमावास्याशब्दः प्रतिपत्पंचदश्योःसंधिवचनोप्यत्रापराण्हशब्दसमन्वयात्तद्युक्तेहोरात्रेवर्तते तस्यापराण्हेन्हश्चतुर्थेभागेपिंडपितृयज्ञःकार्यः औपवसथ्ययजनीयवाहनिषिद्धात्वहोरात्रसंधौतिथिसंधिःस्यात्तदौपवसथ्यएवाहनिक्रियतइति अतएवमुहूर्तमप्यमावास्याप्रतिपद्यपिचेद्भवेत् तदृत्तमक्षयंज्ञेयंपर्वशेषंतुपर्ववदितिहेमाद्रौवचनंपिंडपितृयज्ञपरमुक्तंप्रयोगपारिजाते

अयंच स्मार्ताग्निमता संपूर्णे दर्शे श्राद्धव्यतिषंगेण कार्यः व्यतिषंगो नामोभयोः सहानुष्ठानम् एतच्च स्थालीपाकेन सह पिंडायज्ञस्येति सूत्रे वृत्तिकृतोक्तम् खंडपर्वणि तु केचिदाहुः पूर्वेन्हि पिंडपितृयज्ञव्यतिषंगेण श्राद्धं कृत्वा परेन्हि केवलः पिंडपितृयज्ञः कार्यः वृत्तिकृता त्वान्वाष्टक्यंच पूर्वेद्युर्मासि मास्यथ पार्वणं काम्यामाभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमीमित्यदाहृत्य पूर्वेषु चतुर्षु स्थालीपाकादुद्धृत्याग्नौकरणमित्युक्ते दर्शश्राद्धस्थालीपाकौ नियताविति गम्यते स्थालीपाकश्चापि पितृयज्ञ एवेति पूर्वदिने व्यतिषंगः प्रसिद्धः प्रयोगपारिजाते तु वार्षिकश्राद्धादर्शेपि व्यतिषंग उक्तः किंतु तद्दर्शश्राद्धस्य न्यायविदस्त्वाहुः सूत्रस्य वृत्तेश्च संपूर्णदर्शविषयत्वात् खंडपर्वणि पूर्वदिने केवलं श्राद्धं परदिने च केवलः पितृयज्ञः कार्यः अत एवोक्तं वृत्तिकृता नात्र पूर्वस्थालीपाकश्चोद्यते सर्वश्राद्धेषु प्रसंगादिति प्रयोगपारिजातोक्तिरप्येतद्विषयैव पूर्वदिने च श्राद्धेग्नौकरणमेव न पाणिहोमः चतुर्थ्यादिषु साग्नीनां वह्नौ होमो विधीयते पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति परिशिष्टे नियमात् न च लौकिकाग्नौ पक्वस्य कथं गृह्याग्नौ होमः नान्याग्नौ पक्वमन्याग्नौ जुहुयादिति निषेधात् मैवं श्राद्धस्य गृह्यत्वेन स्मार्ताग्नौ पचनाग्नौ वा कर्तव्यत्वात् तस्मात् पूर्वेद्युः केवलं श्राद्धं न व्यतिषंगः इदमेव च युक्तं आहिताग्निना तु सर्वाधानिनार्धाधानिना वा संपूर्णे खंडे वा दर्शे श्रौताग्नौ पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धव्यतिषंगेणेति विस्तरभीतेर्विररामः संपूर्णे दर्शे च विशेषमाह लौगाक्षिः पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति पक्षांतं कर्मान्वाधानं अन्वाहार्यकं दर्शश्राद्धं अयमेव साग्नेर्जीवत्पितृकस्यापि पिंडपितृयज्ञकालो ज्ञेयः तस्यापि कात्यायनेन होमांतमनारंभो वास्याम्नानात् पिंडपितृयज्ञाकरणे प्रायश्चित्तमाह पराशरमाधवीये कात्यायनः पितृयज्ञात्यये चैव वैश्वदेवात्ययेपि च मो

जनेपतितान्नस्यचरुर्वैश्वानरोभवेदित्यलं प्रकृतमनुसरामः निरग्निकादिभिस्त्वमावास्यापराण्हव्याप्त्यभावेतुकुतुपकालेव्यापिनीग्राह्या न्यूनविद्धाप्यमावास्याप्रतिपन्मिश्रितापिवा पित्र्येकर्मणिविद्वद्भिर्ग्राह्याकुतुपकालिकीतिहारीतोक्तेः इदंचनिरग्निकादिविषयं सिनीवालीद्विजैःकार्यासाग्निकैःपितृकर्मणि स्त्रीभिःशूद्रैःकुहूःकार्यातथाचानग्निकैर्द्विजैरिति लौगाक्षिवचनात् अत्रसाग्निरौपासनाग्निरपीतिमदनपारिजातउक्तम् कुतुपश्चापराण्हव्याप्त्यलाभेतुकल्पः अपराण्हद्वयाव्यापीयदिदर्शस्तिथिक्षयः आहिताग्नेःसिनीवालीनिरग्न्यादेःकुहूर्मतेतिजाबालिनाभावविधानात् तेनसाग्नीनांनिरग्नीनांवापराण्हव्यापिन्येवमुख्या तिथिसाम्यवृद्धिक्षयेःसमव्याप्तौखर्वादिनानिर्णयः वैषम्येधिका दिनद्वयेपराण्हस्पर्शेकुतपव्यापिनीतिमाधवः इदमेवयुक्तम् हेमाद्र्यादिमतेकुतपव्यापिन्येवनिरग्न्यादेर्मुख्या अत्रसाग्निरौपासनाग्निरपीतिमदनपारिजातेउक्तम् सिनीवालीदृष्टचन्द्रा तथाचव्यासः दृष्टचन्द्रासिनीवालीनष्टचन्द्राकुहूःस्मृतेति पूर्वदिनेपरदिनएववातद्व्याप्तित्वेसैवग्राह्या अंशव्यापित्वेवैषम्येधिककालव्यापिनीग्राह्या दिनद्वयेंशतःसमव्याप्तौतिथिक्षयेपूर्वावृद्धौसाम्येचपरा तिथिक्षयेसिनीवालीतिथिवृद्धौकुहूःस्मृता साम्येपिचकुहूर्ज्ञेयावेदवेदांगवेदिभिरितिप्रचेतोवचनात् दिनद्वयेसंपूर्णकुतपव्याप्तिस्तुतिथिवृद्धावेवभवतीत्यनंतरवचनात्परैवेति कुतपस्त्वन्होमुहूर्तोविज्ञेयादशपंचचसर्वदा तत्राष्टमोमुहूर्तोयःसकालःकुतपःस्मृतइतिमात्स्योक्तेः तुलादानपितृदेवप्रीत्यर्थोपवासादौतुपराग्राह्येत्यन्यत्रविस्तरः दर्शेचमासिकवार्षिकादिश्राद्धप्राप्तौकालादर्शेविशेषउक्तः दर्शस्यचोदकुंभस्यदर्शमासिकयोरपि नित्यस्यचाब्दिकस्यापिदार्शिकाब्दिकयोरपीत्युक्ता संपातेदेवताभेदाच्छ्राद्धयुग्मंसमाचरेत् निमित्तानियतिश्चात्रपूर्वान्तुस्नानकारणमिति अत्रक्रमोनिर्णयदीपेउक्तः

नष्टचंद्रेयदाकालेक्षयाहदिवसोभवेत् वैश्वदेवंक्षयश्राद्धंकुर्यात्प्राग्दर्शकर्मणः अमाश्राद्धंचानुपनीतोपिकुर्यात् आहशूलपाणौ अमावास्याष्टकाकृष्णपक्षपंचदशीषुनेत्युपक्रम्य एतच्चानुपनीतोपिकुर्यात्सर्वेषुपर्वसु श्राद्धंसाधारणंनामसर्वकामफलप्रदम् भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधः इतिमात्स्योक्तेः अमाश्राद्धातिक्रमेप्रायश्चित्तमुक्तंभृगुविधाने न्यूष्वाचंजपेन्मंत्रंशतवारंदिनेदिने अमाश्राद्धंयदानास्तितदासंपूर्णमेतितत् अत्रपूर्वोक्तसाग्निकपदेनाहिताग्निस्मार्ताग्निमांश्चगृह्यते विच्छिन्नाग्निकादिस्तुनिरग्निकः तथाचहेमाद्रिरग्नौकरणप्रकरणे साग्निरग्नावनग्निस्तुद्विजपाणावथाप्सुवा कुर्यादग्नौक्रियांनित्यंलौकिकेनेतिनिश्चितमितिस्मृतिवाक्यमुदाहृत्ययस्त्वात्तौपासनतयासमुच्छिन्नाग्निर्याभार्याविधुरस्तथावाग्निरहितस्तस्यद्विजपाणौजलादौहोमइतिव्याचक्षे मदनपारिजातेप्येवम् इदमेवसाग्निकानग्निकस्वरूपंसर्वत्रज्ञेयम् अथग्रहणंनिर्णीयते तत्रचंद्रग्रहणेयस्मिन्यामेग्रहणंतस्मात्पूर्वंप्रहरत्रयंनभुंजीत सूर्यग्रहेतुप्रहरचतुष्टयंनभुंजीत सूर्यग्रहेतुनाश्नीयात्पूर्वंयामचतुष्टयं चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्विनेति माधवीयेवृद्धगौतमोक्तेः ग्रहणंतुभवेदिंदोःप्रथमादधियामतः भुंजीतावर्तनात्पूर्वंप्रथमेप्रथमादधइतिमार्कंडेयोक्तेश्च अधिऊर्ध्वं ननुचंद्रग्रहेयामचतुष्टयनिषेधउचितोनतुसूर्यग्रहेसूर्योदयात्प्राक्भोजनाप्राप्तेः मैवं वचनस्यप्रथमयामेसूर्यग्रहेसतिपूर्वेद्युःपूर्वरात्रेभोजननिषेधपरत्वात् चंद्रग्रहेविशेषमाहमाधवीयेवृद्धवसिष्ठः ग्रस्तोदयेविधोःपूर्वंनाहर्भोजनमाचरेदिति द्वयोर्ग्रस्तास्तेतुमाधवीयेव्यासः अमुक्तयोरस्तगयोरद्याद्दृष्ट्वापरेहनीति विष्णुधर्मेपि अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपरं

अहोरात्रनिषेधः सूर्यग्रस्तास्ते मदनरत्नेगार्ग्यः संध्याकालेयदाराहुर्ग्रसतेशशिभास्करौ तदहर्नैवभुंजीतरात्रावपिकदाचन सायंसंध्यायांसूर्यग्रस्तास्तेपूर्वेन्हिरात्रौचनभोक्तव्यं प्रातःसंध्यायांचंद्रस्यग्रस्तास्तेपूर्वरात्रावुत्तरेन्हिचनभोक्तव्यमित्यर्थः चंद्रग्रस्तास्तेउत्तरदिनेसंध्याहोमादौनदोषः तदाहोशनाः ग्रस्तेचास्तंगतेत्विंदौज्ञात्वामुक्त्यवधारणं स्नानहोमादिकंकार्यंभुंजीतेंदूदयेपुनः एतदनाहिताग्निविषयं अपराण्हेव्रतोपायनीयमश्नीतेतिकात्यायनोक्तेर्व्रतस्यश्रौतत्वेनविहितत्वेनचप्रबलत्वात् अद्भिर्व्रतंकुर्यादिति निर्णयदीपः रागप्राप्तभोजनेकालनियमोयं तेनज्वरादाविवनभोजनमितिकर्कानुसारिणः बालवृद्धातुराणांतुग्रहयामात्पूर्वमेकयामोनिषिद्धः सायान्हेग्रहणंचेत्स्यादपराण्हेनभोजनं अपराण्हेनमध्यान्हेमध्यान्हेनतुसंगवे भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रियेतिमार्कंडेयोक्तेः इदंचबालादिविषयं बालवृद्धातुरैर्विनेतिपूर्वोक्तेः वेधकालेग्रहणेवापक्वमन्नंत्याज्यं सर्वेषामेववर्णानांसूतकंराहुदर्शने स्नात्वाकर्माणिकुर्वीतशृतमन्नंविवर्जयेदिति हेमाद्रौषट्त्रिंशन्मतात् शृतमितितदंतरितस्योपलक्षणं नवश्राद्धेषुयच्छिष्टंग्रहपर्युषितंचयदितिमिताक्षरायांवचनात् भार्गवार्चनदीपिकायांज्योतिर्निबंधेमेधातिथिः आरनालपयस्तक्रदधिस्नेहाज्यपाचितं मणिकस्योदकंचैवनदुष्येद्राहुसूतके मन्वर्थमुक्तावल्याम् अन्नंपक्वमिहत्याज्यंस्नानंस्ववसनंग्रहे वारितक्रारनालादितिलदर्भैर्नदुष्यति जलेत्वदोषोगांगविषयः ग्रहोषितंजलंपीत्वापादकृच्छ्रंसमाचरेदिति तेनैव चतुर्विंशतिमतेऽन्यजलस्यदोषोक्तेः वेधकालेग्रहणेवाभोजनेप्रायश्चित्तमुक्तम् माधवीयेकात्यायनेन चंद्रसूर्यग्रहेभुक्त्वाप्राजापत्येनशुद्ध्यति तस्मिन्नेवदिनेभुक्त्वात्रिरात्रेणैवशुद्ध्यतीति ग्रहणेचत्रिरात्रमेकरात्रंवोपवासः श्रेयोर्थिनाकार्यः एकरा

त्रमुपोष्यैवस्नात्वादत्वाचशक्तितः कंचुकादिवसर्पस्यनिर्मुक्तिःपापकोशतः त्रिरात्रंसमुपोष्यैवग्रहणेचंद्रसूर्ययोः स्नात्वादत्वा–
चविधिवन्मोदतेब्रह्मणासहेतिहेमाद्रौलैंगोक्तेः इदंचपुत्र्यतिरिक्तविषयं आदित्येह्निसंक्रांतौग्रहणेचंद्रसूर्ययोः पारणंचो
पवासंचनकुर्यात्पुत्रवान्गृहीतिजैमिनिवचनात् यदातुरवेर्ग्रस्तास्तस्तदापुत्रिणः मेहृद्धमहिलाबालादिवर्ज्जंभोजनंनतूपवासः
सायान्हेग्रहणंचेत्स्यादितिपूर्वोक्तमार्कंडेयवचनात् सायान्हेसंगवेश्नीयाच्छारदेसंगवादधः मध्यान्हेपरतोश्नीयान्नोपवासोरवि
ग्रहइतिस्मृतेश्चेतिहेमाद्रिः शारदेऽपराण्हः माधवमतेतुपुत्रिणोपितत्रोपवासएव अहोरात्रंनभोक्तव्यमितिपूर्वोक्तनिषेधस्य
तेनापिपालनीयत्वात् उपवासनिषेधस्तुव्रतरूपोपवासपरः कृष्णैकादशीनिषेधवदिति मदनरत्नेप्येवम् इदमेवचयुक्तम्
वर्धमानस्तु अहोरात्रंनभोक्तव्यमितिशातातपीयोक्तेः सूर्याचंद्रमसोर्लोकानक्षयान्यातिमानवइतिफलश्रुतेर्मुक्त्यदर्शनेउप
वासःकाम्यः नत्वयंनिषेधइत्याह तन्न अत्रव्रतत्वेपिप्रागुक्तविष्णुधर्मेनिषेधावश्यंभावात् तथाचव्यासः रविग्रहः
सूर्यवारेसोमेसोमग्रहस्तथा चूडामणिरितिख्यातस्तत्रदत्तमनंतकम् वारेष्वन्येषुयत्पुण्यंग्रहणेचंद्रसूर्ययोः तत्पुण्यंको
टिगुणितंयोगेचूडामणौस्मृतम् अत्रचाद्यंतयोःस्नानंकुर्यात् ग्रस्यमानेभवेत्स्नानंग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमु
क्तेस्नानंविधीयतइतिहेमाद्रौवचनात् स्नानंस्यादुपरागादौमध्येहोमःसुरार्चनमिति ब्रह्मवैवर्ताच्च सर्वेषामेववर्णानांसूतकेंरा-
हुदर्शने सचेलंतुभवेत्स्नानंसूतकान्नंचवर्जयेदितिवृद्धवसिष्ठोक्तेश्च सचेलंमुक्तिस्नानपरमितिमदनरत्नेउक्तम् भार्गवा
र्चनदीपिकायांचतुर्विंशतिमते मुक्तोयस्तुनकुर्वीतस्नानंग्रहणसूतके ससूतकीभवेत्तावद्यावत्स्यादपरोग्रहः इदंचस्नानमम

त्रकंकार्यमितिस्मृतिरत्नावल्यां तत्रतीर्थविशेषोभारते गंगास्नानंनकुर्वीतग्रहणेचंद्रसूर्ययोः महानदीषुचान्यासुस्नानंकुर्याद्यथाविधि महानदीष्वपिमासविशेषेकाश्चिच्छ्रेष्ठाः प्रयागंदेविकारेवासन्निहत्याच्चवारणम् सरस्वतीचंद्रभागाकौशिकीतापिका तथा सिंधुर्गंडकिकाचैवसरयूःकार्तिकादितः मूलंहेमाद्रौस्पष्टम् व्यासः इंदोर्लक्षगुणंपुण्यंरवेर्दशगुणंततः गंगातोयेतुसंप्राप्तइंदोःकोटीरवेर्दश गवांकोटिसहस्रस्ययत्फलंलभतेनरः तत्फलंलभतेमर्त्योग्रहणेचंद्रसूर्ययोः असंभवेतुमाधवीयेशंखः वापीकूपतडागेषुगिरिप्रस्रवणेषुच नद्यांनदेदेवखातेसरसीषूद्धृतांबुनि उष्णोदकेनवास्नायाद्ग्रहणेचंद्रसूर्ययोः अत्रतारतम्यमाहमार्कंडेयः शीतमुष्णोदकात्पुण्यमपारक्यंपरोदकात् भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकम् ततोपिसारसंपुण्यंततःपुण्यंनदीजलम् तीर्थतोयंततःपुण्यंमहानद्यंबुपावनम् ततस्ततोपिगंगांबुपुण्यंपुण्यस्ततोंबुधिरिति उष्णोदकमातुरविषयम् तथा गोदावरीमहापुण्याचंद्रेराहुसमन्विते सूर्येचराहुणाग्रस्तेतमोभूतेमहामुने नर्मदातोयसंस्पर्शेकृतकृत्याभवंतिहि पृथ्वीचंद्रोदयेप्रभासखंडे गावोनागास्तिलाधान्यंरत्नानिकनकंमही संप्रदायकुरुक्षेत्रेयत्फलंलभतेनरः तदिंदुग्रहणेंभोधौस्नानाद्भवतिषड्गुणम् तत्रैवसौरपुराणेंबुधिस्नानमुपक्रम्य दानानियानिलोकेषुविख्यातानिमनीषिभिः तेषांफलमवाप्नोतिग्रहणेचंद्रसूर्ययोः देवीपुराणे गंगाकनखलंपुण्यंप्रयागःपुष्करंतथा कुरुक्षेत्रंमहापुण्यंराहुग्रस्तेदिवाकरे स्नानासंभवेस्मरणंवाकार्यं स्मृत्वाशतक्रतुफलंहत्वासर्वाघनाशनं स्पृष्ट्वागोमेधपुण्यंतुपीत्वासौत्रामणींलभेत् स्नात्वावाजिमखंपुण्यंप्राप्नुयादविचारतः रविचंद्रोपरागेच अयनेचोत्तरेतथेतिमार्कंडेयोक्तेः अत्रश्राद्धमाहऋष्य

संगः चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् तेनैवसकला पृथ्वीदत्ताविप्रस्यवैकरे भारते सर्वस्वेनापिकर्तव्यंश्राद्धं वैराहुदर्शने अकुर्वाणस्तुनास्तिक्यात्पंकेगौरिवसीदति विष्णुः राहुदर्शनदत्तंहिश्राद्धमाचंद्रतारकम् इदंचामान्नेनहेम्नावाकार्यंनत्वन्नेन आपद्यनग्नौतीर्थेचचंद्रसूर्यग्रहेतथा आमश्राद्धंप्रकुर्वीतहेमश्राद्धमथापिवेति शातातपोक्तेरितिहेमाद्रिमाधवादयः अपरार्कस्तु एतद्द्विजातीनांपाकाभावेद्रष्टव्यंतीर्थश्राद्धवत् पाकाभावेद्विजातीनामामश्राद्धंविधीयते इतिस्मृत्युक्तेः सैंहिकेयोयदासूर्यंग्रसतेपर्वसंधिषु गजच्छायातुसाप्रोक्तातस्यांश्राद्धंप्रकल्पयेत् घृतेनभोजयेद्विप्रान्घृतंभूमौसमुत्सृजेदिति वायवीयोक्तेश्चेत्याह विज्ञानेश्वरोप्याह ग्रहणश्राद्धेभोक्तुर्दोषोदातुस्त्वभ्युदयइति सूतकेमृतकेभुंक्तेगृहीतेशशिभास्करे छायायांहस्तिनश्चैवनभूयःपुरुषोभवेदित्यापस्तंबेनभोजननिषेधाच्च अयंचनिषेधःश्राद्धभोक्तृहस्तिच्छायासाहचर्यात् अत्रग्रहणनिमित्तकश्राद्धेनैवामासंक्रांत्यादिनैमित्तिकानांसिद्धिः दार्शिकालभ्ययोरपीतिकालादर्शोक्तेः अत्राशौचमध्येपिस्नानश्राद्धादिकार्यमेव सूतकेमृतकेचैवनदोषोराहुदर्शने तावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते इतिमाधवीयेवृद्धवसिष्ठोक्तेः स्मार्तकर्मपरित्यागोराहोरन्यत्रसूतकइतिव्याघ्रपादोक्तेश्च कालादर्शेअंगिराः सर्वेवर्णाःसूतकेपिमृतकेराहुदर्शने स्नात्वाश्राद्धंप्रकुर्वीरन्दानंशाठ्यविवर्जितं मदनपारिजातेप्येवम् तेन स्नानमात्रंप्रकुर्वीतदानश्राद्धविवर्जितमितिनिर्मूलवदंतोगौडाः परास्ताः इयंचशुद्धिरविशेषान्मंत्रदीक्षापुरश्चरणादिसर्वस्मार्तकर्मविषया मदनरत्नेप्येवम् रजस्वलायास्तुभार्गवार्चनदीपिकायाम् सूर्योदयनिबंधे नसूतकादिदोषोस्तिग्रहेहोमजपादिषु ग्रस्तेस्नायादुदक्यापितीर्थादुद्धृतवा

दियौति अत्रच स्नाने नैमित्तिके मासेन्नारी यदि रजस्वला पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेदि त्यादिर्मिताक्षरोक्तो विधिर्ज्ञेयः न थाग्रहणेरात्रावपिश्राद्धादिकार्यम्. ग्रहणोद्वाहसंक्रांतियात्रार्तिप्रसवेषुच दानंनैमित्तिकंज्ञेयंरात्रावपितदिष्यत इत्यपरार्के व्यासोक्तेः चंद्रग्रहेतथारात्रौस्नानंदानंप्रशस्यतइतिदेवलोक्तेश्च यदातुज्योतिःशास्त्रगम्यादिनेचंद्रग्रहोरात्रौचसूर्यग्रहस्तदास्नानादिनकार्यं सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा तत्रस्नानंनकुर्वीतदद्याद्दानंनचक्वचिदिति षट्त्रिंशन्मतात् ग्रहणदिनेवार्षिकश्राद्धप्राप्तौतुप्रयोगपारिजातेगोभिलः दर्शेरविग्रहेपित्रोःप्रत्याब्दिकमुपस्थितम् अन्नेनासंभवेहेम्नाकुर्यादामेनवास्नातइति अत्रदर्शरविपितृकृतशब्दाः प्रदर्शनार्थाः न्यायसाम्यात् तेनचंद्रग्रहेपिसपिंडादिवार्षिकमन्नादिनातद्दिनएवकार्यमिति मदनपारिजातेव्याख्यातम् पृथ्वीचंद्रोदयेप्येवम् तेनयानि आमश्राद्धंप्रकुर्वीतमाससंवत्सरादृतइति अन्नेनैवाब्दिकंकुर्याद्धेम्नावामेननक्वचिदिति मरीचिलौगाक्ष्यादिवचनानितानिग्रहणादिनातिरिक्तविषयाणि निर्णयामृतेप्येवम् यानितुग्रहणात्तुद्वितीयेऽह्निरजोदोषात्तुपंचमे तथा ग्रस्तोदयेयदाचंद्रेप्रत्यब्दंसमुपस्थितं तद्दिनेचोपवासःस्यात्प्रत्यब्दंतुपरेहनि तथा ग्रस्ताविवास्तमानंतुरवींदूप्राप्नुतोयदि प्रत्यब्दंतुतदाकार्यंपरेहन्येवसर्वदा चंद्रसूर्योपरागेचतथाश्राद्धंपरेहनीत्यादीनिवचनानि तानिमहानिबंधेषुक्वाप्यनुपलभ्यान्निर्मूलानि प्रत्युतपूर्वोक्तनिबंधेषुतद्दिनएवश्राद्धमुक्तमित्यलम् ग्रहणादिसप्तदिनपर्यंतवामगोपालाद्यागमदीक्षोक्ताशिवार्चनचंद्रिकायांज्ञानार्णवे मंत्राद्यारंभणंकुर्याद्ग्रहणेचंद्रसूर्ययोः ग्रहणाद्यापिदेवेशिकालःसप्तदिनावधीति रत्नसागरे सत्तीर्थेऽर्कविधुग्रासेतंतुदामनपर्वणि मंत्रदीक्षांप्रकुर्वाणोमासर्क्षादीन्नशोधयेत् अत्रसूर्यग्रहणनेव

सुखव्ययम् सूर्यग्रहणकालेतुनान्यदन्वेषितंभवेत् सूर्यग्रहणकालेनसमोनान्यःकदाचन नमासतिथिवारादिशोधनंसूर्यपर्वणीति तत्रैवकालोत्तरवचनात् चंद्रग्रहेतुयादीक्षायादीक्षाव्रतचारिणाम् वनस्थस्यचयादीक्षादारिद्र्यंसप्तजन्मस्विति तत्रैवयोगिनीतंत्रेनिषेधाच्च ग्रहणंचजन्मराश्यादौनिषिद्धम् तदुक्तंज्योतिषे त्रिषट्दशायोपगतंनराणांशुभप्रदंस्याद्ग्रहणंरवींद्वोः द्विसप्तनंदेषुषुमध्यमंस्याच्छेषेष्वनिष्टंकथितंमुनींद्रैरिति आयएकादश नंदानव इषुःपंच मदनरत्नेगर्गः जन्मसप्ताष्टरिःफाकदशमस्थेनिशाकरे दृष्टोरिष्टप्रदोराहुर्जन्मर्क्षेनिधनेपिच रिःफंद्वादशम् अंकानव निधनंसप्तमतारा पृथ्वीचंद्रोदयेविष्णुधर्मे यन्नक्षत्रगतोराहुर्ग्रसतेशशिभास्करौ तज्जातानांभवेत्पीडायेनराःशांतिवर्जिताः तत्रैवपुराणांतरे सूर्यस्यसंक्रमोवापिग्रहणंचंद्रसूर्ययोः यस्यत्रिजन्मनक्षत्रेतस्यरोगोथवामृतिः तस्यदानंचहोमंचदेवार्चनजपौतथा उपरागाभिषेकंचकुर्याच्छांतिर्भविष्यति स्वर्णेनवाथपिष्टेनकृत्वासर्पस्यचाकृतिं ब्राह्मणायददेत्तस्यनरोगादिस्त्वतत्कृतः जन्मनक्षत्रंतत्पूर्वोत्तरेचत्रिजन्मनक्षत्रमित्युच्यते जन्मदशमैकोनविंशतितारा इतिकेचित् सर्पस्यतदाकारस्यराहोरित्यर्थः अद्भुतसागरेभार्गवः यस्यराज्यस्यनक्षत्रेस्वर्भानुरुपरज्यते राज्यभंगःसुहृन्नाशोमरणंचात्रनिर्दिशेत् राज्यस्यनक्षत्रंअभिषेकनक्षत्रमिति तत्रैवव्याख्यातम् भार्गवार्चनदीपिकायांज्योतिःसागरे सौवर्णं कारयेन्नागंपलेनाथपलार्धतः तदर्धेनतदर्धेनफणायांमौक्तिकंन्यसेत् ताम्रपात्रेनिधायाथघृतपूर्णेविशेषतः कांस्येवाकंतिलोहेवान्यस्यदद्यात्सदक्षिणं चंद्रग्रहेतुरूप्यस्यबिंबंदद्यात्सदक्षिणम् नागंरुक्ममयंसूर्यग्रहेबिंबंचहेमजम् तुरंगरथ-

गोभूमितिलसर्पिश्चकांचनम् कालविवेकेपि स्वर्णनिर्मितंनागंसतिलंकांस्यभाजनम् सदक्षिणंसवस्त्रंच ब्राह्मणाय निवेदयेत् सौवर्णंराजतंवापिविंबंकृत्वास्वशक्तितः उपरागभव क्लेशच्छिदेविप्रायकल्पयेत् मंत्रस्तु तमोमयमहाभीम सोमसूर्यविमर्द्दन हेमताराप्रदानेनममशांतिप्रदोभव विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत दानेनानेननागस्यरक्षमां वेधजाद्भयादिति अत्रशांतिरप्युक्तामात्स्ये यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः स्नानंतस्यप्रवक्ष्यामिमंत्रौषधिसमन्वितम् चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनम् संपूज्यचतुरोविप्रां शुक्लमाल्यानुलेपनैः पूर्वमेवोपरागस्यसमानीयोषधादिकम् स्थापयेच्चतुरःकुंभानव्रणान्सलिलान्वितान् गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवम् रोचनंपद्मकंशंखकुंकुमंरक्तचंदनम् शुक्तिस्फटिकतीर्थांबुसितसर्षपगुग्गुलून् मधुकंदेवदारुंच विष्णुक्रांताशतावरीं बलांचसहदेवींचनिशाद्वितयमेवच गजदंतंकुंकुमंचतथैवोशीरचंदनं एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरान् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयातुयजमानस्यदुरितक्षयकारकाः योसौवज्रधरोदेव आदित्यानांप्रभुर्मतः सहस्रनयनःशक्रोग्रहपीडांव्यपोहतु मुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः चंद्रोपरागसंभूतामग्निःपीडांव्यपोहतु यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः यमश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु रक्षोगणाधिपःसाक्षान्नीलांजनसमप्रभः खड्गहस्तोतिभीमश्चग्रहपीडांव्यपोहतु नागपाशधरोदेवःसदामकरवाहनः सजलाधिपतिर्देवोग्रहपीडांव्यपोहतु प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु योसौनिधिपतिर्दे-

वः खड्गशूलगदाधरः चंद्रोपरागकलुषंधनदोत्रव्यपोहतु योसाविंदुधरोदेवः पिनाकी वृषवाहनः चंद्रोपरागपापानि स
नाशयतु शंकरः त्रैलोक्ये यानिभूतानि स्थावराणिचराणिच ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपातकम् एवमावाहयेद्दे
वान्मंत्रैरेभिश्च वारुणैः एतानेवतथामंत्रान्स्वर्णपट्टे विलेखयेत् ताम्रपट्टेथवालिख्यनववस्त्रेतथैवच मस्तके यजमाने
स्यनिदध्युस्तेद्विजोत्तमाः कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान् गृहीत्वास्नापयेद्रूढंभद्रपीठोपरिस्थितम् पूर्वैरे
वतुमंत्रैश्चयजमानंद्विजोत्तमाः अभिषेकंततः कुर्यान्मंत्रैर्वारुणसूक्तकैः आचार्यंवरयेत्पश्चात्स्वर्णपट्टंनिवेदयेत् आ
चार्यदक्षिणांदद्याद्गोदानंचस्वशक्तितः होमंचापिप्रकुर्वीततिलैर्व्याहृतिभिस्तथा दानंचशक्तितोदद्याद्यदीच्छेदात्मनोहितं
सूर्यग्रहेसूर्यनामयुक्तान्मंत्रांश्चकीर्तयेत् अनेनविधिनायस्तुग्रहणेस्नानमाचरेत् नतस्यग्रहणेदोषः कदाचिदपिजायते
२४ इतिग्रहणशांतिः भार्गवार्चनदीपिकायांब्रह्मसिद्धांते सर्वैःपटस्थितंवीक्ष्यंखस्थंतैलांबुदर्पणे ग्रहणगु-
र्विणीजातुनपश्येतपटंविना तथामंगलकृत्येषुवेधविशेषोहेमाद्रौ त्रयोदश्यादितोवर्ज्यंदिनानांनवकंक्रमम् मांगल्ये
षुसमस्तेषुग्रहणेचंद्रसूर्ययोः प्रकारांतरंतत्रैवोक्तं द्वादश्यादितृतीयांतोवेधइंदुग्रहेस्मृतः एकादश्यादिकःसौरेचतुर्थ्यंतःप्रकीर्तितः इदं-
चपूर्णग्रासे त्र्यहःखंडग्रहेतयोरितितत्रैवोक्तेः इदंचग्रस्तास्तेत्रिदिनंपूर्वमितिनारदेनग्रस्तास्तेविशेषोक्तेर्ग्रस्तास्तभिन्नग्रह
णपरं ज्योतिर्निबंधेप्यवनः ग्रहणोत्पातभंत्याज्यंमंगलेषुऋतुत्रयं यावच्चरविणाभुक्तामुक्तंभंदग्धकाष्ठवत् अन्यानिचाग्नेयादि
मंडलानितत्फलंवर्णविकारादिफलंचदेवज्ञेभ्योज्ञेयम् पुरश्चरणचंद्रिकायाम् चंद्रसूर्योपरागेचस्नात्वाप्रयतमानसः

स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रं समाहितः जपाद्दशांशतो होमस्तथा होमात्तु तर्पणम् तर्पणस्य दशांशेन मार्जनं कथितं किल नत्रैव देवतारूपं ध्यात्वात्मानं प्रपूज्य च नमोंतं मंत्रमुच्चार्य तदंते देवताभिधाम् द्वितीयांतामहं पश्चादभिषिंचाम्यनेन तु तोयैरंजलिना शुद्धैरेभिः सिंचेत्स्वमूर्द्धनि मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् जपोर्चापूर्वको होमस्तर्पणं चाभिषेचनम् भूदेवपूजनं पंचप्रकारोक्तापुरश्क्रिया तथा होमाशक्तो जपं कुर्याद्धोमसंख्याचतुर्गुणम् एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमा ग्रहणप्रसंगात् कुरुक्षेत्रप्रतिग्रहे प्रायश्चित्तमुच्यते तत्रारुणस्मृतौ प्रतिग्रही कुरुक्षेत्रे न भूयः पुरुषो भवेत् तथापि मनसः शुद्ध्यै प्रायश्चित्तं समाचरेत् तप्तकृच्छ्रद्वयं कुर्याद् दैवेन समन्वितम् सत्रेण वा यजेताथ जपेद्वा लक्षसप्तकम् वापीकूपतडागादिखनने विसृजेद्धनमिति एतच्च यद्गृहीतं तन्नार्जयति कर्मणा ब्राह्मणाधनम् तस्योत्सर्गेण शुद्ध्यति दानेन तपसैव चेति मनूक्तेरुत्सर्गोत्तरज्ञेयमिति दिक् ग्रहणांतरितस्य पूर्वसंकल्पितद्रव्यस्य द्वैगुण्यं न भवतीति शिष्टाः पठंति च लघुब्रह्मवैवर्ते दातव्यमिति नो काश्यां वक्तव्यं कुत्रचित् क्वचित् अहोरात्रमतिक्रम्य तद्दानं द्विगुणं भवेत् दर्शोत्तरं पर्वसत्स्याच्छुतं चंद्रग्रहे भवेत् सूर्यग्रहे सहस्रं तत्स्मरणेनानंतकं स्मृतमिति अत्र मूलं चिंत्यम् अत्र केचिद्बौद्धतुल्या आहुः ग्रहणस्य निमित्तत्वेन तस्मिंश्च यस्य प्रयोजकत्वात् ज्योतिःशास्त्रादिना ज्ञानस्यानिमित्तत्वे प्राप्तेपि स्नानं दानं ततः प्राङ्मनंतरं राहुदर्शने चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति जाबाल्यादिवचने दृशिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेन निमित्तत्वम् अन्यथा दृशो लक्षणा स्यात् तेन मेघाच्छादनेंधादीनां जन्मसप्ताष्टेत्यादिनिषिद्धदर्शनानां च स्नानमा-

ज्ञादौनाधिकारइति कल्पतरुरप्याह दर्शनशब्देनचाक्षुषज्ञानंगृह्यतेनज्ञानमात्रम् अज्ञातस्यनिमित्तत्वासंभवान्नि
मित्तमहिम्नैवज्ञानलाभेनदर्शनपदवैयर्थ्यापत्तेः तेनचाक्षुषधीयोग्यः कालः पुण्यः योग्यत्वंचप्रयत्नानपनेयचाक्षुष
ज्ञानप्रतिबंधकराहित्यंतेनमेघच्छन्नेयोग्यताभावान्नस्नानादीति निर्णयामृतेप्येवम् तदेतत्तुच्छम् यदिचाक्षुष
ज्ञानंनिमित्तंस्यात्तदा सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा तत्रस्नानंनकुर्वीतदद्याद्दानंनचक्वचिदितिवाक्यंव्यर्थं-
स्यात् चाक्षुषज्ञानाभावेनप्राप्त्यभावात् तत्पूर्वकत्वाच्चनिषेधस्य नचेदंग्रस्तास्तपरं रविचंद्रयोरस्तानंतरंरात्रि
दिवाग्रहत्वादितिवाच्यम् तत्रयदस्यग्रहपरत्वेऽधिकरणत्वायोगान्निमित्तपरत्वेचतद्ग्रहनिमित्तकस्नानादेरस्तात्प्रागप्य-
भावापत्तेः अथतत्रैवनिरात्रिदिनेउच्यतेसावैश्वदेवीतिवहुणश्रुतेअपि तन्न तादृशमंत्रलिंगाभावात् तयोर्निमित्तत्वेऽधि
करणत्वेवाऽन्यप्रयुक्तस्नानाद्यभावापत्तेश्च किंच नेक्षेतोद्यंतमादित्यंनास्तंयंतंकदाचन नोपरक्तंनवारिस्थंनमध्यंन-
भसोगतमिति मनुवचनंबाध्येत दृष्टोरिष्टप्रदोराहुरित्यादिच नचात्रविहितेदर्शनेनिषेधाप्रवृत्तिवत् पर्युदासन्यायतापिनयु
क्तेतिवाच्यम् दर्शनस्यानुवादेनविधेयत्वाभावात् एतच्चाग्रेवक्ष्यामः तत्वेवाविरुद्धत्रिकद्वयापत्तेः अस्तु सकृद्दर्शन
विधानेनसंकोचइतिचेन्न मुक्तिंदृष्ट्वाततःस्नायादिति मुक्तिस्नानेपिचाक्षुषज्ञानस्यनिमित्तत्वापत्तेः अस्तु किंनश्छि
न्नमितिचेत् नग्रस्तास्तेतयोः परेद्युरुदयेदृष्ट्वाभ्यवहरेच्छुचिरिति दर्शनोत्तरंभोजनविधानादंधस्यपूर्ववेधकालइव या
वद्दर्शनंभोजननिषेधापत्तिः मध्येऽधीभूतस्यसुतरांयावच्चक्षुःप्राप्त्युपवासःप्रसंगश्च अथान्नलोलुपतयातत्रज्ञा

नमार्थं विवक्ष्येत तत् पूर्वमपि निर्लज्जेन स्वीक्रियताम् एतेन यत् केनचिदुक्तं स्पर्शस्नानं मुक्तिस्नानं च यस्य दर्शनं तेनैव कार्यम् नान्येन क्त्वाप्रत्ययेन समानकर्तृकत्वावगतेरिति तन्निरस्तम् का तर्हि तस्य गतिः दृशेरुद्देश्यविशेषणत्वात् ग्रहेकत्ववद् विवक्षयार्थतः सिद्धज्ञानमात्रानुवादत्वे सर्वं सुस्थम् अंगुल्याद्यनादेश्यग्रहव्यावृत्त्या वा दर्शनस्यार्थवत्त्वम् न चोक्तयोग्यतापि साध्वी दर्शनोत्तरं मेघच्छन्ने योग्यताभावापत्त्या दानाद्यभावापत्तेः तेन तत्तद्देशावच्छेदेन ज्योतिःशास्त्रावेद्यत्वमेव योग्यता किंच रजसो दर्शने नारी त्रिरात्रमशुचिर्भवेदित्यत्राप्यंधस्त्रीणामाशौचाभावप्रसंगः यत्तु वर्धमानेनोक्तम् ज्ञानोत्तरं त्वधिकारो न ज्ञानकाले स्नानकाले ज्ञानाभावात् एवं दर्शनोत्तरं मुक्तिपर्यंतं अस्त्येव योग्यतेति तदपि भ्रांतिज्ञानमात्रम् किंच ग्रस्तस्तेनयोः परेद्युरुदये दृष्ट्वाऽभ्यवहरेच्छुचिरित्यादिवाक्यवैयर्थ्यापत्तिः चाक्षुषज्ञानान्यथानुपपत्त्यैवार्थादुदये स्नानसिद्धेः ननु मुक्तिस्नाने शास्त्रीयमेव ज्ञानं निमित्तं न चाक्षुषं च चन्द्रसूर्यग्रहे नाऽद्यात्तस्मिन्नहनि पूर्वतः राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति वृद्धगौतमेन विज्ञायेति ज्ञानमात्रोक्तेः यत्तु मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति तदपि ज्ञानमात्रपरम् मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते आकल्प्य तु तत्कालं स्नात्वा भुंजीत नान्यत इति गौडनिबंधे वचनात् मैवम् अज्ञातस्यानिमित्तत्वाभावेन निमित्तमहिम्नैव ज्ञानलाभे वाक्यवैयर्थ्यात् ग्रस्तास्तेपि तदापत्तेश्च किंच दर्शनं पुंसो विशेषणमुपलक्षणं वा नाद्यः दर्शनावच्छिन्नेकाले स्नानतुलादानादेर्बाधात् दर्शनविच्छेदे कृतमपि स्नानादि न ग्रहणनिमित्तं स्यात् नांत्यः यावद्दर्शनगोचर इति यावत्पदवैयर्थ्यप्रसंगात् दृष्टग्रहस्य ग्रहणोत्तरमपि स्ना-

नाद्यापत्तेश्च ज्ञानपक्षेप्येषदोषस्तुल्यइतिचेत् सूर्योसि यदिज्ञानवाचकंपदंश्रूयेत ततस्तस्यान्वयोविचार्येत दृशिस्तु
भूयतइतिवैषम्यम् कथंतर्हिज्ञानंलभ्यते संक्रांतोस्नायादितिवदर्थादित्यवेहि अश्रुतत्वादेवनोद्देश्यविशेषणाविवक्षा
कृतोवाक्यभेदोपि अस्तुतर्हिदृश्यग्रहणंनिमित्तमितिचेत् ग्रस्तास्तेऽस्तोत्तरस्नानापत्तेः विशिष्टोद्देशेवाक्यभेदाच्च
तत्राप्येतत्तुल्यमितिचेत् यावद्दर्शनगोचरइतिवचनेनतन्निषेधात् नवस्त्वन्यग्रहइवग्रस्तास्तेपिस्यात् किंचदर्शनस्यवि
धिरनुवादोवा आद्ये ग्रहणोद्देशेनदर्शनविधिरुतदर्शनविशिष्टस्नानविधिरुतस्नानोद्देशेनदर्शनविधिः नाद्यः ग्रहो
द्देशेनस्नानविधानेदर्शनविधानेच वाक्यभेदात् एतेनद्वितीयोपिपरास्तः नतृतीयः स्नानस्याप्राप्तेः दर्शनस्यनिमित्त
त्वेनाविधेयत्वाच्च अन्यथासोमवमनादौप्रसंजनविधिः केनवार्येत अथनानावाक्येषुक्वचिद्दर्शनविशिष्टस्नानविधिः
क्वचिच्चप्राप्तंदर्शनंनिमित्तीकृत्यस्नानमात्रविधिः तन्न स्नानस्यप्रधानस्यप्राप्तौतदंगदर्शनप्राप्तिः तस्यांचनिमित्तेस-
तिस्नानमित्यन्योन्याश्रयात् एवंदर्शनविधौसतितन्निमित्तकस्नानविधिः सतिचप्रधानस्नानविधौतदंगदर्शनविधिः
एवमधिकारेप्रयोजकत्वेच योज्यम् क्त्वार्थपूर्वकालत्वविधौचास्त्येववाक्यभेदः अन्यथास्नानोत्तरमपिदर्शनसंगंस्यात् न
द्वितीयः तत्रापिदर्शनग्रहयोर्निमित्तत्वेस्नानद्वयापत्तेः दर्शनावृत्तौनैमित्तिकावृत्तिप्रसंगात् दर्शनविशिष्टग्रहस्यवि
शिष्टस्यानुवादेवाक्यभेदापत्तेः नचहविरार्तिवद्विशिष्टंनिमित्तमितिवाच्यम् आर्तिमात्रस्यहिनिमित्तत्वेनिमेषाद्यार्तेर ३१
पितत्त्वापत्तेर्नैमित्तिकत्वभंगाद्युक्तंविशिष्टोद्देशत्वम् इहतुग्रहणमात्रस्यनिमित्तत्वेनकाचित्क्षतिः तस्माद्दर्शनवाक्या

नांग्रस्तास्तविषयत्वादनादेशपरत्वाद्वा ज्ञानस्यचार्थतः प्राप्तेस्तद्देवनिमित्तं तेनमघाद्यान्छादने ऽधादेश्चस्नानादिभवत्येवेत्यलंवे
दबाह्यैः संलापेन इतिग्रहणनिर्णयः अथसमुद्रस्नानम् आश्वलायनः समुद्रपर्वसुस्नायादमायांचविशेषतः पा
पैर्विमुच्यतेसर्वैरमायांस्नानमाचरन् भृगोभौमदिनेस्नानंनित्यमेवविवर्जयेत् भारते अश्वत्थसागरौसेव्यौनस्प्रष्टव्यौ
कदाचन अश्वत्थंमंदवारेतु सागरंपर्वणिस्पृशेत् पृथ्वीचंद्रोदयेस्कांदे पुनातिपर्वणि स्नानात्तर्पणैः सरितांपतिः क
दाचिदपिनैवात्रस्नानंकुर्यादपर्वणि अस्यापवादस्तत्रैवप्रभासखंडे पर्वकालेचसंप्राप्तेनदीनांचसमागमे सेतुबंधेतथा
सिंधौतीर्थेष्वन्येषुसंयुतः एवमादिषुसर्वेषुमध्येन्येतुस्वकर्मणि तथा विनामंत्रंविनापर्वक्षौरकर्मविनानरैः कुशाग्रेणा
पिदेवेशिनस्प्रष्टव्योमहोदधिः तथा नकालनियमः सेतौसमुद्रस्नानकर्मणि तद्विधिश्चतत्रैव पिप्पलादसमुत्पन्ने
कृत्येलोकभयंकरे पाषाणस्तेमयादत्त आहारार्थंप्रकल्पतामिति पाषाणंप्रक्षिप्य विश्वाचीचघृताचीचविश्वयोनेविशांपते
सान्निध्यंकुरुमेदेवसागरेलवणांभसि नमस्तेविश्वगुप्तायनमोविष्णोअपांपते नमोजलधिरूपायनदीनांपतयेनमः सम
स्तजगदाधारशंखचक्रगदाधर देवदेहिममानुज्ञांतवतीर्थनिषवणे त्रितत्वात्मकमीशानंनमोविष्णुमुमापतिम् सान्नि
ध्यंकुरुदेवेशसागरेलवणांभसि अग्निश्चयोनिरनिलश्चदेहोरेतोधाविष्णुरमृतस्यनाभिः एतद्ब्रुवन्पांडवसत्यवाक्यंततोऽव
गाहेतपतिंनदीनामिति भारतोक्तमंत्रान्पठित्वाविधिवत्स्नात्वा सर्वरत्नोभवान्छ्रीमान्सर्वरत्नाकरोयतः सर्वरत्नप्रधा-
नस्त्वंगृहाणार्घ्यंमहोदधे इत्यर्घ्यंदत्वातर्पयेत् यथोक्तं पृथ्वीचंद्रोदयेस्कांदे पिप्पलादंविकर्णंचकृतांतंजीवकेश्वरम् त्र

सिद्धंवामदेवंचपराशरमुमापतिं वाल्मीकिंनारदंचैववालखिल्यांस्तथैवच नलंनीलंगवाक्षंचगवयंगंधमादनम् जांबवंतंहनूमंतंसुग्रीवंचांगदंतथा मैंदंचद्विविदंचैवऋषभंशरभंतथा रामंचलक्ष्मणंचैवसीतांचैवयशस्विनीम् एतांस्तुतर्पयेद्विद्वान्जलमध्येविशेषतः आब्रह्मस्तंबपर्यंतंयत्किंचित्सचराचरम् मयादत्तेनतोयेनतृप्तिमेवाभिगच्छतीति॥ ॥इतिश्रीमीमांसकनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृतेनिर्णयसिंधौ प्रथमपरिच्छेदःसमाप्तः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ छँः ॥ इतिनिर्णयसिंधौप्रथमपरिच्छेदः समाप्तः ॥ छुः ॥ ॥

अथनिर्णयसिंधुद्वितीयपरिच्छेदप्रारंभः

श्रीगणेशायनमः अथसांवत्सरप्रतिपदमारभ्यतिथिकृत्येच कृष्णादिमतेनशुक्लादिमतेवच विवाहादौचसौरादिमासंज्ञस्यैवविनिर्देशोदितिश्राद्धमा
यशोनुसृत्यतिथिनिर्णयस्ततत्कृत्यंचनिरूप्यते तत्रमीनसंक्रांतेःपश्चात्षोडशघटिकाःपुण्यकालः रात्रौतुनिशीथात्प्राक्परतश्चसंक्रमेपूर्वोत्तरदिना
र्धंपुण्यं निशीथेतुदिनद्वयंपुण्यमितिसामान्यनिर्णयादवसेयं अथतिथिनिर्णयः तत्रचैत्रशुक्लप्रतिपदिवत्सरारंभः तत्रौदयिकीग्राह्या चैत्रेमा
सिजगद्ब्रह्माससर्जप्रथमेहनि शुक्लपक्षेसमग्रंतुतदासूर्योदयेसतीतिहेमाद्रौब्राह्मोक्तेः दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वैव तदुक्तंज्योतिर्निबंधे चैत्रे-
सितप्रतिपदियोवारोर्कोदयेसवर्षेशः उदयद्वितयेपूर्वानोदययुगलेपिपूर्वःस्यात् यस्माच्चैत्रसितादेरुदयाद्भानोःप्रवृत्तिरब्दादेरिति वत्सरादौवसंता
दौबलिराज्येतथैवच पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरितिवृद्धवसिष्ठोक्तेः चैत्रमासस्ययाशुक्लप्रथमाप्रतिपद्भवेत् तदह्निब्रह्मणःकृत्वासोपवास-
स्तुपूजनं संवत्सरमवाप्नोतिसौख्यानिभृगुनंदनेतिहेमाद्रौविष्णुधर्मोक्तेः यदातुचैत्रोमलमासोभवतितदादैवकार्यस्यतत्रनिषिद्धत्वाच्छुद्धमासिसंव
त्सरारंभः कार्यइतिकेचिदाहुःनिष्कर्षस्तु शुक्लादेर्मलमासस्यसोंतर्भवतिचोत्तरइत्यादिवचनादग्रिमवर्षांतः पातान्मलमासमारभ्यैववर्षप्रवृत्तेः
शुक्लारस्तादावेवमलमासएवकार्यइतिवयंप्रतीमः ननुशुक्लारस्तादौचैत्रशुक्लप्रतिपदंतरस्याभावाद्युक्तंतन्मध्यएवानुष्ठानंमलमासेतुशुद्धप्रतिपदंतर
स्यासंभवात् शुद्धएववत्सरारंभोयुक्तइतिचेत् भ्रांतोसि नहिप्रतिपदंतरसत्वंप्रयोजकं द्विकरणापत्तेः वर्षशब्दत्वापत्तेश्च अपितुवत्सरारंभःसतु
मलमासेपीत्युक्तंप्राक् नहिचैत्रशुक्लादिर्मलमासःपूर्ववर्षेंतर्भवतीतिब्रह्मणापिस्मृवचं तत्रतैलाभ्यंगोनित्यः वत्सरादौवसंतादौबलिराज्येतथैवच
तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतइतिवसिष्ठोक्तेः अस्यामेवनवरात्रारंभः तदुक्तंमार्कंडेयपुराणे शरत्कालेमहापूजाक्रियतेयाचवार्षिकीति त
त्रपरयुतैवग्राह्या अमायुक्तानकर्तव्याप्रतिपच्चंडिकार्चने मुहूर्तमात्राकर्तव्याद्वितीयादिगुणान्वितेति देवीपुराणात् तिस्रोह्येताःपराःप्रोक्तास्तिथयः

कुरुनंदन कार्तिकाश्वयुजोर्मासोश्चैत्रेमासिचभारतेतिहेमाद्रौब्राह्मोक्तेः परापरयुताः अत्रविशेषः पारणानिर्णयश्चशारदनवरात्रेवक्ष्यते अत्रप्रपादानमुक्तमपरार्केभविष्ये अतीतेफाल्गुनेमासिप्राप्तेचैत्रमहोत्सवे पुण्येऽन्हिविप्रकथितेप्रपादानंसमारभेदित्युपक्रम्य ततश्चोत्सर्जयेद्विद्वान्मंत्रेणानेनमानवः प्रपेयंसर्वसामान्याभूतेभ्यःप्रतिपादिता अस्याःप्रदानात्पितरस्तृप्यंतुहिपितामहाः अनिवार्यंततोदेयंजलंमासचतुष्टयमिति तथा प्रपांदातुमशक्तेनविशेषाद्धर्मभीप्सुना प्रत्यहंधर्मघटकोवस्त्रसंवेष्टिताननः ब्राह्मणस्यगृहेदेयःशीतामलजलःशुचिः तत्रमंत्रः एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः अस्यप्रदानात्सकला ममसंतुमनोरथाः अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति प्रपादानफलंसोपिप्राप्नोतीहनसंशयइति चैत्रशुक्लतृतीयायांगौरीमीश्वरसंयुतां संपूज्यदोलोत्सवंकुर्यात् तदुक्तंनिर्णयामृतेदेवीपुराणे तृतीयायांयजेद्देवींशंकरेणसमन्वितां कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः स्रग्गंधधूपदीपैश्चदमनेनविशेषतः आंदोलयेत्ततोवत्सशिवोमातुष्टयेसदेति अत्रचतुर्थीयुताग्राह्या मुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरइतिमाधवोक्तेः अत्रैवसौभाग्यशयनव्रतमुक्तंमात्स्ये वसंतमासमासाद्यतृतीयायांजनप्रिये सौभाग्यायसदास्त्रीभिःकार्यंपुत्रसुखेप्सुभिरिति तत्रापिपरयुतैव इयंचमन्वादिरपि अत्रैवप्रसंगात्सर्वमन्वादिनिर्णयउच्यते ताश्चोक्तादीपिकायां तिथ्यग्नीनतिथिस्तिथ्याशाकृष्णेभेनलोग्रहः तिथ्यर्कानशिवोश्चोमातिथीमन्वादयोमधोरिति तिथिः पूर्णिमा अग्निस्तृतीया नेतिवैशाखेनास्तीत्यर्थः आशादशमी कृष्णेभः कृष्णाष्टमीअनलस्तृतीया ग्रहोनवमी अर्कोद्वादशी नेतिमार्गशीर्षेनास्तीत्यर्थः शिवएकादशी अश्वःसप्तमी मधोश्चैत्रादारभ्यैतामन्वादयइत्यर्थः अत्रमूलवचनानिहेमाद्र्यादौज्ञेयानि एताश्चमन्वादयोहेमाद्रिमतेशुक्लपक्षस्थाः पौर्वाण्हिकाः कृष्णपक्षस्थाःआपराण्हिकाग्राह्याः पूर्वाण्हेतुसदाग्राह्याः शुक्लामनुयुगादयः दैवेकर्मणिपित्र्येचकृष्णेचैवापराण्हिकाइतिगारुडवचनात् अथोमन्वादियुगादिकर्मतिथयःपूर्वाण्हिकाःस्युःसितेविज्ञेयाअ

पराणिह्कार्य्य बहुले इति दीपिकोक्तेश्च कालादर्शे त्वपराह्णव्यापित्वं मन्वादिषूक्तं तत्त्वयुक्तमिति युगादिनिर्णये वक्ष्यामः अत्र च श्राद्धमुक्तं मात्स्ये कृतश्राद्धं विधानेन मन्वादिषु युगादिषु हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति मन्वादिश्राद्धं च मलमासे सति मासद्वयेपि कार्यं मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचन्द्रिकोक्तेः अत्र पिंडरहितं श्राद्धं कुर्यात् तदुक्तं कालादर्शे विषुवायनसंक्रांतिमन्वादिषु युगादिषु विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदिति मन्वादिश्राद्धं नित्यं अकरणे प्रायश्चित्तदर्शनात् तदुक्तमृग्विधाने त्वंभुवः प्रतिमंत्रं च शतवारं जले जपेत् मन्वाद्यायदान्नज्ञाः कुरुते नैव चापि इति एवं यत्र प्रायश्चित्तवीप्सादिदर्शनं तानि षण्णवतिश्राद्धानि नित्यानि तानि तु अमायुगमनुक्रांतिधृतिपातमहालयाः अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिता इत्युक्तानि चकारादष्टकाग्रहणं चैत्रशुक्लतृतीयेयं मत्स्यजयंती अत्रैव प्रसंगाद्दशावतारजयंत्यो निर्णीयंते तत्र पुराणसमुच्चये मत्स्योभूद्भुतभुग्दिने मधुसिते कूर्मो विधौ माधवे वाराहो गिरिजासुते नभसि यद्भूतसिते माधवे सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे रामो गौरितिथावतः परशुभृद्रामो नवम्यां मधोः कृष्णोऽष्टम्यां नभसि सितपरे चाश्विने यद्दशम्यां बुद्धः कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण अन्हो मध्ये वामनो रामरामौ मत्स्यः क्रोडश्चापराण्हे विभागे कूर्मः सिंहो बौद्धकल्की च सायं कृष्णो रात्रौ कालसाम्ये च पूर्वेति केचित्तु स्फुटान् श्लोकान् पठंति तथा चैत्रे तु शुक्लपंचम्यां भगवान् मीनरूपधृक् ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः चैत्रे कृष्णनवम्यां तु हरिर्वाराहरूपधृक् नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः राधशुक्लतृतीयायां रामो भार्गवरूपधृक् चैत्रशुक्लनवम्यां तु रामो दाशरथात्मजः नभस्ये तु द्वितीयायां बलभद्रोऽभवद्धरिः श्रावणे बहुलेऽष्टम्यां कृष्णोऽभूल्लोकरक्षकः ज्येष्ठशुक्लद्वितीयायां बौद्धः कल्की भविष्यतीति कौंकणास्तु वराहपुराणस्थत्वेन वाक्यानि पठंति आषाढशुक्लपक्षे तु एकादश्यां महातिथौ जयंती मत्स्यनाम्नीति तस्यां कार्यं सुपोषणं नभोमासि तृतीयायां हरिः कमठरूपधृक् नभस्य शुक्लपंचम्यां वराहस्य जयंतिका

वैशाखेतुचतुर्दश्यांनृसिंहःसमपद्यत मासिभाद्रपदेशुक्लेकादश्यांवामनोहरिः वैशाखेशुक्लपक्षेतुतृतीयायांभृगूद्वहः चैत्रेनवम्यांरामोभूत्कौसल्यायांपरःपुमान् श्रावणेबहुलेष्टम्यांवासुदेवोजनार्दनः पौषशुक्लेतुसप्तम्यांकुर्याद्बौद्धस्यपूजनं माघशुक्लतृतीयायांकल्किनःपूजनंहरेः प्रातःप्रातस्तु मध्यान्हेसायंसायंतथानिशि मध्यान्हेमध्यरात्रेचसायंप्रातस्तुक्रमादिति तदत्रसमूलत्वनिर्णयेसतिकल्पभेदेनव्यवस्थाद्रष्टव्या एताश्चतदुपासकानांनित्याः अन्येषांतुकाम्याः जन्माष्टम्यादौतुविशेषंवक्ष्यामः चैत्रशुक्लपंचमीकल्पादिः तदुक्तंहेमाद्रौमात्स्ये ब्रह्मणोयादिनस्यादिःकल्पादिःसाप्रकीर्तिता वैशाखस्यतृतीयायाकृष्णायाफाल्गुनस्यच पंचमीचैत्रमासस्यतथैवांत्यातथापरा शुक्लात्रयोदशीमाघेकार्तिकस्यतुसप्तमी नवमीमार्गशीर्षस्यसप्तैताःसंस्मराम्यहं कल्पानामादयोह्येतादत्तस्याक्षयकारकाः अत्रसर्वोपिनिर्णयोमन्वादिवत्ज्ञेयः हेमाद्रौब्राह्मे शुक्लायामथपंचम्यांचैत्रेमासिशुभानना श्रीर्ब्रह्मलोकान्मानुष्यंसंप्राप्ताकेशवाज्ञया ततस्तांपूजयेत्तत्रयस्तंलक्ष्मीर्नमुंचति चैत्रशुक्लाष्टम्यांभवान्याउत्पत्तिः तत्रनवमीयुताग्राह्या अष्टमीनवमीयुक्तानवमीचाष्टमीयुतेतिब्रह्मवैवर्तात् अत्रभवानीयात्रोक्ताकाशीखंडे भवानींयस्तुपश्येतशुक्लाष्टम्यांमधौनरः नजातुशोकंलभतेसदानंदमयोभवेदिति अत्रैवाशोककलिकाप्राशनमुक्तंहेमाद्रौ लैंगे अशोककलिकाश्चाष्टौयेपिबंतिपुनर्वसौ चैत्रेमासिसितेष्टम्यांनतेशोकमवाप्नुयुः प्राशनमंत्रस्तु त्वामशोकवराभीष्टंमधुमाससमुद्भवं पिबामिशोकसंतप्तोमामशोकंसदाकुर्विति अत्रविशेषः स्मृतौचंद्रोदयेविष्णुः पुनर्वसुबुधोपेताचैत्रेमासिसिताष्टमी प्रातस्तुविधिवत्स्नात्वावाजपेयफलंलभेदिति तिथितत्वेकालिकापुराणे चैत्रेमासिसिताष्टम्यांयोनरोनियतेंद्रियः स्नायात्लौहित्यतोयेषुसयातिब्रह्मणःपदं चैत्रंतुसकलंमासंशुचिःप्रयतमानसः लौहित्यतोयेयःस्नायात्सकैवल्यमवाप्नुयात् लौहित्योब्रह्मपुत्रः मंत्रस्तु ब्रह्मपुत्रमहाभागशांतनोःकुलसंभव अमोघागर्भसंभूतपापंलौहित्यमेहर चैत्रशुक्लनवमीरामनवमी तदुक्तमगस्त्यसंहितायां चैत्रेनवम्यांप्राक्प

क्षेदिवापुण्येपुनर्वसौ उदयेगुरुगौरांशोः स्वोच्चस्थेग्रहपंचके मेषेपूषणिसंप्राप्तेलग्नेकर्कटकाह्वये आविरासीत्सकलयाकौसल्यायांपरः पुमान् तस्मिन्दि
नेतुकर्त्तव्यमुपवासव्रतंसदा तत्रजागरणंकुर्याद्रघुनाथपरोभुवीति इयंचमध्यान्हयोगिनीग्राह्या चैत्रशुक्लेतुनवमीपुनर्वसुयुतायदि सैवमध्यान्हयोगेन-
महापुण्यतमाभवेदितितत्रैवोक्तेः तथा चैत्रमासेनवम्यांतुजातोरामःस्वयंहरिः पुनर्वस्वृक्षसंयुक्तासातिथिःसर्वकामदा श्रीरामनवमीप्रोक्ताकोटिसू
र्यग्रहाधिका तथा केवलापिसदोपोष्यानवमीशब्दसंग्रहात् तस्मात्सर्वात्मनासर्वैःकार्यंवैनवमीव्रतं पूर्वेद्युरेवमध्यान्हयोगेकर्मकालव्याप्तेःसैवग्राह्या
दिनद्वयेमध्यान्हव्याप्तौतदभावेवापूर्वदिनेपुनर्वस्वृक्षयुक्तापित्यक्तापरैवकार्या तदुक्तंमाधवीयेऽगस्त्यसंहितायां नवमीचाष्टमीविद्धात्याज्याविष्णुप
रायणैः उपोषणंनवम्यांचदशम्यांनैवपारणमिति अष्टमीविद्धासऋक्षापिनोपोष्येतिमाधवः रामार्चनचंद्रिकायामपि विद्धैवचेदृक्षयुक्ताव्रतंतत्रकथं
भवेत् विद्धानिषिद्धश्रवणान्नवमीचेतिवाक्यतः वैष्णवानांविशेषात्तुतत्रविष्णुपरैरपि दशम्यादिषुवृद्धिश्चेद्विद्धात्याज्यैववैष्णवैः तदन्येषांचसर्वेषां
व्रतंतत्रैवनिश्चितमिति अत्रदशम्यादिषुवृद्धिश्चेदिति तदन्येषामितिचवदन्यदाप्रातस्त्रिमुहूर्तानवमीदशमीचक्षयवशात्सूर्योदयात्प्रागेवसमा-
प्यतेतदास्मार्तानांतत्रैव एकादशीनिमित्तोपवासात् नवमीव्रतांगपारणालोपःस्यात् अतोऽष्टमीविद्धैवस्मार्तैःकार्या वैष्णवानांत्वरुणोदयविद्धै
कादश्याहेयत्वान्नपारणालोपप्रसंगइति द्वितीयैवतैःकार्येतिसूचयति दशमीवृद्ध्यभावेऽष्टमीविद्धाया एवमध्यान्हव्यापित्वेऽक्षयेचवैष्णवैरपि
विद्धैवोपोष्येत्यर्थसिद्धं इदंचव्रतंसंयोगपृथक्त्वन्यायेनकाम्यंनित्यंच तदुक्तंहेमाद्रावगस्त्यसंहितायां उपोषणंजागरणंपितॄनुद्दिश्यतर्पणं त
स्मिन्दिनेतुकर्तव्यंब्रह्मप्राप्तिमभीप्सुभिः सर्वेषामप्ययंधर्मोभुक्तिमुक्त्यैकसाधनः अशुचिर्वापिपापिष्ठःकृत्वेदंव्रतमुत्तमं पूज्यःस्यात्सर्वभूतानांयथा
रामस्तथैवसः यस्तुरामनवम्यांतुभुंक्तेमोहाद्विमूढधीः कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयः तथा अकृत्वारामनवमीव्रतंसर्वव्रतोत्तमं व्रतान्य-

न्यानिकुरुतेनतेषांफलभाग्भवेत् प्राप्तेश्रीरामनवमीदिनेमर्त्योविमूढधीः उपोषणंनकुरुतेकुंभीपाकेषुपच्यते अत्रकेचित्तदुपासकानामेवेदंनित्यंनत्वन्येषामित्याहुः अन्येतु अकरणेदोषश्रवणात्तस्मात्सर्वात्मनासर्वैः कार्यंवैनवमीव्रतमिति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपिसर्वेषांनित्यं अन्यथाजन्माष्टम्यादावपितदुपासकानामेवनित्यतांवक्तुःकोवारयितेत्याहुः अत्रविशेषोहेमाद्रावगस्त्यसंहितायां आचार्यंचैवसंपूज्यवृणुयात्प्रार्थयेन्निशि श्रीरामप्रतिमादानंकरिष्येहंद्विजोत्तम भक्त्याचार्योभवप्रीतःश्रीरामोसित्वमेवच तथा स्वगृहेचोत्तरेदेशेदानस्योज्ज्वलमंडपं शंखचक्रहनूमद्भिःप्राग्द्वारेसमलंकृतं गरुत्मच्छार्ङ्गबाणैश्चदक्षिणेसमलंकृतं गदाखड्गांगदैश्चैवपश्चिमेसुविभूषितं पद्मस्वस्तिकनीलैश्चकौबेरे समलंकृतं मध्येहस्तचतुष्काढ्यंवेदिकासुत्तमायतं ततःसंकल्पयेद्देवंराममेवस्मरन्मुने अस्यांरामनवम्यांचरामाराधनतत्परः उपोष्याष्टसुयामेषुपूजयित्वायथाविधि इमांस्वर्णमयींरामप्रतिमांचप्रयत्नतः श्रीरामप्रीतयेदास्येरामभक्तायधीमते प्रीतोरामोहरत्वाशुपापानिसुबहूनिमे अनेकजन्मसंसिद्धान्यभ्यस्तानिमहांतिच ततःस्वर्णमयींरामप्रतिमांपलमात्रतः निर्मितांद्विभुजांदिव्यांवामांकस्थितजानकीं बिभ्रतींदक्षिणकरेज्ञानमुद्रांमहामुने वामेनाधःकरेणाराद्देवीमालिंग्यसंस्थितां सिंहासनेराजतेत्रपलद्वयविनिर्मिते तथा अशक्तोयोमहाभागसतुवित्तानुसारतः पलेनार्धतदर्धार्धेनवामुने सौवर्णंराजतंवापिकारयेद्रघुनंदनं पार्श्वेभरतशत्रुघ्नौधृतछत्रकरावुभौ चापद्वयसमायुक्तंलक्ष्मणंचापिकारयेत् दक्षिणांगेदशरथंपुत्रावेक्षणतत्परं मातुरंकगतंराममिंद्रनीलसमप्रभं पंचामृतस्नानपूर्वंसंपूज्यविधिवत्ततः कौसल्यासंभवस्तु रामस्यजननींचासिरामरूपमिदंजगत् अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुते नमोदशरथायेतिपूजयेत्पितरंततः अत्रदशावरणपंचावरणादिपूजाऽन्यत्रज्ञेया अशोककुसुमैर्युक्तमर्घ्यंदद्याद्विचक्षणः दशाननवधार्थायधर्मसंस्थापनायच राक्षसानांविनाशायदैत्यानांनिधनायच परित्राणायसाधूनांजातोरामःस्वयं

हरिः गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघ पुष्पांजलिंपुनर्दत्वायामेयामेप्रपूजयेत् दिवैवंविधिवत्कृत्वारात्रौजागरणंततः ततःप्रातःसमुत्थायस्नानसंध्यादिकाःक्रियाः समाप्यविधिवद्रामंपूजयेद्विधिवन्मुने ततोहोमंप्रकुर्वीतमूलमंत्रेणमंत्रवित् पूर्वोक्तपद्मकुंडेवास्थंडिलेवासमाहितः लौकिकाग्नौविधानेनशतमष्टोत्तरंततः साज्येनपायसेनैवस्मरन्राममनन्यधीः ततोभक्त्यासुसंतोष्यआचार्यंपूजयेन्मुने ततोरामंस्मरन्दद्यादेवंमंत्रमुदीरयेत् इमांस्वर्णमयींरामप्रतिमांसमलंकृतां चित्रवस्त्रयुगच्छन्नांरामोहंराघवायते श्रीरामप्रीतयेदास्येतुष्टोभवतुराघवः इतिदत्वाविधानेनदद्याद्वैदक्षिणांशुभां ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयइति इयंमलमासेनकार्या सुजन्मप्यजसंस्यान्नोपवासःकृतोभवेदिति नकुर्यान्मलमासेतुमहादानव्रतानिचेतिचमाधवीयेसंग्रहवचनात् ननुरामनवमीव्रतस्यनित्यत्वादेकादशीवन्मलमासेपिकर्तव्यतास्यादितिचेत् अत्रब्रूमः नैकादश्युपवासस्यव्रतत्वेनप्राप्तिः किंतु एकादश्यांनभुंजीतपक्षयोरुभयोरपी त्यादिनिषेधस्यमलमासेपिपालनीयत्वात्कृष्णैकादश्यांपुत्रवद्गृहिणइत्यर्थादुपवासःप्रसज्यते नत्विहतथेतिव्रतत्वेनप्राप्तिर्वाच्या साचनिषिद्धेत्यप्रसंगः स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइतिनिषेधाच्च एवंजन्माष्टम्यादावपिबोद्धव्यं इतिरामनवमी चैत्रशुक्लैकादश्यांदोलोत्सवउक्तोब्राह्मे चैत्रमासस्यशुक्लायामेकादश्यांतुवैष्णवैः आंदोलनीयोदेवेशःसलक्ष्मीकोमहोत्सवैरिति चैत्रशुक्लद्वादश्यांदमनोत्सवः द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्सवः बौधायनादिभिःप्रोक्तःकर्तव्यःप्रतिवत्सरमिति रामार्चनचंद्रिकोक्तेः ऊर्जेव्रतंमधौदोलाश्रावणेतंतुपूजनं चैत्रेचदमनारोपमकुर्वाणोव्रजत्यधः इतितत्रैवपाद्मवचनाच्च शिवभक्तादिभिस्तुचतुर्दश्यादौकार्यं तत्रस्यात्स्वीयतिथिषुवन्ह्यादेर्दमनार्पणमितितत्रैवोक्तेः ज्योतिःप्रकाशेपि स्वस्वदेवप्रतिष्ठायांमंत्रसंग्रहणेतथा पवित्रदमनारोपेग्राह्यास्तत्तिथिर्बुधैः तिथयस्तु वन्हिर्विरिंचोगिरिजागणेशः फणीविशाखोदिनकृन्महेशः दुर्गांतकोविश्वहरिःस्मरश्चशर्वःशशीचेतितिथीशपूज्याइत्यु

क्ताः अथागमोक्तदीक्षाव्रतोदमनारोपणविधिः रामार्चनचंद्रिकायां तत्रैकादश्यां क्रियालोपविघातार्थंयत्त्वयाविहितंप्रभो नमेविघ्नोभवेदत्रकुरुनाथदयांमयि सर्वथासर्वदाविष्णोममत्वंपरमागतिः उपवासेनत्वांदेवतोषयामिजगत्पते कामक्रोधादयोप्येतेनमेस्युर्व्रतघातकाः अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं तावद्रक्षात्वयाकार्यासर्वस्यास्यजगत्पते इतिदेवंसंप्रार्थ्यदमनमादायपंचगव्येनप्रोक्ष्य वारिणाप्रक्षाल्याशोकमूलेदेवाग्रेवा अशोकायनमस्तुभ्यंकामस्त्रीशोकनाशन शोकार्तिहरमेनित्यमानंदंजनयस्वमे इत्यशोके त्रुट्यादिकालपर्यंतःकालरूपोमहाबलः कलतेचैववयःसर्वंतस्मैकालात्मनेनमइतिकाल वसंतायनमस्तुभ्यंवृक्षगुल्मलताश्रय सहस्रसुखसंवास कामरूपनमोस्तुतइतिवसंतं कामभस्मसमुद्भूतरतिबाष्पपरिप्लुत ऋषिगंधर्वदेवादिविमोहकनमोस्तुतइति दमनंचसंपूज्य नमोस्तुपंचबाणायजगदाल्हादकारिणे मन्मथायजगन्नेत्ररतिप्रीतिप्रियायते इतिदमनमुपस्थाय ॐकामायनमइतिसंपूज्य निशायांदेवताग्रेपंचवर्णैःचंदनेनवा अष्टदलंकृत्वाबहिश्चतुरस्रंतद्बहिर्वर्तुलत्रयंतद्बहिर्वृत्तंचतुरस्रंचकृत्वातत्रकुंभंसंस्थाप्योपरिदमनंपूजयित्वा पूजार्थंदेवदेवस्यविष्णोलक्ष्मीपतेप्रभो मदनत्वमिहागच्छसान्निध्यंकुरुतेनमः ॐ क्लींकामदेवायनमः ॐ ह्रींरत्यैनमइत्यावाह्य दिक्षुपूर्वादितःस्मरशरीरायनमः अनंगाय॰ मन्मथाय॰ कामाय॰ क्लींवसंतसखाय॰ स्मराय॰ इक्षुचापाय॰ पुष्पास्त्रायनमइतिपूजयित्वा ॐ तत्सरूपायविद्महे कामदेवायधीमहि तंनोनंगःप्रचोदयात् इत्यष्टोत्तरशतंसंमंत्र्यपूजयित्वा ह्रीं नमइतिपुष्पांजलिंदत्वा नमोस्तुपुष्पबाणायजगदाल्हादकारिणे मन्मथायजगन्नेत्ररतिप्रीतिप्रियायते इतिनत्वा आमंत्रितोसिदेवेशपुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसान्निध्यंकुरुकेशव क्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वांपूजयिष्यामिसन्निधोभवतेनमः निवेदयाम्यहंतुभ्यंप्रातर्दमनकंशुभं सर्वदासर्वथाविष्णोनमस्ते

स्तुभ्यसीदमे इतिदेवंसंप्रार्थ्यपुष्पांजलिंदत्वा अस्त्रेणचक्रमंत्रेणवारक्षांकुर्यात् ततःप्रातर्नित्यपूजांकृत्वापुनर्देवंसंपूज्यगंधदूर्वाक्षतयुक्तंदम-
नमादायमूलमंत्रंपठित्वा देवदेवजगन्नाथवांछितार्थप्रदायक हृदिस्थान्पूरयेःकामान्ममकामेश्वरीप्रिय इदंदमनकंदेवगृहाणमदनुग्रहात् इ-
मांसांवत्सरींपूजांभगवन्परिपूरयइतिमंत्रांतेपुनर्मूलमंत्रेणदेवेसमर्पयेत् ततोऽंगदेवताभ्यःस्वस्वमंत्रेणदत्वाप्रार्थयेत् मणिविद्रुममालाभिर्मंदा
रकुसुमादिभिः इयंसांवत्सरीपूजातवास्तुगरुडध्वज वनमालांयथाविष्णोकौस्तुभंसततंहृदि तद्वद्दामनकींमालांपूजांचहृदयेवह जानताजान
तावापिनकृतंयत्तवार्चनं तत्सर्वंपूर्णतांयातुत्वत्प्रसादाद्रमापते जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज मंत्र
हीनमितिचसंप्रार्थ्यपंचोपचारैःपुनःसंपूज्यनीराज्यपारयेदिति दीक्षारहितानांतुनाम्नैवसमर्पणं अत्रचद्वादशीमतंत्रीकृत्यपारणाहोग्राह्यं
पारणाहेनलभ्येतद्वादशीघटिकापिचेत् तदात्रयोदशीग्राह्यापवित्रदमनार्पणइतितत्रैवोक्तेः गौणोपिकालउक्तस्तत्रैव हरेर्नदमनारोपःस्यान्मधौ
विघ्नतोयदि वैशाखेश्रावणेवापितत्तिथौस्यात्तदर्पणं श्रावणावधिशुक्रास्तेकर्तव्यमितिनारदः इतिपाठांतरं इदंचमलमासेनकार्यंउपाकर्मो-
त्सर्जनंचपवित्रदमनार्पणमितिकालादर्शेमलमासवर्ज्येषुपरिगणनात् उपाकर्मचहव्यंचकव्यंपर्वोत्सवंतथा उत्तरेनियतंकुर्यात्पूर्वेतन्निष्फलंभ
वेदितिमाधवीये प्रजापतिवचनाच्च शुक्रास्तादौतुकार्यमेव पूर्वोक्तवचनात् उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं ईशानस्यबलिंविष्णोःश-
यनंपरिवर्तनं कुर्याच्छुक्रस्यचगुरोर्मौढ्येपीतिविनिश्चयइतिज्योतिर्निबंधे वृद्धगार्ग्यवचनाच्च इतिदमनारोपः चैत्रशुक्लत्रयोदश्यामनंगव्रतं
तत्रसापूर्वाग्राह्या त्रयोदशतिथिःपूर्वसितइतिदीपिकोक्तेः चैत्रशुक्लचतुर्दशीपूर्वाग्राह्या मधोःश्रावणमासस्यशुक्लायातुचतुर्दशी सारात्रि
व्यापिनीग्राह्यानान्याशुक्लाकदाचनेतिहेमाद्रौबोधायनोक्तेः परापूर्वाह्णगामिनीतिवापाठः अत्रकेचिद्यथाश्रुतमेवार्थंवर्णयंति निशिव्याप्तमं

तिभूतानिशक्तयः शूलभृद्यतः अतस्तत्रचतुर्दश्यांसत्यांतत्पूजनंभवेदिति ब्रह्मवैवर्तात् हेमाद्रिमाधवादिलिखनमप्येवं संप्रदायविदस्त्वाहुः चतुर्दशीतुकर्तव्यात्रयोदश्यायुताविभो इतिस्कांदमुत्सर्गः तदपवादश्च तृतीयैकादशीषष्ठीशुक्लपक्षेचतुर्दशी पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेतिनारदीयवचनं तदपवादश्च मधोःश्रावणमासस्येति तत्रापवादाभावेपुनरुत्सर्गस्यस्थितिरितिन्यायेनपूर्वविद्धैवग्राह्येतिसिद्ध्यति ब्रह्मवैवर्ते तु सामान्यरूपमन्यत्रसावकाशमितितेन पूर्वदिनेमुहूर्तत्रयवेधेपूर्वा अन्यथोत्तरेति चैत्रपूर्णिमासामान्यनिर्णयात्परैव अत्रविशेषोनिर्णयामृते विष्णुस्मृतौ चैत्रीचित्रायुताचेत्स्यात्तस्यांचित्रवस्त्रप्रदानेनसौभाग्यमाप्नोतीति तथाब्राह्मे मंदेवार्केगुरौवापिवारेष्वेतेषुचैत्रिका तत्राश्वमेधजंपुण्यंस्नानंश्राद्धादिभिर्लभेदिति अत्रसर्वदेवानांदमनपूजोक्ता तत्रैववायवीये संवत्सरकृतार्चायाःसाफल्यायाखिलान्सुरान् दमनेनार्चयेच्चैत्र्यां विशेषेणसदाशिवमिति अत्रस्वीयतिथ्यासमुच्चयइतिकेचित् स्वीयतिथ्यामकरणेत्रदमनपूजनमित्यन्ये दीक्षिततदितरविषयत्वेनव्यवस्थेत्यपरे इयंमन्वादिरपि साचपूर्वमुक्ता चैत्रकृष्णात्रयोदश्यांमहावारुणीसंज्ञोयोगोगौडेषुप्रसिद्धः तदुक्तंवाचस्पतिकृतौशूलपाणौचस्कांदे वारुणेनसमायुक्तामधौकृष्णात्रयोदशी गंगायांयदिलभ्येतसूर्यग्रहशतैःसमा शनिवारसमायुक्तासामहावारुणीस्मृता गंगायांयदिलभ्येतकोटिसूर्यग्रहैःसमा शुभयोगसमायुक्ताशनौशतभिषायदि महामहेतिविख्यातात्रिकोटिकुलमुद्धरेत् तत्रैवज्योतिषे चैत्रासितेवारुणर्क्षयुक्तात्रयोदशीसूर्यसुतस्यवारे योगेशुभेसामहतीमहस्यागंगाजलेर्कग्रहकोटितुल्येति त्रिस्थलीसेतौब्रह्मांडपुराणे वारुणेनसमायुक्तामधौकृष्णात्रयोदशी गंगायांयदिलभ्येतशतसूर्यग्रहैःसमेति कल्पतरौब्राह्मे मधौकृष्णत्रयोदश्यांशनौशतभिषायुता वारुणीतिसमाख्याताशुभेतुमहतीस्मृता चैत्रकृष्णचतुर्दश्यांविशेषःपृथ्वीचंद्रोदयेपुलस्त्यः चैत्रकृष्णचतुर्दश्यांयःस्नायाच्छिवसन्निधौ नप्रेतत्वमवाप्नोतिगंगायांतुविशेष-

नइति अत्रपूर्वाग्राह्या कृष्णपक्षस्थत्वात् गौडैस्त्वेतदेवशुक्लचतुर्दश्यामित्येवंदेवलीयत्वेनपठितं इतिश्रीकमलाकरभट्टकृतेकालनिर्णयसिंधौचैत्रमासः मेषसंक्रमेप्रागपरादशदशघटिकाःपुण्यकालः रात्रौतुप्रागुक्तं अत्रधर्मघटादिदानमुक्तंपृथ्वीचंद्रोदयेपाद्मे तीर्थेचानुदिनंस्नानंतिलेश्चपितृतर्पणं दानंधर्मघटादीनांमधुसूदनपूजनं माधवेमासिकुर्वीतमधुसूदनतुष्टिदं अथवैशाखस्नानं तत्रपृथ्वीचंद्रोदयेविष्णुस्मृतिपाद्मयोः तुलामकरमेषेषुप्रातःस्नानंविधीयते हविष्यंब्रह्मचर्यंचमहापातकनाशनमितिसौरमासउक्तः अन्यत्पक्षद्वयमुक्तंतत्रैवपाद्मे मधुमासस्यशुक्लायामेकादश्यामुपोषितः पंचदश्यांचमाधवीरमेषसंक्रमणेतुवा वैशाखंस्नाननियमंब्राह्मणानामनुज्ञया मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपूर्वकं तत्रमंत्रः वैशाखंसकलंमासंमेषसंक्रमणेरवेः प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः मधुहंतुःप्रसादेनब्राह्मणानामनुग्रहात् निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहं माधवेमेषगेभानौमुरारेमधुसूदन प्रातःस्नानेनमेनाथफलदोभवपापहन्निति तीर्थविशेषोपितत्रैवोक्तः मेषसंक्रमणेभानोर्माधवेमासियत्नतः महानद्यांनदीतीर्थेनदेसरसिनिर्झरे देवखातेथवास्नायाद्यथाप्राप्तेजलाशये दीर्घिकाकूपवापीषुनियतात्माहरिंस्मरन्निति संकल्पेचतत्ततीर्थनामग्राह्यं अज्ञानेतुविष्णुतीर्थमितिवदेत् यदानज्ञायतेनामतस्यतीर्थस्यभोद्विजाः तदेत्युच्चारणंकार्यंविष्णुतीर्थमिदंत्विति तीर्थस्यदेवताविष्णुःसर्वत्रापिनसंशयइति तत्रैवोक्तेः तथान्योपिविशेषस्तत्रैवपाद्मे तुलसीकृष्णगौराख्यातयाभ्यर्च्यमधुद्विषं विशेषेणतुवैशाखेनरोनारायणोभवेत् माधवंसकलंमासंतुलस्यायोर्चयेन्नरः त्रिसंध्यंमधुहंतारंनास्तितस्यपुनर्भवः तथा प्रातःस्नात्वाविधानेनमाधवेमाधवप्रियं योश्वत्थमूलमासिंचेत्तोयेनबहुनासदा कुर्यात्प्रदक्षिणंतंतुसर्वदेवमयंततः पितृदेवमनुष्यांश्चतर्पयेत्सचराचरम् योश्वत्थमर्चयेद्देवमुदकेनसमंततः कुलानामयुतंतेनतारितंस्यान्नसंशयः कंडूयपृष्ठतोगांतुस्नात्वापिप्पलतर्पणं कृत्वागोविंदमभ्यर्च्यनदुर्ग

तिमवाप्नुयात् तथा एकभक्तमथोनक्तमयाचितमतंद्रितः माधवेमासियःकुर्याल्लभतेसर्वमीप्सितं वैशाखेविधिनास्नानंदेवनद्यादिकेबहिः हविष्यंब्रह्मचर्यंचभूशय्यानियमस्थितिः व्रतंदानंदमोदेविमधुसूदनपूजनं अपिजन्मसहस्रोत्थंपापंदहतिदारुणं मदनरत्नेस्कांदे प्रपाकार्याच्चवैशाखेदेवेदेयागलंतिका उपानद्व्यजनछत्रसूक्ष्मवासांसिचंदनं जलपात्राणिदेयानितथापुष्पगृहाणिच पानकानिचचित्राणिद्राक्षारंभाफलान्यपि तिथिनले ददातियोहिमेषादौसक्तूनंबुघटान्वितान् पितॄनुद्दिश्यविप्रेभ्यःसर्वपापैःप्रमुच्यतइति तथा वैशाखेयोघटंपूर्णंसभोज्यंवैद्विजन्मने ददातिसकरराजेंद्रसयातिपरमांगतिं एवंसंपूर्णस्नानाशक्तोत्र्यहंवास्नायात् तदुक्तंतत्रैवपाद्मे त्रयोदश्यांचतुर्दश्यांवैशाख्यावादिनत्रयं अपिसम्यग्विधानेननारीवापुरुषोपिवा प्रातःस्नातःसनियमःसर्वपापैःप्रमुच्यते यदातुवैशाखोमलमासोभवतितदाकाम्यनानत्रसमाप्तिनिषेधात् मासद्वयंस्नानंतन्नियमाश्चकर्तव्याः मासोपवासचांद्रायणादितुमलमासएवसमापयेत् तदुक्तंदीपिकायां नियतत्रिंशद्दिनलाच्छुभेमास्यारभ्यसमापयेत्मलिनेमासोपवासव्रतमिति अन्नदानविशेषउक्तोपरार्केवामनपुराणे गंधाश्चमाल्यानितथावैशाखेस्करंभीणिच देयानिद्विजमुख्येभ्योमधुसूदनतुष्टये एवंस्नानेकृतेतस्योद्यापनंकार्यं तदुक्तंतत्रैव मासमेवंबहिःस्नात्वानद्यादौविमलेजले एकादश्यांचद्वादश्यांपौर्णमास्यामथापिवा उपोष्यनियतोभूत्वाकुर्यादुद्यापनंबुधः मंडपंकारयेदादौकलशांस्तत्रविन्यसेत् निष्केणवातदर्धेनतदर्धार्धेनवापुनः शक्त्यावाकारयेद्देवंसौवर्णंलक्षणान्वितं लक्ष्मीयुक्तंजगन्नाथंपूजयेदासनेबुधः भूषणैश्चंदनैःपुष्पैदीपैर्नैवेद्यकैश्चयैः एवंसंपूज्यविधिवद्रात्रौजागरणंचरेत् श्वोभूतेकृतमैत्रोथग्रहवेद्यांग्रहान्यजेत् होमंकुर्यात्प्रयत्नेनपायसेनविचक्षणः तिलाज्येनयवैर्वापिसर्वैर्वापिस्वशक्तितः अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा मतोद्विष्णुरनेनैवइदंविष्णुरनेनवा व्रतसंपूर्तिसिद्ध्यर्थं

धेनुमेकांपयस्विनीं पादुकोपानहौछत्रंगुरवेव्यजनंतथा शय्यांसोपस्करांदद्याद्दीपिकांदर्पणंतथा ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्योदद्याच्चदक्षि
णां कलशान्जलसंपूर्णांस्तेभ्योदद्याद्यवांस्तथा एवंकृतेमाधवस्यचोद्यापनविधौशुभे फलमाप्नोतिसकलंविष्णुसायुज्यमाप्नुयात् एता-
वत्यशक्तौतत्रैवोक्तं वैशाख्यांविधिनास्नात्वाभोजयेद्ब्राह्मणान्दश कृसरंसर्वपापेभ्योमुच्यतेनात्रसंशयइति वैशाखशुक्लतृतीयाअक्षय्य
तृतीयोच्यते सापूर्वाह्णव्यापिनीग्राह्या दिनद्वयेपितद्व्याप्तौपरैव तदुक्तंनिर्णयामृतेनारदीये वैशाखेशुक्लपक्षेतुतृतीयारोहिणीयुता दु
र्लभाबुधवारेणसोमेनापियुतातथा रोहिणीबुधयुक्तापिपूर्वविद्धाविवर्जिता भक्त्याकृतापिमाधातःपुण्यंहंतिपुराकृतं गौरीविनायकोपे
तारोहिणीबुधसंयुता विनापिरोहिणीयोगात्पुण्यकोटिप्रदासदेति इयंयुगादिरपि साचोक्तारत्नमालायां माघेपंचदशीकृष्णानभस्येचत्र
योदशी तृतीयामाधवेशुक्लानवम्यूर्जेयुगादयइति यत्तुगौडाः माघस्यपौर्णमास्यांतु घोरंकलियुगंस्मृतमिति ब्राह्मोक्तेःवैशाखमासस्य
चयातृतीयानवम्यसौकार्तिकशुक्लपक्षे नभस्यमासस्यतमिस्रपक्षेत्रयोदशीपंचदशीचमाघे इतिविष्णुपुराणे चकारेणतमिस्रपक्षा
नुषंगेपिपूर्वानुरोधात्पौर्णमास्येववज्ञेया देशुक्लइत्यादिकंतुनिर्मूलमित्याहुः तन्न दर्शेतुमाघमासस्यप्रवृत्तंद्वापरंयुगमितिभविष्यविरोधात्
एतेनब्राह्मानुसारात् पूर्णिमायामेवयुगादिश्राद्धंवदन् शूलपाणिःपरास्तः तेनकल्पभेदाद्युगभेदाद्वाव्यवस्थेतितत्त्वं एतेनकार्तिकेनवमीशु
क्लामाघमासेच्चपूर्णिमेतिबृहन्नारदीयंव्याख्यातं निर्मूलत्वोक्तिर्नारदीयाज्ञानकृता अत्रश्राद्धमुक्तंमात्स्ये कृतंश्राद्धविधानेनमन्वादिषुयु-
गादिषु हायनानिद्विसाहस्रंपितृणांतृप्तिदंभवेदिति भारतेपि यामन्वाद्यायुगाद्याश्चतिथयस्तासुमानवः स्नात्वाहुत्वाचदत्वाचजप्त्वानंतफ
लभेदिति श्राद्धेपिपूर्वाह्णव्यापिनीग्राह्या पूर्वाह्णेतुसदाकार्याःशुक्लामनुयुगादयः दैवेकर्मणिपित्र्येचकृष्णाश्चैवापराह्णिकाइतिपाद्मोक्तेः दे

शुक्ले द्वे तथा कृष्णो युगादी कवयो विदुः शुक्ले पौर्वाण्हिके ग्राह्ये कृष्णे चैवापराण्हिके इति हेमाद्रौ नारदीयवचनाच्च दीपिकापि अथो मन्वादियुगादिकर्मतिथयः पूर्वाण्हिकाः स्युः सिते विज्ञेया अपराण्हिकाश्च बहुले इति स्मृत्यर्थसारेपि युगादिमन्वादिश्राद्धेषु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या कृष्णपक्षे पराण्हव्यापिनीति दिवोदासीये गोभिलः वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै हव्यं देवा न गृण्हंति कव्यं च पितरस्तथेति गोविंदार्णवेप्येवं तेनेयं पूर्वाण्हव्यापिनी दिनद्वये तत्त्वे परैवेति धर्मतत्त्वविदो हेमाद्र्यादयः अनंतभट्टस्तु सैव धृतिर्व्यतीपातो युगमन्वाद्यस्तथा सन्मुखा उपवासे स्युर्दानादावंतिमाः स्मृता इत्याह दानादाविति श्राद्धसंग्रहः उपवासस्त्वग्रे वक्ष्यते हेमाद्रावप्येवं माधवस्तु व्यतीपातः श्राद्धे पराण्हव्यापी ग्राह्य इत्याह स्मृत्यर्थसारे तु कुतुपकालयोगीत्युक्तं यत्तु मार्कंडेयः शुक्लपक्षस्य पूर्वाण्हे श्राद्धं कुर्याद्विचक्षणः कृष्णपक्षापराण्हे हि रौहिणं तु न लंघयेत् रौहिणो नवमो मुहूर्तः अत्र शुक्लपक्षयुगादिश्राद्धं पूर्वाण्हे कार्यमिति शूलपाणिः निर्णयामृतादयस्तु कालादर्शे माघश्राद्धमापराण्हिकमुक्त्वा एष मन्वंतरादीनां युगादीनां विनिर्णय इत्युक्तत्वात् द्वे शुक्ले इत्यादिवचनं विष्णुपूजनविषयं श्राद्धे त्वापराण्हिकमेवेति व्यवस्थां जगदुः सेयं पूर्वोक्तानेकवचोविरोधात् पूर्वाण्हे दैविकं कुर्यादित्यादिवचनादेव सिद्धे वचनवैयर्थ्याच्च स्वाच्छंद्यविलसितमात्रमित्युपेक्षणीया किंच कालादर्शोक्तिर्न्यायमूला वचोमूला वा नाद्यः युगादिश्राद्धस्यामाश्राद्धविकृतित्वेन न्यायतोपराण्हव्याप्तावपिवचनेन तस्य बाधात् नांत्यः अतिदेशादेवापराण्हप्राप्तेर्वचनवैयर्थ्यात् अप्राप्ते शास्त्रमर्थवदिति न्यायात् तेन यदि कालादर्शोक्तेः कथंचिद्ध ह्वाजाड्येन समाधित्सा तर्हि न्यायप्राप्तकृष्णपक्षयुगादिविषयत्वेन सा व्यवस्थापनीयेति दिक् पूर्वाण्हस्तत्र द्वेधा भक्तदिनपूर्वार्धः द्वेधा भक्तदिनांशकोत्र गदितः प्राण्हापराण्हाविति दीपिकोक्तेः माधवाद्योप्येवं अत्र विशेषो हेमाद्रौ भविष्ये वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च गंगातोये

नरःस्नात्वामुच्यतेसर्वकिल्बिषैः तस्यांकार्योयवैर्होमोयवैर्विष्णुंसमर्चयेत् यवान्दद्याद्द्विजातिभ्यःप्रयतःप्राशयेद्यवानिति अन्नदानविशेषस्तत्रैव भविष्ये इमांप्रक्रम्य उदकुंभान्सकनकान्सान्नान्सर्वरसैःसह यवगोधूमचणकान्सक्तुदध्योदनंतथा ग्रैष्मिकंसर्वमेवात्रसस्यंदानेप्रशस्यतेइति देवीपुराणेपि तृतीयायांतुवैशाखरोहिण्यृक्षप्रपूज्यतु उदकुंभप्रदानेनशिवलोकेमहीयते मंत्रस्तु एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितंपितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठत्विति अन्नंचपिंडरहितंश्राद्धंकुर्यात् अयनद्वितयेश्राद्धंविषुवद्वितयेतथा युगादिषुचसर्वासुपिंडनिर्वपणादृतेइतिहेमाद्रौपुलस्त्यवचनात् अत्ररात्रिभोजनेप्रायश्चित्तमृग्विधाने रात्रौभुक्तेवत्सरंतुमन्वादिषुयुगादिषु अभिस्ववृष्टिंमंत्रंचजपेदशनपातकइति अपरार्केयमः कृतोपवासाःसलिलंयेयुगादिदिनेषुच दास्यंत्यन्नादिसहितंतेषांलोकामहोदयाइति वैशाखेमलमासेसतितत्रैवयुगादिःकार्या तथाचहेमाद्रौऋष्यशृंगः दशहरासुनोत्कर्षश्चतुर्ष्वपियुगादिषु उपाकर्मणिचोत्सर्गेह्येतदिष्टंवृषादितइति एतद्दशहरादिकंवृषादिसंक्रमेइष्टं कन्याचंद्रेवृषेरवावित्यादिनासौरमासोक्तेरित्यर्थः कालादर्शेपि अब्दोदकुंभमन्वादिमहालययुगादिष्विति मलमासकर्तव्येषुपरिगणनाच्च महालयशब्देनमघात्रयोदश्युच्यतइतिमाधवः स्मृतिचंद्रिकायांतुमासद्वयेकर्तव्यमित्युक्तं योगादिकंमासिकंचश्राद्धंचापरपक्षिकं मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेति अपरपक्षः कृष्णपक्षः नतुमहालयः तस्यतत्रनिषेधात् मदनरत्नेपिमरीचिः प्रतिमासमृताहेचश्राद्धंयत्प्रतिवत्सरं मन्वादौचयुगादौचतन्मासोरुभयोरपीति प्रतिवत्सरंक्रियमाणकल्पादिश्राद्धमितिसएवव्याचख्यौ अत्रश्राद्धाकरणेप्रायश्चित्तमुक्तमृग्विधाने नयस्यद्यावामंत्रंचशतवारंतदाजपेत् युगादयोयदान्यूनाःकुरुतेनैवचापियइति अत्रसमुद्रस्नानंप्रशस्तं तदुक्तंपृथ्वीचंद्रो

दयेसौरपुराणे युगादौतुनरःस्नात्वाविधिवल्लवणोदधौ गोसहस्रप्रदानस्यकुरुक्षेत्रेफलंहियत् तत्फलंलभतेमर्त्योभूमिदानस्यचध्रुवमिति अयंनिर्णयः सर्वयुगादिषुबोद्धव्यः इतियुगादिनिर्णयः इयमेवतृतीयापरशुरामजयंती साप्रदोषव्यापिनीग्राह्या तदुक्तंभार्गवार्चनदीपिकायां स्कांदभविष्ययोः वैशाखस्यासितेपक्षेतृतीयायांपुनर्वसौ निशायाःप्रथमेयामेरामाख्यःसमयेहरिः स्वोच्चगैःषड्ग्रहैर्युक्ते मिथुनेराहुसंस्थिते रेणुकायास्तुयोगर्भादवतीर्णोहरिःस्वयमिति दिनद्वयेतद्व्याप्तावंशतःसमव्याप्तौचपरा अन्यथापूर्वैव तदुक्तंतत्रैवभविष्ये शुक्लतृतीयावैशाखेशुद्धापोष्यादिनद्वये निशायाःपूर्वयामेचेदुत्तरान्यत्रपूर्विकेति वैशाखशुक्लसप्तम्यांगंगोत्पत्तिस्तदुक्तंपृथ्वीचंद्रोदयेब्राह्मे वैशाखेशुक्लसप्तम्यांजह्नुनाजाह्नवीपुरा क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात् तांतत्रपूजयेद्देवींगंगांगगनमेखलामिति अत्रशिष्टाचारान्मध्याह्नव्यापिनीग्राह्या दिनद्वयेतद्व्याप्तावव्याप्तावेकदेशव्याप्तौवापूर्वा युग्मवाक्यात् वैशाखशुक्लद्वादश्यां योगविशेषोहेमाद्रौज्योतिःशास्त्रे पंचाननस्थौगुरुभूमिसुतौमेषेरविःस्याद्यदिशुक्लपक्षे पाशाभिधानाकरभेणयुक्तातिथिर्व्यतीपात इतीहयोगःअस्मिंस्तुगोभूमिहिरण्यवस्त्रदानेनसर्वंपरिहायपाप सुरत्वमिंद्रत्वमनामयत्वंमर्त्याधिपत्यंलभतेमनुष्यइति पंचाननःसिंहः पाशाभिधानातिथिर्द्वादशी करभोहस्तः वैशाखशुक्लचतुर्दशीनृसिंहजयंती साप्रदोषव्यापिनीग्राह्या तदुक्तंहेमाद्रौनृसिंहपुराणे वैशाखेशुक्लपक्षेतुचतुर्दश्यांनिशामुखे मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनं वर्षेवर्षेतुकर्तव्यंममसंतुष्टिकारणमिति दिनद्वयेपितद्व्याप्तावंशतःसमव्याप्तौचपरा विषमव्याप्तौत्वधिकव्याप्तिमतीदिनद्वयेप्यव्याप्तौपरा परदिनेगौणकालव्याप्तेः सत्वात्पूर्वदिनेचतदभावात् यत्तुततोमध्याह्नवेलायांनद्यादौविमलेजले इत्युपक्रम्यपरिधायततोवासोकृतकर्मसमारंभेदिनितत्रैवोक्तं तत्संकल्परूपव्रतोपक्रमविषयं नत्वेतावतामध्याह्नव्या

पिनीग्राह्येतिभ्रमितव्यं पूर्वोक्तवचनविरोधात् वैशाखस्यचतुर्दश्यांसोमवारेनिलर्क्षके अवतारोन्नृसिंहस्यप्रदोषसमयेद्विजाइतिटोडरानंदे
स्कांदात् कूर्मःसिंहोबौद्धकल्कीचसायमिति पूर्वोक्तपुराणसमुच्चयवचनाच्चेतिकेचित् तन्नतुपूर्ववचसामनाकरत्वेननिर्मूलत्वात् हेमाद्रौनृसिं
हपुराणे मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनमित्युपक्रम्य स्वातीनक्षत्रयोगेचशनिवारेतुमद्व्रतं सिद्धयोगस्यसंयोगेवणिजेकरणेतथा पुं
सांसौभाग्ययोगेनलभ्यतेदैवयोगतः सर्वैरेतैस्तुसंयुक्तं हत्याकोटिविनाशनम् एतदन्यतरेयोगेमद्दिनंपापनाशनम् केवलेपि-
प्रकर्तव्यंमद्दिनेव्रतमुत्तमं अन्यथानरकंयातियावच्चंद्रदिवाकरावित्युक्त्वा ततोमध्यान्हवेलायांनद्यादौविमलेजलेइत्यादिनामध्यान्हएव-
व्रतविधानाच्चतुर्दश्युत्तरार्धेवणिजेकरणेमध्यान्हेचस्पष्टंजन्मप्रतीयते संध्यायांजन्मतुक्काप्यनुक्तेर्मौर्ख्यकृतंतद्दशान्निर्णयस्त्वहेयएवेति
तथाइदमेव योगविशेषेणातिप्रशस्ता तदुक्तंतत्रैव स्वातीनक्षत्रयोगेचशनिवारेचमद्व्रतं सिद्धयोगस्यसंयोगेवणिजेकरणेतथा पुं
सांसौभाग्ययोगेनलभ्यतेदैवयोगतः एभिर्योगैर्विनापिस्यात्मद्दिनंपापनाशनं सर्वेषामेववर्णानामधिकारोस्तिमद्व्रते मद्भक्तैस्तुविशे
षेणकर्तव्यंमत्परायणैः तथा सिंहःस्वर्णमयोदेयोममसंतोषकारकः तथा विज्ञायमद्दिनंयस्तुलंघयेत्पापकृन्नरः सयातिनरकंघोरं
यावच्चंद्रदिवाकरौ इदंचसंयोगपृथक्त्वन्यायेननित्यंकाम्यंच अथात्रविशेषः मध्यान्हेमृद्गोमयतिलामलकस्नानंकृत्वा नृसिंहदेवदेवेशत
वजन्मदिनेशुभे उपवासंकरिष्यामिसर्वभोगविवर्जितइति मंत्रेणसंकल्पंकृत्वाआचार्यंवृत्वासायंकाले हैमीतुतत्रमन्मूर्तिःस्थाप्याल-
क्ष्म्यास्तथैवच पलेनवातदर्धेनतदर्धार्धेनवापुनः यथाशक्तितथाकुर्याद्वित्तशाठ्यविवर्जितइत्युक्तं नृसिंहमूर्तिंशक्त्याकृत्वासुवर्णसिंहंच
कलशोपरिसंपूज्यरात्रौजागरणंकृत्वाप्रातःपुनःसंपूज्य नृसिंहाच्युतदेवेशलक्ष्मीकांतजगत्पते अनेनार्चाप्रदानेनसफलाःस्युर्मनोरथाः

इत्याचार्यायदत्वा मद्वंशेयेनराजातायेजनिष्यंतिचापरे तांस्त्वमुद्धरदेवेशदुस्तराद्भवसागरात् पातकार्णवमग्नस्यव्याधिदुःखांबुवारिभिः तीव्रैश्चपरिभूतस्यमहादुःखगतस्यमे करावलंबनंदेहिशेषशायिन्जगत्पते श्रीनृसिंहरमाकांतभक्तानांभयनाशन क्षीरांबुधिनिवासिंस्त्वं चक्रपाणेजनार्दन व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभवेतिप्रार्थयेदितिसंक्षेपः वैशाखपौर्णमास्यांविशेषोपरार्केजाबालिः श्वेतान्नमुदकुंभंचवैशाख्यांचविशेषतः निर्दिश्यधर्मराजायगोदानफलमाप्नुयात् स्वर्णतिलयुक्तैस्तुब्राह्मणान्सप्तपंचवा तर्पयेदुदपात्रैस्तुब्रह्महत्यांव्यपोहतीति उदकुंभदानमंत्रस्त्वक्षय्यतृतीयाप्रकरणउक्तः भविष्येपि वैशाखीकार्तिकीमाघीतिथयोतीवपूजिताः स्नानदानविहीनास्तानेनयाःपांडुनंदन अत्रकृष्णाजिनदानंकार्यं तथाचविष्णुः कृष्णाजिनेतिलान्कृष्णान्हिरण्यंमधुसर्पिषी ददातियस्तुविप्रायसर्वतरतिदुष्कृतमिति इतिश्रीकमलाकरभट्टकृतेकालनिर्णयसिंधौवैशाखमासःसमासः वृषसंक्रांतौपूर्वाःषोडशघटिकाःपुण्यकालः रात्रौसंक्रमेसतिप्रागेवोक्तं ज्येष्ठशुक्लतृतीयायांरंभाव्रतमुक्तंमाधवीयेभविष्ये भद्रेकुरुष्वयत्नेनरंभाख्यंव्रतमुत्तमं ज्येष्ठशुक्लतृतीयायांस्नातानियतमत्परेति सापूर्वविद्धाग्राह्या बृहत्तपातथारंभासावित्रीवटपैतृकी कृष्णाष्टमीचभूताचकर्तव्यासंमुखीतिथिरितिस्कांदोक्तेः ज्येष्ठशुक्लदशमीदशहरा तदुक्तंहेमाद्रौब्राह्मे ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुता हरतेदशपापानितस्माद्दशहरास्मृतेति वाराहेपि दशमीशुक्लपक्षेतुज्येष्ठेमासिकुजेहनि अवतीर्णायतःस्वर्गाद्धस्तर्क्षेचसरिद्वरा हरतेदशपापानितस्माद्दशहरास्मृतेति स्कांदेतुदशयोगाउक्ताः तथा ज्येष्ठमासिसितेपक्षेदशम्यांबुधहस्तयोः व्यतीपातेगरानंदेकन्याचंद्रेवृषेरवौ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यतइति अत्रबुधभौमयोःकल्पभेदेनव्यवस्था इयंचयत्रैवयोगबाहुल्यंसैवग्राह्या योगाधिक्येफलाधिक्यात्

ज्येष्ठेमलमासेसतितत्रैवदशहराकार्या नतुशुद्धे दशहरासुनोत्कर्षश्चतुर्थ्यपियुगादिश्चेतिहेमाद्रौऋष्यशृंगोक्तेः तथास्कांदे यांकांचित्सरितंप्राप्यदद्यादर्घ्यंतिलोदकं मुच्यतेदशभिःपापैःसमहापातकोपमैः अत्रविशेषःकाशीखंडे ज्येष्ठमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं दशाश्वमेधकेस्नात्वामुच्यतेसर्वपातकैः एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः आशुक्लपक्षदशमींप्रतिजन्माघमुत्सृजेत् तथा लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंशयः तथाचभविष्योत्तरकाशीखंडयोः निशायांजागरंकृत्वासमुपोष्यचभक्तितः पुष्पैर्गंधैश्चनैवेद्यैःफलैश्चदशसंख्यया तथादीपैश्चतांबूलैःपूजयेच्छ्रद्धयान्वितः स्नात्वाभक्त्यातुजाह्नव्यांदशकृत्वोविधानतः दशप्रसृतिकृष्णांश्चतिलान्सर्पिश्चवैजले सक्तुपिंडान्गुडपिंडान्दद्याच्चैवदशसंख्यया ततोगंगातटेस्वेहेम्नारूप्येणवातथा गंगायाःप्रतिमांकृत्वावक्ष्यमाणस्वरूपिणीं संस्थाप्यपूजयेद्देवींतदलाभेमृदापिच अथतत्राप्यशक्तश्चेदालिखेत्पिष्टेनवैभुवि वक्ष्यमाणेनमंत्रेणकुर्यात्पूजांविशेषतः नारायणंमहेशंचब्रह्माणंभास्करंतथा भगीरथंचनृपतिंहिमवंतंनगेश्वरं गंधपुष्पादिभिःसम्यग्यथाशक्तिप्रपूजयेत् दशप्रस्थांस्तिलान्दद्याद्दशविप्रेभ्यएवच दशप्रस्थान्यवान्दद्याद्दशसंख्यागावीस्तथा प्रस्थःषोडशपलानि पलंतुमुष्टिमात्रंपलंस्मृतमितिमहार्णवेउक्तं मत्स्यकच्छपमंडूकमकरादिजलेचरान् हंसकारंडवबकचक्रादिट्टिभसारसान् कारयित्वायथाशक्तिस्वर्णेनरजतेनवा तदलाभेपिष्टमयानभ्यर्च्यकुंकुमादिभिः गंगायांप्रक्षिपेदाज्यदीपांश्चैवप्रवाहयेत् पुष्पाद्यैःपूजयेद्गंगांमंत्रेणानेनभक्तितः ॐ नमःशिवायैनारायण्यैदशहरायैगंगायैनमोनमः इतिमंत्रंतुयोमर्त्योदिनेतस्मिन्दिवानिशंजपेत्पंचसहस्राणिदशधर्मफलंलभेत् काशीखंडेत्वन्योमंत्रउक्तः नमःशिवायैप्रथमंनारायण्यैपदंततः दशहरायैपदमितिगंगायैमंत्रए

षवै स्वाहांतः प्रणवादिश्च भवेद्विंशाक्षरोमनुः पूजादानंजपोहोमो तेनैवमनुनास्मृतमिति अत्रगंगास्तोत्रपाठमपि दशवारंकुर्यात् तदुक्तंभविष्ये तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः यः पठेद्दशकृत्वस्तु दरिद्रोवापिचाक्षमः सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतइति स्तोत्रंचप्रतिपदादिदशमीपर्यंतंदिनवृद्धिसंख्ययापाठनीयमितिशिष्टाः अत्रचसर्वोपिविस्तरः स्तोत्रादिचभट्टकृतत्रिस्थलीसेतोरवधेयः विस्तरभीतेस्तुनलिख्यते एवंकुर्वतः फलमुक्तंकाशीखंडे एवंकृत्वाविधानेनवित्तशाठ्यविवर्जितः उपवासीवक्ष्यमाणैर्दशपापैः प्रमुच्यते सर्वान्कामानवाप्नोतिप्रेत्यब्रह्मणिलीयतइतिच अस्यांसेतुबंधरामेश्वरस्यप्रतिष्ठादिनत्वाद्विशेषेणपूजाकार्या तदुक्तंस्कांदेसेतुमाहात्म्ये ज्येष्ठेमासेसितेपक्षेदशम्यांबुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ दशयोगेसेतुमध्येलिंगरूपधरंहरम् रामोवैस्थापयामासशिवलिंगमनुत्तममिति इतिदशहरा ज्येष्ठशुक्लैकादशीनिर्जला तत्रनिर्जलमुपोष्य विप्रेभ्योजलकुंभान्दद्यादितिनिर्णयामृते उक्तं मदनरत्नेस्कांदे ज्येष्ठेमासिनृपश्रेष्ठयाशुक्लैकादशीशुभा निर्जलंसमुपोष्यात्रजलकुंभान्सशर्करान् प्रदायविप्रमुख्येभ्योमोदते विष्णुसन्निधौ ज्येष्ठपौर्णमास्यांसावित्रीव्रतं तदुक्तंस्कांदभविष्ययोः ज्येष्ठेमासिसितेपक्षेद्वादश्यांरजनीमुखे इत्युपक्रम्य व्रतंत्रिरात्रमुद्दिश्यदिवारात्रिंस्थिराभवेदिति अंतेप्युपसंहृतं ज्येष्ठेमासिसितेपक्षेपूर्णिमायांतथाव्रतं चीर्णंपुरामहाभक्त्याकथितंतेमयानृपेति दाक्षिणात्यास्त्वेतदेवाद्रियंते एतच्चामावास्यायामप्युक्तंनिर्णयामृतेभविष्ये अमायांचतथाज्येष्ठेवटमूलेमहासती त्रिरात्रोपोषितानारी विधिनानेनपूजयेत् मदनरत्नेत्विदंवाक्यं पंचदश्यांतथाज्येष्ठइतिपठित्वाज्येष्ठपौर्णमास्यामुक्तं तथा अशक्तौत्रयोदश्यांनक्तंकुर्याज्जितेंद्रिया अयाचितंचतुर्दश्याममायांसमुपोषणमिति तत्तुपाश्चात्याआद्रियंते हेमाद्रिसमयोद्योतादिषुतुभाद्रपदपूर्णिमायामुक्तं तत्तुनेदा-

नींप्रचरति गौडास्तु मेषेवावृषभेवापिसावित्रींतांविनिर्दिशेत् ज्येष्ठकृष्णाचतुर्दश्यांसावित्रीमर्चयंतियाः वटमूलेसोपवासानतावैधव्यमाप्नुयुरिति पराशरोक्तेश्चतुर्दश्यांप्रदोषेव्रतं दिनद्वयेतद्व्याप्तौपरेवेत्याहुः तन्निर्मूलं अत्रपूर्णिमामावास्येपूर्वविद्धेग्राह्ये भूतविद्धानकर्तव्याआमावास्याचपूर्णिमा वर्जयित्वानरश्रेष्ठसावित्रीव्रतमुत्तममितिब्रह्मवैवर्तात् स्कांदेपि भूतविद्धासिनीवालीनतुतत्रव्रतंचरेत् वर्जयित्वातुसावित्रीव्रतंतुशिखिवाहनइति मदनरत्नेब्रह्मवैवर्तेपि प्रतिपत्पंचमीभूतसावित्रीवटपूर्णिमा नवमीदशमीचैवनोपोष्याःपरसंयुताइति यदात्वष्टादशघटिकाचतुर्दशीतदापराग्राह्या पूर्वविद्धैवसावित्रीव्रतेपंचदशीतिथिः नाड्योष्टादशभूतस्यस्युश्चेत्तत्रपरेऽहनीतिमाधवः वस्तुतस्तु भूतोष्टदशनाडीभिर्दूषयत्युत्तरांतिथिमित्यस्यव्रतांतरेसावकाशत्वाद्विशेषः मट्टत्तपूर्वविद्धाविधायकवचनेनतस्यबाधादष्टादशनाडीवेधोपिपूर्वैवेत्ययंपंथाःसाधुः अत्रपूर्णिमानुरोधेनैवयथात्रिरात्रसंपत्तिर्भवति तथा त्रयोदश्यादिग्राह्यं तस्याःप्रधानत्वात् अयंनिर्णयोऽमायामपिज्ञेयः पारणंतुपूर्णिमांतेकार्यं अत्रस्त्रीव्रतेषुविशेषाः परिभाषायामुक्ताः अत्रविशेषोभविष्ये गृहीत्वावालुकांपात्रेप्रस्थमात्रंयुधिष्ठिर ततोवंशमयेपात्रेवस्त्रयुग्मेनवेष्टिते सावित्रीप्रतिमांकुर्यात्सौवर्णींवापिमृन्मयीं सार्धंसत्यवतासाध्वीफलनैवेद्यदीपकैः रजन्याकंठसूत्रैश्चशुभैःकुंकुमकेशरैः पूजयेदितिशेषः रजनीहरिद्रा कंठसूत्रंसौभाग्यतंतुः सावित्र्याख्यानकंवापिवाचयीतद्विजोत्तमैः रात्रौजागरणंकृत्वाप्रभातेविमलेततः तामपिब्राह्मणेदत्वाप्रणिपत्यक्षमापयेत् मंत्रस्तु सावित्रीयंमयादत्तासहिरण्यामहासती ब्रह्मणःप्रीणनार्थायब्राह्मणप्रतिगृह्यतां अनेनानेनराजेंद्रवैधव्यंनाप्नुयात्क्वचिदिति ज्येष्ठपौर्णमास्यांविशेषआदित्यपुराणे ज्येष्ठमासितिलान्दद्यात्पौर्णमास्यांविशेषतः अश्वमेधस्ययत्पुण्यंतत्प्राप्नोतिनसंशयः वि-

ष्णुरपि ज्येष्ठीज्येष्ठयुताचेत्स्यात्तस्यांछत्रोपानत्प्रदानेननरोनराधिपत्यमाप्नोतीति हेमाद्रौज्योतिषे ऐंद्रेगुरुःशशीचैवप्राजापत्ये रविस्तथा पूर्णिमाज्येष्ठमासस्यमहाज्येष्ठीप्रकीर्तितेति इयंमन्वादिरपि सापौर्वाण्हिकीग्राह्या विशेषस्तुचैत्रेउक्तः तथाऽपरार्के वामनपुराणे उदकुंभांबुदानंचतालवृंतंसचंदनं त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासिवैति इतिकमलाकरभट्टकृतेनिर्णयसिंधौ ज्येष्ठमासः समाप्तः मिथुनसंक्रांतौपराः षोडशघटिकाःपुण्यकालः रात्रौतुप्रागेवोक्तं आषाढशुक्लद्वितीयायांरथोत्सवः तदुक्तं तिथितत्त्वेस्कांदे आषाढस्यसितेपक्षेद्वितीयापुष्यसंयुता तस्यांरथेसमारोप्यरामंवैभद्रयासह यात्रोत्सवंप्रवर्त्यार्थप्रीणयेतद्विजान्बहून् तथा ऋक्षाभावेतिथौकार्यायात्रासोममपुण्यदा आषाढशुक्लदशमीपौर्णमासीचमन्वादिः साचपूर्वाण्हव्यापिनीग्राह्येतिप्रागुक्तं आषाढशुक्लद्वादश्यामनुराधायोगरहितायांपारणंकुर्यात् तदुक्तंमाधवीये आभाकासितपक्षेषुमैत्रश्रवणरेवती संगमेनहिभोक्तव्यंद्वादशद्वादशीर्हरेत् अस्यार्थः आषाढभाद्रपदकार्तिकशुक्लद्वादशीष्वनुराधाश्रवणरेवतीयोगेपारणंनकुर्यादिति अत्रयद्यप्येतावदेवोक्तं तथाप्यनुराधाप्रथमपादएववर्ज्यः तदुक्तंविष्णुधर्मे मैत्राद्यपादेस्वपितीहविष्णुःपौष्णान्त्यपादेप्रतिबोधमेति श्रुतेश्चमध्येपरिवर्तमेतिस्वापप्रबोधपरिवर्तनमेववर्ज्यमिति वस्तुतस्तुपूर्ववचनमिदंचनिर्मूलं अत्रैवविष्णुशयनोत्सवउक्तोहेमाद्रौब्राह्मे एकादश्यांतुशुक्लायामाषाढेभगवान्हरिः भुजंगशयनेशेतेक्षीरार्णवजलेसदेति कल्पतरौयमः क्षीराब्धौशेषपर्यंकेआषाढ्यांसंविशेद्धरिः निद्रांत्यजतिकार्तिक्यांतयोःसंपूजयेत्सदा ब्रह्महत्यादिकंपापंक्षिप्रमेवव्यपोहति हिंसात्मकैस्तुकिंतस्ययज्ञैःकार्यंमहात्मनः प्रस्वापेचप्रबोधेचपूजितोयेनकेशवः टोडरानंदेपिस्कांदे आषाढशुक्लैकादश्यांकुर्यात्स्वप्नमहोत्सवं अयंद्वादश्यामप्युक्तः आभा-

कासितपक्षेषुमैत्रश्रवणरेवती आदिमध्यावसानेषुप्रस्वापावर्तनोत्सवाः निशिस्वापोदिवोत्थानंसंध्यायांपरिवर्तनं अत्रपादयोगेपिद्वादश्यामेवकारयेत् . आभाकाद्येषुमासेषुमिथुनेमाधवस्यच द्वादश्यांशुक्लपक्षेचप्रस्वापावर्तनोत्सवाइतिभविष्योक्तेः द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे आभाकासितपक्षेषुशयनावर्तकादिकमिति वाराहोक्तेश्च द्वादश्यामित्यत्रापिपारणाहोमात्रंविवक्षितं पारणाहेपूर्वरात्रेघंटादीन्वादयन्मुहुरिति रामार्चनचंद्रिकोक्तेः अत्रैकादशीद्वादश्योर्देशभेदेनव्यवस्था इदंचमलमासेनकार्यं ईशानस्यबलिर्विष्णोः शयनंपरिवर्तनमिति कालादर्शेनिषेधात् यदपिएकादश्यांतुगृह्णीयात्संक्रांतौकर्कटस्यच आषाढ्यांवानरोभक्त्याचातुर्मास्यव्रतक्रियामिति हेमाद्रौब्रह्मवैवर्तेतदपिमलमासेसतिद्रष्टव्यं मिथुनस्थोयदाभानुरमावास्याद्वयंस्पृशेत् द्विराषाढःसविज्ञेयोविष्णुःस्वपितिकर्कटइति तत्रैवमोहचूलोत्तरोक्तेः अत्रैवचातुर्मास्यव्रतारंभउक्तोभारते आषाढेतुसितेपक्षेएकादश्यामुपोषितः चातुर्मास्यव्रतंकुर्याद्यत्किंचिन्नियतोनरइति अस्यनित्यत्वंतत्रैवोक्तं वार्षिकांश्चतुरोमासान्वाहयेत्केनचिन्नरः व्रतेननोचेदाप्नोतिकिल्बिषंवत्सरोद्भवं असंभवेतुलोकेपिकर्तव्यंतत्प्रयत्नतइति तेनाषाढशुक्लैकादश्यांद्वादश्यांपौर्णमास्यांवारंभः समाप्तिस्तु कार्तिकशुक्लद्वादश्यामेव तदुक्तंहेमाद्रौभारते चतुर्धागृह्यतेचीर्णंचातुर्मास्यव्रतंनरः कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेदिति अस्यारंभः शुक्रास्तादावपिकार्यः नशैशवंनमौढ्यंचशुक्रगुर्वोर्नवातिथेः खंडत्वंचिंतयेदादौचातुर्मास्यविधौनरइति हेमाद्रौवृद्धगार्ग्योक्तेः इदंचद्वितीयाद्यारंभविषयं प्रथमारंभस्तुनभवत्येव आशौचमध्येपिद्वितीयाद्यारंभोभवति अशक्तश्चेद्वाशक्तश्चेद्वापियदिस्त्रीयदिवापुमान् व्रतमेतन्नरःकृत्वामुच्यतेसर्वपातकैरिति भार्गवार्चनदीपिकायांस्कांदोक्तेः आरब्धेसूतकंनस्यादनारब्धे-

सूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनाच्च यत्तु असंक्रांतंतथामासंदैवेपित्र्येचकर्मणि मलमासमशौचंचवर्जयेन्मतिमान्नरइति हेमाद्रौचातुर्मास्यप्रकरणे भविष्यवचनं तत्पूषानुमंत्रणमंत्रवदसंबद्धंमध्येपठितमितिज्ञेयं अन्यथापित्र्यस्यपूर्वोक्तस्यविवाहादेश्चचातुर्मास्यव्रतेकःप्रसंगः प्रकरणनिवेशोपिवाप्रथमारंभविषयंज्ञेयं केचित्तुप्रतिवर्षंचातुर्मास्यव्रतप्रयोगानांभिन्नत्वादाशौचादिप्राप्तौद्वितीयादिप्रयोगोनभवत्येवेत्याहुःतन्न प्रतिवर्षंचयःकुर्यादेवंवैसंस्मरन्हरिं देहांतेतिप्रदीप्तेनविमानेनार्कवर्चसा मोदतेविष्णुलोकेसौयावदाभूतसंप्लवमिति हेमाद्रौभविष्यवचनादित्यास्तांविस्तरः इदंचशिवभक्तादिभिरपिकार्यं शिवेवाभक्तिसंयुक्तोभानौवागणनायके कृत्वाव्रतस्यनियमंयथोक्तफलभाग्भवेदिति ब्रह्मवैवर्तात् व्रतग्रहणप्रकारस्तुहेमाद्रौभविष्ये महापूजांततःकुर्याद्देवदेवस्यचक्रिणः जातीकुसुममालाभिर्मंत्रेणानेनपूजयेत् सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदं विबुद्धेचविशुद्ध्येतप्रसन्नोमेभवाच्युत एवंतांप्रतिमांविष्णोःपूजयित्वास्वयंनरः प्रभाषेताग्रतोविष्णोःकृतांजलिपुटस्तथा चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि इमंकरिष्येनियमंनिर्विघ्नंकुरुमेच्युत इदंव्रतंमयादेवगृहीतंपुरतस्तव निर्विघ्नंसिद्धिमायातुप्रसादात्तवकेशव गृहीतेस्मिन्व्रतेदेवपंचत्वंयदिमेभवेत् तदाभवतुसंपूर्णंत्वत्प्रसादाज्जनार्दन गृहीतेस्मिन्व्रतेदेवयद्यपूर्णेमृतोह्यहं तन्मेभवतुसंपूर्णंत्वत्प्रसादाज्जनार्दनेति तत्रभार्गवार्चनदीपिकायां नृसिंहपरिचर्यायांचभविष्ये श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा दुग्धमाश्वयुजेमासिकार्तिकेद्विदलंत्यजेदिति स्कांदेपिचातुर्मास्यकल्पे चत्वार्येतानिनित्यानिचतुराश्रमवर्णिनां प्रथमेमासिकर्तव्यंनित्यंशाकव्रतंनरैः द्वितीयेमासिकर्तव्यंदधिव्रतमनुत्तमं पयोव्रतंतृतीयेतुचतुर्थेपिनिशामय द्विदलंबहुबीजंचवृंताकंचविवर्जयेत् नित्यान्येतानिविप्रेंद्रव्रतान्याहुर्मनीषिणः जंबीरंराजमाषांश्चमूलकंरक्तमूलकं

कूष्मांडंचेक्षुदंडंचचातुर्मास्येत्यजेद्बुधः तथा विशेषाद्बदरींधात्रींकूष्मांडंतिंतिणींत्यजेत् जीर्णधात्रीफलंग्राह्यंकथंचित्तुकायशोधनमिति
तीर्थसौख्येस्कांदे वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने मंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः अनृतोवर्जयेद्भार्यांमांसंमधुपरोद
नं पटोलंमूलकंचैववृंताकंचनभक्षयेत् अभक्ष्यंवर्जयेद्दूरान्मसूरंसितसर्षपं राजमाषान्कुलित्थांश्चआशकधान्यंचसंत्यजेत् शाकंद
धिपयोमाषान्श्रावणादिषुसंत्यजेत् अन्नत्यजेदितिवर्जनसंकल्परूपःपर्युदासोज्ञेयः व्रतोपक्रमात् अत्रकेचिच्छाकाख्यंपत्रपु-
ष्पादीत्यमरकोशस्यशाक्यतेशितुमनेनेति शाकइतिक्षीरस्वामिनाव्याख्यानात् व्यंजनमात्रस्यनिषेधमाचक्षते अन्येतुशाकशब्दस्य
पत्रादिदशविधशाकेयोगरूढत्वात् योगाच्चरूढेर्बलीयस्त्वात्सूपादीनामपित्यागापत्तेश्चतत्प्रत्याचक्षते तेनमूलपत्रकरीराग्रफलकां
डादिरूढकाः त्वक्पुष्पंकवचंचेतिशाकंदशविधंस्मृतं इतिक्षीरस्वामिनोक्तस्यशाकस्यनिषेधइति अधिरूढकश्चांकुरः वस्तुतस्तु
तत्तत्कालोद्भवाःशाकावर्जनीयाःप्रयत्नतः बहुबीजमबीजंचविकारीचविवर्जयेदिति भविष्यवचनात्तत्तत्कालोत्पन्नानांदशविधशा
कानांनिषेधः अत्रतत्कालोद्भवजातीयत्वंविवक्षितं तेनातपादिशोषितानांवर्षांतरोद्भवानामपिनिषेधः अत्रतत्कालोद्भवत्वमात्रंविव-
क्षितंनतुतन्मात्रकालोद्भवत्वंगौरवात् तेनान्यकालोद्भवानांतत्कालोद्भवानांचबिंबादीनांनिषेधः अत्रतत्कालोद्भवाइतिवीप्सावशात्
स्वस्वकालोद्भवानांसर्वेषांनिषेधइतिनिष्कर्षः बहुबीजमित्यनेकबीजमितिकेचित् इतरावयवापेक्षयाबीजावयवायत्रबहवस्तदित्यन्ये
अबीजंकदलादि वस्तुतस्तु इदंमहानिबंधेष्वभावान्निर्मूलमेव आचारप्रदीपे वृंताकंचकलिंगंचबिल्वोदुंबरभिःसटाः उदरेयस्यजीर्यंते
तस्यदूरतरोहरिः तथापरार्केदेवलः ब्रह्मचर्यंतथाशौचंसत्यमामिषवर्जनं व्रतेष्वेतानिचत्वारिवरिष्ठानीतिनिश्चयः आमिषाणिचोक्ता

निरामार्चनचंद्रिकायांपाद्मे प्राण्यंगचूर्णंचर्मांबुजंबीरंबीजपूरकं अयज्ञशिष्टमाषादियद्विष्णोरनिवेदितं दग्धमन्नंमसूरंचमांसंचेत्यष्टधामिषं रुच्यंतत्तद्देशलभ्यंसुप्तेदेवेविवर्जयेत् पाद्मे कार्तिकमाहात्म्ये गोछागीमहिषीदुग्धादन्यदुग्धादिचामिषं धान्येमसूरिकाःप्रोक्ताः अन्नपर्युषितंतथा द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ताम्रपात्रस्थितंगव्यंजलंपल्वलसंस्थितं आत्मार्थंपाचितंचान्नंआमिषं तत्स्मृतंबुधैः तथा निष्पावान्राजमाषांश्चमसूरंसंधितानिच वृंताकंचकलिंगंचसुप्तेदेवेविवर्जयेत् संधितानिलवणशाकादीनि तत्रैवविष्णुधर्मे चतुर्ष्वपीहमासेषुहविष्याशीनपापभाक् हविष्याणितुपृथ्वीचंद्रोदयेभविष्ये हैमंतिकंसितास्विन्नंधान्यंमुद्गायवास्तिलाः कलायकंगुनीवारवास्तुकंहिलमोचिका षष्टिकाकालशाकंचमूलकंकेमुकेतरत् कंदःसैंधवसामुद्रेगव्येचदधिसर्पिषी पयोनुद्धृतसारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैवनागरंगंचतिंतिणी कदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपक्वंमुनयोहविष्याणिप्रचक्षते इति सितास्विन्नंअनूष्मपक्वंधान्यंचतंदुलाः केमुकंकेमुताइतिप्राच्येषुप्रसिद्धःकंदः कलायस्तुसतीनकइत्यमरः बटुरीइतिप्रसिद्धंधान्यं मदनरत्नेप्येवं अगस्तिसंहितायां हैमंताद्युक्ता नारीकेलफलंचैवकदलीलवलीतथा आम्रमामलकंचैवपनसंचहरीतकी व्रतांतरप्रशस्तंचहविष्यंमन्यतेबुधाः अन्यान्यपिव्रतान्युक्तानिहेमाद्रौभविष्ये स्त्रीवानरोवामद्भक्तोधर्मार्थंसुदृढव्रतः गृण्हीयान्नियमानेतान्दंतधावनपूर्वकान् तेषांफलानिवक्ष्यामितत्कर्तृणांपृथक्पृथक् मधुरस्वरोभवेद्राजापुरुषोगुडवर्जनात् तैलस्यवर्जनाद्राजन्सुंदरांगःप्रजायते कटुतैलपरित्यागाच्छत्रुनाशःप्रजायते योगाभ्यासीभवेद्यस्तुसब्रह्मपदमाप्नुयात् तांबूलवर्जनाद्भोगीरक्तकंठश्चजायते घृतत्यागाच्चलावण्यंसर्वस्निग्धतनुर्भवेत् शाकपत्राशनाद्रोगीअपक्वादोमलोभवेत् भूमौप्रस्तरशायीचविप्रोसुनिवरोभवेत् एका

नरोपवासेनब्रह्मलोकेमहीयते धारणान्नखरोम्णांच गंगास्नानफलंलभेत् मौनव्रतीभवेद्यस्तुतस्याज्ञास्खलिताभवेत् भूमौभुंक्तेसदा
यस्तुसपृथिव्याःपतिर्भवेत् प्रदक्षिणाशतंयस्तुकरोतिस्तुतिपाठकः हंसयुक्तविमानेनसचविष्णुपुरंव्रजेत् अयाचितेनप्राप्नोतिपुत्रा
न्धर्म्यान्विशेषतः षष्ठान्नकालभोक्तायःकल्पस्थायीभवेदिति पर्णेषुयोनरोभुंक्तेकुरुक्षेत्रफलंलभेत् गुडवर्जीनरोदद्यात्तद्युतंताम्र-
भाजनं सहिरण्यंनरःश्रेष्ठलवणस्याप्ययंविधिः स्कन्दे देवेतुयोविष्णोःशिवस्यागणमर्चयेत् पंचवर्णैस्तुयोनित्यंस्वस्तिकैःपद्मकैस्त
था सयातिरुद्रलोकंहिगाणपत्यमवाप्नुयात् अथैषांसमासोकार्तिक्यांदानानि एकभुक्तव्रतेदंपतीसंपूज्यधेनुर्देया नक्तेवस्त्रयुगं एकां
नरोपवासेगौः भूशयनेशय्या षष्ठकालभोजनेगौः व्रीहिगोधूमादित्यागेहेमव्रीह्यादि कृच्छ्रेगोयुग्मं शाकाशनेगौः पयोव्रतेच दधिम-
धुघृतव्रतेषुवासोगौश्च ब्रह्मचर्येस्वर्णमूर्तिः तांबूलव्रतेवासोयुगं मौनेघृतकुंभोवस्त्रयुगंघंटाच दूर्वाग्रेरंगमालिकाकरणेधेनुर्हेमपद्मंच
दीपिकाव्रतेदीपिकावासोयुगंच भूमिभाजनेपर्णभोजनेचकांस्यपात्रंगौश्च चतुष्पथदीपेगोग्रासेचगोवृषौ प्रदक्षिणाशतेवस्त्रं अनुक्ते
षुस्वर्णंगौश्चेत्यादिहेमाद्रौज्ञेयं तथाचभार्गवार्चनदीपिकायांपाद्मे शयनीबोधिनीमध्येशमीदूर्वापमार्गकैः भृंगराजेनदेवांस्तुनार्च
यीतकदाचन हेमाद्रौपाद्मे आषाढादिचतुर्मासान्नभ्यंगवर्जयेन्नरः समाप्तौचपुनर्दद्यात्तिलतैलयुतंघटं आषाढादिचतुर्मासंवर्जयेन्न
खकृंतनं वृंताकंगृंजनंचैवमधुसर्पिर्घटान्वितं कार्तिक्यांतत्पुनर्हैमंब्राह्मणायनिवेदयेत् अन्यान्यपिकेशकर्तनादिवर्जनसंकल्पानुरू
पाणि पृथ्वीचंद्रोदयेज्ञेयानि टोडरानंदेस्कांदे एकांतरंत्र्यंतरंवाकुर्यान्मासोपवासकं अनोदनंफलाहारंनक्तव्रतमथापिवा अत्रैव १४
तप्तमुद्राधारणमुक्तंरामार्चनचंद्रिकायांभविष्ये शयन्यांचैवबोधिन्यांचक्रतीर्थेतथैवच शंखचक्रविधानेनवह्निपूतोभवेन्नरइति

अतप्ततनूर्नतदामोअश्नुतेइतिऋग्वेदात्सहोवाचयाज्ञवल्क्यस्तस्मात्पुमानात्महितायहरिंभजेत् ऋक्श्लोकमौलेर्वर्माण्यग्निनासंदधतइति
शतपथश्रुतेः मतद्विष्णोअङ्कचक्रेकृतसेजन्मांभोधीतर्नतेचर्षणीन्द्राः मूलेबाह्वोर्दधन्त्यपुरापातुलिंगान्यंगेतसाशुधान्यपर्यंतइतिसाम
वेदात् अग्निहोत्रंयथानित्यंवेदस्याध्ययनंतथा ब्राह्मणस्यतथैवेदंतप्तमुद्रादिधारणमितिपद्मपुराणाच्चेति ब्राह्मणःक्षत्रियोवैश्यः
शूद्रोवायदिवेतरः शंखमुद्रांकिततनुस्तुलसीमंजरीधरः गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतः इतिकाशीखंडात् तत्प्रकारस्तुरा
मार्चनचंद्रिकातोज्ञेयः एषोचंद्रोदयादयस्तुयस्तुसंतप्तशंखादिलिंगचिह्नतनुर्नरः ससर्वयातनाभोगीचंडालोजन्मकोटिषु द्विजंतु
तप्तशंखादिलिंगांकिततनुर्नरः संभाष्यरौरवंयातियावदिंद्राश्चतुर्दशेतिबृहन्नारदीयोक्तेः शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा एक
जातेरयंधर्मोनजातुस्याद्द्विजन्मनः शंखचक्रेमृदायस्तुकुर्यात्तप्तायसेनवा सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः यथाश्मशानज
काष्ठमनर्हंसर्वकर्मसु तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितः तथा शिवकेशवयोरंकान्शूलचक्रादिकान्द्विजः नधारयेतमतिमा
न्वैदिकेवर्त्मनिस्थित इतिविष्णवाश्वलायनादिवचनात् ऋग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनांचासत्त्वात् चक्रादिधारणंशूद्रविषयमि
त्यूहुः नृत्यंचोदरार्थंनिषिद्धमिति श्रीधरस्वामीयद्यपिनिषेधस्यप्राप्तिसापेक्षत्वाद्विधिविनाचतदयोगादुपजीव्यविरोधेननतोपश्लोकरोतीति
वद्दिकुत्सोद्युक्तस्तथापिएकजातेरयंधर्मइत्यनेनसामान्यवाक्यानामुपसंहारात् द्विजातिनिषेधोनित्यानुवादइतितदाशयः अत्रशिष्टाचार
एवसंकटपाशनिः सरणस्तृणिरितिसंक्षेपः आषाढपौर्णमास्यांकोकिलाव्रतमुक्तंहेमाद्रौभविष्ये आषाढपौर्णमास्यांतुसंध्याकालेह्युपस्थिते
संकल्पयेन्मासमेकंश्रावणेमत्स्यहंत्वहं स्नानंकरिष्येनियताब्रह्मचर्यस्थितासती भोक्ष्यामिनक्तंभूशय्यांकरिष्येप्राणिनांदयामिति ॥

अस्यनक्तव्रतत्वात्सायान्हव्यापिनीग्राह्या अत्रैवशिवशयनोत्सवउक्तोहेमाद्रौवामनपुराणे पौर्णमास्यामुमानाथः स्वपतेचर्मसंस्तरे वैय्याघ्रेचजटाभारंसमुद्ग्रथ्याहिवर्म्मणा मदनरत्नेप्येवं इयंचप्रदोषव्यापिनी अत्रैवव्यासपूजोक्ता तच्चत्रिमुहूर्ताचेत्परैवेतिसन्यासपद्धतौ त्रिमुहूर्ताधिकंग्राह्यंसर्वक्षौरप्रणामयोरितिवचनात् इतिश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृतेनिर्णयसिंधौआषाढः समाप्तः कर्कसंक्रांतौपूर्वंत्रिंशद्दंडाः पुण्यकालः सूर्योदयोत्तरंसंक्रमेतुपरतएवपुण्यंरात्रौतुनिशीथात्प्राक्परतश्चसंक्रमे ऽपरार्कहेमाद्र्यनंतभट्टादिमते पूर्वोत्तरदिनयोः पंचनाड्यः पुण्यकालः धनुर्मीनावतिक्रम्यकन्यांचमिथुनंतथा पूर्वापरविभागेनरात्रौसंक्रमतेरविः दिनांतेपंचनाड्यस्तुतदापुण्यतमाः स्मृताः उदयेपितथापंचदैवेपित्र्येचकर्मणीतिस्कांदोक्तेः पूर्वापरविभागेनेतिमकरकर्कभिन्नसंक्रांतिपर वक्ष्यमाणवचोविरोधादित्युक्तंमदनरत्नेतेनायमर्थः रात्रौपूर्वभागेमकरेउदयेपंचनाड्यः पुण्यकालः रात्रावपरभागेकर्कटेदिनांतेपंचनाड्यः पुण्यकालः विषुवतोस्तुपूर्वदिने पंचापरदिनेचपंचेतिवाक्यांतरानुरोधात्तेनहेमाद्रिमाधवयोः सर्ववचनानांचाविरोधः माधवमतेत्वर्धरात्रेतदूर्ध्वंवासंक्रांतौदक्षिणायनेपूर्वमेवदिनंग्राह्यं यावन्नोदयतेरविरितिवृद्धगार्ग्योक्तेः मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशुमालिनः प्रभातेवानिशीथेवातदापुण्यंतुपूर्वतइति भविष्योक्तेश्चपूर्वदिनएवपुण्यंदाक्षिणात्यास्त्वेतदेवाद्रियंते अत्ररात्रावपिस्नानादिभवतीत्युक्तंप्राक् अन्नदानोपवासादिपूर्वमुक्तं तथाकर्केकेशादिकर्तनंनिषिद्धं कुंभेकर्कटकेवापिकन्यायांकार्मुकेरवौ रोमखंडंगृहस्थस्यपितॄन्प्रापयतेयमइति स्मृतुवचनादित्युक्तंजीवत्पितृकनिर्णयेगुरुभिः अथनदीनांरजोदोषः हेमाद्रावत्रिः सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः नस्नानादीनिकर्माणितासुकुर्वीतमानवः इदंचस्कंदनदीषु सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः तासुस्नानंनकु

वीतिवर्जयित्वासमुद्रगाइति व्याघ्रोक्तेः मात्स्येऽगस्त्योदयावधित्वमुक्तं यावन्नोदेतिभगवान्दक्षिणाशाविभूषणः तावद्रजोमहानद्यःकरतो
याःप्रकीर्तिताः करतोयाअल्पतोयाः तथाकात्यायनः याःशोषमुपगच्छन्तिग्रीष्मेकुसरितोभुवि तासुप्रावृषिनस्नायादपूर्णेदशवासरे
इदंचापदि स्मृतिसंग्रहे धनुःसहस्राण्यष्टौतुगतिर्यासांनविद्यते नतानदीशब्दवहागर्तास्ताःपरिकीर्तिताः महानदीषुतुभविष्ये उक्तं आ
दौतुकर्कटेदेविमहानद्योरजस्वलाः त्रिदिनंचचतुर्थेन्हिशुद्धास्युर्जान्हवीयथा महानद्यश्चब्राह्मे गोदावरीभीमरथीतुंगभद्राचवेणिका
तापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्तिताः भागीरथीनर्मदाचयमुनाचसरस्वती विशोकाचवितस्ताचविंध्यस्योत्तरसंस्थिताः द्वाद
शैतामहानद्योदेवर्षिक्षेत्रसंभवाः मदनरत्नेपुराणांतरे महानद्योदविकाचकावेरीवंजरातथा रजसातुप्रदुष्टाःस्युःकर्कटादौत्र्यहं
नृप कात्यायनः कर्कटादौरजोदुष्टागोमतीवासरत्रयं चंद्रभागासतीसिंधुःसरयूर्नर्मदातथा इदंगंगाद्यतिरिक्तविषयं गंगाचयमुना
चैवप्लक्षजातासरस्वती रजसानाभिभूयंतेयेचान्येनदसंज्ञिताः शोणसिंधुहिरण्याख्याःकोकलोहितघर्घराः शतद्रूश्चनदाःसप्तपाव
नाःपरिकीर्तिताः इतिदेवलोक्तेः यत्तु प्रथमंकर्कटेदेवित्र्यहंगंगारजस्वलेत्यादिवचनंतज्जान्हवीभिन्नगोदावर्यादिगंगांतरपरमितिमदन
रत्ने अन्येत्वंतर्गतरजोविषयं गंगाधर्मद्रवःपुण्यायमुनाचसरस्वती अंतर्गतरजोदोषाःसर्वावस्थास्वचामलाइतिनिगमोक्तेः तीरवासि
नांतुरजोदोषोनास्ति नतुतत्तीरवासिनामितिनिगमोक्तेः रजोदुष्टमपिजलंगंगाजलयोगेपावनं गंगांभसासमायोगान्नदुष्टमप्यंबुपावनमि
तिमात्स्योक्तेः नूतनकूपादौतुयोगयाज्ञवल्क्यः अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका भूमेर्नवोदकंचैवदशरात्रेणशुध्यतीति क्वचि
त्वदोषमाहव्याघ्रपादः अभावेकूपवापीनामनपायिपयोभृतां रजोदुष्टेपिपयसिग्रामभोगोनदुष्यति गौडास्तु अन्येनापिसमुन्हृतेइतिहि

तीयपादेपाठः तेनोक्तेनदोषः तथाचनात्रस्नानंनेतिमाधवोक्तमित्याहुः वसिष्ठोपि उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच चंद्रसूर्यग्रहेचैवरजो
दोषोनविद्यतेइत्यलंविस्तरेण श्रावणशुक्लतृतीयामधुस्रवाख्यागुर्जरेषुप्रसिद्धा सापरयुताग्राह्येतिदिवोदासः श्रावणशुक्लचतुर्थीपूर्व
युतामातृविघ्नोगणेश्वरइत्यादिवचनात् श्रावणशुक्लपंचमीनागपूजादौपरैवेतिसामान्यनिर्णयेउक्तं चमत्कारचिंतामणौ पंचमीनागपू
जायांकार्याषष्ठीसमन्विता तस्यांतुतुषितानागाइतरासचतुर्थिकेति श्रावणेपंचमीशुक्लासंप्रोक्तानागपंचमी तांपरित्यज्यपंचम्यःचतु
र्थीसहिताहिताइतिमदनरत्नेभिधानाच्च तेनपरैवेति अत्रविशेषोहेमाद्रौभविष्ये श्रावणेमासिपंचम्यांशुक्लपक्षेनराधिप द्वारस्योभय
तोलेख्यागोमयेनविषोल्बणाः पूजयेद्विधिवद्वीरदधिदूर्वांकुरैःकुशैः गंधपुष्पोपहारैश्चब्राह्मणानांचतर्पणैः येतस्यांपूजयंतीहनागान्भक्ति
पुरःसराः नतेषांसर्पतोवीरभयंभवतिकुत्रचिदिति श्रावणशुक्लद्वादश्यांदधिव्रतंमाधवोक्तं नक्रादीनांत्वनिषेधः तत्रदधिव्यवहाराभावादिति
वक्ष्यते अत्रैवविष्णोःपवित्रारोपणमुक्तं हेमाद्रौविष्णुरहस्ये श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे द्वादश्यांवासुदेवाय पवित्रारोपणं
स्मृतं द्वादश्यांश्रवणेवापिपंचम्यामथवाद्विज अनुकूल्येषुकर्तव्यंपंचदश्यामथापिवेति शिवेतुतत्रैवकालोत्तरे आषाढांतेचतुर्दश्यांन
भस्यनभसोस्तथा अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोःसममिति अन्यदेवतानांतुवक्ष्यते अधिवासनंतुदीपिकायां गोदोहांतरितेकालेपूर्वे
द्युर्वाधिवासनमिति गौणकालोरामार्चनचंद्रिकायां पवित्रारोपणंविप्राच्छ्रावणेनभवेद्यदि कार्तिक्यवधिशुक्लास्तेकर्तव्यमितिनारदः हे
मरौप्यताम्रक्षौमैःसूत्रैःकौशेयपद्मजैः कुशैःकाशैश्चकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत् त-
त्रोत्तमंपवित्रंतुषष्ट्यासहशतैस्त्रिभिः सप्तत्यासहितंद्वाभ्यांशताभ्यांमध्यमंस्मृतं साशीतिनाशतेनैवकनिष्ठंतत्समाचरेत् साधारणपवि

त्राणित्रिभिःसूत्रैःसमाचरेत् उत्तमंतुशतग्रंथिपंचाशद्ग्रंथिमध्यमं कनिष्ठंतुपवित्रंस्यात्षट्त्रिंशद्ग्रंथिशोभनं षट्त्रिंशच्चचतुर्विंशत्द्वादशे
तिचकेचन चतुर्विंशद्द्वादशाष्टावित्येकेमुनयोविदुः हेमाद्रौविष्णुरहस्येत्वन्यथोक्तं अष्टोत्तरशतंकुर्याच्चतुःपंचाशदेववा सप्तविंशतिरेवा
थज्येष्ठमध्यकनीयसं अधमंनाभिमात्रंस्यादूरुमात्रंद्वितीयकं प्रलंबतोजानुमात्रंप्रतिमायांनिगद्यते शिवपवित्रंतुतत्रैवशैवागमे एका
शीत्यथवासूत्रैस्त्रिंशतावाष्टयुक्तया पंचाशंतावाकर्तव्यंतुल्यग्रंथ्यंतरालकं द्वादशांगुलमानानिव्यासादष्टांगुलानिवा लिंगविस्तारमा
नानिचतुरंगुलकानिचेति अधिकारिणोपितत्रैवविष्णुरहस्ये ब्राह्मणःक्षत्रियोवैश्यस्तथास्त्रीशूद्रएवच स्वधर्मावस्थिताःसर्वेभ
क्त्याकुर्युःपवित्रकं तथा अतोदेवेतिमंत्रेणद्विजोविष्णोर्निवेदयेत् शूद्रस्यमूलमंत्रोवास्येनवापूजयेद्धरिं एतच्चनित्यं नकरोतिविधा
नेनपवित्रारोपणंतुयः तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः वर्षेवर्षेप्रकर्तव्यंपवित्रारोप
णंहरेरितितंत्रेचोक्तेः देवताविशेषतिथयोपितत्रैव धनदश्चरमागौरीगणेशःसोमराड्गुहः भास्करश्चंडिकांबाचवासुकिश्चतथर्षयः
चक्रपाणिस्त्वनंगश्चशिवोब्रह्मातथैवच प्रतिपत्प्रभृतिष्वेताःपूज्यास्तिथिषुदेवताः यथोक्ताःशुक्लपक्षेतुतिथयःश्रावणस्यचेति तथा
हेमाद्रौकालोत्तरे चतुर्दश्यामथाष्टम्यांसर्वसाधारणंतुतदिति तत्प्रकारस्तुरामार्चनचंद्रिकायां यथा ततस्तानिपवित्राणिवेणव
पटलेशुभे संस्थाप्यशुक्लवस्त्रेणपिधायपुरतोन्यसेत् अरत्निसंमितांवेणींकुर्यात्षट्त्रिंशताकुशैः क्रियालोपविघातार्थंयत्त्वयावि
हितंप्रभो मयैतत्क्रियतेदेवतवतुष्ट्यैपवित्रकं नमेविघ्नोभवेद्देवकुरुनाथदयामयि सर्वथासर्वदाविष्णोममत्वंपरमागतिः उपवासेन
देवत्वांतोषयामिजगत्पते कामक्रोधादयोप्येतेनमेस्युर्व्रतघातकाः अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं तावद्रक्षात्वयाकार्यासर्व-

स्यास्यनमोस्तुते इतिदेवंसंप्रार्थ्यकुंभंसंस्थाप्यतत्रवंशपात्रे ॐसांवत्सरस्ययागस्यपवित्रीकरणायभो विष्णुलोकात्पवित्राद्यआगच्छेहनमोस्तुते अनेन मूलेनचावाह्योत्तममध्यमकनिष्ठेषुविष्णुब्रह्मरुद्रान्सत्वरजस्तमांसिवेदत्रयंवनमालायांप्रकृतिंचावाह्य त्रिसूत्र्यांब्रह्मविष्णुरुद्रान् ग्रंथिषु क्रिया पौरुषी वीरा विजया ईशा अपराजिता मनोन्मनी जया भद्रा मुक्तिश्चेत्यावाह्यसंपूज्य ॐसंवत्सरकृतार्चायाःसंपूर्णफलदायियत् पवित्रारोपणायेतत्कुरुकंधरतेनमः विष्णुतेजोद्भवंरम्यंसर्वपातकनाशनं सर्वकामप्रदंदेवतवांगेधारयाम्यहमितिदेवकरेमंगलसूत्रंबध्वादेवंसंपूज्यनिमंत्रयेत् आमंत्रितोसिदेवेशपुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसांनिध्यंकुरुकेशव क्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वांपूजयिष्यामिसन्निधौभवतेनमः निवेदयाम्यहंतुभ्यंप्रातरेतत्पवित्रकं सर्वथासर्वदाविष्णोनमस्तेस्तुप्रसीदमे ततःपुष्पांजलिंदत्वारात्रौजागरणंकुर्यादिति अधिवासनं प्रातर्नित्यपूजांकृत्वागंधदूर्वाक्षतयुतंपवित्रमादाय ॐ देवदेवनमस्तुभ्यंगृहाणेदंपवित्रकं पवित्रीकरणार्थायवर्षपूजाफलप्रदं पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृतं शुद्धोभवाम्यहंदेवत्वत्प्रसादान्महेश्वर मूलसंपुटितेनानेनदत्वांगदेवताभ्योनाम्नासमर्प्य महानैवेद्यंदत्वानीराज्य मणिविद्रुममालाभिरित्यादिभिर्दमनारोपणोक्तमंत्रैः प्रार्थयित्वागुरवेब्राह्मणेभ्यश्चदत्वास्वयंधारयेत् तथा मासंपक्षमहोरात्रंत्रिरात्रंधारयेत्तथा देवेतंसूत्रसंदर्भेदेशकालविवक्षया अकरणेतुतत्रैव पवित्रारोपणंकालेनकरोतिकथंचन तदायुतंजपेन्मंत्रंस्तोत्रंवापिसमाहितइत्युक्तं इतिपवित्रारोपः श्रावणशुक्लचतुर्दशीपूर्वयुताग्राह्या अत्रवक्तव्योविशेषश्चैत्रचतुर्दश्यामुक्तः अथोपाकर्म तत्रबह्वृचानांप्रयोगपारिजातेशौनकः अथातःश्रावणेमासेश्रवणर्क्षयुतेदिने श्रावण्यांश्रावणेमासिपंचम्यांहस्तसंयुते दिवसेविदधीततदुपाकर्मयथोदितं अध्यायोपाकृतिंकुर्यात्तत्रौपासनवन्हिनेति अत्रपौर्णमास्युपसंहारन्यायेनयजुर्वेदिपरेति

हेमाद्रिः अत्रहस्तयुक्तापंचम्युक्ता कारिकापि तन्मासेहस्तयुक्तायांपंचम्यांवातदिष्यतेइति केवलपंचम्यांहस्तयुतेन्यस्मिन्दिनेइतितु हेमाद्रिः उपासनवन्हिनेतितुकर्मद्वयमिदं केचिल्लौकिकाग्नौप्रकुर्वतेइति कारिकोक्तलौकिकाग्निनाविकल्प्यते तत्राप्यध्यायैरन्वारब्ध इतिसूत्रात् सशिष्यत्वेतदधिकारिकस्याचार्याग्नौनान्यस्याग्नावन्योजुहुयादितिनिषेधाल्लौकिकएव तदभावेतुस्मार्तइतिनिगर्वः यद्यपिदीपिकायां वेदोपाकृतिरोषधिप्रजननेपक्षेसितेश्रावणेइति शुक्लपक्षोपिसर्वेषांमुख्यकालत्वेनोक्तः वक्ष्यमाणगार्ग्यवचनेनछंदोगान्प्रतिविहितस्यतस्याविरोधिनः सर्वान्प्रतिप्रवृत्तिश्च तथापिश्रावणमाससंबंधस्यसूत्रोक्तत्वात् कृष्णपक्षेपिकार्यमितिवृद्धाः तथाचसूत्रं अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवा अत्रश्रवणोमुख्योन्येगौणाः तस्याहर्द्वययोगेहेमाद्रौव्यासः धनिष्ठासंयुतंकुर्याच्छ्रावणंकर्मयद्भवेत् तत्कर्मसकलंज्ञेयमुपाकरणसंज्ञितं श्रवणेनतुयत्कर्मह्युत्तराषाढसंयुतं संवत्सरकृतोध्यायस्तत्क्षणादेवनश्यतीति गार्ग्योपि उदयव्यापिनित्वेवविष्णवृक्षेघटिकाद्वयं तत्कर्मसकलंज्ञेयंतस्यपुण्यंत्वनंतकं इतिपूर्वेद्युरुत्तराषाढयोगेपरेद्युः श्रवणाभावेघटिकाद्वयन्यूनेवापंचम्यादौकार्यं नतुपूर्वविद्धायांसंगवमात्रे अपवादाभावात् ॥

किंच परेद्युःसंगवास्पर्शेनिषिद्धपूर्वाग्रहणेकिंमानं संगववाक्यंश्रवणवाक्यंचेतिचेत् तर्हिव्रीहिवाक्यादश्मशफवाक्याच्चमाषमिश्राणामप्युपादानंस्यादितिमहत्पाडित्यं निषेधानुप्रवेशान्नैरपेक्ष्यबाधान्नेतिचेत् इहापितुल्यं एतेनपर्वण्यौदयिकंव्याख्यातंनिषेधानुप्रवेशस्योभयत्रतुल्यत्वात् श्रवणयुतदिनेसंक्रांत्यादौतु उपाकर्मनकुर्वंतिक्रमात्सामर्ग्यजुर्विदः ग्रहसंक्रांतियुक्तेषुहस्तश्रवणपर्वस्विति हेमाद्रौनिषेधात्पंचम्यादयोग्राह्याः मदनरत्नेपि यदिस्याच्छ्रावणंपर्वग्रहसंक्रांतिदूषितं स्यादुपाकरणंशुक्लपंचम्यां

श्रावणस्यतु स्मृतिमहार्णवे संक्रांतिग्रहणंवापियदिपर्वणिजायते तन्मासेहस्तयुक्तायांपंचम्यांवातदिष्यते तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ अर्धरात्रादधस्ताच्चेत्संक्रांतिग्रहणंतदा उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृदिति मदनरत्नेगार्ग्योपि यद्यर्धरात्रादर्वाक्तुग्रहःसंक्रमएववा नोपाकर्मतदाकुर्याच्छ्रावण्यांश्रवणेपिवा एतेनग्रहणसंक्रांतिकालेश्रवणसत्वेएवनिषेधोनार्वागितिसूर्यवंशाकापरास्ता ग्रहविशिष्टानांहस्तश्रवणपर्वणां प्रत्येकंनिषेधेतूद्युतोपाकर्मनिषेधेचविशिष्टोद्देशेवाक्यभेदात् पंचम्यांसंक्रांतौनिषेधाभावापत्तेश्च तेनार्धरात्रात्पूर्वंग्रहसंक्रमसत्वेएवोपाकर्मनिषेधोनतद्योगेएव यत्तु प्रतिपन्मिश्रितेनैवनोत्तराषाढसंयुते श्रवणेश्रावणंकुर्युर्ग्रहसंक्रांतिवर्जितेइति प्रतिपन्मिश्रनिषेधकंवचनंतन्निर्मूलं अत्रच वेदोपाकरणेप्राप्तेकुलीरेसंस्थितेरवौ उपाकर्मनकर्तव्यंकर्तव्यंसिंहयुक्तके इतिवचनंदेशांतरविषयं नर्मदोत्तरभागेतुकर्तव्यंसिंहयुक्तके कर्कटेसंस्थितेभानावुपाकुर्यात्तुदक्षिणइति बृहस्पतिवचनादितिप्रयोगपारिजातेनोक्तं पराशरमाधवीयेप्येवं सामगानांसिंहस्थरवावुक्तेस्तद्विषयइदंपुरोडाशच्चतुर्धाकरणवदुपसंह्रियते तेषामेवदेशव्यवस्थानतुबह्वृचादिपरं तेषांसूत्रेचांद्रश्रावणोक्तेः सौरेपंचम्ययोगात्इतितुवयंपश्यामः यत्तुकालादर्शे अध्यायानासुपाकर्मश्रावण्यांतैत्तिरीयकाः बह्वृचाःश्रवणेकुर्युःसिंहस्थोर्कोभवेद्यदि सहस्तशुक्लपंचम्यांवानग्रहणसंक्रमे असिंहार्केप्रोष्ठपद्यांश्रवणेनव्यवस्थयेति तन्मूलालेखनाच्चिंत्यं श्रावणेसस्यानुद्गमादौतुबह्वृचपरिशिष्टे अदृष्टौषधयस्तस्मिन्मासेतुनभवंतिचेत् तदाभाद्रपदेमासिश्रवणेनतदिष्यतेइति तत्राप्यनुद्गमेतुकुर्यादेवंतद्वार्षिकमित्याचक्षतेइतिसूत्रात् वर्षर्तौभवंवार्षिकं एतच्चशुक्रास्ताद्यावपि कार्यं उपाकर्मोत्सर्जनंचपवित्रंदमनार्पणमिति दमनारोपेलिखितवचनात् नित्यनैमित्तिकेजप्येहोमेयज्ञक्रियासुच उपाकर्मणिचो

त्सर्गेग्रहवेधोनविद्यतइति प्रयोगपारिजातेसंग्रहोक्तेः पर्वणिग्रहणेसतिपूर्वंत्रिरात्रादिवेधाभावंवक्तुमिदंतेन पर्वणिग्रहणेपिचतुर्दश्यांश्रव
णेकार्यमितिहेमाद्रिः अस्तेप्रथमारंभस्तुनभवति गुरुभार्गवयोर्मौढ्येबाल्येवावार्धकेपिवा तथाधिमाससंसर्पमलमासादिषुद्विजे प्र
थमोपाकृतिर्नस्यात्कृतंकर्मविनाशकृदिति तत्रैवकश्यपोक्तेः अत्रप्रथमारंभेवृद्धिश्राद्धंकुर्यादितिनारायणवृत्तौ एतच्चाधिमासेनका
र्यं उपाकर्मतथोत्सर्गःप्रसवाहोत्सवाष्टकाः मासवृद्धौपरेकार्यावर्जयित्वातुपैतृकमितिज्योतिःपराशरोक्तेः उत्कर्षः कालवृद्धौस्या-
दुपाकर्मादिकर्मणि अभिषेकादिवृद्धीनांनतूत्कर्षोयुगादिष्विति कात्यायनोक्तेश्च यत्तु उपाकर्मणिचोत्सर्गेह्येतदिष्टंवृषादितइति
ऋष्यशृंगवचनंतत्सामगविषयं तेषांसिंहार्कएवोक्तेः एतच्चापराण्हेकार्यं उपाकर्मापराण्हेस्यादुत्सर्गःप्रातरेवहीति अध्यायानामु
पाकर्मकुर्यात्कालेपराण्हिके पूर्वाण्हेतुविसर्गःस्यादितिवेदविदोविदुरितिचहेमाद्रौगोभिलोक्तेः वस्तुतस्तु भवेदुपाकृतिःपौर्णमा
स्यांपूर्वाण्हएवहीतिप्रचेतसोवचनात् पूर्ववाक्यंसामगविषयं तेषामपराण्हएवोक्तेरित्यनुपदंवक्ष्यते दीपिकापि अस्यत्तुविधेःपूर्वा
ण्हकालःस्मृतइति याजुषास्तुपर्वणिकुर्युः तच्चापस्तंबैरौदयिकंग्राह्यमन्यैस्तुपूर्वं पर्वण्यौदयिकेकुर्युःश्रावण्यांतैत्तिरीयकाः बह्वृ
चाःश्रवणेकुर्युर्ग्रहसंक्रान्तिवर्जितइति गार्ग्योक्तेः संप्राप्तेवाश्रुतौब्रह्मापर्वण्यौदयिकेपुनः अतोभूतदिनेतस्मिन्नोपाकरणमिष्यते
इतिकालिकापुराणाच्च अथचेद्दोषसंयुक्तेपर्वणिस्यादुपाक्रिया दुःखशोकामयग्रस्ताराष्ट्रंतस्मिन्द्विजातयइति मदनरत्नेहेमाद्रौ
गार्ग्येणदोषोक्तेः अत्रशिंगाभट्टीयेविशेषः श्रवणःश्रावणपर्वसंगवस्पृग्यदाभवेत् तदैवौदयिकंकार्यंनान्यदौदयिकंभवेत् परा-
शरमाधवीयेपिगार्ग्यः श्रावणीपौर्णमासीतुसंगवात्परतोयदि तदैवौदयिकीग्राह्यानान्यदौदयिकीभवेत् कर्मकालमाह काला

दर्शेनिगमः श्रावण्यांप्रौष्ठपद्यांवाप्रतिपत्षण्मुहूर्तकैः विद्धास्याच्छंदसांतत्रोपाकर्मोत्सर्जनंभवेत् अत्रपौर्णमासीश्रवणहस्तयोरुपलक्षणं तेनतावपिसंगवस्पर्शौ उदयेसंगवस्पर्शेस्तःपर्वणिचार्कभे कुर्युर्नभस्युपाकर्मऋग्यजुःसामगाःक्रमादितिपृथ्वीचंद्रः तेनोदयसंगवोभयव्यापिनीमुख्या परेद्युःसंगवाभावेपूर्वेद्युरुभयाभावेचैकैकसत्त्वेपूर्वेद्युश्चतुर्दशीवेधनिषेधात्सामान्यवाक्यादौदयिकीकर्मपर्याप्ताग्राह्या नपूर्वा संगवनिमित्तपूर्वविद्धापवादाभावात् नान्यदौदयिकीत्यस्यपूर्वविद्धापरत्वाभावात् तेनश्राद्धादौकालांतरस्यान्ननुनिषिद्धेनहिव्रीह्यलाभेनिषिद्धमाषग्रहणंयुक्तं अतएवपरेद्युः संगवव्याप्तौपूर्वविद्धानिषेधः तदभावेतुनेतिपूर्वैव्यवस्थाप्युक्ताविधिवैषम्यात् मासनिषेधोपितथापत्तेश्च पूर्वविद्धावचनसत्त्वेहिसायुज्यते एवंश्रवणेपिज्ञेयं तन्न विष्णवर्क्षेघटिकाद्वयमितिपूर्वोक्तविरोधात् तेनप्राशस्त्यमात्रपरमिदं तत्वंतु एतच्छुद्धाधिकपरं तेनयथाग्निहोत्रादौसायंप्रातःकालबाधेसामान्येजीवनावच्छिन्नकालेदर्शादौवानुष्ठानं यथावाव्रीह्यश्वशफाद्यभावेयागोक्तिसनिषिद्धवर्जद्रव्येण तथात्रसंगवाभावेनिषिद्धवर्जकर्मपर्याप्तौदयिकेकालांतरेवानुष्ठानंनतुकदाचिन्निषिद्धे अपवादाभावेउत्सर्गस्यैवप्राप्तेः कात्यायनादीनांतुदिनद्वयेपूर्वाण्हव्याप्तौएकदेशास्पर्शेवापूर्वैवेतिहेमाद्रिः यदपि श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमिति ब्रह्मवैवर्ते तद्ब्रह्मपवित्रश्रवणाकर्मादिदैवकर्मविषयमितिहेमाद्रिः अतएववचनात् कुलधर्मव्रतादावपिपूर्वैव मदनरत्नेप्येवं मदनपारिजातेपि पूर्वविद्धायांश्रावण्यांवाजसनेयिनामुपाकर्मेत्युक्तं मदनरत्नेतु पर्वण्यौदयिकेकुर्युःश्रावणंतैत्तिरीयकाइति बह्वृचपरिशिष्टात् बह्वृचान्प्रतिकर्मविधानार्थप्रवृत्तेः तत्रतैत्तिरीयककर्मविध्ययोगात्पूर्वोक्तकालिकापुराणादौ सामान्यतः औदयिकपर्वप्राप्तेस्तन्निषेधेनबह्वृचा

नांश्रवणविधानात्तैत्तिरीयकपदमनुवादत्वात् तस्यचप्राप्त्यधीनत्वात् प्राप्तेश्च यजुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थं अवश्युत्यानुवादोवा नतुविधायकं येन विशेषविधिनोपसंहारःस्यात् अनुवादत्वाल्लक्षणानदोषः अन्यथात्वौदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्तृविधौकर्तृविशिष्टेवाऔदयिकपर्वविधौवाक्यभेदापत्तेः तस्मात्तैत्तिरीयकपदाविवक्षयासर्वयजुर्वेदिनामौदयिकमेवपर्वेत्युक्तं तन्न नतावत्परिशिष्टे बह्वृचानांप्रत्येकविधिः धनिष्ठाप्रतिपद्युक्तत्वाष्ट्रऋक्षसमन्वितमित्यादिनदुदाहृते एवपरिशिष्टेवेदान्तरधर्मविधीनांदर्शनात् नाप्यनुवादोयंकालिकापुराणात् बह्वृचादीनामपितदापत्तेः कुर्युरित्यस्यविधित्वेनतस्यैवार्थवादत्वेनैतत्प्राप्तानुवादित्वाच्च नचतैत्तिरीयकाणांगृह्येतद्विधिरस्ति येनानुवादःस्यात् नचवाक्यभेदः तैत्तिरीयकमात्रस्यकर्ममात्रस्यवाउद्देश्यत्वायोगेन हविरार्तिवदष्टवर्षंब्राह्मणमुपनयीतेतिवच्चागत्याविशिष्टस्योद्देश्यत्वात् अन्यथान्तरार्धेबह्वृचपदस्याप्यविवक्षापत्त्याश्रवणस्यसर्वसाधारण्यापत्तेः तस्माद्धेमाद्रिमतमेवयुक्तमितिदिक् इदंचशिष्यानध्यापयेत आवसथ्येऽग्नौअनध्यापयतोनाधिकारइतिकर्कः श्रावण्यामपिग्रहणादिदुष्टायांकातीयभिन्नैःप्रोष्ठपद्यांकार्यं तैस्तुश्रावणपञ्चम्यां संक्रांतिर्ग्रहणंवापिपौर्णमास्यांयदाभवेत् उपाकृतिस्तुपंचम्यांकार्यावाजसनेयिभिरिति स्मृतिमहार्णवे वाजसनेयिग्रहणादितिहेमाद्रिः इदंचसूत्रोक्तकालपरत्वात् बह्वृचपरमपिसांख्यायनैस्तुहस्तेकार्यं आपस्तंबैराथर्वणैश्चप्रोष्ठपद्यां यत्तुबौधायनः श्रावण्यांपौर्णमास्यामाषाढ्यांवोपाकृत्येत्यूचे तत्प्रोष्ठपद्यामपिदोषे आषाढ्यांकार्यमित्येवमर्थं तच्छाखीयविषयंवा सामगास्तुश्रावणेहस्तेकुर्युर्बह्वृचाः श्रवणेचैवहस्तर्क्षेसामवेदिनइतिनिर्णयामृते गोभिलोक्तेः सोप्युत्तरः धनिष्ठाप्रतिपद्युक्तंत्वाष्ट्रऋक्षसमन्वितं श्रावणंकर्मकुर्वीरन्नृग्यजुःसामपाठकाः इतिम

दनरत्नेपरिशिष्टोक्तेः गार्ग्योपि सिंहेरवोतुपुष्यर्क्षेपूर्वाण्हेविवरेवहिः छंदोगामिलिताःकुर्युरुत्सर्गंस्वस्वछंदसां शुक्लपक्षेतुहस्तेनउ
पाकर्मापराण्हिकर्मिति अविवरेग्रहणादिदोषहीने विचरेदिति पाठोज्ञानकृतः पुष्यर्क्षेपूर्वाण्हेउत्सर्गः अपराण्हेकस्तुपाकर्मेत्यन्वयः अ
न्यस्तुविशेषः पूर्वमेवोक्तः प्रयोगपारिजातेगोभिलः उपाकर्मोत्सर्जनंचवनस्थानामपीष्यते धारणाध्ययनांगत्वात्गृहीणांब्रह्मचारि
णां उत्सर्जनंचवेदानामुपाकरणकर्मच अकृत्वावेदजप्येनफलंनाप्नोतिमानवः सर्वथाल्लोपेतुकृच्छ्रउपवासश्च वेदोदितानांनित्या
नामिति मनुनाभोजनोक्तेः एवमुत्सर्गेपि अथप्रसंगादन्येवोत्सर्जनमुच्यते तच्चपौषमासेरोहिण्यांतत्कृष्णाष्टम्यांवाकार्यं पौषमा
सस्यरोहिण्यामष्टकायामथापिवा जलांतेछंदसांकुर्यादुत्सर्गंविधिवद्बहिरिति याज्ञवल्क्योक्तेः श्रावण्यांप्रोष्ठपद्यांचोपाकृतोक्रमेणपौ
षशुक्लप्रतिपदिमाघशुक्लप्रतिपदिवाकार्यं अर्धपंचमान्मासानधीयीतेतितेनैवोक्तेः अर्धः पंचमोयेषुसार्धचतुर इत्यर्थः यत्तुहारीतः
अर्धपंचमान्मासानधीत्योर्ध्वमुत्सृजेत् पंचार्धषष्ठान्वेति तदाषाढ्युपाकर्मविषयं बोधायनास्तु पौष्यांमाघ्यांवाकुर्युः पौष्यांमाघ्यां
वोत्सृजेदिति तत्सूत्रात् तैत्तिरीयैस्तु तैष्यांकार्यं तैष्यांपौर्णमास्यांरोहिण्यांवाविरमेदितितत्सूत्रात् बह्वृचैस्तुमाघ्यांकार्यं अध्या
योत्सर्जनंमाघ्यांपौर्णमास्यांविधीयतइति कारिकोक्तेः कातीयास्तुभाद्रपदेकुर्युः उत्सर्गश्चेतितद्दादितैष्यांप्रोष्ठपद्यांपिवेतिकात्यायनो
क्तेः सामगास्तुसिंहार्केपुष्येकुर्युः तथाचसिंहेरवावितिगार्ग्यवचनंपूर्वमुक्तं सर्वैरुपाकर्मदिनेवाकार्यं पुष्येतूत्सर्जनंकुर्यादुपाक-
र्मदिनेथवेति हेमाद्रौखादिरगृह्योक्तेः यदासिंहस्थेसूर्येसतितन्मध्यस्थहस्तनक्षत्रात्प्राक्पुष्यः कर्कटस्थोभवति तदातस्मिन्पु-
ष्येउत्सर्गंकृत्वातदुत्तरहस्तेउपाकर्मसामगाःकुर्युः मासिप्रोष्ठपदेहस्तात्पुष्यःपूर्वोभवेद्यदा तदाचश्रावणेकुर्यादुत्सर्गंछंदसांद्विज

इतितत्रैवपरिशिष्टोक्तेः अत्रद्वावपिसौरौमासौज्ञेयौतेषांसौरस्यैवोक्तेः अत्रविशेषमाह कार्ष्णाजिनिः उपाकर्मणिचोत्सर्गेयथाकालंसमेत्यच ऋषीन्दर्भमयान्कृत्वापूजयेत्तर्पयेत्ततइति उपाकर्मण्युत्सर्गेचत्रिरात्रं पक्षिणीमहोरात्रंवानध्यायइति मिताक्षरायामुक्तं अत्रनदीनांरजोदोषोनास्ति उपाकर्मणिचोत्सर्गेरजोदोषोनविद्यते इतिगार्ग्योक्तेः अत्रैवरक्षाबंधनमुक्तं हेमाद्रौ भविष्ये संप्राप्तेश्रावणस्यांतेपौर्णमास्यांदिनोदये स्नानंकुर्वीतमतिमान्श्रुतिस्मृतिविधानतः उपाकर्मादिकंप्रोक्तमृषीणांचैवतर्पणं शूद्राणांमंत्ररहितंस्नानंदानंचशस्यते उपाकर्मणिकर्तव्यंऋषीणांचैवपूजनं ततोपराण्हसमयेरक्षापोटलिकांशुभां कारयेदक्षतैःशस्तैःसिद्धार्थैर्हेमभूषितैरिति अत्रोपाकर्मानंतर्यस्यपूर्णातिथ्यावार्षिकस्यानुवादोनतुविधिः गौरवात्प्रयोगविधिभेदेचक्रमायोगाच्छुद्धादौतदयोगाच्च तेनपरेद्युरुपाकरणेपिपूर्वेद्युरपराण्हेतत्करणंसिद्धं इदंभद्रायांनकार्यं भद्रायांद्वेनकर्तव्येश्रावणीफाल्गुनीतथा श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनीतिसंग्रहोक्तेः तत्सत्वेतुरात्रावपितदंतेकुर्यादितिनिर्णयामृते इदंप्रतिपद्युतायांनकार्यं नंदायादर्शनेरक्षाबलिदानंदशासुच भद्रायांगोकुलक्रीडादेशनाशायजायते इतिमदनरत्नेब्रह्मवैवर्तात् भविष्ये उपलिप्तेग्रहमध्येदत्तचतुष्केन्यसेत्कुंभं पीठेतत्रोपविष्टोराजामात्यैर्युतस्सुमुहूर्तेतदनुपुरोधानृपतेरक्षांबध्नीतमंत्रेण इदंरक्षाबंधनंनियतकालत्वात् भद्रावर्ज्यंग्रहणादिनेपिकार्यंहोलिकावत् ग्रहसंक्रांत्यादौरक्षानिषेधाभावात्सर्वेषामेववर्णानांसूतकेराहुदर्शने इतितत्कालीनकर्मपरएवनत्वन्यत्र अन्यथा होलिकायांकागतिः अतएव नित्यनैमित्तिकेजप्यहोमयज्ञक्रियासुच उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइति नियतकालीनेतदभावइतिदिक् उपाकर्मणितद्दिनभिन्नपरंतत्रतन्निषेधादित्युक्तंप्राक् मंत्रस्तु येनबद्धोबलीराजादानवेंद्रोमहाबलः तेनत्वामपिब

ग्रामिरक्षेमाचलमाचल ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्चमानवैः कर्तव्योरक्षिताचारोद्विजान्संपूज्यशक्तितइति अत्रैवहयग्रीवोत्पत्तिः तदुक्तंकल्पतरौ श्रावण्यांश्रवणेजातः पूर्वंहयशिराहरिः जगादसामवेदंतुसर्वकल्मषनाशनं स्नात्वासंपूजयेत्तंतुशंखचक्रगदाधरं आश्वलायनेनश्रवणाकर्मोक्तं श्रावण्यांपौर्णमास्यांश्रवणाकर्मेति तत्रास्तमययोगिनीग्राह्या अस्तमितेस्थालीपाकश्रपयित्वेतिसूत्रात् अतएवनिशीथेदर्शप्रयोगांतः पातनियमात्तदंगैः प्रसंगसिद्धिरुक्ताद्वादशे अन्यथापरेद्युः मासीकः प्रसंगः प्रसंगस्य याज्ञिकास्तु पौर्णिमादर्शशब्दयोः पर्वात्यक्षणवदहोरात्रवाचित्वात्तत्रैवकर्मकालव्याप्तिग्राह्येति विकृतित्वाच्छेषपर्वेछंति श्रावणादिमासचतुष्टयकृष्णपक्षद्वितीयास्कअशून्यशयनव्रतं तत्रचंद्रोदयव्यापिनी दिनद्वयेतत्त्वेपरेतिनिर्णयामृते इतिकमलाकरभट्टकृतेनिर्णयसिंधौश्रावणमासः सिंहेपराः षोडशघटिकाः पुण्यकालः अन्यत्पूर्ववत् अत्रगोप्रसवेऽद्भुतसागरेनारदः भानौसिंहगते चैवयस्यगौः संप्रसूयते मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभं प्रसूतांतत्क्षणादेवतांगांविप्रायदापयेत् ततोहोमंप्रकुर्वीतघृताक्तैराजसर्षपैः आहुतीनांघृताक्तानामयुतंजुहुयात्ततः व्याहृतिभिश्चायंहोमः सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणामिति तथा सिंहराशौगतेसूर्येगोप्रसूतिर्यदाभवेत् पौषेचमहिषीसूतेदिवेवाश्वतरीतथा तदानिष्टंभवेत्किंचित्तच्छांत्यैशांतिकंचरेत् अस्यवामेतिसूक्तेनतद्विष्णोरितिमंत्रतः जुहुयाच्चतिलाज्येनशतमष्टोत्तराधिकं मृत्युंजयविधानेनजुहुयाच्चतथासुतं श्रीसूक्तेनततःस्नायाच्छांतिसूक्तेनवापुनः मध्यरात्रेनिशीथेवायदागौःक्रंदतेसदा ग्रामेवास्वगृहेवापिशांतिकंपूर्ववद्दिशेत् एवंश्रावणेवडवाप्रसवोदिनेनिषिद्धः तदुक्तमथर्ववेदिनांगार्ग्यपरिशिष्टे माघेबुधेचमहिषीश्रावणेवडवादिवा सिंहेगावःप्रसूयंतेस्वामिनो

मृत्युदायकाइति अत्रतदुक्तामृताख्याशांतिःकार्या भाद्रकृष्णतृतीयाकज्जलीसंज्ञासापराग्राह्येतिदिवोदासीयउक्तं वचनंतुहरितालिकाप्रकरणेवक्ष्यामः भाद्रकृष्णचतुर्थीबहुलाख्यामध्यदेशेप्रसिद्धा सासायान्हव्यापिनीग्राह्या दिनद्वयेतत्वेपूर्वाग्राह्या गोर्याश्चतुर्थीवटधेनुपूजादुर्गार्चनंदुर्भरहोलिकेच वत्सस्यपूजाशिवरात्रिरेताःपरान्विताघ्नंतिनृपंसराष्ट्रमिति दिवोदासीयवचनात् अत्रवत्सपूजायाःपृथगुपादानात्धेनुपूजाशब्देनबहुलाख्यागृह्यतइतिसएवव्याचख्यौ मदनरत्नेप्येवं अत्रगोपूजायवान्नाशनंचतत्रैवोक्तं भाद्रकृष्णषष्ठीहलषष्ठीसासप्तमीयुतेतिदिवोदासः भाद्रकृष्णसप्तम्यांशीतलाव्रतं तत्रपूर्वाग्राह्येतिहेमाद्रौ अथजन्माष्टमी साचकृष्णादिमासेनभाद्रपदकृष्णाष्टमी तथाभाद्रपदेमासिकृष्णाष्टम्यांकलौयुगे अष्टाविंशतिमेजातःकृष्णोसौदेवकीसुतइतिकल्पतरौब्राह्मोक्तेः अत्रेदंमाधवमतं अष्टमीद्विधा जन्माष्टमीजयंतीचेति तत्राद्याकेवलाष्टमी येनकुर्वंतिजानंतःकृष्णजन्माष्टमीव्रतं तेभवंतिनराःप्राज्ञ व्यालाव्याघ्राश्चकाननइतिस्कांदात् दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतामितिपुराणांतरात् ॥ श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रतं नकरोतिनरोयस्तुभवतिक्रूरराक्षसइति भविष्योक्तेश्चकेवलाष्टम्याएवोपोष्यत्वावगतेः सैवरोहिणीयुक्ताजयंती कृष्णाष्टम्यांभवेद्यत्रकलेकारोहिणीयदि जयंतीनामसाप्रोक्ताउपोष्यासाप्रयत्नतइति वन्हिपुराणात् अष्टमीकृष्णपक्षस्यरोहिणीऋक्षसंयुता भवेत्प्रोष्ठपदेमासिजयंतीनामसास्मृतेतिविष्णुरहस्यादिवचनाच्च ज्योतिरादिवत्संज्ञयाकर्मभेदः रोहिणीयोगश्चाहोरात्रंमुख्यः निशीथमात्रेमध्यमः दिवसादावधमः अहोरात्रंतयोर्योगोह्यसंपूर्णोभवेद्यदि मुहूर्तमप्यहोरात्रेयोगश्चेत्तामुपोषयेदितिवसिष्ठसंहितोक्तेः अर्धरात्रेतुयोगोयंतारापत्युदयेसति नियतात्माशुचिःस्नातःपूजांतत्रप्रवर्तयेदिति विष्णुधर्मोक्तेः

वासरेवानिशायांवायत्रस्वल्पापिरोहिणी विशेषेणनभोमासेसैवोपोष्यामनीषिभिरितिपुराणांतराच्च विशेषेणेतिश्रुतेर्भाद्रपदेपीदं श्रावणेवानभस्येवेतिवक्ष्यमाणात् गौडास्तुनिशीथएवरोहिणीयोगेजयंतीनान्यथेत्याहुः तन्न वासरेवानिशायांवेतिविरोधात् योगविशेषाद्गुणात्फलमित्यन्ये तेष्वकरणेदोषश्रुतेरुपेक्ष्याः तत्रजन्माष्टमीव्रतंनित्यंपूर्वोक्तवचनेषु अकरणेनिंदाश्रुतेः वर्षेवर्षेतुयानारीकृष्णजन्माष्टमीव्रतं नकरोतिमहाप्राज्ञव्यालीभवतिकाननइतिस्कांदेवीप्साश्रुतेश्च नकरोतिनरोयस्त्वितिपूर्वमुक्तेरत्रस्त्रीलिंगमतंत्रं मदनरत्नेस्कांदेत्वत्रफलमप्युक्तं जन्माष्टमीव्रतंयेवैप्रकुर्वंतिनरोत्तमाः कारयंत्यथवालोकान्लक्ष्मीस्तेषांसदास्थिरा सिध्यंतिसर्वकार्याणिकृतेजन्माष्टमीव्रतमिति जयंतीव्रतंतुनित्यंकाम्यंच महाजयार्थंकुरुतांजयंतींमुक्तयेनघ धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव ददातिवांछितानर्थान्येचान्येप्यतिदुर्लभाइति स्कांदादौफलश्रुतेः शूद्रान्नेनतुयत्पापंशवहस्तस्यभोजने तत्पापंलभतेकुंतिजयंतीविमुखोनरः नकरोतियदाविष्णोर्जयंतीसंभवंव्रतं यमस्यवशमापन्नःसहतेनारकींव्यथामित्यकरणेनिंदाश्रुतेश्च यदाचपूर्वेद्युःपरेद्युर्वारोहिणीयोगस्तदाजन्माष्टमीजयंत्यामंतर्भूताज्ञेया नतुजन्माष्टमीव्रतंपृथक्कार्यं विष्णुशृंखलवत् तदुक्तंमाधवेनैव यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीतदा अंतर्भूताजयंत्यांस्यादृक्षयोगप्रशस्तितइति मदनरत्ननिर्णयामृतगौडमैथिलमतेप्येवं हेमाद्रिस्तुरोहिणीसंयुतापोष्यासर्वाघौघविनाशिनी अर्धरात्रादधश्चोर्ध्वंकलयावायदाभवेत् जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनीत्यग्निपुराणादर्धरात्रएवरोहिणीयोगस्यप्राशस्त्यात् मुहूर्तमपिलभ्येतेत्यादीनांचार्धरात्रयोगेप्युपपत्तेर्नजयंतीव्रतंभिन्नं तत्वंतुहेमाद्रिमतेपिजयंतीव्रतंभिन्नमेव उदयेचाष्टमीत्यस्यतेनजयंतीपरत्वोक्तेः किंच रोहिण्यामर्धरात्रेचयदाकृष्णाष्टमीभवेत् तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजमिति विष्णुधर्मो

क्तेः समायोगेतुरोहिण्यांनिशीथेराजसत्तम समजायतगोविंदोबालरूपीचतुर्भुजः तस्मात्तंपूजयेत्तत्रयथावित्तानुरूपतइति वह्निपुराणाच्चार्द्ध
रात्रस्यकर्मकालत्वमवसीयते अतःकर्मणोयस्ययःकालइत्यादिवचनात्पूर्वत्रैवव्याप्तेः परदिनेसतोपिरोहिणीयोगस्यनप्रयोजकत्वं अन्य
थाबुधवारादेरपितत्त्वापत्तेः किंच जयंतीशब्दोरात्रिविशेषवचनः अभिजिन्नामनक्षत्रंजयंतीनामशर्वरी मुहूर्तोविजयोनामयत्रजातो
जनार्दनइति ब्रह्मांडपुराणात् तेनतद्योगिरोहिण्यागौणत्वान्नव्रतभेदः यत्तुवासरेवानिशायांवेतितत्कैमुतिकन्यायेननिशीथयोगस्यैव
स्तुत्यर्थं पूर्वदिनेर्धरात्रयोगाभावेप्राशस्त्यार्थंयद्यपि दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुताम
त्यनेनरोहिणीयोगाभावेर्धरात्रव्याप्तेर्ग्राह्यतोक्ता तथापियस्मिन् वर्षेजयंतीयोगोनास्तितत्रजयंतीव्रतलोपप्राप्ते अष्टमीमात्रेपिजयंतीव्र
तंकार्यं इत्येवंपरमिदमितितदाशयः अत्रहिसत्रायागूर्यविश्वजितायजेत एषामसंभवेकुर्यादिष्टिंवैश्वानरींद्विजइतिवद्रोहिणीयोगाभा
वेविधानात्तत्कार्यापत्तिःस्यात् अतएवोक्तं जयंतीनामशर्वरीति यच्च स्कांदे उदयेचाष्टमीकिंचिन्नवमीसकलायदि भवतेबुधसंयुक्ता
प्राजापत्यर्क्षसंयुता अपिवर्षशतेनापिलभ्यतेवाथवानवेति यच्चपाद्मे प्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः यैःकृताश्रावणेमासिअष्ट
मीरोहिणीयुता किंपुनर्बुधवारेणसोमेनापिविशेषतः किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेति तद्दानादिविषयं उपवासाश्रवणादित्य
नंतभट्टः जयंतीपरामितिहेमाद्रिः उदयेचंद्रोदयइतिकेचित् तन्न चंद्रोदयसत्वेसंदेहान्नवमीसकलेत्ययोगान्मानाभावाच्च तेनपूर्वेद्युः
सप्तमीवेधेपरदिनेसूर्योदयेघटिकापिग्राह्या पूर्वविद्धाष्टमीतिपाद्मोक्तेः इतियुक्तं अतोनव्रतभेदोनाप्यंतर्भावइत्युचितवान् गौडास्तु
नवमीक्षयपरमिदंवचनं नवमीसकलायदीतिविशिष्योक्तेः एतत्पूर्वदिनेजयंत्यभावपरमित्याहुः जयंत्यादिसर्वोपवादोयमितिचूडा

मण्यादयः वयंतुसत्यंव्रतभेदः लोकास्तुजन्माष्टमीमेवानुतिष्ठंति नहिश्रावणेवानभस्येवारोहिणीसहिताष्टमी यदाकृष्णानरैर्लब्धासाज-
यंतीतिकीर्तिता श्रावणेनभवेद्योगोनभस्येतुभवेद्ध्रुवमिति माधवीये वसिष्ठसंहितोक्तापि भाद्रेजयंतीकेनापिक्रियते अतःपूर्वेद्युरेवो
पवासः यद्वागुणात्फलं सप्तमेब्रह्मवर्चसकाममुपनयेदितिवदित्यन्ये तन्न नित्यत्वानुपपत्तेः अत्रगौणमुख्यचांद्राभ्यामेकएवमासइत्य
न्ये तन्न एकवाक्येउभयनिर्देशोवाशब्दद्वयायोगात् अतोजयंतीव्रतस्यापिनित्यत्वादुपवासद्वयंकार्यमितिब्रूमः अतएवहेमाद्रिमदन
रत्नादौजन्माष्टमीव्रतंजयंतीव्रतंचभिन्नमुक्तं भिन्नकालत्वात्सर्वथातावदतद्भावोनेतिसिद्धं यद्यपि पूर्वापरावास्यापिरोहिणीयुतैवकार्ये
तिग्रंथानांतत्त्वंप्रतीयते तदपिजयंतीपरमेव इदंचकाम्यमेवेत्यनंतभट्टः तद्दूषणंहेमाद्रौज्ञेयंनित्यंकाम्यमितितुबहवः ननुयथाविष्णुशृं
खलयोगेनश्रवणद्वादशीवामनजयंत्यादिसर्वसिद्धिर्यथावैकादशीस्वल्पापिपरातथा कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः नव-
म्यांसैवग्राह्या स्यात्सप्तमीसंयुतानहि इत्यादिवचनादर्धोदयादिवद्योगाधिक्येफलाधिक्यात्परैवजन्माष्टमीयुक्तेतिचेत् वार्तमास्य
नहितत्रव्रतभेदोद्वयोर्नित्यत्वं द्वयोरकरणेदोषोवास्तुतः इहत्वेतैस्त्रिभिर्हेतुभिःसंज्ञाभेदाद्धर्मभेदात्कालभेदाच्चोपवासभेदःस्पष्टए
व एकदैवतत्वाच्छ्रवणद्वादशीवन्नपारणालोपदोषोपि तेनव्रतद्वयमेवयुक्तं द्वयोरपिनित्यत्वात् केचित्तु त्रेतायांद्वापरेचैवराजन्कृतयुगेत
था रोहिणीसहितेयंविद्वद्भिःसमुपोषिता अतःपरंमहीपालसंप्राप्तेतामसेकलौ जन्मनावासुदेवस्यभविताव्रतमुत्तममिति हेमाद्रौब्रह्म
पुराणात् कलौजन्माष्टमीव्रतमेवनजयंतीव्रतमित्याहुः तन्न तामसेकलावित्युक्तेः परमश्रेयोहेतोरस्यकलौपापिनांदुर्लभत्वमुच्यते ते
नकलौतामसानकरिष्यंति किंतुधन्याएवेत्यर्थः अन्यथाशूद्राश्चब्राह्मणाचाराभविष्यंति युगेकलौइत्यादौविधिकल्पनापत्तेः अत्रनिशीथ

वेधएवग्राह्यः पूर्वोक्तवचनेभ्युतस्यैवमुख्यकालत्वोक्तेः अष्टमीशिवरात्रिश्चस्यादर्धरात्रादधोयदि दृश्यतेघटिकायासापूर्वविद्धाप्रकीर्तितेति माधवीयपुराणांतरात् अर्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमीभवेत् तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजमिति भविष्योक्तेः अष्टमीरोहिणीयुक्तानिश्यर्धेदृश्यतेयदि मुख्यकालइतिख्यातःस्तत्रजातोहरिःस्वयमिति वसिष्ठसंहितोक्तेश्च तत्राष्टमीद्वेधारोहिणीरहितातद्युताच आद्यापिचतुर्धा पूर्वेद्युरेवनिशीथयोगिनीपरेद्युरेवोभयेद्युरनुभयेद्युश्चेति तत्राद्ययोरसंदेहएवकर्मकालव्याप्तेः जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणमितिस्मृत्युक्तेश्च अस्मात्केवलरोहिण्युपवासोपिसिद्धः अंत्ययोःपरैव यतःसंकल्पकालव्याप्तेराधिक्यात् वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीतिब्रह्मवैवर्ताच्च एवंसतःसमव्याप्तावपि विषमव्याप्तौत्वाधिक्येननिर्णयः रोहिणीयुतापिचतुर्धा पूर्वेद्युरेवनिशीथेरोहिणीयुतापरेद्युरेवोभयेद्युरनुभयेद्युश्च अत्राप्याद्ययोरसंदेहः कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमीतिपाद्मोक्तेः जयंत्यांपूर्वविद्धायामुपवासंसमाचरेदितिगारुडाच्च सप्तमीसहिताष्टम्यांनिशीथेरोहिणीयदि भवितासाष्टमीपुण्यायावच्चंद्रदिवाकरावितिवन्हिपुराणाच्च द्वितीयेत्वसंदेहएव तृतीयपक्षेपरैव वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी सऋक्षापिनकर्तव्यासप्तमीसंयुताष्टमीतिब्रह्मवैवर्तात् चतुर्थेपित्रेधा पूर्वेद्युर्निशीथेष्टमीपरेन्हिरोहिणीपरेन्ह्यष्टमी पूर्वेन्हिरोहिणी उभयेद्युरुभयस्यनिशीथासंबंधोवेति आद्येपरेद्युर्जयंतीयोगस्यसत्वात् परेवेतिमाधवः तदुक्तंतेनेव यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीतदा अंतर्भूताजयंत्यांस्यात्ऋक्षयोगप्रशस्तितइति पूर्वविद्धाष्टमीयातुउदयेनवमीदिने मुहूर्तमपिसंयुक्तासंपूर्णासाष्टमीभवेत् कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः नवम्यांसैवग्राह्यास्यात्सप्तमीसंयुतानहीतिपाद्मोक्तेश्च हेमाद्रिस्त्वाह अष्टम्याःप्राधान्यात्तस्याश्च

पूर्वेद्युः कर्मकालव्यापित्वात्पूर्वैव पाद्मंतुपूर्वेन्हि निशीथेष्टम्यभावेज्ञेयं अंतर्भावोक्तिस्तुमूर्खवंचनमात्रमिति अन्येतुपूर्वविद्धाष्टमी वाक्येनजन्माष्टम्यांसूर्योदयेसप्तमीवेधनिषेधात् कलाघटीमात्राप्यौदयिकीग्राह्या कार्याविद्धापिसप्तम्येतिजयंतीपरं जयंत्यांपूर्वविद्धायासुपवासंसमाचरेदित्येकवाक्यत्वात् तत्रापिद्वयोर्नित्यत्वात्कालभेदाच्चोपवासद्वयंभवत्येव यदातुकेवलाष्टमीशुद्धाधिका तदास्याग्रहेतोः सप्तमीवेधस्याभावात्पूर्वैव यदिवाविद्धन्यूनातदापरदिनेग्राह्यातिथेरभावात्पूर्वैव एवंसर्वाण्यौदयिकावाक्यानिसप्तमीवेधपराणि येतु जन्माष्टमींपूर्वविद्धांसऋक्षांसकलामपि विहायनवमींशुद्धांसुपोष्यव्रतमाचरेदिति व्यासोक्तेर्विद्धायाः क्षयेशुद्धनवम्यासुपवासः दशमीवेधेद्वादश्युपवासवदित्याहुः तेनिर्मूलत्वादुपेक्ष्याः मुहूर्तमपिसंयुतेतिरोहिणीयोगेत्याज्यत्वोक्तेः तिथ्यंतपारणवाक्यानानिर्विषयत्वापत्तेः नचजयंतीपराणिशुद्धाधिकापराणिवा तानि भृग्वाद्यैः पूर्वविद्धाष्टम्यामपितिथ्यंतेपारणोक्तेः तेनकलाकाष्ठेतिवाक्यांतरवशाज्जयंतीपरमेतत् तत्वंतुअष्टम्याः कर्मकालव्याप्तेः दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीत विशेषेणेंदुसंयुतामिति पूर्वोक्तवाक्यैः रोहिणीयोगाभावेग्राह्यत्वोक्तेर्वचनात् कर्मकालव्यापिनींत्यक्त्वापूर्वापरावात्सापिरोहिणीयुताग्राह्या माधवमदनरत्ननिर्णयामृतानंतभट्टगौडमैथिलग्रंथादिष्वप्येवमिति युक्तंतुउपवासद्वयंकार्यंद्वयोर्नित्यत्वादितितुवयं अत्ययोः परैव सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम प्राजापत्यंद्वितीयेन्हिमुहूर्तार्द्धंभवेद्यदि तदाष्टयामिकंपुण्यंप्रोक्तंव्यासादिभिः पुरेतिस्कादात् मुहूर्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत् किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेतिपाद्माच्चेतिदिक् निंबादित्योपासकास्तुजन्माष्टमीरामनवमीशिवरात्र्यादौपूर्वेन्हि कर्मकालीनातिथिंत्यक्त्वा द्वित्रिमुहूर्तापरैवतिथिर्ग्राह्या उदयव्यापिनीग्राह्याकुलतिथिरुपोषणे

निंबार्कोभगवान्येषांवांछितार्थफलप्रदइति हेमाद्रौमात्स्योक्तभुक्तिसप्तमीव्रतेभविष्योक्तेरित्याहुः तन्न यदिद्वितीयेदिवसेतुऋक्षतिथ्योर्युतिःस्यात्नतदोपवासः पूर्वेप्रकुर्याद्दिवसेद्वितीयेदिनेशभक्तोथतदाव्रताद्यमितिमात्स्यवाक्येनतत्रैवउपसंहारात्सर्वार्थत्वेनमानाभावात् ऋक्षतिथ्योर्हस्तसप्तम्योः अन्यथाऋषिपंचम्यादौतदापत्तिः शिष्टाचारान्नेतिचेत् नतस्यन्यायवचोविरोधेनहेयत्वात् इदानीं-क्वापिनिंबार्कोपासनाभावाच्चेतिसंक्षेपः पारणंतु तिथिरष्टगुणंहंतिनक्षत्रंचचतुर्गुणं तस्मात्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमिति ब्रह्मवैवर्तात् तिथ्यृक्षयोर्यदाछेदोनक्षत्रांतमथापिवा अर्धरात्रेथवाकुर्यात्पारणंत्वपरेहनीति हेमाद्रौवचनाच्चार्धरात्रेप्युभयांतेन्यतरांतेवेतिमुख्यःपक्षः सर्वेष्वेवोपवासेषुदिवापारणमिष्यतइतिब्रह्मवैवर्तंत्वन्यविषयं दिनेमुख्यकाललाभेन्यतरांतेवाज्ञेयं गौडास्तु नरात्रौपारणंकुर्यादृतेवैरोहिणीव्रतात् तत्रनिश्यपितत्कुर्याद्वर्जयित्वामहानिशामिति ब्रह्मांडपुराणाद्रात्रौ सार्धप्रहरमध्येकार्यमित्याहुः महानिशातुविज्ञेयामध्यमंमध्ययामयोः तथा मध्यमप्रहरमात्रेविज्ञेयातुमहानिशेतिस्मृत्यंतरात् कल्पतरौमदनरत्नेचैवं कामधेनौगर्गस्तु महानिशातुविज्ञेयामध्यमंप्रहरद्वयमित्याह वृद्धशातातपस्तु महानिशाद्वेघटिकेरात्रौमध्यमयामयोरित्याह वेदपाठपरमेतदित्यन्ये महानिशायामन्यतरांतेतृतीयदिनेपारणं अपरेहनीतिपारणोत्तरदिनपरत्वात् उभयांतापेक्षणादित्याहुः तत्त्वंतुमहानिशांतेवाऽन्यतरांतलाभेमहानिशानिषेधः महानिशायामेवलाभेतत्रैवपारणमिति दिवोदासस्तु रजनीप्रहरंयावत्प्रवृत्तिःकर्मणोमता पारणंतावदेवेष्टंप्रसादान्नभवेद्यदीति स्कांदादूर्ध्वंनिषेधमाह तन्निर्मूलं अशक्तौतुवह्निपुराणे भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणमिति गारुडेविष्णुधर्मेच जयंत्यांपूर्वविद्धायामुपवासंसमाचरेत् तिथ्यंतेचोत्सवांतेवाव्रतीकुर्वीतपारणं अशक्तौतु तिथ्यंतेति

थिभांतेवा पारणंयत्रचोदितं यामद्वयोर्ध्वगामिन्यांप्रातरेवहिपारणा सएवोत्सवांतइति कालादर्शोक्तेश्चेतिसंक्षेपः अष्टम्यांविशेषोहेमाद्रोभविष्ये ततोष्टम्यांतिलैःस्नातोनद्यादौविमलेजले सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहं तन्मध्येप्रतिमास्थाप्यासाचाप्यष्टविधास्मृता कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा वार्क्षीमणीमयीचैववर्णकैर्लिखितायथवा सर्वलक्षणसंपूर्णापर्यंकेचपटावृते देवकींतत्रचैकस्मिन्प्रदेशेसूतिकागृहे प्रसुतांचप्रसूतांचस्थापयेन्मंचकोपरि मांतत्रबालकंसुप्तपर्यंकेस्तनपायिनं यशोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे तद्वच्चकल्पयेत्पार्थप्रसूतवरकंन्यकां कश्यपोवसुदेवोयमदितिश्चैवदेवकी शेषोवैबलभद्रोयंयशोदाक्षितिरब्वभूत् नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः गोधेनुःकुंजरश्चैवदानवाःशस्त्रपाणयः लेखनीयाश्चतत्रैवकालियोयमुनाह्रदे इत्येवमादियत्किंचित्सूच्यतेचरितंमम लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्परः मंत्रेणानेनकौंतेयदेवकींपूजयेन्नरः गायाद्भिःकिन्नराद्यैःसततपरिवृतावेणुवीणानिनादैः शृंगारादर्शकुंभप्रवरकृतकरैःकिंकरैःसेव्यमाना पर्यंकेस्वास्तृतेयामुदिततरमुखीपुत्रिणीसम्यगास्ते सादेवीदेवमाताजयतिसुतनयादेवकीकांतरूपा पादौसंवाहयंतीश्रीर्देवक्याश्चरणांतिके निषण्णापंकजेपूज्यानमोदेव्यैश्रियेइति अर्धरात्रेवसोर्धारांपातयेद्गुडसर्पिषा नाडीवर्धापनंषष्ठीनामादेःकरणंमम ततोमंत्रेणवैदद्याच्चंद्रायार्घ्यंसमाहितः शंखेतोयंसमादायसपुष्पकुशचंदनं जानुभ्यांधरणींगत्वाचंद्रायार्घ्यंनिवेदयेत् क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव गृहाणार्घ्यंशशांकेदंरोहिण्यासहितोमम ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यतां यथापुत्रंहरिंलब्ध्वामासातेनिर्वृतिःपरा तामेवनिर्वृतिंदेहिसुपुत्रंदर्शयस्वमे इतिदेवक्यर्घः ततःपुष्पांजलिंदत्वायामेयामेप्रपूजयेत् प्रभातेब्राह्मणान्शक्त्याभोजयेद्भक्तिमान्नरः ओंन

मोवासुदेवायगोब्राह्मणहितायच शांतिरस्तुशिवंचास्तु इत्युक्त्वामांविसर्जयेत् इदंप्रतिमासकृष्णाष्टम्यासमुक्तंमदनरत्नेवह्निपुराणे प्रतिमासंचतेपूजामष्टम्यांयःकरिष्यति ममचैवाखिलान्कामान्संसंप्राप्स्यत्यसंशयं तथा अनेनविधिनायस्तुप्रतिमासंनरेश्वर करोतिवत्सरंपूर्णंयावदागमनंहरेः दद्याच्छयांकृसंपूर्णांगोभीरत्नैरलंकृतां इतिजन्माष्टमीव्रतं भाद्रामावास्यायांकुशग्रहणमुक्तंहेमाद्रोहारीतेन मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः नभाःश्रावणःतेनदर्शांतमासेजन्माष्टम्यानंतरंदर्शोलभ्यते मदनरत्नेतु मासेनभस्येमावास्यातस्यांदर्भोच्चयोमतइतिमरीचिवाक्यमुक्तं नभस्योभाद्रपदः तेनमहालयांतर्गतदर्शोलभ्यते अत्रगौणमुख्यचांद्राभ्यामेकएवदर्शइत्यन्ये भाद्रपदशुक्लतृतीयायांहरितालिकाव्रतं तत्रपराग्राह्या मुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरे शुद्धाधिकायामप्येवंगणयोगप्रशंसनादिति माधवोक्तेः चतुर्थीयुक्तायांफलाधिक्यंमाधवीये आपस्तंबः चतुर्थीसहितायातुसातृतीयाफलप्रदा अवैधव्यकरास्त्रीणांपुत्रपौत्रप्रवर्धिनी द्वितीयायोगेप्रत्यवायमाहसएव द्वितीयाशेषसंयुक्तायांयाकरोतिविमोहिता सावैधव्यमवाप्नोतिप्रवदंतिमनीषिणइति आद्यामधुश्रावणिकाकज्जलीहरितालिका चतुर्थीमिश्रितास्त्रीभिर्दिवानक्तेविधीयते तृतीयानभसःशुक्लामधुश्रावणिकास्मृता भाद्रस्यकज्जलीकृष्णाशुक्लाचहरितालिकेति दिवोदासोदाहृतवचनाच्च भाद्रशुक्लचतुर्थीवरदचतुर्थी सामध्यान्हव्यापिनीग्राह्या प्रातःशुक्लतिलैःस्नात्वामध्यान्हेपूजयेन्नृपेति हेमाद्रोभविष्ये नैवेद्यपूजोक्तेः मदनरत्नेप्येवं परदिनेएवांशेनसाकल्येनवामध्यान्हव्याप्त्यभावेसर्वपक्षेषुपूर्वाग्राह्या तथाचबृहस्पतिः चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्यान्हव्यापिनीचेत्स्यात्परतश्चेत्परेहनीति मातृविद्धाप्रशस्तास्याच्चतुर्थीगणनायके स

ध्यान्हेपरतश्चेत्स्यान्नागविद्धाप्रशस्यतइतिमाधवीयेस्मृत्यंतराच्च तत्रगणेशरूपंस्कांदे एकदंतंशूर्पकर्णंनागयज्ञोपवीतिनं पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकमिति इयंरविभौमयोरतिप्रशस्ता भाद्रशुक्लचतुर्थ्यांभौमेनार्केणवायुता महतीसात्रविघ्नेशमर्चित्वेष्टलभेन्नरइति निर्णयामृतेवाराहोक्तेः अत्रचंद्रदर्शनंनिषिद्धं तथाचापरार्केमार्कंडेयः सिंहादित्येशुक्लपक्षेचतुर्थ्यांचंद्रदर्शनं मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंसदेति चतुर्थ्यांनपश्येदित्यन्वयः प्रधानक्रियान्वयलाभात् तेनचतुर्थ्यामुदितस्यपंचम्यांननिषेधः गौडाअप्येवमाहुः पराशरोपि कन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनं मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंसदा तद्दोषशांतयेसिंहः प्रसेनमितिवैपठेदिति श्लोकस्तुविष्णुपुराणे सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषःस्यमंतकइति भाद्रपदशुक्लपंचमीऋषिपंचमी सामध्यान्हव्यापिनीग्राह्या पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिरिति माधवीयेहारीतोक्तेः दिनद्वयेतत्वेहेमाद्रिमतेपरा सितापरयुतास्यात्पंचमीतिदीपिकोक्तेः माधवमतेपूर्वा सर्वत्रपंचमीपूर्वेत्युक्तेः युग्मवाक्यान्निर्णयस्तूक्तः ऋषिपंचमीषष्ठीयुतैवेतिदिवोदासः अत्रऋषीन्प्रतिमासुपूजयित्वाऽकृष्टभूमिजशाकेनवर्तनं एवंसप्तवर्षाणिकृत्वासप्तकुंभेषुप्रतिमासुसंपूज्य परेऽह्नितत्तन्मंत्रेणाष्टोत्तरशतंतिलान्हुत्वासप्तब्राह्मणान्भोजयेदितिनिर्णयामृते भाद्रशुक्लषष्ठीसूर्यषष्ठीसासप्तमीयुतैवेतिदिवोदासः शुक्लेभाद्रपदेषष्ठ्यांस्नानंभास्करपूजनं प्राशनंपंचगव्यस्यअश्वमेधफलाधिकमितिवचनात् कल्पतरौभविष्ये यस्य भाद्रपदेमासिषष्ठीस्याद्भरतर्षभ योऽस्यांपश्यतिगांगेयंदक्षिणापथवासिनं ब्रह्महत्यादिपापैस्तुमुच्यतेनात्रसंशयः गांगेयः स्वामिकार्तिकेयः भाद्रपदशुक्लसप्तम्याममुक्ताभरणव्रतं तत्रसप्तमीपूर्वायुताग्राह्या षण्मुन्योरितियुग्मवाक्यात् भाद्रपदशुक्लाष्टमीदूर्वाष्टमी

सापूर्वाग्राह्या श्रावणीदुर्गानवमीदूर्वाचैवहुताशनी पूर्वविद्धातुकर्तव्याशिवरात्रिर्बलेर्दिनमितिहेमाद्रौबृहद्यमोक्तेः शुक्लाष्टमीतिथिर्यातु मासिभाद्रपदेभवेत् दूर्वाष्टमीतुसाज्ञेयानोत्तरासाविधीयतइति पुराणसमुच्चयाच्च यत्तु मुहूर्तेरौहिणेष्टम्यांपूर्वावायदिवापरा दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेदिति तत्रैवपराकार्येत्युक्तं तत्पूर्वदिनेज्येष्ठादियोगेद्रष्टव्यं दूर्वाष्टमीसदात्याज्याज्येष्ठामूलर्क्षसंयुता तथा ऐंद्रर्क्षेपूजितादूर्वाहंत्यपत्यानिनान्यथा भर्तुरायुर्हरामूलेतस्मात्तांपरिवर्जयेदिति तत्रैवतन्निषेधात् इदमगस्त्योदयेकन्यार्केचन कार्यं शुक्लेभाद्रपदेमासिदूर्वासंज्ञातथाष्टमी सिंहार्कएव कर्तव्यानकन्यार्केकदाचन सिंहस्थेसोत्तमासूर्येत्वुदितेमुनिसत्तमइति मदनरत्नेस्कांदोक्तेः अगस्त्येउदितेतातपूजयेदमृतोद्भवं वैधव्यंपुत्रशोकंचदद्याद्वर्षाणिपंचचेति तत्रैवदोषोक्तेश्च भाद्रपदशुक्लाष्टम्यामगस्त्योदयेभाविनिसतिपूर्वसप्तम्यामेवकुर्यादितिहेमाद्रिः दीपिकाप्येवं इदंचव्रतंस्त्रीणांनित्यं यानपूजयतेदूर्वांमोहादिहयथाविधि त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः तस्मात्संपूजनीयासाप्रतिवर्षंवधूजनैरिति पुराणसमुच्चयात् यदाज्येष्ठादिकंविनाष्टमीनलभ्यतेतदातत्रैवोक्तं कर्तव्याचैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्चयेद्भक्त्यानवम्यांदिवसंनयेदिति अत्रविधिर्मदनरत्ने भविष्ये शचीदेशेप्रजातायांदूर्वायांब्राह्मणोत्तम स्थाप्यलिंगंततोगंधैःपुष्पधूपैःसमर्चयेत् दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंदद्यात्त्रिलोचने दूर्वाशमीभ्यांविधिवत्पूजयेच्छ्रद्धयान्वितः मंत्रस्तु त्वंदूर्वेऽमृतजन्मासिवंदितासिसुरासुरैः सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव यथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले तथाममापिसंतानंदेहित्वमजरामरमिति अत्रानग्निपक्वंभक्षयेत् अनग्निपक्वमश्नीयादन्नंदधिफलंतथा अक्षारलवणंब्रह्मन्भोज्यान्मधुनान्वितमितितत्रैवभविष्योक्तेः भाद्रपदेपिमासेऽतीतनिर्णयदीपेस्कांदे

अधिमासेतुसंप्राप्तेनभस्यउद्येमुने: अर्वाग्दूर्वाव्रतंकार्यंपरतोनैवकुत्रचित्‌ अत्रैवज्येष्ठापूजोक्तामाधवीयेस्कांदे मासिभाद्रपदेशुक्लपक्षेज्ये
ष्ठर्क्षसंयुता रात्रिर्यस्मिन्दिनेकुर्याज्ज्येष्ठायाः परिपूजनमिति इयंज्येष्ठायोगवशेनपूर्वापरावाग्राह्या दिनद्वययोगेपरा पूर्वेह्निरात्रियोगेपूर्वे
व नवम्यासहकार्यास्यादष्टमीनात्रसंशयः मासिभाद्रपदेशुक्लपक्षेज्येष्ठर्क्षसंयुता रात्रिर्यस्मिन्दिनेकुर्याज्ज्येष्ठायाः परिपूजनमिति त
त्रैवोक्तेः अस्यापवादः यस्मिन्दिनेभवेज्ज्येष्ठामध्यान्हादूर्ध्वमप्यणुः तस्मिन्हविष्यपूजाचन्यूनाचेत्पूर्ववासरेइति इदंकेवलतिथ्योन
क्षत्रेचोक्तं तत्राद्यंकेवलतिथौकार्यं अंत्यंकेवलर्क्षे तदुक्तंमात्स्ये प्रत्याब्दिकंतिथावुक्तंयज्ज्येष्ठादेवतंव्रतं प्रतिज्येष्ठाव्रतंयच्चविहितं
केवलोडुनि तिथावेवान्त्येदाद्यंद्वितीयंकेवलर्क्षतइति अतएवमदनरत्नेभविष्ये नक्षत्रमात्रेउक्तं मासिभाद्रपदेपक्षेशुक्लेज्येष्ठायदाभवेत्‌
रात्रौजागरणंकृत्वाएभिर्मंत्रैश्चपूजयेदिति दाक्षिणात्यास्त्वृक्षएवकुर्वंति हेमाद्रौस्कांदेपि मासिभाद्रपदेशुक्लपक्षेज्येष्ठर्क्षसंयुते य
स्मिन्कस्मिन्दिनेकुर्याज्ज्येष्ठायाः परिपूजनमिति तथा मैत्रेणावाहयेद्देवींज्येष्ठायांतुप्रपूजयेत्‌ मूलेविसर्जयेद्देवींत्रिदिनंव्रतमुत्तममि
ति मंत्रस्तु एह्येहित्वंमहाभागेसुरासुरनमस्कृते ज्येष्ठेत्वंसर्वदेवानांमत्समीपगताभवेत्यावाह्य तामग्निवर्णामितिसंपूज्यज्येष्ठायै
तेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः शर्वायैतेनमस्तुभ्यंशांकर्यैतेनमोनमः ज्येष्ठेश्रेष्ठेतपोनिष्ठेब्रह्मिष्ठेसत्यवादिनि एह्येहित्वंमहाभागेअ-
र्घ्यंगृह्णसरस्वति इत्यर्घः भाद्रपदशुक्लद्वादश्यांश्रवणयोगरहितायांपारणंकुर्यात्‌ आभाकासितपक्षेष्वितिदिवोदासोदाहृतवच-
नात्‌ उपोष्यैकादशींमोहात्‌ पारणंश्रवणेयदि करोतिहंतितत्पुण्यंद्वादशद्वादशीभवमिति तत्रैवस्कांदाच्च अस्यतत्रैवप्रतिप्रसवः २७
मार्कंडेयः विशेषेणमहीपालश्रवणंवर्धतेयदि तिथिक्षयेनभोक्तव्यंद्वादशींलंघयेन्नहीति केचित्तु यदाल्पपरिहार्योयोगस्तदाश्रव

णनक्षत्रेत्रेधाविभक्तेमध्यमविंशतिघटिकायोगंत्यक्त्वापारणंकार्यं तदुक्तंविष्णुधर्मे श्रुतेश्चमध्येपरिवर्तमेतिसुप्तिप्रबोधपरिवर्तनमेववर्ज्यमिति केचित्तुचतुर्धाविभज्यमध्यपादद्वयंवर्ज्यमाहुः अत्रमूलंचिंत्यं अत्रैवविष्णुपरिवर्तनोत्सवंकुर्यात् संध्यायांविष्णुंसंपूज्यप्रार्थयेत् मंत्रस्तुतिथितत्त्वेउक्तः ॐ वासुदेवजगन्नाथप्राप्तेयंद्वादशीतव पार्श्वेनपरिवर्तस्वसुखंस्वपिहिमाधवेति अत्रैवशक्रध्वजोत्थापनमुक्तमपरार्केगार्ग्येण द्वादश्यांतुसितेपक्षेमासिप्रोष्ठपदेतथा शक्रमुत्थापयेद्राजाविश्वश्रवणवासवे इयमेवश्रवणद्वादशी तत्रैकादश्यांद्वादशीश्रवणयोगेसैवोपोष्या एकादशीद्वादशीचवैष्णव्यमपितत्रचेत् तद्विष्णुशृंखलंनामविष्णुसायुज्यकृद्भवेदिति विष्णुधर्मोक्तेः नारदीयेपि संस्पृश्यैकादशींराजन्द्वादशींयदिसंस्पृशेत् श्रवणंज्योतिषांश्रेष्ठंब्रह्महत्यांव्यपोहति द्वादशीश्रवणस्पृक्स्यात्स्पृशेदेकादशीयदि सएववैष्णवोयोगोविष्णुशृंखलसंज्ञितः इतिहेमाद्रौमात्स्योक्तेश्च दिनद्वयेद्वादशीश्रवणयोगेपिपूर्वा निर्णयामृतेतस्यपूर्वार्धमन्यथापठितं द्वादशीश्रवणर्क्षंचस्पृशेदेकादशींयदीति तेनहेमाद्रिमतेएकादश्याः श्रवणयोगाभावेपितद्युक्तद्वादशीयोगमात्रेणविष्णुशृंखलंभवति निर्णयामृतमतेतु श्रवणस्यैकादशीद्वादशीभ्यांयोगएवविष्णुशृंखलं नान्यथेति यदानिशीथानंतरंसूर्योदयावधिद्विकलामात्रमपिश्रवणर्क्षंभवति तदापिपूर्वैव तदुक्तंतत्रैवनारदीये इमांप्रकृत्य तिथिनक्षत्रयोर्योगोयोगश्चैवनराधिप द्विकलोयदिलभ्येतसज्ञेयोह्यष्टयामिकइति द्वादशीश्रवणस्पृष्टाकृत्स्नापुण्यतमातिथिः नतुसातेनसंयुक्तातावत्येवप्रशस्यतइति मदनरत्नेमात्स्याच्च दिवोदासीयेतु रात्रेःप्रथमपादेचेच्छ्रवणंहरिवासरे तदापूर्वामुपवसेत्प्रातःप्राप्तेचपारणमित्युक्तं इदंतुनिर्मूलत्वात्पूर्वविरोधाच्चोपेक्ष्यं इयंबुधवारेतिप्रशस्ता बुधश्रवणसंयुक्तासैवचेद्द्वादशीभवेत् अत्यंतमहतीसास्याद्दत्तंभवतिचा-

स्पर्यामिति हेमाद्रौ स्कांदात् यानि तु पठंति उत्तराषाढसंयुक्ता श्रोणा मध्याह्नगापि वा आसुरी सेव तारास्यां संतिपुर्यं पुराकृतं उदयव्यापिनी ग्राह्या श्रोणा द्वादशिका शुभा विष्णुऋक्षसंयुता सा च नैवोपोष्या शुभेप्सुभिरित्यादीनि विष्णुधर्मस्कांदभविष्यादीनि वचनानि तानि निर्मूलानि यदपि स्मृत्यर्थसारे उदयव्यापिनी ग्राह्येत्युक्तं यच्च बृहन्नारदीये उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रत इति तद्यदा शुद्धाधिका द्वादशी परदिन एवोदये श्रवणयोगः पूर्वाह्ने च तद्दिने कालयोगस्तत्परं दिनद्वये उदययोगे पूर्वैव बहुकर्मकालव्याप्तेरित्युक्तं मदनरत्ने यत्तु एकादश्येव श्रवणयुता न द्वादशी तदापि पूर्वैव यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् एकादशी तदोपोष्या पापघ्नी श्रवणान्वितेति मदनरत्ने नारदीयोक्तेः यदा परैव ऋक्षयुता तदा परा तत्र शक्तेनोपवासद्वयं कार्यं एकादशीमुपोष्यैव द्वादशीमुपोषयेत् न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति भविष्योक्तेः यत्तु विष्णुधर्मे पारणान्ते व्रतं ज्ञेयं व्रतान्ते विप्रभोजनं असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतान्तरमिति तद्दैतद्भिन्नपरं अत एव गौडाः शृणु राजन् परं काम्यं श्रवणद्वादशीव्रतमिति स्थूलशीर्षवचनात् काम्यमेवेदं तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यन्ते द्वादश्यामुपवासेन शक्रह्वात्मान्नृपसर्वशः चक्रवर्तित्वमतुलं संप्राप्नोत्युत्तमां श्रियमिति गौडनिबंधे मार्कंडेयोक्तेश्च दाक्षिणात्यास्तु एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात् व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयमिति वराहवामनपुराणोक्तेः श्रवणद्वादशीव्रतमेवेत्याहुः भुक्त्वेति फलाद्याहारपरं नत्वन्नपरं अन्नाश्रितानि पापानीति निषेधात् उपवासद्वयं कर्तुं न शक्नोति नरो यदि प्रथमेऽह्नि फलाहारी निराहारः परेऽहनीति दिवोदासीये भविष्योक्तेश्च अशक्तोऽनुगृहीतैकादशीव्रतो यस्तमत्युक्तं मात्स्ये द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिमिति पूजयेन्न तूपवसेदित्यर्थः

अगृहीतैकादशीव्रतश्चेदेकादश्यांभुक्त्वाद्वादश्यामुपवसेत् एवमेकादशींभुक्त्वाद्वादशींसमुपोषयेत् पूर्ववासरजंपुण्यंसर्वंप्राप्नोत्यसंशयमिति नारदीयोक्तेः पारणंतूभयांतेन्यतरांतेवाकुर्यात् तिथिनक्षत्रनियमेतिथिभांतेचपारणमिति स्कांदात् तिथिनक्षत्रसंयोगेउपवासोयदाभवेत् पारणंतुनकर्तव्यंयावन्नैकस्यसंक्षयइति नारदीयादितिहेमाद्रिः यद्यप्यत्रनक्षत्रमात्रांतेपिपारणंप्रतिभाति तथापितिथिमात्रांतेज्ञेयं नत्वृक्षांते तिथिमध्येपि याःकाश्चित्तिथयःप्रोक्ताःपुण्यानक्षत्रयोगतः ऋक्षांतेपारणंकुर्याद्विनाश्रवणरोहिणीमिति विष्णुधर्मे श्रवणांतमात्रेपारणनिषेधात् रोहिण्यांतु भांतेकुर्यात्तिथेर्वापिइतिवह्निपुराणात् तदंतेप्यस्तुनत्वन्येवमस्तीति नक्षत्रांतोनुकल्पइतिमदनरत्ने असंभवेतुतिथ्यंतेतिथिभांतेवापारणंयत्रचोदितं यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणेतिज्ञेयं यत्तु मदनरत्ने द्वादशीवृद्धौश्रवणवृद्धौवाश्रवणांतएवपारणंकुर्यात् पारणांतिथिवृद्धौतुद्वादश्यास्तुसंक्षयात् वृद्धौकुर्यात्त्रयोदश्यांतत्रदोषोनविद्यतइति वह्निपुराणादित्युक्तं तत्प्रकरणादेतस्यामेवश्रवणयुक्तैकादश्यांविहितंविजयैकादशीव्रतपरंनतुश्रवणद्वादशीपरमिति मदनरत्ने गौडास्तुश्रवणद्वादशीपरमाहुः अत्रविधिमदनरत्नेविष्णुधर्मे तस्मिन्नृक्षेतथास्नानंयत्रक्वचनसंगमे तथा दध्योदनयुतंतस्याजलपूर्णंघटंद्विजे वस्त्रसंवेष्टितंदत्वाछत्रोपानहमेवच नदुर्गतिमवाप्नोतिगतिमग्र्यांचविंदति मंत्रस्तुभविष्ये घटेजनार्दनपूजामभिधाय नमोनमस्तेगोविंदबुधश्रवणसंज्ञक अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव प्रीयतांदेवदेवेशोममसंशयनाशनः वामनावतारनिमित्तोपवासस्तुव्रतहेमाद्रौभविष्ये द्वादश्यास्तुविधिःप्रोक्तःश्रवणेनयुधिष्ठिर सर्वपापप्रशमनःसर्वसौख्यप्रदायकः एकादशीयदासास्याच्छ्रवणेनसमन्विता विजयासातिथिःप्रोक्ताभक्तानांविजयप्रदेत्युपक्रम्य अथकालेबहुतिथेगतेसागुर्विणीप्र

वेत् कश्यपेननवमेमासिपुत्रंसावामनंहरिमित्युक्त्वा एतत्सर्वंसमभवदेकादश्यांयुधिष्ठिर तेनेष्टादेवदेवस्यसर्वथाविजयातिथिः एषा तुष्टिःसमाख्याताएकादश्यामयातव पूर्वमेवसमाख्याताद्वादशीश्रवणान्वितेत्युपसंहारादेकादश्यामेव तुष्टिःफलं भागवतेष्टमस्कंधेतु द्वादश्यांवामनोत्पत्तिरुक्ता श्रोणायांश्रवणद्वादश्यांमुहूर्तेभिजितिप्रभुः ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणं द्वादश्यांसवितातिष्ठन्मध्यंदिनगतोनृप विजयानामसाप्रोक्तायस्यांजन्मविदुर्हरेः श्रोणायांचंद्रे अभिजिच्छ्रवणप्रथमांशः गौडाअप्येवं पत्रकल्पभेदाद्व्यवस्था तद्विधिश्चहेमाद्रौवन्हिपुराणे नदीनांसंगमेस्नायादर्चयेदत्रवामनं सौवर्णवस्त्रसंयुक्तंद्वादशांगुलमुच्छ्रितं ततोविधिवत्संपूज्य हिरण्मयेनपात्रेणदद्यादर्घ्यंप्रयत्नतः नमस्तेपद्मनाभायनमस्तेजलशायिने तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे नमःकमलकिंजल्कपीतनिर्मलवाससे महाहवरिपुस्कंधधृतस्कंधायचक्रिणे नमःशार्ङ्गसीरबाणपाणयेवामनायच यज्ञभुक्फलदात्रेचवामनायनमोनमः देवेश्वरायदेवायदेवसंभूतिकारिणे प्रभवेसर्वदेवानांवामनायनमोनमः एवंसंपूजयित्वातंद्वादश्यामुदयेरवेः शृंगारसहितंतंतुब्राह्मणायनिवेदयेत् वामनःप्रतिगृह्णातिवामनोहंददामिते वामनंसर्वतोभद्रंद्विजायप्रतिपादये इतिअनंतभट्टोप्याह श्रवणद्वादश्यांजनार्दननामाविष्णुःपूज्यते श्रवणैकादश्यांवामनावतारइति श्रवणयुतशुक्लैकादश्यलाभेतुदशमीविद्धापि श्रवणयुताकार्या दशम्येकादशीयत्रसानोपोष्याभवेत्तिथिः श्रवणेनतुसंयुक्तासाचेत्स्यासर्वकामदेति वन्हिपुराणादित्युक्तंमदनरत्ने पूजाचमध्यान्हेकार्या अन्होमध्येवामनोरामरामाविति पूर्वोक्तवचनात् अत्रैवदुग्धव्रतंसंकल्पयेत् तदुक्तं दुग्धमाश्वयुजेमासीति अत्रेदंचिंत्यते दुग्धव्रतेपायसादिवर्ज्यंनवेति नेतिकेचित् नहिप्रकृतिवर्जनेविकारवर्जनंयुक्तं दधिघृतादीनामपिवर्जनापत्तेः नचयत्रप्रकृतिर

सोपलंभस्तद्वर्जनमिति वाच्यम् मांसविकारस्यौष्ट्रदध्यादेश्चावर्जनापत्तेः तस्माद्दध्यादिवत् पायसादि भक्ष्यमिति अत्र ब्रूमः यत्र विकारे प्रकृतिरसोपलंभस्तत्प्रत्यभिज्ञा वा तत्र विकारस्यापि निषेधः अस्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वानपायात् यत्तु औष्ट्रदध्यादेरनिषेधापत्तिरिति तन्न औष्ट्रमिति विकारतद्धितेन निषेधात् तथा च विज्ञानेश्वरः औष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकमित्यत्र औष्ट्रमिति विकारतद्धिताच्छकृन्मूत्रादीनामपि निषेध इत्याह नन्वेवं संधिन्यनिर्दशावत्सागोपयः परिवर्जयेदिति संधिन्यादिक्षीरनिषेधेपदध्यादिग्रहणं स्यात् सत्यं प्राप्ते वचनेन परं निषेधः तदाहापरार्के शंखः क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः सप्तरात्रं व्रतं कुर्यात् प्रयत्नेन समाहित इति व्रतं गोमूत्रयावकं तस्मात्पायसे दुग्धरसोपलंभाद्वर्जनं अत एव भिक्षायां दधिसत्त्वेपि माधुर्योपलंभात् पयोरूपत्वमुक्तं मीमांसकैः तदुक्तं पय एव घनीभूतमामिक्षेत्यभिधीयत इति दध्यादिषु तु तदभावादवर्जनमिति एवं दध्यादिव्रते तैलतक्रादीनां निषेधः उक्तोभयहेत्वभावादिति केचित् पूर्वोक्तशंखवचनात्सर्वविकारनिषेध इति युक्तं प्रतीमः इति दुग्धव्रतं भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतं तत्र त्रिमुहूर्ताप्यौदयिकी ग्राह्येति माधवः तदुक्तं उदये त्रिमुहूर्तापि ग्राह्यानन्तव्रते तिथिरिति मध्याह्ने भोज्यवेलायामिति कथायां श्रवणादुपरि हि देवभ्यो धारयतीति वह्निधिकल्पनात् पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये वचनात् मध्याह्नव्यापिनी ग्राह्येति तु दिवोदासः प्रतापमार्तंडेप्येवं इदमेव च युक्तं निर्णयामृते तु घटिकामात्राप्यौदयिकीत्युक्तं तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम पौर्णमास्याः समायोगे व्रतं चानन्तकं चरेदिति भविष्योक्तेः मुहूर्तमपि चेद्भाद्रे पौर्णमास्यां चतुर्दशी संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति स्कांदाच्चेति अत्र मूलं चिंत्यं द्व्यहे औदयिकत्वे पूर्णत्वात् पूर्वेति युक्तं तत्त्वं तु विध्यर्थवादयोर्भिन्नार्थत्वे एकवाक्यतायोगात् संदिग्धे तु एकवा

कपालादिनिन्यायेनपूर्वापरावामध्यान्हव्यापिन्येवमुख्या माधवस्तुसामान्यवाक्यान्निर्णयंकुर्वन्भ्रांतएव अनंतव्रतस्यपुराणांतरेष्वभावान्निबंधांतरेष्वभावाच्च वचनंनिर्मूलमेवेति अथागस्त्यार्घ्यः तत्कालोत्रहेमाद्रौभविष्ये कन्यायामागतेसूर्येअर्वागेवेसप्तमेदिने कन्यायांसप्तमासेर्घ्यकालोनिवर्तते तेनउदयोत्तरसप्तसदिनमध्येइत्यर्थः यत्तारे आसप्तरात्रादुदयाद्यमस्यदातव्यमेतत्सकलंनरेण यावत्समाः सप्तदशाथवास्युस्तयोर्ध्वमप्यत्रवदंतिकेचित् एतस्यागस्त्यस्य उदयकालश्चदिवोदासीयेउक्तः उदेति याम्यांहरिसंक्रमाद्दिवेरेकाधिकेविंशतिमेस्त्वगस्त्यः ससप्तमेस्तंहयसंक्रमात्त्वमयातिगर्गादिभिरप्यमाणि अत्रविधिर्विष्णुरहस्ये काशपुष्पमयींरम्यांकृत्वामूर्तिंतुवारुणेः प्रदोषेविन्यसेत्तांतु पूर्णकुंभेस्वलंकृतां कुंभस्थांपूजयेत्तांतुपुष्पधूपविलेपनैः दध्यक्षतबलिंदद्याद्रात्रौकुर्यात्प्रजागरं पूजांचवक्ष्यमाणार्घ्यमंत्रेणकार्या प्रभातेतांसमादाययायात्तुपुण्यजलाशयं निशावसानेतांपश्यन्जलांतेप्रतिमांमुनेः अर्घ्यंदद्यादगस्त्यायभक्त्यासम्यक्सुपोषितः मानंतु अंगुष्ठमात्रपुरुषंतथैवसौवर्णमत्यायतबाहुदंडं पूर्वंकाशमयीत्वमशक्तौ चतुर्भुजंकुंभमुखेनिधायधान्यानिसप्तांकुरसंयुतानि सकाशपुष्पाक्षतशक्तियुक्तंमंत्रेणदद्याद्द्विजपुंगवाय धेनुंबहुक्षीरवतींचदद्यात्सवस्त्रघंटाभरणांद्विजाय भविष्ये विरूढैःसप्तधान्यैश्चवंशपात्रनिधापितैः सौवर्णरूप्यपात्रेणताम्रवंशमयेनवा मूर्ध्निस्थितेननम्रेणजानुभ्यांधरणींगतः विष्णुरहस्ये अगस्त्यःखनमानेतिपठन्मंत्रमिमंमुनेः अर्घ्यंदद्यादगस्त्यायशूद्रेमंत्रविधिस्त्वयं काशपुष्पप्रतीकाशवन्हिमारुतसंभव मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते विंध्यवृद्धिक्षयकरमेघतोयविषापह रत्नवल्लभ—देवेश लंकावासनमोस्तुते वातापीभक्षितोयेनसमुद्रःशोषितःपुरा लोपामुद्रापतिःश्रीमान्योसौतस्मैनमोनमः येनोदितेनपापानि

विलयंयांतिव्याधयः तस्मैनमोस्त्वगस्त्यायसशिष्यायचपुत्रिणे अगस्त्यःखनमानोनिति विप्रोर्घ्यंविनिवेदयेत् राजपुत्रिमहाभागेऋषिपत्नि
वरानने लोपामुद्रेनमस्तुभ्यमर्घ्यंमेप्रतिगृह्यतां दत्वैवमर्घ्यंकौरव्यप्रणिपत्यविसर्जयेत् अर्चितस्त्वंयथाशक्त्यानमोगस्त्यमहर्षये ऐ
हिकामुष्मिकींदत्वाकार्यसिद्धिंद्विजस्त्वमे विसर्जयित्वागस्त्यंतंविप्रायप्रतिपादयेत् अगस्त्योमेमनस्थोस्तु अगस्त्योस्मिन्घटेस्थि
तः अगस्त्योद्विजरूपेणप्रतिगृह्णातुसत्कृतः दानमंत्रः अगस्त्यःसप्तजन्मार्घनाशयत्वावयोरयं अतुलंविमलंसौख्यंप्रयच्छत्वं-
महामुने प्रतिग्रहमंत्रःविष्णुर्गृहस्य त्यजेदगस्त्यमुद्दिश्यधान्यमेकंफलंरसम् होमंकृत्वाततःपश्चाद्भुंजीयान्मानवःफलं होमश्चार्घ्य
मंत्रेणाज्येनभविष्ये दत्वार्घ्यंसप्तवर्षाणिक्रमेणानेनपांडव ब्राह्मणःस्याच्चतुर्वेदःक्षत्रियःपृथिवीपतिः वैश्येचधान्यनिष्पत्तिः
शूद्रश्चधनवान्भवेत् यावद्गायुस्त्वयःकुर्यात्सपरंब्रह्मगच्छति इत्यगस्त्यार्घ्यः भाद्रपौर्णमास्यांप्रपितामहाःपुराःस्त्रीनुद्दिश्यश्राद्धंका
र्यं तदुक्तंहेमाद्रौब्राह्ममार्कंडेययोः नांदीमुखानांप्रत्यब्दकन्याराशिगतेरवौ पौर्णमास्यांतुकर्तव्यंवराहवचनंयथेति नांदीमुखत्वंचा
क्तंब्राह्मे पितापितामहश्चैवतथैवप्रपितामहः त्रयोह्यश्रुमुखास्त्वेतेपितरःपरिकीर्तिताः तेभ्यःपूर्वतरायेचप्रजावंतःसुखैधिताः तेतु
नांदीमुखानांदीसमृद्धिरितिकथ्यते एतच्चप्रत्यब्दमित्युक्तेः पक्षश्राद्धपक्षेसकृन्महालयपक्षेचावश्यकमितिप्रयोगपारिजाते अ
त्र मातामहाअपिकार्याः पितरोयत्रपूज्यंतेतत्रमातामहाअपीतिधौम्योक्तेः पितृशब्दस्यचजनकपरत्वेबहुवचनविरोधेनपितृभ्रा
वापन्नपरत्वात् वार्षिकेतुवचनान्निवृत्तिः नचजीवत्पितृकस्यान्वष्टकायांमातृश्राद्धेतदापत्तिः इष्टापत्तेः अतएवमदुक्तंश्राद्धेभुक्त
मातृमातामहयोर्दद्यादिति मदनरत्नकालादर्शौ एतज्जीवत्पितृकश्राद्धेवक्ष्यामः केचित्तु अजहल्लक्षणयापित्रादयोयत्रतत्रमाता

महास्तेनात्रनेत्याहुः नचात्रनाम्नानांदीश्राद्धधर्मातिदेशः वैष्णवादिशब्दवद्देवतापरस्यकर्मनामत्वाभावात् नापिनांदीमुखत्वंपितृविशेषणं पारिभाषिकत्वादितिदिक् तथानिर्णयदीपेगार्ग्यः पौर्णमासीषुसर्वासुनिषिद्धंपिंडपातनं वर्जयित्वाप्रोष्ठपदींयथादशोक्तस्तथैवसेति इति भाद्रपदमासः कन्यासंक्रमेपराःषोडशघटिकाःपुण्याःशेषंप्राग्वत् अथमहालयः तत्रपृथिवीचंद्रोदयेवृद्धमनुः आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताःकांक्षंतिपितरःक्लिष्टाअन्नमप्यन्वहंजलं कन्यायोगेतुप्रशस्तत्वमाह शाट्यायनिः कन्यास्थार्कान्वितःपक्षःसोत्यंतंपुण्यमुच्यतइति अत्रविशेषमाहवृद्धमनुः मध्येवायदिवाप्यंतेयत्रकन्यांव्रजेद्रविः सपक्षःसकलःश्रेष्ठःश्राद्धेषोडशकंप्रति तथाब्रह्मांडमार्कंडेययोः कन्यागतेसवितरिदिनानिदशपंचच पार्वणेनेहविधिनाश्राद्धंतत्रविधीयते तथातत्रैवषोडशदिनान्युक्तानि कन्यागतेसवितरियान्यहानितुषोडश क्रतुभिस्तानितुल्यानिदेवोनारायणोब्रवीत् अत्रहेमाद्रिः षोडशत्वंत्रेधाव्याचख्यौ तिथिवृद्ध्यापक्षस्यषोडशदिनात्मकत्वंश्राद्धवृद्ध्यर्थमेकःपक्षः भाद्रपदपूर्णिमयासहेतिद्वितीयः आश्विनशुक्लप्रतिपदासहेतितृतीयः अंत्यएवतुयुक्तः अहःषोडशकंयत्तुशुक्लप्रतिपदासह चंद्रक्षयाविशेषेणसापिदर्शात्मिकास्मृतेतिदेवलोक्तेः तत्रपंचपक्षाः तदुक्तंहेमाद्रौब्राह्मे आश्वयुक्कृष्णपक्षेतुश्राद्धंकार्यंदिनेदिने त्रिभागहीनंपक्षंवात्रिभागंत्वर्धमेववा दिनेदिनेइतिपक्षपर्यंतत्वमुक्तं त्रिभागहीनमितिपंचम्यादिपक्षः त्रिभागमितिदशम्यादिपक्षः त्रिभागहीनमितिचतुर्दशीसहितप्रतिपदादिचतुष्टयवर्जनाभिप्रायेणेतिकल्पतरुः अत्रदिनपदंतिथिपरंवीप्सयातत्पक्षीयतिथित्वंश्राद्धव्याप्यतावच्छेदकम् तेनपंचदशतिथिष्वपिश्राद्धंसिद्ध्यति तेनचतुर्दशीनिषेधोऽन्यकृष्णपक्षपरइतिगौडाः तन्न श्राद्धंशस्त्रहतस्यैवचतुर्दश्यांमहालये इत्यादिविरोधात् यच्च कश्चित् पूरणप्रत्ययलोपेनतृतीयभागहीनंषष्ठ्यादिपक्षः तृतीयभागमेकादश्यादितदर्धंत्रयोदश्यादिउत्तरोत्तरंल

घुकालोक्तेरिति तन्न गौतमादिवचनेनमूलकल्पनालाघवात् पक्षमित्यन्वयापत्तेश्च पंचम्यूर्ध्वंचतत्रापिदशम्यूर्ध्वंततोप्यतीति विष्णुधर्मोक्तेः षष्ठ्याद्येकादश्यादिपक्षावपिज्ञेयाविति तत्वम् कालादर्शेपि पक्षाद्यादि च दर्शांतं पंचम्यादिदिगादि च अष्टम्यादियथाशक्ति कुर्यादापरपक्षिकं पक्षादिःप्रतिपत् दिक्दशमी दर्शांतमितिसर्वत्र गौतमोपि अथापरपक्षेश्राद्धंपितृभ्योदद्यात्पंचम्यादिदर्शांतमष्टम्यादिदशम्यादिसर्वस्मिंश्चेति तथैकस्मिन्नपिदिनेश्राद्धमुक्तंहेमाद्रौनागरखंडे आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे योवैश्राद्धं नरः कुर्यादेकस्मिन्नपिवासरे तस्यसंवत्सरंयावत्संतृप्ताःपितरोध्रुवमिति अत्रशक्ताशक्तपरत्वव्यवस्थेतिप्रांचः तन्न तद्वाचकपदाभावात् त्रयोदश्यादिपक्षएवनित्यः तत्रैवनिंदाश्रुतेः ब्राह्मे एवकारेणतस्यैवपंचमपक्षायोगव्यवच्छेदोक्तेरितिगौडाः तन्न एकस्मिन्नपीतिविरोधात् तेनफलभूयार्थिनान्यानिकार्याणीतितत्वम् तत्रचतुर्दशीश्राद्धाभावेपंचम्यादिदशम्यादिपक्षौतत्सत्वेषष्ठ्याद्येकादश्यादिकौ एवंचतुर्दश्यभावेद्वादश्यादिः तत्सत्वेत्रयोदश्यादिरितिव्यवस्था विधवायास्तुविशेषःस्मृतिसंग्रहे चत्वारःपार्वणाःप्रोक्ताविधवायाःसदैवहि स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच ततोमातामहानांचश्राद्धदानमुपक्रमेत् तथा श्वश्रूणांचविशेषेणमातामह्यास्तथैवचेति अशक्तौतु स्मृतिरत्नावल्यां स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथैवच विधवाकारयेच्छ्राद्धं यथाकालमतंद्रिता विधवास्वयंसंकल्पंकृत्वान्यत् ब्राह्मणद्वाराकारयेदित्युक्तं प्रयोगपारिजाते सकृन्महालयेचवर्ज्यतिथ्याद्युक्तं पृथ्वीचंद्रोदयप्रयोगपारिजातादिषु वसिष्ठः नंदायांभार्गवदिनेचतुर्दश्यांत्रिजन्मसु एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात् जन्मभंतत्पूर्वोत्तरेचत्रिजन्मानि वृद्धगार्ग्यः प्राजापत्येचपौष्णेच पित्र्यर्क्षेभार्गवेतथा यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रोविनश्यति प्राजापत्यंरोहिणी पौष्णंरेवती पित्र्यंमघा अन्यान्यपिप्रत्यरादीनितत्रैववर्ज्ये-

यानि केचित्तु नंदाभद्रकाभरण्यारभृगुवह्निपितृकालभे गंडेवैधृतिपातेचपिंडास्त्याज्याः सुतैःपितुरितिसंग्रहात् नंदाप्रतिपत्षष्ठीकादश्यः
भद्राःसप्तमी कामस्त्रयोदशी आरोभौमः भृगुःशुक्रः अग्निःकृत्तिका कालभंभरणी तत्रपिंडास्त्याज्याइत्याहुः तन्नमूलंमृग्यम्
एतच्चसकृन्महालयविषयं सकृन्महालयेकाम्येपुनःश्राद्धेदिनेषुच अतीतविषयेचैवसर्वमेतद्विचिंतयेदिति पृथ्वीचंद्रोदयेनारदोक्तेः
अस्यापवादोहेमाद्रौपृथ्वीचंद्रोदयेच अमापातेभरण्यांचद्वादश्यांपक्षमध्यके तथातिथिंचनक्षत्रंवारंचनविचारयेत् पराशरमाधवीयेम-
दनपारिजातादिषुचैवम् निर्णयदीपिकायांतु पितृमृताहेनिषिद्धदिनेपिसकृन्महालयःकार्यइत्युक्तं आषाढ्याःपंचमेपक्षेकन्यासंस्थे
दिवाकरे मृताहनिपितुर्योवैश्राद्धंदास्यतिमानवः तस्यसंवत्सरंयावत्संतृप्ताःपितरोध्रुवमितिनागरखंडोक्तेः यातिथिर्यस्यमासस्यमृता
हेतुप्रवर्तते सातिथिःपितृपक्षेतुपूजनीयाप्रयत्नतः तिथिच्छेदोनकर्तव्योविनाशौचंयदृच्छया पिंडश्राद्धंचकर्तव्यंविच्छित्तिंनैवकारयेत्
अशक्तःपक्षमध्येतुकरोत्येकदिनेयदा निषिद्धेपिदिनेकुर्यात्पिंडदानंयथाविधीतिकात्यायनोक्तेश्च अत्रमूलंचिंत्यम् तथापक्षश्राद्धकर
णेपिनन्दादिषुपिंडनिषेधइत्याहुः पराशरमाधवीयेकार्ष्णाजिनिः नभस्यस्यापरेपक्षेश्राद्धंकार्यंदिनेदिने नैवनंदादिवर्ज्यंस्यान्नैव
निंद्याचतुर्दशीति अत्रश्राद्धमित्येकवचनाद्दिनेदिने इतिवीप्सावशाच्च सोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदं अतःप्रतिपत्प्रभृ
तिष्वेकांवर्जयित्वाचतुर्दशीमितियाज्ञवल्कीयं प्रयोगभेदपरं नतुपंचम्यादिपक्षविषयं प्रतिपत्प्रभृतिष्वितिविशिष्योक्तेः निर्णयदीप
पृथ्वीचंद्रोदये मदनपारिजातेचैवं अन्यत्कृष्णपक्षपरंयाज्ञवल्कीयं एतत्परत्वेनैवनिंद्याचतुर्दशीतिविरोधादितिगौडाः तन्न श्राद्धं
शस्त्रहतस्यैवचतुर्दश्यांमहालयइतिविरोधात् तत्वंतु तिथिनक्षत्रवारादिनिषेधोयउदाहृतः सःश्राद्धेतन्निमित्तस्यान्नानुषंगकृते-

त्यासाविति दिवोदासीये बृहद्गार्ग्योक्तेस्तन्निमित्ते पक्षांतरेस्त्वज्ञेयः सकृन्महालयेतुवचनान्निषेधः अन्यत्रनकोपिनिषेधः कार्ष्णाजिनिस्मृतेरिति अतोनंदादौसपिंडकश्राद्धे पुत्रवतोप्यधिकारः अत्रिरपि महालयेक्षयाहेच दर्शेपुत्रस्यजन्मनि तीर्थेपिनिर्वपेत्पिंडान्रविवारादिकेष्वपि पूर्वोक्तनंदादिनिषेधस्तु मृताहातिक्रमे सकृन्महालये पौर्णमास्यादिमृतश्राद्धे तन्निमित्तेचज्ञेयः यत्तुस्मृत्यर्थसारे विवाहव्रतचूडासुवर्षमर्धंतदर्धकं पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति तस्यात्रापवादोदिवोदासीये बृहस्पतिः तीर्थेसंवत्सरेप्रेतेपितृयागेमहालये पिंडदानंप्रकुर्वीतयुगादिभरणीमघे महालयेगयाश्राद्धेमातापित्रोःक्षयेहनि कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसदेति निर्णयदीपेतुनंदादिनिषेधः प्रत्यहमिन्नश्राद्धविषयः षोडशाहव्यापिश्राद्धप्रयोगकल्पेतुप्रत्यहंपिंडदानंकार्यमेवेत्युक्तं तदयमर्थःसंपन्नः षोडशाहव्यापिश्राद्धेकेचनपिंडनिषेधः मृताहेसकृन्महालयेपितथाइतिकेचित् तत्रापिनिषेधस्तुयुक्तः प्रत्यहंश्राद्धभेदेपिव्यतीपातादौतथा अन्यत्रमृताहातिक्रमेमहालयातिक्रमेचपिंडनिषेधइति संन्यासिनांतुद्वादश्यांश्राद्धंकार्यं यतीनांचवनस्थानांवैष्णवानांविशेषतः द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइति पृथ्वीचंद्रोदयेसंग्रहोक्तेः अत्रपक्षश्राद्धाकरणेगौणकालमाहहेमाद्रौयमः हंसेकन्यासुवर्षास्थेशाकेनापिगृहेवसन् पंचम्योरंतरेदद्यादुभयोरपिपक्षयोः आश्विनकृष्णशुक्लपंचम्योर्मध्यइत्यर्थः तत्राप्यसंभवेभविष्ये येयंदीपान्विताराजन्ख्यातापंचदशीभुवि तस्यांदद्यान्नचेद्दत्तं पितृणांवैमहालये तत्राप्यसंभवेभारते यावच्चकन्यातुलयोःक्रमादास्तेदिवाकरः शून्यंप्रेतपुरंतावद्वृश्चिकंयावदागतः ब्राह्मे वृश्चिकेसमतिक्रांतेपितरोदैवतैःसह निःश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणं यत्तुजातूकर्ण्यः आकांक्षंतिस्मपितरःपंचमंपक्षमाश्रिताः तस्मात्तत्रैवदातव्यंदत्तमन्यत्रनिष्फलमिति तत्फलातिशयहानिपरं कन्यांगच्छतुवानवेतितुर्यपादेवापाठः तेनकन्यायोगेप्राशस्त्यमात्रं

अतः श्राद्धविवेकोक्तंश्राद्धद्वयंहेयं इदंचश्राद्धमन्येनैवकार्यंनामान्नादिना मृताहंचसपिंडंचगयाश्राद्धंमहालयं आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचिदिति स्मृतिदर्पणेगालवोक्तेः अथात्रदेवताःसंग्रहे तातांबात्रितयंसपत्नजननीमातामहादित्रयं सस्त्रिस्त्रीतनयादिताजननीस्वभ्रातरस्तत्स्त्रियः तातांबात्मभगिन्यपत्यधवयुक्जायापितासद्गुरुः शिष्याप्ताःपितरोमहालयविधौतीर्थेतथातर्पणे अस्यार्थः तातत्रयी पितृत्रयी अंबात्रयीच स्मृत्यर्थसारेपि महालयेमातृश्राद्धंपृथक्कर्मशक्तमिति अत्रविशेषःस्मृतिदर्पणेगालवः अनेकामातरोयस्यश्राद्धेचापरपक्षिके अर्घ्यदानंपृथक्कुर्यात्पिंडमेकंतुनिर्वपेत् जीवन्मातृकस्तुसापत्नमातुरेकोद्दिष्टंकुर्यान्नपार्वणम् श्राद्धदीपकलिकायांतुपार्वणमुक्तं अन्वष्टक्यंचयन्मातुर्गयाश्राद्धंमहालयं पितृपत्नीष्वपिश्राद्धंकार्यंपार्वणवद्बुधैरिति बृहन्मनूक्तेः सपत्नीतिमातामहानांसपत्नीकत्वेपिविभवेसतिमातामहीनांपृथक्कार्यं महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच ज्ञेयंद्वादशदैवत्यंतीर्थेमाघेमघासुचेति निगमोक्तेः हेमाद्रिमतेत्वत्रनवदैवत्यमेव महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच नवदैवत्यमत्रेष्टंशेषंषाट्पौरुषंविदुरिति विष्णुधर्मोक्तेः तातभ्रातापितृव्यः जननीभ्रातामातुलः तत्स्त्रियः पितृव्यस्त्री मातुलानी भ्रातृजायाः पितृष्वसृमातृष्वसृस्वभगिन्योपत्यभर्तृयुक्ताः तेनसापत्यार्थेसधवार्थेइतिप्रयोगोज्ञेयः एतासुसतीषुनतद्भर्त्रादेर्दानं द्वारलोपात् जायापिताश्वशुरः श्वश्रूरप्यत्रोपलक्ष्या अत्रमूलस्मृतिचंद्रिकायांज्ञेयम् अत्रपार्वणेकोद्दिष्टव्यवस्थोक्ताहेमाद्रौ पुराणांतरे उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः भगिनीस्वामिदुहितृजामातृभगिनीसुताः पितरोपितृपत्नीनां पितुर्मातुश्चयास्वसा सखिद्रव्यदशिष्याद्यास्तीर्थेचैवमहालये एकोद्दिष्टविधानेनपूजनीयाःप्रयत्नतइति इतरेषांपित्रादीनांपार्वणमर्थसिद्धं अत्रक्रमान्यत्वेप्या

चाशाद्यवस्था अशक्तौतुपृथिवीचंद्रोदयेचतुर्विंशतिमते एकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत् दशद्वादशवापिंडान्दद्यादुक
रणान्तु एकोद्दिष्टस्वरूपंचाहयाज्ञवल्क्यः एकोद्दिष्टंदेवहीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितंह्यपसव्यवदिति अत्रैकपाकोवै-
श्वदेवतंत्रंपिंडवर्हिश्चैकमिति स्मृत्यर्थसारउक्तं अत्रपाणिहोमः पिंडाश्चद्विजातिकइत्याह प्रयोगपारिजातेआचार्यः काम्यमभ्युदयेष्ट-
म्यामेकोद्दिष्टमथाष्टमं चतुर्थेषुकरेहोमःपिंडाश्चात्रद्विजातिकइति पार्वणैकोद्दिष्टयोःसमानतंत्रत्वेतु अग्निसमीपएव अत्रधुरिलोच
नौवैश्वदेवौ अपिकन्यागतेसूर्येकाम्येचधुरिलोचनौ इतिहेमाद्रावादित्यपुराणात् अत्रप्रतिदिनंभिन्नप्रयोगत्वाद्दक्षिणाभेदोवाप्रयोगै-
क्यादंतेएववादक्षिणेति हेमाद्रौउक्तम् एतच्चसंन्यस्तपितृकादिनाजीवत्पितृकेणापिकार्यं हृष्टोतीर्थेचसंन्यस्तेतातेचपतितेसति येभ्यएव
पितादद्यात्तेभ्योदद्यात्स्वयंसुतइति कात्यायनोक्तेः यत्तुकौंडिण्यः दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपाक्षिकं नजीवत्पितृकःकुर्यात्तिलैस्तर्प-
णमेवचेति तत्संन्यस्तपित्राद्यतिरिक्तविषयं काम्यश्राद्धपरंवा अत्रबहुवक्तव्यंश्रीपितृकृतजीवत् पितृकनिर्णयेज्ञेयं एतच्चजीवत्पितृके
णापिंडरहितंकार्यं मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति दक्षेणतस्यपिंडनिषेधात् अन्वष्टक्यमा-
तृवार्षिकादौतुवचनाद्भवतीतिवक्ष्यामः तथाछागलेयः पिंडोयत्रनिवर्तेतमघादिषुकथंचन सांकल्पंतुतदाकार्यंनियमाद्ब्रह्मवादिभिः सां
कल्पस्वरूपंचवक्ष्यते अत्रश्राद्धांगतर्पणंपक्षश्राद्धेप्रतिदिनंश्राद्धोत्तरं सकृन्महालयेतुपरेऽह्निकार्यं तदुक्तंनारदीये पक्षश्राद्धंयदाकुर्यात्तर्प
णंतुदिनेदिने सकृन्महालयेचैवपरेहनितिलोदकं गर्गोपि पक्षश्राद्धेहिरण्येचअनुव्रज्यतिलोदकमिति तथाप्रयोगपारिजातेगर्गः कृष्णे
भाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत् पितृणांप्रत्यहंकार्यंनिषिद्धाहेपितर्पणं सकृन्महालयेश्वःस्यादष्टकास्वंतएवहि इदंनिषिद्धदिनेपिका

यम् तिथितीर्थविशेषेषुकार्यंप्रेतेनचसर्वदेति स्मृत्यर्थसारोक्तेः तीर्थेतिथिविशेषेचगयायांप्रेतपक्षके निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितमिति
स्मृतिरत्नावल्यावचनाच्च एतच्चश्राद्धंमलमासेनकार्यं नदाहस्पृशः वृद्धिश्राद्धंतथासोममग्न्याधेयंमहालयम् राजाभिषेकंकाम्यंचनकुर्या-
द्भानुलंघितइति हेमाद्रौनागरखंडे नभोवाथनभस्योवामलमासोयदाभवेत् सप्तमःपितृपक्षःस्यादन्यत्रैवतुपंचमः एतच्चपित्रोर्मरणप्र
थमाब्देकृताकृतमितित्रिस्थलीसेतौभट्टाः इदंचनित्यंकाम्यं पुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा प्राप्नोतिपंचमेदत्वाश्राद्धंकामांश्च
पुष्कलानितिजाबालोक्तेः वृश्चिकेसमतिक्रांतेपितरोदैवतैःसह निःश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणमिति कार्ष्णाजिनिवचनाच्च
तदतिक्रमेप्रायश्चित्तमुक्तंमृग्विधाने उदुरोअश्वस्यमंत्रंदशमासर्द्विमासयोः महालयंयदान्यूनंनदासंपूर्णमेतिनदिति द्विमासयोः क
न्यातुलयोर्महालयश्राद्धंयदाहीनमित्यर्थः अत्रभरण्यांश्राद्धंसतिप्रशस्तं तदुक्तंपृथ्वीचंद्रोदयेमात्स्ये भरणीपितृपक्षेतुमहतीपरि
कीर्तिता अस्यांश्राद्धंकृतंयेनसगयाश्राद्धकृद्भवेत् पृथ्वीचंद्रोदये श्रीधरीयेबृहस्पतिः नभस्यापरपक्षस्यद्वितीयायदियाम्यभे तृती
याचाश्विनाराशिभिःसहिताप्रीतिदापितुः एतत्पक्षेषष्ठीयोगविशेषेणकपिलासंज्ञा तदुक्तंवाराहे नभस्यकृष्णपक्षेतुरोहिणीपातभूसुतैः
युक्ताषष्ठीपुराणज्ञैःकपिलापरिकीर्तिता व्रतोपवासनियमैर्भास्करंतत्रपूजयेत् कपिलांचद्विजाग्र्यायदत्वाक्रतुफलंलभेत् पुराणसमु-
च्चये भाद्रेमास्यसितेपक्षेभानौचैवकरेस्थिते पातेकुजेचरोहिण्यांसाषष्ठीकपिलाभवेत् अत्रदर्शांतत्वेनमहालयोभाद्रपदकृष्णपक्षो
ज्ञेयइत्युक्तंनिर्णयामृतेहेमाद्रौच हस्तार्कस्तुफलातिशयार्थः संयोगेतुचतुर्णांवैनिर्दिष्टापरमास्थितिरितितत्रैवोक्तेः अत्रविशेषोहेमाद्रौस्कां
दे देवदारुतथोशीरंकुंकुमैलामनःशिला पत्रकंपद्मकंयष्टिमधुगव्येनपेषयेत् क्षीरिणालोड्यकल्केनस्नानंकुर्यात्समंत्रकम् आपस्त्वम

३५

सिद्देवेशांज्योतिषांपतिरेवच पापंनाशयमेदेववाङ्मनःकायकर्मजं पंचगव्यकृतस्नानः पंचभंगैस्तुमार्जयेत् पंचभंगैःपंचपल्लवैः तथा रत्नैर्नानाविधैर्युक्तंसौवर्णंकारयेद्रविं शक्तितस्तुपलादूर्ध्वंतदर्धंकर्षतोपिवा सौवर्णमरुणंकुर्यान्नौकांचैवतथारथम् तथा अल्पवित्तोपियःकुर्यात्सोपिकुर्यादिमंविधिं प्रभासखंडे स्थापयेदव्रणंकुंभंचंदनोदकपूरितं रक्तवस्त्रयुगच्छन्नंताम्रपात्रेणसंयुतं रथोरौक्मपलस्यैव एकचक्रःसुचिह्नितः सौवर्णपलसंयुक्तांमूर्तिंसूर्यस्यकारयेत् ततःसूर्यंकपिलांचषोडशोपचारैःसंपूज्यदद्यात् दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मादिवाकरः कपिलासहितोदेवोममसुक्तिंप्रयच्छतु यस्मात्त्वंकपिलेपुण्यासर्वलोकस्यपावनी प्रदत्तासहसूर्येणममसुक्तिप्रदाभवेति विशेषांतरंतत्रैवज्ञेयमितिदिक् इयमेवचंद्रषष्ठी साचंद्रोदयव्यापिनीग्राह्या उभयत्रतथात्वेपूर्वा तदुक्तंभविष्ये तद्वद्भाद्रपदेमासि षष्ठ्यांपक्षेसितेतरे चंद्रषष्ठीव्रतंकुर्यात्पूर्ववेधःप्रशस्यते चंद्रोदयेयदाषष्ठीपूर्वाण्हेचापरेहनि चंद्रषष्ठ्यासितेपक्षेसैवोपोष्याप्रयत्नतइति अष्टम्यामाश्वलायनेनमघावर्षसंज्ञंश्राद्धमुक्तं एतेनमाघ्यावर्षंप्रोष्ठपद्याअपरपक्षेइति इदंसप्तम्यादिषुत्रिष्वहःसुकार्यमितिनारायणवृत्तिः हरदत्तस्तुमघायुक्तवर्षासुकृष्णत्रयोदशीश्राद्धमितिव्याचख्यौ एषाचंद्रोदयेग्राह्या आषाढ्याःपंचमेपक्षेगयायांमध्याष्टमीस्मृता त्रयोदशीगजच्छायागयातुल्यातुपैतृके आश्विनकृष्णाष्टम्यांमहालक्ष्मीव्रतं तन्निर्णयामृतेपुराणसमुच्चये श्रियोर्चनंभाद्रपदेसिताष्टमीप्रारभ्य कन्यागतेचसूर्येसमापयेत्तत्रतिथौचयावत्सूर्यस्तुपूर्वार्धगतोस्तुवस्याइति तत्रैव कन्यागतर्केप्रारभ्यकर्तव्यंनश्रियोर्चनं हस्तभांतदलस्थेर्केतद्व्रतंनसमापयेत् पूजनीयागृहस्थानामष्टमीमार्गधिश्रियः दोषैश्चतुर्भिःसंयुक्तासर्वसंपत्करीतिथिः तथा पुत्रसौभाग्यराज्यायुर्नाशिनीसाप्रकीर्तिता तस्मात्सर्वप्रयत्नेनत्याज्याकन्यागतेरवौ विशेषेणपरित्याज्यानवमीदूषितायदीति दोषचतुष्टयं

त्रैवेणोक्तं त्रिदिनेचावमेचैवअष्टमींनोपवासयेत् पुत्रहानवमीविद्धास्वर्गीहन्त्यार्धगेरवाविति त्रिदिनावमदिनलक्षणंचरत्नमालायां यत्रैकः
स्पृशतितिथिद्वयावसानंवारश्चेदवमदिनंतदुक्तमार्यैः यःस्पर्शोद्भवतितिथित्रयस्यचान्हामिहद्युस्पृक्कथितमिदंद्वयंचनेष्टं एतेचसर्वेनि-
षेधाः प्रथमारंभविषयाः मध्येतु सतिसंभवेज्ञेयाः व्रतस्यषोडशाब्दसाध्यत्वेनमध्येत्यागायोगात् इयंचंद्रोदयव्यापिनीग्राह्या तत्रैव
पूजाद्युक्तेः परदिनेचंद्रोदयादूर्ध्वंत्रिमुहूर्तव्यापित्वेपरेवकार्या अन्यथापूर्वैव पूर्वावापरविद्धावाग्राह्याचंद्रोदयेसदा त्रिमुहूर्तापिसापूज्या
परतश्चोर्ध्वगामिनीति मदनरत्नेनिर्णयामृतेचसंग्रहोक्तेः अर्धरात्रमतिक्रम्यवर्ततेयोत्तरातिथिः तदातस्यांतिथौकार्यंमहालक्ष्मीव्रतंस
देतिवचनाच्चेतिसंक्षेपः इतिमहालक्ष्मीव्रतनिर्णयः अथनवम्यामन्वष्टकाश्राद्धं तत्रकात्यायनः अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदा
हृतं पित्रादिमातृमध्यंचततोमातामहान्तकं पृथ्वीचंद्रोदयेब्रह्मांडे पितॄणांप्रथमंदद्यान्मातॄणांतदनंतरं ततोमातामहानांच अन्वष्टके
क्रमःस्मृतः श्राद्धहेमाद्रौछागलेयः केवलास्तुक्षयेकार्यावृद्ध्यावादौप्रकीर्तिताः अन्वष्टकासुमध्यस्थानान्त्याःकार्यास्तुमानवः दीपिका
यांतु मातृश्राद्धमादौकार्यमित्युक्तं मातृयजनंत्वन्वष्टकास्वादितइति हेमाद्रौब्राह्मेपि अन्वष्टकासुक्रमशोमातृपूर्वंतदिष्यतइति अत्रशा-
खाभेदेनव्यवस्थेति पृथ्वीचंद्रोदयः जीवत्पितृकविषयमितिनिर्णयदीपः इदंचजीवत्पितृकेणापिकार्यं तदुक्तंनिर्णयामृते मैत्राय-
णीयपरिशिष्टे आन्वष्टक्यंगयाप्राप्तौसत्यायच्चमृतेहनि मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति यद्यपिजीवत्पितृकस्यपंचान्वष्टका
अवश्यंकर्तव्याः तथाप्यशक्तस्येयमावश्यकी प्रोष्ठपद्यष्टकाभूयःपितृलोकेभविष्यतीति हेमाद्रौपाद्मोक्तेः सर्वासामेवमातॄणांश्राद्धं
कन्यागतेरवौ नवम्यांहिप्रदातव्यंब्रह्मलब्धवरायतइतिस्मृतेनावश्यकत्वोक्तेश्च अत्रसर्वासामित्युक्तेः स्वमातरिजीवंत्यामपिसपत्न

मातृभ्योदद्यात् तन्मरणेसतितस्यैताभ्यश्चदद्यादित्युक्तं जीवत्पितृकनिर्णयेगुरुभिः अत्रसर्वासांनामनिर्देशोनैकोब्राह्मणोर्घ्यैःपिंडश्च नामैकेतुद्विवचनादिप्रयोगइत्युक्तं नारायणवृत्तौ अन्वष्टकाश्राद्धं तद्यागश्चगोभिलीयानांमध्यमायामेवनसर्वासु अन्वष्टक्यंमध्यमायामितिगोभिलगौतमाविति छंदोगपरिशिष्टात् अत्रभर्तृमरणोत्तरंपूर्वमृतमातृश्राद्धंनकार्यमितिकेचिदाहुः पठंतिच श्राद्धंनवम्यांकुर्यात्तन्मृतेभर्तरिलुप्यतइति तदेतन्निर्मूलत्वात्पूर्वप्रतारणमात्रं श्राद्धदीपकलिकायांब्राह्मे पितृमातृकुलोत्पन्नायाःकाश्चित्तुमृताःस्त्रियः श्राद्धार्हामातराज्ञेयाःश्राद्धंतत्रप्रदीयतइति अत्रदेशाचाराद्व्यवस्था इदंचानुपनीतेनापिकार्यं तदुक्तंश्राद्धशूलपाणौ मात्स्ये अमावास्याष्टकाकृष्णपक्षपंचदशीषुचेत्यभिधाय एतच्छ्राद्धमनुपनीतोपिकुर्यात्सर्वेषुपर्वसु श्राद्धंसाधारणंनामसर्वकामफलप्रदं भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधइति तेनसाग्नेरेवेदमितिपरास्तं अन्वष्टकातःपृथगेवेदंमातुःश्राद्धमित्यपिपरास्तं लाघवेनमूलैक्यादष्टकापदाविशेषाच्च तेनान्यअन्वष्टकाश्राद्धस्यांगस्याप्यप्रधानत्ववचनात् अवेष्टीरवराजसूयांतर्गतायाएतयान्नाद्यकामंयाजयेदितिफलार्थत्वम् अत्राष्टकान्वष्टकापूर्वानुरोधात् तथाग्निपुराणे अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासह आपस्तंबानांत्वष्टकासुचवृद्धौचेतिभाष्यकारैःपाठादष्टकायांमातृकाश्राद्धं छंदोगैस्त्वत्रमातृमातामहश्राद्धेनकार्ये किंतुत्रिपुरुषमेव नयोषिद्भ्यःपृथग्दद्यादवसानदिनादृते कर्षूसमन्वितं मुक्त्वातथाद्यंश्राद्धषोडशं प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थितिरिति छंदोगपरिशिष्टात् अन्वष्टकासुतेषांकर्षूविधानादितिशूलपाणिः यत्तु तामिस्रपक्षेनवमीपुण्याश्राद्धपदेहिया चत्वारःपार्वणाःकार्याःपितृपक्षेमनीषिभिरिति तद्देशाचारतोव्यवस्थितंज्ञेयं इदंजीव

स्तिनृकेणापिसपिंडंकार्यं हेमाद्रौविष्णुधर्मोत्तरे अन्वष्टकासुचस्त्रीणांश्राद्धंकार्यंतथैवचेत्युपक्रम्य पिंडनिर्वपणंकार्यंतस्यामपिनृसत्तमे
तिवचनंश्राद्धविधिनापिंडदानेप्राप्तेपुनस्तत्कीर्तनंयस्यजीवत्पितृकगर्भिणीपत्नीस्याद्विनापिंडदानंनिषिद्धं तस्यतत्प्राप्त्यर्थमिति
श्रीतातचरणाः अन्वष्टकायांसुवासिनीभोजनमुक्तं मार्कंडेयपुराणे मातुःश्राद्धेतुसंप्राप्तेब्राह्मणैःसहभोजनं सुवासिन्यैप्रदातव्यमितिशा
तातपोऽब्रवीत् भर्तुरग्रेमृतानारीसहदाहेनवामृता तस्याःस्थानेनियुंजीतविप्रैःसहसुवासिनीं तत्रैवमदालसावाक्यम् स्त्रीश्राद्धेषुच
दद्यास्तुस्वलंकारान्स्वयोषिते भंजरीसंकलादामकर्णिकाकंकणादयइति अत्राशक्तावनुकल्पमाहाश्वलायनः अनडुहोयवसमाह
रेदग्निनावाकक्षमुपोषेदेषामेष्टकेतिनत्वेवानष्टकःस्यादिति हेमाद्रौपितामहः अमावास्याव्यतीपातपौर्णमास्यष्टकासुच विद्वान्श्रा
द्धमकुर्वाणोनरकंप्रतिपद्यते अकरणेचप्रायश्चित्तमुक्तंस्मृतिविधाने एभिर्द्युभिर्जपेन्मंत्रंशतवारंतुनार्हिते आन्वष्टक्यंयदाशून्यंसंपूर्णं
यातिसर्वथेति एतत्पक्षेद्वादश्यांविशेषः पृथ्वीचंद्रोदयेधारावीये सन्यासिनोप्याब्दिकादिपुत्रःकुर्याद्यथाविधि महालयेतुय
स्माद्द्वादश्यांपार्वणंतुतदिति अथत्रयोदशीश्राद्धं तत्रचंद्रिका त्रयोदशीभाद्रपदीकृष्णासुरम्यापितृप्रिया तृप्यंतिपितरस्त-
स्यांस्वयंपंचशतंसमाः मघायुतायांतस्यांतुजलाद्यैरपितोषिताः तृप्यंतिपितरस्तद्वद्वर्षाणामयुतायुतं प्रयोगपारिजातेशंखः प्रो
ष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीं प्राप्यश्राद्धंतुकर्तव्यंमधुनापायसेनच प्रजामिष्टांयशःस्वर्गमारोग्यंचधनंतथा नृणांश्राद्धेस
दाप्रीताःप्रयच्छंतिपितामहाः एतन्नित्यमपि पृथ्वीचंद्रोदयेविष्णुधर्मे प्रोष्ठपद्यामतीतायांतथाकृष्णात्रयोदशीत्युक्त्वा एतास्तुश्रा
द्धकालान्वैनित्यानाहप्रजापतिः श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइत्युक्तेः एतच्चाविभक्तैरपिपृथक्कार्यं तथाचहेमाद्रौ विभ-

कावाविभक्तावाकुर्युःश्राद्धंपृथक्सुताः मघासुचततोन्यत्रनाधिकारःपृथग्विनेति अपरार्केवायवीये हंसेहस्तस्थितेयातुमघायुक्तात्रयोदशी तिथिर्वैवस्वतीनामसाछायाकुंजरस्यतु अत्रच अपिनःसकुलेभूयाद्योनोदद्यात्त्रयोदशीं पायसंमधुसर्पिर्भ्यांप्राक्छायेकुंजरस्यचेति विष्णुमनुवचने केवलत्रयोदशीस्तुतेर्मघागुणंइतिकल्पतरुः शूलपाणिस्तु केवलवाक्यानामर्थवादत्वाद्विधौचमघायोगश्रुतेर्विधिलाघवात् विशिष्टमेवनिमित्तमित्याह वस्तुतस्तु मधुमांसैश्चशाकैश्चपयसापायसेनच एषनोदास्यतिश्राद्धंवर्षासुचमघासुचेति वसिष्ठवचनेकेवलमघास्तुतेर्विनिगमकाभावादुभयंभिन्ननिमित्तं पूर्वोक्तवचनाच्चयोगाधिक्येफलाधिक्यं अतएवयाज्ञवल्क्यः तथावर्षात्रयोदश्यांमघासुचविशेषतइति त्रयोदशीश्राद्धंनित्यं अन्यत्काम्यं अत्रत्रयोदश्यांबहुपुत्रायुवमारिणस्तु भवंतीत्यापस्तंबोक्तेर्युवमारित्वमपत्यदोषसहिष्णोरपत्यमात्रार्थिनः स्मृत्यंतरोक्तधनार्थिनोवाधिकारइतिकल्पतरुः अपत्यनिंदयातदर्थिनोनाधिकारात् फलांतरकामस्यैवाधिकारइति हलायुधः एतत्पिंडरहितंकार्यं मघायुक्तत्रयोदश्यांपिंडनिर्वपणंद्विजः ससंतानोनैवकुर्यान्नित्यंतेकवयोविदुरितिबृहत्पराशरोक्तेः इदंमलमासेपिकार्यं मघात्रयोदशीश्राद्धंप्रत्यक्षपरिशिष्टहेतुकं अनन्यगतिकत्वेनकर्तव्यंस्यान्मलिम्लुचे इतिकाठकगृह्योक्तेः यानितु अंगिराः त्रयोदश्यांतुकृष्णपक्षेयः श्राद्धंकुरुतेनरः पंचत्वंतस्यजानीयाज्ज्येष्ठपुत्रस्यनिश्चितं वामनपुराणे त्रयोदश्यांतुवैश्राद्धंनकुर्यात्पुत्रवान्गृहीत्यादीनिवचनानितानिपुत्रवद्विषयाणिवामहालयस्थभिन्नत्रयोदशीविषयाणिवाकाम्यश्राद्धविषयाणिवासपिंडकश्राद्धविषयाणिवेतिकेचित् हेमाद्रिमतसारस्त्वेकवर्गश्राद्धविषयाणि श्राद्धंनैवैकवर्गस्यत्रयोदश्यामुपक्रमेत् ननुसास्तत्रयेयस्यप्रजाहिसंततिस्यत इतिकार्ष्णाजिनिस्मृतेः यद्यपिपितरोयत्रपूज्यंतेतत्रमातामहाअपीति धौम्योक्तेर्नकेवलपितृवर्गस्यप्राप्तिस्तथापिव्यामोहादिप्रासनि

षेधोयमित्याहुः वयंतु पश्यामः पुत्रवद्विषयाण्येवेति असंतानस्तु यस्तस्य श्राद्धे भोक्ता त्रयोदशी संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेदिति हेमाद्रौ नागरखंडोक्तेः पूर्ववाक्यमप्यसंतानस्यैवैकवर्गनिषेधकमिति अत्र मघात्रयोदशीमहालययुगादिश्राद्धानां तंत्रेण प्रयोगः न तु प्रसंगसिद्धिरित्यन्यत्र विस्तरः अथ चतुर्दशी पृथ्वीचंद्रोदये प्रचेताः वृक्षारोहणलोहाद्यैर्विद्युज्जलविषाग्निभिः नखिदंष्ट्रिविपन्ना ये तेषां शस्ता चतुर्दशी ब्राह्मे युवानः पितरो यस्य मृताः शस्त्रेण वा हताः तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता नागरखंडे अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप एतच्च प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति गौतमोक्तदुर्मरणोपलक्षणं एकयोगनिर्देशात् सर्वेषां तुल्यं धर्माणामेकस्यापि यदुच्यते सर्वेषां तत्समं ज्ञेयमेकरूपा हि ते स्मृता इत्युशनसोक्तेश्च तच्च कृतक्रियाणामेवेति वक्ष्यामः मरीचिः विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनां चतुर्दश्यां क्रियाः कार्या अन्येषां तु विगर्हिताः अत्र ब्राह्मणघातीतेन हतो न तु ब्रह्महा तस्य पतितत्वादिति शूलपाणिः अत्रोद्देश्यविशेषणस्याविवक्षितत्वात् स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यं न पार्वणमिति श्रीदत्तोपाध्यायः इदं विषादिहतानामेव न प्रसवादिमृतानामिति वाचस्पतिः यत्तु शाकटायनः जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीमिति तत्प्रायश्चित्तार्थजलादिमृतविषयमित्याकरे उक्तम् अत एव वैधत्वात् सहगमनेपि न कार्यमिति हेमाद्रिः एतच्च दैवयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत् तच्छ्राद्धं दैवहीनं चेत् पुत्रदारधनक्षयः एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत् भविष्येपि समत्वमागतस्यापि पितुः शस्त्रहतस्य च चतुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणे कृते एकोद्दिष्टविधानेन तत्कार्यं

शस्त्रघातिनइति संवत्सरप्रदीपेहारीतः विश्वेदेवांश्चतत्रापिपूजयित्वादितोमलान् येयेशस्त्रहतास्तेषांश्राद्धंकुर्यादतंद्रितः अत्रैकोद्दिष्टवचनानांनिर्मूलत्वं समूलत्वेपिपार्वणाशक्तपराणि विष्ण्वादिवचनैः प्रकरणात्कृष्णपक्षीयपार्वणावगतेरिति शूलपाणिः तन्न वाक्येन प्रकरणस्यबाधात् पित्रादीनांपार्वणंमात्रादीनामेकोद्दिष्टमितिगौडावाचः तन्न पितुरित्यनेनविरोधात् विशेषवाक्यवैयर्थ्यापत्तेश्च अत्रशस्त्रहतस्यैवचतुर्दश्यामितिनियमोनतुचतुर्दश्यामेवशस्त्रहतस्येति श्राद्धंशस्त्रहतस्यैवचतुर्दश्यांमहालये इतिकालादर्शात् वार्षिकादीनामप्रकरणापत्तेश्च तेनमहालयएव दिनांतरेपार्वणंमातामहादितृप्त्यर्थंकार्यमेव पितामहोपिशस्त्रहतश्चेदेकोद्दिष्टद्वयंकार्यं तदुक्तंहेमाद्रौस्मृत्यंतरे एकस्मिन्द्वयोर्वैकोद्दिष्टमिति त्रिषुशस्त्रहतेषुपार्वणमेवकार्यं यत्तुदेवस्वामिनोक्तंत्रिष्वपिशस्त्रहतेषुपृथगेकोद्दिष्टत्रयंकार्यं नतुपार्वणमाहत्यवचनाभावादितितदयुक्तं पित्रादयस्त्रयोयस्यशस्त्रेयांतास्त्वनुक्रमात् संभूतेपार्वणंकुर्यादाब्दिकानिपृथक्पृथगितिवृद्धपराशरोक्तेः एकस्मिन्वाद्वयोर्वापिविद्युच्छस्त्रेणवाहते एकोद्दिष्टंसुतःकुर्यात्त्रयाणांदर्शवद्भवेदितिस्मृत्यंतराच्चेति पृथ्वीचंद्रोदयेउक्तं अपरार्केहेमाद्रौचैवं यत्तु अन्नेवशास्त्रादिनाहतस्तस्यवार्षिकमेवपार्वणमेकोद्दिष्टंवाकार्यं नतुश्राद्धद्वयं प्रसंगसिद्धेरिति पृथ्वीचंद्रोदये अन्नश्राद्धाकरणेग्रिमापरपक्षेदिनांतरेपार्वणेनैवकार्यमितितत्रैवोक्तं यद्यपिशस्त्रविषहतानांचशृंगिदंष्ट्रिसरीसृपैः आत्मनस्त्यागिनांचैवश्राद्धमेषांनकारयेदितिछागलेयोक्तेः शस्त्रादिहतानांश्राद्धंनिषिद्धं तथापिप्रमादमृतानांश्राद्धार्हत्वात्कार्यं वृद्धादिभिन्नबुद्धिपूर्वमृतानांतुनकार्यं यत्तुचतुर्दश्यांतर्पणीयाःसुसपिंडोदकक्रिया इतिब्राह्मेतत्तर्पणमितिशूलपाणिः लक्षणायांमानाभावात् पतितेनापिकर्तव्यंकर्तव्यंपतितस्यचेति गयादितुतद्विशेषविधिबलात्पतितानामपिकार्यमितिनव्य

गौडाः नत्वंतुसमत्वमागतस्येत्यादिवशात्कृतक्रियाणांकार्यंनान्येषामितिवयंप्रतीमः यत्तुमनुः नपैतृयज्ञियोहोमोलौकिकाग्नौविधीयतेन
दर्शेनविनाश्राद्धमाहिताग्नेर्विधीयतइति अत्रपूर्वार्द्धंहेतुत्वेनोक्तं तद्यथाश्रुतमेवसमन्वते पृथ्वीचंद्रोदयादयः आहिताग्नेःपिंडपितृयज्ञक
ल्पेनश्राद्धनिषेधार्थमिदंनतुसाकल्यादेरपीत्यस्मद्गुरवः कृष्णपक्षश्राद्धमन्यदिनेषुमाभूदाहिताग्नेर्दर्शेनियम्यतइतितुवयं दर्शेनपार्व
णेनविनाश्राद्धंन तेनक्वापिवार्षिकादावेकोद्दिष्टंनेतिहरिहरः इतिचतुर्दशी अमायांविशेषमाहपरार्केयमः हंसेकरस्थितेयातुअमावास्याक
रान्विता साज्ञेयाकुंजरच्छायाइतिबोधायनोब्रवीत् वनस्पतिगतेसोमेछायायाप्राङ्मुखीभवेत् गजच्छायातुसाप्रोक्तातस्यांश्राद्धंप्रकल्पये
त् भारते अजेनसर्वलोहेनवर्षास्वनियतव्रतः हस्तिच्छायासुविधिवत्कर्णव्यजनवीजितं श्राद्धंदद्यादितिशेषः आश्विनशुक्लप्रतिप
दिदौहित्रस्यमातामहश्राद्धमुक्तं हेमाद्रौसंग्रहेच जातमात्रोपिदौहित्रोविद्यमानेपिमातुले कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसितइति
इयंसंगवव्यापिनीग्राह्येतिनिर्णयदीपेउक्तं प्रतिपद्याश्विनेशुक्लेदौहित्रस्त्वेकपार्वणं श्राद्धंमातामहंकुर्यात्सपितासंगवेसदा जातमा
त्रोपिदौहित्रोजीवत्यपिचमातुले प्रातःसंगवयोर्मध्येआर्यस्यप्रतिपद्भवेदितिवचनात् अत्रसमूलत्वंविमृश्यं इदंचमलमासेनकार्यं
स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलेइतिनिषेधात् इदंचजीवत्पितृकेणैवकार्यमितिशिष्टाः इदंचशिष्टाचारात्सपिंडकंका
र्यमितिकेचित् पिंडरहितंतूक्तं जीवत्पितृकस्य मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति
दक्षेणपिंडनिषेधात् आन्वष्टक्यवद्विशेषवचनाभावाच्चेतिसंक्षेपः इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौमहालयनिर्णयः ॥
अथाश्विनशुक्लप्रतिपदिनवरात्रारंभः तन्निर्णयः तत्रभार्गवार्चनदीपिकायांदेवीपुराणे सुमेधाउवाच शृणुराजन्प्रवक्ष्या

मिचंडिकापूजनक्रमं आश्विनस्य सिते पक्षे प्रतिपत्सु शुभे दिने इत्युपक्रम्योक्तं शुक्ले तिथौ प्रकर्तव्यं प्रतिपच्चोर्ध्वगामिनी आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादश वापि वा अपराह्णे च कर्तव्यं शुद्धसंततिकांक्षिभिः इदं चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदोभावे ज्ञेयम् तथा तत्रैव देवीपुराणे डामरतंत्रे च देवीवचः अमायुक्ता न कर्तव्या प्रतिपत् पूजने मम मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः कलशस्थापनं तत्र स्यादरिष्टं जायते एवं मार्कंडेयदेवीपुराणयोः पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते नंदायां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति स्कांदेपि प्रतिपद्याश्विने मासि सा शुद्धा शुभदा भवेत् भाद्रपंचदशीकृष्णा तथायुक्ता न शस्यते विरुद्धफलदा सा हि पुत्रदारभयावहेति तथा वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा तथा देवीपुराणे यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम् प्रतिपच्छारदीं ज्ञात्वा सोश्नुते सुखमव्ययं यदि कुर्यादमायुक्तां प्रतिपत्स्थापने मम तस्य शापात्सुतं दत्वा भस्मशेषं करोम्यहं आग्रहात्कुरुते यस्तु कलशस्थापनं मम तस्य संपद्विनाशः स्यात् ज्येष्ठः पुत्रो विनश्यति अमायुक्ता न कर्तव्या प्रतिपच्चंडिकार्चने धनार्थिभिर्विशेषेण वंशहानिश्च जायते न दर्शकलया युक्ता प्रतिपच्चंडिकार्चने उदये द्विमुहूर्तापि ग्राह्या सोदयगामिनीति देवीपुराणे यान्त्वाश्वयुजि मासि स्यात् प्रतिपद्दर्शयान्विता शुद्धा ममार्चनं तस्यां शतयज्ञफलप्रदं रुद्रयामले अमायुक्ता सदा चैव प्रतिपन्निंदिता सता तत्र चेत्स्थापयेत् कुंभं दुर्भिक्षं जायते एवं प्रतिपत्सद्वितीयायां तु कुंभारोपणकर्मयीति यद्यपि रुद्रयामलडामरवचनिर्मूलं तथाप्यविरोधात् प्रचाराच्च तद्वचनानि लिख्यंते तिथितत्वे देवीपुराणेपि प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् तत्रैव

शरत्कालेमहापूजाक्रियतेयाचवार्षिकी साकार्योदयगामिन्यांनतत्रतिथियुग्मता तथा कुहूकाष्ठेपसंयुक्तांवर्जयेत्प्रतिपत्तिथिं राज्य
नाशायसाप्रोक्तानिंदिताचाम्बपूजनइति एषुवचनेषुकलशस्थापनग्रहणात् तदेवप्रथमदिनेनिषिध्यतेनतूपवासादि तस्यप्रतिपद्यप्य
मावास्येतियुग्मवाक्यात् शुक्लास्यात्प्रतिपत्तिथिः प्रथमतइतिदीपिकोक्तेः शुक्लपक्षेदर्शाविद्धेतिमाधवोक्तेश्च पूर्वदिनेप्राप्तस्यबाधे-
मानाभावादितिकेचित् वस्तुतस्तुपूर्वोक्तवाक्येषुचंडिकार्चनपूजाग्रहणादुपवासादेश्चांगत्वात्प्रधानदेवीपूजादावपिपरेतियुक्तं कल-
शस्थापनग्रहणंतूपलक्षणं अतएवदेवलः व्रतोपवासनियमेघटिकैकापियाभवेत् सातिथिस्तद्दिनेपूज्याविपरीतातुपैतृकइति अत्रघ
टिकामुहूर्तइतिगौडाः यदातुपूर्वदिनेसंपूर्णाशुक्लाचमूलापरदिनेवर्धतेतदासंपूर्णत्वादमायोगाभावाच्चपूर्वैव यानिचद्वितीयायोगनिषे
धकानिवचनानि केचित्पठंति तान्यपिशुक्लाधिकनिषेधपराणि परदिनेप्रतिपदोत्यंतासत्वेतुदर्शयुतापिपूर्वैवग्राह्या तदाहलल्लः
तिथिःशरीरंतिथिरेवकारणंतिथिःप्रमाणंतिथिरेवसाधनमिति यानित्वमायुक्ताप्रकर्तव्येत्यादीनिनृसिंहप्रसादेवचनानि तानिसमूल
त्वेसत्येतद्विषयाणि अत्रेदंतत्वम् पूर्वोक्तवाक्यानांसर्वेषांहेमाद्र्याद्यलिखितत्वेननिर्मूलत्वात्तैश्चान्यनिर्णयस्यानुक्तेः सामान्यनिर्णया
त् पूर्ववत्प्राप्तावपिगौडनिबंधेषुविशेषनिर्णयादौदयिकीग्राह्या तत्रापिघटिकैकेत्यस्यद्विमुहूर्तस्तुतित्वोक्तेर्द्विमुहूर्ताग्राह्या उदितेदै
वतेभानावित्यत्रद्विमुहूर्तोत्रिरन्हश्चेति औदयिक्याद्विमुहूर्तत्वनियमात् तेनउदयेद्विमुहूर्तापीत्याद्यनुसारोपिमुहूर्तमात्राकर्तव्येतिद्विमु
हूर्तस्तुतिः अन्यथाद्विमुहूर्तविधेर्वैयर्थ्यात् केचित्तुमुहूर्तमात्रेतिवचनात्ततोन्यूनत्वपरानेत्याहुः गौडाअप्येवम् अत्रदेवीपूजैवप्र
धानम् उपवासादिलंगं अष्टम्यांचनवम्यांचजगन्मातरमंबिकां पूजयित्वाश्विनेमासिविशोकोजायतेनरइतिहेमाद्रौभविष्ये त

स्याएव फलसंबंधात् नवमीतिथिपर्यंतं वृद्ध्या पूजाजपादिकमिति तत्रैव देवीपुराणात् शरत्काले महापूजा क्रियते या च वार्षिकीति मार्कंडेयपुराणाच्च पूर्ववचनादष्टमीनवमीपूजैव प्रधानमन्यत्सर्वमंगमिति गौडाः एकाहपक्षोऽपि कालिकापुराणे यस्त्वेकस्यामथाष्टम्यां नवम्यामथ साधकः पूजयेद्वरदां देवीं महाविभवविस्तरैरिति तत्त्वंतु राजसूयेन्ययागैः समप्रधानायाः सहिताअप्यवेष्टेरतपान्नाद्यकामं याजयेदित्येकत्वान्मध्येविधानाच्च यथा फलार्थो बहिः प्रयोगस्तथा नवरात्रमध्यस्थाया अष्टम्या नवम्या वा फलार्थः पृथक्प्रयोगः रूपनारायणधृतदेवीपुराणे महानवम्यां पूजेयं सर्वकामप्रदायिका सर्वेषु वत्सवर्णेषु तव भक्त्या प्रकीर्तिता कृत्वाप्नोति यशोराज्यपुत्रायुर्धनसंपदः साच काम्या नित्या च एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनं विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकामिति यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे न पूजयति दंभाद्वा द्वेषाद्वाप्यत्र भैरव क्रुद्धा भगवती तस्य कामानिष्टान्निहंति वै इति कालिकापुराणे फलनिंदाश्रुतेः वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनमिति तिथितत्त्वे देवीपुराणाच्च अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये एवं च विंध्यवासिन्यां नवरात्रोपवासतः एकभक्तेन नक्तेन तथैवायाचितेन च पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति यत्तु रूपनारायणीये भविष्ये एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिरिति तत्तामसपूजापरं विनामंत्रैस्तामसी स्यात्किरातानां तु संमतेति तंत्रे चोक्तेः मदनरत्ने देवीपुराणेपि कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां अयाचीत्वथवैकाशी नक्ताशी वाथवाब्बदः भूमौशायी नरश्चामंत्र्य कुमारीर्भोजयेन्मुदा वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरं बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः इति नंदि

कामं प्रतिपत्तिथिं विदुरिति मैथिलाः पक्षीति गौडाः तच्च पूजनं रात्रौ कार्यम् आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् — निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमादिति देवीपुराणात् संग्रहेपि आश्विने मासि मेघान्ते प्रतिपद्या तिथिर्भवेत् ॥ तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् रात्रिरूपा यतो देवी दिवारूपो महेश्वरः रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम् सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणं रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यमिष्यते नक्तव्रतमिदं यस्मादन्यथा नरके गतिरित्यादिवचनाच्च रात्रिव्रतं चैतदभिप्रेत्य माधवेनोक्तम् तस्य नक्तव्रतत्वादिति न तु रात्रिभोजनात् ननु मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम् आरंभे नवरात्रस्येत्यादिस्कान्दात् माधवोक्तेश्च नक्तमेव प्रधानमिति चेन्न नवरात्रोपवासतः इत्यादेरनुपपत्तेः तेन पाक्षिकनक्तानुवादोऽयम् नित्यानित्यसंयोगविरोधात् नत्वग्निहोत्रे दशमपक्षे प्राप्तस्य दध्ना जुहोतीत्यस्येन्द्रियकामहोमेऽनुवादो घटते नित्यवदनुवादायोगादित्युक्तं वार्तिके तथात्रापि तेनात्र तद्देवगुणात्फलमिति ज्ञेयं न तु रात्रेः कर्मकालत्वे तद्व्यापिनी पूर्वैव प्रतिपत्प्राप्नुयात् मैवं न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात् यथा पूर्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा स्वल्पापि परैव रामनवमीति प्रागुक्तं यथा वा निशीथे सतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणीयुक्ता परैवेति माधवेनोक्तं तथात्रापि वस्तुतस्तु रात्रेः कर्मकालत्ववचसां हेमाद्याद्यलिखनात् समूलत्वं विमृश्यमेव त्रिकालं पूजयेदित्यादिपूर्वविरोधाच्च माधवोक्तिस्तु पाक्षिकनक्तानुवाद इत्युक्तं तस्मात्सर्वपक्षेषु परैव प्रतिपदिति सिद्धम् अत्र केचिन्नवरात्रशब्दो नवाहोरात्रपरः द्वंद्वोऽसमाप्तिरष्टम्यां ह्रासे भाऽप्रतिपन्निशि प्रारंभो नवचंड्यास्तु नवरात्रमतोऽर्थवदि

तिदेवीपुराणादित्याहुः तन्न अतिह्रासवृद्ध्योर्न्यूनाधिकत्वापत्तेः अत्रमूलाभावाच्च तेननतिथिवाच्येवायं तदुक्तं तिथिवृद्धौतिथिह्रासे नवरात्रमपार्थकं अष्टरात्रेनदोषोयंनवरात्रतिथिक्षयेइति सचनवरात्रशब्दः क्वचिल्लक्षणयाकर्मवाची यथाप्रारंभोनवरात्रस्येत्यत्रेतिद रु प्रतिपदिचवैधृत्यादियोगनिषेधोभार्गवार्चनदीपिकायां देवीपुराणे त्वाष्ट्रेवैधृतियुक्ताचेत्प्रतिपच्चंडिकार्चने तयोरंतेविधातव्यंकलशारोपणंगृहेति चित्रावैधृतियुक्तापिद्वितीयायुताचेत्सैवग्राह्येत्युक्तं दुर्गोत्सवे भद्रान्विताचेत्प्रतिपत्तुलभ्यतेविरुद्धयोगैरपिसंगतासती सैवापराण्हेविबुधैर्विधेयाश्रीपुत्रराज्यादिविवृद्धिहेतुरिति यदातुवैधृत्यादिपरिहारेणप्रतिपन्नलभ्यते तदोक्तंतंत्रेवकात्यायनेन प्रतिपद्याश्विनेमासि भवेद्वैधृतिचित्रयोः आद्यपादौपरित्यज्य प्रारभेन्नवरात्रकमिति भविष्येपि चित्रावैधृतिसंपूर्णाप्रतिपच्चेद्भवेन्नृप त्याज्याद्यंशास्त्रयस्त्वाद्यास्तुरीयांशेतुपूजनमिति रुद्रयामलेपि वैधृतौपुत्रनाशःस्याच्चित्रायांधननाशनं तस्मान्नस्थापयेत्कुंभंचित्रायांवैधृतौतथा संपूर्णाप्रतिपद्देवचित्रायुक्तायदाभवेत् वैधृत्यावापियुक्तास्यात्तदामध्यंदिनेरवौ अभिजित्तुमुहूर्तंयत्तत्रस्थापनमिष्यतइति चित्रादिनिषेधेमूलंचिंत्यम् इदंकलशस्थापनंरात्रौनकार्यं नरात्रौस्थापनंकार्यंनचकुंभाभिषेचनमितिमात्स्योक्तेः भास्करोदयमारभ्ययावत्तुदशनाडिकाः प्रातःकालइतिप्रोक्तःस्थापनारोपणादिष्विति विष्णुधर्मोक्तेश्च रुद्रयामले स्नानंमांगलिकंकृत्वाततोदेवींप्रपूजयेत् शुभाभिर्मृत्तिकाभिश्चपूर्वंकृत्वातुवेदिकां यवान्वैवापयेत्तत्रगोधूमैश्चापिसंयुतान् तत्रसंस्थापयेत्कुंभंविधिनामंत्रपूर्वकं सौवर्णराजतंवापिताम्रंमृन्मयजंतुवेति अथपूजाविधिः सचजयंतीमंत्रेणनवाक्षरेणकार्यः तदुक्तंदुर्गाभक्तितरंगिण्यांदेवीपुराणे कुर्याद्देव्यास्तुमंत्रेणपूजांक्षीरघृतादिभिरित्युक्त्वा जयंतीमंगलाकालीभद्रकालीकपालिनी दु

र्गाक्षमाशिवाधात्रीस्वधास्वाहानमोस्तुते अनेनैवतुमंत्रेणजपहोमौतुकारयेदिति ॐ दुर्गेदुर्गेरक्षिणिस्वाहेतिनवाक्षरः तत्रप्रतिपदिशान्तरम्यंगां कृत्वा देशकालौसंकीर्त्यममेहजन्मनिदुर्गाप्रीतिद्वारासर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थंशारदनवरात्रप्रतिपदिविहितकलशस्थापनदुर्गापूजाकुमारीपूजादिकरिष्ये इतिसंकल्प्य महीद्यौरितिभूमिंस्पृष्ट्वा ओषधयःसमितियवान्निक्षिप्य आकलशेष्वितिकुंभंस्थाप्य इमंमेगंगेइतिजलेनापूर्य गंधद्वारामितिगंधं या ओषधीरितिसर्वौषधीः कांडात्कांडादितिदूर्वाः अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीतिसप्तमृदः याःफलिनीरितिफलं सहिरत्नानीतिपंचरत्नानि हिरण्यंक्षिप्त्वा युवासुवासाइतिवस्त्रेणावेष्ट्य पूर्णादर्वीतिपूर्णपात्रंनिधाय तत्रवरुणंसंपूज्य जीर्णायांनूतनायांवाप्रतिमायांदुर्गामावाह्यपूजयेत् तद्यथा पूर्वोक्तंमंत्रमुक्त्वा आगच्छवरदेदेविदैत्यदर्पनिषूदनि पूजांगृहाणसुमुखिनमस्तेशंकरप्रिये सर्वतीर्थमयंवारिसर्वदेवसमन्वितं इमंघटंसमागच्छतिष्ठदेवगणैःसह दुर्गेदेविसमागच्छसान्निध्यमिहकल्पय बलिंपूजांगृहाण त्वमष्टाभिःशक्तिभिःसहेत्यावाह्यपूर्वोक्तमंत्रेणषोडशोपचारैःपूजयित्वा माषभक्तबलिंकूष्मांडादिबलिंवानिवेदयेत् ततःकुमारीपूजा तदुक्तंहेमाद्रौस्कांदे एकैकांपूजयेत्कन्यामेकवृद्ध्यातथैवच द्विगुणंत्रिगुणंवापिप्रत्येकंनवकंतुवा तथा नवभिर्लभतेभूमिमैश्वर्यंद्विगुणेनतु एकवृद्ध्यालभेत्क्षेममेकैकेनश्रियंलभेत् एकवर्षातुयाकन्यापूजार्थेतांविवर्जयेत् गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते तेनद्विवर्षमारभ्यदशवर्षापर्यंताएवपूज्याः नत्वन्याः तासांचक्रमेणकुमारिकात्रिमूर्तिःकल्याणीरोहिणीकालीचंडिकाशांभवीदुर्गासुभद्रेतिनामभिःपूजाकार्या आसांचप्रत्येकंपूजामंत्राः फलविशेषाश्चतत्रैवज्ञेयाः सामान्यस्तु मंत्राक्षरमयींल-

क्ष्मींमातृणांरूपधारिणीं नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं एवमभ्यर्चनंकुर्यात्कुमारीणांप्रयत्नतः कंचुकैश्चैववस्त्रैश्चगंधपुष्पाक्षतादिभिः नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः तथा ग्रंथिस्फुटितशीर्ष्णांगीरक्तपूयव्रणांकितां जात्यंधांकेकरांकाणींकुरूपांतनुरोमशाम् संत्यजेद्रोगिणींकन्यांदासीगर्भसमुद्भवां तथा ब्राह्मणींसर्वकार्येषुजयार्थेनृपवंशजाम् लाभार्थेवैश्यवंशोत्थांसुतार्थेशूद्रवंशजां दारुणेचांत्यजातानांपूजयेद्विधिनानरइति अत्रवेदपारायणमप्युक्तंरुद्रयामले एवंचतुर्वेदविदोविप्रान्सर्वान्प्रसादयेत् तेषांचवरणंकार्यंवेदपारायणायवैइति तथा एकोत्तराभिवृद्ध्यातुनवमींयावदेवहि चंडीपाठंजपेच्चैवजापयेद्वाविधानतः तिथितत्वेवाराहीतंत्रे प्रणवंचादितोजप्त्वास्तोत्रंवासंहितांपठेत् अंतेचप्रणवंदद्यादित्युवाचादिपूरुषः आधारेस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः हस्तसंस्थापनादेवयस्मात्स्याद्विफलंभवेत् स्वयंचलिखितंयच्चशूद्रेणलिखितंभवेत् अब्राह्मणेनलिखितंतच्चापिविफलंभवेत् ऋषिच्छंदादिकंन्यस्यपठेत्स्तोत्रंविचक्षणः स्तोत्रेनदृश्यतेयत्रप्रणवंतत्रविन्यसेत् सर्वत्रपाठ्येविज्ञेयस्त्वन्यथाविफलंभवेत् एवंनवमीपर्यंतमन्वहंकुर्यात् अत्रविशेषोहेमाद्रौदेवीपुराणे यदाद्यदिवसेकुर्याच्चंडिकापूजनादिकं द्विगुणंतद्द्वितीयेह्नित्रिगुणंतत्परेहनि नवमीतिथिपर्यंतंवृद्ध्यापूजाजपादिकमिति एतेननवरात्रेपूजैवप्रधानं उपवासादिस्त्वंगमितिगम्यते तिथिह्रासेतुतिथिद्वयनिमित्तंपूजादिमहालयश्राद्धवदेकदिनेआहृत्याकार्यं वृद्धौतद्वदेवावृत्तिः ततोनवरात्रोपवासादिसंकल्पंकुर्यात् स्वस्थाशक्तौवन्येनवापूजादिकारयेत् स्वयंवाप्यन्यतोवापिपूजयेत्पूजयीतवेतितरंगिण्यांदेवीपुराणात् इदंचदेवीपूजनंशुक्रास्तादावपिकार्यं तदुक्तंधर्मप्रदीपे नष्टेशुक्रेतथाजीवेसिंहस्थेचबृहस्पतौ कार्याचैवस्वदेव्यर्चाप्रत्यब्दंकुलधर्मतइति मलमासेतुवचनाभावान्नभवति

अत्रसाश्वस्याश्वपूजनमुक्तम् मदनरत्नेदेवीपुराणे आश्वयुक्शुक्लप्रतिपत्स्वातीयोगेशुभेदिने पूर्वमुच्चैःश्रवानामप्रथमंश्रियमावहत् तस्मात्साश्वैर्नरैस्तत्रपूज्योसौश्रद्धयासह पूजनीयाश्चतुरगानवमींयावदेवहि शांतिःस्वस्त्ययनंकार्यंतदातेषांदिनेदिने धान्यंभल्लातकंकुष्ठंवचासिद्धार्थकास्तथा पंचवर्णेनसूत्रेणग्रथितंतेषांतुबंधयेत् वायव्यैर्वारुणैःसौरैःशाक्रैर्मंत्रैःसवैष्णवैः वैश्वदेवैस्तथाग्नेयैर्होमःकार्योदिनेदिने कल्पतरोत्वेतदग्रेन्यदपि ज्येष्ठायोगेसुरात्रगजाश्चाष्टौमहाबलाः पृथिवीमवहन्पूर्वंसशैलवनकाननां कुमुदैरावणोपद्मःपुष्पदंतोथवामनः सुप्रतीकोंजनोनीलस्तस्मात्तांस्तत्रपूजयेत् शाक्राद्दशात्समारभ्यनवम्यंतंचपूर्ववत् अश्ववद्धोमादीत्यर्थः अथप्रतिपदादिषुविशेषोदुर्गाभक्तितरंगिण्यांभविष्ये केशसंस्कारद्रव्याणिप्रदद्यात्प्रतिपद्दिने पक्वतैलंद्वितीयायांकेशसंयमहेतवे पट्टडोरमितिगौडपाठः दर्पणंचतृतीयायांसिंदूरालक्तकंतथा मधुपर्कंचतुर्थ्यांतुतिलकंनेत्रमंडनं पंचम्यामंगरागंचशक्त्यालंकरणानिच षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेत् सप्तम्यांप्रातरानीयगृहमध्येप्रपूजयेत् उपोषणमथाष्टम्यामात्मशक्त्याचपूजनं नवम्यामुग्रचंडायाःपूजांकुर्याद्बलिंतथा संपूज्यप्रेषणंकुर्याद्दशम्यांसारवोत्सवैः अनेनविधिनायस्तुदेवींप्रीणयतेनरः स्कंदवत्पालयेद्देवीतंपुत्रधनकीर्तिभिः कृत्यतत्त्वार्णवेलिंगे कन्यायांकृष्णपक्षेतुपूजयित्वार्द्रभेपिवा नवम्यांबोधयेद्देवींमहाविभवविस्तरैः शुक्लपक्षेचतुर्थ्यांतु देवीकेशविमोक्षणं प्रातरेवतुपंचम्यांस्नापयेच्छुभैर्जलैः षष्ठ्यांसायंप्रकुर्वीतबिल्ववृक्षेधिवासनं सप्तम्यांपत्रिकापूजामष्टम्यांचाप्युपोषणं पूजांचजागरंचैवनवम्यांविधिवद्बलिः विसर्जनंदशम्यांतुक्रीडाकौतुकमंगलैः अत्रनवम्यांबोधनासामर्थ्येषष्ठ्यांबोधनमितिस्मार्ताः फलभूमार्थिनःसमुच्चयंत्वन्ये नवम्यांमंत्रःकालिकापुराणे इषेमास्यसितेपक्षेनवम्यामा-

र्दमेदिवा श्रीवृक्षेबोधयामित्वांयावत्पूजांकरोम्यहं अत्रस्त्रीव्रतेविशेषः परिभाषायांज्ञेयः अथाशौचेविशेषोनिर्णयामृतेविश्वरूपनिबंधे आश्विनेशुक्लपक्षेतुप्रारब्धेनवरात्रके शावाशौचेसमुत्पन्नेक्रियाकार्याकथंबुधेः सूतकेवर्तमानेचतत्रोत्पन्नेसदाबुधैः देवीपूजाप्रकर्तव्या पशुयज्ञविधानतः सूतकेपूजनंप्रोक्तं दानंचैवविशेषतः देवीमुद्दिश्यकर्तव्यंतत्रदोषोनविद्यतइति कालादर्शेविष्णुरहस्येपि पूर्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः तत्कर्तव्यंनरैःशुद्धंदानार्चनविवर्जितमिति गौडनिबंधेतिथितत्वेप्युक्तं आश्विनकृष्णनवम्यादिशुक्लप्रतिपदादिषष्ठ्यादिसप्तम्यादिचैकंकर्म अतश्चमध्येआशौचपातेपिनदोषः संकल्पोव्रतसत्रयोरितिविष्णूक्तेरिति आरब्धंस्वयमेवकार्यं. अनारब्धंत्वन्येनकारयेदितिदिवोदासः रजस्वलात्वन्येनकारयेत् सूतकादिवृद्धिशेषवचनाभावात् स्त्रीणांचनवरात्रेतांबूलादिचर्वणंभवति तदुक्तंव्रतहेमाद्रौगारुडे गंधालंकारतांबूलपुष्पमालानुलेपनं उपवासेनदुष्यंति दंतधावनमंजनमिति एतत्सभर्तृकोपवासविषयं अन्यश्चात्रविशेषःपरिभाषायामुक्तः आश्विनशुक्लपंचम्यामुपांगललिताव्रतं महाराष्ट्रेषुप्रसिद्धं तत्रयद्यपिकस्यांकालविशेषोनोक्तस्तथापिरात्रौजागरणंकुर्याद्गीतवादित्रनिःस्वनैरितिरात्रौजागरोक्तेः शक्तिपूजायारात्रौप्राशस्त्याच्च. रात्रिव्यापिनीग्राह्येतिकेचित् वस्तुतस्तुवचनंविनारात्रिपूजायांमानाभावात् जागरस्यचांगत्वाद्युग्मवाक्यात् भुक्त्वाजागरणंनक्तेचंद्रार्घ्यव्रतेतथा ज्ञारव्रतेषुसर्वेषुरात्रियोगोविशिष्यतइति कालहेमाद्रौवचनाच्च पूर्वविद्धाग्राह्या रात्रिशब्दःपूर्वविद्धावचनइतिहेमाद्रिः अस्यचभुक्त्वाजागरणरूपत्वादितिसाधुप्रतीमः भुक्त्वाजागरणंयत्रेत्येकपदं तस्मिन्व्रतेइत्यर्थः अन्यथाभुक्त्वेत्यसंगतेः दिवोदासीयेप्येवं आश्विनशुक्लपक्षेमूलनक्षत्रेसरस्वतीस्थापनं यथोक्तंनिर्णयामृतेदेवीपुराणे मूलेषुस्थापनंदेव्याःपूर्वाषाढासुपूजनं उत्तरासुबलिं

दद्याच्छ्रवणेनविसर्जयेदिति रुद्रयामलेपि मूलऋक्षेसुराधीशपूजनीयासरस्वती पूजयेत्प्रत्यहंदेवयावद्वैष्णवमृक्षकं नाध्यापयेन्नच
लिखेन्नाधीयीतकदाचन पुस्तकेस्थापितेदेवविद्याकामोद्विजोत्तमः संग्रहे आश्विनस्यसितेपक्षेमेधाकामःसरस्वतीम् मूलेना-
वाहयेद्देवींश्रवणेनविसर्जयेत् मूलस्याद्यपादेआवाहनमितिशिष्टाः श्रवणाद्यपादेचविसर्जयेत् आदिभागोनिशायांतुश्रवणस्ययदा
भवेत् संप्रेषणंतदादेव्यादशम्यांचमहोत्सवइति चिंतामणौब्रह्मांडपुराणात् अथषष्ठी गौडनिबंधेदेवीपुराणे ज्येष्ठानक्षत्रयुक्ता-
यांषष्ठ्यांबिल्वाभिमंत्रणं सप्तम्यांमूलयुक्तायांपत्रिकायाःप्रवेशनं पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं उत्तरेणनवम्यांतुबलिभिःपू
जयेच्छिवाम् श्रवणेनदशम्यांतुप्रणिपत्यविसर्जयेत् कालिकापुराणे बोधयेद्बिल्वशाखायांषष्ठ्यांदेवींफलेषुच सप्तम्यांबिल्वशा
खांतामाहृत्यप्रतिपूजयेत् पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत् जागरंचस्वयंकुर्याद्बलिदानंमहानिशि प्रभूतबलिदानंतुनवम्यां
विधिवच्चरेत् विसर्जनंदशम्यांतुकुर्याद्वैसारवोत्सवैः धूलिकर्दमनिक्षेपैःक्रीडाकौतुकमंगलैः अत्रसर्वत्रतिथिनक्षत्रयोगादरोमु
ख्यःकल्पः तदभावेतुतिथिरेवग्राह्या तिथिःशरीरंदेवस्यतिथौनक्षत्रमाश्रितं तस्मात्तिथिंप्रशंसंतिनक्षत्रंनतिथिंविनेति विद्या-
पतिलिखितवचनात् तिथिनक्षत्रयोर्योगेद्वयोरेवानुपालनं योगाभावेतिथिर्ग्राह्यादेव्याःपूजनकर्मणीति तत्रैवदेवलोक्तेश्च अत्र-
चपत्रीप्रवेशात्पूर्वेद्युः सायंकालेषष्ठ्यभावेतत्पूर्वदिनेधिवासनंकार्यं सायंकालेत्यंतासत्त्वेत्वधिवासनलोपः षष्ठ्यांसायंप्रकुर्वीत
बिल्ववृक्षेधिवासनमितिपूर्ववचनादितिकल्पतरुः सायंस्मृतिःफलातिशयमात्रार्थानतुकर्मलोपइत्याचार्यचूडामणिः अत्रक्रमः बिल्व-
समीपंगत्वादेवींबिल्वंचसंपूज्यप्रार्थयेत् तत्रमंत्रः रावणस्यवधार्थायरामस्यानुग्रहायच अकालेब्रह्मणाबोधोदेव्यास्त्वयिकृतःपुरा

अहमप्याश्रितःषष्ठ्यांसायान्हेबोधयाम्यतः श्रीशैलशिखरेजातश्रीफलःश्रीनिकेतनः नेतव्योसिसमागच्छपूज्योदुर्गास्वरूपतइति एवंदेवीमधिवास्यपरदिनेनिमंत्रितबिल्वशाखापत्रीप्रवेशपूजांकुर्यात् तदुक्तंहेमाद्रौलैंगे मूलाभावेतुसप्तम्यांकेवलायांप्रवेशयेत् युग्माभ्यांनवबिल्वस्यफलाभ्यांशाखिकांतथा तत्रैवप्रतिमांदेव्याः स्नात्वाप्युक्ष्यप्रवेशयेत् अत्रचोपवासपूजादावौदयिकीसप्तमीग्राह्या नतुयुग्मवाक्यात् पूर्वा युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया रवेरुदयमीक्षंतेनतत्रतिथियुग्मतेति कृत्यतत्वार्णवोदाहृतवचनात् भगवत्याः प्रवेशादिविसर्गांताश्चयाःक्रियाः तिथावुदयगामिन्यांसर्वास्ताःकारयेद्बुधः इतितिथितत्वेनंदिकेश्वरपुराणाच्च दुर्गाभक्तितरंगिण्यामप्येवम् तत्रापिघटिकातोन्यूनत्वेपरानकार्या व्रतोपवासनियमे घटिकैकापियाभवेदिति देवलोक्तेरितिगौडाः दाक्षिणात्यास्तुपूर्ववचनमदृष्ट्वा युग्मवाक्यात्पूर्वांकुर्वंति पत्रिकापूजाचपूर्वाण्हेएवकार्या नतुमूलानुरोधान्मध्यान्हादाविति कृत्यतत्वार्णवेउक्तं पत्रिकास्तुरंभाकचीहरिद्राचजयंतीबिल्वदाडिमौ अशोकोमानकश्चधान्यादिनवपत्रिकाइतितत्रैवोक्ताः अस्यामेवसप्तम्यांदेवीत्रिरात्रमुक्तंहेमाद्रौ प्रतिपदादिनवतिथिषूपवासकरणासामर्थ्येसप्तम्यादिदिनत्रयेवाकुर्यात् तदाह धौम्यः आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रंवापिकर्तव्यंसप्तम्यादियथाक्रमं अतएवहेमाद्रौदेवीपुराणेमंगलाव्रते आश्विनेवाथवामाघेचैत्रेवाश्रावणेपिवा कृष्णाष्टम्यादिकर्तव्यंव्रतंशुक्लावधिंहरेः यावत्शुक्लाष्टमीशक्रउपोष्यात्तुविधानतः दानंहोमोजपःपूजाकन्याभोज्यास्तथान्वहं महाभैरवरूपेणअस्थिमालाधराश्चये पूजनीयाविशेषेणवस्त्रैर्ग्रामपुरादिषु इतिमासचतुष्टयेभिधाय अन्यत्रापि अथवानवरात्रंचसप्तपंचत्रिकंदिवा एकभक्तेननक्तेनायाचितोपोषितैःक्रमादिति पूजयेताश्विनेशक्रयावच्छुक्लाष्टमीभवेत् सर्वकार्याणि

सिद्ध्यंतिशक्रनास्त्यत्रसंशयइत्युक्तं दिवेत्येकरात्रमुक्तं देवीपुराणे नवरात्रव्रतेशक्तस्त्रिरात्रंचैकरात्रकं व्रतंचरतियोभक्तस्तस्मैदास्यामिवां-
छितमिति तत्रापिसप्तम्याःपूजनेपूर्वोक्तोनिर्णयः अत्रतिथियौगपद्येतंत्रेणोपवासः तिथिद्वयनिमित्तपूजादिकंतुभेदेन अत्रविशेषोनि-
र्णयामृतेभविष्ये सप्तम्यांनवगेहानिदारुजानिनवानिच एवंवावित्तभावेनकारयेत्सुसमाहितः दुर्गागृहंप्रकर्तव्यंचतुरस्रंसुशोभनं त
न्मध्येवेदिकांकुर्याच्चतुर्हस्तांसमांशुभां तस्यांसिंहासनंक्षौमंकंबलाजिनसंयुतं तत्रदुर्गांप्रतिष्ठाप्यसर्वलक्षणसंयुतां भुजैश्चतुर्भिरु-
चिरैर्दशभिर्वाविभूषितां तप्तहाटकवर्णाभांत्रिनेत्रांशशिशेखरां अनेककुसुमाकीर्णांकपर्दैनसुशोभितां नितंबबिंबसन्नद्धकिंकिणी
क्वाणनादिनीं शूलचक्रदंडशक्तिवज्रचापासिधारिणी घंटाक्षमालाकरकपानपात्रलसत्करां तदग्रेछिन्नशिरसंमाहिषंरुधिराप्लुतं निःसृ
तार्धतनुकंठनालेचर्मासिधारिणं देवीधृतकरग्रीवंशूलेनोरसिताडितं नागपाशेनविक्षिप्तंहर्यक्षेणापिविद्रुतं वमद्रुधिरवक्रेणधुन्वतो
र्ध्वंसटान्रुषा सर्वतोमातृचक्रेणसेव्यमानांसुरैस्तथेति तत्रदेवीप्रकर्तव्याहैमीवाराजतीतथा मृद्वार्क्षीलक्षणोपेताखड्गशूलेचपूजयेत्
वार्क्षीदारुमयी देवीमूर्तिस्थापनेविशेषोदुर्गाभक्तितरंगिण्यांदेवीपुराणे याम्यास्यांशुभदादुर्गापूर्वास्याजयवर्धिनी पश्चिमाभिमु
खीनित्यंनस्थाप्यासौम्यदिङ्मुखी प्रतिमाभावेविशेषस्तत्रैव हैमराजतमृद्धातुशैलचित्रार्पितापिवा खड्गशूलेर्चितादेवीसर्वकामफ
लप्रदा यद्यदस्यायुधंप्रोक्तंतस्मिंस्तांप्रतिपूजयेत् देवीभक्त्यार्चितापुंसांराज्यायुःसुतसौख्यदा इत्यतत्वापर्वेकालिकापुराणे लिंग
स्थांपूजयेद्देवींमंडलस्थांतथैवच पुस्तकस्थांमहादेवींपावकेप्रतिमासुच चित्रेचत्रिशिखेखड्गेजलस्थांवापिपूजयेत् बिल्वपत्रैर्यजे
द्देवींतथाजातीप्रसूनकैः नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः भगलिंगाभिधानैश्च भगलिंगप्रगीतकैः भगलिंगक्रियाभिश्चप्रीणये

हरचंडिकां परैर्नाक्षिप्यतेयस्तुयःपरान्नाक्षिपत्यपि नतस्यक्रुद्धाभगवतीशापंदद्यात्सुदारुणं चित्रमृन्मयादौस्नानाद्यसंभवेतन्त्रेचोक्तम् अंतिकेस्थापितेखड्गे स्नापयेद्दर्पणेथवेति अथसप्तमीपूजाविधिः प्रतिपद्युक्तविधिनाफलसंकीर्तनांतेनवपत्रिकामृन्मयदुर्गापूजाबलिदानानिकरिष्यइतिसंकल्प्यपूर्वनिमंत्रितबिल्वसमीपंगत्वासंपूज्य आगच्छसर्वकल्याणीतिपूर्वोक्तमंत्रंपठित्वा बिल्ववृक्षमहाभागसदात्वंशंकरप्रिय गृहीत्वातवशाखांचदेवीपूजांकरोम्यहं शाखाछेदोद्भवंदुःखंनचकार्यंत्वयाप्रभो गृहीत्वातवशाखांचपूज्यादुर्गेतिचस्मृतिः उत्तिष्ठपत्रिकेदेविसर्वकल्याणहेतवे पूजांगृहाणसकलामस्माकंवरदाभव मेरुमंदारकैलासहिमवच्छिखरेगिरौ जातश्रीफलवृक्षत्वमंबिकायाःसदाप्रियः इतिसंप्रार्थ्य ॐछिंधिफट्फट् ॐहुंफट्स्वाहेतिछित्वासंपूज्य ॐचामुंडेचलचलइतिवाद्यघोषेणदेवींतांचगृहंप्रवेश्य आरोपितासिदुर्गेत्वंमृन्मय्यांश्रीफलेपिच स्थिरानितोत्वं भूत्वाचगृहलक्ष्मिकासदाभवेतिस्थिरीकृत्यरंभादिपत्रिकाः पंचगव्येनपंचामृतेनचस्नापयित्वावस्त्रेणावेष्ट्यस्थापयेत् ततःपूर्ववत्संकल्पंकृत्वाऽक्षतानादायदेवीमावाहयेत् तत्रमंत्रः आवाहयाम्यहंदेविमृन्मय्यांश्रीफलेतथा कैलासशिखराद्देविविंध्याद्देर्हिमपर्वतात् आगत्यबिल्वशाखायांचंडिकेकुरुसन्निधिं स्थापितासिमयादुर्गेपूजयेत्वांप्रसीदमे आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते दुर्गेदुर्गस्वरूपासिस्वतेजोमयेचिंते सदानंदकरेदेविप्रसीदममसिद्धये एह्येहिभगवत्येवशत्रुक्षयजयप्रदे भक्तितःपूजयामित्वांदुर्गेदेविसुरार्चिते पल्लवैश्चफलोपेतैःपुष्पैश्चकुसुमनोहरैः पल्लवैसंस्थितेदेविपूजयेत्वांप्रसीदमे दुर्गेदेवीहागच्छसांनिध्यमिहकल्पय यज्ञभागान्गृहाणत्वंयोगिनीकोटिभिःसहेति ततोमूलमंत्रेणपाद्यादिगंधांतोपचारैः अमृतोद्भवश्रीवृक्षशंकरस्यसदाप्रियं बिल्वपत्रंप्रयच्छामिपवित्रंतेसुरेश्वरीतिबिल्वपत्रम्

ब्रह्मविष्णुशिवादीनांद्रोणपुष्पंसदाप्रियं तत्तेदुर्गेप्रयच्छामिसर्वकामार्थसिद्धयइतिद्रोणपुष्पंनिवेद्य धूपादिदक्षिणांतांपूजांमूलेनकृत्वा
प्रार्थयेत् ओम्महिषघ्निमहामायेचामुंडेमुंडमालिनि आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते कुंकुमेनसमालब्धेचंदनेनविलेपि
ते बिल्वपत्रकृतापीडेदुर्गेहंशरणंगतः रूपंदेहियशोदेहिभगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे सर्वमंगलमा-
गल्येइतिचसंप्रार्थ्यपत्रिकाःपूजयेत् कदल्यांब्रह्माणीं दाडिमेरक्तदंतिकां धान्येलक्ष्मीं हरिद्रायांदुर्गां मानेचामुंडाम् कचोकालि
कां बिल्वेशिवां अशोकेशोकरहितां जयंत्यांकार्तिकींचावाह्यसंपूज्यदुर्गायैबलिंदद्यात् अस्त्रशस्त्रादिपूजावक्ष्यते ततस्तुतिंपठेत् न
दुक्तंशिवरहस्ये दुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियाम् सर्वलोकप्रणेत्रींचप्रणमामिसदाशिवाम् मंगलांशोभनांशुद्धांनिष्क
लांपरमांकलां विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहं सर्वदेवमयींदेवींसर्वरोगभयापहां ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमां विंध्य
स्थांविंध्यनिलयांदिव्यस्थाननिवासिनीं योगिनींयोगमातांचचंडिकांप्रणमाम्यहं ईशानमातरंदेवीमीश्वरीमीश्वरप्रियां प्रणतोस्मि
सदादुर्गांसंसारार्णवतारिणीं यइदंपठतस्तोत्रंशृणुयाद्वापियोनरः समुक्तःसर्वपापैस्तुमोदतेदुर्गयासह अथमहाष्टमी साचपरयुता शु
क्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेति ब्रह्मवैवर्तात् मदनरत्नेस्मृतिसंग्रहे शरन्महाष्टमीपूज्यानवमी
संयुतासदा सप्तमीसंयुतानित्यंशोकसंतापकारिणी जंभेनसप्तमीयुक्तापूजितातुमहाष्टमी इंद्रेणनिहतोजंभस्तस्माद्दानवपुंगवः तस्मा
त्सर्वप्रयत्नेनसप्तमीमिश्रिताष्टमी वर्जनीयाप्रयत्नेनमनुजैःशुभकांक्षिभिः सप्तमीशल्यसंयुक्तांमोहादज्ञानतोपिवा महाष्टमींप्रकुर्वा ५५
णोनरकंप्रतिपद्यते सप्तमीकलयायत्रपरतश्चाष्टमीभवेत् तेनशल्यमिदंप्रोक्तंपुत्रपौत्रक्षयप्रदम् तथा पुत्रान्हंतिपशून्हंति

हंतिराष्ट्रंसराजकं हंतिजातानजातांश्चसप्तमीसहिताष्टमी तेननात्रत्रिमुहूर्तवेधः तदाघटिकामात्राप्योदयिकी ग्राह्या व्रतोपवासनियमे घटिकै
कापियाभवेद्दिति देवलोक्तेः गौडाअप्येवमाहुः अतएवोक्तं भोजराजेन नचसप्तमीशल्यसप्तमोपहतेति इयंभौमेतिप्रशस्ता अष्टम्यामुदितेसूर्ये
दिनांतेनवमीभवेत् कुजवारोभवेत्तत्रपूजनीयाप्रयत्नतइति मदनरत्नेवचनात् सप्तमीशल्यसंविद्धावर्जनीयासदाष्टमी स्तोकापिसामहा
पुण्यायस्यांसूर्योदयोभवेदिति मदनरत्नेस्मृतिसमुच्चयवचनात् अष्टमीनवमीयुक्तानवमीचाष्टमीयुतेति पाद्मवचनाच्च इयमेवमूलयुक्ता
चेन्महानवमीसंज्ञा आश्वयुक्शुक्लपक्षेयाष्टमीमूलेनसंयुता सामहानवमीप्रोक्तात्रैलोक्येपिसुदुर्लभेति हेमाद्रौस्कांदात् मूलयुक्तापि
सप्तमीयुताचेत्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे मूलेनापिहिसंयुक्तासदात्याज्याष्टमीबुधैः लेशमात्रेणसप्तम्याअपिस्याद्यदिदूषितेति
महाष्टमीपूर्वेद्युः पूर्वापह्नव्यापित्वे पूर्वान्यथापरैवेति निर्णयदीपमतं एतच्चतुच्छत्वादुपेक्ष्यं रूपनारायणधृतेदेवीपुराणे सप्तमीवेधसंयु-
क्तायेः कृतातुमहाष्टमी पुत्रदारधनैर्हीनाभ्रमंतीहपिशाचवत् यत्तुसप्तम्यामुदितेसूर्येपरतोयाष्टमीभवेत् तत्रदुर्गोत्सवंकुर्यान्नकुर्याद्दप
रेहनीति विश्वरूपनिबंधवचनंतदाश्विनकृष्णाष्टमीविषयं कन्यायांकृष्णपक्षेतुपूजयित्वाष्टमीदिने नवम्यांबोधयेद्देवींगीतवादित्रनिः
स्वनैरिति देवीपुराणे तत्रापिपूजेत्युक्तेरितिहेमाद्रौनिर्णयामृतेचोक्तं यानितु भद्रायांभद्रकाल्याश्चमध्येस्यादर्चनक्रिया तस्माद्वैसप्तमीवि
द्धाकार्यादुर्गाष्टमीबुधैरिति यच्च मोहचूलोत्तरब्राह्मेच आश्विनस्यसिताष्टम्यामर्धरात्रेतुपार्वती भद्रकालीसमुत्पन्नापूर्वाषाढासमायु
तेतितथा नचाष्टम्यांभद्रकाली दक्षयज्ञविनाशिनी प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसहेति यच्चमदनरत्ने महाष्टम्याश्विनेमा
सि शुक्लाकल्याणकारिणी सप्तम्यापियुताकार्यामूलेनतुविशेषतइति तानिपरदिनेष्टम्याभावविषयाणीतिमदनरत्नेउक्तं यत्तुतत्रै

वपरदिनेष्टमीसत्त्वेपिपूर्वविद्धाविधायकंवचनं यदाष्टमीतुसंप्राप्यत्वस्तंयातिदिवाकरः तत्रदुर्गोत्सवंकुर्यान्नकुर्यादपरेहनि दुर्भिक्षंतत्र
जानीयान्नवम्यांयत्रपूज्यतइतितत्परदिने दशम्यांनवम्याभावविषयं यदासूर्योदयेनस्यान्नवमीचापरेहनि तदाष्टमींप्रकुर्वीतसप्त
म्यासहितांनृपेतितत्रैवस्मृतिसंग्रहोक्तेः उत्तरास्तिथयोयत्रक्षयंयांतिनराधिप पूर्वाष्टमीतदाकुर्यादन्यथात्वशुभंभवेदितिदुर्गोत्सवो
क्तेश्चेतिमदनरत्ने वस्तुतस्तु इदंवचनद्वयं अष्टमीनवम्योः सूर्योदयद्वयसंबंधपरं अतएवनवमींचेतिचकारादष्टमीच तिथयइतिब
हुवचनादष्टमीनवमीदशम्युक्ता अन्यथापूर्वोक्तविरोधादितिदिक् यत्तु अहंभद्रात्वभद्राहंनावयोरंतरंक्वचित् सर्वसिद्धिंप्रदास्यामि
भद्रायामर्चितान्वहमिति देवीपुराणे तद्विष्टिकरणमध्ये पूजाविधानार्थं विष्टिंत्यक्त्वामहाष्टम्याममपूजांकरोतियः तस्यपूजाफलंन-
स्यात्तेनाहमवमानितेतितत्रैवोक्तेरितिनिर्णयामृते तथाकालिकापुराणे सप्तम्यांपत्रिकापूजाअष्टम्यांचाप्युपोषणं पूजाचजागरश्चैव
नवम्यांविधिवद्बलिरिति अष्टम्युपवासश्चपुत्रवतानकार्यः उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत् यथातथावापूतात्माव्रतीदेवीं
प्रपूजयेदितितत्रैवोक्तेः रूपनारायणीयेब्राह्मे अतोर्थंपूजनीयासातस्मिन्नहनिमानवैः उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः
पशुभिःपानकैर्हृद्यैर्गीतोजागरणेनच दुर्गागृहेचशस्त्राणिपूजितव्यानिपंडितैः वाद्यभांडानिचिह्नानिध्वजचान्यायुधानिच अत्रवि
शेषोहेमाद्रौनिर्णयामृतेभविष्ये आश्वयुक्कृष्णपक्षस्यअष्टमीमूलसंयुता सामहानवमीनामत्रैलोक्येपिसुदुर्लभा कन्यागतेस
वितरिशुक्लपक्षेष्टमीयुता मूलनक्षत्रसंयुक्तासामहानवमीस्मृता नवम्यांपूजितादेवीददात्यभिमतंफलं सापुण्यासापवित्राचसाध
न्यासुखप्रदायिनी तस्यांसदापूजनीयाचामुंडामुंडमालिनी सदेत्युक्तेर्नित्यतापि तस्यांयेह्युपयुज्यंतेप्राणिनोमहिषादयः सर्वे

तेस्वर्गतिंयांतिस्थतांपापंनविद्यते यावन्नचालयेद्गात्रंपशुस्तावन्नहन्यते नतथाबलिदानेनपुष्पधूपविलेपनैः यथासंतुष्यतेमेषैर्महिषै
र्विंध्यवासिनी एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेननक्तेनस्वशक्त्यायाचितेनच पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे गृहे
गृहेभक्तिपरैर्ग्रामेग्रामेवनेवने स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः वैश्यैःशूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्चमानवैः स्त्रीभिश्चकुरु
शार्दूलतद्विधानमिदंशृणु जयाभिलाषीनृपतिःप्रतिपत्प्रभृतिक्रमात् लोहाभिसारिकंकर्मकारयेद्यावदष्टमीति लोहाभिसारिक
कर्मविधानंतत्रैवोक्तं प्रागुदक्प्रवणेदेशेपताकाभिरलंकृतं मंडपंकारयेद्दिव्यंनवसप्तकरंपरं षोडशहस्तमित्यर्थः आग्नेय्यांकारयेत्कुं
डंहस्तमात्रंसुशोभनं मेखलात्रयसंयुक्तंयोन्याश्वत्थदलाभया राजचिन्हानिसर्वाणिशस्त्राण्यस्त्राणियानिच आनीयमंडपेतानिस
र्वाण्यत्राधिवासयेत् ततस्तुब्राह्मणःस्नातःशुक्लांबरधरःशुचिः ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्धुतं शस्त्रास्त्रमंत्रैर्होतव्यंपा
यसंघृतसंयुतं हुतशेषंतुरगाणांराजानमुपहारयेत् लोहाभिसारिकंकर्मतेनैवऋषिभिःस्मृतं धृतपल्ययनानश्वान्गजांश्चस
मलंकृतान् भ्रामयेन्नगरेनित्यंबंदिघोषपुरःसरं प्रत्यहंनृपतिःस्नात्वासंपूज्यपितृदेवताः पूजयेद्राजचिन्हानिफलमाल्यविलेप
नैः यस्याभिसरणाद्राज्ञोविजयःसमुदाहृतः पूजामंत्रान्प्रवक्ष्यामिपुराणोक्तानहंतव यैःपूजिताःप्रयच्छंतिकीर्तिमायुर्यशोबल
अथमंत्राविष्णुधर्मोत्तरोक्ताः छत्रस्य यथांबुदश्छादयतिशिवायेमांवसुंधरां तथाछादयराजानंविजयारोग्यवृद्धये चामरस्य
शशांककरसंकाशक्षीरडिंडीरपांडुर प्रोत्सारयाशुदुरितंचामरामरदुर्लभ अश्वानांवृद्ध्यर्थंरेवंतपूजनमहंकारये सूर्यपुत्रमहा
बाहोछायाहृदयनंदन शांतिंकुरुतुरंगाणांरेवंतायनमोनमः अनेनमंत्रेणपूजा अथाश्वस्य गंधर्वकुलजातस्त्वंमाभूयाःकुलदू

षकः ब्रह्मणःसत्यवाक्येनसोमस्यवरुणस्यच प्रभावाच्चहुताशस्यवर्धयत्त्वंतुरंगमान् तेजसाचैवसूर्यस्यमुनीनांतपसातथा रुद्रस्यब्र
ह्मचर्येणपवनस्यबलेनच स्मरत्वंराजपुत्रत्वंकौस्तुभंचमणिंस्मर यांगतिंब्रह्महागच्छेन्मातृहापितृहातथा भ्रूणहानृतवादीचक्षत्रियश्चपरा
ङ्मुखः सूर्याचंद्रमसौवायुर्यावत्पश्यंतिदुष्कृतं व्रजाश्वतांगतिंक्षिप्रंतच्चपापंभवेत्तव निकृतोयदिगच्छेथायुद्धाध्वनितुरंगम रिपून्वि
जित्यसमरेसहभ्रात्रासुखीभवेति अथध्वजस्य शक्रकेतोमहावीर्यश्यामवर्णार्चयाम्यहं पत्रिराजनमस्तेस्तुतथानारायणध्वज काश्य
पेयारुपाक्ष्मातर्नागारेविष्णुवाहन अप्रमेयदुराधर्षरणेदेवारिसूदन गरुत्मान्मारुतगतिस्त्वयिसन्निहितोयतः सारवंत्यायुधान्यत्ररक्ष-
त्वंचरिपून्दह अथपताकायाः हुतभुग्वसवोरुद्रावायुःसोमोमहर्षयः नागकिन्नरगंधर्वयक्षभूतगणग्रहाः प्रमथास्तुसहादित्यैर्भूतेशो
मातृभिःसह शक्रःसेनापतिःस्कंदोवरुणश्चाश्रितास्त्वयि प्रदहंतुरिपून्सर्वान्राजाविजयमृच्छतु यानिप्रयुक्तान्यरिभिरायुधा-
निसमंततः पतंतूपरिशत्रूणांहतानितवतेजसा हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा कालनेमिवधेयद्वद्यद्वत्त्रिपुरघातने शोभिता
सितथैवाद्यशोभयास्मांश्चसंस्मर नीलान्श्वेतानिमान्दृष्ट्वानश्यंत्वाशुनृपारयः व्याधिभिर्विविधैर्घोरैःशस्त्रैश्चयुधिनिर्जिताः पूतना
रेवतीनाम्नाकालरात्रिश्चयास्मृता दहत्वाशुरिपून्सर्वान्पताकेत्वंमयार्चिता अथगजस्य कुमुदैरावणोपद्मःपुष्पदंतोथवामनः सुप्रती
कोंजनोनीलएतेष्टौदेवयोनयः तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः मंदोभद्रोमृगश्चैवगजःसंकीर्णएवच वनेवनेप्रसूतास्ते-
सूर्यानिस्कमहांतिच पांतुत्वांवसवोरुद्राआदित्याःसमरुद्गणाः भर्तारंरक्षनागेंद्रस्वामिवत्प्रतिपाल्यतां अवाप्नुहिजयंयुद्धेगमने-
स्वस्तिनोव्रज श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्याज्जवोनिलात् स्थैर्यंगिरेर्जयंरुद्राद्यशोदेवात्पुरंदरात् युद्धेरक्षंतुनागास्त्वादिशा

श्चसहदेवतेः अश्विनौसहगंधर्वैः पांतुत्वांसर्वतःसदेति अथखड्गमंत्रः असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः श्रीगर्भोविजयश्चैवधर्मधारस्तथैवच एतानितवनामानिस्वयमुक्तानिवेधसा नक्षत्रंकृत्तिकातेतुगुरुर्देवोमहेश्वरः रोहिण्यश्चशरीरंतेदैवतंचजनार्दनः पितापितामहोदेवस्त्वंमांपालयसर्वदा नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धोमर्षणश्च अतितेजास्तथैवच इयंयेनधृताक्षोणीहतश्चमहिषासुरः तीक्ष्णधारायशुद्धायतस्मैखड्गायतेनमः अथछुरिकायाः सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहंशुभं चंडिकायाःप्रदत्तासि सर्वदुष्टनिबर्हिणी तयाविस्तारितावासिदेवानांप्रतिपादिता सर्वसत्वांगभूतासिसर्वाशुभनिबर्हिणी छुरिकेरक्षमांनित्यंशांतिंयच्छनमोस्तुते अथकट्टारकपूजा रक्षांगानिगजान्रक्षरक्षवाजिधनानिच ममदेहंसदारक्षकट्टारकनमोस्तुते कट्टारकोमध्यदेशेकटारीतिप्रसिद्धः धनुःपूजा सर्वायुधमहामात्रसर्वदेवारिसूदन चापमांसमरेरक्षसाकंशरवरैरिह धृतंकृष्णेनरक्षार्थंसंहारायहरेणच त्रयीमूर्तिगतंदेवंधनुस्त्वांनमाम्यहं कुंतपूजा प्रासपातयशत्रूंस्त्वंमनयानाकमायया गृहाणजीवितंतेषांममसैन्यंचरक्षतां चर्मपूजा शर्मप्रदस्त्वंसमरेचर्मन्सैन्येयशोधमे रक्षमांरक्षणीयोहंतापनेयनमोस्तुते अथकनकदंडमंत्रः प्रोत्सारणायदुष्टानांसाधुसंरक्षणायच ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये यशोदेहिसुखंदेहिजयदोभवभूपतेः ताडयस्वरिपून्सर्वान्हेमदंडनमोस्तुते अथदुंदुभिमंत्रः दुंदुभेत्वंसपत्नानांघोषोहृदयकंपनः भवभूमिपसैन्यानांतथाविजयवर्धनः यथाजीमूतघोषेणप्रहृष्यंतिचबर्हिणः तथास्तुतवशब्देनहर्षोस्माकंमुदावहः यथाजीमूतशब्देनस्त्रीणांत्रासोभिजायते तथात्रतवशब्देनत्रस्यंत्वस्मद्द्विषोरणे अथशंखमंत्रः पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलम् विष्णुनाविधृ

नोनित्यमृतः शांतिप्रदोभव अथसिंहासनमंत्रः विजयोजयदोजेतारिपुघातीशुभंकरः दुःखहाधर्मदःशांतःसर्वारिष्टविनाशनः एते
वैसन्निधोयस्मात्त्वसिंहासमहाबलाः तेनसिंहासनेतित्वं देवैर्मंत्रैश्चगीयसे त्वयिस्थितःशिवःशांतस्त्वयिशक्रःसुरेश्वरः नमस्तेसर्वतो-
भद्रभद्रदोभवभूपतेः त्रैलोक्यजयसर्वस्वसिंहासननमोस्तुते नथैवकर्मचिन्हानिस्त्वानिपूज्यानिशिल्पिभिः लोहाभिसारिकंक
र्मकृत्वैवंमंत्रपूर्वकं नियमंकृत्वातथाष्टम्यांपूर्वाण्हेस्नानमाचरेत् कुंकुमचंदनचंपकचतुःसमैःशैलपिष्टैश्च चर्चितगात्रीदेवीकुसु
मैरभ्यर्चयेद्बहुभिः कुसुदैःसपद्मपुष्पैःसधूपदीपैःसनैवेद्यैः मांसैर्बल्युपहारैर्मंगलशब्दैःसमुच्छलितैः विहितछत्रैर्यानैःस्यंदन-
सितशस्त्रधारिजनलोकैः तुष्टैःपक्षधस्त्रादितुनिवेद्यते सर्वमेवभगवत्यै दुर्गासापूजनीयाचतार्द्दिनेद्रोणपुष्पकैः ततःखड्गनमस्कृत्य
शत्रूणांवधसिद्धये इच्छेतविजयंराज्यंसुभिक्षंचात्मनेनृपः पुनःपुनःप्रणम्यार्थासंस्मरन्हृदयेशिवां सर्वंकृत्वातिकौरव्यअष्ट
म्यांजागरंनिशि नटनर्तकगीतैश्चकारयेच्चमहोत्सवं एवंदृष्टैर्निशांनीत्वांप्रभाते अरुणोदये घातयेन्महिषान्मेषानग्रतोनतकंधरा
न् शतमर्धशतंवापितदर्धंवायथेच्छया सुरासवघृतैःकुंभैस्तर्पयेत्परमेश्वरीं कापालिकेभ्यस्तद्देयंदासीदासजनेनतथा ततोपरा
ण्हसमयेनवम्यांवेश्मस्थितां भवानींभ्रामयेद्राष्ट्रेस्वयंराजासशब्दवान् कश्चिच्चोपोषितोवीरोविधृतोन्येनखड्गवान् भूतेभ्य-
स्तुबलिंदद्यान्मंत्रेणानेनसामिषं सरक्तंसजलंचान्नंगंधपुष्पाक्षतैर्युतं त्रीन्स्त्रीन्वारान्समूहेनदिग्विदिक्षुकिरेद्बलिम् मंत्रश्च
बलिंगृण्हंत्विमंदेवाआदित्यावसवस्तथा मरुतश्चाश्विनौरुद्राःसुपर्णाःपन्नगागृहाः असुरायातुधानाश्चपिशाचोरगराक्षसाः
डाकिन्योयक्षवेतालायोगिन्यःपूतनाशिवाः जृंभकाःसिद्धगंधर्वामालाविद्याधरानगाः दिक्पालालोकपालाश्चयेचविघ्नविना।

यकाः जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः माविघ्नंमाचमेपापंमासंतु परिपंथिनः सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाइति इतिमहाष्टमी महानवमीतुपूर्वयुताग्राह्या पूर्वोक्तवचनात् नवमीदुर्गाव्रतेश्रावणीतिदीपिकोक्तेः श्रावणीदुर्गनवमी दूर्वाचैवहुताशनी पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमिति हेमाद्रौपाद्मोक्तेश्च भविष्येपि आश्वयुक्शुक्लपक्षेतुअष्टमीमूलसंयुता सामहानवमीनामत्रैलोक्येपिसुदुर्लभेति मूलमुपलक्षणं दुर्गापूजासुनवमीमूलाद्यृक्षत्रयान्विता महतीकीर्तितातस्यांदुर्गामहिषमर्दिनीइति मदनरत्नेलिंगात् अत्रपूजयेदित्यग्रेशेषः यानितु साकायोदयगामिन्या तिथ्यावुदयगामिन्यामित्यादिप्रागुक्तानितानिनवमीभिन्नतिथिपराणि नवम्याविशेषोक्तेः वेधश्चमुहूर्तत्रयेणवज्ञेयः यद्यपिहेमाद्रिमतेमुहूर्तद्वयात्मापिवेधोस्ति तथापिसूर्योदयएवसः सायंतुत्रिमुहूर्तएव तदुक्तं दीपिकायां त्रिमुहूर्तगातुसकलासायइति माधवोपि सायंतूत्तरयातद्वन्न्यूनयानतुविध्यतइति तेनत्रिमुहूर्तयोगेपूर्वानवमी पूर्वोक्तवचनात् नकुर्यान्नवमीतातदशम्यांतुकदाचनेतिस्कांदेपरानिषेधाच्च त्रिमुहूर्तयोगाभावेतुनिषिद्धापिपरैवकार्येतिनिष्कर्षः यत्तुनवम्यांचजपंहोमंसमाप्यश्रवणेपिवेति संग्रहोक्तेः व्रतंचजागरश्चैवनवम्यांविधिवद्बलिरितिदेवीपुराणाच्च नवम्यांहोमबल्यादिविहितंतत्राश्वयुक्शुक्लनवमीमुहूर्तंवाकलायदि सातिथिःसकलाज्ञेयालक्ष्मीविद्याजयार्थिभिरिति सौरपुराणात् सूर्योदयपररिक्तापूर्णास्यादपरा यदि बलिदानंप्रकर्तव्यंतत्रदेशेशुभावहम् बलिदानेकृतेष्टम्यांपुत्रभंगोभवेन्नृपेतिमदनरत्नेदेवीपुराणाच्च बल्यादौपराकार्या उपवासादौतुपूर्वेतिमदनरत्नेउक्तं प्रतापमार्तंडेप्येवम् यत्तु अष्टम्यांबलिदानेनपुत्रनाशोभवेद्ध्रुवमिति कालिकापुराणेतत्संधिपूजापरं अष्टमीनवमीसंधौतृतीयाखलुकथ्यतइतितत्रैवतदुक्तेः कामरूपनिबंधे अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच तत्रयाक्रियते

पूजाविज्ञेयासामहाफला अष्टमीमात्रेभवत्येव आश्विनेपूजयित्वातुअर्धरात्रेष्टमीषुच घातयंतिपशून्भक्त्यातेभवंतिमहाबलाः तथा कन्यासंस्थेरवावीशशुक्लाष्टम्यांप्रपूजयेत् सोपवासोनिशार्धेतुमहाविभवविस्तरैः तथा पशुघातश्चकर्तव्योगवयाजवधस्तथेति रूपनारायणीये देवीपुराणात् तत्रैवभविष्ये तस्मादियंमहापुण्यानवमीपापनाशिनी उपोष्यासुप्रयत्नेनसततंसर्वपार्थिवैः निर्णयदीपेतु महानवमी परदिनेपराह्णव्यापित्वेपरा अन्यथापूर्वा आवर्तनात्पूर्वकालेनवमीस्यात्परेहनि दुर्गार्चनंतत्रपूर्वेद्युःपूर्वाह्णेत्वष्टमीयदीतिधौम्यवचनादित्युक्तं अस्यतुशारदानवमीविषयत्वंसमूलत्वंचविमृश्यं यानितु नंदायांज्वलतेवह्निःपूर्णायांपशुघातनं भद्रायांगोकुलेक्रीडातत्रराज्यंविनश्यतीति नवम्यामपराह्णेतुबलिदानंप्रशस्यते दशमींवर्जयेत्तत्रनात्रकार्याविचारणेति नंदायांदर्शनेरक्षाबलिदानंदशासुच भद्रायांगोकुलेक्रीडादेशनाशायजायतेइति ब्रह्मवैवर्तनारदादिवचनानितानिशुक्लाधिकनिषेधपराणीतिमदनरत्ने तथाकालिकापुराणे नवम्यांबलिदानंतुकर्तव्यंवैयथाविधि जपंहोमंचविधिवत्कुर्यात्तत्रविभूतये. केचित्तुपूर्वाषाढायुताष्टम्यांपूजाहोमावुपोषणमितिपूर्वोक्तदेवीपुराणादष्टम्यांहोममाहुः अन्येतुद्विविधवाक्यवशादष्टम्यामारभ्यनवम्यांसमापयंति समुच्चयस्तुयुक्तः रुद्रयामलेतुविकल्पउक्तः नतुनिर्मूलं दुर्गाभक्तितरंगिण्यादिगौडग्रंथेष्वपिनवम्यांहोमउक्तः होमेचविशेषउक्तोडामरतंत्रे पायसंसर्पिषायुक्तंतिलैःशुक्लैर्विमिश्रितं होमयेद्विधिवद्भक्त्यादशांशेननृपोत्तम रुद्राध्यायेनवाहोमंमंत्रेणैकेनसाधयेत् तथास्तोत्रजपेहोमःश्लोकेनैकेनसाधयेत् यद्वासप्तशतीजप्येहोममंत्रोनवाक्षरः ऐंह्रींक्लींचामुंडायैविच्चेइतिनवाक्षरइतिकेचित् पूजोक्तोग्राह्यइतितुयुक्तं रुद्रयामलेपि प्रधानाहुतयःसुदिष्टाःपायसान्नंतिलास्तथा किंशुकैःसर्षपैःपुष्पैर्लाजदूर्वांकुरैरपि यवैर्बिल्वफलैर्द्रव्यैर्नानाविधफलैस्तथा रक्तचंदनखंडैश्चगुग्गुलैश्चमनोहरैः प्रतिश्लोकंचजुहुयात्सर्वद्रव्या

णिचक्रमात् नवाक्षरेणवाहुत्वानमोदेव्याइतीतिचेति रहस्येतु प्रतिश्लोकंचजुहुयात्पायसंतिलसर्पिषेत्युक्तं दुर्गाभक्तितरंगिण्यांतुतिलैर्जयंतीमंत्रेणचहोमउक्तः पुरश्चरणकार्येतुबिल्वपत्रयुतैस्तिलैरिति कालिकापुराणाद्बिल्वपत्रैश्चेतिस्मार्ताः तन्न अन्यत्रमानाभावात् अथबलिदानं तत्राश्वमेषच्छागमहिषस्वमांसानामुत्तरोत्तरप्राशस्त्यंफलविशेषश्चान्यतोवसेयइतिदिक् बलिप्रकारस्तुदेवीपुराणे कन्यासंस्थेरवौशुक्लाष्टम्यांप्रपूजयेत् द्रोणपुष्पैश्चबिल्वाम्रजातीपुन्नागचंपकैः पंचाब्दलक्षणोपेतंगंधपुष्पसमन्वितं विधिवत्कालिकालीतिजप्त्वाखड्गेनघातयेत् ॐ कालिकालियज्ञेश्वरिलोहदंडायैनमइतिमंत्रः तदुत्थरुधिरंमासंगृहीत्वापूजनादिषु आदिशब्दात् चरकीविदारीपापराक्षस्यः नैर्ऋतेभ्यःप्रदातव्यंमहाकौशिकमंत्रितं मंत्रस्तुवक्ष्यते तथा तस्यायतोनृपःस्नायात्कृत्वाशत्रुंतुपैष्टिकम् खड्गेनघातयित्वातुदद्यात्स्कंदविशाखयोः अशक्तौब्राह्मणेनचकूष्मांडादिभिर्बलिदानंकार्यं तदुक्तंकालिकापुराणे कूष्मांडमिक्षुदंडंचमांसंसारसमेवच एतेबलिसमाःप्रोक्तास्तृप्तौछागसमाःसदा रुद्रयामलेपि छागाभावेतुकूष्मांडंश्रीफलंवामनोहरं वस्त्रसंवेष्टितंकृत्वाछेदयेच्छुरिकादिना तथा ब्राह्मणेनसदादेयंकूष्मांडंबलिकर्मणि श्रीफलंवास्कराधीशछेदनेवतुकारयेत् छेदेविकल्पः माषान्नेनबलिर्देयोब्राह्मणेनविजानता कालिकापुराणे उत्तराभिमुखोभूत्वाबलिंपूर्वमुखंतथा निरीक्ष्यसाधकःपश्चादिमंमंत्रमुदीरयेत् पशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः प्रणमामिततःसर्वरूपिणंबलिरूपिणं चंडिकाप्रीतिदानेनदातुरापद्विनाशन चामुंडाबलिरूपायबलेतुभ्यंनमोस्तुते यज्ञार्थेबलयःसृष्टाःस्वयमेवस्वयंभुवा अतस्त्वांघातयाम्यद्यतस्माद्यज्ञेवधोवधः ऐंह्रींश्रीमितिमंत्रेणतंबलिमत्स्वरूपिणं चिंतयित्वान्यसेत्पुष्पंमूर्ध्नितस्यतुभैरव रसनात्वंचंडिकायाःसुरलोकप्रसाधकः ह्रींह्रींखड्गइतिमंत्रेणध्यात्वाखड्गंचपूजयेत् पूजयित्वाततःखड्गं ओंहुंफडितिमंत्रकैः

गृहीत्वाविमलंखड्गंछेदयेद्बलिमुत्तमं ॐ ह्रींऐंह्रींकौशिकीतिरुधिरेणाप्यायतामिति बलिदानेतुदुर्गायाः सर्वत्रायंविधिःस्मृतः मत्स्यसूक्ते न
वम्यांपूर्ववत्पूजाकर्तव्याभूतिमिच्छता दक्षिणावस्त्रयुग्मंचआचार्यायनिवेदयेत् अथात्रप्रसंगाच्छतचंडीविधानमुच्यते रुद्रयामले
शतचंडीविधानंचप्रोच्यमानंशृणुष्वतत् सर्वोपद्रवनाशार्थंशतचंडीसमारभेत् षोडशस्तंभसंयुक्तंमंडलंपल्लवोज्ज्वलं वस्त्रकोणयुतांवे
दींमध्येकुर्यात्त्रिभागतः पक्केष्टकवितारम्यामुच्छ्रायेहस्तसंमिता पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभं पंचवर्णवितानंचकिंकिणीजा
लमंडितं आचार्यंलसमंविप्रान्वरयेद्धुशास्त्रव्रतान् ईशान्यांस्थापयेत्कुंभंपूर्वोक्तविधिनाचरेत् वारुण्यांचप्रकर्तव्यंकुंडलक्षणलक्षितम्
मूर्तिदेव्याःप्रकुर्वीतस्वर्णस्यफलेनवै तदर्धेनतदर्धेनतदर्धेनमहामते अष्टादशभुजांदेवींकुर्याद्वाष्टकरामपि पट्टकूलयुगच्छन्नांदेवींम
ध्येनिधापयेत् देवींसंपूज्यविधिवज्जपंकुर्युर्दशद्विजाः शतमादौशतंचांतेजपेन्मंत्रंनवार्णवम् चंडीसप्तशतीमध्येसंपुटोयमुदाहृतः
एकंद्वेत्रीणिचत्वारिजपेद्दिनचतुष्टयं रूपाणिक्रमशस्तद्वत्पूजनादिकमाचरेत् पंचमेदिवसेप्रातर्होमंकुर्याद्विधानतः गुडूचीपायसंदूर्वा
तिलान्शुक्लान्यवानपि चंडीपाठस्यहोमंतुप्रतिश्लोकंदशांशतः होमंकुर्याद्ग्रहादिभ्यःसमिदाज्यचरूंक्रमात् हुत्वापूर्णाहुतिंदद्याद्विप्रे
भ्योदक्षिणांक्रमात् कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरे अभिषेकंततःकुर्युर्यजमानस्यऋत्विजः एवंकृतेमहेशानसर्वसिद्धिःप्रजायते
अथसहस्रचंडीसाचतंत्रेचोक्ता सहस्रचंडीविधिवच्छृणुविष्णोमहामते राज्यभ्रंशेमहोत्पातेजनमारेमहाभये गजमारेश्वमारेचप-
रचक्रभयेतथा इत्यादिविविधेदुःखेक्षयरोगादिजेभये सहस्रचंडिकापाठंकुर्याद्वाकारयेत्तथा जापकास्तुशतंप्रोक्ताविंशद्धस्तश्चमंड
पः भोज्याःसहस्रविप्रेंद्रागोशतंदक्षिणांदिशेत् गुरवेद्विगुणंदद्यंशय्यादानंतथैवच सप्तधान्यंचभूदानंश्वेताश्वंचमनोहरं पंचनि

ष्कमितामूर्तिःकर्तव्यावार्धमानतः अष्टादशभुजादेवीसर्वायुधविभूषिता अवारितान्नंदातव्यंसहस्रंमस्यहंप्रभो शतंवानियताहारःपयःपानेनवर्तये
त् एवंयश्चंडिकापाठंसहस्रंतुसमाचरेत् तस्यस्यात्कार्यसिद्धिस्तुनात्रकार्याविचारणेति एतद्द्वयंयद्यपिमहानिबंधेषुनास्तितथापिप्रचरद्रूपत्वा
दुक्तमितिदिक् वाराहीतंत्रे संकटेसमनुप्राप्तेदुर्भिक्षेकिल्स्यामयेतथा जातिभ्रंशेकुलोच्छेदेप्यायुषोनाशआगते वैरिवृद्धौव्याधिवृद्धौध
ननाशेतथाक्षये तथैवत्रिविधोत्पातेतथाचैवोपपातके कुर्याद्यत्नाच्छतावृत्तंततःसंपद्यतेशुभं श्रेयोवृद्धिःशतावृत्ताद्राज्यवृद्धिस्तथापरा
मनसाचिंतितंदेविसिद्ध्येदष्टोत्तराच्छतात् सहस्रावर्तनाल्लक्ष्मीरावृणोतिस्वयंस्थिरा भुक्तिकामनोरथान्कामान्नरोमोक्षमवाप्नुयात् चं
ड्याःशतावृत्तिपाठात्सर्वाःसिद्ध्यंतिसिद्धयः इतिशतचंडीसहस्रचंडीविधिः अथनवरात्रपारणानिर्णयः साचदशम्यांकार्या आश्विने
मासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रंवापिकर्तव्यंसप्तम्यादिप्रथाक्रममितिहेमाद्रौधौम्यवचनात् न
वमीतिथिपर्यंतंवृद्ध्यापूजाजपादिकमिति प्रागुक्तवचनेनेनवमीपर्यंतंप्रधानभूतपूजाद्युक्तेरुपवासादेश्चांगत्वेनतत्पर्यंतत्वात् आदिशब्देनोप
वासोक्तेः पूर्वोक्तत्रिरात्रव्रतेनवम्याअप्युपोष्यत्वाच्च नचपारणांतत्वेनत्रिरात्रत्वं विष्णुत्रिरात्रादौतथाप्रसक्तेः नचात्रोपवासेमानाभावइति
वाच्यम् एवंचविंध्यवासिन्यानवरात्रोपवासतः एकभक्तेननक्तेनतथैवायाचितेनच पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरइति हेमाद्रौ-
भविष्योक्तेः नवरात्रसमाख्यातोनवम्याअप्युपोष्यत्वाच्च नतुतिथिह्रासेऽष्टावप्युपवासाभवंतीतिकथंसमाख्या तेनकर्मविशेषेनवरात्र
शब्दोरूढः अतएवोक्तंदेवीपुराणे तिथिवृद्धौतिथिह्रासेनवरात्रमपार्थकमितिचेन्नतिथिह्रासेपिनवतिथीनामुपोष्यत्वान्नवरात्रत्वाक्ष
तेः एतेनरात्रीणांप्राधान्यात् ह्रासेऽमामादायननवत्वमितिसूर्योक्तिःपरास्ता यत्तुदेवीपुराणे कन्यासंस्थेरवौशुक्लेशुक्लामारभ्यनंदि

कास् अयाचीत्स्वार्थेचैकाशीनकाशीवाथवाबद इतिव्रतत्रसुष्पुस्तकेतु लोहाभिसारिकविषयं तस्यजयाभिलाषीनृपतिःप्रतिपत्प्रभृतिक्र
मात् लोहाभिसारिककर्मकारयेद्यावदष्टमीतिभविष्ये ऽष्टमीपर्यंतमेवोक्तेः रूपनारायणेनतुनंदादिव्रतप्रयोगपृथगेवोक्तातस्यनवम्यापा
रणमुक्तं यदपिनिर्णयदीपे आश्विनेशुक्लपक्षेतुनवरात्रमुपोषितः नवम्यांपारणंकुर्याद्दशमीमिश्रितानचेत् दशमीमिश्रितायत्रपारणेनवमी-
भवेत् दुःखदारिद्र्यदाज्ञेयातथाव्रतविनाशिनीतिब्राह्मनाम्नालिखितंवचनं यच्चरुद्रयामलइतिवदंति अष्टम्यासहकार्यास्यान्नवमीपारणादि
ने योमोहाद्दशमीविधानवम्यांचंडिकांयजेत् पारणंचमकुर्याद्वै तस्यपुण्यनिरर्थकम् नवम्यांपारितादेवीकुलवृद्धिंप्रयच्छति दशम्यांपारि
तादेवीकुलनाशंकरोतिवै तस्मात्तुपारणंकुर्यान्नवम्यांविबुधाधिपेत्यादीनितानियदिसमूलानितदालोहाभिसारिकनंदादिव्रतचतुष्टयविष
याणि तस्याऽष्टमीपर्यंतमेवोक्तेरित्युक्तंप्राक् अन्यथामहाष्टम्यापरविद्धायांपारणाविधाने पूर्वनिबंधैर्विरोधोदुर्वारःस्यात् यानितुकेश्चि
ल्लिखितानिनवम्यांपारणाविधायकानिवचनानितानिहेमाद्र्यादिविरुद्धत्वान्निर्मूलानि समूलत्वेपियद्दिनद्वयेनवमीतदाद्वितीयदिनउपो
ष्यातिथ्यंतेपारणानकिंतुनवमीमध्येकार्येत्येवंनेयानिशिवरात्रिपारणावत् अत्रकेचित्पारणाहेसूतकादिप्राप्तौतदतिक्रम्यपारणाकुर्या -
दित्याहुः तन्मंदम् काम्योपवासेप्रक्रांतेत्वंतरामृतसूतके तत्रकाम्यव्रतंकुर्याद्दानार्चनविवर्जितमितिमाधवीयोक्तेः व्रतयज्ञविवाहे-
षुश्राद्धेहोमेर्चनेजपे प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनाच्चाशौचमध्येपितत्कर्तव्यतावगतेः पारणात्वाङ्गतस्य प्रारंभ
स्तुतेनैवोक्तः प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति रुद्रयामलेपि सूतकेपारणंकुर्यान्नवम्यां
होमपूर्वकं तदंतेभोजयेद्विप्रान्दानंदद्याच्चशक्तितइति तदंतेसूतकांते एवंस्त्रीभिरपिरजोदर्शनमध्येकर्तव्यमेवपारणम् संप्रवृत्तेपिर

जसिनत्याज्यंद्वादशीव्रतमिति माधवीयेऋष्यशृंगवचनात् द्वादशीव्रतमित्युपलक्षणम् प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् न तत्रापिव्रतस्यस्यादुपरोधःकदाचनेति तत्रैवसत्यव्रतवचनात् किंच एकादश्यादौपंचधाशौचपातेमासांतेपारणापत्तिः मासोपवासादिपंचधाशौचपातेजीवनासंभवश्च यत्तु नियमस्थायदानारीप्रपश्येदंतरारजः उपोष्यैवतुतारात्रीःस्नात्वाशेषंचरेद्व्रतमित्यंगिरोवचनम् यच्चहारीतवचनम् नियमस्थाव्रतस्थास्त्रीरजःपश्येत्कथंचन त्रिरात्रंतुक्षिपेदूर्ध्वंव्रतशेषंसमापयेत् तद्द्विधोपवासविषयं तासांतत्र भोजननिषेधादितिकेचित् वयंतुप्रागुक्तसत्यव्रतवचनेदीर्घतपसामितिविशेषणोपादानाद्द्वादशीव्यतिरिक्तसफलैकाहोपवासविषयाऽयंनिषेधः त्रिरात्रनवरात्रादिदीर्घव्रतेषुतुरजोमध्येपारणेतिब्रूमः आशौचमध्येसर्वापिपारणाभवतिप्रागुक्तकौर्मवचनादितिसिद्धम् अयंचोपवासपारणानिर्णयः सर्वव्रतेषुबोद्धव्यइत्यलंभूयसा दशम्यांदेवींविसर्जयेत् तदुक्तं दुर्गाभक्तितरंगिण्यांदेवीपुराणे ततःप्रातःप्रपूजयित्वादशम्यांविधिपूर्वकम् संप्रेषणंतुकर्तव्यंगीतवादित्रनिःस्वनैः रूपंदेहियशोदेहिभगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे महिषघ्निमहामायेचामुंडेमुंडमालिनि आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते इतिसंप्रार्थ्यदेवींतुततउत्थापयेद्बुधः उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच कुरुष्वममकल्याणमष्टाभिःशक्तिभिःसह गच्छगच्छपरंस्थानंस्वस्थानंदेविचंडिके व्रजस्रोतोजलंवृद्ध्यैस्थीयतांचजलेत्विहेतिउत्थाप्यजलंनीत्वा दुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिते संवत्सरेव्यतीतेतुपुनरागमनायवै इमांपूजांमयादेवियथाशक्त्योपपादिताम् रक्षार्थंत्वंसमादायव्रजस्वस्थानमुत्तमम्इतिजलेप्रवाहयेत् इयमेवविजयादशमी साचद्वितीयदिनेश्रवणयोगाभावेपूर्वाग्राह्या तदुक्तंहेमाद्रौस्कांदे दशम्यांतुनरैःसम्यक्पू

जनीयापराजिता ऐशानींदिशमाश्रित्यअपराण्हेप्रयत्नतः यापूर्णानवमीयुक्तातस्यांपूज्यापराजिता क्षेमार्थंविजयार्थंचपूर्वोक्तविधिनानरैः नवमीशेषयुक्तायांदशम्यामपराजिता ददातिविजयंदेवीपूजिताजयवर्धिनी तथा आश्विनेशुक्लपक्षेतुदशम्यांपूजयेन्नरः एकादश्यांनकुर्वीतपूजनंचापराजितमिति यदातुपूर्वदिनेश्रवणयोगाभावः परदिनेचाल्पापितद्योगिनीतदापरैव तथाचहेमाद्रौव्रतकांडेकश्यपः उदयेदशमीकिंचित्संपूर्णैकादशीयदि श्रवणर्क्षंयदाकालेसातिथिर्विजयाभिधा श्रवणर्क्षेतुपूर्णायांकाकुत्स्थःप्रस्थितोयतः उल्लंघयेयुःसीमानंतद्दिनर्क्षेततोनराइति कालेपराण्हे परदिनेअपराण्हेश्रवणाभावेतुसर्वपक्षेषुपूर्वैव मदनरत्नेप्येवम् ज्योतिर्निबंधेरत्नकोशेचनारदः ईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः विजयोनामकालोयंसर्वकार्यार्थसिद्धिदः ईषस्यदशमीशुक्लापूर्वविद्धांनकारयेत् श्रवणेनापिसंयुक्तांराज्ञापट्टाभिषेचने सूर्योदयेयदाराजन्दृश्यतेदशमीतिथिः आश्विनेमासिशुक्लेतुविजयांतांविदुर्बुधाः अत्रायंनिर्गलितोर्थः अपराण्होमुख्यः कर्मकालः तत्रैवपूजाद्युक्तेःप्रदेषोगौणः तत्रदिनद्वयेऽपराण्हव्याप्तौपूर्वा प्रदोषव्याप्तेराधिक्यात् दिनद्वयेप्रदोषव्याप्तौपरा अपराण्हव्याप्तेराधिक्यात् इदंशुद्धतिथावन्यकाले श्रवणस्तुरोहिणीवदप्रयोजकः दिनद्वयेऽपराण्हस्पर्शेतुपूर्वा तत्रापिपरदिनेपराण्हेश्रवणसत्त्वेपरैवेतिदिक् अत्रविशेषोभार्गवार्चनदीपिकायांभविष्ये शमीसुक्तंजगन्नाथंभक्तानामभयंकरं अर्चयित्वाशमीवृक्षमर्चयेच्चततःपुनः शमीमंत्रस्तुहेमाद्रौगोपथब्राह्मणे अमंगलानांशमनींशमनींदुष्कृतस्यच दुःस्वप्ननाशिनींधन्यांप्रपद्येहंशमींशुभाम् तथाभविष्ये शमीशमयतेपापंशमीलोहितकंटका धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी करिष्यमाणयात्रायांयथाकालंसुखंमया तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजितेइति

तथा गृहीत्वासाक्षतामार्द्रांशमीमूलगतांमृदं गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति ततोभूषणवस्त्रादिधारयेत्स्वजनैःसहेति अत्रैवबलनीराजनमुक्तंकृत्यरत्ने तत्रमंत्रः चतुरंगंबलंमह्यंनिररित्वंप्रजस्विह सर्वत्रविजयोमेस्तु त्वत्प्रसादात्सुरेश्वरीति गौडनिबंधेज्योतिषे कृत्वानीराजनंराजा बलवृद्ध्यैयथाक्रमं शोभनंस्वजनंपश्येज्जलगोगोष्ठसन्निधौ अस्यफलानिशुभाशुभदेशाश्चतत्रैवज्ञेयाः आश्विनपौर्णमासीपराग्राह्या सावित्रीव्रतमंतरेणभवतोमापौर्णमास्यौपरइतिदीपिकोक्तेः अत्रविशेषस्तिथितत्त्वेलिंगे आश्विनेपौर्णमास्यांतुचरेज्जागरणंनिशि कौमुदीसासमाख्याताकार्यालोकैर्विभूतये कौमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं सुगंधिर्निशिसद्वेषअक्षैर्जागरणंचरेत् तथा निशीथेवरदालक्ष्मीःकोजागर्तीतिभाषिणी तस्मैवित्तंप्रयच्छामिअक्षैःक्रीडांकरोतियइति अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन आश्वयुज्यामाश्वयुजीकर्मेतितच्छेषपर्वणिकार्यम् विकृतित्वात् तत्रपूर्वापह्नव्यापिनीग्राह्या देवकर्मत्वात् आग्रयणंतुपर्वणिकार्यं शरद्याग्रयणंनामपर्वणिस्यात्तदुच्यतइतिशौनकोक्तेः तत्रापिशेषपर्वणिकार्यमितिप्रागुक्तम् तत्रव्रीहिभिरिष्ट्वाव्रीहिभिरेवयजेत यवैश्चायवैरिष्ट्वायवैरेवयजेतव्रीहिभ्यइतिश्रुत्यादर्शपूर्णमासयोरेककर्मत्वेनैकद्रव्यनियमाद्दर्शेष्ट्याः परंपौर्णमासेष्ट्याश्चप्राग्भवतीतिहेमाद्र्यादयः दर्शेष्ट्याःपरमुक्तमाग्रयणकंप्राक्पौर्णमासाच्चतदितिदीपिकोक्तेश्च तच्चाग्रयणंत्रेधाव्रीह्याग्रयणंयवाग्रयणंश्यामाकाग्रयणंचेति एषांकालःश्रुतौ गृहमेधीव्रीहियवाभ्यांशरद्वसंतयोर्यजेतश्यामाकैर्नीवारैर्वर्षास्वापत्कालेनान्येनपुराणैर्वेति आपस्तंबोपि वर्षासुश्यामाकैर्यजेतशरदिव्रीहिभिर्वसंतेयवैर्यथर्तुवेणुयवैरिति तत्रापिश्यामाकाग्रयणमनित्यमितरेतुअनाहिताग्नेर्नित्येयवाग्रयणंचकार्यमितिस्मार्तवृत्त्यादावुक्तत्वात् सूत्रेव्रीहियवदेवतासंबद्धानामेवमंत्राणामाम्नानाच्च आहिताग्नेस्तु

यवाग्रयणस्याप्यनित्यत्वम् अपिवाक्रियायवेष्विति सूत्रात् यज्ञाव्रीह्याग्रयणेनसमानतंत्रता श्यामाकेस्तुभक्तरंकुर्यान्नाग्रयणम् यदिवातदपिसमानतंत्रमित्यादिनारायणवृत्तौपरिश्रमवत्ताफलमित्यलम् इदंचपर्वाभावेशुक्लपक्षेदेवनक्षत्रेकृत्तिकादिविशाखांतेकार्यमितिस्मृत्यर्थसारेउक्तं बौधायनीयेकेशवस्वामिनाप्येवमुक्तं परिशिष्टे श्यामाकैर्व्रीहिभिश्चैवयवैश्चान्योन्यकालतः प्राग्यष्टुंयुज्यतेवश्यंनत्वत्राग्रयणात्ययः त्रिकांडमंडनोप्येवम् यदात्वेतदाश्विनपौर्णमास्यांक्रियतेतदेककालत्वादाश्वयुजीकर्मणोस्यचसमानतंत्रताभवतितदेतद्वृत्तिकृताएकबर्हिरिध्माज्येतिसूत्रेस्पष्टमुक्तम् अस्याकरणेप्रायश्चित्तमुक्तंस्मृतिचंद्रिकायांकात्यायनेन नित्ययज्ञात्ययेन्वैववैश्वदेवद्वयस्यच अनिष्ट्वानवयज्ञेननवान्नप्राशनेतथा भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेत् कारिकापि अकृताग्रयणोऽश्नीयान्नवान्नंयदिवैनरः वैश्वानरायकर्तव्यश्चरुः पूर्णाहुतिस्तुवेति ऋग्विधानेतु समिद्वरायामंत्रंचवर्षंवर्षेजपेच्छतं आग्रयणंयदान्यूनंतदासंपूर्णमेतितदित्युक्तम् एतच्चापदिमलमासेकार्यमन्यथानेतिप्रागुक्तम् अन्योप्याहिताग्न्यादिविशेषः शौनकादेर्ज्ञेयइत्यलंबहुना इत्याश्विनमासः अथकार्तिकमासः तुलासंक्रमेप्रागपरादशघटिकाःपुण्याः रात्रौतुप्रागुक्तम् अथकार्तिकस्नानं तत्रपृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः तुलामकरमेषेषुप्रातःस्नानंविधीयते हविष्यंब्रह्मचर्यंचमहापातकनाशनमितिसौरमासउक्तः प्राच्यास्त्वेतदेवाद्रियंते दाक्षिणात्यास्तु आश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत् कार्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधीरितिपाद्मोक्तेः भार्गवार्चनेच प्रारभ्यैकादशींशुक्लामाश्विनस्यतुमानवः प्रातःस्नानंप्रकुर्वीतयावत्कार्तिकभास्करइतिविष्णुरहस्योक्तेः हेमाद्रावादित्यपुराणे पूर्णआश्वयुजेमासिपौर्णमास्यांसमाहितइत्युक्त्वा मासंसमग्रंपरयाचभक्त्यासमाप्यतेकार्तिकपौर्णमास्यामित्यभिधानाच्चा

श्विनशुक्लैकादश्यांपौर्णमास्यांवारभ्यकार्तिकशुक्लद्वादश्यांपौर्णमास्यांवासमापयेदित्याहुः मदनपारिजातेविष्णुः कार्तिकंसकलंमासं नित्यस्नायीजितेंद्रियः जपन्हविष्यभुक्शांतःसर्वपापैःप्रमुच्यते अत्रदेशविशेषःपाद्मेकार्तिकंप्रकृत्य कुरुक्षेत्रेकोटिगुणोगंगायामपितत्समः ततोधिकःपुष्करस्याद्वारवत्यांचभार्गव पुण्याःपुर्यस्त्वसंसेवमुनयोमथुराधिका दुर्लभःकार्तिकोविप्रामथुरायांनृणामिह यत्रार्चितःस्वकंरूपंभक्तेभ्यःसंप्रयच्छतीति इदंचस्नानंकाशीस्थपंचनदेप्यतिप्रशस्तं शतंसमास्तपस्तप्त्वाकृतेयत्प्राप्यतेफलम् तत्कार्तिकेपंचनदेसकृत्स्नानेनलभ्यते कार्तिकेबिंदुतीर्थेयोब्रह्मचर्यपरायणः स्नास्यत्यनुदिनंभानौभानुजातस्यभीःकुतइत्यादिकाशीखंडोक्तेः भानुजोयमः इदंचप्रातःस्नानंसंध्यांचकृत्वाकार्यम् तेनर्विनेतरकर्मानधिकारादितिवर्धमानः यद्यपिप्रातःसंध्यायाःसूर्योदयेसमाप्तिस्तथापिवचनबलादनुदितहोमवद्भविष्यति स्नानमंत्रश्चतत्रैव कार्तिकेऽहंकरिष्यामिप्रातःस्नानंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह इमंमंत्रंसमुच्चार्यमौनीस्नायाद्व्रतीनरइति अर्घ्यमंत्रोपितत्रैव व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन नित्यनैमित्तिकेकृष्णकार्तिकेपापनाशने गृहाणार्घ्यंमयादत्तंराधयासहितोहरे इमौमंत्रौसमुच्चार्ययोऽर्घ्यंमह्यंप्रयच्छति सुवर्णरत्नपुष्पांबुपूर्णशंखेनपुण्यवान् सुवर्णपूर्णापृथिवीतेनदत्तानसंशयइति एवंसंपूर्णस्नानाशक्तोत्र्यहंस्नायात् वाराणस्यांपंचनदेत्र्यहंस्नातास्तुकार्तिके अमीतेपुण्यवपुषःपुण्यभाजोतिनिर्मला इतिकाशीखंडोक्तेः अथ मालाधारणम् तत्रस्कांदेद्वारकामाहात्म्ये निवेद्यकेशवेमालांतुलसीकाष्ठसंभवाम् वहतेयोनरोभक्त्यातस्यवैनास्तिपातकम् नजह्यात्तुलसीमालांधात्रीमालांविशेषतः महापातकसंहर्त्रींधर्मकामार्थदायिनीम् विष्णुधर्मे स्पृशेत्तुयानिलोमानिधात्रीमाला

कलौनृणाम् तावद्वर्षसहस्राणि वैकुंठेवसतिर्भवेत् मालायुग्मंतु योनित्यंधात्रीतुलसिसंभवम् वहतेकंठदेशेतुकल्पकोटिदिवंवसेत् तु
लसीकाष्ठसंभूतेमालेकृष्णजनप्रिये बिभर्मित्वामहंकंठेकुरुमांकृष्णवल्लभं एवंसंप्रार्थ्यविधिवन्मालांकृष्णगलेऽर्पिताम् भा
रयेत्कार्तिकेयोवैसगच्छेद्वैष्णवंपदमिति अत्रमूलंचिंत्यम् तथाकाशीखंडे कार्तिकेमासिमेयात्रायैःकृताभक्तितत्परैः विंदु
तीर्थेकृतस्नानैस्तेषांमुक्तिर्नदूरतः भार्गवार्चनदीपिकायांनृसिंहपुराणे अगस्तिकुसुमैर्देवंयोऽर्चयेच्चजनार्दनं दर्शनात्तस्यदे
वर्षैर्नरकंनाप्नुतेनरः विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवम् कार्तिकेयोर्चयेद्भक्त्यावाजपेयफलंलभेत् स्कांदे कार्तिकमा
हात्म्ये मालतीमालयाविष्णुःकेतक्याचैवपूजितः समाःसहस्रंसुप्रीतोभवेत्तेमधुसूदनः पृथ्वीचंद्रोदयेपाद्मे कार्तिकेनार्चितो
यैस्तुकमलैःकमलेक्षणः जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे तथा कार्तिकेकेशवेपूजायेषांनास्त्यास्केतैःकृता तेनिर्भर्त्स्यंरवेःपुत्रैव
संतित्रिदिवेसदा तुलसीदललक्षेणकार्तिकेयोर्चयेद्धरिं पत्रेपत्रेमुनिश्रेष्ठमौक्तिकंलभतेफलं तथास्कांदेकार्तिकमाहात्म्ये धात्रीच्छायांतुयःकुर्यात्पिंड
दानंमहामुने मुक्तिंप्रयांतिपितरःप्रसादान्माधवस्यतु धात्रीफलविलिप्तांगोधात्रीफलविभूषितः धात्रीफलकृताहारोनरोनारायणोभवेत् धात्रीच्छा
यांसमाश्रित्ययोर्चयेच्चक्रधारिणं पुष्पेपुष्पेश्वमेधस्यफलंप्राप्नोतिमानवः तथास्कांदे कार्तिकेमासिविप्रेंद्रधात्रीवृक्षोपशोभिते वनेदामोदरंविष्णुं
विप्रान्नैस्तोषयेद्विभुं मूलेनपायसेनाथहोमंकुर्याद्विचक्षणः ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीतबंधुभिरिति तथा कार्तिकेद्विदलव्रतंप्रा
गुक्तंकार्तिकेद्विदलंत्यजेदिति पाद्मेपिकार्तिकमाहात्म्ये राजिकामाढकंचैवनैवाद्यात्कार्तिकव्रती द्विदलंतिलतैलंच तथा-
न्यन्मतिदूषितम् स्कांदेपि कार्तिकेवर्जयेत्तद्वद्द्विदलंबहुबीजकम् माषमुद्गमसूराश्चचणकाश्चकुलित्थकाः निष्पावारा

जमाषाश्चआढक्योर्द्विदलंस्मृतं नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत् अत्रकेचिदुत्पत्तिसमयेदलद्वयंयस्यभवतितद्भूतपूर्वगत्याद्विदलमित्युच्यतइत्याहुः उदाहरन्तिच बीजमेवसमुद्भूतंद्विदलंचांकुरंविना दृश्यतेयत्रसस्येषुद्विदलंतन्निगद्यतइति अन्येतुलक्षणायांमानाभावाद्वचनस्यनिर्मूलत्वाद्द्विदलात्मकंयस्यस्वरूपंतदेववर्जयेदित्याहुः तथानारदीये कार्तिकेवर्जयेत्तैलं कार्तिकेवर्जयेन्मधु कार्तिकेवर्जयेत्कांस्यंकार्तिकेशुक्तसंधितं कांस्यंतत्पात्रभोजनं शुक्तंपर्युषितं संधितंलवणशाकः तत्रैव कार्तिकेविष्णुमूर्त्यग्रेदीपदानाद्दिवंव्रजेत् तथा कार्तिकेतुकृतादीक्षानृणांजन्मविमोचनी तथाकार्तिकेकृच्छ्रसेवीयःप्राजापत्यपरोऽथवा एकांतरोपवासीवात्रिरात्रोपोषितोपिवा षड्वाद्वादशपक्षेवामासंवावरवर्णिनि एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनभैक्षेणव्रजतेपरमंपदम् अन्येपिनियमाःप्रागुक्ताः ग्राह्यमुक्तंस्कांदे व्रीहयोयवगोधूमाःप्रियंगुतिलशालयः एतेहिसात्त्विकाःप्रोक्ताःस्वर्गमोक्षफलप्रदाः काशीखंडे ऊर्जेयवान्नमश्नीयाद्देवान्नमथवापुनः वृंताकंसूरणंचैवशूकशिंबींश्चवर्जयेत् पृथ्वीचंद्रोदये पाद्ये नोर्जेविंध्याविधातव्याव्रतिनाकेनचित्क्वचित् तथानारदीये अव्रतेनक्षपेद्यस्तुमासंदामोदरप्रियं तिर्यग्योनिमवाप्नोतिनात्रकार्याविचारणा अन्यान्यपि तांबूलतैलकेशकर्तनादिवर्जनसंकल्परूपाणिप्रागुक्तानि तथाकार्तिकेआकाशदीपउक्तोनिर्णयामृतेपुष्करपुराणे तुलायांतिलतैलेनसायंकालेसमागते आकाशदीपंयोदद्यान्मासमेकंहरिंप्रति महतींश्रियमाप्नोतिरूपसौभाग्यसंपदमिति तद्विधिश्चहेमाद्रावादित्यपुराणे दिवाकरेस्ताचलमौलिभूते गृहाददूरेपुरुषप्रमाणं यूपाकृतिंयज्ञियवृक्षदारुमारोप्यभूमावथतस्यमूर्ध्नि यवांगुलच्छिद्रयुतास्तुमध्येद्विहस्तदीर्घाअथपट्टिकास्ताः कृत्वाचतस्रोऽष्टदलाकृतीस्तुयाभिर्भवे

दष्टदिशानुसारी तत्कर्णिकायांतु महाप्रकाशोदीपःप्रदेयोदलगाःकार्याष्टौ निवेद्यधर्मायहरायभूम्यैदामोदरायाप्यथधर्मराज्ञे प्रजापतिभ्यस्त्वथसत्पितृभ्यः प्रेतेभ्यएवाथतमःस्थितेभ्यइति अपरार्केत्वन्योमंत्रउक्तः यथा दामोदरायनभसितुलायांलोलयासह प्रदीपंतेमयादत्तंनमोनंतायवेधसइति कार्तिककृष्णचतुर्थीकरकचतुर्थी साचंद्रोदयव्यापिनीग्राह्या दिनद्वयेतत्त्वेपूर्वा तत्रैवपूजाद्याम्नानात् कार्तिककृष्णद्वादशीगोवत्ससंज्ञा साप्रदोषव्यापिनीग्राह्या दिनद्वयेतत्त्वेपूर्वा युग्मवाक्यात् वत्सपूजावटश्चैवकर्तव्याप्रथमेहनीतिनिर्णयामृतेभिधानाच्च अत्रविशेषोमदनरत्नेभविष्ये सवत्सांतुल्यवर्णांचशीलिनींगांपयस्विनीं चंदनादिभिरालिप्यपुष्पमालाभिरर्चयेत् अर्घ्यंताम्रमयेपात्रेकृत्वापुष्पाक्षतैस्तिलैः पादमूलेतुदद्याद्वैमंत्रेणानेनपांडव क्षीरोदार्णवसंभूते सुरासुरनमस्कृते सर्वदेवमयेमातर्गृहाणार्घ्यंनमोनमः ततोमाषादिसंसिद्धान्वटकान्विनिवेदयेत् सुरभित्वंजगन्मातर्देविविष्णुपदेस्थिता सर्वदेवमयेग्रासंमयादत्तमिमंग्रस ततःसर्वमयेदेविसर्वदेवैरलंकृते मातर्ममाभिलषितंसफलंकुरुनंदिनि इतिप्रार्थयेत् तथा तद्दिनेतैलपक्वंचस्थालीपक्वंयुधिष्ठिर गोक्षीरंगोघृतंचैवदधितक्रंचवर्जयेत् ज्योतिर्निबंधेनारदः आश्विनेकृष्णपक्षेतुद्वादशादिषुपंचसु तिथिषूक्तःसर्वरात्रेनृणांनीराजनाविधिः नीराजयेत्तुदेवांस्तुविप्रान्गाश्चतुरंगमान् ज्येष्ठान्श्रेष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितइति निर्णयामृतेस्कांदे कार्तिकस्यासितेपक्षेत्रयोदश्यांनिशामुखे यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति मंत्रस्तु मृत्युनापाशदंडाभ्यांकालेनयमयासह त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतांममेति कार्तिककृष्णचतुर्दश्यांप्रभातेचंद्रोदयेभ्यंगंकुर्यात् तदुक्तंहेमाद्रौनिर्णयामृतेचभविष्योत्तरे कार्तिकेकृष्णपक्षेतुचतुर्दश्यामिनोदये अवश्यमेवकर्तव्यंस्नानंनरकभीरुभिः इनश्चंद्रः मदनरत्नेपि-

धूदयइतिपाठः दिनोदयइतिपाठात् सूर्योदयोत्तरंत्रिमुहूर्तेस्नानंवदतांगौडानांतदनुसारिणांचाज्ञैतेव पूर्वविद्धचतुर्दश्यांकार्तिकस्यासि
तेतरे पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतइति स्मृतिदर्पणेपि चतुर्दशीचाश्वयुजस्यकृष्णास्वात्यर्कसंयुक्ताचभवेत्प्रभाते स्नानसम
भ्यज्यनरैस्तुकार्यंसुगंधतैलेनविभूतिकामैरिति पृथ्वीचंद्रोदयेपाद्मे आश्वयुक्कृष्णपक्षस्यचतुर्दश्यांविधूदये तिलतैलेनकर्तव्यं
स्नानंनरकभीरुणेति कर्तव्यंमंगलस्नानंनरैर्निरयभीरुभिरिति कालादर्शेपाठः उभयत्राप्यश्वयुगित्यमावास्यांतमासमभिप्रेत्योक्तं
तथा तैलेलक्ष्मीर्जलेगंगादीपावल्याश्चतुर्दशीं प्राप्येतिर्विशेषः प्रातःस्नानंतुयःकुर्याद्यमलोकंनपश्यतीति दिनद्वयेपिचंद्रोदयेच-
तुर्दशीसत्वेतदभावेप्यरुणोदयेसंपूर्णेखंडेवादिनद्वयेचतुर्दशीसमत्वेचपूर्वदिनेभ्यंगंकुर्यात् पूर्वविद्धचतुर्दश्यामितिवचनात् पूर्वदि-
नेपरदिनएववासत्वेसैवग्राह्या दिनद्वयेप्यसत्वेअरुणोदयव्यापिनीग्राह्या पक्षेप्रत्यूषसमयइत्युक्तेः वक्ष्यमाणवचनाच्च तदभावे
तुचतुर्दशीह्रासेपूर्वेद्युःप्रवेशयपूर्वेऽन्हित्रयोदशीमध्यएवाभ्यंगंकुर्यादितिदिवोदासः केचिदत्रवचनमपिसाधकत्वेनवदंति ति-
थ्यादौतुभवेद्यावान्ह्रासोवृद्धिःपरेहनि तावान्ग्राह्यः सपूर्वेद्युरदृष्टेपिस्वकर्मणीतितन्नमंदं नहीदंवचनंपूर्वदिनस्यापूर्वग्राह्यत्वं
विधत्ते नत्वेकभक्तजन्माष्टम्यादौदिनद्वयेकर्मकालव्याप्त्यभावेसर्वत्रपूर्वदिनस्यग्राह्यत्वप्रसंगात् किंतु यत्रैकभक्तादौदिनद्व
येकर्मकालव्याप्त्यभावेवाक्यांतरेणान्यार्थेनवापूर्वदिनस्यग्राह्यत्वमुक्तं तत्रमुख्यकालेतत्तिथेरभावेपितत्रैवानुष्ठानबोधकमिदं न
नचात्रतदस्तीतियत्किंचिदेतत् तेनचतुर्थयामगामिनीग्राह्या अतएवसर्वज्ञनारायणः तथाकृष्णचतुर्दश्यामाश्विनेऽर्कोदयात्पुरा
यामिन्याःपश्चिमेयामेतैलाभ्यंगोविशिष्यतइति मृगांकोदयवेलायांत्रयोदश्यांयदाभवेत् दर्शोवामंगलस्नानंदुःखशोकभयप्रदमि

ति कालादर्शेत्रयोदशीनिषेधाच्च तेनायमर्थः यथाग्निहोत्रेयावज्जीवंसायंप्रातःकालेषुव्याप्यकालस्यगुरुत्वम् तथात्रचतुर्दशीचतुर्थयामारुणोदयचंद्रोदयानामुत्तरोत्तरस्यव्याप्यत्वाद्गुरुत्वमिति यदपिदिवोदासीये त्रयोदशीयदाप्रातःक्षयंयातिचतुर्दशी रात्रिशेषेत्वमावास्यातदाभ्यंगेत्रयोदशीति वचनंतद्धेमाद्रिनिर्णयामृताद्यलिखितत्वेननिर्मूलं समूलत्वेपिचतुर्दश्याः सूर्योदयद्वयासंबंधित्वरूपःक्षयोत्रविवक्षितः सूर्योदयात्प्राक्समाप्तौचंद्रोदयकालसत्त्वेचतथैवांगीकारात् किंतु अभ्यंगकालात्प्राक्समाप्तिरूपोऽत्रह्रासः क्षयशब्देनविवक्षितः सचारुणोदयात् चतुर्थयामाद्वाप्राक्यदाह्रासस्तत्परमिदं अतएवसर्वज्ञनारायणेनचतुर्थयाममात्रेस्नानमुक्तं तथाचोदाहृतं तथाकृष्णचतुर्दश्यामिति ज्योतिर्निबंधेनारदोपि इषासितचतुर्दश्यामिंदुक्षयतिथावपि ऊर्जादौस्वातिसंयुक्तेतदादीपावलीभवेत् कुर्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयं येतुत्रयोदशीमध्येस्नानमाहुस्तेषामाशयंनविद्मइत्यलंभूयसा यदपि अरुणोदयतोन्यत्ररिक्तायांस्नातियोनरः तस्याब्दिकभवोधर्मोनश्यत्येवनसंशयइतिदिवोदासीयेभविष्यवचनंतन्मुख्यकाले ऽरुणोदयेचतुर्दश्यभावेपितत्रैवस्नातव्यमित्येवंपरमितिसर्वंसिद्धं चतुर्घटिकात्मको ऽरुणोदयइतितत्रैवोक्तम् मदनरत्ने पाद्मे अपामार्गमथोतुंबीप्रपुन्नाटमथापरं भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै प्रपुन्नाटश्चक्रमर्दः मंत्रस्तु सितालोष्ठसमायुक्तसकंटकदलान्वित हरपापमपामार्गभ्राम्यमाणःपुनःपुनरिति अस्यामेवप्रदोषेदीपान्दद्यादित्युक्तं हेमाद्रौस्कांदे ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवादीनांभवनेषुमठेषुचेति दिवोदासीयेब्राह्मे अमावास्याचतुर्दश्योःप्रदोषेदीपदानतः यममार्गाधिकारेभ्योमुच्यतेकार्तिकेनरः एवंतिथौतुपूर्वेन्हिप्रदोषेदीपान्दत्वापरेद्युःस्नायादीतिदिवोदासीयेउक्तं

अत्रनरकोद्देशेनचतुर्वर्तियुक्तंदीपदानंकार्यम् तत्रमंत्रः दत्तोदीपश्चतुर्दश्यांनरकप्रीतयेमया चतुर्वर्तिसमायुक्तः सर्वपापापनुत्तये तत्रैवलैंगे माषपत्रस्यशाकेनभुक्त्वात्रदिनेनरः प्रेताख्यायांचतुर्दश्यांसर्वपापैःप्रमुच्यते अत्रयमतर्पणमुक्तंमदनपारिजातेवृद्धमनुना दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणम् मदनरत्नेब्राह्मे अपामार्गस्यपत्राणिभ्रामयेच्छिरसोपरि ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालायसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैनमइति तर्पणप्रकारस्तुहेमाद्रौ एकैकेनतिलैर्मिश्रान् दद्यात्त्रींस्त्रीन्जलांजलीन् संवत्सरकृतंपापंतत्क्षणादेवनश्यति तथामदनरत्नेस्कांदे दक्षिणाभिमुखोभूत्वातिलैःसव्यंसमाहितः देवतीर्थेनदेवत्वात्तिलैःप्रेताधिपोयतः तथा यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवेति इदंजीवत्पितृकेणापिकार्यम् जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरितिपाद्मोक्तेः अत्रभीष्मतर्पणमप्युक्तंदिवोदासीये तत्प्रकारस्तुमाघेवक्ष्यते इतिनरकचतुर्दशी कार्तिकामावास्यायांप्रातरभ्यंगंकुर्यात् तदुक्तंकालादर्शे प्रत्यूषआश्वयुग्दर्शेकृताभ्यंगादिमंगलः भक्त्याप्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये अस्यव्याख्यानेआदिशब्दात्संवत्वगुदकस्नानादेरुपसंग्रहः तदुक्तंपुष्करपुराणे स्वातीस्थितेरवाविंदुर्यदिस्वातिगतोभवेत् पंचत्वगुदकस्नायीकृताभ्यंगविधिर्नरः नीराजितोमहालक्ष्मीमर्चयन्श्रियमश्नुते आश्वयुग्दर्शइतिदर्शशब्दः प्रत्यूषस्वातियुक्ततिथिपरः तदुक्तंब्राह्मे ऊर्जेशुक्लद्वितीयायांतिथिषुस्वातिऋक्षगे मानवोमंगलस्नायीनैवलक्ष्म्याविमुच्यते तत्रैव इषभूतेचदर्शेचकार्तिकप्रथमेदिने यदास्वातीतदाभ्यंगस्नानंकुर्याद्दिनोदये कश्यपसंहितायांतुदीपावलिदर्शंप्रक्रम्य इंदुक्षयेपिसंक्रांतौरवौपातेदिनक्षये तत्राभ्यंगोनदोषाय

प्रातःपापापनुत्तयइति स्वातियोगंविनाप्यभ्यंगउक्तः मात्स्ये दीपैर्नीराजनादत्रसैषादीपावलीस्मृता अत्रविशेषोहेमाद्रौभविष्ये दि
वातत्रनभोक्तव्यमृतेबालातुरज्जनात् प्रदोषसमयेलक्ष्मीपूजयित्वाततःक्रमात् दीपवृक्षास्चदातव्याःशक्त्यादेवगृहेषुच तत्रैवाभ्यंग
मभिधाय एवंप्रभातसमयेत्वमावास्यांनराधिप कृत्वातुपार्वणश्राद्धंदधिक्षीरघृतादिभिः दीपान्दत्वाप्रदोषेतुलक्ष्मींपूज्ययथा-
विधि स्वलंकृतेनभोक्तव्यंसितवस्त्रोपशोभिना अयंप्रदोषव्यापीग्राह्यः तुलासंस्थेसहस्रांशौप्रदोषेभूतदर्शयोः उल्काहस्ता
नराःकुर्युःपितॄणांमार्गदर्शनमितिज्योतिषोक्तेः दिनद्वयेसत्वेपरः दंडैकरजनीयोगेदर्शःस्यात्तुपरेऽहनि तदाविहायपूर्वेद्युःपरेऽ
न्हिस्फुरवरात्रिकेतितिथितत्वेज्योतिर्वचनात् दिवोदासीयेतुप्रदोषस्यकर्मकालत्वात् अर्धरात्रेभवत्येवलक्ष्मीराश्रयितुगृहान् अतः
स्वलंकृतालिप्तादीपैर्जाग्रज्जनोत्सवाः सुधाधवलिताःकार्याःपुष्पमालोपशोभिताइति ब्राह्मोक्तेश्च प्रदोषार्धरात्रव्यापिन्येमुख्या
एकैकव्याप्तौपरैव प्रदोषस्यमुख्यत्वादर्धरात्रेतुष्टयाभावाच्च यत्तु अपराण्हेप्रकर्तव्यंश्राद्धंपितृपरायणैः प्रदोषसमयेराजन्कर्तव्या
दीपमालिकेतिक्रमः ससंपूर्णतिथावेवप्राप्तेरनुवादोनविधिः तत्तत्कर्मकालव्याप्तेर्बलवत्वात्संपूर्णतिथौप्राप्त्यर्थएवइतिप्रागप्राप्त्यावि-
ध्यनुवादविरोधाच्चेत्युक्तं अत्रैवदर्शेपररात्रेऽलक्ष्मीनिःसारणमुक्तंमदनरत्नेभविष्ये एवंगतेनिशीथेतुजनेनिद्रार्धलोचने तावन्नगर
नारीभिःशूर्पडिंडिमवादनैः निष्काश्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृहांगणात् कार्तिकशुक्लप्रतिपदिगोक्रीडनमुक्तं निर्णयामृते अस्या
मेवरात्रौबलेःपूजोक्ताहेमाद्रौभविष्ये कृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः पूजाकुर्यान्नृपःसाक्षाद्भूमौमंडलकेशुभे बलिमालिख्यदै
त्येंद्रंवर्णकैःपंचरंगकैः गृहस्यमध्यशालायांविशालायांततोऽर्चयेत् लोकश्चापिगृहस्यांतःशय्यायांशुक्लतंडुलैः संस्थाप्यबलिराजानं

फलैः पुष्पैश्च पूजयेत् मंत्रस्तु पाद्मे बलिराज नमस्तुभ्यं दैत्यदानववंदित इंद्रशत्रोमराराते विष्णुसान्निध्यदो भवेति तथा बलिमुद्दिश्य दीयंते दानानि कुरुनंदन यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितमिति तदेतत्पूर्वविद्धप्रतिपदि कर्तव्यं पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः माधवोपि बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेदिति निर्णयामृतेपि याकुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप पूजनात्रीणि वर्धंते प्रजा गावो महीपतिरिति तथा भद्रायां गोकुलक्रीडा स देशो वै विनश्यति भद्रायां द्वितीयायां तथा प्रतिपाद्यग्निकरणं द्वितीयायां तु गोर्चनं छत्रच्छेदं करिष्यते वित्तनाशं कुलक्षयमिति तथा प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् परविद्धेषु यः कुर्यात्पुत्रदारधनक्षय इति देवलवचनाच्च एते च विधिप्रतिषेधाः पूर्वदिने प्रतिपदः सायान्हव्यापित्वे द्वितीयदिने चंद्रदर्शनसंभवे च ज्ञेयाः गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमाः सोमो राजा पशून्हंति सुरभिः पूजकांस्तथेति पुराणसमुच्चयात् दिनद्वये सायान्हव्यापित्वे तु परैव ग्राह्या वर्धमानतिथौ नंदा यदा सार्धत्रियामिका द्वितीया ह्रासगामित्वादुत्तरा तत्र चोच्यत इति तथा त्रियामगा दर्शतिथिर्भवेच्चेत्सा द्वित्रियामा प्रतिपद्वृद्धौ दीपोत्सवे तु मुनिभिः प्रदिष्टे अतोन्यथा पूर्वयुतैव विधेय इति पुराणसमुच्चयादिति निर्णयामृतकारः सार्धत्रियामिकेत्यनेन चंद्रदर्शनाभाव उक्तः द्वितीयायाः पंचधाविभक्तदिनचतुर्थांशरूपापराण्हव्याप्तावेव चंद्रदर्शनसंभवात् वर्धतेति वचनद्वयं पूर्वविद्धासंभवे वेदितव्यमिति ब्रूमः दिनद्वये प्रतिपदः सायान्हव्याप्त्यभावे तु पूर्वैव रात्रौ बलिपूजाविधानेन कर्मकालव्यापित्वात् परदिने चंद्रोदये तन्निषेधादिति दिक् मदनरत्ने तु पूर्वविद्धायां गोक्रीडा नीराजनं मंगलमालिके तूत्तरत्र कार्ये कार्तिके शुक्लपक्षे तु विधानं द्वितयं भवेत् नारीनीराजनं प्रातः सायं मंगलमालिका यदा च प्रतिपत्स्वल्पा नारीनीराजनं भवेत् द्वितीयायां तदा कुर्यात्सायं मंगलमालिकामिति ब्राह्मोक्तेः

लभ्यतेयदिवाप्रातःप्रतिपद्घटिकाद्वयम् तस्यांनीराजनंकार्यंसायंमंगलमालिकेति भविष्योक्तेः प्रातर्वायदिलभ्येतप्रतिपद्घटिकाशुभा द्वितीयायांतदाकुर्यात्सायंमंगलमालिकाम् कार्तिकेशुक्लपक्षादौत्वमावास्याघटीद्वयम् देशभंगभयान्नैवकुर्यान्मंगलमालिकामिति देवीपुराणाच्चेत्युक्तम् अत्रविशेषोहेमाद्रौब्राह्मे बलिप्रतिपदंप्रक्रम्य तस्माद्द्यूतंप्रकर्तव्यंप्रभातेतत्रमानवैः तस्मिन्द्यूतेजयोयस्यतस्यसंवत्सरंजयः पराजयोविरुद्धश्चलाभनाशकरोभवेत् दयिताभिश्चसहितैर्नेयासाचभवेन्निशेति अत्रगोवर्धनपूजादिमार्गपालीपूजादिचोक्तंहेमाद्रौनिर्णयामृतेचस्कांदे प्रातर्गोवर्धनंपूज्यद्यूतंचापिसमाचरेत् भूषणीयास्तथागावःपूज्याश्चावाहदोहनाः गोवर्धनश्चगोमयेनकार्यश्चित्रेपावा मंत्रस्तु गोवर्धनधराधारगोकुलत्राणकारण बहुबाहुकृतच्छायगवांकोटिप्रदोभव गोमंत्रस्तु लक्ष्मीर्यालोकपालानांधेनुरूपेणसंस्थिता घृतंवहतियज्ञार्थेममपापंव्यपोहतु तत्रैवस्कांदे ततोऽपराण्हसमयेपूर्वस्यांदिशिभारत मार्गपालींप्रबध्नीयात्तुंगेस्तंभेथपादपे कुशकाशमयींदिव्यांलंबकैर्बहुभिर्मुने दर्शयित्वागजानश्वान्सायमस्यास्तलेनयेत् कृतहोमैर्द्विजेंद्रैस्तुबध्नीयान्मार्गपालिकाम् नमस्कारंततःकुर्यान्मंत्रेणानेनसुव्रत मार्गपालिनमस्तेस्तुसर्वलोकसुखप्रदे विधेयैःपुत्रदाराद्यैःपुनरेहिव्रतस्यमे नीराजनंचतत्रैवकार्यंराष्ट्रजयप्रदम् राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयः मार्गपालींसमुल्लंघ्यनीरुजःस्युःसुखान्विताः तत्रैवादित्यपुराणे कुशकाशमयींकुर्याद्दर्षिकांसुदृढांनवां तामेकतोराजपुत्राहीनवर्णास्तथान्यतः गृहीत्वाकर्षयेयुस्तांयथासारंमुहुर्मुहुः जयेत्रहीनजातीनांजयोराज्ञस्तुवत्सरमिति

यमद्वितीयातुप्रतिपद्युताग्राह्येत्युक्तंनिर्णयामृतादौ यमद्वितीयामध्यान्हव्यापिनीपूर्वविद्धाचेतिहेमाद्रिः अत्रविशेषोहेमाद्रौस्कांदे ऊर्जेशुक्लद्वितीयायामपराण्हेऽर्चयेद्यमं स्नानंकृत्वाभानुजायांयमलोकंनपश्यतिति ऊर्जेशुक्लद्वितीयायांपूजितस्तर्पितोयमः वेष्टितःकिन्नरैर्हृष्टैस्तस्मैयच्छतिवांछितं तथाभविष्ये प्रथमाश्रावणेमासितथाभाद्रपदेतरा तृतीयाश्वयुजेमासिचतुर्थीकार्तिकेभवेत् श्रावणेकलुषानामतथाभाद्रेचगीर्मला आश्विनेप्रेतसंचाराकार्तिकेयाम्यकामतेत्युक्त्वाप्रथमायांव्रतंद्वितीयायांसरस्वतीपूजातृतीयायांश्राद्धमुक्त्वाचतुर्थ्यामुक्तं कार्तिकेशुक्लपक्षस्यद्वितीयायांयुधिष्ठिर यमोयमुनयापूर्वंभोजितःस्वगृहेऽर्चितः अतोयमद्वितीयेयंत्रिषुलोकेषुविश्रुता अस्यांनिजगृहेविप्रनभोक्तव्यंततोनरैः स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनं दानानिचप्रदेयानिभगिनीभ्योविधानतः स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः प्रतिपन्नाः माताभगिन्यइतिहेमाद्रिः पितृव्यभगिनीहस्तात्प्रथमायांयुधिष्ठिर मातुलस्यसुताहस्ताद्द्वितीयायांतथानृप पितुर्मातुःस्वसुःकन्येतृतीयायांतयोःकरात् भोक्तव्यंसहजायाश्चभगिन्याहस्ततःपरं सर्वासुभगिनीहस्ताद्भोक्तव्यंबलवर्धनं यस्यांतिथौयमुनयायमराजदेवःसंभोजितःप्रतिजगत्स्वसृसौहृदेन तस्यांस्वसुःकरतलादिहयोभुनक्तिप्राप्नोतिरत्नसुखधान्यमनुत्तमंसः गौडास्तु यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत् अर्घ्यश्चात्रप्रदातव्योयमायसहजद्वयैः मंत्रः एह्येहिमार्तंडजपाशहस्तयमांतकालोकधरामरेश भ्रातृद्वितीयाकृतदेवपूजांगृहाणचार्घ्यंभगवन्नमस्ते भ्रातस्तवानुजाताहंभुंक्ष्वभक्तमिदंशुभं प्रीतयेयमराजस्ययमुनायाविशेषतः ज्येष्ठाग्रजातेतिवदेदितिस्मार्ताः इत्यन्नदानमित्यप्याहुःब्रह्मांडपुराणेपि यातुभोजयतेनारीभ्रातरंयुग्मकेतिथौ अर्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात् भ्रातुरायुः

क्षयोराजन्नभवेत्तत्कर्हिचिदिति कार्तिकशुक्लनवमीयुगादिः सापौर्वाण्हिकीग्राह्या शुक्लपक्षस्थत्वात् अत्रपिंडरहितंश्राद्धंकर्तव्यं अन्यत्तुप्रागुक्तं अत्रैवविष्णुत्रिरात्रमुक्तं हेमाद्रौपाद्मे कार्तिकेशुक्लनवमीमवाप्यविजितेंद्रियः हरिंविधायसौवर्णंतुलस्यासहितंविभुम् पूजयेद्विधिवद्भक्त्याव्रतीतत्रदिनत्रयं एवंयथोक्तविधिनाकुर्याद्वैवाहिकंविधिमिति कार्तिकशुक्लैकादश्यांभीष्मपंचकव्रतमुक्तं नारदीये अतोनरैःप्रयत्नेनकर्तव्यंभीष्मपंचकं कार्तिकस्यामलेपक्षेस्नात्वासम्यग्यतव्रतः एकादश्यांतुगृह्णीयाद्व्रतंपंचदिनात्मकमिति तद्विधिस्तुगोमयेनस्नात्वामौनीपंचामृतैःपंचगव्यैर्विष्णुंसंस्नाप्यसंपूज्यपायसंनिवेद्यद्वादशाक्षरमष्टोत्तरशतंजप्त्वा ॐनमोविष्णवइति षडक्षरेणघृताक्तान्यवान्व्रीहींश्चाष्टोत्तरशतंहुत्वाभूमौस्वपेत् एवंपंचदिनेषुकुर्यात् विशेषस्त्वाद्येऽन्हिहरेःपादौकमलैःसंपूज्य त्रिर्गोमयंप्राशयम् द्वितीयेन्हिबिल्वपत्रैर्जानुनीसंपूज्यगोमूत्रं त्रयोदश्यांभृंगराजेननाभिंसंपूज्यक्षीरम् चतुर्दश्यांकरवीरैःस्कंधंसंपूज्यदधि पौर्णमास्यांहोमांतेलोहीपापप्रतिमांखड्गचक्रहस्तांकृष्णवस्त्रेणवेष्टितांप्रस्थतिलोपरिस्थांकृत्वाधर्मराजनामभिः करवीरैःसंपूज्य यदन्यजन्मनिवापुनः तत्सर्वंप्रशमंयातुमत्पापंतवपूजनादिति पुष्पांजलिंक्षिप्त्वाकृष्णप्रतिमांचसंपूज्यविप्रायदत्वाविप्रान्संभोज्य दक्षिणांदत्वापंचगव्यंप्राश्यपौर्णमास्यांनक्तंभुंजीतेतिलघुनारदीये पंचगव्यप्राशनंषडक्षरेणेतिहेमाद्रिः हेमाद्रौभविष्येतुशाकैर्मुन्यन्नैर्वापंचाहंवर्तनमुक्तं अंतेप्युक्तं यद्भीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशीनिरुद्धमुन्यन्नभोजनपरस्यनरस्यतस्मिन्निष्टंफलंदिशतिपांडवशार्ङ्गधन्वेति तथापाद्मे पंचाहंपंचगव्याशीभीष्मायार्घ्यंचपंचसु अहःस्वपितथादद्यान्मंत्रेणानेनसुव्रत सत्यव्रतायशुचयेगांगेयायमहात्मने भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे वैयाघ्रपद्यगो

र्थयेतिच सव्येनानेनमंत्रेणतर्पणंसार्ववर्णिकमिति कार्तिकशुक्लद्वादश्यांरेवतीनक्षत्रयोगरहितायांपारणंकार्यं तदुक्तं आभाकासितपक्षेषुमैत्रश्रवणरेवती संगमेनहिभोक्तव्यंद्वादशद्वादशीहरेरिति यदातुरेवतीयोगरहिताद्वादशीसर्वथानलभ्यतेतदारेवत्याश्चतुर्थपादंवर्जयेत् वचनंतुप्रागुक्तं लघुनारदीये कार्तिकेशुक्लपक्षस्यकृत्वाचैकादशींनरः प्रातर्दत्वाशुभान्कुंभान्प्रयातिहरिमंदिरम् मदनरत्नेवाराहे एकादशीसोमयुक्ताकार्तिकेमासिभामिनि उत्तराषाढसंयोगेअनंतासाप्रकीर्तिता तस्यांयत्क्रियतेभद्रेसर्वमानंत्यमश्नुते अस्यामेवरात्रौदेवोत्थापनमुक्तंहेमाद्रौब्राह्मे एकादश्यांचशुक्लायांकार्तिकेमासिकेशवं प्रसुप्तंबोधयेद्रात्रौश्रद्धाभक्तिसमन्वितइति मदनरत्नेभविष्ये कार्तिकेशुक्लपक्षेतुएकादश्यांप्रयत्नतः मंत्रेणानेनराजेंद्रदेवमुत्थापयेद्द्विजः रामार्चनचंद्रिकादौतुद्वादश्यामुक्तं पारणाहपूर्वरात्रेघंटादीन्वादयेन्मुहुरिति अत्रदेशाचारतोव्यवस्था तत्रैवदेवदेवस्यस्नानपूर्वंमहद्भवेत् महापूजांततःकृत्वादेवमुत्थापयेत्सुधीः मंत्रास्तुवाराहपुराणेउक्ताः ॐ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय बुध्यस्वदेवेशजगन्निवासमंत्रप्रभावेनसुखेनदेव इयंतुद्वादशीदेवप्रबोधार्थंविनिर्मिता त्वयैवसर्वलोकानांहितार्थंशेषशायिना उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिदं उत्थितेचेष्टितेसर्वमुत्तिष्ठोत्तिष्ठमाधव गतामेघावियच्चैवनिर्मलंनिर्मलादिशः शारदानिचपुष्पाणिगृहाणममकेशव इदंविष्णुरितिप्रोक्तोमंत्रउत्थापनेहरेरिति एवंदेवमुत्थाप्यतद्दिनेचातुर्मास्यव्रतसमाप्तिंकुर्यात् तदुक्तंभारते चतुर्धागृह्यवैचीर्णंचातुर्मास्यव्रतंनरः कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेत् लघुनारदीये चातुर्मास्यव्रतानांचसमाप्तिःकार्तिकेस्मृता मंत्रश्चनिर्णयामृतेसनत्कुमारेणोक्तः इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दनेति अथवाराहोक्तोबोधि

नीविधिः एकादश्यांरात्रौकुंभेघृतपात्रोपरिहैमंमाषमितंमत्स्यंपंचामृतेनसंस्नाप्यकुंकुमपीतवस्त्रसुगन्धाद्यैः संपूज्यमत्स्यादिदशावतारान् संपूज्यजागरंकृत्वाप्रातर्देवमाचार्यंच वस्त्राद्यैः संपूज्य जगदादिर्जगद्रूपोजगदादिरनादिमान् जगदाद्योजगद्योनिःप्रीयतांमेजनार्दन इतिनत्वा दक्षिणांदत्वाब्राह्मणान्भोजयेदिति तथाब्राह्मे महातूर्यरवैरात्रौतस्यामथस्यंदनेस्थितम् उत्थितंदेवदेवेशंनगरेपार्थिवः स्वयं चतुरोवार्षिकान्मासान्नियमंयस्ययत्कृतम् कथयित्वाद्विजेभ्यस्तद्दद्यात्तस्यासदक्षिणं यस्यप्रक्ष्यस्यनियमःकृतस्तद्द्रव्यंदद्यादित्यर्थः इदंशुक्रास्तादावपिकार्यं आशौचेतु पूजामन्येनकारयेत् कार्तिकशुक्लद्वादशीपौर्णमासीचमन्वादिः सापौर्वाह्णिकीग्राह्या अन्यत्प्रागुक्तम् कार्तिकशुक्लचतुर्दशीवैकुंठसंज्ञा साविष्णुपूजायांरात्रिव्यापिनीग्राह्या दिनद्वयेतद्व्याप्तौनिशीथप्रदोषोभयव्यापिनीग्राह्या तदुक्तंहेमाद्रौभविष्ये कार्तिकस्यासितपक्षेचतुर्दश्यांनराधिप सोपवासस्तुसंपूज्यहरिंरात्रौजितेंद्रियइति अस्याएवविश्वेश्वरप्रतिष्ठादिनत्वात्तत्प्रीत्यर्थंयदोपवासादिक्रियते तदारुणोदयव्यापिनीग्राह्या तदुक्तंत्रिस्थलीसेतौ सनत्कुमारसंहितायां वर्षेचहेमलंबाख्येमासेश्रीमतिकार्तिके शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति महादेवतिथौब्राह्ममुहूर्तेमणिकर्णिके स्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयदिति तत्पूर्वदिनेचोपवासःकार्यः ततःप्रभातेविमलेकृत्वाकृत्वापूजांमहाद्भुताम् दंडपाणेर्महाधाम्निवनेऽस्मिन्कृतपारणइति तत्रैवोक्तेः शिवरहस्येपि पूजाजागराद्युक्तम् ततोऽरुणोदयेजातेस्नात्वास्नात्वाचभस्मना संध्यांसमाप्यविश्वेशंमामभ्यर्च्ययथाविधि मद्भक्तान्भोजयामासऋषयोबभूवुस्ततइति अत्रकार्तिकव्रतोद्यापनंपाद्मेउक्तम् कार्तिकमाहात्म्ये अथोर्जव्रतिनःसम्यगुद्यापनविधिंशृणु ऊर्जशुक्लचतुर्दश्यां

कुर्यादुद्यापनंव्रती तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभाम् तुलसीमूलदेशेचसर्वतोभद्रमेवच तस्योपरिष्टात्कलशंपंचरत्नसमन्वितम् पूजयेत्तत्रदेवेशंसौवर्णंगुर्वनुज्ञया रात्रौजागरणंकुर्याद्गीतवाद्यादिमंगलैः ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान् त्रिंशन्मितानथैकंवास्वशक्त्यावानिमंत्रयेत् अतोदेवाइतिद्वाभ्यांजुहुयात्तिलपायसं ततोगांकपिलांदद्यात्पूजयेद्विधिवद्गुरुमिति कार्तिकीपौर्णमासी पराग्राह्या अमापौर्णमास्यौपरेइतिदीपिकोक्तेः अत्रविशेषोहेमाद्रौब्राह्मे पुण्यामहाकार्तिकीस्याज्जीवेंदोः कृत्तिकासुच तथा आग्नेयंतुयदाऋक्षंकार्तिक्यांभवतिक्वचित् महतीसातिथिर्ज्ञेयास्नानदानेषुचोत्तमा यदातुयाम्यंभवतिऋक्षंतस्यांतिथौक्वचित् तिथिः सापिमहापुण्यामुनिभिःपरिकीर्तिता प्राजापत्यंयदाऋक्षंतिथौतस्यांनराधिप सामहाकार्तिकीप्रोक्तादेवानामपिदुर्लभेति पाद्मे विशाखासुयदाभानुःकृत्तिकासुचचंद्रमाः संयोगःपद्मकोनामपुष्करेष्वपिदुर्लभः पद्मकंपुष्करेप्राप्यकपिलांयःप्रयच्छति सहित्वासर्वपापानिवैष्णवंलभतेफलं यमः कार्तिक्यांपुष्करेस्नातःसर्वपापैःप्रमुच्यते माघ्यांस्नातःप्रयागेतुमुच्यतेसर्वकिल्बिषैः अस्यामेवसायंकालेमत्स्यावतारोजातइत्युक्तम् पाद्मेकार्तिकमाहात्म्ये वरान्दत्वायतोविष्णुर्मत्स्यरूपीभवेत्ततः तस्यांदत्तंहुतंजप्तंतदक्षय्यफलंस्मृतमिति अत्रत्रिपुरोत्सवउक्तोभार्गवार्चनदीपिकायां पौर्णमास्यांतुसंध्यायांकर्तव्यस्त्रिपुरोत्सवः दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये कीटाःपतंगामशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः दृष्ट्वाप्रदीपंनचजन्मभागिनोभवंतिनित्यंश्वपचाहिविप्राः अत्रवृषोत्सर्गोतिप्रशस्तः तदुक्तंमात्स्ये कार्तिक्यांयोवृषोत्सर्गंकृत्वानक्तंसमाचरेत् शैवंपदमवाप्नोतिशिवव्रतमिदंस्मृतमिति अत्रकार्तिकेयदर्शनमुक्तंकाशीखंडे कार्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनं सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः इतिश्रीकमलाकर

भट्टकृतेनिर्णयसिंधौद्वितीयपरिच्छेदेकार्तिकमासः वृश्चिकेपूर्वाःषोडशघटिकाःपुण्याः शेषंप्राग्वत् मार्गशीर्षकृष्णाष्टमीकालाष्टमी साचरात्रिव्यापिनीग्राह्या मार्गशीर्षसिताष्टम्यांकालभैरवसन्निधौ उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्यते इतिकाशीखंडात् रात्रिव्रतत्वावगतेः रुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिथिरितिब्रह्मवैवर्ताच्च दिनद्वयेऽश्रुतोरात्रिव्याप्तावुत्तरैव भैरवोत्पत्तेः प्रदोषकालीनत्वादितिकेचित् तन्न शिवरहस्येमध्यान्हेभैरवोत्पत्तेःश्रवणात् तथाचतत्रैव नित्ययात्रादिकंकृत्वामध्यान्हेसंस्थितेरवावित्युपक्रम्य ब्रह्मणारुद्रेवज्ञातेउक्तं तदोग्ररूपादनवद्यान्मत्तःश्रीकालभैरवः आविरासीत्तदालोकान्भीषयन्नखिलानपीति अत्रोपवासएवप्रधानमित्युक्तंतत्रैव उपोषणस्याग्रभूतमर्घ्यदानमिहस्मृतम् तथाजागरणंरात्रौपूजायामचतुष्टये संध्यायामपिपूजेवोक्ता तेनमध्यान्हव्यापिनीयुक्ता दिनद्वयेऽश्रातःसंपूर्णायांवातद्व्याप्तौपूर्वैव पूर्वोक्तवचनात् पारणान्तुप्रातरेव यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणेतिवचनात् अत्रचकालभैरवपूजोक्तात्रिस्थलीसेतौ कृत्वाचविविधांपूजांमहासंभारविस्तरैः नरोमार्गासिताष्टम्यांवार्षिकंविघ्नमुत्सृजेत् तथा तीर्थेकालोदकेस्नात्वाकृत्वातर्पणमत्वरः विलोक्यकालराजानंनिरयादुद्धरेत्पितॄनिति इयंचकार्तिक्यनंतरागौणचांद्राभिप्रायेण मार्गशीर्षशुक्लपंचम्यांनागपूजोक्ताहेमाद्रौस्कांदे शुक्लामार्गशिरेपुण्याश्रावणेयाचपंचमी स्नानदानैर्बहुफलानागलोकप्रदायिनीति इयंनागपूजायांषष्ठीयुतैवग्राह्या पंचमीनागपूजायांकार्याषष्ठीसमन्विता तस्यांतुतुषितानागाइतरासचतुर्थिकेति मदनरत्नेवचनात् मार्गशीर्षशुक्लषष्ठीचंपाषष्ठीतिमहाराष्ट्रेषुप्रसिद्धा सोत्तरयुताग्राह्या षण्मुन्योरितियुग्मवाक्यात् पूर्वाण्हेदैविकंकुर्यादितिवचनादस्यचदैवकर्मत्वात् इयमेवयोगविशेषेणचंपेत्युच्यते तदुक्तंब्रह्मांडपुराणेमल्लारिमाहात्म्ये मार्गभाद्रपदेशुक्ला

षष्ठीवैधृतिसंयुता रविवारेणसंयुक्तासाचांपेतीहकीर्तितेति विशाखाभौमयोगेनसाचांपेतीहकीर्तितेति मदनरत्नेपाठः मार्गशीर्षेमले
पक्षेषष्ठ्यांवारेऽर्कमालिनः शततारागतेचंद्रेलिंगस्याहृष्टिगोचरमिति इयंचयोगवशेनपूर्वापरावाकार्या चंपाषष्ठीसप्तमीयुतेतिदिवोदा
सः इयमेवस्कंदषष्ठी सापूर्वयुता कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेदिति भृगूक्तेः प
रेऽन्हिरात्रावाद्ययाममध्येपारणासंभवेदिदं अन्यथान्तेरेवेतिदिवोदासः अब्दपर्यंतषष्ठीषुसेनाविदारकस्कंदमहासेनमहाबल रुद्रोमा
ग्निजषड्वक्त्रगंगागर्भनमोस्तुते इतिराजतंस्कंदंसंपूज्यविप्रायदद्यादितिदिवोदासः मार्गशीर्षकृष्णचतुर्दश्यांपिशाचविमोचनीतीर्थे
श्राद्धंत्रिस्थलीसेतोभट्टचरणैरुक्तम् तस्यप्राप्तपैशाच्यस्वपित्राद्युद्देश्यकत्वेपार्वणत्वादपराण्हव्यापिनीग्राह्या अज्ञातनामपिशाचाद्युद्देश्यकत्वेत्वेकोद्दिष्टत्वात् मध्यान्हव्यापिनीति कुलधर्मव्रतादौतूक्तैरेव चैत्रनभोगतेतरसितास्यांदूर्ध्वमिति दीपिकोक्तेः
मार्गशीर्षेपौर्णमास्यांदत्तात्रेयोत्पत्तिः तदुक्तंस्कांदेसह्याद्रिखंडे मार्गशीर्षेतथामासिदशमेऽन्हिसुनिर्मले मृगशीर्षयुतेपौर्ण
मास्यांयज्ञस्यवासरे जनयामासदेदीप्यमानपुत्रंसतीशुभम् तंविष्णुमागतंज्ञात्वाअत्रिर्नामाकरोत्स्वयम् दत्तवान्स्वस्यपुत्रत्वाद्द
त्तात्रेयइतीश्वरइति इयंप्रदोषव्यापिनीग्राह्येतिवृद्धाः मार्गशीर्षपौर्णिमानंतराष्टमीअष्टकाएवंपौषादिमासत्रयेपि हेमंतशिशिरयो
श्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यांवेत्याश्वलायनोक्तेः एकस्यामष्टम्यांवैकार्येतिहरदत्तः कश्चित्पंचम्यप्युक्ताप्रोष्ठपद्य
ष्टकाभूयःपितृलोकेभविष्यतीति पाद्मवचनात् तत्पूर्वसप्तमीषुपूर्वेद्युः तत्परनवमीष्वन्वष्टकाकृत्यश्राद्धमुक्तम् कालादर्शे मार्ग
शीर्षेचपौषेचमाघेप्रोष्ठेचफाल्गुने कृष्णपक्षेचपूर्वेद्युरन्वष्टकंतथाष्टकाइति यत्तुविष्णुः अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका-

इति पद्मकौर्मे अमावास्याष्टकास्तिस्रः पौषमासादिषुत्रिष्विति तच्चतुर्थ्यामनावश्यकत्वार्थं याचाप्यन्याचतुर्थीस्यात्तांचकुर्यात्प्रयत्नतइतिवायुब्रह्मांडपुराणात् श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइतिविष्णूक्तेरितिशूलपाणिः शाखाभेदाद्व्यवस्थेतितत्त्वम् वायुब्रह्मांडयोः आद्यापूपैःसदाकार्यामांसैरन्यासदाभवेत् शाकैःकार्यातृतीयास्यादेषद्रव्यगतोविधिः पौषादिक्रमः अत्राष्टकातुप्रागेवनिर्णीता तत्राष्टम्यपराह्णव्यापिनीग्राह्या अयाच्छादनपर्यंतंश्राद्धंपार्वणवद्भवेदित्याश्वलायनकारिकोक्तेरपराह्णकालत्वाच्चपार्वणस्य पूर्वेद्युरष्टकाश्राद्धयोस्तुअष्टम्यनुरोधेननिर्णयः अतएवसूत्रम् पूर्वेद्युःपितृभ्योदद्यात् अपरेद्युरन्वष्टक्यमितिच अत्रकामकालौविश्वेदेवौ इष्टिश्राद्धेक्रतुदक्षावष्टम्यांकामकालावितिसायणीयशंखोक्तेः अत्रश्राद्धाकरणप्रायश्चित्तमुक्तंसूत्रविधाने एभिर्द्युभिर्जपेन्मंत्रंशतवारंतुतद्दिने आन्वष्टक्यंयदान्यूनंसंपूर्णंयातिसर्वथेति अशाकौत्वाश्वलायनः अथश्वोभूतेष्टकाःपशुनास्थालीपाकेनवाप्यनडुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामेष्टकेतिनत्वेवानष्टकःस्यादिति मार्गशीर्षादिषुमलमासेसतितत्राष्टकानकार्या चतुर्णामितिग्रहणादित्युक्तंनारायणवृत्तौ तथाकाठकगृह्येपि महालयाष्टकाश्राद्धोपाकर्माद्यपकर्षयेत् स्पष्टमासविशेषाख्याविहितंवर्जयेन्मले इति मार्गादिरविवारेषुकाम्यव्रतमुक्तम् हेमाद्रौ तत्रभक्ष्याण्युक्तानिसंग्रहेसौरधर्मे पत्रनिंबंतुलस्याश्चफलमथघृतंमार्गशीर्षादिभक्ष्यंमुष्टीनांत्रिस्तिलानांत्रिपलदधिपयोदुग्धकंगोमयंच त्रिस्त्वंतोयांजलीनांत्रिमरिचकमथोत्रिःपलाःसक्तवःस्युर्गोमूत्रंशर्करासद्धविरितिविधिनाभानुवारेक्रमेणेति इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौद्वितीयपरिच्छेदेमार्गशीर्षमासःसमाप्तः धनुःसंक्रमेपराःषोडशघटिकाःपुण्याःअन्य

तूभाग्वत् अत्रोत्सर्जननिर्णयोवक्तव्योप्युपाकर्मप्रसंगात्प्रागेवोक्तः कल्पतरौभविष्ये पौषमासियदादेवीशुक्लाष्टम्यांबुधोभवेत् त
स्यांस्नानंजपोहोमस्तर्पणंविप्रभोजनं सर्वमेतत्कृतंदेविशतसाहस्रिकंभवेत् अत्रैवरोहिण्यार्द्रायोगेपुण्यतमत्वंतत्रैववर्ज्यं पौषशु
क्लैकादशीमन्वादिः साचोक्ताप्राक् पौषपौर्णिमानंतराः सप्तम्यष्टमीनवम्योष्टकाद्याः प्रागुक्ताः पौषामावास्यायांअर्धोदययोगविशे-
षः तदुक्तंमदनरत्नेमहाभारते अमार्कपातश्रवणैर्युक्ताचेत्पुष्यमाघयोः अर्धोदयःसविज्ञेयः कोटिसूर्यग्रहैःसमइति पुष्यमाघयो-
र्मध्यवर्तिनीपौषीपौर्णमास्युत्तरामावास्येत्यर्थइतिभट्टाः मदनरत्नेपुष्यस्यनमाघस्येत्यर्थउक्तः तन्न हेमाद्रिविरोधात् तत्रहिमा
घएवोक्तः तथा दिवैवयोगः शस्तोयंनतुरात्रौकदाचनेति इदमूर्धमन्यनिबंधेष्वभावान्निर्णयामृतमात्रोक्तेर्निर्मूलमेव तेनहेमाद्र्या
दिमतेरात्रावर्धोदयोभवत्येव केचित्तु किंचिदूनोमहोदयइत्याहुस्तन्निर्मूलम् हेमाद्रौमदनरत्नेचस्कांदे माघामायांव्यतीपातेआदित्ये
विष्णुदैवते अर्धोदयंतदित्याहुःसहस्रार्कग्रहैःसमम् तत्रैव माघमासेकृष्णपक्षेपंचदश्यांरवेर्दिने वैष्णवेनतुऋक्षेणव्यतीपातेस्कदु
र्लभे व्रतंकुर्यादित्ययेऽन्वयः तत्रैव ब्रह्मविष्णुमहेशानांसौवर्णीःपलसंख्यया प्रतिमास्तुप्रकर्तव्यास्तदर्धेनद्विजोत्तम सार्धशतत्रयंशु
भोर्द्रोणानांतिलपर्वतः कर्तव्योपर्वतोविष्णुरुद्रयोःपूर्वसंख्यया शंकरस्त्रब्रह्मा शय्यात्रयंततःकुर्यादुपस्करसमन्वितम् तिलैर्हो
मंकृत्वाप्रतिमांदद्यादित्युक्तं स्कांदे अर्धोदयेतुसंप्राप्तेसर्वंगंगासमंजलम् शुद्धात्मानोद्विजाःसर्वेभवेयुर्ब्रह्मसंमिताः यत्किंचिद्दी
यतेदानंतद्दानंमेरुसन्निभमिति अन्नदानविशेषोनिर्णयामृतेस्कांदे चतुःषष्टिपलंमुख्यममत्रंतत्रकारयेत् चत्वारिंशत्पलंवाथपं
चविंशतिरेववा अमत्रंपात्रम् तच्चकांस्यमयमित्युक्तंतत्रैव एवंसुघटितंकार्यंकांस्यभाजनमुत्तममिति तथा निधायपायसंतत्र

पद्ममष्टदलंलिखेत् पद्मस्यकर्णिकायांतुकर्षमात्रंसुवर्णकम् तदभावेतदर्धंवातदर्धंवापिकारयेत् भूमौतुतंडुलैःशुभ्रैःकृत्वाष्टदलमु
त्तमम् अमत्रंस्थापयेत्तत्रब्रह्मविष्णुशिवात्मकम् तेषांपूजाततःकार्यागंधमाल्यैस्तुशोभनैः वस्त्रादिभिरलंकृत्यब्राह्मणायनिवेद
येत् मंत्रस्तु सुवर्णपायसामत्रंयस्मादेतत्त्रयीमयम् आपत्तेस्तारकंयस्मात्तद्ब्राह्मणद्विजोत्तम समुद्रमेखलांपृथ्वीं सम्यग्दातुश्च
यत्फलम् तत्फलंलभतेमर्त्यःकृत्वेदंदानमुत्तममिति इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौपौषमासः अथमाघस्नानम्
तत्रविधयः तुलामकरमेषेषुप्रातःस्नायीसदाभवेत् हविष्यंब्रह्मचर्यंचमाघस्नानेमहाफलमितिसौरमासउक्तः ब्राह्मेतुसावनउक्तः
एकादश्यांशुक्लपक्षेपौषमासेसमारभेत् द्वादश्यांपौर्णमास्यांवाशुक्लपक्षेसमापनमिति पाद्मेपि पुष्यस्यैकादशींशुक्लामारभ्य
स्थंडिलेशयः मासमात्रंनिराहारस्त्रिकालंस्नानमाचरेत् त्रिकालमर्चयेद्विष्णुंत्यक्तभोगोजितेंद्रियः माघस्यैकादशींशुक्लांयाव
द्विद्याधरोत्तमेति त्रिकालस्नानंमासोपवासविषयम् निराहारइत्युक्तेः पृथ्वीचंद्रोदयेत्वन्यथोक्तम् विष्णुः दर्शंवापौर्णमासींवा
प्रारभ्यस्नानमाचरेत् पुण्यान्यहानित्रिंशत्तुमकरस्थेदिवाकरइति अत्रदर्शमितिशुक्लादिमुख्यचांद्राभिप्रायेण अयंतुपक्षोनेदानींप्र
चरति अत्राधिकारिणोभविष्ये ब्रह्मचारीगृहस्थोवावानप्रस्थोथभिक्षुकः बालवृद्धयुवानश्चनरनारीनपुंसकाः स्नात्वामाघेशुभे
तीर्थेप्राप्नुवंतीप्सितंफलम् पाद्मे सर्वेधिकारिणोह्यत्रविष्णुभक्तोयथानृप ब्राह्मे उष्णोदकेनवास्नानमशक्येसतिकुर्वते हृदे
षुसर्वगात्रेषुउष्णोदंनविशिष्यते वैष्णवामृतेगौडनिबंधेचस्कांदे पौष्यांतुसमतीतायांयावद्भवतिपूर्णिमा माघमासस्यतावद्धि
पूजाविष्णोर्विधीयते पितॄणांदेवतानांचमूलकंनैवदापयेत् ब्राह्मणोमूलकंभुक्त्वाचरेच्चांद्रायणव्रतम् अन्यथायातिनरकंक्षत्र

विद्धश्राद्धएवच वर्जनीयंप्रयत्नेनमूलकंमदिरोपमम् यदातुमाघेमलमासोभवति तदाकाम्यानांतत्रसमाप्तिनिषेधान्मासद्वयेस्नानं तन्नियमाश्चकार्याः मासोपवासचांद्रायणादितुमलमासएवसमापयेत् तदुक्तंदीपिकायाम् नियतत्रिंशद्दिनसाच्छुभेमास्यारभ्य समापयेत् मलिनेमासोपवासव्रतमिति मासोपवासपदंचांद्रायणादेरुपलक्षणं स्नानारंभेचमंत्रोविष्णुनोक्तः तत्रचोत्थायनियमं गृण्हीयाद्विधिपूर्वकम् माघमासमिमंपूर्णंस्नास्येहंदेवमाधव तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसीति प्रत्यहंमंत्रश्चपाद्मे दुःखदारिद्र्यनाशायश्रीविष्णोस्तोषणायच प्रातःस्नानंकरोम्यद्यमाघेपापविनाशनम् मकरस्थेरवौमाघेगोविंदाच्युतमाधव स्नानेनानेनमेदेवयथोक्तफलदोभव इमंमंत्रंसमुच्चार्यस्नायान्मौनसमन्वितइति प्रत्यहंसूर्यार्घ्यम् मंत्रस्तुपृथ्वीचंद्रोदयेपाद्मे सवित्रेप्रसवित्रेचपरंधामजलेमम त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधेति स्नानकालश्चसूर्योदयः त्रिस्थलीसेतौ मकरस्थेरवौयोहिनस्नात्यभ्युदितेरवाविति माघमासेरटंत्यापः किंचिदभ्युदितेरवाविति चपाद्मवचनात् संप्राप्तेमाघमासेतुतपस्विजनवल्लभे कोशांतिसर्ववारीणिसमुद्गच्छतिभास्करे पुनीमःसर्वपापानित्रिविधानिनसंशयइति नारदीयोक्तेः योमाघमास्युषसिसूर्यकराभितेस्नानंसमाचरतिचारुनदीप्रवाहे उद्धृत्यसप्तपुरुषान्पितृमातृवंश्यान्स्वर्गंप्रयात्यमरदेहधरोनरोसौ इतिभविष्योत्तरवचनाच्च ब्राह्मेत्वरुणोदयउक्तः अरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणः माधवांघ्रियुगंध्यायन्यःस्नातिसुरपूजितइति तथा अरुणोदयमारभ्यप्रातःकालावधिप्रभो माघस्नानवतांपुण्यंक्रमात्तत्रावधारणा उत्तमंतुसनक्षत्रंमध्यमंलुप्ततारकम् सवितर्युदितेभूपततोहीनंप्रकीर्तितमिति तेनात्रशक्त्यपेक्षयाव्यवस्था इदंचस्नानंप्रयागेऽतिप्रशस्तम् काश्याःशतगुणंप्रोक्तंगंगायमुनसंगमे सहस्रगुणितासापिभवेत्पश्चिमवाहिनी प

श्विसाभिसुरवीगंगाकालिंद्यासहसंगता हंतिकल्पकृतंपापंसामाघेनृपदुर्लभेत्यादिपाद्मादिवचोभ्यः विस्तरस्तुमत्पितामहकृतप्रयागसेतौज्ञेयः ब्राह्मे यत्रकुत्रापियोमाघेप्रयागस्मरणान्वितः करोतिमज्जनंतीर्थेसलभेद्भागमज्जनम् तथासमुद्रेप्यतिप्रशस्तं तदुक्तं पृथ्वीचंद्रोदये प्रभासखंडे माघेमासिचयःस्नायान्नैरंतर्येणभावतः पौंडरीकफलंतस्यादिवसेदिवसेभवेत् माघस्नानंकाम्यमेवेतिभट्टाः विष्णुवाद्विवाक्येसदावश्यपशब्दान्नित्यत्वावगतेर्नित्यंकाम्यमितियुक्तं मासपर्यंतंस्नानासंभवेतुत्र्यहमेकाहंवास्नायात् महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयमितिलिंगात् अस्मिन्योगेत्वशक्तोपिस्नायादपिदिनत्रयम् प्रयागेमाघमासेतुत्र्यहंस्नातस्ययत्फलम् नाश्वमेधसहस्रेणतत्फलंलभतेभुवीतिपाद्मादिवचनात् अत्रमकरसंक्रमोरथसप्तमीमाघीत्र्यहमित्येके माघशुक्लदशम्यादीत्यन्ये मकराद्यत्र्यहइत्यपरे माघमासाद्यत्र्यहइतिकेचित् त्रयोदश्यादीतिबहवः महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयमितिपाद्मोक्तेः एतस्यार्थवादत्वाद्यत्किंचिद्दिनत्रयमितिभट्टाः तत्वंतुसंदिग्धेषुवाक्यशेषादितिन्यायात्त्रयोदश्याद्येवेतिप्रयागंविनापिपाद्मे अस्मिन्योगेत्वशक्तोपिस्नायादपिदिनत्रयमिति माघस्नानेनियमास्तुनारदीये नवह्निंसेवयेत्स्नातोह्यस्नातोपिवरानने होमार्थंसेवयेद्वह्निंशीतार्थंनकदाचन अहन्यहनिदातव्यास्तिलाःशर्करयान्विताः त्रिभागस्तुतिलानांहिचतुर्थःशर्करान्वितः अनभ्यंगीवरारोहसर्वमासंनयेद्व्रती तथा अनाहतशरीरस्तुयःकष्टंस्नानमाचरेत् पदेपदेश्वमेधस्यफलंप्राप्नोतिमानवः तथा शंखचक्रधरंदेवंमाधवंनामपूजयेत् वह्निंहुत्वाविधानेनततस्त्वेकाशनोभवेत् भूशय्याब्रह्मचर्येणशक्तःस्नानंसमाचरेत् अशक्तोब्रह्मचर्यादौस्वेच्छासर्वत्रकथ्यते तथा तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी तिलभुक्तिलदाताचषट्तिलाःपापनाशनाइति प्रयागासंभवेकाश्यांदशाश्वमेधोक्त

रस्य प्रयागतीर्थे स्नानमुक्तं काशीखंडे काश्युद्भवे प्रयागे येन पक्षिस्नांति मानवाः दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवमिति स्नानोत्तरं मदनपारिजाते विष्णुः काश्मोनान्नमस्कृत्य पूजयेत्पुरुषोत्तमम् अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः भविष्ये तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनाम् एवं स्नानावसाने तु भोज्यं देयमवारितम् भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्रभूषणैः कंबलाजिनरत्नानि वासांसि विविधानि च चोलकानि च देयानि प्रच्छादनपटास्तथा उपानहौ तथा गुप्तमोचकौ पापमोचकौ अनेन विधिना दद्यान्माधवः प्रीयतामिति पाद्मे भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम् तथा अन्नं चैव यथाशक्त्या देयं माघे नराधिप सुवर्णरक्तिकामात्रं दद्याद्वेदविदे तथा माघान्ते तु विशेषेण नारदीये माघावसाने सुभगे षड्रसं भोजनं स्मृतं सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरंजनः दंपत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते त्रिंशत्तु मोदका देयाः शर्करातिलसंयुता इति अन्नेकादशीविधानेन व्रतस्योद्यापनं तथेति पाद्मवचनात् पूर्वेह्नि उपवासपूजनादि कृत्वा परेऽह्नि तिलचर्वाज्यैरष्टोत्तरशतहोमं कृत्वा सावित्रे प्रसवित्रे चेति पूर्वोक्तमंत्रमुक्त्वा दिवाकर जगन्नाथ प्रभाकर नमोस्तु ते परिपूर्णं कुरुष्वेह माघस्नानमुपः पते इति समापयेदिति संक्षेपः मकरसंक्रांतौ हेमाद्रिमते परतः चत्वारिंशद्घटिकाः पुण्याः त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिका इति ब्रह्मवैवर्तात् माधवमते तु विंशतिः त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः परेति वृद्धवसिष्ठोक्तेः यदा तु सूर्यास्तात्पूर्वं संक्रांतिर्भवति तदा उभयमते पूर्वमेव पुण्यकालः रात्रौ तु प्रदोषे निशीथे वा मकरसंक्रमे माधवमते द्वितीयदिन एव पुण्यम् यद्यस्तमयवेलायां मकरं याति भास्करः प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनीति वृद्धगार्ग्यवचनात् अस्तमयं प्रदोषः प्रदोषे पूर्वरात्रे कार्मुकं तु परित्यज्य झषं संक्रमते रविः प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनीति भविष्योक्तेश्च तदा भोगः परेऽह्

नीतिहेमाद्रौपाठः कालादर्शनिर्णयामृतमदनपारिजातादयोऽप्येवमूचुः दाक्षिणात्याश्चैतदेवाद्रियंते यत्तुहेमाद्रिणाद्योवाशब्दोयथार्थे द्वितीयस्तथार्थे यथाप्रदोषेपूर्वेद्युस्तथार्धरात्रेपरेऽह्नीत्युक्तम् तस्मैनमोस्तु तेनपरेऽह्नि पुण्यंवक्तुंप्रदोषइति दिनद्वयेपुण्यनिरासार्थं अर्धरात्रग्रहणम् हेमाद्रिस्मृत्यर्थसारानंतभट्टादिमतेतुनिशीथात्पूर्वंपश्चाच्चसंक्रांतौपूर्वदिनेपरदिनेवापुण्यं धनुर्मीनावतिक्रम्यकन्याचमिथुनंतथा पूर्वापरविभागेनरात्रौसंक्रमणंयदा दिनांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः उदयेपितथापंचदेवेपित्र्येचकर्मणीतिस्कांदवचनात् पूर्वापरविभागेनेतिमकरकर्कभिन्नविषयम् पूर्वोक्तवचोविरोधादितिमदनरत्नेउक्तम् षडशीतिमुखेऽतीतेअतीतेचोत्तरायणे इत्यादिविरोधाच्च तेनपूर्वैकवाक्यतयाऽयमर्थः रात्रौपूर्वभागेमकरसंक्रमेपरेऽह्निउदयेपंचनाड्यःपुण्याः रात्रावपरभागेकर्कसंक्रमे पूर्वदिनांतेपंचनाड्यइति एवंसर्वेषामविरोधः मकरेसामान्येनपरदिनेपुण्यत्वेपिपुण्यातिशयार्थमिदं यत्तुदेवलयज्ञपार्श्वौ आसन्नसंक्रमपुण्यंदिनार्धंस्नानदानयोः रात्रौसंक्रमणेभानोर्विषुवत्ययनोदिवेति अत्रमाधवः अयनेदिवाजातेतदर्धंपुण्यम् कर्केपूर्वंमकरेत्यम् एतन्मध्यंदिनायनपरमिति हेमाद्रिस्तुरात्रौविषुवत्यासन्नदिनार्धंपुण्यम् अयनेत्वासन्नदिनंपुण्यम् दिनेइतिपाठेउभयत्रदिनार्धंपुण्यमित्याह एतदेवोक्तंदीपिकायाम् अथायनमधःपश्चान्निशीथाद्भवेद्यद्यासन्नमहस्तदर्धमथवापुण्यमिति तत्वंतु आसन्नसंक्रममित्यस्यविषुवत्येवान्वयः अयनेरात्रौसतिदिनेपुण्यं कस्मिन्नित्यपेक्षायांकर्केपूर्वेऽह्निमकरेपरेऽह्नीतिवाक्यांतरवशादर्थेउच्यमानेनकोपिविरोधः यत्त्वनंतभट्टः अथसंक्रमणंभानोर्निशीथात्प्राक्यदाभवेत् अयनंविषुवंतत्रप्राग्दिनांतिमनाडिकाः पंचपुण्यतमाःपश्चान्निशीथाच्चेद्भवेत्तथा आद्याःपरदिनस्यापितद्वदित्येषनिर्णयइति अपरार्केप्येवम् अस्तंगतेयदास्तु-

येंह्नःसंयातिदिवाकरः प्रदोषेवार्धरात्रेवातदापुण्यंदिनद्वयमितिबौधायनवचनाद्दिनद्वयंवापुण्यकालः तदापुण्यंदिनांतरमितिमदनरत्नेपाठः गुर्जरप्राच्योदीच्यास्त्विदमेवाद्रियंते अत्रापिपूर्ववद्व्याख्येयम् तिथित्वाद्योगोडग्रंथास्तुप्रदोषार्धरात्रिभिन्नेरात्रेःपूर्वभागेपूर्वदिनेपरभागेचपरदिनेपुण्यमन्यसंक्रांतिवत् विशिष्यतयोर्निर्देशात् प्रदोषश्च प्रदोषोऽस्तसमयादूर्ध्वघटिकाद्वयमिष्यतेइतिवत्सोक्तइत्याहुः तन्न अस्तंगतइतित्रितयवैयर्थ्यापत्तेः अतःप्रदोषपदेनतद्भिन्नैवरात्रिरुच्यते अतएवयावन्नोदयतेरविरितिवृद्धगार्ग्यादिभिर्दक्षिणायनेपूर्वरात्रौसंक्रमेपूर्वदिनमुक्तं वत्सोक्तिरप्यध्ययनादिपरा इहतुत्रिमुहूर्तएवप्रदोषः मकरेदानविशेषोहेमाद्रौस्कांदे धेनुंतिलमयींराजन्दद्याद्यश्चोत्तरायणे सर्वान्कामानवाप्नोतिविंदतेपरमंसुखम् विष्णुधर्मे उत्तरेत्वयनेविप्रावस्त्रदानंमहत्फलम् तिलपूर्णमनड्वाहंदत्वारोगैःप्रमुच्यतेइति शिवरहस्येपि तस्यांकृष्णतिलैःस्नानंकार्यंचोद्वर्तनंशुभैः तिलाश्चविप्रेभ्यःसर्वदैवोत्तरायणे तिलतैलेनदीपाश्चदेयाःशिवगृहेशुभाः कल्पतरौकालिकापुराणे होमंतिलैःप्रकुर्वीतसर्वदैवोत्तरायणे तान्येवदेयाविप्रेभ्योहाटकेनसमंददेत् उत्तरायणमासाद्यनरःकस्मात्सशोचति तथा मकरेसाग्नावपिश्राद्धादि भवतीत्युक्तंप्राक् माघामायांयोगविशेषोर्धोदयःप्रागेवोक्तः माघकृष्णचतुर्दश्यांयमतर्पणमुक्तंहेमाद्रौयमेन अनर्कोभ्युदितेकालेमाघकृष्णचतुर्दशीं स्नातःसंतर्प्ययमंसर्वपापैःप्रमुच्यतेइति माघशुक्लचतुर्थीतिलचतुर्थी साप्रदोषव्यापिनीग्राह्या माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः येत्वांढुंढेर्चयिष्यंतितेऽर्च्याःस्युरसुरद्रुहामितिकाशीखंडात् माघमासेचतुर्थ्यांतुतस्मिन्कालउपोषितः अर्चयित्वातुयोदंतिजागरंतत्रकारयेदितित्रिस्थलीसेतौलैंगाच्च इयमेवकुंदचतुर्थीसाप्रदोषव्यापिनीग्राह्या माघशुक्लचतुर्थ्यांतुकुंदपुष्पैःसदाशिवम्

संपूज्ययोहितः काशींसमाप्नोतिश्रियंनरइतिकालादर्शेकौर्मेके: माघशुक्लपंचमीश्रीपंचमी तदुक्तंहेमाद्रौवाराहे माघशुक्लचतुर्थ्यांतुवरमाराध्यचश्रियः पंचम्यांकुंदकुसुमैः पूजांकुर्यात्समृद्धये इयंमाधवमतेपूर्वा हेमाद्रिमतेपरा चैत्रशुक्लेश्रीपंचमीदिवोदासः माघशुक्लसप्तमीरथसप्तमी साअरुणोदयव्यापिनीग्राह्या सूर्यग्रहणतुल्यातुशुक्लामाघस्यसप्तमी अरुणोदयवेलायांतस्यांस्नानंमहाफलमितिचंद्रिकायांविष्णुवचनात् अरुणोदयवेलायांशुक्लामाघस्यसप्तमी प्रयागेयदिलभ्येतकोटिसूर्यग्रहैःसमेऽतिवचनाच्च यत्तुदिवोदासीये अचलासप्तमीदुर्गाशिवरात्रिर्महाभरः द्वादशीवत्सपूजायांसुखदाप्राग्युतासदेति षष्ठीयुतत्वमुक्तम् तद्यदापूर्वेन्हिघटिकाद्वयंषष्ठीसप्तमी चपरेद्युः क्षयवशारुणोदयात्पूर्वंसमाप्यते तत्परंज्ञेयम् तत्रषष्ठ्यांसप्तमीस्वयंप्रवेश्यारुणोदयस्नानंकार्यम् मदनरत्नेभविष्योत्तरे माघेमासिसितेपक्षेसप्तमीकोटिभास्करा कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः अर्घविधिर्भविष्ये स्नात्वाषष्ठ्यामेकभक्तंसप्तम्यां निश्चलंजलं रात्र्यंतेचालयेथास्त्वंदत्त्वाशिरसिदीपकम् तथाजलमनाक्रम्य नकेनचाल्यतेयावत्तावत्स्नानंसमाचरेत् सौवर्णेराजतेपात्रेमन्त्यालाबुमयेऽथवा तैलेनवर्तिर्दातव्यामहारजनरंजिता महारजनंकुसुंभं समाहितमनाभूत्वादत्त्वाशिरसिदीपकम् भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत् नमस्तेरुद्ररूपायरसानांपतयेनमः वरुणायनमस्तेस्तुहरिवासनमोस्तुते जलेपरिहरेद्दीपंध्यात्वासंतर्पयेद्देवताइति चंदनेनालिखेत्पद्ममष्टपत्रंसकर्णिकम् मध्येशिवंसपत्नीकंप्रणवेनचसंस्तुतम् पूर्वादिदलेषु रविभानुविवस्वद्भास्करसवित्रर्कसहस्रकिरणसर्वात्मकान्संपूज्यगृहंगच्छेदिति स्नानमंत्रश्चकाशीखंडे यद्यज्जन्मकृतंपापंमयासप्तसुजन्मसु तन्मेरोगंचशोकंचमाकरीहंतुसप्तमी एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितम् मनोवाक्कायजंयच्चज्ञाताज्ञातेचयेपुनः इतिसप्तविधंपापंस्नानान्मेसप्त

सप्तिके सप्तव्याधिसमासुक्तं हरमाकरिसप्तमि एतन्मंत्रत्रयंजस्त्वास्नात्वापादोदकेनरः केशवादित्यमालोक्यक्षणान्निःकलुषोभवेत् दि
वोदासीयेमदनरत्नेच इक्षुदंडेनजलंचालयित्वासप्तार्कपत्राणिबदरीपत्राणिचशिरसिनिधायपूर्वोक्तैर्मंत्रैःस्नात्वा तिलपिष्टमयापूपैः
हेमंसूर्यंसंपूज्य विप्रायदद्यात् अर्घ्यमंत्रोमदनरत्ने सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन सप्तमीसहितोदेवगृहाणार्घ्यंदिवाकर ततः
जननीसर्वलोकानांसप्तमीसप्तसप्तिके सप्तव्याहृतिकेदेविनमस्तेसूर्यमंडलइतिप्रार्थयेत् सौरागमे अर्कपत्रैःसबदरैर्दूर्वाक्षतसचंद
नैः अष्टांगविधिनाचार्घ्यंदद्यादादित्यतुष्टये अन्नदानंविशेषोमदनरत्नेभविष्ये ताम्रपात्रेयथाशक्त्यामृन्मयेवाथभक्तिमान् स्थापये
त्तिलपिष्टंचसघृतंसगुडंतथा कांचनंतालकंकृत्वाअशक्तस्तिलपिष्टजं संछाद्यरक्तवस्त्रेणपुष्पैर्धूपैरथार्चयेत् दानमंत्रस्तु आदित्य
स्यप्रसादेनप्रातःस्नानफलेनच दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकं तालकंकर्णाभरणमितितत्रैवोक्तम् दीपपात्रमितिहेमाद्रौ
तत्रैवभविष्योत्तरे एवंविधंरथवरंरथवाजियुक्तं हैमंचहेमशतदीधितिनासमेतम् दद्याच्चमाघसितसप्तमिवासरेयःसोसंगचक्रगति
रेवमहींभुनक्ति इयंमन्वादिरपि इयंचशुक्लपक्षस्थत्वात्पौर्वाण्हिकीग्राह्या यदामाघोमलमासोभवतितदामासद्वयेमन्वादिश्राद्धंकु
र्यात् मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः माघशुक्लाष्टमीभीष्माष्टमी तदुक्तंहेमाद्रौपाद्मे माघेमासिसिता
ष्टम्यांसतिलंभीष्मतर्पणम् श्राद्धंचयेनराःकुर्युस्तेस्युःसंततिभागिनइति भारतेपि शुक्लाष्टम्यांतुमाघस्यदद्याद्भीष्माययोजलम्
संवत्सरकृतंपापंतत्क्षणादेवनश्यतीति धवलनिबंधेस्मृतिः अष्टम्यांतुसितेपक्षेभीष्मायतुतिलोदकं अन्नंचविधिवद्दद्युःसर्ववर्णा
द्विजातयः सर्ववर्णोक्तेर्द्विजातयइतिसंबोधनम् तर्पणमंत्रस्तत्रैव भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः आभिरद्भिरवाप्नो

तिपुत्रपौत्रोचितांक्रियाम् वैयाघ्रपद्यगोत्रायसांकृत्यप्रवरायच अपुत्रायददाम्येतज्जलंभीष्मायवर्मणे वसूनामवतारायशंतनोरात्मजायच अर्घ्यंददामिभीष्मायआबालब्रह्मचारिणेइति एतज्जीवत्पितृकस्यापिभवति जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरिति पाद्मोक्तेरितिजीवत्पितृकनिर्णयेपितृचरणैरुक्तम् एतच्चापसव्येनकार्यमितिदिवोदासीये अत्रश्राद्धंकाम्यंतर्पणंचनित्यं ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलं संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेतिमदनरत्नेवचनात् माघशुक्लद्वादशीभीष्मद्वादशी त्वयाकृतमिदंवीरतवनाम्नाभविष्यति साभीष्मद्वादशीत्येषासर्वपापहराशुभेतिहेमाद्रौपाद्मवचनात् इयंपूर्वयुतायुग्मवाक्यात् माघीपूर्णिमापरेत्युक्तंप्राक् तथाहेमाद्रौब्राह्मे माघस्ययाम्यजीवेंद्वोर्महामाघीतिकथ्यते तत्रैवज्योतिषे मेषस्थेतथासौरिःसिंहेचगुरुचंद्रमाः भास्करःश्रवणर्क्षेचमहामाघीतिसास्मृता तथाभविष्ये वैशाखीकार्तिकीमाघीतिथयोऽतीवपूजिताः स्नानदानविहीनास्ताननेयाःपांडुनंदन तथा तिलपात्राणिदेयानिकंचुकाःकंबलास्तथेति माघपूर्णिमानंतराष्टमीमाघीअष्टकातन्निर्णयः पूर्वेद्युरन्वष्टकानिर्णयश्चपूर्वमुक्तः मलमासेचैतानभवंतीत्येतत्सर्वंमार्गशीर्षप्रकरणेऽभिहितम् तथाचतस्रष्टका स्वशक्त्यावेषाआवश्यकी हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाएकस्यांवेत्याश्वलायनोक्तेः तथा माघाष्टकांप्रक्रम्यतामेकाष्टकेत्याचक्षतइत्यापस्तंबवचनाच्चेत्यादिप्रयोगपारिजातेज्ञेयं इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौद्वितीयपरिच्छेदेमाघमासःसमाप्तः कुंभेषोडशघटिकाःपुण्याः शेषंमाघवत् फाल्गुनकृष्णाष्टम्यांविशेषःकल्पतरौ फाल्गुनस्यचमासस्यकृष्णाष्टम्यांमहीपते इत्युपक्रम्य जातादाशरथेःपत्नीतस्मिन्नहनिजानकी उपोषितोरघुपतिःसमुद्रस्यतटेतदा रामपत्नीचसंपूज्यासीताजनकनंदिनीति फाल्गुनकृष्णचतुर्दशीशिवरात्रिः साचकेषुचिद्वचनेषुप्रदोषव्यापिनीग्राह्येत्यु-

क्तम् केषुचिन्निशीथव्यापिनी तत्राद्यामाधवीये त्रयोदश्यस्तगेसूर्येचतसृष्वेवनाडिषु भूतविद्धातुयातत्रशिवरात्रिव्रतंचरेत् स्मृत्यंतरेपि प्रदोषव्यापिनीग्राह्याशिवरात्रिश्चतुर्दशी रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेत् अत्रप्रदोषोरात्रिः उत्तरार्धेतस्याहेतुत्वोक्तेः कामिकेपि आदित्यास्तमयेकालेअस्तिचेधाचतुर्दशी तद्रात्रिःशिवरात्रिःस्यात्साभवेदुत्तमोत्तमेति द्वितीयापितंत्रैवनारदसंहितायां अर्धरात्रियुतायत्रमाघकृष्णाचतुर्दशी शिवरात्रिव्रतंतत्रसोऽश्वमेधफलंलभेत् स्मृत्यंतरेपि भवेद्यत्रत्रयोदश्यांभूतव्याप्तामहानिशा शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति ईशानसंहितायाम् माघकृष्णचतुर्दश्यामादिदेवोमहानिशि शिवलिंगतयोद्भूतः कोटिसूर्यसमप्रभः तत्कालव्यापिनीग्राह्याशिवरात्रिव्रतेतिथिरिति अर्धरात्रादधश्चोर्ध्वंयुक्तायत्रचतुर्दशी तत्तिथावेवकुर्वीतशिवरात्रिव्रतंव्रती नार्धरात्रादधश्चोर्ध्वंयुक्तायत्रचतुर्दशी नैवतत्रव्रतंकुर्यादायुरैश्वर्यहानितः अर्धरात्रश्चद्वितीययामांत्यतृतीययामाद्यघटीद्वयरूपइतिमाधवः वचनंतूक्तमाकू एवंसतिपूर्वेद्युरेवोभयव्याप्तौपूर्वैव त्रयोदशीयदादेविदिनभुक्तिप्रमाणतः जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशीतिस्कांदोक्तेः दिनभुक्तिरस्तमयः जयंतीशिवरात्रिश्चकार्येभद्राजयान्वितइतिस्कांदाच्च दिनद्वयेनिशीथव्याप्तौहेमाद्रिमतेपूर्वा अर्धरात्रात्पुरस्ताच्चेज्जयायोगोयदाभवेत् पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियैरितिपाद्मवचनात् मदनरत्नेप्येवम् गौडाअप्येवमाहुः निर्णयामृतेतुसर्वापिशिवरात्रिःप्रदोषव्यापिन्येव अर्धरात्रवाक्यानिकैमुतिकन्यायेनप्रदोषस्तावकानीत्युक्तम् तन्न अर्धरात्रस्यपूर्वकर्मकालत्वोक्तेः परदिनप्रदोषनिशीथोभयव्याप्तिसत्वात् परैवेतितुमाधवः इदमेवचयुक्तंप्रतीमः परेद्युःप्रागुक्तार्धरात्रस्यैकदेशव्याप्तौपूर्वेद्युः संपूर्णतद्व्याप्तौचसत्यपिपरेद्युःसंपूर्णव्याप्तेःपूर्वैव व्याप्यार्धरात्रंयस्यांतुलभ्यतेयाचतुर्दशी तस्यामे

वव्रतंकार्यंमत्प्रसादार्थिभिर्नरैः तदूर्ध्वाधोनिताभूतासाकार्याव्रतिभिःसदेति माधवधृतेशानसंहितोक्तेः पूर्वेद्युर्निशीथस्यपरेद्युः
प्रदोषस्येत्येकैकव्याप्तौतुपूर्वैव जयायोगस्यप्राशस्त्यात् तथोक्तंनागरखंडे माघफाल्गुनयोर्मध्ये असितायाचतुर्दशी अनं
गेनसमायुक्ताकर्तव्यासासदातिथिरिति पाद्मे अर्धरात्रात्परस्ताच्चेज्जयायोगोयदाभवेत् पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रि-
यैरिति स्कांदेपि भवेद्यत्रत्रयोदश्याभूतव्याप्तामहानिशा शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति महतामपिपापानांदृष्टावैनि
ष्कृतिःपरा नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतिथिंशिवामितिस्कांदेदर्शयोगस्यनिंदितत्वाच्च यदाचतुर्दशीपूर्वेद्युर्निशीथादूर्ध्व-
प्रवृत्तापरेद्युश्चनिशीथादर्वागेवसमाप्तातदापरेद्युरेकव्याप्तिसत्वात्परैव माघासितभूतादिनेहिराजन्नुपैतियोगंयदिपंचदश्याः
जयाप्रयुक्तांनतुजातुकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्येतिवचनात् एवंदिनद्वयेप्रदोषव्याप्त्यभावेनिशीथव्याप्तिसत्वात्पू
र्वैव तेनदिनद्वयेनिशीथव्याप्तौप्रदोषव्याप्त्यानिर्णयः दिनद्वयेप्रदोषव्याप्तौनिशीथेननिर्णयः एकैकव्याप्तौतुनिशीथेननिर्णय-
इति इयंचरविभौमसोमवारेषुशिवयोगेचातिप्रशस्ता हेमाद्रौतीर्थखंडेलैंगे फाल्गुनस्यचतुर्दश्यांकृष्णपक्षेसमाहिताः
कृत्तिवासेश्वरंलिंगमर्चयंतिशिवंशुभम् तेयांतिपरमंस्थानंसदाशिवमनामयं शिवरात्रिपारणेतुविरुद्धवाक्यानिदृश्यंते स्कांदे
कृष्णाष्टमीस्कांदषष्ठीशिवरात्रिचतुर्दशी एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेत् जन्माष्टमीरोहिणीचशिवरात्रिस्तथैव
च पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणमिति तिथिमध्येपिपारणंस्कांदेउक्तम् उपोषणंचतुर्दश्यांचतुर्दश्यांतुपारणम् कृ
तैःसुकृतलक्षैश्चलभ्यतेवाथवानवा ब्रह्मांडोदरमध्येतुयानितीर्थानिसंतिवै संस्नातानिभवंतीहभूतायांपारणेकृते तिथीना

मेवसर्वासामुपवासव्रतादिषु तिथ्यंतेपारणंकुर्याद्विनाशिवचतुर्दशीमिति अत्रयामत्रयादर्वाक्चतुर्दशीसमाप्तौतदंतेतदूर्ध्वगामिन्यांतुप्रातस्तिथिमध्यएवेतिहेमाद्रिमाधवादयोव्यवस्थामाहुः तन्न तिथ्यंतेतिथिभांतेवापारणंयत्रचोदितं यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणेत्यादिसामान्यवचनैरेवव्यवस्थासिद्धेरुभयविधवाक्यवैयर्थ्यापत्तेः वयंतुतिथ्यंतेपारणंभवेदितिकृष्णाष्टम्यादिविषयमेव नतुशिवरात्रिविषयं तदुपादानंतुपूर्वयुतत्वमात्रकथनार्थं कथमन्यथास्कांदेएवशन्यत्हृदयवाक्यवत्तिथिमध्येपारणविधानंघटते तस्माद्विनाशिवचतुर्दशीमितिपर्युदस्तत्वाच्छिवरात्र्याः सर्वप्रकारेषुतिथिमध्यएवपारणेतिब्रूमः शिष्टाचारोप्येवमेव दीपिकायांतुरात्रावपितिथ्यंतएवोक्तम् व्रतांतेपारणेनिशीथेपिवाऽश्नीयादिति मदनरत्नकालादर्शयोस्तुसास्तमयपर्यंतव्यापिनीचेत्परेहनि दिवैवपारणंकुर्यात्पारणेनैवदोषभागित्युक्तम् तन्न तिथिमध्येपारणविधानान्निषेधेफलायोगाच्च तिथ्यंतानपेक्षणाद्दोषाप्रसक्त्याचतुर्थपादासंगतेः तेनेदंशिवरात्रिभिन्नव्रतपरंज्ञेयम् इदंचव्रतंसंयोगपृथक्त्वन्यायेननित्यंकाम्यंच तथाचमाधवीयेस्कांदे परात्परतरंनास्तिशिवरात्रिःपरात्परम् नपूजयतिभक्त्येशंरुद्रंत्रिभुवनेश्वरम् जंतुर्जन्मसहस्रेषुभ्रमतेनात्रसंशयइत्यकरणेप्रत्यवायश्रवणात् वर्षेवर्षेमहादेविनरोनारीपतिव्रता शिवरात्रौमहादेवंनित्यंभक्त्याप्रपूजयेदितिवीप्सास्मृतेः अर्णवोयदिवाशुष्येत्क्षीयतेहिमवानपि चलंत्येतेकदाचिद्वैनिश्चलंहिशिवव्रतमितिवचनाच्चनित्यता ममभक्तस्तुयोदेविशिवरात्रिमुपोषितः गणत्वमक्षयंदिव्यमक्षय्यंशिवशासनम् सर्वान्भुक्त्वामहाभोगांस्ततोमोक्षमवाप्नुयादितिस्कांदात् द्वादशाब्दादिकमेतत्स्याच्चतुर्विंशाब्दिकंतुवातितत्रैवेशानसंहितावचनात्काम्यता तत्रैव शिवरात्रिव्रतंनामसर्वपापप्रणाशनम्

आचंडालमनुष्याणां भुक्तिमुक्तिप्रदायकम् अत्रजागरोपवासपूजाः समुदिताः व्रतं न तु प्रत्येकम् समुदितानां फलसंबंधात् यत्तु
अथवाशिवरात्रिंचपूजाजागरणैर्नयेत् तथा अखंडितव्रतोयोहिशिवरात्रिमुपोषयेत् सर्वान्कामानवाप्नोतिशिवेनसहमोदते
कश्चित्पुण्यविशेषेणव्रतहीनोपियःपुमान् जागरंकुरुतेतत्रसरुद्रसमतांव्रजेदित्यादिस्कांदंतदनुकल्पत्वादशक्तपरम् माघेतरप्र-
तिमासशिवरात्रिस्तु शिवरात्रिशब्दस्यमाघकृष्णचतुर्दश्यामेवरूढत्वान्माघमासस्यशेषेयाप्रथमाफाल्गुनस्यच कृष्णाचतुर्दशी
सातुशिवरात्रिःप्रकीर्तितेति हेमाद्रौवचनाच्च नाद्यंनिर्णयस्तत्रेति रात्रौयामचतुष्टयेपूजाविधानाद्यस्मिन्दिने अधिकारात्रिव्याप्तिःसाग्रा
ह्या सास्यतुपूर्वैवेति हेमाद्रिरूचिवान् वस्तुतस्तु प्रतिमासकृष्णचतुर्दश्यामपिसर्वकामप्रदंकृष्णचतुर्दश्यांशिवव्रतमित्युपक्रम्य-
चतुर्दशाब्दंकर्तव्यंशिवरात्रिव्रतंशुभमिति हेमाद्रौकालान्तरेशिवरात्रिशब्दप्रयोगात् कौंडपायिनामयनाग्निहोत्रेनैत्यकाग्निहोत्रधर्माइ
वत्तद्धर्मप्राप्तिःस्यादेव अतःप्रदोषनिशीथोभयव्याप्त्यैवनिर्णयइतिवयंप्रतीमः अस्यारंभो हेमाद्रौस्कांदे आदौमार्गशिरेमासि
दीपोत्सवदिनेपिवा गृह्णीयान्माघमासेवाद्वादशैवसुपोषयेत् तथा दीपोत्सवेतथामाघेकृष्णायांतुचतुर्दशी द्वादशस्वपिमासेषु
प्रकुर्यादिहजागरम् एवंद्वादशवर्षेषुद्वादशैवतपोधनान् वरयेदितिशेषः चतुर्दशवाविप्रान् आचार्यंचवृत्वा कुंभोपरिन्यसेद्धेमवृषमु
मयासहितंशिवम् सौवर्णेप्यथवारौप्ये वृषभेसंस्थितंशुभे इत्युक्तम् हैमींमूर्तिंसंपूज्यस्थिरंचरंवालिंगंपंचामृत सहस्रश-
तपंचाशत्तदर्धान्यतरकुंभैः संस्नाप्यसंपूज्यजागरंकृत्वापरेद्युस्तिलान्सहस्रशतंवाहुत्वाविप्रेभ्योवस्त्राणिद्वादशगाश्चदत्वाआचा-
र्यायधेनुंशय्यांचदत्वाविप्रान्भोजयेदितिमदनरत्नेउक्तम् माघामावास्यायुगादिः तदुक्तम् माघमासेतमावास्येति अन्यत्

प्राग्वत् तथान्योपिविशेषोविष्णुपुराणे माघासितेपंचदशीकदाचिदुपैतियोगंयदिवारुणेन ऋक्षेणकालःसपरःपितॄणांनह्यल्पपुण्यैर्नृपलभ्यतेऽसाविति वारुणंशतभिषक् इदंचकुंभादित्येज्ञेयमिति हेमाद्रिः भारते कालेधनिष्ठायदिनामतस्मिन्भवेत्तुभूपालतदापितृभ्यः दत्तंतिलान्नंप्रददातितृप्तिंवर्षायुतंतत्कुलजैर्मनुष्यैरिति फाल्गुनपौर्णमासीहोलिका साचसायान्हव्यापिनीग्राह्या सायान्हेहोलिकांकुर्यात्पूर्वान्हेक्रीडनंगवामितिवचनादितिनिर्णयामृतेउक्तम् ज्योतिर्निबंधेतु प्रतिपद्भूतभद्रासुयार्चिताहोलिकादिवा संवत्सरंचतद्राष्ट्रंपुरंदहतिसाद्भुतम् प्रदोषव्यापिनीग्राह्यापौर्णिमाफाल्गुनीसदा तस्यांभद्रामुखंत्यक्त्वापूज्याहोलानिशामुखइतिनारदवचनात्प्रदोषव्यापिनीत्युक्तम् हेमाद्रौमदनरत्नेचभविष्ये अस्यांनिशागमेपार्थसंरक्ष्याःशिशवोगृहे गोमयेनोपलिप्तेचसचतुष्केगृहांगणेइत्यादिनातत्रैवतद्विधानाच्च तेनेयंपूर्वविद्धा श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी पूर्वविद्धैवकर्तव्या शिवरात्रिर्बलेर्दिनमितिबृहद्यमब्रह्मवैवर्तोक्तेश्च दिनद्वयेप्रदोषव्याप्तौपरैव पूर्वदिनेभद्रासत्वात्तत्रचहोलिकानिषेधात् तदुक्तंनिर्णयामृतेमदनरत्नेचपुराणसमुच्चये भद्रायांदीपिताहोलीराष्ट्रभंगंकरोतिवै नगरस्यचनैवेष्टातस्मात्तांपरिवर्जयेत् तथा भद्रायांद्वेनकर्तव्येश्रावणीफाल्गुनीतथा श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी तथा दिनार्धात्परतोपिस्यात्फाल्गुनीपौर्णिमायदि रात्रौभद्रावसानेतुहोलिकादीप्यतेतदेति यदातुपूर्वदिनेचतुर्दशीप्रदोषव्यापिनीपरदिनेचक्षयवशात्सायान्हात्प्रागेवपूर्णिमासमाप्यतेतदापूर्वदिनसंपूर्णरात्रौभद्रासत्वात्तत्रचतन्निषेधात्परेऽह्निप्रतिपद्येवकुर्यात् सार्धयामत्रयंवास्याद्द्वितीयदिवसेयदा प्रतिपद्वर्धमानातुतदासाहोलिकास्मृतेतिभविष्यवचनादितिनिर्णयामृतकारः मदनरत्नेप्येवम् यत्तु वन्हौवन्हिंपरित्यजेदितिभविष्यम्

वन्हौ होलिकायां वान्हं प्रतिपदं वर्जयेदित्यर्थः तदुक्तं भिन्नविषयमिति तत्रैवोक्तम् अन्ये तु तस्यां भद्रामुखं त्यक्त्वेत्यर्थः प्रदोषव्यापिनी चेत्स्याद्यदा पूर्वदिने तथा भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनमिति नारदवचनात् निशागमे प्रपूज्येत होलिका सर्वदा बुधैः न दिवा पूजयेद्ढुंढां पूजिता दुःखदा भवेदिति दिवोदासीये वचनात् यामत्रयोर्ध्वं युक्ता चेत्प्रतिपत्तु भवेन्निशि भद्रामुखं परित्यज्य कार्या होला मनीषिभिरिति विद्याविनोदेऽभिधानाच्च भद्रामुखं विहाय पूर्वदिन एव कार्येत्याहुः भद्रामुखं तु नाड्यस्तु पंच वदनं गलकस्तथैकेति रत्नमालोक्तं ज्ञेयम् शिष्टाचारोऽप्येवमेव अत्र चेच्चंद्रग्रहणं तदा ततोर्वाङ्निशि भद्रावर्ज्यपौर्णमास्यां होलिकादीपनम् अथ परेऽन्हि ग्रस्तोदयस्तदा पूर्वदिने भद्रावर्ज्यं रात्रौ चतुर्थयामे विष्टिपुच्छे वा होलिका कार्या ग्रहोत्तरं प्रतिपत्सत्वान्न तु पूर्वं च दिवा होलानिषेधादिति दिवोदासचंद्रप्रकाशौ वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्वे कर्मकालस्पर्शे चतुर्थयामादिगौणकालग्रहणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव होला कार्या न च सर्वेषामेव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति निषेधात् कथं सूतके होलेति वाच्यम् तस्योत्तरार्धशेषत्वात् पूजामंत्रस्तु असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालिशैः अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति यत्तु वार्तिककारैर्होलिका आचारप्राप्तेत्युक्तम् तन्न हेमाद्र्याद्युदाहृतभविष्यवचनान्यसिद्धानि कृत्वा चिंता ज्ञेया आर्त्यधिकरणवत् हुताशिनी मलमासे न भवति इयं मन्वादिरपि सा तु पौर्वाण्हिकी ग्राह्या मलमासे सति मन्वादिश्राद्धं मासद्वये कार्यमित्युक्तं प्राक् कृत्यचिंतामणौ ब्राह्मे नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमम् फाल्गुन्यां संयतो भूत्वा गोविंदस्य पुरं व्रजेत् चैत्रकृष्णप्रतिपदि वसंतोत्सवः सा चौदयिकी ग्राह्या प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवाविति भविष्यो

र्के: दिनद्वयेतथात्वेपूर्वा वत्सरादौवसंतादौबलिराज्येतथैवच पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरिति वृद्धवसिष्ठवचनात् अत्रविशेषोहेमाद्रौभविष्ये चैत्रेमासिमहाबाहोपुण्येतुप्रतिपद्दिने यस्तत्रश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तमः नतस्यदुरितंकिंचिन्नाधयोव्याधयोनृपेति तथा प्रवृत्तेमधुमासेतुप्रतिपद्युदितेरवौ कृत्वाचावश्यकार्याणिसंतर्प्यपितृदेवताः वंदयेद्धोलिकाभूतिंसर्वदुःखोपशांतये मंत्रश्च वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच अतस्त्वंपाहिनोदेविभूतेभूतिप्रदाभवेति अत्रचूतकुसुमप्राशनमुक्तंतत्रैवपुराणसमुच्चये वृत्तेतुषारसमयेसितपंचदश्यांप्रातर्वसंतसमयेसमुपस्थितेच संप्राश्यचूतकुसुमंसहचंदनेन सत्यंहिपार्थपुरुषोऽथसमाःसुखीस्यात् मंत्रस्तु चूतमग्र्यंवसंतस्यमाकंदकुसुमंतव सचंदनंपिबाम्यद्यसर्वकामार्थसिद्धय इति चैत्रामावास्यामन्वादिः साचापराह्णव्यापिनीग्राह्या कृष्णपक्षस्थत्वात् इतिफाल्गुनमासःसमाप्तः एवंनिरूपितमिदंगहनंतुकालतत्वंविचार्यवचनैश्चनयैश्चसम्यक् तद्दोषदृष्टिमपहायविवेचनीयंविद्वद्भिरित्यविरतंप्रणतोस्मितेषु १ मयासहासहायदिहगदितंमंदमतिनाकिमेतच्छक्यंवाध्यवसितुमपिस्वल्पमतिना तदेवंयत्किंचिद्गदितमिहविख्यातमहिमाप्रतापोऽयसर्वोविकसतितुपित्रोश्चरणयोः २ योभाट्टतंत्रगहनार्णवकर्णधारःशास्त्रांतरेष्वखिलेष्वपिमर्मभेत्ता योत्रश्रमःकिलकृतःकमलाकरेण प्रीतोसुनास्तुसकृतीबुधरामकृष्णः ३ इतिश्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टसुतदिनकरभट्टानुजभट्टकमलाकरकृतेनिर्णयसिंधौसंवत्सरकृत्यनिरूपणंनामद्वितीयपरिच्छेदःसमाप्तः ॥छ॥ छ श्रीकृष्णार्पणमस्तु छ छ

॥ श्रीसांबसदाशिवार्पणमस्तु छ छ छ छ छ शुभंभवतु

इतिश्रीनिर्णयसिंधौद्वितीयपरिच्छेदः समाप्तः

अथनिर्णयसिंधौतृतीयपरिच्छेदेपूर्वार्द्धप्रारंभः

श्रीगणेशायनमः अथप्रकीर्णकनिर्णयः श्रीरामकृष्णतनयःकमलाकरसंज्ञितः निरूप्यतिथिकृत्यंतुप्रकीर्णंवक्तुमुद्यतः १
तत्रादौसंस्कारेषुगर्भाधानम् तत्रप्रथमरजोदर्शनेदुष्टमासग्रहणसंक्रमादिफलतत्रशांत्यादिचपितृकृतभट्टकृतप्रयोगरत्नेज्ञेयम्
किंचित्तूच्यते मदनरत्नेनारदः अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि परिघस्यतुपूर्वार्द्धेव्यतीपातेचवैधृतौ संध्यासूपप्लवेविष्ट्यामशुभंप्रथमार्तवं रोगीपतिव्रतादुःखीपुत्रिणीभोगभागिनी पतिव्रताक्लेशभागीसूर्यवारादिषुक्रमात् वैधव्यंसुतलाभश्चमैत्रं
शत्रुविवर्द्धनम् मित्रलाभःशत्रुवृद्धिःकुलवृद्धिर्बंधुनाशनम् मरणंवंशवृद्धिश्चनिराहारःकुलक्षयः तेजश्चसुतनाशश्चकुलहा
निस्तिथिक्रमात् गर्गः सुभगाचैवदुःशीलावंध्यापुत्रसमन्विता धर्मयुक्ताव्रतस्थाचपरसंतानमोदिनी सुपुत्राचैवदुःपुत्रापितृवेश्मरतासदा दीनाप्रजावतीचैवपुत्राढ्याचित्रकारिणी साध्वीपतिप्रियानित्यंसुपुत्राकष्टचारिणी स्वकर्मनिरताहिंस्रापुण्यपुत्रादिसंयुता नित्यंधनचयासक्तापुत्रधान्यसमन्विता मूर्खाचाज्ञापुण्यवतीदस्रर्क्षादेःक्रमात्फलम् नारदः कुलीरहरिचापान्त्यमृगकन्यातुलाघटाः राशयःशुभदाज्ञेयानारीणांप्रथमार्तवे गर्गः सुभगाश्वेतवस्त्रास्याद्दृढवस्त्रापतिव्रता क्षौमवस्त्राक्षितीशास्यान्नववस्त्रासुखान्विता दुर्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवाससा नीलांबरधरानारीपुष्पिताविधवाततः वस्त्रेस्युर्विषमारक्तबिंदवःपुत्रमाप्नुयात् समास्येत्कन्यकाश्चेतिफलंस्यात्प्रथमार्तवे अथस्त्रीसंसर्गवर्जनमाह वसिष्ठः प्रसूतदोषोयदिदृश्यतेतत्पुष्पंतदाशांतिककर्मकार्यम् विवर्जयेदेवतदेकशय्यांयावद्रजोदर्शनमुत्तमेह्नि ज्योतिर्निबंधेवसिष्ठः आद्यर्तौपौषशुक्रोर्जमधुशुचिनभस्याःकुयुक्पापवारारिक्तामार्काष्टषष्ठ्यःपितृपरसदनेरात्रिसंध्यापराह्णे मिश्रोग्रामूलतीक्ष्णाविवरमनक

पात्याधिकारस्त्रंगराष्टोत्पातः पापस्थलग्नेनसद्रूपजरन्नीलरक्तांबरंच आद्यर्तौदुर्भगानारीविष्कंभेचेद्रजस्वला वंध्याचैवातिगंडेचशूलेशूलवतीभवेत् गंडेतुपुंश्चलीनारीव्याघातेचात्मघातिनी वज्रेचस्वैरिणीप्रोक्तापातेचपतिघातिनी परिघेमृतवंध्याचवैधृतौपतिमारिणी शेषाःशुभावहायोगायथानामफलप्रदाः शांतिमाहप्रयोगपारिजातेशौनकः सार्तवानांतुनारीणांशांतिवक्ष्यामिशौनकः पंचमेन्हिचतुर्थेवाग्रहयज्ञपुरःसरम् द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् कुंभत्रयंन्यसेद्राशौनतुवस्त्रादिवेष्टितम् सूक्तेनाथनवर्चेनप्रसुवआपइत्यथ ऋचायाःप्रवतस्तद्ब्रारत्र्याचततःक्रमात् मध्यकुंभेक्षिपेद्धान्यमोषधानिचहेमज उदुंबरःकुशोदूर्वाराजीववटबिल्वकाः विष्णुक्रांताश्वतुलसीबर्हिषशंखपुष्पिका शतावर्यश्वगंधाचनिर्गुंडीसर्षपद्वयम् अपामार्गपलाशश्चपनसोजीवकस्तथा प्रियंगवश्चगोधूमाव्रीहयोऽश्वत्थएवच क्षीरदधिचसर्पिश्चपद्मपत्रंतथोत्पलम् कुरंटकत्रयंगुंजावचाभद्रकमुस्तकाः द्वात्रिंशदोषधानीहयथासंभवमाहरेत् मृत्तिकाश्चौषधादीनितन्मंत्रेणाक्षिपेत्क्रमात् कुंभोपरिन्यसेत्पात्रंकांस्यंसूक्ष्मेणुताम्रजम् भुवनेश्वरीन्यसेत्तत्रइंद्राणीचपुरंदरं जपेद्गायत्रिमाहोमात्स्त्रीसूक्तंचजपेत्ततः स्पृशन्वेदक्षिणंकुंभंरुलिंगेकोजपेदथ चत्वारिरुद्रसूक्तानिचतुर्मंत्रोत्तराणिच संस्पृशन्नुत्तरंकुंभंश्रीसूक्तंरुद्रसंख्यया शन्नइंद्राग्नीसूक्तंचतत्रैवसंस्पृशन्जपेत् कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत् दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच तिसृभिश्चैवदूर्वाभिरेकैकाचाहुतिर्भवेत् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा गायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयम् ततःस्विष्टकृतंहुत्वासमुद्रादूर्मिसूक्ततः संततासाज्यधारांतांपूर्णाहुतिमथाचरेत् अथाऽभिषेकंकुर्वीतप्रतिकुंभस्थितोदकैः आपोहिष्ठेतिनवभिःसूक्तेनचततःपरम् इंद्रोअंगतृचेनैवपावमानैःक्रमेणतु उभयंस्वणवच्चन

स्नास्नदाविशाएकया त्र्यंबकेनमंत्रेणजातवेदसएकया समुद्रज्येष्ठाइत्यादिश्चायंतांश्चत्रिभिः क्रमात् इमाआपस्तृचेनैवदेवस्यत्वेति मंत्रतः मंत्रेणाथतमीशानंत्वमग्नेरुद्रइत्यथ तमुष्टुहीतिमंत्रेणभुवनस्यापतेरंतथा यातेरुद्रेतिमंत्रेणाशिवसंकल्पमंत्रतः इंद्रलाद्यष-मंपंचमंत्रैश्चैवाभिषेचयेत् धेनुंपयस्विनींदद्यादाचार्यायचभूषणैः सदक्षिणामनड्वाहं प्रदद्याद्रुद्रजापिने महाशांतिंप्रजप्याथब्राह्मणान्भोजयेत्ततः इतिनारदः तत्रशांतिंप्रकुर्वीतघृतदूर्वातिलाक्षतैः प्रत्येकाष्टशतंचैवगायत्र्याजुहुयात्ततः स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये प्रकारांतरंमदनरत्नेज्ञेयम् विस्तरभयान्नोच्यते ग्रहणेरजोदर्शनेतुजातकर्मप्रस्तावेशांतिंवक्ष्यामः प्रथमर्तौविशेषःस्मृतिचंद्रिकायाम् प्रथमर्तौतुपुष्पिण्याः पतिपुत्रवतीस्त्रियः अक्षतैरासनंकृत्वातस्मिंस्तांसुपवेशयेत् हरिद्रागंधपुष्पादिदद्युस्तांबूलकंस्रजम् दीपैर्नीराजनंकुर्यात्सदीपेवासयेद्गृहे लवणापूपमुद्गादिदद्यात्ताभ्यःस्वशक्तितइति द्वितीयादिर्तुषुतुतन्नियममाहपारिजातेदक्षः अंजनाभ्यंजनेस्नानंप्रवासंदंतधावनं नकुर्यात्सार्तवानारीग्रहाणामीक्षणंतथा अत्रिरपि वर्जयेन्मधुमांसंचपात्रेखर्वेचभोजनं गंधमाल्यंदिवास्वापंतांबूलंचास्यशोधनं दग्धेशरावेभुंजीतपर्यंचांजलिनापिबेत् मदनरत्नेहारीतः रजःप्रासावधःशायीभूमौकार्ष्णायसेपाणौमृन्मयेवाऽश्नीयादिति विष्णुधर्मे आहारंगोरसानांचचक्षुष्यालंकारधारणं अंजनंकंकतंगंधान्पीठशय्याधिरोहणं अग्निसंस्पर्शनंचैववर्जयेत्सादिनत्रयमिति तथाचप्रथमर्तौपूर्वंस्त्रीसंगमनंनकार्यं आरजोदर्शनात्पत्नींनेयात्गत्वापतत्यधः व्यर्थीकारेणशुक्रस्यब्रह्महत्यामवाप्नुयादिति तत्रैवाश्वलायनोक्तेः एतत्तुदशवर्षात्प्राक्ज्ञेयम् प्रथमर्तौगमनेगौतमेनविशेषोदर्शितः गौरीमपिचरत्यर्थंगच्छेत्पुरुषआकुलः अन्यथावीर्यपातोहिसहस्रकुलपातकः अन्यथा-

पितदिच्छयाभवतीतिविज्ञानेश्वरः तत्रऋतौगमनमाहयाज्ञवल्क्यः षोडशर्तुर्निशास्त्रीणांतस्मिन्युग्मासुसंवसेदिति अनृतावप्याहगौतमः ऋतावुपेयात्सर्वत्रवाप्रतिषिद्धवर्जमितिमनुः ऋतुःस्वाभाविकःस्त्रीणांरात्रयःषोडशस्मृताः तासामाद्याश्चतस्रस्तुनिंदितैकादशीतथा त्रयोदशीचशेषाःस्युःप्रशस्तादशरात्रयः मदनरत्नेदेवलः तस्मात्त्रिरात्रंचांडालींपुष्पितांपरिवर्जयेदिति तत्रतिथ्यादीनाहश्रीधरः षष्ठ्यष्टमीपंचदशीचतुर्थीचतुर्दशीमप्युभयत्रहित्वा शेषाःशुभाःस्युस्तिथयोनिषेकेवाराःशशांकार्यसितेंदुजानाम् उभयत्रपक्षद्वये आर्योगुरुःसितःशुक्रः इंदुजोबुधः विष्णुप्रजेशरविमित्रसमीरपौष्णमूलोत्तरावरुणभानिनिषेककार्ये पूज्यानिपुष्यवसुशीतकराश्विचित्रादित्याश्चमध्यमफलाविफलाःस्युरन्ये विष्ण्वादिदैवत्यनक्षत्राण्युक्तानिरत्नमालायां भेशादस्रयमाग्निधातृशशिनःशर्वोदितिर्वाक्पतिःकद्रूजाःपितरोभगोर्यमरवीत्वष्टाह्वयोमारुतः शक्राग्नीत्वथमित्रइंद्रनिर्ऋतीतोयंचविश्वेविधिर्गोविंदोवसवोंबुपाजचरणाहिर्बुध्न्यपूषाभिधाः उत्तराशब्देनोत्तरात्रयं अत्रमूलस्यपूज्यत्वमुक्तम् याज्ञवल्क्येनतु एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेदित्युक्तं तेनपूर्वत्रमूलंचिंत्यम् अत्रसमासुपुत्राः विषमासुकन्यकेतिज्ञेयं युग्मासुपुत्राजायंतेस्त्रियोयुग्मासुरात्रिष्विति हेमाद्रौशंखवाक्ये: तत्रास्युत्तरोत्तराःप्रशस्ताः तदाहापस्तंबः तत्रास्युत्तरोत्तराप्रशस्तेति तत्रैवव्यासः रात्रौचतुर्थ्यांपुत्रःस्यादल्पायुर्धनवर्जितः पंचम्यांपुत्रिणीनारीषष्ठ्यांपुत्रस्तुमध्यमः सप्तम्यामप्रजायोषिदष्टम्यामीश्वरःपुमान् नवम्यांसुभगानारीदशम्यांप्रवरःसुतः एकादश्यामधर्मास्त्रीद्वादश्यांपुरुषोत्तमः त्रयोदश्यांसुतापापावर्णसंकरकारिणी धर्मज्ञश्चकृतज्ञश्च आत्मवेदीदृढव्रतः प्रजायतेचतुर्दश्यांपंचदश्यांपतिव्रता आश्रयःसर्वभूतानांषोडश्यांजायतेपुमानिति

अत्रचतुर्थदिननिषेधेपि स्नातांचतुर्थदिवसेरात्रौगच्छेद्विचक्षणइतिमहाभारतोक्तेः चतुर्थेहनिस्नातायांयुग्मासुवागर्भंसंदधातीतिहारीतोक्तेर्विकल्पोज्ञेयः तत्रापिस्नानंरजस्वलायास्तुचतुर्थेहनिशास्यते गम्यानिवृत्तेरजसिनानिवृत्तेकथंचनेत्यापस्तंबोक्तेर्व्यवस्थाज्ञेया अत्रसर्वासुयुग्मासुगमनमावश्यकं युग्मास्वितिबहुवचननिर्देशादितिविज्ञानेश्वरः तच्चैकस्यांरात्रौसकृदेवकार्यं सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्पुमानितियाज्ञवल्क्योक्तेः इदंचर्तौगमनमन्यकालेप्रतिबंधादिनागमनासंभवेश्राद्धैकादश्यादावपिकार्यं ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रस्तुवर्जयेदितियाज्ञवल्क्योक्तेः व्याख्यातंचेदंमिताक्षरायां यत्रश्राद्धादौब्रह्मचर्यंविहितंतत्राप्यृतौगच्छतोनब्रह्मचर्यस्खलनदोषइतिपर्वाणीतिबहुत्वेनाष्टमीचतुर्दश्योर्ग्रहणमितिच मदनरत्नेप्येवं यत्तुहेमाद्रौशिवरहस्ये दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रती श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीनचपर्वस्विति तदनृतुविषयं ब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन्निति मनूक्तेः दर्शादौतुनभवत्येव पर्वणांपर्युदस्तत्वात् माधवीयेतु ऋतुकालेनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित् तत्रगच्छन्समाप्नोतित्यनिष्टफलमेवास्तीति वृद्धमनूक्तेः श्राद्धेब्रह्मचर्यंनियतमित्युक्तं पृथ्वीचंद्रोदयेप्येवं एतत्सतिसंभवेज्ञेयं अनेकभार्यस्यतु योगपद्येहेमाद्रौकश्यपः योगपद्येत्वृतीर्थानांविवाहक्रमशोव्रजेत् रक्षणार्थमपुत्रांवाग्रहणक्रमशोपिवेति ग्रहणमृतुग्रहणं कविधाने विष्णुर्योनिंजपेत्सूक्तंयोनिस्तरक्षांत्रिभिर्व्रती गर्भाधानंततःकुर्यात्सत्पुत्रोजायतेध्रुवं अगमनेदोषमाहपराशरः ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति घोरायांभ्रूणहत्यायांपच्यतेनात्रसंशयः अस्यापवादमाहमदनरत्नेव्यासः व्याधितोबंधनस्थोवाप्रवासेष्वथपर्वसु ऋतुकालेपिनारीणांभ्रूणहत्याप्रमुच्यते वृद्धांवंध्यामसद्वृत्तांमृतापत्यामपुष्पिणीं कन्यांचबहुपुत्रांचवर्जयेन्मु

च्यतेभयात् वृद्धांगतरजस्कां गर्भाधानांगहोमाकरणेप्रायश्चित्तमाह पारिजाते आश्वलायनः गर्भाधानस्याकरणात्तस्यांजातस्तुदुष्यति अकृत्वागांद्विजेदत्वाकुर्यात्पुंसवनंपतिः गर्भाधानंमलमासगुरुशुक्रास्तादावपिकार्यं उत्सवेषुचसर्वेषुसीमंतेऋतुजन्मसु सुरासुरेज्ययोश्चैवमौढ्यदोषोनविद्यतइति ज्योतिर्निबंधेभृगूक्तेः ऋतुगमनेपराशरः ऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनःस्मृतं अनृतौतु यदागच्छेच्छौचंमूत्रपुरीषवत् स्त्रीणांतुनस्नानं उभावप्यशुचीस्यातांदंपतीशयनंगतौ शयनादुत्थितानारीशुचिःस्यादशुचिःपुमानिति वृद्धशातातपोक्तेः अत्रकश्चिद्विशेषउच्यते तत्ररात्रौरजसिजननादौचरात्रिंत्रिभागांकृत्वा आद्यभागद्वयेचेत्पूर्वदिनंग्राह्यं परतस्तूत्तरदिनमितिमिताक्षरायां यत्तुप्रागर्धरात्रात्प्राग्वासूर्योदयात्पूर्वदिनंग्राह्यमित्युक्तं तत्रदेशाचाराद्व्यवस्था तथासप्तदशादिनपर्यंतंपुनारजोदर्शनेस्नानमात्रं अष्टादशेएकरात्रं एकोनविंशेद्व्यहः विंशतिप्रभृतित्रिरात्रमितिततएवज्ञेयं यत्तु चतुर्दशादिनादर्वागशुचित्वंनविद्यतइति तत्रस्नानप्रभृतित्वमभिप्रेतं एतच्चयस्याविंशतिदिनोत्तरंप्रायशोरजस्तत्रैव यस्यास्त्वर्वाक्प्रायशो रजस्तत्रोक्तं स्मृत्यर्थसारे त्रयोदशादिनादूर्ध्वंप्रायोरजोवतीनामेकादशादिनात्प्रागशुचित्वंनास्ति एकादशादिनेएकरात्रम् द्वादशेद्विरात्रं ऊर्ध्वंत्रिरात्रमिति प्रयोगपारिजातेप्येवं रोगजेतुनत्रैवविशेषःसंग्रहे रोगेणायद्रजःस्त्रीणामन्वहंहिप्रवर्तते नाशुचिस्तुभवेत्तेनयस्माद्वैकारिकंमतमिति कर्माधिकारस्तुरजोनिवृत्तावेव साध्वाचारानतावत्स्यात्स्नातापिस्त्रीरजस्वला यावत्प्रवर्तमानंहिरजो नैवनिवर्ततइति श्राद्धहेमाद्रौशंखोक्तेः तत्रापिस्वकालेअशुचिरेवेत्याहऋष्यशृंगः रोगजेवर्तमानेपिकालेनिर्यातिकालजं तस्मात्कालेप्रमत्तास्यादन्यथासंकरोभवेत् तथारजस्वलायाःरजस्वलांतरस्पर्शेअकामतःस्नानंकामतःउपवासः पंचगव्याशनंच असव

र्णानांतुब्राह्मण्याः क्षत्रियादिस्पर्शेक्रमेण कृच्छ्रार्द्धपादोनकृच्छ्रकृच्छ्राः क्षत्रियादीनांतुकृच्छ्रपादएव क्षत्रियादीनांहीनवर्णास्पर्शेत्रिरा
त्रमुपवासः वैश्याशूद्र्योःपूर्वयास्पर्शेहोरात्रंद्विरात्रंच एतच्चकामतः अकामतस्तुप्राक्शुद्धेरनशनं अकामतः चांडालादिस्पर्शेप्यन
शनमेवप्राक्शुद्धेः कामतस्तुप्रथमेन्हित्र्यहः द्वितीयेद्व्यहः तृतीयएकाहः श्वस्पर्शेतुद्व्यहएकाहोवा भुंजानायाश्चांडालादिस्पर्शे
षड्रात्रं उच्छिष्टयोःस्पर्शेतुकृच्छ्र इत्यादिमिताक्षरायांज्ञेयं स्मृत्यर्थसारेतु सर्वत्रबालापत्यायाःस्पर्शेस्नानेकृतेभुक्तिःपश्चादशनप्र-
त्याम्नायइति स्नानविधिंचाहपराशरः स्नानेनैमित्तिकेप्राप्तेनारीयदिरजस्वला पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत् सिक्तगात्राभ
वेदद्भिः सांगोपांगाकथंचन नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेत् अथरजस्वलास्नानं दैवज्ञवल्लभः ब्रह्माद्युराधाश्विनसोम-
मेषुहस्तानिलाखंडलवासवेषु विश्वार्यमर्क्षोत्तरभाद्रभेषुवरांगनास्नानविधिःप्रदिष्टः ज्वरेतूशनाः ज्वराभिभूतायानारीरजसाच
परिप्लुता कथंतस्याभवेच्छौचंशुद्धिःस्यात्केनकर्मणा चतुर्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियं सासचैलावगाह्यापःस्नात्वास्ना
त्वापुनःस्पृशेत् दशद्वादशकृत्वोवाआचामेच्चपुनःपुनः अंतेचवाससात्यागस्ततःशुद्धाभवेत्तुसेति इदंचातुरमात्रेज्ञेयं आतुरेस्ना
नउत्पन्नेदशकृत्वोत्वनातुरइतिपराशरोक्तेः रजसोज्ञानेतुपराशरमाधवीयेप्रजापतिः अविज्ञातेमलेसाचेत्सलवद्वसनायदि कृतंयत्
त्तदुष्टंस्याच्छुद्धिस्तस्यास्त्रिरात्रतः देवजानीयकारिकायां उच्छिष्टास्तुद्विजातीनांरजस्त्रीयदिपश्यति उपवासमधोच्छिष्टेऊर्ध्वोच्छि-
ष्टेत्र्यहंक्षिपेत् इति अथपुंसवनं प्रयोगपारिजातेजातूकर्ण्यः द्वितीयेवातृतीयेवामासिपुंसवनंभवेत् व्यक्तेगर्भेभवेत्कार्यंसी ४
मंतेनसहाथवा बृहस्पतिः तृतीयेमासिकर्तव्यंगृष्टेरन्यत्रशोभनं गृष्टेश्चतुर्थेमासेतुषष्ठेमास्यथवाष्टमे सकृत्प्रसूतागृष्टिः एते

नप्रतिगर्भंसमपि भवतीतिविज्ञायतेबह्वृचकारिकापि कर्तास्याद्देवरस्तस्यायस्याः पत्युरसंभवः आवर्तनइदंकर्मप्रतिगर्भमितिस्थितिः ब्राह्मे
गर्भाधानादिसंस्कर्तापिताश्रेष्ठतमः स्मृतः अभावेस्वकुलीनःस्याद्बांधवोवान्यगोत्रजः मदनरत्नेसत्यव्रतः मृतेदेशांतरगतोभर्तास्त्रीय
द्यसंस्कृता देवरोवागुरुर्वापिवंश्योवापिसमाचरेत् हेमाद्रौयमः प्रथमेमासिद्वितीयेवायदापुंनक्षत्रेणचंद्रमायुक्तःस्यादितिवराहः
हस्तोमूलंश्रवणःपुनर्वसुर्मृगशिरस्तथापुष्यः पुंसंज्ञकेषुकार्येष्वेतानिशुभानिधिष्ण्यानिअनूराधापिपुंनक्षत्रं अनूराधान्हविषावर्धयं
तइतिश्रुतेः गर्गोपि पुन्नामाश्रवणस्तिष्योहस्तश्चैवपुनर्वसुः अभिजित्प्रोष्ठपाच्चैव अनूराधातथाश्वयुक् नृसिंहः रिक्तापर्वचनव-
मीत्यस्ताःपुंसवनेशुभाः ज्योतिर्निबंधेवसिष्ठः मृत्युश्चसौरेस्तनहानिरिंदोर्मृतप्रजापुंसवनेबुधस्य काकीवबंध्याभवतीहशुक्रेस्त्रीपुत्र
लाभोरविभौमजीवैः अनवलोभनस्याप्ययमेवकालः दीपिकायांतुचतुर्थेऽनवलोभनमित्युक्तं अथसीमंतः हेमाद्रौबैजवापः अ
थसीमंतोन्नयनंचतुर्थेपंचमेषष्ठेचेति वसिष्ठः चतुर्थेसप्तमेमासिषष्ठेवाप्यथवाष्टमे हेमाद्रौशंखः गर्भस्पंदनेसीमंतोन्नय-
नंयावद्वानप्रसवः कृष्णाजिनिः गर्भलंभनमारभ्ययावन्नप्रसवस्तदा सीमंतोन्नयनंकुर्याच्छंखस्यवचनंयथा मासश्चात्रसौरः
सावनोवाकालविधाने चतुर्थषष्ठाष्टममासभाजिसौरेणगर्भेप्रथमंविधेयं सीमंतकर्मद्विजभामिनीनांमासेष्टमेविष्णुबलिंचकुर्यात्
वसिष्ठः चतुर्थेसावनेमासिषष्ठेवाप्यथवाष्टमे ज्योतिर्निबंधेनारदः अरिक्तापर्वदिवसेकुजजीवार्कवासरे कालविधाने सीमंते-
तिष्यहस्तादितिहरिशशभृत्पौष्णाविध्युत्तराख्याः पक्षच्छिद्रंचरिक्तांपितृतिथिमपहायापराःस्युःप्रशस्ताः अदितिःपुनर्वसुः प
क्षच्छिद्रंचाहवसिष्ठः चतुर्दशीचतुर्थीच अष्टमीनवमीतथा षष्ठीचद्वादशीचैवपक्षच्छिद्राःप्रकीर्तिताः क्रमोदितासुतिथिषुवर्जनी

याश्चनाडिकाः भूता ५ ष्ट ८ मनु १४ तत्वा २५ कः ९ दश १० शेषास्तुशोभनाः कालनिर्णये शुभसंस्थेनिशानाथेचतुर्थींचचतुर्दशीं पौर्णमासींप्रशंसंतिकेचित्सीमंतकर्मणि बृहस्पतिः पूर्वपक्षः शुभःप्रोक्तःकृष्णश्चांत्यत्रिकंविना चतुर्दशींचतुर्थींचशुक्लपक्षेशुभप्रदे नारदः विप्रक्षत्रिययोःकुर्याद्दिवासीमंतकर्मतत् वैश्यशूद्रकयोरेतत्तुदिवानिश्यपिकेचन वाराःपूर्वोक्ताएव एतच्चसकृत्कार्यमितिविज्ञानेश्वरः सकृच्चसंस्कृतानारीसर्वगर्भेषुसंस्कृतेति देवलोक्तेः सकृत्प्रतिगर्भंवाकार्यमितिहेमाद्रिः सकृच्चकृतसंस्काराःसीमंतेनद्विजस्त्रियः यंयंगर्भंप्रसूयंतेससर्वःसंस्कृतोभवेदिति हारीतोक्तेः सीमंतोन्नयनंकर्मनस्त्रीसंस्कारइष्यते केचिद्गर्भस्यसंस्कारात्प्रतिगर्भंप्रयुंजत इतिहेमाद्रौविष्णुवचनाच्च सएव स्त्रीयद्यकृतसीमंताप्रसवेत्तुकथंचन गृहीतपुत्राविधिवत्पुनःसंस्कारमर्हति सीमंतेभोजनेप्रायश्चित्तमुक्तंपराशरमाधवीयेधौम्येन ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा जातकर्मनवश्राद्धेभुक्त्वाचांद्रायणंचरेत् ऋग्विधानेतु अराइवेजपेन्मंत्रंशतवारंनसंशयः सीमंतेचयदाभुंक्तेमुच्यतेकिल्बिषात्तदेति अथगर्भिणीतत्पतिधर्माः वराहः सामिषमशनंयत्नात्प्रमदापरिवर्जयेदतःप्रभृति गृह्यकारिका अंगारभस्मास्थिकपालचुल्लीसूर्पादिकेसूपविशेन्ननारी सोलूखलाद्येदृषदादिकेवायंत्रेतुपाद्येनतथोपविष्टा नोमार्जनीगोमयपिंडकादौकुर्यान्नवारिण्यवगाहनंसा अंगारभूत्याननखैर्लिखेक्ष्मांकलिंवपुर्भंगमथोनकुर्यात् नोमुक्तकेशीविवशाथवास्याद्दुःखेनसंध्यावसरेनशेते नामंगलंवाक्यमुदीरयेत्साशून्यालयंवृक्षतलंनयायात् विष्णुधर्मोत्तरे कटुतीक्ष्णकषायाणिअत्युष्णलवणानिच आयासंचव्यवायंचगर्भिणीवर्जयेत्सदेति हेमाद्रौकौंडिण्यः मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवच मिताक्षरायां उदन्वतोंभसिस्नानंनार्थ-

केशादिकर्तनं अंतर्वत्न्याः पतिः कुर्यान्नप्रजाजायतेध्रुवं पृथ्वीचंद्रोदयेगारुडे गयायांपिंडदानस्यनकदाचिन्निराक्रिया अत्रकालेदाप्रत्ययस्मृतेर्निषिद्धकालस्यैवापवादोनतुजीवत्पितृकगर्भिणीपत्याशौचादिनिमित्तस्य निमित्तसंयोगस्यकालसंयोगाच्छेदेनापवादाभावात् अग्निहोत्रवत् यावज्जीवपरत्वाभावात् अन्यथाशौचेपिगयायात्राश्राद्धंचस्यात् यत्रनिमित्तसंयोगस्यापवादो यथाशौचेग्निहोत्रादेर्यथावाजीवत्पितृकस्यापवादोमातुर्गयान्वष्टकादौतदेवभवतिनान्यदितिसंक्षेपः प्रयोगपारिजातेकश्यपः गर्भिणीकुंजराश्वादिशैलहर्म्यादिरोहणम् व्यायामंशीघ्रगमनंशकटारोहणंत्यजेत् शोकंरक्तविमोक्षंचसाध्वसंकुक्कुटासनं व्यवसायंदिवास्वापंरात्रौजागरणंत्यजेत् मदनरत्नेस्कांदे हरिद्रांकुंकुमंचैवसिंदूरंकज्जलंतथा कूर्पासकंचतांबूलंमांगल्याभरणंशुभं केशसंस्कारकबरीकरकर्णविभूषणं भर्तुरायुष्यमिच्छंतीवर्जयेद्गर्भिणीनहि बृहस्पतिः चतुर्थेमासिषष्ठेवाप्यष्टमेगर्भिणीसदा यात्रानित्यंविवर्ज्यास्यादाषाढेतुविशेषतः याज्ञवल्क्यः दौर्हृदस्याप्रदानेनगर्भोदोषमवाप्नुयात् वैरूप्यंमरणंवापितस्मात्कार्यंप्रियंस्त्रियाः दौर्हृदगर्भिणीप्रियं तत्रैवाश्वलायनः वपनंमैथुनंतीर्थंवर्जयेद्गर्भिणीपतिः श्राद्धंचसप्तमान्मासादूर्ध्वंचान्यत्रवेदवित् श्राद्धंतज्जननमिति प्रयोगपारिजातः कालविधानेमुहूर्तदीपिकायांच क्षौरंशवानुगमनंनखकृंतनंच युद्धादिवास्तुकरणंत्वतिदूरयानं उद्वाहमौपनयनंजलधेश्चगाहमायुःक्षयार्थमितिगर्भिणिकापतीनां रत्नसंग्रहेगालवः दहनंवपनंचैवचौलंवैगिरिरोहणं नावआरोहणंचैववर्जयेद्गर्भिणीपतिः अन्यत्रापि प्रव्यक्तगर्भापतिरब्धियानंमृतस्यवाहक्षुरकर्मसंगं तस्यानुयत्नेनगयादितीर्थयागादिकंवास्तुविधिंनकुर्यात् प्रव्यक्तगर्भावनिताभवेन्मासत्रयात्परं षण्मासात्परतः सूतिर्नवमेरिष्टवासिनी अथसूतिकागृहप्रवेशः गर्गः रोहिण्यैंदवपौष्णो

ध्रुवस्वातीवरुणयोरपि पुनर्वसौपुष्यहस्तधनिष्ठास्युत्तरासु च मैत्रेलाङ्केतथाश्विन्यां सूतिकागारवेशनम् एतच्च संभवे प्रसूतिसमये काले स
द्य एव प्रवेशयेदिति वसिष्ठोक्तेः तच्चनैर्ऋत्यां कार्यं वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहमिति वसिष्ठोक्तेः विष्णुधर्मे दशाहं सूतिकागारमा
युधैश्च विशेषतः वह्निनातिंदुकालातैः पूर्णकुंभैः प्रदीपकैः मुसलेनतथा वारिवर्णकैश्चित्रितेन चेति अथजातकर्म पारिजाते वसिष्ठः
श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेत् मनुः प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते वर्द्धनंछेदनं हेमाद्रौ बैजवापः जन्मनोऽनं
तरंकार्यंजातकर्म यथाविधि दैवादतीतकालं चेदतीते सूतके भवेत् पृथ्वीचंद्रोदये विष्णुधर्मे अच्छिन्ननाभिकर्तव्यं श्राद्धं वैपुत्रजन्म
नि पुत्रपदेन कन्यापि गृह्यते तदाह तत्रैव कार्ष्णाजिनिः प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चंद्रसूर्ययोः स्नात्वानंतरमात्मीयान् पितॄन् श्राद्धे
नतर्पयेत् एतच्च रात्रावपिकार्यं पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयमिति तत्रैव व्यासोक्तेः बैजवापः जातमात्रकुमारस्य जातक
र्मविधीयते स्तनप्राशनतः पूर्वं नाभिकर्तनतोपि वा एतेन नैमित्तिकमपीदं जातेष्टिवदाशौचांते कार्यमिति शंकापरास्ता जाते कुमारे
पितॄणामामोदात्सुपर्यंतदहरिति हारीतोक्तेश्च अत्रश्राद्धमामेन हेम्ना वा कार्यमित्युक्तं पृथ्वीचंद्रोदये आदित्यपुराणे जातश्राद्धेतु
पक्वान्नंनदद्याद्ब्राह्मणेष्वपीति हेमाद्रिस्तु पुत्रजन्मनिकुर्वीत श्राद्धं हेम्नैव बुद्धिमान् नपक्वेन नचामेन कल्याणान्यभिकामयन्निति
संवर्तोक्तेर्हेम्नैवेत्याह एतच्चजननाशौचेमरणाशौचे च कार्यमित्याह मिताक्षरायां प्रजापतिः आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्
कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति केचित्तु मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत् आशौचापगमे कार्यं जातकर्म यथा
विधीति स्मृतिसंग्रहोक्तेराशौचांते कार्यमित्याहुः स्मृत्यर्थसारेपि विकल्प उक्तः मृदुध्रुवचरक्षिप्रभेष्वेषामुदयेषु चतुरोंशकेथवाकेंद्रे

८५

जातकर्मचनामच मृद्वादिलक्षणमाहश्रीधरः रोहिण्युत्तरभंस्थिरंगिरिशमूलेंद्रोरगादारुणंक्षिप्रंचाश्विदिनेशपुष्यमनलंब्राह्मीतुसाधारणं उग्रंपूर्वमघांतकंमृदुगतित्वाष्ट्रंत्वथमैत्रंचरंविष्णुस्वातिशतोडुवस्वदितयः कुर्युस्त्वसंज्ञाफलं अत्रसर्वत्रजातकर्मनामकर्मादावकुकालातिक्रमेनक्षत्रादिकंज्ञेयम् देशकालोपघाताद्यैः कालातिक्रमणंयदि अनस्तगेज्येदुसितेतत्कार्यंचोत्तरायणे इतिमदनरत्ने नारदोक्तेः बृहस्पतिरपि सुख्यालाभेविधिज्ञेनविधिश्चिंत्योप्रमादतः नक्षत्रतिथिलग्नानांविचार्यैवपुनःपुनः सूतकेसंध्यादौविशेषं वस्यासः अथजन्मनिदुष्टकालाः तत्रगंडांतः ज्योतिर्निबंधेनारदः पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयंतथा गंडांतंमृत्युदंजन्मयात्रोद्वाहव्रतादिषु कुलीरसिंहयोःकीटचापयोर्मीनमेषयोः गंडांतमंतरालंस्याद्घटिकार्धंमृतिप्रदं सार्पेंद्रपौष्णभेष्वंत्यषोडशांशाभसंधयः तदग्रमेषाद्यपादाभानांगंडांतसंज्ञकाः रत्नमालायां पौष्णाश्विन्योःसार्पपित्र्यर्क्षयोश्चयच्चज्येष्ठामूलयोरंतरालं स्याद्गंडांतस्याचतुर्नाडिकंहियात्राजन्मोद्वाहकालेष्वनिष्टम् रत्नसंग्रहेनवनीतारिष्टे सर्वेषांगंडजातानांपरित्यागोविधीयते वर्जयेद्दर्शनंचावत्त्वषाण्मासिकंभवेत् तिथ्यर्क्षगंडेपितृमातृनाशोलग्नेतुसंधौतनयस्यनाशः सर्वेषुनोजीवतिहंतिबंधून्जीवन्पुनःस्याद्बहुवारणाश्वः अशेषांदानमुत्तरगार्ग्ये तिथिगंडेत्वनड्वाहंनक्षत्रेधेनुरुच्यते कांचनंलग्नगंडेतुगंडदोषोविनश्यति उत्तरेतिलपात्रंस्यात्पुष्येगोदानमुच्यते अजाप्रदानंत्वाष्ट्रेस्यात्सूर्धाषादेचकांचनं उत्तरापुष्यचित्रासु पूर्वाषाढोद्भवस्यच कुर्याच्छांतिंप्रयत्नेननक्षत्राकरजांबुधः अथाश्लेषाफलं मूर्धास्यनेत्रगलकांसयुगंचबाहू हृज्जानुगुह्यपदमित्यहिदेहभागः बाणाद्रिनेत्रहुतभुक्श्रुतिनागरुद्रषण्नंदपंचशिरसः क्रमशस्तुनाड्यः राज्यंपितृक्षयोमातृनाशःकामक्रियारतिः पितृभक्तोबलीस्वघ्नस्त्यागीभोगीधनीक्रमात् अथज्येष्ठाफलंब्रह्मयामले

नि॰सिं॰ ७

ज्येष्ठाद्येजननीमाताद्वितीयेजननीपिता तृतीयेजननीभ्रातास्वयंमाताचतुर्थके आत्मानंपंचमेहंतिषष्ठेगोत्रक्षयोभवेत् सप्तमेचोभयकुलंज्येष्ठभ्रातरमष्टमे नवमेश्वशुरंहंतिसर्वंहंतिदशांशकइति अथमूलफलं मल्लादः अभुक्तमूलसंभवंपरित्यजेत्तुबालकं समाष्टकंपिताथवानतस्युखंविलोकयेत् तदाद्यपादकेपिताद्वितीयकेजनन्यथ धनक्षयस्तृतीयकेचतुर्थकःशुभावहः प्रतीपमंत्यपादतः फलंतदेवसार्पभे अभुक्तमूलंत्वाहबृहद्वसिष्ठः ज्येष्ठांतेघटिकाचैकामूलादौघटिकाद्वयं अभुक्तमूलमित्याहुस्तत्रजातंशिशुंत्यजेत् केचिज्ज्येष्ठांत्यमूलाद्यंचपादमभुक्तमूलमाहुः कश्यपसंहितायांत्वन्यथोक्तं मूलाद्यपादजोहंतिपितरंतुद्वितीयजः मातरंस्वतृतीयोर्थान्शुभस्त्वदंतस्तुरीयजः फलंतदेवसार्पर्क्षेप्रतीपंत्वंत्यपादतः अथमूलवृक्षः जयार्णवे मूलंस्तंभस्त्वचाशाखापत्रंपुष्पंफलंशिखा वेदाश्वमुनयश्चैवदिशश्चवसवस्तथा नंदाबाणारसारुद्रामूलभेदःप्रकीर्तितः मूलेमूलविनाशायस्तंभेहानिर्धनक्षयः त्वचिभ्रातृविनाशायशाखामातृविनाशकृत् पत्रेसपरिवारःस्यात्पुष्पेषुनृपवल्लभः फलेषुलभतेराज्यंशिखायामल्पजीवितं अन्यत्रत्वन्यथोक्तं मूलेसप्तघटीषुमूलहननंस्तंभेष्टसुस्वक्षयंत्वग्दिग्बंधुविनाशनंचविषयेरुद्रैर्हतोमातुलः पत्रेर्कैःसुहृतीतुबाणकुसुमेमंत्रीफलेसागरैराजावन्हिशिखाल्पमायुरितिसन्मूलांघ्रिपेस्यात्फलं भूपालवल्लभः वृषालिसिंहेषुघटेचमूलंदिविस्थितंयुग्मतुलांगनांत्ये पातालगंमेषधनुःकुलीरनक्रेषुमर्त्येक्षितिसंस्मरंति स्वर्गेमूलेभवेद्राज्यंपातालेचेद्धनागमः मर्त्यलोकेयदामूलंतदाशून्यंसमादिशेत् वसिष्ठः नैर्ऋत्यभोद्भूतसुतःसुतावाक्षिपादवश्यंश्वशुरंनिहंति तदंत्यपादेजनितोनिहंतितस्योत्क्रमेणाहिभवेकलत्रं सुरेशताराजनिताधवाग्रजंहिदेवताराजनितानुदेवरं पुरंदरर्क्षेजनितःसुतस्तथास्वस्याग्रजंहंतिनपुत्रिकायदि प्रयोगपारिजाते मूलजाश्वशुरंहंतिव्या

प॰पू॰ ३

७

लजाचत्तदंगनां माहेंद्रजाग्रजंहंतिदेवरंतुद्विदैवजा नृसिंहप्रसादे धवाग्रजंहंतिस्फुरेंद्रजातातथैवपत्न्याभगिनींपुमांश्च द्विदैवजोदेवरमांश्च हन्याद्भार्यानुजामासुनिहंतिसूनुः पत्न्यग्रजामग्रजंवाहंतिज्येष्ठर्क्षजःपुमान् तथाभार्यास्वसारंवाशालकंवाद्विदैवजः कन्यकादेवरंहंतिविशाखांत्यसमुद्भवा आद्यपादत्रयेनैवआद्यर्क्षेतुपुमान्भवेत् नहन्याद्देवरंकन्यातुलामिश्राद्विदैवजा तदृक्षांतोद्भवावर्ज्यादुष्टाहिवृश्चिकपुच्छवत् चित्राद्यर्धेपुष्यमध्येद्विपादेपूर्वाषाढाधिष्ण्यपादेतृतीये जातःपुत्रश्चोत्तराद्येविधत्तेमातापित्रोर्भ्रातरंबालनाशं द्विमासंचोत्तरादोषःपुष्येचैवत्रिमासकः पूर्वाषाढाष्टमेमासिचित्राषाण्मासिकंफलं नवमासंतथाश्लेषामूलेचाष्टकवर्षकं ज्येष्ठापंचदशेमासिपुत्रदर्शनवर्जिता वसिष्ठः व्यतीपातेंगहानिःस्यात्परिघेमृत्युमादिशेत् वैधृतौपितृहानिःस्यान्नष्टेदावंधतांव्रजेत् मूलेसमूलनाशःस्यात्कुलनाशोधृतौभवेत् विकृतांगश्चहीनश्चसंध्ययोरुभयोरपि पर्वण्यपिप्रसूतौचसर्वारिष्टभयप्रदः तद्वत्सदंतजातश्चपादजातस्तथैवच विपरीतप्रसूतोतुनाभिनालेनवेष्टितः राष्ट्रस्यनृपतेश्चैवस्वस्यापिचविनाशकः तस्माच्छांतिंप्रकुर्वीतग्रहाणांक्रूरचेतसां गर्गः कृष्णाचतुर्दशीषोढाकुर्यादादौशुभंस्मृतं द्वितीयेपितरंहंतितृतीयेहंतिमातरं चतुर्थेमातुलंहंतिपंचमेवंशनाशनं षष्ठेतुधननाशःस्यादात्मनोवंशनाशनं तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः अथपित्रोर्नक्षत्रेजन्मदोषः तत्रदेवकीर्तिः यद्येकस्मिन्धिष्ण्येजायंतेदुहितरोथवापुत्राः पितुरंतकराह्येतेयद्यपरेप्रीतिरतुलास्यात् गर्गः एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः प्रसूतिश्चतयोर्मृत्युर्भवेदेकस्यनिश्चितं शौनकः ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते व्याधिपीडातदास्त्रीणामादौतुऋतुदर्शनात् इत्थंसंजायतेयस्यतस्यमृत्युर्नसंशयः शांतिस्तु तदृक्षाधिपतेरूपंस्वर्णेनप्रकल्पयेत् सूर्यग्रहेसूर्यरूपंहेमंचंद्रंतुराज

तं राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः नागःसीसं त्रयाणांचैवरूपाणांस्थापनंतत्रकारयेत् आकृष्णोनाप्यायस्वस्वर्भानोरितिपूजा
मंत्राः नक्षत्रदेदेवतायास्तन्मंत्रेणसंपूज्यतुयजेत्सूर्यसमिद्भिश्चार्कसंभवैः चंद्रग्रहेचपालाशैर्दूर्वाभीराहुमेवच समिद्भिर्ब्रह्मवृक्षस्य-
भेशायजुहुयाद्बुधः आज्येनचरुणाचैवतिलैश्चजुहुयात्ततः पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः जलैरौषधिकल्कैश्चअभिषेकंस
माचरेत् मंत्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः इमंमेगंगेपुरतस्तत्वायामीतिमंत्रकैः यजमानस्ततोदद्याद्भक्त्याप्रतिकृतित्रय-
मिति मात्स्ये अकालप्रसवानार्यः कालातीतप्रजास्तथा विकृतप्रसवाश्चैवयुग्मप्रसवकास्तथा अमानुषाअमुंडाश्चअजातव्यंज-
नास्तथा हीनांगाअधिकांगाश्चजायंतेयदिवास्त्रियः पशवःपक्षिणश्चैवतथैवचसरीसृपाः विनाशंतस्यदेशस्यकुलस्यचविनि
र्दिशेत् निर्वासयेत्तांनगरात्ततःशांतिंसमाचरेत् पाद्मे उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः दंतैर्वासहयस्यस्याज्जन्मभार्गवस-
त्तम द्वितीयेचतृतीयेचचतुर्थेपंचमेतथा यदादंताश्चजायंतेमासेचैवमहद्भयं मातरंपितरंवाथखादेदात्मानमेवच गजपृष्ठगतं-
बालंनौस्थंवास्थापयेद्द्विज तदभावेतुधर्मज्ञकांचनेवावरासने सर्वौषधैःसर्वगंधैर्बीजैःपुष्पैःफलैस्तथा पंचगव्येनरत्नैश्चपताक
भिश्चभार्गव स्थालीपाकेनधातारंपूजयेत्तदनंतरं सप्ताहंचान्नकर्तव्यंतथाब्राह्मणभोजनं भद्रासनेनिवेश्यैनंमृद्भिर्मूलैःफलैस्तथा
सर्वौषधैःसर्वगंधैःसर्वबीजैस्तथैवच स्नापयेत्पूजयेच्चात्रवह्निंसोमंसमीरणं पर्वतांश्चतथाख्यातान्देवदेवंचकेशवं एतेषामेवजु
हुयाद्धुतमग्नौयथाविधि ब्राह्मणानांतुदातव्या ततःसंपूज्यदक्षिणा ब्रह्मयामले प्रथमंदंतनिर्मुक्तिरूर्ध्वंबालस्यचेद्भवेत् क्लेशायमा
तुलस्यैहतदाप्रोक्तामनीषिभिः सौवर्णंराजतंवापिताम्रंकांस्यमयंतुवा दध्योदनेनसंपूर्णंपात्रंदद्याच्छिशोःकरे समंत्रंभाजनंदत्वासप

ग्र्येन्मातुलःशिशुं सालंकारंसवस्त्रंचशिशुंसमालिंग्यसादरं तत्रमंत्रः रक्षमांभागिनेयत्वंरक्षमेसकलंकुलं गृहीत्वाभाजनंसान्नंमसन्नोभवसर्वदा निर्विघ्नंकुरुकल्याणंनिर्विघ्नांचस्वमातरं मय्यात्मानमधिष्ठाप्यचिरंजीवमयासह एवंकृतेविधानेतुविघ्नःकोपिनजायतइति अथत्रिकशांतिः शांतिसर्वस्वे सुतत्रयेसुताचेत्स्यात्त्रयेवासुतोयदि मातापित्रोःकुलस्यापितदानिष्टंमहद्भवेत् ज्येष्ठनाशोधनेहानिर्दुःखंवासुमहद्भवेत् तत्रशांतिंप्रकुर्वीतवित्तशाठ्यविवर्जितः जातस्यैकादशाहेवाद्वादशाहेशुभेदिने आचार्यमृत्विजोवृत्वाग्रहयज्ञपुरःसरं ब्रह्मविष्णुमहेशेंद्रप्रतिमास्वर्णतःकृताः पूजयेद्धान्यराशिस्थकलशोपरिशोभितः पंचमेकलशेरुद्रंपूजयेद्रुद्रसंख्यया रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः द्विजएकोजपेद्धोमकालेशुचिस्समाहितः आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चरुअष्टोत्तरसहस्रंवाशतंवात्रिशतंतुवा देवताभ्यश्चतुर्वक्त्रादिभ्योग्रहपुरःसरं ब्रह्मादिमंत्रैरिंद्रस्ययतइंद्रभयामहे ततःस्विष्टकृतंहुत्वाबलिंपूर्णाहुतिंततः अभिषेकंकुटुंबस्यकृत्वाचार्यंप्रपूजयेत् हिरण्यधेनुरेकात्रऋत्विजांदक्षिणाततः आज्यस्यवीक्षणंकृत्वा शांतिपाठंतुकारयेत् प्रतिमांगुरवेदत्वाउपस्कारसमन्विताः ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्चतर्पयेत् एवंशांतिविधानेनसर्वारिष्टंप्रलीयतइति अन्येषुमूलाद्यृक्षेषुशांत्यादिप्रयोगपारिजातेमत्कृतेशांतिरत्नेचज्ञेयं मिताक्षरायांमार्कंडेयः रक्षणीयातथाषष्ठीनिशातत्रविशेषतः रात्रौजागरणंकार्यंजन्मदानांतथाबलिः पुरुषाःशस्त्रहस्ताश्चनृत्यगीतैश्चयोषितः रात्रौजागरणंकुर्युर्दशम्यांचैवसूतके व्यासः सूतिकावासनिलयाजन्मदानामदेवताः तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तिता प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि अपरार्केब्राह्मे कन्यास्वतस्त्रोराकाद्यावातस्त्रीचैवपंचमी क्रीडनार्थांचवा

लानांषष्ठीचशिशुरक्षिणी खड्गेतुपूजनीयावैवैश्यैर्व्रात्यैर्द्विजातिभिः राकानुमतिः सिनीवालीकुहूरितिचतस्रः कन्याइत्यर्थः अथदत्तपुत्रपरिग्रहविधिः पारिजातेशौनकः अपुत्रोमृतपुत्रोवापुत्रार्थंसमुपोष्यच वाससीकुंडलेदत्वाउष्णीषंचांगुलीयकं बंधून्नन्नेनसंभोज्यब्राह्मणांश्चविशेषतः अन्वाधानादियत्तंत्रंकृत्वाज्योसवनांतकं दातुःसमक्षंगत्वातुपुत्रंदेहीतियाचयेत् दानेसमर्थोदातास्मैयज्ञेनेतिपंचभिः देवस्यत्वेतिमंत्रेणहस्ताभ्यांपरिगृह्यच अंगादंगेत्यृचंजप्त्वाआघ्रायशिशुमूर्धनि गृहमध्येतमाधायचरुंहुत्वाविधानतः यस्त्वाहृदात्यृचाचैवतुभ्यमग्रेऋचैकया सोमोदददित्येताभिःप्रत्यृचंपंचभिस्तथा स्विष्टकृदादिहोमंचकृत्वाशेषंसमापयेत् सच ब्राह्मणानांसपिंडेषुकर्तव्यःपुत्रसंग्रहः तदभावेसपिंडोवाअन्यत्रतुनकारयेत् मिताक्षरादौतुव्याहृतिभिराज्येनहोमउक्तः सचहोमोत्तरंजलपूर्वंकंदेयः नवाङ्मात्रेण व्याहृतिभिर्हुत्वाप्रतिगृण्हीयादितिवसिष्ठोक्तेः मातापितावादद्यातांयमद्भिःपुत्रमापदिसदृशंप्रीतिसंयुक्तंसज्ञेयोदत्रिमःसुतइतिमनूक्तेः तत्रैववसिष्ठः नत्वेवैकंपुत्रंदद्यात्प्रतिगृपहीयाद्वानस्त्रीपुत्रंदद्यात्प्रतिगृण्हीयाद्वा अन्यत्रानुज्ञानाद्भर्तुरिति इदंचभर्तृसत्वे अन्यथादद्यान्मातापितावायंसपुत्रोदत्रिमःस्मृतइतिवत्सव्यासवचोविरोधःस्यात् दानंप्रतिग्रहोपलक्षणं यत्तु समंत्रकहोमस्यपुत्रप्रतिग्रहांगत्वात् व्याहृत्यादिमंत्रपाठेचस्त्रीशूद्रयोरनधिकारात् तयोर्दत्तकःपुत्रोनभवत्येवेतिशूद्रविवेकेरुद्रधरेणोक्तं वाचस्पतिश्चैवमेवाह तन्न भर्तुरनुज्ञयास्त्रियाअपिप्रतिग्रहोक्तेः यद्यपिमेधातिथिनाभार्यात्ववदृष्टरूपदत्तकत्वहोमसाध्यमुक्तं स्त्रियाश्चहोमासंभवस्तथापिव्रतादिवद्विप्रद्वाराहोमादिकारयेदितिहरिनाथादयः संबंधतत्वेप्येवं एवंशूद्रस्यापि स्त्रीशूद्राश्चसधर्माणइतिस्मृतेः अतएवशूद्रकर्तृकहोमोविप्रद्वारेवपराशरेणोक्तः दक्षिणार्थंतुयोविप्रःशूद्रस्यजुहुयाद्धविः ब्राह्मणस्तुभवेच्छूद्रःशूद्रस्तुब्राह्मणोभवेत् अत्र

माधवाचार्यः योविप्रःशूद्रदक्षिणामादायतद्दीयंहविः शांतिपुष्ट्यादिसिद्ध्येवेदिकेमंत्रैर्जुहोति तस्यविप्रस्यैवदोषः शूद्रस्तुहोमफलंलभेतैवेतिव्याचक्षते दत्तकेविशेषः कालिकापुराणे पितुर्गोत्रेणयः पुत्रः संस्कृतः पृथिवीपते आचूडांतंनपुत्रःसपुत्रतांयातिचान्यतः चूडोपायनसंस्कारानिजगोत्रेणवैकृताः दत्ताद्यास्तनयास्तेस्युरन्यथादासउच्यते ऊर्ध्वंतुपंचमाद्वर्षान्नदत्ताद्याःसुतानृप गृहीत्वापंचवर्षीयंपुत्रेष्टिंप्रथमंचरेत् पंचमोर्ध्वंतुस्वदानेच्छोरेवदानंनान्यथा विक्रयंचैवदानंचननेयाःस्युरनिच्छवः दाराःपुत्राश्चसर्वस्वमात्मन्येवतुयोजयेदितिहेमाद्रिमाधवधृतव्यासदक्षादिवचनात् यच्चयाज्ञवल्क्यः स्वकुटुंबाविरोधेनदेयंदारसुतादृते इति तदूर्ध्वंस्वदानानिच्छुपुत्रपरम् तेनसर्वस्वदानेस्वदानेच्छुदारपुत्रदानंसिद्धम् यत्तु विश्वजिदधिकरणेषष्ठे तत्रपुत्रादीनांज्ञातित्वेनस्वशब्दवाच्यत्वात्पुत्रत्वेनदानमाशंक्यनिराकृतम् जन्यपुंस्त्वस्यदानेनानिष्पत्तेः दासत्वेनदानंभवत्येव तस्माद्यथेष्टविनियोगार्हत्वंस्वत्वंभवत्येव पुत्रेस्वत्वाभाववदन् पुत्रक्रयविक्रयादिशुनःशेपविक्रयादिश्रौतलिंगाद्दासक्रयविक्रयादिव्यवहारायोगात् मूर्खएव नहिग्रभायारणःसुशेवोन्योदर्योमनसामंतवाउ इतिश्रुतोदत्तकनिषेधः सोप्यौरसातिशयार्थः अन्यथाशुनःशेपादिप्रतिग्रहश्रौतलिंगविरोधापत्तेः उपेयातवपुत्रतामित्युक्तेः इदंचश्रौतलिंगंस्वयंदत्तक्रीतपरं नदत्तकपरं द्वादशविधपुत्रमध्येदत्तात्मातुस्वयंदत्तः क्रीतश्चताभ्यांविक्रीतइतियाज्ञवल्क्येननतयोर्दत्तकाद्भेदोक्तेः तयोश्चदत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहइतिकलौनिषेधात्तेनसंस्कारोनस्वयंक्रीतौनभवतः तदुत्तरं दत्तकोनश्यत्येवेतिसिद्धम् अथयमलयोः संस्कारक्रमार्थंज्येष्ठकनिष्ठभावउच्यते मनुः पुत्रःकनिष्ठोज्येष्ठायांकनिष्ठायांचपूर्वजः कथंतयोर्विभागःस्यादितिचेत्संशयोभवेत् सदृशाःस्त्रीप्रजातानांपुत्राणामविशेषतः नमातृतोज्यैष्ठ्यमस्तिजन्मतोज्यैष्ठ्यमुच्यते

नेनकनिष्ठायांपूर्वजातएवज्येष्ठोनज्येष्ठायांपश्चाज्जातइत्यर्थः सएवश्राद्धाधिकारी जन्मज्येष्ठेनचाह्वानंसुब्रह्मण्यास्वपिस्मृतं यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतामता देवलः यस्यजातस्ययमयोः पश्यंतिप्रथमंमुखं संतानःपितरश्चैवतस्मिन्ज्येष्ठ्यंप्रतिष्ठितम् भागवतेतु द्वौतदाभवतोगर्भौसूतिवेशविपर्ययादित्युक्तेः पश्चादुत्पन्नस्यज्येष्ठ्यमुक्तं अत्रदेशाचारतोव्यवस्था पूर्वमेवतुयुक्तं गर्भाःस्युरित्यादौविशेषनिर्देशएवगर्भग्रहणंनान्यत्र अन्यथालिङ्गैयर्थ्यात् अथसूतिकास्नानं ज्योतिषे करेंद्रभाग्यानिलवासवांत्यमैत्रेंद्रवाश्विध्रुवभेन्हिपुंसां तिथावरिक्तेशुभसामनंतिप्रसूतिकास्नानविधिंमुनींद्राः अथनामकर्म मदनरत्नेबृहस्पतिः द्वादशेदशमेवापिजन्मतोपित्रयोदशे षोडशेविंशतौचैवद्वात्रिंशेवर्णतःक्रमात् याज्ञवल्क्यः अहन्येकादशेनाम हेमाद्रौभविष्ये नामधेयंदशम्यांतुद्वादश्यांमासिकेचन अष्टादशेहनितथावदंत्यन्येमनीषिणः दशम्याममतीतायामितिज्ञेयं आशौचापगमेनामधेयमितिविष्णूक्तेः गृह्यपरिशिष्टेपि जननाद्दशरात्रेव्युष्टेशतरात्रेसंवत्सरेवानामकरणं व्युष्टेतीते ज्योतिर्निबंधेगर्गः अमासंक्रांतिविष्ट्यादौप्राप्तकालेपिनाचरेत् श्रीधरः मित्रादित्यमघोत्तराशतभिषक्स्वातीधनिष्ठाच्युतप्राजेशाश्विशशांकपौष्णादिनकृत्सुध्वेषु राशौस्थिरे छिद्रांपंचदशींविहायनवमींशुक्लेष्टमेभार्गवज्ञाचार्यामृतपादभागदिवसेनामानिकुर्याच्छिशोः मनुः शर्मांतंब्राह्मणस्य स्याद्वर्मांतंक्षत्रियस्यतु वैश्यस्यधनसंयुक्तंशूद्रस्यप्रेष्यसंयुतं मदनरत्नेनारदीये सूतकांतेनामकर्मविधेयंस्वकुलोचितं नामपूर्वंतु मासस्यमंगलस्कसमाक्षरैः तत्रैवगार्ग्यः मासनामगुरोर्नामदद्याद्बालस्यवैपिता स्मृतिसंग्रहे कृष्णोनंतोच्युतश्चक्रीवैकुंठोथजनार्दनः उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात् अत्रमार्गशीर्षादिश्चैत्रादिर्वाक्रमइतिम १०

दनरत्ने तन्मासनामप्रथमंदद्यात्संबुध्यैचैवहि देवालयगजाश्वानांवृक्षाणांवापिकूपयोः सर्वोपधानांपुण्यानांचिन्हार्थंयोषितांनृणां काव्यानांचकवीनांचपश्वादीनांचसर्वशः राजप्रासादवास्तूनांनामकर्मविशिष्यते नाक्षत्रमपिनामकार्यं अभिवादनीयंचसमीक्षेतत्मातापितरौविद्यातामोपनयनादित्याश्वलायनोक्तेः कुलदेवतानक्षत्रसंबद्धंपितानामकुर्यादितिमदनरत्नेशंखोक्तेः तच्चनक्षत्रपादक्षराद्यक्षरंकुर्यादित्युक्तंपरिशिष्टे तदक्षरादिकंनामयस्मिन्नृधिधेययदाक्षरमिति स्कंदर्शनभाष्येतु रोरेसमृज्येविष्णुवृद्धिरादौ ठास्येचवात्येश्चवशाश्वयुक्स्कः घोषेषुनाम्नोःकपरःस्वरोत्स्यः स्वाधारदीर्घःसविसर्गइष्टः इत्युक्तंठात्यंतिप्रोष्ठपदेत्यत्रादौयत्सरेचवृद्धिःप्रोष्ठपादइति अंत्यभपभरणीशब्दःश्रुतायुक्तः तत्रश्रवणादौचवादिवृद्धिः अपभरणआपभरणइत्यादिमदनरत्नेवसिष्ठः जन्माहेद्वादशाहेवादशाहेवाविशेषतः उत्तरारेवतीहस्तमूलपुष्याःसवारुणाः श्रवणादितिमैत्रंचस्वातीमृगशिरस्तथा प्राजापत्यंधनिष्ठाचप्रशस्तानामकर्मणि अथदोलारोहः पारिजातेबृहस्पतिः दोलारोहस्तुकर्तव्योदशमेद्वादशेपिवा षोडशेदिवसेवापिद्वाविंशेदिवसेपिवा ज्योतिर्निबंधे करत्रयेवैष्णवरेवतीषुदितिद्वयेवाश्विनकध्रुवेषु कुर्याच्छिशूनांनृपतेश्चतद्वद्दोलनंवैस्करविनोभवंति तत्रैव आंदोलशयनेपुंसोद्वादशोदिवसःशुभः त्रयोदशस्तुकन्यायाननक्षत्रविचारणा अन्यस्मिन्दिवसेचेत्स्यात्तिर्यगास्यप्रशस्यते अथदुग्धपानम् नृसिंहः एकत्रिंशाद्दिनेचैवपयःशंखेनपाययेत् अन्नप्राशननक्षत्रेदिवसोदयराशिषु अथकर्णवेधः मदनरत्नेवसिष्ठश्रीधरौ मासेषष्ठेसप्तमेवाष्टमेवावेध्यौकर्णौद्वादशेषोडशेन्हि मध्येनान्हःपूर्वभागेनरात्रौनक्षत्रेद्वेतिथौवर्जयित्वा अत्रजन्ममासोवर्ज्यः ज्योतिर्निबंधेगर्गः मासेषष्ठेसप्तमेवाप्यष्टमेमासिवत्सरे कर्णवेधंप्रशंसंतिपुष्यायुःश्रीविवृद्धये

मदनरत्ने प्रथमेसप्तमेमासिअष्टमेदशमेथवा द्वादशेचतथाकुर्यात्कर्णवेधंशुभावहं हेमाद्रौव्यासः कार्तिकेपौषमासेवाचैत्रेवाफा-
ल्गुनेपिवा कर्णवेधंप्रशंसंतिशुक्लपक्षेशुभेदिने श्रीधरः हरिहयकरचित्रासौम्यपौष्णोत्तराद्यादितिवसुपुष्यघटालीसिंहवर्ज्ये-
स्वलग्ने शशिगुरुबुधकाव्यानांदिनेपर्वरिक्तारहिततिथिषुशुभेह्नेनैधनेकर्णवेधः मदनरत्नेबृहस्पतिः द्वितीयादशमीषष्ठीसप्तमीच
त्रयोदशी। द्वादशीपंचमीशस्तातृतीयाकर्णवेधने सौवर्णीराजपुत्रस्यराजतीविप्रवैश्ययोः शूद्रस्यचायसीसूचीमध्यमाष्टांगुला-
त्मिका हेमाद्रौदेवलः कर्णरंध्रेरवेश्छायानविशेदग्रजन्मनः तंदृष्ट्वाविलयंयांतिपुण्यौघाश्चपुरातनाः शंखः अंगुष्ठमात्रसुषिरौ
कर्णौनभवतोयदि तस्मैश्राद्धंनदातव्यंदत्तंचेदासुरंभवेत् अथतांबूलभक्षणं चंडेश्वरः सार्धमासद्वयेदद्यात्तांबूलंप्रथमंशिशोः क
र्पूरादिकसंमिश्रंविलासायहितायच मूलार्कचित्रकरतिष्यहरींद्रभेषुपौष्णेतथामृगशिरोदितिवासवेषु अर्केंदुजीवभृगुबोधन
वासरेषुतांबूलभक्षणविधिर्मुनिभिःप्रदिष्टः अथनिष्क्रमणं ज्योतिर्निबंधेयमः तृतीयेवाचतुर्थेवामासिनिष्क्रमणंभवेत् यमः
ततस्तृतीयेकर्तव्यंमासिसूर्यस्यदर्शनं चतुर्थेमासिकर्तव्यंशिशोश्चंद्रस्यदर्शनं अत्रसूर्येंद्वोःकर्मणीयेचनयोःश्राद्धंनविद्यतइति-
छंदोगपरिशिष्टात् छंदोगानांनिष्क्रमणेवृद्धिश्राद्धंनास्तीतिकल्पतरुः व्यासः मैत्रपुष्यपुनर्वसुप्रथमभेपौष्णानुकूलेविधौहस्ते
चैववसौरश्वरेचमृगभेतारासुशस्तासुच कुर्यान्निष्क्रमणंशिशोर्बुधगुरोःशुक्रेविरिक्तेतिथौकन्याकुंभतुलामृगादिभवनेसौम्यग्रहा-
लोकिते मदनरत्ने अन्नप्राशनकालेवाकुर्यान्निष्क्रमणक्रियां विष्णुधर्मे दिगीशानांदिनेतत्रतथाचंद्रार्कयोर्द्विजः पूजनंवासु
देवस्यगगनस्यचकारयेत् बहिर्निष्कासयेद्गेहात्शंखपुण्याहनिःस्वनैः चंद्रार्कयोर्दिगीशानांदिशांचगगनस्यच निक्षेपार्थमिमं-

दग्निते मे रक्षंतु सर्वदा अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः माधवीये मार्कंडेयः अग्रतोथ प्रविन्यस्य शिल्पभांडानि सर्वशः शास्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणं प्रथमं यत्स्पृशेद्बालस्ततो भांडं स्वयं दद्या जीविका तस्य बालस्य तेनैव तु भविष्यतीति अथोपवेशनं प्रयोगपारिजाते पाद्मे विष्णुधर्मे च पंचमे च तथा मासि भूमौ तमुपवेशयेत् तत्र सर्वे ग्रहाः शस्ता भौमोप्यत्र विशेषतः उत्तरात्रितयं सौम्यपुष्यर्क्षं शाक्रदैवतं प्राजापत्यं च हस्तश्च शस्तमाश्विनमित्रभं वाराहं पूजयेद्देवं पृथिवीं च तथा द्विजं ॐ रक्षैनं वसुधे देवि सदा सर्वगते शुभे आयुःप्रमाणं सकलं निक्षिपस्व हरिप्रिये अचिरादायुषस्त्वस्य ये केचित् परिपंथिनः जीवितारोग्यवित्तेषु निर्दह त्वाचिरेण तान् वरेण्या शेषभूतानां माता त्वमसि कामधुक् अजरा चाप्रमेया च सर्वभूतनमस्कृता चराचराणां भूतानां प्रतिष्ठानाव्ययात्यसि कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतां अथान्नप्राशनं पारिजाते नारदः जन्मतो मासि षष्ठे स्यात्सौरेणान्नाशनं परं तदभावेष्टमे मासि नवमे दशमेपि वा द्वादशे वापि कुर्वीत प्रथमान्नाशनं परं संवत्सरे वा संपूर्णे केचिदिच्छंति पंडिताः मदनरत्ने लौगाक्षिः षष्ठेन्नप्राशनं जातेषु दंतेषु वेति शंखः संवत्सरेन्नप्राशनमर्द्धसंवत्सरे वेति ज्योतिर्निबंधे नारदः षष्ठे वाप्यष्टमे मासि पुंसां स्त्रीणां तु पंचमे सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभं रिक्तादिनक्षयं नंदां द्वादशीमष्टमीममां त्यक्त्वान्यतिथयः प्रोक्ताः सितजीवज्ञवासराः चंद्रवारं प्रशंसंति कृष्णो चांत्यत्रिकं विना श्रीधरः आदित्यतिष्यवसुसौम्यकरानिलाश्विचित्राजविष्णुवरुणोत्तरपौष्णमित्राः बालान्नभोजनविधौ दशमीं च शुक्ले छिद्रां विहाय नवमीं तिथयः शुभाः स्युः वसिष्ठः बालान्नभुक्तौ व्रतबंधने च राजाभिषेके खलु जन्मधिष्ण्यं शुभं त्वनिष्टं सततं विवाहसीमंतयात्रादिषु मंगलेषु मार्कंडेयविष्णुधर्मयोः ब्रह्माणं शंकरं विष्णुं चंद्रार्कौ च दिगीश्व

रान् सुवंदिशश्चसंपूज्यहुत्वावन्हौतथाचरुं देवतापुरतस्तस्यधात्र्युत्संगगतस्यच अलंकृतस्यदातव्यमन्नंपात्रेसकांचनं मध्वाज्यदधिसं
युक्तंप्राशयेत्पायसंतुवेति अथाब्दपूर्तिः व्यवहारनिर्णये नवांबरधरोभूत्वापूजयेच्चचिरायुषं मार्कंडेयंनरोभक्त्यापूजयेत्प्रयत-
स्तथा ततोदीर्घायुषंव्यासंरामंद्रौणिकृपंबलिं प्रह्लादंचहनूमंतंबिभीषणमथार्चयेत् स्वनक्षत्रंजन्मतिथिंप्राप्यसंपूजयेन्नरः ष
ष्ठींचदधिभक्तेनवर्षेवर्षेपुनःपुनः तिथितत्वेएतन्नामभिस्तिलहोमोप्युक्तः आदित्यपुराणे सर्वैश्चजन्मदिवसेस्नातैर्मंगलवा
दिभिः गुरुदेवाग्निविप्राश्चपूजनीयाःप्रयत्नतः स्वनक्षत्रंचपितरोतथादेवःप्रजापतिः प्रतिसंवत्सरंयत्नात्कर्तव्यश्चमहोत्सवः
कृत्यचिंतामणौ गुडदुग्धतिलान्दद्याद्धस्तेग्रंथींचबंधयेत् गुग्गुलनिंबसिद्धार्थदूर्वागोरोचनादिकं संपूज्यभानुं विघ्नेशौमहर्षीं
प्रार्थयेदिदं चिरंजीवीयथात्वंभोभविष्यामितथामुने रूपवान्वित्तवांश्चैवश्रिया युक्तश्चसर्वदा मार्कंडेयनमस्तेस्तुसप्तकल्पां
तजीवन आयुरारोग्यसिद्ध्यर्थंप्रसीदभगवन्मुने चिरंजीवीयथात्वंतुमुनीनांप्रवरद्विज कुरुष्वमुनिशार्दूलतथामांचिरजीविनं
मार्कंडेयमहाभागसप्तकल्पांतजीवन आयुरारोग्यसिद्ध्यर्थमस्माकंवरदोभव सतिलंगुडसंमिश्रमंजल्यर्धमितंपयः मार्कंडे
यादवरंलब्ध्वापिबाम्यायुर्विवृद्धयइतिपयःपिबेत् तिथितत्वेस्कांदे खंडननखकेशानांमैथुनाध्वगमौतथा आमिषंकलहंहिं
सांवर्षवृद्धौविवर्जयेत् तत्रैवदीपिकायां कृतांतकुजयोर्वारेयस्यजन्मतिथिर्भवेत् अनृक्षयोगसंप्राप्तौविघ्नस्तस्यपदेपदे
कृतांतःशनिः तस्यसर्वौषधिस्नानंगुरुदेवाग्निपूजनं वृद्धमनुः मृतेजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा अस्पृश्यस्पर्शनेचै
वनस्नायादुष्णवारिणा अत्रजन्मतिथिरौदयिकीग्राह्या युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया रवेरुदयमीक्षंतेनतत्रतिथियुग्म

तेतिकृत्यतत्त्वार्णवेवचनात् विशेषोमल्लतस्तूद्धर्मैर्ज्ञेयः अथकटिसूत्रं प्रयोगपारिजातेब्राह्मे प्रतिसंवत्सरंतदृक्षेवक्ष्येनृणांविधिंपरं
दत्वागोभूहिरण्यादितथास्वर्णादिनिर्मितं बध्नीयात्कटिसूत्रंचवासःसंगृह्यनूतनं दूर्वांकुरैरथाज्येनचरुणावापिनाकिनं आयुष्यहो-
मंकृत्वाचतर्पयेत्पितृदेवताः अथचौलं प्रयोगपारिजातेषड्गुरुशिष्यः जाताधिकाराज्जन्मादितृतीयेब्देतुचौलकं आद्येब्देकुर्वतेके
चित्पंचमेब्देद्वितीयके उपनीत्यासहैवेतिविकल्पाःकुलधर्मतः बृहस्पतिः तृतीयेब्देशिशोर्गर्भाज्जन्मतोवाविशेषतः पंचमेसप्तमेवापि-
स्त्रियास्तुसोपिवासमं तत्रैवनारदः जन्मतस्तुतृतीयेब्देश्रेष्ठमिच्छन्तिपंडिताः पंचमेसप्तमेवापिजन्मतोमध्यमंभवेत् अधमंगर्भत-
स्यात्तुनवमेकादशेपिवेति पारिजातेबृहस्पतिः उत्तरायणगेसूर्येविशेषात्सौम्यगोलके शुक्लपक्षेशुभंप्रोक्तंकृष्णपक्षेशुभेतरत्
अशुभंचान्त्यत्रिभागःस्यात्कृष्णपक्षेत्रिधाकृते तत्रैववसिष्ठः द्वित्रिपंचमसप्तम्यामेकादश्यांतथैवच दशम्यांचत्रयोदश्यांकार्यंक्षौरंरवि
जानता नृसिंहीये षष्ठ्यष्टमीचतुर्थीचनवमीचचतुर्दशी द्वादशीदर्शपूर्णेंदूप्रतिपच्चैवनिंदिताः वसिष्ठः रवेरंगारकस्यैवसूर्यपुत्र-
स्यैवहि निंदितादिवसाःक्षौरेशेषाःकार्यकराःस्मृताः ज्योतिर्निबंधेबृहस्पतिः पापग्रहाणांवारादौविप्राणांशुभदोरवौ क्षत्रि
याणांतुसासूनोर्विट्छूद्राणांशनौशुभं हस्ताश्विविष्णुपौष्णाश्वश्रविष्ठादित्यपुष्यभं सौम्यचित्रेनवक्षौरेउत्तमानवतारकाः
त्रीण्युत्तराणिवासर्प्यंरोहिणीवारुणंतथा क्षौरेषण्मध्यमाःप्रोक्ताःशेषाद्वादशगर्हिताः निधनेजन्मनक्षत्रेवैनाशेचंद्रमेष्टमे विप
त्करेवधेक्षौरंप्रत्यरेचापिवर्जयेत् अमलग्रशुद्धिरन्येचयोगाज्योतिर्विज्ञोज्ञेयाः अन्येचविशेषाःमास्तुकर्मनिर्णयेवक्ष्यन्ते एतच्च-
शिशोर्मातरिगर्भिण्यानकार्यम् तदाहज्योतिर्निबंधेमदनरत्नेचबृहद्गार्ग्यः पुत्रचूडाकृतौमातायदिसागर्भिणीभवेत् शस्त्रेणशि

त्युमाप्नोतितस्मात्क्षौरंविवर्जयेत् अस्यापवादमाहतत्रैवनारदः सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् पंचाब्दात्प्रागथोर्ध्वंतुगर्भिण्यामपिका
रयेत् यदिगर्भविपत्तिःस्याच्छिशोर्वामरणंयदि सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यते बृहस्पतिः गर्भिण्यांमातरिशिशोःक्षौरकर्मनकारयेत् व्रताभिषेके
ष्वेवस्यात्कालोवेदव्रतेष्वपि अभिषेकःसमावर्तनं गर्भिण्यामपिपंचमासपर्यंतनदोषइत्युक्तं मुहूर्तदीपिकायांगर्गेण पंचममासादूर्ध्वंमातुर्ग
र्भस्यजायतेमृत्युरिति मदनरत्नेबृहस्पतिः पुत्रचूडाकृतौमातागर्भिणीयदिवाभवेत् विपद्यतेगुरुस्तत्रदंपतीशिशुरब्दतः गर्भेमातुः
कुमारस्यनकुर्याच्चौलकर्मतु पंचमासादधःकुर्यादतऊर्ध्वंनकारयेत् गर्गः ज्वरस्योत्पादनंयस्यलग्नंतस्यनकारयेत् दोषनिर्गमनात्प-
श्चात्त्वस्यधर्मंसमाचरेत् लग्नमितिमंगलोपलक्षणम् ज्योतिर्गर्गः विवाहोत्सवयज्ञेषुमातायदिरजस्वला तदासमृत्युमाप्नोति
पंचमंदिवसंविना वसिष्ठः यस्यमांगलिकंकार्यंतस्यमातारजस्वला अर्धंतदेव तत्रैवबृहस्पतिः प्राप्तमभ्युदयश्राद्धंपुत्रसंस्कार
कर्मणि पत्नीरजस्वलाचेत्स्यान्नकुर्यात्तत्पितातदा पितेतिकर्तृमात्रोपलक्षणं संकटेतुवाक्यसारेउक्तं अलाभेसत्सुहूर्तस्यरजोदोषे
ह्युपस्थिते श्रियंसंपूज्यविधिवत्ततोमंगलमाचरेत् एतच्चमंडनोत्तरंनकार्यं नमंडनाच्चापिहिमुंडनंचगोत्रेकृतायांयदिनाब्दभेदइ
तिमदनरत्नेवसिष्ठोक्तेः तत्रैवकात्यायनः कुलेऋतुत्रयादर्वाङ्मंडनान्नतुमुंडनं प्रवेशान्निर्गमोनेष्टोनकुर्यान्मंगलत्रयं तथाबृहन्म
नुः एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः नसमानक्रियांकुर्यान्मातृभेदेविधीयते आशौचेतुसंग्रहे संकटेसमनुप्राप्तेसूतकेसमु
पागते कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेदिति ज्योतिर्निबंधे षष्ठेब्देषोडशेवर्षेविवा
हाब्देतथैवच अंतर्वत्न्यांचजायायांनेष्यतेमुंडनंक्वचित् अन्योपिविशेषोविवाहप्रकरणेवक्ष्यते दीपिकायां नचूडाजन्मभाग्नेयदास्र

पौषु शनौ कुजे प्रतिपद्द्वादशीरिक्तासु विद्यारंभस्तु पंचमे प्रयोगरत्ने मध्येशिरसि चूडास्याद्वासिष्ठानांतु दक्षिणे उभयोः पार्श्वयोरत्रिकश्यपानां शिखासमता माधवीयेप्येवं आपस्तंबस्त्वाह तूष्णीं केशान्विनीय यथर्षिशिखानिदधाति यथर्षिप्रवरसंख्यया तासामन्याशिखावर्जमुपनयनेवपनं कार्यं प्रतिदिशं प्रवपतीत्युपनयनेनैनैवोक्तेः रिक्तोवाएषोनपिहितोयन्मुंडस्तस्यैतदपिधानं यच्छिखेतिश्रुतेः विशिखोव्युपवीतश्च यत्करोतिनतत्कृतमितिनिषेधाच्च सर्वत्रैववचनात्सशिखंवपनमितिसुदर्शनभाष्येउक्तं यत्तु कुमाराविशिखाइवेतिलिंगंतच्छंदोगपरं अपरार्केमदनरत्नेचलौगाक्षिः दक्षिणतः कमुजावासिष्ठानामुभयतोऽत्रिकश्यपानां मुंडाभृगवः पंचचूडा अंगिरसोवाजिमेके मंगलार्थंशिखिनोऽन्येयथाकुलधर्मंवेति कमुजाशिखा वाजिः केशपंक्तिः स्मृतिदर्पणे एकाशिखादक्षिणतोवसिष्ठगोत्रस्यपंचांगिरसोभृगोस्तु नैकाशिखाकश्यपगोत्रजानांशिखोभयत्रापि यथाकुलंच एतच्छूद्रातिरिक्तविषयम् शूद्रस्यानियताः केशवेषाइतिवसिष्ठोक्तेः यत्तु पाद्मे नशिखीनोपवीतीस्यान्नोच्चरेत्संस्कृतांगिरमितिशूद्रमुपक्रम्योक्तं तदसच्छूद्रस्येतिकेचित् विकल्पइतितुयुक्तं अतएवहारीतः स्त्रीशूद्रौतुशिखांछित्वाक्रोधाद्वैराग्यतोपिवा प्राजापत्यंप्रकुर्यातांनिष्कृतिर्नान्यथाभवेत् एततूपरिग्रहपक्षे अत्रदेशभेदाद्व्यवस्थेतिदिक् ज्योतिर्निबंधे नर्मदोत्तरदेशेतुसिंहस्थेदेवमंत्रिणि शुभकर्मनकुर्वीतनिषेधोनास्तिदक्षिणे अन्नप्राशनेप्रायश्चित्तमुक्तं पराशरमाधवीये निवृत्तेचूडहोमेतुप्राङ्नामकरणात्तथा चरेत्स्नातपनंभुक्त्वाजातकर्मणिचैवहि अतोन्येषुतुसंस्कारेषूपवासेनशुद्ध्यति एतेसंस्काराः स्त्रीणाममंत्रकाः कार्याः होमस्तुसमंत्रक इतिप्रयोगपारिजाते आश्वलायनोपि होमकृत्स्नंतुपुंवत्स्यात्स्त्रीणांचूडाकृतावपीति मनुरपि अमंत्रकातुकार्येयंस्त्रीणामावृदशेष

नइति होमोप्यमंत्रइत्येके संस्काराः स्त्रीणामहोमकास्तूष्णींस्युरितिस्मृत्यर्थसारे होमोनेतिवृत्तिकृत् अथविद्यारंभः मदनरत्नेनृ
सिंहः अक्षरस्वीकृतिंकुर्यात्प्राप्तेपंचमहायने उत्तरायणगेसूर्येकुंभमासंविवर्जयेत् दीपिकायाम् वर्षेपर्जन्यकेकालेषष्ठींरिक्तां-
शनिंकुजं अनध्यायान्विनानत्वादेवंग्रंथकृतंगुरुं श्रीधरः हस्तादित्यसमीरमित्रपुरुजित्पौष्णाश्विचित्राच्युते धातृत्र्यंशादिनो
दयादिरहितेराशौस्थिरेचोभये पक्षेपूर्णनिशाकरेप्रतिपदंरिक्तांविहायाष्टमींषष्ठींसृष्टमशुक्रेंदुभाजिभवनेप्रोक्ताक्षरस्वीकृतिः वि
ष्णुधर्मोत्तरे पूजयित्वाहरिंलक्ष्मींतथादेवींसरस्वतीं स्वविद्यासूत्रकारांश्चस्वांविद्यांचविशेषतः एतेषामेवदेवानांनाम्नातुजुहुया
द्घृतम् दक्षिणाभिर्द्विजेंद्राणांकर्तव्यंचात्रपूजनमिति अथधनुर्विद्यादीपिकायां अदितिगुरुयमार्कस्वातिचित्राग्निपित्र्यध्रुवह
रिवसुमूलेष्विंदुभागांत्यभेषु शनिशशिबुधवारेविष्णुबोधेपिपौषे शुभसमयतिथियोगेचापविद्याप्रदानं अथानुपनीतस्यविशे
षः गौतमः प्रागुपनयनात्कामचारवादभक्षाइति भक्षणंलशुनादेरपीतिहरदत्तः अपरार्केवृद्धशातातपः शिशोरभ्युक्षणंप्रो
क्तंबालस्याचमनंस्मृतं रजस्वलादिसंस्पर्शेस्नानमेवकुमारके प्राक्चूडाकरणाद्बालःप्रागन्नप्राशनाच्छिशुः कुमारकस्तुविज्ञे-
योयावन्मौंजीनिबंधनं आपस्तंबोपि अन्नप्राशनात्प्रयतोभवत्यासंवत्सरादित्येकेइति गौतमोपि नतदुपस्पर्शनादाशौचम् न
स्यानुपनीतस्यचंडालादिस्पृष्टस्यापिस्पर्शान्नस्नानं इदंचषष्ठवर्षात्प्राक् ऊर्ध्वंतुस्नानंभवत्येव बालस्यपंचमाद्वर्षाद्रक्षार्थंशौच
माचरेदितिस्मृतेः कामचारादिकेप्येवं ऊनैकादशवर्षस्यपंचवर्षात्परस्यच चरेद्गुरुःसुहृच्चैवप्रायश्चित्तंविशुद्धये अतोबा
लतरस्यास्यनापराधोनपातकमितिस्मृतेरितिहरदत्तः स्मृत्यर्थसारेप्येवं अथोपनयनं आश्वलायनः गर्भाष्टमेष्टमेवाब्दे

पंचमेसप्तमेपिवा द्विजत्वंप्राप्नुयाद्विप्रोवर्षैस्त्वेकादशेनृपः मनुः ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे राज्ञोबलार्थिनःषष्ठेवैश्यस्यार्थार्थिनोष्टमे विष्णुः षष्ठेतुधनकामस्यविद्याकामस्यसप्तमे अष्टमेसर्वकामस्यनवमेकांतिमिच्छतः आपस्तंबः गर्भाष्टमेषुब्राह्मणमुपनयीत बहुवचनंगर्भषष्ठगर्भसप्तमयोःप्राप्त्यर्थमितिसुदर्शनभाष्ये केचित्तुविप्रस्यषष्ठंनमन्यंते आपस्तंबः अथकाम्यानिसप्तमेब्रह्मवर्चसकाममष्टमआयुष्कामंनवमेतेजस्कामंदशमेऽन्नाद्यकाममेकादशइंद्रियकामंद्वादशेपशुकाममुपनयेत् गौणकालमाहमनुः आषोडशाद्ब्राह्मणस्यसावित्रीनातिवर्तते आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः ज्योतिर्निबंधे अग्रजाबाहुजावैश्याःस्वावधेरूर्ध्वमब्दतः अकृतोपनयाःसर्वेवृषलाएवतेस्मृताः गर्गः विप्रंवसंतेक्षितिपंनिदाघेवैश्यंघनांतेव्रतिनंविदध्यात् माघादिशुक्रांतिकपंचमासाःसाधारणावासकलद्विजानां हेमाद्रौज्योतिषे माघादिषुचमासेषुमौंजीपंचसुशस्यते कालादर्शेवृद्धगार्ग्यः माघादिमासषट्केतुमेखलाबंधनंमतं चूडाकरणमन्नंचश्रावणादौविवर्जयेत् मैत्रेयसूत्रेपि वसंतोग्रीष्मः शरदित्यृतवोवर्णानुपूर्व्येणमाघादिषण्मासाःसर्ववर्णानामेतदुदगयनमनयोर्विकल्पइति अत्रेदंतत्त्वं नात्रवसंतेनोत्तरायणस्यसंकोचः श्राद्धदर्शस्यापराह्णविधिनेवाधानेवसंतादेः कृत्तिकादिनेवसायंप्रातर्विधिनायावज्जीवविधेरिवयुक्तः आद्ययोःपरस्परव्यभिचारान्नियमः अंत्येनिमित्तेसांगकर्मोक्तेः कालापेक्षा इहतूत्तरायणंविनावसंतस्याभावान्ननियमः नवानिमित्तत्वं नचैकंवृणीतइतिवदवयुत्यानुवादः तद्वद्वाक्यभेदापरिहारात् उत्तरायणविधिवैयर्थ्यात्तुकल्पोयमिति माघआदिर्येषांपंचानांएवंषट् पारिजातेवृहस्पतिः झषचापकुलीरस्थोजीवोप्यशुभगोचरः अतिशोभनतांदद्याद्विवाहोपनयादिषु वृत्तशते नजन्मधिष्ण्येनचजन्ममासेनजन्मकालीयदिनेविदध्यात् ज्येष्ठेनमासिप्रथमस्यसूनोस्तथासुतायाअपिमंग-

लानि राजमार्तंडः जातंदिनंदूषयतेवसिष्ठोत्र्यष्टौचगर्गोनियतंदशात्रिः जातस्यपक्षंकिलभागुरिश्चशेषाःप्रशस्ताःखलुजन्ममासि जन्म
मासेतिथौभेचविपरीतदलेसति कार्यंमंगलमित्याहुर्गर्गभार्गवशौनकाः जन्ममासनिषेधेपिदिनानिदशवर्जयेत् आरभ्यजन्मदिवसा
च्चतुर्मास्युक्तिस्तथापरे ग्रंथांतरे व्रतेजन्मत्रिखारिस्थेजीवेपीष्टोर्चनात्सकृत् शुभोतिकालेतुर्याष्टव्ययस्थोद्विगुणार्चनात् शुद्धिर्नैवगु
रोर्यस्यवर्षेप्राप्तेष्टमेयदि चैत्रेमीनगतेभानौतस्योपनयनंशुभं जन्मभाद्दष्टमेसिंहेनीचेवाशत्रुभेगुरौ मौंजीबंधःशुभःप्रोक्तश्चैत्रेमीनग
तेरवौ नारदः बालस्यबलहीनोपिशांत्याजीवोबलप्रदः यथोक्तवत्सरेकार्यमनुक्तेचोपनायनं शांतिश्चाग्रेवक्ष्यते ज्योतिर्निबंधेनृसिंहः
तृतीयापंचमीषष्ठीद्वितीयाचापिसप्तमी पक्षयोरुभयोश्चैवविशेषेणसुपूजिताः धर्मकामौसितेपक्षेकृष्णेचप्रथमानया शुक्लत्रयोदशीं
केचिदिच्छंतिमुनयस्तथा टोडरानंदेवसिष्ठः नैमित्तिकमनध्यायंकृष्णेचप्रतिपद्दिनं मेखलाबंधनेशस्तंचौलेवेदव्रतेष्वपि प्रशस्ताप्र-
तिपत्कृष्णानपूर्वापरसंयुता एतदतीतकालस्यार्तस्यबटोरुपनयनविषयम् प्रशस्ताप्रतिपत्कृष्णाकदाचिच्छुभगेविधौ चंद्रेबलयुतेल
ग्नवर्षाणामपिलंघनइतिव्यासोक्तेरित्याहुः एवंसप्तम्यपि तस्यागलग्रहत्वोक्तेः बृहस्पतिः शुक्लपक्षःशुभःप्रोक्तःकृष्णश्चांत्य
त्रिकंविना तथा मिथुनेसंस्थितेभानौज्येष्ठमासोनदोषकृत् मदनरत्नेनारदः विनर्तुनावसंतेनकृष्णपक्षेगलग्रहे अप
राह्नेचोपनीतःपुनःसंस्कारमर्हति अपराह्नस्त्रेधाविभक्तदिनतृतीयांशइत्युक्तं तत्रैव वसंतेगलग्रहोनदोषायेत्यर्थः नारदः
कृष्णपक्षेचतुर्थींचसप्तम्यादिदिनत्रयम् त्रयोदशीचतुष्कंचअष्टावेतेगलग्रहाः वसिष्ठः पापांशकगतेचंद्रेअरिनीचस्थिते
पिच अनध्यायेचोपनीतःपुनःसंस्कारमर्हति अनध्यायस्यपूर्वेद्युस्तस्यचैवापरेहनि व्रतबंधंविसर्गंचविद्यारंभंनकारयेत्

राजमार्तंडः आरंभानंतरंयत्रप्रत्यारंभोनसिद्ध्यति गर्गादिमुनयःसर्वेतमेवाहुर्गलग्रहं ज्योतिर्निबंधे अष्टकासुचसर्वासुयुगमन्वंतरादिषु अनध्यायंप्रकुर्वीततथासोपपदास्वपि सोपपदास्तुस्मृत्यर्थसारे सिताज्येष्ठेद्वितीयाच आश्विनेदशमीसिता चतुर्थीद्वादशीमाघेएताः सोपपदाःस्मृताः एवंप्रदोषदिनंवर्ज्यं प्रदोषस्वरूपमाहगोभिलः षष्ठीचद्वादशीचैवअर्धरात्रोननाडिका प्रदोषमिहकुर्वीततृतीयात्रयामिका ज्योतिर्निबंधेव्यासः यांचैत्रवैशाखसितातृतीयामाघस्यसप्तम्यथफाल्गुनस्य कृष्णेतृतीयोपनयेप्रशस्ताप्रोक्ताभरद्वाजमुनींद्रमुख्यैः अत्रापिकृष्णाप्रतिपज्ज्ञेयम् यत्तुबृहद्गार्ग्यः अनध्यायेप्रकुर्वीतयस्तुनैमित्तिकोभवेत् सप्तमीमाघशुक्लेतुतृतीयाचाक्षयातथा बुधत्रयंदुवाराश्चशस्तानिव्रतबंधनइति तत्प्रायश्चित्तार्थोपनयनविषयम् स्वाध्यायविमुखोघस्याः कृष्णाप्रतिपदादयः प्रायश्चित्तनिमित्तेतुमेखलाबंधनेमताइतितेनैवोक्तेरिति निर्णयामृतकालादर्शौ यद्यप्यथोपेतपूर्वस्येत्युक्त्वा अनिरुक्तंपरिदानकालश्चेत्याश्वलायनेनपुनरुपनयनेकालानियमउक्तस्तथापिनिमित्तांतरमेवसः तदानीमकरणेतुपूर्वोक्तकालोज्ञेयः प्रतिवेदमुपनयनेकालानियमइतितुयुक्तम् गर्गः ग्रहेरवींद्वोरवनिप्रकंपेकेतूद्गमोल्कापतनादिदोषे व्रतेदशाहानिवदंतितज्ज्ञास्त्र्योदशाहानिवदंतिकेचित् संकटेतुचंडेश्वरः दाहेदिशांचैवधराप्रकंपेवज्रप्रपातेथविदारणेच केतौतथोल्काशककणप्रपातेत्र्यहंनकुर्याद्व्रतमंगलानि तत्रैव वेदव्रतोपनयनेस्वाध्यायाध्ययनेतथा नदोषोयजुषांसोपपदास्वध्ययनेपिच हेमाद्रोज्योतिषे हस्तत्रयेपुष्यधनिष्ठयोश्चपौष्णाश्विसौम्यादितिविष्णुभेषु शस्तेतिथौचंद्रबलेनशुक्रे कार्योद्विजानांव्रतबंधमोक्षौ ज्योतिर्निबंधेनारदः श्रेष्ठान्यर्कत्रयांत्येज्यचंद्रादित्युत्तराणिच विष्णुत्रयाश्विमित्राजयोनिभान्युपनायने बृहस्पतिः त्रिपू

त्रेषुरोहिण्यांहस्तेमैत्रेचवासवे त्वाष्ट्रेसौम्यपुनर्वस्वोरुक्तमंत्युपनायनं ज्योतिर्निबंधे पूर्वाहस्तत्रयेसार्पश्रुतिमूलेषुबह्वृचां यजुषांपौष्णमैत्रार्कादित्यपुष्यमृदुध्रुवैः सामगानांहरीशार्कवसुपुष्योत्तराश्विभैः धनिष्ठादितिमैत्रार्कैर्विंदुपौष्णोऽप्यथर्वणां राजमार्तंडस्तु ब्राह्मणस्यपुनर्वसुंनिषेधति ताराचंद्रानुकूलेषुग्रहाद्वेषुशुभेष्वपि पुनर्वसौकृतोविप्रः पुनःसंस्कारमर्हति ज्योतिर्निबंधेनारदः सर्वेषांजीवशुक्रज्ञवाराःप्रोक्ताव्रतेशुभाः चंद्रार्कौमध्यमौज्ञेयौसामबाहुजयोःकुजः शाखाधिपतिवारश्चशाखाधिपबलंतथा शाखाधिपतिलग्नंचदुर्लभंत्रितयंव्रते शाखाधिपाश्चरत्नसंग्रहे ऋगथर्वसामयजुषामधिपागुरुसौम्यभौमसिताः जीवसितौविप्राणांक्षत्रस्यारोष्णगूविशांचंद्रे इति पारिजातेबृहस्पतिः बह्वृचानांगुरोर्वारेयजुर्वेदजुषांबुधे सामगानांधरासूनोरथर्वविदुषांरवेः अत्रलग्नशुद्ध्यादिदैवज्ञेभ्योज्ञेयम् विस्तरभयान्नोच्यते लल्लः व्रतेन्हिपूर्वसंध्यायांवारिदोयदिगर्जति तद्दिनेस्यादनध्यायोव्रतंतत्रविवर्जयेत् ज्योतिर्निबंधे नांदीश्राद्धेकृतेचेत्स्यादनध्यायस्त्वकालिकः तदोपनयनंकार्यंवेदारंभनकारयेत् एतद्बह्वृचातिरिक्तानां तेषांतद्दिनेवेदारंभाभावात् अतस्तेषामुपनयनंनभवत्येव ऐतरेयोपनिषदि मृगादिज्येष्ठांतवर्षर्तुः तद्विनावर्षादौत्रिरात्रमनध्यायइतिवेदभाष्येउक्तेः एतच्चप्रातस्तनितेसायंस्तनितेतुदिवैवचरुंश्रपयित्वासायंसंध्योत्तरहोमंकुर्यात् नसंध्यागर्जितेकालेनष्टेछ्युस्यात्तद्दूषिते ब्रह्मौदनंपचेद्यत्रोपकर्मचेन्ननिवर्तते ब्रह्मौदनंपचेद्यत्रोपक्वमन्ननदुष्यतीतिसंग्रहोक्तेरितिप्रयोगरत्नेभट्टचरणाः अत्रशांतिरप्युक्तानृसिंहप्रसादे ब्रह्मौदनविधेःपूर्वंप्रदोषेगर्जितंयदि तदाविघ्नकरंज्ञेयंबटोरध्ययनस्यतत् तस्यशांतिप्रकारस्तुवक्ष्येशास्त्रानुसारतः प्रधानंपायसंसाज्यंद्रव्यंशांतियजोभवेत् सूक्तंबृहस्पतेर्विद्वान्पठेत्प्रज्ञाविवृद्धये गायत्रीचैवमंत्रःस्यात्प्रायश्चित्तंतुसर्पिषा धेनुंसवत्सकांदद्यादाचार्यायपयस्विनीं ब्राह्मणान्भोजयेन्नृप

श्चान्ते ब्रह्मौदनं चरेत् उपनयने चाधिकारिणः माधवीये त्वत्र मनुनोक्ताः पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः उपायनेऽधिकारी स्यात् पूर्वाभावे परः परः प्रयोगरत्ने पितैवोपनयेत् पुत्रं तदभावे पितुः पिता तदभावे पितुर्भ्राता तदभावे तु सोदरः पितेति विप्रपरं न क्षत्रियादेः तेषां पुरोहित एव उपनयनस्य दृष्टार्थत्वात् तेषां चाध्यापनेऽनधिकारात् अत्र पितृव्यस्य ज्येष्ठभ्रातृ भावे ऽधिकारः असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति याज्ञवल्क्योक्तेः तेनेदमविभक्तपरं पूर्वं तु विभक्तपरं मातृरजोदोषे तु प्रागुक्तं अथ षंढमूकादीनां विशेषः प्रयोगपारिजाते ब्राह्मे ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः तस्माच्च षंढबधिरकुब्जवामनपंगुषु जडगद्गदरोगार्तशुष्कांगविकलांगिषु मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितं मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा संस्कारमंत्रहोमादीन् करोत्याचार्य एव तु उपनेयांश्च विधिवदाचार्यस्य समीपतः आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वाजपेत् कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेत् एवमेव द्विजैर्जातौ संस्कार्यौ कुडगोलकौ इति स्मृत्यर्थसारेप्येवं कुडगोलकयोः संस्कार्यत्वं श्राद्धे निषेधश्च क्षेत्रजपुत्रविषयः अन्यस्य विन्नास्त्वेष विधिः स्मृत इति वचनात् अब्राह्मण्येनोपनयनाद्यप्राप्तेरित्यपरार्कः उपनयनं च कुमारं भोजयित्वा कार्यम् प्रागेवैनं तदह भोजयंतीति मदनपारिजाते गोभिलोक्तेः गायत्र्युपदेशश्चोत्तरतोऽग्नेः कार्यः उत्तरेणाग्निमुपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरोऽधीहि भो इति शांखायनसूत्रोक्तेः यद्यपि कात्यायनेनाथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायेत्युक्त्वा दक्षिणतस्तिष्ठत आसीनाय वैके इति विकल्प उक्तस्तथापि कातीयानामेव सः बह्वृचानां तूत्तर एव वेदेर्व्या

न् भिक्षायांविशेषमाहकात्यायनः मातरमेवाग्रेभिक्षेत पराशरमाधवीये मातरंवास्वसारंवामातुर्वाभगिनींनिजाम् भिक्षेतभिक्षांप्रथमंयाचैनंनविमानयेत् अथसंस्कारलोपेशौनकः आरभ्याधानमाचौलात्कालेतीतेतुकर्मणाम् व्याहृत्याग्निंसंस्कृत्य हुत्वाकर्मयथाक्रमं एतेष्वेकैकलोपेतुपादकृच्छ्रंसमाचरेत् चूडायामर्धकृच्छ्रंस्यादापदित्येवमीरितं अनापदितुसर्वत्रद्विगुणंद्विगुणंचरेत् पारिजातेकात्यायनः लुप्तेकर्मणिसर्वत्रप्रायश्चित्तंविधीयते प्रायश्चित्तेकृतेपश्चाल्लुप्तंकर्मसमाचरेत् स्मृत्यर्थसारेप्येवं कारिकायांतुप्रायश्चित्तेकृतेतीतेकर्मकृताकृतमित्युक्तं प्रायश्चित्तेकृतेपश्चादतीतमपिकर्मवै कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितइति त्रिकांडमंडनेतुकालातीतेषुकार्येषुप्राप्तवत्स्वपरेषुच कालातीतानिकृत्वैवविदध्यादुत्तराणितु तत्रसर्वेषांतंत्रेणनांदीश्राद्धंकुर्यात् देशकालकर्त्रैक्यात् गणशः क्रियमाणानांमातॄणांपूजनंसकृत् सकृदेवभवेच्छ्राद्धमादौनपृथगादिष्विति छंदोगपरिशिष्टात् एतद्बहूनामपत्यानांयुगपत्संस्कारकरणविषयमिति बोपदेवः अतीतसंस्काराणांयुगपत्करणइत्यन्ये तत्रापिचौलस्योपनीत्यासहेतिपक्षेउपनीतिदिनएवानुष्ठानंनपूर्वदिने सहत्वस्यदिवसैक्येसन्निकृष्टतरत्वात् वृद्धाचारोप्येवं उपनीतिदिनेमध्यान्हसंध्यामाहपारिजातेजैमिनिः यावद्ब्रह्मोपदेशस्तुतावत्संध्यादिकंनच ततोमध्यान्हसंध्यादिसर्वकर्मसमाचरेदिति ब्रह्मगायत्री यत्तुवचनम् उपासनेतुकर्तव्यंसायंसंध्येउपासनं आरभेद्ब्रह्मयज्ञंतुमध्यान्हेतुपरेहनीति तच्छाखांतरविषयमिति पारिजातः विकल्पइतियुक्तंपश्यामः उपनयनाग्निस्त्रिरात्रंधार्यः अहमेतमग्निंधारयतीत्यापस्तंबोक्तेः बौधायनसूत्रेतुसदाधारणमप्युक्तं उपनयनादिरग्निस्तमौपासनमित्याचक्षते पाणिग्रहणादित्येकेनित्योधार्योनुगतोनिर्मंथ्यइति इदंजातारणिपक्षे अन्यथामथनासंभवात् ब्रह्मयज्ञविशेषमा-

हृतत्रैवजैमिनिः अनुपाकृतवेदस्यकर्तव्योब्रह्मयज्ञकः वेदस्थानेतुसावित्रीगृह्यतेतत्समायतइति येषांतहि न एववेदारंभस्तेषांनेदृक्षितिदिक् अथब्रह्मचारिधर्माः याज्ञवल्क्यः मधुमांसांजनोच्छिष्टंशुक्तस्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादादिवर्जयेत् मनुः अभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणं वर्जयेदितिप्रकृतं पारिजाते कौर्मे नादर्शंचैववीक्षेतनाचरेद्दंतधावनं गुरूच्छिष्टं भेषजार्थंप्रयुंजीतनकामतः एतन्निषिद्धमध्वादिविषयं अन्यस्यगुरूच्छिष्टस्यसर्वदाप्राप्तेः सचेद्व्याधीयीतकामंगुरोरुच्छिष्टंभेषजार्थंसर्वंप्राश्नीयादितिवसिष्ठोक्तेः ज्येष्ठभ्रातुरित्यपिज्ञेयम् पितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमित्यापस्तंबोक्तेः गुरुपुत्रेतुस्मृत्यंतरेउक्तं गुरुवद्गुरुपुत्रःस्यादन्यत्रोच्छिष्टभोजनात् प्रचेताः ताम्बूलाभ्यंजनंचैवकांस्यपात्रेचभोजनं यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् यमः मेखलामजिनंदंडमुपवीतंचनित्यशः कौपीनंकटिसूत्रंचब्रह्मचारीतुधारयेत् अग्नींधनंभैक्ष्यचर्यामधःशय्यांगुरोर्हितं कुर्यादितिशेषः मेखलामाहाश्वलायनः तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्यावीवैश्यस्येति आचार्यःत्रिवृतामेखलाकार्यात्रिवारंस्यात्समावृता तद्ग्रंथयस्त्रयःकार्याःपंचवासप्तवापुनः मनुः मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमेखला त्रिवृतांग्रंथिनैकेनत्रिभिःपंचभिरेववा मौंज्यभावेतुकर्तव्याकुशाश्मंतकबल्वजैः अत्रप्रवरसंख्यानियमइतिवृद्धाः अथ दंडाः मनुः ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखादिरौ पैप्पलौदुंबरौवैश्योदंडानर्हंतिधर्मतः एषामभावेगौतमः यज्ञियोवासर्वेषांमूर्धललाटनासाग्रप्रमाणइति अजिनमाहाश्वलायनः अहतेनवाससासंवीतमैणेयेनवाजिनेनब्राह्मणंरौरवेणक्षत्रियमाजेन वैश्यमिति यद्यप्येणेयशब्देनमृगीचर्मैवोच्यतेएण्याढञितिपाणिनिस्मृतेः ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभेत्रिष्वितिअमरकोशा

श्च तथापिकृष्णारुरुबस्तान्यजिनानीतिशंखोक्तेः सर्वेषांवारौरवमितियमोक्तेश्च मृगचर्मणासहविकल्पोज्ञेयः वस्त्राजिनयोस्तुवि
कल्पः कार्पासंवाविकृतमितिगौतमोक्तेः अथयज्ञोपवीतं मनुः कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत् पारिजातेदेवलः कार्पा
सक्षौमगोवालशणवल्कतृणादिकं यथासंभवतोधार्यमुपवीतंद्विजातिभिः शुचौदेशेशुचिःसूत्रंसंहतांगुलिमूलके आवर्त्यषण्णवत्या
तत्त्रिगुणीकृत्ययत्नतः अब्लिंगकैस्त्रिभिःसम्यक्प्रक्षाल्योर्ध्ववृतंत्रिवृत् अप्रदक्षिणमावृत्यसावित्र्यात्रिगुणीकृतं ततःप्रदक्षिणाव
र्तंसमंस्यान्नवसूत्रकं त्रिरावेष्ट्यदृढंबध्वाब्रह्मविष्ण्वीश्वरान्नमेत् तन्नवतंतुकार्यं सावित्र्यात्रिगुणंकुर्यान्नवसूत्रंतुतद्भवेदितितेने
वोक्तेः छंदोगपरिशिष्टे त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रयमधोवृतं त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यते ऊर्ध्ववृतंदक्षिणकरमूर्ध्वंकृत्वा
वलितं भृगुः वामावर्तवलितंत्रिगुणंकृत्वादक्षिणावर्तवलितंत्रिगुणंकार्यं सःएकस्तंतुरेवंत्रितंतुकमित्यर्थः कात्यायनः पृष्ठदेशेच-
नाभ्यांचधृतंयद्विंदतेकटिं तद्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितं वसिष्ठः नाभेरूर्ध्वमनायुष्यमधोनाभेस्तपःक्षयः तस्मान्ना
भिसमंकुर्यादुपवीतंविचक्षणः पारिजातेदेवलः उपवीतंबटोरेकंद्वेतथेतरयोःस्मृते एकमेवयतीनांस्यादितिशास्त्रस्यनिश्चयः
सएव बहूनिवायुष्कामस्य तत्रमंत्रमाहसएव यज्ञोपवीतमितिवाव्याहृत्यावापिधारयेत् हेमाद्रौ यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्ते
चकर्मणि तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यते देवलः सावित्र्यादशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेत् विच्छिन्नंचाप्यधोयातंभु
क्त्वानिर्मितमुत्सृजेत् मनुः मेखलामजिनंदंडमुपवीतंकमंडलुं अप्सुप्रास्यविनष्टानिगृण्हीतान्यानिमंत्रतः अथैतल्लोपेप्रायश्चि-
त्तंमनुः अकृत्वाभैक्ष्यचरणमसमिध्यचपावकं अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेत् अमत्याआपदित्यागेतुयाज्ञवल्क्यः भक्ष्या

ग्निकार्येत्यक्त्वातुसप्तरात्रमनातुरः कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयं उपस्थानंततःकुर्यात्समासिंचंत्यनेनतु मंत्रास्तुमिताक्षरायांज्ञेयाः सकृल्लोपेतुऋग्विधाने मानस्तोकेजपेन्मंत्रंशतसंख्यंशिवालये अग्निकार्यंविनाभुक्त्वानपापंब्रह्मचारिणः स्मृत्यर्थसारेतु संध्याग्निकार्यलोपेस्नात्वाऽष्टसहस्रंजपः भिक्षालोपेष्टशतं अभ्यासेद्विगुणं पुनःसंस्कारश्चेत्युक्तं अपरार्केसंवर्तः यःसंध्यांचैव नोपास्ते अग्निकार्यंयथाविधि गायत्र्यष्टसहस्रंतुजपेत्स्नात्वासमाहितः अग्निकार्यंसंध्याद्वयेकार्यं अग्निकार्यंततःकुर्यात्संध्ययोरुभयोरपीतियाज्ञवल्क्योक्तेः सायमेववा सायमेववाग्निमिंधीतेत्येकेइतिलौगाक्षिणोक्तेः पारिजातेवृद्धशातातपः ब्रह्मचारीतुयोश्नीयान्मधुमांसंतथैवच प्राजापत्यंचरेत्कृच्छ्रंव्रतशेषंसमापयेत् ऋग्विधाने तवोधियाजपेन्मंत्रंलक्षंचैवशिवालये ब्रह्मचारीस्वधर्मेषुन्यूनंचेत्पूर्णमितितत् स्त्रीसंगेतुमनुः अवकीर्णीतुकामेनगर्दभेनचतुष्पथे स्थालीपाकविधानेनयजेद्वैनिर्ऋतिंनिशि विस्तरस्तुमिताक्षरादौज्ञेयः उपवीतनाशेतुहारीतः मनोव्रतपतीभिश्चतस्रआज्याहुतीर्हुत्वापुनःप्रतीयात् तत्रैवमरीचिः ब्रह्मसूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेथवा गायत्र्यष्टसहस्रेणप्राणायामेनशुध्यति मनुः भोशब्दंकीर्तयेदंतेस्वस्यनाम्नोभिवादने आयुष्मान्भवसौम्येतिवाच्योविप्राभिवादने आकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः शर्मन्नितिनकारात्पूर्वइत्यर्थः अभिवादनेप्रत्यभिवादनादौविशेषःस्मृत्यर्थसारेपारिजातादौज्ञेयः यमः ज्यायानपिकनीयांसंसंध्यायामभिवादयेत् विनाशिष्यंचपुत्रंचदौहित्रंदुहितुःपतिं अथपुनरुपनयनं पारिजातेशातातपः लशुनंगृंजनंजग्ध्वापलांडुंचतथाशुनम् उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात् उपायनंपुनःकुर्यात्तप्तकृच्छ्रंचरेन्मुहुरिति हेमाद्रौवृद्धमनुः जीवन्यदिसमागच्छेद्घृतकुंभेनिमज्यच उद्धृत्यस्नापयित्वा

स्यजातकर्मादिकारयेत् तत्रैवपाद्मे प्रेतशय्याप्रतिग्राही पुनःसंस्कारमर्हति चंद्रिकायांबोधायनः सिंधुसौवीरसौराष्ट्रांस्तथाप्रत्यंतवासिनः अंगवंगकलिंगांध्रगत्वासंस्कारमर्हति हेमाद्रौप्रायश्चित्तकांडेवृद्धगौतमः खरमुष्ट्रंचमहिषमनड्वाहमजंतथा बस्तमारुह्यमुखजः क्रोशेचार्द्धंविनिर्दिशेत् मार्कंडेयः खरमारुह्यविप्रस्तुयोजनंयदिगच्छति तप्तकृच्छ्रत्रयंप्रोक्तंशरीरस्यविशोधनं पुनर्जन्मप्रकुर्वीतघृतगर्भविधानतः मदनरत्नेमिताक्षरायांचस्नानमात्रमुक्तं मनुः अज्ञानात्प्राश्यविण्मूत्रंसुरासंस्पृष्टमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः मिताक्षरायांपराशरः यःप्रत्यवसितोविप्रःप्रव्रज्यातोविनिर्गतः अनाशकनिवृत्तश्चगार्हस्थ्यंचेच्चिकीर्षति सचरेत्त्रीणिकृच्छ्राणित्रीणिचांद्रायणानिच जातकर्मादिभिःसर्वैःसंस्कृतःशुद्धिमाप्नुयात् बोधायनसूत्रे अथोपनीतस्यव्रत्यानिभवंतिनान्यस्योच्छिष्टंभुंजीतान्यत्रपितृज्येष्ठाभ्यांनस्त्रियासहभुंजीतमधुमांसश्राद्धसूतकान्नानिदशाहसंधिनीक्षीरछत्राकनिर्यासोविलापनंगणान्नंगणिकान्नमित्येतेषुपुनः संस्कारः प्रतिषिद्धदेशगमनमित्येकेअथाप्युदाहरंति सुराष्ट्रसिंधुसौवीरमवंतींदक्षिणापथम् एतानिब्राह्मणोगत्वापुनःसंस्कारमर्हति अथपुनःसंस्कारव्याख्यास्यामोदेवयजनप्रभृत्याग्निमुखात्कृत्वापालाशींसमिधमाज्येनांऽक्ताभ्याधायवाचयति पुनस्त्वादित्यारुद्रावसवःकामाःस्वाहेत्यथात्रप्रायश्चित्तेजुहोति यन्मआत्मनोमिंदाभूत्पुनरग्निश्चक्षुरदादिति द्वाभ्यामथपक्वाज्जुहोति सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्त॰ घृतेनस्त्वाहेत्यथाज्याहुतीरुपजुहोति येनदेवाःपवित्रेणेतितिसृभिरनुच्छंदसंस्विष्टकृत्प्रभृतिसिद्धमाधेनुवरदानादथापरमापरिधानात्कृत्वापालाशींसमिधमाधायाथात्रप्रायश्चित्तेजुहोत्यथव्याहृतीर्जुहोति अथापरोब्राह्मणवचनादेवसावित्र्याशतकृत्वो-

घृतमभिमंत्र्यप्राश्यकृतप्रायश्चित्तोभवति गुरोर्वाप्युच्छिष्टंभुंजीताथाप्युदाहरंति वपनंदक्षिणादानंमेखलादंडमजिनभैक्ष्यचर्याव्रतानिच निवर्तंतेपुनःसंस्कारकर्मणीति आश्वलायनगृह्येपि अथोपेतपूर्वस्येत्यादिनापुनःसंस्कारउक्तः तथापित्रादिव्यतिरेकेणब्रह्मचारिणः प्रेतकर्मकरणेपुनरुपनयनमित्यपरार्कोदयः त्रिस्थलीसेतौ कर्मनाशाजलस्पर्शात्करतोयाविलंघनात् गंडकीबाहुतरणात् पुनःसंस्कारमर्हति गौडास्तु करतोयाजलस्पर्शात्कर्मनाशाविलंघनादितिपठंति तन्न दानधर्मेषुकरतोयास्नानेप्राशस्त्योक्तेः करतोयेसदानीरेसरिच्छ्रेष्ठेतिविश्रुते आप्लावयसिपौराणांपापंहरकरोद्भवेइतिस्मृतिदर्पणचंद्रिकालिखितस्नानमंत्राच्च पराशरः अजिनंमेखलादंडोभैक्ष्यचर्याव्रतानिच निवर्तंतेद्विजातीनांपुनःसंस्कारकर्मणि हरदत्तस्तु यः एकंवेदमधीत्यान्यंवेदमध्येतुमिच्छति तस्यपुनरुपनयनंतेनप्रतिवेदमुपनयनंकर्तव्यमित्याह अन्येनैतन्मन्यंतेसर्वेभ्योवैवेदेभ्यः सावित्र्यनूच्यतइत्यापस्तंबोक्तेः तद्विधिः कारिकायां वेदांतरमधीत्यैवऋग्वेदंयेत्वधीयते उपनीतिरियंतेषामलंकरणवर्जिता यद्वेतदुपनीतस्यप्रायश्चित्तंयदाभवेत् कृताकृतंचवपनंमेधाजननमेवच मेधाजननसद्भावेव्रतचर्याभवेदिह अनुप्रवचनीयश्चतदभावेद्वयंनहि परिदानंनकार्यंस्यात्त्रिर्मित्रानंतरंत्विदं पूर्वस्यावाचयेत्स्थानेतत्सवितुर्वृणीमहइति यत्तुहारीतः द्विविधाःस्त्रियःब्रह्मवादिन्यःसद्योवध्वश्च तत्रब्रह्मवादिनीनामुपनयनमग्नींधनंवेदाध्ययनंस्वगृहेचभैक्ष्यचर्येति सद्योवधूनामुपनयनंकृत्वाविवाहः कार्यइतितद्युगांतरविषयं पुराकल्पेषु नारीणांमौंजीबंधनमिष्यते अध्यापनंचवेदानांसावित्रीवाचनंतथेति यमोक्तेः अथानध्यायाः पारिजातेबृहस्पतिः प्रतिपत्सचतुर्दश्यामष्टम्यांपर्वणोर्द्वयोः श्वोनध्यायेद्यशर्वर्यांनाधीयीतकदाचन नारदः अयनेविषुवेचैवशयनेबोधनेहरेः अनध्याय

स्तुकर्तव्योमन्वादिषुयुगादिषु निर्णयामृते चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु अनध्यायस्तुकर्तव्योयाश्चसौपपदातिथिः गर्गः शुचावूर्जनभस्येचयाद्वितीयाविधुक्षये चातुर्मास्यद्वितीयास्ताःप्रवदंतिमनीषिणः स्मृत्यर्थसारेपि आषाढीकार्तिकीफाल्गुनीसमीपस्थद्वितीयाश्चेति मनुः उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षपणंस्मृतं अष्टकासुत्वहोरात्रमृत्वंतासुचरात्रिष्विति उत्सर्गेतु मनूक्तपक्षिण्यहोरात्राभ्यांत्र्यहस्यविकल्पइतिविज्ञानेश्वरः अष्टकाशब्देनसप्तम्यादित्रयंज्ञेयं तिस्रोष्टकास्त्रिरात्रसंख्यासंकेइतिगौतमोक्तेः ऋत्वंतास्त्वितिसौरऋत्वंतासुचांद्रस्यपर्वत्वेनैवनिषेधसिद्धेरितिसर्वज्ञनारायणः एतेनित्याः नैमित्तिकानप्याहयाज्ञवल्क्यः त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेतथा संध्यागर्जितनिर्घातभूकंपोल्कानिपातने समाप्यवेदंद्युनिशमारण्यकमधीत्यच पंचदश्यांचतुर्दश्यामष्टम्यांराहुसूतके ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्रतिगृह्यच पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरेत्वहोरात्रंशक्रपातेतथोच्छ्रये ग्रहणेद्युनिशोर्कावपिग्रस्तास्तेत्र्यहमित्युक्तंप्राक् स्मृत्यर्थसारेतुराज्ञोतुग्रहेतिस्रोरात्रीःदिवाचत्र्यहमित्युक्तं ऋतुःसौरः भुक्तेत्युत्सवविषयं ऊर्ध्वंभोजनादुत्सवइति गौतमोक्तेः श्राद्धिकंमहैकोद्दिष्टभिन्नं तत्रतुत्र्यहमितिमनुः स्मृत्यर्थसारेचैवं यत्तुपश्वाद्यंतरायेत्र्यहमुपवासोविप्रवासश्चेतिगौतमोक्तंतत्प्रथमाध्ययने याज्ञवल्क्यः श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिःस्वने अमेध्यशवशूद्रांत्यश्मशानपतितांतिके देशेशुच्यावात्मनिचविद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते पांसुप्रवर्षेदिग्दाहेसंध्यानीहारभीतिषु धावतःपूतिगंधेचशिष्टेचगृहमागते खरोष्ट्रयानहस्त्यश्वनौवृक्षगिरिरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः बाणोवंशःशततंतुर्वीणेतिहरदत्तः अमेध्यास्मृतिकादयः स्तंनि

तंगर्जः वर्षातोन्यत्रगर्जेवृष्टिविद्युतांयौगपद्येआकालिकः वर्षासुतात्कालिकइतिनारायणः संध्यागर्जेतुहारीतः सायंसंध्यास्तनि
तेरात्रिः प्रातःसंध्यास्तनितेहोरात्रंरात्रौविद्युत्यपररात्र्यवधिः विद्युतिनक्तंचापररात्रादितिगौतमोक्तेः तृतीयदिनांशोत्तरंतुविद्युतिसर्वं
रात्रमित्याहसएव त्रिभागादिप्रवृत्तौसर्वमिति अर्धरात्रेमध्ययामद्वयमितिविज्ञानेश्वरः मध्यदंडचतुष्टयइतिनिर्णयामृते मनुः नवि
वादनकलहेनसेनायांनसंगरे नभुक्तमात्रेनाजीर्णेनवमित्वानसूतके रुधिरेचस्रुतेगात्राच्छस्त्रेणचपरिक्षते कौर्मे श्लेष्मातक
स्यच्छायायांशाल्मलेर्मधुकस्यच कदाचिदपिनाध्येयंकोविदारकपित्थयोः मनुः शयानःप्रौढपादश्चकृत्वाचैवावसक्थिकाम् नाधी-
यीतामिषंजग्ध्वासूतकान्नाद्यमेवच प्रौढपादःपादोपरिपादद्वाला आसनारूढपादोवेतिहरदत्तः सोपपदास्वेतिप्रागुक्तं स्मृत्यर्थ-
सारेश्रवणद्वादशीमहाभरण्योः प्रेतद्वितीयायांरथसप्तम्यामाकाशेशवदर्शनेचाहोरात्रं असपिंडेगुरौमृतेत्रिरात्रं आचार्येउपाध्यायेचप
क्षिणी आचार्यभार्यापुत्रशिष्येषुहोरात्रम् अग्न्युत्पातेगोविप्रमृतौत्रिरात्रम् अयनेविषुवेचपक्षिणी अकालवृष्टौच आरण्यमार्जारस
र्पनकुलपंचनखादेरंतरागमनेत्रिरात्रम् आरण्यश्वसृगालादिवानररजकादौद्वादशरात्रं खरवराहोष्ट्रचांडालसूतिकोदक्याशवादौमा-
सम् गोगवयाजानास्तिकादौत्रिमासं शशमेषश्वपाकादौषण्मासं गजगंडसारससिंहव्याघ्रमहापापिकृतघ्नादावब्दमनध्यायः शोभन
दिनेचानध्यायः विवाहप्रतिष्ठोद्यापनादिष्वासमासेःसगोत्राणामनध्यायः उदयेस्तमयेचापिमुहूर्तत्रयगामियत् तद्दिनंतदहोरात्रंचा
नध्यायविदोविदुः केचिदाहुः क्वचिद्देशेयावन्तदिननाडिकाः तावदेवत्वनध्यायोनतत्तन्मिश्रेदिनांतरे प्रदोषंत्वाहप्रजापतिः षष्ठी
चद्वादशीचैवअर्धरात्रोननाडिका प्रदोषेनत्वधीयीततृतीयानवनाडिका निर्णयामृतेगर्गः रात्रौयामद्वयादर्वाक्सप्तमीचत्रयोदशी

प्रदोषःसतुविज्ञेयःसर्वविद्याविगर्हितः रात्रौनवसुनाडीषुचतुर्थीयदिदृश्यते प्रदोषःसतुविज्ञेयःसर्वविद्याविगर्हितः कौर्मे अनध्यायस्तुनांगेषुनेतिहासपुराणयोः नधर्मशास्त्रेष्वन्येषुपर्वण्येतानिवर्जयेत् शौनकः नित्येजपेचकाम्येचक्रतौपारायणेपिच नानध्यायोस्तिवेदानांग्रहणेग्राहणेस्मृतः इत्यनध्यायाः अथमहानाम्न्यादिव्रतं श्रीधरः तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणं चौलवत्सर्वमाख्यातंसगोदानव्रतेषुच एषांलोपेशौनकः व्रतानिविधिनाकृत्वास्वशाखाध्ययनंचरेत् अकृत्वाप्यस्यतेयेनसपापीविधिघातकः प्रत्येकंकृच्छ्रमेकेकंचरित्वाज्याहुतीःशतं हुत्वाचैवतुगायत्र्यास्नायादित्याहशौनकः स्मृत्यर्थसारेतु त्रीन्षड्द्वादशवाकृच्छ्रान्कृत्वापुनर्व्रतंचरेदित्युक्तं अथसमावर्तनं सुरेश्वरः भौमभानुजयोर्वारेनक्षत्रेचन्द्रतोदिते ताराचन्द्रविशुद्धौचस्यात्समावर्तनक्रिया बौधायनसूत्रेतु रोहिण्यांतिष्येउत्तरयोःफाल्गुन्योर्हस्तेचित्रायांमैत्रेविशाखयोर्वास्नायादित्युक्तं वसिष्ठः स्नानमाध्यान्हकालेतुहोरायांकारयेच्छुभं पूर्वाण्हेतदभावेतुकुर्यात्स्नानंयथाविधि सर्वऋतवोविवाहस्येतिसूत्रात् यदादक्षिणायनेविवाहस्तदासमावर्तनमपितत्रैव अन्यथोदगयनेसमावर्तने अनाश्रमीनातिष्ठेदितिविरोधःस्यादित्युक्तंसुदर्शनभाष्ये एतच्चब्रह्मचारिव्रतलोपप्रायश्चित्तं कृत्वाकार्यं तदाहबौधायनः शौचसंध्यादर्भभिक्षाग्निकार्यराहित्यकौपीनोपवीतमेखलादंडाजिनाधारणेदिवास्वापच्छत्रपादुकास्रग्विधारणांगोद्वर्तनानुलेपनांजनद्यूतनृत्यगीतवाद्यादिभिरतोब्रह्मचारीकृच्छ्रत्रयंचरेत् महाव्याहृतिहोमंपाहित्रयोदशहोमंचकुर्यात् समावर्तनोत्तरंपूर्वमृतानांत्रिरात्रमाशौचंकार्यम् आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात् समाप्तेतूदकंकृत्वात्रिरात्रमशुचिर्भवेदितिमनूक्तेः आदिष्टीब्रह्मचारीतिविज्ञानेश्वरः ब्रह्मचर्येयदिकश्चिन्मृतस्तदात्रिरात्रमध्येविवाहःकार्योऽन्य

थानेतिसिद्ध्यति जननेतुसत्यपिनत्रिरात्रम् तत्रातिक्रांताशौचाभावादुदकंदत्वेतिवचनाच्चेतिदिक् तत्रापिविकल्पः पितर्यपिमृतेनैषांदोषोभवतिकर्हिचित् आशौचंकर्मणोंतेस्यात्र्यहंवाब्रह्मचारिणामिति छंदोगपरिशिष्टात् स्नातकव्रतान्याहव्यासः यज्ञोपवीतद्वितयंसोदकंचकमंडलुम् छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ रौक्मेचकुंडलेवेदःकृत्तकेशनखःशुचिः वेदोदर्भबटुः मनुः उपानहौचवासश्चधृतमन्यैर्नधारयेत् उपवीतमलंकारंस्रजंबध्वाकमेवच अन्यान्यपिबह्वृचगृह्यस्मृत्यादिभ्योज्ञेयानि अथच्छुरिकाबंधः ज्योतिर्निबंधेनारदः छुरिकाबंधनंवक्ष्येनृपाणांप्राक्करग्रहात् विवाहोक्तेषुमासेषुशुक्लपक्षेप्यनस्तगे जीवेशुक्रेचभूपुत्रेचंद्रताराबलान्विते मौंजीबंधर्क्षतिथिषुकुजवर्जितवासरे संग्रहे शूद्राणांराजपुत्राणांमौंज्यभावेक्षुबंधनं मौंजीबंधोक्ततिथ्यादौकार्यंभौमदिनंविना अथविवाहः याज्ञवल्क्यः अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत् अनन्यपूर्विकांकांतामसपिंडांयवीयसीम् अरोगिणींभ्रातृमतीमसमानार्षगोत्रजाम् लक्षण्यांबाह्याभ्यंतरलक्षणैर्युक्ताम् बाह्यानिकाशीखंडादौप्रसिद्धानि आंतराण्याश्वलायनोक्तान्यष्टौपिंडान्कृत्वेत्यादीनि मनुः असपिंडाचयामातुरसगोत्राचयापितुः साप्रशस्ताद्विजातीनांदारकर्मणिमैथुने दत्रिममातुर्गृहीताअपिसपिंडासगोत्रा तत्कुलनिवृत्तयेचकारात्मातुरसगोत्राद्दत्तस्यपितुर्जनककुलेपितुरसगोत्रापिसपिंडत्वान्निषिद्धेत्यन्यश्चकारः असपिंडांसापिंड्यरहिताम् तच्चैकशरीरावयवान्वयेनभवति एकस्यहिपितुर्मातुर्वाशरीरस्यावयवाः पुत्रपौत्रादिषुसाक्षात्परंपरयावाशुक्रशोणितादिरूपेणानुस्यूताः यद्यपिपत्न्याः पत्यासहभ्रातृपत्नीनांचपरस्परंनैतत्संभवति तथापिआधारत्वेनैकशरीरावयवान्वयोस्त्येव अस्थिभिः अस्थीनीतिमंत्रलिंगात् एकस्यहिपितृशरीरस्या

वयवाः पुत्रद्वारातास्त्वाहिताइति मदनरत्नपारिजातविज्ञानेश्वरादयः वाचस्पतिशुद्धिविवेकशूलपाण्यादिगौडमैथिलादयोप्येवम् श्रुतावपि एततूषाट्कौशिकंशरीरं त्रीणिपितृतस्त्रीणिमातृतोऽस्थिस्नायुमज्जानःपितृतस्त्वङ्मांसरुधिराणिमातृतइति मजाम नुभजायसइतिच चंद्रिकापरार्कमेधातिथिमाधवादयस्तु एकपिंडदानक्रियान्वयित्वंसापिंड्यम् लेपभाजश्चतुर्थाद्याःपित्राद्याः पिंडभागिनः पिंडदःसप्तमस्तेषांसापिंड्यंसाप्तपौरुषमितिमात्स्योक्तेः नचपितृव्यादिष्वेतन्नास्तीतिवाच्यम् तत्कर्तृकश्राद्धेदेव तैक्येनतत्सत्त्वात् देवदत्तकर्तृकश्राद्धेहियेदेवताभूतास्तेषांमध्येयःकश्चिदन्यकर्तृकश्राद्धेऽनुप्रविशतितेषांसापिंड्यं तद्भार्याणाम पिभर्तृकर्तृकश्राद्धेसहाधिकारित्वेनतदन्वयात् एकत्वंसागताभर्तुःपिंडेगोत्रेचसूतके इतिस्मृतेश्च श्रुतीनांचवैराग्यार्थत्वात्तस्य सापिंड्यनिमित्तत्वेमानाभावात् नचमातुलादिष्वेतन्नास्तीतिवाच्यम् मातामहरूपदेवतैक्यात् ननुगुरुशिष्यादेरपिश्राद्धदेवता त्वात्सापिंडत्वंस्यात् किंबहुनासर्वाभावेतुनृपतिःकारयेत्तस्यरिक्थतइतिमार्कंडेयपुराणाद्राज्ञोपिश्राद्धकर्तृत्वात्सापिंड्यप्रसंगः सत्यम् पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेति याज्ञवल्क्यवचनेनमातापितृसंबंधएवतत्सत्त्वात् ऊर्ध्वंसापिंड्यंनिवर्ततइतिशेषः ननुपंचमत्वाद्यत्रनियम्यतेनमातृतइत्यादिवाक्यभेदात् मैवं मातृकुलेपंचमत्वस्यपितृकुलेसप्तमत्वस्यचबोधनेतुल्यत्वात् पौरु षेयत्वाददोषइतिचेत् तुल्यमन्यत्रापि अन्यकर्तृकेराज्ञस्तत्पितृणांवादेवतात्वाभावाच्च किंच अवयवान्वयपक्षेयथायोगरू ढ्यापरिहारस्तथेहापितेनमातृकुलेपितृकुलेचैकपिंडदानक्रियान्वयित्वंसापिंड्यमित्याहुः तेनैकस्यपित्रादयःषट्पुत्रादयश्च षट्सपिंडाभवंति अत्रकेचिदुभयतःसापिंड्यनिवृत्तावेवोद्वाहोनान्यथेत्याहुः शुद्धिचिंतामणिवाचस्पतिहरिदत्तादयस्तु सगोत्रत्व

वत्सापिंड्यस्यसप्रतियोगिकत्वेनसंयोगवदुभयनिरूप्यत्वात् एकतोनिवृत्तावन्यतोनिवृत्तेरावश्यकत्वान्मूलपुरुषमारभ्याष्टमोवरोमूलपुरुषमारभ्यद्वितीयातृतीयादिकांकन्यामुद्वहेदित्याहुः शिष्टास्तु नवधूवरयोःस्वतःसापिंड्यंकिंतुकूटस्थसंततित्वात्तत्सापिंड्येनैव अतोष्टमवरंप्रतिकन्यायाअसापिंड्येपिकन्यायाःकूटस्थेनसापिंड्यात्तत्संततिस्थत्वाद्वरस्तांप्रतिसपिंडएवेत्यविवाहः सापिंड्यासापिंड्ययोःप्रतियोगिभेदेनाविरोधादित्याहुः इदमेवचयुक्तं आशौचेप्येवंसापिंड्यंज्ञेयम् यत्रतुमध्येविच्छिन्नमपिसापिंड्यंमंडूकप्लुतिवत्पुनरनुवर्तते यथा कूटस्थात्सप्तम्योःकन्ययोःपुत्रौतत्रनिवृत्तिः तदपत्ययोस्त्वनुवृत्तिस्तत्रापिनसापिंड्यासापिंड्ययोर्दोषः संबंधिभेदात् तेनतत्रनविवाहः अत्रकूटस्थमारभ्यगणनाकार्या तदुक्तं वध्वावरस्यवातातःकूटस्थाद्यदिसप्तमः पंचमीचेत्तयोर्मातातत्सापिंड्यंनिवर्ततइति कूटस्थोमूलपुरुषः विश्वरूपनिबंधे एवमुक्तप्रकारेणपितृबंधुषुसप्तमात् ऊर्ध्वमेवाविवाह्यत्वंपंचमान्मातृबंधुतः संतानोभिद्यतेयस्मात्पूर्वजाद्भयत्रच तमाद्यगणयेद्धीमानुवरंयावच्चकन्यकाम् स्मृतितत्त्वेनारदः आसप्तमात्पंचमाच्चबंधुभ्यःपितृमातृतः अविवाह्यासगोत्राचसमानप्रवरातथा अत्रबंधुभ्यइतिपंचमीनिर्देशात् पितुःपितृषसृपुत्रात्सप्तमींमातुःपितृषसृपुत्राच्चपंचमीमपित्यजेत् एवमन्यबंधुषुज्ञेयम् तत्रापि त्रिगोत्रात्ययेर्वागपिविवाहंकुर्यात् वक्ष्यमाणवचनात् त्रिगोत्रगणनाचमातामहगोत्रापेक्षया नतुस्वापेक्षया अन्यथापितुःपितामहदुहितुर्दौहित्रीपुत्रीपरिणेयास्यात् वध्वाःमातामहगोत्रापेक्षयातुत्रिगोत्रांतर्गतेनविवाहप्रसंगइतिसंबंधतत्त्वादयोगौडग्रंथाः संबंधविवेकेशूलपाणिरप्याह पंचमात्सप्तमाच्चार्वागपित्रिगोत्रांतरिताविवाह्या असंबद्धाभवेन्मातुःपिंडेनैवोदकेनवा साविवाह्याद्विजातीनांत्रिगोत्रांतरितान्वयेतिबृहन्मनुः

क्तेः सन्निकर्षेपिकर्तव्यंत्रिगोत्रात्परतोयदीतिदेवलोक्तेश्चेति एतच्चदाक्षिणात्यानमन्यंते यत्तुवसिष्ठः पंचमींसप्तमींचैवमातृतः पितृतस्तथेति यच्चविष्णुपुराणम् पंचमीमातृपक्षाच्चपितृपक्षाच्चसप्तमी गृहस्थउद्वहेत्कन्यांन्याय्येनविधिनानृपेतितत्पंचमीसप्तमीमतीत्येतिव्याख्येयम् पंचमेसप्तमेचैवयेषांवैवाहिकीक्रिया क्रियापराअपिहितेपतिताःशूद्रतांगताइत्यपरार्केमरीचिवचनात् हारलतायांशंखलिखितौ सपिंडतातुसर्वेषांगोत्रतःसाप्तपौरुषी पिंडश्चोदकदानंचआशौचंचतदानुगं गोत्रंसंतानं आशौचंतानभिव्याप्यगच्छतीत्यर्थः शुद्धिविवेकेशुद्धिचिंतामणौचब्राह्मे सर्वेषामेववर्णानांविज्ञेयासाप्तपौरुषी सपिंडतातःपश्चात्समानोदकधर्मता ततःकालवशात्तत्रविस्मृतेनामगोत्रतः समानोदकसंज्ञातुतावन्मात्रापिनश्यति सप्तोर्ध्वंत्रयःसोदका तोगोत्रजाः तत्रैवब्राह्मे अविभक्तधनास्त्वेतेसपिंडाःपरिकीर्तिताः तेनाविभक्तधनाभावेविभक्तःसपिंडोधनहारीनान्यथेत्यर्थः तेनविवाहेआशौचेधनग्रहणेचत्रिधासापिंड्यमित्युक्तं यत्तु पंचमीमातृतःपरिहरेत्सप्तमींपितृतस्त्रीन्मातृतःपंचपितृतोवेतिपैठीनसिस्मृतौ त्रीनित्यनुकल्पइतिमाधवोक्तेः पंचमींसप्तमींचैवमातृतःपितृतस्तथा दशभिःपुरुषैःख्याताच्छ्रोत्रियाणांमहाकुलात् उद्वहेत्सप्तमादूर्ध्वंतदभावेतुसप्तमीम् पंचमींतदभावेतुपितृपक्षेप्ययंविधिः सप्तमीचतथाषष्ठीपंचमींचतथैवच एवमुद्वाहयेत्कन्यांनदोषःशाकटायनः तृतीयांवाचतुर्थींवापक्षयोरुभयोरपि विवाहयेन्मनुःप्राहपाराशर्योगिरायमः यस्तुदेशानुरूपेणकुलमार्गेणचोद्वहेत् नित्यंसव्यवहार्यःस्याद्वेदाच्चैतत्प्रदृश्यतइतिचतुर्विंशतिमतात् चतुर्थीमुद्वहेत्कन्यांचतुर्थःपंचमोपिवा पराशरमतेषष्ठीपंचमोनतुपंचमीमितिपराशरोक्तेश्चानुक

त्वेनापदिपंचम्यादिपरिणयनंकार्यमितिप्रतीयते अत्रहितदभावेइतिस्पष्टमेवानुकल्पत्वमुक्तम् तत्रयथाश्रुतंज्ञेयम् पूर्वोक्तमरीचिवचोरोधात् वस्तुनिविकल्पासंभवात् पंचमात्सप्तमाद्धीनांयः कन्यामुद्वहेद्द्विजः गुरुतल्पीसविज्ञेयः सगोत्रांचैवमुद्वहन्निति विष्णूक्तेः पराशरस्यमूलाभावाच्च तस्मान्मदनपारिजाताद्युक्तदिशादत्तकसापत्नसंबंधाद्यनुप्रवेशो ब्राह्मणादीनांक्षत्रियादिसपिंडविषयेवा पूर्वोक्तानिनेयानि नत्वनुकल्पइतिभ्रमितव्यं यत्तुस्मृतिचंद्रिकामाधवादयआहुः तृतीयेसंगच्छावहे चतुर्थेसंगच्छावहाइतिशातपथश्रुतेः तृप्तांजहुर्मातुलस्येवयोषाभागस्तेपैतृष्वसेयीवपामिवेति गर्भेनुनौजनितादंपतीकरितिचमंत्रवर्णात् मातृष्वसृसुतांकेचित्पितृष्वसृसुतांतथा विवहंतिक्वचिद्देशेसंकोच्यापिसपिंडतामितिशातातपोक्तेश्चमातुलकन्योद्वाहः कार्यः यद्यपिपितृष्वसृकन्योद्वाहोपिप्राप्तस्तथाप्यस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्वितिनिषेधाद्वचनांतरेणतदुद्वाहस्याविधानाच्चन कार्यः अयंतुदाक्षिणात्यशिष्टाचारात्कार्यइति नचपूर्वोक्तश्रुतीनामर्थवादमात्रता मानांतरेणासिद्धेरुपरिहिद्वेष्योधारयतीनिवदनुवादानुपपत्त्याविधिकल्पनात् यत्तुशातातपः मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच समानप्रवरांचैवत्यक्त्वाचांद्रायणंचरेत् यच्चमनुः पैतृष्वसेयींभगिनींस्वस्रीयांमातुरेवच मातुश्चभ्रातुराप्तस्यगत्वाचांद्रायणंचरेत् एतास्तिस्रस्तुभार्यार्थेनोपयच्छेत्तुबुद्धिमान् यच्चव्यासः मातुःसपिंडायत्नेनवर्जनीयाद्विजातिभिरितितद्गांधर्वादिविवाहोढमातृविषयम् तत्रपितृगोत्रानिवृत्तेः अतएवमार्कंडेयपुराणे गांधर्वादिविवाहेषुपितृगोत्रेणधर्मविदिति ब्राह्मादिविवाहेतुपरिणेयेवेति भट्टसोमेश्वरोपितृतीयेध्यायेवाक्यपादेमातुलकन्योद्वाहमुदाहृत्यस्मृतिविरोधेनाचारप्रामाण्यस्यवार्तिकेबाधोक्तावपिपूर्वोक्त

श्रौतलिंगबलीयस्त्वादस्यकर्तव्यतामाह तदेतद्दत्तकस्य पालकदत्रिमसमातृसोदरकन्याविषयत्वेनासवर्णमातुलकन्याविषयत्वेन युगांतरपरत्वेनचोपपन्नमपि अविचारितरमणीयंयथातथास्तु तथापिकलौनाचरन्निषिद्धमेव गोत्रान्मातुःसपिंडाच्चविवाहो गोवधस्तथेत्यादिपुराणात् माधवीये बौधायनोप्यस्यनिंदामाह पंचधाविप्रतिपत्तिर्दक्षिणतस्तथोत्तरतऊर्णाविक्रयोनुपेतेन-स्त्रियासहभोजनंपर्युषितभोजनंमातुलपितृष्वसृदुहितृपरिणयनमिति अथोत्तरतः सीधुपानादिकमुक्त्वाइतरइतरस्मिन्कुर्वन्दुष्यतीतिइतरइतरस्मिन्निति भट्टसोमेश्वरेणापिस्मृतिविरुद्धानांमातुलकन्योद्वाहादीनामस्माद्वचनादप्रामाण्यमित्युक्तम् बृह-स्पतिरपि उद्वह्यतेदाक्षिणात्यैर्मातुलस्यसुताद्विजैः मत्स्यादाश्चनराःपूर्वेव्यभिचाररताःस्त्रियः उत्तरेमद्यपाश्चैवस्पृश्यानृणांरजस्वलाद्दूष्यनाचारत्वमाह अतएवहेमाद्रौमात्स्ये कर्णोदकादीनांतत्कारिणांश्राद्धेनिषेधः बोपदेवेनापिलिखितंब्राह्मम् यत्रमातुलजोद्वाहीयत्रवैवृषलीपतिः श्राद्धंनगच्छेत्तद्विप्राःकृतंयच्चनिरामिषमिति तस्मान्मातृतःपंचपितृतःसप्तत्यक्त्वोद्वहेदितिसिद्धम् संबंधविवेकेसुमंतुः ब्राह्मणानामेकपिंडस्वधानामादशमाद्धर्मविच्छित्तिर्भवति आसप्तमाद्रिक्थविच्छित्तिर्भवति आतृतीयात्सपिंडविच्छित्तिरन्यथा पिंडशौचक्रियाविच्छेदाद्ब्रह्महतुल्याभवति अस्यार्थमाहशूलपाणिः जीवत्पित्रादित्रिकस्यवृद्धप्रपितामहादयस्त्रयः श्राद्धदेवतात्वात्सपिंडभाजोभवंति तदूर्ध्वंत्रयोनवपुरुषपर्यंतालेपभाजः श्राद्धकर्ताचदशमइतिदशमादूर्ध्वंसापिंड्यनिवृत्तिः दशमादित्युपलक्षणं तेनपितृपितामहजीवनेनवपुरुषपर्यंतंपितृजीवनेचाष्टपुरुषपर्यंतंसापिंड्यमितिज्ञेयम् अपुत्रधनग्रहणेसन्निहिताभावेसप्तपुरुषपर्यंतमधिकारः धनग्राहिणमारभ्यतृतीयःपौत्रः तदूर्ध्वंश्राद्धविच्छेदः अन्यथाधनहारित्वे

पुत्रश्राद्धाद्यकरणेब्रह्महेत्यर्थः आतृतीयादित्यनूढकन्याविषयं अप्रत्तानांतुस्त्रीणांत्रिपुरुषीविज्ञायतइतिवसिष्ठोक्तेः एतच्चाशौचविषयंसापिंड्यंनतुविवाहादौ तत्रपूर्वोक्तवचनैः पंचमत्सप्तमत्वनियमादितिमेधातिथिप्रमुखादाक्षिणात्याः वाग्दानोत्तरमेतदितिशुद्धिविवेकः मातृकुलविषयकानीनकन्यकाविषयंचैतत् अन्यथाअप्रत्तानांतथास्त्रीणांसापिंड्यंसाप्तपौरुषं प्रत्तानांभर्तृसापिंड्यंप्राहदेवः प्रजापतिरितिकौर्मेणविरोधःस्यादितिरत्नाकरस्मृतितत्वादितिगौडग्रंथाः युक्तंचैतत् अन्यथाकन्योत्पत्तौपुरुषत्रयपर्यंतमेवसूतकंस्यान्नोर्ध्वं सापत्नमातामहकुलेत्वाहमिताक्षरायांशंखः यद्येकजाताबहवः पृथक्क्षेत्राः पृथक्जनाः एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्ततेत्रिषु पृथक्क्षेत्राः भिन्नजातीयः स्त्रीषुजाताः पृथक्जनाः सजातीयभिन्नमातृषुजाताः अत्रत्रिपुरुषंसापिंड्यमिति विज्ञानेश्वरोव्याचख्यौ पृथ्वीचंद्रोदयेसापिंड्यदीपिकायांचैवम् मदनपारिजातेतु पृथक्क्षेत्रजाः भिन्नमातृजाः पृथक्जनाः भिन्नजातीयाः एतद्विजातीयसापत्नमातृकुलविषयम् सवर्णसापत्नमातृकुलेचतुःपुरुषंसापिंड्यं पंचमींसप्तमींचैवमातृतःपितृतस्तथेतिवसिष्ठोक्तेः सप्तमीमितिब्राह्मणादीनांक्षत्रियादिदारोत्पन्नपितृकुलविषयंचेत्युक्तं तत्स्वकपोलकल्पितत्वात् ग्रंथांतरविरोधाच्च निर्मूलम् पितृपत्न्यःसर्वामातरइत्युक्त्वासुमंतुनातदपत्यानिभागिनेयानीतिपृथङ्निषेधाच्च अन्यथासपिंडत्वेननिषेधात् सपत्नमातुलत्वादिनिर्देशोव्यर्थः अतएवतेनस्मृतिकौमुद्यांसवर्णसापत्नमातामहकुलपरत्वेनतथैवशंखवचनंव्याख्यातम् तेनवासिष्ठंपंचमीं सप्तमीमतीत्येतिव्याख्येयम् तस्मात्प्राच्यैवव्याख्यायुक्ताप्रयोगरत्नेभट्टैः स्मृतितत्वादिगौडग्रंथेषुचसपत्नमातामहकुलेयावदुक्तं वार्तनिकमेवसापिंड्यमुक्तम् यथाहसुमंतुः मातृपितृसंबद्धाआसप्तमादविवाह्याभवंति आपंचमादन्येषांपितृपत्न्यःसर्वामातर

स्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरकारिणः स्युस्तथाध्यापयितुरेतदेवेति आपंचमादिति मातृकुले त्रिगोत्रांतरितविषयं वेति प्राच्याः मात्स्ये समानप्रवरां चैव शिष्यसंततिरेव च ब्रह्मदातुर्गुरोश्चैव संततिः प्रतिषिध्यते तद्भगिन्यो मातृष्वसार इति तु आकरे न पठितम् क्वचिद्वचनाद्विवाहः यथा गृह्यपरिशिष्टे अविरुद्धसंबंधामुपयच्छेत तुल्यां विरुद्धसंबंधः स्वयमेवोक्तः यथा भार्यास्वसृदुहिता पितृव्यपत्नीस्वसा चेति बौधायनः मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत् पितृव्यपत्न्या भगिनीं तत्सुतां च विवर्जयेत् अतो मातृष्वसुः सापत्नपुत्रकन्याप्यविवाह्या सापत्नमातृकुलजामिति मदनपारिजातोक्तेरिति केचित् केचित्तु ज्येष्ठो भ्राता पितुः सम इति मनूक्तेस्तत्पत्न्याः मातृत्वात्तत्पितुर्मातामहत्वात् ज्येष्ठभ्रातृपत्नीभगिनी न विवाह्या तथा उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पितेति मनूक्तेर्गुरुणापि त्रिपुरुषं सापिंड्यं सर्वथापि निर्वाप्यः अतस्तेषां कन्या नोद्वाह्याः गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद्द्विजः गुरोश्च कन्यां शिष्यो वा तत्संतत्यापि नेष्यते पुरुषत्रयपर्यंतं भ्रात्रादेर्नैतदिष्यते वाक्संबंधकृतानां तु स्नेहसंबंधभागिनां विवाहोत्र न कर्तव्यो लोकगर्हा प्रसज्यत इति वचनाच्चेत्याहुः तत्र मूलं चिंत्यम् दत्तकविषये तूच्यते तत्र गौतमः ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमादिति बंधुग्रहणान्न दत्तकमात्रपरमिदम् किंतु संतानेपि एतत् क्षेत्रजादिसर्वद्व्यामुष्यायणपरमिति हरदत्तः अत्र स्मृतिचंद्रिका नियोगात् य उत्पादयति तस्माद्बीजिनोप्यूर्ध्वं सप्तमादित्यर्थ इति दत्तकस्य जनकविषयमेतदिति सापिंड्यमीमांसायाम् तेन दत्तकस्य जनककुले साप्तपौरुषं जननीकुले पंचपौरुषं सापिंड्यं दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिंडता सप्तमी पंचमी चैव गोत्रित्वं पालकस्य चेति बृहन्मनूक्तेः बीजिनश्चेति गौतमोक्तेश्च पालकपितृकुले तु पंचपुरुषं पालकमातृकुले त्रिपुरुषं तथा चापरार्के

पैठीनसिः त्रीन्मातृतःपंचपितृतःपुरुषानतीत्योद्वहेदिति एतत्स एव व्याचख्यौ दत्तकादीन्पुत्रान्पितृपक्षतोनिवृत्तपिंडगोत्रार्षेयान्प्रत्येतदुच्यतेपंचपितृतइतिनान्यान्प्रतीति यत्तु वृद्धगौतमः स्वगोत्रेषुकृतायेस्युर्दत्तक्रीतादयःसुताः विधिनागोत्रमायांतिनसापिंड्यंविधीयते यच्चवसिष्ठः अन्यशाखोद्भवोदत्तःपुत्रश्चैवोपनायितः स्वगोत्रेणस्वशाखोक्तविधिनास्यात्स्वशाखभागिति यच्चनारदः धर्मार्थंवर्धिताःपुत्रास्तन्नाम्नागोत्रेणपुत्रवत् अंशपिंडविभागित्वंतेषुकेवलमीरितमिति तत्पालककुलेसाप्तपौरुषंसापिंड्यंनेत्येवंपरं नतुसर्वथासापिंड्यनिषेधपरमितिसापिंड्यमीमांसायाम् मदनपारिजातादपिदत्तकानुप्रवेशेऽल्पसापिंड्यंप्रतिभाति तथाहि ते नत्रीनतीत्यस्तुदात्रत्वस्ययस्यमातादत्तपुत्रीप्रतिगृहीत्रापुत्रीकृतातस्याःप्रतिगृहीतृकुलेत्रीनतीत्येति पंचपितृतइतियस्यदत्तपुत्रःपिता तस्यदत्तस्ययज्जनककुलंतद्विषयमित्युक्तम् वस्तुतस्तुपूर्ववच्चसाप्तमहानिबंधेषुक्वाप्यनुपलंभादपरार्कादिलिखनाभावात् पूर्वोक्तव्यवस्थायाश्चप्रातिभिज्ञानतुल्यत्वाद्धेरेतल्लिखितंतेषामेवशोभते ममतुपालककुलेएकापिंडदानक्रियान्वयित्वरूपंसाप्तपौरुषमेवसापिंड्यं बीजिनश्चेतिगौतमोक्तेर्जनककुलेऽपितावदेवत्रीन्मातृतइत्यादितुसवर्णासापत्नमातृकुलपरं यद्येकजाताबहवइतिशाखैकक्यत्वादितियुक्तंप्रतिभाति अतएवास्यद्व्यामुष्यायणत्वंहेमाद्रिप्रवरमंजरीवृत्तिकृन्नारायणादिभिरुक्तम् भट्टसोमेश्वरेणापिपृथायाःकुंतिभोजस्यपालककन्यात्वेपि ऊर्ध्वंसप्तमात्पितृबंधुभ्योबीजिनश्चेतिगौतमोक्तेर्दत्रिमायाः पृथायाः जनकस्यशूरसेनस्यकुलेपिसाप्तपौरुषंपालककुलेपितावदेवसापिंड्यमुक्तमपिवाकारणाग्रहणेइत्यत्र सापिंड्यदीपिकायांतु दत्तक्रीतादीनांजनकगोत्रेणोपनयनेकृतेजनककुलेसाप्तपौरुषंसापिंड्यम् पालकमातापितृकुलेत्रिपुरुषं पिंडनिर्वापान्निर्वाप्यलक्षणंत्रिपुरुषंसापिंड्यम्

पालकगोत्रेणोपनयने तत्कुले साप्तपौरुषमित्युक्तम् तन्न चूडोपायनसंस्कारा निजगोत्रेणवे कृताः दत्ताद्यास्तनयास्ते स्युरन्यथा दासउच्यत इति कालिकापुराणादुपनयनोत्तरं दत्तकनिषेधात् त्रिपुरुषमित्यत्रापि मूलं मृग्यमित्यलं बहुना मातापितृद्वारकसापिण्ड्यवतीनां कन्यानामियं संख्या रामवाजपेयिनोक्ता उद्वोढुः पितरौ पितुश्च पितरौ तज्जन्मकृद्दंपतिद्वंद्वं तस्य चतुष्कमष्ट च ततोप्यस्य क्रमात् षोडश वंशारंभकृद्दंपतीप्रमितिरित्थं सप्तकक्षं रदाः एकैकान्वयकन्यकाः पितृकुलेत्वासप्तकक्षं ध्रुवं यद्यप्येकस्य बहवः सुताः स्युस्तदपीह तु संबंधसाम्यादेकैकगणितेत्यवधार्यताम् एकस्मान्मिथुनात्सुतोथ दुहिता द्वंद्वद्वयं तद्द्वयात्तस्माद्द्वंद्वचतुष्कमष्ट च ततोतः षोडशाऽब्धीरदाः यावत्सप्तमकक्षमग्निकृतवः कन्या इहैकान्वये तावत्तेर्गुणिता रसैकसदृशो वंशोसपिंडाः पितुः मातुर्जन्मदंपती च मिथुनद्वंद्वं तयोः सागरास्तस्याः पंचमकक्षमष्टमितिरित्थं कान्वयः पुंस्कृते द्वंद्वाद्वंद्वयुगंमतोब्धय इतोऽष्टौ पंचकक्षं शरक्षोण्यः सप्तगुणाः शराश्च विधवो मातुः सपिंडाः कुले कुलद्वयस्य कन्यका युता मिथः सापिंडकाः हिमांशुकृद्दृग्धराहशो विवाहकर्मवर्जिता इति एतच्च सर्ववर्णसाधारणं सर्वत्र सापिंड्यसद्भावादिति विज्ञानेश्वरोक्तेः पंचमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात् सपिंडता निवर्तेत सर्ववर्णेष्वयं विधिरिति हरनाथधृतदेवलवचनाच्च संबंधतत्वे सुमंतुः पितृष्वसृसुतां मातृष्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयीं विवाह्य चांद्रायणं चरेत्सारित्यज्येनां मातृवद्बिभृयादिति दिक् ऋषेरिदमार्षं प्रवरः गोत्रं प्रसिद्धं समाने आर्षे गोत्रे यस्य तस्माज्जाता या न भवति ताम् अथ संक्षेपेण गोत्रप्रवरनिर्णयः तौ च भिन्नौ निषेधनिमित्तम् सगोत्राय दुहितरं न प्रयच्छेदित्यापस्तंबोक्तेः असमानप्रवरैर्विवाह इति गौतमोक्तेश्च तत्र गोत्रलक्षणमाह प्रवरमंजर्यां बौधायनः विश्वामित्रो जमदग्निर्भरद्वाजो

यगौतमः अत्रिर्वसिष्ठः कश्यपइत्येतेसप्तऋषयः सप्तानामृषीणामगस्त्याष्टमानांयदपत्यंतद्गोत्रमिति यद्यपिकेवलभार्गववार्ष्टिषेणादिषुकेवलांगिरसेषुचहरितादिषुचहरितादिषुनैतत् भृग्वंगिरसोरुक्तेष्वंतर्गतेः तथाप्यत्रेष्टापत्तिरेवेतिकेचित् अतएवस्मृत्यर्थसारे प्रवरैक्यादेवात्राविवाहउक्तः यद्यपिवसिष्ठादीनांनगोत्रत्वंयुक्तं तेषांसप्तर्षित्वेनतदपत्यत्वाभावात् तथापितत्पूर्वंभाविवसिष्ठाद्यपत्यत्वेनगोत्रत्वंयुक्तम् अतएवपूर्वेषांपरेषांचैतद्गोत्रम् अत्रविशेषोऽस्मत्कृतप्रवरदर्पणेज्ञेयः प्रवरास्तुप्रवरणानिप्रवराः कल्पकाराहि वासिष्ठेति होतावसिष्ठवदित्यध्वर्युरित्यादिनायेषांप्रवरणमामनंतितेप्रवराः तच्चवरणंयद्यपिगोत्रभूतस्यापिक्वचिद्दृश्यते तथापिपूर्ववदृषिभेदोद्रष्टव्यः अन्यथातेषांत्र्यार्षेयएकार्षेइत्यादिनिर्देशानुपपत्तेः अन्येतुतद्गोत्राणांत्र्यार्षेयइतिभेदमाहुरितिदिक् तत्त्वंतुगोत्रभूतस्यपितृपितामहप्रपितामहाएवप्रवराः पितेवाग्रेथपुत्रोथपौत्रइतिशतपथश्रुतेः परंपरंप्रथममित्याश्वलायनोक्तेश्च अत्रविशेषमाहबोधायनः एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वमन्यत्रभृग्वंगिरसांगणादिति स्मृत्यर्थसारे म्रियमाणतयावापिसत्तयावानुवर्तनम् एकस्यदृश्यतेयत्रतद्गोत्रंतस्यकथ्यते भृग्वंगिरोगणेषुतुमाधवीयेस्मृत्यंतरे पंचार्षेत्रिषुसामान्यादविवाहस्त्रिषुद्वयोः भृग्वंगिरोगणेष्वेवशेषेष्वेकोपिवारयेत् शेषगोत्रेषुएकोपिसमानःप्रवरोविवाहंवारयेदित्यर्थः बौधायनोपि भृग्वंगिरसावधिकृत्यत्र्यार्षेयसन्निपाते विवाहस्त्र्यार्षेयाणांत्र्यार्षेयसन्निपातेविवाहः पंचार्षेयाणामिति भृग्वंगिरोगणेष्वपिजमदग्निगौतमभरद्वाजेष्वेकप्रवरसाम्येसर्वेषामप्यसाम्येवासगोत्रत्वादेवाविवाहइतिदिक् अथगोत्राणिप्रवराश्चोच्यंते तत्रबोधायनः गोत्राणांतुसहस्राणिप्रयुतान्यर्बुदानिच ऊनपंचाशदेवैषांप्रवराऋषिदर्शनात् तत्रसप्तभृगवः वत्साविदाआर्ष्टिषेणायस्कामित्रयुवावैन्याःशुनकाइति वत्सानांभार्गवच्या

वनाप्नवानौर्वजामदग्न्येति भार्गवौर्वजामदग्न्येतिवा भार्गवच्यावनाप्नवानेतिवा बिदानांपंच भार्गवच्यावनाप्नवानौर्वबैदेति भार्गवौर्वजामदग्न्येतिवा एतौद्वौजामदग्न्यसंज्ञौ आर्ष्टिषेणानां भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति भार्गवार्ष्टिषेणानूपेतिवा एषांत्रयाणांपरस्परमविवाहः वात्स्यानाम् भार्गवच्यावनाप्नवानेति वत्सपुरोधसयोः पंच भार्गवच्यावनाप्नवानवात्स्यपौरोधसेति वैजवनिमथितयोः पञ्च भार्गवच्यावनाप्नवानबैजवनेमथितेति एतेत्रयः क्वचित् एषामपिपूर्वैरविवाहः अत्रतत्तद्गणस्थाऋषयोऽन्यश्चविशेषोमत्कृतप्रवरदर्पणेज्ञेयः यस्कानाम् भार्गववैतहव्यसावेतसेति मित्रयुवानाम् भार्गववाध्र्यश्वदिवोदासेति भार्गवच्यावनदिवोदासेतिवा वाध्र्यश्वेत्येकोवा वैन्यानांभार्गववैन्यपार्थेति एतएवश्येताः शुनकानांशुनकेतिवा गार्त्समदेतिवा भार्गवगार्त्समदेतिद्वौवा भार्गवशौनहोत्रगार्त्समदेतित्रयोवा वेदविश्वज्योतिषांभार्गववेदवैश्वज्योतिषेति शाठरमाठराणांभार्गवशाठरमाठरेति एतौद्वौक्वचित् यस्कादीनांस्वगणंत्यक्त्वासर्वैर्विवाहः तदुक्तंस्मृत्यर्थसारे यस्कामित्रयुवावैन्याः शुनकाःप्रवरैक्यतः स्वंस्वंहित्वागणंसर्वैर्विवहेयुः परावरैरिति

अथांगिरसः तेगौतमाः भरद्वाजाः केवलांगिरसश्चेतित्रिधा अत्रगौतमादश आयास्याः शारद्वताः कौमंडादीर्घतमसः औशनसः कारेणुपालयः राहूगणाः सोमराजकाः वामदेवाः बृहदुक्थाश्चेति तत्रायास्यानां आंगिरसायास्यगौतमेति शारद्वतानांआंगिरसगौतमशारद्वतेति कौमंडानांआंगिरसौतथ्यकाक्षीवतगौतमकौमंडेतिवा आंगिरसायास्यौशिजगौतमकाक्षीवतेतिवा आंगिरसौतथ्यगौतमौशिजकाक्षीवतेतिवा आंगिरसौशिजकाक्षीवतेतित्रयोवा दीर्घतमसां आंगिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति आंगिरसौतथ्यदैर्घतमसेतित्रयोवा औशनसां आंगिरसगौतमौशनसेतित्रयः कारेणुपालानां आंगिरसगौतमकारेणुपालेतित्रयः रा

हूगणानां आंगिरसराहूगणगोतमेति सोमराजकानां आंगिरससोमराजकगोतमेति वामदेवानां आंगिरसवामदेव्यगोतमेति बृहदुक्थानां आंगिरसबार्हदुक्थगोतमेति आंगिरसवामदेवबार्हदुक्थेतिवा उतथ्यानामांगिरसौतथ्यगोतमेति औशिजानामांगिरसौशिजकाक्षीवतेत्यापस्तम्बः आंगिरसायास्यौशिजगोतमकाक्षीवतेति कात्यायनः एतौद्वौक्वचित् रघुवानां आंगिरसराघुवगोतमेति केचित् तत्रमूलंचिंत्यम् एषांसर्वेषांगोतमानामविवाहः अथभरद्वाजाः तेचत्वारः भरद्वाजागर्गाऋक्षाः कपयइति भरद्वाजानामांगिरसबार्हस्पत्यभारद्वाजेतित्र्यः गर्गाणामांगिरसबार्हस्पत्यभारद्वाजसैन्यगार्ग्येतिपंच आंगिरससैन्यगार्ग्येतिपंच आंगिरससैन्यगार्ग्येतिवा अंत्ययोर्व्यत्ययोवा भारद्वाजगार्ग्यसैन्येतिवा गर्गभेदानां आंगिरसतैत्तिरकापिभुवेति ऋक्षाणांकपिलानांचांगिरसबार्हस्पत्यभरद्वाजवांदनमातवचसेतिपंच आंगिरसवांदनमातवचसेतित्र्योवा कपिलानामांगिरसामहीयवौरुक्षयसेति आत्मभुवाम् आंगिरसभारद्वाजबार्हस्पत्यमंत्रवरात्मभुवेतिपंच अथक्वचित् भरद्वाजानांसर्वेषामविवाहः अथकेवलांगिरसः हारितानां आंगिरसांबरीषयौवनाश्वेति आद्योमांधातावा कुत्सानाम् आंगिरसमांधात्रकौत्सेति कण्वानामांगिरसाजमीढकाण्वेति आंगिरसघोरकाण्वेतिवा रथीतराणामांगिरसवैरूपराथीतरेति आंगिरसवैरूपपार्षदश्वेतिवा अष्टादंष्ट्रपार्षदश्ववैरूपेतिवा अंत्ययोर्व्यत्ययोवा मुद्गलानामांगिरसभार्म्यश्वमौद्गल्येति आद्यस्तार्क्ष्योवा आंगिरसतार्क्ष्यमौद्गल्येतिवा विष्णुवृद्धानामांगिरसपौरुकुत्सत्रासदस्यवेति एषांस्वगणंविहायसर्वैर्विवाहोभवति हरितकुत्सयोस्तुनभवति अथात्रयः तेचत्वारः आत्रेयाः वाद्भुतकाः गविष्ठिराः मुद्गलाइति आद्यानामात्रेयार्चनानसश्यावाश्वेति वाद्भुतकानां आत्रेयार्चनानशवाद्भुकेति धनंजयाना-

आत्रेयार्चनानशधानंजयेतिकेचित् गविष्ठिराणामात्रेयार्चनानशगविष्ठिरेति आत्रेयगाविष्ठिरपौर्वातिथेतिवा मुद्गलानामात्रेयार्चनानशपौर्वातिथेति वामरथ्यसुमंगलबैजवापानामात्रेयार्चनानशातिथेति आत्रेयार्चनानशगविष्ठिरेतिवा सुमंगलानांआत्रिसुमंगलश्यावाश्वेतिकेचित् अत्रेःपुत्रिकापुत्राणाम् आत्रेयवामरथ्यपौत्रिकेति अत्रीणांसर्वेषामविवाहः अथविश्वामित्राः तेदश कुशिकाः लौहिताः रौक्षकाः कामायनाः कताः धनंजयाः अघमर्षणाः पूरणाः इंद्रकौशिकाइति कुशिकानांविश्वामित्रदेवरातौदलेति लौहितानांविश्वामित्राष्टकलौहितेति अंत्ययोर्व्यत्ययोवा वैश्वामित्रमाधुच्छंदसाष्टकेतिवा विश्वामित्राष्टकेतिद्वौवा रौक्षकाणांवैश्वामित्रगाथिनरैवणेति वैश्वामित्ररौक्षकरैवणेतिवा कामकायनानांवैश्वामित्रदेवश्रवसदैवतरसेतिवा अजानांवैश्वामित्रमाधुच्छंदसाजेति वैश्वामित्राश्मरथ्यवाधूलेतिवा अघमर्षणानांवैश्वामित्राघमर्षणकौशिकेति पूरणानांवैश्वामित्रपौरणेतिद्वौवा वैश्वामित्रदेवरातपूरणेतिवा इंद्रकौशिकानांवैश्वामित्रेंद्रकौशिकेतिद्वौ धनंजयानांविश्वामित्रमाधुच्छंदसधानंजयेति वैश्वामित्रमाधुच्छंदसाघमर्षणेतिवा कतानांवैश्वामित्रकात्यात्कीलेति एतेबौधायनोक्ताः रौहिणानांवैश्वामित्रमाधुच्छंदसरौहिणेति रेणूनांवैश्वामित्रगाथिनरैणवेति वेणूनांवैश्वामित्रगाथिनवैणवेति जन्हूनांवैश्वामित्रशालंकायनकौशिकेति आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधुलेति उदवेणूनांवैश्वामित्रगाथिनवैणवेति एतेआश्वयनामात्स्योक्ताः अन्यैस्त्वन्येपिषट्गुणाउक्ताः तेऽन्यत्रमत्कृतौज्ञेयाः एषांविश्वामित्राणामविवाहः अथकश्यपाः तेपंच निध्रुवाः कश्यपाः शांडिलाः रैभाः लौगाक्षयश्च निध्रुवाणांकाश्यपावत्सारनैध्रुवेति कश्यपानांकाश्यपावत्सारासितेति रैभाणांकाश्यपावत्साररैभ्येति शांडिलानांकाश्यपशांडिल्येति अंत्यस्थानेदेवलोवासितोवा शांडिलासितदेवलेतिवा कश्यपासितदेवले

तिवा अंत्ययोर्व्यत्ययोवा देवलासितेतिद्व्योवा लौगाक्षीन्वक्ष्यामः एषांकश्यपानामविवाहः अथवसिष्ठाः तेपंच वसिष्ठाः कुंडिनाः उपमन्यवः पराशरः जातूकर्ण्याश्चेति वसिष्ठानां वासिष्ठेंद्रप्रमदाभरद्वस्विति वासिष्ठेत्येकोवा कुंडिनानां वासिष्ठमैत्रावरुणकौंडिन्येति उपमन्यूनां वासिष्ठेंद्रप्रमदाभरद्वसव्येति वासिष्ठाभरद्वस्विंद्रप्रमदेतिवा आद्ययोर्व्यत्ययोवा पराशराणांवासिष्ठशाक्त्यपाराशर्येति जातूकर्ण्यानां वासिष्ठात्रिजातूकर्ण्येति वासिष्ठानांसर्वेषामविवाहः अंत्यस्यात्रिभिश्च अथागस्त्याः तेचत्वारः इध्मवाहाः सांभवाहाः सोमवाहाः यज्ञवाहाश्चेति आद्यानां आगस्त्यदार्ढ्यच्युतेध्मवाहेति आगस्त्येत्येकोवा सोमवाहानां आगस्त्यदार्ढ्यच्युतसोमवाहेति सांभवाहानांसांभवाहोंऽत्यः यज्ञवाहानांयज्ञवाहोंऽत्यः आद्योपूर्वोक्तावेव सारवाहानांतद्वतास्त्रयः दर्भवाहानांतद्वतास्त्रयः अगस्तीनामागस्त्यमाहेंद्रमायोभुवेति पूर्णमासानां आगस्त्यपौर्णमासपारणेति हिमोदकानां आगस्त्यहैमवर्चिहैमोदकेति पाणिकानामागस्त्यपैनायकपाणिकेति एतेषट्कचित् अगस्तीनांसर्वेषामविवाहः अथद्विगोत्राः शौंगशैशिरीणां आंगिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेतिपंच कात्याक्षीलयोःस्थानेशौंगशैशिरीवा आंगिरसकात्याक्षीलेतित्र्योवा एषांभरद्वाजेविश्वामित्रेश्चाविवाहः एवंकपिलानांकतानांच संस्कृतिपूतिमाषादीनां आंगिरसगौरिवीतसांकृत्येति शाक्त्यगौरिवीतसांकृत्येतिवा एषांस्वगणस्थैर्वसिष्ठैः शौंगशैशिरेर्लौगाक्षिभिश्चाविवाहः कश्यपैरपीतिप्रयोगपारिजाते लौगाक्षीणांकाश्यपवत्सारवासिष्ठेति काश्यपावत्सारासितेतिवा एतेहर्वसिष्ठानक्तंकश्यपाः एषांवसिष्ठैःकश्यपैः संस्कृताद्यैश्चाविवाहः देवरातस्यजामदग्न्यैर्विश्वामित्रैश्चाविवाहइतिप्रयोगपारिजाते यदुक्तंबह्वृचसुतौ पयेवांगिरसःसन्तुपेयातवपुनता आंगिरसोजन्मनास्याजीगर्तिःसुतः कविरित्यांगिरोगणस्थत्वेनभार्गवजामदग्न्य

त्वस्मृतेर्बाधात् तेनमत्स्यस्त्रुत्याहरिवंशादिस्मृतेश्चबाधात् तेनद्वौदेवराते एकआंगिरसःश्रुत्युक्तः अन्योभार्गवः तयोःकल्पभेदेप्यांगिरसेनदेवरातेनजमदग्न्यैर्भवत्येवविवाहः भार्गवेणतुनेतितत्त्वम् धनंजयानांविश्वामित्रैरत्रिभिश्चाविवाहः जातूकर्ण्यानांवसिष्ठैरत्रिभिश्चाविवाहः एवंदत्तक्रीतकृत्रिमस्वयंदत्तपुत्रिकापुत्रादीनांउत्पादकपालकयोः पित्रोर्गोत्रप्रवरावर्ज्याइतिप्रवरमंजरीनारायणवृत्तिप्रयोगपारिजातादयः अत्रसर्वत्रोपपत्तयः मूलंचमत्कृतप्रवरदर्पणेज्ञेयमितिदिक् क्षत्रियवैश्ययोस्तुपुरोहितगोत्रप्रवरावेवेतिसर्वसिद्धांतः यद्यपिबह्वृचपरिशिष्टे कपिभरद्वाजयोर्विवाहउक्तस्तथापि भरद्वाजाश्चकपयोगर्गारौक्षायणाइति चत्वारोपिभरद्वाजगोत्रेक्यान्नान्वयेयुर्मिथः कपिगर्गभरद्वाजामिथोरौक्षायणाद्विजाः नोद्वहेयुःसगोत्रत्वात्प्रवरैक्याच्चकुत्रचिदिति स्मृत्यर्थसाराद्युक्तेरविवाहएवतयोरितिप्रवरमंजर्यांयद्यपीदमुक्तम् तथापिभृग्वंगिरोगणेषुतुभवत्येव तथाबह्वृचपरिशिष्टेबौधायनः एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वमृतेभृग्वंगिरोगणात् माधवीयेस्मृत्यंतरे पंचानांत्रिषुसामान्यादविवाहस्त्रिषुद्वयोः भृग्वंगिरोगणेष्वेवंशेषेषु कोपिवारयेदिति देशाचाराच्च सोप्याभीरदेशेप्रसिद्धः चतुर्विंशतिमते यस्तुदेशानुरूपेणकुलमार्गेणचोद्वहेत् नित्यंसव्यवहार्यःस्याद्वेदाच्चैतत्प्रदृश्यतइतिदिक् तथाचभृगुः यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा योयत्रविहितोधर्मस्तंधर्मंनविचालयेदिति पुनश्चतुर्विंशतिमते यस्मिन्देशेयआचारः पारंपर्यक्रमागतः वर्णानांकिलसर्वेषांससदाचारउच्यते स्वगोत्राद्यज्ञानेतुसत्याषाढः अथानाज्ञातबंधोःपुरोहितप्रवरेणाचार्यप्रवरेणवेति आचार्यगोत्रप्रवरानभिज्ञस्तुद्विजःस्वयम् दत्वात्मानंतुकस्मैचित्तज्ज्ञात्रप्रवरोभवेत् यद्वास्वगोत्रप्रवरविधुरोजामदग्निजः विवाहंचनतेनैवगोत्रेणतुसमाचरेदितिकश्चित् दिवोदासीयेपि स्वगोत्रप्रवराज्ञानेजमदग्निमुपाश्रयेत् अथमातृगोत्रनिर्णयः शातातपः मातुल

स्यसुतामूढ्वामातृगोत्रांतथैवच समानप्रवरांचैवगत्वाचांद्रायणंचरेत् यद्यपिसगोत्रांमातुरप्येकेनेच्छंत्युद्वाहकर्मणि जन्मनाम्नोरविज्ञातेप्यु
द्वहेदविशंकितइतिव्यासोक्तेरज्ञातनामत्वेनसगोत्रत्वदोषस्तथापिनेदंकलौप्रवर्तते गोत्रान्मातुः सपिंडाच्चविवाहोगोवधस्तथेतिकलि-
वर्जत्वोक्तेः इदंमातृगोत्रवर्जनंमाध्यंदिनीयानामेव मातृगोत्रंमाध्यंदिनीयानामपुत्रासाश्चेति सत्याषाढोक्तेरितिकश्चिन्महाराष्ट्रकल्पि
तम् तन्निर्मूलम् अन्यथागुर्जरादेःकातीयस्यकुतोननिषेधः अतएवप्रवरमंजरीकारः दोषस्यातिगुरुत्वात्सर्वेषांमातृगोत्रंवर्ज्यमिति
यत्तु गुर्जरादीनामाध्यंदिनीयानामप्याचरणाच्च एकस्मिन्प्रवरेतुल्येमातृगोत्रेवरस्यच तमुद्वाहंनकुर्वीतसाकन्याभगिनीस्मृतेति
मातृकुलेप्रवरचिंतनमुक्तम् तदासकृदादिविवाहोद्वापरमितिदिक् विस्तरस्तुग्रंथांतरेभ्योज्ञेयः सगोत्रादिविवाहेप्रायश्चित्तंस्मृत्यर्थसारे
इत्थंसगोत्रसंबंधविवाहविषयेस्थिते यदिकश्चिदज्ञानतस्तांकन्यामूढ्वोपगच्छति गुरुतल्पव्रताच्छुध्येद्गर्भस्तज्जोंऽस्यतांव्रजेत् भोगतस्तांप
रित्यज्यपालयेज्जननीमिव अज्ञानादैंदवैःशकृच्छ्रैस्त्रिभिर्गर्भस्तुकश्यपः एवंसापिंड्येपि सपिंडापत्यदारेषुप्राणत्यागोविधीयतइतिबृ
हद्यमोक्तेः तिथितत्त्वेबौधायनः सपिंडांसगोत्रांचेदमत्योपयच्छेन्मातृवदेनांबिभृयात् कन्याविवाहकालउक्तोज्योतिर्निबंधे षडब्दमध्ये
नोद्वाह्याकन्यावर्षद्वयंयतः सोमोभुंक्तेततस्तद्वद्गंधर्वश्चतथाऽनलः राजमार्तंडः अयुग्मेदुर्भगानारीयुग्मेतुविधवाभवेत् तस्माद्गर्भान्वि-
तेयुग्मेविवाहेसापतिव्रता मासत्रयादूर्ध्वमयुग्मवर्षेयुग्मेपिमासत्रयमेवयावत् विवाहशक्तिंप्रवदंतिसंतोवात्स्याद्यः स्त्रीजनिजन्ममा
सात् पराशरमाधवीयेतु जन्मतोगर्भाधानाद्वापंचमाब्दात्परंशुभं कुमारीवरणंदानंमेखलाबंधनंतथेत्युक्तम् संबंधतत्त्वेयमः कन्या
ऽदशवर्षाणियाप्रदत्तावसेद्गृहे ब्रह्महत्यापितुस्तस्याःसाकन्यावरयेत्स्वयं भारते त्रिंशद्वर्षःषोडशाब्दांभार्यांविंदेतनग्निकां दशवर्षोऽ

ष्टवर्षांवाधर्मेसीदतिसत्वरः अतोप्रवृत्तेरजसिकन्यांदद्यात्पितासकृत् तत्रैव सप्तसंवत्सरादूर्ध्वंविवाहःसार्ववर्णिकः कन्यायाःशस्यतेराजन्नन्यथाधर्मगर्हितः राजमार्तंडः राहुग्रस्तेतथायुद्धेपितृणांप्राणसंशये अतिप्रौढाचयाकन्याचंद्रलग्नबलेनतु चकारादतिबाला प्राणसंशयइत्युक्तेः मनुः त्रिंशद्वर्षोवहेत्कन्यांहृद्यांद्वादशवार्षिकीं त्र्यष्टवर्षोष्टवर्षांवाधर्मेसीदतिसत्वरः यद्यपिविवाहस्त्वष्टवर्षायाःकन्यायाःशस्यतेबुधैरिति संवर्तोक्तेरतऊर्ध्वंरजस्वलेत्यादेश्चदशवर्षादूर्ध्वंविवाहोनिषिद्धः तथापिदातुरभावेद्वादशषोडशाब्देज्ञेयेत्रीणिवर्षाण्यृतुमतीकांक्षेतपितृशासनमिति पराशरमाधवीयेबौधायनोक्तेश्च मनुः स्त्रीसंबंधेदशैतानिकुलानिपरिवर्जयेत् हीनक्रियंनिःपुरुषंनिश्छंदोरोमशार्शसम् क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानिच नर्क्षवृक्षनदीनाम्नींनांत्यपर्वतनामिकां नपक्ष्यहिप्रेष्यनाम्नींनचभीषणनामिकाम् यमः तस्मादुद्वाहयेत्कन्यांयावन्नर्तुमतीभवेत् तथामूलजादीनांफलमप्युक्तम् तथा वर्णवश्यग्रहमैत्र्यादिघटितविचारोज्योतिर्विद्भ्योज्ञेयः विस्तरात्तुनोच्यते अथगुर्वर्कबलं ज्योतिर्निबंधेगर्गः स्त्रीणांगुरुबलंश्रेष्ठंपुरुषाणांरवेर्बलम् तयोश्चंद्रबलंश्रेष्ठमितिगर्गेणभाषितम् जन्मत्रिदशमारिस्थपूजयाशुभदोगुरुः विवाहेऽथचतुर्थाष्टद्वादशस्थोमृतिप्रदः देवलः नष्टात्मजाधनवतीविधवाकुशीलापुत्रान्विताहतधवासुभगाविपुत्रा स्वामिप्रियाविगतपुत्रधवाधनाढ्यावंध्याभवेत्सुरगुरौक्रमशोभिजन्म बृहस्पतिः झषचापकुलीरस्थोजीवोप्यशुभगोचरः अतिशोभनतांदद्याद्विवाहोपनयादिषु लल्लः द्वादशदशमचतुर्थेजन्मनिषष्ठाष्टमेतृतीयेच प्राप्तेपाणिग्रहणेजीवेवैधव्यमाप्नोति गर्गः सर्वत्रापिशुभंदद्याद्द्वादशाब्दात्परंगुरुः पंचषष्ठाब्दयोरेवशुभगोचरतामता सप्तमात्पंचवर्षेषुस्वोच्चस्वर्क्षगतोयदि अशुभोपिशुभंदद्याच्छुभर्क्षेषुकिंपुनः रजस्वलायाःकन्यायागुरुशुद्धिंनचिंतयेत् अष्टमेपिप्रकर्तव्योविवा

हस्त्रिगुणार्चनात् अर्कगुर्वोर्बलंगोर्यारोहिण्यर्कबलास्मृता कन्याचंद्रबलाप्रोक्ता वृषलीलग्नतोबला अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी दशवर्षाभवेत्कन्या अतऊर्ध्वंरजस्वला अथबृहस्पतिशांतिः शौनकः कन्यकोद्वाहकालेतु आनुकूल्यंनविद्यते ब्राह्मणस्योपनयनेगुरोर्विधिरुदाहृतः सुवर्णेनगुरुंकृत्वापीतवस्त्रेणवेष्टयेत् ईशान्यांधवलंकुंभंधान्योपरिनिधायच दमनंमधुपुष्पंचपलाशंचैवसर्षपान् मांसीगुडूच्यपामार्गीविडंगीशंखिनीवचा सहदेवीहरिक्रांतासर्वौषधिशतावरी बलाचसहदेवीचनिशाद्वितयमेवच कृत्वाज्यभागपर्यंतंस्वशाखोक्तविधानतः ग्रहोक्तमंडलेभ्यर्च्यपीतपुष्पाक्षतादिभिः देवपूजोत्तरेकालेततःकुंभानुमंत्रणम् अश्वत्थसमिधश्चाज्यपायससर्पिषायुतं यवव्रीहितिलाःसाज्यामंत्रेणैवबृहस्पतेः अष्टोत्तरशतंसर्वंहोमशेषंसमापयेत् पुत्रदारसमेतस्यअभिषेकंसमाचरेत् कुंभाभिमंत्रणोत्तैश्चसस्तुइज्यष्टमंत्रतः प्रतिमाकुंभवस्त्रंचआचार्यायनिवेदयेत् ब्राह्मणान्भोजयेत्पश्चाच्छुभदःस्यान्नसंशयः इतिबृहस्पतिशांतिः शौनकः गुर्वादित्येव्यतीपातेवक्रातीचारगेगुरौ नष्टेशशिनिशुक्रेवाबालेवृद्धेथवागुरौ पौषेचैत्रेऽथवर्षासुशरद्यधिकमासके केतूद्गमेनिरंशेर्केसिंहस्थेमरमंत्रिणि विवाहव्रतयात्रादिपुरहर्म्यगृहादिकं क्षौरंविद्योपविद्यांचयत्नतःपरिवर्जयेत् मदनपारिजातेज्योतिःसागरे बालेशुक्रेवृद्धेशुक्रेवृद्धेजीवेनष्टेजीवे बालेजीवेजीवेसिंहेसिंहादित्येजीवादित्ये तथामलिम्लुचेमासिक्रूराचार्येतिचारगे वापीकूपविवाहादिक्रियाःप्रागुदितास्त्यजेत् सिंहस्थंमकरस्थंचगुरुंयत्नेनवर्जयेत् लल्लः अतिचारगतोजीवस्तंराशिंनैवचेत्पुनः लुप्तःसंवत्सरोज्ञेयःसर्वकर्मबहिष्कृतः सिंहस्थगुरोरपवादमाहपराशरः गोदाभागीरथीमध्येनोद्वाहःसिंहगेगुरौ मघास्थेसर्वदेशेषु तथामीनगतेरवौ वसिष्ठोपि विवाहोदक्षिणेकूलेगौतम्यानेतरत्रतु भागीरथ्युत्तरेकूलेगौतम्यादक्षिणेतथा विवाहोव्रतबंधश्चसिंह

स्येज्येनदुष्यति कन्यादातृक्रममाह याज्ञवल्क्यः पितापितामहोभ्रातासकुल्योजननीतथा कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः अप्र-
यच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ गम्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरं भ्रातॄणांसंस्कृतानामेवाधिकारमाह सएवयाज्ञवल्क्यः
असंस्कृतास्तुसंस्कार्याभ्रातृभिःपूर्वसंस्कृतैः भगिन्यश्चनिजादंशाद्दत्वांशंतुतुरीयकम् अत्रचकारेणपूर्वसंस्कृतैरित्यस्यानुवृत्तेर्विवा
हपर्याप्तद्रव्यदानेस्वांशसमांशचतुर्थभागदानेवासंस्कृतग्रहणंव्यर्थंस्यात् अतःकर्तृनियमोयं तेनानुपनीतभ्रातृमात्रादिसत्वेमात्रा
देरेवाधिकारोनभ्रातुरित्युक्तंसंबंधतत्वादौ कन्यास्वयंवरेमातुर्दातृत्वेचताभ्यामेवनांदीश्राद्धंकार्यम् तत्रचस्वयंप्रधानसंकल्पमात्रंकृ
त्वान्यद्ब्राह्मणद्वाराकारयेदितिप्रयोगपारिजाते वरस्तुसंस्कृतभ्रात्राद्यभावेस्वयमेवनांदीश्राद्धंकुर्यात् नमातापुत्रेषुविद्यमानेषुनान्दीं
वैकारयेत्स्वधामितिनिषेधात् उपनयनेनकर्माधिकारस्यजातत्वाच्चेति पृथ्वीचंद्रोदयः माधवीयेपराशरेकेचनारदः पितादद्यात्स्वयंक
न्यांभ्रातावानुमतेपितुः मातामहोमातुलश्चसकुल्योबांधवस्तथा मातात्वभावेसर्वेषांप्रकृतौयदिवर्तते तस्यामप्रकृतिस्थायांकन्यां
दद्युःस्वजातयः सकुल्यःपितृपक्षीयोबांधवोमातृवंशजः मदनपारिजातेकात्यायनः स्वयमेवौरसींदद्यात्पित्रभावेस्वबांधवाः मा
तामहस्ततोन्यामाह मातावाधर्मजांसुताम् ततोन्यामौरसींभिन्नांधर्मजांनियोगात्क्षेत्रजांमातामहोमातामातुलोवादद्यात् तेनौरसीदाने
पितृबंधुषुसत्सुमातामहादीनांनाधिकारः अनुमतिंविना अस्यापवादस्तत्रैव दीर्घप्रवासयुक्तेषुपौगंडेषुचबंधुषु मातातुसमयेदद्यादौ
रसीमपिकन्यकां मनुः यदातुनैवकश्चित्स्यात्कन्याराजानमाव्रजेत् परकीयकन्यादानेविशेषोमदनरत्नेस्कांदे आत्मीकृत्यसुवर्णे-
नपरकीयांतुकन्यकाम् धर्मेणविधिनादानमसगोत्रेपियुज्यते अत्रप्रकृतिग्रहणादप्रकृतिस्थेनकृतमकृतमेव स्वतंत्रोयदितत्कार्यंकु

यदिप्रकृतिंगतः तदप्यकृतमेवस्यादस्वातंत्र्यस्यहेतुतइत्यपरार्केनारदोक्तेः यदित्तुसप्तपदीविवाहहोमादिप्रधानंजातंतदंगवैकल्येपिना
वृत्तिर्विवाहस्य गौडाअप्येवमाहुः तत्रैवमरीचिः गौरींददन्नाकपृष्ठेवैकुंठंरोहिणींददत् कन्यांददद्ब्रह्मलोकेरौरवंतुरजस्वलाम्
अथमासनिर्णयः तत्रजन्ममासेविशेषःप्रागुक्तः ज्योतिःप्रकाशेव्यासः माघफाल्गुनवैशाखेयदूढामार्गशीर्षके ज्येष्ठेवाषाढमासेच
सुभगावित्तसंयुता श्रावणेवापिपौषेवाकन्याभाद्रपदेतथा चैत्राश्वयुक्कार्तिकेषुयातिवैधव्यतांलघु नारदः माघफाल्गुनवैशाखज्येष्ठ
मासाःशुभप्रदाः कार्तिकोमार्गशीर्षश्चमध्यमौनिंदिताःपरे वसिष्ठः पौषेपिकुर्यान्मकरस्थितेर्केचैत्रेभवेन्मेषगतेयदास्यात् प्रश
स्तमाषाढकृतंविवाहंवदंतिगर्गामिथुनस्थितेर्के आचार्यचूडामणौज्योतिर्गर्गराजमार्तंडौ मांगल्येषुविवाहेषुकन्यासंवरणेषुच दशमासाः
प्रशस्यंतेचैत्रपौषविवर्जिताः आपस्तंबः सर्वऋतवोविवाहस्य शैशिरौमासौपरिहाप्योत्तमंचनैदाघम् अत्रमाघफाल्गुनाषाढवर्जंनव
मासामुख्यःकालइतिसुदर्शनभाष्येउज्ज्वलायांब्रह्मविद्यातीर्थैश्चोक्तम् बौधायनसूत्रेपि सर्वेमासाविवाहस्यशुचितपस्तपस्यवर्जमित्यु
क्ते तेनपूर्वोत्तराशिशिरसंबंधिनौमासौपौषचैत्रौविवाहइति निर्णयामृतव्याख्यानंमौख्यंकृतमित्युपेक्ष्यं निशिचेत्सर्वेषुद्वादशस्वपिमासे-
षूद्वहेदितिकालादर्शः यत्तुज्योतिषेमाघादिविधयस्तेगृह्यसूत्राणांद्विजपरत्वेनप्राबल्याच्छूद्रादिपराः ज्योतिषे वात्स्योवर्षमनूनमि-
च्छतितथारैभ्योयनंचोत्तरंश्रीवासेनमृतुंविहायमुनयोमांडव्यशिष्याजगुः चैत्रंमोज्झ्यपराशरःपरिणयेपौषंचदौर्भाग्यदंह्याषाढादिच
तुष्टयंनतिनंदंकैश्चित्प्रदिष्टंबुधैः चंडेश्वरः मार्गमासितथाज्येष्ठेक्षौरंपरिणायंव्रतम् ज्येष्ठपुत्रदुहित्रोस्तुयत्नेनपरिवर्जयेत् कृत्ति-
कास्थरविंत्यक्त्वाज्येष्ठपुत्रस्यकारयेत् उत्सवादिषुकार्येषुदिनानिदशवर्जयेत् रत्नकोशे जन्मर्क्षेजन्मदिवसेजन्ममासेशुभंत्यजेत्

ज्येष्ठमास्याद्यगर्भस्यशुभंवर्ज्यंस्त्रियाअपि पराशरः अज्येष्ठाकन्यकायत्रज्येष्ठपुत्रोवरोयदि व्यत्ययोवातयोस्तत्रज्येष्ठमासःशुभप्रदः
मिहिरः ज्येष्ठस्यज्येष्ठकन्यायाविवाहोनप्रशस्यते तयोरन्यतरेज्येष्ठेज्येष्ठोमासःप्रशस्यते द्वौज्येष्ठौमध्यमौप्रोक्तावेकंज्येष्ठंशुभावहं ज्ये
ष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतम् यत्तुसार्वकालमेकेविवाहमिति तदासुरादिविवाह वि षयम् धर्म्येषुविवाहेषुकालपरीक्षणंनाधर्म्ये
ष्वितिगृह्यपरिशिष्टात् रत्नमालायामप्येवं तेनासुरादयोमाघचैत्रादिनिषिद्धकालेष्वपिभवंति मासाःसौराः सौरामासोविवाहादावि-
त्युक्तेः झषोननिंद्योयदिफाल्गुनेस्यादजस्तुवैशाखगतोननिंद्यइतित्वपवादः अथदशदोषाः व्यवहारोच्चये वेधश्चलत्ताचतथैवपातः
खर्जूरवेधोदशयोगचक्रं युतिश्चजामित्रमुपग्रहश्चबाणाख्यवज्रेचदशैवदोषाः एषांलक्षणंज्योतिषेज्ञेयम् अतिचारगेगुरौतुवसि
ष्ठः अतिचारगतेजीवेवर्जयेत्तदनंतरं विवाहादिषुकार्येषुअष्टविंशतिवासरान् रत्नमालायाम् एकपंचनवयुग्मषड्दशत्रीणिसप्तच
तुरष्टलाभगः द्वादशाजवृषभादिराशितोघातचंद्रइतिकीर्तितोबुधैः नारदः भूबाणनंदहस्ताश्वरसदिग्वह्निशैलजाः वेदावसुशिवा
दित्याघातचंद्रोयथाक्रमम् यात्रायांयुद्धकार्येषुघातचंद्रंविवर्जयेत् विवाहेसर्वमांगल्येचौलादौव्रतबंधने घातचंद्रोनैवचिंत्यइतिपारा-
शरोब्रवीत् ज्योतिर्निबंधे विवाहचौलव्रतबंधयज्ञेपट्टाभिषेकेचतथैवराज्ञां सीमंतयात्रासुतथैवजातेनोचिंतनीयःखलुघातचंद्रः ना
रदः अकालजाभवेयुश्चेद्विद्युन्नीहारवृष्टयः प्रत्यर्कपरिवेषेंद्रचापाभ्रध्वनयोयदि दोषायमंगलेनूनंनदोषायैवकालजाः अकालवृ
ष्टिस्वरूपमाहल्लः पौषादिचतुरोमासाःप्रोक्तावृष्टिरकालजेति शार्ङ्गधरः निर्घातेक्षितिचलनेग्रहयुद्धेराहुदर्शनेचैव आपंचदिनात्क
न्यापरिणीतानाशमुपयाति उल्कापातेंद्रचापप्रबलघनरजोधूमनिर्घातविद्युद्वृष्टिप्रत्यर्कदोषादिषुसकलबुधैस्त्याज्यमेवैकरात्रम्

दुःस्वप्नेदुर्निमित्तेत्वशुभफलदृशोदुर्मनोभ्यांतबुद्धौचौलेमौंजीनिबंधेपरिणयनविधौसर्वदात्याज्यमेव ज्योतिःप्रकाशे अर्वाक्षोडशना-
ड्यःसंक्रांतेःपुण्यदाःपरतः उपनयनव्रतयात्रापरिणयनादौविवर्ज्यास्ताः गर्गः दिग्दाहेदिनमेकंचगृहेसप्तदिनानितु भूकंपेचसप्तु
सप्ने त्र्यहमेवतुवर्जयेत् उल्कापातेत्रिदिवसंधूमेपंचदिनानिच वज्रपातेचैकदिनंवर्जयेत्सर्वकर्मसु दर्शनादर्शनाद्राहुकेत्वोःसप्तदिनं
त्यजेत् यावत्केतूद्गमस्तावदशुभःसमयोभवेत् अस्यापवादोऽद्भुतसागरे अर्धदिवसत्रयमध्येमृदुपानीयंयदाभवति उत्पातदोष
शमनंतद्दैवसमाहुराचार्याः संबंधतत्वे भूकंपादेर्नदोषोऽस्तिवृष्टिश्चार्द्रेकृतेसति अथापरिहार्येकन्यायावैधव्ययोगविशेषउच्यते
मार्कंडेयपुराणे बालवैधव्ययोगेतुकुंभद्रुमप्रतिमादिभिः कृत्वालग्नंततःपश्चात्कन्योद्वाह्येतिचापरे अत्रपुनर्दोषाभावउक्तोविधानखंडे
स्वर्णांबुपिप्पलानांचप्रतिमाविष्णुरूपिणी तयासहविवाहेतुपुनर्भूत्वंनजायते सूर्यारुणसंवादे विवाहात्पूर्वकालेचचंद्रताराबलान्वि
ते विवाहोक्तेचतांकन्यांकुंभेनसहचोद्वहेत् सूत्रेणवेष्टयेत्पश्चाद्दशतंतुविधानतः कुंकुमालंकृतंदेहंतयोरेकांतमंदिरे ततःकुंभंचनिः
सार्यप्रभज्यसलिलाशये ततोऽभिषेचनंकुर्यात्सच्चपल्लववारिभिः कुंभप्रार्थनातत्रैव वरुणांगस्वरूपायजीवनानांसमाश्रय पतिंजीवय
कन्यायाश्चिरंपुत्रसुखंकुरु देहिविष्णोवरंदेवकन्यांपालयदुःखतः ततोलंकारवस्त्राढ्यांवरायप्रतिपादयेत् इतिकुंभविवाहः
मूर्तिदानमपितत्रैवोक्तं ब्राह्मणंसाधुमामंत्र्यसंपूज्यविविधार्हणैः तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजां शुद्धवर्णसुवर्णेनवित्त
शक्त्याथवापुनः निर्मितांरुचिरांशंखगदाचक्राब्जसंयुताम् दधानांवाससीपीतेकुमुदोत्पलमालिनीं सदक्षिणांचतांदद्यान्मंत्रमेनमुदी
रयेत् यन्मयाप्राक्चजनुषिध्वंस्यापतिसमागमम् विषोपविषशस्त्राद्यैर्हतोवातिविरक्तया प्राप्यमानंमहाघोरंयशःसौख्यधनापहम्

वैधव्याद्यतिदुःखौघनाशायशुभलब्धये बहुसौभाग्यलब्ध्यैचमहाविष्णोरिमांतनुम् सौवर्णींनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज अनघाद्या
हमस्मीतित्रिवारंप्रजपेदिति एवमस्त्वितितस्याःकिं गृहीत्वास्वगृहंविशेत् ततोवैवाहिकंकुर्याद्विधिदानामृगीदृशः अन्येप्यश्वत्थविवाहकुम्भ
सेचनादयस्तत्रैवज्ञेयाः विस्तरभयान्नोच्यते अथप्रतिकूलादि ज्योतिर्निबंधेगर्गः कृतेतुनिश्चयेपश्चान्मृत्युर्भवतिकस्यचित् तदानमं
गलंकुर्यात्कृतेवैधव्यमाप्नुयात् ज्योतिर्मेधातिथिः वधूवरार्थंघटितेसुनिश्चितेवरस्यगेहेप्यथकन्यकायाः मृतिर्यदिस्यान्मनुजस्यक
स्यचित्तदानकार्यंखलुमंगलंबुधैः मंगलंविवाहः स्मृतिचंद्रिकायाम् कृतेवाङ्निश्चयेपश्चान्मृत्युर्मर्त्यस्यगोत्रिणः तदानमंगलंका
र्येनारीवैधव्यदंध्रुवं भृगुः वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदोद्वाहोनैवकार्यःस्ववंशक्षयदोयतः शौनकः वरवध्वोःपि
तामातापितृव्यश्चसहोदरः एतेषांप्रतिकूलंचमहाविघ्नप्रदंभवेत् पितापितामहश्चैवमाताचैवपितामही पितृव्यस्त्रीसुतोभ्राताभगिनी
चाविवाहिता एभिरत्रविपन्नैश्चप्रतिकूलंबुधैःस्मृतं अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेत् मांडव्यः वाग्दानानंतरंमातापिताभ्रा
ताविपद्यते विवाहोनैवकर्तव्यःस्ववंशस्थितिमिच्छता संकटेतुमेधातिथिः वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदासंवत्सरादू
र्ध्वंविवाहःशुभदोभवेत् स्मृतिरत्नावल्याम् पितुरब्दमशौचंस्यात्तदर्धंमातुरेवच मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः अन्येषांतु
सपिंडानामाशौचंमासमीरितं तदंतेशांतिकंकृत्वाततोलग्नंविधीयते ज्योतिःप्रकाशे प्रतिकूलेपिकर्तव्योविवाहोमासतःपरः शांतिं
विधायगांदत्वावाग्दानादिचरेत्पुनः शांतिंविनायकशांतिं तथाचमेधातिथिः संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना शांतिरुक्ता
गणेशस्यकृत्वातांशुभमाचरेदिति प्रतिकूलेनकर्तव्योगच्छेद्यावदृतुत्रयं प्रतिकूलेपिकर्तव्यमित्याहुर्बहुविप्लवे प्रतिकूलेसपिंडस्यमा

समैकंविवर्जयेत् ज्योतिःसारे दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये प्रौढायामपिकन्यायांनानुकूल्यंप्रतीक्ष्यते मेधातिथिः पुरुषत्रयपर्यंतंप्रतिकूलंस्वगोत्रिणां प्रवेशान्निर्गमस्तद्वत्तथामंडनमुंडने प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियां आचतुर्थंततःपुंसिपंचमेशुभदंभवेत् अथरजोदोषनिर्णयः माधवीये प्रारंभात्प्राग्विवाहस्यमातायदिरजस्वला निवृत्तिस्तस्यकर्तव्यासहलश्रुतिचोदनात् आरंभात्नांदीश्राद्धात् नांदीमुखंविवाहादावित्यादिनानस्यैवप्रारंभोक्तेः मेधातिथिः चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि भार्यारजस्वलायस्यप्रायस्तस्यनशोभनं वधूवरान्यतरयोर्जननीचेद्रजस्वला तस्याःशुद्धेःपरंकार्यंमांगल्यंमनुरब्रवीत् वृद्धमनुः विवाहव्रतचूडासुमातायदिरजस्वला तदानमंगलंकार्यंशुद्धौकार्यंशुभेप्सुभिः गर्गः यस्योद्वाहादिमांगल्येमातायदिरजस्वला तदानतत्प्रकर्तव्यमायुःक्षयकरंयतः नांदीश्राद्धोत्तररजोदोषेतुकपर्दिकारिकासु सूतिकोदक्ययोःशुद्ध्यैगांदद्याद्धोमपूर्वकम् प्राप्तेकर्मणिशुद्धिःस्यादितरस्मिन्नशुद्ध्यति अलाभेसुमुहूर्तस्यरजोदोषेचसंगते श्रियंसंपूज्यतत्कुर्यात्पाणिग्रहणमंगलहेमींमाषमितांपद्मांश्रीसूक्तविधिनार्चयेत् प्रत्यृचंपायसंहुत्वाअभिषेकंसमाचरेदिति सूतकादिसंकटेतु कूष्मांडीभिर्घृतंहुत्वापयस्विनींगांचदत्वाविवाहादिकुर्यादितिचप्रागुक्तं अथैकक्रियानिर्णयः ज्योतिर्निबंधेवृद्धमनुः एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः नसमानक्रियांकुर्यान्मातृभेदेविधीयते एतेनएकस्यपुंसोविवाहद्वयमेकदिनेनिषिद्धंमातृभेदाभावात् नारदः पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रये नतयोर्व्रतमुद्वाहान्मंडनादपिमुंडनं वराहः विवाहस्त्वेकजातानांषण्मासाभ्यंतरेयदि असंशयंत्रिभिर्वर्षैस्तत्रैकाविधवाभवेत् मदनरत्नेवसिष्ठः नपुंविवाहोर्ध्वमृतुत्रयेपिविवाहकार्यंदुहितुःप्रकुर्यात् नमंडनाच्चापिहिमुंडनंचगोत्रैकतायांयदिना-

ब्दभेदः एकोदरभ्रातृविवाहकृत्यं स्वसुर्नपाणिग्रहणंविधेयं षण्मासमध्येमुनयःसमूचुर्नमुंडनंमंडनतोपिकार्यं एतदपवादस्तत्रैव ऋतुत्रयस्यमध्येचेदन्याब्दस्यप्रवेशनं तदाद्येकोदरस्यापिविवाहस्तुप्रशस्यते सारावल्याम् फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने भेदादब्दस्यकुर्वीतनर्तुत्रयविलंघनं संहिताप्रदीपे ऊर्ध्वंविवाहात्तनयस्यनैवकार्योविवाहोदुहितुःसमार्धं अप्राप्यकन्यांश्वशुरालयंचवधूःप्रवेश्यास्वगृहंचनादौ मदनरत्नेवसिष्ठः द्विशोभनंत्वेकगृहेपिनेष्टंशुभंतुपश्चान्नवभिर्दिनैस्तु आवश्यकंशोभनमुत्सवोवाद्वारेथवाचार्यविभेदतोवा एकोदरप्रसूतानांनाग्निकार्यत्रयंभवेत् भिन्नोदरप्रसूतानांनेतिशातातपोब्रवीत् ज्योतिर्निबंधेकात्यायनः कुलेऋतुत्रयादर्वाङ्मुंडनान्नतुमंडनं प्रवेशान्निर्गमोनेष्टोनकुर्यान्मंगलत्रयम् कुर्वंतिमुनयःकेचिदन्यस्मिन्वत्सरेलघु लघुवागुरुवाकार्यंप्राप्तंनैमित्तिकंतुयत् पुत्रोद्वाहःप्रवेशाख्यःकन्योद्वाहस्तुनिर्गमः मुंडनंचौलमित्युक्तंव्रतोद्वाहौतुमंगलं चौलंमुंडनमेवोक्तंवर्जयेन्मंडनात्परम् मौंजीचोभयतःकार्यायतोमौंजीनमुंडनम् अभिन्नवत्सरेपिस्यात्तदहस्तत्रभेदयेत् अभेदेतुविनाशःस्यान्नकुर्यादेकमंडपे संकटेतुकपर्दिकारिकासुवराहमिहिरश्च उद्वाह्यपुत्रींनपिताविदध्यात्पुत्र्यंतरस्योद्वहनंकदाचित् यावच्चतुर्थंदिनमत्रपूर्वंसमाप्यचान्योद्वहनंविदध्यात् कश्यपः मौंजीबंधस्तथोद्वाहःषण्मासाभ्यंतरेपिवा पुंस्युद्वाहंनकुर्वीतविभक्तानांनदोषकृत् ज्योतिर्निबंधे विवाहमारभ्यचतुर्थिमध्येश्राद्धंदिनंदर्शदिनंयदिस्यात् वैधव्यमाप्नोतितदाशुकन्याजीवेत्पतिश्चेदनपत्यतास्यात् तथा विवाहमध्येयदिचेत्क्षयाहस्तत्रस्त्वसुख्याःपितरोनयाति वृत्तेविवाहेपरतस्तुकुर्याच्छ्राद्धंस्वधाभिर्नतुदूषयेत्तम् येवाभद्रंदूषयंतिस्वधाभिरितिश्रुतेश्च मासिकविषयेकालहेमाद्रौशाट्यायनिः प्रेतश्राद्धानिसर्वाणिसपिंडीकरणंतथा अपकृष्यापिकुर्वीतकर्तुंनांदीमुखं

द्विजः वृद्धिंविनापकर्षेदोषमाह तत्रैवोशनाः वृद्धिश्राद्धविहीनस्तुप्रेतश्राद्धानियश्चरेत् सश्राद्धीनरकेघोरेपितृभिःसहमज्जतीतिमे
धातिथिः प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियां आचतुर्थंततःपुंसिपंचमेशुभदंभवेत् स्मृत्यंतरे सपिंडीकरणादर्वागपकृष्यकृ
तान्यपि पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात् स्मृतिसारावल्याम् भ्रातृयुगेस्वसृयुगेभ्रातृस्वसृयुगेतथा एकस्मिन्मंडपेचैवनकुर्यां
न्मंडनद्वयं सोदरविषयमेतत् यमः एकोदरप्रसूतानामेकस्मिन्वासरेपुनः विवाहंनैवकुर्वीतमंडनोपरिमुंडनं गार्ग्यः भ्रातृ
युगेस्वसृयुगेभ्रातृस्वसृयुगेतथा नकुर्यान्मंगलंकिंचिदेकस्मिन्मंडपेहनि एकस्मिन्वासरेप्राप्तेकुर्याद्यमलजातयोः क्षौरंचैवविवा
हंचमौंजीबंधनमेवच ज्योतिर्विवरणे एकोदरयोरेकदिनोद्वाहेनेभवेन्नाशः नद्यंतरएकदिनेकेप्याहुःसंकटेचशुभं ऊर्ध्वंविवाहा
च्छुभदोनरस्यनारीविवाहोनऋतुत्रयंस्यात् नारीविवाहात्तदहेपिशस्तंनरस्यपाणिग्रहमाहुरार्याः भिन्नमातृजयोस्तुएकवासरेवि
वाहमाहमेधातिथिः पृथङ्मातृजयोःकार्योविवाहस्त्वेकवासरे एकस्मिन्मंडपेकार्यःपृथग्वेदिकयोस्तथा पुष्पपट्टिकयोःकार्यंदर्शनं
नशिरस्ययोः भगिनीभ्यामुभाभ्यांचयावत्सप्तपदीभवेत् यमयोस्तुविशेषः भट्टकारिकायाम् एकस्मिन्वत्सरेचैकवासरेमंडपेतथा
कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोः ज्योतिर्निबंधेनारदः प्रत्युद्वाहोनैवकार्योनैकस्मैदुहितृद्वयं नैवैकजन्ययोःपुंसोरेकजन्येतु
कन्यके नैवंकदाचिदुद्वाहोनैकदामुंडनद्वयं नैकजन्येतुकन्येद्वेपुत्रयोरेकजन्ययोः नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेति कन्याया
रजोदर्शनेतुअपरार्केसंवर्तः मातांचैवपितांचैवज्येष्ठभ्रातातथैवच त्रयस्तेनरकंयातिदृष्ट्वाकन्यांरजस्वलां हारीतः पितुर्गेहेतुयाक
न्यारजःपश्यत्यसंस्कृता साकन्यावृषलीज्ञेयातत्पतिर्वृषलीपतिः देवलात्रिकश्यपाःपूर्वार्धंतदेव भ्रूणहत्यापितुस्तस्याःसाकन्यावृष

लीस्मृता यस्तांसमुद्वहेत्कन्यांब्राह्मणोज्ञानदुर्बलः अश्राद्धेयमपाङ्क्तेयंतंविद्याद्वृषलीपतिम् माधवीयेबौधायनः त्रीणिवर्षाण्यृतुमती-
कांक्षेतपितृशासनम् विष्णुः ऋतुत्रयमुपास्यैवकन्याकुर्यात्स्वयंवरम् अत्रवरस्यदोषाभावमाहयमः कन्याद्वादशवर्षाणियाऽप्र-
दत्तावसेद्गृहे भ्रूणहत्यापितुस्तस्याः साकन्यावरयेत्स्वयं एवंचोपयतांपत्नींनावमन्येतकदाचन नतुतांबधकींविद्यान्मनुःस्वायंभुवो-
ब्रवीत् मनुः अलंकारंनाददीतपितृदत्तंस्वयंवरे पितृदत्तंमातृदत्तंस्तेयीस्याद्यदिसंहरेत् वरमप्याह पित्रेनदद्याच्छुल्कंतुकन्या-
मृतुमतींहरन् सहिस्वाम्यादतिक्रामेदृतूनांप्रतिबोधनात् अत्रप्रायश्चित्तमुक्तमाश्वलायनेन कन्यामृतुमतींशुद्धांकृत्वानिष्कृतिमा-
त्मनः शुद्धिंचकारयित्वातामुद्वहेदनृशंस्यधीः पिताऋतूनस्वपुत्र्यास्तुगणयेदादितःसुधीः दानावधिगृहेयत्नात्पालयेच्चरजोवतीं दद्या-
त्तदृतुसंख्यागाः शक्तःकन्यापितायदि दातव्यैकापिनिःस्वेनदानेतस्यायथाविधि दद्याद्वाब्राह्मणेष्वन्नमतिनिःस्वःसदक्षिणं तस्या-
तीतर्तुसंख्येषुवरायप्रतिपादयेत् उपोष्यत्रिदिनंकन्यारात्रौपीत्वागवांपयः अदृष्टरजसेदद्यात्कन्यायैरत्नभूषणम् तामुद्वहन्वरश्चापि
कूष्माण्डैर्जुहुयाद्द्विजइति मदनपारिजातेयज्ञपार्श्वः विवाहेविततेयज्ञेहोमकालउपस्थिते कन्यामृतुमतींदृष्ट्वाकथंकुर्वन्तियाज्ञिकाः स्ना-
पयित्वातुतांकन्यामर्चयित्वायथाविधि युंजानामाहुतिंहुत्वाततस्तंत्रंप्रवर्तयेत् बौधायनसूत्रे अथयदिकन्योपसाद्यमानाचोद्यमानावा
रजस्वलास्यात्तामनुमंत्रयेत् पुमांसौमित्रावरुणौपुमांसावश्विनावुभौ पुमानिंद्रश्चसूर्यश्चपुमांसंचदधात्वियमिति अथद्वादशरात्रमलंकृ-
त्यप्राशयेत्पंचगव्यमथशुद्धांकृत्वाविवहेत् अत्रगांधर्वाद्यष्टौविवाहास्तद्व्यवस्थाचाकरेज्ञेया मनुः षडानुपूर्व्याविप्रस्यक्षत्रस्यचतुरोवरान्
विट्शूद्रयोस्तुतानेवविद्याद्धर्म्यानराक्षसान् चतुरः आसुरगांधर्वराक्षसपैशाचान् तान्राक्षसवर्ज्यान्वैश्यशूद्रयोः सएव आसुरंवैश्य ३५

शूद्रयोः हेमाद्रौपैठीनसिः राक्षसोवैश्यस्यपैशाचः शूद्रस्य प्रचेताः पैशाचोसंस्कृतप्रसूतानांप्रतिलोमजानांच मनुः राज्ञस्तथासुरोवै श्येशूद्रेचांत्यस्तुगर्हितः क्षत्रियादेःसंकटेपैशाचमाहमाधवीये वत्सः सर्वोपायैरसाध्यास्यात्साकन्यापुरुषस्यया चौर्येणापिविवाहेन साविवाह्यारहःस्थिता गांधर्वादिविवाहेषूदकपूर्वकंदानमाहतत्रैवयमः नोदकेननवावाचाकन्यायाःपतिरुच्यते पाणिग्रहणसंस्कारा सतित्वंसप्तमेपदे पराशरमाधवीयेदेवलोपि गांधर्वादिविवाहेषुपुनर्वैवाहिकोविधिः कर्तव्यश्चत्रिभिर्वर्णैःसमर्थेनाग्निसाक्षिकः त्रै वर्णिके गांधर्वादौविप्रवर्जमधिकारउक्तः तत्रैवपरिशिष्टे गांधर्वासुरपैशाचाविवाहाराक्षसश्चयः पूर्वंपरिणयस्तेषुपश्चाद्धोमोविधीय ते अतोहोमादावकृतेभार्यात्वाभावाद्वरांतरायदेया तथाचतत्रैववसिष्ठबोधायनौ बलादपहृताकन्यामंत्रैर्यदिनसंस्कृता अन्यस्मैवि धिवद्देयायथाकन्यातथैवसेति अत्रमंत्रसंस्काराभावेऽन्यस्मैदानस्यसर्वविवाहेषुसाम्याद्बलादपहारेराक्षसपैशाचयोर्विशेषवचनंव्यर्थं तेनतयोर्यदिनसंस्कृतासंस्कृतावेत्याद्यस्यकन्यानुमत्याभावन्यस्मैदेयेतिव्याख्येयं मदनपारिजातेनारदः पाणिग्रहणिकामंत्रानियतंदार-लक्षणं तेषांचनिष्ठाविज्ञेयाविद्वद्भिःसप्तमेपदे स्मृतिचंद्रिकायामपरार्केचैवं आशौचेतुयाज्ञवल्क्यः दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे आपद्यपिचकष्टायांसद्यःशौचंविधीयते केषामित्यपेक्षितेब्रह्मपुराणेउक्तं दातुः प्रतिगृहीतुश्चकन्यादानेचनोभवेत् विवाहेविष्णोःक न्यायांलाजहोमादिकर्मणीति व्रतयज्ञविवाहेषुश्राद्धेहोमेऽर्चनेजपे आरब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनाच्च प्रारंभ स्तेनैवोक्तः प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति वरणमितिमधुपर्कपरं गृहीतमधुपर्क स्ययजमानाच्चऋत्विजः पश्चादशौचेपतितेनभवेदितिनिश्चयइति ब्राह्मोक्तेः मधुपर्कात्पूर्वंतुभवत्येवाशौचमितिशुद्धिविवेकः

रासांडारभाष्येप्येवम् नांदीमुखावधिश्चस्मृत्यंतरे एकविंशत्यहर्यज्ञेविवाहेदशवासराः त्रिषट्चौलोपनयनेनांदीश्राद्धंविधीयते आरंभा
भावेपिलग्नांतराभावेगद्यविष्णुः नदेवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरपीति अत्रप्रायश्चित्तमाहमदनपारिजातेविष्णुः अनारब्धविशु
द्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतम् गांदद्यात्पंचगव्याशीततः शुध्यतिसूतकी संग्रहेपि संकटेसमनुप्राप्ते सूतकेसमुपागते कूष्मांडीभिर्घृतं
हुत्वागांचदद्यात्पयस्विनीम् चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् यदैवसूतकप्राप्तिस्तदैवाभ्युदयक्रिया अन्नादिषुविशेषः षट्त्रिं
शन्मते विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः परैरसगोत्रैः भुंजानेषुतुविप्रेषुत्वंतरामृतसू
तके अन्यगेहोदकाचांताः सर्वेतुशुचयः स्मृताः एतदाशौचात्पूर्वंपृथक्कृतान्नविषयं तत्रशेषमन्नंत्याज्यमित्यर्थः पृथक्कृतेषु
तुबृहस्पतिराह विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके पूर्वसंकल्पितान्नेषुनदोषः परिकीर्तितइति धर्मार्थविवाहकरणेफलमुक्तंमहा
भारते ज्ञात्वास्ववित्तसामर्थ्यादेकंचोद्वाहयेद्द्विजं तेनाप्याप्नोतितत्स्थानंशिवप्रोक्तोनरोध्रुवम् अपरार्केदक्षः मातापितृविहीनंतु-
संस्कारोद्वाहनादिभिः यः स्थापयतितस्येहपुण्यसंख्यानविद्यते मदनरत्नेभविष्ये विवाहादिक्रियाकालेतत्क्रियासिद्धिकारणं
यः प्रयच्छतिधर्मज्ञः सोश्वमेधफलंलभेत् कन्यागृहेभोजननिषेधोपितत्रैव अप्रजायांतुकन्यायांनभुंजीतकदाचन दौहित्रस्यमु
खंदृष्ट्वाकिमर्थमनुशोचति अपरार्केआदिपुराणे विष्णुंजामातरंमन्येतस्यकोपंनकारयेत् अप्रजायांतुकन्यायांनाश्नीयात्तस्य
वैगृहे ब्रह्मदेयांनवैकन्यांदत्त्वाश्नीयात्कदाचन अथभुंजीतमोहाच्चेत्पूयाशीनरकेवसेत् तत्रैवकश्यपः अहतंयंत्रनिर्मुक्तंवासः
प्रोक्तंस्वयंभुवा शस्तंतन्मांगलिक्येषुतावत्कालंनसर्वदा यंत्रनिर्मुक्तंनूतनं विवाहमध्येस्त्रियासहभोजनेपिनदोषइत्याह हेमाद्रौ

प्रायश्चित्तकांडेगालवः विवाहकालेयात्रायांपथिचोरसमाकुले असहायोभवेद्विप्रस्तदाकार्यंद्विजन्मभिः एकयानसमारोहएकपात्रेचभोजनम् विवाहेपथियात्रायांकृत्वाविप्रोनदोषभाक् अन्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेत् मिताक्षरायामप्येवम् रत्नमालायां मूलमैत्रमृगरोहिणीकरैःपौष्णमारुतमघोत्तरान्वितैः भौमसौररविवारवर्जितेपाणिपीडनविधिर्विधीयते अत्रानिष्टनक्षत्रादौदानमुक्तंज्योतिषे विपत्तारेगुडंदद्यान्निधनेतिलकांचनम् प्रत्यरेलवणंदद्याच्छागंदद्याच्चजन्मसु चंद्रेचशंखंलवणंचतारास्तिथौविरुद्धेलय तंदुलांश्च धान्यंचदद्यात्करणेचवारेयोगेविरुद्धेकनकंप्रदेयम् विवाहमंडपमाहवसिष्ठः षोडशारत्निकंकुर्याच्चतुर्द्वारोपशोभितम् मंडपंतोरणैर्युक्तंतत्रवेदिंप्रकल्पयेत् अष्टहस्तंतुरचयेन्मंडपंवाद्विषट्करं दैवज्ञमनोहरः चित्राविशाखाशततारकाश्विनीज्येष्ठाभरण्योसितभाच्चतुष्टयम् हित्वाप्रशस्तफलतैलवेदिकाप्रदानकंडनमंडपादिकम् हेमाद्रौव्यासः कंडनदलनयवारकमंडपमृद्वेदिवर्णकाद्यखिलं तत्संबंधिगतागतमृक्षेवैवाहिकेकुर्यात् यवारकंचिकसाइतिप्रसिद्धम् वैवाहिकेतुदिवसेशुभेवाप्यतिथौशुभे चतुर्थिकंप्रकुर्वीतविधिदृष्टेनकर्मणा वेदिमाहनारदः हस्तोच्छ्रितांचतुर्हस्तैश्चतुरस्रांसमंततः स्तंभैश्चतुर्भिःसुश्लक्ष्णांवामभागेतुसद्मनि समांतथाचतुर्दिक्षुसोपानैरतिशोभिताम् प्रागुदक्प्रवणारंभास्तंभहंसशुकादिभिः एवंविधामारुरुक्षेन्मिथुनंसाग्निवेदिकामिति सप्तर्षिमते मंगलेषुच सर्वेषुमंडपोगृहमानतः कार्यःषोडशहस्तोवाद्व्यूनहस्तोदशावधि स्तंभैश्चतुर्भिरेवात्रवेदीमध्येप्रतिष्ठिता हस्तावध्याःसोपानपश्चिमतः उपरिभागेउक्तपरिमाणाद्भिन्नम् अथमृदाहरणं ज्योतिर्निबंधेनारदः कर्तव्यंमंगलेष्वादौमंगलायांकुरार्पणम् नवमेसप्तमेवापिपंचमेदिवसेपिवा तृतीयेबीजनक्षत्रेशुभवारेशुभोदये सम्यग्गृहाण्यलंकृत्यवितानध्वजतोरणैः सहवादित्रनृत्याद्यैर्गत्वा-

प्रागुत्तरांदिशम् तत्रमृत्तिकांतांश्लक्ष्णांगृहीत्वापुनरागतः मृन्मयेष्वथवावैणवेषुपात्रेषुयोजयेत् अनेकबीजसंयुक्तांतोयपुष्पोपशोभिताम् शौनकः आधानंगर्भसंस्कारंजातकर्मचनामच हित्वान्यत्रविधातव्यंमंगलेंकुरवापनम् बृहस्पतिः आत्यंतिकेषुकार्येषुकार्यंसद्योऽकुरार्पणम् तत्रैववाग्दानंहरिद्रावंदनचकार्यम् ज्योतिःप्रकाशे चतुर्थोमंडपःश्रेष्ठःसप्तमःपंचमस्तथा नवमेकादशोश्रेष्ठोनेष्टौषष्ठस्तृतीयकौ विवाहप्रेप्सोदयेवाकन्यावरणमाचरेत् वरस्यापिवरणमाहचंडेश्वरः उपवीतंफलंपुष्पंवासांसिविविधानिच देयंवरायवरणेकन्याभ्रात्राद्विजेनवेति वाग्दानोत्तरंवरमरणेऽपरार्केस्मृतिचंद्रिकायांवसिष्ठः अद्भिर्वाचाचदत्तायांम्रियेतोर्ध्वंवरोयदि नचमंत्रोपनीतास्यात्कुमारीपितुरेवसा यत्तुनारदः उद्वाहितापिसाकन्यानचेत्संप्राप्तमैथुना पुनःसंस्कारमर्हेतयथाकन्यातथैवसेति यच्चकात्यायनः वरोयद्यन्यजातीयःपतितःक्लीबएवच विकर्मस्थःसगोत्रोवादासोदीर्घामयोपिवा उढापिदेयासान्यस्मैसहावरणभूषणेति इदंकलौनिषिद्धम् देवरेणसुतोत्पत्तिर्दत्ताकन्यानदीयते इत्यादित्यपुराणेकलौनिषेधात् दत्ताशब्दऊढापरः ऊढायाःपुनरुद्वाहमितिहेमाद्र्युक्तेः अतएवसगोत्रासपिंडादिविवाहेपि भोगतस्तांपरित्यज्यपालयेज्जननीमिवेत्युक्तम् देशांतरगमनेतुकात्यायनः वरयित्वातुयःकश्चित्प्रणश्येत्पुरुषोयदा ऋत्वागमांस्त्रीनतीत्यकन्यान्यंवरयेद्वरम् अपरार्केनारदोपि प्रतिगृह्यतुयःकन्यांवरोदेशांतरंव्रजेत् त्रीनृतून्समतिक्रम्यकन्याऽन्यंवरयेद्वरम् शुल्कदानेतुमनुवसिष्ठौ कन्यायांदत्तशुल्कायांम्रियेतयदिशुल्कदः देवरायप्रदातव्यायदिकन्यानुमन्यते चंद्रिकायांकात्यायनः प्रदायशुल्कंगच्छेद्यःकन्यायाःस्त्रीधनंतथा धार्यासावर्षमेकंतुदेयान्यस्मैविधानतः अनेकेभ्योहिदत्तायामनूढायांतुतत्रैव पूर्वागतश्चसर्वेषांलभेताद्यवरस्तुताम् पश्चाद्वरेणयद्दत्तं

तस्याःप्रतिलभेतसः अथागच्छेन्नवोढायांदत्तंपूर्ववरोहरेत् याज्ञवल्क्यः सकृत्प्रदीयतेकन्याहरंस्तांचोरदंडभाक् दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्रजेत् पूर्वस्यदोषसत्त्वेइदमितिविज्ञानेश्वरः संबंधतत्त्ववसिष्ठः कुलशीलविहीनस्यषण्ढादिपतितस्यच अपस्मारिविधर्मस्यरोगिणांवेषधारिणाम् दत्तामपिहरेत्कन्यांसगोत्रोढांतथैवच मनुः षंढांधबधिरादीनांविवाहोऽस्तियथोचितम् विवाहसमयेतेषांकनिष्ठोविवहेत्तदा पितृव्यपुत्रेसापत्न्येपरदारसुतेषुच विवाहाधानयज्ञादौपरिवेदोनदूषणम् अन्यद्वक्तव्यंविस्तरभीतेर्नोच्यतेइतिदिक् अथनांदीश्राद्धेविशेषंतदधिकारिविशेषंचाग्रेवक्ष्यामः इदंचाद्यविवाहेपिताकुर्यात्द्वितीयादौवरएव नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहेपुनः अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकमितिस्मृतेः त्रिकांडमंडनोऽपि पित्रोस्तुजीवतोःकुर्यात्पुनःपाणिग्रहेयदा पितुर्नांदीमुखंश्राद्धंनोक्तंतस्यमनीषिभिरिति रेणुकाकारिका उक्तेकालेविवाहांगंकुर्यान्नांदीमुखंपिता देशांतरेविवाहश्चेत्तत्रगत्वाभवेदिदम् लग्नघटीस्थापनमाहनारदः षडंगुलमितोत्सेधंद्वादशांगुलमायतम् कुर्यात्तातलवत्ताम्रपात्रंलद्दशाभिःपलैः ताम्रपात्रेजलैःपूर्णेमृत्पात्रेवाथवाशुभे मंडलार्धोदयंवीक्ष्यरवेस्तत्रविनिक्षिपेत् तत्रमंत्रः मुख्यंत्वमसियंत्राणांब्रह्मणानिर्मितंपुरा भवभावायदंपत्योःकालसाधनकारणमिति वरस्यमधुपर्कमाहयाज्ञवल्क्यः प्रतिसंवत्सरंत्वर्च्याःस्नातकाचार्यपार्थिवाः प्रियोविवाह्यश्चतथायज्ञंप्रत्यृत्विजःपुनः अत्रविशेषोगृह्यपरिशिष्टे वरस्ययाभवेच्छाखातच्छाखागृह्यचोदितः मधुपर्कःप्रदातव्योह्यन्यशाखेऽपिदातरि अत्रवरदातृशब्दौऋत्विगाद्युपलक्षणम् तदाहुः अर्घ्यशाखयामधुपर्कइति अर्घ्यस्ययच्छाखीयंकर्मतच्छाखयामधुपर्कइतियाज्ञिकाः जयंतस्तुवरणवत्सर्वत्रयजमानशाखयैवमधुपर्कइत्याह यत्तुनाद्रियंतेवृद्धाः अत्र पंचाशताभवे-

ब्रह्मातदर्धेनतुविष्टर इत्यादि गृह्यपरिशिष्टादेर्विष्टरादिलक्षणंमधुपर्कादिविधिश्चस्वगृह्यादेर्ज्ञेयः कन्यादानेप्रपितामहपूर्वकमित्युक्तंस्मृ
त्यर्थसारे नांदीमुखेविवाहेचप्रपितामहपूर्वकं नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकम् नांदीमुखेवइति बह्वृचाद्यतिरिक्तविषयम्
गृह्यपरिशिष्टे पित्राद्यानुलोम्याम्नानात् व्यासः भुक्तासमुद्वहेत्कन्यां सावित्रीग्रहणंतथा उपोषितःस्नाता दद्यादर्चितायद्विजायतु
भुक्तेतिमधुपर्केवैधभोजनपरं गृह्यपरिशिष्टे कन्यांवरयमाणानामेषधर्मोविधीयते प्रत्यङ्मुखावरंयंतिप्रतिगृह्णातिप्राङ्मुखः
मदनरत्नेऋष्यशृंगे वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकं नामसंकीर्तयेद्विद्वान्कन्यायाश्चैवमेवहि तिष्ठेत्पूर्वमुखोदातावरःप्रत्यङ्मुखो
भवेत् मधुपर्कार्चितायेनांतस्मैदद्यात्सदक्षिणाम् उदपात्रेततोगृह्यमंत्रेणानेनदापयेत् गौरींकन्यामिमांविप्रयथाशक्तिविभूषिता
गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय भूमिंगांचैवदासींचवासांसिचस्वशक्तितः माहिषीवाजिनश्चैवदद्यात्स्वर्णमणीनपि ततःस्वगृह्यविधि
नाहोमाद्यंकर्मकारयेत् यथाचारंविधेयानिमांगल्यकुतुकानिच एतत्कन्यादानंत्रिःकार्यमितिशौनकः गृहप्रवेशनीयहोमेविशेष
माहाश्वलायनः अर्धरात्रेव्यतीतेतुपरेद्युःप्रातरेवहि गृहप्रवेशनीयःस्यादितियज्ञविदोविदुरिति औपासनहोमेविशेषमाहशौ
नकः यदिरात्रौविवाहाग्निरुत्पन्नःस्यात्तथासति उपक्रम्योत्तरस्यान्हःसायंपरिचरेदमुम् यदिरात्रौनवनाडीमध्येऽग्न्युत्पत्तिस्त
दानदैवहोमारंभः तदुत्तरत्वेपरदिनेसायमारभइति सुदर्शनभाष्येउक्तम् अथदेवकोत्थापनं समेचादिवसेकुर्याद्देवकोत्थापनं
बुधः षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ निर्णयदीपेगार्ग्यः नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनम् दर्शश्राद्धंक्षयश्राद्धं
स्नानंशीतोदकेनच अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच ब्रह्मयज्ञंचाध्ययनंनदीसीमातिलंघनम् उपवासव्रतंचैवश्राद्धभो

३८

जनमेवच नैवकुर्युःसपिंडाश्चमंडपोद्वासनावधि बृहस्पतिः तीर्थेविवाहेयात्रायांसंग्रामेदेशविप्लवे नगरग्रामदाहेचस्पृष्टास्पृष्टिर्नदुष्यति योगयाज्ञवल्क्यः नस्नायादुत्सवेतीतेमंगलंविनिवर्त्यच अनुव्रज्यसुहृद्बंधूनर्चयित्वेष्टदेवताम् ज्योतिषे स्नानंसचैलंतिलमिश्रकर्मप्रेतानुयानंकलशप्रदानम् अपूर्वतीर्थामरदर्शनंचविवर्जयेन्मंगलतोब्दमेकम् मासषट्कंविवाहादौव्रतप्रारंभणेनच जीर्णभांडादित्याज्यंगृहसंमार्जनंतथा ऊर्ध्वंविवाहात्पुत्रस्यतथाचव्रतबंधनात् आत्मनोमुंडनंनैववर्षंवर्षार्धमेवच अभ्यंगस्नतकेचैवविवाहेपुत्रजन्मनि मांगल्येषुचसर्वेषुनधार्यंगोपिचंदनं ज्योतिर्निबंधे उद्वाहात्प्रथमेशुचौयदिवसेद्भर्तुर्गृहेकन्यकाहन्यात्तज्जननींक्षयेनिजतनुंज्येष्ठेपतिज्येष्ठकम् पौषेचश्वशुरंपतिंचमलिनेचैत्रेस्थितापित्रालयेतिष्ठन्तीपितरंनिहंतिनभयंतेषामभावेभवेत् निबंधे विवाहात्प्रथमेपौषेआषाढेचाधिमासके नसाभर्तुर्गृहेतिष्ठेच्चैत्रेपितृगृहेतथा हेमाद्रौस्मृत्यंतरे विवाहव्रतचूडासुवर्षमर्धंतदर्धकम् पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणम् तथा अर्धपूर्ववत् सपिंडानैवकुर्वीरन्नाद्भिःस्नानमृतुत्रये तीर्थेसंवत्सरेप्रेतेपितृयज्ञमहालये कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसदा अथवधूप्रवेशः जयतुंगे मार्गशीर्षेतथामाघमाधवेज्येष्ठसंज्ञके सुप्रशस्तेभवेद्वेश्मप्रवेशोनवयोषिताम् नारदः आरभ्योद्वाहादिवसात्षष्ठेवाप्यष्टमेदिने वधूप्रवेशःसंपत्त्यैदशमेथसमेदिने संग्रहे विवाहमारभ्य वधूप्रवेशोयुग्मेतिथौषोडशवासरांतात् ऊर्ध्वंततोब्देयुजिपंचमांतादतःपरंत्वान्नियमोनचास्ति नारदः समेवर्षेसमेमासेयदिनारीगृहंव्रजेत् आयुष्यंहरतेभर्तुः सानारीमरणंव्रजेत् प्रयोगरत्नेतु वधूप्रवेशःप्रथमेतृतीयेश्वश्रूप्रदःपंचमकेथवाब्दे द्वितीयकेवाथचतुर्थकेवाषष्ठेवियोगामयदुःखदःस्यादित्युक्तंतत्रमूलंचिंत्यम् वृद्धवसिष्ठोपि षष्ठाष्टमेवादशमेदिनेवाविवाहमारभ्य

वधूप्रवेशः पंचांगसंशुद्धदिनंविनापिविधावसङ्गोत्वरगेपिकार्यः लल्लः स्वभुवनपुरवेशेदेशानांविप्लवेतथोद्वाहे नववध्वागृहगमनेप्रतिशुक्रविचारणानास्ति मांडव्यः नित्ययानेगृहेजीर्णेप्राशनान्तेषुसत्सुच वधूप्रवेशेमांगल्येनमौढ्यंगुरुशुक्रयोः ज्योतिःप्रकाशे समेशुक्रेनवोढायाःकरवंहानिश्चदक्षिणे धनधान्यंचपृष्ठस्थेसर्वनाशःपुरःस्थिते नवोढायास्तुवैधव्यं यदुक्तंसम्मुखभृगौ तदेवविबुधैर्ज्ञेयं केवलंतुद्विरागमे पूर्वतोभ्युदितेशुक्रेप्रयायाद्दक्षिणापरे पश्चादभ्युदितेचैवयायात्पूर्वोत्तरेदिशो व्यवहारतत्त्वे पौष्णात्कराच्छ्रवणाच्चयुग्मेहस्तत्रयेमूलमघोत्तरासु पुष्येचमैत्रेचवधूप्रवेशोरिक्तेतरेर्ककुजेचशस्तः गर्गः व्यतीपातेचसंक्रान्तौग्रहणेवैधृतावपि श्राद्धंविनाशुभंनैवप्राप्तकालेपिमानवः तथा अमासंक्रान्तिविष्ट्यादौप्राप्तकालेपिनाचरेदिति अथद्विरागमनम् ऋक्षोच्चये माघफाल्गुनवैशाखेशुक्लपक्षेशुभेदिने गुर्वादित्यविशुद्धौस्यान्नित्यंपत्न्याद्विरागमः बादरायणः नीहारांशुदिनोत्तरादितिगुरुब्रह्मानुराधाश्विनीशुक्रेभास्करवासुविष्णुवरुणत्वाष्ट्रप्रशस्तेतिथौ कुंभाजालिगतेरवौशुभकरेमासादयेभार्गवेजीवज्ञासुजितादिनेनववधूवेश्मप्रवेशःशुभः अथपुनर्विवाहः श्रीधरीये पुनर्विवाहंवक्ष्यामिदंपत्योःशुभवृद्धिदम् लग्नेन्दुलग्नयोर्दोषेग्रहतारादिसंभवे अन्येष्वशुभकालेषुदुष्टरोगादिसंभवे विवाहेचापिदंपत्योराशौचादिसमुद्भवे तस्यदोषस्यशान्त्यर्थंपुनर्वैवाह्यमिष्यते याज्ञवल्क्यः सुरापीव्याधिताधूर्तावंध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा मनुः वंध्याष्टमेधिवेत्तव्यादशमेतुमृतप्रजा एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनी संग्रहेतु अप्रजांदशमेवर्षेस्त्रीप्रजांद्वादशेत्यजेत् मृतप्रजांपञ्चदशेसद्यस्त्वप्रियवादिनीम् याज्ञवल्क्यः एकामुत्क्रम्यकामार्थमन्यांलब्धुंयइच्छति समर्थस्तोषयित्वार्थैःपू-

र्वैदासपरांव्रजेत् आज्ञासंपादिनींदक्षांवीरसूंप्रियवादिनीम् त्यजन्दाप्यस्तृतीयांशमद्रव्योभरणंस्त्रियाः मनुः अधिविन्नातुया नारीनिगच्छेद्रोषितागृहात् सासद्यःसन्निरोद्धव्यात्याज्यावाकुलसन्निधाविति हेमाद्रौकात्यायनः अग्निशिष्टादिशुश्रूषांबहुभार्यःसवर्णया कारयेत्तद्बहुत्वेचेज्ज्येष्ठयागर्हितानचेदिति याज्ञवल्क्यः सत्यामन्यांसवर्णायांधर्मकार्यंनकारयेत् सवर्णासुविधौधर्म्येज्येष्ठयानविनेतरा द्वितीयविवाहहोमेऽग्निमाहकात्यायनः सदारोऽन्यान्पुनर्दारानुद्वोढुंकारणांतरात् यदीच्छेदग्निमान्कर्तुंक्वहोमोस्यविधीयते स्वेग्नावेवभवेद्धोमोलौकिकेनकदाचन त्रिकांडमंडनोपि आद्यायांविद्यमानायांद्वितीयामुद्वहेद्यदि तदावैवाहिकंकर्मकुर्यादावसथ्यग्निमान् सुदर्शनभाष्येतु द्वितीयविवाहहोमोलौकिकएवनपूर्वोपासनइत्युक्तम् इदन्त्वासंभवे तत्रचाग्निद्वयसंसर्गःकार्यस्तदाहशौनकः अथाग्न्योर्गृह्ययोर्योगंसपत्नीभेदजातयोः सहाधिकारसिध्यर्थमहंवक्ष्यामिशौनकः अशेषासुद्वहेत्कन्याधर्मलोपभयात्स्वयं कृतेतत्रविवाहेचव्रतांतेतुपरेहनि पृथक्स्थंडिलयोरग्नीसमाधाययथाविधि तंत्रंकृत्वाज्यभागांतमन्वाधानादिकंततः जुहुयात्पूर्वपत्न्यग्नौतयान्वारब्धआहुतीः अग्निमीळेपुरोहितंसूक्तेननवर्चेनतु समिद्धेनसमारोप्य अयंतेयोनिरित्यृचा प्रत्यवरोहेत्यनयाकनिष्ठाग्नौनिधायतम् आज्यभागांततंत्रादिकृत्वारभ्यतदादितः समन्वारब्धएताभ्यांपत्नीभ्यांजुहुयाद्धुतम् चतुर्गृहीतमेताभिर्ऋग्भिःषड्भिर्यथाक्रमम् अग्नावग्निश्चरतीत्यग्निनाग्निःसमिध्यते अस्तीदमितितिसृभिःपाहिनोअग्नएकया ततःस्विष्टकृदारभ्यहोमशेषंसमापयेत् गोयुगंदक्षिणादेयाश्रोत्रियायाहिताग्नये पत्न्योरेकायदिमृतादग्ध्वातेनैवतांपुनः आदधीतान्ययासार्द्धमाधानविधिनागृहीति बोधायनसूत्रेतु अथयदिगृहस्थोद्वेभार्येविंदेतकथंतत्रकुर्यादिति यस्मिन्कालेविंदेता

भावश्रीपरिचरेदपराग्निमुपसमाधाय परिस्तीर्याज्यं विलाप्य स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वारब्धायां जुहोति नमस्तऋषेरादाव्यधायैत्वास्वधायैत्वामानइंद्राभिमतस्त्वहृष्वारिष्टास एवब्रह्मन्तवेदस्तु स्वाहेत्यथाऽयंते योनिर्ऋत्विय इति समिधि समारोपयेत् पूर्वाग्निमुपसमाधायाजुह्वानउद्बुध्यस्वाग्नइति समिधमाधाय परिस्तीर्य स्रुचि चतुर्गृहीत्वा द्वयोंशीर्षयोरन्वारब्धयोर्यजमानोऽभिमृशति यो ब्रह्मा ब्रह्मण इत्यतेन सूक्तेनैकेन चतुर्गृहीतं जुहोत्याग्निमुखान्कृत्वा पक्वाज्जुहोति संमितं संकल्पेथामिति पुरोनुवाक्यामनूच्याग्ने पुरीष्यइति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति पुरीष्यमस्त्वमित्यंतादनुवाकस्य स्विष्टकृत्प्रभृति सिद्धमाधेनुवरदानादथाग्रेणाग्निं दर्भस्तंबे हुतशेषं निदधाति ब्रह्मजज्ञानं पिता विराजामिति द्वाभ्यां ससर्गविधिः कार्यः द्वितीयादिविवाहे काल उक्तः संग्रहे प्रमदामृतिवासरादितः पुनरुद्वाहविधिवरस्य च विषमे युगवत्सरे शुभो युगले चापि मृतिप्रदो भवेत् तृतीयविवाहे निषेधो मात्स्ये उद्वहेद्दाति सिद्ध्यर्थं तृतीयां न कदाचन मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् नश्यत्येव न संदेहो गर्गस्य वचनं यथेति संग्रहे तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् तद्विधिस्तु रविशन्योर्हस्ते वा वरः संकल्प्य स्वस्तिवाचनं नांदीश्राद्धं कृत्वाचार्यं वृत्वा आकृष्णेनेति छायासुतं सूर्यमर्कं संपूज्य गुडोदनं दत्वा वस्त्रेण तन्तुभिरावेष्ट्य त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे तृतीयोद्वाहजं दोषंनिवारय सुखं कुर्विति संप्रार्थ्य जलेनाभिः सिंचेत् मम प्रीतिकरा येयं मया सृष्टा पुरातनी अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु नमस्ते मंगले देवि नमः सवितुरात्मने त्राहि मां कृपया देवि पत्नी त्वं मे इहागता अर्कत्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति ततआचार्यः काश्यपगोत्रामादित्यप्रपौत्रीं सवितुः पौत्रीं मम-

पुत्रीमर्ककन्याममुकगोत्राय वराय दास्ये इति वाग्दानंकृत्वावरस्यमधुपर्कंकृत्वाऽन्तःपटंधृत्वास्वस्तिनइतिसूक्तंजप्त्वापूर्ववत्कन्यांदत्वा अर्कक-न्यामिमांमित्यूहेनकन्यादानमंत्रमुक्त्वादक्षिणांदद्यात् ततोगायत्र्यावेष्टितसूत्रेणबृहत्सामेतिमंत्रेणकंकणंबध्वाऽर्कस्यचतुर्दिक्षुकुंभेषुविष्णुंसंपूज्याग्निंप्रतिष्ठाप्याघारांतेसंगोभिरितिबृहस्पतयेयस्मैत्वाकामकामायेत्यृचाऽग्नयेव्यस्तसमस्तव्याहृतिभिराज्यंहुत्वाचाथायगोयुगंदत्वा मयाकृतमिदंकर्मस्थावरेषुजरायुणा अर्काऽपत्यानिनोदेहितत्सर्वंक्षंतुमर्हसीतिनमस्मेतिदिक् इतिनिर्णयसिंधौविवाहः अथाधानम् रत्नमालायाम् प्राजापत्यपूषभेसाहिर्दैवपुष्येज्यष्ठास्वैंदवकृत्तिकासु अग्न्याधानत्वुत्तराणांत्रयेपिचित्रादित्येकीर्तितंगर्गमुख्यैः आश्वलायनः अग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसिफल्गुनीषुविशाखयोरुत्तरयोःप्रोष्ठपदयोरेतेषांकस्मिंश्चिद्वसंतेपर्वणिब्राह्मणआदधीतग्रीष्मवर्षाशरत्सुक्षत्रियवैश्यौपक्कुष्टा यस्मिन्कस्मिंश्चिदृतावादधीतसोमेनयक्ष्यमाणोनर्तुंपृच्छेन्ननक्षत्रम् सोमाधानेऋत्वाद्यनालोचनमार्तपरम् अथोखलुयदैवैनंश्रद्धोपनमेदथादधीतसैवास्यर्धिरिति सोमेनयक्ष्यमाणोनर्तुंपृच्छेन्ननक्षत्रंतदेतदार्तस्यातिविलंबाश्रद्धायुक्तस्यभवतीतिबोधायनोक्तेरिति मदनरत्नेप्येवं गार्ग्यः पुष्याग्नेयस्वुत्तरादित्यपौष्णाज्येष्ठाचित्रार्कद्विदैवेंदुभेषु कुर्युर्वह्न्याधानमाद्यंवसंतग्रीष्मप्रांतेष्वथविप्रादिवर्णाः कालादर्शे अग्निहोत्रंदर्शपूर्णमासावग्न्युत्तरायणे उपक्रम्ययथाकालमुपासीरन्द्विजातयः सोमंचपशुबंधंचसर्वाश्चविकृतीरपि सौम्यायनेयथाकालंविदध्युर्गृहमेधिनः अत्रविशेषःपूर्वमुक्तः अग्निहोत्रकालउक्तः छंदोगपरिशिष्टे उदितेनुदितेचैवसमयाध्युषितेतथा सर्वथावर्ततेयज्ञइतीयंवैदिकीश्रुतिः एषांस्वरूपंतत्रैव रात्रेस्तुषोडशेभागेग्रहनक्षत्रभूषिते कालंत्वनुदितंज्ञात्वाहोमंकुर्याद्विचक्षणः तथाप्रभातसमयेनष्टेनक्षत्रमंडले

रविर्यावन्नदृश्येतसमयाव्युषितंचतत् रेखामात्रंप्रदृश्येतरश्मिभिश्चसमन्वितः उदितंतद्विजानीयात्तत्रहोमंप्रकल्पयेत् आश्वलायनः उषोदयंव्युषितउदितेवा सायंतुसएव अस्तमितेहोमइति गौणकालमाहसएव प्रदोषांतोहोमकालःसंगवांतःप्रातरिति छंदोगपरिशिष्टे यावत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्वतः नचलोहितमापैतितावत्सायंतुहूयते औपासनेप्येवम् तस्याग्निहोत्रेणप्रादुष्करणहोमकालौव्याख्यातावित्याश्वलायनोक्तेः अथावसथ्याधानम् पारस्करः अवसथ्याधानंदारकालेदायाद्यकालएकेषामिति . दायाद्यकालोविभागकालः मदनरत्नेव्यासः अग्निर्वैवाहिकोयेननगृहीतःप्रमादिना पितर्युपरतेतेनगृहीतव्यःप्रयत्नतः योगृहीत्वाविवाहाग्निंगृहस्थइतिमन्यते अन्नंतस्यनभोक्तव्यंवृथापाकोहिसःस्मृतः ज्येष्ठभ्रातरिपितरिवासाग्नौकनिष्ठस्यपुत्रस्यवाऽग्न्यभावेपिनदोषः तदाहतत्रैवगार्ग्यः पितृपाकोपजीवीवाभ्रातृपाकोपजीविकः ज्ञानाध्ययननिष्ठोवानदुष्येताग्निनाविना गृहस्थस्याप्ययनमाहसत्यव्रतः अनधीत्यद्विजोवेदंस्नात्वोद्वाह्ययथातथा अधीतेब्रह्मचर्येणसांगंवेदंपुरोगृहे इदंचाधानंज्येष्ठकृताधानेनकार्यम् दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजइतिमनुशातातपोक्तेः स्मार्तेप्येवम् सोदर्यतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहम् आवसथ्यंतथाधानंपतितस्तुतथाभवेदितितत्रैवगार्ग्योक्तेः आज्ञायांत्वदोषमाहसुमंतुः ज्येष्ठोभ्रातायदातिष्ठेदाधानंनैवचाश्रयेत् अनुज्ञातस्तुकुर्वीतशंखस्यवचनंयथा वृद्धवसिष्ठः अग्रजस्तुयदाऽनग्निरादध्यादनुजःकथम् अग्रजोनुमतःकुर्यादग्निहोत्रंयथाविधि हारीतः सोदराणांतुसर्वेषांपरिवेत्ताकथंभवेत् दारैस्तुपरिविद्यंतेनाग्निहोत्रेणनेज्यया अधिकारिणापिभ्रातुरनुज्ञयाकुर्यादितिमदनपारिजातः विवाहस्त्वनुज्ञयापिनेत्यर्थः सोदरोक्तेरसोदराणांसापत्नदत्तकादीनांनदोषः दत्तकस्यापिसो

दरविवाहाभावेदोषएव तदाहहेमाद्रौवसिष्ठः पितृव्यपुत्रान्सापत्नान्परनारीसुतांस्तथा दाराग्निहोत्रसंयोगेनदोषःपरिवेदने परनारीसुताःदत्तकादयः देशांतरेविशेषमाहसएव अष्टौदशद्वादशवर्षाणिवाज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्तीभवतीति क्लीबादावप्यदोषमाहकात्यायनः देशांतरस्थक्लीबैकवृषणानसहोदरान् वेश्यानिष्ठांश्चपतितशूद्रतुल्यातिरोगिणः जडमूकांधबधिरकुब्जवामनखंजकान् अतिवृद्धानभार्यांश्चकृषिसक्तान्नृपस्यच धनवृद्धिप्रसक्तांश्चकामतोकारिणस्तथा कुटिलोन्मत्तचौरांश्चपरिविंदन्नदुष्यति आशार्केपि उन्मत्तःकिल्बिषीकुष्ठीपतितःक्लीबएववा राजयक्ष्मामयावीचनन्याय्यःस्यात्प्रतीक्षितुम् एवंज्येष्ठेछिन्नहस्तादावपिनपरिवेत्तृत्वम् तदाहत्रिकांडमंडनः दर्शेष्टिंपौर्णमासेष्टिंसोमेज्यामग्निसंग्रहम् अग्निहोत्रंविवाहंचप्रयोगप्रथमेस्थितम् नकुर्याज्जनकेज्येष्ठेसोदरेचाप्यकुर्वति क्षेत्रजादावनौजानेविद्यमानेपिसोदरे नाधिकारोविघातोस्तिभिन्नोदर्येपित्रौरसे पंग्वंधमूकबधिरपतितोन्माददूषणे सन्यस्तच्छिन्नहस्तादौयद्वाषंढादिदूषणे जनकेसोदरेज्येष्ठेकुर्यादेवेतरःक्रियामिति आरोहतंदशतंशक्वरीर्ममेत्याधानेमंत्रवर्णाच्च शक्वरीरंगुलीः तंत्ररत्नेप्युक्तम् अंगवैकल्यात्पूर्वमाहिताग्नित्वेऽधिकारेतेन नित्येषु आधानंतुनकुर्यात्तस्यनैमित्तिकत्वादिति एवंचतुरंगुलेपि षडंगुलकाणविवर्णादेस्तस्यैवाधिकारः एकादशासुदशांतर्गतेः शरीरकार्श्यंवाविप्रतिषिद्धमितिहिरण्यकेशिसूत्रेकर्माशक्तिहेतोरेवांगवैकल्यस्यनिषेधात् अतएवद्राह्यायणसूत्रेयाज्यश्चप्रथमैस्त्रिभिर्गुणैर्रहितन्यूनांगस्याप्यधिकारउक्तः अपरार्केउशनाः पितापितामहोयस्यअग्रजोवाथकस्यचित् तपोग्निहोत्रमंत्रेषुनदोषःपरिवेदने पितुराज्ञायामप्यदोषमाहमदनरत्नेसुमंतुः पित्रायस्यतुनाधानंकथंपुत्रस्तुकारयेत् अग्निहोत्रेधिकारोस्तिशास्त्र

स्यवचनंयथेति नाधानंकृतमित्यर्थः एतदाज्ञायामेवेतिहेमाद्रिः यत्तु पितुःसत्यप्यनुज्ञानेनादधीतकदाचनेति तत्सत्यधिकारेज्ञेयम्
अथशूद्रसंस्काराः यमः शूद्रोप्येवंविधःकार्योविनामंत्रेणसंस्कृतः नकेनचित्समसृजच्छंदसातंप्रजापतिः छंदसामंत्रेण व्यासोपि
गर्भाधानंपुंसवनंसीमंतोजातकर्मच नामक्रियानिष्क्रमोन्नप्राशनंवपनक्रिया कर्णवेधोव्रतादेशोवेदारंभक्रियाविधिः केशांतस्नानमु
द्वाहोविवाहाग्निपरिग्रहः त्रेताग्निसंग्रहश्चैवसंस्काराःषोडशस्मृताइत्युक्त्वाह नवैताःकर्णवेधांतामंत्रवर्जंस्त्रियाःक्रियाः विवाहोमं
त्रतस्तस्याःशूद्रस्यामंत्रतोदशेति मदनरत्नेहिरण्यगर्भदानेतु गर्भाधानपुंसवनसीमंतोन्नयनंतथा कुर्युर्हिरण्यगर्भस्यततस्तेद्वि
जपुंगवाइत्युक्त्वा जातकर्मादिकाःकुर्यात्क्रियाःषोडशचापराइत्यत्रक्रियाजातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाविवाहाः
षट् शूद्राणांतुषडेतेपंचमहायज्ञाश्चेत्येकादशेत्युक्तम् रूपनारायणहरिहरभाष्ययोरप्येवम् शार्ङ्गधरस्तु द्विजानांषोडशैवस्युः
शूद्राणांद्वादशैवहि पंचैवमिश्रजातीनांसंस्काराःकुलधर्मतः वेदव्रतोपनयनमहानाम्नीमहाव्रतम् विनाद्वादशशूद्राणांसंस्कारा
नाममंत्रतइत्याह अपरार्कस्तु गर्भाधानमृतौपुंसइत्यत्राह एतच्चातुर्वर्ण्यपरम् नद्विजातिमात्रपरम् तथासत्युपनयनंविधायवा
च्यंस्यादिति तेनतन्मतेषोभवंति ब्राह्मेतु विवाहमात्रसंस्कारंशूद्रोपिलभतांसदेत्युक्तम् अत्रसदसच्छूद्रगोचरत्वेनदेशभेदाद्व्य
वस्था यत्तुमनुः नशूद्रेपातकंकिंचिन्नचसंस्कारमर्हतीति तदर्थमाहमेधातिथिः यत्सामान्यतोनिषिद्धंस्तेयानृतादिनतदतिक्रमेः
स्यपापंयथाद्विजानाम् उपनयनरूपंसंस्कारंचनार्हतीति तेचतूष्णींकार्याः शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधा
स्वाहावषट्कारादिभिर्विनेतिव्यासोक्तेः अमंत्रस्यतु शूद्रस्यविप्रोमंत्रेणगृह्यतेइतिमरीच्युक्तेश्च इयंपरिभाषासर्वार्था ते

नशूद्रधर्मेषुसर्वत्रविप्रेणमंत्राःपठनीयाः सोपिपौराणएवेतिशूलपाणिः एवंस्त्रीणामपीतिदिक् इतिरामकृष्णभट्टात्मजकमलाकरभट्टकृतेनिर्णयसिंधौसंस्कारनिर्णयः छ

अथकूपादिकालाः तत्रजलाशयस्य वाराहः हस्तेचांबुपपौष्णकेशवमघामित्रोत्तरारोहिणीदेवेज्येषुचशुक्रसौम्यशशभृद्वागीशवारांशके रिक्तांछिद्रतिथिंविहायवृषभेनक्रेकुलीरेघटेमीनेकूपतडागकर्मसुनयः शंसंतिशुद्धेष्टमे हस्तोमघानुराधापुष्यधनिष्ठोत्तराणिरोहिण्यः शतभिषगित्यारंभेकूपानांशस्यतेभगणः हेमाद्रौभविष्ये तस्मिन्सलिलसंपूर्णेकार्तिकेतुविशेषतः सुनयः केचिदिच्छंतिव्यतीतेचोत्तरायणे नकालनियमस्तत्रसलिलंतत्रकारणम् दीपिकापि मार्तंडेंदुज्ञशुक्रेज्यासुरजिदश्वयनेमाघषट्कस्यशुक्लेमूलाषाढोत्तराश्विश्रवणगुरुकरेपौष्णशक्राज्यचंद्रे मैत्रेब्राह्मेचपूर्णामदन १३ रवि १२ तिथौसद्वितीयातृतीयेकार्यातोयप्रतिष्ठाज्यशुक्रसितदिनेकालशुद्धेशुभेलग्ने वराहः आग्नेय्यांयदिकोणेग्रामस्यपुरस्यवाभवतिकूपः नित्यंसकरोतिभयंदाहंचसमानसंशयः नैर्ऋत्येबालभयंवनिताक्षयंचवायव्ये दिक्त्रयमेतत्त्यक्त्वाशेषाःशुभावहाःकूपाः वास्तुशास्त्रे भूतिंपुष्टिंपुत्रहानिंपुरंध्रीनाशंमृत्युंसंपदंशत्रुबाधाम् किंचित्सौख्यंशंभुकोणादिकुर्यात्कूपोमध्येगेहमर्थक्षयंच उत्सर्गविधिश्चोक्तोबह्वृचपरिशिष्टे अथातोवापीकूपतडागयज्ञंव्याख्यास्यामः पुण्येन्ह्युदकसमीपेऽग्निंसमाधायवारुणंचरुंश्रपयित्वाज्यभागांते आज्याहुतीर्जुहुयात् समुद्रज्येष्ठेतिप्रत्यृचंततोहविषाष्टौतत्त्वायामीतिपंचत्वंनोअग्नइतिद्वेइमंमेवरुणेतित्रिःस्विष्टकृतंनवमम् मार्जनांतेधेनुंतारयेत् अवतीर्यमाणामनुमंत्रयेत इदंसलिलंपवित्रंकुरुष्वशुद्धाः पूताअमृताःसंतुनित्यम् मांतारयंतीकुरुतीर्थाभिषेकंलोकांल्लोकंतरतेतीर्यतेचेतिपुच्छाग्रेन्वारब्धउत्तीर्यापोअस्मान्मातरःशुंधयंत्वित्यथापराजितायांदिश्युत्थापयेत् सूयवसाद्भगवतीतिहिं

कृतं चेद्विंशं कृष्णवनीत्यलंकृतां विप्राय दद्यादितरां वा शक्त्या दक्षिणां ततउत्सृजेद्देवपितृमनुष्याः प्रीयंतामिति ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयीत विस्तरस्तु मात्स्योक्तोऽस्मत्कृतजलाशयोत्सर्गविधौ ज्ञेयः कूपादेरुत्सर्गाकरणे दोषउक्तो भविष्ये सदा जलं पवित्रं स्यादपवित्रमसंस्कृतं कुशाग्रेणापि राजेंद्र नस्प्रष्टव्यमसंस्कृतं तथा वापीकूपतडागादौ यज्जलं स्यादसंस्कृतं अपेयं तद्भवेत्सर्वं पीत्वा चांद्रायणं चरेत् अथ वृक्षारोपणं चंडेश्वरः आदित्यचांद्रपित्र्यतिष्यविशाखपौष्णमूलोत्तरात्रयतुरंगमवारुणाश्च एतेषु तारकगणेषु हितं नराणां वृक्षादिरोपणमिहोपदिशंति धीराः अथ मूर्तिप्रतिष्ठा वसिष्ठः हस्तत्रये मित्रहरित्रये च पौष्णाद्वयादित्यसुरेज्यभेषु तिस्रोत्तराधातृशशांकभेषु सर्वामरस्थापनमुत्तमस्यात् मात्स्ये चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् नारदस्तु चैत्रं निषेधति विचैत्रेष्वेव मासेषु माघादिषु च पंचस्विति तेनात्र विकल्पः अत्र माघमासो विष्णुप्रतिष्ठाव्यतिरिक्तविषयः माघे कर्तुर्विनाशाय फाल्गुने शुभदा भवेदिति विष्णुधर्मोक्तेरिति हेमाद्रिः मात्स्ये हृढा धनकरी स्फीता तथा प्रतिपदि स्मृता द्वितीयायां धनोपेता तृतीयायां धनप्रदा चतुर्थ्यां नाशसंप्रोति यमस्य स्यात्सुखावहा विनायकस्य देवस्य तथा तत्र हितप्रदा पंचम्यां श्रीयुता कर्तुर्वरदा च तथा भवेत् षष्ठ्यां लक्ष्मीयुता नित्यं सप्तम्यां रोगनाशिनी अष्टम्यां धान्यबहुला नवम्यां च विनश्यति भद्रकाल्याः कृता तत्र कर्तुर्भवति तुष्टये धर्मवृद्धिकरी ज्ञेया दशम्यां तु तथा तिथौ एकादश्यां तथा युक्ता द्वादश्यां सर्वकामदा त्रयोदश्यां तथा ज्ञेया चतुर्दश्यां विनश्यति कृष्णपक्षे पंचदश्यां कर्तुः क्षयकरी भवेत् पंचदश्यां तथा शुक्ले सर्वकामकरी भवेत् आषाढे द्वे तथा मूलमुत्तरात्रयमेव च ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रपदा तथा हस्ताश्विनी रेवती च पुष्यो मृगशिरास्तथा अनूराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते श्रीपतिः रोहिण्युत्तरपौष्णवैष्णवकरादित्याश्विनीवासवानूराधेंदवजीवभेषु-

गदितं विष्णोः प्रतिष्ठापनम् पुष्यश्रुत्यभिजित्सुरेश्वरकयोर्विघ्नाधिपस्कंदयोर्मैत्रे तिग्मरुचेः करे निर्ऋतिभे दुर्गादिकानां शुभं गणपरिवृढरक्षोयक्षभूतासुराणां प्रमथफणिसरस्वत्यादिकानां च पौष्णे श्रवसि सुगतनाम्नो वासवे लोकपानां निगदितमखिलानां स्थापनं च स्थिरेषु तेजस्विनी क्षेमकृदग्निदाहविधायिनी स्याज्जनदा दृढा च आनंदकृत्कल्पविनाशिनी च सूर्यादिवारेषु भवेत्प्रतिष्ठा माधवीये वैखानसः मातृभैरववाराहनरसिंहत्रिविक्रमाः महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने वैशब्दोऽप्यर्थे लिंगप्रतिष्ठायां विशेषः हेमाद्रौ लक्षणसमुच्चये उत्तराशागते भानौ लिंगस्थापनमुत्तमम् दक्षिणे त्वयने पूज्यात्रिवर्षाद्वै भयावहम् स्वगृहे स्थापनं नेष्टं तस्माद्वै दक्षिणायने स्थापनं तु मृकर्तव्यं शिशिरादावृतुत्रये प्रावृषि स्थापितं लिंगं भवेद्वरदयोगदम् हेमंते ज्ञानदं चैव लिंगस्यारोपणं मतम् रत्नावल्याम् माघफाल्गुनवैशाखज्येष्ठाषाढेषु पंचसु मासेषु शुक्लपक्षेषु लिंगस्थापनमुत्तमम् विष्णोरप्याह तत्रैव वैखानसः मार्गशीर्षादिमासौ द्वौ निंदितौ ब्रह्मणा पुरा मासेषु फाल्गुनः श्रेष्ठश्चैत्रो वैशाख एव च ज्येष्ठे वाप्याश्वयुङ्मासे श्रावणे मासि वा भवेत् बौधायनसूत्रे विष्णुप्रतिष्ठामुपक्रम्य आद्द्याश्रोणायां वा यानि चान्यानि पुण्यनक्षत्राणीति कृत्तिकादिविशाखांतेष्वित्यर्थः सर्वदेवेषु मासविशेषो हेमाद्रौ विष्णुधर्मे माघे कर्तुर्विनाशाय फाल्गुने शुभदा भवेत् लोकानंदकरी चैत्रे वैशाखे वरसंयुता आज्ञायुता सदा ज्येष्ठे आषाढे धर्मवृद्धिदा श्रावणे धनहीना स्यात् प्रोष्ठपादे विनश्यति आश्विने नाशमाप्नोति वह्निना कार्तिके तथा सौम्ये सौभाग्यमतुलं पौषे पुष्टिरनुत्तमा दोषान्विताधिमासे स्यात्कर्तुरात्मन एव चेति अत्र श्रावणाश्विनयोर्निषेधो मार्गशीर्षविधिश्च विष्णुव्यतिरिक्तविषयः पूर्वोक्तवचनादिति हेमाद्रिः माघश्रावणभाद्रपदनिषेधः शिवव्यतिरिक्तविषयः तत्र तस्योक्तेः देवीस्थापने तत्रैव विशेषो देवीपुराणे देव्या माघाश्विने मासे उत्तमा

सर्वकामदा तथा न तिथिर्नैव नक्षत्रं नोपवासोऽत्र कारणम् सर्वकालं प्रकर्तव्यं कृष्णपक्षे विशेषतः अन्यश्चात्र विचारो हेमाद्रौ ज्ञेयः नारदः हृत्यर्थहीना कर्तारं मंत्रहीना तु ऋत्विजम् स्त्रियं लक्षणहीना तु न प्रतिष्ठासमो रिपुः अत्राधिकारिण उक्ताः कृत्यकल्पतरौ देवीपुराणे वर्णाश्रमविभेदेन देवाः स्थाप्यास्तु नान्यथा ब्रह्मा तु ब्राह्मणैः स्थाप्यो गायत्रीसहितः प्रभुः चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः भैरवोपि चतुर्वर्णैरन्त्यजानां तथा मतः मातरः सर्वलोकैस्तु स्थाप्याः पूज्याः सुरोत्तमाः लिंगं गृही यतिर्वापि संस्थाप्य तु यजेत्सदा शिवसर्वस्वे भविष्ये यस्तु पूजयते लिंगं देवादिं मां जगत्पतिम् ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः तस्य प्रीतः प्रदास्यामि शुभाल्लोकाननुत्तमान् तिथितत्वे स्कांदे शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये तस्याहमर्चां गृण्हामि चंद्रखंडविभूषिते ब्रह्मचारी गृहस्थो वा वानप्रस्थश्च सुव्रते एवं दिने दिने देवं पूजयेदंबिकापतिम् सन्यासी देवदेवेशं प्रणवेनैव पूजयेत् नमोंतेन शिवेनैव स्त्रीणां पूजा विधीयते एतच्च पुराणप्रसिद्धजीर्णलिंगपूजाविषयम् यानि तु त्रिस्थलीसेतौ नारदीये यः शूद्रेणार्चितं लिंगं विष्णुं वा प्रणमेन्नरः न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तायुतैरपि नमेद्यः शूद्रसंस्पृष्टं लिंगं वा हरिमेव वा स सर्वयातनाभोगी यावदाचंद्रतारकम् पाखंडपूजितं लिंगं नत्वा पाखंडतां व्रजेत् आभीरपूजितं लिंगं नत्वा नरकमश्नुते योषिद्भिः पूजितं लिंगं विष्णुं वापि नमेत्तु यः स कोटिकुलसंयुक्त आकल्पं रौरवं वसेदित्यादीनि तानि नूतनस्थापितलिंगादिविषयाणि यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधि तदाप्रभृत्य शूद्रश्च योषिद्वापि न संस्पर्शेदिति तत्रैवोक्तेः प्रतिष्ठायां तु शूद्रादीनां नाधिकारः स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर स्पर्शने नाधिकारोस्ति विष्णोर्वा शंकरस्य वा यः शूद्रसंस्पृष्टलिंगं विष्णुं वापि नमेन्नरः इहैवाप्यंतदुःखानि पश्यत्यामुष्मिके किमु शूद्रो वानुपनीतो वा स्त्रियो वा पतितोपि वा

केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते इति बृहन्नारदीयस्कांदोक्तेरिति त्रिस्थलीसेतौ पितामहचरणाः चतुर्वर्णैरिति पूर्वोक्तवचनाद्दिष्ठवादिप्रतिष्ठायां शूद्रस्य विकल्प इति युक्तं पश्यामः तत्रैव गोतमः शिवार्चनं सदाप्येव शुचिः कुर्यादुदङ्मुखः वाचस्पतिमतम् प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु चेति प्रयोगपारिजाते गृह्यपरिशिष्टे प्रतिमाः प्राङ्मुखीः कुर्यादुदङ्मुखो यजेताऽन्यत्र प्राङ्मुखः एतच्च स्थिरप्रतिमाविषयं अन्यत्र चलार्चासु अथ प्रतिमाः भार्गवार्चनदीपिकायां भविष्ये सौवर्णी राजती ताम्री मृन्मयी च तथा भवेत् पाषाणधातुयुक्ता वा रीतिकांस्यमयी तथा रीतिः पित्तलं शुद्धदारुमयी वापि देवतार्चा प्रशस्यते अंगुष्ठपर्वादारभ्य वितस्तिं यावदेव तु गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः पंचरात्रे तु मृद्दारुलाक्षागोमेदमधूच्छिष्टमयी न लिखितनिषेध उक्तः भागवते शैली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता काष्ठमधुकस्यैव तत्र काष्ठेषु मधुकमानीय चैव सुधीरे कृत्वा तत्र प्रतिमां चैव प्रतिष्ठाविधिनार्चयेदिति वराहोक्तेः देवीपुराणे सप्ताङ्गुलं समारभ्य यावच्च द्वादशाङ्गुलम् गृहेष्वर्चा समाख्याता प्रासादे वाधिका शुभा तिथितत्वे कालिकापुराणे प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना प्राणप्रतिष्ठां कुर्वीत तस्य देवस्य वा हरेः अन्येषामपि देवानां प्रतिमासु च पार्थिव प्राणप्रतिष्ठा कर्तव्या तस्या देवत्वसिद्धये वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च तस्यैव हृदयेंगुष्ठं दत्वा शश्वच्च मंत्रवित् एभिर्मंत्रैः प्रतिष्ठां तु हृदयेपि समाचरेत् अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरंतु च अस्यै देवत्वमर्चायै मामहेति च कश्चन हयशीर्षपंचरात्रे अर्चकस्य तपोयोगादर्चनस्यातिशायनात् आभिरूप्याच्च बिंबानां देवः सान्निध्यमृच्छति प्रयोगपारिजाते व्यासः प्रतिमापटयंत्राणां नित्यं स्नानं न कारयेत् कारयेत्पर्वदिवसे यदा वा मलधारणम्

लिंगेविशेषस्तिथितत्वेभविष्ये मृद्रत्नगोशकृत्सिष्टताम्रकांस्यमयंतथा कृत्वालिंगंसकृत्पूज्यवसेत्कल्पायुतंदिवि वार्क्षेवित्तप्रदंलिंगं-स्फाटिकंसर्वकामदं कृत्वापूजयविप्रेन्द्रलभ्यस्यवांछितफलम् तत्रैवकालकौमुद्यांस्कांदे अक्षादल्पपरीमाणान्नलिंगंकुर्याचन्नरः कुर्वीतांगुष्ठतोह्रस्वंनकदाचित्समाचरेत् अक्षोऽशीतिर्गुंजागुंजाः पंचाद्यमाषकः तेषोडशाक्षः कर्षोस्त्रीत्यमरकोशात् प्रयोगपारिजाते क्रियासारे नवाष्टसप्तांगुलिकंलिंगंश्रेष्ठमिहोच्यते षट्पंचकचतुर्मानंमध्यमंत्रिविधंस्मृतम् त्रिद्व्येकांगुलिमानंयत्त्रिविधंतत्कनीयसम् एवंनवविधंप्रोक्तंचरलिंगंयथाक्रमम् अथपंचसूत्रीनिर्णयः गौतमीतंत्रे लिंगमस्तकविस्तारोलिंगोच्छ्रायसमासतः परिधिस्तत्रगुणितस्तद्वत्पीठव्यवस्थितम् प्रणालिकातथैवास्यात्पंचसूत्रविनिर्णयः अत्रेदंतत्वम् लिंगमस्तकविस्तारंलिंगोच्चतासमंकृत्वातत्त्रिगुणसूत्रवेष्टनाद्धिलिंगस्थौल्यंकृत्वातत्समंतुचतुरस्रंवापीठविस्तारमधश्चोर्ध्वंचकुर्यात् पीठोच्चतातुलिंगोच्चतातोद्विगुणापीठमध्येलिंगाद्द्विगुणस्थूलंपीठोच्चतातृतीयांशेनकंठंकृत्वातस्योर्ध्वमधश्चसमंवप्रद्वयंत्रयंवाकृत्वालिंगविस्तारषष्ठांशेनपीठोपरिबाह्यमेखलांकृत्वातदंतः संलग्नंतुसमंखातंकृत्वा पीठाद्बहिर्लिंगसमदीर्घांपीठार्धदीर्घांवामूलेदैर्घ्यसमविस्तारांतृतीयांशेनमध्येखातांपीठवत्समेखलांप्रणालिकांकुर्यादिति अत्रमूलंसिद्धांतशेखरेशैवागमेचज्ञेयम् तिथितत्वेब्राह्मे सर्वत्रैवप्रशस्तोऽब्जः शिवसूर्यार्चनंविना तत्रैववाराहपाद्मयोः गृहेलिंगद्वयंनार्च्यंशालग्रामद्वयंतथा द्वेचक्रेद्वारकायास्तुनार्च्येसूर्यद्वयंतथा शक्तित्रयंतथानार्च्यंगणेशत्रयमेवच द्वौशंखौनार्चयेच्चैवभ्रमाच्चप्रतिमांतथा नार्चयेच्चतथामत्स्यकूर्मादिदशकंतथा गृहेऽग्निदग्धाभग्नाश्चनार्च्याः पूज्यावसुंधरे एतासांपूजनान्नित्यमुद्वेगंप्राप्नुयाद्गृही शालग्रामाः समाः पूज्याः समेषुद्वितयंनहि विषमानैवपूज्यास्तु

५५

विषमेष्वेकएवहि शालग्रामशिलाभग्नापूजनीयासचक्रका खंडिताःस्फुटितावापिशालग्रामशिलाशुभा वाराहे दद्याद्भक्तायद्योदेवि-शालग्रामशिलांनरः सुवर्णसहितांदिव्यांपृथ्वीदानफलंलभेत् तत्रैव यःपुनःपूजयेद्भक्त्याशालग्रामशिलाशतम् तत्फलंनैवश-क्नोहंवक्तुंवर्षशतैरपि देवीपुराणे ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चपृथिवीपते स्वधर्मेतत्परोविष्णुमाराधयतिनान्यथा अविभक्तानामपृथग्देवपूजामाहप्रयोगपारिजाते आश्वलायनः पृथगप्येकपाकानांब्रह्मयज्ञोद्विजातिनाम् अग्निहोत्रंसुरार्चाचसंध्यानित्यंभवेत्पृथक् तत्रैवविष्णुधर्मे शालग्रामशिलावापिचक्रांकितशिलांतथा ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेत् इदंस्पर्शसहितपूजाविषयम् शूद्रोवाऽनुपनीतोवास्त्रियोवापतितोपिवा केशवंवाशिवंवापिस्पृष्ट्वानरकमश्नुते ब्राह्मण्यापिहरिंविष्णुंनस्पृशेच्छ्रेयइच्छती सनाथामृतनाथावानस्यानास्तीहनिष्कृतिः स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर स्पर्शनेनाधिकारोस्तिविष्णौवा-शंकरस्यचेतिस्कांदात् स्पर्शरहितातुतयोर्भवत्येव शालग्रामेनस्पृशेत्तुहीनवर्णोवसुंधरे स्त्रीशूद्रकरसंस्पर्शोवज्रस्पर्शाधिकोमतः मोहाद्यःसंस्पृशेच्छूद्रोयोषिद्वापिकदाचन स्वपतेन्नरकेघोरे यावदाभूतसंप्लवम् यदिभक्तिर्भवेत्तस्य स्त्रीणांवापिवसुंधरेदूरादेवास्पृशन्पूजांकारयेत्सुसमाहितइति वाराहोक्तेः शालग्रामशिलामात्रेनिर्बंधोनप्रतिमादौ सर्ववर्णैस्तुसंपूज्याः प्रतिमाःसर्वदेवताः लिंगान्यपितुपूज्यानिमणिभिःकल्पितानिचेति तत्रैवोक्तेः चत्वारोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः वैश्यैर्द्वावेवसंपूज्योतत्रैकःशूद्रजातिभिरितिस्कांदात् अन्येतुदीक्षितविषयत्वेनव्यवस्थामाहुः विष्णुधर्मे तयोरसंभवेचार्चावैसाचेहनवधास्मृता रत्नजाहेमजाचैवराजतीताम्रजातथा रैतिक्यर्चातथालौहीशैलजाद्रुमजातथा अधमाधमाचविज्ञेयामृन्मयाप्रतिमाचया एषां

फलानितत्रैवज्ञेयानि नार्च्यागृहेऽश्मजामूर्तिश्चतुरंगुलतोधिका नवितस्त्याधिकाधातुसंभवाश्रेयइच्छता एवंलक्षणसंपन्नापारंपर्यक्रमागता उत्तमासातुविज्ञेयागुरुदत्तापितत्समा तत्रैवपाद्मे शालग्रामभक्रस्यतत्राप्यामलकीतुल्यापूज्यासूक्ष्मैवयाभवेत् यथायथाशिलासूक्ष्मातथास्यात्तुमहत्फलम् तथा यवमात्रंतुगर्तःस्याद्यवार्धलिंगमुच्यते शिवनाभिरितिख्यातस्त्रिषुलोकेषुदुर्लभः तत्रैव शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित् वाराणस्यायवाधिक्यंसमंताद्योजनत्रयम् योमृतस्तत्समीपेतुमृतोवानीयतांतिके सर्वोमोक्षमवाप्नोतिसत्यसत्यनचान्यथा तत्रैव चक्राङ्कमिथुनंपूज्यनैकंचक्राङ्कमर्चयेत् चक्राङ्कमिथुनात्सार्द्धं शालग्राममपूजयेत् तत्रैववाराहे म्लेच्छदेशेशुचौवापिचक्राङ्कोयत्रतिष्ठति योजनानांतथात्रीणिममक्षेत्रंवसुन्धरे तत्रैवशालग्रामंभक्रस्य क्रयक्रीतापरिज्ञेयामध्यमासार्चिताधमा प्रयोगपारिजातेवाराहे एवंलक्षणसंपन्नापारंपर्यक्रमागता उत्तमासातुविज्ञेयागुरुदत्तापितत्समा अथपार्थिवपूजानंदीपुराणे आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी वरमिष्टंलभेल्लिंगंपार्थिवंयःसमर्चयेत् तस्मात्तुपार्थिवंलिंगंज्ञेयंसर्वार्थसाधकं तत्रैव गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ज्ञेयोनमःशिवायेतिमन्त्रःसर्वार्थसाधकः सर्वमन्त्राधिकश्चायमोंकाराद्यःषडक्षरः भविष्ये मूर्तयोष्टौशिवस्यैताः पूर्वादिक्रमयोगतः आग्नेय्याद्याःप्रपूज्यास्तुवेद्यांलिंगेशिवंयजेत् अननमप्राचीमयत्नःशंभोरितिरुद्रयामलेनिषेधात् नान्तरालंप्राचीकिंतुप्रसिद्धैव तिथितत्त्वेदेवीपुराणे मृदाहरणसंघट्टप्रतिष्ठाह्वानमेवच स्नपनंपूजनंचैवविसर्जनमतःपरं हरोमहेश्वरश्चैवशूलपाणिःपिनाकधृक् शिवःपशुपतिश्चैवमहादेवइतिक्रमः स्कांदे शुक्लाण्यपिचपत्राणिश्रीवृक्षस्यनिवेदयेत् तत्रैवभविष्ये धत्तूरकैश्चयोलिंगंसकृत्पूजयतेनरः सगो

लक्षफलंप्राप्यशिवलोकेमहीयते योगिनीतंत्रे शिवागारेमल्लुकंच सूर्यागारेच शंखकं दुर्गागारे वंशवाद्यंमधुरींनचवादयेत् आन्त्रे हेमाद्रौस्कांदे स्पृष्ट्वारुद्रस्यनिर्माल्यंवाससाआप्लुतःशुचिः प्रयोगपारिजाते क्रियासारे मध्यमानामिकामध्ये पुष्पंसंगृह्यपूजयेत् अंगुष्ठतर्जन्यग्राभ्यांनिर्माल्यमपनोदयेत् अपनीतंचनिर्माल्यंचंडेशायनिवेदयेत् अशून्यमस्तकंलिंगंसदाकुर्वीतपूजकः शूलपाणौलिंगे वरंप्राणपरित्यागःशिरसोवापिकर्तनम् नचैवापूज्यभुंजीतशिवलिंगेमहेश्वरम् सूतकेमृतकेचैवनत्याज्यंशिवपूजनम् तिष्ठितेलिंगे विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः तस्मान्मृदापिकर्तव्यंललाटेवैत्रिपुंड्रकम् रुद्राक्षधारणेविशेषः शिवरहस्ये एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति अवध्यत्वंप्रतिस्त्रोतोवह्निस्तंभंकरोतिच द्विवक्त्रोहरगौरीस्याद्गोवधाद्यघनाशकृत् त्रिवक्त्रोह्यग्निजन्माद्यपापराशिप्रणाशयेत् चतुर्वक्त्रःस्वयंब्रह्मानरहत्यांव्यपोहति पंचवक्त्रस्तुकालाग्निरगम्याभक्ष्यपापनुत् षड्वक्त्रस्तुगुहोज्ञेयोभ्रूणहत्यादिनाशयेत् सप्तवक्त्रःस्त्वनंतःस्यात्स्वर्णस्तेयादिपापहृत् विनायकोष्टवक्त्रःस्यात्सर्वानृतविनाशकृत् भैरवोनववक्त्रस्तुशिवसायुज्यकारकः दशवक्त्रःस्मृतोविष्णुर्भूतप्रेतभयापहः एकादशमुखोरुद्रोनानायज्ञफलप्रदः द्वादशास्यस्तथादित्यःसर्वरोगनिबर्हणः त्रयोदशमुखःकामःसर्वकामफलप्रदः चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपरइति तथा विनामंत्रेणयोधत्तेरुद्राक्षंभुविमानवः सयातिनरकान्घोरान्यावदिंद्राश्चतुर्दश पंचामृतपंचगव्यस्नानकालेप्रयोजयेत् रुद्राक्षस्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा त्र्यंबकादिमंत्रंचतथातत्रप्रयोजयेत् यद्वा ॐ अघोर ओंहें अघोरतर ॐ हौंहांनमस्तेरुद्ररूपेहेंस्वाहा अनेनाभिमंत्र्यधारयेत् तथा अष्टोत्तरशतंकार्यानस्तुःपंचाशद्वा सप्तविंशतिमाना

ततोहीनाधमाःस्मृताः प्रजापतिः मोक्षार्थीपंचविंशत्याधनार्थीत्रिंशताजपेत् पुष्ट्यर्थीपंचविंशत्यापंचदशयाभिचारके सप्तविंशतिरुद्राक्षमालयादेहसंस्थया यत्करोतिनरःपुण्यंसर्वंकोटिगुणंभवेत् योददातिद्विजेभ्यश्चरुद्राक्षंसुविसन्सुखम् तस्यप्रीतोभवेद्रुद्रः स्वपदंचप्रयच्छतीति पदार्थादर्शे बोपदेवः रुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतिद्वे षट्षट्कर्णप्रदेशेकरयुगलकृतेद्वादशद्वादशैव बाह्वोरिंदोःकलाभिर्नयनयुगकृतेएकमेकंशिखायां वक्षस्यष्टाधिकंयःकलयतिशतकंसःस्वयंनीलकंठः हेमाद्रौशिवधर्मे स्नानेपलशतंज्ञेयमभ्यंगःपंचविंशतिः पलानांद्वेसहस्रेतुमहास्नानंप्रकीर्तितम् पंचविंशत्पलंलिंगेअभ्यंगंकारयेदस्य शिवस्यसर्पिषास्नानंप्रोक्तंपलशतेनच तावतामधुनाचैवदध्नाचैवततःपुनः तावतैवचक्षीरेणगव्येनैवभवेत्ततः भूयःसार्द्धसहस्रेणपलानामैक्षवेणच रसेनकारयेत्स्नानंभक्त्याचोष्णांबुनाततः विष्ण्वादौतुस्कांदे क्षीराद्दशगुणंदध्नाघृतेनैवदशोत्तरम् घृताद्दशगुणंक्षौद्रंक्षौद्राच्चैक्षवजंतथा ब्राह्मे देवानांप्रतिमायत्रघृताभ्यंगक्षमाभवेत् पलानितत्रदेयानिमृन्मय्यापंचविंशतिः इदंक्रोडीकृताभिप्रायेण तत्रैवसंग्रहे विष्वक्सेनायदातव्यंनैवेद्यस्यशतांशकम् पादोदकप्रसादंचलिंगेचंडेश्वरायतु पंचायतनसन्निवेशमाहबोपदेवः पदार्थादर्शश्च शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्यनागसुतारवौहरगणेशाजांबिकाःस्थापिताः देव्यांविष्णुहरेभवक्त्ररवयोलंबोदरेजेश्वरेनांबाःशंकरभागतोऽतिसुखदाव्यस्तास्तुहानिप्रदाः शंकरभागतः ईशानकोणादारभ्यप्रदक्षिणमित्यर्थः अत्रदिक्स्वरूपमुक्तंप्रयोगपारिजातेमंत्रशास्त्रे देवस्यमुखमारभ्यदिशंप्राचींप्रकल्पयेत् तदादिपरिवाराणामंगाद्यावरणःस्थितिः तत्रक्रमः पाद्मे रविर्विनायकश्चंडीईशोविष्णुस्तुपंचमः अनुक्रमेणपूज्यंते

व्युत्क्रमेतुमहद्भयम् तथा पूज्यपूजकयोर्मध्ये प्राचीप्रोक्ताविचक्षणैः अथकेशवादिमूर्तयः बोपदेवः केविगोवाद्याःपुरुपेप्रजान्त्यहृ ममास्त्रिना वाधोनृहसानिश्रीपाशाच्चगेविगपेचपे अत्रकोविगाविस्याद्यैः केशवविष्णवादिचतुर्विंशतिमूर्तयोऽभिधीयंते शातुशूरवात् चगेचक्रगदेज्ञेयेत्यर्थः शिष्टभुजेपद्मंत्वर्थतःसिद्धं अत्रदक्षिणाधःकरक्रमेणज्ञेयम् दक्षिणोऽधःकरक्रमादितिहेमाद्रे वचनात् तेनहेमाद्रिणासंवादः विशब्देनविपरीतंगचेइत्यर्थः अत्रापिशब्दादनुवृत्तिः शंखाद्गदाचक्रेइत्यर्थः गपेइत्यत्रापिशादनुवर्तते शंखाद्गदापद्मेइत्यर्थः विपरीतेपद्मगदेइत्यत्रापिशंखाज्ज्ञेये चपेचक्रपद्मे शंखाच्चक्रपद्मेइत्यर्थः विइत्यत्रापिपद्मचक्रेइत्यर्थः तेनचगदेइत्यष्टौमूर्तयः गपेइत्यष्टौमूर्तयः चपेइत्यत्र अत्रमूलंहेमाद्रौज्ञेयम् अथबोधायनसूत्रम् त्रैविक्रमीचानुस्मृत्य लिंगार्चाप्रतिष्ठोच्यते यजमानः पूर्वोक्तकाले पूर्वेद्युः दशाद्वादशषोडशान्यतरहस्तंमंडपंकृत्वा गृहेएकहस्तमात्रंचतुरस्रंकुंडं स्थंडिलंवापूर्वतोहस्तमात्रांवेदींनैर्ऋतेवारुद्रमंडलमध्येवेदींतदुपरिसर्वतोभद्रंकृत्वाप्राणानायम्यास्यांमूर्तौदेवस्यसान्निध्यसिद्ध्यर्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽमुकमूर्तिप्रतिष्ठांकरिष्येइतिसंकल्प्य गणेशपूजापुण्याहवाचनमातृकापूजननांदीश्राद्धानिकृत्वाचार्यंचतुरोऋत्विजश्चवृत्वावस्त्राद्यैःपूजयेत् अथाचार्यः यदत्रसंस्थितमितिसर्षपान्विकीर्यापोहिष्ठेतिकुशोदकेनभूमिंप्रोक्ष्य देवाआयांतु यातुधानाअपयांतु विष्णोदेवयजनंरक्षस्वेतिभूमौप्रादेशंकृत्वाऽस्मत्कृततुलापञ्चुनिमार्गेणमंडपप्रतिष्ठांकृत्वाऽकृत्वावापूर्वरात्रौहिरण्यापधानंदेवंपंचगव्यहिरण्ययवदूर्वाश्वत्थपलाशपर्णैरापोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतसृभिः पवमानःसुवर्चनइत्यनुवाकेनाभिषिच्य व्याहृतिभिरिदंविष्णुरितिफलयवदूर्वाःसमर्प्यरक्षोहणमितिहस्तेकंकणंबध्वा वा

सासाच्छाद्य अवने हेड उदुत्तममिति जलेधिवासयेत् इदं बौधायनोक्तम् ततश्चललिंगार्चायां वा अत्राग्निं प्रतिष्ठाप्य गोक्षीरनीवारचरुं कृत्वा विष्णुश्चेत् कृसरमपि श्रपयित्वा ज्यभागान्ते पलाशोदुंबराश्वत्थशम्यपामार्गसमिद्भिः आज्येन चरुणा तिलैर्वा प्रत्येकमष्टाविंशतिमष्टौ वा हुत्वा लोकपालमूर्तिमूर्तिपतिभ्यो हुत्वा स्थाप्य देवमंत्रेण पूर्वोक्तसमित्तिलनैवारचर्वाज्यैरष्टसहस्रमष्टशतमष्टविंशतिं वा हुत्वा अग्निर्यजुर्भिरित्यनुवाकेन दशाहुतीर्जुहुयात् प्रतिद्रव्यहोमान्ते देवपादनाभिशिरः स्पृशेत् आज्यहोमे चोक्तततः सजलकुम्भे सम्पातान्नयेत् तेषां मंत्राः इडायेदेइ इतीडस्य स्योनेति पृथिवीमूर्तेः अघोरेभ्य इति तत्पतेः सर्वस्य अग्न आयाहीत्यग्नेः अग्निं दूतमित्यग्निमूर्तेः नमः शर्वाय च पशुपतये चेति पशुपतेः यमाय सोमं यमस्य असि हि वीरेति यजमानमूर्तेः स्तुहि श्रुतं तत्पतेः उग्रस्य असुन्वन्तमिति निर्ऋतेः आकृष्णेन सूर्यमूर्तेः यो रुद्रो अग्नौ इति तत्पते रुद्रस्य इमं मे वरुणस्य शंनो देवीजलमूर्तेः नमो भवायेति भवस्य आनो नियुद्भिरिति वायोः वात आवातु वायुमूर्तेः तमीशानं तत्पतेरीशानस्य आप्यायस्वेति कुबेरस्य वयं सोमेति सोममूर्तेः तत्पुरुषाय महादेवस्य अभित्वा ईशानस्य आदित्प्रत्नस्येत्याकाशस्य नमउग्राय चेति तत्पतेर्भीमस्य ततो देवस्य पादौ स्पृशेत् एवं द्वितीये हुत्वा नाभिं तृतीये मध्यं चतुर्थे उरः पंचमे शिरः स्पृष्ट्वा प्रतिपर्यायं संपातजलेन देवं अभिषिंचेत् ततः स्विष्टकृदादिहोमशेषं समाप्यार्चां शोधयेत् स्थिरलिंगार्चादौ तु नदानीमग्निस्थापनहोमादिकार्यम् ततो देवं नत्वा स्वागतं देव देवेश विश्वरूप नमोस्तु ते शक्तेपि त्वदधिष्ठाने शक्त्या कुर्मः सहस्वतामिति संप्रार्थ्य उत्तिष्ठ ब्रह्मणस्पते इति सूक्तेनोत्थाप्य पूर्वमकृतं तदुत्तारणे अधुना वा कार्यम् अग्निः सप्तिमिति सूक्तमग्निपदहीनं पठित्वा तत्सहितं पुनः

पठेत् एवमष्टसहस्रमष्टशतमष्टाविंशतिंवा पठन् जलंपातयेत् ततोर्चांद्वादशवारंमृदा जलेनच प्रक्षाल्यसंश्रवत् पंचगव्यंकृत्वा पयः पृथिव्यामावोराजानमितिच संस्नाप्य आप्यायस्वदधिक्राव्णस्तेजोसिमधुवाता आयंगौरिति पंचामृतैः संस्नाप्य लिंगंचेन्नमस्ते रुद्र मन्यव इत्यष्टाभिः संस्नाप्य घृतेनाभ्यज्योद्वर्तनेनोष्णोदकेन प्रक्षाल्य गंध दत्वा संपातोदकेनाभिषिच्य सपल्लवैः चतुर्भिः कुंभैरापोहिष्ठेति त्रिभिराकलशाष्वितिच प्रत्येकंसमुद्रज्येष्ठाइतिचतुर्भिराकलशाष्वितिचमीलितैः संस्नाप्योदुंबरादिपीठेर्चामुपवेश्य परितोऽष्टदिक्षु सजलकुंभान्संस्थाप्य तेषु गंधपुष्पदूर्वाः क्षिप्त्वाद्ये सप्तमृदः द्वितीये पुष्करपर्णशमीविकंकताश्मंतकत्वचः पल्लवांश्च तृतीयादिषु सप्तधान्यं पंचरत्नफलपुष्पाणि कुशदूर्वागोरोचनसंपातोदकगंधफलसर्वौषधीः क्षिप्त्वा क्रमेणापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इतिचतुर्भिः पवमानानुवाकेन चाभिषिच्यैकं कुंभे शमीपलाशवटखदिरबिल्वाश्वत्थविकंकतपनसाम्रशिरीषोदुंबराणां पल्लवान् कषायांश्च क्षिप्त्वा अश्वस्थव इत्यभिषिच्य पंचरत्नोदकेन हिरण्यवर्णा इति संस्नाप्य वाससी दत्वा उपवीतादि दीपांतं कृत्वा हिरण्यगर्भः य आत्मदा यः प्राणतः यस्येमे येनद्यौः यंक्रंदसी आपोहयन् यश्चिदापो इत्यष्टौ पिष्टदीपान् दत्वा सुवर्णशलाकया तैजसपात्रस्थं मधुघृतं च गृहीत्वा- चित्रंदेवानां तेजोसीति मंत्राभ्यां ॐ नमो भगवते तुभ्यं शिवाय हरये नमः हिरण्यरेतसे विष्णो विश्वरूपायतेनमइति च दक्षिणसव्यदेवनेत्रे मंत्राष्टत्यालिखेत् अंजंतित्वेसांजनेन मधुनावाक्त्वा देवस्यत्वेति मध्वाज्यशर्कराभिरक्त्वा तैनैवांजनेन पुनरंजयेत् अत्रानज्मीतिशेषः स्थिरलिंगेतु स्वर्णसूच्यागंधेन ॐ नमो भगवते रुद्राय हिरण्यरेतसे परायपरमात्मने विश्वरूपायोमाप्रियायनम इत्यङ्काजनादिनाजयेत् ततः आदर्शभक्ष्यादि दर्शयेत् ततः कर्ता आचार्याय गामृत्विग्भ्यश्च दक्षिणां दद्यात् अथाचार्यः

प्रत्यृचमादौप्रणवंवदन् पुरुषसूक्तेनस्तुत्वा वंशपात्रेपंचवर्णोदकेनदेवस्यनीराजनंकारयित्वारुद्रायचतुष्पथादौदद्यात् मंत्रस्तु ॐनमोरुद्रायसर्वभूताधिपतयेदीप्तशूलधरायोमादयितायविश्वाधिपतयेरुद्रायदेवेनमोनमः शिवमगर्हितकर्मास्तुस्वाहेति अश्वत्थपर्णेभूतेभ्योनमइति केचिदेतद्रात्रौस्थिरप्रतिष्ठायामिच्छंति अथाचार्यः सर्वतोभद्रेदेवानावाहयेत् मध्येब्रह्माणम् पूर्वादिदिक्षुइंद्रादिलोकपालान् ईशानेंद्राद्यंतरालेषु वसून्रुद्रान् आदित्यान् अश्विनौ विश्वान्देवान् पितृन् नागान् स्कंदवृषौ ब्रह्मेशानाद्यंतरालेषुदक्षविष्णुदुर्गास्वधाकारमृत्युरोगान् समुद्रान्सरितः मरुतः गणाधिपंचेति मध्येएव पृथिवीमेरुंसंस्थाप्यदेवंचावाह्य प्रागादिवज्रशक्तिदंड खड्ग पाशं अंकुशं गदां शूल तद्बाह्ये गोतमंभरद्वाज विश्वामित्रं कश्यपं जमदग्निं वसिष्ठं अत्रिं अरुंधतींच. तद्बाह्येनवग्रहान् तद्बाह्ये ऐंद्रीं कौमारीं ब्राह्मीं वाराहीं चामुंडां वैष्णवीं माहेश्वरी वैनायकीमिति एताः नामभिरावाह्यसंपूज्य अर्चायांदेवंतन्मंत्रेणावाह्य मंडलमध्येर्चास्वप्रतिष्ठोभवतीतिनिवेश्यसंपूज्य वह्नौमंडलदेवतानांनामभिस्तिलाज्येनदशदशाहुतीर्हुत्वा शय्यायांदेवमारोप्य पुरुषसूक्तोत्तरनारायणाभ्यांस्तुत्वादेवंन्यासंकुर्यात् तद्यथा पुरुषात्मनेनमः प्राणात्मनेन० प्रकृतितत्वाय० बुद्धितत्वाय० अहंकारतत्वाय० मनस्तत्वाय० इतिसर्वांगे प्रकृतितत्वाय० बुद्धितत्वाय० हृदितत्वाय० शब्दतत्वाय० शिरसि स्पर्शतत्वाय० त्वचि रूपतत्वाय० हृदि एवंरसगंधश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक् पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाशसत्वरजस्तमोदेहतत्वानिविन्यसेत् ततःपुरुषसूक्तस्याद्यमृग्द्वयंकरयोः तदुत्तरंजान्वोः तदुत्तरंकट्योः तंयज्ञमितितिस्रः नाभिहृत्कंठेषुतस्मादश्वेतिद्वयंबाह्वोः ब्राह्मणस्येतिद्वयंनासयोः नाभ्येतिद्वयमक्ष्णोः अंत्या

शिरसि केचित्तत्न्यासमन्यथामाहुः पुरुषप्रकृतिमहदहंकारतत्वानि शब्दस्पर्शरूपरसगंधतन्मात्राणि आकाशवायुतेजोपृथिवीश्रोत्रत्वक्चक्षूरसनाघ्राणवाक्पाणिपादपायूपस्थमनस्तत्वानीति केचिदेतानिस्थिरलिंगादावेवेच्छंति ततःसुखशायीभवेति शय्यायांदेवंस्वापयित्वा मंडलशय्ययोरंतरालेनगंतव्यमितिप्रैषंदत्वामंडलदेवताभ्योनामभिः पायसेनचरुणावाबलीन्दद्यात् नीवाररचरुशेषेणादिग्बलिम् नेदंस्थिरप्रतिष्ठायाम् स्थिरलिंगार्चादौत्वयंविशेषः अग्निस्थापनहोमवर्ज्यंसर्वंपूर्ववत्कृत्वा इदानीमग्निस्थापनंकृत्वापूर्वोक्तहोमंकुर्यात् नात्रनैवारश्चरुः विष्णुश्चेत्पूर्वोक्तहोमंकृत्वापुरुषसूक्तेनप्रत्यृचमाज्यंहुत्वाइदंविष्णुरितिपादौस्पृष्ट्वा पुनस्तावेवहुत्वा विष्णोर्नुकमितिनाभिंस्पृष्ट्वापुनस्तावेवहुत्वा अतोदेवेतिशिरःस्पृष्ट्वापुनस्ताएवहुत्वापुरुषसूक्तेनसर्वांगंस्पृशेत् स्थिरलिंगंचेदग्निस्थापनादिपूर्वोक्तसमिदाज्यतिलाहुतीर्हुत्वा यातइषुरित्यनुवाकांतद्रापेसहस्राणीत्यनुवाकाभ्यांचप्रत्यृचमाज्यंहुत्वासर्वोवैरुद्रइतिमूलंस्पृशेत् पुनस्ताएवहुत्वाकद्रुद्रायेतिमध्यं पुनस्ताएवहुत्वा नमोहिरण्यबाहवइत्यग्रम् पुनस्ताएवहुत्वासर्वरुद्रेणसर्वांगंस्पृशेत् ततोधामंतइतिपूर्णाहुतिंजुहुयान्नवा एवमधिवासनंकृत्वापरेद्युः सद्योवापीठिकांस्नापयित्वामहीमूषित्यावाह्य अदितिर्द्यौरितिस्तुत्वा ह्रींनमइतिसंपूज्यतेनैवपूर्णाहुतिंहुत्वा उत्तिष्ठब्रह्मणस्पतइतिदेवमुत्थाप्यपुष्पांजलिंदत्वा पुरुषसूक्तेनस्तुत्वाउदुत्यमित्युत्थाप्यकनिक्रददितिसूक्तेनविष्णुं सद्योजातमितिपंचानुवाकैर्लिंगंगृहंप्रवेश्य पीठिकायांइंद्रादिनामभिरष्टरत्नानिक्षिप्त्वासप्तधान्यरूप्यदृषमनःशिलाःक्षिप्त्वापायसेनसंलिप्य प्रणवेनांगन्यासंकृत्वा सुवर्णशलाकामंतरितांकृत्वा ॐ सुलग्नेप्रतितिष्ठपरमेश्वरेत्युक्त्वा अतोदेवेतिविष्णुं रुद्रेणचलिंगंस्थापयेत् ततःप्राणप्रतिष्ठा चलार्चादौत्वधिवासनांतेपरे-

द्युरुत्तिष्ठब्रह्मणस्पतइतिदेवमुत्थाप्यपुरुषसूक्तोत्तरनारायणाभ्यांस्तुत्वाघृतेव्रीहिचरुंहुत्वातद्देवतामंत्रेणदशाहुतीर्हुत्वानामभिर्जुहुयात् अग्नयेस्वाहा सोमायस्वाहा धन्वंतरयेस्वाहा कुह्वैस्वाहा अनुमत्यैस्वाहा प्रजापतयेस्वाहा परमेष्ठिनेस्वाहा ब्रह्मणेस्वाहा अग्नयेस्वाहा सोमायस्वाहा अग्नयेन्नादायस्वाहा अग्नयेन्नपतयेस्वाहा प्रजापतयेस्वाहा विश्वेभ्योदेवेभ्यःस्वाहा सर्वेभ्योदेवेभ्यःस्वाहा भूर्भुवःस्वः अग्नयेस्विष्टकृतेइति ततः सप्ततेपुनरस्त्वेत्याभ्यांपूर्णाहुतिः ततः आचार्योयाओषधीरितिसर्वौषधीःसमर्प्य संपातोदकंदेवमंत्रेणशतवारमभिमंत्र्य तेनैवाभिषिंचेत् ततः उत्तिष्ठेतिदेवमुत्थाप्य विश्वतश्चक्षुरित्युपस्थायदेवंध्यात्वाजपेत् ब्रह्मणेनमः एवंविष्णवेरुद्राय० इंद्रादीनष्टौवसुभ्योरुद्रेभ्यआदित्येभ्यो ऽश्विभ्यांमरुद्भ्यः कुबेरायगंगादिमहानदीभ्यो ऽग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयेसर्वेशायविश्वेभ्योदेवेभ्योब्रह्मणेनम इति ततः संपातोदकेनयजमानमभिषिच्य देवंध्यात्वाप्रतितिष्ठपरमेश्वरेतिपुष्पांजलिंनिवेद्य सच्चिदानंदब्रह्मैवभक्तानुग्रहायगृहीतविग्रहकरचरणाद्यवयवविनश्वरचक्राद्यायुधवंतंनिजवाहनाद्युपेतंनिजहृत्कमले ऽवस्थितंसर्वलोकसाक्षिणमणीयांसं परमेष्ठ्यसिपरमांश्रियंगमयेति मंत्रेणपुष्पांजलावागतंविभाव्या ऽर्चायांविन्यस्यप्राणप्रतिष्ठांकुर्यात् यथा प्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानिच्छंदांसि क्रियामयवपुः प्राणाख्यादेवता आंबीजम् क्रोंशक्तिः प्राणप्रतिष्ठायांविनियोगः ततोऋष्यादीन्क्रमेणशिरोमुखहृदयगुह्यपादेषुविन्यस्य ॐ कंखंगंघंङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आंहृदयायनमः ॐ चंछंजंझंञंइंशब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा ॐ टंठंडंढंणंउंश्रोत्रत्वक्चक्षुर्जिह्वाघ्रा

णात्मने ऊं शिखायै वषट् ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम् ओं पं फं बं भं मं वचनादानविहरणोत्सर्गानंदात्मने औं नेत्रत्रयाय वौषट् ओं यं रं लं वं शं षं सं हं ळं क्षं अं मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट् एवं आत्मनि देवे च कृत्वा देवस्य रक्षां जपेत् ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य सर्वेन्द्रियाणि ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति ततोऽचोत्हृदयंगुष्ठं दत्वा जपेत् अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च अस्यै देवत्वमर्चायै मामहेति च कश्चनेति ततः प्रणवेन संरुध्य सजीवं ध्यात्वा ध्रुवा द्यौरिति नूनं जप्त्वा कर्णे गायत्रीं देवमन्त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरः स्पृष्ट्वा इहैवैधीति त्रिर्जपेत् ततः कर्त्ता स्वागतं देव देवेश मद्भाग्यात्त्वमिहागतः प्राकृतस्त्वमदृष्ट्वा मां बालवत् परिपालय धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभाय नः सान्निध्यं तु सदा देव स्वार्चायां परिकल्पय यावच्च ज्ञानी सर्वास्ति त्वस्य प्रतिघातिनः तावत्त्वयात्र देवेश स्थेयं भक्तानुकम्पया भगवन्देवदेवेश त्वं पिता सर्वदेहिनाम् येन रूपेण भगवंस्त्वया व्याप्तं चराचरम् तेन रूपेण देवेश स्वार्चायां सन्निधौ भवेति नमेत् एतदन्ते सर्वदेवानां समानं देवमन्त्रश्च मूलमन्त्रो वैदिको वा ग्राह्यः अथाचार्यः कर्त्ता वा लिंगमर्चेत् ॐ भूः पुरुषमावाहयामि ॐ भुवः पुरुषमावाहयामि ॐ स्वः पुरुषमावाहयामि ॐ भूर्भुवः स्वः पुरुषमावाहयामीत्यावाह्य प्रणवेनासनं दत्वा तेन दूर्वाश्यामाकविष्णुक्रान्तापद्ममिश्रं पाद्यम् इमा आपः शिवतमाः पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पा

द्यास्त्वाजुषन्तांप्रतिगृह्यतांप्रतिगृण्हातुभगवान्महाविष्णुर्विष्णवेनमइतिपाद्यम् भगवान्महादेवोरुद्रायनमइतिलिंगे इमाआपआचमनीयास्त्वाजुषतामित्याचमनीयम् अर्घ्योइत्यर्घ्यम् ततोवेदमंत्रैःसंस्नाप्यइदंविष्णुरितिविष्णोः नमोऽस्तुनीलग्रीवायेतिलिंगेप्रतिसर्वविस्नस्य इमेगंधाःशुभादिव्याःसर्वगंधैरलंकृताः पूताब्रह्मपवित्रेणपूताःसर्वस्यरश्मिभिः पूताइत्यादिपूर्ववत् इतिगंधम् इमेमाल्याःशुभादिव्याःसर्वमाल्यैरलंकृताः पूताइत्यादिमाल्यम् इमेपुष्पाःशुभाइत्यादिपुष्पम् वनस्पतिरसोद्भूतोगंधाढ्योधूपउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् प्रतिगृण्हात्वित्यादिधूपम् ज्योतिःशुक्रंचतेजश्चदेवानांसततंप्रियः प्रभाकरःसर्वभूतानांदीपोयंप्रतिगृह्यताम् इतिदीपंदत्वा विष्णोःसंकर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्दनोपेन्द्रहरिश्रीकृष्णेतिद्वादशनामभिः केशवादिद्वादशनामभिर्वापुष्पाणिसमर्प्य तैरेवतर्पणंकृत्वा पायसगुडौदनचित्रौदनानि पवित्रंतेविततमितिनैवेद्यंकृसरंपूर्वोक्तनामभिर्हुत्वातेनैवशार्ङ्गिणेश्रियेसरस्वत्यैविष्णवेइतिहुत्वा विष्णोर्नुकंवीर्याणि॰ तदस्यप्रियमभिपाथो॰ प्रतद्विष्णुस्तवतेवीर्येण॰ परोमात्रया॰तन्वावृधान॰ विचक्रमेपृथिवीमेषएतां॰ त्रिर्देवःपृथिवीमेषएतां॰ इतिद्वादशनामभिश्चाज्येस्वाहेतिजुहुयात् लिंगेतुदीपांतंकृत्वा भवाय॰ देवाय॰ शर्वाय॰ ईशानाय॰ पशुपतये॰ रुद्राय॰ उग्राय॰ भीमाय॰ महतेदेवायनमइति पुष्पाणिदत्वा तैरेवतर्पणंकृत्वा पवित्रंतेइतिपायसंगुडौदनंचनिवेद्यपूर्वोक्तनामभिःकृसरंहुत्वा भवस्यदेवस्यपत्न्यैस्वाहेत्याद्यष्टभिर्गुडौदनंहुत्वा भवस्यदेवस्यसुतायस्वाहेत्याद्यैर्हरिद्रौदनंहुत्वा त्र्यंबकंयजामहे॰ मानोमहांतमुतमानो॰ मान

स्तोके तनये० आरात्तेगोघ्नउतपूरुषघ्ने० विकिरिद्रविलोहित० सहस्राणिसहस्रशोइति द्वादशएतैर्हुत्वा शिवायशंकरायसहमानाय शितिकंठाय० कपर्दिने ताम्राय अरुणाय० अपगुरमाणाय हिरण्यबाहवे सस्पिंजराय बभ्लुशाय हिरण्यायेतिचजुहुयात् ततःस्विष्टकृदादिहोमशेषंसमाप्य पूर्वोक्तसर्वहविर्भिर्विष्णवेलिंगायवाबलिंदद्यात् मंत्रस्तु त्वामेकमाद्यंपुरुषंपुरातननारायणंविश्वसृजंयजामहे त्वमेवयज्ञोविहितोविधेयस्त्वमात्मनात्मन्प्रतिगृण्हीष्वहव्यमिति लिंगेतुनारायणपदरुद्रशिवमितिवदेत् ततोऽश्वत्थपर्णेभूर्भुवःस्वःशमिति हुतशेषंनिधायप्रदक्षिणीकृत्याविश्वभुजेआत्मनेपरमात्मनेनमइतिनत्वा आचार्यायशतंतदर्धंतदर्धंद्वादशतिस्रएकांवागांदत्वाऋत्विग्भ्योपिदक्षिणांदत्वाशतंद्वादशवाब्राह्मणान्भोजयेदितिसंक्षेपः प्रासादमात्रेनूतनेतुमात्स्योक्तजलाशयप्रतिष्ठाविधिमेवकुर्यात् गोरुत्तारणपात्रीप्रक्षेपादिस्तुनभवतिद्वारलोपात् वारुणहोमस्थानेवास्तुहोमः अन्यत्तद्वत् इतिभट्टकमलाकरकृतोलिंगार्चाप्रतिष्ठाविधिः ॥छ॥ अथपुनःप्रतिष्ठामधिकृत्यहयशीर्षपंचरात्रे चांडालमद्यसंस्पर्शाद् चितावह्निनाथवा अपुण्यजनसंस्पृष्टाविप्रक्षतजदूषिता संस्कार्येतिशेषः पदार्थादर्शेब्राह्मे खंडितेस्फुटितेदग्धे प्रोक्षमानविवर्जिते यागहीनेपशुस्पृष्टेपतितेदुष्टभूमिषु अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते दशस्वेतेषुनोचक्रुःसन्निधानंदिवौकसः यागःपूजा पशुर्गर्दभादिः पंचरात्रे खंडितास्फुटितादग्धायस्माद्वाभयावहा तस्मात्सम्यक्सुरेन्द्रांतुपूर्वोक्तविधिनानरः अर्चाभंगादावुपवासःकार्यः नराज्ञोविप्लवेस्त्रीयाःकृतार्चाविप्लवेतथेति विष्णुधर्मोक्तेः सिद्धांतशेखरे चोरचंडालपतितश्वोदक्यास्पर्शनेसति शिवाद्युपहतौचैवम

तिष्ठां पुनराचरेत् पंचरात्रे अंगादूंगादिसंधाने प्रतिष्ठां पुनराचरेत् जलाधिवासविहितनेत्रोन्मीलनवर्जिताम् शुद्धिवेके
विष्णुः द्रव्यवत् कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन शुद्धिरिति अर्चाःप्रतिमाः तद्द्रव्यस्य ताम्रादेरुक्तशौचं कृत्वा पु
नः प्रतिष्ठां कुर्यादित्यर्थः स्मृत्यर्थसारेप्येवम् तद्विधिर्बौधायनसूत्रे पूर्वप्रतिष्ठितस्याबुद्धिपूर्वमेकरात्रं द्विरात्रमेकमासं द्वि-
मासं वार्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने पूर्वोक्ते काले पुण्याहं वाचयित्वा युग्मान् ब्राह्मणान् भोजयित्वा निशायां जला
धिवासं कृत्वा प्रभाते कलशपूर्णेन पंचगव्येन तत्तन्मंत्रैः स्नापयित्वाऽन्यकलशं शुद्धोदकेनापूर्य तस्मिन्नवरत्नानि प्रक्षिप्य तंक
लशं तत्र गायत्र्याष्टसहस्रमष्टशतमष्टाविंशतिवारं वाभिमंत्र्य तेनोदकेन देवं स्नापयेत्ततः शुद्धोदकेन स्नापयेदष्टसहस्रमष्टश
तमष्टाविंशतिं वा पुरुषसूक्तेन मूलमंत्रेण च ततः पुष्पाणि दत्वा यथासंभवमर्चयित्वा गुडोदनं निवेदयेदिति बुद्धिपूर्वं तु विच्छे
दे पूर्वोक्तां प्रतिष्ठां पुनः कुर्यात् पूर्वोक्तविष्णुवचनात् इदं मलमासशुक्रास्तादावपि कार्यमिति मदनरत्ने हेमाद्रौ च देवा-
र्चाभासादभेदने तु शूलपाणौ काश्यपः वापीकूपारामसेतुसभातडागवप्रदेवतायतनभेदने प्रायश्चित्तं च तस्य आज्याहुतीर्जुहु
यात् इदं विष्णुर्मानस्तोके विष्णोः कर्माणि पादोस्यति यां देवतासुत्सादयति तस्यै देवतायै ब्राह्मणान्भोजयेदिति शं-
खलिखितौ प्रतिमारामकूपसंक्रमध्वजसेतुनिपातभंगेषु तत्समुत्थानप्रतिसंस्कारोऽष्टशतं च निपातितानामिति समुत्थानं प्र
तिक्रिया प्रतिसंस्कारः पुनःप्रतिष्ठा अष्टशतपणाद्दण्डश्चेत्यर्थः अथ जीर्णोद्धारः सचलिंगादौ दग्धे भग्ने चालिते वा कार्यः
अयं चानादिसिद्धप्रतिष्ठितलिंगादौ भंगादिदुष्टेपि न कार्यः तत्र तु महाभिषेकं कुर्यादिति त्रिविक्रमः कर्मसुकदेवस्य जी

णोद्धारं करिष्ये इत्युक्त्वा पुण्याहं वाचयित्वा आचार्यमूर्त्तिजाश्च हुत्वा लिंगे ॐ व्यापकेश्वरहृदयाय नमः ॐ व्यापकेश्वरशिरसे स्वाहे-
त्येवं षडंगं कृत्वा घोरमन्त्रशतं जप्त्वा ऽग्निं प्रति स्थाप्य घोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्वा जीर्णं देवं प्रणवेन सं-
पूज्य ब्रह्मादिमण्डलदेवतानां होमं पूर्वोक्तं कृत्वा देवं प्रार्थयेत् जीर्णभग्नमिदं चैव सर्वदोषावहं नृणाम् अस्योद्धारे कृते शान्तिः शा-
न्ते ऽस्मिन् कथिता त्वया जीर्णोद्धारविधानं च नृपराष्ट्रहितावहम् तदधितिष्ठ तं देव प्रहृष्टमितवाज्ञयेति ततः क्षीराज्यमधुदू-
र्वाभिः समिद्भिश्चाष्टोत्तरसहस्रं शतं वा देवमन्त्रेण हुत्वा ऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत् लि-
ङ्गरूपं समास्थाय येनेदं समधिष्ठितम् यायास्त्वं संमितं स्थानं संत्यज्यैव शिवाज्ञया अत्र स्थाने च या विद्या सर्वा विद्येश्वरैर्युता
शिवेन सह सा तिष्ठतीति मन्त्रितजलेनाभिषिच्य विसर्जयेत् ततो ऽस्त्रसंमन्त्रितेन खनित्रेण खात्वा लिङ्गमादाय नद्यादौ वामदेवेन लिङ्गं
प्रणवेन मूर्तिं क्षिपेत् दारुजं तु मधुना ऽभ्यज्याघोरेण दहेत् हेमरत्नादिमयं तु दग्धं चालितं वा पुनस्तत्रैव स्थापयेत् ततः शान्त्यै
अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत् भगवन् भूतभव्येश लोकनाथ जगत्पते जीर्णलिङ्गसमुद्धारः कृतस्त्वदाज्ञया मया अ-
ग्निना दारुजं दग्धं क्षिप्तं शैलादिकं जले प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम् ज्ञानतो ऽज्ञानतो वापि यथोक्तं न कृतं य-
दि तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरेति ततो यजमानः प्रार्थयेत् गोविप्रशिल्पिभूतानामाचार्यस्य च यज्वनः शा-
न्तिर्भवतु देवेश आच्छिद्रं जायतामिदम् मूर्तौ तु विशेषः त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ वासं कुरु सुरश्रेष्ठ-
तावत्त्वं चाल्यके गृहे वसन् क्लेशं सहित्वेह मूर्तिर्वै तव पूर्ववत् यावत्कारयते भक्तः कुरु तस्य च वाञ्छितमिति ततो नवां मूर्तिं लिं-

गवाहूत्वोक्तविधिनास्थापयेत् मूलंत्वग्निपुराणेस्पष्टम् इतिजीर्णोद्धारः अथतुलसीग्रहणम् देवयाज्ञिकधृतेस्मृतिसारे वै
धृतौचव्यतीपातेभौमभार्गवभानुषु पर्वद्वयेचसंक्रान्तौद्वादश्यांसूतकद्वये तुलसींयेविचिन्वन्तितेछिंदंतिहरेःशिरः वि
ष्णुधर्मोत्तरे रविवारंविनादूर्वांतुलसींद्वादशींविना जीवितस्याविनाशायनविचिन्वीतधर्मवित् तथा संक्रान्तावर्कपक्षांते
द्वादश्यांनिशिसंध्ययोः यैश्छिन्नंतुलसीपत्रंतैश्छिन्नंहरिमस्तकम् पाद्मे द्वादश्यांतुलसीपत्रंधात्रीपत्रंचकार्तिके
लुनातिसनरोगच्छेन्निरयानतिगर्हितान् रुद्रयामले द्वादश्यांचदिवास्वापस्तुलस्यवचयस्तथा विष्णोश्चैवदिवास्नानं-
वर्जनीयंसदाबुधैः विष्णुधर्मे नछिंद्यात्तुलसींविप्रोद्वादश्यांवैष्णवःक्वचित् देवार्थेतुलसीच्छेदोहोमार्थेसमिधा-
तथा इंदुक्षयेनदुष्येतगवार्थेतुतृणस्यच ग्रहणमंत्रस्तुपाद्मे तुलस्यमृतजन्मासिसदात्वंकेशवप्रिये केशवार्थंविचि-
न्वामिवरदाभवशोभनेइति पारिजाते दक्षः समित्पुष्पकुशादीनांद्वितीयःप्रहरोमतः अथपुष्पादेःपर्युषितत्वम्
भार्गवार्चने भविष्ये प्रहरंतिष्ठतेजातीकरवीरमहर्निशम् तुलस्याबिल्वपत्रेषुसर्वेषुजलजेषुच नपर्युषितदोषोस्तिमा-
लाकारगृहेपिच बृहन्नारदीये वर्ज्यंपर्युषितंपुष्पंवर्ज्यंपर्युषितंजलम् नवर्ज्यंतुलसीपत्रंनवर्ज्यंजान्हवीजलम् त
त्रैवपाद्मे तुलसीपर्युषितानैवबिल्वंतुत्रिदिनावधि पद्मंपंचदिनान्त्याज्यंशेषंपर्युषितंविदुः स्कांदे पालाशादिन-
मेकंतुपंकजंचदिनत्रयम् पंचाहंबिल्वपत्रंचदशाहंतुलसीदलम् पदार्थादर्शेबोपदेवस्त्वन्यथाह बिल्वापा-
मार्गजातीतुलसिशमिशताकेतकीभृंगदूर्वामंदाम्भोजाहिदर्भामुनितिलतगरब्रह्मकल्हारमल्ल्यः चंपाश्वारातिकुंभीदमन

मरुबकाबिल्वतोह्यानिशास्तास्त्रिंश ३० श्चैका १ र्य ६ रीशो ११ दृधि ४ निधि ९ वसू ८ भू १ भू १ यमा २ भूयएवम् अस्यार्थः शताशतावरी मंदः मंदारः अहिर्नागकेशरः मुनिरगस्त्यः अश्वासतिः करवीरः कुंभीपाटलेतिकेदेवनिघंटुः अरयः षट् ईशाः एकादश उदधयश्चत्वारः निधयोनव वसवोऽष्टौ भूः एकः यमौद्वौ बिल्वमारभ्याऽह्निपर्यंत गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादि गणयेदित्यर्थः एतद्दिनोत्तरं पर्युषितानीत्यर्थः टोडरानंदे स्कांदे दमनमुपकस्य तस्य मालाभगवतः परमप्रीतिकारिणी शुष्का पर्युषितावापिनदुष्टाभवतिकर्हिचित् तिथितत्वे मात्स्ये बिल्वपत्रंचमाध्यंच तमालामलकीदले कल्हारंतुलसीचैव पद्मंचमुनिपुष्पकम् एतत्पर्युषितंनस्यात्कुशाश्चकलिकास्तथा स्मृतिसारावल्याम् जलजानांचसर्वेषां पत्राणामहतस्यच कुशपुष्पस्यरजतस्वर्णकृतयोरपि नपर्युषितदोषोस्तितीर्थतोयस्यचैवहि मुकुलैर्नार्चयेद्देवं पंकजैर्जलजैर्विना अथशिवनिर्माल्यनिर्णयः सिद्धांतशेखरे धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् विहायशेषंनिर्माल्यंचंडेशायनिवेदयेत् अन्यदन्नादिपानीयंतांबूलं गंधपुष्पकम् दद्याच्चंडायनिर्माल्यं शिवभक्तेतुसर्वशः आचार्यशिवचंडानामाज्ञाभंगेतुलक्षकम् धनस्यभक्षणेतेषांपादोनंलक्षमीरितम् निर्माल्येभक्षितेलक्षपादतः शुद्धिमीरिता दानंचभक्षणसमंतदर्धंतदुपेक्षणे अकामाद्भक्षणेसद्योनिर्माल्यस्यजपेत्सुधीः ब्रह्मपंचकसाहस्रंधर्मेणसहितंततः कामतोभक्षणेदीक्षाप्रायश्चित्तंनचान्यतः निर्माल्यलंघनेघोरंप्रजपेदयुतंततः स्पर्शश्चलंघनसमोविक्रयोभक्षणेनच स्मृत्यर्थसारेपि शैवसौरनिर्माल्यनैवेद्य-

भक्षणे चांद्रम् अभ्यासे द्विगुणमत्याभ्यासे पतनम्. अन्यनिर्माल्ये त्वनापद्येवमिति इदं च ज्योतिर्लिंगाद्यतिरिक्तविषयम् तथाच पुरुषार्थप्रबोधे भविष्ये. ज्योतिर्लिंगं विनालिंगं यः पूजयति सत्तमः तस्यनैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम्. शालग्रामोद्भवे लिंगे बाणालिंगे स्वयंभुवि रसलिंगे तथार्षे च सुप्रसिद्धप्रतिष्ठिते हृदये चंद्रकांते च स्वर्णरौप्यादिनिर्मिते शिवदीक्षावता भक्तेनेदं भक्ष्यमितीर्यते तथा बाणलिंगे स्वयंभूते चंद्रकांते हृदि स्थिते चांद्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षण लिंगे स्वयंभुवे बाणे रत्नजे रसनिर्मिते सिद्धप्रतिष्ठिते चैव न चंडाधिकृतिर्भवेत्. यत्र चंडाधिकारोस्ति तद्भोक्तव्यं न मानवैः चंडाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः त्रैविक्रम्याम् बाणलिंगे च लोहे च सिद्धलिंगे स्वयंभुवि प्रतिमासु च सर्वासु न चंडाधिकृतो भवेत् अत्र ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते इति स्कांदाद्दक्षभिन्नान ग्राह्यं शिवनिर्माल्य किंतु स्नात्वेति स्मार्ताः अनुपनीतेन ग्राह्यमिति श्रीदत्तः शिवदीक्षाहीनेन ग्राह्यमिति शैवाः तिथितत्वे हेमाद्रौ परिशिष्टे अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं शालग्रामशिलासंगात्सर्वं याति पवित्रताम् पंचायतनपूजायां तंत्रेण च निवेदितमित्यर्थः शिवपुराणे ये वीरभद्रशापिताः शिवभक्तिपराङ्मुखाः शंभोरन्यत्र देवेषु ये भक्ता ये न दीक्षिताः तेषामनर्हमीशस्य तत्प्रसादचतुष्टयं काशीखंडे जलस्य धारणं मूर्ध्नि विश्वेशस्नानजन्मनः एष जालंधरोबंधः समस्तस्करवल्लभः तथा स्नापयित्वा विधानेन यो लिंगस्नपनोदकं त्रिः पिबेत् त्रिविधं पापं तस्येहाशु विनश्यति लिंगस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनं गंगास्नानफलं तस्य जायतेऽत्र विपाप्मनः इदं पूर्ववाक्यवशाद्विश्वेश्वरविषयमिति केचित् काशीस्थपुराणप्रसिद्धसर्वलिंगविषयम्

काशीखंडे रत्नेश्वराख्याने तथैव दर्शनादित्यन्ये अथ हलीषिः राजमार्तंडः ऋक्षेषूत्तरपौष्णवैष्णवमघामूलानुराधाश्विनीप्राजापत्यकरा‍द्विदेवनगुरू प्रालेयपादेषु च निर्दोषैर्द्विषभे हलेश्च सुमनोमालाभिरभ्यर्चिते दत्त्वा क्षेत्रपते बलिं हलधरः क्षेत्रं ततः कर्षयेत् प्राजेशाश्ववपोत्तरादितिमघा मार्तंडइति श्याश्विनी पौष्णानुष्यामरीचयः शतभिषक् स्वाती विशाखा तथा जीवार्केंदुसितेंदुनंदनदिने लग्ने च सौम्योदये सस्यानां वपने तथैव लवने शस्तास्तथारोपणे चंडेश्वरः हस्तचित्रादितिस्वातीरेवत्यां श्रवणत्रये स्थिरलग्ने गुरौ वारे बीजधार्यं ज्ञशुक्रयोः ॐ धनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहा लेखयित्वा इमं मंत्रं धान्यागारे निधापयेत् सस्य वृद्धिं परां कुर्यात् पूजितमानिपूजयेत् दक्षिणदिङ्मुखगमनं गमनमभिनवासुनारीषु व्ययमपि सस्यधनानां नबुधाबुधवासरेः कुर्युः शनिवारे च नो कार्यो धनधान्यव्ययो बुधैः अथ वस्त्रं श्रीपतिः रोहिणीषु करपंचकेश्विभेष्वुत्तरासु च पुनर्वसुद्वये रेवतीषु च वसुदेवते च भे नव्यवस्त्रपरिधानमिष्यते जीर्णं रवौ सततमंबुभिरार्द्रमिंदौ भौमे शुचे बुधदिने तु भवेद्धनाय ज्ञानाय मंत्रिणि भृगौ प्रियसंगमाय मंदे मलाय च न नवांबरधारणं स्यात् रोहिणीगुरुपुनर्वसूत्तरे या बिभर्ति नववस्त्रभूषणे सा न योषिन्नवलं बत पति स्नानमाचरति वारुणे पिया अथालंकारवलयादि दैवज्ञवल्लभः नासत्यपूषवसुभिः करपंचकेन मार्तंडभौमगुरुदानवमंत्रिवारे मुक्तासुवर्णमणिविद्रुमशंखदंतरक्तांबराणि विधृतानि भवंति सिद्ध्यै ज्योतिर्निबंधे हस्तानुराधामृगपूषधनिष्ठयुक्तचित्रोत्तरासु च पुनर्वसु — रोहिणीषु लग्ने स्थिरे रविसुतेंदुजजीववारे हेमादिधारणविधिः कथितो नराणां तत्रैव श्रीपतिः पौष्णाश्विनीवसुकरादिषु पंचकेषु कौसुंभहेममणिविद्रुमकाचशंखाः नार्या धृताः सुतसुखार्थकरा भवंति ब्राह्मोत्तरादितिगुरुष्वसुखाय भर्तुः तत्रैव शंखादिवररत्ना-

नि॰सिं॰ निपुष्यादित्युत्तरास्वचरोहिण्यांनैवगृण्हीतभर्तुर्जीवितकांक्षिणी अथसूचीकर्म वासवादितिभत्वाष्ट्रमैत्रचंद्राश्विनीषुच सूचीकर्मतन्तुत्राणसं- फ॰प्र॰
५५ भिर्ऋक्षैःप्रशस्यते अथशय्या हस्तादितिब्रह्मगुरूत्तराणिपौष्णाश्विमूलेंदुभचित्रभानि वारेषुजीवेंदुसितेंदुजानांशय्यासना ३
रंभणमुत्तमंस्यात् अथशस्त्रधारणम् पुष्येचादितिचित्रपद्मतनयशक्रोत्तरारेवतीस्वातीवाजिविशाखमित्रसुहितेभानौगुरौभा
र्गवे कुंभेकीटगृहेवृषेमृगपतौचेंदौशुभेवीक्षितेसन्नाहःशरखड्गकुंतछुरिकाधार्यानृपाणांहिताः अथस्वामिसेवा चंडेश्वरः
रोहिण्युत्तरपौष्णेषुवसुवारुणयोरपि सेवेतस्वामिनंभृत्यःशुभवारोदयेतथा ज्योतिर्निबंधे दासीदासादिभृत्यानांकुर्यात्संग्रह
णंबुधैः स्थिरलग्नेशुभेदृष्टेसंद्वारेविशेषतः अथगजाश्वदोलाः सएव पौष्णप्रजेशादितिभद्वयानिहस्तादिषट्कंश्रवणोत्तरा
णि दोलादिमातंगतुरंगमाणामारोहणेभीष्टफलप्रदानि अथनृत्यम् हस्तःपुष्योवासवंरोहिणीचज्येष्ठापौष्णावारुणंचोत्तराश्च
पूर्वाचार्यैःकीर्तितश्चक्रवर्तीनृत्यारंभेशोभनोऽयंभवर्गः अथराजदर्शने श्रीपतिः मृगाश्विपुष्यश्रवणश्रविष्ठाहस्तध्रुवत्वाष्ट्र-
भपूषभानि मैत्रेणयुक्तानिनरेश्वराणांविलोकनेभानिशुभप्रदानि अथक्रयविक्रयौ भाद्रयाग्निदशमर्क्षदिवाकरेषुमूलानिलो
त्तरतुरंगमरेवतीषु सारंगपाणिरजनीकरमैत्रभेषुलाभःसदेवभवतिक्रयविक्रयाभ्यां वस्त्रेतु चित्राशतभिषास्वातीरेवतीत्वाश्वि-
नीशुभा श्रवणश्चतथाप्रोक्तावस्त्राणांक्रयणेशुभः अथसेतुः स्वातीयुक्तेमंदवारेवृषलग्नेशुभेदिने सेतूनांबंधनंकार्यंध्रुवभेत्वा-
र्कजीवयोः अथपशुकृत्यम् श्रीपतिः चित्रोत्तरावैष्णवरोहिणीषुचतुर्दशीदर्शदिनाष्टमीषु स्थानप्रवेशोगमनंविदध्यात्पु ५५
मान्पशूनांनकदाचिदेव चंडेश्वरः हस्तमूलविशाखासुरेवत्यांश्रवणेतथा मैत्रेचवारुणेप्रोक्तंपशुक्रयणमुच्यते पूर्वात्रयास्तुत

मघूस्वहुताशनेषु इंद्राग्नि वाजिवसुवारुणशंकरेषु एतेषुगोमहिषदंतितुरंगमादिनानाप्रकारपशुजातिगतिः प्रशस्ता अथगजदंतच्छेदः ज्योतिर्निबंधे त्वाष्ट्रवैष्णवअश्विन्यामादित्येवसुदेवते दंतिनाशुभदंकर्मपुष्येहस्तेचकर्तनम् अथनिक्षेपः भरणीत्रीणि पूर्वाणिआर्द्राश्लेषामघातथा चित्राज्येष्ठाविशाखाचमूलमृगपुनर्वसू एभिर्दत्तंप्रयुक्तंचयद्यन्निक्षिप्यतेधनम् पृष्ठतोधावमानस्यनिर्धनोनोपपद्यते अथऋणमोक्षः श्रीधरः वागीशमंददिवसांशकलग्नयुक्तेरिक्तासुमंददिवसेकुलिकोदयेच मैत्रद्वितीयपदमैत्रमुहूर्तयुक्तेराश्युद्गमेच ऋणमोक्षमुशंतिसंतः अथराजमुद्रा मृदुध्रुवक्षिप्रचरेशुभेषु योगप्रशस्तेशनिचंद्रवर्जे वारेतिथौपूर्णजयाढ्येचमुद्राप्रतिष्ठाशुभदाहिराज्ञाम् अथनौः चंडेश्वरः पौष्णाश्विनीतुरगवारुणमित्रचित्राशीतोष्णरश्मिवसवो नलवंत्यसूनि वारेचजीवभृगुनंदनकेप्रशस्ते नौकादिसंघट्टनवाहनमपुकुर्यात् अथभोगः गुरुभरविभानुराधाविधातृपौष्णाश्विरोहिणीषुस्यात् स्नात्वानरासुकुर्याच्छयनासनभोगभोगादि अथश्मश्रुकर्म श्रीपतिः पुष्येपौष्णेचाश्विनीषेंदवेचशाक्रे हस्ताद्येत्रिकेभेप्यदित्याः क्षौरकार्यंवैष्णवादित्रयेचमुक्त्वाभौमादित्यपातंगिवारान् नस्नातभुक्तोत्कटभूषितानामभ्यक्तयात्रासमरोत्सुकानां क्षौरंविदध्यान्निशिसंध्ययोर्वाजिजीविषूणांनवमेनचाह्नि त्रिस्थलीसेतौवृद्धगार्ग्यः रव्यारसौरवारेषु रात्रौ पातेव्रताहनि श्राद्धाहःप्रतिपद्रिक्ताभद्राःक्षौरेषुवर्जयेत् गार्ग्यः षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमीतथा आसुसन्निहितंपापत्रिषुतैलभगक्षुरे राजमार्तंडः देवकार्येपितुःश्राद्धेरवेरंशपरिक्षये क्षौरकर्मनकुर्वीतजन्ममासेचजन्मभे बृहस्पतिः राजकार्येनियुक्तानांनराणांभूपजीविनाम् श्मश्रुलोमनखच्छेदोनास्तिकालविशोधनम् तथा क्षौरंनैमित्तिकंकार्यंनिषेधेस

त्यपिफलम् पित्रादिमृतिदीक्षासुप्रायश्चित्तेचतीर्थके केचित्तूत्तरार्धमन्यथापठंति मुंडनस्यनिषेधेपिकर्तनंतुविधीयतइति ना
रदः नृपविप्राज्ञयायज्ञेमरणेबंधमोक्षणे उद्वाहेखिलवारर्क्षेतिथिषुक्षौरमिष्टदम् भारते प्राङ्मुखःश्मश्रुकर्माणिकारयीतसमाहि
तः उदङ्मुखोवाप्यमूलानथायुर्विंदतेमहत् अपरार्के उदङ्मुखःप्राङ्मुखोवावपनंकारयेत्सुधीः केशश्मश्रुलोमनखान्युदक्संस्था
निवापयेत् दक्षिणंकर्णमारभ्यधर्मार्थंपापसंक्षये शिखाद्यंनवसंस्कारे शिखाद्यंतंशिरोवपेत् यतीनांतुविशेषोनिगमे कक्षोप
स्थशिखावर्जमृतुसंधिषुवापयेदिति अन्येपिविधिप्रतिषेधाःप्रागुक्ताः अथधनसंग्रहः ब्रह्मानिलार्कमघमूलत्रिपूर्वरौद्रपौष्णानुराधयु
क्तविष्णुविशाखसुक्रे वारेकुजार्कभृगुनंदनसोमजानांश्रेष्ठंधनस्यकरणंप्रवदंतिशस्तम् अथनवान्नम् श्रीपतिः रेवतीश्रुतिपुनर्वसुह
स्तब्राह्मतःपृथगपिद्वितयेच स्युत्तरेषुगदितंपृथुकानांप्राशनंनववलान्नविधानं अथनवभोजनपात्रम् ज्योतिर्निबंधे भोज्यपात्रंसुधा-
सिंधौघटेवाह्नासमाहरेत् तत्रान्नप्राशनप्रोक्तेकालेभोजनमाचरेत् अथनवपर्णफलादिभक्षणम् चंडेश्वरः मूलाश्विमैत्रकरतिष्यहरी
इभेषुपौष्णोत्तरदेवपुनर्वसूवासवेषु वारेषुभूमितनयार्कजवारवर्जेतांबूलनूतनफलाद्यशनंहिताय अथहोमेआहुतिपातः ज्योतिषे
तरणिविद्भृगुभास्करिचंद्रमाः कुजसुरेज्यविधुंतुदकेतवः रविभतोदिनभंगणयेत्क्रमात्प्रतिखगंत्रितयंत्रितयंन्यसेत् दिनकुरार्कितमःकु
जकेतवोहुतभुजेनशुभास्त्वितरेशुभाः हवनचक्रमिदंपरिलोक्यतांहवनकर्मणिसर्वसमृद्धये अन्नशांतिरुक्ताविष्णुधर्मे क्रूरग्रह
मुखेचैवसंजातेहवनेशुभे शांतिंविधायगांदद्याद्ब्राह्मणायकुटुंबिने आयसींप्रतिमांकृत्वानिक्षिपेत्ताम्रधोमुखीं गोमूत्रमधुगंधाद्यैरर्चि
तांप्रतिमांततः स्वेस्थानिधायसंपूज्यतत्रहोमोविधीयते अत्रापवादःक्रियासारे नित्यनैमित्तिकेदुर्गाहोमादौनविचारयेत् अथयज्ञ-

रादौ फलम्   श्रीपतिः स्वात्याश्लेषारौद्रपूर्वात्रयशाक्रे रोगोत्पत्तिर्जायते यस्य पुंसः तद्भैषज्यं व्याप्ततो निःप्रयत्नः स्याद्दुग्धाब्धेर्लब्धजन्मापि वैद्यः व्याध्युत्पत्तिर्यस्य पौष्णे समैत्रे प्राणत्राणं जायते तस्य कृच्छ्रात् वैश्वे सौम्ये रोगमुक्तिस्तु मासाद्विंशत्या स्यादुत्तराणां मघासु पक्षाद्धस्ते वासवे सद्विदैवे मूलाश्विन्योरग्निधिष्ण्ये नवाहात् याम्ये त्वाष्ट्रे वैष्णवे वारुणे च नैरुज्यं स्यान्नूनमेकादशाहात् अहिर्बुध्न्ये तिष्यसंज्ञे यमाख्ये प्राजापत्यादित्ययोः सप्तरात्रात् रोगान्मुक्तिर्जायते मानवानां निःसंदिग्धं जल्पितं गर्गमुख्यैः ज्योतिषे एकाहो निधनं दशाहमनिलाद्द्राणावियत्सर्वताः सप्ताग्नाविलयश्च मासयुगलं मासो मृतिः पक्षकः द्वौ मासावथ विंशतिर्दश निशाः पक्षांत पक्षानखा मासो पक्षदशान्तपक्षककुभः पीडादिनान्यश्विभात् दैवज्ञः उरगवरुणरौद्रावासवेन्द्राभिपूर्वा यमदहनविशाखा पापवारेण युक्ताः तिथिषु नवमिषष्ठी द्वादशी वा चतुर्थी भवति मरणयोगो रोगिणां कालहेतुः अत्र कुंभे हेमीं नक्षत्रदेवताप्रतिमां संपूज्य द्वादशदलेषु संकर्षणादिद्वादशमूर्तीर्द्वादशादित्यान् वा संपूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्या तद्देवतायै अष्टोत्तरशतं हुत्वा दध्योदनबलिं दत्वाचार्याय गां प्रतिमां च दत्वा विप्रान् भोजयेदिति संक्षेपः विशेषस्त्वत्र हेमाद्रौ पद्मार्थादर्शे च ज्ञेयः अथ भैषज चंडेश्वरः मूलानुराधमृगतिष्यपुनर्वसौ च पौष्णाश्विनीश्रवणशक्रकरत्रये च वारेषु वाक्पतिदिनेशसितेंदुशस्ते भैषज्यभक्षणममीषु हितं नराणाम् अथारोग्यस्नानम् श्रीपतिः इंदोर्वारे भार्गवे च ध्रुवेषु सार्पादित्यस्वातियुक्तेषु भेषु पित्र्ये चान्ते वापि कुर्यात्कदाचिन्नैव स्नानं रोगनिर्मुक्तजंतुः चरे विलग्ने रविभौमवारे रिक्ते तिथौ स्याद्बहुले च पक्षे धिष्ण्ये चरे रोगनिपीडितानां स्नानं नराणां निरुजत्वकारि अथ दंतधावनम् पृथ्वीचंद्रोदये विष्णुः प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च नवम्यां भानुवारे च दंतकाष्ठं विवर्जयेत् नारदः चतुर्दश्यष्टमीपौर्णमासीसंक्रमणेषु च नंदासु च नवम्यां च दंतकाष्ठं विव-

र्जयेत् श्राद्धे यज्ञेचनियमेतथाप्रोषितभर्तृका व्यतीपातेचसंक्रांत्यांनंदाभूताष्टपर्वसु तैलंक्षौरंरतिंमांसंदंतकाष्ठंचवर्जयेत् वसिष्ठः श
न्यर्कशुक्रवारेषुकुजाहेव्रतवासरे जन्माहेश्राद्धदिवसेदंतकाष्ठंविवर्जयेत् हेमाद्रौस्कांदे अभ्यंगेजलधिस्नानेदंतधावनमैथुने जातंचनि
धनेचैवतत्कालव्यापिनीतिथिः संवर्त्तः रवौविवाहेआशौचेवर्जयेद्दंतधावनं व्यासः अलाभेदंतकाष्ठानांनिषिद्धानांतथातिथौ अ
पांद्वादशगण्डूषैर्विदध्याद्दंतधावनम् अथामलकस्नानं व्यासः श्रीकामःसर्वदास्नानंकुर्वीतामलकैर्नरः सप्तमींनवमींचैवपर्वका-
लंविवर्जयेत् चंद्रसूर्योपरागेचस्नानमामलकैस्त्यजेत् क्रतुः षष्ठीचसप्तमींचैवनवमींचत्रयोदशीं संक्रांतौरविवारेचस्नानमा-
मलकैस्त्यजेत् यत्तु नवमींदशमींचैवतृतीयांचत्रयोदशीं प्रतिपद्द्वादशीकृष्णास्नानंतासुविवर्जयेत् यच्च दर्शेस्नानंनकुर्वीतमा
तापित्रोःसजीवतोः पुत्रःकुर्वन्निरावष्टेपित्रोरुन्मातिजीवितइति कृष्णवयसाद्यैः स्नानमात्रंनिषिद्धं तन्नांगार्थस्नानपरं नित्यने-
मित्तिकपरमितिहेमाद्रिः अथतैलस्नाननिषेधः कात्यायनः पक्षादौचरवौषष्ठ्यांरिक्तायांचतथातिथौ तैलेनाभ्यज्यमानस्तुचक्षु-
र्भिःपरिहीयते गर्गः पंचदश्यांचतुर्दश्यामष्टम्यांरविसंक्रमे द्वादश्यांसप्तमीषष्ठ्योस्तैलस्पर्शंविवर्जयेत् नचकुर्यात्तृतीयायां
त्रयोदश्यांतिथौतथा शाश्वतींगतिमन्विच्छन्दशम्यामपिपण्डितः तत्रैवायुर्वेदे षष्ठ्यादिनस्वरेष्टम्यामेकादश्यांचपर्वसु द्वाद-
श्यांचचतुर्दश्यांपंचम्यांप्रतिपत्तिथौ व्रतेश्राद्धदिनेजन्मत्रितयेश्रवणाद्वयोः ज्येष्ठोत्तराफल्गुनीषुव्यतीपातेचवैधृतौ विष्टियोगे
चसंक्रांतौमन्वादिषुयुगादिषु नाभ्यंगंनत्रबालानांहत्सानात्तुनदोषकृदिति व्यवहारतत्त्वे संक्रांतिभद्राव्यतिपातवैधृतिषष्ठ्यष्टमीप
र्वसुनार्केभूसुते स्नानेद्वितीयादशमीचगर्हिताः षष्ठ्यादिसाद्वारदधावनेधमाः अस्यापवादमाह तत्रैवमन्वेताः सार्षपंगंधतैलंचयत्तो

लं पुष्पवासितं अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन आयुर्वेदे निषिद्धतिथिवारर्क्षग्रहणेष्वपि रात्रिषु किंचिद्गोघृतयुक्तं वा विमश: दरजोन्वितं भानौ दूर्वान्वितं भौमे भूसुक्तं पुष्पयुग्गुरौ सर्वेषां सर्वदा तैलमभ्यंगेषु न दुष्यति मंगले व्यप्यदोषः आगस्त्यादि धृते स्नान वृद्धिपूर्वोत्सवेषु च स्नेहमाभ्यसमायुक्तं मध्याह्नात्प्राक् तदिष्यते इति मदनपारिजाते कात्यायनोक्तेः हेमाद्रौ हस्तं मनुः तैलाभ्यंगो नार्कवारे न भौमे नो संक्रांतौ वैधृतौ विष्टिषष्ठ्योः पर्वस्वष्टम्यां च नेष्टः सद्भिः प्रोक्तानुक्ताऽवासरे सूर्यसूनोः तिलस्नाननिषेधस्तु षट्त्रिंशन्मते तथा सप्तम्यमावास्या संक्रांतिग्रहजन्मर्क्ष धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत् अथ गृहारंभः ज्योतिर्निबंधे बादरायणः वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके सूत्रारंभः शिलान्यासः स्तंभारंभः प्रशस्यते नारदः सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः अत्र वृषसिंहवृश्चिकाः वैशाखश्रावणकार्तिकाः सौरा ज्ञेया इति कालादर्शः तन्त्रे कारणतन्त्रे स्थिरमासे स्थिरराशौ स्थिरांशे नववेश्मनाम् कुर्वीत स्थापनं शंकोः शंकुस्थापनवेलया कार्तिके निषेधस्तुलापरः कुंभमाघेपि सर्वेषां मंदिराणामुपक्रमम् महर्षयः प्रशंसंति धान्यागारं विहाय च निषेधो धान्यगृहपरः पाकभोजनशालादौ मार्गशीर्षस्य फाल्गुनः रथ्यागृहमठादौ च सहस्यः शुचिरेव तु पौषाषाढनिषेधस्तु प्रधानगृहपरः नत्वप्रधानगृहारंभकुड्यादौ विशाखा चापि तत्रैवोक्तेः ज्योतिस्तत्त्वे पूर्वापरास्यं तु नभोत्यपौषे याम्योत्तरास्यं सहसि इति ये कार्यं गृहं जीवबुधर्क्षगेऽर्के नो चार्कगो जीवसितौ चाहितौ रत्नमालायां कर्कनक्रहरिकुंभगतेऽर्के पूर्वपश्चिममुखानि गृहाणि तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि वदंति दैवज्ञवल्लभः शाकधान्यपंचतालिः परफल स्त्रालिनैः स्वसंगरफस्यनाशम् स्वंत्रीश्रासिवन्हिभीतिं चलक्ष्मीं कुर्युस्ते चाद्या गृहाणां

भकाले गर्गः उत्तरामृगरोहिण्यां पुष्ये मैत्रे करत्रये धनिष्ठाद्वितये पौष्णे गृहारंभः प्रशस्यते रोहिण्यां श्रवणत्रये दितियुगे हस्तत्रये मूलके रेवत्युत्तरफाल्गुनीषुरुगभे मैत्रोत्तराषाढयोः शस्तंवास्तुकुजार्कवर्जितदिने गोकुंभसिंहेघटे कन्यायांमिथुनेनभः शुक्रेसहो राधोर्जके फाल्गुने कालादर्शे सनत्कुमारः आदित्यभौमवर्जंतु सर्वेवाराः शुभप्रदाः वास्तुशास्त्रे मार्गशीर्षे तथा पौषे वैशाखे श्रावणे तथा फाल्गुनेच कृतंवेश्म सर्वसंपत्प्रदंभवेत् कार्तिके माघमासेच चैत्रे ज्येष्ठे तथाश्विने मास्याषाढे भाद्रपदे न कुर्यात्सर्वथागृहं द्वितीयाच तृतीयाच पंचमी सप्तमी तथा त्रयोदशीचदशमीपूर्णाचैकादशीतथा वेश्मारंभे शुभायस्युर्विशेषाच्छुक्लपक्षगाः व्यवहारसारे शिलान्यासः प्रकर्तव्यो गृहाणां श्रवणे मृगे पौष्णे हस्तेचरोहिण्यांपुष्याश्विन्युत्तरात्रये वास्तुप्रदीपे अधोमुखभैर्विदधीतखातंशिलास्तथैवोर्ध्वमुखैश्च पट्टम् तिर्यङ्मुखैर्द्वारकपाटयानगृहप्रवेशोमृदुभिर्ध्रुवैश्च लल्लः स्नानंचपाकशयनंच भोज्यंगजालयंवाजिगृहंच धनस्य देवस्यपूर्वादिदिशिक्रमेणमध्येसभाकूपनिवेशनाय शिल्पशास्त्रे कन्यासिंहेतुलायांभुजगपतिमुखेह्याग्निकोणेनिखातंवायव्येस्यात्तदास्यंत्वलिधनमकरेईशखातंवदंति कुंभेमीनेचमेषेनिर्ऋतिदिशिमुखंखातमायव्यकोणे चाग्नेःकोणेमुखंवैवृषमिथुनगतेकर्कटेरक्षखातं तत्त्वचिंतामणौ यत्रदेशेगृहादीनांहानिर्वास्यात्ततोधिकं ततश्चिंतयेद्धीमान्गुणानायव्ययादिकान् राजमार्तंडः आयव्ययौमासशुद्धिंतृणागारेनचिंतयेत् शिलान्यासादिनोकुर्यात्तथागाढप्रयातने व्यवहारतत्त्वे निषिद्धेष्वपिकालेषु स्वानुकूलेशुभेदिने तृणकाष्ठगृहारंभेमासदोषोनविद्यते चंडेश्वरः पूर्णादिलक्ष्मीयावत्पूर्ववास्त्वंवर्जयेद्गृहं उत्तरास्यंनकुर्वीतनवम्यादिचतुर्दशी अमावास्याष्टमीयावत्पश्चिमास्यंविवर्जयेत् नवम्यादौतथायाम्यंयावत्कृष्णचतु-

दर्शी ध्रुवंदृष्ट्वाथवास्मृत्वाकर्तव्यंवास्तुरोपणम् सायान्हवर्जेदिवसेरात्रौत्यक्त्वामहानिशाम् वराहः दक्षिणपूर्वेकोणेकृत्वापूजांशिलांन्यसेत्प्रथमाम् शेषाःप्रदक्षिणेनस्तंभाश्चैवंसमुत्थाप्याः कालादर्शेवास्तुशास्त्रे खातेचैवशिलान्यासेद्वैधचक्रंप्रशस्यते तच्चोक्तंशांतिरत्ने चतुर्हस्तप्रमाणंतुखात्वागर्तंसमंततः कुंभोदकैःसेचयेयुःशांतिपाठपुरःसरं ततईशानदिग्भागेसाक्षतंरत्नपंचकम् साज्यंकुंभंस्थिरंमुक्त्वावास्तुपूजनपूर्वकं कुंभोपरिशिलान्यासःकर्तव्यस्तदनंतरं अथगृहप्रवेशः बृहस्पतिः नंदायांदक्षिणद्वारंभद्रायांपश्चिमेनतु जयायामुत्तरद्वारंपूर्णायांपूर्वतोविशेत् वसिष्ठः कृत्वाशक्रंपृष्ठतोवामतोऽर्कंविप्रान्पूज्यानग्रतःपूर्णकुंभं हर्म्यंरम्यंतोरणस्रग्वितानैःस्त्रीभिःस्रग्वीगीतवाद्यैर्विशेच्च व्यवहारतत्त्वे सौम्यायनेश्रावणमार्गपौषेजन्मर्क्षलग्नोपचयोदयांशे वामंगतेर्केगृहवास्तुपूजांकृत्वाविशेद्वेश्मभकूटशुद्धम् वास्तुशास्त्रे लग्नात्प्रागादितोदिक्षुद्वौद्वौराशीन्नियोजयेत् एकमेकंन्यसेत्कोणेसूर्यंवामंविचिंतयेत् वसिष्ठः चंद्रेज्यार्यसितवासरेषुचश्रीकरंकृतमहार्थलाभदं सूर्यसूनुदिवसेस्थिरप्रदंकिंतुचोरभयमत्रनिर्दिशेत् रत्नकोशे पुष्येधनिष्ठामृगवारुणेषुस्वातीध्रुवर्क्षेत्रिषुचोत्तरासु अक्षीणचंद्रेशुभदोनृपस्यतिथावरिक्तेचगृहप्रवेशः नारदः प्रवेशोमध्यमोज्ञेयःसौम्यकार्तिकमासयोः माघफाल्गुनवैशाखज्येष्ठमासेषुशोभनः अकपाटमनाच्छन्नमदत्तबलिभोजनं गृहंनप्रविशेद्दीमानापदामाकरोहितत् ज्येष्ठःक्षयङ्गृहपरः वृद्धगार्ग्यः भानोश्चभौमस्यविहायवारौशूलादियोगान्शुभान्नवापिरिक्तातिथिश्चापिमृदुध्रुवर्क्षेसौम्यायनेचप्रविशेद्गृहाणि रत्नमालायाम् त्वाष्ट्रमित्रशशिपुष्यदेवतान्यामनंतिमुनयोमृदून्यथ मैत्रगेहरति भूषणाम्बरग्रहीतमंगलविधानमेषुच रोहिण्युत्तरात्रयंचध्रुवाणि प्रवेशश्चवास्तुपूजांकृत्वाकार्यः जीर्णोद्धारेतथोद्यानेतथागृहनिवे

ज्ञाने नवप्रसादभवनेप्रासादपरिवर्तने द्वाराभिवर्तनेतद्वत्प्रासादेषुगृहेषुच वास्तूपशमनंकुर्यात्पूर्वमेवविचक्षणइति मात्स्यो
क्तेः तत्रैव कृत्वाग्रतोद्विजवरानथपूर्णकुंभंदध्यक्षताम्रदलपुष्पफलोपशोभम् दत्वाहिरण्यवसनानितथाद्विजेभ्योमांगल्यशांति
निलयंस्वगृहंविशेच्च गृह्योक्तहोमविधिनाबलिकर्मकुर्यात्प्रासादवास्तुशमनेचविधिर्यउक्तः संतर्पयेद्द्विजवरानथभक्ष्यभोज्यैः शु
क्लांबरःस्वभवनंप्रविशेत्सरूपं अथकलिवर्ज्यानि बृहन्नारदीये समुद्रयातुःस्वीकारः कमंडलुविधारणं द्विजानामसवर्णासुक
न्यासूपयमस्तथा देवराच्चसुतोत्पत्तिर्मधुपर्केपशोर्वधः मांसदानंतथाश्राद्धे वानप्रस्थाश्रमस्तथा दत्ताक्षतायाःकन्यायाःपुनर्दानंपरस्य
च दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधकौ २ महाप्रस्थानगमनंगोमेधश्चतथामखः इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणः कमंडलुः
सोदकंचकमंडलुमित्युक्तः मृन्मयोवा दत्ताऊढा ऊढायाःपुनरुद्वाहज्येष्ठांशोगोवधस्तथा कलौपंचनकुर्वीतभ्रातृजायांकमंडलुमि
ति हेमाद्रौवचनात् ऊढायाःपुरापुरुषसंयोगान्मृतेदेयेतिकेचनेत्यादिभिर्विवाद्यतोक्ता हेमाद्रौब्राह्मे गोत्रान्मातुःसपिंडाच्चविवाहो
गोवधस्तथा नराश्वमेधौमद्यंचकलौवर्ज्यंद्विजातिभिः गोत्राद्भ्रातृजायाःपितृष्वसुः मातृसपिंडात्मातुलात्तत्कन्यायाविवाहः कलौ
नकार्यः तेनयानितद्विधायकानितानियुगांतरविषयाणि तथाव्यासः तृतीयांमातृतःकन्यांतृतीयांपितृतस्तथा शुल्केनचोद्वहेद्व्य
तिविप्राःपापविमोहिता इतिकलौतन्निंदामाह मातृतस्तृतीयांमातुलकन्यामित्यर्थः उक्तंचैतत्प्राक् मद्यंस्त्रीष्वश्वस्करासाचाम
मित्यादिनाविहितमपिवर्ज्यं हेमाद्रौआदित्यपुराणे विधवायांप्रजोत्पत्तौदेवरस्यनियोजनं बालायाःक्षतयोन्यास्तुवरेणान्येनसंस्कृतिः ५९
कन्यानामसवर्णानांविवाहश्चद्विजन्मभिः आततायिद्विजाग्र्याणांधर्मयुद्धेनहिंसनम् द्विजस्याब्धौतुनौयातुःशोधितस्यापिसंग्रहः सत्रदी

क्षाचसर्वेषांकमंडलुविधारणम् महाप्रस्थानगमनंगोसंज्ञप्तिश्चगोसवे सौत्रामण्यामपिसुराग्रहणस्यचसंग्रहः अग्निहोत्रहवन्याश्चलेहोलीढापरिग्रहः वृत्तस्वाध्यायसापेक्ष्यमघसंकोचनंतथा प्रायश्चित्तविधानंचविप्राणांमरणांतिकं संसर्गदोषस्तेयान्यमहापातकनिष्कृतिः संसर्गदोषस्तत्संसर्गिणःपंचमइत्युक्तः स्तेयंच तदन्यानिमहापातकानि ब्रह्महत्यासुरापगुरुतल्पानित्रीणि तेषांकामकृतानांमरणांतिकंप्रायश्चित्तंविप्राणांकलौनेत्यर्थः मरणांतिकेद्विजातिवधनिमित्तंद्वादशाब्दंद्विगुणंब्रह्मवधनिमित्तंचद्विगुणंभवति तच्चतुर्थेनास्तिनिष्कृतिरितिनिषिद्धम् नचात्महत्याविधिनातद्बाधः तेनत्वात्महत्यानिमित्तस्यैवबाधोनजातिवधनिमित्तस्याऽभिन्नविषयत्वात् संसर्गिणस्तुकामतोपिव्रतस्यैवोक्तेर्नमरणांतिकम् नापिस्तेयेतत्रराज्ञोवधकर्तृत्वात् तेनतयोर्मरणांतिकाभावात् तयोरेवनिष्कृतिर्नान्येषांत्रयाणांयुगांतरेतुकलौनिषेधबलात्प्रवृत्तिः एतद्विप्रपरम् नक्षत्रियादेः तदुक्तंविप्राणांमरणांतिकमिति विशेषोस्मत्कृतप्रायश्चित्तरत्नेज्ञेयः वरातिथिपितृभ्यश्चपशूपाकरणंक्रिया दत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहः सवर्णान्यागनादुष्टैः संसर्गः शोधितैरपि अयोनौसंग्रहेवृत्तेपरित्यागोगुरुस्त्रियः परोद्देशात्मसंत्यागउद्दिष्टस्यापिवर्जनम् प्रतिमाभ्यर्चनार्थायसंकल्पश्चसधर्मकः अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवच शामित्रंचैवविप्राणांसोमविक्रयणंतथा षड्भक्तानशनेचान्नहरणंहीनकर्मणः माधवीयेपृथ्वीचंद्रोदयेच शूद्रेषुदासगोपालकुलमित्रार्धसीरिणां भोज्यान्नतागृहस्थस्यतीर्थसेवातिदूरतः शिष्यस्यगुरुदारेषुगुरुवद्वृत्तिशीलता आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकृतातथा प्रजार्थंतुद्विजाग्र्याणांप्रजारणिपरिग्रहः ब्राह्मणानांप्रवासित्वंमुखाग्निधमनक्रिया बलात्कारादिदुष्टस्त्रीसंग्रहोविधिचोदितः यतेश्चसर्ववर्णेषुभिक्षाचर्याविधानतः नवोदकेदशाहंचदक्षिणागुरुचोदिता ब्राह्मणादिषुशूद्रस्यपच-

नादिक्रियापि च भृग्वाग्निपतनैश्चैववृद्धादिमरणेतथा गोतृप्तिशिष्टपयसिशिष्टेराचमनक्रिया पितापुत्रविरोधेषुसाक्षिणांदंडकल्पनं यतेःसायंगृहत्वं चसूरिभिस्तत्वदर्शिभिः एतानिलोकगुप्त्यर्थंकलेरादौमहात्मभिः निवर्तितानिविद्वद्भिर्व्यवस्थापूर्वकंबुधैः सुराग्रहणस्यतत्क्रतुःसंग्रहोव्यवहारकः नचमद्यंचेतिसामान्येननिषिद्धस्या ऽनेनोपसंहारइतिवाच्यम् निषिद्धस्यनिवृत्तिमात्रफलत्वेनविशेषानपेक्षत्वात् नहिंस्यादित्यस्यनब्राह्मणंहन्यादित्यनेनोपसंहारोहिंसांतरस्यादोषत्वापत्तेश्चनिरूपितंचैतद्धेमाद्रिणा ऽन्यत्रेत्युपरम्यते सुराग्रहस्योद्देश्यस्यसौत्रामणिविशेषणाविवक्षयावाजपेयेपिनिषेधः सौत्रामण्यांतुपयोग्रहावास्युरित्यापस्तंबोक्तेर्वैकल्पिकपयोग्रहैरप्यधिकारः वाजपेयेतुतत्प्राप्तसोमानाभावात् सोमसुरयोः सहत्यागेनांशेसुराद्रव्यत्वात्तत्प्रत्यक्षतयायागनामत्वेनतांविनासंज्ञायोगात् कलौनाधिकारइतियुक्तंप्रतीमः त्रिकांडमंडनादिलिखनंतुनिर्मूलमनाकरंच वृत्तेति एकाहाद्ब्राह्मणः शुद्ध्येद्योग्निवेदसमन्वितइतिउक्तः आद्यस्याशौचस्यसंकोचोनतस्यनिष्कृतिर्दृष्टा भृग्वग्निपतनाद्धतेइत्युक्तस्यप्रायश्चित्तस्यविधानंउपदेशः कलौकर्तैवलिप्यते इतिव्यासोक्तेः पतितसंसर्गदोषसत्वेपिपातित्यंनेत्यर्थः अन्यथासंसर्गः शोधितेरपीतिविरोधापत्तेः स्तेयभिन्नमहापापरहस्यकृतेप्रायश्चित्तंनेत्यर्थः सवर्णान्याअसवर्णाक्षत्रियादिस्त्रियादुष्टे अयोनौशिष्यादौचतस्मस्तुपरित्याज्याः शिष्यगागुरुगाचयेत्युक्तस्त्यागः परोद्देशेनब्राह्मणाद्यर्थंआत्मत्यागः यद्वा परोद्देशात्मत्यागोगोदानंमनसापात्रमुद्दिश्येत्युक्तं उद्दिष्टस्यत्यक्तस्यवर्जनंप्रतिग्रहसमर्थोपीत्युक्तम् वेतनग्रहणेनप्रतिमापूजा स्वाशौचकालाद्विज्ञेयस्पर्शनंतुत्रिभागतइत्युक्तःस्पर्शः षडिति उपोषितस्त्र्यहंस्थित्वाधान्यमब्राह्मणाच्छूद्रादित्युक्तमन्नचौर्यम् आपदिक्षात्राद्वृत्तिः सुरवनेवधमेदग्निमित्युक्तंधमनम् दशाहेनैवशुद्ध्येतभूमिष्ठंचनवोदकमित्युक्तोदशाहः गु

रसेतुवरंदत्वेस्युक्ता दक्षिणाश्द्रेषुदासगोपालेति कंदुपक्वंस्नेहपक्वंयच्चदुग्धेनपाचितम् एतान्यशूद्रान्नभुजोभोज्यानिमनुरब्रवी-
दित्यपरार्केस्मृत्यन्तरोक्ताश्द्रस्यपाककिया पितापुत्रविवादेतुसाक्षिणांत्रिपणोदमइत्युक्तः सायंगृहत्वंविधूमेसन्नमुसलेइत्युक्तं
पृथ्वीचंद्रेणतु अटतिवसुधांविप्रः पृथिवीदर्शनायच अनिकेतात्मनाहारायत्रसायंगृहास्तुतेइतिविष्णुपुराणोक्तोनिषिद्धः
तेनज्ञातशीलपर्यायादेः श्राद्धादौविनियोगोनकार्यः कलावित्यर्थउक्तः एतानिवर्ज्यानीत्यर्थः निगमः अग्निहोत्रंगवालंबंसं-
न्यासंपलपैतृकं देवराच्चसुतोत्पत्तिः कलौपंचविवर्जयेत् अग्निहोत्रंतदर्थंसमाधानं एतच्चसर्वाधानपरम् अर्धाधानंस्मृतौश्रौ-
तस्मार्ताग्न्यास्तुपृथक्कृतिः सर्वाधानंतयोरैक्यकृतिःपूर्वयुगाश्रयेतिलौगाक्षिवचनादितिस्मृतिचंद्रिकायाम् एतेनचत्वार्यब्दसहस्रा-
णिचत्वार्यब्दशतानिच कलेर्यदागमिष्यंतितदात्रेतापरिग्रहः संन्यासश्चनकर्तव्योब्राह्मणेनविजानतेतिव्यासवचनंव्याख्यातम्
सर्वाधानेपिविशेषमाहदेवलः यावद्वर्णविभागोस्तियावद्वेदःप्रवर्तते संन्यासंचाग्निहोत्रंचतावत्कुर्यात्कलौयुगेइति अत्रपूर्वयु-
गाश्रितेतिलौगाक्षिवाक्येपूर्वयुगानिकृतादीनीत्यर्थः अन्येतुयुगस्यपूर्वंकलेःपूर्वोभागः सचत्वार्यब्दसहस्राणीतिपूर्वोक्त-
वाक्याच्चतुश्चत्वारिंशच्छतवर्षावच्छिन्नः तस्मिन्भागेसर्वाधानंकार्यं तदुत्तरंतुयावद्वर्णविभागोस्तीतिवाक्यात् वर्णविभागप-
र्यंतमर्धाधानमित्याहुः संन्याससस्त्रिदंडः छ्ः इतिश्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमला-
करभट्टकृतेनिर्णयसिंधौतृतीयपरिच्छेदेकलिवर्ज्यानिसमाप्तानि छ्ः श्रीमत्सत्योदयानात्मजशतागस्त्येजगन्नाथेश्रीकृष्णा-
यार्पणमस्तु ॥छ्ः॥ ॥छ्ः॥ ॥छ्ः॥ ॥छ्ः॥ श्रीरामचंद्रप्रसन्नोस्तु ॥छ्ः॥ ॥छ्ः॥ ॥छ्ः॥ ॥छ्ः॥ शुभमस्तु छ्ः

॥ इतिश्रीनिर्णयसिंधौतृतीयपरिच्छेदेप्रथमप्रकरणंसमाप्तं ॥

॥ ॥

॥ अथ निर्णयसिंधोस्तृतीयपरिच्छेदेश्राद्धप्र०प्रा०ते. ॥

श्रीगणेशायनमः अथश्राद्धनिर्णयः नानानिबंधैर्विमत्यभ्रांतचित्तोद्दिधीर्षया कमलाकरसंज्ञेनक्रियतेश्राद्धनिर्णयः तत्स्वरूपमाह पृथ्वीचंद्रोदयेमरीचिः प्रेतंपितॄंश्चनिर्दिश्यभोज्यंयत्प्रियमात्मनः श्रद्धयादीयतेयत्रतच्छ्राद्धंपरिकीर्तितम् ब्राह्मणस्वीकारांतश्चतुर्थ्यंतपदोपनीतपित्राद्युद्देश्यकस्त्यागः श्राद्धमित्यर्थः तत्रयद्यपिहोमपिंडभोजनानिप्रधानानीतिहेमाद्रिः होमश्च पिंडदानंचतथाब्राह्मणभोजनम् श्राद्धशब्दाभिधेयंस्यादेकस्मिन्नौपचारिकमिति श्रीधरश्च तथापिक्वचिद्विशेषंवक्ष्यामः निमित्तभेदाद्भोजनस्यपिंडानांवानिषेधोनप्राधान्यंविरुणद्धि असोमयाजिनोदधिपयोयागवत् यत्तुशूलपाणिः नित्यश्राद्धमदैवंस्यादर्घ्यपिंडविवर्जितमिति हारीतोक्तेर्नित्यश्राद्धमघादौपिंडनिषेधोस्तिनचप्राप्तिंविनासः नचातिदेशंविनाप्राप्तिः नचांगत्वेन विनातिदेशः प्रधानस्यानतिदेशात् सप्तमेउपकारकत्वेनातिदेशोक्तेः तेनभोजनंप्रधानंपिंडोंगम् पिंडदानमात्रविधिस्त्वंगभूतात्कर्मांतरमेवप्रकरणांतरन्यायादिति तन्न जातश्राद्धेनदद्यात्तुपक्वान्नंब्राह्मणेष्वपि नपक्वंभोजयेद्विप्रान्सच्छूद्रोपिकदाचनेत्यादौजातश्राद्धग्रहश्राद्धादौभोजनस्यनिषेधेनांगत्वापत्तेः नतौपशौकरोतीति बहूपजीव्यविरोधेनविकल्पापत्तेश्च तेन श्राद्धशब्दाभिधेयत्वेनोभयप्राप्तौनिषेधः पर्युदासोवादीक्षितोनददातिनजुहोतिनासोमयाजीसन्नयेदितिवदितितत्त्वम् धर्मप्रदीपेपि यजुषांपिंडदानंतुबह्वृचानांद्विजार्चनम् श्राद्धशब्दाभिधेयंस्यादुभयंसामवेदिनां तच्चपितॄन्यजेतपितृभ्योदद्यादित्युभयप्रयोगदर्शनाद्यागदानोभयात्मकं पितरोदेवताइतिपित्रुद्देश्यकत्वाद्यागत्वंविप्रापेक्षयाचदानत्वमित्यविरुद्धम् एतेन नायंयागः देवतोद्देशेनत्यागोयागः यागोद्देश्याच्चदेवतेत्यास्माश्रयादिति गौडमतमपास्तंवेदशब्दविशेषोद्देश्यत्वस्यतस्येदमिति

स्वत्वारोपप्रभृतियोगित्वस्यवादेवतात्वात् तत्रैवसुमंतुः श्राद्धात्परतरंनान्यच्छ्रेयस्करमुदाहृतम् आदित्यपुराणे नसंतिपितरश्चेतिकृत्वामनसियोनरः श्राद्धंनकुरुतेतत्र तस्यरक्तंपिबंतिते तद्भेदानाहविश्वामित्रः नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंसपिंडनम् पार्वणंचेतिविज्ञेयंगोष्ठ्यांशुद्ध्यर्थमष्टकं कर्मांगंनवमंप्रोक्तंदैविकंदशमंस्मृतम् यात्रास्वेकादशंप्रोक्तंपुष्ट्यर्थंद्वादशंस्मृतमिति एषांलक्षणानिभविष्ये अहन्यहनियच्छ्राद्धंतन्नित्यमितिकीर्तितं वैश्वदेवविहीनंतदशक्तावुदकेनतु एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते तदप्यदैवंकर्तव्यमयुग्मान्भोजयेद्द्विजान् कामायविहितंकाम्यमभिप्रेतार्थसिद्धये वृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयं अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् येसमानाइतिद्वाभ्यामेतज्ज्ञेयंसपिंडनं नित्येनतुल्यशेषंस्यादेकोद्दिष्टंस्त्रियाअपि एतदुभयमेवस्त्रियाः तेनस्त्रीकर्तृकंस्त्रीसंप्रदानकंचेत्युभयनियमइतिकल्पतरुः अमावास्यायांयत्क्रियतेतत्पार्वणमितिस्मृतम् क्रियतेवापर्वणियत्तत्पार्वणमितिस्थितिः अत्रपर्व चतुर्दश्यष्टमीचैवअमावास्याचपौर्णिमा पर्वाण्येतानिराजेंद्ररविसंक्रमणंतथेति विष्णुपुराणोक्तंसंक्रांत्यादि गोष्ठ्यांयत्क्रियतेश्राद्धंगोष्ठीश्राद्धंतदुच्यते बहूनांविदुषांसंपत्सुखार्थंपितृतृप्तये क्रियतेशुद्धयेयत्तुब्राह्मणानांतुभोजनं शुद्ध्यर्थमितितत्प्रोक्तंवैनतेयमनीषिभिः निषेककालेसोमेचसीमंतोन्नयनेतथा ज्ञेयंपुंसवनेचैवश्राद्धंकर्मांगमेवच देवानुद्दिश्ययच्छ्राद्धंतत्तुदैविकमुच्यते गच्छन्देशांतरंयस्तुश्राद्धंकुर्यात्तुसर्पिषा यात्रार्थमितितत्प्रोक्तंप्रवेशेचनसंशयः शरीरोपचयेश्राद्धमर्थोपचयएवच पुष्ट्यर्थमेतद्विज्ञेयमौपचायिकमुच्यते गोष्ठ्यांश्राद्धंकर्तृसमुदायेसंभूयसामग्रीसंपादनेनश्राद्धमि

त्यर्थः सुमन्तुर्यदि मासो बहूनां श्राद्धसंपदा स्करवार्थं भिन्नपाकाशक्तौ बहुपितृकश्राद्धमेकः कुर्यादिति कल्पतरुः शंखधरश्च शुस्त्रि श्राद्धं प्रायश्चित्तांगमिति मैथिलाः अन्नपार्वणैकोद्दिष्टवृद्धिसपिंडीकरणात्मकं चतुर्विधमेव स्त्रव्यम् तस्यैवायं प्रपंचः अथ श्राद्धदेशाः मनुः शुचिदेशं विविक्तं तु गोमयेनोपलेपयेत् दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् पृथ्वीचंद्रोदये विष्णुधर्मे दक्षिणाप्रवणे देशे तीर्थादौ च गृहेऽपि वा भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः तत्रैव प्रभासखंडे तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे भारते तस्यदेशाः कुरुक्षेत्रं गया गंगा सरस्वती प्रभासं पुष्करं चेति तेषु श्राद्धं महाफलं स्कांदे तुलसीकाननच्छाया यत्र यत्र भवेद्द्विज तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे माधवीये श्राद्धोपक्रमे व्यासः महोदधौ प्रयागे च काश्यां च कुरुजांगले शंखः गंगायमुनयोस्तीरे पयोष्ण्यमरकंटके नर्मदाबाहुदातीरे भृगुलिंगे हिमालये गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा सान्निहत्यां गयायां च दत्तमक्षय्यतां व्रजेत् अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् आदित्यपुराणे पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः महानद्याः पश्चिमेन यावद्गृध्रेश्वरो गिरिः उत्तरे ब्रह्मयूपस्य यावद्दक्षिणमानसम् एतद्गयाशिरो नाम त्रिषु लोकेषु विश्रुतमिति शूलपाणौ बृहस्पतिः गंगायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयं धर्मारण्यधर्मपृष्ठे धेनुकारण्यमेव च दृष्ट्वैतानि पितॄंश्चार्च्य वंशान्विंशतिमुद्धरेत् त्रिस्थलीसेतौ वायवीये शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिरे उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतं सप्तगोत्राणि तु पिता माता च भार्या च भगिनी दुहिता तथा पितृमातृष्वसा चैव सप्त ३

गोत्राणिवेविदुरिति एषांगोत्राणामेकोत्तरशतंकुलंपुरुषाइत्यर्थः तेचोक्तास्तत्रैव तत्वानिविंशतिर्नृपाद्वादशैकादशादश अष्टाविंतिश्चगोत्राणांकुलमेकोत्तरंशतं तत्वानिचतुर्विंशतिः तेचद्वादशपूर्वाद्वादशपराः एवमग्रेपि प्रयोगपारिजातेपाद्मे शालग्राममयीसुद्रासंस्थितायत्रकुत्रचित् वाराणस्यायवाधिक्यसमंताद्योजनत्रयं तथा यत्किंचित्पैतृकंकुर्यात्सपिंडवानदांतिके विष्णुलोकंसगच्छेत्तुलभतेशाश्वतंपदम् तत्रैववाराहे चक्रांकस्यतुसान्निध्यंयत्कर्मक्रियतेनरैः स्नानंदानंतपःश्राद्धंसर्वमक्षयतांव्रजेत् अथनिषिद्धदेशाः पृथ्वीचंद्रोदयेस्कांदे त्रिशंकोर्वर्जयेद्देशांसर्वद्वादशयोजनं उत्तरेणमहानद्यादक्षिणेनतुकीटकान् देशास्त्रैशंकवानामश्राद्धकर्मणिवर्जितः वायवीये म्लेच्छाश्रमधर्माश्चदेशावर्ज्याःप्रयत्नतः यमः रूक्षंकृमिहतंक्लिन्नंसंकीर्णानिष्टगंधिकं देशंत्वनिष्टशब्दंचवर्जयेच्छ्राद्धकर्मणि तत्रैवशंखः गोगजाश्वादिपृष्ठेषु कृत्रिमायांतथाभुवि न कुर्याच्छ्राद्धमेतेषुपारक्यासुचभूमिषु यमः परकीयप्रदेशेषुपितृणांनिर्वपेत्तुयः तद्भूमिस्वामिपितृभिःश्राद्धकर्मविहन्यते ब्राह्मभारतयोरपि परकीयगृहेयस्तुस्वान्पितॄंस्तर्पयेद्यदि तद्भूमिस्वामिनस्तस्यहरंतिपितरोबलात् अग्रभागततस्तेभ्योदद्यान्मूल्यंचजीवितम् श्राद्धार्हाणामग्रभागश्राद्धतदनर्हाणांशूद्राणांतुमूल्यमितिकेचित् षोडशीपिंडेबांधवानामपिपिंडोक्तेः येबांधवाबांधवावेत्यादितर्पणबाधापत्तेश्च नामगोत्रपूर्वंश्राद्धंनिषेधानान्यत्रेतिगौडाः विभासकृतस्यधटकृतपुत्रश्राद्धनिषेधानान्यत्र अन्नदानंचान्नत्यागात्पूर्वंकार्यमितिमैथिलाः तन्न अग्रभागस्यश्राद्धपरत्वेमानाभावात् अन्नदानंचनिषेधाभावात् त्यागात्पूर्वंकरणेनगेनव्यवधानापत्तेः अंगत्वेचमानाभावात् इदंचस्वाम्यनुज्ञाभावेतदुक्तं तत्रैवब्राह्मे स्वकुलेषु

गेहेषुस्वेष्वनुज्ञापितेषुच श्राद्धमेतेषुदातव्यंवर्ज्यमेतेषुनोच्यते किरातेषुगलिंगेषुकोंकणेषुखसेष्वपि सिंधोरुत्तरकूलेषुनर्मदायाश्चदक्षिणे
पूर्वेणकरतोयायानदेयंश्राद्धमुच्यते इदंकाम्यविषयं अन्यथातत्रस्थानां सर्वश्राद्धाकरणापत्तेः नर्मदादक्षिणेऽपवादः स्कांदे सह्यस्य
चोद्भवोयत्रयत्रगोदावरीनदी पृथिव्यामपिकृत्स्नायां सप्रदेशोऽतिपावनः परकीयत्वापवाद आदित्यपुराणे अटवीपर्वताः पुण्यानदीतीरा
णियानिच सर्वाण्यस्वामिकान्याहुर्नहितेषुपरिग्रहः वनानिगिरयोनद्यस्तीर्थान्यायतनानिच देवखाताश्चगर्ताश्चनस्वाम्यंतेषुविद्यते
स्मृतिसारे नैकवासानचद्वीपेनांतरिक्षेकदाचन श्रुतिस्मृत्युदितंकर्मनकुर्यादशुचिःक्वचित् दिवोदासीये म्लेच्छदेशेतथारात्रौसंध्या
यांविप्रवर्जितः नश्राद्धमाचरेद्विद्वान्नचाकाशेकथंचन अथश्राद्धकालाः तेचसंक्रांतियुगादिमहालयादयः प्रायेणपूर्वपरिच्छेदद्व
येउक्ताएव केचित्तूच्यंते पृथ्वीचंद्रोदये वृद्धपराशरः श्राद्धं वृद्धावचंद्रेभछायाग्रहणसंक्रमे नवोदकेनवान्नेचनवच्छन्नेतथा
गृहे नवेक्षवेषुचेहंतेपितरोहिसघास्वपि पितरःस्पृहयंत्यन्नमष्टकासुमघासुचेति शातातपपादः नवोदकेनवकूपवाप्यादा-
विति केचित् वर्षोपक्रमेआर्द्राप्रवेशइतिगौडाः नवान्नश्राद्धेविशेषोज्योतिषे ज्येष्ठांशेषार्धगेसूर्येमृगनेत्रानिशात्मके नवान्नेभोज
नश्राद्धंजन्मचंद्रतिथौनच आश्लेषाकृत्तिकाज्येष्ठामूलाजपदगेषुच गुरुभौमदिनेरिक्तेतिथौनाद्यान्नवौदनं तत्रैव वृश्चिकेशुक्लप
क्षेतुनवान्नशस्यतेबुधैः अतःकृष्णपक्षेनेतिगौडाः मैथिलास्तु अकृत्वाग्रयणंचैव धान्यजातंनरोत्तम इतिवाराहोक्तेः प्रति-
धान्यंश्राद्धमाहुः तन्न जातपदस्यश्राद्धयोग्यसमूहपरत्वात् हेमाद्रौजातूकर्ण्यः ग्रहोपरागेचसुतेचजातेपित्र्येगयायामयनद्व
येच नित्यंचशांखेचतथैवपद्मेदत्तंभवेन्निष्कसहस्रतुल्यम् शांखमाहुरमावास्यांक्षीणचंद्रांद्विजोत्तमाः अष्टकासुभवेत्पद्मंतत्रदत्त

तथाक्षयम् तत्रैव शंखः यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् याज्ञवल्क्यः अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयं द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः व्यतीपातो गजच्छाया ग्रहणं चेन्दुसूर्ययोः श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः कृष्णपक्षः सर्वोपि शाकेनापरपक्षं नातिक्रमेत् मासि मासि वाशनमिति श्रुतेः ऊर्ध्वं वा चतुर्थ्यां यदहः संपद्यतेकृते चतुर्दशीमिति कात्यायनोक्तेः मासि मासि कार्यमपरपक्षस्यापराण्हः श्रेयानित्यापस्तंबोक्तेश्च वीप्सया सर्वकृष्णपक्षेषु नित्यम् तेनोपसंहारान्महालयपरत्वं परास्तं अत्र प्रत्यहं पञ्चम्यादि यदहः संपत्तिर्वेति त्रयः पक्षाः यदेकदिने श्राद्धं तदा दार्शं पृथगेव याज्ञवल्क्येनामावास्यायाः पृथङ्निर्देशात् एतेन कृष्णपक्षे यदहः संपद्यते अमावास्यायां तु विशेषेणेति निगमोक्ते गुणापरपक्षश्राद्धस्यामावास्येति शूलपाणिमतमप्यपास्तम् अशक्तो दर्शेनापि मासिश्राद्धसिद्धिरिति नारायणवृत्तिः निरग्निकानां कस्मिंश्चिद्दिने आहिताग्नेस्तु दर्श एव न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन इति मनूक्तेः सर्वकृष्णपक्षाशक्तो मात्स्ये अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् कन्याकुंभवृषस्थेर्के कृष्णपक्षे च सर्वदा कर्कोपि आहिताग्नेः संवत्सरे त्रिः श्राद्धनियम इति देवलः अनेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् द्विश्चतुर्वा यथा श्राद्धं मासे मासे दिने दिने कृष्णपक्षेष्वपि महालयस्य श्रैष्ठ्यम् तच्चोक्तं प्राक् व्यतीपातविशेषमाह हेमाद्रौ शंखः फललक्षमसुस्पत्तौत्क्रमणे कोटिरुच्यते पतने शतकोट्यस्तु पाते वै दत्तमक्षयम् ज्योतिःशास्त्रे द्वाविंशतिस्तथोत्पत्तौ क्रमणे चैकविंशतिः पतने दश नाड्यस्तु पतिते सप्त नाडिकाः अंत्यो नद्धो व्यतीपातो प्रयुक्तो हेमाद्रौ मार्कण्डेयः यदा च श्रोत्रियोभ्येति गृहं वेदविदग्निवित् तेनैकेनापि कर्तव्यं श्राद्धं च विषुवच्छुभं इदं चापिंडं कार्यमिति हेमाद्रिः

एतज्जीवत्पितृकोपि कुर्यात् उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके परवे तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति मैत्रायणीयपरिशिष्टे
के: तिथिविशेषे फलविशेषो याज्ञवल्क्येनोक्तः कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा
ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरौप्ये सकुप्यके ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं एताः कृ
ष्णपक्षस्था एव महालये तु फलमिति पृथ्वीचन्द्रोदयः पौर्णमास्यां हेमाद्रौ पितामहः अमावास्या व्यतीपाते पौर्णमास्यष्टकासु च वि
द्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते एतन्माघ्यादिपरम् व्रीहिपाके च कर्तव्यं यवपाके च पार्थिव पौर्णमासी तथा माघी श्रावणी च नृ
पोत्तम प्रोष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी एतास्तु श्राद्धकालान्वै नित्यानाह प्रजापतिरिति विष्णुधर्मोक्तेः विष्णुः माघीप्रो
ष्ठपद्यूर्ध्वं कृष्णत्रयोदशीति अत्र माघी पौर्णमासीति कल्पतरुः श्रावण्यूर्ध्वं मपूमघायोगसंभवात्त्रयोदशीविशेषणमिति गौडाः न
क्षत्रेऽपि याज्ञवल्क्यः स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा पुत्रान् श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभम् प्रवृत्तचक्रतां वापि-
वाणिज्यप्रभृतीनपि अरोगित्वं यशो वीतशोकतां परमां गतिं धनं वेदान्भिषक्सिद्धिं कुप्यं गामप्यजाविकं अश्वानायुश्च विधिवद्यः
श्राद्धं संप्रयच्छति कृत्तिकादिभरण्यन्तं सकामान्प्राप्नुयादिमान् फलान्तराण्यपि महाभारते कौर्मादौ ज्ञेयानि माधवीये मरीचिः कृ
त्तिकादिषु ऋक्षेषु श्राद्धं यत्फलमीरितम् विष्कम्भादिषु योगेषु तदेव फलमिष्यते वृहस्पतिः आरोग्यं चैव सौभाग्यं शत्रूणां च प
राजितं सर्वान्कामानभियाद्विद्यां धनमायुर्यथाक्रमम् सूर्यादिदिवसेष्वेतच्छ्राद्धकृल्लभते फलं बवादिकरणेष्वेतच्छ्राद्धकृल्लभते फ
लम् अन्यानि च षण्णवतिश्राद्धादीनि प्रागुक्तानि मार्कण्डेयपुराणे श्राद्धार्हद्रव्यसंपत्तौ तथाद्दुःस्वप्नदर्शने जन्मर्क्षे ग्रहपीडासु श्राद्धं

कुर्वीतचेच्छया अथश्राद्धाधिकारिणः चंद्रिकायांसुमंतुः मातुःपितुःप्रकुर्वीतसंस्थितस्यौरसः सुतः पैतृमेधिकसंस्कारंमंत्रपूर्वक
मातृतः तत्रैवहेमाद्रौशंखः पितुःपुत्रेणकर्तव्यापिंडदानोदकक्रिया पुत्राभावेतुपत्नीस्यात्तदभावेतुसोदरः अत्रयद्यपिपुत्रपदंक्षे
त्रजादिद्वादशविधपुत्रपरम् तेचद्वादशपुत्रायाज्ञवल्क्येनोक्ताः औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतः क्षेत्रजःक्षेत्रजातस्तुस
गोत्रेणेतरेणवा गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतःस्मृतः कानीनःकन्यकाजातोमातामहसुतःस्मृतः अक्षतायांक्षतायांवाजातः
पौनर्भवस्तथा दद्यान्मातापितावायंसपुत्रोदत्तकोभवेत् क्रीतश्चताभ्यांविक्रीतःकृत्रिमःस्यात्स्वयंकृतः दत्तात्मातुःस्वयंदत्तोग
र्भेविन्नःसहोढजः उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सुतः पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरइति तथापि दत्तौरसेतरेषांतुपुत्र
त्वेनपरिग्रहइति हेमाद्रावादिपुराणे कलावितरेषांपुत्रत्वनिषेधादौरसदत्तकपरमेव यद्यपि पिंडदोंशहरश्चैषां
पूर्वाभावेपरःपरइति याज्ञवल्क्योक्तेरौरसाभावेदत्तकप्राप्तिस्तथाप्यौरसाभावेपौत्रः तदभावेप्रपौत्रस्तदभावेदत्तकादयइतिज्ञेयं
पुत्रेणलोकाञ्जयतिपौत्रेणानंत्यमश्नुते अथपुत्रस्यपौत्रेणब्रध्नस्याप्नोतिविष्टपमिति जीमूतवाहनधृतवसिष्ठहारीतशंखलिखितोक्तेः
लोकानंत्यंदिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैरिति याज्ञवल्क्योक्तेश्चपुत्रः पौत्रश्चतत्सुतःपुत्रिकापुत्रएवच पत्नीभ्रातानाचतज्जश्चपितामा-
तास्नुषातथा भगिनीभागिनेयश्चसपिंडःसोदकस्तथा असन्निधानेपूर्वेषामुत्तरेपिंडदाःस्मृताः स्मृतिसंग्रहे प्रपौत्रानंतरंपुत्रिका
पुत्रोक्तेस्तत्समत्वाच्च दत्तकस्य यद्यपिवृहस्पतिना पुत्रश्चपुत्रिकापुत्रःस्वर्गप्राप्तिकरावुभौ रिक्थेचपिंडदानेचसमानौपरिकीर्तिता
वितिपौत्रसाम्यमुक्तं याज्ञवल्क्येनच औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतइति औरससाम्यम् तथापि लोकेराजसमोमंत्रीत्या

दौकिंचिन्न्यूनेसमशब्दप्रयोगात् गौणमुख्ययोः साम्ययोगाच्चस्तुत्यर्थंतत् नतुसमविकल्पइतिभ्रमितव्यं पुत्रःपौत्रःप्रपौत्रोवाभ्राता
वाभ्रातृसंततिः सपिंडसंसृतिर्वापिक्रियार्हानृपजायते तेषामभावेसर्वेषांसमानोदकसंततिः मातृपक्षसपिंडेनसंबंधोयोजलेनवा
कुलद्वयेपिचोच्छिन्नेस्त्रीभिःकार्याक्रियानृप तत्संघातगतेर्वापितद्रिक्थात्कारयेन्नृपइतिविष्णुपुराणाच्चेति प्रपौत्रानंतरंदत्तकादय
इति पृथ्वीचंद्रमदनरत्नकालादर्शोदयः मदनपारिजातेप्येवम् बोपदेवरुद्रधरादयस्तु पुत्रेषुविद्यमानेषुनान्यंवैकारयेत्स्वधामिति
सुमंतूक्तो पितामहःपितुःपश्चात्संचलंयदिगच्छति पौत्रेणैकादशाहादिकर्तव्यंश्राद्धषोडशं नैतत्पौत्रेणकर्तव्यंपुत्रवांश्चेत्पिता-
महइति छंदोगपरिशिष्टेच पुत्रशब्दस्यद्वादशविधसुतपरत्वात्सूरौभावेपरःपरइत्यस्यानन्यपरत्वाच्च दत्तकाद्यभावेपुत्रादीनामप्य
धिकारइत्याहुः तन्नगौणमुख्ययोःसाम्यायोगाद्दत्तकेसतिपौत्रस्यांशाहर्त्वस्याप्यभावापत्तेः पुत्रपदस्यौरसमात्रपरत्वाच्चिंत्यम् अत
एवनिषेधादुपनीतपौत्रसत्वेप्यनुपनीतपुत्रस्यैवाधिकारः औरसश्चानुपनीतोपिकुर्यादित्याह पृथ्वीचंद्रोदयेसुमंतुः श्राद्धंकु-
र्यादवश्यंतुप्रमीतपितृकोद्विजः व्रतस्थोवाव्रतस्थोवाएकएवभवेद्यदि वृद्धमनुः कुर्यादनुपनीतोपिश्राद्धमेकोहियःसुतः पितृय
ज्ञाहुतिंपाणौजुहुयाद्ब्राह्मणस्यसः एकोमुख्यऔरसइत्यर्थः मनुः नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात् नाभिव्याहार
येद्ब्रह्मस्वधानिनयनादृते ब्रह्मवेदः सुमंतुरपि नाभिव्याहारयेद्ब्रह्मयावन्मौंजीनिबध्यते मंत्राननुपनीतोपिपठेदेवैकऔरसः
अयंमंत्रपाठः त्रिवर्षकृतचूडस्यैव अनुपनीतोपिकुर्वीतमंत्रवत्पितृमेधिकम् यद्यसौकृतचूडःस्याद्यदिस्याच्चत्रिवत्सरइतिसुमं ५
तूक्तेः यत्तुव्याघ्रः कृतचूडस्तुकुर्वीतउदकंपिंडमेवच स्वधाकारंप्रयुंजीतवेदोच्चारंनकारयेदिति यच्चस्मृतिसंग्रहे कृतचूडोनु

पेतश्च पित्रोः श्राद्धं समाचरेत् उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसाविति तत्प्रथमवर्षच्चूडाविषयमिति माधवमदनरत्नपृथ्वीचंद्राः त्रिवर्षोर्ध्वं मंत्रवत्त्वस्य विकल्प इति चंद्रिकाबोबदेवश्च. दत्तकादिपरो निषेध इति वयम् मदनरत्ने स्कांदे यज्ञेषु मंत्रवत्कर्म पत्नी कुर्याद्यथा नृप तथोर्ध्वदैहिकं कर्म कुर्यात्साधर्मसंस्कृता अशक्तो तु कात्यायनः असंस्कृते तु पत्न्या च ह्यग्निदानं समंत्रकं कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि पुत्रश्च तज्जन्मतोधिकारी किंतु वर्षोत्तरमित्याह कालादर्शः चौलादाद्याब्दिकादर्वान कुर्यात्प्रेतमेधिकम् पुत्रश्चोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात् पितरं नाब्दिकाच्चौलात्प्रेतमेधेन कर्मणा एतच्चौरसस्यैव दत्तकादीनां तूपनीतानामेवाधिकार इति कालादर्शः पृथ्वीचंद्रोदयेपि स्कांदे पित्रोरनुपनीतोपि विदध्यादौरसः सुतः और्ध्वदैहिकमन्ये तु संस्कृताः श्राद्धकारिण इति अन्यत्रापि दर्शमहालयादावनुपनीतस्याधिकारोस्माभिः पूर्वमुक्तः प्रपौत्राभावे दत्तकादय एकादश पुत्राः तदभावे भर्तुः पत्नी तस्याश्च सः अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति वृद्धमनूक्तेः भार्या पिंडं पतिर्दद्याद्भर्त्रे भार्या तथैव च श्वश्र्वादेश्च स्नुषा चैव तदभावे सपिंडका इति पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदर इति च हेमाद्रौ शंखोक्तेः पृथ्वीचंद्रोदयस्तु कानीनगूढसहजपुनर्भूतनयाश्च ये पत्न्यभावेधिकुर्युस्ते अप्रशस्ताः स्मृता हिते इति स्मृतिसंग्रहात् पत्न्यभावे कानीनादय इत्याह पत्युरपि सपत्नीपुत्रे सति नाधिकारः पितृपत्न्यः सर्वा मातरः स्मृत्युक्तेः विदध्यादौरसः पुत्रो जनन्या और्ध्वदैहिकं तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा स्मृताः तेषामभावे तु पतिस्तदभावे सपिंडका इति मदनरत्ने कात्यायनोक्तेश्च बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः एका चेत्पुत्रिणी तासां सर्वासां पिंडदस्तु स इति

बृहस्पतिवचनाच्च अपरार्केप्येवम् तेनयच्छुद्धिविवेके उक्तंसत्यपिसपत्नीपुत्रे पत्नुरेवाधिकारइति तन्निरस्तम् यच्चतत्रैवकात्यायनः नभार्यायाःपतिर्दद्यादपुत्रायाअपिक्वचित् यच्चविष्णुपुराणं कुलद्वयेपिचोत्सन्ने स्त्रीभिःकार्याक्रियानृपेति यच्चमार्कंडेयपुराणम् सर्वाभावेस्त्रियःकुर्युःस्वभर्तॄणाममंत्रकमिति तदासुरादिविवाहोढाविषयम् धर्मैर्विवाहेरूढायासापत्नीपारिकीर्तिता क्रयक्रीतातुयानारीनसापत्न्यभिधीयते नसादैवेनवापित्र्येदासींतांमुनयोविदुरिति माधवीयेशातातपोक्तेः यत्तुशुद्धिरत्नाकरः शूलपाणिश्च अपुत्रस्यचयापुत्रीसापिपिंडप्रदाभवेत् तस्यापिंडान्नदेशीकवाएकाहेनैवनिक्षिपेदितिजाबालोक्तेः भर्तुर्धनहरापत्नीतांविनादुहितास्मृता अंगादंगात्संभवतिपुत्रवद्दुहितानृणामितिबृहस्पतिदुहितुर्धनहारित्वोक्तेश्च पुत्राभावेकन्यातदभावेसपत्नीपुत्रइत्याहतुः तत्सर्वविरोधात् मातुर्दुहितरःशेषमृणात्ताभ्यऋतेन्वयइतिदुहितुर्मातृधनग्राहित्वेनपुत्रस्यतच्छ्राद्धानधिकारापत्तेश्चोपेक्ष्यम् वचनंतुभ्रातृपुत्राद्यभावविषयम् पत्न्यभावेअविभक्तस्यसोदरः पूर्वोक्तशंखवचनात् विभक्तस्यतुदुहिताधनहारित्वात् पूर्वोक्तजाबालवचनाच्च तत्राप्यूढानूढसमवायेऊढैव दुहितापुत्रवत्कुर्यान्मातापित्रोस्तुसंस्कृता आशौचमुदकंपिंडमेकोद्दिष्टंसदातयोरितिभरद्वाजोक्तेः तदभावेदौहित्रः धनहारित्वात् मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकं कुर्वन्मातामहस्यापिव्रतीनश्यतेव्रतादितिचंद्रिकायांवृद्धमनूक्तेः यथाव्रतस्थोपिसुतःपितुःकुर्यात्क्रियांनृप उदकाद्यांमहाबाहोदौहित्रोपितथार्हतीत्यपरार्केभविष्योक्तेश्च एतद्धनहारिणाआवश्यकंनान्यस्येत्याहतत्रैववरदः श्राद्धंमातामहानांतु अवश्यंधनहारिणा दौहित्रेणार्थनिष्कृत्यैकर्तव्यंपूर्वमुत्तरमिति तेनदौहित्रोऽत्रपुत्रीकृतइति देवयाज्ञिकोक्तेः

परास्ता अत्रपत्नी दौहित्रसमवायेंशपरत्वात् पत्न्येव कुर्यात् दौहित्रभ्रातृपुत्रसत्वे विभक्तस्य दौहित्रः अविभागे भ्रातृपुत्रः भ्रातृतत्सुतसत्वे कनिष्ठश्चेत् भ्रातैव ज्येष्ठश्चेत्तत्सुतः कुर्यादिति दाक्षिणात्यग्रंथाः हारलतादौ तु भ्रातुर्भ्राता स्वयं चक्रे तद्भार्या चेन्न विद्यते तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदर इति ब्राह्मोक्तेः पत्नी कुर्यात्सुताभावे पत्न्याभावे सहोदर इति कौर्माच्च ज्येष्ठभ्रातैव कुर्यान्न तत्सुतः यत्तु नानुजस्य तथाग्रज इति तत् कनिष्ठभ्रातृसत्वविषयम् यच्च मनुः सर्वेषामेकजातानामेकश्चेत्पुत्रवान्भवेत् सर्वास्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति तत्सहोदराभावविषयमित्युक्तं एतेन पुत्रत्वातिदेशोयम् अतस्तस्मिन्सति एकादशपुत्राः प्रतिनिधयो न कार्याः स एव पिंडदोंशहरश्चेति अत्रापीति वाचस्पतिमनुटीकाकल्पतरुरत्नाकरादयः परास्ताः द्वादशपुत्राभावे पत्नीदुहितर इति याज्ञवल्क्योक्तेश्च तस्माद्दत्तपुत्रप्रशंसेयमिति विज्ञानेश्वरः अविभक्तविषयं वा मदनरत्ने स्मृतिसंग्रहे पुत्रः कुर्यात्पितुः भ्रातृपत्नी च तदसन्निधौ धनहार्यथ दौहित्रस्ततो भ्राता च तत्सुतः भ्रात्रोः सहोदरो भ्राता कुर्याद्वाहादितत्सुतः ततस्तत्सोदरो भ्राता तदभावे च तत्सुत इति भ्रातृपुत्राभावे क्रमेण पितृमातृस्नुषास्वस्तृतत्पुत्रादयः धनहारित्वात् भगिनीतत्सुतयोर्विशेषमाह मदनरत्ने कात्यायनः अनुजा अग्रजा वापि भ्रातुः कुर्वीत सत्क्रियाम् ततः स्वसोदरान्तद्वत्क्रमेपालनयस्तयोः अपरार्के कार्ष्णाजिनिः पुत्रः शिष्योऽथवा पत्नी पिता भ्राता स्नुषा गुरुः स्त्री हारी धनहारी च कुर्यात्पिंडोदकक्रियाम् मार्कंडेयपुराणे पुत्राभ्राता च तत्पुत्रः पत्नी माता तथा पिता मित्राभावे तु शिष्यश्च कुर्वीरन्नौर्ध्वदेहिकम् तेन धनहारी एतद्भिन्न इति कालादर्शः अत्र पाठक्रमो न विवक्षितः पूर्ववाक्ये ऽथ ततः शब्दादिभिः श्रोतक्रमोक्तेः अथ जिह्वाया अथ वक्षस इतिवत् पृथ्वीचंद्रोदये वृद्धमनुः

स्नुषास्वस्रीयतत्सुत ज्ञातिसंबंधिबांधवाः पुत्राभावेतुकुर्वीरन्सपिंडांतंयथाविधि मार्कंडेयपुराणे पुत्राद्युत्सन्नबंधोश्चभरत्तापिश्वशुरस्यच जामातास्नेहवत्कुर्यादखिलंपैतृमेधिकम्. चंद्रिकायांवृद्धशातातपः मातुलोभागिनेयस्यस्वस्रीयोमातुलस्यच श्वशुरस्यगुरोश्चैवसख्युर्मातामहस्यच. एतेषांचैवभार्याणांस्वसुर्मातुःपितुस्तथा श्राद्धमेषांतुकर्तव्यमितिवेदविदोविदुः शुद्धिविवेकेपृथ्वीचंद्रोदयेचब्राह्मे दत्तानांवाप्यदत्तानांकन्यानांकुरुतेपिता चतुर्थेहनितास्तेषांकुर्वीरन्सुसमाहिताः दत्तावाग्दत्ताः मातामहानांदौहित्राःकुर्वंत्यहनिचापरे तेपितेषांप्रकुर्वंतिद्वितीयेहनिसर्वदा जामातुःश्वशुराश्चकुर्युस्तेषांतेपिचसंयताः मित्राणांतद्वत्पत्नीनांश्रोत्रियाणांगुरोस्तथा भागिनेयसुतानांचसर्वेषांतुपरेहनि राज्ञोसतिसपिंडेतुनिरपत्यपुरोहितः मंत्रीवातद्दशौचंतुपुरश्चीर्त्वाकरोतिसः अत्रद्वितीयाहादौश्राद्धविधानमस्थिसंचयपरम् कालादर्शे दाहादिमंत्रवत्पित्रोर्विदध्यादौरसःसुतः तदभावेतुपौत्रश्चप्रपौत्रःपुत्रिकासुतः दौहित्रोधनहारीचभ्रातातत्सुतएवच पितामातास्नुषाचैवस्वसातत्सुतएवच सपिंडःसोदकोभ्रातुःसपिण्डश्चसहोदकः स्त्रीचशिष्यर्त्विगाचार्याजामाताचसखापिच उत्सन्नबंधोरिक्थेनकारयेदवनीपतिः गौतमः पुत्राभावेसपिंडामातृसपिंडाःशिष्याश्चदद्युस्तदभावेऋत्विगाचार्यौ यत्तुचंद्रिकायांवृद्धशातातपः प्रीत्याश्राद्धंप्रकर्तव्यंसर्वेषांवर्णलिंगिनामितितत्सवर्णविषयम् ब्राह्मणास्त्वन्यवर्णानांनकुर्यात्कर्मकिंचन कामाल्लोभाद्भयान्मोहात्कृत्वातज्जातितांव्रजेदिति ब्राह्मोक्तेः नब्राह्मणेनकर्तव्यंशूद्रस्याप्यौर्ध्वदैहिकं शूद्रेणवाब्राह्मणस्यविनापारसवात्क्वचिदितिपारसवोक्तेश्च पारसवः ऊढशूद्रापुत्रः अत्रेदंतत्वम् सर्वत्रपुत्रादेः सर्वस्याभावेपत्न्यादेरधिकारउक्तः तत्राभावोसन्निधिर्नाशश्चोच्यते अतएवपूर्वत्र असन्निधानेपूर्वेषामित्यु

क्रम्‌ तत्रासन्निधौ पत्न्यादेः सर्वाधिकारेऽप्राप्ते प्रोषितावसिते पुत्रः कालादपि चिरादपि एकादशाद्याः क्रमशो ज्येष्ठस्य विधिवत्क्रियाः ज्येष्ठेनैव तु यत्कृतमित्याद्यैर्देशांतरेपवादात्पुत्रनाशएव पत्न्यादेः सपिंडनादधिकारः असन्निधौ तु तत्पूर्वमेव नोर्ध्वं अतोऽनधिकारिणा भ्रात्रादिना कृतमप्यकृतमेवेति पुनरावर्तनीयम्‌ मासिकापकर्षोप्यावर्तनीयः एकादशाहमासिकानि नावर्तंते तज्ज्यायसापि कर्तव्यं सपिंडीकरणं पुनरिति वदावृत्तिविधानाभावादिति केचित्‌ तन्न अस्य निर्मूलत्वात्‌ अतस्तदपि कनिष्ठकृतमावर्तते ह्यग्नि श्रौतपिंडपितृयज्ञार्थं तु कृतं नावर्तते नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत्‌ न पार्वणं नाभ्युदयं कुर्वन्न लभते फलमिति इत्युत्तरनिषेधनादिति भ्राता वा भ्रातृपुत्रो वेत्यादिहारीतादिवचोभ्यः कनिष्ठादेरप्यधिकारात्‌ यथात्रज्येष्ठकर्तृकत्वबाधस्तथापुत्रकर्तृकत्वस्यापि बाधः सपिंडने तु बहुवक्तव्यं तन्निर्णये वक्ष्यामः अधिकारविशेषेण क्रियाव्यवस्थोक्ता विष्णुपुराणे पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः त्रिप्रकाराः क्रिया ह्येतास्तासां भेदाञ्छृणुष्व मे आदाहाद्द्वादशाहाच्च मध्ये याः स्युः क्रियान्नृप ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः प्रेते पितृत्वमापन्ने सपिंडीकरणादनु क्रियंते याः क्रियापुत्रैः प्रोच्यंते तान्नृपोत्तराः पितृमातृसपिंडैश्च समानसलिलैस्तथा तत्संघातगतैश्चैव राज्ञा वा धनहारिणा पूर्वा मध्याश्च कर्तव्याः पुत्राद्यैरेव चोत्तराः दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा मृताहनि तु कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः दौहित्रतत्सुतयोर्धनहारिणोरिदम्‌ एवमन्यस्य धनहर्तुः यश्चार्थहरः सपिंडदायीत्यापस्तंबोक्तेः प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः वर्णानां यद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरेदिति पृथ्वीचंद्रोदये व्याघ्रपादोक्तेः मदनरत्ने स्कांदेपि मलमेतन्मनुष्याणां द्रविणं यत्प्रकीर्तितमित्युक्त्वा ऋषिभिस्तस्य नि-

दिष्टानिष्कृतिःपावनीपरा आदेहपतनात्तस्यकुर्यात्पिंडोदकक्रियामित्युक्तं क्रियानिबंधेकात्यायनः नचमातानचपिताकुर्यात्पुत्रस्यपैतृकम् नाग्रजश्चतथा भ्राताभ्रातॄणांतुकनीयसां पृथ्वीचंद्रोदयेबोधायनः पित्राश्राद्धंनकर्तव्यंपुत्राणांतुकथंचन भ्रात्राचैवनकर्तव्यंभ्रातॄणांचकनीयसाम् यदिस्नेहेनकुर्यात्तांसपिंडीकरणंविना गयायांतुविशेषेण ज्यायानपिसमाचरेत् अन्याभावेपित्रादिरपिकुर्यात् उत्सन्नबांधवेप्रेतेपिताभ्राताथवाग्रजः जननीचापिसंस्कुर्यान्महदेनोन्यथाभवेदितिस्मृत्युक्तेः ब्रह्मचारिणांतु शुद्धिविवेके पृथ्वीचंद्रोदयेब्राह्मे असमासन्नतस्यापिकर्तव्यंब्रह्मचारिणः श्राद्धंतुमातापितृभिर्नतुतेषांकरोतिसः श्राद्धंमासिकाब्दिकादिसर्वं कार्यमित्यर्थः नत्वितिनिषेधोन्यसत्वे यत्तुछंदोगपरिशिष्टे नत्यजेत्सूतकेकर्मब्रह्मचारीस्वयंक्वचित् नदीक्षणात्परंयज्ञेनकृच्छ्रादितपश्चरन् पितर्यपिमृतेनैषांदोषोभवतिकर्हिचित् आशौचंकर्मणोंतेस्यात्र्यहंवाब्रह्मचारिणा यच्चयाज्ञवल्क्यः नब्रह्मचारिणःकुर्युरुदकंपतितास्तथैवेति तदप्यन्यसत्वे अन्याभावेतुब्रह्मचारिणापिकार्यं पूर्वोक्तवृद्धमनुवचनात् आचार्यपित्रुपाध्यायान्निर्हृत्यापिव्रतीव्रती संकरान्नंचनाश्नीयान्नचतैःसहसंवसेदितितेनैवोक्तेः ब्रह्मचारिणः शवकर्मणोव्रतान्निवृत्तिरन्यत्रमाता पित्रोरितिवसिष्ठोक्तेः अत्राशौचमेकाहंवक्ष्यामः प्रागुपनयनान्मृतस्यतुपंचवर्षोत्तरंसपिंडीकरणवर्ज्यंषोडशश्राद्धादिसर्वंकार्य मित्युक्तंदेवजानीये असंस्कृतानांभूमौपिंडंदद्यात्संस्कृतानांकुशेष्विति प्रचेतोवचनाच्च एतच्चाग्रेवक्ष्यामः अविभक्तानांविशेष माह पृथ्वीचंद्रोदयेमरीचिः बहवःस्युर्यदापुत्राःपितुरेकत्रवासिनः सर्वेषांतुमतंकृत्वाज्येष्ठेनैवतुयत्कृतं द्रव्येणचाविभक्तेन सर्वैरेवकृतंभवेत् ज्येष्ठस्यकर्तृत्वेपिसर्वेफलभागिनइत्यर्थः तेनयेब्रह्मचर्यपरान्नवर्जनादयः फलसंस्कारास्तेसर्वेषांभवती-

तिसिद्धम् संसृष्टीनामप्येवम् तुल्यत्वात् विभक्तानांविशेषमाहोशनाः नवश्राद्धंसपिंडत्वंश्राद्धान्यपिच षोडश एकेनैवतु कार्याणिस
विभक्तधनेष्वपि लघुहारीतः सपिंडीकरणांतानि यानिश्राद्धानिषोडश पृथङ्नैवसुताःकुर्युः पृथग्द्रव्या अपिक्वचित् ऊर्ध्वंसपि
डीकरणात्सर्वैःकुर्युः पृथक् पृथक् मदनरत्ने विभक्तास्तु पृथक्कुर्युःप्रतिसंवत्सरादिकं एकेनैवाविभक्तेषु कृतेसर्वैस्तुतत्कृतम्
एतेनाब्दिकादिष्वविभक्तानामनियमइतिवदन्शूलपाणिः परास्तः दत्तकस्तुजनकस्य पुत्राद्यभावेदद्यात्तत्सत्वे गोत्ररिक्थेज
नयितुर्नभजेद्दत्रिमःसुतः गोत्ररिक्थानुगः पिंडो व्यपैतिददतःस्वधेतिमनूक्तेः इदंजनकस्यपुत्रसत्वविषयम् एतच्चप्रवरमंजर्यां
कात्यायनलौगाक्षिभ्यां स्पष्टमुक्तं अथयेदत्तकक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणानार्षेयाजातास्तेद्व्यामुष्यायणा भवंति य
थाशौंगशैशिरीणां यानिचान्यान्यवेसमुत्पन्नानिकुलानिभवंतीत्यादिनाद्वयोःपित्रोःप्रवरानुक्त्वोक्तम् अथसर्वेषांस्वास्वभार्यास्व
पत्यंनस्याद्रिक्थहरेषुः पिंडंचेत्त्रिपुरुषंदद्युर्यद्युभयोर्नस्याद्भाभ्यामेवदद्युरेकस्मिन्श्राद्धे पृथगुद्दिश्यैकपिंडंवानुकीर्तये
त्सारिगृहीतारंचोत्पादयितारंचातृतीयात्पुरुषादिति हेमाद्रौकार्ष्णाजिनिः यावंतःपितृवर्ज्याःस्युस्तावद्भिर्दत्तकादयः प्रेतानां
योजनंकुर्युःस्वकीयैःपितृभिःसह द्वाभ्यांसहायतत्पुत्राःपौत्रास्त्वेकेनतत्समं चतुर्थेपुरुषेच्छेदस्तस्मादेषात्रिपूरुषी साधारणेषु
कालेषुविशेषोनास्तिवर्गिणाम् मृताहस्त्वेकमुद्दिश्यकुर्युःश्राद्धंयथाविधीति अस्यार्थमाहहेमाद्रिः दत्तकादयः जनकपालक
योःकुलेप्रेतानांस्ववर्गीयैः सपिंडनंकुर्युः दत्तकानांपुत्रास्तुपितुर्दत्तकस्यपितृभ्यांजनकपालकाभ्यांस्वपितामहाभ्यांसपिंडनं
कुर्युः तेषांपौत्राःस्वपितरंदत्तकेनपितामहेनतज्जनकेनचसापिंडयेयुः चतुर्थोपितत्कुलस्यएव तेषांप्रपौत्रस्तुदत्तकस्यप्रपितामह

स्य पालककुलस्थं चतुर्थं योजयेन्नवा छंदइच्छा दर्शमहालयादौ तु द्वयोः पित्रोः पितामहयोः प्रपितामहयोर्वा श्राद्धं देयं तत्र द्वयोः पित्राद्योः पृथक् पिंडदानं द्वयोरुद्देशेनैकोवेति अत्र केचित् आवयोरयमिति परिभाष्य यो दत्तस्तस्यैव द्वयोः पित्रोः श्राद्धं यस्तु परिभाष्य दत्तः स गृहीतुरेव सपालकायैव दद्यादित्याहुः अत्र मूलत एवमष्टव्याः वस्तुतस्तु जनकस्य पुत्रपत्न्याद्यभावे दत्तको द्वयोर्दद्यादन्यथा पालकायैव प्रागुक्तकात्यायनवचनात् मानवीयमप्येतद्विषयमेव गोत्रं तु श्राद्धे पालकस्यैव विवाहादौ तूभयोरित्यादि मत्कृतप्रवरदर्पणे ज्ञेयम् यस्तु मूल्यक्रीतायां परभार्यायां दास्यां चोत्पन्नः स बीजिन एव दद्यात् मूल्यं विना स्वयमुपनतायां तु क्षेत्रिण एव तदुक्तं पृथ्वीचंद्रोदये कौर्मे अनियोगात्कृतो यस्तु शुल्कतो जायते त्विह प्रदद्याद्बीजिने पिंडं क्षेत्रिणे तु ततोऽन्यथेति क्षेत्रजादेर्विशेषस्तु कलौ तदभावान्नोच्यते इति दिक् जारजानां विशेषमाहापरार्के नारदः जायते त्वनियुक्तायामेकेन बहुभिस्तथा अरिक्थभाजस्ते सर्वे बीजिनामेव ते स्मृताः दद्युस्ते बीजिने पिंडं माता चेच्छुल्कतो हृता अशुल्कोपहृतायां तु पिंडदा वोढुरेव ते धर्मार्थश्राद्धकरणे फलमाह चंद्रिकायां शातातपः प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिंगिनाम् एवं कुर्वन्नरः सम्यङ्महतीं श्रियमाप्नुयात् गयायामपि तत्रैव ब्रह्मवैवर्ते आत्मजो वाथ वान्योऽपि गयाशीर्षे यदा तदा यन्नाम्ना पातयेत्पिंडं तन्नयेद्ब्रह्म शाश्वतम् एतच्च यदा फलभूमार्थिना द्विस्त्रिर्वा क्रियते तदा प्रेतशिलाश्राद्धवर्ज्यं कुर्यात्तस्य प्रेतत्वविमोक्षार्थत्वात्तस्य च जातत्वादिति केचित् वस्तुतस्तु सन्यासिश्राद्धवदत्रापि सर्वं कार्यम् सांगेऽधिकारादिति युक्तं प्रतीमः संन्यस्तपित्रादिस्तु पितुः पित्रादिभ्यः सर्वश्राद्धेषु दद्यादित्युक्तं प्राक् वक्ष्यते च जीवत्पितृकश्राद्धे अत्र स्त्रीशूद्राणां श्राद्धं मंत्रवर्ज्यं तूष्णीं भवति स्त्रीणाममंत्रकं श्राद्धं तथा शूद्रकृतस्य च मार्गिद्रजाम्भवता देशान्ते च कुर्युस्तथैव तदिति हेमाद्रौ मरीचिवचना

त् अयमेवविधिःप्रोक्तःशूद्राणांमंत्रवर्जितः अमंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्यतेइतिब्राह्मोक्तेश्च गृह्यतेसंबध्यते अस्यश्राद्धप्रकरणेपाठेऽपिपरिभाषात्वान्नप्रकरणेनसंकोचोयुक्तः तेनशूद्रस्यस्नानदानादावपिविप्रेणमंत्रपाठःकार्यः अमंत्रश्चेतिविशेषणात्स्त्रियाअपीतिशूलपाणिः यत्तुतेनोक्तम् मंत्रजन्यनियमादृष्टसिद्धिस्तुनमस्कारेण अनुमतोस्यनमस्कारोमंत्रइतिगौतमोक्तेरिति तन्न दृष्टद्वारैवहितत्प्राप्तिर्नस्वातंत्र्येण अन्यथानखविपूतेर्व्यवधानजन्यादृष्टार्थंसोपिक्रियेतेतिकिंचिदेतत् तेनापिपितॄणाममुकगोत्रइत्यादौयत्रद्विजानामपिनाममंत्रउक्तस्तत्रमतिप्रसवमात्रार्थंयुक्तम् नतिलावपनादावपि अत्रकेचित् वैदिकमंत्रोविप्रस्यपौराणस्तुशूद्रैःपठनीयः नहिवेदेष्वधिकारः क्वचिच्छूद्रस्यविद्यते पुराणेष्वधिकारोमेदर्शितोब्राह्मणैरिहेतितंत्रेवपाद्मोक्तेरित्याहुः गौडाअप्येवम् तन्न नाध्येतव्यमिदंशास्त्रंवृषलस्यतुसन्निधाविति कौर्मे पुराणनिषेधेनवेदस्यदूरापास्तत्वात् अध्येतव्यंब्राह्मणेनवैश्येनक्षत्रियेणच श्रोतव्यमेवशूद्रेणनाध्येतव्यंकदाचन श्रौतंस्मार्तंचवैधर्मंप्रोक्तमस्मिन्नृपोत्तम तस्माच्छूद्रैर्विनाविप्रैर्नश्रोतव्यंकदाचनेतितंत्रेवपुराणाधिकारेभविष्योक्तेश्च एतेननाध्येतव्यमितिनिषेधोमंत्रेतरपुराणपरइति श्रीदत्तादिमतमपास्तम् तेनपौराणमंत्राणामेवविप्रेणपाठोनवैदिकानामितिसिद्धम् द्विजस्त्रियस्तुसंकल्पमात्रंस्वयंकृत्वावैदिकमंत्रयुक्तंसर्वंब्राह्मणद्वाराकारयेयुरितिप्रयोगपारिजातः अतएवस्त्रीणामित्यकृतविवाहस्त्रीपरमितिहेमाद्रिराह अनुपनीतस्तुवैदिकमंत्रयुक्तंसर्वंस्वयमेवकुर्यादित्युक्तंप्राक् यत्तुप्राग्द्विजाश्चव्रतादेशादितितदशक्तविषयमचूडविषयंवेतिदिक् शूद्रस्यतुसदामश्राद्धमेव सदाचैवतुशूद्राणामामश्राद्धंविधीयतइतिस्मृत्यंतरोक्तेः पृथ्वीचंद्रोदयेमात्स्येपि एवंशूद्रोपिसामान्यंवृद्धिश्राद्धंचसर्वदा नमस्कारेण

मंत्रेणकुर्यादामान्नंवत्सदा तत्रैवबह्वृचपराशरः आमान्नेनतुशूद्रस्यतूष्णींतुद्विजपूजनं कृत्वाश्राद्धंतुनिर्वाप्यसजातीनाशयेदथ सएव आमंशूद्रस्यपक्वान्नंपक्वमुच्छिष्टमुच्यते हेमाद्रौभविष्ये धर्मेसवस्तुधर्मज्ञायदिशूद्राःप्रकुर्वते अग्नौकरणमंत्रश्चनमस्कारोविधीयते आवाहनादिकर्तव्यंयथावद्रुद्रेणतच्छृणु देवानांदेवनाम्नातुपितृणांनामगोत्रतः पिंडादीन्निर्वपेद्धीरनामतोगोत्रतस्तथा शूद्राणांगोत्राभावेपिकाश्यपगोत्रंज्ञेयम् तस्मादाहुःसर्वाःप्रजाःकाश्यप्यइतिश्रुतेः गोत्रनाशेतुकाश्यपइतिव्याघ्रपादोक्तेश्चेतिहेमाद्रिः एवमन्यत्रगोत्राज्ञाने एवंतर्पणादिषुज्ञेयम् तत्रैवभविष्ये शूद्रस्तुगृहपाकेननपिंडान्निर्वपेत्तथा सक्तुमूलंफलंतस्य पायसंवाभवेत्स्मृतम् गौतमः अनुमतोस्यनमस्कारोमंत्रइति देवताभ्यःपितृभ्यश्चेत्ययंनमस्कारमंत्रइतिकेचित् विज्ञानेश्वरोप्येवमाह हेमाद्रिस्तु शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधइतिमात्स्ये मंत्रनिषेधान्नाममंत्रेणेत्याह पृथ्वीचंद्रोदयेस्कांदे राजकार्यनियुक्तस्यबंधनग्रहवर्तिनः व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेत् यत्तुभारतेराजधर्मेषु यवनाःकिराताःगांधाराश्चीनाःशबरबर्बराः शकास्तुषाराः कंकाश्चपल्हवाश्चांध्रमद्रकाइत्युक्त्वाब्रह्मक्षत्रप्रसूताश्चवैश्याःशूद्राश्चमानवाः कथंधर्मांश्चरिष्यंतिसर्वेविषयवासिनः इतिचोक्त्वाः वेदधर्मक्रियाश्चैवतेषांधर्मोविधीयते पितृयज्ञास्तथाकूपाःप्रपाश्चशयनानिच दानानिचयथाकालंद्विजेभ्योविसृजेत्सदा तथा दक्षिणाःसर्वयज्ञानांदातव्याभूतिमिच्छता पाकयज्ञामहार्हाश्चकर्तव्याःसर्वदस्युभिरितिम्लेच्छादीनांश्राद्धविधानम् तदपिसजातीयभोजनद्रव्यदानादिपरंनतुश्राद्धपरमिति इतिश्रीनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतेनिर्णयसिंधौअधिकारनिर्णयः अथपितरः हेमाद्रौमात्स्यदेवलौ नामगोत्रंपितॄणांतुप्रापकंहव्यकव्ययोः अग्निष्वा-

न्तादयस्तेषामाधिपत्येव्यवस्थिताः नाममंत्रास्तदादेशाभवांतरगतानपि प्राणिनःप्रीणयंत्येवतदाहारत्वमागतान् देवोयदिपिताजातःशु
भकर्मानुयोगतः तस्यान्नममृतंभूत्वादेवत्वेप्यनुगच्छति गांधर्वेभोगरूपेणपशुत्वेचतृणंभवेत् श्राद्धान्नंवायुरूपेणनागत्वेप्युपतिष्ठति
पानंभवतियक्षत्वेराक्षसत्वेतथामिषम् दनुजत्वेतथामद्यंप्रेतत्वेरुधिरोदकम् मनुष्यत्वेन्नपानादिनानाभोगकरंभवेत् अत्रपित्रादि
शब्देर्जनकादीनामेवदेवतात्वमुच्यते नवस्वादीनाम् असावेततइति यजमानस्यपित्रेइतिशतपथश्रुतेः यस्यपिताप्रेतःस्यात्सपि
त्रेपिंडंनिधायेतिविष्ण्वादिस्मृतेश्च यत्तुमनुदेवत्वोवसवः पितरोज्ञेयारुद्राज्ञेयाः पितामहाः प्रपितामहास्तथादित्याःश्रुतिरे
षासनातनी यच्चयाज्ञवल्क्यः वसुरुद्रादितिसुताःपितरःश्राद्धदेवताइति तदभेदध्यानार्थं यानितुहेमाद्रौनंदिपुराणे विष्णुः
पितास्यजगतोदिव्योयज्ञःसएवच ब्रह्मापितामहोज्ञेयोह्यहंचप्रपितामहइति यच्चभविष्ये अनिरुद्धःस्वयंज्ञेयःप्रद्युम्नश्चपिता
स्मृतः संकर्षणस्तज्जनकोवासुदेवस्तुतत्पिता स्वयंकर्ता यत्तुतत्रैव प्रथमोवरुणोज्ञेयःप्राजापत्यस्तथापरः तृतीयोग्निःस्मृतः
पिंडोत्थेषपिंडविधिःस्मृतः यच्चमनुः सोमपानामविप्राणाक्षत्रियाणांहविर्भुजः वैश्यानामाज्यपानामशूद्राणातुसुकालिनः
यच्चादित्यपुराणे मासाश्चपितरोज्ञेयाऋतवश्चपितामहाः संवत्सरःप्रजानाचसुषेकःप्रपितामहाः यच्चनंदीपुराणे अ-
ग्निष्वात्ताब्राह्मणानांपितरःपरिकीर्तिताः राज्ञाबर्हिषदोनामविशाकाव्याःप्रकीर्तिताः सुकालिनस्तुशूद्राणांव्यामाम्लेच्छात्यजा
तिषु अत्रावाहनादिषुपित्रादयः समुच्चयेनाविकल्पेनवायथाचारंतत्तद्देवतारूपेणावाच्याइतिहेमाद्र्यादयः हेमाद्रौब्राह्मे पार्वणं
कुरुतेयस्तुकेवलंपितृहेतुकम् मातामह्यंनकुरुतेपितृहासप्रजायते धौम्यः पितरोयत्रपूज्यंतेतत्रमातामहाध्रुवम् अविशेषेण

कर्तव्यंविशेषान्नरकंव्रजेत् अस्यापवादमाहकात्यायनः कर्षूसमन्वितंमुक्त्वातथाद्यंश्राद्धषोडशम् प्रत्याब्दिकंतुशेषेषुपिंडाःस्युःषडि
तिस्थितिः कर्षूसमन्वितंसपिंडीकरणम् दर्शादौसपत्नीकानामेवदैवतात्वम् स्वेनभर्त्रासमंश्राद्धंमाताभुंक्तेस्वधासमं पितामही
चस्वेनैवतथैवप्रपितामहीतितत्रैवोक्तेः चंद्रिकायांचतुर्विंशतिमते क्षयाहंवर्जयित्वैकस्त्रीणांनास्तिपृथक्क्रिया केचिदिच्छंति-
नारीणांपृथक्श्राद्धंमहर्षयः अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासहेतिकात्यायनोक्तेश्च अ
स्यनिर्मूलतांवदंतोगौडास्त्वज्ञाएव अत्रभागइत्यध्याहारः अन्यथासपतिकार्येमात्रेइतिप्रयोगापत्तेः अत्रमातृशब्दोजनन्यामेवमुख्यः
तेनसपत्नमातृभ्योनदद्यात् एवंपितामह्यादिशब्दैःपितृजनन्यादयएवोच्यंतेइतितत्सपत्नीभ्योनदेयमितिहेमाद्रिः कारुण्येनतु-
महालयादौदेयमितिसएव अथविश्वेदेवाः हेमाद्रौशंखबृहस्पती इष्टिश्राद्धेक्रतुर्दक्षौसत्योनांदीमुखेवसु नैमित्तिकेकामकालौ-
काम्येचधुरिलोचनौ पुरूरवार्द्रवौचैवपार्वणेसमुदाहृतौ तत्रैव उत्पत्तिनामचैतेषांनविदुर्येद्विजातयः अयमुच्चारणीयस्तैश्लो-
कःश्रद्धासमन्वितैः आगच्छंतुमहाभागाविश्वेदेवामहाबलाः येयत्रविहिताःश्राद्धेसावधानाभवंतुतेइति इष्टिश्राद्धमग्निरुचि
रित्युक्तमितिकल्पतरुः आधानादिकर्मांगमित्यन्ये नैमित्तिकमेकोद्दिष्टम् एकोद्दिष्टंतुयच्छ्राद्धंत
न्नैमित्तिकमुच्यतेइतिभविष्योक्तेः एतद्यद्यपि एकोद्दिष्टंदैवहीनमितितत्रविश्वेदेवनिषेधस्तथापिनवश्राद्धेद्वादशमासि-
केचकामकालौज्ञेयौ नवश्राद्धंदशाहानिनवमिश्रंतुषड्ऋतून् अतःपरंपुराणंवैत्रिविधश्राद्धमुच्यते यस्मिन्नेवपुराणेवावि
श्वेदेवानलेभिरे आसुरंतद्भवेच्छ्राद्धंवृषलंमंत्रवर्जितमितिबह्वृचपरिशिष्टात् एतच्चबह्वृचानामेवतेषामेवोक्तेः अन्येषांतु

नात्रविश्वेदेवाइति कात्यायनोक्तेस्तन्निषेधएवेति पृथ्वीचंद्रोदयः अन्येतुनैमित्तिकंसपिंडीकरणमाहुः भविष्ये यद्यप्येकोद्दिष्टंतच्छब्देनोक्तंतथापि तदप्यदैवंकर्तव्यमयुग्मान्भोजयेद्द्विजानितितत्रैववैश्वदेवनिषेधात् यद्यपिसपिंडीकरणेशातएकोद्दिष्टवत्तथापिसपिंडीकरणश्राद्धंदैवपूर्वंनियोजयेदिति वचनात्तत्परत्वम् हेमाद्रावादित्यपुराणे विश्वेदेवौक्रतुर्दक्षः सर्वास्विष्टिषुकीर्तितौ नित्यंनांदीमुखश्राद्धे वसुसत्यौचपैतृके नवान्नलंभनेदेवौकामकालौसदैवहि अपिकन्यागतेसूर्येकाम्येचधुरिलोचनौ पुरूरवाद्रवौचैववैश्वदेवौतुपार्वणे क्वचिद्विश्वेदेवापवादमाह हेमाद्रौशातातपः नित्यश्राद्धमदैवंस्यादेकोद्दिष्टंतथैवच मातुःश्राद्धंचयुग्मैःस्याद्दैवप्राङ्मुखैःपृथक् योजयेद्दैवपूर्वाणिश्राद्धान्यन्यानियत्नतः नांदीश्राद्धेभिन्नप्रयोगपक्षेमातुःश्राद्धंसदैवमितिहेमाद्रिः अथविप्राः तेचोत्तममध्यमाधमभेदेनत्रिविधाः तत्राद्याः अन्नमदीयाः श्लोकाः त्रिणाचिकेतस्त्रिमधुश्च बह्वृचोप्याथर्वणोयाजुषसामगोच षडंगवित्त्रिसुपर्णोवृत्तोप्यथर्वशीर्षाध्ययनेरतश्च शांतःस्ववेदार्थविदांप्रवक्तास्यात्कुलशीलीचतथाग्निविच्च सोदर्हतिःसत्यवाक्पुरुषैःसेवैर्मातापित्रोःपंचाग्निःख्यातवंशः पत्नीयुक्तोज्येष्ठसामापुराणवेत्तापुनश्चेतिहासेष्वभिज्ञः योगीभिक्षुःसामगोब्रह्मवेत्ता पंचाग्निश्चश्रोत्रियस्तत्सुतोवा शंभुध्यायीश्रीशपादाब्जसेवीपात्रश्चैतेतूत्तमाःसंप्रदिष्टाः भिक्षुर्योगीपांथएतेत्वलभ्याभाग्याल्लब्धाश्चेत्तदाभोजनीयाः श्राद्धेविप्रेषूपविष्टेषुपश्चात्संप्राप्ताश्चेदिष्टपंक्तौतुभोज्याः अत्रमूलंहेमाद्रौज्ञेयम् तत्रैवनारदः योवैयतीननादृत्यभोजयेदितरान्द्विजान् विजानन्वसतोग्रामेकव्यंतद्यातिराक्षसान् दीपकलिकायांदक्षः विनामांसेनमधुनाविनादक्षिणयाशिषा परिपूर्णंभवेच्छ्राद्धंयतिषुश्राद्धभोजिषु एतच्चज्ञातिविषयम् भि-

नाचिकेतस्त्रिसुपर्णोयजुर्वेदैकदेशोतद्व्रतेनतदध्यायिनो यस्यसप्तपूर्वेसोमपाः सत्रिसुपर्णइतिबोपदेवः त्रिमधुर्ऋग्वेदैकदेशः तदध्यायी केचिन्नाचिकेतंचयनंचिःकृतवानित्यर्थमाहुस्तद्धेमाद्रिविरुद्धम् हेमाद्रौगौतमः एवभ्योदानंप्रथमंपितृवयसइत्येके मात्स्येमनुः यश्चव्याकुरुतेवाचंयश्चमीमांसतेध्वरम् सामस्वरविधिज्ञश्चपंक्तिपावनपावनाः कौर्मे असमानप्रवरकोह्यसगोत्रस्तथैवच असंबंधीचविज्ञेयाब्राह्मणाःश्राद्धसिद्धये गारुडे श्राद्धेषुविनियोज्यास्तेब्राह्मणाब्रह्मवित्तमाः येयोनिगोत्रमंत्रांतेवासिसंबंधवर्जिताः मनुः नमित्रंभोजयेच्छ्राद्धेधनैःकार्योस्यसंग्रहः नारिंनमित्रंयंविद्यात्तंश्राद्धेनिमंत्रयेत् द्वयोर्गोत्रयोः श्राद्धेभोजनंनिषिद्धं पितृपुत्रौभ्रातरौद्वौनिरग्निंगुर्विणीपतिम् सगोत्रप्रवरंचैवश्राद्धेषुपरिवर्जयेदिति श्राद्धदीपकलिकायांजातूकर्ण्योक्तेः अयमप्यसाः हेमाद्रौकौर्मेगार्ग्यो नैकगोत्रेहविर्दद्याद्यथाकन्यांतथाहविः अभावेत्वन्यगोत्राणामेकगोत्रांस्तुभोजयेत् अत्रकेचित्स्वशाखीयानसुख्यानाहुः पठंतिच निमंत्रयीतपूर्वेद्युःस्वशाखीयान्द्विजोत्तमान् स्वशाखीयद्विजाभावेद्विजानन्यान्निमंत्रयेदिति इदंतुनिर्मूलत्वाद्धेमाद्रिणादूषितत्वाच्चोपेक्ष्यम् मनुरपि यत्नेनभोजयेच्छ्राद्धेब्राह्मणंवेदपारगं शाखांतगमथाध्वर्युंछंदोगंवासमाप्तिगम् एषामन्यतमोयस्यभुंजीतश्राद्धमर्चितः पितॄणांतस्यतृप्तिःस्याच्छाश्वतीसाप्तपौरुषी अत्रमासकाःश्लोकाः मातामहोमातुलभागिनेयदौहित्रजामातृगुरुस्वशिष्याः ऋत्विक्चयाज्यश्वशुरोस्वबंधुश्यालागुणाढ्यास्त्वनुकल्पभूताः बंधवोमातृष्वसृपितृष्वसृमातुलपुत्राइतिबोपदेवः अत्रमूलंहेमाद्रौज्ञेयम् सगुणास्वस्त्रीयाद्यतिक्रमेदोषएव सप्तपूर्वान्सप्तपरान्पुरुषानात्मनासह अतिक्रम्यद्विजानेतान्नरकेपातयेत्खग संबंधिन

स्तथासर्वान्दौहित्रंविट्पतिंतथा भागिनेयंविशेषेणतथाबंधुंस्वगाधिपतिमदनरत्ने भविष्योक्तेः अतएवयाज्ञवल्क्योब्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणइतिगुणव्यतिक्रमेदशपणंदंडमाह आसन्नमात्रपरमिदम् मूर्खेतुनदोषः ब्राह्मणातिक्रमोनास्तिमूर्खेवेदविवर्जिते ज्वलंतमग्निमुत्सृज्यनहि भस्मनिहूयते इतिकात्यायनोक्तेः विप्रस्यापिदोषः अविद्वान्प्रतिगृह्णानोभस्मीभवतिदारुवदितिमनूक्तेः अपरार्केअत्रिः षड्भ्यस्तुपुरुषेभ्योर्वाग्श्राद्धेयास्तुगोत्रिणः षड्भ्यस्तुपरतोभोज्याःश्राद्धेस्युर्गोत्रजास्त्वपि एतच्चब्राह्मणालाभेअपिशब्दात्असंभवेहेमाद्रौगौतमः शिष्यांश्चैकेसगोत्रांश्चभोजयेदूर्ध्वंत्रिभ्योगुणवतः आपस्तंबः ब्राह्मणान्भोजयेद्योनिगोत्रमंत्रांतेवास्यसंबंधान् गुणहान्यांतुपरेषांसमुदितः सोदर्योपिभोजयितव्यएतेनांतेवासिनोव्याख्याताइति अत्रविशेषमाहात्रिः पितापितामहोभ्रातापुत्रोवाथसपिंडकः नपरस्परमर्घ्याःस्युर्नश्राद्धेऋत्विजस्तथा ऋत्विक्पुत्रादयोप्येतेसकुल्याब्राह्मणाःस्मृताः वैश्वदेवेनियोक्तव्यायद्येतेगुणवत्तराः सगोत्राननियोक्तव्याः स्त्रियश्चैवविशेषतइति अथवर्ज्याः अत्रमामकाःश्लोकाः वर्ज्यान्प्रवक्ष्येत्वथरोगिवैरिहीनाधिकांगान्कितवान्कृतघ्नान् नक्षत्रशास्त्रेणचजीवमानान्भेषज्यवृत्त्यापिचराजभृत्यान् संगीतकायस्थकुसीदवृत्त्यावेदत्रयेणापिकवित्ववृत्त्या देवार्चनेनापिचजीवमानान्स्वाध्यायदाराग्निसुतोज्झकाणान् दुर्वालखल्वाटकुनख्यधर्मिनटांश्चपौनर्भवकृष्णदंतान् अगारदाहीगरदःसमुद्रयायीचकुंडास्यथकूटकारी बालांश्चयोध्यापयतेस्वपुत्रादवाप्तविद्यस्त्वथकुंडगोलौ अग्रेदधिषूःपतिरस्त्रकर्तासोमक्रयीतैलिककेकराक्षौ युद्धाचार्यःपक्षिणांपोषकश्चस्रोतोभेत्तावृक्षसरोपकश्च मेषाणांवामाहिषाणांचपुष्टास्वीयस्त्रीपुंसमहितैर्यश्चजारैः जीवत्यथोतुश्चदत्तानुयोगाद्रव्यप्राप्त्यैवेदसुह्नाटयंतः ग्रामयाजिपशुकेशाविक्रयीस्तेनशिल्पिपितृवादकारकान् अर्थकामरतशूद्रयाजकश्मश्रुहीनजटि-

शुंडिनिर्घृणान् यस्यचैव गृहिणीरजस्वलास्वार्थपाकरतशापदायकान् क्लीबकुष्ठ्यतिविलोहितेक्षणान् कुब्जवामनमृषाभिशापिनः पुत्रहीनमथकूटसाक्षिणं प्रातिहारिकमयाज्ययाजकं कृत्वात्मदात्तृपरिवेत्तृजागकस्तेनहिंस्रकसुरपान्विवर्जयेत् अत्रमूलंहेमाद्रौ पृथ्वीचंद्रोदयेचज्ञेयं भारतेदानधर्मेषुश्राद्धे वर्ज्यविप्राधिकारं कितवोभ्रूणहायक्ष्मीपशुपालोनिराकृतिः ग्राम्यप्रेष्यो वार्धुषिकोगायकःसर्वविक्रयी सामुद्रिकोराजभृत्यस्तैलिकःकूटकारकः पित्राविवदमानश्चयस्यचोपपतिर्गृहे अभिशस्तस्तथास्तेनःशिल्पंयश्चोपजीवति पर्वकारश्चसूचीचमित्रध्रुक्पारदारिकः अव्रतानामुपाध्यायःकांडपृष्ठस्तथैवच श्वभिश्चयःपरिक्रामेद्यःशुनादष्टएवच परिवित्तिस्तथास्तेनोदुश्चर्मागुरुतल्पगः कुशीलकोदेवलकोनक्षत्रैर्यश्चजीवति ईदृशाब्राह्मणाज्ञेयाअपांक्तेयायुधिष्ठिर तथा ऋपकर्ताचयोराजन्यश्चवार्धुषिकोनरः कांडपृष्ठःस्वशाखांवात्यक्त्वापरशाखयोपनीतः तदध्यायीच क्षत्रियवैश्यवृत्तौ नारदस्तु तस्यामेवतुयोवृत्तौब्राह्मण्यांवसतेरसान् कांडपृष्ठश्च्युतोमार्गात्सोपांक्तेयःप्रकीर्तितः इत्याहहारीतः शूद्रापुत्राःस्वयंदत्तायेचैतेक्रीतकाःस्मृताः तेसर्वेमनुनाप्रोक्ताःकांडपृष्ठानसंशयः अन्येपिहेमाद्रौमात्स्ये त्रिशंकून्बर्बरानघ्रान्चीनद्रविडकोंकणान् कर्णाटकांस्तथाभीरान्कालिंगांश्चविवर्जयेत् तत्रैवसौरपुराणे अंगवंगकलिंगांश्चसौराष्ट्रान्गुर्जरांस्तथा आभीरान्कोंकणांश्चैवद्राविडान्दाक्षिणायनान् आवंत्यान्मागधांश्चैवब्राह्मणांस्तुविवर्जयेत् चंद्रिकायांयमः काणाःकुब्जाश्चषंढाश्चकृतघ्नागुरुतल्पगाः मानकूटास्तुलाकूटाःशिल्पिनोग्रामयाजकाः राजभृत्यांधबधिरमूकखल्वाटपंगवः वणिजोमधुहर्तारोरोगदावनदाहकः समयानांचभेत्तारःप्रदानेयेनिवारकाः प्रव्रज्योपनिवृत्ताश्चवृथाप्रव्रजि

ताश्चये यश्चप्रव्रजिताज्जातः प्रव्रज्यावसितश्चयः अवकीर्णीच्चवीरघ्नो गरुघ्नः पितृदूषकः श्राद्धकारिकायांकात्यायनः द्वि-
र्नग्नः क्लीबदुश्चर्माशफक्रोतिकपिलस्तथा छिन्नोष्ठश्छिन्नलिंगश्चनैवकेतनमर्हति द्विर्नग्नः पित्रोर्वंशोभिपुरुषंविछिन्नवेदाग्निः
हेमाद्रौमरीचिः अविद्धकर्णः कृष्णश्च लंबकर्णस्तथैवच वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्मणि ब्राह्मे मूकश्च पूतिना
शश्च छिन्नागश्चाधिकांगुलिः गलरोगीच गडुमान्स्फुटितांगश्च सज्वरः षंढतूवरमंदाश्च श्राद्धेष्वेतान्विवर्जयेत् लंबकर्णंचा
हतत्रैवगोभिलः हनुमूलादधः कर्णौलंबौतुपरिकीर्तितौ द्व्यंगुलोप्यंगुलोशस्त्राविति शातातपोब्रवीत् चंद्रिकायांयमः द्व्यंगु
लातीतकर्णस्य भुंजतेपितरोनतु षंढश्चात्रचंद्रिकोक्तः सप्तविधोग्राह्यः यथा षंढकोवातजः षंढः पंडः क्लीबोनपुंसकः कीलकश्चे
तिसप्तैवक्लीबभेदाः प्रकीर्तिताः पराशरमाधवीयेतु चतुर्दशविधउक्तः तेषांस्वरूपाणितत्रैवज्ञेयानि चंद्रिकायांशातातपः अ-
ग्निष्टोमादिभिर्यज्ञैर्येयजंत्यल्पदक्षिणैः तेषामन्ननभोक्तव्यमपांक्तास्तेप्रकीर्तिताः एतच्चशक्तोसत्या अपरार्केभारते अव्रती-
कितवस्तेनः प्राणिविक्रयकोपिवा पश्चाच्चेत्पीतवान्सोमंसोपिकेतनमर्हति श्राद्धदीपकलिकायांयमः अपत्नीकश्चवर्ज्यःस्या
त्सपत्नीकोप्यनग्निकः तत्रैवाश्वलायनः प्रतिमाविक्रयंयोवैकरोतिपतितस्तुसः जीवनार्थंपरास्थीनि धृत्वातीर्थप्रयातियः मा
तापित्रोर्विनासोपिपतितःपरिकीर्तितः तत्रैवजातूकर्ण्यः यत्रमातुलजोद्वाहोयत्रवावृषलीपतिः श्राद्धंनगच्छेत्तद्विप्रः कृतंय
च्चनिरामिषं पितृपुत्रोभ्रातरौद्वौनिरग्निंगुर्विणीपतिम् सगोत्रप्रवरंचैवश्राद्धेषुपरिवर्जयेत् बृहन्नारदीये शंखंचक्रंमृ
दायस्तुकुर्यात्तप्तायसेनवा सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा एकजातेरयंध-

मौनजातुस्याद्द्विजन्मनः तेनयेतप्तमुद्रादिर्विधयस्तेशूद्रविषयाइति पृथ्वीचंद्रोदये शिवकेशवयोरंकान्शूलचक्रादिकान्द्विजः न धारयेतमतिमान् वैदिके वर्त्मनिस्थितइत्याश्वलायनोक्तेश्च नृत्यंचोदराद्यर्थंनिषिद्धमितिश्रीधरस्वामी अन्येपिनिषेधानिबंधेषु ज्ञेयाइतिदिक् अत्रविप्राणांग्राह्यत्वोक्त्यैव तद्वर्ज्यानांनिषेधेसिद्धे पुनर्वर्ज्यपरिगणनंनिषिद्धवर्ज्यंनिर्गुणप्राप्त्यर्थमितिविज्ञानेश्वरः कुष्ठिकाणादेरपवादोहेमाद्रौवसिष्ठः अपिचेन्मंत्रविद्युक्तःशारीरैःपंक्तिदूषणैः अदूष्यंतंयमःप्राह पंक्तिपावनएवसः कश्चिद्विप्राणांजातिमात्रेणग्राह्यत्वमुक्तं चंद्रिकायामाग्नेये यदिपुत्रोगयांगच्छेत्कदाचित्कालपर्ययात् तानेवभोजयेद्विमान्ब्राह्मणार्थप्रकल्पिताः ब्राह्मणाकृतसंस्थानाविप्राब्रह्मसमाःस्मृताः अमानुषागयाविप्राब्राह्मणार्थेप्रकल्पिताः तेषुतुष्टेषुसंतुष्टाःपितृभिःसहदेवताः तत्रैव नविचार्यंकुलंशीलंविद्याचतपएवच पूजितैस्तैस्तुसंतुष्टादेवाःसपितृगुह्यकाः गयायानिर्गुणाअपिते एवभोज्याइतिहेमाद्रौ अक्षय्यवटश्राद्धएवतन्नियमोनान्यत्रेतित्रिस्थलीसेतौपितामहचरणाः पृथ्वीचंद्रोदयेपिपाद्मे तीर्थेषुब्राह्मणंनैवपरीक्षेतकदाचन अन्नार्थिनमनुप्राप्तंभोज्यंतंमनुरब्रवीत् स्कांदेपि ब्राह्मणान्नपरीक्षेततीर्थक्षेत्रनिवासिनः मनुः नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित् पित्र्येकर्मणितुप्राप्तेपरीक्षेतप्रयत्नतः असंभवपरमेतदितिमेधातिथिः हेमाद्रौव्यासः गायत्रीसारमात्रोपिवरंविप्रःसुयंत्रितः नायंत्रितश्चतुर्वेदीसर्वाशीसर्वविक्रयी काणाःकूटाश्चकुब्जाश्चदरिद्रा व्याधितास्तथा सर्वेश्राद्धेनियोक्तव्यामिश्रितावेदपारगैः अथविप्रनिमंत्रणम् चंद्रिकायांवाराहे वस्त्रशौचादिकर्तव्यंश्वःकर्तास्मीतिजानता स्थानोपलेपनंकृत्वाततोविप्रान्निमंत्रयेत् दंतकाष्ठंचविसृजेद्ब्रह्मचारीशुचिर्भवेत् तत्रैवप्रचेताः दक्षिणंचर

णंविप्रःसव्यंवैक्षत्रियस्तथा पादावादायवैश्योद्वौशूद्रःप्रणतिपूर्वकम् बृहस्पतिः उपवीतीततोभूत्वा देवार्थंतुद्विजोत्तमान् अपसव्येनपित्र्येथस्वयंशिष्योथवासुतः प्रचेताः सवर्णंप्रेषयेद्वासंद्विजानांतुनिमंत्रणे पृथ्वीचंद्रोदयेस्कांदे राजकार्येनियुक्तस्यबंधनिग्रहवर्तिनः व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेत् चंद्रिकायांयमः अभोज्यंब्राह्मणस्यान्नंवृषलेननिमंत्रितम् तथैववृषलस्यान्नंब्राह्मणेन निमंत्रितम् तत्रैवपैठीनसिः सप्तपंचद्वौवाश्रोत्रियान्निमंत्रयेत् आश्वलायनसूत्रे एकैकमेकैकस्यद्वौद्वौत्रींस्त्रीन्वावृद्धौफलभूयस्त्वंद्वाविति वृद्धिश्राद्धेगौतमः नवावरान्भोजयेद्युजोवायथोत्साहम् याज्ञवल्क्यः द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा मातामहानामप्येवंतंत्रंवावैश्वदेविकम् दीपकलिकायांपाराशरः संपत्तावयंपात्राणामेकैकस्यत्रयस्त्रयः पित्रादेर्ब्राह्मणाःप्रोक्ताश्चत्वारोवैश्वदेविके वृद्धयाज्ञवल्क्यः दर्शैकंपंचवाविप्रान्पार्वणेविनियोजयेत् अन्नेवैश्वदेवेद्वौचतुरोवोपवेश्यपित्रादीनामेकैकस्यस्थानेएकंत्रीन्पंचसप्तनववोपवेशयेदितिनिष्कर्षणोर्थः मनुः द्वौदैवेपितृकृत्येत्रीनेकैकमुभयत्रवा भोजयेत्सुसमृद्धोपिनप्रसज्येतविस्तरे सत्क्रियांदेशकालौचशौचंब्राह्मणसंपदम् पंचैतान्विस्तरोहंतितस्मान्नेहेतविस्तरम् पृथ्वीचंद्रोदयेशातातपः द्वौदैवेथर्वणोविप्रौप्राङ्मुखावुपवेशयेत् पित्र्येतूदङ्मुखांस्त्रींश्चबह्वृचाध्वर्युसामगान् अत्यशक्तौहेमाद्रौदेवलः एकेनापिहिविप्रेणषट्पिंडंश्राद्धमाचरेत् षडर्घ्यान्दापयेत्तत्रषड्भ्योदद्यात्तथाहविः गोभिलः यद्येकंभोजयेच्छ्राद्धेछंदोगंतत्रभोजयेत् ऋचोयजूंषिसामानित्रितयंतत्रविद्यते अत्रवैश्वदेवेविशेषमाहतत्रैववसिष्ठः यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत् अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्य च देवतायतनेकृत्वाततःश्राद्धंसमाचरेत् प्रास्येदग्नौतदन्नंतुदद्याद्वाब्रह्मचारिणे एतच्चसपिंडीकरणवर्ज्यंज्ञेयम् नत्वेवैकंसर्वेषां

काममनाद्येइत्याश्वलायनोक्तेः अस्यार्थउक्तोनारायणवृत्तौ आद्यंसपिंडीकरणंतद्वर्ज्येषुश्राद्धेषुकामंत्रयाणामेकंभोजयेत् सपिंडीकरणेतुनियतंत्रिभिर्भवितव्यमिति अनाद्येपार्वणवर्जितेवा अभोजनेआमहेमश्राद्धादौवा अन्नाभावेतिव्याख्यानंतरंतत्रैवज्ञेयम् कारिकापि दैवेपित्र्येथवैकैकंसपिंडीकरणंविनेति अत्रैकविप्रेसाग्नेर्विशेषमाह पृथ्वीचंद्रोदयेप्रचेताः एकस्मिन्ब्राह्मणेदैवे साग्नेरग्निर्भवेत्सदा अनग्नेःकुशमुष्टिःस्याच्छ्राद्धकर्मणिसर्वतः सर्वथाविप्रालाभेतत्रैवहेमाद्रौचसत्यव्रतः निधायदर्भनिचयमासनेषुसमाहितः प्रैषानुप्रैषसंयुक्तंसर्वंश्राद्धंप्रकल्पयेत् अत्रानन्यभावात्सत्रेइवऋत्विक्कार्येयजमानविधौनदक्षिणेतिकेचित् तन्न अदृष्टार्थायाःदक्षिणायाःप्राप्तेः सर्वंतस्मिजदेतुभ्यंयच्चश्राद्धमदक्षिणमितिपाद्मात् विदध्याच्छ्रोत्रमन्यश्चेद्दक्षिणार्द्धहरोभवेत् स्वयंचेदुभयंकुर्यादन्यस्मैप्रतिपादयेदिति छंदोगपरिशिष्टाच्च एवंयतिश्राद्धेपिकात्यायनः यज्ञवस्तुनिमुष्टौचस्तंभेदर्भबटौतथा दर्भसंख्यानविहिताविष्टरास्तरणेषुच मातृश्राद्धेतुविप्रालाभेसुवासिन्योपिभोजनीयाइत्याहापरार्केवृद्धवसिष्ठः मातृश्राद्धेतुविप्राणामलाभेपूजयेदपि पतिपुत्रान्विताभव्यायोषितोष्टौकुलोद्भवाइति अष्टाविति वृद्धिश्राद्धविषय पाद्मेउत्तरखंडे सकृदभ्यर्चितंलिंगंशालग्रामशिलांचयः पीठेसंस्थापयित्वातुश्राद्धंचकुरुतेनरः पितरस्तस्यतिष्ठंतिकल्पकोटिशतंदिवि चंद्रिकायांमात्स्ये पठन्निमंत्र्यनियमान्श्रावयेत्पैतृकान्बुधः अक्रोधनैःशौचपरैःसततंब्रह्मचारिभिः भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा यत्तुमनुः सर्वायासविनिर्मुक्तैःकामक्रोधविवर्जितैः भवितव्यंभवद्भिर्नःश्वोभूतेश्राद्धकर्मणीति तत्पूर्वेद्युर्निमंत्रणपरंनतदहः तत्रैवदेवलः असंभवेपरेद्युर्वाब्राह्मणांस्तान्निमंत्रयेत् अज्ञातीनसमानार्षानयुग्मानात्मशक्तितः कात्यायनः अनिंद्येनामन्त्रितोनापक्रामेत्केतनंगृह्यशाक्तः

अथश्राद्धकर्तृभोक्तृनियमाः तत्रनिमंत्रितविप्रत्यागे ऽ परार्केयमः केतनंकारयित्वातुयोतिपातयतिद्विजम् ब्रह्महत्यामवाप्नोतिशूद्रयोनौचजायते आमंत्र्यब्राह्मणयस्तुयथान्यायंनपूजयेत् अतिकृच्छ्रासुघोरासुतिर्यग्योनिषुजायते प्रमादात्यागेतुहारीतः प्रमादाद्विस्मृतंज्ञात्वाप्रसाद्यैनंप्रयत्नतः तर्पयित्वायथान्यायंसर्वंतत्फलमश्नुते प्रमादाभावेतुनारायणः एकस्मिन्नेनसिप्राप्तेब्राह्मणोनियतःशुचिः यतिचांद्रायणंकृत्वातस्मात्पापात्प्रमुच्यते यमः आमंत्रितस्तुयोविप्रोभोक्तुमन्यत्रगच्छति नरकाणांशतंगत्वाचांडालेष्वभिजायते तत्रैवदेवलः पूर्वंनिमंत्रितोन्येनकुर्याद्न्यप्रतिग्रहं भुक्त्वाहारोथवाफंक्ते सुकृतंतस्यनश्यति यदिविप्रोविलंबेनतदोक्तमादित्यपुराणे आमंत्रितश्चिरंनैवकुर्याद्विप्रःकदाचन देवतानांपितृणांचदातुरन्नस्यचैवहि चिरकारीभवेद्द्रोहीपच्यतेनरकाग्निना पृथ्वीचंद्रोदयेयमः निमंत्रितस्तुयोविप्रोह्यध्वानंयातिदुर्मतिः भवंतिपितरस्तस्यतंमासंपांसुभोजनाः आमंत्रितस्तुयःश्राद्धेहिंसांवैकुरुतेद्विजः पितरस्तस्यतंमासंभवंतिरुधिराशनाः आमंत्रितस्तुयोविप्रोभारमुद्वहतेद्विजः पितरस्तस्यतंमासंभवंतिस्वेदभोजनाः निमंत्रितस्तुयोविप्रःप्रकुर्यात्कलहंयदि पितरस्तस्यतंमासंभवंतिमलभोजनाः शंखः निमंत्रितस्तुयःश्राद्धेमैथुनंसेवतेद्विजः श्राद्धंदत्वाचभुक्त्वाचयुक्तःस्यान्महतेनसा मैथुनंऋतावपिनिषिद्धं ऋतुकालेनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित् तत्रगच्छन्नवाप्नोतिह्यनिष्टानिफलानीति तत्रैवमाधवीयेचन्द्रमनूक्तेः श्राद्धंकरिष्यन्कृत्वावाभुक्त्वावापिनिमंत्रितः उपोष्यचतथाभुक्त्वानोपेयात्त्वऋतावपि भोक्ष्यन्करिष्यन्श्वःश्राद्धंपूर्वरात्रौप्रयत्नतः व्यवायभोजनंचापिऋतावपिविवर्जयेदिति तत्रैवाश्वलायनोक्तेश्च विज्ञानेश्वरेणतु श्राद्धेकृतेगच्छतोपिनदोषइत्युक्तं तत्वगतिकत्वेज्ञेयं बृहस्पतिः द्विनिशांब्रह्मचारीस्याच्छ्राद्धकृद्ब्राह्मणैः

सह अन्यथावर्तमानौतु स्यातांनिरयगामिनौ पुनर्भोजनमध्वानंभारमायासमैथुनं श्राद्धकृच्छ्राद्धभुक्चैवसर्वमेतद्विवर्जयेत् स्वाध्यायंकलहंचैवदिवास्वापंतथैवच यत्तुश्राद्धकारिकायांपुराणसमुच्चये छूत्वातुरुधिरस्रावंनविद्वान्श्राद्धमाचरेत् एकंद्वेत्रीणिवाविद्वान्दिनानिपरिवर्जयेदिति तन्निर्मूलम् पृथ्वीचंद्रोदयेयमः पुनर्भोजनमध्वानंभाराध्ययनमैथुनम् संध्यांप्रतिग्रहंहोमश्राद्धभोक्ताष्टवर्जयेत् संध्यानिषेधःप्रायश्चित्तात्पूर्वंज्ञेयः यथाहोशनाः दशकृत्वःपिबेदापोगायत्र्याश्राद्धभुक्द्विजः ततःसंध्यामुपासीतजपेच्चजुहुयादपि गौडास्तु सायंसंध्यांपरान्नंचछेदनंचवनस्पते अमावास्यांनकुर्वीतरात्रिभोजनमेवच द्यूतंचकलहंचैवसायंसंध्यांदिवाशयं श्राद्धकर्ताचभोक्ताचपुनर्भुक्तिंचवर्जयेदिति कामधेनौवराहाद्युक्तेः श्राद्धकर्तुरपि सायंसंध्यानिषेधमाहुः शिष्टास्तुनिर्मूलत्वमाहुः होमनिषेधस्तुस्वविषयः सूतकेचप्रवासेचअशक्तौश्राद्धभोजने एवमादिनिमित्तेषुहावयेन्नतुहापयेदितिछंदोगपरिशिष्टात् तत्रैवादित्यपुराणे निमंत्रितस्तुनश्राद्धेकुर्याद्भार्यादिताडनं चंद्रिकायांप्रचेताः श्राद्धभुक्प्रातरुत्थायप्रकुर्याद्दंतधावनं श्राद्धकर्तानकुर्वीतदंतानांधावनंबुधः हेमाद्रौजाबालिः दंतधावनतांबूलतैलाभ्यंगमभोजनं रत्यौषधपरान्नंचश्राद्धकृत्सप्तवर्जयेदिति विष्णुरहस्ये श्राद्धोपवासदिवसेखादित्वादंतधावनं गायत्र्याशतसंपूतमंबुप्राश्यविशुद्ध्यति पुनर्भोजनमध्वानंयानमायासमैथुनं दानप्रतिग्रहंहोमंश्राद्धभुक्त्वष्टवर्जयेत् सोमोत्पत्तौवनस्पतिगतेसोमेयस्तुहिंस्याद्वनस्पतिम् घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयः एतद्विहितधावनादिव्यतिरेकेण वनस्पतिगतेसोमेमंथानंयस्तुकारयेत् गावस्तस्यप्रणश्यंतिचिरकालमुपस्थिताः वनस्पतिगतस्वरूपमाह पृथ्वीचंद्रोदयेव्यासः त्रिमुहूर्तंवसेदर्केत्रिमुहूर्तंवसेज्जले

त्रिमुहूर्तंवसेत्क्षौरेत्रिमुहूर्तंवनस्पतौ कलिकायांहृदूमनुः निसंध्याविभांस्तद्वद्वर्जयेन्मैथुनंक्षुरं प्रमत्ततांचस्वाध्यायंक्रोधशोकौचेतथानृतम् केचिन्निमंत्रणात्पूर्वंश्राद्धस्यपूर्वेन्हिक्षौरंकुर्वंति तत्रमूलंमृग्यम् मरीचिः षष्ठ्यांपर्वसुपक्षादौरिक्ताभद्रातिथिष्वपि पातेश्राद्धेव्रताहे चक्षौरंवर्ज्यंनिशासुच यदाकर्तुरशक्तत्वात्पुत्रशिष्यादिःश्राद्धंकरोति तदाकर्ताप्रतिनिधिना चप्रागुक्तनियमाःकार्याः नशक्नोति स्वयंकर्तुंयदात्वनवकाशतः श्राद्धंशिष्येणपुत्रेणतदान्येनापिकारयेत् नियमानाचरेत्सोपिनियतांश्चवसुंधरे यजमानोपितान्सर्वानाचरेत्स समाहितइतिहेमाद्रौवाराहोक्तेः स्त्रियस्तुपात्रे मुक्तकच्छातुयानारीमुक्तकेशीतथैवच हसतेवदतेचैवनिराशाःपितरोगताः आश्वलायनः श्राद्धेन्हिभोजयेद्वास्तोनबालानपियत्नतः प्राक्पिंडदानात्क्षधाद्येनालंकुर्यात्स्वविग्रहम् वास्तोगृहे अथश्राद्धवस्तूनि तत्रादौकुशाः पृथ्वीचंद्रोदयेदक्षः समित्पुष्पकुशादीनांद्वितीयःपरिकीर्तितः अष्टधाभक्तेदिनेद्वितीयोभागइत्यर्थः तत्रैवयमः समूलस्तुभवेद्दर्भाःपितॄणांश्राद्धकर्मणि मूलेनलोकान्जयतिशक्रस्यसुमहात्मनः व्यासः तर्पणादीनिकार्याणि पितॄणांयानिकानिचित् तानिस्युर्द्विगुणैर्दर्भैःसप्तपत्रैर्विशेषतः शालंकायनः सपिंडीकरणंयावदृजुदर्भैःपितृक्रिया सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत् शंखः अनंतगर्भिणंसाग्रंकौशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् हारीतः पवित्रं ब्राह्मणस्यैवचतुर्भिर्दर्भपिंजूलैः एकैकंन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमम् स्मृत्यर्थसारे सर्वेषांवाभवेद्द्वाभ्यांपवित्रंग्रंथितंनवम् रत्नावल्याम् द्वयोस्तुपर्वणोर्मध्येपवित्रंधारयेद्बुधः हेमाद्रौस्कांदे अनामिकाधृतादर्भाह्येकानामिकयापिवा द्वाभ्यामनामिकाभ्यांतुधार्येदर्भपवित्रके पवित्राभावेतुतत्रैवसुमंतुः समूलाग्रौविगर्भौतुकुशौद्वौदक्षिणेकरे सव्येचैवतथात्रीन्वैबिभृयात्सर्वक-

र्मक्ष बौधायनः हस्तयोरुभयोर्द्वौद्वावासनेपितथैवच दर्भग्रहणेमंत्रमाहशंखः विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज नुदसर्वाणिपापानिदर्भस्वस्तिकरोभव स्मृत्यर्थसारे हुंफट्कारेणमंत्रेणसकृच्छित्वासमुद्धरेत् भारद्वाजः प्रेतक्रियार्थंपित्र्यर्थमभिचारार्थमेवच दक्षिणाभिमुखश्छिंद्यात्प्राचीनावीतिकोद्विजः कुशाभावेपरार्केसुमंतुः कुशाःकाशाःशरोगुंद्रायवादूर्वाथबल्वजाः गोकेशमुंजकुंदाश्चपूर्वाभावेपरःपरः काशादौविशेषमाहशंखः काशाहस्तस्तुनाचामेत्कदाचिद्विधिशांकया प्रायश्चित्तेनयुज्येतद्दूर्वाहस्तस्तथैवच पृथ्वीचंद्रोदयेयमः मासिमास्युद्धृतादर्भामासिमास्येवचोदिताः षट्त्रिंशन्मते मासेनस्यादमावास्यादर्भो ग्राह्योनवःस्मृतः गृह्यपरिशिष्टे येचपिंडाश्रितादर्भायैःकृतंपितृतर्पणं अमेध्याशुचिलिप्तायेनेषांत्यागोविधीयते लघुहारीतः पथिदर्भाश्चितादर्भायेदर्भायज्ञभूमिषु स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेत् ब्रह्मयज्ञेचयेदर्भायेदर्भाःपितृतर्पणे हतामूत्रपुरीषाभ्यांतेषांत्यागोविधीयते हेमाद्रौ अन्यानिचपवित्राणिकुशदूर्वात्मकानिच हेमात्मकपवित्रस्यत्वेकांनार्हंतिवैकलाम् अथहविः हेमाद्रौप्रचेताः कृष्णामाषास्तिलाश्चैवश्रेष्ठाःस्युर्यवशालयः महायवाव्रीहियवास्तथैवचमधूलिकाः कृष्णाःश्वेताश्चलोहाश्चग्राह्याःस्युः श्राद्धकर्मणि महायवावेणुबीजं मधूलिकायावनालाइतिहेमाद्रिः कल्पतरुश्चभारते वर्द्धमानतिलंश्राद्धमक्षय्यंमनुरब्रवीत् सर्वकामैःसयजतेयस्तिलैर्यजतेपितॄन् चंद्रिकायांदेवलः इष्टापूर्तेमृताहेचदर्शेवृद्ध्यष्टकासुच पात्रेभ्यस्तेषुकालेषुदेयंनैवकुभोजनं सायणीये अगोधूमंचयच्छ्राद्धंमाषमुद्गविवर्जितं तैलपक्वेनरहितंकृतमप्यकृतंभवेत् हेमाद्रावत्रिः अगोधूमंचयच्छ्राद्धंकृतमप्यकृतंभवेत् तत्रैवब्राह्मे यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा संतर्पयेत्पितॄन्मुद्गैःश्यामाकैःसर्षपद्रवैः नीवारैर्हस्तिश्यामाकैः

प्रियंगुभिरथार्चयेत् हेमाद्रौ कार्ष्णाजिनिः यदि स्वंजीवतश्चासीत्तद्धान्तस्य यत्नतः सतृप्तो दुस्तरं मार्गं ततो याति न संशयः कलिकायामाश्वलायनः कदल्यादिफलैः शस्तैः मूलैरार्द्रादिकैरपि गोरसैर्मधुनाद्भ्याश्राद्धे संतर्पयेत्पितॄन् कदल्याम्रफलादीनि श्राद्धे संपादयेत्सुधीः हेमाद्रौ पृथ्वीचंद्रोदये च मार्कंडेयः गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि श्राद्धेषु दत्तैः प्रीयंते मासमेकं पितामहाः विदार्या च भरुंडैश्च तिलैः शृंगाटकैस्तथा कंचुकैश्च तथा कंदैः कर्कंधुबदरैरपि पालेवतैरारुकैश्चाप्यक्षोटैः पनसैस्तथा काकोल्या क्षीरकाकोल्या तथा पिंडालकैः शुभैः लाजाभिश्च सधानाभिस्त्रपुसैश्चारुचिर्भटैः सर्षपाराजकाशाभ्यामिंगुदैराजजंबुभिः प्रियालामलकैर्मुख्यैः फल्गुभिश्चातिलटकैः वेत्रांकुरैस्तालकंदैश्चक्रिकाक्षीरिकावचैः लोचैः समोचैर्लकुचैस्तथा वेबीजपूरकैः मुंजातकैः पद्मफलैर्भक्ष्यभोज्यैश्च संस्कृतैः रागखाडवचोष्यैश्च त्रिजातकसमन्वितैः दत्तैस्तु मासं प्रीयंते श्राद्धेषु पितरो नृणाम् एषां कोशहेमाद्र्यादिव्याख्या वैद्यकाद्यनुसारेण मध्यदेशभाषया नामान्युच्यंते सतीनैः कलापैः कलापस्तु सतीनक इत्यमरः बटुरीति प्रसिद्धैः विदार्या तत्कंदेन भरुंडजलजं मखाणा इति श्राद्धमंजर्यां भूकूष्मांडमित्यन्ये शृंगाटकं सिंघाडा कंचुकः कंचनार दः कंदः सूरणः अर्शोघ्नः सूरणः कंद इत्यमरः कर्कंधूः वन्यं सूक्ष्मं बदरं पालेवतं कोशातकी आरुकं अरुइ अक्षोटं अखरोट काकोली क्षीरकाकोल्यौ गौडेषु प्रसिद्धौ पिंडालकं सुथनी महाराष्ट्राणां सोहलकंद इति प्रसिद्धं त्रपुसादयस्त्रयः कर्कटीभेदाः चिर्भटं खर्बुजम् सर्षपेति दीर्घश्चादसः प्रियालं चिरौंजी फल्गु उदुंबरं तिलटकं पटोलकं तालकंदः कंदविशेषः चक्रिका तिंतिणी बिंबा क्षीरिका खीरिणी मोचकदलीफलं लकुचं बडहरम् मुंजातकं गौडदेशे प्रसिद्धं पद्मफलं गट्टा रागखाडवः पिप्पलीशुंठीयुक्त

स्तुसुहृयूषस्तुखांडवः रागखांडवतांयातिशार्करासंयुतंतुतत् इत्युक्तः पानविशेषः त्रिजातंलवंगेलापत्रिकाणि मदनरत्नेकौर्मे कालशा-
कंचवास्तूकंमूलकंकृष्णनालिका प्रशस्तानीतिशेषः हेमाद्रौ पृथ्वीचंद्रोदयेच वायुपुराणे कालशाकंमहाशाकंद्रोणशाकंतथार्द्रकं बि
ल्वामलकमृद्वीकापनसाम्रातदाडिमं चव्यंपालिवतासोदखर्जूरंचकसेरुकं कोविदारश्चकंदश्चपटोलंबृहतीफलं पिप्पलीमरिचं
चैवएलाशुंठीचसैंधवं शर्करागुडकर्पूरबदरीद्रोणपत्रकं तथा मधुकंरामठंचैवकर्पूरंगुडमेवच श्राद्धकर्मणिशस्तानिसैंधवंत्र
पुसंतथा रामठंहिंगुः कसेरुः कोविदारश्चतालकंदस्तथाबिसम् तमालंशतकंदश्चमध्वालुःशीतकंदकं कालेयंकालशाकंचसु-
निषण्णंसुवर्चलं मांसशाकंदधिक्षीरंचांबुवेत्रांकुरस्तथा कट्फलंकौंकणीद्राक्षालकुचंमोचमेवच अलाबुग्रीवकंचारकर्कंधुर्मधु
साह्वयम् वैकंकतंनारिकेलशृंगाटकपरूषकं पिप्पलीमरिचंचैवपटोलंबृहतीफलं एवमादीनिचान्यानिस्वादूनिमधुराणिच
नागरंचार्द्रकंदेयंदीर्घमूलकमेवचेति तथा शर्कराक्षीरसंयुक्ताः पृथुकानित्यभक्ष्याः द्रोणशाकंगूमइतिप्रसिद्धम् मृद्वीद्राक्षा
आम्रातंआंबाडाइतिप्रसिद्धोवृक्षः तत्फलंच पालिवतंजंबीरं पालिआलमितिगौडप्रसिद्धंवा खर्जूरंखजूरइतिप्रसिद्धम् कसे
रुः जलजःकंदः कोविदारः कंचनारसदृशः तालकंदः तालमूली बिसंभसीडं शतकंदःशतावरी शीतकंदः शालुकंसेरुकी-
तिप्रसिद्धम् कालेयंकरालसंज्ञः शाकः दारुहरिद्रावेति पृथ्वीचंद्रोदयः सुनिषण्णकर्कटी सुदृशासुलटियाइतिगौडप्रसिद्ध
सुवर्चलंशाकविशेषः कट्फलंश्रीपर्णीवृक्षफलं कौंकणीअम्लरसाद्राक्षा तिंदुकंडिंडिसमितिकेदवः तिंदुफलंवा ग्रीवकंफ १८
लविशेषः चारकइतालं मधुसाह्वयंमधुकपुष्पफलंवा वैकंकतंचैंचीतिगौडाख्यातम् परूषकंपरूसमितिप्रसिद्धम् नागरंशुं

ठी पृथ्वीचंद्रोदये श्राद्धे आम्रमाम्रातकं बिल्वं दाडिमं बीजपूरकं प्राचीनामलकं क्षीरं नारिकेरं परूषकं नारंगकं च खर्जूरं द्राक्षानीलकपित्थकम्
एतानि फलजातानि श्राद्धे देयानि यत्नतः मात्स्ये अन्नं तु सदधि क्षीरं गोघृतं शर्करान्वितम् मासं प्रीणाति सर्वान्वै पितॄन्नित्याह केशवः
याज्ञवल्क्यः हविष्यान्नेन वै मासं पायसेन तु वत्सरम् मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं
मासवृद्ध्याभितृप्यंति दत्तैरिह पितामहाः खड्गामिषं महाशल्कमधुमुन्यन्नमेव च लोहामिषं कालशाकं मांसं वाध्रीणसस्य च निगमः
त्रिःपिबंत्विंद्रियक्षीणं श्वेतं वृद्धमजापतिम् वाध्रीणसं तु तं प्राहुर्याज्ञिकः श्राद्धकर्मणि वाध्रीणसोजरच्छाग इति मेधातिथिः कात्यायनः
छागास्त्रमेषानालभ्य शेषाणि क्रीत्वा लब्ध्वा वा स्वयम् मृतानां वाहृत्य पचेत् कौर्मे क्रीत्वा लब्ध्वा स्वयं वाथ मृतानाहृत्य वा द्विजः दद्याच्छ्रा-
द्धे प्रयत्नेन तदस्याक्षय्यमुच्यते श्राद्धे दत्तस्य मांसस्याभक्षणे दोषमाह मनुः नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः स प्रेत्य पशुतां या
ति संभवानेकविंशतिं अत्र बहुषु वचनेषु श्राद्धे मांसमधुनोः प्राशस्त्योक्तेः विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेदिति हेमाद्रौ देवलो
क्तेः यच्छ्राद्धं मधुना हीनं तदसैः सकलैरपि मिष्टान्नैरपि संयुक्तं पितॄणां नैव तृप्तये अणुमात्रमपि श्राद्धे यदि न स्याच्च माक्षिकम् नासा
धिकीर्तिनी यस्मात्पितॄणां प्रीतये मत इति हेमाद्रौ ब्राह्मोक्तेश्च मांसमधुनोः श्राद्धे नियतत्वं गम्यते गौडनिबंधे मात्स्यसूक्ते: मध्वा-
भावे गुडो देयः क्षीरस्य च तथा दधि न लभ्यते घृतं यत्र कुर्याद्धृतवतीजपं श्राद्धकलिकायां नागरखंडे कथंचिद्यदि विप्रेभ्यो न दत्तं भोज
नं मधु पिंडास्तु नैव दातव्याः कदाचिन्मधुना विना बृहत्पाराशरस्तु मांसनिषेधति यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत्पितॄन् सोवि
द्वान्चंदनं दग्ध्वा कुर्यादंगारविक्रयम् क्षिप्त्वा कूपे यथा किंचिद्बाल आदातुमिच्छति पतत्यज्ञानतः सोपि मांसेन श्राद्धकृत्तथा सएव

सर्वथान्नं यदानस्यान्तदेवामिषमाश्रयेत् ब्राह्मणश्चस्वयंनाद्यान्नच्छ्रादि हुतंयदि भागवतेपि नदद्यादामिषंश्राद्धे नचाद्याद्धर्मतत्त्ववित् मुन्यन्नैः स्यात्पराप्रीतिर्यथा नपशुहिंसया तथेतिशेषः अत्रकेचित् मुन्यन्नंब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोः मधुप्रदानंशूद्रस्य सर्वेषांवा विरोधियदिति हेमाद्रौपुलस्त्योक्त्याव्यवस्थामाहुः पृथ्वीचंद्रोदयस्तु अक्षतागोपशुश्चैवश्राद्धेमांसंतथामधु देवराच्चसुतोत्पत्तिः कलौपंचविवर्जयेदितिनिगमोक्तेः वरातिथिपितृभ्यश्चपशूपाकरणक्रियेति कलिवर्ज्येषु हेमाद्र्यादिपुराणात् बृहन्नारदीये मांसदानंयथाश्राद्धेवानप्रस्थाश्रमस्तथेत्युक्त्वा इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणइति बृहन्नारदीयेऽभिधानाच्चमांसविधिः कलिव्यतिरिक्तविषयः कलौमांसनिषेधानांचदेशाचाराद्व्यवस्था तथाचबृहन्नारदीयेश्राद्धंप्रकृत्य यथाचारंप्रदेयंतु मधुमांसादिकंतथा देशाचाराःपरिग्राह्यास्तत्तद्देशीयजैर्नरैः अन्यथापतितोज्ञेयः सर्वधर्मबहिष्कृतइति यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा योयत्रविहितोधर्मस्तंधर्मंनविचारयेदिति भृगूक्तेश्चेत्याहुः तन्न होलाकाधिकरणन्यायेनदेशविशेषव्यवस्थापकपदकल्पनायोगात् निरूपितंचैतत्पितामहचरणैर्मांसमीमांसायामितिदिक् मनुः संवत्सरंतुगव्येन पयसापायसेनच वार्ध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकी त्रिपिबंत्विन्द्रियक्षीणंश्वेतंवृद्धमजापतिं वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःश्राद्धकर्मणि क्षीरादौविशेषमाह हेमाद्रौसुमंतुः पयोदधिघृतंचैवगवांश्राद्धेषुपावनम् महिषीणांघृतंप्राहुःश्रेष्ठंनतुपयः क्वचित् याज्ञवल्क्यः संधिन्यनिर्दशावत्सागोपयःपरिवर्जयेत् औष्ट्रमैकशफंस्त्रैणमारण्यकमथाविकम् हेमाद्रौहारीतः नवसूतायाःसप्तरात्रादित्येके दशरात्रादित्यपरे मासेनोपेयुषंभवतीतिधर्मविदः एतद्राजोभावपरं देवलः अजाविमहिषीणांतुपयःश्राद्धेषुवर्जयेत् वि

कारान्पयसश्चैवमाहिषंतुघृतंहितम् तत्रैवब्राह्मे माहिषंचामरंमार्गमाविकैकशफोद्भवम् स्त्रैणमौष्ट्रंपाचितंचदधिक्षीरंत्यजेद्घृतम् सगुडंमरिचाक्तंतुतथापर्युषितंदधि दीर्णंतक्रमपेतंचनष्टस्वादंचफेनवत् माहिषापवादोपरार्के ब्राह्मे देयंतक्रंतुसद्यस्कंनवनीताद उद्धृतम् आरण्यमाहिषीक्षीरंशर्करास्तुतिसंस्तुतम् मध्वक्तंतुहितंचैवदद्यात्तदमृतंयतः स्तुतिःक्षीरशरः श्राद्धकौमुद्यांचैवम् यद्यपि याज्ञवल्क्येन अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितम् अस्नेहाअपिगोधूमयवगोरसविक्रियाइति पर्युषितदध्यादिभोज्यमुक्तम् तथापिगुडमरीचाक्तस्यपर्युषितदोषोऽत्रोच्यतइतिहेमाद्रिः तत्रैवब्राह्मे कालशाकंतंदुलीयंवास्तुकंमूलकंतथा शाकमारण्यकंचैवदद्याच्छ्राद्धेशुनित्यशः तंदुलीयंसूक्ष्मपत्रमितिहेमाद्रिः महाराष्ट्राणांमाठइतिप्रसिद्धम् आरण्यकंफांजीचूकादि तत्रैव दाडिमंमागधींचैवनागराङ्कतिंतिणी आम्रातकंजीरकंचकुवरंचैवयोजयेत् मागधीपिप्पली नागरंशुंठी कुवरंकुस्तुंबरं धणियाइतिप्रसिद्धम् वायवीये अगस्त्यस्यशिखास्ताम्राःकाषायाःसर्वएवच शिखानवपल्लवाः प्रभासखंडे आरामस्यतुसीमंताःकलायाःसर्वएवच सीमंताःनवपल्लवाः कौर्मे तमालंशतकंदंचमध्वालुशीतकंदली मध्वालुःमोहलकंदः शीतकंदलीरातालू इतिप्रसिद्धम् अथवर्ज्यंमार्कंडेयपुराणे यच्चोत्कोचादिनाप्राप्तंपतितादुपार्जितम् अन्यायकन्याशुल्कार्थंद्रव्यंचात्रविगर्हितं पित्रर्थंमेप्रयच्छस्वेत्युक्त्वाप्राप्तंचाप्युपाहृतं चंद्रोदयेशंखः भूस्तृणंशिरसाशिग्रुपालंकीमृचुकंतथा कूष्मांडालाबुवार्ताककोविदारांश्चवर्जयेत् पिप्पलींमरिचंचैवतथावैपिंडमूलकम् कृतंचलवणंसर्वंवंशाग्रंचविवर्जयेत् ३ राजमाषान्मसूरांश्चकोद्रवान्कोरदूषकान् लोहितान्वृक्षनिर्यासान्श्राद्धकर्मणिवर्जयेत् भूस्तृणंकाश्मीरदेशेप्रसिद्धं सुरसानिर्गुंडीतिमाधवः तुलसीत्यन्येचंद्रोदयः सा

नभक्ष्यत्वेननिषिद्धानुपपत्वेनेति गौडाः पालंकी पालक इति प्रसिद्धा मृत्तुकं जलजः शाकः सस्ककमिति पाठे खदिरशाक इति हेमाद्रिः मरीचास्याद्रोणीति हेमाद्रिः कृतलवणं साम्भरभिन्नं सैंधवं लवणं चैव तथा मानससंभवम् यच्च सामुद्रिकं भवेदिति शूलपाणौ पाठः पवित्रे परमेष्ठेते प्रत्यक्षे अपि नित्यश इति वायवीयोक्तेः मानससाम्भरम् यत्तु भविष्यम् तर्जन्यादंतकाष्ठं च प्रत्यक्षं लवणं तथेति तत्रक्षारलवणं खारीति प्रसिद्धं निषिद्धं क्ष क्षात्तु क्षारलवणं त्रिरात्रं तु वने वसेदिति ब्राह्मोक्तेरिति शूलपाणिः क्षीरलवणमिति यावत् क्षीरमिश्रं लवणं निषिद्धमिति वाचस्पतिः राजमाषाः रतरा इति प्रसिद्धाः कोरदूषकः वनकोद्रवः चंद्रिकायां शरवः पिंडालकं च तुंडीरं करमर्दचनालिकं कूष्मांडं बहुबीजानि श्राद्धे दत्त्वा व्रजत्यधः पिंडालकं महाराष्ट्रेषु पेंडरमिति प्रसिद्धम् तुंडीरं बिंबीफलमिति केदेवः करमर्दं करवंदमिति प्रसिद्धं तत्रैव बिडालोच्छिष्टमाघ्रातं श्राद्धे यत्नेन वर्जयेत् कूष्मांडं महिषीक्षीरं माढक्यो राजसर्षपाः चणकाराजमाषाश्च घ्नंति श्राद्धं न संशयः वृद्धपराशरः करीरफलपुष्पाणि विडंगमरिचानि च जंभारिकासजंबीरा रूपकं बीजपूरकम् जंबलाबूनि पिप्पल्यः पटोलं पिंडमूलकम् मसूरांजनपुष्पं च श्राद्धे दत्त्वा पतत्यधः जंबूसूक्ष्मं माधवीये चतुर्विंशतिमते यावनालान्कुलित्थांश्च वर्जयेदिति विपश्चितः यावनालाजोंधलाः अन्यानि चणकादीनि विहितनिषिद्धानि तेषां विकल्पः अन्यथा श्यामाकैश्वपाकैः शाकैर्नीवारैश्च प्रियंगुभिः गोधूमैश्च तिलैर्मुद्गैर्मासं प्रीणयते पितॄनिति गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपीति हेमाद्रौ कौर्मविष्णुधर्मादिविरोधः स्यात् पिप्पलीमरीचादेस्तु प्रत्यक्षस्य निषेधो नत्वन्यद्रव्यमिश्रस्य सौवीरानिक्तैर्लवणादिभिस्तु पाकस्यसिद्धिर्महताह्येस्तु तद्बीजपूरान्मरिचादियोगात्सिद्धं मदेयनतुदुष्यतीति पृथ्वीचंद्रोदये वृद्धपराशरोक्तेः तत्रैव दत्तुश्च

यस्मिन्मनसोभिलाषः श्रद्धा भवेद्यत्रचदीयमाने श्राद्धेक्षुद्रेयंविधिवन्नदेवतद्वत्तमक्षय्यमितिब्रुवंति एतन्निषिद्धेतरविषयम् चंद्रिकायां कृष्णाधान्यानिसर्वाणिवर्जयेच्छ्राद्धकर्मणि नवर्जयेत्तिलांश्चैवमुद्गमाषांस्तथैवच मात्स्ये मसूरशणनिष्पावराजमाषकुसुंभिकाः पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः नदेयाःपितृकार्येषु पयश्चाजाविकंतथा कोद्रवोद्दारवरककपित्थमधुकातसी एतान्यपि नदेयानिपितृभ्यःश्राद्धमिच्छता निष्पावाः वल्लाः यत्तुमार्कंडेयः प्रियंगवःकोविदारानिष्पावाश्चात्रशोभनाइति तत्रनिष्पावः श्वेतशिंबीति दानसागरे श्राद्धप्रकाशेचोक्तम् बिल्वंचरक्तंनिषिद्धं जंबीरंरक्तबिल्वंच शालस्यापिफलंत्यजेदिति ब्राह्मोक्तेः पारिभद्रोनिंबतरुरित्यमरः रक्तमंदारइतिहेमाद्रिः आटरूषोवासातपुष्पं उद्दारःकांचनारः मधुकंज्येष्ठीमध्वीतिचंद्रिका चरकावनमुद्गाः हेमाद्रौब्रह्मांडे आसनारूढमन्नाद्यं पादोपहतमेवच अमेध्यैर्जंगमैःस्पृष्टं शुष्कंपर्युषितंचयत् द्विःस्विन्नंपरिदग्धंचतथैवाग्रावलेहितम् शर्कराकीटपाषाणैःकेशैर्यच्चाप्युपद्रुतम् पिण्याकंमथितंचैवतथातिलवणंचयत् सिद्धाःकृताश्चयेभक्ष्याःप्रत्यक्षलवणीकृताः वाससाचावधूतानिवर्ज्यानिश्राद्धकर्मणि द्विःस्विन्नंयत्सकृत्पाकेनभक्ष्यमपिहिंगुजीरकादिसंस्कारार्थं पुनःपच्यतेतद्वर्ज्यम् यत्तुतिक्तशाकान्नविकारादिद्विःपाकेनैवभक्षणार्थंनिषिद्धं अग्रावलेहितमास्वादितपूर्वं पर्युषितस्यसदानिषेधेपिपुनर्वचनं अपूपाश्चकरंभाश्चधानावटकसक्तवः शाकंमांसमपूपंचसूपंकृसरमेवच यवागूःपायसंचैवयच्चान्यत्स्नेहसंयुतं सर्वंपर्युषितंभोज्यंशुक्तेचेत्परिवर्जयेदितिमाधवीयेयमोक्तवटकादेरपिपर्युषितस्यनिषेधार्थमितिचंद्रिकाद्वयः वर्ज्येषुविश्वामित्रः कपित्थंकुसुंभंचैवनालिकेलंचपौनकम् जंबूफलादिपक्वंचपिण्याकंतंडुलीयकम् हेमाद्रौषट्त्रिंशन्मते वर्ज्यामर्कटकाःश्या

न्द्रेराजमाषास्तथैवच मर्कटकाःलाकाइतिप्रसिद्धाः पैठीनसिः वृंताकंनलिकापोतकुसुंभाश्मंतकानिच शाकानामभक्ष्याइति पोतपोईतिप्रसिद्धम् मार्कंडेयः वर्ज्याश्चाभिषवानित्यंशतपुष्पागवेधुकाः जंबीरकंफलंवर्ज्यंकोविदारश्चनित्यशः अभिषवःसूक्तमितिचंद्रिका संधानकमितिपृथ्वीचंद्रः शतपुष्पाओंवाइतिप्रसिद्धम् शाठ्यायनः मारिषंनालिकाचैवरक्तायाचकलंबिका असुरान्नमिदंसर्वंपितृणांनोपतिष्ठते मारिषंमध्यदेशेमरुसाइति महाराष्ट्रेषुराजगिराइतिप्रसिद्धं कलंबिकावेणवाहूतिपत्रा तत्रैव गांधारिकापटोलानिश्राद्धकर्मणिवर्जयेत् गांधारिकातंदुलीयमितिचंद्रिका जवासारव्यादुरालभेतिकेदेवः भारते हिंगुद्रव्येषु शाकेषु अलाबुंलशुनंतथा कुकुंडकान्यलाबूनिकृष्णंलवणमेवच पुनरलाबुग्रहणमुभयालाबुनिषेधार्थमितिपृथ्वीचंद्रः कुकुंडकंवर्तुलंछत्राकम् तत्रैव कुस्तुंबुरुकलिंगोत्थंवर्जयेदाम्लवेतसं हेमाद्रौब्राह्मे वार्ताकंपंचशिंबंचलोमशानिफलानिच कलिंगंरक्तचारंचवीणाकंधृतचारकम् कपालकांचमारीचकरंजंपिंडमूलकम् गृंजनंचुलिकांचैवगाजरंजीवकंतथा वृंताकंश्वेतकंडूरांश्वेतवृंताकंकूष्मांडंचविवर्जयेदितिदेवलोक्तेः तेनकृष्णस्यानिषेधइतिचंद्रिकामाधवौ वस्तुतस्तुसदाश्वेतनिषेधात्पुनःश्राद्धेनिषेधोव्यर्थः तेनभक्ष्यस्यकृष्णवृंताकस्यापिनिषेधार्थमिदमितिवयम् कंदुराकपिकच्छुः कुंभांडंवृत्तालाबुः पंचशिंबंवल्लमसूरराजमाषमठकुलित्थाः लोमशानिकपित्थानि रक्तचारंलोहितचारफलम् वीणाकंकृष्णदीर्घकर्कटी घृतचारकंचिरस्थितचारफलम् चारोलीतिप्रसिद्धं कपालंनारिकेलं कांचंकचुप्लक्षफलं मारीचंआर्द्रमरीचानि गृंजनंपलांडुभेदः पश्चिमदिशिप्रसिद्धः ननुगाजरम् तस्यपृथगुक्तेः हेमाद्रिणातुगृंजनंगाजरमेवोक्तम् गौडश्राद्धकौमुद्यामप्येवं तच्चिंत्यम् चुक्रिकाचिरकालशुक्तपानकम् चंद्रिकायां

हारीतः नवटप्लक्षोदुंबरशेलुदधित्थनीपमातुलिंगानि भक्षयेत् शेलुः श्लेष्मातकः भोकरसंज्ञः दधित्थं कपित्थं स्मृतिसारे क्षीरेक्षुलवणंदत्वा उच्छिष्टेपि च यद्धृतम् स्नानं रजकतीर्थेषु ताम्रे गव्यं सुरासमम् गौडनिबंधे सागरे स्मृतिः नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु गव्यं च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ताम्रपात्रे घृतं मांसं यच्च गव्यं घृतेतरत् आमिषं तु गवां मांसं दधि मद्यं पयो रजः द्रव्यांतरयुतं मांसं पयसा संयुतं दधि पयोऽनुक्तं सारं च ताम्रपात्रे न दुष्यति अथ जलम् याज्ञवल्क्यः शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं वर्ज्यं जलमुक्तं हेमाद्रौ ब्रह्मांडे दुर्गंधि फेनिलं क्षारं पंकिलं पल्वलोदकम् न भवेद्यत्र गोतृप्तिर्नक्तं यच्चाप्युपाहृतम् यच्च सर्वार्थमुत्सृष्टं यच्चाभोज्यनिपानजम् तद्वर्ज्यं सलिलं तात सदैव श्राद्धकर्मणि निपानो जलाशयः शुद्धितत्त्वे शंखः स्नानमाचमनं दानं देवतापितृतर्पणम् शूद्रोदके न कुर्वीत तथामेध्याद्विनिःसृते हेमाद्रावादित्यपुराणे चिरपर्युषितं वापि शूद्रस्पृष्टमथापि वा जाह्नव्याः स्नानदानादौ पुनात्येव सदा पयः कात्यायनः अपो निशि न गृह्णीयान्नापि बेच्च कदाचन उद्धृत्याग्निमुपर्यग्नेर्धाम्नो धाम्न इतीरयेत् रजोदोषे तु प्रागुक्तं नारदीये त्यजेत्पर्युषितं पुष्पं त्यजेत्पर्युषितं जलम् न त्यजेज्जान्हवीतोयं तुलसीबिल्वपद्मकम् अन्यान्यपि दृष्टानि चंद्रोदये मात्स्ये मध्यान्हः खड्गपात्रं च तथा नेपालकंबलः रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः पापं कुत्सितमित्याहुस्तस्य संतापकारिणः अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः ब्राह्मे यतिस्त्रिदंडः करुणा राजतं पात्रमेव च दौहित्रं कुतपः कालश्छागः कृष्णाजिनं तथा शास्त्रानीतिशेषः दौहित्रं खड्गपात्रमिति कल्पतरुः अपरार्के स्मृत्यंतरे अपत्यं दुहितुश्चैव खड्गपात्रं तथैव च घृतं च कपिलाया गोर्दौहित्रमिति कीर्तितम् ब्रह्मांडे अमावास्यागते सोमे यातु खादति गोस्तृणम् तस्या-

गोर्यद्वैतत्क्षीरं तद्दौहित्रमुदाहृतम् स्मृतिसंग्रहे उच्छिष्टं शिवनिर्माल्यं वांतं च मृतकर्पटम् श्राद्धे सप्त पवित्राणि दौहित्रः कुतपस्तिलाः उच्छिष्टं वत्सस्य दुग्धमित्यर्थः शिवनिर्माल्यं गंगोदकं वांतं मधु मृतकर्पटं तसरीपट्टम् तिलेष्वापस्तंबः अटव्यां ये समुत्पन्ना अकृष्टफलितास्तथा ते वै श्राद्धे पवित्राः स्युस्तिलास्तेन तिलास्तिलाः अभावे ग्राम्याः गौराः कृष्णास्तथारण्यास्तथैव त्रिविधास्तिला इति ब्राह्मोक्तेः अथ वर्ज्यानि चंद्रिकायां यमः कुक्कुटो विड्वराहश्च काकश्वाथ बिडालकः वृषलीपतिश्च वृषलः षंढो वीरा रजस्वला एते तु श्राद्धकाले वै वर्जनीयाः प्रयत्नतः खंजः काणः कुणिः श्वित्री दातुः प्रेष्यकरस्तथा न्यूनांगोप्यतिरिक्तांगस्तमप्यपनयेत्ततः वायवीये अन्नं पश्येयुरेते तु यदि वै हव्यकव्ययोः उत्स्रष्टव्यं प्रधानार्थं संस्कारस्तापदिस्मृतः सुमंतुः चांडालादिवीक्षितमन्नमभोज्यमन्यत्र मृद्भस्महिरण्योदकस्पर्शात् तत्रैव जमदग्निः शुद्धवत्योथ कूष्मांड्यः पावमान्यस्तरत्समाः पूतेन वारिणा दर्भैरन्नदोषमपानुदंतु चंद्रोदये पादुकोपानहौ छत्रं चित्ररक्तांबरं तथा रक्तपुष्पं च मार्जारं श्राद्धभूमौ विवर्जयेत् निर्णयदीपे घंटानिनादो हयसंनिधानं शंबूकशंखं कदलीदलं च उन्मत्तजात्यर्कहयारिजानि श्राद्धस्य वैगुण्यकराण्यमूनि हयारिजं महिषीक्षीरादि अथ श्राद्धदिनकृत्यम् चंद्रोदये उशनाः गोमयोदकैर्भूमिभाजनशौचं कुर्यात् पराशरः कांजिकं दधितक्रं च श्रृतं वाश्रृतमेव च पूर्वमेव न दातव्यमेकोद्दिष्टेथ पार्वणे हेमाद्रौ पराशरः गृहाग्निशिशुदेवानां ब्रह्मचारितपस्विनाम् तावन्न दीयते किंचिद्यावत्पिंडान्न निर्वपेत् कौर्मे तिलानवकिरेत्तत्र सर्वतो बंधयेदजान् तत्रैव देवलः तथैव यंत्रितो दाता प्रातः स्नात्वा सहांबरः आरभेत नवैः पात्रैरन्नारंभं च बांधवैः अत्रात्मनेपदात्स्वयमेव पाकः कार्यः अशक्तौ पत्न्या तद

भावेबांधवैः ततस्तानि पपाचाशु सीताजनकनंदिनीति पद्मलिंगादिति हेमाद्रिः श्राद्धदीपकलिकायामाश्वलायनः समानप्रवरैर्मिश्रैः सपिंडैश्च गुणान्वितैः कृतोपकारिभिश्चैव पाककार्यं प्रशस्यते व्यासः गृहिणीचैवसुस्नाता पाकंकुर्यात्प्रयत्नतः निष्पन्नेषु च पाकेषु पुनः स्नानं समाचरेत् पृथ्वीचंद्रोदये ब्राह्मे रजस्वलाच पाखंडा पुंश्चलीपतितातथा त्यजेच्छूद्रां तथावंध्यां विधवांचान्यगोत्रजाम् व्यंगकर्णीं चतुर्थाहः स्नातामपि रजस्वलाम् वर्जयेच्छ्राद्धपाकार्थममातृपितृवंशजाम् मातृपितृवंशजभिन्नां त्यजेदित्यर्थः स्मृतिसारे नपाकं कारयेत्पत्नीमन्यां वाप्यन्यगोत्रजाम् मृतवंध्यां च गर्भघ्नीं गर्भिणीं चैव दुर्मुखीं पाकभांडानि तु हेमाद्रौ नागरखंडे सौवर्णान्यथ रौप्याणि कांस्यताम्रोद्भवानि च मार्तिकान्यपि भव्यानि नूतनानि दृढानि च तत्रैवादित्यपुराणे पचेदन्नानि सुस्नातः पात्रेषु शुचिषु स्वयं स्वर्णादिधातुजातेषु मृन्मयेष्वपि वा द्विजः अच्छिद्रेष्वविलिप्तेषु तथानुपहतेषु च नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् पूर्वं कृतोपयोगेषु मृन्मयेषु न तु क्वचित् वायुपुराणे नकदाचित्पचेदन्नमयस्थालीषु पैतृकं अयसो दर्शनादेव पितरोपि द्रवंति हि कालायसं विशेषेण निंदंति पितृकर्मणि फलानां चैव शाकानां छेदनार्थानि यानि तु महानसेपि शस्त्राणि तेषामेवा हि सन्निधिः इष्यते नेतरस्यात्र शस्त्रमात्रस्य दर्शनं श्राद्धदेशे तु विदुषा पितॄणां तृप्तिमिच्छता महानसेपि युक्तानामपि कार्यं न दर्शनम् तत्रैव पच्यमानस्तु भांडेषु भक्त्या ताम्रमयेषु च समुद्धरति वै घोरात्पितॄन्दुःखमहार्णवात् तैजसानामभावे तु पिठरे मृन्मयेपि च नवे शुचौ प्रकुर्वीत पाकं पित्रर्थमादरात् तत्रैवादित्यपुराणे पक्वान्नस्थापनार्थं तु शस्यंते दारुजान्यपि दर्व्यादीन्यपि कार्याणि यज्ञियैरपि दारुभिः यमः विवाहे प्रेतकार्ये च मातापित्रोः क्षयेहनि नवभांडानि कुर्वीत यज्ञकाले विशेषतः अथ पाकाग्निः हेमाद्रौ प्रजा

पतिः औपासनेनान्नसिद्धिरग्नौकरणमेव च पृथ्वीचंद्रोदयेंगिराः शालाग्नौतुपचेदन्नंलौकिकेवापिनित्यशः यस्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयते मनुः वैवाहिकेग्नौकुर्वीतगृह्यंकर्मयथाविधि पंचयज्ञविधानंचपंक्तिंचान्वाहिकींद्विजः श्राद्धस्यगृह्यत्वंचोक्तमपरार्केण अत्रविशेषःकर्मप्रदीपे प्रातर्होमंतुनिर्वर्त्यसमुद्धृत्यहुताशनात् शेषंमहानसेकृत्वातत्रपाकंसमाचरेत् पाकांतेग्निंसमाहृत्यगृह्याग्नौतुपुनःक्षिपेत् ततोस्मिन्वैश्वदेवादिकर्मकुर्यादतंद्रितः तदभावेलौकिके ततःपचेयुरन्नानिनिर्वापानत्रशाशनैः वैवाहिकेग्नावन्यत्रलौकिकेवापिसंयतइतिकलिकायांसंग्रहोक्तेः पित्रर्थंनिर्वापंकुलेत्यर्थः अतएवहेमाद्रौवायुपुराणे पित्रर्थंनिर्वपेद्भूमौकूर्चेवादर्भसंस्कृते तत्रैवपाद्ममात्स्ययोः अग्निमान्निर्वपेत्पैत्रंचरुंवासममुष्टिभिः पितृभ्योनिर्वपामीतिसर्वंदक्षिणतोन्यसेत् चरुग्रहणान्नशाकाद्यपीतिहेमाद्रिः पिंडपितृयज्ञार्थपाकविषयोयंनिर्वापः इतितुयुक्तं अयंचेतरेषामग्निः आश्वलायनानांतुगुरुणाभिसृष्टाअन्यतोवापक्षीयमाणाअमावास्यायांशांतिकर्मकुर्वीरन्नित्यादिसूत्रेणपचनाग्नेस्त्यागमुक्त्वाइहैवायमितरेजातवेदाइत्यर्धर्चेनशमीमयीभ्यामरणिभ्यामग्निंमंथेत्सपचनाग्निर्भवतीतिसूत्रेवृत्तौचोक्तेः पचनाग्नावेवपाकः बोधायनेनाप्युक्तम् आहृतपचनाग्निमौपासनंवाभिप्रव्रजंतीति स्मार्ताग्नौपाकस्त्वन्यशाखाविषयइतिकेचित् वस्तुतस्तुपूर्वोक्तस्यसर्वाधानविषयत्वमुक्तम् शिष्टाचारोपिनपचनेदृश्यते अंडविलायामपिसर्वाधानपक्षेवैश्वदेवश्राद्धंचपचनेकुर्यादन्यथापानेइत्युक्तं अग्नौकरणंतुप्रयोगपारिजातादिभिराब्दिकादिसर्वश्राद्धेषुपिंडपितृयज्ञव्यतिषंगोक्तेर्लौकिकेपचनेवापाकेकृतेपिगृह्याग्नौपक्वचरुणैवकार्यमितिप्रतिभाति मदनरत्नेप्येवम् विधुरोत्सन्नाग्न्यादेस्तुपृष्ठोदिविविधानेनाग्निसंपादनमित्युक्तंहरिहरभाष्ये इतिपा-

कार्ष्णिः चंद्रिकायां मार्कंडेयः अन्हः षट्सु मुहूर्तेषु गतेषु प्रयतान् द्विजान् प्रत्येकं प्रेषयेत्तेषां प्रदायामलकोदकम् देवलः ततो निवृत्ते मध्यान्हे कृत्तरोमनखान् द्विजान् अभिगम्य यथान्यायं प्रयच्छेद्दंतधावनम् ॥ तैलमभ्यंजनं स्नानं स्नानीयं च पृथग्विधम् पात्रैरौदुंबरैर्दद्याद्वैश्वदेविकपूर्वकम् औदुंबरेष्वसंभवे: अत्र क्षौरामलकस्नानादि निषिद्धतिथ्यादिव्यतिरिक्तविषयमिति हेमाद्रिर्माधवश्च यत्तु चंद्रिकायां प्रचेताः तैलमुद्वर्तनं स्नानं दद्यात्पूर्वाण्ह एव च श्राद्धकृद्भ्यो नखश्मश्रुच्छेदनं तु न कारयेदिति तन्निषिद्धतिथ्यादिविषयम् निषिद्धतिथ्यादि तु प्रागुक्तम् अभ्यंगे तु कलिकायां कात्यायनः तैलमुद्वर्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः तैरभ्यंगश्च कर्तव्यो वर्ज्यकालं न चिंतयेत् अपरार्के प्रचेताः स्नातोधिकारी भवति दैवे पित्र्ये च कर्मणि श्राद्धकृच्छुक्लवासाः स्यान्मौनी चापि जितेंद्रियः हेमाद्रौ जाबालः तांबूलं दंतकाष्ठं च स्नेहस्नानमभोजनम् रत्यौषधं परान्नानि श्राद्धकर्ता विवर्जयेत् वस्त्रविशेषमाह तत्रैव भृगुः नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः द्विकच्छोनुत्तरीयश्च अकच्छो वस्त्र एव च नग्नः काषायवासाः स्यान्नग्नश्चार्द्धपटः स्मृतः नग्नो द्विगुणवस्त्रः स्यान्नग्नो रक्तपटः स्मृतः न्नग्नो रक्तपटः स्मृतः नग्नस्तु स्निग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथा ततः कर्ता ऊर्ध्वपुंड्रं कुर्यात् जपे होमे तथा दाने स्वाध्याये पितृकर्मणि तत्सर्वं नश्यति क्षिप्रमूर्ध्वपुंड्रं विना कृतमिति हेमाद्रावुक्तेः यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म च वृथा भवति विप्रेंद्र ऊर्ध्वपुंड्रं विना कृतमिति बृहन्नारदीयात् ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणीति वृद्धपराशरोक्तेश्च अन्ये तु ऊर्ध्वपुंड्रं द्विजातीनामग्निहोत्रसमो विधिः श्राद्धकाले तु संप्राप्ते कर्ता भोक्ता च तत्त्यजेत् वामहस्ते च दर्भांस्तु गृहे रंगवल्लिं तथा लला

टेतिलकंदृष्ट्वानिराशाःपितरोगताइति संग्रहोक्तेः उर्ध्वपुंड्रंत्रिपुंड्रंवाचंद्राकारमथापिवा श्राद्धकर्तानकुर्वीत यावत्पिंडान्निर्वपेदिति विश्व
प्रकाशेवचनाच्च नकार्यमित्याहुः अत्राचाराद्व्यवस्था अतएवबृहन्नारदीये उर्ध्वपुंड्रंचतुलसीश्राद्धेनेच्छंतिकेचनेति ऊर्ध्वपु
ड्रविधिर्विप्रविषयः निषेधःकर्तृपरइति पृथ्वीचंद्रः यत्तुहेमाद्रौदेवलः ललाटेपुंड्रकंदृष्ट्वास्कंधेमाल्यंतथैवच निराशाःपित-
रोयांतिदृष्ट्वाचवृषलीपतिमिति तद्गंधेनत्रिपुंड्रविषयम् प्राक्पिंडदानाद्धाद्येनौलंकुर्यात्स्वविग्रहमित्याश्वलायनोक्तेः पुंड्रंवर्तुल
मित्यपरार्के मदनरत्नेच पृथ्वीचंद्रस्तुपुंड्रंत्रिपुंड्रं ऊर्ध्वंचतिलकंकुर्यान्नकुर्याद्वैत्रिपुंड्रकं निराशाःपितरोयांति दृष्ट्वाचैवत्रिपुंड्र
कमितिबृहत्पराशरोक्तेः भोक्तुस्तिर्यगूलेपोभवत्येव वर्जयेत्तिलकंभालेश्राद्धकालेचसर्वदा तिर्यगप्यूर्ध्वपुंड्रंवाधारयेत्तुप्रयत्न-
तइतिव्यासोक्तेरित्याह पृथ्वीचंद्रोदयेब्राह्मे सदर्भेणतुहस्तेनयः कुर्यात्तिलकंबुधः आचम्यसविशुद्ध्येत दर्भत्यागेनचैवहि
श्राद्धारंभकालमाहापरार्केगौतमः आरभ्यकुतपेश्राद्धंकुर्यादारोहिणंबुधः विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेत् एतदे
कोद्दिष्टे पार्वणेतूक्तंमात्स्ये ऊर्ध्वंमुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यते तथा मध्यान्हःसर्व-
दायस्मान्मंदीभवतिभास्करः तस्मादनंतफलदस्तत्रारंभोविशिष्यते अथश्राद्धपरिभाषा चंद्रिकायांकात्यायनः दक्षिणंपात
येज्जानुं देवान्परिचरन्सदा पातयेदितरंजानुंपितॄन्परिचरन्सदा बौधायनः प्रदक्षिणंतुदेवानांपितॄणामप्रदक्षिणं देवाना-
मृजवोदर्भाःपितॄणांद्विगुणास्तथा पृथ्वीचंद्रोदयेशंखः आवाहनार्घ्यसंकल्पेपिंडदानान्नदानयोः पिंडाभ्यंजनकालेतुतथैवा
जनकर्मणि अक्षय्यासनयोःपाद्येगोत्रंनामप्रकाशयेत् तत्रैवपरिशिष्टे दक्षिणापिंडदानेचगंधधूपाक्षयेतथा संकल्पेचास

दीपेअंजनाभ्यंजनेतथा अन्नार्घ्यदानाद्यंतेषुगोत्रंनामचकीर्तयेत् कलिकायांसंग्रहे आसनावाहनेपाद्येअन्नदानेतथैवच अक्षय्येपिंड
दानेचषट्सुनामानिकीर्तयेत् मात्स्ये संबंधंप्रथमंब्रूयाद्गोत्रंनामतथैवच पश्चाद्रूपंविजानीयात्क्रमएषसनातनः तत्रैव सका
रेणतुवक्तव्यंगोत्रंसर्वत्रधीमता सकारःकुतपोज्ञेयस्तस्माद्यत्नेनतंवदेत् यथाकाश्यपसगोत्रेति पराशरसगोत्रस्यवृद्धस्यतुमहात्मनः
भिक्षोःपंचशिखस्याहंशिष्यःपरमधार्मिकइति मोक्षधर्मेषुप्रयोगाच्च तेनगोत्रसगोत्रयोःपर्यायत्वाच्छाखाभेदाव्यवस्थेतिशूलपा
णिः एतद्येषामाम्नातंतेषामेव हेमाद्रौबृहस्पचेताः गोत्रंस्वरांतंसर्वत्रगोत्रस्याक्षय्यकर्मणि गोत्रस्तुतर्पणेप्रोक्तःएवंदातानमुह्यति स
र्वत्रैवपितःप्रोक्तःपितातर्पणकर्मणि पितुरक्षय्यकालेतुपित्र्येसंकल्पनेतथा शर्मन्नर्घ्यादिकेकार्येशर्मातर्पणकर्मणि शर्मणो
क्षय्यकालेतुपितॄणांदत्तमक्षयं स्वरांतंसंबुद्ध्यंतमितिहेमाद्रिः तत्रैवचंद्रिकायांचस्मृत्यंतरे गोत्रस्यत्वपरिज्ञानेकाश्यपंगो
त्रमुच्यते यस्मादाहश्रुतिःसर्वाःप्रजाःकश्यपसंभवाः यत्तुसत्याषाढः अथानाज्ञातबंधोःपुरोहितगोत्रेणाचार्यगोत्रेणवेतितद्वि
वाहपरम् नाम्नोच्चारणेविशेषमाहहेमाद्रौबोधायनः शर्मांतंब्राह्मणस्योक्तंवर्मांतंक्षत्रियस्यतु गुप्तांतंचैववैश्यस्यदासांतंशूद्र
जन्मनः पित्रादिनामाज्ञानेतत्रैव पृथिवीवत्पितावाच्यस्तत्पिताचांतरिक्षवत् अभिधानापरिज्ञानेदिविषत्प्रपितामहः पि
त्रादीनांनामयदापुत्रैर्नज्ञायतेतदा आपस्तंबसूत्रेप्येवम् एतदन्यशाखापरम् आश्वलायनोक्तं तत्सूत्रे यदिनामान्यविद्वां
सस्तत्पितामहप्रपितामहेतिब्रूयात् तत्कारिकापि नामानिचेन्नजानीयात्तत्तेत्यादिवदेत्क्रमात् ततेतिसंबंधमात्रपरम् ते
नपितृव्यादावपितथेतिगौडाः स्त्रीणांदांतंनामज्ञेयम् दांतंनामस्त्रीणामितिपृथ्वीचंद्रोदयेगोभिलोक्तेः केचिद्दीशब्दांतमाहुः अ-

न्येतुदेवीदाशनिजुयोः समुच्चयमाहुः हेमाद्रौनारायणः विभक्तिभिस्तुयत्किंचिद्दीयतेपितृदैवते तत्सर्वंसफलंज्ञेयंविपरीतंनिरर्थकम् चंद्रिकास्मृत्यर्थसारयोश्चनारदीये अक्षय्यासनयोः षष्ठीद्वितीयावाहनेतथा अन्नदानेचतुर्थीस्याच्छेषाःसंबुद्धयः स्मृताः यत्तुव्यासः चतुर्थीचासनेनित्यंसंकल्पेचविधीयते प्रथमातर्पणेप्रोक्तासंबुद्धिमपरेजगुरिति अत्रशाखाभेदाद्व्यवस्थेतिहेमाद्रिः हेमाद्रौस्मृत्यः अर्घ्यावनेजनंपिंडमन्नंप्रत्यवनेजनम् संबुद्धिंतत्रकुर्वीतशेषेषष्ठीविधीयते तत्रैवमातुर्विशेषोनागरखंडे मातर्मात्रेतथामातुरासनेकल्पनेक्षये गोत्रेगोत्रायैगोत्रायाः प्रथमाद्याविभक्तयः हेमाद्रौप्रभासखंडे यज्ञोपवीतिनाकार्यंदैवंकर्मप्रदक्षिणं प्राचीनावीतिनाकार्यंपितृकर्माप्रदक्षिणं अनुपनीतस्त्रीशूद्रादेस्तूत्तरीयेणैवसव्यापसव्येज्ञये तस्योपवीतस्थानीयत्वात् अपसव्यंक्रमाद्वस्त्रंकृत्वाकश्चित्सगोत्रजइतिब्राह्मणाश्चेतिवाचस्पतिः यत्तुकेचित् सदोपवीतिनाभाव्यमित्यस्यपुरुषार्थत्वात् प्राचीनावीतकालेप्युपवीतांतरेणतत्कार्यमेवेति तन्न विशेषबाधात् जमदग्निः सूक्तस्तोत्रजपंत्यक्त्वापिंडाघ्राणंचदक्षिणाम् आह्वानंस्वागतंचार्घ्यंविनाचपरिवेषणं विसर्जनंसौमनस्यमाशिषांप्रार्थनंतथा विप्रप्रदक्षिणांचैवस्वस्तिवाचनकंविना पितॄनुद्दिश्यकर्तव्यंप्राचीनावीतिनासदा हेमाद्रौसंग्रहे आदौविप्राग्निशौचांतेभ्यर्चनेविकिरेहुते पिंडानभ्यर्चयित्वाचविसर्ज्यब्राह्मणांस्तथा आचमेच्छ्राद्धकर्ताचस्थानेष्वेतेषुसप्तसु आद्यंतयोर्द्विराचामेच्छेषेषुतुसकृत्सकृत् तत्रैव श्राद्धारंभेवसानेचपादशौचार्चनांतयोः विकिरेपिंडदानेचषट्स्वाचमनमिष्यते आश्वलायनः दानाध्ययनदेवाचाजपहोमव्रतादिकान् नकुर्याच्छ्राद्धदिवसेप्राग्विप्राणांविसर्जनात् एतन्नित्यवर्ज्यमितिबोपदेवः इदंविष्णुभिन्नदेवपरम् विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरम् पितृभ्यश्चापित

द्दैयं तदानंत्याय कल्पते पितृशेषंतु योदद्याद्धरये परमात्मने रेतोधाःपितरस्तस्य भवंति क्लेशभागिनइतिस्कांदात् पितरःसर्वमनुष्या विष्णुनाशितमश्नंतीतिश्रुतेः यःश्राद्धकाले हरिभुक्तशेषं ददातिभक्त्या पितृदेवतानाम् तेनैवपिंडांस्तुलसीविमिश्रानाकल्पकोटिंपितरस्तुतृप्ता इतिब्राह्मोक्तेश्चेति श्रीधरस्वामिनृसिंहपरिचर्यादयः एतत्सर्वंनिबंधविशेषान्निर्मूलं अत्रविशेषोहेमाद्रौविष्णुधर्मे श्राद्धानितुसमभ्यर्च्य नृवराहजनार्दनं शिवपुराणे पूजयित्वाशिवंभक्त्या पितृश्राद्धंप्रकल्पयेत् पूर्वनिषेधस्तुविहितभिन्नपरः तथाहेमाद्रौ देव्यर्चादक्षिणागादिःपादजान्वंसमूर्धनि शिरोंसजानुपादेषु वामांगादिचपैतृकं कलिकायांस्मृत्यंतरे श्राद्धारंभेतुयेदर्भाः पादशौचेविसर्जयेत् अर्चनादौतुयेदर्भाउच्छिष्टांतेविसर्जयेत् मार्जनादौतुयेदर्भाःपिंडोत्थानेविसर्जयेत् उत्तानादौतुयेदर्भादक्षिणांतेविसर्जयेत् प्रार्थनादौतुयेदर्भानमस्कारेविसर्जयेत् ऊहमाह विष्णुः मातामहानामप्येवं श्राद्धंकुर्याद्विचक्षणः मंत्रोहेनयथान्यायं शेषाणांमंत्रवर्जितं यथान्यायमिति यत्रबहुवचनांतःपितृशब्दस्तत्रसर्वपितृवाचित्वान्नोहः तत्रापिशुंधंतांपितरइत्यत्रोहएव सर्वपितृवाचित्वेउत्तरमंत्रद्वयेवैयर्थ्यात् बहुवचनंतुनोह्यते प्रकृतावसमर्थत्वात्पाशानितिवत् ऋगंतेचनोहः तस्मादृचंनोहेदितिनिषेधात् एकोद्दिष्टेप्येवम् प्रेतैकोद्दिष्टेत्वेकवन्मंत्रानूहेनैकोद्दिष्टइति विष्णूक्तेरूहः अत्रबहुवचनस्याप्यूहोवचनात् वृद्ध्यादौतुविशेषंवक्ष्यामः शेषाणामितिपितृव्यादेकोद्दिष्टे आवाहनादिमंत्रवर्ज्यंकार्यमितिकल्पतरुः ऊहयोग्योपितृपदवान्मंत्रएवतत्रनप्रयोज्यः नतूहः नापिपितृपदरहितः प्रयोज्यइतिशूलपाणिः अर्थांतरंचोक्तंप्राक् बह्वृचकारिकापि अर्घ्यप्रदानमंत्रेतुमात्रादिपदमावपेत् शुंधंतामितिपित्रादौमात्रादिपदमावपेत्

मातृश्राद्धे पिंडदाने येचत्वामत्रान्वित्यत्र नोहइति वृत्तिकृत् तथा मातुः श्राद्धेप्यनूहेनकुर्यात् पिंडानुमंत्रणम् दशादानमुपस्थानं तद्वत्कार्यमिति स्थितिः प्रवाहणमनूहेन तद्वत्प्राशनमिष्यते तथा आयंतुनस्तिलोसीतिउशंतस्त्वेति यानितु अनूह्यः पितृशब्दोत्र पितृसामान्यवाचकः आपस्तंबानांतु वक्ष्यते हेमाद्रौ मार्कंडेयः स्नातः स्नातान्समाहूतान्स्वागतेनार्चयेत् पृथक् कलिकायां नारदीये प्रायश्चित्तविशुद्धात्मा तेभ्योनुज्ञां गृहीत्वाच दद्याद्धेम्रदलदंडार्थं हिरण्यं कुशमेवच तत्रैव संग्रहे तिथिवारादिकं ज्ञात्वा संकल्प्यच यथाविधि प्राचीनावीतिना कार्यं सर्वं संकल्पनादिकं संबंधं प्रथमं ब्रूयान्नामगोत्रे तथैवच वस्त्रादिरूपतांचापि स्वपितॄणामनुक्रमात् चंद्रोदये नारदीये श्राद्धार्थं समनुप्राप्तान्विप्रान्भूयो निमंत्रयेत् आपस्तंबस्तु पूर्वेद्युर्निमंत्रणं परेद्युर्द्वितीयं तृतीयमामंत्रणमित्याह यूयं समयानिमंत्रणीया इति निवेदनरूपं आद्यं तद्विधिमाह शौनकः गृहीत्वामुकसंज्ञस्यामुकगोत्रस्यचामुके श्राद्धेतु वैश्वदेवार्थं करणीयः क्षणस्त्वया इत्येवं श्राद्धकृद्ब्रूयादोंतथेति वदेत्तु सः श्राद्धस्य कर्ता संब्रूयात्तं प्राप्नोतु भवानिति स वदेत्प्राप्नवानीति इतरस्तु प्रति द्विजः देवे पार्वणे पुरूरवार्द्रवौ वाच्यौ पित्रादेरप्यनेनैव वृणीत विधिना द्विजान् ततः कर्ता बह्वृचोऽनाहिताग्निः पिंडपितृयज्ञं परिस्तरणादी आधानांतं कुर्यात् अर्धाधानिनोप्येवमिति प्रयोगपारिजाते परिशिष्टेच भाष्यकारमते आह्निकेप्येवम् वृत्तिकारमतेनेदम् हेमाद्रौ शंखः संमार्जितोपलिप्तेतु द्वारि कुर्वीत मंडले उदक्प्लवमुदीच्यं स्याद्दक्षिणं दक्षिणाप्लवम् व्यासः उत्तरे क्षतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान् दक्षिणे दक्षिणाग्रांस्तु सतिलान्विन्यसेत्कुशान् तत्रैव बोधायनः चतुरस्रं त्रिकोणंच वर्तुलं चार्धचंद्रकं

कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलम् तत्रैव लौगाक्षिः हस्तद्वयमिते कार्यं वैश्वदेविकमंडलम् दक्षिणे च चतुर्हस्तं पितॄणामपि शोधने कलिकायां संग्रहे तु प्रादेशमात्रं देवानां चतुरस्रं तु मंडलं त्यक्त्वा षडंगुलं तस्माद्दक्षिणे वर्तुलं तथेत्युक्तम् स्मृत्यंतरे गर्तः पंचांगुलो विप्रे जानुमात्रो महीभुजि प्रादेशमात्रो वैश्ये च साधिकः स तु शूद्रके तिर्यगूर्ध्वप्रमाणेन व्याख्यातो दैवपित्र्ययोः चतुरस्रं वर्तुलं च कथितं गर्तलक्षणम् पादप्रक्षालनप्रोक्तमुपवेश्यासने द्विजान् तिष्ठश्चेत्क्षालनं कुर्यान्निराशाः पितरो गता इति तत्समूलले मंडलाग्रे पृथक् ज्ञेयम् तत्र गोमये हेमाद्रौ भृगुः अत्यंतजीर्णदेहाया वंध्यायाश्च विशेषतः आर्ताया नवसूताया न गोर्गोमयमाहरेत् मात्स्ये अक्षताभिः सपुष्पाभिस्तदभ्यर्च्यापसव्यवत् विप्राणां क्षालयेत्पादानभिवंद्य पुनः पुनः प्रत्यङ्मुखस्थितः कुर्याद्विप्रपादाभिषेचनं तत्रैव भविष्ये प्रक्षालयेद्द्विजपादान् शंनो देवीरिति त्वृचा पृथ्वीचंद्रोदये वृद्धवसिष्ठः न कुशग्रंथिहस्तस्तु पाद्यं दद्याद्विचक्षणः कलिकायां संग्रहे ततः प्रक्षालयेत्पादौ भार्यासाधितवारिणा तथा श्राद्धकाले यदा पत्नी वामे नीरप्रदा भवेत् आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते तत्रैव नाधः प्रक्षालयेत्पादौ कर्ता पित्र्यादिकर्मसु पाद्यानंतरमर्घ्यमपि दद्यादिति हेमाद्रिः तत्रैव लौगाक्षिः मंडलादुत्तरे देशे दद्यादाचमनीयकं तत्रैव विधाय क्षालनं तेषां द्विराचमनमिष्यते स्वयं चापि द्विराचामेद्विधिज्ञः श्रद्धयान्वितः हेमाद्रौ नारदीये यत्राचमनवारीणि पादप्रक्षालनोदकैः संगच्छंते बुधाः श्राद्धमासुरं तत्प्रचक्षते हेमाद्रौ व्यासः सव्येनैवासनं धृत्वा दक्षिणेन दक्षिणं करं व्याहृतीभिः समस्ताभिरासनेषूपवेशयेत् समाध्वमिति चैवोक्त्वा दक्षिणं जानु संस्पृशन् आस्यतामिति तान् ब्रूयादासनं संस्पृशन्नपि हेमाद्रौ शातातपः द्वौ दैवेऽथर्वणो विप्रौ प्राङ्मुखावुपवेशये

त् पित्र्येतूदङ्मुखांस्त्रींस्त्वबह्वृचाध्वर्युसामगान् याज्ञवल्क्यः द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा यत्तुहेमाद्रौहारीतः दक्षिणाग्रदर्भेषुप्राङ्मुखान्ब्राह्मणान्भोजयेदुदङ्मुखान्नित्येके इतितन्मैत्रायणीयविषयम् प्राङ्मुखान्भोजयेदुदङ्मुखान्नित्येके इतितत्परिशिष्टात् विकल्पइतिहेमाद्रिः माधवीयेयमः भिक्षुकोब्रह्मचारीवाभोजनार्थमुपस्थितः उपविष्टेष्वनुप्राप्तःकामंतमपिभोजयेत् कौर्मे अतिथिर्यस्यनाश्नातिनतच्छ्राद्धंप्रचक्षते विप्रनियमोमाधवीये पवित्रपाणयःसर्वेतच्च मौनव्रतान्विताः उच्छिष्टोच्छिष्टसंस्पर्शंवर्जयंतःपरस्परं तत्रासनानिपृथ्वीत्वंद्रोदयेयमः आसनंकुतपंदद्यादितरद्वापवित्रकं हेमाद्रौचमत्कारखंडे पितॄणांघटितंहैमंराजतंवापिचासनम् येनताम्रमयंदत्तमासनंपितृकर्मणि सर्वेदिव्यासनारूढोनहिप्रच्यवतेदिवः हेमाद्रौनागरखंडे अयःशंकुमयंपीठंप्रदेयंनोपवेशने कलिकायांसंग्रहे क्षौमंदुकूलंनेपालमाविकंदारुजंतथा तार्णंपार्णंबृसींचैवविष्टरादिचविन्यसेत् अग्निदग्धान्यायसानिभग्नानिचविवर्जयेत् हेमाद्रौछागलेयः पश्चाद्भागादुपक्रम्यप्राच्यांपंक्तिर्यथाभवेत् दक्षिणासंस्थितात्त्वेषापितृणांश्राद्धकर्मणि पुलस्त्यः श्रीपर्णीवारुणीक्षीरीजंबुकाम्रकदंबकं सप्तमंवाकुलंपीठंपितॄणांदत्तमक्षयं संग्रहे शमीचकाश्मरीशल्लुःकदंबोवारुणस्तथा पंचासनानिशस्तानिश्राद्धेदेवार्चनेतथा कारिका द्वौदैवेप्राङ्मुखौपित्र्येत्रीन्विप्रानुदगाननान् पैठीनसिः कुतपःश्राद्धवेलायांश्रोत्रियोयदिदृश्यते आश्वलायनः नीवीवासोदशान्तेनस्वरक्षार्थंप्रबंधयेत् हृद्धयाज्ञवल्क्यस्तु दक्षिणेकटिदेशेतुतिलैःसहकुशत्रयं यत्तुकातीयम् नीवीकार्यादशागुप्तिर्वामकुक्षौकुशैःसहेति तद्वृद्धिश्राद्धे पितॄणांदक्षिणेपार्श्वेविपरीतात्तुदैविकइति

स्मृत्यंतरात् वामे दक्षिणे वेत्याचाराद्व्यवस्थेति मदनपारिजाते आचार्यः प्राणायामत्रयं कृत्वा गायत्रीस्मरणं तथा श्राद्धं कर्तास्मीति वदेद्विप्रैर्वाच्यं कुरुष्व च ब्राह्मे ततस्तिलान्गृहे तस्मिन्विकिरेद्धा प्रदक्षिणम् श्रद्धया परया युक्तो जपेदपहता इति स्मृत्यर्थसारे अपहता इति तिलान्विकीर्य उदीरतामित्यृचा प्रोक्षेत् पराशरः तद्विष्णोरिति मंत्रेण गायत्र्याचमय त्ततः प्रोक्षयेदन्नजातंतुशुद्ध्यादिशुद्धये हेमाद्रौ ब्रह्मांडे श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं गदाधरम् वस्वादींश्च पितॄन् ध्यात्वा ततः श्राद्धं प्रवर्तने देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः आदिमध्यावसानेषु त्रिरावृत्तं जपेद्बुधः पितरः क्षिप्रमायांति राक्षसाः प्रवदंति च तत्रैव स्कांदे तिला रक्षंत्वसुरान्दर्भा रक्षंतु राक्षसान् पंक्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः वसिष्ठः शुद्धवतीभिः कूष्मांडीभिः पावमानीभिश्च पाकादि प्रोक्षयेत् अथ देवार्चा तत्र प्रत्युपचारमाद्यंतयोरपो दद्यादित्युक्तवृत्तौ स्मृत्यर्थसारे च हेमाद्रौ ब्राह्मे आसनेष्वासनं दद्याद्वामे वा दक्षिणेपि वा पितृकर्मणि वामे च दैवे दद्यात्तु दक्षिणे प्रचेताः आसनेष्वासनं दद्यान्न तु पाणौ कदाचन धर्मोसीत्यथ मंत्रेण गृण्हीयुस्ते तु तान् कुशान् धर्मोसि विशिराजा प्रतिष्ठित इति मंत्रः गालवः दर्भानादाय हस्ताभ्यां गृहीत्वा दक्षिणे करे दैवे क्षणः क्रियतां तु निरंगुष्ठकरं ततः ओं तथेति द्विजा ब्रूयुस्ते प्राप्नोतु भवानिति कर्ता ब्रूयात्ततो विप्रः प्राप्नवानीति वै वदेत् पृथ्वीचंद्रोदये बृहन्नारदीये सर्वैर्दैवैश्च विश्वेषां देवानामिदमासनं दत्वेति प्रोच्य दद्याद्दैवे देवेक्षण इति क्षणं तच्च षष्ठ्या चतुर्थ्या वा कार्यमिति स एव ततोर्घ्यं कल्पयेदिति मन्वादयः शौनकजयंताभ्यामर्घ्यरहितस्य देवार्चनस्योक्तेः आश्वलायनानां दैवेर्घ्यदानं बोपदेवः तन्न परिशिष्टप्रयोगपारिजातविरोधात् वृद्धिश्राद्धे तु दैवेप्यर्घ्यं दद्यात् देवेभ्योपि पृथग्दद्या-

दित्याहार्घ्यंश्रुतिचोदनादितिशौनकोक्तेः अथार्घ्यपात्रं पृथ्वीचंद्रोदयेमात्स्यपाद्मयोः पात्रंवनस्पतिमयंतथापर्णमयंपुनः जलजंवापिकुर्वीततथासागरसंभवं ब्राह्मे सौवर्णताम्ररौप्याश्मस्फाटिकंशंखशुक्तयः भिन्नान्यपिहियोज्यानिपात्राणिपितृकर्मणि हेमाद्रौप्रजापतिः सौवर्णराजतताम्रखड्गमणिमयंतथा यज्ञियंचसमंवापि अर्घ्यार्थंपूरयेद्बुधः अत्रविप्रैकत्वद्वित्वचतुष्ट्वादावर्घ्यपात्रेद्वेएव मानवसूत्रेतुद्वेवैश्वदेविके त्रीणिपित्र्ये एकैकमुभयत्रचेत्युक्तम् तदेकविप्रपरं पात्रालाभपरंचेतिहेमाद्रिः मदनरत्नेतुदैवेएकपात्रमुक्तं पृथ्वीचंद्रोदयेपित्रीणिपैतृकपात्राणिद्वेद्वेवैश्वदेविकइतिबृहत्पराशरोक्तेर्द्वेएवेत्याह बह्वृचानांतुदैवेविप्रद्वित्वेप्येकमर्घ्यपात्रंअर्धशोदद्यादित्युक्तंपरिशिष्टप्रयोगपारिजातेच कलिकायांहारीतः दत्तमक्षय्यतांयातिखड्गेनार्घ्यंतुयत्कृतम् वृद्धमनुः मृन्मयंदारुजंपात्रमयःपात्रंचयद्भवेत् राजतंदैविकेकार्येशिलापात्रंचवर्जयेत् पुराणसमुच्चये मृन्मयंदारुजंपात्रमयःपात्रंचयद्भवेत् राजतंदैविकेकार्येशिलापात्रंचवर्जयेत् पुराणसमुच्चये मृत्स्नाभवंतथाकांस्यमामृक्तंजंतुसंभवम् त्रपुसीसलोहभवंसदापात्रंविवर्जयेत् तत्रैव अष्टांगुलंभवेत्पात्रंपितृणांराजतंशुभं दशांगुलंतुदेवानांसौवर्णंशक्तितःकृतं स्थापयेदर्घ्यपात्रेद्वेस्युअनंतरकुशोपरि द्वेद्वेपवित्रेविधिवत्पात्रयोश्चोपरिक्षिपेत् यज्ञपार्श्वः पवित्रेस्थेतिमंत्रेणपवित्रेछेदयेत्तुते ओषधीमंतरेकृत्वाअंगुष्ठांगुलिपर्वणोः स्फ्येनकाष्ठेनलोहेननमृन्मयनखादिभिः वसिष्ठः तूष्णींप्रोक्ष्यापसापत्रेकुर्यादूर्ध्वबिलेततः पूरयेत्पात्रयुग्मंतुकृत्वोपरिपवित्रके वृद्धपराशरः पात्रद्वयमथार्घ्यार्थंतैजसंचैकवस्तुनः प्राङ्मुखोमरतीर्थेनशन्नोदेव्योदकंक्षिपेत् यवोसीतियवांस्तत्रतूष्णींपुष्पाणिचंदनं मानवसूत्रेसुमनसःप्रक्षिप्यासूययवान्प्रक्षिप्ये

ति यवोसीतिमंत्रः पाद्मे यवोसिधान्यराजो वा वारुणो मधुमिश्रितः निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतः राज्ञो वा वारुणो मधुसंयु
तइति परिशिष्टपाठः गोभिलेन तु यवोसि सोमदेवत्यइति तिलमंत्रोत्र स्वाहायुक्त उक्तः हेमाद्रौ यमः यवहस्तस्ततो देवान्विज्ञाप्यावा
हनंप्रति आवाहयेत्यनुज्ञातो विश्वेदेवास इत्यृचा वृद्धपराशरः ततः सव्यकरं न्यस्य विप्रदक्षिणजानुनि देवानावाहयिष्येहमिति-
वाचमुदीरयेत् आवाहयेत्यनुज्ञातो विश्वेदेवास आगत विश्वेदेवाः शृणुतेममिति मंत्रद्वयं पठेत् श्राद्धविशेषे विश्वेदेवनामज्ञाने हे
माद्रौ बृहस्पतिः उत्पत्तिनामनैवैतेषां न विदुर्ये द्विजातयः अयमुच्चारणीयस्तैर्मंत्रः श्रद्धासमन्वितैः आगच्छंतु महाभागा विश्वेदेवा
महाबलाः ये अत्र विहिताः श्राद्धे सावधाना भवंतु ते इदं चावाहनमर्घ्यपात्रासादनात् प्राक् हेमाद्रिणोक्तम् तत्र कातीयैः प्राक्कार्यंत
थैव तत्सूत्रात् अन्ये त्वदुत्तरं पृथ्वीचंद्रोदये शंखः सयवपुष्पमादाय चरणादि शिरोंतकं अर्चतेत्यर्चनं कुर्यादंतरे चोदकं तथा
पिण्डेतु मूर्द्धादि पादांतं पादप्रभृति मूर्द्धांतं दैविके पूजनं भवेत् शिरःप्रभृति पादांतं नमोंक इति पैतृके इति मदनरत्ने प्रचेतसोक्तेः
कालिकायां संग्रहे तिष्ठन्कृतांजलिर्भूत्वा पठेन्मंत्रौ समाहितः विश्वेदेवाः शृणुतेइत्यागच्छत्वपरस्ततः हेमाद्रौ जातूकर्ण्यः त
तोर्घ्यपात्रसपन्नि वाचयित्वा द्विजोत्तमान् तदग्रेणार्घ्यपात्रं तु स्वाहार्घ्या इति विन्यसेत् गार्ग्यः दत्वा हस्ते पवित्रं च कृत्वा पूजां च पाद
तः या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत् संग्रहे विश्वेदेवा इदं वोर्घ्यमिति दानं समादिशेत् तदंते स्वाहा नम इति वाच्यम्
या दिव्या इति मंत्रेण स्वाहाकारं नमोंतकमिति हेमाद्रौ नागरखंडात् अथर्वणसूत्रे तु पाद्यमर्घ्यमाचमनीयमिति द्विजकरे निनये-
द्विलस्येव त्रयमुक्तं गभस्तिः अर्घ्यं च पिंडदानं च स्वस्त्यक्षय्ये तथैव च गंधपुष्पादिकं सर्वं हस्तेनैव तु दापयेत् प्रतिविप्रं या दिव्या

त्याहुतिः बह्वृचानां त्वनेन दत्तार्घ्यानुमंत्रणं ततः पात्रे देवेभ्यः स्थानमसीति न्युब्जमुत्तानं वा कार्यमिति गारुडे उक्तम् एतदापस्तंबा
नां नियतमन्येषां न हेमाद्रौ विष्णुधर्मे गंधैः पुष्पैश्च धूपैश्च वस्त्रैश्चाप्यथ भूषणैः अर्चयेद्ब्राह्मणान् शक्त्या श्रद्दधानः समाहितः पृ
थ्वीचंद्रोदये मार्कंडेयः चंदनागरुकर्पूरकुंकुमानि प्रदापयेत् विष्णुः चंदनकुंकुमकर्पूरागरुपद्मकान्यनुलेपनायति व्यासः अ
पवित्रकरो गंधैर्गंधद्वारेति पूजयेत् कलिकायां स्मृतिः गंधद्वारेति वै गंधमायनेते च पुष्पकं धूरसीत्यमुना धूपमुद्दीप्यस्वेति दीप
कं युवं वस्त्राणि मंत्रेण वस्त्रं दद्यात्प्रयत्नतः आसने स्वासनं ब्रूयादर्घ्ये स्वर्घ्यं द्विजोत्तमः सुगंधिश्च सुपुष्पाणि सुमाल्यानि सुधू
पकः सुज्योतिश्चैव दीपे तु स्वाच्छादनमिति क्रमः विप्राणां गंधेन वर्तुलं त्रिपुंड्रं वा न कार्यं हेमाद्रौ देवलः ललाटे पुंड्रकं दृष्ट्वा स्कं
धे मालां तथैव च निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिम् पुंड्रं वर्तुलमित्यपरार्के मदनरत्ने च पुंड्रं त्रिपुंड्रं वर्तुलमर्धचंद्रं च ऊ
र्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुंड्रकं ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणि निराशाः पितरो यांति दृष्ट्वा चैवं त्रिपुंड्रकमिति
वृद्धपराशरोक्तेः तिर्यग्लेपो भवत्येव वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा तिर्यग्वाप्यूर्ध्वपुंड्रं वा धारयेत्तु प्रयत्नत इति व्यासो
क्तेरिति पृथ्वीचंद्रः यत्तु नारदीये ऊर्ध्वपुंड्रं च तुलसी श्राद्धे नेच्छंति केचनेति तत्कर्तृकपरम् हेमाद्रौ ब्राह्मे सूतिकं मृगनाभिं
च रोचनं रक्तचंदनं कालेयकं तूग्रगंधं तुरुष्कं चापि वर्जयेत् कस्तूर्या विकल्प इति हेमाद्रिः वृद्धशातातपः पवित्रं तु करे कृत्वा यः
समालभते द्विजान् राक्षसानां भवेच्छ्राद्धं निराशैः पितृभिर्गतैः पुष्पं तु ब्राह्मे जातीचंपकलोध्राश्च मल्लिकाबाणबर्बरी चू २९
ताशोकाटरूषं च तुलसी शतपत्रकं कुब्जकं तगरं चैव भृंगमारण्यकेतकी यूथिकामतिमुक्तं च श्राद्धे योग्यानि भो द्विजाः कमलं

कुमुदंपद्मंपुंडरीकंचयत्नतः इंदीवरंकोकनदंकल्हारंचनिवेदयेत् हेमाद्रौवायुभविष्ययोः सुकुमारैःकिसलयैर्यवदूर्वांकुरैरपि
संपूजनीयाःपितरःश्रेयस्कामेनसर्वदा स्कांदे जातिश्चसर्वादातव्यामल्लिकाश्वेतयूथिका जलोद्भवानिसर्वाणिकुसुमानिचचं-
पकं तत्रैववृद्धमनुः ननियुक्तःशिखावर्ज्यंमाल्यंशिरसिधारयेत् वर्ज्यानिपृथ्वीचंद्रोदयेभविष्ये केतकीतुलसीपत्रंबिल्वप
त्रंचवर्जयेत् द्रोणंचकरवीरंच धत्तूरंकिंशुकंतथा माधवीयेस्मृत्यर्थसारेचतुलसीनिषिद्धा तुलसीनिषेधोनिर्मूलइतिहेमाद्रिः
समूलत्वेपिपिंडपरः तुलसीगंधमाघ्रायपितरस्तुष्टमानसाः प्रयांतिगरुडारूढास्तत्पदंचक्रपाणिनइतिप्रयोगपारिजातेपाद्मोक्ते-
रितिबोपदेवः वृद्धपराशरः नजातीकुसुमैर्विद्वान्बिल्वपत्रैश्चनार्चयेत् जपादिकुसुमंझिंटीरूषिकासकुरंटिका पुष्पाणिवर्जनी
यानिश्राद्धकर्मणिनित्यशः हेमाद्रौशंखः उग्रगंधीन्यगंधीनिचैत्यवृक्षोद्भवानिच पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच जलो
द्भवानिदेयानिरक्तान्यपिविशेषतः अंगिराः नजातीकुसुमानिदद्यान्नकदलीपत्रमिति जात्याविकल्पइतिहेमाद्रिः निषेधःपिं
डविषयः कुंदंशंभोर्वनोदद्यान्नोमत्तंगरुडध्वजे पिंडेजातीचनोदद्याद्देवीमर्केणनार्चयेदितिवृद्धयाज्ञवल्क्योक्तेरितिबोपदेवः
स्मृतिसारे अगस्त्यंभृंगराजंचतुलसीशतपत्रिका चंपकंतिलपुष्पंचषडेतेपितृवल्लभाः केतकींकरवीरंचबकुलंकुंदकंतथा पा
टलांचैवजातींचश्राद्धेयत्नेनवर्जयेत् केचित्पिंडेतुलसीमाहुः पितृपिंडार्चनंश्राद्धेयैःकृतंतुलसीदलैः प्रीणिताःपितरस्तेस्तुया
वच्चंद्रार्कमेदिनीतिमार्कंडेयोक्तेः धूपस्तत्रैवविष्णुधर्मे धूपस्तुगुग्गुलुर्देयस्तथाचंदनसारजः अगरुश्चसकर्पूरस्तुरुष्कस्त्वकृतथै
वच विष्णुः घृतमधुयुक्तंगुग्गुलुंश्रीखंडदेवदारुसरलादिदद्यादितितत्रैवदेवलः येहिप्राण्यंगजाधूपाहस्तवाताहताश्चये न

तेश्राद्धेनियोक्तव्यायेन्चकेन्चोग्रगंधयः घृतंनकेवलंदद्याद्दुष्टंवातृणगुग्गुलुं दीपमाहविष्णुः घृतेनदीपोदातव्यस्तिलतैलेनवापुनः वसा
मेदोद्भवंदीपंप्रयत्नेनविवर्जयेत् वस्त्रंब्राह्मे कौशेयंक्षौमकार्पासंदुकूलमहतंतथा श्राद्धेष्वेतानिनोदद्यात्कामानाप्नोतिचोत्तमान्
हेमाद्रौब्रह्मवैवर्ते यज्ञोपवीतंदातव्यंवस्त्राभावेविजानता पितृभ्योवस्त्रदानस्यफलंतन्नाप्नुतेखिलम् तत्रैवपाद्मे निष्क्रयोवा
यथाशक्तिवस्त्राभावेप्रदीयते अन्यान्यपिचदेयानितत्रैवकालिकापुराणे धात्वादिनिर्मितारम्यादीपिकाः श्राद्धकर्मणि पितॄनु
द्दिश्ययोदद्यात्सभवेद्भाजनंश्रियः योधूपदानपात्रंतुपात्रमारार्तिकस्यच दद्यात्पितृभ्यःप्रयतस्तस्यस्वर्गेक्षयागतिः विष्णुधर्मे यः
कंचुकंतथोष्णीषंपितृभ्यःप्रतिपादयेत् ज्वरोद्भवानिदुःखानिसकदाचिन्नपश्यति स्त्रीणांश्राद्धेतुसिंदूरंदद्युश्चंडातकानिचनि
मंत्रिताभ्यःस्त्रीभ्योयेतेस्युःसौभाग्यसंयुताः हेमाद्रावादित्यपुराणे नकृष्णवर्णंदातव्यंनापिकार्पाससंभवं पितृभ्योनापिम-
लिनंनोपयुक्तंकदाचन नच्छिद्रितंनापदशांनधौतंकारुणापिच कार्पासनिषेधोन्यसंभवे तत्रैव पितॄन्सत्कृत्यवासोभिर्दद्या
द्यज्ञोपवीतकं यज्ञोपवीतदानेनविनाश्राद्धंतुनिष्फलं एतद्यतिशूद्रस्त्रीश्राद्धेपिदेयमितिहेमाद्रिः तत्रैवनृसिंहपुराणे कम
डलुंताम्रमयंश्राद्धेषुप्रददातियः काष्ठेननिर्मितंवापिनारिकेलमथापिवा दद्यात्कमंडलुंश्राद्धेसः श्रीमानभिजायते योमृत्ति-
काविरचितान्श्राद्धेषुचघटान्शुभान् प्रदद्यात्करकान्वापिसोऽक्षयंविंदतेसुखं तत्रैव उपानच्छत्रवस्त्राणिभक्तिपात्रंक-
मंडलुं शयनासनयानानिदर्पणव्यजनानिच अन्नसुसंस्कृतंगंधांस्तांबूलंदीपचामरं पितृभ्योयःप्रयच्छेत्तुविष्णुलोकंसगच्छ- ३०
ति सौरपुराणे चामरंतालवृंतंचश्वेतच्छत्रंचदर्पणं दत्वापितॄणामेतानिभूमिपालोभवेदिह तत्रैवनंदिपुराणे अलंकाराःप्रदा

तव्यायथाशक्तिहिरण्मयाः केयूरहारकटकमुद्रिकाकुंडलादयः तथा स्त्रीश्राद्धेषुप्रदेयाः स्युरलंकारास्तुयोषिताम् मंजीरमेखलादामकर्णिकाकंकणादयः आदर्शव्यजनच्छत्रशयनासनपादुकाः मनोज्ञाःपटवासाश्च सुगंधाश्चूर्णदृष्टयः अंगारधानिकाःशीतेयोगपट्टाश्च दृष्टयः कटिसूत्राणिरौप्याणि मेखलाश्चैवकंबलाः कर्पूरादेश्च भांडानितांबूलायतनंतथा भोजनाधारयंत्राणिपतद्ग्राहांस्तथैवच तथांजनशलाकाश्च केशानांचप्रसाधनं एतान्दद्यात्तुयःसम्यक्सोऽश्वमेधफलंलभेत् स्कांदे सौवर्णराजतंवापि कांस्येनाप्यथनिर्मितं दत्वाभोजनपात्रंतुसम्राट्भवतिभूतले वामनपुराणे बंदीकृतास्तुयेकेचित्त्वयंवायदिवापरैः येनकेनाप्युपायेन यस्तान्मोचयतेनरः पितरस्तस्यगच्छंति शाश्वतंपदमव्ययं पराशरः वाचयेत्परिपूर्णंत वासोदत्वाविधानतः नारदीये देवैश्चसमनुज्ञातोयजेत्पितृगणंत्वथ तत्रपित्र्येआसनाद्यशेषमर्चनकांडेवैश्वदेविकंज्ञेयं विशेषस्तूच्यते तत्रासनेद्विगुणभुग्नाःकुशाः अत्रावाहनमासनात्पूर्वंवार्घ्यपूरणोत्तरंवाग्नौकरणोत्तरंवेतिस्मृतिषुपक्षाउक्ताः एषांशाखाभेदेनव्यवस्था द्वितीयपक्षएवबहुसंमतः तत्रार्घ्यमाश्वलायनः तैजसाश्ममयमृन्मयेषुत्रिषुपात्रेष्वेकद्रव्येषुवादर्भान्तर्हितेष्वपःप्रसिच्य शंनोदेवीरित्यनुमंत्र्यतिलानावपति तिलोसिसोमदेवत्योगोसवेदेवनिर्मितः प्रत्नवद्भिःप्रत्तस्स्वधयापितृनिमाल्लोकान्प्रीणयाहिनःस्वधानमइति अश्ममयंस्फाटिकादि मृन्मयंहस्तकृतमेव कुलालचक्रनिष्पन्नमासुरंदैविकंनतत् तदेवहस्तघटितंदैविकंकेवलंतथेतिछंदोगपरिशिष्टात् अन्यान्यपिपात्राणिपूर्वमुक्तानिमनुः अन्नाभावेद्विजाभावेयद्येकोब्राह्मणोभवेत् पात्राण्यासादयेत्त्रीणिनतुब्राह्मणसंख्यया दत्तकादेःकर्तुर्द्विपितृत्वादावपिवचनात् त्रीण्येवपात्राणीतिहरिहरः माधवीये बैजवापः अर्घ्येपितॄणांत्रीण्येवकुर्यात्सा-

त्राणि धर्मोपि च एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधि हेमाद्रावप्येवं अत्रानुमंत्रणं सकृत् तिलोसीत्यस्य मंत्रपाठमावृत्तिः पितृशब्दस्यानूहश्चेति हारि हृत् दर्भस्त्रिगुणं पवित्रं तिस्रःतिस्रः शलाकास्तु पितृपार्वणेषु पार्वणे एकोद्दिष्टे शलाकैकां निधायोदकमाहरेदिति हेमाद्रौ चतुर्विंशतिमतात् तथैव विष्णुः दक्षिणाग्रदर्भेषु दक्षिणापवर्गांश्च मसेषु पवित्रांतर्हितेष्वप आसिंचेच्छंनोदेवीरिति मंत्रेण जलसेचनं बह्वृचभिन्नविषयं अत्रास्मिन्पक्षे प्रतिपात्रं मंत्रावृत्तिः कारिकायाम् गंधपुष्पाणि चैतेषु पात्रेषु प्रक्षिपेदथ ब्राह्मे जलं क्षीरं दधि घृतं तिलतंडुलसर्षपान् कुशाग्रमधुपुष्पाणि दत्वाचामेत्ततः स्वयम् जातूकर्ण्यः ततोर्घ्यपात्रसंपत्तिं वाचयित्वा द्विजोत्तमान् तदग्रे चार्घ्यपात्राणि-स्वधार्घ्या इति विन्यसेत् ततस्तिलहस्तो विप्रसव्यजानो दक्षिणाकरं न्यस्यावाहनं पृच्छेत् अत्र गोत्रसंबंधनामानि द्वितीयांतत्वं च प्रागुक्तम् बैजवापगृह्ये तिष्ठन्पितॄनावाहयिष्यामीत्यामंत्र्य कौर्मे अपसव्यं ततः कृत्वा पितॄणां दक्षिणामुखः आवाहनं ततः कुर्यादुशंतस्त्वेत्यृचा बुधः आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः अत्र सव्यस्यापि प्रागुक्तेर्विकल्पः अत्राद्यमंत्रोहेत्या ऽस्मत्पितरममुकशर्माणममुकगोत्रं वसुरूपमावाहयामीत्युक्त्वा मूर्धादिपादांतं तिलान्विकीर्यायंतु न इति सर्वांते सकृज्जपेदिति निबंधाः अत्रोपवेशनसंवेशनपाद्यार्घ्याचमनीयान्यपि हेमाद्रिणोक्तानि तान्यथर्ववेदिनां नियतानि नान्येषां तेषां च प्रपितामहादिभिन्नतंत्रं प्रातिलोम्येन सर्वैः प्रयोगः वाराहे गंधपुष्पार्चनं कृत्वा दद्याद्धस्ते तिलोदकं गार्ग्यः शिरस्तः पादतो वापि सम्यगभ्यर्च्य चैत्ततः ततः स्वधार्घ्या इति पितृपितामहादिविप्राग्रप्रत्येकं निवेदयेदिति कारिकायाम् वृत्तोच आश्वलायनः प्रसव्येनेतरपाण्यंगुष्ठांतरेणोपवीती त्वा दक्षिणेन वा सव्योपगृह्य तेन पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्रपितामहेदं तेऽर्घ्यमित्यप पूर्वं ताः प्रतिग्राहयिष्यन् सकृत्सकृत्स्वधा अर्घ्या इति प्रसृष्टा अनुमंत्र

वीत यादिव्याआपः पृथिविसंबभूवुर्याअंतरिक्ष्याउतपार्थिवीर्याः हिरण्यवर्णायज्ञियास्तानआपःशंस्योनाभवंतु अर्घ्यादिप्रागंधादेर्यज्ञोपवीतमेव अर्घ्यदानात्प्रागन्या अपोदद्यात् यद्यप्यत्रसव्येनदक्षिणेनवार्घ्यंदद्यादित्युक्तं तथापिदक्षिणेनेत्यभिमतोर्थः कारिकायांतूक्तोचैवम् पित्रादेस्त्रिभिः पात्रैर्दद्यात् पितुःस्थानेविप्रत्रयंचेदेकार्घ्यंविभज्यदद्यात् त्रयाणांस्वधाअर्घ्याइतिसकृत्प्रश्नः एवंपैतामहादावपि अन्यजलदानमर्घ्यमंत्राश्चप्रतिविप्रमावर्तते तेषुगंधादौचप्रतिविप्रंपदार्थानुसमयः कांडानुसमयोवा पित्रादित्रयाणामेकविप्रपक्षेत्रिभिःपात्रैरेकस्यैवार्घ्यंदद्यादितिवृत्तिः कारिकापि स्वधार्घ्याइत्यपोर्घ्यास्त्वाउपवीतीनिवेदयेत् निवेदनात्प्राक्प्राचीनावीतमेवेत्यर्थः अर्घ्यंसशेषमादायदक्षिणेनतुपाणिना सव्यहस्तगृहीतेननिनयेत्पितृतीर्थतः दत्वादत्वानितीतास्तायादिव्यार्चानुमंत्रयेत् यत्तु यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेदिति यच्चवाराहे तिलांबुनाचापसव्यंदद्यादर्घ्यादिकंद्विजइति यच्चव्यासः गोत्रसंबंधनामानिपितृणामनुकीर्तयन् एकैकस्यतुविप्रस्यअर्घ्यपात्रेविनिक्षिपेदितितद्बह्वृचातिरिक्तविषयं ततआचामेत् एवंमातामहेष्वपि आश्वलायनः संस्रवान्समवनीयताभिरद्भिःपुत्रकामोमुखमनक्ति संस्रवशेषः संस्रवोहिपरिशिष्टोभवतीतिशतपथश्रुतेः केचित्तुहस्तगलितांबुवदंति समवनीयांस्थैर्पात्रेपितृपात्रेआसिच्येतिवृत्तिः प्रथमेपात्रेसंस्रवान्समवनीयेतिकातीयसूत्राच्च ब्राह्मेतुप्रतिबिंबावलोकनमुक्तं स्कांदेत्वायुःकामस्यनेत्रासेचनमुक्तं पित्र्याविप्रैःप्राङ्मुखस्यकर्तुरभिषेकःकार्यइतिकेचित् आश्वलायनः नोद्धरेत्प्रथमंपात्रंपितृणामर्घ्यपातितं आवृतास्तत्रतिष्ठंतिपितरः शौनकोब्रवीत् यावद्विप्रविसर्जनमितितुर्यपादेयमीयःपाठः अत्रवृत्तिः पितृपात्रंसमवनयनदेशान्नचालयेदाश्राद्धसमाप्तेः

यस्मात्तत्र तृतीयपात्रेणावृत्ताइति यद्वा प्रथमपात्रमेवन्यग्बिलंकुर्यादिति कामाभावेपीदमेवशेषप्रतिपादनं हेमाद्रौ कौर्मे संस्रवांश्चततः सर्वान् पात्रे कुर्यात्समाहितः पितृभ्यः स्थानमसीति न्युब्जं पात्रंनिधापयेत् शूलपाणौ यमस्तु पैतृकंप्रथमं पात्रंतस्मिन्पैतामहंन्यसेत् प्रपितामहंततोन्यस्यनोद्धरेन्नचचालयेदित्याह अथसंस्रवानानीयतृतीयेनाच्छाद्यन्युब्जीकुर्यादिति सर्वैकवाक्यतयार्थइतिकेचित् अत्रिः गंधादिभिस्तदभ्यर्च्यतृतीयेनापिधापयेत् पितृभ्यःस्थानमसीति शफ्चोदेशेर्चितेर्चयेत् अर्चनंन्युब्जीकृतेपितुल्यं न्युब्जमुत्तरतोन्यसेदिति प्रचेतसोक्तेः सर्वविप्रोत्तरतोन्यसेदिति हेमाद्रिकल्पतरू विप्रवामे इति हलायुधः कर्तुर्वामे इतिशूलपाणिः उत्तानं विवृत्तं वापिपितृपात्रंनतत्कुर्वेदित्युशनसोक्तेर्न्युब्जनंनैवसाधुः मातामहादिसंस्रवानपिपितृपात्रएवगृहीत्वाप्रयाजवत्तंत्रेण न्युब्जीकुर्यादिति शूलपाणिः एकोद्दिष्टेतूहेनन्युब्जनंनेति पितृभक्तौश्रीदत्तः यमोपि स्पृष्टमुत्तानमन्यत्रनीतमुद्घाटितंतथा पात्रंदृष्ट्वाव्रजंत्याशुपितरस्तंशपंतिच वैश्वदेवेउत्तानमितिमदनपारिजातः वैजवापः तस्योपरिकुशान्दत्वाप्रदद्याद्दैवपूर्वकं गंधपुष्पाणिधूपंचदीपंवस्त्रोपवीतके अत्रगंधादेर्दैवेपित्र्येचपदार्थानुसमयस्य याज्ञवल्क्योक्तकांडानुसमयेनविकल्पोज्ञेयः बह्वृचानांतुसूत्रेदेवानुक्तेः कांडानुसमयएव अत्रप्राचीनावीतीनामगोत्रसंबुद्ध्यायुक्तंप्रागन्यद्देववत्तदंतआचमनंच हेमाद्रौकालिकापुराणे निर्वर्त्यब्राह्मणादेशात्क्रियामेवंयथाविधि भाजनानिततोदद्यान्तुस्तशोचपुनःक्रमात् आदेशात्पात्राणिदद्यादित्यन्वयः तेनतत्रापिप्रश्नानुज्ञेज्ञेये तत्रैवब्राह्मे मंडलानिचकार्याणिनैवारैश्चूर्णकैःशुभैः गौरमृत्तिकयावापिभस्मनागोमयेनवा भृगुः भस्मनावारिणावापिकारयेन्मंडलंततः चतुःकोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु मंडलाकृतिवैश्यस्यशूद्रस्याभ्युक्षणंस्मृतं ३२

बह्वृचपरिशिष्टेतु दैवेचतुरस्रंपित्र्येवृत्तंमंडलंकृत्वाक्रमेणसयवान्सतिलांश्चदर्भान्दद्यादित्युक्तं मार्कंडेयः यातुधानाःपिशाचाश्चक्रूरायेचैवराक्षसाः हरंतिरसमन्नस्यमंडलेनविवर्जितं हेमाद्रौहारीतः भूमावेवनिदध्यान्नोपरिपात्राणीति तानिचहेमाद्रावत्रिराह भोजनेहैमरौप्याणिदैवेपित्र्येयथाक्रमं हारीतः राजतपार्णताम्रकांस्यपात्राणिभोजनेइति तत्रैववाराहे सौवर्णानीहरौप्याणिकांस्यानितदसंभवे अन्यान्यपिहिकार्याणिदारुजान्यपिजानता नायसान्यपिकार्याणिपैत्तलानिनतुक्वचित् नचसीसमयानीहशस्यंतेत्रपुजान्यपि अत्रिः पंचाशत्पलिकंकांस्यंह्यधिकंभोजनायवै गृहस्थैस्तुसदाकार्यमभावेहैमरौप्ययोः पालाशेभ्योविनास्युःपर्णपात्राणिभोजने पृथ्वीचंद्रस्तु कांस्यपात्रेहविर्दद्यान्निराशाःपितरोगताइतिब्राह्मोक्तेः कांस्यपात्रनिषेधमाह बोपदेवस्तुस्मृतिसंग्रहमुदाजहार श्राद्धेपलाशपात्राणिमधुकोदुंबराणिच पारिकाकुटजप्लक्षक्रकचानिक्रमाज्जगुः कदलीचूतपनसजंबुपुन्नागचंपकाः अलाभेसुरत्वपात्राणांग्राह्याःस्युःपितृकर्मणीति हेमाद्रौतुकदलीपात्रनिषेधमाहांगिराः नजातीकुसुमानिदद्यान्नकदलीपत्रमिति क्रतुः असुराणांकुलेजातारंभापूर्वपरिग्रहे तस्यदर्शनमात्रेणनिराशाःपितरोगताः एवंपात्राण्यासाद्यभस्ममर्यादांकृत्वाविप्रहस्तशोधनंकुर्यात् तत्रपिशंगरक्षाणोइतिमंत्रद्वयंकेचित्पठंति मात्स्ये अकृत्वाभस्ममर्यादांयःकुर्यात्पाणिशोधनं आसुरंतद्भवेच्छ्राद्धंपितृणांनोपतिष्ठते तत्रैवब्रह्मांडे प्रक्षाल्यहस्तपात्रादिपश्चादद्भिर्विधानवत् प्रक्षालनजलंदर्भैस्तिलैर्मिश्रांक्षिपेच्छुचौ मंडलोपरीतिहेमाद्रिः अथाग्नौकरणं हेमाद्रौमार्कंडेयः आहिताग्निस्तुजुहुयाद्दक्षिणाग्नौसमाहितः अनाहिताग्निश्चौपासनेऽग्न्यभावेद्विजेप्सुवा वायवीये आहृत्यदक्षिणाग्निंतुहोमार्थंवैप्रयत्नतः अग्न्यर्थंलौकिकंवापिजुहुयात्कर्मसिद्धये

आहिताग्निः सर्वाधानी अर्धाधानीतु गृह्य एवेति चंद्रिकापरार्कमिताक्षरामाधवादयः तस्यापि दक्षिणाग्नौ लौकिको गृह्य इति हेमाद्रिः कल्पतरुश्च आद्यपक्षएवतुयुक्तः बहुसंमतश्च यद्यपिस्मार्ताग्नौ करणंश्रौतेदक्षिणाग्नौनयुक्तं तथापिवचनाद्भवतीति हेमाद्रिचंद्रिकादयः इदंदर्शश्राद्धएव आब्दिकादिषुतु सर्वाधानीपाणौ अर्धाधानीगृह्येकुर्यादिति हेमाद्रिमाधवादयश्च पक्षांतं कर्मनिर्वर्त्य वैश्वदेवंचसाग्निकः पिडयज्ञंततः कुर्यात्ततोन्वाहार्यकंबुधइति लौगाक्ष्यादिभिः क्रमोक्तेर्विहृतदक्षिणाग्निसत्वात् अतएवात्रवचनेसाग्निकः आहिताग्निरुक्तोहेमाद्रिणा एतदापस्तंबादीनामेव आश्वलायनस्याहिताग्नेः पाणावेवेतिवृत्तिः अर्धाधानिनः गृह्ये एवव्यतिषंगेणेतिप्रयोगपारिजाते परिशिष्टेच बोपदेवस्त्वाह होमशब्दः पिंडपितृयज्ञपरः पितृयज्ञेतुजुहुयाद्दक्षिणाग्नौसमाहितः श्राद्धेत्वौपासनाग्नौतुनिरग्निर्लौकिकेनले अनग्निर्दूरभार्यश्च पार्वणेसमुपस्थिते संधायाग्निंततः कुर्याद्धोममग्निंसमुत्सृजेदिति त्रिकांडमंडनोक्तेः श्राद्धे गृह्याग्नावेवेति लौकिकाग्न्यादिविधानंच तैत्तिरीयादिविषयं बह्वृचस्य त्वनग्नेरपिपाणिहोमएव अग्निपाणिं विनासूत्रेविधानांतरानुक्तेः अग्न्यभावेतुविप्रस्यपाणावेवोपपादयेदितिमनूक्तेश्च वृत्तावप्येवं क्वचित्साग्नेरपिपाणिहोमउक्तो गृह्यपरिशिष्टे अन्वष्टक्यंचपूर्वेद्युर्मासिमास्यथपार्वणं काम्यमाभ्युदयेष्टम्यामेकोद्दिष्टेतथाष्टमं चतुर्ष्वाद्येषुसाग्नीनां वह्नौहोमोविधीयते पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्ष्वपीति एकोद्दिष्टंसपिंडीकरणंशूद्रेतन्निषेधात् बह्वृचभाष्यकारास्तुसर्वैकोद्दिष्टेषुपाणिहोममाहुः इदंबह्वृचानामेव अत्रेदंतत्वम् स्थालीपाकेनसहपिंडार्थमुद्धृत्येतिसूत्रेनान्यापूर्वः स्थालीपाकश्चोद्यते सर्वश्राद्धेषुप्रसंगात्तेनानुवादोयमिति वृत्तिकारोक्तेः पार्वणेआर्थिकस्यानंगस्यव्यतिषंगस्यवार्षिकादिष्वनतिदेशादर्धाधानिनोपिपा

णिहोमएवेतिवृत्तिस्वरसः एवंमासिकादावपि षोडशेमासिकेश्राद्धेसपिंडीकरणेतथा पाणावेवतुहोतव्यमन्यत्राग्नौतुहूयते इतिबोपदेवोदाहृतवचनाच्च भाष्यकारमतेतु सूत्रेस्थालीपाकेनेतिकरणत्वान्नित्यवच्छ्रवणाच्चपार्वणेसांगं ततःकाम्यादिषुतदभावेकार्यस्यपिंडदानस्याप्यभावः एतदेवानुसृत्यविकृतावपिवार्षिकादौव्यतिषंगउक्तः प्रयोगपारिजातेपरिशिष्टेच तेनैतन्मतेऽर्धाधानिनोग्नावेव वस्तुतस्तुस्थालीपाकेसहशाखयाप्रस्तरंप्रहरतीतिवत्सहभावमात्रश्रुतेः पत्नीवतेत्वङ्गरूपलक्षणमिवनांगत्वम् तत्त्वेवानांगानुरोधेनप्रधानभूतपिंडदानत्यागोयुक्तः तेनव्यतिषंगाभावेप्यग्नौहोमोभवतीतिबोपदेवः अनाहिताग्नेर्गृह्याग्निमतस्तुसर्वमतेग्नावेव वार्षिकादौवृत्तिमतेव्यतिषंगोन अन्यमतेत्वस्ति अत्रयथाचारमनुष्ठेयं. आश्वलायनः उद्धृत्यघृताक्तमनुज्ञापयत्यग्नौकरिष्ये करवैकरवाणीतिवाप्रत्यनुज्ञाक्रियतांकुरुष्वकुर्वित्यथाग्नौजुहोतियथोक्तंपुरस्तादिति व्यतिषंगपक्षेइदमितिवृत्तिः करवैकरवाणीत्यत्राग्नावित्यनुषंगः पुरस्तात्पिंडपितृयज्ञे तच्चैवं मेक्षणेनावदायावदानसंपदाजुहुयात्सोमायपितृमतेस्वधानमोग्नयेकव्यवाहनायस्वधानमइतिस्वाहाकारेणवाग्निपूर्वंयज्ञोपवीतीमेक्षणमनुप्रहृत्येति अवदानसंपदाउपस्तरणाद्यपेक्षयेत्यर्थः व्यतिषंगपक्षे अतिप्रणीतेयंहोमोन्यथामुख्ये अतिप्रणीतेग्नाविध्ममुपसमाधायेतिबह्वृचपरिशिष्टात् केचित्तस्यरक्षोनिबर्हणार्थत्वान्मुख्येवदंति तदेतद्विरोधाच्चिंत्यम् प्रयोगपारिजातेप्येवम् शौनकः स्वाहाकारेणहोमस्तुभवेद्यज्ञोपवीतवान् तत्रप्रागग्नयेहुत्वापश्चात्सोमायहूयते अग्नौयज्ञोपवीत्येवप्रक्षिपेन्मेक्षणंततः छंदोगपरिशिष्टे अग्नौकरणहोमश्चकर्तव्यउपवीतिनाअपसव्येनवाकार्योदक्षिणाभिमुखेनच कातीयानांत्वपसव्यमेवपिंडपितृयज्ञवत् हुत्वेतिसर्वातिदेशात् सव्यंतुछंदोगपरम् गो

भिलेनेतदुत्तरमेवापसव्योक्तेः छंदोगाजुहुयुः सव्येनापसव्येन याजुषा इति वृद्धयाज्ञवल्क्योक्तेश्च अथ पाणिहोमः आश्वलाय
नः अभ्यनुज्ञायां पाणिष्वेवेति पिंडपितृयज्ञकल्पाभावेनाग्न्यभावे काम्यादिष्वित्यर्थः तेन बह्वृचानामेकोद्दिष्टे पाणिहोमोप
वृत्त्येव निषेधोऽन्यपरः पाणिष्विति बहुवचनात्सर्वविप्रपाणिषु होम इति वृत्तिः एवं मातामहेपि शौनकोपि सर्वेषामुपविष्टा
नां विप्राणामथ पाणिषु विभज्य जुहुयात्सर्वं सोमायेत्यादिमंत्रतः यत्तु हेमाद्रौ कात्यायनः पित्र्ये यः पंक्तिमूर्धन्यस्तस्य पाणा-
वनग्निकः हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेदिति बह्वृचातिरिक्तानां यत्तु तत्रैव मात्स्ये अग्न्यभावे तु विप्रस्य पाणौ वाथ-
जलेपि वा अजकर्णेऽश्वकर्णे वा गोष्ठे वाथ शिलांतिक इति तत्तीर्थश्राद्धविषयं तद्यदापांसमीपे स्याच्छ्राद्धं ज्ञेयो विधिस्तदेति
तत्रैव कात्यायनोक्तेः निर्जले जकर्णादौ यत्तु चंद्रोदये यमः देवविप्रकरेनग्निः हुत्वाग्नौ करपां द्विज इति तदभार्यपरम् अप
त्नीको यदा विप्रः श्राद्धं कुर्वीत पार्वण पित्र्यविप्रैरनुज्ञातो विश्वेदेवेषु हूयत इति तत्रैव कात्यायनोक्तेः हूयत इति छांदसो व्यत्ययः हे
माद्रौ वायवीये विधुरो दैविके कुर्याच्छेषं पित्र्ये निवेदयेत् देवविप्रानेकत्वे तत्रैव विश्वेदेवे यदेकस्मिन् भवेयुर्बह्वोदयो द्विजाः ते
देकपाणौ होतव्यं स्याद्विधिर्विहितस्तदा सोप्याद्यः प्रथमं वा नियम्येतेति न्यायात् तेन मृतभार्यस्य दैवे होमः अनुपनीत ब्रह्मचार्या
देस्तु पित्र्ये अग्न्यभावः स्मृतस्तावद्यावद्भार्यां न विंदतीति हेमाद्रौ जातूकर्ण्योक्तेः सभार्यस्य नष्टाग्नेरपि पित्र्यविप्रकरे इति पृथ्वीचं
द्रः उपवीतित्वे दैवे होमः प्राचीनावीतेन पित्र्ये यद्वा सर्वत्र दैवपित्र्यकरयोर्विकल्प इति हेमाद्रौ मदनरत्ने पारिजाते च यदा तु पि
तृमातामहयोर्दैवपित्र्यविप्रभेदस्तदा भेदेन पाणिहोम इत्यपरार्कचंद्रिकादयः यदा तु दैवं तंत्रेनदा तंत्रेण सकृदेव पाणिहोम इति

केचित् हेमाद्रिस्तु मातामहस्यभेदेपिकुर्यात्तंत्रेणसाग्निकइतिकातीयस्मृतेर्भेदमाह एवंपित्र्येपि माधवीयेप्येवं एवंसाग्नेरपि विदेशादौपाणिहोमोज्ञेयः यत्तुकर्केणाग्निंविनाश्राद्धमेवनास्तीत्युक्तम् तत्सपिंडीकरणवार्षिकाद्यकरणापत्तेर्यत्किंचिदेव यतुबृहन्नारदीये अनग्निर्दूरभार्यश्चपार्वणेसमुपस्थिते भ्रातृभिः कारयेच्छ्राद्धं साग्निकैर्विधिवद्द्विजाः क्षयाहादिवसेप्राप्तेस्वस्याग्निर्दूरगोयदि तथैवभ्रातरः स्युश्चेल्लौकिकाग्नावितिस्थितिः औपासनोग्नौदूरस्थेसमीपेभ्रातरिस्थिते यद्यग्नौजुहुयाद्वापिपाणौवासहिपातकी औपासनाग्नौदूरस्थेकेचिदिच्छंतिसत्तमाः पाणावेवतुहोतव्यमितिनेतत्समंजसं तद्वचनादरादुपेक्ष्यम् हेमाद्रौयमः अग्नौकरणवत्तत्रहोमोविप्रकरेभवेत् पर्युक्ष्यदर्भानास्तीर्ययतोह्यग्निसमोद्विजः मेक्षणेनकरेणवाहोमः मेक्षणप्रहरणंनेतिवृत्तिः स्मृतिरत्नावल्याम् नानुज्ञापाणिहोमेस्यान्नस्तःपर्यूहनोक्षणे नाग्नेनसमिद्यादितिच्चनस्यात्तामिध्ममेक्षणे कर्काचार्योप्येवमाह माधवीयेचंद्रिकायांचानुज्ञादिसर्वंभवतीत्युक्तं पाणिहोमेप्यग्न्याद्याहापरार्के शौनकः अनग्निश्चेदाज्यंगृहीत्वाभवत्स्वेवाग्नौकरणमितिपूर्ववत्तथास्त्विति आश्वलायनः यदिपाणिष्वाचांतेष्वन्यदन्नमनुदिशत्यन्नमन्नेसृष्टंहुतमक्षवमिति पाणौहुतंपात्रेनिधायविप्रैराचम्यभोजनार्थमन्नेपरिविष्टेहुतशेषंपात्रेषुदद्यादित्यर्थः सृष्टप्रभूतं नैमित्तिकंचेदमाचमनेनहुतभक्षणनिमित्तम् अन्नंपाणितलेदत्तंपूर्वमश्नंत्यबुद्धयः पितरस्तेनतृप्यंतिशेषान्नंनलभंतिते यच्चपाणितलेदत्तंयच्चान्यदुपकल्पितं एकीभावेनभोक्तव्यंपृथग्भावोनविद्यतेइतिबह्वृचपरिशिष्टात् हेमाद्रावप्याचमनेहेत्वर्थवादउक्तः पाण्यास्योहिद्विजःस्मृतइति प्राच्येत्वाचांतेषुभक्षितेषुचसुभक्षणेभक्षणोत्तरंचनाचमनं अग्निसाम्यात् पूर्वनिषेधस्तुसपिंडीकरणेज्ञेयः ददा

ग्निचोदितत्वात् नत्वग्नजुहोतिचोदितत्वादित्युक्तं नत्वेतद्बहुसंमतं यत्तु बोधायनेन तस्मिंस्तु प्राशिते दद्याद्यदन्नं प्रकृतं भवे-
दिति भक्षणमुक्तं तत्तच्छाखीयानामेवेति हेमाद्रिः तत्रैव यमः पित्र्ये पाणिहुताच्छेषं पितृपात्रेषु निक्षिपेत् अग्नौकरणशेषं
तु न दद्याद्वैश्वदेविके एतदग्निहोमेपि समं तथा कर्कस्तु सूत्रे हुतशेषं दत्वेत्यविशेषात् सर्वविप्रेषु दद्यादित्याह तत्रैव वृद्धवसिष्ठः
पित्र्ये विप्रकरे हुत्वा शेषं पात्रेषु निक्षिपेत् पिंडेभ्यः शेषयेत्किंचिन्न दद्याद्वैश्वदेविके अथापस्तंबानां सूत्रे उद्ध्रियतामग्नौ च क्रिय-
तामित्यामंत्रयते काममुद्ध्रियतां काममग्नौ च क्रियतामित्यतिसृष्ट उद्धरेज्जुहुयाच्च नष्टाग्निविधुरादेर्विशेषो ब्रह्मनारदीये नष्टाग्नि
दूरभार्यश्च पार्वणे समुपस्थिते संधायाग्निं ततो होमं कृत्वा तं विसृजेत्पुनः अयाश्चेति तत्कालेग्निं संधाय हुत्वा सृजेदित्यर्थः एतदाप-
स्तंबानामेव पाणिहोमस्तु छंदोगादीनां विश्वप्रकाशेपि साग्निरौपासनेनाग्निरग्नौ कुर्वीत लौकिके पाणौ होमं प्रशंसंति नत्वापस्त
बशाखिनां स्नातका विधुरा वा स्युर्यदि वा ब्रह्मचारिणः अग्नौकरणहोमं तु कुर्युस्ते लौकिकेनले अयाश्चाग्नेमनोज्योतिरुद्बुध्य
व्याहृतीर्हुनेत् ततोनुज्ञातोग्नीधनाद्याज्यभागांते यन्मे मातेत्याद्यैर्जुहुयात् तत्र समाम्नाहुतयः षडाज्यस्येति त्रयोदश व्यत्ययो-
वा यथा यन्मे माता प्रलुलोभ तन्मे रेतः पिता वृंक्तां यास्ति षंतीति द्वाभ्याममुष्मै स्वाहेति पितुर्नाम्ना द्वौ होमौ यन्मे पितामही प्रलुलो-
भ तन्मे रेतः पितामहो वृंक्तामंतर्दधे इति तन्नाम्ना पितामहाय द्वौ यन्मे प्रपितामही प्रलुलोभ तन्मे रेतः प्रपितामहो वृंक्तामंतर्द
धे ऋतुभिरिति तन्नाम्ना प्रपितामहाय द्वौ मातामहेषु तूहः यन्मे मातामही तन्मे मातामहो वृंक्तां अन्यमातामहाद्वृन्द्वमित्यादौ य
न्मे मातुः पितामही प्रलुलोभ तन्मे रेतो मातुः पितामहो वृंक्तां अन्यं मातुः पितामहाद्वृन्द्वम् यन्मे मातुः प्रपितामही प्रलुलोभ तन्मे रेतो

मातुःप्रपितामहोद्युक्तं अन्यं मातुःप्रपितामहाद्युक्तं सर्वत्राप्यमुष्मा इत्यत्र ङेन्तं तन्नाम योज्यम् तद्गृह्यसंग्रहे योज्यः पित्रादिशब्दानां स्थाने मातामहादिकः अन्नहोमे तथा स्पर्शे जलपिंडादिदानके यन्मे मातामहीत्यादि तत्रोदाहरणं भवेत् ततो ये केचेत्येकान्नाहुतिः ततः स्वाहा पित्र्ये इत्याद्यैराज्यं हुत्वा स्विष्टकृतं हुत्वा सर्वभक्ष्यं किंचिदादायोदगुद्धां भस्मापोह्य तत्र तूष्णीं स्वाहाकारेण जुहोति परिषेचनान्तं स्थालीपाकवत् अयमग्नौकरणहोमो मासिकश्राद्ध एव तच्च स्मार्तानामन्यभावेन कार्यमिति केचित् कार्यमेवेति बह्वृचः अतएव सर्वाधानिनो होमवर्जं मासिकश्राद्धमुक्तं सुदर्शनभाष्ये महालये तद्वदित्येके प्रकरणान्तरत्वात् कर्मान्तरत्वेन स्मार्तपार्वणवत्कार्यमिति त्वस्मद्गुरवः आब्दिकादिषु तु स्मार्तपार्वणविधिरेव एवं मातृवार्षिकादिषु मासिश्राद्धविकृतावष्टकायां मातृश्राद्धे वैकृतहोमेन प्राकृतहोमबाधः अन्वष्टकाख्यमातृश्राद्धं नेति भाष्ये तत्रापि श्राद्धान्तरवत् क्रियमाणे तु यन्मे मातेत्यादौ गुणत्वेपि मातृप्राधान्यं विवक्षितं मासिश्राद्धेन कल्पो व्याख्यात इति सूत्रात् आग्नेय्येव मनोता कार्येति वचनात् अभिशब्दस्येव वैकृतदेवताभिधायित्वम् तेनामुष्या इत्यत्रामुकशर्मण्या पितृभ्यामित्याद्यूहः कार्यः तच्च मासिश्राद्धं जीवत्पित्रादिना व्युत्क्रममृतपित्रादिना च कार्यमित्युक्तं सुदर्शनभाष्ये तत्प्रकारस्तु वक्ष्यते मातापित्रोर्द्वित्वादौ तु नोहः तस्मादूर्ध्वं नोहेदिति निषेधात् प्रकृतावूहाभावाच्च पत्नीसन्नह्येतिवत् उपदेशिमते तूहः यथा यन्मे मातरो प्रलुलोभतुश्चरत्योधनतुव्रते इत्याद्यस्मत्पितृकृत मासिश्राद्धनिर्णये ज्ञेयमिति दिक् अन्यत्प्राग्वत् अथ परिवेषणं तच्चोपवीत्येवाज्येन देवपूर्वमासाद्यपक्वमिति पात्राण्युपस्तीर्य कुर्यादिति हेमाद्रिः भारते दानधर्मेपि आज्याहुतिं विना नैव यत्किंचित्परिविष्यते दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः तत्रैव-

शौनकः विधिनादेवपूर्वंतुपरिवेषणमाचरेत् तत्रैवधर्मः फलस्यानंततांप्रोक्तास्वयंचपरिवेषणे तत्रैववायुभविष्ययोः भार्ययाश्राद्धकालेतुप्रशस्तंपरिवेषणं ब्रह्मांडे नापवित्रेणनैकेनहस्तेननविनाकुशम् नायसेनायसेनैवश्राद्धेतुपरिवेषयेत् वसिष्ठः आयसेनतुपात्रेणयदन्नंसंप्रदीयते भोक्ताविष्ठासमंभुंक्तेदाताचनरकंव्रजेत् पैठीनसिः सीसकायसरीतीपात्राण्ययज्ञियानि तत्रैवहारीतः सौवर्णराजताभ्यांचखड्गेनौदुंबरेणवा दत्तमक्षय्यतांयातिफल्गुपात्रेणवापुनः कार्ष्णाजिनिः दर्व्यादेयंघृतंचान्नंसमस्तव्यंजनानिच उदकंचैवपक्वान्नंनोदर्व्यातुकदाचन यमः पंक्त्यांविषमदातुश्चनिष्कृतिर्नैवविद्यते पृथ्वीचंद्रोदयेपराशरः सर्वदाचतिलाग्राह्याःपितृकृत्येविशेषतः भोज्यपात्रेतिलान्दृष्ट्वानिराशाःपितरोगताः चंद्रिकायांवृद्धशातातपः हस्तदत्तास्तुयेस्नेहालवणव्यंजनादयः पितृणांनोपतिष्ठति भोक्ताभुंजीतकिल्बिषं घृतपात्रेविशेषोग्रंथांतरे ओदनेपरमान्नेचपात्रमांसाद्यमुग्धधीः घृतेनपूरयेत्पात्रंतद्दत्तंरुधिरंभवेत् घृतादिपात्राणिभूमौस्थापयेन्नभोजनपात्रइतिमदनरत्ने संग्रहे हस्तदत्तंतुनाश्नीयाल्लवणव्यंजनादिकम् अपक्वंतैलपक्वंचहस्तेनैवप्रदीयते पात्रालंभनमुक्तंचतुर्विंशतिमते उत्तानंदक्षिणंसव्यंनीचंपात्रापद्युपस्पृशेत् याज्ञवल्क्यः दत्त्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणम् कृत्वेदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशयेत् बौधायनः विप्रांगुष्ठेनानखेनानुदिशति पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽमृतेऽमृतंजुहोमि ब्राह्मणानांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिमामेपितृणांक्षेष्ठा अमुत्रामुष्मिंल्लोकेइति अद्यजुहोम्यग्नेस्वाहाशब्दःकातीयसूत्रेउक्तः मैत्रैःस्वधाशब्दः अंगुष्ठविशेषमाहहेमाद्रौधौम्यः परिवृत्त्यनखांगुष्ठंद्विजस्यान्नेनिवेशयेत् सं

था उत्तानेनतुहस्तेनद्विजांगुष्ठनिवेशनं यःकरोतिद्विजोमोहात्तद्वैरक्षांसिभुंजते तत्रैवयमः विष्णोर्हव्यंचकव्यंच ब्रूयाद्रक्षस्वचक्रमात् दैवेपित्र्येचेत्यर्थः तत्रैवात्रिः संबंधनामगोत्राणि इदमन्नं ततःस्वधा पितृकर्मादुदीर्येति स्वसत्तांविनिवर्तयेत् हस्तेनाक्रम्यमन्नाद्यमिदमन्नमुदीरयेत् अत्रान्नदानेचतुर्थी स्यादित्यादिविशेषाःपूर्वमुक्ताः अत्र पूर्वोक्तमंत्रांते पुरूरवाद्रवसंज्ञकाविश्वेदेवादेवता इदमन्नंसपरिकरं हव्यंअयं ब्राह्मणस्त्वाहवनीयार्थे दत्तं दास्यमानंचातृप्तेः गयेयभूः गदाधरोभोक्ता इदमन्नं ब्रह्मसौवर्णपात्रस्थमन्नमक्षय्यवटच्छायास्थं अमुकेभ्योविश्वेभ्योदेवेभ्य इदमन्नममृतरूपंपरिविष्टं परिवेक्ष्यमाणंचातृप्तेः स्वाहानमोनमेति बह्वृचपरिशिष्टहेमाद्र्याद्यनुमतःप्रयोगः एवंपित्र्ये अमुकगोत्रवसुरूपादितत्तन्नामज्ञेयम् ततोयेदेवासइतिदेवे येचेहपितरइतिपित्र्ये केचिज्जपंति ततोछिद्रंवाचयेत् तत्रैवप्रचेताः आपोशानकरे विप्रे संकल्प्याच्छिद्रभाषणात् निराशाःपितरोयांतिदेवैःसहनसंशयः पारस्करः संकल्प्यपितृदेवेभ्यः सावित्रीमधुमज्जपः श्राद्धेनिवेद्यापोशानंजुषध्वेषोप्रभोजनं निवेद्येतिब्रह्मार्पणंकृत्वेत्यर्थः अतएवबृहन्नारदीयेन्नत्यागमुक्त्वोक्तं दत्तंहविश्चतत्कर्मविष्णवेवैसमर्पयेदिति यत्तुकृत्यरत्ने कार्ष्णाजिनिः अपसव्येनकर्तव्यंपितृकृत्यमशेषतः अन्नदानादृतेसर्वमेवंमातामहेष्वपि तच्च ब्रह्मार्पणंब्रह्महविः हरिर्दातान्नतुभिश्चेति केचित्पठंति धर्मप्रदीपे ततोन्नंपितृदेवेभ्यः संकल्प्यच यथाविधि दत्तंयद्दास्यमानंच आतृप्तेर्नममेतिच नथा श्राद्धीयान्नस्यसंकल्पोभूमावेवप्रदीयते हस्तेषुदीयमानंतुपितृणांनोपतिष्ठते वैश्वदेवस्यवामेतुपितृपात्रस्यदक्षिणे संकल्पोदकदानेस्यान्नित्यश्राद्धेयथारुचि प्रचेताः आपोशानंप्रदायाथसावित्रींत्रिर्जपेदथ मधुवाताइतित्र्यृचंमध्वित्येतत्त्रिकं

तथा मिताक्षरायांपारस्करः संकल्प्यपितृदेवेभ्यः सावित्रीमधुमज्जपः श्राद्धंनिवेद्यापोशानंजुषमेषोध्यभोजनं गायत्रींत्रिःसकृद्वापिजपेद्व्याहृतिपूर्विकां मधुवाताइतितृचंमध्वित्येतत्त्रिकंतथा याज्ञवल्क्यः सव्याहृतिकांगायत्रींमधुवाताइतितृचंजप्त्वा यथासुखंवाच्यभुंजीरंस्तेपिवाग्यताः यथासुखंजुषध्वमितिवाच्यं अत्रिः असंकल्पितमन्नाद्यंपाणिभ्यांयद्युपस्पृशेत् अभोज्यंतद्भवेदन्नंपितृणांनोपतिष्ठते अन्नंदत्त्वानगृह्णीयाद्यावत्तोयंनसंपिबेत् आपोशानेविशेषमाह स्मृतिसमुच्चये आपोशानंवामभागेसुरापानसमंभवेत् दक्षभागेतुयःकुर्यात्सोमपानसमंभवेत् तथा पुनरापूर्यापोशानं सुरापानसमंभवेत् हेमाद्रावत्रिः दत्तेवाप्यथवादत्तेभूमौयोनिक्षिपेज्जलं तदन्नंनिष्फलंयातिनिराशैःपितृभिर्गतैः केचिदाज्येनकुर्वंति तन्न पायसेनतथाज्येनमाषान्नेनतथैवच नकुर्याद्बलिदानंतु ओदनेनप्रकल्पयेदितिस्मृतिसारेनिषेधात् शंखः श्राद्धेनियुक्तान्भुंजानान्नपृच्छेल्लवणादिषु उच्छिष्टाःपितरोयांतिपृच्छतोनात्रसंशयः कात्यायनः अश्नत्सुजपेत्सव्याहृतिकांगायत्रींसकृत्त्रिर्वारक्षोघ्नीःपौरुषंसूक्तमप्रतिरथमिति हेमाद्रौसौरपुराणे ऐंद्रंचपौरुषंसूक्तंश्रावयेद्ब्राह्मणांस्ततः मात्स्यपाद्मयोः ब्रह्मविष्ण्वर्करुद्राणांस्तोत्राणिविविधानिच इंद्रेशसोमसूक्तानिपावमानीश्चशक्तितः मंडलंब्राह्मणंतद्वत्प्रीतिकारिचयत्पुनः अभावेसर्वविद्यानांगायत्रीजपमाचरेत् पृथ्वीचंद्रोदयेब्राह्मे वीणावंशध्वनिंचापिविप्रेभ्यःसंनिवेदयेत् जपेच्चपौरुषंसूक्तंनाचिकेतत्रयंतथा त्रिमधुत्रिसुपर्णंचपावमानीर्यजूंषिच हेमाद्रावत्रिः हुंकारेणापियोब्रूयाद्धस्ताद्वापिवदेद्गुणान् भूतलाच्चोद्धरेत्पात्रंमुंचेद्धस्तेनवापिबेत् प्रौढपादोबहिःकच्छोब

द्विर्जानुकरोपिवा अंगुष्ठेनविनाश्नातिसुखशब्देनवापुनः पीतावशिष्टतोयानिपुनरुद्धृत्यवापिबेत् खादितार्धात्पुनःखादेन्मोदकानिफलानिच मुखेनवाधमेदन्नंनिष्ठीवेद्भाजनेपिवा इत्थमश्नन्द्विजःश्राद्धंहत्वागच्छत्यधोगतिं जाबालिः इष्टमुष्णंहविष्यंचदद्यादन्नंशनैःशनैः वृद्धशातातपः अपेक्षितंयाचितव्यंश्राद्धार्थमुपकल्पितं नयाचतेद्विजोमूढःसभवेत्पितृघातकः यत्तुयमः श्राद्धेद्विजोनैवनदद्यान्नयाचेन्नैवदापयेदितितदसंपादितवस्तुविषयमितिहेमाद्रिः हारीतः ऊर्ध्वपाणिश्चविहसन्सक्रोधोविस्मयान्वितः भुग्नपृष्ठश्चपद्भुंक्तेनतत्प्रीणातिवैपितॄन् प्रचेताः नस्पृशेद्वामहस्तेनभुंजानोन्नंकदाचन नपादौनशिरोबस्तिनपदाभाजनंस्पृशेत् शंखः श्राद्धपंक्तौतुभुंजानोब्राह्मणोब्राह्मणंस्पृशेत् तदन्नमत्यजन्भुक्त्वागायत्र्यष्टशतंजपेत् उशनाः भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन अन्यत्रदध्नःक्षीराद्वाक्षौद्रात्सक्तुभ्यएवच ब्राह्मे नचाश्रुपातयेज्जातुनशुक्तांगिरमीरयेत् नचोद्वीक्षेतभुंजानान्नचकुर्वीतमत्सरं यमः स्वाध्यायंश्रावयेत्सम्यग्धर्मशास्त्राणिनैवहि प्रचेताः भुंजानेषुतुविप्रेषुऋग्यजुःसामलक्षणं जपेदभिमुखोभूत्वापित्र्यंचैवविशेषतः यजूंषिचैवरुद्रंचराक्षोघ्नीर्ऋचएवच राक्षोघ्नीः कृणुष्वरक्षोहणमित्याद्याः तत्रैवनिगमः भुंजत्सुजपेत्पावमानीरुदीरतामध्वन्नवतीश्च अन्नवत्यःपितुन्नुस्तोषमिति पृथ्वीचंद्रोदये भरद्वाजः भुंजानेषुतुविप्रेषुप्रसादात्स्रवतेगुदम् पादकृच्छ्रंततःकृत्वाअन्यंविप्रंनियोजयेत् क्षणपाद्यादितत्वेत्यर्थः विप्रवमनेतत्रैवदक्षः निमंत्रितस्तुयःश्राद्धेभोजनेमुखनिःसृते तदैवहोमंकुर्वीतस्वाग्नौविप्रःसमाहितः प्राणादिपंचभिर्मंत्रैर्यावद्द्वात्रिंशसंख्यया ब्राह्मणस्तुततःकृत्वाघृतप्राशनमाचरेत् ऋग्विधानेतु इंद्रा-

यसोमसूक्तेनश्राद्धविघ्नोयदाभवेत् अग्न्यादिभिर्भोजनेनश्राद्धंसंपूर्णमेवहीत्युक्तं अग्न्यादिभिरितिलौकिकाग्निस्थापन
चरुनिर्वापाज्यभागांतेनामगोत्रपूर्वमग्नौपितॄनावाह्यसंपूज्यान्नत्यागंकृत्वाप्राणादिभिर्द्वात्रिंशदाहुतीर्हुनेदित्यर्थः भोजने
नपुनःश्राद्धेनतेनहोमःपुनःश्राद्धंचेतिपक्षद्वयमुक्तं सूक्तजपस्तूभयानुगतः स्मृतिसंग्रहे प्राधान्यंपिंडदानस्यभोजनस्य
तदंगता अतोभुक्तिक्रियाहानौश्राद्धहानिंनमन्वते पिंडदानोत्तरंवांतौहोमएवनावृत्तिः पिंडदानात्प्राग्वांतौतद्दिनेउपवा
संकृत्वापरेद्युः पुनःश्राद्धंकार्यमित्यर्थः तत्रैव श्राद्धपंक्तौतुभुंजानोब्राह्मणोवमतेयदि लौकिकाग्नौप्रतिष्ठाप्यअर्चयेच्च
हुताशनं तथा एकएवयदाविप्रोभोजनेछर्दितोयदि तदैवाग्निंसमाधायहोमंकुर्याद्यथाविधि द्वितीयपक्षेऽग्निधाने
भोजनोपक्रमादूर्ध्वंप्रक्रमात्पूर्वतोयदि श्राद्धविघ्नेपुनःकार्यंजपहोमौनतृप्तिदौ स्मृतिसंग्रहे अकृतेपिंडदानेतुभुंजा
नोब्राह्मणोवमेत् पुनःपाकात्तुकर्तव्यंपिंडदानंयथाविधि पिंडदानश्राद्धं अकृतेपिंडदानेतुपितायद्विवमेत्तदा पुनःपा-
कंप्रकुर्वीतश्राद्धंकुर्याद्यथाविधीतितत्रैवोक्तेः तथा पित्रर्थानांत्रयाणांचपिताचवमतेयदि तद्दिनेचोपवासःस्यात्पुनः
श्राद्धंपरेहनि वमनेचाविरेकेवातदहंनपरिवर्जयेत् एषुवचनेषुमूलंचिंत्यं इदंमासिकाब्दिकविषयं दर्शादौतुवांतावा
मेनतदैवकार्यम् श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितं अमावास्यादिनियतंमाससंवत्सरादृत इतिमरीचिस्मृतेः श्रा
द्धेपिंडदानमेवप्रधानमितिकर्काचार्याः तन्मतेदक्षोक्तोहोमएवनावृत्तिः विप्रभोजनमितिमेधातिथिः भोजनपिंडदानाग्नौक
रणानीतिकपर्दिधूर्तस्वामिहेमाद्र्यादयः श्राद्धस्यहोमदानोभयरूपत्वात्संपूर्णदानाभावाद्भोजनस्यांगत्वेपिसोमवमतेइतियुक्तं

तन्मतेपूर्वोक्तोनिर्णयः अन्नत्यागमात्रंप्रधानं भोजनंतुप्रतिपत्तिरूपमंगं अतोवांतौनत्यागेपिनावृत्तिरिति गौडमैथिलादयः नै
मित्तिकविधानमितियुक्तंप्रतीमः अत्रेदंतत्वं वैश्वदेविकस्यवमने होमएवनावृत्तिः अंगत्वात् तच्चरक्षार्थत्वादिदिष्याच्चेत्क्रतुद
क्षइति दिस्मृतेश्च तत्रजयान्जुहुयादितिवत् पितामहादेरपितथा पितेत्युक्तेरितिकेचित् तस्यापिप्रधानत्वात्पितृवदितियु
क्तं सपिंडीकरणादौवार्षिकवत् सपिंडीकरणादीनियानिश्राद्धानिषोडश तत्रापिंडप्रधानत्वमेतत्त्वविनिवर्तकमितिस्मृतेः
महैकोद्दिष्टादौतूभयप्राधान्यादावृत्तिरेव एकएवद्विजोभोज्यःपिंडोप्येकोविधीयतइतिस्मृतेः वृद्धिसंकल्पनित्यश्राद्धादौतुभो-
जनप्राधान्याद्वांतावावृत्तिरेव वृद्धिश्राद्धेविकल्पेनपिंडदानंबुधैःस्मृतं नित्यश्राद्धमदैवंस्यात्पिंडदानविवर्जितमितिस्मृतेः भुक्ति
क्रियायाःप्राधान्यंश्राद्धसंकल्पसंज्ञके तत्रैवपितृविप्रस्यतूपघातेपुनःक्रियेतिसंग्रहोक्तेश्चप्रमादादप्येवं तीर्थमहालयादौदर्श
वदित्याशाकोद्यालोचनेनप्रतीमः आश्वलायनः तृप्तान्ज्ञात्वामधुमतीःश्रावयेदक्षन्नमीमदंतेतिचसंपन्नंपृष्ट्वायद्यदन्नमुपभु
क्तंतत्तत्स्थालीपाकेनसहपिंडार्थमुद्धृत्यशेषंनिवेदयेत् अभिमतेनुमतेचेति अत्रगायत्रीमध्वितित्रिकजपोपिज्ञेयः तृप्तान्बु
ध्वान्नमादायसतिलंपूर्ववज्जपेदिति प्रचेतसोक्तेः व्यासः तृप्ताःस्थेतितुपृष्टास्तेब्रूयुस्तृप्ताःस्मइत्यथ अभिमतेविप्रैःस्वीक
र्तुमिष्टे शौनकोपि अन्नशेषैश्चकिंकार्यमितिपृच्छेत्तांस्ततः तेइष्टैःसहभोक्तव्यमितिभक्तिपूर्वकं प्रदद्युःसकलंतस्मै
स्वीकुर्युर्वायथारुचि श्राद्धविशेषप्रश्नभेदमाह हेमाद्रौविष्णुः पित्र्येस्वदितमितिगोष्ठ्यांसुश्रुतंसंपन्नमित्यभ्युदयेदैवेरोचत
इति आयुष्यमितिस्वैरिषु स्वैरमिच्छाश्राद्धं याज्ञवल्क्यः अन्नमादायतृप्ताःस्थशेषंचैवानुमान्यच तदन्नंप्रकिरेद्भूमौद

घादापःसकृत्सकृत् इदंचात्रविकिरदानमन्यशाखिनां आश्वलायनानांतुपिंडांतएवसूत्रकृतोक्तम् कात्यायनस्तु विकिरोत्तरं-
गायत्र्यादिजपंतृप्तिप्रश्नंचाह हेमाद्रौदेवलः ततःसर्वाशनंपात्रेगृहीत्वाविधिवद्बुधः तेषामुच्छेषणस्थानेविकिरंप्रविनिक्षिपे
त् माधवीयेप्रचेताः सार्ववर्णिकमादाययेअग्नीतिप्रविक्षिपेत् सचकुशेषुकार्यः दर्भेषुविकिरश्चयइत्युक्तेः मंत्रःकातीयः
अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिमिति अन्येतु असोमपाश्चयेदेवायज्ञभाग
विवर्जिताः तेषामन्नंप्रदास्यामिविकिरंवैश्वदैविकमिति हेमाद्रौगोभिलोक्तेनदैवे असंस्कृतप्रमीतायेत्यागिन्योयाःकुलस्त्रियः
दास्यामितेभ्योविकिरमन्नंताभ्यश्चपैतृकमित्यग्निपुराणोक्तेनपित्र्येत्वंविकीर्य येअग्निदग्धाइत्युच्छिष्टपिंडंकुशोपरिपृथग्दद्या
दित्याहुः पृथ्वीचंद्रोदयेप्येवम् ब्राह्मे ततःप्रक्षाल्यहस्तौचद्विराचम्यहरिंस्मरेत् माधवीयेगौतमः विकिरमुच्छिष्टैःप्रति
पादयेत् हेमाद्रौव्यासः उच्छिष्टैरेवविकिरंसदैवंप्रतिपादयेत् भृगुः पिंडवत्प्रतिपत्तिःस्याद्विकिरस्येतितोल्वलिः श्रा
द्धकारिकायाम् यजमानस्यदासादीनुद्दिश्यद्विजसत्तम तस्माद्दन्नंत्यजेद्भूमौवामभागेक्षिपेत्तके मनुः उच्छेषणंभूमिगत
मजिह्मस्याशठस्यच दासवर्गस्यतत्पित्र्येभागधेयंप्रचक्षते विष्णुः उदङ्मुखेष्वाचमनमादौदद्यात्ततःप्राङ्मुखेषु पित्र्ये-
दैवेचेत्यर्थः शातातपः विश्वेदेवनिविष्टानांचरमंहस्तधावनम् हेमाद्रौवाराहे हस्तंप्रक्षाल्यपश्चापःपिबेदुक्त्वाद्विजः
सदा तदन्नमसुरैर्भुक्तंनिराशाःपितरोगताः मरीचिः हस्तंप्रक्षाल्यगंडूषंयःपिबेदविचक्षणः आसुरंतद्भवेच्छ्राद्धंपि- ३९
तृणांनोपतिष्ठते तत्रैवसंग्रहे पवित्रग्रंथिमुत्सृज्यमंडलेभुविनिक्षिपेत् हस्तादीन्क्षालयेद्विद्वान्शरावादौतुकुत्रचित्

व्यासः तांबूलोज्झिरणंचैव गंडूषोज्झिरणंतथा कांस्यपात्रेतथाताम्रेनकुर्वीतकदाचन उष्णोदकेर्धान्यचूर्णैः करौश्मश्रूणिशोधयेत् अथपिंडदानं तच्चार्चनोत्तरं मग्नौकरणोत्तरंभोजनोत्तरंविकिरोत्तरंस्वधावाचनोत्तरंविप्रविसर्जनोत्तरंचेति हेमाद्रौस्मृतिषु पक्षाउक्ताः तेषांशाखाभेदेनव्यवस्था प्रेतश्राद्धेषु पूर्वमन्येषुभोजनोत्तरमितिचंद्रिकामाधवौ सर्वत्रभोजनोत्तरमिति बहवः आश्वलायनः भुक्तवत्स्वनाचांतेषु पिंडान्निदध्यादाचांतेष्वेके भुक्तवत्स्वितिपूर्वनिषेधार्थं साग्निरितिप्रणीतसमीपेऽनग्निर्द्विजसमीपे हेमाद्रौजातूकर्ण्यः व्याममात्रंसमुत्सृज्यपिंडांस्तत्रप्रदापयेत् प्रसारितभुजांतरं व्यामः संकटेतुव्यासः अरत्निमात्रमुत्सृज्येति यत्तुतत्रैव सिकताभिर्मृदावापिवेदीदक्षिणनिम्नगेति तदन्यशाखिपरं देवलः ततस्तैरभ्यनुज्ञातो दक्षिणांदिशमेत्यच चंद्रिकायां पिंडनिर्वपणंकार्यंकुशाभावेविचक्षणैः काशेषुराजदूर्वासुपवित्रेपरमेहिते आश्वलायनः स्फ्येनरेखामुल्लिखेत् अपहताअसुरारक्षांसिवेदिषद इतितामभ्युक्ष्यसकृदाच्छिन्नैरवस्तीर्यप्राचीनावीतीरेखायांत्रिरुदकेनोपनयेच्छुंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्रपितामहाइतितस्यांपिंडान्निदधीयात्पराचीनपाणिःपित्रेपितामहायप्रपितामहायेतत्तेसौयेचत्वामचान्विति हेमाद्रौपारस्करः कराभ्यामुल्लिखेत्स्फ्येनकुशेर्वापिमहींद्विजः बह्वृचानांकरेणैवलेखाचाग्नेय्यभिमुखेतिवृत्तिः दक्षिणाप्राचींवेदिमुल्लिख्यापस्तंबोक्तेश्च देवलः आवाहयित्वादर्भाग्रेस्तेषांस्थानानिकल्पयेत् तेषासीनेषुपात्रेणप्रयच्छेत्सतिलोदकं पराचीनेननिम्नापितृतीर्थेन वायवीये मधुसर्पिस्तिलयुतांस्त्रीन्पिंडान्निर्वपेद्बुधः त्रिस्थलीसेतौ तिलमन्नंचपानीयंधूपंदीपंपयस्तथा मधुसर्पिःखंडयुक्तंपिंडमष्टांगमुच्यते याज्ञवल्क्यः सर्वमन्नमुपा-

दायसतिलंदक्षिणामुखः उच्छिष्टसन्निधौपिंडान्दद्याद्वैपितृयज्ञवत् केचित्पिंडेषुमाषान्वर्जयंति माषाःश्राद्धेषुवैग्राह्या वर्ज्याश्चैवाग्निपिंडयोः ब्राह्मणेषुयथामद्यंतथामाषोग्निपिंडयोरिति स्मृतिसारात् माषान्सर्वत्रवैदद्यात्पिंडेयत्नाद्विवर्जये दितिस्मृतेश्च अत्रमूलंचिंत्यं हेमाद्रावपिसर्वशब्दस्यप्रकृतार्थत्वात्सर्वान्नग्रहणमुक्तं अत्रशेषमन्नमनुज्ञाप्यसर्वमेकत्रोद्धृत्योच्छिष्टसमीपेदर्भेषुत्रीस्त्रीन्पिंडान्दद्यादितिगोभिलसूत्रेसर्वस्मात्प्रकृतादन्नात्पिंडान्मधुतिलान्वितानितिविशेषनियमात्तदभावेपिंडनिवृत्तिः प्राप्नोतीतिमैथिलवाचस्पती तन्न तुषोपवापवत्परप्रयुक्तद्रव्यत्वेप्यर्थकर्मत्वाद्गुणानुरोधेनप्रधानत्यागाच्च शेषलोपेपिद्रव्यांतरेणकार्यं अतोनेयंप्रतिपत्तिः किंतुप्रधानमित्युक्तंप्राक् अन्यथासपिंडीकरणादौसंयोजनादेःप्रधानस्यलोपापत्तेरितिदिक् अथपिंडप्रमाणं हेमाद्रावंगिराः कपित्थबिल्वमात्रान्वापिंडान्दद्याद्विधानतः कुक्कुटांडप्रमाणान्वाआमलकैर्बदरैःसमानिति तत्रैवधूम्रः कपित्थस्यप्रमाणेनपिंडान्दद्यात्समाहितः तत्समंवाकिरंदद्यात्पिंडांतेतुषडंगुलेः अंत्येष्टिपद्धतौभट्टास्तु एकोद्दिष्टेसपिंडेतुकपित्थंतुविधीयते नारिकेलप्रमाणंतुप्रत्यब्देमासिकेतथा तीर्थेदर्शेचसंप्राप्तेकुक्कुटांडप्रमाणतः महालयेगयाश्राद्धेकुर्यादामलकोपममित्याहुः कलिकायामाचार्यैः यत्रस्युर्बहवःपिंडास्तत्रबिल्वफलोपमाः यत्रचैकोभवेत्पिंडस्तत्रखर्जूरसन्निभः प्रेतपिंडस्तुदैर्घ्येणद्वादशांगुलउच्यतइति वायवीये पत्नीपिंडास्तुमृन्मीयातुत्रिवर्गस्यसहायिनी ४० हेमाद्रौलौगाक्षिः महालयेगयायांचप्रेतश्राद्धेदशाहिके पिंडशब्दप्रयोगःस्यादन्नमन्यत्रकीर्तयेत् शाट्यायनिः असावेतत्तइत्युक्त्वाददंतेचस्वधानमः असावित्यत्रसंबंधरूपगोत्रादीनि

शिष्टंपित्रादिनामसंबुध्यंतमुक्त्वापुनश्चतुर्थ्यंतंतदत्तेयंपिंड इदमन्नंवास्वधानमोनममेतिवदेदितिहेमाद्रिः पित्रादीनामज्ञाने त्वापस्तंबः यदिनामानिनविद्यात्स्वधापितृभ्यःपृथिवीषद्भ्यइतिप्रथमंपिंडंदद्यात् स्वधापितृभ्योंतरिक्षसद्भ्यइतिद्वितीयंस्वधा पितृभ्योदिविषद्भ्यइतितृतीयं एवंमातामहेषुमातृषुच बह्वृचानांतूष्णींभाक् कलिकायांस्मृतिः यावदेवोच्चरेन्मंत्रंतावत्प्राणानिरोधयेत् येषांतुगृह्योक्तेदर्शेमातुःश्राद्धंपृथगुक्तं तेषांपितृभ्यःपश्चिमेमातृभ्य स्तत्पश्चिमेमातामहीभ्यःपिंडादिदेयमितिसांख्यायनः अस्मिन्पक्षेतत्पश्चिमेमातामहीभ्योपिदद्यादितिहेमाद्रिः पूर्वास्तुपितृभ्योदद्यादपरास्तुस्त्रीभ्यइतिसूत्राच्च एवंयत्रतीर्थमहालयादौकेचिदिच्छंति नारीणांपृथक्श्राद्धंमहर्षयइतिचतुर्विंशतिमतात् पित्रादिनवदैवत्यंतथाद्वादशदैवत्यमित्यग्निपुराणाच्च मातृणांपृथगुक्तं यत्रवाआचार्यगुरुशिष्येभ्यःसखिज्ञातिभ्यएवच तत्पत्नीभ्यश्चसर्वाभ्यस्तथैवचजलांजलीन् पिंडांस्तेभ्यःसदादद्यापृथग्भाद्रपदेनरः तीर्थेषुचैवसर्वेषुमाघमासेमघासुचेतिचतुर्विंशतिमते दौहित्रपुत्रदाराश्चयेकनिष्ठाःसहोदराः निःसंतानामृतायेचतेभ्योप्यत्रप्रदीयतइतिभविष्ये एकोद्दिष्टास्तूक्तानितत्रापितत्पश्चिमेपिंडदानंज्ञेयं येषांनपृथक्कृतेःसपत्नीकाः पित्रादयोवाच्याः अन्वष्टकागयामातृश्राद्धंचैवमृतेहनि एकोद्दिष्टंतथामुक्त्वास्त्रीषुनान्यत्पृथग्भवेदितिशांखोक्तेश्च मनुः तेषुदर्भेषुतंहस्तंनिमृजेल्लेपभागिनां हस्तलेपाभावेपिहस्तंनिमृज्यादेवेतिमेधातिथिः विष्णुः अत्रपितरोमादयध्वमितिदर्भमूलेकरावघर्षणं कलिकायांस्तुमनुः एकोद्दिष्टेषुवर्षासुदर्भलेपोनविद्यते सपिंडीकरणादौतुलेपःसर्वत्रशस्यते मनुः आचम्योदक्परावृत्यत्रिरायम्यशनैरसून् षडृतूंश्चनमस्कुर्यात्पितॄनेवचमंत्रवत् उदकंनिनयेच्छेषंशनैःपिंडांतिकेपुनः त्रिःप्रा-

पायासं कृत्वेति मेधातिथिः अमंत्रं प्राणान्निरुध्येति कर्कोद्याः मंत्रवद्वसंताय नमः नमो वः पितर इत्याद्यैः शेषं पूर्ववन्नयनशेषं आश्वलायनः निष्टानानुमंत्रयेतात्र पितरो मादयध्वं यथाभागमावृषायध्वमिति सव्यावृदुदगावृत्य यथाशक्ति प्राणान्नासित्वाऽभिपर्यावृत्यामीमदंत पितरो यथाभागमावृषायीषतेति चरोः प्राणभक्षं भक्षयेन्नित्यं निनयनमिति नित्यग्रहणं शेषाभावेपि कुर्यादित्यर्थः शौनकः अथैषामत्र पितर इत्याद्येनानुमंत्रणं अमीमदंतेत्याद्येन मंत्रेणाप्यनुमंत्र्यताम् पिंडशिष्टं चरोरन्नं किंचिदाघ्रायतत्यत्यजेत् प्रक्षाल्याचम्य शुंधंतामित्याद्यैरेव पूर्ववत् मंत्रैः पिंडेषु पानीयं निषिंचेत्तु पितृतीर्थतः व्याघ्रः अद्भिः प्रक्षाल्य तत्पात्रं तत्तु पिंडं प्रति पूर्ववत् कृत्वावनेजनं कुर्यात्पिंडपात्रमधोमुखं एतत्कातीयादीनां आचार्यः ततः सम्यगुद्दिशाचम्य नीवीं विस्रस्य वाग्यतः आश्वलायनः असावभ्यंक्ष्वासावंक्ष्वेति पिंडेष्वभ्यंजनांजने वासोद द्याद्दशामूर्णास्तुकां वा पंचाशद्वर्षताया ऊर्ध्वं स्वलोमैतद्वः पितरो वासो मानोतोन्यत्पितरो युंजध्वमिति श्राद्धचिंतामणौ ब्राह्मे एतद्वः पितरो वास इति जल्पन्पृथक् पृथक् अमुकामुकगोत्रैतत्तुभ्यं वासः पठेद्बुधः इदं कातीयानां एतद्व इति सूत्राणि प्रतिपिंडमिति तत्सूत्रात् हेमाद्रौ ब्राह्मे श्रेष्ठमाहुस्त्रैककुदमंजनं नित्यमेव हि तैलं कृष्णातिलेभ्यश्च दद्यादभ्यंजनं हितं त्रैककुदस्फुरपी इति प्रसिद्धं अंजनप्राथम्यमापस्तंबादिविषयं तत्रैव व्याघ्रः गंधपुष्पाणि धूपं च दीपं च विनिवेदयेत् देवलः दक्षिणा सर्वभोगाश्च प्रतिपिंडं प्रदापयेत् भक्ष्याण्यपूपानिक्षूंश्च व्यंजनान्यशनानि च तत्रैव शंखः यत्किंचित्पच्यते गेहे भक्ष्यं भोज्यमगर्हितं अनिवेद्य न भोक्तव्यं पिंडमूले कथंचन एतत्सव्येनेति केचित् युक्तं त्वपसव्येन मनुः अवजिघ्रेच्च तान्पिंडान्यथान्युप्तान्समाहितः ततो नमो वः पितर इष इत्यादिनोपस्थानं मात्स्ये अथाचांतेषु

चाचम्यवारिदद्यात्सकृत्सकृत् तिलपुष्पाक्षतान्पश्चादक्षय्योदकमेवच अत्रदैवेसव्यंपित्र्येऽपसव्यमितिकर्कः परिभाषोक्तवचनात्सव्यमितिशुक्तं अत्रशिवाआपःसंतु सौमनस्यमस्त्वित्यादिप्रयोगोज्ञेयः मात्स्ये नत्वाशीःप्रतिगृह्णीयाद्द्विजेभ्यःप्राङ्मुखोबुधः अघोराःपितरःसंतुसंत्वित्युक्तेपुनर्द्विजैः गोत्रंतथावर्धतांनस्तथेत्युक्तःसतैःपुनः दातारोनोभिवर्द्धंतामन्त्रंचैवेत्युदीरयेत् स्वस्तिवाचनकंकुर्यात्पिंडानुद्धृत्यभक्तितः स्वस्तिवाचनात्प्राक्पात्रचालनंकार्यं हेमाद्रौबृहस्पतिः भोजने पुच्छतिप्रसक्तस्वस्तिकुर्वंतियेद्विजाः तदन्नमसुरैर्भुक्तंनिराशैःपितृभिर्गतैः जातूकर्ण्यः पात्राणिचालयेच्छ्राद्धे स्वयंशिष्योथवासुतः नस्त्रीभिर्नचबालेननासजात्याकथंचन याज्ञवल्क्यः स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवच तत्रैववृद्धशातातपः पितृणांनामगोत्रेणकरेदेयंतिलोदकं प्रत्येकंपितृतीर्थेन अक्षय्यमिदमस्त्विति अत्रषष्ठीप्रागुक्ता तत्रैवनागरखंडे उत्तानमर्घ्यपात्रंतुकृत्वादत्वाचदक्षिणां हिरण्यंदेवतानांचपितॄणांरजतंतथा बृहस्पतिः तस्मात्पणंकाकिणींवाफलंपुष्पमथापिवा प्रदद्याद्दक्षिणांयज्ञेतयासःसफलोभवेत् अत्रपित्रुद्देशेनदक्षिणादानेऽपसव्यं विप्रोद्देशेनसव्यमितिमाधवः कलिकायामाचार्यः दद्याद्यज्ञोपवीत्येवतांबूलंदक्षिणांतथा अत्रिः वदेच्चतांस्ततोविप्रान्पित्रादिभ्यःस्वधोच्यतां गोभिलः अघोराःपितरःसंत्वित्युक्तेस्वधांवाचयिष्यइतिपृच्छतिपितृभ्यः स्वधोच्यतामित्युक्तेस्तुस्वधेत्युच्यमानेधारांदद्यादूर्जंवहंतीति आपस्तंबेनतुपुत्रान्पौत्राननभितर्पयंतीरित्यपिपरिषेचनेमंत्रउक्तः आश्वलायनः अथैतान्प्रवाहयेत् परेतनपितरःसोम्यासोगंभीरेभिःपथिभिःपूर्विणेभिः दत्तायास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियच्छतेति मात्स्ये वाजेवाजेइतिजपन्कुशाग्रेणवि

सर्जयेत् प्रचेताः स्वस्तिवाच्यं ततः कृत्वा पितृपूर्वं विसर्जयेत् आश्वलायनः अन्नंप्रकीर्योपवीत्योंस्वधेति विसृजेदस्तु स्वधेतिवा
ब्रह्मवैवर्ते आमावाजेति मंत्रं तु पठित्वा च प्रदक्षिणां द्वारोपांते ततः कृत्वा संयतः प्रविशेद्गृहं प्रांजलिश्च ततः प्राह तान्विप्रा-
न्सत्यवादिनः दातारो नोभिवर्धतामन्नं च न इतिब्रूहीति एवमस्त्विति ते तं च कथयंति समाहिताः एतन्मंडलदेशे कार्यमिति हेमा
द्रिः मनुः दातारो नोभिवर्धंतां वेदाः संततिरेव च श्रद्धा च नो माव्यगमद्बहुदेयं च नोस्त्विति बौधायनः अन्नं च नो बहु भवे
दतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचनेति अन्नदातारो नोभिवर्धंतां लभध्वं याचिदुमित्याद्यूहेन पठित्वावि
प्रैः प्रतिवचनं कार्यमिति स्मृदर्शनभाष्ये स्वादुषंसद इति ब्राह्मणासः पितर इति मंत्रद्वयं च पठंति शौनकः ब्राह्मणानथनिर्यातान्
परीत्य त्रिः प्रदक्षिणं सस्त्रीकः स्वजनैः सार्द्धं प्रणमेद्रचितांजलिः कनिष्ठप्रथमाज्येष्ठचरमास्तु प्रदक्षिणे हेमाद्रौ बृहस्पतिः अ
द्य मे सफलं जन्म भवत्सादाद्ब्रुवदनात् अद्य मे वंशजाः सर्वे याता वोनुग्रहाद्दिवं पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः तत् क्लेश-
जातं चित्तात्तु विस्मृत्य क्षंतुमर्हथ प्रचेताः विसृजेद्भक्तिसंयुक्तः सीमांतं चाप्यनुव्रजेत् अथ पिंडप्रतिपत्तिः हेमाद्रौ ब्रह्मांडे पिंड
मग्नौ सदा दद्याद्भोगार्थी प्रथमं नरः पत्न्यै प्रजार्थी दद्याद्वै मध्यमं मंत्रपूर्वकं उत्तमां गतिमन्विच्छन् गोषु नित्यं प्रयच्छति आज्ञां प्रज्ञां
यशः कीर्तिमप्सु पिंडं प्रवेशयेत् प्रार्थयन्दीर्घमायुष्यं वायसेभ्यः प्रयच्छति आकाशं गमयेदप्सु स्थितो वा दक्षिणामुखः आश्वला
यनः वीरं मे दत्त पितर इति पिंडानां मध्यमं पत्नीं प्राशयेत् आधत्त पितरो गर्भं कुमारं पुष्करस्रजं यथायमरपा असदिति मन्त्रो दत्तस्य—
आद्येनादाय द्वितीयेन प्राशनं आपस्तंबस्तु दाने मंत्रमाह अपां त्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति मध्यमं प

त्येप्रयच्छतीतिप्राशनेपि यद्येहपुरुषोअसदितितद्द्वितीयःपाठः अन्येषांतत्तच्छाखायांज्ञेयः तत्रैवशंखः पत्नीवामध्यमंपिंडमश्नी-
यादार्तवान्विता कलिकायांछागलेयः प्राचीनावीतिनामंत्र्यपत्नीपिंडोविभज्यते प्रतिपत्यस्यमंत्रस्यकर्तव्यावृत्तिरन्वतु माधवीये
विष्णुधर्मे तीर्थेश्राद्धेसदापिंडान्क्षिपेत्तीर्थसमाहितः याज्ञवल्क्यः पिंडास्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा बृहस्पतिः अन्य
देशगतापत्नीरोगिणीगर्भिणीतथा नदातंजीर्णवृषभश्छागोवाभोक्तुमर्हति अथपिंडोपघाते हेमाद्रौप्रायश्चित्तकांडेदेवलः श्व
सृगालखरैःपिंडःस्पृष्टोभिन्नःप्रमादतः कर्तुरायुष्यनाशःस्यात्प्रेतस्तन्नोपसर्पति जातूकर्ण्यः पूर्वश्लोकांते तद्दोषपरिहारा
र्थंप्राजापत्यंप्रकल्पयेत् पुनःस्नात्वातदाकर्तापिंडंकुर्याद्यथाविधि काकस्पर्शेतुनदोषः पिंडोपघातप्रकस्यधनस्यचविनाशः
स्यात् काकस्पर्शादिकंविनेति तत्रैवश्लोकेगौतमोक्तेः स्मृतिदर्पणेत्रिः मार्जारमूषकस्पर्शेपिंडेचोद्दलीकृते पुनःपिंडाःप्र
दातव्यास्तेनपाकेनतत्क्षणात् बोधायनः श्वचांडालादिभिःस्पृष्टःपिंडोयद्युपहन्यते प्राजापत्यंचरित्वाथपुनःपिंडंसमा-
चरेत् बोपदेवोप्येवमाह अथदिनांतरेतुप्राजापत्यमात्रं शेषप्रतिपत्तित्वेनपिंडावृत्तौमानाभावादितिमैथिलाः तन्न सपिंडी-
करणादौशेषनाशेसंयोजनादिलोपापत्तेः तेनवचनाद्भमनेड्वान्नापितन्मात्रपिंडदानावृत्तिः अतएवनचनक्तंश्राद्धंकुर्वीतार
ब्धेवा भोजनसमापनादित्यापस्तंबसूत्रम् रात्रौभोजनमात्रंपूर्वेद्युःकार्यं श्राद्धसमाप्तिस्तुपरदिनेएव समाप्तिपर्यंतंकर्तुरु
पवासश्चेति हरिदत्तेनव्याख्यातं तस्मात्पाकांतरेणपिंडदानमात्रंकार्यं अथपिंडनिषिद्धकालः सचप्रायेणमहालयादिनि
र्णयेपूर्वमुक्तः हेमाद्रौवृद्धपराशरः युगादिषुमघायांचविषुवत्ययनेतथा भरणीषुचकुर्वीतपिंडनिर्वपणंनहि स्मृतिरत्नावल्यां

पुत्रेजातेव्यतीपातेग्रहणेचंद्रसूर्ययोः श्राद्धंकुर्यात्प्रयत्नेनपिंडनिर्वपणादृते तत्रैवकात्यायनः ऊढेरनंतरंचैवयावन्मासःसमाप्य
ते नावत्पिंडान्नैवदद्यान्नकुर्यात्तिलतर्पणं बोधायनः संस्कारेषुतथान्येषुमासंमासार्धमेवच तथा भानौभौमेत्रयोदश्यांनंदासु
मघासुच पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणं त्रिस्थलीसेतौ कार्ष्णाजिनिः विवाहव्रतचूडासुवर्षमर्द्धंतदर्धकं उत्तरार्द्धं भार्गवत् वृद्धि
मात्रे तथान्यत्रपिंडदाननिराक्रिया कृतागर्गादिभिर्मुख्यैर्मासमेकंतुकर्मणा हेमाद्रौज्योतिःपराशरः विवाहविहितेमासांस्त्यजेयु
र्द्वादशावहि सपिंडाःपिंडनिर्वापंमौंजीबंधेषडेवहि तत्रैव महालयगयाश्राद्धेमातापित्रोःक्षयेहनि यस्यकस्यापिमर्त्यस्यसपि
डीकरणेतथा कृतोद्वाहोऽपिकुर्वीतपिंडनिर्वपणंसदेति मातापित्रोरितिक्षयाहविशेषणं द्वित्वमुभयत्ववदविवक्षितं तेनभ्रातृपितृव्या
दिवार्षिकेऽपिपिंडदानंकार्यमितिकेचित् सपिंडीकरणेनवश्राद्धषोडशश्राद्धोपलक्षणार्थमितिनिर्णयामृतेउक्तं क्षयाहविशेषःसंग्रहे मा
तापित्रोराब्दिकेतुविवाहादिषुसर्वदा तिलैःपिंडाःप्रदातव्याअन्यश्राद्धेविवर्जयेत् अत्रमूलंचिंत्यम् रामकौतुके नंदाश्वकामरव्यारभृगुवशि
पितृकालभेगंडवैधृतिपातेचपिंडास्त्याज्याःकृतेकृभिः विश्वरूपनिबंधे तिथिवारप्रयुक्तोयोदोषोवैसमुदाहृतः सश्राद्धेतन्निमित्तस्यान्नान्य
श्राद्धेकदाचन अन्यसूक्तंप्राक् उच्छिष्टोद्वासनमाह हेमाद्रौवसिष्ठः श्राद्धेनोद्वासनीयानिउच्छिष्टान्यादिनक्षयात् श्च्योतंतेवैसुधाधारास्ताः
पिबंत्यकृतोदकाः व्यासः उच्छिष्टंनप्रमृज्यात्तुयावन्नास्तमितोरविः इदंगृहांतरसत्वे एकगृहेतुमनुः उच्छेषणंतुतत्तिष्ठेद्यावद्विप्राविसर्जि
ताः ततोगृहबलिंकुर्यादितिधर्मोव्यवस्थितः बलिर्वैश्वदेवादिनित्यकर्मेतिमेधातिथिः ब्रह्मांडे शूद्रायचानुपेतायश्राद्धोच्छिष्टंनदापयेत्
तथा कामंदद्याच्चसर्वंतुशिष्यायचकृतायच भोक्तुरितिशेषः जातूकर्ण्यः द्विजभुक्तावशिष्टंतुशुचिभूमौनिखानयेत् अथर्वेभ्यः

देवादि अत्रसामकः श्लोकः श्राद्धे साग्निककर्तृकेऽग्निकरणात् पश्चाज्जुहोति बलिस्त्वंते स्याद्यथवा मवैद्धि किरतः पश्चात् पृथक्कृतेऽपचे: श्राद्धांते त्वथ वा महालयविधौ पूर्वं क्षयेऽस्यात्तु क्षये लंते मासिके च मध्यताशक्षभविधौ वादौ तथा साग्निके अस्यार्थः साग्नेः पृथक्पाके न सर्वत्रादौ वैश्वदेवः पक्षान्तकर्म निर्वर्त्य वैश्वदेवं च साग्निकः पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेवच वैश्वदेवं न पित्रर्थं न दार्शं वैश्वदेविकमिति लौगाक्षिस्मृतेः अत्र साग्निक आहिताग्निरिति हेमाद्रिः श्राद्धात्प्राग कुर्वीत वैश्वदेवं तु साग्निकः एकादशाहिकं भुक्त्वा तत्र्यन्ते विधीयते इति हेमाद्रौ शालंकायनोक्तेश्च तत्रैव परिशिष्टे संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च अग्रतो वैश्वदेवः स्यात् पश्चादेकादशेऽहनि साग्निमतां तद्रहितानां वा अग्नौकरणान्तरं विकिरान्तरं वा होमः अत्र पृथक्पाकेन भूतयज्ञादि तु श्राद्धात एव अत्र मूलं हेमाद्रिवार्द्धिकादौ स्पष्टं सर्वेषां श्राद्धान्ते वा तत्पाकेन वैश्वदेवो नित्यश्राद्धादीति तृतीयः श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथेति पैठीनसिस्मृतेः ततः श्राद्धशेषात् श्राद्धाह्ने श्राद्धशेषेण वैश्वदेवं समाचरेदिति चतुर्विंशतिमताच्च एवं वैश्वदेवकालत्रयस्य आशाकेशाखायनपरिशिष्टमुदाहृत्यैव व्यवस्थोक्ता आदौ वृद्धौ क्षये चान्ते दर्शे मध्ये महालये एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयत इति बहुस्मृत्युक्तत्वात्सर्वेषां श्राद्धान्त एवेति मेधातिथि-स्मृतिरत्नावल्यादयो बहवः बोपदेवस्तु वृत्तिकारेणाविसर्जनात् श्राद्धं भुक्त्वा उच्छेषणालिति पूर्वोक्तमनुवाक्योदाहरणाद्बह्वृचानां श्राद्धान्त एव मध्यपक्षस्त्वन्यशाखापर इत्याह हेमाद्रिस्तु बह्वृचानामप्यन्त एव वैश्वदेवमाह कातीयानां तु श्रौतस्मार्ताग्निमतामादावेकेनैव पाकेन नित्यकः अन्येषामन्ते तैत्तिरीयाणां तु साग्निकानां सर्वत्रादौ वैश्वदेवः पंचयज्ञाश्च अन्ते चेति सुदर्शनभाष्ये उक्तं अस्य पक्षद्वयस्य पूर्ववद्व्यव-

स्या हेमाद्रौ मार्कंडेयः ततो नित्यक्रियां कुर्याद्भोजयेच्च ततोऽतिथीन् ततस्तदन्नं भुंजीत सह भृत्यादिभिर्नरः ततः श्राद्धशेषात् नित्यक्रियां नित्यश्राद्धं तत्र पृथक् पाके नित्यकमिति तेनैवोक्तेः पाकैक्ये विकल्पः अथ नित्यश्राद्धं हेमाद्रौ व्यासः एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही अपीत्यनुकल्पः प्रचेताः नामंत्रणं न होमश्च नाह्वानं न विसर्जनं न पिंडदानं विकिरं न दद्यादत्र दक्षिणा अत्रानिर्दिश्य भोजयित्वा तु किंचिद्दत्वा विसर्जयेदिति तेनैवोक्तेर्दक्षिणाविकल्पः यत्तु नित्यश्राद्धं दैवहीनं नियमादिविवर्जितं दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितमिति काशीखंडे तद्विप्राभावपरमिति पृथ्वीचंद्रः भविष्ये आवाहनं स्वधाकारं पिंडाग्नौकरणादिकं ब्रह्मचर्यादिनियमा विश्वेदेवा न चैव हि दातृणामथ भोक्तृणां नियमो न च विद्यते एतद्दिवासंभवे रात्रावपि कार्यम् दिवोदितानि कर्माणि प्रमादादकृतानि वै यामिन्याः प्रहरं यावत्तावत्कर्माणि कारयेदिति बृहन्नारदीयोक्तेः रात्रौ प्रहरपर्यंतं दिवाकृत्यानि कारयेत् ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषत इति पृथ्वीचंद्रधृतसंग्रहोक्तेश्च नच दार्शिकाब्दिकाद्यपि रात्रौ स्यादिति वाच्यं इष्टापत्तेः तस्य तिथिसंबंधित्वात् संध्यारात्रौ न कर्तव्यं श्राद्धं खलु विचक्षणैरिति विष्णुवाक्ये रात्रौ निषेधात् अत एवाल्पद्वादश्यां सुषःकाले द्वयं कुर्यात् प्रातर्माध्याह्निकं तदेत्यादिवाक्ये त्रयोदशीश्राद्धं नापकृष्यते भिन्नविषयत्वादित्युक्तं मदनरत्ने नित्यं नापकृष्यते अन्वहमित्युक्तेस्तिथिसंबंधिकाभावात् यथा च सुदर्शनभाष्ये परपक्षेऽपि श्रापीति नियमोऽपि नित्यश्राद्धे संवत्सरमित्यत्यंतसंयोगे द्वितीयाबलाच्छुक्लपक्षेऽपीत्युक्तं तथा रात्रावपि तथा च माधवेन प्रतिपत्प्रकरणे स्पष्टमुक्तं वयं चाग्रे वक्ष्यामः अस्या दिने करणे लोप एव रात्रौ श्राद्धं न कुर्वीतेति निषेधादिति पृथ्वीचंद्रोदयः पात्राभावे कौर्मे उद्धृत्य वा यथाशक्ति किंचिदन्नं प्रकल्पयेत् तत्प्रतिपत्तिमाह विष्णुः ४४

भिक्षुकाभावेअन्नंगोभ्योदद्याद्ग्नौवाप्रक्षिपेदिति हेमाद्रौनागरखंडे नित्यश्राद्धंनकुर्वीतप्रसंगाद्यत्रसिद्ध्यति श्राद्धांतरेकृतेन्यत्रनित्यत्वात्तन्नहापयेत् षड्दैवतेपृथङ्नेत्यर्थः मात्स्ये ततस्तुवैश्वदेवांतेसभृत्यसुतबांधवः भुंजीतातिथिसंयुक्तःसर्वपितृनिषेवितं सर्वपर्वनिषिद्धंमांसमाषाद्यपीत्यर्थः एवंकृष्णैकादश्यादौगृहिणोपिभोजनम् अस्यवैधत्वेननिषेधाप्रवृत्तेः एवंग्रहणवेधेपि यत्तुनाहिताग्नेरमाषमासासव्रतयेदित्युक्तं तद्वैयमव श्रौतत्वेनतस्यबलवत्वात् देवलः श्राद्धंकृत्वातुयोमर्त्योनभुंक्तेथकदाचन देवाहव्यंनगृह्णंतिकव्यानिपितरस्तथा शिवरात्र्येकादश्यादौत्ववघ्राणमेव त्यक्तमाकृ यत्रतूपवासोनावश्यकस्तत्रैकभक्तमयाचितंवाकार्यमितिहेमाद्रिः जातूकर्ण्यः अहन्येवतुभोक्तव्यंकृतेश्राद्धेद्विजन्मभिः अन्यथात्वाकरश्राद्धंपरपाकेचसेविते श्राद्धशेषभोजनस्यकश्चिन्निषेधमाह हेमाद्रौप्रायश्चित्तकांडेमार्कंडेयः पित्रादीनामथान्येषांश्राद्धशेषान्नभोजनम् व्रतिनांविधवानांचयतीनांचविगर्हितं अन्येभिन्नगोत्राःव्रतिनोब्रह्मचारिणः श्राद्धावशिष्टभोक्तारस्तेवैनिरयगामिनः सगोत्राणांसकुल्यानांज्ञातीनांचनदोषकृदितितत्रैवोक्तेः तत्रैवजाबालिः विप्रस्त्वन्यगृहेश्राद्धेशिष्टान्नभोजनंचरेत् प्राजापत्यंविशुद्धिःस्याज्ज्ञातिगोत्रेनदोषकृत् यतीनांवपनंलक्षप्रणवजपश्चेतितत्रैवोक्तं अस्यापवादमाहसएव श्वशुरस्यगुरोर्वापिमातुलस्यमहात्मनः ज्येष्ठभ्रातुश्चपुत्रस्यब्रह्मनिष्ठस्ययोगिनः एतेषांश्राद्धशिष्टान्नंभुक्त्वादोषोनविद्यते इतिकेचित्प्रशंसंतिमुनयस्तदसम्मतं विशेषांतरंतत्रैवज्ञेयं हेमाद्रौजाबालिः तांबूलंदंतकाष्ठंचस्नेहस्नानमभोजनम् रत्यौषधिपरान्नानिश्राद्धकर्ताविवर्जयेत् पृथ्वीचंद्रोदयेआचार्यः नशूद्रंभोजयेत्तस्मिन्

गृहेयत्नेनतीह्वन्ते श्राद्धशेषंनशूद्रेभ्यःप्रदद्यादखिलेष्वपि इतिजगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टसूनुकमलाकर
भट्टकृतेनिर्णयसिंधौपार्वणश्राद्धं अथानुकल्पः तत्रविप्रालाभे भोजयेदथवाप्येकंब्राह्मणंपंक्तिपावनं दैवेकृ-
त्वातुनैवेद्यंपश्चात्तस्यतुनिर्वपेदितिशंखोक्तेरेकोविप्रःपूर्वमुक्तः विप्राभावेदर्भबटुः निधायवादर्भबटूनासनेषुसमा-
हितःप्रैषानुप्रैषसंयुक्तंविधानंप्रतिपादयेदितिदेवलोक्तेः अशक्तावामश्राद्धं आपद्यनग्नौतीर्थेचप्रवासेपुत्रजन्मनि
आमश्राद्धंप्रकुर्वीतभार्यारजसिसंक्रमेइति कात्यायनोक्तेः पृथ्वीचंद्रोदयेजमदग्निः यावत्स्यान्नाग्निसंयुक्तउत्सन्नाग्नि
रथापिवा आमश्राद्धंतदाकुर्याद्धस्तेऽग्नौकरणंभवेत् कौर्मे अनग्निरधनोवापितथैवव्यसनान्वितः आमश्राद्धंद्विजः
कुर्याद्वृषलस्तुसदैवहि आहिताग्नेःप्रवासस्थेतत्पत्नीगृहेदर्शंऋत्विगादिनाकारयेत् अमावास्यादिनियतंप्रोषितेध
र्मचारिणि पत्न्यातुकारयेन्नित्यमन्येनाप्यृत्विगादिनेतिलघुहारीतोक्तेरिति पृथ्वीचंद्रोदयः आदिपदमाब्दिकादिसर्व
पार्वणपरमितिशूलपाणिः क्रतुः पाकाभावेधिकारःस्याद्विप्रादीनांनराधिप अपत्नीनांमहाबाहोविदेशगमना
दिभिः सदाचैवतुशूद्राणामामश्राद्धंविदुर्बुधाः प्रचेताः स्त्रीशूद्रःश्वपचश्चैवजातकर्मणिचाप्यथ आमश्राद्धंसदाकु
र्याद्विधिनापार्वणेनतु स्वयंपचतीतिस्वपचः विष्णूशनसौ आत्मनोदेशकालाभ्यांविप्लवेसमुपस्थिते आपद्यनग्नौती
र्थेचप्रवासेपत्न्यसंभवे चंद्रसूर्यग्रहेचैवदद्यादामंविशेषतः नपक्वंभोजयेद्विद्वान्सच्छूद्रोपिकदाचन भोजयन्प्रत्य
वायीस्यान्नचतस्यफलंलभेत् अत्रप्रवासतीर्थग्रहणादावामहेमश्राद्धमेव पाकश्राद्धंतुनभवत्येवेतिहेमाद्रिरत्नावल्या

दयः अपरार्केविज्ञानेश्वरादयस्तु पाकाभावेद्विजातीनामामश्राद्धंविधीयतइतिस्मृत्युक्तेः साग्निकैर्निरग्निकैश्चप्रवासादौसर्वत्र पाकाभावेआमादिकार्यम् पाकसंभवेत्वन्नेनैवेत्याहुः अतएवपाकश्राद्धमुक्त्वा एतच्चानुपनीतोपिकुर्यात्सर्वेषुकर्मसु भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यश इतिमात्स्ये निरग्नेरपिपाकेनोक्तमितिशूलपाणिः तन्न एतच्छब्दःश्राद्धमात्रपर इत्यन्ये एकोद्दिष्टंतुकर्तव्यंपाकेनैवसदास्वयमिति लघुहारीतीयमपिसाग्नेरेव निरग्नेर्महैकोद्दिष्टमप्यामेन शूद्रस्यतुदशाहेपि ह्यामेनेति हलायुधः उत्सन्नाग्नीनांत्वामश्राद्धमेव पूर्वोक्तजमदग्निवाक्यात् मरीचिः श्राद्धंविप्रोद्विजातीनामामश्राद्धंप्रकीर्तितं अमावास्यादिनियतमाससंवत्सराद्दते स्मृतिदर्पणे मृताहंचसपिंडंचगयाश्राद्धंमहालयं आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचित् हेमाद्रौव्यासः आमंदद्यात्तुकौंतेयदद्यादामंचतुर्गुणं द्विगुणंत्रिगुणंवापिनत्वेकगुणमर्पयेत् सिद्धान्नेतुविधिर्यः स्यादामश्राद्धेप्यसौविधिः आवाहनादिसर्वंस्यात्पिंडदानंचभारत दद्याद्यच्चद्विजातिभ्यःशृतंवाशृतमेववा तेनाग्नौकरणंकुर्यात्पिंडांस्तेनैवनिर्वपेत् पश्चात्तरमाहसएव आमंदद्यात्तुकौंतेयतदामंद्विगुणंचरेत् त्रिगुणंचतुर्गुणंचापिनत्वेकगुणमर्पयेत् स्मृत्यर्थसारेसममप्युक्तं षट्त्रिंशन्मते आमश्राद्धंयदाकुर्यात्पिंडदानंकथंभवेत् गृहपाकात्समुद्धृत्य सक्तुभिःपायसेनवा पिंडान्दद्याद्यथालाभंतिलैःसहविमत्सरः पृथ्वीचंद्रोदयेव्यासः आमश्राद्धंयदाकुर्याद्विधिज्ञःश्राद्धदःसदा हस्तेग्नौकरणंकुर्याद्ब्राह्मणस्यविधानतः एतत्साग्नेर्निरग्नेःसदातत्सत्वात् यत्तु आमेनपिंडदद्याच्चद्विजान्पाकेनभोजयेत् पक्वेनकुरुतेपिंडमामान्नयःप्रयच्छति तावुभौमनुजौप्रोक्तौनरकार्हौनसंशयइति तद्दर्शादिपरं देशाचाराद्व्यवस्थेतियुक्तं मरी

चिः आवाहनेस्वधाकारेमंत्राऊह्याविसर्जने अन्यकर्मण्यनूह्याःस्युरामश्राद्धविधिःस्मृतः आवाहनेहविषे अत्तवइत्यत्रस्वीकर्तवेइ
त्यूहः स्वधाकारेनमोवःपितरइषेइत्यत्रइषेपदस्थानेआमद्रव्यायेत्यूहः विसर्जनेवाजेवाजेइत्यत्रतृप्ताइतिस्थानेतर्प्यततृप्यतेति
वोहः यद्यपितस्माद्दर्चनोहेदिति ऋच्यूहोनिषिद्धः तथापिवचनोद्भवति तृप्तिप्रश्नोवगाहश्चजुषप्रश्नोयथास्फुरं आमश्राद्धे-
भवेन्नेतदपोशानंचपंचमं अयंचानुवादः स्वलेवाल्याछेदनादीनामिवार्थाभावाल्लोपसिद्धेः धर्मप्रदीपेतु आमंचतुर्गुणंदद्याद्
यथाद्विगुणंतथा हेमंचाष्टगुणंतद्वदामेहेमेप्ययंविधिः आमेहेमेतथानित्येनांदीश्राद्धेतथैवच व्यतीपातादिकेश्राद्धेनियमान्
परिवर्जयेत् गृहपाकात्समुद्धृत्यसक्तुभिःपायसेनवा पिंडदानंप्रकुर्वीतआमेहेमेकृतेसति आमश्राद्धेचशूद्रैश्चप्रेतश्राद्धेतथैव
च विकिरंनैवकुर्वीतमुनिःकात्यायनोऽब्रवीत् आमश्राद्धमनंगुष्ठमग्नौकरणवर्जितं तृप्तिप्रश्नविहीनंतुकर्तव्यंमानवैर्ध्रुवम्
आवाहनाग्नौकरणंविकिरंपात्रपूरणं तृप्तिप्रश्नंनकुर्वीतआमेहेमेकदाचनेत्युक्तं एतच्च आवाहनंभवेत्कार्यमर्घ्यदानंतथैवचेति हे-
माद्रौभविष्यादिविरोधाच्चिंत्यम् शाखातरविषयंवास्तु विकिरोप्यामेनेतिहेमाद्रिः शूद्रस्यतुतत्रैवोक्तम् अग्नौकरण
मंत्रश्चनमस्कारोविधीयते अग्नयेकव्यवाहनायनमः सोमायपितृमतेनमइत्ययंमंत्रः मात्स्ये मंत्रवर्जंहिशूद्रस्यसर्वमे-
वविधीयते एवंशूद्रोपिसामान्यंवृद्धिश्राद्धंचसर्वदा नमस्कारेणमंत्रेणकुर्यादामान्नवद्बुधः तच्चपूर्वाण्हेकार्यम् आम
श्राद्धंतुपूर्वाण्हेएकोद्दिष्टंचमध्यतः पार्वणंचापराण्हेतुप्रातर्वृद्धिनिमित्तकमितिहारीतोक्तेः एतद्द्विजविषयं शूद्रकर्तृ-
कंतपराण्हएवमध्यान्हात्परतोयस्तुकुतुपःसमुदाहृतःआमश्राद्धंतुतत्रैवपितॄणांदत्तमक्षयमितिस्मृत्युक्तेरित्यपरार्केहेमाद्रौचोक्तम्

तद्भावेहेमश्राद्धमाह हेमाद्रौमरीचिः आमान्नस्याप्यभावेतुश्राद्धं कुर्वीतबुद्धिमान् धान्याच्चतुर्गुणेनैवहिरण्येनस्फरोचिषा
धर्मः आमंतुद्विगुणंप्रोक्तंहेमंतद्वच्चतुर्गुणं स्मृत्यर्थसारे हिरण्यमष्टगुणंचतुर्गुणंसमंवादद्यात् हेमाद्रौभविष्ये अन्ना
भावेद्विजाभावेप्रवासेपुत्रजन्मनि हेमश्राद्धंसंग्रहेचनपास्त्रीशूद्रयोरपि षट्त्रिंशन्मतेतुर्यंपादंवर्जयित्वाक्षयेहनीतिपाठः
यस्यभार्यारजस्वलेतिव्यासपाठः पुत्रोत्पत्तौतुहेमनियममाहसंवर्तः पुत्रजन्मनिकुर्वीतश्राद्धंहेम्नैवबुद्धिमान् नपक्वेनन
चामेनकल्याणान्यभिकामयन् भविष्ये गृहपाकात्समुद्धृत्यसक्तुभिःपायसेनवा पिंडदानंप्रकुर्वीतहेमश्राद्धेकृतेसति
शूद्रस्तुगृहपाकेनतत्पिंडान्निर्वपेत्तथा सक्तुमूलफलंतस्य पायसंवाभवेत्स्मृतं हेमश्राद्धेपिंडदानमितिदिवोदासः स्मृत्य
र्थसारेतुविकल्पउक्तः तदाशयंनविद्मः षट्त्रिंशन्मते नामंत्रणाग्नौकरणंविकिरोनैवदीयते तृप्तिप्रश्नोपिनैवात्रकर्तव्यःकेन
चिद्भवेत् अत्रमरीचिना आमाभावेहेमविधानेनस्यान्नापत्ताधर्मप्राप्तेः पूर्ववन्मंत्रोहः पूर्वाह्णकालताचज्ञेयेतिदिक् पूर्वो
क्तधर्मप्रदीपोक्तेश्च व्यासः हिरण्यमामश्राद्धीयंलब्धंयत्क्षत्रियादितः यथेष्टंविनियोज्यंस्याद्भुंजीयाद्ब्राह्मणात्स्वयं वि
प्रलब्धंभुंजीयात् क्षत्रियादिलब्धेतुयथेष्टविनियोगः तेनापिश्राद्धंवैश्वदेवादिनकार्यं देवोद्देशेनत्यक्तस्यदेवतान्तराय
त्यागायोगादितिदेवयाज्ञिकः शूद्रलब्धेतूक्तंतत्रैवषट्त्रिंशन्मते आमंशूद्रस्ययत्किंचिच्छ्राद्धिकंप्रतिगृह्यते तत्सर्वंभो
जनायालंनित्यनैमित्तिकेनचेति शुद्धितत्वेंगिराः शूद्रवेश्मनिविप्रेणक्षीरंवायदिवादधि निवृत्तेननभोक्तव्यंशूद्रान्नंतद
पिस्मृतं शूद्राद्विप्रगृहेष्वन्नंप्रविष्टंतुसदाशुचि पराशरः तावद्भवतिशूद्रान्नंयावन्नस्पृशतिद्विजः द्विजातिकरसंस्पृष्टंस

वैतन्नविरुद्ध्यते विष्णुपुराणे संप्रोक्षयित्वागृण्हीयाच्छुद्धान्नं गृहमागतं अंगिराः पात्रांतरगतं ग्राह्यं दुग्धं स्वगृहमागतं सर्पिं उश्चान्नूशक्तावाह हेमाद्रौ संवर्तः समग्रं यस्तु शक्नोति कर्तुं नैवेह पार्वणं अपि संकल्पविधिना काले तस्य विधीयते पात्रे भोज्यस्य चान्नस्य त्यागः संकल्प उच्यते व्यासः सांकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणं नावाहनाग्नौकरणे पिंडांश्चैव वर्जयेत् पात्रसर्घ्यस्य समंत्रकावाहनस्य निषेधः तूष्णीं तु भवत्येवेति हेमाद्रिः स्मृत्यर्थसारे विकिरस्तु न दातव्यमिति तृतीयपादे पाठः स्मृत्यंतरे त्यजेदावाहनं चार्घ्यमग्नौकरणमेव च पिंडांश्च विकिरांश्चैव श्राद्धे सांकल्पसंज्ञके हेमाद्रौ वृद्धशातातपस्तु पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते स्वधावाचनलोपोत्र विकिरस्तु न लुप्यत इत्याह पृथ्वीचंद्रोदये वसिष्ठः आवाहनं स्वधाशब्दं पिंडाग्नौकरणं तथा विकिरं पिंडदानं च सांकल्पे षड्विवर्जयेत् विकिरे विकल्पः स्मृत्यंतरे अंगानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात् स तदा वाचयेद्विप्रान् संकल्पात्सिद्धिरस्त्विति छागलेयः पिंडो यत्र निवर्तेत मघादिषु कथंचन सांकल्पं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः कार्ष्णाजिनिः मौंजीबंधाद्वत्सरार्धं वत्सरं पाणिपीडनात् पिंडान् सपिंडनाद्द्युः प्रेतपिंडं विनात्र तु अस्यापवादः पित्रो शाब्दिकादौ पूर्वमुक्तः त्यक्ताग्नेरपि सांकल्पमुक्तं षाड्विंशन्मते अनग्निको यदा विप्रउत्सन्नाग्निस्तथैव च तथा वृद्धिषु सर्वासु संकल्पश्राद्धमाचरेत् अशक्तौ पृथ्वीचंद्रोदये बृहन्नारदीये द्रव्याभावे द्विजाभावे अन्नमात्रं तु पाचयेत् पैतृकेन तु सूक्तेन होमं कुर्याद्विचक्षणः देवलः पिंडमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः श्राद्धीयाहनि संप्राप्ते भवेन्निरशनोपि वा वृद्धवसिष्ठः किंचिद्दद्यादशक्तस्तु उदकुंभादिकं द्विजे तृणानि वा गवे दद्यात्पिंडान्वा

प्यर्थं निर्वपेत् तिलदर्भैः पितॄन्वापि तर्पयेत्स्नानपूर्वकं हेमाद्रौ भविष्ये अग्निना वा दहेत्तु कक्षं श्राद्धकाले समागते तस्मिन्वोपवसेदन्हि जपेद्वा श्राद्धसंहितां श्राद्धसंहितासमंत्रश्राद्धसंकल्पः विष्णुवराहपुराणयोः असमर्थोन्नदानस्य धान्यमामं स्वशक्तितः प्रदास्यतितिलान्वापि स्वल्पां वापि च दक्षिणां सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति नमेस्ति वित्तं न धनं न चान्यच्छ्राद्धोपयोगि स्वपितॄन्नतोस्मि तृप्यंतु भक्त्या पितरो मयैतौ भुजौ कृतौ वर्त्मनि मारुतस्य इत्येतत्पितृभिर्गीतं भावाभावप्रयोजनं यः करोति कृतं तेन श्राद्धं भवति भारत प्रभासखंडे गत्वारण्य- ममामुष्यमूर्ध्वबाहुर्विरौत्यदः निरन्नो निर्धनो देवाः पितरो मा नृणां कृथाः नमोस्ति वित्तं न धनं न भार्या श्राद्धं कथं वः पितरः करोमि वनं प्रविश्येह तु तन्मयोच्चैर्भुजौ कृतौ वर्त्मनि मारुतस्य श्राद्धर्णमेतद्भवता प्रदत्तं मत्यं दयध्वं पितृदेवता याः आख्याय चोत्क्षिप्य भुजौ ततो वै दिवा च रात्रिं समुपोष्य तिष्ठेत् भवेत्सर्वं तेन कृतेन तेषामृणेन मुक्तः पितृदेवतानाम् इत्यनुकल्पः

अथ श्राद्धभोजने प्रायश्चित्तं दर्शे षट्प्राणायामाः वृद्धौ त्रयः संस्कारेषु जातकर्मादिचूडांतेषु सांतपनं आद्ये चांद्रं वा अन्यसंस्कारेषूपवासः सीमंते चांद्रमिति विज्ञानेश्वरः आपदि नवश्राद्धेकादशाहेषु भोजनेषु कार्यः द्वादशाहे ऊनमासेन्न पादोनः द्विमासे त्रिपक्षे ऊनषष्ठे नाब्दयोः श्राद्धे कृच्छ्रः त्रिमासाद्याब्दिकांतेषु सपिंडने च पादकृच्छ्रः उपवासो वा गुरुरित्यर्थे भोजने द्विजपशीले तदर्धं अनापदि तूनमासांतेषु चांद्रं कार्यं वा द्विमासादौ पादोनं त्रिमासादावर्धं कार्यः आब्दिके पादोनं कार्यः पुनराब्दिके एकाहः क्षत्रियादिश्राद्धेषु द्वित्रिचतुर्गुणानि ज्ञेयानि चांडालसर्पश्वादिहत पतित क्लीबादिनवश्राद्धे चांद्रं आद्यमासि

कांते चांद्रं पराकश्च द्वादशाहादौ पराकः द्विमासादावतिकृच्छ्रः त्रिमासादौ कायः आब्दिके पादः अभ्यासे सर्वं द्विगुणं आमहेमसंकल्पश्राद्धेषु तत्तदर्धानि यतिर्ब्रह्मचारी चोक्तप्रायश्चित्तं कृत्वा त्रीनुपवासान्प्राणायामान्घृताशनं चाधिकं कृत्वा व्रतशेषं समापयेत् अनापदि द्विगुणं दर्शादौ दश गायत्रीमंत्रिता आपः पिबेत् षट् प्राणायामा वा संस्कारेषु चौले कृच्छ्रः सीमंते चांद्रं अन्येषूपवास इति दिक् अत्र माधवमिताक्षरादौ क्वचिद्विरोधो विषयभेदात्परिहार्यः एकादशाहे चांद्रं पुनः संस्कारश्चेति प्रायश्चित्तकांडे हेमाद्रिः यत्तूशनाः दश हूलः पिबेदापो गायत्र्याश्राद्धभुग्द्विज इति तदनुक्तप्रायश्चित्तश्राद्धपरमिति विज्ञानेश्वरः अथ क्षयाहश्राद्धं तत्स्वरूपमाह हेमाद्रौ व्यासः मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियते हनि प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुः नारदीये पारणे मरणे नॄणां तिथिस्तात्कालिकी स्मृता अत्र चांद्रमानं ज्ञेयं आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यत इति गर्गोक्तेः मलमासमृतस्य तु सौरं मलमासमृतानां तु सौरं मानं समाश्रयेदिति हेमाद्र्युक्तेः एतन्मृतमासस्यैवाधिको ज्ञेयं ब्राह्मे प्रतिसंवत्सरं कार्यं मातापित्रोर्मृते हनि पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि अपुत्रस्येति भ्रात्राप्यन्वयः ज्येष्ठस्येति कनिष्ठस्यानावश्यकत्वार्थं मदनरत्ने भविष्ये सर्वेषामेव श्राद्धानां श्रेष्ठं सांवत्सरं मतम् तथा मोजको यस्तु वै श्राद्धं न करोति खगाधिप मातापितृभ्यां सततं वर्षे वर्षे मृते हनि स याति नरकं घोरं तामिस्रं नाम नामतः तच्च नानास्मृतिष्वेकोद्दिष्टं पार्वणं चोक्तं आद्यमाह यमः सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृते हनि व्यासः एकोद्दिष्टं तु कर्तव्यं पित्रोश्चैव मृते हनि एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः अकृतं तद्विजानीयाद्भवेच्च पितृघात

कः अत्यमाह शातातपः सपिंडीकरणं कृत्वा कुर्यात् पार्वणवत्सदा प्रतिसंवत्सरं श्राद्धं छागलेनोदितो विधिः यःसपिंडीकृतं प्रेतं पृथक्पिंडे नियोजयेत् विधिघ्नस्तेन भवति पितृहा चोपजायते अत्रौरसक्षेत्रजयोः पार्वणं दत्तकादीनामेकोद्दिष्टमित्येकः पक्षः साग्नेः पार्वणं निरग्नेरेकोद्दिष्टमित्यपरः तद्दूषणं मिताक्षरादौ ज्ञेयं कल्पतरुस्तु साग्न्योरौरसक्षेत्रजयोः पार्वणं निरग्निकयोस्त्वेकोद्दिष्टमित्याह अपरार्केप्येवं दत्तकादयो दशपुत्रास्तु साग्नयो निरग्नयश्चैकोद्दिष्टमेव कुर्युः मत्स्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दशेति जातूकर्ण्योक्तेः यदा तु दत्तकस्य पिता दर्शे महालये वा मृतस्तत्र पार्वणैकोद्दिष्टयोर्विकल्पः वस्तुतस्तु सर्वेषां पार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्पः स च देशाचाराद्व्यवस्थित इति सर्वनिबंधसिद्धांतः अत एव पृथ्वीचंद्रोदये वृद्धपराशरः मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेहनीत्येकस्त्वाह देशधर्मं समाश्रित्य वंशधर्मं तथा परे सूरयः श्राद्धमिच्छंति पार्वणं च क्षयाह्न्यपीति तच्च केवलपितृणां न सपत्नीकानामिति हेमाद्रिः अत्र मातामहानां कार्यः कर्षूसमन्वितं कृत्वा तथाद्यं श्राद्धं षोडशं मत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति कात्यायनोक्तेः कर्षूसमन्वितं सपिंडनं येरेकोद्दिष्टं क्रियते तेषामपि क्वचित्पार्वणमेव शंखोक्तेः एवं सन्यासिनोपि एकोद्दिष्टं यतेर्नास्ति त्रिदंडग्रहणादिह सपिंडीकरणाभावात्तं पार्वणं तस्य सर्वदेति प्रचेतसोक्तेः वायवीये सन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथाविधि महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं हि तत् पृथ्वीचंद्रोदये वृद्धपराशरः संन्यासे संस्थितानां च प्रेतपक्षे समाश्रये तेषां पार्वणमेवोक्तं क्षयाहेपि च सत्तमैः चंद्रक्षयानाशकसंयुगेषु यः प्रेतपक्षे मृतवान्न सपिंडः सपिंडितानामपि चाब्दिकानि भवंति तेषामिह पार्वणानि तथा भ्रातुर्ज्येष्ठस्य कुर्वीत ज्ये

ष्ठोभ्रातानुजस्यच दैवहीनंतुतत्कुर्यादितिधर्मविदब्रवीत् दैवहीनमेकोद्दिष्टं ज्येष्ठोभ्रातानाद्यगर्भजः तथाचतत्रैवशातातपः अनाद्यगर्भजेज्येष्ठोपिभ्राताभ्रातुर्विनिगद्यते कृतेसपिंडनात्तस्यनैवपार्वणमाचरेत् आद्यगर्भेतुपार्वणमेकोद्दिष्टंवेत्यर्थः मातुस्तुहेमाद्रौकात्यायनः मृत्यब्दंयोयथाकुर्यात्पुत्रःपित्रोःसदाद्विजः तथैवमातुःकर्तव्यंपार्वणंचान्यदेववा यत्तुतेनैवोक्तं सपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणं पितृव्यभ्रातृमातॄणामेकोद्दिष्टंसदैवहीति तत्सापत्नमातृपरं यत्तुवृद्धपराशरः अपुत्रस्यपितृव्यस्यतत्पुत्रोभ्रातृजोभवेत् सएवास्यतुकुर्वीतपिंडदानादिकंक्रिया पार्वणंतेनकार्यंस्यात्सुतवद्भ्रातृजेनतु पितृस्थानेतुतत्कुलाशेषंपूर्ववदुद्धरेदिति तत्तुपितृवद्देशाचारव्यवस्थितमिति पृथ्वीचंद्रः श्राद्धदीपकलिकायांचतुर्विंशतिमतेतु पितृव्यभ्रातृमातॄणांज्येष्ठानांपार्वणंभवेत् एकोद्दिष्टंकनिष्ठानांदंपत्योःपार्वणंमिथः अपुत्रस्यपितृव्यस्यभ्रातुर्ज्येष्ठेवाग्रजन्मनः भ्रातासहस्यतत्पत्न्याःश्राद्धंपार्वणवद्भवेदित्युक्तं तत्पत्न्याःकर्तृत्वेपिपार्वणमेव सर्वाभावेत्वपत्न्याःस्वभ्रातॄणाममंत्रकंसपिंडीकरणंकुर्युस्ततःपार्वणमेवचेतिलौगाक्षिस्मृतेः ततःपत्न्यपिकुर्वीतसापिंड्यंपार्वणंतथेतिस्मृत्युक्तेश्चेतिनिर्णयामृतेउक्तं अन्येत्वेतत्साग्निकपार्वणपरमाहुः अतएवभर्तुःश्राद्धंतुयानारीसोद्दात्पार्वणमाचरेत् नतेनतृप्यतेभर्ताकृत्वातुनरकंव्रजेदितिवचनंक्षयाहेपाक्षिकैकोद्दिष्टप्रसंगार्थंनपार्वणनिषेधार्थमित्युक्तं त्रिस्थलीसेतौभट्टचरणैःस्वभर्तृप्रभृतित्रिभ्यइत्यनेनाविरोधाच्च अपुत्राणांचाहहेमाद्रावापस्तंबः अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषाश्चये तेषामपिचदेयंस्यादेकोद्दिष्टंनपार्वणं मित्रबंधुसपिंडेभ्यःस्त्रीकुमारिभ्यएवच दद्याद्वैमासिकंश्राद्धंसांवत्सरमतोन्यथा पारिजातेतु अन्यथापार्वणमित्युक्त्वासर्वत्रपार्वणमित्युक्तं एकोद्दिष्टवाक्यानितुतीर्थमहालयपराणीत्युक्तं पृथ्वीचंद्रोदयेवृद्धगार्ग्यः मातुःसहोदरायाचपितुःसहभवाचया तयोश्चैनेवकु

वीतपार्वणपिंडमाहृते प्रत्येताः सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते अपुत्राणांचसर्वेषामपत्नीनांतथैवच अपत्नीनांब्रह्मचर्यादीनां मार्कंडेयपुराणे प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः मृताहनि यथान्यायं नृणां यद्वदिहोदितं नृणामिति दृष्टांतात् गोविप्रहतपाखंड्यादीनांसपिंडनाभावेपि सांवत्सरमेकोद्दिष्टंकार्यमेवेतिशूलपाणिः अत्रिस्तु वसिष्ठौ सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च पितृव्यश्वशुरे श्राद्धमेकोद्दिष्टं न पार्वणं यत्तु जातूकर्ण्यः पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च मातामहस्याप्यसुतस्य श्राद्धादि पितृवद्भवेदिति तदावश्यकत्वार्थं न तु पार्वणार्थमिति हेमाद्रिः युक्तं चैवम् मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः इति पुलस्त्योक्तेर्मातामहस्य पार्वणमेव तस्माहृतयात् पितृव्यादेस्तथा पितृव्यभ्रातृमातॄणामेकोद्दिष्टं च पार्वणमिति क्षयाहोक्तौ पक्षे पुलस्त्योक्तेश्च विकल्पः केचित्त्वापस्तंबादिवाक्यानि पुत्रमात्रप्रतीतानां नैव कार्या सपिंडता तस्य स्यात्पितृव्यादि परस्तादकृतसपिंडनपितृव्यादिपराणीत्याहुः मातासपत्नमाता एकोद्दिष्टं तु कनिष्ठपरमिति पृथ्वीचंद्रोदयेप्येवम् विशेषस्त्वधिकारिनिर्णये प्रागुक्तः केचित्तु पुत्रांतराभावेपि पितामहवार्षिकमप्यावश्यकम् पुत्राभावे च तत्पुत्रः पत्नी माता तथा पिता शिष्याभावेपि सच्छिष्यः कुर्यात्तस्यौर्ध्वदैहिकमिति मार्कंडेयपुराणादित्याहुस्तन्न पौत्रेणैकादशाहादि कर्तव्यं श्राद्धं षोडशमिति कार्तीयविशेषोक्तेः अथ क्षयाहे द्वैधे निर्णयः तत्रैकोद्दिष्टं मध्याह्ने कार्यं मध्याह्नश्च पंचधाविभक्तदिनतृतीयभाग इति माधवः आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति हारीतोक्तेः प्रातःशब्दसाहचर्यात् तत्रापि कुतपादिमुहूर्तत्रितये ज्ञेये मारभ्य कुरुते श्राद्ध

नि॰सिं॰
५०

प॰आ॰
३

कुर्यादारोहिणंबुधः विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेदितिगौतमोक्तेरेतत्परत्वात् रौहिणोनवमोमुहूर्तः मैथिलाः श्रा
द्धकौमुदीचैवम् अन्यथा ऊर्ध्वंमुहूर्तात्कुतुपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यतइत्यादिविरोधात् दी
पिकापि एकोद्दिष्टमुपक्रमेत्कुतपइति माधवीयेव्याप्तोपि कुतपप्रथमभागेएकोद्दिष्टमुपक्रमे आवर्तनसमीपेवातन्त्रे
वनियतात्मवान् पृथ्वीचन्द्रोदयेप्येवं तेनकुतुपादिरौहिणान्तोमुख्यःकालः दिनद्वयेतद्व्याप्तौसमव्याप्तौचपूर्वा विषमव्या
प्ताबाधिक्येननिर्णयः अव्याप्तौपूर्वैव परविद्धायानिषेधात् साचपूर्वदिनेरौहिणलंघनापत्तेः परैवेतिगौडाः शूलकृष्णाव
शालसर्वदर्पणाद्यैर्वाव्यवस्थेत्यन्ये तन्न परविद्धानिषेधप्राबल्यात् अत्रमूलंकालमाधवीयेज्ञेयं पार्वणंत्वपराण्हेकार्यंपूर्वोक्तव
चनात् मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत् अपराण्हव्यापिनीयापार्वणेसातिथिर्भवेदिति पृथ्वीचन्द्रोदयेवृद्धगौ
तमोक्तेश्च पूर्वेद्युरेवपरेद्युरेववापराण्हव्याप्तौसैवग्राह्या दिनद्वयेतद्व्याप्तौतदस्पर्शेशतः समव्याप्तौवापूर्वैव विषमव्याप्तौत्वधि
काग्राह्या ह्यपराण्हव्यापिनीस्यादाब्दिकस्ययदातिथिः महतीयअतीद्रुंप्रशंसंतिमहर्षय इति मरीचिस्मृतेः दर्शंचपूर्ण-
मासंचपितुःसांवत्सरंदिनं पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइत्यपरार्केनारदोक्तेः अह्नेप्यव्यापिनीचेत्स्यान्मृताहस्ययदा
तिथिः पूर्वविद्धाप्रकर्तव्यात्रिमुहूर्ताभवेद्यदीतिसुमन्तूक्तेः पूर्वस्यानिर्वपेत्पिण्डानित्यांगिरसभाषितमितिहेमाद्रौपाठः त
त्रैवबृहन्मनुः नअह्नव्यापिनीचेत्स्यान्मृताहस्यचयातिथिः पूर्वविद्धैवकर्तव्यात्रिमुहूर्ताचयाभवेत् मदनरत्नेप्येवं पञ्चका
ष्ठाजिनिव्याप्तौ अन्हेस्तमयवेलायांकलामात्रायदातिथिः सैवमत्याब्दिकेज्ञेयानापरापुत्रहानिदेति त्रिमुहूर्तस्तुतिः पूर्वेद्यु

५०

सायंत्रिमुहूर्ताभावेतु परेव त्रिमुहूर्तानचेद्व्याप्यपरेवकुतपोहिसेति कालादर्शेगोभिलोक्तेः कालादर्शेपि मत्स्याब्दिकेप्येवमेवतिथिर्ग्राह्यापराह्णिकी उभयत्रतथात्वेतुमहत्त्वेनैवनिर्णयः समत्वे पूर्वविद्धैवस्यात्तथात्वेपि सायदि त्रिमुहूर्ताभवेत्सायं सर्वेष्वेयंविनिर्णयः अन्यत्रापि सायन्तन्यपरत्रचेन्मृततिथिः सेवाब्दिकेमासिके ग्राह्यासाद्व्यपराह्णयोर्यदि तदा यत्राधिका सामना तुल्याचेदुभयापराह्णसमये पूर्वानचेत्तुद्वये पूर्वैवत्रिमुहूर्तासा त्वसमयेनोचेत्परैवोचिता माधवपृथ्वीचंद्रौतु दिनद्वये पराह्णव्याप्तौ अंशतः समव्याप्तौच क्षये पूर्वा वृद्धौपरा खर्वदर्पौ परौ पूज्यावित्युक्तेः अपराह्णद्वयव्यापिन्यतीतस्यचयातिथिः क्षये पूर्वाच कर्तव्या वृद्धौ कार्या तथोत्तरेति बौधायनोक्तेः क्षयाहस्यतिथिर्यातु अपराह्णद्वयेयदि पूर्वाक्षयेतुकर्तव्या वृद्धौ कार्या तथोत्तरेति बृहन्नारदीयाच्चेत्याहुः वृद्धिक्षयौ चात्र पूर्वतिथेर्नतु ग्राह्यतिथेः तस्याःक्षये पराह्णद्वयव्याप्तेरसंभवात् तदाह माधवः न ग्राह्यतिथिगौ वृद्धिक्षयौ पूर्वतिथेस्तु ताविति यत्तु पृथ्वीचंद्रः पूर्वोक्तवचनेषु यत्र सायाह्नास्तमययोगिनी तिथिरुक्ता तत्रापराह्णव्यापिनी ज्ञेया सायाह्नस्त्रिमुहूर्तःस्यात्तत्र श्राद्धं न कारयेदिति मात्स्यादौ सायाह्ननिषेधात् यच्च त्रिमुहूर्तादिग्रहणं तच्छास्त्रोक्तापराह्णरूपत्रिमुहूर्तपरमित्याह तद्धेमाद्रिमदनरत्नकालादर्शादिग्रन्थविरोधाल्लक्षणापत्तेश्चाचिन्त्यम् तस्मात्पूर्वोक्तमेव साधु यदा विघ्नवशाद्दिने सांवत्सरश्राद्धं न कृतं तदा रात्रावपि कार्यं मृताहं समतिक्रम्य चण्डालेष्वपि जायत इति मरीचिना मृताहातिक्रमे दोषोक्तेः नच नक्तं श्राद्धं कुर्वीतारब्धे वा भोजनसमापनमित्यापस्तम्बेन गौणकालोक्तेश्चेति माधवः आरब्धे श्राद्धे विघ्नवशात्कृत्स्नविभागे पाते भोजनसमाप्त्यन्ते रात्रौ कार्यं शेषसमाप्तिः परदिने एवेति हरदत्तः ग्रहण

दिने वार्षिकप्राप्तौ तद्दिन एवान्नेनामेन हेम्ना वा कुर्यात् नोत्तरदिने इत्युक्तं प्राक् ग्रहणनिर्णये तच्च प्रथमाब्दिकं त्रयोदशे मलमासे कार्यमन्यथा न प्रेतस्य द्वादशे मासि कार्या पिंडक्रिया स्मृतेः क्वचित्त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरमिति लघुहारीतोक्तेः इदमंत्याधिकमासपरं द्वादशे त्रयोदशे वातीत इत्यर्थः तेन यत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशेऽधिक एवाब्दिकं कार्यं यत्राधिकमध्ये द्वादशं मासिकं तत्र तस्य द्विरावृत्तिं कृत्वा चतुर्दशे शुद्ध एव प्रथमाब्दिकमितीति माधवीये हेमाद्रौ चैवं द्वितीयाब्दिकं तु शुद्धमास एव नाधिके नाप्युभयोः मलमासमृतानां तु यदा स एवाधिकः स्यात्तदा तत्रैव कार्यमन्यथा शुद्ध एवेति प्रागुक्तम् दर्शे वार्षिकं चेत्तदा पूर्वं वार्षिकं कृत्वा ततः पिंडपितृयज्ञो दर्शश्राद्धं चेति निर्णयदीपेक उक्तः स्मृतिसारेऽपि दर्शे क्षयाहसंप्राप्ते कथं कुर्वंति याज्ञिकाः आदौ क्षयाहं निर्वर्त्य पश्चाद्दर्शो विधीयत इति युक्तं त्वेवम् तद्वचने मूलाभावात् पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति दर्शश्राद्धे पिंडपितृयज्ञानंतर्यात्तस्याब्दिकेप्यतिदेशात्प्राप्तेः पितृयज्ञानंतरं वार्षिकं ततो दर्शश्राद्धमिति व्यतिषंगस्तु न भवत्येव तस्यार्थिकत्वात् कालादर्शेऽपि निमित्तानि यतश्चान्नपूर्वानुष्ठानकारणमिति सर्वान्प्रत्येकरूप्याभावात् क्षयाहनिमित्तस्यानियतत्वम् देवजानीयेप्येवं एवं मासिकादिष्वपि ज्ञेयं प्रेताब्दं वा यथा कुर्यात्तथान्यपीति सर्वातिदेशात् मृताहवृषोत्सर्ग उक्तो हेमाद्रौ विष्णुधर्मे अघनाड़ितये चैवं मृताहे बांधवस्य च उत्सृजेन्नीलवृषभं कौमुद्याः समुपागमे कौमुदी कार्तिकी अथ शुद्धिश्राद्धं दिवोदासीये सपिंडीकरणादूर्ध्वं यावदब्दत्रयं भवेत् तावदेव न भोक्तव्यं क्षयेऽहनि कदाचन वर्षांतसपिंडनेप्येतत्तुल्यं मृताहनि तु संप्राप्ते यावदब्दचतुष्टयं बहिःश्राद्धं प्रकुर्वीत न कुर्याच्छ्राद्धभोजनं प्रथमेस्थीनिमज्जा च द्वितीये मांसभक्षणं तृ

तृतीयेरुधिरंप्रोक्तंश्राद्धंशुक्लंचतुर्थकमिति श्राद्धकारिकोक्तेः शुक्लंकिंचिदितिज्ञेयं स्मृत्यंतरे सप्तत्रिंशच्चयोमासान्श्राद्धेभुंक्तेतमो-
हतः सपंक्तिदूषितःपापःप्रेताशीचभवेत्तुसः तत्रप्रथमेब्दे वर्षांतसपिंडनपक्षे मृताहात्पूर्वेन्हि सपिंडनमब्दपूर्तिश्राद्धंच कृत्वापरेद्युर्वा
र्षिकंकुर्यादिति स्मृत्यर्थसारे उक्तं हेमाद्रिस्तु मृताहे सपिंडीकरणेनैव वार्षिकसिद्धिः पूर्णेसंवत्सरेपिंडः षोडशः परिकीर्तितः ते
नैवचसपिंडत्वंतेनैवाब्दिकमिष्यतइतिवचनादित्याह इदमेवयुक्तं अथक्षयाहाज्ञानेमरीचिः श्राद्धविघ्ने समुत्पन्ने अविज्ञातमृ
तेहनि एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतइत्युक्तेः शुक्लैकादश्यामपि बृहस्पतिः नज्ञायतेमृताहश्चेत्प्रमीतेप्रोषितेसति
मासश्चेत्प्रतिविज्ञातस्तद्दर्शेस्यादथाब्दिकं दिनमासौनविज्ञातौमरणस्ययदापुनः प्रस्थानमासदिवसौ ग्राह्यौ पूर्वोक्तयादिशा
मदनरत्ने भविष्ये मृताहंयोनजानातिमानवोविनतात्मज तेनकार्यममावास्याश्राद्धंसांवत्सरंसदा दिनमेवतुजानातिमासंनैवतुयोनरः मार्गशी
र्षेतथाभाद्रेमाघेवातद्दिनंभवेत् निर्णयामृतेतु यदामासोनविज्ञातोविज्ञातंदिनमेवतु तदाचाषाढकेमासिमाघेवातद्दिनंभवेत् इतिबृ
हस्पतिस्मृतेराषाढोप्युक्तः कालादर्शेपि मासाज्ञानेदिनज्ञानेकार्यमाषाढमाघयोरित्युक्तं हेमाद्रौप्रभासखंडे मृताहंयोनजानातिमास
वापिकथंचन तेनकार्यममावास्याश्राद्धंमाघेथमार्गके भविष्ये मृतवार्ताश्रुतेग्राह्यौतौपूर्वोक्तक्रमेणतु पूर्वोक्तेतिप्रस्थानदिना
ज्ञानेमासज्ञानेचतद्दर्शे मासाज्ञानेदिनज्ञानेचमार्गादावितिवच्छ्रवणदिनेपिज्ञेयमित्यर्थः श्रवणदिनेमासाज्ञानेमाघमार्गदर्शेकार्यं पू
र्वोक्तप्रभासखंडात् अतोत्रलोपइतिशूलपाण्युक्तंहेयं तिथितत्त्वेयमः गतस्यनभवेद्वार्तायावद्द्वादशवार्षिकी प्रेतावधारणंतस्यकर्तव्यं
सुतबाधवैः यन्मासियदहर्यातस्तन्मासितदहःक्रिया दिनाज्ञानेकुहूस्तस्यआषाढस्याथवाकुहूः अथश्राद्धविघ्ननिर्णयः तत्रादिप्रस्थानि

मंत्रणोत्तरं सूतके मृतके चाशौचाभावः निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि निमंत्रणाद्धि विप्रस्य स्वाध्यायाद्विरतस्य च देहे पितृषु तिष्ठत्सु नाशौ
चं विद्यते क्वचिदिति ब्राह्मोक्तेः कर्तुस्तु विष्णुराह व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे आरब्धे सूतकं न स्यादनारब्धे तु सूतकं श्राद्धे प्रारंभ
स्त्वेनेवोक्तः प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति माधवीये ब्राह्मेपि श्राद्धादौ पितृयज्ञे च कन्या
दाने च नो भवेत् मिताक्षरायां स्मृत्यंतरे सद्यःशौचं प्रकृत्य यज्ञे संभृतसंभारे विवाहे श्राद्धकर्मणीति तिथितत्वादिगौडग्रंथास्तु निमंत्रणोत्तरं क
र्तुर्भोक्तुश्च नाशौचं निमंत्रणोत्तरं श्राद्धे प्रारंभः स्यादिति स्मृतिरिति विष्णूक्तेः यत्तु श्राद्धे पाकपरिक्रियेति तद्दर्शश्राद्धविषयमित्याहुः
दातृगृहे मरणादौ ब्राह्मे उक्तं भोजनार्थं तु संभुक्ते विप्रे दातुर्विपद्यते गृहे इति शेषः यदा कश्चित्तदोच्छिष्टं शेषं त्यक्त्वा समाहितः आच
म्य परकीयेन जलेन शुचयो द्विजा इति अस्य श्राद्धविषयत्वं हेमाद्रिणोक्तं पृथ्वीचंद्रोदयेप्येवं मम तु प्रतिभाति इदं विवाहादिविषयं न
तु श्राद्धविषयं तत्पदाभावात् विवाहोत्सवयज्ञेषित्कपक्कस्य भुंजानेषु तु विप्रेषु त्वंतरा मृतसूतके अन्यगेहोदकाचांताः सर्वे ते शुचयः
स्मृता इति षट्त्रिंशन्मतेकवाक्यात् निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणीति पूर्वोक्तविरोधाच्च श्राद्धे तु यद्यपि विष्णुना पाकोत्तरमा
शौचाभाव उक्तस्तथापि कर्तुरेव सः भोक्तुर्दोषोस्त्येव अपि दातृगृहीत्रोश्च सूतके मृतके तथा अविज्ञानेन दोषः स्याच्छ्राद्धादिषु कथंचन
विज्ञाने भोक्तुरेव स्यात्प्रायश्चित्तादिकं क्रमात् इति माधवीये ब्राह्मोक्तेः आदिशब्देनाशौचमुच्यते तथाह विष्णुः ब्राह्मणादीनामाशौचे यः
सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तं कुर्यादिति यत्तु देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचिदिति ब्राह्मं तत् श्राद्ध
कालीनस्य निषेधकं न तदुत्तरकालीनस्य शुद्धिदीपस्तु निमंत्रितश्चित्यामश्राद्धपरं भोजनार्थं त्वित्यादि त्वन्नश्राद्धपरमित्याह प्रायश्चित्तमाह मार्कंडेयः

मुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः एतत्कामतः अभ्याशंखः ब्राह्मणस्य तथा भुक्त्वा मासमेकं व्रती भवेदिति अज्ञानात्तु छागलेयः एकाहं चत्र्यहं पंच सप्तरात्रमभोजनम् ततः शुचिर्भवेद्विप्रः पंचगव्यं पिबेन्नर इति वर्णक्रमेणेदम् अभ्यासे तु द्वैगुण्यमित्यादि मिताक्षरामाधवीयादौ ज्ञेयं मिताक्षरामाधवादौ तु श्राद्धे कर्तुर्भोक्तुश्च सर्वथा दोषाभाव उक्तः आशौचमध्ये श्राद्धदिनप्राप्तौ तु माधवीये कालादर्शे च ऋष्यशृंगः देये पितॄणां श्राद्धे तु आशौचं जायते यदा आशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं प्रदीयते श्राद्धचिंतामणौ ज्योतिषे प्रति सांवत्सरश्राद्धमाशौचात् पतितं च यत् मलमासेऽपि तत्कार्यं भूतिभागुरिभाषितं आशौचान्त्यदिनत्वेन निमित्तत्वादित्यर्थः एतन्मासिकादिपरं न दार्शिकादौ अत एव कृद्दर्शनभाष्ये अपरपक्षे पित्र्याणीति नियमात् कृष्णपक्षश्राद्धलोपे प्रायश्चित्तमेव न तु गौणकाले करणं न चोपवासः वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति मनूक्तेरित्युक्तं आशौचे तु प्रायश्चित्तमपि न मुख्यकाले अनधिकारात् आशौचान्ते संभवेत्तु व्यासः श्राद्धविघ्ने समुत्पन्ने त्वंतरामृतसूतके अमावास्यां प्रकुर्वीत शुद्धावेके मनीषिणः हेमाद्रौ षट्त्रिंशन्मतेऽपि मासिके चाब्दिके तद्वत् संप्राप्ते मृतसूतके वदंति शुद्धौ तत्कार्यं दर्शे चापि विचक्षणाः गोभिलः देयं प्रत्याब्दिके श्राद्धे अंतरा मृतसूतके आशौचानंतरं कुर्यात्तन्मासेंदुक्षये तथा मरीचिः श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः विघ्नो घृतद्रव्यक्तेः शुक्लैकादश्यामपि आशौचेतराविघ्ने एतदिति माधवः पृथ्वीचंद्रो यत्त्वत्रिः तदहश्चेत्प्रदुष्येत केनचित्सूतकादिना सूतकान्तरं कुर्यात्पुनस्तदहरेवचेति तत्पूर्वकालाभावे ज्ञेयं एतदाब्दिकेतरश्राद्धपरं यच्च देवलः एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते मासेऽन्यस्मिंस्तिथौ तस्मिन् श्राद्धं

कुर्यात्प्रयत्नतइति तद्दीपमासिकपरिभाषितिस्मृद्भरत्ने हेमाद्रौच इदमपि पूर्वकालासंभवे व्याख्यातो विस्मरणेचेवज्ञेयं अथभार्यारजोदर्शने तत्र दार्शिकमामेनकार्यं श्राद्धविवेके द्विजातीनामामश्राद्धं प्रकीर्तितं अमावास्यादिनियतं माससंवत्सरादृते इति हेमाद्रौ हारीतोक्तेः व्याघ्रपादोपि आर्तवे देशकालानां विप्लवे समुपस्थिते आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैवहीति दीपिकापि दर्शे तु भार्यार्तवे त्वामश्राद्धं विधिं प्रवासि विधुराद्याश्चान्येशुद्रद्विजाः वस्तुतस्तु पाकाभावे द्विजातीनामामश्राद्धं विधीयत इति सुमन्तूक्तेः पाककर्तृ तत्सत्त्वेऽन्नेनान्यथामेनेत्युक्तं मासिकानि सपिंडानि अमावास्यातथाब्दिकं अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वलेति कलिकायां वचनाच्च कालादर्शे तु स्त्रियारजोदर्शे दर्शश्राद्धं पंचमेह्नीति पक्षान्तरमुक्तं पारिजातेप्येवं एवं महालययुगादावपि आब्दिकं तु रजोदर्शनेपि मद्धिन्नेनैवकार्यं पुष्पवत्स्वपि दारेषु विदेशस्थोप्यनग्निकः अन्नेनैवाब्दिकं कुर्याद्धेम्नावामेन नक्वचिदिति माधवीये लौगाक्षिस्मृतेः मरीचिरपि अनग्निकः प्रवासी च यस्य भार्या रजस्वला आमश्राद्धं प्रकुर्वीत तन्नतत्कुर्यान्मृतेहनि कार्ष्णाजिनिः आपन्नोप्याब्दिकं नैव कुर्यादामेन कुत्रचित् अन्नेन तदमायां वा कृष्णो वा हरिवासरे प्रयोगपारिजाते रजस्वलायां भार्यायां क्षयाहं यः परित्यजेत् सवैनरकमाप्नोति यावदाभूतसंप्लवं मासिकानि सपिंडं च अमावास्या तथाब्दिकं अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वला दैवयाज्ञिकनिबंधेपि भर्तुः श्राद्धं पंचमेन्हि कुर्याद्भार्या रजस्वला पुत्रः पित्रोः प्रकुर्वीत मृताहनि शुचिर्यतः कालादर्शेपि रजस्वलामनोनग्निर्विदेशस्थोथवाब्दिके दर्शादौ वा विनामेनत्वन्नेन श्राद्धमाचरेत् अन्यत्रापि विदेशको वा विगताग्निको वा रजस्वलायामपि धर्मपत्न्यां श्राद्धं मृताहे विदधीत पाकेनामेन हेम्ना न तु पंचमेन्हि एवं मासिकेपि यत्तु

मरीचिः आह्निके समनुप्राप्ते यस्य भार्या रजस्वला पंचमेऽहनि तच्छ्राद्धं न तत्कुर्यान्मृतेऽहनि माधवीये श्राद्धं तदा न कर्तव्यं कर्तव्यं पंचमेऽहनीति श्लोकगौतमोक्तेः दैवे कर्मणि पित्र्ये वा पंचमेऽहनि शुद्ध्यतीति प्रभासखंडाच्च नन्वशुचित्वादेव तत्र पंचमेऽहन्यर्थात् श्राद्धं प्राप्तमिति वचनं व्यर्थं मैवं गर्भिणी सूतिकादिश्च कुमारी वाप्यरोगिणी यदा शुद्धा तदान्येन कारयेत् प्रयता स्वयमिति हेमाद्रौ भविष्योक्तेः अस्तु पत्नीतरस्त्री शूद्राश्च श्राद्धं मृत्विजा कारयेयुः स्वयं वामंत्रकं कुर्युरिति स्मृत्यर्थसाराच्चान्यद्वाराकरणनिवृत्त्यर्थत्वाच्चास्य त्वदुक्तदिशा आशौचानंतरं श्राद्धकर्तव्यतावेदकवाक्यवैयर्थ्याच्च अतः प्रागुक्तमरीच्युक्तेः पत्नी पंचमेऽहनीत्युक्तं यत्तु सप्ताहात्पितृदेवानां भवेद्योग्या व्रतार्चने इति तद्रजोनिवृत्तिपरमिति हेमाद्रिभिन्नसर्वनिबंधसिद्धांतः हेमाद्रिस्तु श्राद्धादौ स्त्रियाः सहैवाधिकारात्तस्या रजोदुष्टत्वात्तन्निवृत्तेरेकभार्येण पंचमेऽहनि कार्यं प्रागुक्तमरीच्युक्तेः भार्यान्तरसत्त्वे तु पुष्पवत्स्वपीति वचनात्तद्दिने एवेत्याह दीपिकापि भार्यर्तौ सति पंचमे च दिवसे स्याद्वार्षिकं मासिकं पक्षान्ते बहुभार्यकस्त्वधिकृते पत्न्यंतरैस्तत्तिथौ कुर्यात्तद्वितयं स्वमुख्यदिवसे इति तच्चिंत्यं सहाधिकारः सहत्वं तुल्यता वा एकफलभाक्त्वेन वा पाककर्तृत्वेन वा नाद्यः तदभावात् पाणिग्रहणाद्धि सहत्वं कर्मस्वित्यस्याग्निसाध्यकर्मविषयत्वात् आह्निकस्य चानिरग्नेरपि पाकेनैवोक्तेः स्मार्ताग्निसाध्यत्वानियमात्तामपरुध्येति पूर्वोक्तवचनसत्त्वाच्च कथं च भार्यान्तरसत्त्वेऽधिकारः ज्येष्ठया न विनेतरेति नियमात् ज्येष्ठापरत्वे च तेनैव सिद्धे वचनवैयर्थ्यात् न द्वितीयः अविभक्तभ्रातृवदेकस्या अशुचित्वेऽन्यस्याधिकारापत्तेः न तृतीयः प्रवासनिर्देशसूतिकारोगिण्यादिष्वप्यकरणापत्तेः आरभेत नवैः पात्रैरन्नारंभं च बांधवैरिति देवलोक्त्या वात्मनेपदात्त्वस्य बांधवानां च पाककर्तृत्वोक्त्याविरोधाच्च ततस्तानि

पपाचाशक्रसीताजनकनंदिनीति पाद्मादिलिंगात् प्राशस्त्यंभार्यापाकस्योच्येतनतत्कस्याप्यनिष्टं तेनैतद्वचनंयुक्त्याद्यभावात् पूर्वो
क्तवचोविरोधाच्च यत्किंचिदेव यदपिश्राद्धीयाहनि संप्राप्ते यस्यभार्यारजस्वला श्राद्धंतत्रनकर्तव्यं कर्तव्यंपंचमेहनीतिश्लोकगौतम
पाठोन्यथादर्शितः माधवीयेच तद्दशात्पक्षांतरमुक्तं तेनापिनाभिप्रेतार्थसिद्धिः यस्यप्रेतस्येत्यर्थात् तेनात्रहेमाद्रिवचसामेति
बहुवक्तव्येपिनोच्यते अथान्वारोहणेनिर्णयः लौगाक्षिः मृताहनिसमासेनपिंडनिर्वपणंपृथक् नवश्राद्धंचदंपत्योरन्वारोहण
एवतु समासेनतुतंत्रेणाद्यपितृकश्राद्धवद्द्वयोरेकः पिंडोविभज्य पिंडशब्दःश्राद्धपरः नवश्राद्धंपृथगितिहेमाद्रिपृथ्वीचंद्रौ अ
त्रमृताहनीत्येकत्वात् दिनभेदेदिनैक्यवामृततिथेरेकत्वेकालैक्यकर्त्रैक्यपाकैक्यंच एकचित्याधिरोहेतुतिथिरेकैवजायते
एकपाकेनपिंडैक्येद्वयोर्गृह्णीतनामनीइतिस्मृत्यंतराच्च अंत्येष्टिपद्धतौभट्टैरप्युदाहृतं अन्वारोहेतुनारीणांपत्युश्चैकोदकक्रिया
पिंडदानक्रियातद्वच्छ्राद्धंप्रत्याब्दिकंतथा नवश्राद्धानिसर्वाणिसपिंडीकरणंपृथक् एकएववृषोत्सर्गोगोरेकात्रदीयते इति ति
थिभेदेतुवार्षिकंपृथगेव तथावार्षिकेसमासविधानादन्यत्रसर्वत्रपृथक्त्वेमासेनवश्राद्धमेवपृथगिति परिसंख्ययान्यत्रपृथगु
क्तेष्वपि वार्षिकषोडशश्राद्धतीर्थसपिंडान्वष्टक्यादिषुसमासएवेतिमदनपारिजातनिर्णयामृतादयः अतःसमासविधिबलात्
ज्येष्ठपुत्रस्यकर्तृत्वे सपत्नमातुरन्वारोहणे तत्पुत्रेसत्यपितद्वार्षिकादिकमविभक्तः सापत्नपुत्रएवज्येष्ठः कुर्यान्नौरसः वक्ष्यमा
णपृथ्वीचंद्रादिमतेतु औरसएवमातुः पृथक्कुर्यात् एवंबह्वीष्वपिमातृषुज्ञेयं त्रिस्थलीसेतौपितामहचरणैरप्येवमुक्तम्
यत्तुगार्ग्यः एकचित्यांसमारूढौदंपतीनिधनंगतौ पृथक्श्राद्धंतयोःकुर्यादोदनंचपृथक्पृथक् ओदनंपिंडः तन्नवश्राद्ध-

५४

विषयं यत्तु भृगुः यास्समारोहणंकुर्याद्भर्तुश्चित्यांपतिव्रता तांमृताहनिसंप्राप्तेपृथक्पिंडेनियोजयेत् प्रत्यब्दंचनवश्राद्धंयुगपत्तुस माचरेत् तद्यपावार्षिकमेकोद्दिष्टमुक्तम् तद्विषयं प्रत्यब्दंचमृताहनीत्यन्वयः नवश्राद्धंयुगपदिति दर्शेवर्गद्वयवदेकतंत्रेणपृथगित्यर्थमाह हेमाद्रिः एतन्मृततिथ्यभेदविषयमिति पृथ्वीचंद्रनिर्णयामृताद्याः देवयाज्ञिकोप्येवम् पराशरमाधवस्तु गार्ग्यभृग्वादिवचनात् लौगाक्षिवाक्यसमासेनपाकादितंत्रैक्येनदर्शेवर्गद्वयवत्पृथक्श्राद्धंकुर्यात् नवश्राद्धंचतथेत्याह पृथ्वीचंद्रचंद्रिकादयस्तु द्वयोरेकपिंडदानंलौगाक्षिवचनंचापद्विषयं पृथक्पिंडदानंतुमुख्यः कल्पः तदाहस्पष्टंपराशरः आरुह्य भर्तुश्चितिरंगनायाप्राप्नोतिमृत्कंखलुसत्त्वयुक्ता एकादशाहेतुतयोर्विधेयंश्राद्धंपृथक्स्वर्गमपेक्ष्यसद्भिः एकत्वमिच्छंतिसतिप्रहीणाएकादशाहादिषुयेनुनार्याः ते स्वर्गमार्गंविनिहत्यकुर्युः स्त्रीसत्त्वघातान्नरकाधिवासं भर्त्रासहमृतायास्तु नाकलोकमभीप्सती साहंश्राद्धंपृथक्पिंडान्नेकत्वंतुस्मृतंतयोः पृथगेवाहकर्तव्यंश्राद्धमेकादशाहिकं यानिश्राद्धानि सर्वाणितान्युक्तानिपृथक्पृथक् विश्वादर्शेऽपि मातुर्गयाष्टकावृद्धिमृताहेषुमहालये श्राद्धंकुर्यात्पृथग्देवतंत्रंवानुगतादपि एकचित्यांसमारुह्यमृतयोरेकबर्हिषि पित्रोःपिंडान्पृथग्दद्यात्पिंडलापस्कृततस्कृत इत्यग्निस्मृतेरित्याहुः यत्तु षट्त्रिंशन्मते एकत्वंसागताभर्तुःपिंडेगोत्रेचसूतके नपृथक्पिंडदानंतुतस्मात्पत्नीपृथिवद्यते इति तद्दर्शादिपरं चंद्रप्रकाशेऽपि एकचित्यांसमारूढौदंपतीप्रमृतौयदि पृथक्श्राद्धंप्रकुर्वीतपत्न्यैर्वक्ष्ययेहनि मृतानामपिभृत्यानांभार्यापापतिनासह सूर्वैकस्यमृतस्याद्दोद्वितीयस्यततःपुनः तंत्रेणाश्रपणंकृत्वाश्राद्धंस्वामिक्षयेहनि मृतानामपिभृत्यानांभार्याणांपतिनासह पूर्वक-

स्य मृतस्या दौहित्री यस्य ततः पुनः तंत्रेणाऽपणं कृत्वा श्राद्धं स्यात्क्षयेहनि तृतीयस्य ततः कुर्यात्संनिपातेष्वयं क्रमइति सहगमने-
सर्वत्र श्राद्धार्थमेकपाकइत्याह मदनरत्ने प्रचेताः एकचित्यां समारूढौ म्रियेते दंपती यदि तंत्रेणाऽपणं कुर्यात्पृथक्पिंडं समा-
वपेत् पृथ्वीचंद्रोदयेप्येवं अत्र भर्तुराशौचमध्येऽन्यदिने स्त्रीमरणे पतिमरणादिनगणनयाशौचं पिंडदानेकादशाहादिकार्यं
नात्र पक्षिणीवृद्धिः मृतं पतिमनुव्रज्य पत्नी चेदनलं गता न तत्र पक्षिणी कार्या पैतृकादेव शुद्ध्यति पुत्रोन्यो वाग्निदस्तस्यास्तावदेवाशु-
चिस्तयोः नवश्राद्धं सपिंडं च युगपत्तु समापयेदिति षडशीतिमतात् यदा नारी विशेदग्निं प्रियस्य प्रियवांछया तदाशौचं विधा-
तव्यं भर्त्राशौचक्रमेण हीति लघुहारीतोक्तेश्च भर्त्राशौचोत्तरमन्वारोहणे तु त्र्यहमाशौचं ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी
त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रत इति ब्राह्मोक्तेरिति पृथ्वीचंद्रापरार्कौ एतदन्वारोहणे एव न त्वेकचितौ ऋग्वेदवादः इ-
मा नारीरविधवेत्यादिः एतदसवर्णापरमित्यन्ये स्मार्तगौडास्तु देशांतरमृते पत्यौ साध्वी तत्पादुकाद्वयमित्युपक्रम्य ब्राह्मे त्र्य-
हाशौचे तु निर्वृत्ते इत्युक्तेर्भर्त्राशौचोत्तरमन्वारोहणे त्र्यहः सहगमने तु पूर्णं दशाहादि पिंडास्तु दशापि सहैव तथाच जनकशूल-
पाणिशुद्धितत्त्वधृतव्यासः संस्थितं पतिमालिंग्य प्रविशेद्या हुताशनं तस्याः पिंडादिकं ज्ञेयं क्रमशः पतिपिंडवत् अन्विता पिंड-
दानं तु यथा भर्तुर्दिनेदिने नदश्चारोहिणी यस्मात्तस्मात्सा नात्मघातिनीति विष्णूक्तेश्च पृथक्चितौ तु भर्त्राशौचमध्ये तदूर्ध्वं वा स-
त्यां त्र्यहेण दशापिंडाः अन्वितायाः प्रदातव्या दशपिंडास्त्र्यहेण तु स्वाम्याशौचे व्यतीते तु तस्याः श्राद्धं प्रदीयत इति तत्रैव पैठीनसि-
स्मृतेः भर्त्राशौचोत्तरं मृतौ तु चतुर्थेह्नि श्राद्धं शूलपाणिनालिदमग्निपुराणीयत्वेनोक्तं शुद्धहनस्य सद्यःशौचे त्वन्वारोहणे त्रिरात्रं

एकचितौ तु संस्थितं पतिमिति प्रागुक्तव्यासोक्तेः सद्यःशौचमित्याहुः अन्यसपिंडाशौचमध्ये विदेशमृतान्वारोहणं त्वनाशक्यमेवकचितायामगत्वात् अन्येतु रजोवत्याः सूतिकायाश्च गमननिषेधादितराशौचं स्यान्निषेध अन्यथा प्रत्यक्षभर्तृमरणे कागतिरित्याहुः तन्मूलवचनं विनाचिंत्यमेव स्मृत्यर्थसारेपि सहगमने सर्वत्र श्राद्धपिंडादौ पाके कं काले कं कर्त्रे कं चेति यातु पत्निसुहृध्याऽन्यकालेऽन्यतिथावन्वारूढा तस्याः श्राद्धं तत्क्षयतिथौ कार्यं न भर्तृतिथौ पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृतेति स्कांदात् तिथिरेकैव जायत इत्यादिवचनाच्चेति मदनरत्नपारिजातपृथ्वीचंद्रादयः अन्येतु तस्याः पतिमरणेन मृतप्रायत्वात् सहाग्रतः पृष्ठतो वा तद्भक्त्या म्रियते यदि तस्याः श्राद्धं प्रदातव्यं पृथक् पत्युः क्षयेहनीति स्मृत्यंतरात् अग्रतः पृष्ठतो वापि तद्भक्त्या म्रियते यदि तस्याः श्राद्धं सुतैः कार्यं पत्युरेव क्षयेहनीति पुराणसमुच्चयाच्च भर्तृतिथावेवेत्याहुः अत्र मूलं चिंत्यं अत्र विशेषो हेमाद्रौ स्मृत्यंतरे माता मंगलसूत्रेण म्रियते यदि तद्दिने उद्दिश्य विप्रपंक्तौ तां भोजयेच्च सुवासिनीं अथ श्राद्धसंपाते निर्णयः अत्र पित्रोर्मृततिथ्यैकत्वे मरणक्रमेण दर्शे वर्गद्वयवत्तंत्रेण श्राद्धं कुर्यात् पौर्वापर्याज्ञाने तु पितृपूर्वकं कुर्यादिति हेमाद्रिः माधवादयस्तु पित्रोः श्राद्धे संप्राप्ते नैव पर्युषिते पिता पितृपूर्वं सुतः कुर्यादन्यथासति योगत इति कार्ष्णाजिनिस्मृतेः सर्वत्र पितृपूर्वं भिन्नप्रयोगमाहुः पार्वणैकोद्दिष्टयोः संपाते माधवीये जाबालिः यद्येकत्र भवेद्यातामेकोद्दिष्टं च पार्वणं पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत् गृहदाहादिना युगपन्मरणे भृगुः एककाले गतासूनां बहूनामथवा द्वयोः तंत्रेण श्रपणं कृत्वा कुर्याच्छ्राद्धं पृथक् पृथक् पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः तृतीयस्य ततः कुर्यात्संनिपाते त्वयं क्रमः ऋष्यशृंगः प्रवे-

यदि सपिंडानां युगपन्मरणं तदा संबंधासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत् गारुडे एकेनैव तु पाकेन श्राद्धानि कुरुते त्रीहि विकिरं त्वेकतः कुर्यात् पिंडान् दद्यात् पृथक् पृथक् अत्रानुगमने च दाहसपिंडनादौ विशेषं वक्ष्यामः अत्रिः बहूनामथवा द्वाभ्यां श्राद्धं चेत्स्यात्समेहनि तंत्रेण श्रपणं कृत्वा पृथक् श्राद्धानि कारयेत् पुलस्त्यः महालये गयाश्राद्धे गतासूनां क्षयेहनि तंत्रेण श्रपणं कृत्वा श्राद्धं कुर्यात् पृथक् पृथक् इदं च पृथक् पाकेन भिन्नश्राद्धशक्तौ पृथक् पाकेन संबंधासत्त्या श्राद्धभेदस्तु मुख्यः पक्षः एकत्रैव दिने श्राद्धद्वयं प्राप्तं यदा तदा चरेदेव पुरा वर्षात् पितुर्मातुश्च यत्नतः एकस्मिन् यः करोत्यन्हि द्वयोः श्राद्धं यदा द्विजः तदा पूर्वमृतस्यादौ कृत्वा स्नात्वा यथाविधि पश्चात् पश्चान्मृतस्यैव पृथक् पाकैः समाचरेत् नैकस्मिन् दिवसे श्राद्धत्रयाणां कुत्रचिद्द्विजः एकः कुर्यात्तथा प्राप्ते अन्यो भ्राता समाचरेत् भ्रातर्यविद्यमाने तु तत्परेऽन्हि समाचरेत् अन्यथा श्राद्धहंता स्याच्छ्राद्धसंकरकृद्भवेत् इत्याश्वलायनोक्तेरिति पृथ्वीचंद्रः कात्यायनः द्वे बहूनि निमित्तानि जायेरन्नेकवासरे नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात् जाबालिः श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयं कालादर्शे नित्यदार्शिकयोश्चोदकुंभमासिकयोरपि दार्शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः दार्शिकस्य च मन्वादेः संपाते श्राद्धकर्मणः प्रसंगादितरस्यापि सिद्धेरुत्तरमाचरेत् अस्य देवताभेदे पवादमाह स एव नित्यस्य चोदकुंभस्य नित्यमासिकयोरपि दर्शस्य चोदकुंभस्य दर्शमासिकयोरपि नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि युगाद्याब्दिकयोश्चैव मन्वाद्याब्दिकयोस्तथा प्रत्याब्दिकस्य चालभ्ययोगेषु विहितस्य च संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् निमित्तानियतश्चात्र पूर्वो

नुष्ठानकारणं पित्रोस्तुपितृपूर्वत्वंसर्वत्रश्राद्धकर्मणि माधवीयेस्मृतिसंग्रहे काम्यतंत्रेणनित्यस्यतंत्रंश्राद्धस्यसिद्ध्यति अथश्राद्धांगतर्पणम् पारिजातपृथ्वीचंद्रोदयेचगार्ग्यः पूर्वंतिलोदकंकृत्वा अमाश्राद्धंतुकारयेत् प्रत्यब्देनभवेत्पूर्वंपरेऽहनितिलोदकं पक्षश्राद्धेहिरण्येन अनुव्रज्यतिलोदकं नचनित्यतर्पणस्यायंपरेद्युरुत्कर्षः नतुश्राद्धांगतर्पणमस्तीतिवाच्यं यस्तर्पयतितान्विप्रःश्राद्धंकृत्वापरेहनि पितरस्तेनतृप्यंतिनचेत्कुप्यंतिवैभृशमितिगार्ग्येणफलनिंदार्थवादाभ्यांसंगतत्वेनोक्तेः श्राद्धप्रक्रमाद्वार्षिकं बृहन्नारदीयेप्याब्दिकंप्रक्रम्य परेद्युःश्राद्धकृन्मर्त्योयोनतर्पयतेपितॄन् तस्यतेपितरःक्रुद्धाःशापंदत्वाव्रजंतिहि. पितृशब्दश्च श्राद्धेज्यवर्गपरः तेनतर्पणस्यपशौपुरोडाशयागवत्प्रस्तरप्रहरणवच्चेष्टदेवतासंस्कारकृतातेनाब्दिकेदिनेनित्यस्यपित्रादितर्पणंकार्यमेवश्राद्धांगभूतस्यैवपरेद्युरुक्तेः तदुक्तं प्रत्यब्दांगतिलंदद्यान्निषिद्धेपिपरेहनि वर्गैकस्यवचोयेषामन्येषांतुविवर्जयेत् कश्चिद्विशेषमाहगार्ग्यः कृष्णाभाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत् पितॄणांप्रत्यहंकार्यंनिषिद्धाहेपितर्पणं तर्पणंतिलतर्पणंनिषिद्धाहेपीत्युक्तेः सकृन्महालयेश्वःस्यादष्टकास्त्वतएवहि अत्रसप्तमीनिर्देशात्अंगितास्फुटैव तत्रजयान्जुहुयात् संइंशायणीयायांमद्भ्रातःसवने इत्यादिवत् अस्यापवादोबृहन्नारदीये वृद्धिश्राद्धेसपिंड्यांचप्रेतश्राद्धेतुमासिके संवत्सरविमोकेचनकुर्यात्तिलतर्पणं तदयमर्थः दर्शेविप्रनिमंत्रणोत्तरंपाकारंभोत्तरंवाश्राद्धप्रयोगस्यारब्धत्वात् ब्रह्मयज्ञोत्तरंनित्यतर्पणंनैवश्राद्धांगतर्पणस्यतंत्रेणप्रसंगेनवासिद्धिः ततःपूर्वंवैश्वदेवोत्तरंवाब्रह्मयज्ञकरणेश्राद्धांगतर्पणंपृथक्कार्यंपित्रोर्वार्षिकेतुनित्यतर्पणंतिलवर्ज्यंकार्यं नैवश्राद्धदिनेकुर्यात्तिलैस्तुपितृतर्पणं श्राद्धंकृत्वापराण्हेचतर्पणंतुतिलैःसहेतिवचनात्

सप्तम्यांभानुवारेच्चमातापित्रोर्मृतेहनि तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकइति स्मृतिरत्नावल्यांवृद्धमनूक्तेश्च अत्रनित्यतिलतर्पणेतिलमात्रनिषेधोनतुतर्पणस्यतिलैरित्यस्यवैयर्थ्यापत्तेः यत्तुकातीयम् उपरागेपितुःश्राद्धेपातेमायांचसंक्रमे निषिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेदितितत्परेद्युःश्राद्धांगतर्पणविषयमितिकेचित् श्राद्धाशक्तस्यतत्स्थानापन्नतर्पणविषयमितियुक्तं सकृन्महालयेपरेद्युस्तर्पणं अष्टकासुतुसप्तम्यष्टमीश्राद्धयोरंतेतद्दैवर्वगद्वयस्य अन्वष्टक्येतुमातृवर्गस्यापितीर्थश्राद्धेदर्शवत् माघाद्यादिष्वष्टकावदंते अनेकश्राद्धसंपातेतुयदितत्तत्प्रसंगसिद्धिः तदातदीयमेवतर्पणं तंत्रत्वेतुश्राद्धसमसंख्यत्वेआदावंतेवा विषमसंख्यायांबह्वनुरोधइति तस्माच्छ्राद्धांगतर्पणंसिद्धं तद्विधिःसंग्रहे स्नात्वातीरंसमागत्यउपविश्यकुशासने संतर्पयेत्पितॄन्सर्वान्स्नात्वावस्त्रंचधारयेत् तर्पणोत्तरंनित्यस्नानकृत्वेत्यर्थः अपसव्यंततःकृत्वासव्यंजान्वाच्यभूतले नामगोत्रस्वधाकारैर्द्वितीयांतेनतर्पयेत् अत्रवस्वादिरूपतोक्तास्मृत्यर्थसारे वसुरुद्रादितिसुतान्श्राद्धार्थेतर्पयेत्पितॄन् तत्रबह्वृचानांदक्षिणेनैव अनादेशेदक्षिणप्रतीयादितिसूत्रात् अत्रप्रत्यजलिमन्त्रावृत्तिः निर्वापवत्संध्यार्घ्यदानवच्चद्रव्यभेदात् अवघातवेदिप्रोक्षणादौतुद्रव्यैकत्वान्नमंत्रावृत्तिः केचित्तुपरिव्याणमंत्रवत्क्रियमाणानुवादित्वेनकरणत्वाभावात्सकृदिच्छंति तन्न तत्रापूपद्रव्यैक्यात् परवीरसीतिकरणीभूतमंत्रांतरसत्त्वादन्यतरेणाव्यवधानापत्त्योभयोःकारणत्वायोगात् कर्तृभेदेनविकल्पायोगाच्च क्रियमाणानुवादित्वनत्वत्रतथेतिबोधायनादिवचनात्करणत्वमेव तेनावृत्तिरेवयुक्ता एवंनित्येपि यत्तुसंग्रहेनाम्ना पठंति पित्रोःक्षयाहेसंप्राप्तेयःकुर्यान्नित्यतर्पणं आसुरंतद्भवेच्छ्राद्धंततोयरुधिरंभवेत् सर्वदातर्पणंकुर्याद्ब्रह्मयज्ञपुरःसरं

मृताहेनैवकर्तव्यं कृतंचेन्निष्फलंभवेत् तत्समूलत्वेसतिफलविषयं यच्चपठंति कपिलः मन्वादिषुयुगाद्यासुदर्शसंक्रमणेषुच पौर्णमास्यांव्यतीपातेदद्यात्पूर्वंतिलोदकं अर्धोदयेगजच्छायेषष्ठीषुचमहालये भरण्यांचमघाश्राद्धेतदंतेतर्पणंविदुः शौनकः मातापित्रोर्मृताहेचपरेहनितिलोदकं कारुण्यश्राद्धविषयेसद्योदद्यात्तिलोदकं एतन्निर्मूलं अथतिलतर्पणनिषेधः गार्ग्यः स्नानेहोमेमैत्रयोर्द्वयानंदाभृगुमघासुच पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणं स्मृत्यर्थसारे विवाहव्रतचूडासुवर्षमर्धंतदर्धकं अर्धंतदेव वृद्धौसत्यांचतन्मासिनेत्याहुस्तिलतर्पणं हेमाद्रौमरीचिः सप्तम्यांरविवारेचगृहेजन्मदिनेतथा निशासंध्यासुपुत्रार्थीनकुर्यात्तिलतर्पणं यत्तुसंग्रहे नंदायांभार्गवदिनेकृत्तिकासुमघासुच भरण्यांभानुवारेचगजच्छायाद्वयेतथा अयनद्वितयेचैवमन्वादिषुयुगादिषु पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमितितच्चिंत्यं पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यः प्रयतोमनुष्य इत्यादिविरोधात् अत्रापवादः पृथ्वीचंद्रोदये तीर्थतिथिविशेषेचगंगायांप्रेतपक्षके निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितं स्मृत्यर्थसारेपि तिथितीर्थविशेषेषुकार्यंप्रेतेचसर्वदेतिगोभिलः तिलाभावेनिषिद्धाहेसुवर्णरजतान्वितं तदभावेनिषिंचेत्तुदर्भमंत्रेणवापुनः पतितस्यातिलोदकंवक्ष्यामः अथवृद्धिश्राद्धं तन्निमित्तं पृथ्वीचंद्रोदयेब्राह्मे जन्मन्यथोपनयनेविवाहेपुत्रकस्यच पितॄन्नान्दीमुखान्नामतर्पयेद्विधिपूर्वकं देवव्रतेषुचाधानयज्ञपुंसवनेषुच नवान्नभोजनेस्नानेऊढायाः प्रथमार्तवे देवारामतडागादिप्रतिष्ठासूत्सवेषुच राजाभिषेकेबालान्नभोजनेवृद्धिसंज्ञकान् वनस्थाद्याश्रमगच्छन्पूर्वेद्युःसद्यएववा पितॄन्पूर्वोक्तविधिनातर्पयेत्कर्मसिद्धये विष्णुपुराणे यज्ञोद्वाहप्रतिष्ठासुमेखलाबंधमोक्षयोः

पुत्रजन्मवृषोत्सर्गेवृद्धिश्राद्धंसमाचरेत् तन्नैव नामकर्मणिबालानांचूडाकर्मादिकेतथेत्युक्तेर्निष्क्रमान्नप्राशनयोर्नश्राद्धमितिमैथिलाः पूर्वोक्तविरोधात्नानिष्ठेतिविरोधात् सुतोत्पत्तौतथाश्राद्धे अन्नप्राशनिकेतथेतिराजमार्तंडाच्च यत्तुछंदोगपरिशिष्टं सूर्येंदोःकर्मणीयच्च तयोःश्राद्धंनविद्यतेइतितत्तेषामेवेतिकल्पतरुः बह्वृचकारिकायां स्यादाभ्युदयिकंश्राद्धंवृद्धिपूर्तेषुकर्मसु पुंसःसवनसीमंतचौलोपनयनेष्विह विवाहेचानलाधेयप्रभृतिश्रौतकर्मणि इदंश्राद्धंप्रकुर्वीतद्विजावृद्धिनिमित्तकं अन्ये: षोडशसंस्कारश्रावण्यादिष्वपीष्यते वाप्याद्युद्यापनादौतुकुर्युःपूर्तनिमित्तकं बोपदेवकालादर्शौ सीमंतव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च पुंसूत्यावसथप्रवेशनसुताद्यास्यावलोकाश्रमस्वीकारक्षितिपाभिषेकदयिताद्यर्तौचनांदीमुखं यत्तुकामधेनौ जलाशयप्रतिष्ठायांवृषोत्सर्गादिकर्मसु वत्सराभ्यंतरेपित्रोर्वृषस्योत्सर्गकर्मणि वृद्धिश्राद्धंनकुर्वीततदन्यत्रसमाचरेदिति तत्रजलाशयेवृद्धिश्राद्धस्यनिषेधोनतुकर्मांगस्येतिकेचित् अन्येत्वस्यनिर्मूलतामाहुः श्राद्धकौमुद्यांनिर्णयामृतेचमात्स्ये अन्नप्राशेचसीमंतेपुत्रोत्पत्तिनिमित्तके पुंसवेचनिषेकेचनववेश्मप्रवेशने देववृक्षजलादीनांप्रतिष्ठायांविशेषतः तीर्थयात्रावृषोत्सर्गेवृद्धिश्राद्धंप्रकीर्तितं इदंचावश्यकं वृद्धौनतर्पितायेवैपितरोगृहमेधिभिः तद्धीनमफलंज्ञेयमासुरोविधिरेवसइतिशातातपोक्तेः अत्रश्राद्धत्रयंसएवाह मातृश्राद्धंतुपूर्वंस्यात्पितॄणांतदनंतरं ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतं तत्कालमाहपृथ्वीचंद्रोदयेगार्ग्यः मातृश्राद्धंतुपूर्वेद्युःकुर्यादहनितुपैतृकम् मातामहंचोत्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृतं अथाप्यशक्तौसएव पृथक्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे श्राद्धत्रयंप्रकुर्वीतवैश्वदेवंतुतांत्रिकमिति

वृद्धमनुरपि अलाभेभिन्नकालानांनांदीश्राद्धत्रयंबुधः पूर्वेद्युर्वैप्रकुर्वीत पूर्वाण्हेमातृपूर्वकं अत्रमहत्सु पूर्वेद्युस्तदहरल्पेष्विति गृह्यपरिशिष्टाद्व्यवस्थाज्ञेया तच्चप्रातरेव पार्वणञ्चापराण्हेतुप्रातर्वृद्धिनिमित्तकमितिशातातपोक्तेः अत्रप्रातःशब्दःसार्द्ध प्रहरपरः प्रहरोप्यर्धसंयुक्तःप्रातरित्यभिधीयतइति गार्ग्योक्तेरिति पृथ्वीचंद्रः इदञ्चपुत्रजन्मातिरिक्तविषयं तदाहात्रिः पूर्वाण्हेवैप्रवेद्वृद्धिर्विनाजन्मनिमित्तकं पुत्रजन्मनिकुर्वीत श्राद्धंतात्कालिकंबुधइति एतदनियतनिमित्तपरं नियतेषुनिमित्तेषु प्रातर्वृद्धिर्निमित्तकं तेषामनियतत्त्वेतु तदानंतर्यमिष्यतइति लौगाक्षिस्मृतेः आधानांगंनांदीश्राद्धंत्वपराण्हएव आमश्राद्धंतुपूर्वाण्हेसिद्धान्हेनतुमध्यतः पार्वणंवापराण्हेतुवृद्धिश्राद्धंतथाग्निकमितिनिर्णयामृते गालवोक्तेः नांदीमुखाह्वयप्रातराब्दिकंत्वपराण्हत इतिविष्णूक्तेश्च इदंचमातृपितृमातामहादिक्रमेणनवदैवत्यंकार्यं तत्रमातामह्यःसपत्नीकाः वृद्धप्रमातामहप्रमातामहमातामह्यानांसपत्नीकानामिति पृथ्वीचंद्रोदये गारुडेगद्यरूपेणपाठात् हेमाद्रौशंखः नांदीमुखेसत्यवसूसंकीर्तयेत्वैश्वदेविके वृद्धपराशरः नांदीमुखेभ्योदेवेभ्यःप्रदक्षिणकुशासनं पितृभ्यस्तन्मुखेभ्यश्चप्रदक्षिणमितिस्मृतिः यत्तुवृद्धवसिष्ठः नांदीमुखेविवाहेचप्रपितामहपूर्वकं नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकं यच्चस्मृत्यर्थसारे वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषु भुंजतइति यच्चगारुडे व्युत्क्रमप्रतिपादनंतच्चशाखांतरविषयं पितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइतिबह्वृचपरिशिष्टे कात्यायनेनचानुलोम्याम्नानात् पृथ्वीचंद्रोदयेप्येवं यत्तुकेचिद्वृद्धिपदंपित्रादिषुप्रयुंजतेतन्न अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम् अनाम्नामतिलार्थेश्चनांदीश्राद्धंतुसव्यवदिति पृथ्वीचंद्रोदयेसंग्रहोक्तेः नचनिषेधादेवविधिः कल्प्यतइति वाच्यम्

प्रोष्ठपदीश्राद्धे प्रपितामहात्परेषां वृद्धपित्रादीनां देवतात्वोन्नान्दीश्राद्धत्वसाम्येनेहापि तत्प्राप्तौ निषेधात् गोत्रनामादिनिषेधस्तु प्राभार्थीप्रथमांतेन वृद्धौ संकल्पमात्रं दद्यात् पक्षे ध्यानमस्मद्वृद्धश्राद्धानामित्युक्तेः संकल्पश्राद्धपरः सपिंडके तु सर्वं प्रवर्ततीति प्रयोगपारिजातः गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेदिति छंदोगपरिशिष्टे तद्विधानात् यत्तु ब्राह्मे पितापितामहश्चैव तथैव प्रपितामहः त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः तेभ्यः पूर्वतरा ये च प्रजावंतः सुखेधिताः ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यत इति यच्च मार्कंडेयपुराणे ये स्युः पितामहादूर्ध्वं ते तु नांदीमुखाः स्मृता इति तज्जीवत्पित्रादित्रिककर्तृकवृद्धिश्राद्धविषयं तेन न तस्येदमावश्यकं यत्तु विष्णुः पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यादिति तद्दर्शादिविषयमिति कल्पतरुः मदनपारिजातेप्येवं हेमाद्रिस्तु नांदीमुखानां श्राद्धं तु कन्याराशिगते रवौ पौर्णमास्यां तु कर्तव्यं वराहवचनं यथेति प्रोष्ठपदीश्राद्धैकवाक्यत्वात् तत्रैव पूर्वेषां देवतात्वमित्याह अत्र सत्यवसू विश्वेदेवाविति स्फुटं प्रागवत् यत्तु शातातपः मातुः श्राद्धं तु युग्मैः स्याद्दैवं प्राङ्मुखैः पृथगिति तद्भिन्नप्रयोगमातृश्राद्धभिन्नश्राद्धद्वये विश्वेदेवविकल्पार्थं प्रयोगे क्वचित्तु विश्वेदेवविहीनं तु केचिदिच्छंति मातृवाइति तद्भिन्नप्रयोगमातृश्राद्धभिन्नश्राद्धद्वये विश्वेदेवविकल्पार्थं प्रयोगे क्वचित्तु दैवनियम इति हेमाद्रिः एतच्च मातृपूजापूर्वकं कार्यं अकृत्वा मातृयागं तु यः श्राद्धं परिवेषयेत् तस्य क्रोधसमाविष्टा हिंसामिच्छंति मातर इति शातातपोक्तेः कौसुमैः पुष्पैर्धूपैः सनैवेद्यैर्गंधाद्यैर्भूषणैरपि पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं बुध इति छंदोगपरिशिष्टे कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः पूजनीयाः प्रयत्नेन पूजिताः पूजयंति ताः प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु अपि वाक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैः कुड्यलग्नां वसोर्धारां

सप्तधारां घृतेन तु कारयेत् पंचधारां वा नातिनीचां नचोच्छ्रितां आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् अत्र सर्वेष्विति ग्रहणात् ग्रहयज्ञादिकारेष्वपि नित्यश्राद्धं नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किंचित्समाचरेदिति शातातपोक्तेश्च इयं च वसोर्धारा तच्छाखीयानां नियतान्येषां त्वनियता बह्वृचास्त्वगृह्योक्तमित्युक्तेः करणे त्वभ्युदयः यन्नाम्नातं स्वशाखायामित्युक्तेः आयुष्याणि आनोभद्रा इत्यादीनि षड्भ्य इति मात्रादित्रिकोपलक्षणमिति पृथ्वीचंद्रोदयः छंदोगानां षड्दैवत्यमन्येषां नवदैवत्यमित्याशार्कः ममतु मतकोकिलमतानुसारिणां मातृमातामहाप्रमातामहा इति मात्रा सहैव मातामहश्राद्धकरणात् तद्विषयमिदं षड्भ्य इति मातरस्तत्रैवोक्ताः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः इति सर्वविशेषणो तेन चतुर्दशत्वं यदा षोडशेति पाठस्तदा देवतांतरं चंडिकायां चतुर्विंशतिमते त्वन्या उक्ताः तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा इत्येता मातरः प्रोक्ताः पितुर्मातुः स्वसाष्टमी आसां जीवने प्रत्यक्षपूजनं मृतानां त्वक्षतपुञ्जेष्विति हेमाद्रिः ब्राह्मण्याद्यास्तथा सदुर्गाक्षेत्रगणाधिपान् वृद्ध्यादौ पूजयित्वा तु पश्चान्नान्दीमुखान् पितॄन् मातृपूर्वान् पितॄन् पूज्य ततो मातामहानपि मातामहीस्ततः केचिद्युग्मा भोज्या द्विजातय इति अत्र द्वादशदैवतस्य देशाचाराद्व्यवस्था ब्राह्मण्याद्याः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेंद्राणी चामुंडाः सप्त मातर इत्यपरार्के उक्ताः अत्र चौलादीनां योगपद्ये तंत्रतोक्ता छंदोगपरिशिष्टे गणशः क्रियमाणानां मातृभ्यः पूजनं सकृत् सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु मातृभ्य इति षष्ठ्यर्थे चतुर्थी गणशः एकानेकपुत्राणां संस्कारेष्वेकदिने एकदेशकालकर्तृत्वादित्यर्थः तथा

असकृद्यानिकर्माणिक्रियेरन्नैवकारिभिः प्रतिप्रयोगंनैवस्युर्मातरःसगणाधिपाः कर्मवृत्तावपिकुर्याच्छ्राद्धकार्यंचकनेत्युक्तंतत्रैव आधानेहोमयोश्चैववैश्वदेवेतथैवच बलिकर्मणिदर्शेचपूर्णमासेतथैवच नवयज्ञेचयज्ञज्ञावदंत्येवंमनीषिणः एकमेवभवेच्छ्राद्धमेतेपुनःपृथक्पृथक् एतेषुप्रतिप्रयोगंनावर्ततेकिंत्वादौ एतद्भिन्नेसोमयागादौप्रतिप्रयोगमावर्ततएवश्राद्धमित्यर्थः क्वचिदादावपि निषेधमाहसएव नाष्टकासुभवेच्छ्राद्धंनश्राद्धेश्राद्धमिष्यते नसोष्यंतीजातकर्मप्रोषितागतकर्मसु विवाहादिःकर्मगणोयउक्तो गर्भाधानंशुश्रुमोयस्यचांते विवाहादावेकमेवात्रकुर्याच्छ्राद्धंनादौकर्मणःकर्मणःस्यात् सोष्यंत्याआसन्नप्रसवायाः सोष्यंतीप्रसूष्यंत्युक्तंकर्मकात्यायनोक्तस्य श्राद्धस्यपाकस्यप्राधान्यात्तस्यच जातश्राद्धेनदद्यात्तुपक्वान्नंब्राह्मणेष्वपीतिनिषेधाज्जातकर्मणिनांदीश्राद्धमित्याशार्कः आमान्नेनवाकार्यमित्यपितेनैवोक्तं गौडास्तु जातकर्मण्येवनिषेधः पुत्रजन्मनिमित्तकंतुकार्यमेव जन्मन्यथोपनयने इत्युक्तेः नैमित्तिकमथोवक्ष्ये श्राद्धमभ्युदयात्मकं पुत्रजन्मनितत्कार्यंजातकर्मसमंनरैरितिमार्कंडेयपुराणाच्चेत्याहुः हारलतायांश्राद्धविवेकेचैवं एतेनजातकर्मणिकालांतरेश्राद्धनिषेधान्नपुत्रजन्मदिनेइतिवाचस्पतिमतंपरास्तं अत्रनिषेककालेइतिवचनात् गर्भाधानेननिषेधः निषेककालेसोमेचसीमंतोन्नयनेतथा ज्ञेयंपुंसवनेश्राद्धंकर्मांगंविधिवत्कृतमिति पारस्करः प्रोषितेति प्रोष्येत्यगृहानुपतिष्ठतेपुत्रंदृष्ट्वाजपतीतिविहितंकर्मविवाहादिगर्भाधानांतोयोगृहप्रवेशान्चतुर्थीकर्मादिकर्मसमूहउक्तः सूत्रकारेण तत्रापिप्रतिकर्मनेत्यर्थः अन्येपिहलाभियोगादयोपवादविषयास्तत्रैवज्ञेयाः अप्रचारान्नोच्यंते अत्राधिकारिणः विष्णुपुराणे जातस्यजातकर्मादिक्रियाकांडमशेषतः पितापुत्र

स्यकुर्वीतश्राद्धंचाभ्युदयात्मकं अत्रकेचित् जीवत्पितुःसाग्नेरेव वृद्धिश्राद्धेधिकारः नतुनिरग्नेः नजीवत्पितृकःकुर्याच्छ्राद्धमग्निमृतेद्विजः येभ्यएवपितादद्यात्तेभ्यःकुर्वीतसाग्निकः पितामहेप्येवमेवकुर्याज्जीवतिसाग्निकः साग्निकोपिनकुर्वीतजीवतिप्रपितामहइतिचन्द्रिकायांस्मृत्युक्तेरित्याहुः प्रयोगपारिजातेप्यनाहिताग्निर्नकुर्यादितीदंव्याख्यातं तन्न अनग्निकोपिकुर्वीतजन्मादौवृद्धिकर्मणि येभ्यएवपितादद्यात्तानेवाह्वयत्तर्पयेद्वितिहारीतोक्तेः सीमंतवत्तुवृद्धिश्राद्धभिन्नश्राद्धपरमित्युक्तंमदनरत्ने श्राद्धपदंपिंडपितृयज्ञपरमिति पृथ्वीचंद्रोदयः निर्णयामृतेतु हारीतीयेनाग्निकोनाहिताग्निरभिप्रेतः पूर्ववचनेतु साग्निकः श्रौताग्निःस्मार्ताग्निर्वोच्यते तेनोभयाग्निहीनस्यनेत्युक्तं तन्न पूर्वोक्तदिशागतिसंभवेनाग्निपदस्यस्मार्ताग्निपरत्वेमानाभावात् वक्ष्यमाणनित्यानित्यसंयोगविरोधात् पितरोजनकस्येज्यायावद्व्रतमनाहितं समाहितव्रतःपश्चात्स्वान्यजेत्पितामहानिति पृथ्वीचंद्रोदयेयमवचोविरोधाच्च अपरार्केपि समावर्तनेब्रह्मचारीस्वयमेवनांदीश्राद्धंकुर्यादित्याहुः अतः पूर्वमेवसाधु बोपदेवोप्येवमाह यत्तुमतंजीवत्पितुःपुत्रनामकर्मादौनवृद्धिश्राद्धं हारीतीये जन्मादावित्यादिशब्देनतत्प्राप्तावपिउद्वाहपुत्रजननेपित्र्येष्ट्यांसौमिकेमखे तीर्थेब्राह्मणआयातेषडेतेजीवतःपितुरितिमैत्रपरिशिष्टेउद्वाहएवनस्योपसंहारात् एवंयत्तुसंस्कारादिपदंतदप्युद्वाहादिपरमेवेति तन्न उद्वाहपदस्यस्वविवाहपरत्वस्यापिसंभवात् पुत्रविवाहपरत्वेमानाभावात् नामकर्मणिबालानांचूडाकर्मादिकेतथेत्यादिभिर्नित्यश्राद्धस्यचोलाद्यंगत्वावगतेर्नित्यानित्यसंयोगविरोधाच्च अतोजन्मादावितिसर्वसंस्कारसंग्रहः तथाकात्यायनः स्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्मसु पिंडानोद्वाहनात्तेषां

स्याभावेतत्क्रमात् सुतानांचौलादिसंस्कारेषुपितास्वपितृभ्यःपिंडान्श्राद्धं पिंडदोंशहरश्चैषामितिदर्शनात् ओद्वहनाद्वात्पर्यंतं दद्यात् विवाहस्यप्रथमः नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहेबुधः अंतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकमितिस्मृतेः तस्यपितुरभावेतत्क्रमात् असंस्कृतास्तुसंस्कार्याभ्रातृभिःपूर्वसंस्कृतैरितियःकर्तृक्रमः तेनक्रमेणज्येष्ठभ्रात्रादिर्दद्यादितिचंद्रिकादयः हेमाद्रिस्तुतस्यपितुरभावेयःपितृव्यमातुलादिःसंस्कर्तास्तत्क्रमात्संस्कार्यपितृक्रमाद्दद्यान्नतुस्वपितृभ्यइतिव्याचख्यौ समावर्तनस्यापिविवाहप्राचीनकृतसंस्कारत्वात्पितैवनांदीश्राद्धंकुर्यात् तदभावेज्येष्ठभ्रात्रादिभिःतदभावेस्वयमेवकुर्यात् उपनयनेनकर्माधिकारस्यजातत्वात् एवमाद्यविवाहेपीतिपृथ्वीचंद्रोदयचंद्रिकादयः मदनरत्नेप्येवं यदातुपितरिसंन्यस्तेप्रोषितेपतितेवाधर्मार्थेनत्पुत्रमन्यःसंस्कुर्यात्तदासंस्कार्यपितुःपित्रादिभ्योदद्यात् पितरोजनकस्येज्यायावह्नितमनाहितं समाहितमतःपश्चात्त्वान्यजेनपितामहानितिपृथ्वीचंद्रोदयेयमोक्तेः जीवत्पितृकस्यविशेषमाहकात्यायनः ह्नौतीर्थेचसंन्यस्तेतातेचपतितेसति येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइतिबह्वृचपरिशिष्टे जीवत्पिताकृतसंस्कारेषुमातृमातामहयोःकुर्यात् तस्याजीवत्स्यामातामहस्यैवेतितत्सच्छाखीयानामेवेतिदिक् स्मृतितत्त्वादिगौडग्रंथेषुतुजीवन्मातृकःपितामह्यादिभ्योवृद्धौदद्यात् जीवंतमपिदद्यात्प्रेतायान्नोदकेद्विजइतिकात्यायनोक्तेः जीवेतस्मिन्कृताःकुर्युःपितामत्यासहैवतु तस्यांचैवतुजीवत्यांतस्याश्वश्वार्तिनिश्चयइतिहारीतोक्तेश्चेत्युक्तं तस्मिन्भर्तरिदाक्षिणात्यास्तुपूर्वोक्तसपिंडीकरणादिविषयत्वात् जीवेत्तुयदिवर्गाद्यस्तंवर्गंतुपरित्यजेदितिवचनात्तद्वर्गस्यलोपएवेत्याहुः यत्तुचंद्रिकायांपारस्करः निषेककालेसोमेचसीमंतोन्नयनेतथा ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवच्चतदिति तत्रगर्भाधानादौ

कर्मांगं जातकर्मादावुक्तंतुवृद्धिश्राद्धं पृथगेवविधिवदित्युक्तेः गौडनिबंधेमात्स्ये अन्नप्राशेचसीमंतेपुत्रोत्पत्तिनिमित्तके पुंसवेचनिषेकेचनववेश्मप्रवेशने वेदव्रतजलादीनांप्रतिष्ठायांतथैवच तीर्थयात्रावृषोत्सर्गेवृद्धिश्राद्धंप्रकीर्तितं अत्रभूतनिमित्तानांवृद्धित्वम् भाविनिमित्तानामगत्या वृद्धिशब्दस्तत्कर्मादिदेशार्थइतिगौडाः अन्येतुनिषेकादौकर्मांगवृद्धिश्राद्धयोः समुच्चयमाहुः नांदीश्राद्धसंज्ञातूभयानुगता अथेतिकर्तव्यता पृथ्वीचंद्रोदयेवृद्धपराशरः मालत्याःशतपत्रावामल्लिकाकुब्जयोरपि केतक्याःपाटलायावादेयामालानलोहिताः श्राद्धेमालानिषेधस्यायमपवादः तथा सुवेषभूषणैस्तत्रसालंकारैस्तथानरैः कुंकुमाद्यनुलिप्तांगैर्भाव्यंतुब्राह्मणैःसह स्त्रियोपिस्युस्तथाभूतागीतनृत्यादिहर्षिताः हेमाद्रौब्रह्मांडे कुशस्थानेचदूर्वास्युर्मंगलस्याभिवृद्धये कुशाअपिवस्यंते छंदोगपरिशिष्टे प्रातरामंत्रितान्विप्रान्युग्मानुभयतस्तथा उभयतःदैवेपित्र्येच वैश्वदेवेद्वौविप्रौपित्रादीनामेकैकस्यद्वौद्वाविति विंशतिः त्रिकेवाद्वावित्यष्टौविप्राः अत्रविप्रालाभेस्त्रियोपि भोज्याइत्याहशाकेवृद्धवसिष्ठः मातृश्राद्धेतुविप्राणामलाभेपूजयेदपि पतिपुत्रान्विताभव्यायोषितोष्टौकुलोद्भवाः मातृत्रिकेचतस्रः मातामहीत्रिकेचेत्यष्टावितिहेमाद्रिः अत्रपित्र्येप्राङ्मुखाविप्राः पाद्यपित्र्येचतुरस्रंमंडलमितिजयंतः हेमाद्रौब्राह्मे विप्रान्प्रदक्षिणावर्तंप्राङ्मुखानुपवेशयेत् छंदोगपरिशिष्टे गोत्रनामभिरामंत्र्यपितृभ्योर्घ्यंप्रदापयेत् नात्रापसव्यकरणंनपित्र्यंतीर्थमिष्यते ज्येष्ठोत्तरकरान्युग्मान्कराग्राग्रपवित्रकान् कृत्वार्घ्यंसंप्रदातव्यंनैकैकस्यात्रदीयते पित्रादेर्द्वौद्वौविप्रौतयोर्दक्षिणहस्तौसंयोज्यप्रथमोपवेशितविप्रकरोपरितंत्रेणद्वयोरर्घ्यंदद्यादित्यर्थः बह्वृचकारिकायांतु दत्तार्घ्यादेकदेशःस्यादर्घ्यदानंप्रतिद्विजं आवृत्तिरपिमंत्रस्यप्रतिब्राह्मणमिष्य

तेप्रतिद्विजंपृथक्कुर्यान्निवीत्यर्घ्यानुमंत्रणमित्युक्तं मधुमध्वितियस्तत्रत्रिर्जपोशितुमिच्छतां गायत्र्यानंतरंस्तोत्रंमधुमंत्रविवर्जितं नचाश्नंस्तु
जपेदत्रकदाचित्पितृसूक्तकं तथा संपन्नमितितृप्ताःस्थप्रश्नस्थानेविधीयते सुसंपन्नमितिप्रोक्तेशेषमन्नंनिवेदयेत् अक्षय्योदक
दानंचअर्घ्यदानवदिष्यते षष्ठ्यैवनियतंकुर्यान्नचतुर्थ्याकदाचन चंद्रोदयेब्राह्मे पठेच्छकुनिसूक्तंतुस्वस्तिसूक्तंशुभंतथा नांदीमु
खान्पितॄन्भक्त्यासांजलिश्चसमाह्वयेत् तथा शाल्यन्नंदधिमध्वक्तंबदराणियवांस्तथा मिश्रीकृत्यातुचतुरःपिंडान्श्रीफलसन्नि-
भान् दद्यान्नांदीमुखेभ्यश्चपितृभ्योविधिपूर्वकं द्राक्षामलकमूलानियवांश्चापिनियोजयेत् तान्येवदक्षिणार्थंतुदद्याद्विप्रेषुसर्वदा त
त्रैवचतुर्विंशतिमते द्वौद्वौचाभ्युदयेपिंडावेकैकस्मैविनिक्षिपेत् एकंनाम्नापरंतूष्णींदद्यात्पिंडान्पृथक्पृथक् वसिष्ठः प्राङ्मुखोदे
वतीर्थेनप्राक्कूलेषुकुशेषुच दत्वापिंडान्नकुर्वीतपिंडपात्रमधोमुखं नांदीमुखेभ्यःपितृभ्यःस्वाहेतिवापिंडदानमंत्रइतिवृत्तिः अत्रपिंडाःकृ
ताकृताइत्युक्तं तत्रैवभविष्ये पिंडनिर्वपणंकुर्यान्नवाकुर्याद्विचक्षणः वृद्धिश्राद्धेमहाबाहोकुलधर्मानवेक्ष्यतु छागलेयः अग्नौकर
णमर्घ्यंवावाहनंचावनेजनं पिंडश्राद्धेप्रकुर्वीतपिंडहीनेनिवर्तते तेनात्रभोजनस्यैवप्रधानत्वाद्यदिविप्रस्यवमनंतदातस्यैवपार्वण-
स्यपुनरावृत्तिरितिसिद्धं अत्रसांकल्पेविशेषःप्रयोगपारिजातेसंग्रहे शुभार्थीप्रथमांतेनवृद्धौसांकल्पमाचरेत् नषष्ठ्यायदिवाकुर्यान्महादो
षोभिजायते नामगोत्रादिनिषेधोप्यत्रैवनतुसपिंडकश्राद्धे इतिसएव अत्रार्थक्रमः नांदीश्राद्धेदैवेक्षणःक्रियतामितिद्वौयुग्मान्वानिम
न्त्र्य ओंतथेतिविप्राभ्यांयुगपदुक्तेप्रासुताभवंतौप्रासुवावइति वैश्वदेववत्पित्र्येचद्विवचनांतेनविप्रद्वयप्रयोगंकुर्यात् आहिताग्निस्तुहे-
माद्रौब्राह्मे योग्नौतुविद्यमानेपिहस्तेवोपिंडान्निर्वपेत् पतंतिपितरस्तस्यनरकेसचपच्यते बह्वृचपरिशिष्टे द्वौदर्भौपवित्रेपवित्राणिचत्वा

रियंनोदेवीत्यनुमंत्रितासुयवानावपति यवोसिसोमदेवत्योगोसवेदेवनिर्मितः प्रत्नवद्भिःप्रत्तःपुष्ट्यानांदीमुखान्पितृनिमाल्लोकान्प्रीणयाहिनःस्वाहेतिस्वाहार्घ्याइतिपृच्छति विश्वेदेवाइदंवोअर्घ्यंनांदीमुखाःपितरइति यथालिंगमर्घ्यदानं गंधादिदानं द्विर्द्विः पाणौहोमोग्नयेकव्यवाहनायस्वाहा सोमायपितृमतेस्वाहेत्यतोदेवाअवंतुनो इत्यंगुष्ठग्रहणं पावमानीःशंवतीरैवमतिरंयचश्रावयेन्मधुवाताऋचःस्थानेउपास्मैगायतेतिपंचमधुमतीः श्रावयेदक्षन्नमीमदंतेतिच षष्ठीं भुक्तशेषेणैकैकस्य द्वौद्वौपिंडौदद्यादिति चंद्रिकायांत्वत्र वसिष्ठः पितृभ्यस्तुसंपन्नं दैवेरुचितमित्यपि दधिकर्कंधुमिश्राश्चपिंडाःकार्या यथाक्रमं कात्यायनः त्वमूषुवाजिनमितिविप्रांश्चविसर्जयेत् नांदीमुखाःपितरःप्रीयंतामित्यक्षय्यस्थाने स्वधांवाचयिष्य इत्यस्यस्थानेनांदीमुखान्पितॄन्वाचयिष्ये इति नस्वधांप्रयुंजीतेति अत्रसाग्निरग्निर्वादौवैश्वदेवंकुर्वीत् आदौ वृद्धौक्षयेचांतेमध्येश्राद्धेतुपार्वणे एकोद्दिष्टेनिवृत्तेतुवैश्वदेवोविधीयत इत्याशार्केशांखायनपरिशिष्टात् हेमाद्रौतुशेषमन्नमनुज्ञाप्यवैश्वदेवक्रियाततः श्राद्धान्हिश्राद्धशेषेणवैश्वदेवंसमाचरेदितिचतुर्विंशतिमतान्नांदीश्राद्धेप्यंतेवैश्वदेवउक्तः बह्वृचानामपिगृह्यस्यालोचनात्तथैव पूर्वोक्तंतुयेषांपरिशिष्टंतद्विषयमन्यविषयंवाज्ञेयं अत्रश्राद्धांगतर्पणंनेत्युक्तंप्राक् इतिश्रीजगद्गुरुनारायणभट्टात्मजरामकृष्णभट्टसूनुकमलाकरभट्टकृतेनिर्णयसिंधौवृद्धिश्राद्धं अथजीवत्पितृकश्राद्धं तत्रानेकपक्षादृश्यंते जीवंतंपितरंभोजयित्वापरयोःश्राद्धंकुर्यादित्येकः होमांतमेवकुर्यादित्यन्यः होमांतःपितृयज्ञःस्याज्जीवेपितरिजानतः पितरंभोजयित्वावापिंडानिपृणुयात्परावितियज्ञपार्श्वोक्तेः यदिजीवत्पितानदद्यादाहोमात्कृत्वाविरमेदित्यापस्तंबोक्तेश्चजीव

तांपिंडानग्नौहुत्वा परेभ्योदेयमित्यपरः जुहुयाज्जीवेभ्य इत्याश्वलायनोक्तेः जीवतामजीवतांच पिंडदान-
मितीतरः जीवतामजीवतांवा देयमेवेतिहिरण्यकेतुरितिनिगमात् तस्माज्जीवत्पिताकुर्याद्वाभ्यामेवनसंशयइति
भविष्योक्तेर्द्वाभ्यामेवेत्यन्यः एतेपक्षाःकलौनिषिद्धाः प्रत्यक्षमर्चनंश्राद्धेनिषिद्धंमनुरब्रवीत् पिंडनिर्वपणंचापिसहापातकसंभि
तमिति पृथ्वीचंद्रोदयेभविष्योक्तेः चंद्रिकाप्येवं तस्मात्पितरिजीवति श्राद्धानारंभएवेत्येकःपक्षः सपितुःपितृकृत्येषु अधिका
रोनविद्यतइतिकात्यायनोक्तेः जीवेपितरिवैपुत्रःश्राद्धकालंविवर्जयेदितिहारीतोक्तेश्च पितुःपित्रादिभ्योदद्यादितिसिद्धांतः ध्रि
यमाणेतुपितरिपूर्वेषामेवनिर्वपेदितिमनूक्तेः पितुःपितृभ्योवादद्यात्सपितेत्यपराश्रुतिरितिकात्यायनोक्तेश्च अयंबहुसंमतःपक्षः
अन्येशाखाभेदेनज्ञेयाः एवंजीवन्मातामहेनाप्यूहेनकार्यं मातामहानामप्येवंश्राद्धंकुर्याद्विचक्षणः मंत्रोहेनयथान्यायंशेषाणाम-
न्त्रवर्जितमितिविष्णूक्तेः एवंमात्रादिकस्यापितथामातामहादिकेइति पृथ्वीचंद्रोदयेऽग्निपुराणाच्च पितरिजीवतितुस्वमातरिमृतायां
मपिपितुरेवमातृमातामहयोःकुर्यात् येभ्यएवपितादद्यादितिवक्ष्यमाणवचनादितिपितामहचरणाः मदनरत्नेतुजीवत्पितास्वमाता-
महयोर्दद्यादित्युक्तं कालादर्शेप्येवं मृतेतुपितरिजीवन्मातृकःपितामह्यादिभ्योवृद्धोदद्यादितिस्मृतिरत्नादिगौडग्रंथाः दाक्षि-
णात्यास्तुपितृवर्गेमातृवर्गेतथामातामहस्यच जीवेत्तुयदिवर्गाद्यस्तंवर्गंतुपरित्यजेदितिवचनात्तद्वर्गत्यागएवेत्याहुः एवंपतितसं
न्यस्तपितृकादेरपिज्ञेयं वृद्धेतीर्थेचसंन्यस्तेतातेचपतितेसति येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइतिषट्त्रिंशन्मतात्संन्यस्तेजी
वतीत्यर्थः मृतेतुसंन्यस्तेतदाद्यएवदेयं मृतेपिपरेभ्यएवेतिगौडाः कात्यायनोपि ब्राह्मणादिहतेतातेपतितेसंगवर्जिते व्युत्क्रमाच्चमृतेदेयं ये

भ्यएवददात्यसौ अयंचसंन्यस्तपित्रादेरपिशेषात्सर्वश्राद्धेधिकारः एतच्चत्रिदंडिपरं एकादशाहपार्वणवार्षिकाद्यपितस्यैव अहन्येकादशेमासेपार्वणंतुविधीयतेइत्युक्त्वा त्रिदंडग्रहणादेवप्रेतत्वंनैवजायते इत्युशनसाविशेषोक्तेः ब्राह्मणादिहतेइत्यादिनिषेधस्त्वेकदंडादिपरः अतःपरमहंसानांवार्षिकादिकमपिनकार्यमितिशूलपाणिश्राद्धतत्त्वादयोगौडग्रंथाः इदमेवतुयुक्तं यत्तुहेमाद्रौकौडिन्यः दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकं नजीवत्पितृकःकुर्यात्तिलैस्तर्पणमेवचेति तत्संन्यस्तपित्राद्यतिरिक्तविषयं मैत्रायणीयपरिशिष्टे उद्वाहेपुत्रजननेपित्र्येष्ट्यांसौमिकेमखे तीर्थेब्राह्मणआयातेषडेतेजीवतःपितुः तत्रैव महानदीषुसर्वासुतीर्थेषुचगयामृते जीवत्पितापिकुर्वीतश्राद्धंपार्वणधर्मवत् गयामृतेइतिमातृव्यतिरिक्तविषयं अन्वष्टक्यंगयाप्राप्तौसत्यायंचमृतेहनि मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवतीतितत्रैवोक्तेः गयाप्राप्तौप्रासंगिक्या गयांप्रसंगतोगत्वामातुःश्राद्धंसमाचरेदितिवचनात् तेनमृतमातृकोगयायांतस्यापार्वणमात्रंकुर्यात् तज्जीवनेतुतीर्थश्राद्धमपिनेतिकालादर्शस्मृतिदर्पणादयः अन्येतुगत्वाश्राद्धंनेतिनिषेधार्थः सामान्यतःप्राप्ततीर्थश्राद्धंभवत्येवगयायामित्याहुः यदातुपितुःप्रतिनिधित्वेनगयांयातितदायजमानस्यपितृपितामहप्रपितामहाइत्येवंश्राद्धं तत्रमातुःपितृपत्नीत्वेनैकोद्दिष्टंकृत्वामातृत्वेनपुनःपार्वणंकुर्यादितित्रिस्थलीसेतौ तच्चफल्गुविष्णुपदाक्षय्यवटेष्वेवेतिकेचित् आद्यांतएवेत्यन्ये मध्यमांतेइत्यपरे संकोचेहेत्वभावात्तत्रत्यसर्वश्राद्धानिमातुःकार्याणीत्युक्तंप्रतिभाति यत्तुमदनपारिजाते नजीवत्पितृकःकुर्याच्छ्राद्धमग्निमृतेद्विजः येभ्यएवपितादद्यात्तेभ्यःकुर्वीतसाग्निकइतिस्मृत्युक्तेः साग्नेरेवजीवत्पितृकस्यतीर्थादिश्राद्धमुक्तं साग्नेरपिमैत्रायणीयशाखीयस्यैवना

न्येषाम् षडेतेजीवतःपितुरितिनतत्परिशिष्टेएवोक्तेरितिरत्नावलीदिवोदासाद्याः तदप्युक्तं सोमंतवंपिंडपितृयज्ञविषयं संन्यस्तपित्रा
द्यतिरिक्तविषयंवेति पृथ्वीचंद्रोदयोक्तेः वृद्धौतीर्थेचेत्यादेः साधारण्येनास्यापितत्त्वाच्च तथानिरग्नेरपिनांदीश्राद्धमुक्तंप्राक् एवंपिता
महजीवनेपिज्ञेयं विशेषःपितृकृतजीवत्पितृकनिर्णयेज्ञेयः. अथपितामहेजीवतिमृतेचपितरियद्यपिपितरौ होचातच्छ्राद्धेभुं
जीतेत्यब्रवीन्मनुरितिमनुनाजीवतः पितामहस्यभोजनमुक्तं तथापिप्रत्यक्षार्चनस्यपूर्वंनिषिद्धत्वात्पितामहंविहायपितृप्र-
पितामहवृद्धप्रपितामहेभ्योदद्यात्पितायस्यतुवृत्तःस्याज्जीवेच्चापिपितामहः पितुःसनामसंकीर्त्यकीर्तयेत्प्रपितामहमिति
मनूक्तेः अयमेवसर्वसंमतःपक्षः यत्तुछंदोगपरिशिष्टे पितामहेध्रियमाणेपितुःप्रेतस्यनिर्वपेत् पितुस्तस्यचवृत्तस्यजीवे
च्चेत्प्रपितामहइति एकपुरुषंद्विपुरुषंवापार्वणमाहतत्तीर्थपितृयज्ञपरं श्राद्धेपूर्वोक्तमेव एवंपूर्वयोर्मृतयोःप्रपितामहेजी
वतिपितृमात्रेमृतेपरयोर्जीवतोश्चवृद्धप्रपितामहादिभ्योज्ञेयं जीवंतमतिदद्याद्वाप्रेतायान्नोदकेद्विजइतिकात्यायनोक्तेश्च एत
त्सर्वंमनसिकृत्वाहहेमाद्रौविष्णुः पितरिजीवतियःश्राद्धंकुर्याद्येषांपिताकुर्यात्तेषांपितरिपितामहेचजीवतियेषांपितामहः पित
रिपितामहेप्रपितामहेचजीवतिनैवकुर्यात् यस्यपितामृतःस्यात्सपित्रेपिंडंनिधायपितामहात्पराभ्यांद्वाभ्यांदद्यात् यस्यपिता-
प्रपितामहश्चप्रेतौस्यातांसपित्रेपिंडंनिधायपितामहात्पराभ्यांदद्यात् यस्यपितामहःप्रेतःस्यात्सतस्मैपिंडंनिधायप्रपितामहात्
पराभ्यांदद्यात् यस्यपितापितामहश्चप्रेतौस्यातांसताभ्यांपिंडौदत्वापितामहप्रपितामहायदद्यात् मातामहाना-
मप्येवंश्राद्धंकुर्याद्विचक्षणः मंत्रोहेनयथान्यायंशेषाणांमंत्रवर्जितमिति अत्रपितृवन्मातामहेजीवतितत्पित्रादिभ्यः यथातत्रपित्रिषुजीव-

त्कृनैवकुर्यात्तथात्रापीत्यादिसर्वमतिदेश्यम् एवंमातृजीवनेपीतिशूलपाणिकालादर्शौ तन्न येभ्यएवेत्यादौयच्छब्दादेर्व्यक्तिविशेषवाचित्वेनतदप्रसंगादितिदिक् उत्तरार्धंव्याख्यातंप्राक् यत्त्वत्रविज्ञानेश्वरेणोक्तं पित्रेपिंडंनिधायेतिपितुरेकोद्दिष्टविधिनाश्राद्धंकृत्वापितामहादिभ्यःपार्वणंकुर्यात् तद्व्युत्क्रममृतसपिंडीकरणाभावपक्षेसपिंडीकरणस्थानापन्नंज्ञेयं व्युत्क्रमात्तुप्रमितानांनैवकार्यासपिंडतेतिवचनात् दर्शादौतुपितुरेकोद्दिष्टमेवकार्यम् नजीवंतमतिदद्यादितिश्रुतेः जीवेत्तुपितामहोयस्यपितान्वंतरितोभवेत् पितुरेकस्यदातव्यमेवमाहुर्मनीषिणइतियज्ञपार्श्वोक्तेः पितामहेजीवतिवैपितर्येवसमापयेदितिहारीतोक्तेश्च शिष्टास्तु व्युत्क्रमात्तुप्रमीतानांनैवकार्यासपिंडता यदिमातायदिपिताभर्तानैषविधिःस्मृतइतिमाधवीयस्कांदोक्तेर्व्युत्क्रममृतसपिंडीकरणाभावः पित्रादिविषयइत्याहुः एषविधिर्निषेधरूपःत्रिषुजीवत्सुविष्णुराहत्रिषुजीवत्सुनैवकुर्यादितितद्दर्शादिविषयं नांदीश्राद्धंतुपरेभ्यस्त्रिभ्यो भवत्येवेतिकल्पतरुः पृथ्वीचंद्रोदयस्तु दद्यात्त्रिभ्यः परेभ्यस्तु जीवेच्चेत्त्रितयंयदीतिमनूक्तेः सर्वत्रविकल्पः स्वदेशाचाराद्व्यवतिष्ठतइत्याहुः सुदर्शनभाष्येतुमासिकश्राद्धंजीवत्पित्रादिनाव्युत्क्रममृतपित्रादिनाचकार्यमेवेत्युक्तं मदनरत्नेतुः अष्टकादिषुसंक्रांतौमन्वादिषुयुगादिषु चंद्रसूर्यग्रहेपाते स्वेच्छयापूज्ययोगतः जीवत्पितानैवकुर्याच्छ्राद्धंकाम्यंतथाखिलं अन्येविशेषाः श्रीपितृकृतजीवत्पितृकनिर्णयेमत्कृतत्रिस्थलीसेतौचज्ञेयाः इतिश्रीभट्टकमलाकरकृतौनिर्णयसिंधौजीवत्पितृकादिश्राद्धं

अथविभक्ताविभक्तनिर्णयः पृथ्वीचंद्रोदयेमरीचिः बहवःस्युर्यदापुत्राःपितुरेकत्रवासिनः सर्वेषांतुमतंकृत्वाज्येष्ठेनैवतुयत्कृतं द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् ज्येष्ठस्यकर्तृत्वेपिसर्वेफलभागिनइत्यर्थः तेनयेत्र

ब्रह्मचर्यादिनियमास्तेफलितसंस्कारत्वात्सर्वैःकार्याः एवंसंसृष्टिनामपितुल्यत्वात् मिताक्षरायांनारदः भ्रातॄणामविभक्तानामे
कोधर्मःप्रवर्त्तते विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक् बृहस्पतिरपि एकपाकेनवसतांपितृदेवद्विजार्चनं एकंभवेद्विभक्ता
नांतदेवस्याद्गृहेगृहे अत्रयद्यप्यविशेषश्रवणात् ब्रह्मयज्ञसंध्यादिष्वप्यविभक्तानांपृथङ्निषेधःप्राप्नोतितथापिद्रव्यसाध्यश्रा
द्धवैश्वदेवादिष्वेवसः द्रव्यस्यानेकस्वामिकत्वेनैकस्यव्ययेनाधिकारात् यानितुद्रव्यासाध्यानिमंत्रजपोपवाससंध्याब्रह्मयज्ञपारा
यणादीनिनित्यनैमित्तिककाम्यानितेषुपृथगेवाधिकारः द्रव्यव्ययाभावेनुमत्यनपेक्षणात् द्रव्येणवाविभक्तेनेत्यस्याविषय-
त्वात् पृथगप्येकपाकानांब्रह्मयज्ञोद्विजातिनां अग्निहोत्रसुरार्चाचसंध्यानित्यंभवेत्तथेति प्रयोगपारिजातेआश्वलायनस्मृ
तेश्च अग्निहोत्रशब्दोग्निसाध्यश्रौतस्मार्तनित्यकर्मपरः तेषुप्यन्यानुमत्यैवाधिकारेणान्यायसाम्यात् पितृश्राद्धादिषुतुल्यफ
लेषुनित्येष्वनुमतिंविनाप्येकस्याधिकारः एकोपिस्थावरेकुर्याद्दानाध्ययनविक्रयं आपत्कालेकुटुंबार्थेधर्मार्थेचविशेषतइति
वचनात् धर्मार्थेवश्यकर्तव्येपितृश्राद्धादावितिविज्ञानेश्वरः केचित्त्वविभक्तानामपिपृथक्पाकत्वेदेशांतरेचदार्शिकाब्दिकयोः
पृथक्त्वमाहुः भ्रातॄणामविभक्तानांपृथक्पाकोभवेद्यदि वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथक् इतिहारीतोक्तेः अ
विभक्तेनपुत्रेणपितृमेधोमृताहनि देशांतरेपृथक्कार्योदर्शश्राद्धंतथैवचेति यमोक्तेश्चेतितन्मूलंचिंत्यं तदयमर्थः पंचमहा
यज्ञमध्येदेवभूतपितृमनुष्ययज्ञानन्यानुमत्याज्येष्ठएवकुर्यात् होमाग्रदानरहितंनभोक्तव्यंकदाचन अविभक्तेषुसंसृष्टे
ष्वेकेनापिकृतंकृतमितिव्यासोक्तेश्च यस्यतुज्येष्ठेनाकृतेवैश्वदेवेनसिद्ध्येत्तेनतूष्णींमग्नौकिंचित्क्षिप्त्वाभोक्तव्यं यस्यत्वेषा

मग्रतोन्नंसिद्धंयत्स्यान्नियुक्तमग्नौहुत्वाग्रंब्राह्मणायदत्वाभुंजीतेत्यविभक्ताधिकारेपृथ्वीचंद्रोदयेगोभिलोक्तेः आश्वलायनस्तुपाक
पार्थक्येपृथक्त्वंतदेकत्वेपृथक्त्वमाह वसतामेकपाकेनविभक्तानामपिप्रभुः एकस्तुचतुरोयज्ञान्कुर्याद्ब्रह्मयज्ञपूर्वकान् अ
विभक्ताविभक्तावापृथक्पाकाद्विजातयः कुर्युःपृथक्पृथग्यज्ञान्भोजनात्प्राग्दिनेदिनइति ब्रह्मयज्ञसंध्यास्नानतर्पणादि
तूक्तहेतोःपृथगेव देवपूजातूक्तवचनद्वयादेकत्वेपृथग्वा दर्शग्रहणश्राद्धादित्वेकस्यैव तीर्थश्राद्धाद्यपियुगपत्सर्वेषामविभक्ता
नांप्राप्तावेकस्यभेदेनप्राप्तौभिन्नं गयाश्राद्धेप्येवं एष्टव्याबहवःपुत्राःशीलवंतोगुणान्विताः तेषांतुसमवेतानांयद्येकोपिग
यांव्रजेत् तारितास्मोवयंतेनसयातिपरमांगतिमितिहेमाद्रौकौर्मोक्तेः काम्यापिदानहोमादावन्यानुमत्यैवाधिकारः इत्यासा
ध्यजपादौतावितापि अपरार्केपैठीनसिः विभक्तेस्तुपृथक्कार्यंप्रतिसंवत्सरादिकं एकेनैवाविभक्तेषुकृतंसर्वैस्तुतत्कृतम्
सांवत्सरात्पूर्वाणिमासिकान्येकमेव तदाहलघुहारीतः सपिंडीकरणात्तानियानिश्राद्धानिषोडश पृथङ्नैवसुताःकुर्युः
पृथक्द्रव्याअपिक्वचित् सपिंडनंमासिकोपलक्षणं अर्वाक्संवत्सराज्ज्येष्ठःश्राद्धंकुर्यात्समेत्यतु ऊर्ध्वंसपिंडीकरणात्सर्वे
कुर्युःपृथक्पृथगितिव्यासोक्तेः उशनाः नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषोडश एकेनैवतुकार्याणिसंविभक्तधनेष्वपि म
घात्रयोदशीश्राद्धंत्वविभक्तानामपिपृथगित्युक्तंप्राक् यत्तुवृद्धवसिष्ठः मासिकंचवृषोत्सर्गंसपिंडीकरणंतथा ज्येष्ठेनैवप्रकर्तव्यंसा
ब्दिकंप्रथमंतथेति तन्निर्मूलं बह्वृचपरिशिष्टेनवश्राद्धंसहदद्युः अथतीर्थश्राद्धं तत्रवृद्धप्रस्मासितामहत्ताभ्रस्थलीसेतुरेव
जागर्तितथापिकिंचिदुच्यते तत्रयात्रायांसहाग्निर्वासपत्नीकोगच्छेत्तीर्थानिसंयतः प्रायश्चित्तीव्रजेत्तीर्थंपत्नीविरहितोपिवा यज्ञे

श्वनधिकारीवा यश्च वासंत्रसाधक इति कौर्मादिवचनात्साग्नेः सपत्नीकस्यैवाधिकारः भारते ब्राह्मणः क्षत्रियोवैश्यः शूद्रोवाराज-
सत्तम नवियोनिंव्रजंत्येते स्नानात्तीर्थे महात्मनः स्कांदेविधवाधर्मेषु स्नानंदानंतीर्थयात्रांविष्णुनामग्रहंमुहुः एतत्पुत्रा-
द्यनुमत्यैव साधवायाः पत्यासहैवेतिप्रागुक्तं काशीखंडे मातुःपितुःक्षेत्रमनास्तथास्थिस्कृतस्तुकुर्यात्खलुतीर्थयात्रां तद्वि
धिस्कांदे तीर्थयात्रांचिकीर्षुःप्राग्विधायोपोषणगृहे गणेशंचपितॄन्विप्रान्साधून्शक्त्याप्रपूज्यच कृतपारणकोहृष्टोगच्छे
न्नियमधृक्पुनः आगत्याभ्यर्च्यचपितॄन्यथोक्तफलभाग्भवेत् उपवासात्प्रागमुंडनंचकार्यं प्रयागेतीर्थयात्रायांपितृमातृ
वियोगतः कचानांवपनंकुर्याद्यथानीवृकंचौप्रभवीदितिविष्णूक्तेः प्रायश्चित्तार्थयात्रायांगंगायांचैतदित्येके केचित्तुहेमाद्रौभार
ते केशश्मश्रुनखादीनांवपनंनचशस्यते अतोनकार्यंवपनंगयायांश्राद्धार्थिनांसदा येभारतेस्मिन्पितृकर्मनि नृपराःसंधार्यकेशान्
तिभक्तिभाविताः ऋणक्षयार्थंपितृतीर्थमागतास्तेषामृणंसंक्षयमेष्यत्यक्षयमितिनिषेधात् गयायात्रांगंवपनंनकार्यमित्याहुः
वस्तुतस्तु गयाधिकरणकस्यैवायंनिषेधः नतुयात्रांगस्यश्राद्धार्थिनेत्युक्तेः विशालांविरजांगयामित्यनेनैकवाक्यत्वाच्च श्राद्धं
तुषड्नवद्वादशादैवतंवाघृतेनकार्यं गच्छेद्देशांतरंयस्तुश्राद्धंकुर्यात्ससर्पिषेतिविष्णुपुराणात् यात्रागवृद्धिश्राद्धेकेश्व श्रा
द्धंचपारणादिनएव उपोष्यरजनीमेकांप्रातःश्राद्धंविधायच गणेशब्राह्मणान्नत्वाक्षमाप्रस्थितवान्सुधीरितिस्कांदलिंगा
त् गौडनिबंधेगौतमः तीर्थयात्रासमारंभेतीर्थात्प्रत्यागमेपिच वृद्धिश्राद्धंप्रकुर्वीतबहुसर्पिःसमन्वितं वृद्धिपदंतन्त्रसार्थं
श्राद्धोत्तरंयात्रासंकल्पइतिभट्टाः वायवीये उद्यतस्तुगयांगंतुंश्राद्धंकृत्वाविधानतः विधायकार्पटीवेषंग्रामंगत्वाप्रदक्षिणम्

ततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनं घृतस्य भोजनं तच्च क्रोशमध्ये श्राद्धोत्तरं क्रोशगमननिषेधात् ततः प्रतिदिनं गच्छेत् प्रतिग्रहविवर्जितः गयायामेव तन्नान्यत्रेति केचित् हेमाद्रिस्तु गयायां श्राद्धदिन एव प्रस्थानं तीर्थांतरे तु श्राद्धोत्तरदिन इत्याह प्रभासखंडे यद्यन्यं कारयेच्छक्त्या तीर्थयात्रां नरेश्वरः स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणं यात्रामध्ये आशौचे रजसि वा स्त्री पर्यंतं स्थित्वा तदंते गच्छेत् मार्गवैषम्ये त्वदोषः यात्रामध्ये तीर्थांतरप्राप्तौ श्राद्धादिकार्यमेव वाणिज्याद्यर्थं गते न तु मुंडनोपवासादि न कार्यमिति प्रयागसेतौ भट्टाः वस्तुतस्तु तत्रापि मुंडनोपवासश्राद्धादिकार्यं अर्धं तीर्थफलं तस्य यः प्रसंगेन गच्छतीति ब्राह्मोक्तेः स्कांदे द्विर्भोजनं तृतीयांशं हरेत्तीर्थफलस्य च वाणिज्यं त्रींस्तथा भागान् हंति सर्वं प्रतिग्रहः यानं धर्मं चतुर्थांशं छत्रोपानहमेव चेत्युत्तरार्धपाठांतरं अत्र नदीषु विशेषः मार्गेतरा नदीप्राप्तौ स्नानादि परपारतः अर्वागेव सरस्वत्या एष मार्गगतो विधिः यस्तु पितॄन्संतर्पयित्वा तु नदीं संतरति यो नरः तस्यास्तु कूपानकामास्ते भवंति भृशदुःखिता इति तत्सरस्वतीपरं शंखः तीर्थं प्राप्यानुषंगेण स्नानं तीर्थे समाचरेत् स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु स एव न स्रवंतीमतिक्रामेदनवसिच्य तीर्थप्राप्तो तु प्रभासखंडे यानानि तु परित्यज्य भाव्यं पादचरैर्नरैः लुठित्वा लोठनीं तत्र कृत्वा कार्पटिकाकृतिं कृत्वेति गृहान्निर्गमसमये करणे इदं प्रथमं चालयेत्तीर्थं प्रपावेन जलं शुचि अवगाह्य ततः स्नायाद्यथावन्मंत्रयोगतः मंत्रश्च प्रभासखंडे नमोस्तु देवदेवाय शितिकंठाय दंडिने रुद्राय चापहस्ताय चक्रिणे वेधसे नमः सरस्वती च सावित्री वेदमाता गरीयसी सन्निधात्री भव त्वत्र तीर्थे पापप्रणाशिनीति मंत्रः स्नानं च वपनोत्तरं कार्यं पूर्वमावाहनं तीर्थे मुंडनं तदनंतरं ततः स्नानादिकं कुर्यात्पश्चाच्छ्राद्धं समाचरेदित्युक्तेः

यत्तु गत्वा स्नानं प्रकुर्वीत वपनं तदनंतरमिति तन्मुशलस्नानपरं काशीखंडे तीर्थोपवासः कर्तव्यः शिरसो मुंडनं तथा उपवासेन चैवोक्तं यदह्नि तीर्थप्राप्तिः स्यात्तदह्नः पूर्ववासरे उपवासः प्रकर्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् अथ उपवासं ततः कुर्यात्तस्मिन्नहनि सुव्रत इति प्राप्तिदिनेऽप्युपवासोक्तेर्विकल्पः मुंडने तु स्कांदे देवलो मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिः वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयां विरजं लोणारप्रसिद्धमहातीर्थपरः सर्वतीर्थशब्दः अत्र विशेषः स्मृत्यंतरे ऊर्ध्वमब्दाद्द्विमासोनात्पुनस्तीर्थं व्रजेद्यदि मुंडनं चोपवासं च ततो यत्नेन कारयेत् तदा तद्वपनं शस्तं प्रायश्चित्तं मृते द्विजेति पादः प्रयागे प्रतियात्रं तु योजनत्रय इष्यते क्षौरं कृत्वा तु विधिवत्ततः स्नायात्सितासिते तथा च बृहस्पतिः क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवं पित्रादिमृतिदीक्षासु प्रायश्चित्तथतीर्थके अपरार्के स्कांदे उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् इदं प्रयागे सधवानामपि समूलं भवतीति भट्टाः युक्तं तु सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं एवमेव हि नारीणां शास्येत वपनक्रियेति तच्चाकृतचूडानां न कार्यमिति केचित् तत्त्वं तु नैमित्तिकत्वात्पित्रादिमृतवत्कार्यमेवेति तदपि प्रयागे नित्यं नान्यत्र तच्च यतिभिस्तीर्थेपि ऋतुसंधिष्वेव कार्यं नान्यदा कक्षोपस्थशिखावर्जं ऋतुसंधिषु वापयेदिति स्मृतेः इदं जीवत्पितृकेणापि तीर्थे कार्यं न च मुंडनं पिंडदानं चेति दक्षवचनेन निषेधः विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं विना यो वापयति लोमानि स पुत्रः पितृघातक इति स्मृत्या तत्संकोचात् तदपि प्रयागे प्रतियात्रमन्यतीर्थे आद्ययात्रायामेवेति शिष्टाः ततः स्नानं परार्के तु मार्कंडेयपुराणे मातरं पितरं जायां भ्रातरं सुहृदं गुरुं यमुद्दिश्य निमज्जेत अष्टमांशं लभेत्ततः पैठीनसिः प्रतिकृतिं कुशमयीं—

तीर्थवारिणिमज्जयेत् मज्जयेच्चयमुद्दिश्यसोऽष्टभागफलंलभेत् ततस्तर्पणश्राद्धे पृथ्वीचंद्रोदयेब्रह्मदेवीपुराणकाशीखंडादिषु अकालेप्यथवाकालेतीर्थेश्राद्धंसतर्पणं अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेत् मात्स्ये पितॄणांचैवतर्पणमितितुर्यपादः तत्रदेवता: महालयेप्रागुक्ताः शंखदेवलौ तीर्थद्रव्योपपत्तौचनकालमवधारयेत् पात्रंचब्राह्मणंप्राप्यसद्यःश्राद्धंसमाचरेत् हारीतः दिवावायदिवारात्रौभुक्तोवाप्युपोषितोपिवा नकालनियमस्तत्रगंगांप्राप्यसरिद्वरां भारते भुक्तोवाप्यथवाभुक्तोरात्रौवायदिवादिवा पर्वकालेथवाकाले शुचिर्वाप्यथवाशुचिः यदैवदृश्यतेतत्रनदीचत्रिपथाप्रिय प्रभापादर्शनतस्मान्नकालस्तत्रकारणं आशौचेपिकार्यं विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदितिपैठीनसिस्मृतेः तदानीमकरणेत्वाशौचांतेएवकुर्यात् प्रभासखंडे नवारंनचनक्षत्रंनकालस्तत्रकारणं यदैव दृश्यतेतीर्थंतदापर्वसहस्रकं मलमासेपिकार्यं नित्येनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लुचे तीर्थश्राद्धंगजच्छायाप्रेतश्राद्धंतथैवचेति बृहस्पतिस्मृतेः एतच्चाशौचेप्रकृतभोजनस्यरात्रौवास्नानश्राद्धादिकमाकस्मिकतीर्थप्राप्तावामहेमश्राद्धविषयंग्रहणादिवत् नतुबुद्धिपूर्वमाशौचादौतीर्थप्राप्तिःकार्या मलमासेतुमासद्वयेतीर्थश्राद्धंकार्यमितिचंद्रिकायां देवीपुराणे श्राद्धंचतत्रकर्तव्यमर्घ्यावाहनवर्जितं हेमाद्रौ अर्घ्यमावाहनंचैवद्विजांगुष्ठनिवेशनं तृप्तिप्रश्नंचविकिरंतीर्थश्राद्धेविवर्जयेत् भविष्ये आवाहनंविसृष्टिश्चतत्रतेषांनविद्यते आवाहनंनतीर्थेस्यान्नार्घ्यंदानंतथाभवेत् आहूताःपितरस्तीर्थेकृतार्घ्याःसंतिवैयतः अग्नौकरणंचनेतिरत्नावल्यां अत्रषड्दैवतेश्राद्धेपिमात्रादीनांपिंडमात्रंदेयं हविःशेषंततोमुष्टिमादायैकैकमादृतः क्रमशःपितृपत्नीनांपिंडनिर्वपणंचरेदितितीर्थोपक्रमेदेवलोक्तेरिति पृथ्वी

चंद्रः ततःसामान्यपिंडंदद्यात् ततःपिंडमुपादायहविषःसंस्कृतस्यच ज्ञातिवर्गस्यसर्वस्यसामान्यंपिंडमुत्सृजेदितितेनैवोक्तेः पाद्मे तीर्थश्राद्धंप्रकुर्वीतपक्वान्नेनविशेषतः आमान्नेनहिरण्येनकंदमूलफलैरपि पिंडद्रव्याणिदेवीपुराणेहेमाद्रौब्राह्मेच सक्तुभिःपिंडदानंचसंयावैःपायसेनवा कर्तव्यमृषिभिःप्रोक्तंपिण्याकेनगुडेनवा पिंडानांतीर्थप्रक्षेपएवनान्याप्रतिपत्तिरित्युक्तंप्राक् एतच्चविधवयाऽपुत्रयाकार्यं नसपुत्रयेत्युक्तंप्राक् सपुत्रयानकर्तव्यंभर्तुःश्राद्धंकदाचनेतिस्मृतेश्च अनुपनीतेनापिकार्यं एतच्चानुपनीतोपिकुर्यात्सर्वेषुपर्वस्वितिपाद्मेतीर्थश्राद्धस्यपक्वस्योक्तेः एतच्चजीवत्पितृकेणापिकार्यमित्युक्तंप्राक् नकुर्यात्सूतकंभिक्षुःश्राद्धंपिंडोदकक्रियां त्यक्तंसन्यासयोगेनगृहधर्मादिकंव्रतं गोत्रादिचरणंसर्वंपितृमातृकुलंधनमितिस्मृतेः गयायांतूक्तंवायवीये दंडंप्रदर्शयेद्भिक्षुर्गयांगत्वानपिंडदः दंडंस्पृष्ट्वाविष्णुपदेपितृभिःसहमुच्यते गयायांमुंडपृष्ठेचकूपेयूपेवटेतथा दंडंप्रदर्शयन्भिक्षुः पितृभिःसहमुच्यते कृत्यरत्नेप्रभासखंडे तीर्थेचेत्प्रतिगृण्हातिब्राह्मणोवृत्तिदुर्लभः दशांशमर्जितंदद्यादेवंकुर्वन्नहीयते इतिविशेषांतराणिभट्टकृतत्रिस्थलीसेतौज्ञेयानीतिदिक् इति कमलाकरभट्टकृतेनिर्णयसिंधौतीर्थश्राद्धविधिः समाप्तः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥इतिनिर्णयसिंधौतृतीयपरिच्छेदेश्राद्धप्र॰स०॥

॥अथनिर्णयसिंधौतृतीयपरिच्छेदेआशौचप्रकरणंप्रार०॥

श्रीगणेशायनमः ॥ ॥ अथाशौचप्रकरणंप्रारभ्यते नारायणात्मजःश्रीमद्रामकृष्णाख्यसूनुना कमलाकरसंज्ञेनाशौचंनिर्णीय
तेऽधुना १ मरीचिः आचतुर्थाद्भवेत्स्रावःपातःपंचमषष्ठयोः अतऊर्ध्वंप्रसूतिःस्याद्दशाहंसूतकंभवेत् बृहत्पराशरः गर्भस्रावे
तुनैकत्वारात्रयोमासस्संमिताः स्रावगर्भस्यविद्वांसोमासादर्वाक्चतुर्थकात् पातमूर्ध्ववदंत्येके तत्राधिकंतुसूतकं स्रावेमातुस्त्रिरा-
त्रंस्यात्सपिंडाशौचवर्जनं पातेमातुर्यथामासंसापिंडानांदिनत्रयं अत्रसर्वत्रमूलंमिताक्षरायांज्ञेयं अत्रमासत्रयेत्रिरात्रंस्यादित्य
नुवादः रजस्वलात्वेनैवतत्सिद्धेः यद्यप्यनेन चतुर्थमासपित्रिरात्रंप्राप्नोति तथापि षण्मासाभ्यंतरंयावद्गर्भस्रावोभवेद्य
दि तदामाससमैस्तासांदिवसैःशुद्धिरिष्यतेइत्यादिपुराणात् रात्रिभिर्मासतुल्याभिर्गर्भस्रावेविशुद्ध्यतीतिमनूक्तेः गर्भस्रावे
यथामासमचिरेतूत्तमेत्रयइतिमरीच्युक्तेश्चतूरात्रज्ञेयं अचिरेत्रिमासमध्ये उत्तमेब्राह्मणे अत्रसपिंडानांस्नानं सद्यःशौचंसपिं
डानांगर्भस्यपतनेसतीतितत्रैवोक्तेः एतदाचतुर्थमासात्पातेत्रिदिनस्योक्तेः अकारणायाःशुद्धेरसंभवात् सद्यःपदंस्नानपरं एव
मर्त्येपि गर्भस्रावेस्नानमात्रंपुरुषस्येतिवृद्धवसिष्ठोक्तेः पुरुषस्येतिसपिंडोपलक्षणं पूर्वोक्तवचनात् आचतुर्थमासंसपिंडानांनस्ना
नंकिंतुपुंसएव पातेत्रिदिनंनिर्गुणपरं गुणवतस्तु अजातदंतेतनयेशिशौगर्भच्युतेतथा सपिंडानांतुसर्वेषामेकरात्रमशौचकमिति
यमोक्तेरेकाहइतिमदनपारिजातः सप्तमासादिदशाहं एतत्सर्ववर्णविषयं तुल्यंवयसिसर्वेषामतिक्रांतेतथैवचेति व्यासोक्तेःप
राशरः जातेविप्रोदशाहेन द्वादशाहेनभूमिपः वैश्यःपंचदशाहेनशूद्रोमासेनशुद्ध्यति संवर्तः जातेपुत्रेपितुःस्नानंसचेलं
तुविधीयते माताशुद्ध्येद्दशाहेनस्नानात्तुस्पर्शनंपितुः पुत्रपदात्कन्यात्पत्तौनपितुःस्नानमितिहारलतायां तन्न पुत्रपदस्य

पौत्रीमातामहस्तेनेतिकन्यायामपिप्रयोगात् यच्चतत्रैवोक्तम् सूतकेतुमुखंदृष्ट्वाजातस्यजनकस्ततः कृत्वासचैलंस्नानंतुशुद्धोभवतितत्क्षणात् इत्यादित्यपुराणान्मुखदर्शनोत्तरमेवपितुःस्नानमितितन्न विदेशेमुखदर्शनावध्यस्पृश्यतापत्तेः मुखदर्शनोत्तरंपुनःस्नानार्थमिदमितिस्मार्तगौडाः तन्न मूलेश्रवणज्ञानमात्रपरत्वात् इदंसवर्णसमं सूतिकासर्ववर्णेषुदशरात्रेणशुद्ध्यति अतोऽत्रनएस्यकुशोऽसवर्णेष्वयंविधिरिति हारलतायांप्रचेतसोक्तेः यत्तुब्राह्मे ब्राह्मणीक्षत्रियावैश्याप्रसूतादशभिर्दिनैः गतैःशूद्राचसंस्पृश्यात्रयोदशभिरेवचेति प्रयोगपारिजाते पारस्करः द्विजातेःसूतिकायास्यात्सादशाहेनशुद्ध्यति त्रयोदशेन्हिसंप्राप्तेशूद्राशुद्ध्यत्यसंशयमिति तदस्पृश्यत्वपरं अंगिराः सूतकेसूतिकावर्जंसंस्पर्शोननिषिध्यते संस्पर्शेसूतिकायास्तुस्नानमेवविधीयते नाशौचंसूतकेपुंसः संसर्गंचेन्नगच्छति रजस्तत्राशुचिज्ञेयंतच्चपुंसिनविद्यते संसर्गोमैथुनं स्पर्श इत्यन्येमातुरेवसूतकं नास्पृशतश्चेति हारलतायांस्वमतोक्तेरिति तन्न संस्पर्शेसूतिकायास्तुस्नानमेवविधीयतइति स्नानमात्रोक्तेः सीमंतवर्जनस्यस्नानपर्यंतमस्पृश्यत्वमात्रबोधकत्वात् एवकारोबालस्पृश्यत्वार्थः माधवस्तु यस्तैःसहसपिंडोपिप्रकुर्याच्छयनाशनं बांधवोवापरोवापिसदशाहेनशुद्ध्यतीतिबृहस्पतिस्मृतेः शयनासनादिरूपसंसर्गमाहपराशरः यदिपत्न्यांप्रसूतायांद्विजःसंपर्कमृच्छति सूतकंतुभवेत्तस्ययदिविप्रःषडंगवित् पितृवत्सापत्नमातुः प्राक्स्नानादस्पृश्यत्वम् सूतिकास्पर्शेतुयावदाशौचंअन्यास्तुमातरस्तत्रसद्यहनप्रजातिचेदितिब्राह्मोक्तेरितिशुद्धतत्वादयः तन्न तद्देहगताःसूतिकांयदिनस्पृशंतितदास्पृश्याः अन्यथानेतितस्यार्थः कर्मानधिकारमाहपैठीनसिः सूतिकांपुत्रवतींविंशतिरात्रेणकर्माणिकारयेन्मासेन स्त्रीजननींइदमाशौचो

नरं अन्यथासंख्याः सपिंडानामाशौचेतदभावःस्यात् विध्यनुवादविरोधश्च एतच्चसोमयागादिश्रौतभिन्नपरं प्रजातायाश्चदशरात्रादूर्ध्वंस्नानादितिकात्यायनोक्तेः व्यासः प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि पुत्रशब्दोपत्यमात्रपरः ब्राह्मे देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां आयांतितस्मात्तदहःपुण्यंषष्ठंचसर्वदा जननेविशेषःप्रागुक्तः अन्नप्रयोगपारिजातः उभयत्रदशाहः स्त्र्यपत्येतुत्र्यहः पुंजन्मनिसपिंडानांदशाहाच्छुद्धिरिष्यते त्र्यहादेकोदकानांचएकाहंसूतकंक्वचित् स्त्रीजन्मनिसपिंडानांसोदकानांत्र्यहाच्छुचिः स्त्रीषुत्रिपुरुषंज्ञेयंसपिंडत्वंद्विजोत्तमाइत्यत्रिस्मृतेरित्याहमेधातिथिरपि अप्रत्तानांतुस्त्रीणांत्रिपुरुषीविज्ञायते इतिवासिष्ठसूत्रंक्काशौचएवेतिहेमाद्रिस्तु वधिर्दर्शितएवेत्याह अन्येतुत्रिपुरुषसापिंड्यस्यकानीनकन्यापरत्वमाहुः अप्रत्तानांतथास्त्रीणांसापिंड्यंसाप्तपौरुषं प्रत्तानांभर्तृसापिंड्यंप्राहदेवःप्रजापतिरितिकौर्मविरोधाच्च अत्रेदंतत्त्वम् पंचमात्सप्तमाद्वीमातृपः कन्यामुद्वहेद्द्विजः गुरुतल्पीसविज्ञेयइत्यादिविरोधात्त्रिपुरुषंप्रकरणात्स्मरणाशौचपरम् वासिष्ठेतदर्थेउदकदानोक्तेः तेनकन्याप्रसवेपिसप्तपौरुषंदशरात्रमेव नचकन्यापुत्रकृतप्रसक्तेबलाबलंक्काप्युक्तं अत्रिस्मृतिस्तुकल्पोविगीताचेतिसर्वसिद्धांतः अन्यथात्रिपुरुषसपिंडानांअष्टमादिसोदकानांचत्र्यहसाम्यायोगात् चतुर्थादिसप्तमांतानांचकिमापनंस्यात् तेनकन्याप्रसवेदशाहएव किंच स्त्रीजन्मोद्देशेनत्रिपुरुषसापिंड्यंतेषांचत्रिरात्रमित्यनेकार्थविधिःकथंस्यात् वाक्यभेदापत्तेः नचचतुर्थादीनांसोदकत्वंक्कापिसिद्धं तेनत्रिपुरुषंचतुर्थादीनांचस्त्रीजन्मनिसोदकत्वंविधायपुनस्तेषांत्रिरात्राशौचविधौविध्यनुवादविरोधोवाक्यभेदद्वयंचेत्यसंवादार्थात्रिस्मृतिर्हेया

अथमृताशौचं हारीतः जातमृतेमृतजातेवासपिंडानांदशाहमितिस्वाशौचपरं जातमृतेनालच्छेदोर्ध्वं यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं

छिन्नेनालेततः पश्चात्सूतकं तु विधीयत इति जैमिन्युक्तेः नाड्यां छिन्नायामाशौचमिति हारीतोक्तेश्च नाडीछेदात्प्राक्मातुः स्पर्शेऽपि न दोष इति शंखलिखितोक्तेः परास्ता नाभिच्छेदात्प्राक् मृतौ तु बृहन्मनुः जीवन्जातो यदि ततो मृतः सूतक एव तु सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं इदं च मरणाशौचमेव शावनिमित्तस्नानमात्रं प्राङ्नामकरणात्सद्यः शौचमिति शंखोक्तेः अत्र कश्चिदाह नामकरणमाशौचान्तकालोपलक्षणं आशौचव्यपगमे नामधेयमिति विध्युक्तेः आशौचे च व्यतिक्रान्ते नामकर्म विधीयते इति — मनूक्तेश्च नाम्नो नियतकालत्वात् न च नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते इति मनूक्तेरनियतकालत्वम् दशम्यामतीतायां विप्रः द्वादश्यामतीतायां क्षत्रियः वैश्यः षोडशे शूद्र एकत्रिंशे इत्यपि ज्ञेयं पुण्य इत्याद्यनुकल्पः तेन नाम्नः कालोपलक्षणं एवं दंतजननेऽपि दंतजन्म सप्तमे मासीत्युपनिषदादिनियतकालत्वात् चौलं तु न कालोपलक्षणम् प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनादिति मनूक्तेः ततः संवत्सरे पूर्णे चूडाकर्म विधीयते द्वितीये वा तृतीये वा कर्तव्यं स्मृतिदर्शनादिति यमोक्तेश्च तस्यानियतकालत्वादिति तन्मंदं चौलवन्नामदंतजननयोरपि स्वरूपेण निमित्तत्वोपपत्तेस्तादृशिष्टकालानुवादे वाक्यभेदात् सप्तममासादर्वाक् दंतजनने तदभावप्रसंगाच्च यत्तूपनिषद्दर्शनेन निर्णयं कुर्यात् स नूनं शतायुः पुरुष इति श्रुतेरर्वाक् पित्रोर्मरणे तदन्त्यकर्मापि लुप्येत ननु कालानुपलक्षणे नामोत्कर्षे तदभावे वा स्नानमात्राच्छुद्धिः स्यात् ततः किम् अस्तु अत एवोक्तं आदंतजन्मनः सद्य इति सा च विष्णुवचनाद्दाहाभावविषयेति वक्ष्यामः त्रिवर्षादावपि स्यादिति चेत् तदाह दंतादिनिमित्तविशेषाशौचैः पूर्वस्य बाधात् तदुक्तं पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिद्ध्यतीति जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे चेति

परिशिष्टे द्वादश्यामपरेरात्र्यांमासेपूर्णेतथापरे अष्टादशोहनितथावदंत्यन्येमनीषिणइति भविष्येच नाम्नःकालानियमाच्च न
चमाथस्याद्दशाशौचेनीतेइतिमुख्यःकालः अन्यस्त्वनुकल्पइतिवाच्यम् चौलेपितथापत्तेः नचदंतजननकालानुपलक्षणेसदंतजा
तमृतस्य दाहेकाहप्रसंगः दशाहेनबाधात् नामकरणोत्तरमेवदाहप्रवृत्तेः दशाहाभ्यंतरेबालेमृतेतस्यबांधवैः शावाशौचंन
कर्तव्यंसूत्याशौचंविधीयतेइतिबृहन्मनूक्तेश्च आशौचदाहोपलक्षणं सूतकवदितिपारस्करोक्तेः यत्तुविष्णुः अनिवृत्तेदशाहे
तुपंचत्वंपरिगच्छति सद्यएवविशुद्धिःस्यान्नप्रेतंनोदकक्रियेति तदपिप्रेताशौचनिषेधार्थनतुसद्यस्त्वपरं वाक्यभेदान्नकिंचना
मकालात्प्राक्मृतस्यस्नानम् तदुत्तरमेकाहादिनामकालेचैकादशाहेमृतस्यनकिमपिस्यात् अथशंखवचनेल्यब्लोपेपंचमीतदाप्रा-
शितिनोपपद्येत नाम्निवापिकृतेसतीतिमन्वादिविरोधात् कृतनाम्नइतिमाधवमिताक्षरादिविरोधाच्चनकालोपलक्षणंकापीति
दिक् नामोत्तरंदंतोत्पत्तेःप्राग्दाहेसत्यहः अदंतजातेतनयेशिशौगर्भच्युतेतथा सपिंडानांतुसर्वेषामहोरात्रमशौचकमिति यमो
क्तेः दाहाभावेतुस्नानमात्रं आदंतजननमेतेसद्यएवनास्याग्निसंस्कारइतिविष्णुनादाहाभावेतदुक्तेः आदंतजन्मनःसद्यइतियाज्ञवल्की-
याच्च दाहविकल्पंचाहलौगाक्षिः तूष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेवच सर्वेषांकृतचूडानामन्यत्रापीच्छयाद्वयं अन्यत्राकृतचूडे अ-
कृतचूडाकरणा तृतीयवर्षरूपकालोपलक्षणार्थमितिमेधातिथिहरदत्तौमनुरपि नत्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया जातदंतस्यवाकुर्यु
र्नाम्निवापिकृतेसतीतिउदकदाहोपलक्षणं दंतोत्पत्त्यनंतरंप्राक्त्रिवर्षात्तन्मृतेहः दंतजातेप्यकृतचूडेत्वहोरात्रेणशुद्धिरितिवि-
ष्णूक्तेः त्रिवर्षोर्ध्वंकृतचूडेऽकृतचूडेवामाउपनयनात्त्र्यहः यद्यप्यकृतचूडोवैजातदंतस्तुसंस्थितः तथापिदाहयित्वैनमाशौचंत्र्यहमाचरेदिति

३

अंगिरसोक्तेः अकृतायामपि चूडायां त्रिवर्षोर्ध्वं दाहादिनियतं नात्रिवर्षस्येति वचनात् कृतायां वर्षत्रयात्प्रा पितं तूष्णीमेव अत्र जातदंतत्वमुद्देश्यविशेषणत्वादविवक्षितं दाहविधिलेत्यप्यनुवादः उभयविधौ वाक्यभेदात् त्रिवर्षात् प्राक् चूडाभावेग्निदानेप्यहस्तदभावेविष्णूक्तेरेकाह इति माधवः यत्तु कश्चिदाह अत्र त्रिवर्षविषयादस्माद्वाक्यात् त्रिवर्षोर्ध्वमपि तत्सिद्धिः विज्ञानेश्वरोक्तंच त्रिवर्षोर्ध्वमकृतचूडाविषयत्वोचित्यम् जातदंतपदवैयर्थ्यादिति तत्तुच्छं दाहस्याविधेयत्वात् नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृतेति मनूक्तेः त्रिवर्षोर्ध्वमेकाहापत्तेरयोग्यस्याहासिद्धेः तथाप्यग्रे तथा गौकारात्पदवैयर्थ्यस्य साम्याद्वाक्यार्थाज्ञानाच्चेत्यलं मिताक्षरार्थानभिज्ञदूषणेन प्रथमवर्षादौ कृतचूडस्य सदाप्यहः निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यत इति मनूक्तेः एतत्सर्वं प्रागुक्तसपिंडानां मातापित्रोस्तु दशाहोर्ध्वं मृते सर्वत्र त्रिरात्रं बालानामजातदंतानां त्रिरात्रेण शुद्धिरिति कश्यपोक्तेः बैजिकादभिसंबंधादनुरुध्यादाद्यत्र्यहमिति मनूक्तेश्च शुद्धितत्त्वादयो गौडास्तु अजातदंतमरणे पित्रोरेकाहमिच्छंते दंतजाते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणाविति कौर्मात् काश्यपं शूद्रपरं अनूढानां तु कन्यानां तथा वै शूद्रजन्मनामिति त्र्यहानुवृत्तौ शंखोक्तेः त्रिरात्रं तु भवेच्छुद्धिः षण्मासेपि शिशौ मृत इति मत्स्यसूक्ताच्च दंतजाते शूद्रे तु पंचाहः यथाहांगिराः शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पंचभिः अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते षड्वर्षांतोयमतीतो यः शूद्रः संम्रियते यदि मासिकं तु भवेच्छौचमित्यांगिरसभाषितमिति यत्तु अनूढभार्यः शूद्रस्त्विति शंखोक्तं मासाशौचं तत्सगुणशूद्रपरम् निर्गुणेत्वनूढभार्ये शूद्रे त्रिवर्षोर्ध्वं द्वादशाहः षडब्दोर्ध्वं मासः षडब्दात् प्रागपि कृतोद्वाहे मास इत्याहुः एतत्तुल्यवयसि सर्वेषामिति विरोधाच्छिष्टविगानानादर्तव्यमिति विज्ञानेश्वरादयः दाक्षिणात्यानां तथैव अन्यदेशे प्रागुक्तमिति गौडाः एवं कन्यास्वपि तास्वप्यजातदंता

स्तुपित्रोरेकरात्रमिति माधवः यत्तु विज्ञानेश्वरेणोक्तं ऊनद्विवर्षउभयोः सूतकंमातुरेवहीति याज्ञवल्क्योक्तेः गर्भस्थेप्रेतेमातुर्दशाहं
जातउभयोः हुतेनाग्निसोदराणांचेति पैठीनस्युक्तेश्च पित्रोः सोदराणांच दशाहमस्पृश्यत्वमिति तन्नेदानींमचरन्ति अतएवस्मृत्यर्थसा
रेतन्नाहृत कन्यासुचोलात्प्राङ्मृतौस्नानं अचूडायांतुकन्यायांसद्यः शौचंविधीयत इत्यापस्तम्बोक्तेः इदंत्रिपुरुषमध्ये अप्रत्तानां
तु स्त्रीणांत्रिपुरुषीविज्ञायतइति वशिष्ठोक्तेः इदंवाग्दानोत्तरमितिगौडाः अप्रत्तानांतथास्त्रीणांसापिंड्यंसाप्तपौरुषमितिवचनात्
चौलोत्तरंवाग्दानात्पूर्वंतास्वेकाहः अविशेषेणवर्णानामर्वाक्संस्कारकर्मणः त्रिरात्रात्तुभवेच्छुद्धिः कन्यास्वह्नाविधीयतइत्यंगिरसा
त्रिरात्रविषयेह्नोविधानात् अतःशूद्रस्योपनयनस्थानीयविवाहात्पूर्वंत्रिरात्रंविवाहोत्कर्षेतुषोडशाब्दमध्येत्रिरात्रमेवेत्यपरार्का
द्याः शूद्रेतुनिर्गुणेऽब्दोर्ध्वंपंचाहः षडब्दोर्ध्वंविवाहाभावेद्वादशाहइतिगौडाः सगुणानांषोडशाब्दोर्ध्वंतुविवाहाभावेपिपूर्णाशौ
चंवक्ष्यते तदुत्तरमाविवाहाद्भर्तृकुलेचसप्तपुरुषावधित्रिरात्रं अवारिपूर्वंप्रत्तात्तुयानैवप्रतिपादिता असंस्कृतातुसाज्ञेयात्रिरात्र
मुभयोःस्मृतमितिमरीच्युक्तेः रत्नाकरेशुद्धितत्वेचशंखः पितृवेश्मनियानारीरजःपश्यत्यसंस्कृता तस्यांमृतायांनाशौचंकदाचि
दपिशाम्यति यावज्जीवमशौचमितिवाचस्पतिमिश्राः अथानुपनीतेकिंचिदुच्यते नाम्नःपूर्वंखननमेव तदूर्ध्वंवर्षत्रयात्पूर्वंचौला
भावेप्युदकदानविकल्पः नात्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया जातदंतस्यवाकुर्युर्नाम्निवापकृतेसतीतिमनूक्तेः उदकक्रियासा
हचर्याद्दाहोपलक्षणं खननेतुनान्यदौर्ध्वदैहिकंऊनद्विवर्षंनिखनेन्नकुर्यादुदकंततइतियाज्ञवल्क्योक्तेः उदकमंत्यकर्मपरमित्यप
रार्कः यमः ऊनद्विवार्षिकंप्रेतंघृताक्तंनिखनेद्भुवि यमगाथागायमानोयमसूक्तमनुस्मरन् माधवीयेब्राह्मेपि स्त्रीणांतुपति

तोगर्भः सद्योजातोमृतोथवा अजातदंतोमासैर्वामृतः षड्भिर्गतैर्बहिः वस्त्राद्यैर्भूषितंकृत्वानिक्षिपेत्तंतुकाष्ठवत् खनित्वाशनकैर्भूमौसद्यः
शौचंविधीयते अलंकरणमपिवक्ष्यते कृतचूडस्यतुत्रिवर्षात्प्रागूर्ध्वंवाप्युदकदानंनियतं यत्तुवसिष्ठः ऊनद्विवर्षेप्रेतेगर्भपतनेवास
पिंडानांत्रिरात्रमितितत्प्रथमाब्दचूडापरं वर्षत्रयादूर्ध्वमकृतचूडस्यापिनियतम् वर्षत्रयोर्ध्वंउपनयनात्पूर्वंचतूष्णीमप्युदकदानम् तू
ष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेवचेति पूर्वोक्तलौगाक्षिस्मृतेः पिंडदानमपिकार्यम् असंस्कृतानांभूमौपिंडंदद्यात् संस्कृतानांकुशेषि
तिमच्चेलसोक्तेः उदकदानंसपिंडैः कृतचूडस्येतिगौतमोक्तेः उदकग्रहणमौर्ध्वदैहिकमितिहरदत्तः द्वादशाद्वत्सरादर्वाक्पौगंडमरणे
सति सपिंडीकरणंनस्यादेकोद्दिष्टंनिकारयेदिति हरदत्तधृतदेवलोक्तेश्च मरीचिरपि प्रेतपिंडंबहिर्दद्याद्दर्भमंत्रविवर्जितमिति ए
तदनुपनीतपरमितिविज्ञानेश्वरः अत्रचूडैवपूर्वावधिः पूर्ववाक्येतुतद्ग्रहणात् उदकग्रहणस्योपलक्षणत्वादाहुः पूर्वावधिरितिकेचित् द्वादशा
द्वत्सरादित्यनुपनीतद्विजानूढशूद्रविषये आहाशौचे पिंडदानविधिमाह पारस्करः प्रथमेदिवसेदेयास्त्रयःपिंडाःसमाहितैः द्वितीयेच
तुरोदद्यादस्थिसंचयनंतथा त्रींस्तुदद्यात्तृतीयेन्हि वस्त्रादिक्षालयेत्ततइति अत्रदेवयाज्ञिकनिबंधविशेषः शिशुरादंतजननाद्बालःस्या
यावदाशिखः कथ्यतेसर्वशास्त्रेषुकुमारोमौंजिबंधनात् आपंचवर्षात्कौमारंपौगंडोनवहायनः तथा गर्भेनष्टेक्रियानास्तिदुग्धंदेयं
शिशौमृते परंत्रपायसंक्षीरंदद्याद्बालविपत्तितः एकादशाद्द्वादशाहंवृषोत्सर्गविधिंविना तथा यत्रप्रमीयतेबालस्तत्रभागःप्रदीयते किं
चित्समानवयसांसंस्कृत्यान्नंयथाविधि भक्ष्यभोज्यंचदातव्यंतथाचक्रुरवभक्षिका तद्वस्त्राणिप्रदेयानिसोपानत्कानितत्समे कुमाराणांच
बालानांभोजनंवस्त्रवेष्टनं यच्चोपजीवतेबालस्तत्तद्विभाप्रदीयते तथा भूमिनिक्षेपणंबालेआवर्षद्वयमाशिखं ततःपरंखगश्रेष्ठदह

दाहोयथाविधि अचूडेत्वूर्ध्वंखनननिक्षेपार्थेसावर्षद्वयमिति प्रागपिकृतचूडस्यतन्निवृत्त्यर्थमाशिरवमिति तथा चूडाकर्मणिसंजातेविपत्तिस्तुयदाभवेत् सूतकांतेप्रकर्तव्यंवृषस्योत्सर्जनंतथा तत्रदाहःप्रकर्तव्यउदकंतत्रनिश्चितं श्राद्धानिषोडशापिस्युःसपिंडीकरणंविना इदंपंचवर्षोत्तरजन्मतः पंचवर्षाणिभुंक्तेद्न्नमसंस्कृतं पंचवर्षाधिकेबालेविपत्तिर्यदिजायते वृषोत्सर्गादिकंकर्मकर्तव्यमुदकंततः अहन्यहनिसंप्राप्तेकुर्यात्श्राद्धानिषोडश पायसेनगुडेनैवपिंडंदद्याद्यथाक्रमं उदकुंभप्रदानंचपददानानियानिच दीपदानानियानिकिंचित्पंचवर्षाधिकेसदा कर्तव्यंतुखगश्रेष्ठव्रतावाक्क्रमेणतु सर्वे स्वाहाकारेणवैकार्याण्येकोद्दिष्टानिषोडश ऋजुदर्भैस्तिलैःशुक्लैःप्राचीनावीतिनातथेति तत्रैवोक्तेः अत्रमूलंचिंत्यम् वार्षिकादितुनभवत्येव सपिंडनाभावेपितृत्वायोगात् वचनाभावाच्च दिवोदासीये अव्रतेनिधनंप्राप्तेविप्रादौशूद्रजानिवत् क्रियाःसर्वाःसमुद्दिष्टाःसपिंडीकरणंविना उदकंपिंडदानंचकृतचूडेविधीयतइति स्त्रीणांतूद्वाहात्प्राक् उदकपिंडदानविकल्पः स्त्रीणांचैकेप्रत्तानामितिगौतमोक्तेः स्त्रीशूद्राश्चसधर्माणइतिवचनात्शूद्रेप्येवं एतद्वयानिर्मिताशौचंसर्ववर्णसमं तुल्यवयसिसर्वेषामतिक्रांतेतथैवचेति व्याघ्रपादोक्तेः यानितु निवृत्तचूडकेविप्रेत्रिरात्राच्छुद्धिरिष्यते इतिनिवृत्तक्षत्रियेषाड्वैश्येनवभिरुच्यते शूद्रेत्रिवर्षन्यूनेतुमृतेशुद्धिस्तुपंचभिः अतऊर्ध्वंमृतेशूद्रेद्वादशाहोविधीयते षड्वर्षातमतीतेतुशूद्रेमासमशौचकमित्यांगिरसादीनितानिविशिष्टविगानान्नादर्तव्यानीति विज्ञानेश्वरमदनपारिजातादयः तेनैतद्दशाच्छूद्राणांव्यवस्थाप्रागुक्ताहृष्टैव तुल्यवयसिसर्वेषामिति दाक्षिणात्यपरं अन्यदेशेकौर्मोक्ताव्यवस्थेतिशुद्धितत्त्वे अथजात्याशौचं तत्रैद्विजपुंसामुपनयनोर्ध्वंप्रवर्तते त्रिरात्रमाव्रताद्दशरात्रमतःपरं क्षत्रस्यद्वादशाहानिविशःपंचदशैवतु त्रिंशाद्दिनानिशूद्रस्यतदर्ध

न्यायवर्तिनंइतियाज्ञवल्क्योक्तेः यस्तुसएव त्रिरात्रंदशरात्रंवाशावमाशौचमिष्यतइत्याह तत्रदशाहेत्रिरात्रमस्पृश्यत्वंएकादिनोत्सन्नेआशौचद्वयेदशाहमस्पृश्यत्वं मरणादितुल्यंस्यान्मरणेनकथंचन अस्पृश्यत्वंतुभवेज्ज्ञात्रंसर्वमेवसबांधवमित्यंगिरसोक्तेः दशाहाशौचपरत्वेदशरात्रमतःपरमित्यनेनपौनरुक्त्यापत्तेरितिशुद्धिविवेकादयः स्मृतिभेदात्त्रिरात्रंदशरात्रंवेतिविकल्पायोगाच्च यस्तुपुत्राणांवेदानध्यापयन्नितिविदधातितत्राहाश्वलायनः द्वादशरात्रंमहागुरुषुदानाध्ययनेवर्जयेरन्निति अत्रयावदुक्तनिषेधोवास्पृश्यत्वमात्रंवा नतुकर्मानधिकारः एकादशाहांतेवैश्वदेवोक्तेः एकादशाहकृत्यमुक्त्वातत्रत्यंतविधीयतइति शुद्धितत्त्वेतुत्रयः पुरुषस्यापिगुरवोभवंति मातापिताचार्यश्चेतिविष्णूक्तेः पित्रादयोमहागुरवः भर्ताप्युक्तोरामायणे पतिर्बंधुर्गतिर्भर्तादैवतंगुरुरेवच शातातपः पतिरेकोगुरुःस्त्रीणांसर्वस्याभ्यागतोगुरुः एकपदंमूढानांपितृमातृनिषेधार्थं सोदकानांत्रिरात्रं त्र्यहान्नूदकदायिनइतिमनूक्तेः अग्निपुराणे सपिंडतातुपुरुषेसप्तमेविनिवर्तते समानोदकभावस्तुनिवर्ततचतुर्दशे जन्मनामस्मृतेरेवैकेतत्परंगोत्रमुच्यते बृहस्पतिः दशाहेनसपिंडास्तुशुध्यंतिप्रेतसूतके त्रिरात्रेणसकुल्यास्तुस्नात्वाशुध्यंतिगोत्रजाः स्त्रीशूद्रयोस्तुविवाहोर्ध्वंजातस्याशौचं वैवाहिकोविधिःस्त्रीणांमौपनायनिकःस्मृतइत्युक्तेः दत्तानांभर्तुरेवहि स्वजात्युक्तमशौचंस्यान्मृतकेजातकेतथेति माधवीयब्राह्माच्च शूद्रस्याविवाहाभावेषोडशवर्षोर्ध्वंमासः अनूढभार्यः शूद्रस्तुषोडशाद्वत्सरात्परं मृत्युंसमधिगच्छेच्चेन्मासात्तस्यापिबांधवाः शुद्धिंसमधिगच्छंतिनात्रकार्याविचारणेत्यपरार्केशंखोक्तेः निर्णयामृतमदनपारिजातादौचान्यथोक्तम् हारीतः आमौंजीबंधनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात् आप्रतोदग्रहाद्वैश्यः शूद्रोवस्त्रद्वयग्रहात् धनुःप्रतोदावष्टमेब्दे द्वादशेवस्त्रद्वयमिति मेधातिथिस्तु त्रिरात्रमाव्रतादेशादित्यत्रव्रतंकालोपलक्षणार्थं

सचकालःस्वकीयः सर्वेषांचाष्टमवर्षरूपः तेनचतुर्णामपिवर्णानामुपनयनाभावेप्यष्टमादूर्ध्वंपूर्णमेवाशौचं तत्रापिप्रागष्टमाच्छिशवः प्रोक्ताइतिस्मृत्यंतरादूर्ध्वंसंपूर्णमर्वाक्त्रिरात्रं येत्वाषोडशाद्द्वेबालइत्याहुः तेषामप्यष्टमादूर्ध्वंशूद्रेमासएव ऊर्ध्वमष्टमाद्वर्षेभ्यः शूद्रे शूद्रस्यमासिकीतिवचनादित्याह हारलताशुद्धितत्वादिगौडग्रंथेषुतु अनुपनीतोविप्रइत्यस्मान्म्रियतेयत्रतत्रस्यादाशौचंत्र्यहमेवहीति द्विजन्मनामयकालस्त्रयाणांतुषडाब्दिकइत्यादिपुराणोक्तेरुपनयनकालोपलक्षणं षडब्दपदंमासत्रयाधिकपरं गर्भाष्टमेष्टमेवाब्दइत्युक्तेः यत्तुजाबालः व्रतचूडाद्विजानांचमृतीनिश्चयथाक्रमं दशाहस्त्र्यहएकाहः शूद्रस्यापिहिनिर्गुणाद्वीतिद्विजादंताः इदंतीत्युक्तेः पंचाब्दोपनीतपरमितितन्नदंतन्नाद्रियंते वृद्धाः यानितु पराशरः एकाहाद्ब्राह्मणःशुद्ध्येद्योग्निवेदसमन्वितः त्र्यहात्केवलवेदस्तुत्रिहीनोदशभिर्दिनैः केवलवेदः केवलश्रौताग्निरप्युपलक्षणं अयंसंकोचोहोमाध्ययनपरएव नतुसंध्यादाविति हारलतायाम् अंगिराः सर्वेषामेववर्णानांसूतकेमृतकेतथा दशाहाच्छुद्धिरेतेषामितिशातातपोब्रवीत् देवलः आशौचंदशरात्रंतुसर्वेषामपरेविदुः निर्धनेप्रसवेचैवपश्यतःकर्मणःक्षयं अत्यंतोत्कृष्टस्यकर्महानौपीडावतोविप्रपरिचर्यापरशूद्रेदशरात्रमितिहारलतायां दक्षः सद्यःशौचंतथैकाहस्त्र्यहश्चतुरहस्तथा षड्दशद्वादशाहश्चपक्षोमासस्तथैवच मरणांततथाचान्यद्दशपक्षास्तुसूतके मिताक्षरायां स्मृत्यंतरे. चतुर्थेदशरात्रंस्यात्षण्निशाःपुंसिपंचमे षष्ठेचतुरहाच्छुद्धिःसप्तमेत्वहरेवतु. इत्यादीनितान्यापदनापद्गुणवदगुणवद्विषयाणिदेशांतरभेदाद्वाज्ञेयानि सद्यःशौचादिषडहांताःपक्षायायावरादिपराः अत्रमरणांतजननादिनिमित्ताद्भिन्नम् शिष्टविगानान्नादर्तव्यानीतिविज्ञानेश्वरः अस्नात्वाचाप्यहुत्वाचअदत्वाश्नंस्तथाद्विजः एवंविधस्यविप्रस्यसर्वदासूतकंभवेदितिदक्षोक्ता अन्यपूर्वाय-

स्यगेहे भार्यास्यात्तस्यानित्यशः आशौचं सर्वकार्येषु देहे भवति सर्वदेति ब्राह्मादिवशाद्व्यवस्थेत्यपरार्कमदनपारिजातादयः माधवस्तु वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथेति कलिवर्ज्यप्रोक्तेः दशाहएवविप्रस्य सपिंडे मरणे सति कल्पांतराणि कुर्वाणः कलौ भवति किल्बिषीति हारीतोक्तेश्च न्यूनाशौचपक्षायुगांतरविषयाः मरणांतादिपक्षास्तु निंदार्थवादं अन्यथा नामधारकविप्रस्तु दशाहे सूतकी भवेदिति विरोधः स्यादित्याह यत्तु देवलः दशाहादित्रिभागे न कृते संचयने क्रमात् अंगस्पर्शनमिच्छंति वर्णानां तत्वदर्शिन इति पूर्णाशौचेऽस्पृश्यतामाह यच्चानुपनीतातिक्रांताशौचे त्रिरात्रादौ तेनैवोक्तं स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागत इति तदपि युगांतरेषु अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव चेति माधवीये कलौ तन्निषेधात् यत्तु हारलतायां चतुर्थेहनि कर्तव्यः संस्पर्शो ब्राह्मणस्य त्विति प्रचेतसोक्तेस्त्र्यहैकाहाशौचेपि चतुर्थाहएवांगस्पर्शइति तन्न देवलादिवशेनास्य दशाहगोचरत्वात् येतु वर्णसंकरजा मूर्धावसिक्ताद्यास्तेषामाशौचविशेषः कलौ नोपयुक्त इति नोच्यते प्रतिलोमजानामाशौचं मलापकर्षणार्थं तु स्नानमात्रमिति विज्ञानेश्वरः माधवस्तु शौचाशौचे प्रकुर्वीरन् शूद्रवद्वर्णसंकरा इति ब्राह्मोक्तेः शूद्रवदाह हारलताप्येवम् दत्तक्रीतकृत्रिमादिपुत्रेषु अहीनवर्णगासु स्त्रीषु च सपिंडत्वेपि प्रसवे मरणे च पूर्वापरपित्रोर्भर्तुश्च त्रिरात्रमेव न दशाहादि अनौरसेषु पुत्रेषु जातेषु च मृतेषु च परपूर्वासु भार्यासु प्रसूतासु मृतासु चेति त्रिरात्रानुवृत्तौ विष्णूक्तेः सपिंडानां त्वेकाहः परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च भर्तुः पित्रोस्त्रिरात्रं स्यादेकाहस्तु सपिंडत इति माधवीये हारीतोक्तेः सूतके मृतके चैव त्रिरात्रं परपूर्वयोः एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति मरीच्युक्तेश्च शंखः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते परपूर्वा पुनर्भूः इदं-

सवर्णासु हीनवर्णासुनु शंखलिखितौ परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च नानध्यायो भवेत्तस्य नाशौचं नोदकक्रिया श्राद्धेपि आशौचं तु त्रिरात्रं स्यात्समवर्णेषु निश्चितं यत्तु षडशीतौ अन्यपूर्वावरुद्धासु त्रिदिनाच्छुद्धिरिष्यते तास्वेवानन्यपूर्वासु पंचाहोभिर्विशुध्यतीति तत्र पंचाहे मूलं चिंत्यम्‌ यत्तु याज्ञवल्क्यः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु चेत्येकाहमाह तदसान्निधौ ज्ञेयम्‌ यदा पितुरेकाहस्तदा सपिंडानां स्नानं अन्याश्रितेषु दारेषु परपत्नीसुतेषु च गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पितेति प्रजापत्युक्तेः पितेति वोढुरुपलक्षणं तथोपक्रमात्‌ यत्तु दत्तके पालकप्रतियोगिकपुत्रत्वात्‌ पूर्वपितुर्न त्रिरात्रं पूर्वसंबंधनिवृत्तेश्च न दशाहादीति कश्चित्‌ तन्न जानकेपि बैजिकादभिसंबंधादनुरुध्यादघं त्र्यहमिति वाचनिकाशौचस्यानिवार्यत्वात्‌ पितृमरणेपि दत्तकादीनां त्रिरात्रं शुद्धितत्त्वे ब्राह्मे दत्तकस्य स्वयंदत्तः कृत्रिमः क्रीत एव चेत्युपक्रम्य सूतके मृतके चैव त्र्यहाशौचस्य भागिन इत्युक्तेः स्मृतिकौमुद्यां हारलतायामप्येवं दत्तकस्य पुत्रपौत्राणां जनने मरणे वा सपिंडानामेकाहः बीजिनश्चेति गौतमेन सप्तपौरुषसापिंड्योक्तेः सपिंडानां चैकाहस्योक्तत्वात्‌ सपिंडे तु पुत्रीकृते सपिंडदत्तौरसयोर्भ्रात्रोस्तत्पुत्रयोर्दशाह एव तत्राकांक्षाभावात्‌ सपिंडत्वेन दशाहप्राप्तत्वाच्च पूर्वापरयोर्भर्त्रोरुत्पन्नयोः पुत्रयोस्त्र्यहः माधवीये मरीचिः मातुरैक्याद्द्विपितृकौ भ्रातरावन्यगोत्रजौ एकाहं सूतके तत्र त्रिरात्रं मृतके तयोरिति दिक्‌ ऊढकन्यानां तु विष्णुराह संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं चेति प्रसवे एकरात्रं मरणे त्रिरात्रमिति विज्ञानेश्वरापरार्कौ माधवस्तु प्रसवेपि त्रिरात्रं पित्रोः एकरात्रं भ्रात्रादिबंधुवर्गस्य दत्तानां तु पितुर्गेहे सूयेताथ म्रियेत वा तद्बंधुवर्गस्त्वेकेन शुचिस्तज्जनकस्त्रिभिरिति ब्राह्मोक्तेरित्याह यत्तु कश्चिदाह पक्षपदेन भ्रातरो गृ-

त्यंते वाक्यांतरेणभगिनीमृतौत्रिरात्रोक्तेरितितच्चिंत्यम् तदभावेतद्विरोधाच्च भ्रातुःप्रसवेएकाहः मृतौत्रिरात्रमितिकेचित् युक्तातुपक्षिणी परस्परमृतौभ्रातृभगिन्योःपक्षिणीभवेदितिब्राह्मात् भ्रातृभिन्नानामेकाहः वर्गोक्तेः इतरेषांतुयथाविधीति वक्ष्यमाणवचनाच्च यत्तुप्रधानगृहेमृतौपित्रोःपूर्णंभ्रातुस्त्र्यहइतिकश्चित्तन्निर्मूलत्वान्नाशौचं पितृपक्षेइत्येतद्विरोधाच्च भ्रांतः दत्तानारीपितुर्गेहेप्रधानेसूयतेयदा म्रियतेवासदातस्याःपिताशुद्ध्येत्त्रिभिर्दिनैरितिकल्पतरौशुद्धितत्वेच पितृगृहेप्रसवेतुपित्रादीनामाशौचंनास्ति मृतौपित्रोस्त्रिरात्रमस्त्येव प्रत्ताप्रत्तासुयोषित्सुसंस्कृतासंस्कृतासुच मातापित्रोस्त्रिरात्रंस्यादितरेषांयथाविधि अजातदंतासुपित्रोरेकरात्रमितिमाधवीये शंखकार्ष्णाजिनिस्मृतेः बैजिकादभिसंबंधादित्युक्तेश्च स्मृत्यर्थसारेप्येवं माधवस्तुइदंत्रिरात्रंजातदंतपरम् दंतोत्पत्तेःप्रागेकरात्रं पित्रोःसद्यस्त्वप्रौढकन्यायांप्रौढायांवासराच्छुचिः प्रदत्तायांत्रिरात्रेण दत्तायांपक्षिणीभवेदितिपुलस्त्योक्तेरन्यत्रकन्यामृतौपित्रोःपक्षिणीत्याह षडशीतावपि पितृगेहाद्दतान्यत्रयदिपुत्रीप्रमीयते पक्षिणीतत्रपित्रोःस्यान्नान्येषामितिनिश्चयइति ग्रामांतरेइयमितिस्मृत्यर्थसारे भ्रातुस्तुपक्षिणी श्वशुरयोर्भगिन्यांचमातुलायांचमातुले पित्रोस्स्वसरितद्वच्चपक्षिणींक्षपयेन्निशामिति वृद्धबृहस्पतिस्मृतेः शुद्धितत्वेकौर्मे आदंतात्सोदरेसद्यआचूडादेकरात्रकम् आप्रदानात्त्रिरात्रंस्याद्दशरात्रमतःपरं पित्रोर्मृतौस्त्रीणांत्रिरात्रं पित्रोरुपरमेस्त्रीणामूढानांतुकथंभवेत् त्रिरात्रेणैवशुद्धिःस्यादित्याहभगवान्यमइतिमाधवीयेवृद्धमनूक्तेः इदंदशाहातःऊर्ध्वंतुपक्षिणी भ्रातुर्भगिनीगृहेतस्यावातद्गृहेमृतौत्रिरात्रमन्यत्रतुपक्षिणीतिषडशीतावुक्तं ब्राह्मेपि परस्परंमृतौभ्रातृभगिन्योःपक्षिणीभवेत् मातुलाशौचवत्पुत्र्याःपितृव्याशौचमिष्यतइति शिष्टास्तत्तुनिर्मूलत्वात्सतृष्यस्त्वा

नमात्रमाहुः त्रिंशच्छ्लोक्यांमेते आचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्‌सयाज्यस्वस्त्रीयेषु त्रिरात्रं त्रिदिवसमशुचिः सोदकस्तूप्रयत्र
पक्षिण्याशौचंमृत्विक्‌दुहितृसुतसहाध्यायिबंधुत्रयांतेवासिश्वश्रूस्वमित्रश्वशुरभगिनिकाभागिनेयपर्याणे मातामृत्यांचपित्रोःस्व
सरिचविरतौमातुलेमातुलान्यांचाथोसज्योतिरेवस्वविषयनृपतौग्रामनाथेचनष्टे शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रा
नूचानश्रोत्रियेषुस्वगृहपरमृतौमातुलेचैकरात्रं शास्त्रिंसब्रह्मचारिण्यथतुकथमपिस्वल्पसंबंधयुक्तेस्नानंवासोयुतंस्यादिदमपिस-
कलसवर्णेषुतुल्यमिति अत्रमूलंमिताक्षरादौस्पष्टं दौहित्रभागिनेययोरुपनीतयोस्त्रिरात्रं अनुपनीतयोः पक्षिणी संस्थि
तेपक्षिणीरात्रिं दौहित्रेभगिनीसुते संस्कृतेतुत्रिरात्रंस्यादिति धर्मोव्यवस्थितइति हेत्र्यमनूक्तेः संस्कृतेदाहेन तेनदाहेत्रिरात्रंना
न्यथेतिगौडाः तन्न विशेषवैयर्थ्यात् मातुलादौसन्निधिविदेशाभ्यां पक्षिण्येकाहयोर्व्यवस्था मनुः त्रिरात्रमाहुराशौचमाचा
र्येसंस्थितेसति तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिः श्रोत्रियेस्वगृहेमृतेत्रिरात्रं श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेदि
तिस्मृतेरितिमाधवः एकग्रामीणेत्वेकाहः ऋत्विक्षुबह्वल्पकालश्रौतस्मार्तयाजनपरेत्रिरात्रैकरात्रेज्ञेये यद्यपिकर्मकुर्वतएषवा
चकः शब्दोभवतीतिशबराचार्यैः कर्मसध्येऋत्विक्त्वमुक्तम् तथापिकर्मण्याशौचनिषेधात्तदुत्तरमेवैतज्ज्ञेयं गौडास्तुसमा
नोदकानांत्र्यहोगोत्रजानामहःस्मृत मातृबंधौगुरौमित्रेमंडलाधिपतौतथेति जाबालोक्तेर्मातृबंधुष्वेकाहमाहुः शिष्यस्योपनी
तेत्र्यहः शिष्यसतीर्थब्रह्मचारिषुक्रमेणत्रिरात्रमहोरात्रमेकाहइतिमाधवीयेबौधायनोक्तेः अन्यत्रतुमनुः मातुलेपक्षिणींरात्रिं ८
शिष्यर्त्विक्‌बांधवेषुचेति बंधुत्रयंआत्मपितृष्वसृमातुलपुत्राः पितुःपितृष्वसृमातृष्वसृमातुलपुत्राः मातुःपितृष्वसृमातृष्वसृ-

मातुलपुत्राश्चेति विज्ञानेश्वरः अत्रपक्षिणी पितृष्वस्रादिकन्यानामूढानांत्वेकाहः तदूर्ध्ववर्गस्त्वेकेनेति पूर्वोक्तब्राह्मात् यत्तु षडशीत्यां एवंपित्रोर्भगिन्योर्येयेपितामहयोस्तथा येमातामहयोश्चैव भगिन्योतत्प्रजाश्चयाः मातुलाः स्वस्यपित्रोश्च पत्न्यश्चैषां प्रजाश्चयाः भ्रातरश्चेति सर्वेषु पक्षिणी स्वगृहे त्र्यहम् एवंश्वशुरजामातृदौहित्राधिपादिस्मृत यत्तु यमः जामातरि मृते शुद्धिस्त्रिरात्रेणोभयोस्मृता पक्षिणी श्यालकानां स्यादिति शातातपोऽब्रवीत् इतिनिर्मूलत्वान्मिताक्षरादिविरोधाच्चोपेक्ष्यम् मदनपारिजाते विष्णुः असपिंडे स्ववेश्मनि मृत एकरात्रं अत्र हरदत्तोक्तः शवेचेत्यापस्तम्बसूत्रतः शवग्रामेधनुः शतादर्वागन्नमभोज्यं दीपमुदकुंभं वापानिधाय तु भुंजीत यदि समानवंशेन गृहमेवं सूतिकायामित्याह मध्यान्तरगृहमृतातु गृहे यस्य मृतः कश्चिदसपिंडः कथंचन तस्याप्याशौचं विज्ञेयं त्रिरात्रं नात्र संशय इत्यंगिरसोक्तमिति माधवः एतेन त्रिरात्रमसपिंडेषु स्वगृहे संस्थितेषु चेति कौर्मं व्याख्यातं शुद्धितत्त्वे बृहन्मनुः श्वशूद्रपतितांश्चान्त्यान्मृतांश्च द्विजमंदिरे शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा दशरात्राच्छुनि मृते मासाच्छूद्रे भवेच्छुचिः द्वाभ्यां तु पतिते गेहे अंत्ये मासचतुष्टयात् अत्यन्ते वर्जयेद्गेहमित्येवं मनुरब्रवीत् अंत्यो म्लेच्छः अत्यंतः श्वपाक इति वाचस्पतिः तत्रैव यमः द्विजस्य मरणे वेश्म विशुद्ध्यति दिनत्रयात् संवर्तः गृहशुद्धिं प्रवक्ष्यामि अंतस्थशवदूषिते प्रोत्सृज्य मृन्मयं भाण्डं सिद्धमन्नं तथैव च गोमयेनोपलिप्याथ छागेन घ्रापयेद्बुधः ब्राह्मणैर्मंत्रपूतैश्च हिरण्यकुशवारिभिः सर्वमभ्युक्षयेद्वेश्म ततः शुद्ध्यत्यसंशयम् बृहद्विष्णुः ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित् ग्रामस्य तावदाशौचं निर्गते शुचितामियात् गृहे शवादौ मृतेऽप्येवं यत्तु माधवीये प्रचेतसा मातृष्वस्रादिषु त्रिरात्रमुक्तं मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरोः मृते चर्त्विजि याज्ये च त्रिरात्रेणविशुद्ध्यती

तिगुरुराचार्यः कल्किकुलागतः तत्स्वगृहमृतौज्ञेयं श्वशुरयोरन्यत्रमृतावपिसन्निधौत्रिरात्रम् असन्निधौपक्षिणी देशांतरेएकरात्रम् वक्ष्यमाणविष्णूक्तेरितिमाधवगौडादयः अन्यत्रतुमातृष्वस्रादिषुपित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशामितितद्वचनमुक्तम् यत्तुवृद्धमनुः भगिन्यांसंस्कृतायांतुभ्रातर्यपिचसंस्कृते मित्रेजामातरिप्रेतेदौहित्रेभगिनीसुते शालकेतत्सुतेचैवसद्यःस्नानेनशुद्ध्यतीति तद्भ्रातृदौहित्रादौदेशांतरे शालकसुतजामात्रोःस्वदेशेज्ञेयं शालकेतुस्वदेशएकाहः आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूश्वशुर्यसहाध्यायीशिष्येष्वेकरात्रमितिमाधवीयेविष्णूक्तेः हरदत्तीयेदशश्लोक्यामप्येवं श्वशुर्यःशालकः देशांतरेस्नानम् श्वशुरयोर्देशांतरएकाहः जाबालः एकोदकानांतुत्र्यहोगोत्रजानामहःस्मृतं सर्वत्रमूल्याभावेपिक्रियाकर्तुर्दशाहः गुरोःप्रेतस्यशिष्यस्तुपितृमेधसमाचरेत् प्रेताहारैःसमंतत्रदशरात्रेणशुद्ध्यतीतिमनूक्तेः शिष्यइत्युपलक्षणं निरन्वयेसपिंडेतुमृतेसतिदयान्वितः तदशौचमुराचीर्त्वाकुर्यात्तुपितृवत्क्रियामितिमाधवीयेब्राह्मोक्तेः दिवोदासीये सगोत्रोवासगोत्रोवायोग्निंदद्यात्सखनरः सोपिकुर्यान्नवश्राद्धंशुद्धेस्तुदशमेहनि यत्रैकविषयेपक्षिण्येकाहादिपक्षद्वयमुक्तं तत्रसन्निधिविदेशमैत्र्यादिकृताव्यवस्थाविंशश्लोक्याम् वानप्रस्थयतीन्वापरमतिकुलजषंढकेवाप्लवःस्याद्योषिद्गोविप्रगुर्व्योमृतवतितुदिनंशुद्धिर्विद्धेचसद्यः अत्रमूलमाकरेस्पृष्टम् युद्धभूमिमृतस्यस्नानं उद्यतैराहवेशस्त्रैः क्षत्रधर्महतस्यच सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिरितिमनूक्तेः यज्ञोत्रकर्मसर्वंतदैवेत्यर्थः यस्तुभारतेराजधर्मेषु अशौच्योहिहतःशूरःस्वर्गलोकेमहीयते नह्यन्नमुदकंतस्यनस्नानंनाप्यशौचकमितिश्राद्धादिनिषेधःसचपुत्राद्यभावपरः अतएवतत्रकर्णादीनांश्राद्धमुक्तम् अन्येतुदशपिंडनिषेधमाहुर्यतिवत् यत्तुपराशरः आ

हवेपिहतानांच एकरात्रमशौचकमिति तद्युद्धक्षतेन कालान्तरस्मृतेज्ञेयम् असन्निधौस्नानमितिमाधवः शुद्धितत्वेग्निपुराणे दंष्ट्रिभिः शृङ्गिभिर्वापिहतान्म्लेच्छैश्चतस्करैः येस्वाम्यर्थेहतायान्तिराजन्स्वर्गंनसंशयः सर्वेषामेववर्णानांक्षत्रियस्यविशेषतः यत्तुबृहस्पतिः डिंबाहवेविद्युताचराज्ञागोविप्रपालने सद्यःशौचंमृतस्याहुस्त्र्यहंचान्येमहर्षयः तच्छस्त्रंविनापराङ्मुखहतेचत्रिरात्रं राज्ञावध्येहतेसद्यःशौचमन्यत्रिरात्रं तथैवव्याघ्रः क्षतेनम्रियतेयस्तुतस्याशौचंभवेद्विधा आसप्ताहात्त्रिरात्रंस्याद्दशरात्रमतःपरं शस्त्राघातेत्र्यहादूर्ध्वंयदिकश्चित्प्रमीयते आशौचंप्राकृतंतस्यसर्ववर्णेषुनित्यशः शस्त्राघातक्षतंविनाशवस्पर्शेतुहारीतः शवस्पृशोग्रामंनप्रविशेयुरानक्षत्रदर्शनाद्रात्रौचेदादित्यस्य यत्तुमनुः अन्हाचैकेनरात्र्याचत्रिरात्रैरेवचत्रिभिः शवस्पृशोविशुध्यन्तित्र्यहादुदकदायिनइति अन्हारात्र्याचेत्यहोरात्रमित्युक्त्वा त्रिभिस्त्रिरात्रैरितिनवरात्रमेवंदशरात्रमित्यर्थः तत्तदन्नाशनेतद्गृहवासेनोपदिष्टंज्ञेयं अङ्गिराः आशौचंयस्यसंसर्गादापतेद्गृहमेधिनः क्रियास्तस्यनलुप्यन्तेगृह्याणांचनतद्भवेत् अथनिर्हाराद्याशौचम् स्नेहेनसवर्णनिर्हारेतदन्नाशनेतद्गृहवासेचदशाहः तदन्नाशनेतद्गृहवासेत्र्यहः गृहावासेन्नाभक्षणेचैकाहः भृतिग्रहणेननिर्धारेदाहेचतज्जात्याशौचं यदिनिर्हरतिप्रेतंप्रलोभाक्रान्तमानसः दशाहेनद्विजःशुध्येद्द्वादशाहेनभूमिपः मासार्धेनतुवैश्यस्तुशूद्रोमासेनशुध्यतीतिकौर्मोक्तेः विजातीयनिर्हारेतुशवजातीयमाशौचं अन्नभृतिग्रहेद्विगुणं अवरश्चेद्वरं वर्णंवरोवाप्यवरंयदि वहेच्छवंतदाशौचंदिष्टाद्द्विगुणंभवेदितिव्याघ्रोक्तेः कौर्ममेतदितिगौडाः दाहेप्येवं यत्तुब्राह्मे यासवर्णंतुमूल्येननीत्वाचैवदहेन्नरः आशौचंतुभवेत्तस्यप्रेतजातिसमंनृपेति तदापदिज्ञेयं सोदकनिर्हारेतुदशाहइतिमाधवः

नि॰सिं॰ अलंकरणेतुशंखः कृछ्रपादोसपिंडस्यप्रेतालंकरणेकृते अज्ञानादुपवासःस्यादशक्तौस्नानमिष्यते धर्मार्थं अनाथसवर्णहरणे प॰आ॰
१० क्रियाकरणेचद्विजस्थानंतयज्ञफलं स्नानंप्राणायामोग्निस्पर्शश्चेतिमाधवीये अग्निदेप्येवं प्रेतसंस्पर्शसंस्कारेब्राह्मणोनैवदुष्य ३
ति वोढाचैवाग्निदाताचसद्यःस्नात्वाविशुध्यतीत्यपरार्के बृहत्पराशरोक्तेः मातुलत्वादिसंबंधेत्रिरात्रं असंबंधिद्विजान्वाहित्वाद
हित्वाचसद्यःशौचंसंबंधेत्रिरात्रमिति पैठीनसिस्मृतेः गौतममिताक्षरायांबृहस्पतिः सूतकाद्द्विगुणंशावंशावाद्द्विगुणमार्तवं आर्त
वाद्द्विगुणासूतीततोपिशवदाहकः अत्रपूर्वेणोत्तरनिवृत्तिरित्यर्थः विष्णुः मृतंद्विजंनशूद्रेणहारयेन्नशूद्रंद्विजेन देवलः ब्र
ह्मचारीनकुर्वीतशववाहादिकाःक्रियाम् यदिकुर्याच्चरेत्कृछ्रंपुनःसंस्कारमेवच याज्ञवल्क्यः आचार्यपित्रुपाध्यायान्निर्हृत्या-
पिव्रतीव्रती अनुगमनेतुसपिंडेनदोषः विहितंहिसपिंडानांप्रेतनिर्हरणादिकं तेषांकुर्वीतयःकश्चित्तस्याधिक्यंनविद्यतइति
देवलोक्तेः दोषःस्यात्त्वसपिंडस्यतत्रनाथक्रियांविनेति हारीतोक्तेश्च समोत्कृष्टवर्णेतुमाधवीयेकपवः अनुगम्यशवंबुद्ध्यास्ना
त्वास्पृष्ट्वाहुताशनं सर्पिःप्राश्यपुनःस्नात्वाप्राणायामैर्विशुद्ध्यतीति हीनवर्णेतुक्षत्रियेत्र्यहः वैश्येपक्षिणी शूद्रेत्रिरात्रम् क्षत्रि
यस्यवैश्येत्र्यहः शूद्रेपक्षिणी वैश्यस्यशूद्रेद्व्यहमिति विज्ञानेश्वरः माधवस्तु विप्रस्यवैश्येत्र्यहः क्षत्रस्यशूद्रेप्येवं अन्यत्प्राग्व
त् स्नानाग्निस्पर्शघृताशनानिसर्वत्रेत्याह हीनवर्णस्यदाहोर्ध्वदैहिककरणेतुब्राह्मे ब्राह्मणोहीनवर्णस्यनकुर्यादौर्ध्वदैहिकं का
माल्लोभात्तथामोहात्कृत्वातज्जातितांव्रजेत् मनुः व्रात्यानांयाजनंकृत्वापरेषामन्त्यकर्मच अभिचारमहीनंचत्रिभिःकृछ्रैर्व्यपो १०
हति परेषांसर्ववर्णानांहीनेषुतद्द्वैगुण्यत्रैगुण्यचातुर्गुण्याद्यूह्यं अथरोदने समोत्तमवर्णयोः सचयनात्पूर्वंसचैलस्नानमूर्ध्व

साचमनं हीनवर्णेषु तु संचयात् प्राक् सचैलमूर्ध्वं स्नानमात्रं विप्रस्य क्षत्रवैश्यविषये तु ब्राह्मे अस्थिसंचयने विप्रो रोति चेत् क्षत्रवैश्ययोः तदा स्नातः सचैलस्तु द्वितीयेह्नि शुद्ध्यति कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेत् क्षत्रस्य वैश्यस्यैवं शूद्रे तु संचयात् प्राक् विप्रस्य त्रिरात्रं क्षत्रवैश्ययोर्द्विरात्रं ऊर्ध्वं तु द्विजानामेकाहः शूद्रस्य शूद्रस्पर्शो विना संचयात् पूर्वमेकाहः ऊर्ध्वं सज्योतिरिति माधवीये ज्ञेयम् शुद्धितत्त्वे पारस्करस्तु अस्थिसंचयनादूर्ध्वमासस्थावद्द्विजातयः दिवसेनैव शुद्ध्यति वाससा क्षालनेन च सजातेर्दिवसेनैव त्र्यहात् क्षत्रियस्य वैश्ययोरित्युक्तं सपिंडानां शोदनानिहारादावृद्दोष इत्युक्तं प्राक् विज्ञानेश्वरस्तु मृतस्य बांधवैः सार्द्धं कृत्वा तु परिदेवनम् वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म चेति पारस्करोक्तेः सर्वत्रैकरात्रमाह अथाशौचान्नभक्षणे विष्णुः ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तमिति अज्ञाने त्वंगिराः अंतर्दशाह भुक्त्वान्नं सूतके मृतकेपि वा अस्याशौचं भवेत्तावद्यावदन्नं व्रजत्यधः प्रायश्चित्तत्वसत्या विप्रस्य वर्णक्रमेणैकाहत्र्यहपंचाहसप्ताहोपवासाः दशविंशतिः षष्टिः शतं च प्राणायामाः पंचगव्याशनं च अभ्यासे द्विगुण आपदि तु प्राणायामशतं पंचशतमष्टशतमष्टसहस्रं गायत्रीजपश्च सत्यापदि तु सवर्णाशौचे त्रिरघमर्षणं गायत्र्यष्टसहस्रं च क्षत्रियाशौचे उपवासस्त्र्यहं वैश्याशौचे त्रिरात्रोपवासश्च शूद्राशौचे कृच्छ्रः क्षत्रवैश्ययोः पंचशतमष्टशतं गायत्रीजप उत्तमेषु शूद्रस्य सर्वत्र स्नानं मत्यानापदि विप्रस्य वर्णेषु सांतपनकृच्छ्रमहासांतपनचांद्राणि अभ्यासे तु मासिकं द्वैमासिकं त्रैमासिकं षण्मासिकानीत्यादि माधवीयादौ ज्ञेयम् अथ दासस्य स्वदासस्तु सन्नस्य सपिंडमृतौ स्नानमात्रेण स्वामिकार्ये स्पृश्यत्वम् भक्तदासस्य त्र्यहोर्ध्वं सद्यः-

स्पृश्यो गर्भदासो भक्तदासस्त्वहाच्छुचिरिति स्मृत्यंतरोक्तेः मूल्यकर्मकराः शूद्रा दासीदासास्तथैव च स्नाने शारीरसंस्कारे ग्रहकर्मण्यदूषिता इति शातातपोक्तेश्च एतच्चानुस्पृश्यसाध्यतत्कार्यमात्रे अन्यत्र मासाद्याशौचमस्त्येव एवं दास्यामपि सूतिकायास्तस्या अस्पृश्यत्वमपि मासमात्र दासीदासश्च सर्वो वै यस्य वर्णस्य यो भवेत् तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकमित्यंगिरसोक्तेः षडशीतावपि स्वामिशौचे न दासाद्याः स्पृश्या मासात्तु कर्मसु योग्याः स्युर्मासतो दासी सूतौ नेतु स्पृश्यतामियात् दत्तदासादीनां स्वसपिंडमरणादौ स्वाम्याशौचसमसंख्यादिनोर्ध्वं सत्यपि मासाद्याशौचे स्वामिकार्ये स्पृश्यते इति हरदत्तः दासांतेवासिभृतकाः शिष्याश्चैकत्रवासिनः स्वामितुल्येन शौचेन शुध्यंति मृतसूतक इति बृहस्पतिस्मृतेः दासश्चात्र गृहजातस्तथा क्रीतो लब्धो दायादुपागतः अन्नकालभृतस्तद्वदाहितः स्वामिना च यः मोक्षितो महतश्चर्णाद्युद्धे प्राप्तः पणे जितः तवाहमित्युपगतः प्रव्रज्यावसितः कृतः भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृता इति नारदोक्तेषु गर्भभक्तदासो विनाज्ञेयाः वडवादासी तयाहृतः तामुद्वाह्य दासो जात इत्यर्थः अंतेवास्यपि तेनैवोक्तः स्वं शिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया आचार्यस्य वसेदंते कृत्वा कालं सुनिश्चितं आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनमिति शिष्यस्तत्तुल्यो विद्यार्थी दासादेः स्वामितत्सपिंडमरणे तु विष्णुः पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्यात्मीयमिति प्रतिलोमदासानामाशौचाभावः वर्णानामानुलोम्येन दास्यं न प्रतिलोमत इति याज्ञवल्क्योक्तेः अथ रात्रौ जनने मरणे वा रात्रिं त्रिभागां कृत्वाद्यभागद्वये चेत् पूर्वदिनं अंत्ये तूत्तरमिति मिताक्षरायां यत्तु प्रागर्धरात्रात् प्राक् वा सूर्योदयात् पूर्वदिनमित्युक्तं तत्र देशाचारतो व्यवस्था सर्वत्राशौ

चमाहिताग्नेर्दाहंतद्भिन्नस्यमरणमारभ्यज्ञेयम् अनग्निमतउत्क्रांतेऽशौचादिद्विजातिषु दाहादग्निमतोविद्याद्विदेशस्थेमृतेसतीति पैठीनसिस्मृतेः साग्निराहिताग्नि आहिताग्निश्चेत्प्रवसन्म्रियेतपुनःसंस्कारंकृत्वा शववदाशौचमितिवसिष्ठविशेषोक्तेः दाहादेवतु कर्तव्यंयस्यवैतानिकोविधिरितिब्राह्मणाच्च यत्तु धूर्तस्वामिनारामाण्डारेणचोक्तं आहिताग्नेरपिमरणादेवदशरात्रंदशाहंशाव माशौचमितिमरणनिमित्तत्वात्तस्य यत्तु दाहादेवतस्याशौचमुक्तम् तत्संस्कारनिमित्ताशौचंपृथगेव तेनगृह्याग्नेःसंस्कारांगंत्रिरा त्रं श्रौताग्नेस्तुदशरात्रं मरणनिमित्तंतूभयथादशाहंदाहात् प्रागपीतितद्वचनविरोधात्पूर्वस्यैवोत्कर्षान्मूलकल्पनालाघवाच्चेत्य अथातिक्रांताशौचं तत्राशौचमध्येजननादौज्ञातेतच्छेषेणशुद्धिः विगतंतुविदेशस्थंशृणुयाद्योह्यनिर्दशं यच्छेषंदशरात्रस्यताव देवाशुचिर्भवेदितिमनूक्तेः अत्रकेचिदेतत्पुत्रातिरिक्तविषयं तेषांत्वाशौचमध्येश्रवणेपितदाद्येवदशाहादि पितरौचेन्मृतौस्या तांदूरस्थोपिहिपुत्रकः श्रुत्वातद्दिनमारभ्यदशाहंसूतकीभवेदित्यस्यसर्वापवादत्वादित्याहुः तन्न ज्ञातमरणस्यानिमित्तत्वात् अ नग्निमतउत्क्रान्तइत्यादिविरोधाच्च स्मृत्यर्थसारेपि जननेमरणेवाप्रथमदिनादूर्ध्वंज्ञातेपुत्रादीनामविशेषेणैवशुद्धिरिति षड-शीतावपरार्केचैवं दशाहादूर्ध्वंज्ञातेतूक्तंवसिष्ठः मासत्रयेत्रिरात्रंस्यात्षण्मासेपक्षिणीतथा अहस्तुनवमादर्वागूर्ध्वंस्नाने नशुद्ध्यति जननेत्वतिक्रान्ताशौचंनास्त्येव नाशुद्धिः प्रसवाशौचेव्यतीतेषुदिनेष्वपीतिदेवलोक्तेः पितुःस्नानंतथापिभवत्येव निर्दशंज्ञातिमरणंश्रुत्वापुत्रस्यजन्मच सवाससाजलमाप्लुत्यशुद्धोभवतिमानवइतिमनूक्तेः तच्चातिक्रान्ताशौचंदशाहादिजात्या शौचविषयं नत्वनुपनीतादिनिमित्तत्रिरात्रादौ उपनीतेतुविषमंतस्मिन्नेवातिकालजमितिव्याघ्रोक्तेः निर्दशंज्ञातिमरण-

अतिक्रांतेदशाहेत्विति मनूक्तेश्च माधवीयेदेवलस्तु आत्रिपक्षात्त्रिरात्रंस्यात्षण्मासात्पक्षिणीततः परमेकाहमावर्षादूर्ध्वंस्ना
तोविशुद्ध्यतीत्याह तत्रापदनापद्विषयत्वेनव्यवस्था इदंचैकदेशे देशांतरेतुस्नानमात्रं देशांतरमृतस्तुल्ला क्लीबेवैखानसेय
तौ मृतेस्नानेनशुद्ध्यंति गर्भस्रावेचगोत्रिणइतिपराशरोक्तेरितिविज्ञानेश्वरः स्नानवत्सरात् अर्वाक्त्रिपक्षात्त्रिनिशाषण्मा
सात्त्वदिवानिशं अहः संवत्सरादर्वाग्देशांतरमृतेसपीतिविष्णूक्तेरितिमाधवः इदंसपिंडानांदेशांतरेस्नानंसोदकानामितियु
क्तं लक्षणंत्वाह बृहस्पतिः महानद्यंतरंयत्रगिरिर्वाव्यवधायकः वाचोयत्रविभिद्यंतेतद्देशांतरमुच्यते देशांतरंवदंत्येके षष्टियोजनम्
मायतं चत्वारिंशद्वदंत्यन्ये त्रिंशदन्येतथैवचेति एतत्सर्वंमातापितृभिन्नविषयं तयोस्तुपितरौचेदितिपूर्वंपैठीनवाक्यात्सदापूर्ण
मेवदशाहादि स्मृत्यर्थसारेपि मातापितृमरणेदूरदेशेपि संवत्सरादूर्ध्वमपिपुत्रोदशाहादिकंपूर्णमाशौचंकुर्यात् स्त्रीपुंसयोःप
रस्परंसपत्नीशुचैवमिति शुद्धितत्वादयोगौडास्तु ऊर्ध्वंसंवत्सरादाद्याद्बंधुश्चेच्छ्रूयतेमृतः भवेदेकाहमेवात्रतच्चसत्यासि-
नानंत्वितिदेवलोक्तेः पित्रोरब्दमध्येत्रिरात्रमूर्ध्वमेकाहः बंधुर्मातापितामताच पूर्वोक्तदशाहस्तुकलिंगादिदेशपरइत्याहुः
तेबंधुपदस्यपुत्रादिपरत्वेमानाभावादुपेक्ष्याः सापत्नमातुस्तुदक्षः पितृपत्न्यामपेतायांमातृवर्जंद्विजोत्तमाः संवत्सरेव्यतीते
पित्रिरात्रमशुचिर्भवेत् हीनवर्णमातृपुंसपत्नीशुचैवमितिस्मृत्यर्थसारे केचित्पितुःपत्न्यांप्रमीतायामौरसेतनयेतथेति
श्लोकोक्तेस्त्वौरसेपीदमाहुः षडशीतावप्येवं एतत्सवर्णतुल्यं तुल्यवयसिसर्वेषामतिक्रांतेतथैवचेति व्याघ्रोक्तेः अथा-
शौचसंपातेउच्यते तत्रशावेशावस्सूतकेसूतकं शावसूतकेसूतकेशावंवातत्राप्युत्तरकालतः पूर्वेणसमन्यूनमधिकंचेतिद्वा-

दशाभेदाः यद्येकदिने समंन्यूनमधिकंवाशौचद्वयंतत्रतंत्रेणान्यसिद्धिः द्वयोरेककालत्वात् यदातुद्वितीयादिदिनेतूत्तरंसजातीयंशावंजननंवासमकालंन्यूनकालंवापरंस्यात्तदाषट्सुपक्षेषुपूर्वशेषेणशुद्धिः अंतराजन्ममरणेशेषाहोभिर्विशुद्ध्यतीतियाज्ञवल्क्योक्तेः अंतराज्ञातेइत्यस्यार्थः ज्ञातस्यैवजननादेर्निमित्तत्वात् पूर्वाशौचान्तरंतन्मध्योत्पन्नेजाततूत्तरमेवकार्यम् शुद्धितत्त्वेप्युक्तं पूर्वाशौचान्तरुत्पन्नंसमानंलघुवानिमित्तंतत्कालादुपरिस्थितस्वाशौचहेतुरेव अज्ञातंतुन अविज्ञातेनदोषःस्याच्छ्राद्धादिषुकथंचनेत्यस्याशौचसांकर्येपिप्रवृत्तेः तेनाज्ञानादूर्ध्वोत्सर्गादौकृतेपश्चाज्ञानेपिनावृत्तिरिति माधवीयेयसमोपि जननेजननेचेत्स्यान्मरणेमरणंतथा पूर्वशेषेणशुद्धिःस्यादुत्तराशौचवर्जनं अत्रकेचिद्‌तद्दशाहस्यांतेचेत्पुनर्मरणजन्मनी तावत्स्यादशुचिर्विप्रोयावत्तस्यादनिर्दशमिति मनुपराशराद्यैर्दशाहग्रहणात्पूर्णाशौचएवपूर्वशेषेणशुद्धिः त्र्यहाद्यल्पाशौचसंपातेतूत्तरेणैवशुद्धिरित्याहुः हरदत्तोप्येवमाह गौडाअप्येवं तन्न याज्ञवल्क्यादिवशेनदशाहस्यतुल्यकालाशौचोपलक्षणत्वात् समानाशौचसंपातेप्रथमेनसमापयेत् असमानंद्वितीयेनधर्मराजवचोयथेतिमाधवीयशंखोक्तेः अपरार्कमिताक्षरादिविरोधाच्च यदातुसूतकेशावंसमंन्यूनमधिकंवातदानपूर्वशेषाच्छुद्धिः तदाहांगिराः सूतकेमृतकंचेत्स्यान्मृतकेत्वथसूतकं तत्राधिकृत्यमृतकाशौचंकुर्यान्नसूतकं षट्त्रिंशन्मते शावाशौचेसमुत्पन्नेसूतकंतुयदाभवेत् शावेनशुध्यतेसूतिर्नसूतिःशावशोधनी चतुर्विंशतिमतेपि मृतेनशुध्यतेजातंनमृतंजातकेनतु अतोयदादशाहजननमध्येतदंतेवात्र्यहादिशावंतदापूर्वेणशुद्धावपितन्निमित्तमस्पृश्यत्वंभवत्येव मरणोत्पत्तियोगेतुगरीयोमरणंभवेदितिकौर्माच्च गौतमव्याख्यातृभिरपि सूतकाद्द्विगुणंशाव-

शावाह्निगुणमार्तवं आर्तवाह्निगुणास्सूतिस्ततोपि शवदाहकः अत्र पूर्वं पूर्वेण नोत्तरोत्तरनिवृत्तिरस्पृश्यत्वाधिक्यादित्यर्थः षडशीतावपि स्वभावबहुसूतिस्तु न्यूनशावविशोधनीति रात्रिशेषादौ वर्धिता त्रिदिनेऽगंतुकेः सूतेर्बहुत्वं न स्वभावेन अतस्तत्र न्यूनशावस्यापि न पूर्वेण शुद्धिरिति वक्तुं स्वभावेत्युक्तं ब्राह्मेपि नागंतुकैरथाहोभिराशौचमपनुद्यते नच पातनिमित्तेन शावस्यान्यस्य शोधनमिति एवं नव पक्षाः यदा तु त्र्यहाद्यल्पाशौचमध्ये सजातीयं विजातीयं वा दीर्घकालमुत्तरं तदाप्युत्तरं पूर्णं कार्यं न पूर्वेण शुद्धिः स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि न पूर्वेण विशुद्धिः स्यात् स्वकालेनैव शुध्यतीत्युशनसोक्तेः तेन त्र्यहादिशावमध्ये दशाहादिसूतकेपि न पूर्वेण शुद्धिरित्यपरार्कः शावनिमित्तमस्पृश्यत्वं च भवत्येव शुद्धिविवेके तु शावेन शुध्यते सूतिरिति प्रागुक्तेः तत्राप्युत्तराशौचान्निवृत्तिरुक्ता तन्न उत्तरस्य कालाधिक्येन बलवत्त्वात् माधवीयेयमपि अद्यवृद्धिमदाशौचं पश्चिमेन समापयेत् यथा त्रिरात्रे प्रक्रांते दशाहं प्रविशेद्यदि आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यति हारीतोपि गुरुणा लघु शुध्येत्तु लघुना नैव तद्गुर्विति गुरुत्वं लघुत्वं च कालकृतमेव पूर्वानुरोधात् एतच्च हरदत्तेन स्पष्टमुक्तं मिताक्षरायामेवं यत्तु आद्यानायौगपद्ये तु ज्ञेया शुद्धिर्गरीयसा मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति हारीतकौर्मादि तत्रास्पृश्यत्वाभिप्रायं शावस्य गुरुत्वं ज्ञेयं क्वचिदल्पकालेनापि दीर्घकालाशौचनिवृत्तिमाह देवलः परतः परतो शुद्धिरघवृद्धौ विधीयते स्याच्चेत्पंचतमादह्नः पूर्वेणैवात्र शिष्यते अस्यार्थः अघवृद्धौ दीर्घाशौचे परतः शुद्धिः परमाशौचं यदि पूर्वाशौचमुत्तरस्य पंचमादिनात्परतोनुवर्तते तदा पूर्वेणैव शुद्धिः पूर्वस्योत्तराशौचाद्वाधिककालव्यापित्वे पूर्वशेषाच्छुद्धिरित्यर्थः यथा षष्ठमासे गर्भपातनिमित्तषडहाशौचमध्ये दशाहपाते पूर्वेणोत्तरनिवृत्तिः

यथावात्र्यहमध्येस्रावपातनिमित्तचतुरहपंचाहयोरितिकश्चित् तन्न दशाहावधिपूर्वशेषशुद्ध्यावेदकवाक्यविरोधात् षष्ठादिदिने पूर्णाशौचमन्त्यरात्रौतु त्र्यहइत्यनौचित्याच्च अस्मद्गुरवस्तुपंचतमादन्ह आततोन्यूनत्र्यहादिचेत्स्यादस्मिन्विषये पूर्वेणैवाशुद्धिः शिष्यते दशाहादिरात्रिशेषेत्र्यहादिपातेत्र्यहाद्यल्पाशौचानांपरस्पररात्रिशेषसंपातेचनत्र्यहादिवृद्धिरित्यर्थमाहुः केचित्तु पूर्वशेषेणाशुद्धेरपवादमाहगौतमः रात्रिशेषेसतिद्वाभ्यांप्रभातेतिसृभिरिति प्रभातेत्र्ययामे रात्रिशेषेत्र्यहाच्छुद्धिर्यामशेषेशुचिस्त्र्यहादितिशातातपोक्तेः इदंशावातेसूतकपातेसजातीयेवातुल्य अत्रकेचित् रात्रिशब्दः अहोरात्रपरः अह्नःशेषेद्वाभ्यांप्रभातेतिसृभिरितिशङ्खलिखितोक्तेः अथयदिदशरात्राःसन्निपतेयुराद्यदशरात्रमाशौचमानवमाद्दिवसात्ततऊर्ध्वं द्विरात्रेप्रत्युषाया त्रिरात्रेणेतिबोधायनोक्तेः पुनःपातेदशाहात्प्राक्पूर्वेणसहगच्छति दशमेन्हिपतेद्यस्याहर्द्वयात्साविशुद्ध्यतीति प्रभातेतुत्रिरात्रेण दशरात्रेष्वयंविधिरिति देवलोक्तेश्च नवमदशमशब्दौचोपान्त्यान्त्यदिनपरौ तेनक्षत्रियादावपितथेत्याहुः माधवीयेप्येवं अन्येत्वाहुः अंतर्दशाहेस्यातांचेत्पुनर्मरणजन्मनी तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति मनुपराशराद्युक्तेर्दशमदिनेनान्तरस्यशुद्धेरुक्तत्वात् विरोधःस्पष्टएव विरोधेच यद्वैकिंचनमनुरवदत्तद्भेषजं कलौपाराशरस्मृतिरित्यनेनपूर्ववचसांबाधः अतएववाचस्पतिनातेषामनाकरत्वमुक्तं साकरत्वेपिजातिमात्रविप्रादिविषयं देशान्तरविषयंवायुगान्तरविषयंवास्तु तेनगौतमीये रात्रिशब्दो नाहोरात्रपरः रात्रिमात्रावशिष्टेइतिमिताक्षरोक्तेश्च नकुकविकृतेरिवान्यथाव्याख्यायुक्ता माधवस्तु अनिर्गतदशाहमितिपूर्वस्त्वयंथविरोधादुपेक्ष्यइति अस्मत्पितृचरणास्तुबोधायनीये आनवमाद्दिवसादिति द्वितीयाशौचस्यनवमदिनप्रथमस्यदशमम

मेवाह द्व्यहादिवृद्धेः पूर्वशेषापवादत्वात्तस्य च न्यायतो द्वितीयदिनादेव प्रवृत्तेः अतऊर्ध्वमिति दशमरात्रिपरं शंखलिखितोक्तो देवलोक्तौ चाह शेषे दशमेह्नि चातीते रात्रौ पतेदित्यर्थः दशम्यांपितानामकुर्यादितिवत् तेनमन्वाद्यैर्विरोधो नापि मिताक्षराद्यैरित्याहुः अपरार्के निर्णयामृतस्वरसोप्येवं यत्तु तत्रैव ब्राह्मे आद्यभागद्वयं यावत्सूतकस्य तु सूतके द्वितीये पतिते त्वाद्यात्सूतकाच्छुद्धिरिष्यते अतऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतः एवमेव विचार्यं स्यान्मृतके मृतकान्तरे मृतकस्यान्तरे यत्र सूतकं प्रतिपद्यते सूतकस्यान्तरे वाथ मृतकं यत्र विद्यते मृतकान्ते भवेत्तत्र शुद्धिर्वर्णेषु सर्वशः इति अस्यार्थस्तत्रैवोक्तः पूर्वाशौचचरमाहोरात्रस्य दिनरूप आद्यभागद्वये न्याशौचपाते पूर्वेणशुद्धिः भागद्वयोर्ध्वं रात्रौ सूतकान्तरे द्वितीयात् पूर्वभिन्नात्सूतकान्ताद्व्यहादिरूपाच्छुद्धिरिति अपरार्के त्वाशौचकालं त्रेधा विभज्य निर्गुणविषयत्वेनेदमुक्तं अस्य वचनस्य निर्मूलत्वात्किं रज्ञोक्तिरेव अतः पूर्वाशौचान्त्यरात्रावन्याशौचे होरात्रद्वयमधिकं रात्रेरन्त्ययामे तु दिनत्रयमिति भट्टाचरणोपदिष्टः पन्थाः एतत्संपूर्णाशौचसंपात एव रात्रिशेषत्रिरात्रादिसंपाते तु पूर्वशेषेणैव शुद्धिः द्विरात्रादिवृद्धेः पूर्ववाक्ये दशाहविषयत्वादपवादाभावे शेषशुद्धेरेव सामान्यतः प्रवृत्तेः षडशीतौ तु दशाहान्तेप्यहः पातेपि द्वित्रिदिनवृद्धिरुक्ता रात्रिशेषे यदाशौचं पूर्वानधिकमापतेत् ऊर्ध्वं दिनद्वयं पूर्वाद्यामशेषे दिनत्रयमिति अनधिके समन्यूनं वा तत्तुच्छं निर्मूलत्वादते पक्षिण्यादिपातेपि द्विरात्रादिवृद्ध्यापत्तेश्च पूर्वाशौचान्तर्वर्धितद्वित्रिदिनमध्येधिकाशौचान्तरपाते तु वर्धितस्याल्पत्वादधिकेनैव शुद्धिः न च वर्धितस्य पूर्वशेषत्वं शंकनीयं रात्रिशेषपूर्वशेषशुद्ध्यपवादेनैमित्तिकावृत्तिन्यायोज्जीवनात् अपवादाभावे उत्सर्गस्य प्राप्तेः अपवादान्तरमाह शंखः मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता पितुः शेषेण शु

द्धिः स्यान्मातुः कार्यान्तु पक्षिणीं पादत्रयंसप्तम् तुर्यस्य त्वयमर्थः पित्राशौचमध्ये मातृमृतौ पित्राशौचांते मातुः पक्षिणीमधिकांकुर्या
दिति अत्राशङ्कावित्यक्ते शात्महादेः पितुराशौचाभावान्मातृमरणेनपक्षिणी किंतु पूर्णमेवाशौचं इयंच पक्षिणी तृतीयादिदिनप
रात्राद्यदिनद्वयेमृतिनिमित्तनैमित्तिकावृत्तिन्यायापवादत्वादिति पितृचरणाः सपिंडाद्याशौचेनमातापित्रोराशौचापगमोनास्त्येवं ए
वंभर्तुरपि इयंच पक्षिणी दशमदिनात्पूर्वंमातृमरणेज्ञेया दशम्यारात्रौ तत्प्रभातेवा मातृमरणे त्र्यहत्र्यहमसुचितापक्षिणीतिकु-
श्चित् तन्न संख्यांतरापजननापत्त्या त्र्यहादिश्रुतिबाधापत्तेः अतएवैकादशाद्याद्यस्त्वादौ सुतसंख्याबाधापत्तेः समुच्चयोनिरस्तो
द्वादशे गुरुणि लघोरंतर्गतेः गुरुणा लघुशङ्कृत्यादिस्फुत्केश्च मातुरन्वारोहणेतुनपक्षिणी यदानारीविशेदग्निंभिन्नयस्याभियवांछया
तदाशौचंविधातव्यंभर्त्राशौचक्रमेणहीति पृथ्वीचंद्रोदयेलघुहारीतोक्तेः तत्रैवषडशीतिमतेपि मृतपतिमनुव्रज्यपत्नीचेदनलंगता
नतत्रपक्षिणीकार्यापैतृकादेवशङ्कुचयति पुत्रोन्योवाभिदस्तस्यास्तावदेवाशुचिस्तयोः नवश्राद्धंचापिंडंचयुगपत्तुसमापयेत् गृ
हीताशौचानांपुत्राणांपितुःसंस्कारेमातुः सपिंडस्यवामरणेनायंनिर्णयः अतिक्रांतकालाद्विद्यमाननिमित्तस्य बलवत्त्वात् द्वादश
वर्षान्तरसंस्काराशौचमध्येसपिंडमरणेप्येवं यत्तु अपरार्केब्राह्मे ऋग्वेदवादात्साध्वीस्त्रीनभवेदात्मघातिनी त्र्यहाशौचेतुनिर्वृ-
त्ते श्राद्धंप्राप्नोतिशास्त्रतइति तद्भर्तुराशौचान्तरमन्वारोहणेत्रिरात्राशौचपरमिति पृथ्वीचंद्रः ब्राह्मणादेःक्षत्रियाद्यनुगमनेत्वाशौ
चपूर्वमित्यपरार्कः शूलपाणितत्त्वादयोगौडास्तु भर्तुराशौचान्तरमन्वारोहणेत्रिरात्रं सहगमनेतुसंपूर्णम् शुद्धहस्तस्यसद्यः शौचे-
न्वारोहणेब्राह्मोक्तेस्त्रिरात्रत्वात् भर्तुरपित्र्यहेपापिंडदानं एकचितेतुसद्यःशौचमित्याहुः अन्यतमायुक्तम् पूर्वशेषेणशङ्क्ये

रपवादांतरमुक्तं षडशीत्यां पूर्वाशौचेनयाशुद्धिः सूतके मृतकेचसा सूतिकामग्निदं हित्वा प्रेतस्यचस्पृतानपि निर्णयामृते स्मृतिसंग्रहेपि इयंविशुद्धिरुदितासूतिकामग्निदंविना इदं मूल्येनदाहकरणेमातुलादिसंबंधेनदाहमात्रकरणेतुत्रिरात्रमेवेत्युक्तंप्राक् वृद्धत्रिः सूतकाद्विगुणंशावंशावाद्विगुणमार्तवं आर्तवाद्विगुणासूतिस्ततोपिशवदाहकः तथाशौचसंपातेनशावजनननिमित्तकार्यप्रतिबंधः आशौचेतुसमुत्पन्ने पुत्रजन्मयदाभवे कर्तुस्तात्कालिकीशुद्धिः पूर्वाशौचेनशुध्यतीतिप्रजापतिस्मृतेः आशौचेतुद्विविधेपिशातातपः अंतर्दाहेजननात् पश्चात्तस्यान्मरणंयदि प्रेतमुद्दिश्यकर्तव्यःपिंडदानंयथाविधि प्रारब्धेप्रेतपिंडेतुमध्येचेज्जननंभवेत् तथैवाशौचपिंडास्तुशेषान्दद्याद्यथाविधि मातुःपक्षिणी मध्येपितुरेकादशाहंकुर्यात् आद्यश्राद्धमशुद्धोपिकुर्यादेकादशेहनि इतिस्मृतेः केचित्तुक्षत्रियादिपरम् विप्रादेस्त्वाशौचांतरएकादशाहश्राद्धंनेत्याहुः अतएवविज्ञानेश्वरेण दशमपिंडमुत्सृज्यरात्रिशेषेशुचिर्भवेदिति शुचित्वंमहैकोद्दिष्टांगविप्रनिमंत्रणपरमितिवदतातत्रशुद्धेरंगत्वंदर्शितं

एवंवृषोत्सर्गशय्यादावपिदैवयाज्ञिकेनत्वाशौचांतरेपिभवत्येवेत्युक्तं अथाशौचापवादः सचपंचधा कर्तृतः द्रव्यतः मृतदोषतः विधानात् आद्योब्रह्मचारि इत्यादिषु नैष्ठिकानांवनस्थानांयतीनांब्रह्मचारिणां नाशौचंकीर्तितंसद्भिः पतितेचतथामृतइति कौर्मोक्तेः तुर्यपादेशावेवापितथैवचेतिदेवलपाठः आशौचंमंत्यकर्मोपलक्षणं ब्रह्मचारीनकुर्वीतशववाहादिकाः क्रियाः यदिकुर्याच्चरेत्कृच्छ्रं पुनःसंस्कारमेवचेतिदेवलोक्तेः एतत्पित्राद्यतिरिक्तविषयं आचार्यंस्वमुपाध्यायंमातरंपितरंगुरुं निर्हृत्यतुव्रतीप्रेतंनव्रतेनवियुज्यतइतिमनूक्तेः हारीतः आचार्यंस्वमुपाध्यायंमातरंपितरंगुरुं निर्हृत्यतुव्रतीप्रेतंनव्रते १५

नविमुज्यते मातापित्रोस्तुयत्प्रोक्तं ब्रतचारीतुपुत्रकः ब्रतस्थोपिहिकुर्वीतपिंडदानोदकक्रियाम् भवत्यशौचं नैवास्यनवाग्निस्तस्यलुप्यते स्वाध्यायंचप्रकुर्वीत पूर्ववद्विधिदर्शित संवर्तः अन्यगोत्रोपसंबंधः प्रेतस्याग्निंददातियः पिंडंचोदकदानंचसदशाहंसमाचरेत् निर्हरणमंत्यकर्मपरं एवंमातामहस्य यथा ब्रतस्थोपिकृतः पितुः कुर्यात्क्रियांनृप तथामातामहस्यापि दौहित्रः कर्तुमर्हतीत्यपरार्के भविष्योक्तेः मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदैहिकं कुर्वन्मातामहस्यापि ब्रतीनभ्रश्यते ब्रतादिति कालादर्शोक्तेश्च तत्रास्य कर्मनिमित्तमस्पृश्यत्वं दशाहमस्त्येव सगोत्रोवासगोत्रोवायोग्निंदद्यात्सखेनरः सोपिकुर्यान्नवश्राद्धं शुध्येत्तुदशमेहनीतिदिवोदासोक्तवचनात् अतएवब्रह्मचारिणः शवकर्मणो ब्रतान्निवृत्तिरन्यत्रमातापित्रोर्गुरोश्चेति गौतमीये ब्रतनिवृत्तेरेव पर्युदासेनाशौचस्य संध्यादिकर्मलोपस्तुनास्ति नत्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचिदिति छंदोगपरिशिष्टात् पित्रोर्गुरोर्विपत्तौतु ब्रह्मचार्यपि यः कृतः कृब्रतश्चापिकुर्वीत अग्निपिंडोदकक्रियां तेनाशौचंनकर्तव्यंसंध्याचैवनलुप्यते अग्निकार्यंचकर्तव्यंसायंप्रातश्चनित्यशइति चंद्रिकायां संवर्तोक्तेश्च अत्रकर्मानधिकाररूपाशौचनिषेधएव अपरार्कमाधवादयस्तु एकाहमाशौचमाहुः आचार्यंवाप्युपाध्यायं गुरुंवापितरंचवा मातरंवास्वयंदग्ध्वाब्रतस्थस्तत्र भोजनं कृत्वापततिनोतस्मात्प्रेतान्नंतत्रभक्षयेत् अन्यत्रभोजनंकुर्यान्नचतैः सहसंवसेत् एकाहमशुचिर्भूत्वाद्वितीयेहनिशुध्यतीति ब्राह्मोक्तेः तदन्नभोजनेतु प्रायश्चित्तंपुनरुपनयनमाशौचंच दिवोदासादयस्तुब्राह्मोक्तेः प्रथमेन्हिसंध्यादिलोपः ब्रह्मचारीयदाकुर्यात्पिंडनिर्वपणंपितुः तावत्कालमशौचंस्यात्पुनःस्नात्वाविशुध्यतीतिप्रजापतिवचनात् द्वितीयाद्यादौपिंडदानकालएवास्पृश्यत्वमात्रंनान्यदित्याहुः दशाहमस्पृश्यत्वेपिकर्मांगस्नानविधानार्थ-

मेतदिति युक्तं अन्त्यकर्माकरणे तु ब्रह्मचारिणः पित्रादिमरणेप्याशौचाभाव एव सोपि ब्रह्मचर्यकाल एव समावर्तनोत्तरं तु पूर्वमृतानां त्र्यहाशौचं भवत्येव आदिष्टीनोदकं कुर्यादाव्रतस्य समापनात् समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदिति मनूक्तेः तत्रापि विकल्पः पितर्यपि मृते नैष दोषो भवति कर्हिचित् आशौचं कर्मणो तस्मात्त्र्यहं वा ब्रह्मचारिणामिति छंदोगपरिशिष्टात् तथा कृतजीवच्छ्राद्धे न किमप्याशौचं न कार्यमिति हेमाद्रिः ऋत्विक्तन्त्रे कौर्मे सद्यः शौचं समाख्यातं दुर्भिक्षे चाप्युपद्रवे डिंबाहवहतानां च विद्युता पार्थिवैर्द्विजैः उपद्रवे त्वंतमरके उपसर्गमृते चैव सद्यः शौचं विधीयत इति पराशरोक्तेः उपसर्गोत्यंतमरक इति शूलपाण्यनिरुद्धभट्टादयः याज्ञवल्क्योपि आपद्यपि च कष्टायां सद्यः शौचं विधीयत इति मरणसमयेपि नाशौचं तथा च शंखः रत्नाकरे दक्षः स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितम् आपद्गतस्य सर्वस्य सूतकेपि न सूतकं अतः सति वैराग्ये संन्यासोप्यातुरस्य भवतीति केचित् अथकमनुः त्रिंशच्छ्लोक्यां तत्तत्कार्येषु सत्त्रिव्रतिनृपनृपवद्दीक्षितर्त्विक् स्वदेशाभ्रंशापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्प्यातुराणां समारब्धेषु दानोपनयनयजनश्राद्धपुंसवप्रतिष्ठाचूडातीर्थार्थयात्राजपपरिणयनाद्युत्सवेषु तदर्थं नाशौचमिति शेषः सत्री अन्नसत्रवान् मुख्यसत्त्रस्य दीक्षितपदात्सिद्धेः व्रती अनन्तव्रतादिनियमवान् न व्रतिनां व्रते इति विष्णूक्तेः प्रचेताः कारवः शिल्पिनो वैद्या दासीदासास्तथैव च राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः कारवः सूपकाराद्याः शिल्पिनश्चैलनिर्णेजकाद्याः आतुरस्य व्याधिनाशार्थे दानादौ तुलादानादेः प्रारंभो नांदीश्राद्धं संकल्पो वा यजनं तडागोत्सर्गकोटिहोमादिः लघुविष्णुः व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे आरब्धे सूतकं न स्यादनारब्धे तु सूतकं प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रियेति पाकस्य परिसमंता

त्क्रियापाकप्रोक्षणमिति शुद्धिप्रदीपः तन्मंदंतीर्थेति आशौचेआकस्मिकतीर्थप्राप्तौ विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदिति पैठीनसिस्मृतेः अत्रविशेषःप्रागुक्तः जपः पुरश्चरणादिः स्तोत्रपाठः अविच्छेदेनसंकल्पितहरिवंशश्रवणादिश्च अतएवोक्तंब्राह्मे गृहीतानियमस्यापिनस्यादन्यस्यकस्यचिदिति एवंदेवपूजादि मदनपारिजातेयश्चापि शिवविष्ण्वर्चनदीक्षायस्यचाग्निपरिग्रहः श्रौतकर्माणिकुर्वीतस्नातःशुद्धिमवाप्नुयात् गौडशुद्धितत्त्वेमन्त्रमुक्तावल्या. जपोदेवार्चनविधिःकार्योदीक्षान्वितैर्नरैः नास्तिपापंयतस्तेषांसूतकंवायतात्मनाम् राघवभट्टीयेनारदः अथसूतकिनः पूजावक्ष्यास्यागमप्रचोदितान् स्नात्वानित्यंचनिर्वर्त्यमानस्याक्रिययातुवै.बाह्यपूजाक्रमेणैवध्यानयोगेनपूजयेत् .यदिकामीनचेत्कामीनित्यंपूर्ववदाचरेत् यत्तुनृसिंहकल्पे सदामन्त्रजपःसुक्तायादिस्यादशुचिर्नरः मनसावाहितस्तत्रस्मरन्मन्त्रंनतूच्चरेत् तन्मूत्राद्याशौचपरं रामार्चनचन्द्रिकायां अशुचिर्वाशुचिर्वापिगच्छंस्तिष्ठन्स्वपन्नपि मंत्रैकस्मरणाविद्वान्मनसैवसदाभ्यसेत् कालनियमाभावेतुहृदयमेव उत्सवोरथयात्रादिःएषुनाशौचं अयंचाशौचाभावोनान्यगतित्वे आर्तीचन्द्रोदयः अत्रमूलमाकरेस्पष्टं अत्रदीक्षितस्यअवभृथात्पूर्वमेवाशौचाभावः तदादित्वाशौचमस्त्येव तेनैवतानोपासनाः कार्याइतिवैतानत्वेप्यवभृथादिनभवत्येव अतएवोक्तंमाधवीयेब्राह्मे तद्गृहीतदीक्षस्यत्रैविद्यस्यमहामखे स्नानंत्ववभृथेयावत्तावत्तस्यनसूतकमिति वैतानोपासनाःकार्याइत्यनेनैवसिद्धेऋत्विजादीक्षितानांचेतिपुनर्दीक्षितग्रहणम् यजमानस्त्वयकृत्वार्थस्नानप्राप्त्यर्थंवेतिविज्ञानेश्वरः वस्तुतस्तुदीक्षणीयासंस्कृतस्यप्रागवभृथात्कर्मप्राप्त्यर्थंदीक्षितग्रहणंतेनततः पूर्वंनिषेधएव सत्तु

प्रारंभोवरणंयज्ञेइतितदृत्विक्परं तथाच छंदोगपरिशिष्टे नदीक्षिण्याःपरंयज्ञेनकृच्छ्रादितपश्चरन्निति ऋत्विक्तत्त्वेप्येवम् ऋत्विजांचमधुपर्कोत्तरमाशौचाभावः गृहीतमधुपर्कस्ययजमानाच्चऋत्विजः पश्चादशौचेपतितेनभवेदितिनिश्चयइतिब्राह्मात् अतएवरामांडारः चतुर्णांवरणपक्षेन्येषामाशौचेन्यआगमयितव्यइत्याह एवंस्मार्तेपि तुलादिहोमादौमधुपर्केसतिदोषाभावोज्ञेयः यत्तु प्रारंभोवरणंयज्ञइतितत्रापिमधुपर्कांतंज्ञेयं तेनाधानेष्टिपशुबंधादौतदभावादन्यंभवतीतिसिद्धं अपवादांतरमाहयाज्ञवल्क्यः वैतानोपासनाःकार्याःक्रियाश्चश्रुतिचोदनात् तत्रत्यागमात्रेस्नानोत्तरंस्वयंकर्तृत्वं श्रौतकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयादितिस्मृतेः त्यागातिरिक्तेतुश्रौतेस्मार्तेचान्यस्यैवकर्तृत्वं सूतकेमृतकेचैवअशक्तौश्राद्धभोजने प्रवासादिनिमित्तेषुहावयेन्नतुहापयेदितिबृहस्पत्युक्तेः नित्यानिनिवर्तेरन्वैतानवर्जंशालाग्नौचैकेन्यएतानिकुर्युरिति पैठीनसिस्मृतेश्च विज्ञानेश्वरः एकग्रहणंपूजार्थं तेनस्मार्तंकार्यंभवति हारलतायां दाक्षिणात्यास्तुविकल्पमाहुः अपरार्कादिनिबंधास्तु श्रौतंसर्वंस्वयंकार्यंस्मार्तेतुत्यागातिरिक्तेन्यस्यैवकर्तृत्वं त्यागमात्रेतुस्वस्यकर्मवैतानिकंकार्यंस्नानोपस्पर्शनवान्स्वयमितिहारीतोक्तेः दर्शंचपूर्णमासंचकर्मवैतानिकंचयत् सूतकेपित्यजेन्मोहात्प्रायश्चित्तीपतेद्द्विजइतिमरीच्युक्तेः जन्महान्यौवितानस्यकर्मत्यागोनविद्यते शालाग्नौकेवलोहोमःकार्यएवान्यगोत्रजैरितिजाबालोक्तेश्चेत्याहुः आशार्केप्येवं याज्ञिकाअप्येवं सूतकेतुसमुत्पन्नेस्मार्तंकर्मकथंभवेत् पिंडयज्ञंचरुंहोमंअसगोत्रेणकारयेदितिजातूकर्ण्योक्तेश्च चरुःस्मार्तस्थालीपाकः श्रवणाकर्मादिश्चेति विज्ञानेश्वरः प्रारब्धंतुसपिंडेनापिकार्यं नचतत्कर्मकुर्वाणःसनाभ्योप्यशुचिर्भवेदितिमनूक्तेः छंदोगपरिशिष्टेपि होमः श्रौते

तु कर्त्तव्यः शाकान्नेन फलेन वा अकृतं हावयेत्तस्मात्तैंतदभावे कृताकृतं । अकृतं व्रीह्यादि कृताकृतं तण्डुलादि स्मार्त्तहोमादौ तु विकल्पो ज्ञेयः शालाग्नौ वैक इति भाष्योक्तेः यदा कारणान्तरादन्यद्वारा अग्नेदतत्त्व येषां बह्वृचादीनां द्वादशरात्रमहोमोऽपि नाग्निविच्छेदः तैर्न कार्यं तैत्तिरीयाद्यैः कार्यं त्रिरात्रमहूयमानोऽग्निर्लौकिकः संपद्यते इति स्मृदर्शनभाष्ये वचनात् समारूढस्त्वग्नौ तेनापि न कार्यम् किन्तु पुनराधानमेव समारोपमस्त्यवरोहयोराशौचापवादाभावादनन्यकर्तृकत्वाच्च अन्यथा पुनराधानमपि स्यात् यत्त्वाश्वलायनः तोचापि सूतके शावे पर्वणीष्टिं महापदि प्रोष्य वत्स्याच्च भार्यायां न कुर्यान्नाक दाचन स्मार्त्ताग्निः सूतके शावे स्वयं न जुहुयाद्द्विजः श्रौताग्निस्तु सहृत्तुत्वा समाप्ते वा स्वयं हुनेदिति तदपि समारूढपरम् तदाह स एव स्मार्त्ताग्निरात्मनोऽन्येषामभावे सूतकादिषु समारोप्य तदन्ते तेषु विहृत्य जुहुयात्स्वयमिति तथा मनुः प्रत्यूहेन्नाग्निषुक्रियाइति वैश्वदेवस्य त्वग्निसाध्यत्वेऽपि वचनान्निवृत्तिः विप्रो दशाहमासीत वैश्वदेवविवर्जित इति संवर्तोक्तेः यद्यपि पञ्चयज्ञविधानं तु न कुर्यान्मृतजन्मनोरिति तेनैवोक्तेः पूर्वनिषेधो व्यर्थस्तथाप्यापस्तम्बादीनां वैश्वदेवस्य पंचयज्ञभिन्नत्वात् पृथङ्निषेधः हरदत्तस्त्वाशौचेऽपि बह्वृचैर्वैश्वदेवः कार्यः तस्य द्वावनध्यायौ यदात्माशुचिर्यद्देशइति ब्रह्मयज्ञस्यैवाशौचे विशिष्य निषेधात् संध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् न त्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः सूतके मृतके चैव संध्याकर्म समाचरेत् मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः यत्तु चन्द्रिकायां जाबालः संध्यां पञ्चमहायज्ञान्नैत्यकं स्मृतिकर्म च तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रियेति यच्च संवर्तः सूतके कर्मणां त्यागः संध्यादीनां विधीयते यच्च विष्णुपुराणे सर्वकालमुपासीत संध्ययोः पार्थिवेष्यते

अन्यत्रसूतकाशौचविभ्रमातुरभीतितइति तत्पूर्णसंध्यापरं अर्घ्यांतामानसींसंध्याकुशवारिविवर्जितेतिशुद्धिदीपेऽप्यवलोक्तेः पैठी-
नसिस्त्वर्घ्यमंत्रोच्चारणमाह सूतकेसावित्र्यांजलिंप्रक्षिप्यसूर्यंध्यायन्नमस्कुर्यात् प्रयोगपारिजातेभरद्वाजोपि सूतकेमृतकेकुर्यात्
प्राणायाममममंत्रकं तथामार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत् गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् मार्जनंतुनवाकार्यमुप-
स्थानंनचैवहि ग्रहणश्राद्धादावप्याशौचापवादमाहव्याघ्रः स्नातकर्मपरित्यागोराहोरन्यत्रसूतकेइति लैंगेपि सूतकेमृतकेचै
वनदोषोराहुदर्शने तावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते प्रयोगपारिजातेबृहस्पतिः कन्याविवाहसंक्रांतौसूतकेनकदाच
न दुष्य शातातपः यदाभोजनकालेतुअशुचिर्भवतिद्विजः भूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रोविशुध्यति भक्षयित्वातुतंग्रा-
समहोरात्रेणशुध्यति अशित्वासर्वमेवान्नंत्रिरात्रेणविशुध्यति इदमविशेषात्सूतकादिपरमपीतिशुद्धितत्त्वेशूलपाणौच
अथद्रव्यतः मरीचिः लवणेमधुमांसेचपुष्पमूलफलेषुच शाककाष्ठतृणेष्वप्सुदधिसर्पिःपयःसु तिलौषधाजिनेचैवपक्कापक्के
स्वयंग्रहः पुण्येष्वेवसर्वेषुनाशौचंमृतसूतके स्वयमेवस्वाम्यनुज्ञयाग्राह्यं नतद्धस्तादित्यर्थः क्रयेतुतद्धस्तादपिनदोषः प
क्वलड्डुकादि अपक्कतंडुलादि एतदन्नसत्रपरं अन्नसत्रेप्रवृत्तानामाममन्नमगर्हितं भुक्त्वापक्कान्नमेतेषांत्रिरात्रंतुव्रतीभवेदि
त्यंगिरसोक्तेः पक्कान्नमोदकादि नतुभक्ष्यषट्त्रिंशन्मते उभाभ्यामपरिज्ञातेसूतकेनैवदोषकृत् एकेनापिपरिज्ञातेभोक्तु
र्दोषमुपावहेत् विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके
अन्यगेहोदकाचांताःसर्वेतेशुचयःस्मृताः बृहस्पतिः विवाहोत्सवेत्याद्युक्त्वापूर्वसंकल्पितान्नेषुनदोषःपरिकीर्तितः षडशीतौ

संसर्गोद्यस्यवाशौचंयस्यातिक्रांतकालता तदीयस्यपदार्थस्यनाशौचंविद्यतेक्वचित् शुद्धितत्त्वे शुद्धोदस्यतुहन्तोविष्णुः प्रोक्षणेन पुस्तकमिति अथमृतदोषहेमाद्रौ षट्त्रिंशन्मते कौर्मेच व्यापादयेद्यआत्मानंस्वयमग्न्युदकादिभिः विहितंतस्यनाशौचंनापिकार्योदकक्रिया शवदर्शनं यावदाशौचमस्त्येव हतानामृतगोविप्रैरन्वक्षंचात्मघातिनामिति याज्ञवल्क्योक्तेः शुद्धितत्त्वेकौर्मे सद्यःशौचंसमाख्यातं शापादिमरणेतथा आदिपदादभिचारहतेभविष्ये स्वेच्छयामरणविप्राच्छृंगिदंष्ट्रिसरीसृपैः अस्यान्त्यजविषोद्बन्धैरात्मनात्मवताडनैः पाखण्डमाश्रिताश्चैवमहापातकिनस्तथा स्त्रियश्चव्यभिचारिण्यआरूढपतितास्तथा नतेषांस्नानसंस्कारोनश्राद्धंनसपिंडनं गौतमः प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति नाशौचमितिशेषः अंगिराः चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणा उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीयते नोपतिष्ठतितत्सर्वमंतरिक्षेविनश्यति षट्त्रिंशन्मतेप्येवं ब्राह्मेपि शृंगिदंष्ट्रिनखव्यालविषवन्हिस्त्रियाजलैः व्यालोगजः सुदूरात्परिहर्तव्यः कुर्वन्क्रीडांमृतस्तुयः नागानांविप्रियंकुर्वन्हतश्चाप्यथविद्युता निगृहीतःस्वयंराज्ञाचौर्यदोषेणकुत्रचित् परदारान्हरंतश्चद्वेषात्तुपतिभिर्हताः असमानैश्चसंकीर्णैश्चंडालाद्यैश्चविग्रहात् कृत्वातैर्निहतास्तद्वच्चंडालादीन्समाश्रिताः शस्त्राग्निगरदाश्चैवपाखंडाः क्रूरबुद्धयः क्रोधात्प्रायविषवन्हिशस्त्रोद्बन्धनजलगिरिवृक्षप्रपातंचयेकुर्वंतिनराधमाः कुशिल्पजीविनोयेचसूनालंकारधारिणः मुखेभगास्तुयेकेचित्क्लीबप्रायानपुंसकाः ब्रह्मदंडहतायेचयेचापिब्राह्मणैर्हताः महापातकिनो येचपतितास्तेप्रकीर्तिताः पतितानांनदाहःस्यान्नान्त्येष्टिर्नास्थिसंचयः नचाश्रुपातःपिंडोवाकार्यंश्राद्धादिकंक्वचित् एतानिप

नितानांतु यः करोति विमोहितः तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा एतद्बुद्धिपूर्वं सर्वेषां करणे तु माधवीये वसिष्ठः यआत्मत्यागिनां
कुर्यात्स्नेहात्प्रेतक्रियां द्विजः सतप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतं अज्ञाने तु कृत्वाग्निमुदकस्नानसंस्पर्शवहनकथा रज्जुच्छेदाश्रु
पातनं च तप्तकृच्छ्रेण शुद्ध्यतीति ज्ञेयं प्रत्येकं बुद्धिपूर्वमेतदिति मदनपारिजातः प्रत्येकं तु स्पर्शाश्रुपाते मिताक्षरायां तच्छवकेवलस्पृष्ट
मश्रु वा पतितं यदि पूर्वोक्तानामकार्यं चेदेकरात्रमभोजनं एकरात्रं तु नाश्नीयात्त्रिरात्रं बुद्धिपूर्वकमिति माधवीये उत्तरार्द्धं अन्यत्तु
संवर्तः एषामन्यतमं प्रेतं यो वहेत दहेत वा कटोदकक्रियां कृत्वा कृच्छ्रं सांतपनं चरेत् अज्ञाने त्वर्द्धं एतदनाहिताग्ने आहिताग्नेः कृच्छ्र
एवेति माधवः मिताक्षरायां आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया तेषामपि तथा गंगातोये संस्थापनं हितं आहिताग्ने
स्तु विशेषो हेमाद्रौ भविष्ये वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे पात्राणि तु दहेदग्नौ साग्निके पापकर्मणि छंदोगपरिशिष्टेपि
महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि पुत्रादिः पालयेदग्नीन्युक्त आदोषसंक्षयात् प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते यदि
गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदं पात्राणि दद्याद्विप्राय दहेदप्स्वेव वा क्षिपेत् माधवीये पराशरः आहिताग्निर्मृतो विप्र
श्चण्डालेनात्मघातकः दहेत ब्राह्मणा विप्रा लौकाग्नौ मन्त्रवर्जितं प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात् दग्ध्वास्थीनि पुनर्गृ
ह्य क्षीरेण क्षालयेत्ततः स्वेनाग्निना स्वमंत्रेण पृथगेनं पुनर्दहेत् हेमाद्रौ तु दाहयित्वा शवं तेषां शूद्रैर्विधिपूर्वकमित्युक्तं एत-
हृपादिना मरणे ज्ञेयं तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति श्रुतावात्महनन एव दोषोक्तेः प्रमादमरणे त्वाशौचादि सर्वं प्र
वत्येव तदाहांगिराः अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया ब्राह्मेपि प्रमादा-

दंष्ट्रिभिः शंकुस्तकस्माद्बुधिचोदितः शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलादिभिः चंडालैरथवा चौरैर्निहतो वापि कुत्रचित् तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः इति प्रमादमरणे त्रिरात्रमाशौचमिति गौडाः शुद्धितत्त्वादयः दशाहादीति दाक्षिणात्याः अस्यापवादो हेमाद्रौ भविष्ये प्रमादादिच्छया वापि न कुर्यात्सर्पतो मृते नागपूजां विना न कुर्यादित्यर्थः बौधायनोऽपि बुद्धिपूर्वात्स्वहन्तॄणां क्रियालोपो विधीयते क्रियास्य कर्म तत्र दुर्मरणनिमित्तं दानादि कार्यं तच्च विश्वप्रकाशादौ शातातपीये च व्याघ्रेण निहते विप्रे विप्रकन्यां विवाहयेत् सर्पदष्टे नागबलिर्ज्ञेयः सर्पश्च काञ्चनः चतुर्निष्कमितं हैमं गजं दद्याद्गजे हते राज्ञा विनिहते दद्यात्पुरुषं तु हिरण्मयं चौरेण निहते धेनुं वैरिणा निहते वृषं वृषेण निहते दद्याद्यथाशक्त्या तु काञ्चनं शय्या मृते प्रदातव्या शय्या तूलीसमन्विता निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता शौचहीने मृते चैवाष्टनिष्कस्वर्णजं हरिं संस्कारहीने च मृते कुमारमुपनाययेत् निष्कत्रयस्वर्णमितं दद्यादश्वं हया हते श्वना हते क्षेत्रपालस्यापर्यान्निजशक्तितः सूकरेण हते दद्यान्माहिषं दक्षिणान्वितं कृमिभिश्च मृते दद्याद्गोधूमान्सचवारिकाः वृक्षे वृक्षहते दद्यात्सौवर्णं वस्त्रसंयुतं शृंगिणा निहते दद्याद्वृषभं वस्त्रसंयुतं शकटेन हते दद्याद्वृषं सोपस्करान्वितं भृगुपातमृते चैव प्रदद्याद्धान्यपर्वतं अग्निना निहते कार्यं सुदर्शनं स्वशक्तितः दारुणा निहते चैव कर्तव्या सदनसभा शस्त्रेण निहते दद्यान्माहिषीं दक्षिणान्वितां अश्मना निहते दद्यात्सवत्सां गां पयस्विनीं विषेण च मृते दद्यान्मेदिनीं हेमनिर्मितां उद्बन्धनेन च मृते कापि कनकनिर्मितं मृते जलेन वरुणं हैमं दद्याद्द्विनिष्कजं विषूचिकामृते स्वादु भोजयेच्च शतं द्विजान् घृतधेनुः प्रदातव्या कंठान्नकवले मृते कासरोगेण च मृते अष्टकृच्छ्रव्रतं चरेत् अतिसारमृते लक्षं गायत्र्याः प्रयतो जपेत् शाकिन्यादिग्रहग्रस्ते जपं कुर्याद्यथोदितं विद्युत्पातेन निहते विद्यादानं समाचरेत्

अंतरिक्षमृतेकार्यंवेदपारायणंतथा सच्छास्त्रपुस्तकंदद्याद्स्पृश्यस्पर्शनोमृते पतितेचमृतेकुर्यात्प्राजापत्यांस्तुषोडश मृतेचापत्य
रहितेकृच्छ्राणानवतिंचरेत् एवंकृतेविधानेतु विदध्याद्दौर्ध्वदैहिकं तथावैधमरणेपिनदोषः तदाहतुर्मनुवृद्धगार्ग्यौ वृद्धःशौचस्मृते
र्लुप्तःप्रत्याख्यातभिषक्क्रियः आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनाम्बुभिः तस्यत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः तृतीयेतूदकंद
त्वाचतुर्थेश्राद्धमाचरेदिति हेमाद्रौविष्णुधर्मेपि नरस्तुव्याधिरहितोनत्यजेदात्मनस्तनुं असूर्यानामतेलोकाअंधेनतमसावृताः
तांस्तमस्त्वाभिगच्छंतियेकेचात्महनोजनाः अरिष्टैरात्मनोज्ञात्वामृत्युकालमुपस्थितं व्याधितोभिषजात्यक्तः पूर्णवायुर्विचा
त्मनः यथायुगानुसारेणसंत्यजेदात्मनस्तनुं तस्मिन्कालेतनुत्यागाद्यथेष्टफलमाप्नुयात् आयुषस्तुपुरादृष्टमरणंब्राह्मणस्यचने
तिगौडानामपपाठः उत्तरार्धेसंगतेः क्षत्रियस्यतुसंग्रामेमृतेभर्तरियोषितः अपरार्केब्रह्मगर्भः योजीवितुनशक्नोतिमहाव्याध्युप
पीडितः सोग्न्युदकंमहायात्रांकुर्वन्नात्रनदुष्यति अत्रोक्तवक्ष्यमाणवचोनिचयात्प्रयागातिरिक्तेऽचिकित्स्यरोगाद्युपहतानाम
धिकारः सोपिजीर्णवानप्रस्थस्यैवेतिविज्ञानेश्वरदेवयाज्ञिकादयः अतएवमिताक्षरादौभृगुपातानशनादिकं वानप्रस्थस्यैवो-
क्तं मनुरपि आसांमहर्षिचर्याणांत्यक्त्वान्यतमयातनुं वीतशोकभयोविप्रोब्रह्मभूयायकल्पतइतितेनान्यत्राधितादूषयतेवामू
लैक्यादितिकेचित् तन्न वानप्रस्थमरणेआशौचनिषेधात् तेनप्रहस्त्यादिपरमेवदतेनयतेनाधिकारः काम्येनाधिकाराच्च नै
मित्तिकत्वेत्वकरणेदोषानित्यताचस्यात् प्रयागेत्वरोगिणांरोगिणांच यत्तु शूद्राश्चक्षत्रियावैश्याअंत्यजाश्चतथाधमाः एते- २०
त्यजेयुःप्राणान्वैवर्जयित्वाद्विजनृप पतित्वाब्राह्मणस्तत्रब्रह्महाचात्महाभवेदिति तन्निर्मूलमितिभट्टाः तत्त्वंतुहेमाद्रौव्रतका

डेलिखनान्निर्मूलत्वान्नित्यमेव भक्तमात्तुपतितेऽपि भृगुपातमात्रपरं युक्तं ब्राह्मणस्याप्यनुज्ञातमिति वक्ष्यमाणविरोधाच्च यत्त्वादित्यपुराणे अ
ब्राह्मणो वा स्वर्गादिमहाफलजिगीषया प्रविशेज्ज्वलनं तोयं कुर्यात्त्वनशनं तथेति तत्प्रयागातिरिक्तपरमिति केचित् हेमाद्रौ त्वेतदग्रे
प्रयागवटशाखायामित्युक्ते ब्राह्मणस्य प्रयागेऽपि नेति प्रतीयते माधवीये पूर्वोक्ते चादित्यपुराणे दुश्चिकित्स्यमहारोगैः पीडित-
स्तुउमानपि प्रविशेज्ज्वलनं दीप्तं कुर्यात्त्वनशनं तथा अगाधतोयराशिं च भृगोः पतनमेव च गच्छेन्महापथं वापि तुषारगिरिमाद-
रात् प्रयागवटशाखायां देहत्यागं करोति च स्वयं देहविनाशस्य काले प्राप्ते महामतिः उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्
क्वचित् महापापक्षयात्स्वर्गादिव्यान्भोगान्समश्नुते एतेषामधिकारस्तु सर्वेषां सर्वजन्तुषु नराणामथ नारीणां सर्ववर्णेषु स-
र्वदा ईदृशं मरणं येषां जीवितां कुत्रचिद्भवेत् आशौचं स्यात्त्र्यहं तेषां वज्रानलहते तथा वाराणस्यां म्रियेद्यस्तु प्रत्याख्यातभिषक्क्रि-
यः काष्ठपाषाणमध्यस्थो जाह्नवीजलमध्यगः अविमुक्तोन्मुखस्तस्य कर्णमूलगतो हरः प्रणवं तारकं ब्रूते नान्यथा कुत्रचित्
क्वचित् हेमाद्रौ चैवं अत्र प्राप्ते काले इत्युक्ते रमासमरणकालायाः स्त्रियाः अन्वारोहणे संपूर्णमेवाशौचं पृथ्वीचन्द्रस्त्वत्रापि
त्र्यहमाह कश्चित्त्वादिगौडग्रन्थेष्वप्येवं एतच्च वृद्धादिमरणं कलौ निषिद्धं भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथेति माध-
वेन पृथ्वीचन्द्रेण च कलिवर्ज्ये प्रोक्तेः नचात्र यावदुक्तनिषेधः विशिष्टे देशे वाक्यभेदात् न च कलौ वानप्रस्थाश्रमनिषेधाद्वसि-
ष्ठे मरणनिषेधो व्यर्थ इति वाच्यं सर्ववर्णेष्वित्यादिभिस्तद्भिन्नस्यापि प्राप्तेः काम्यप्रवृत्त्यैव ये वै तन्वं विसृजन्तीति श्रुतेः स्मृत्या
संकोचायोगात् न चेयं स्वाभाविकमृत्युपराधीरपदोक्तेः मात्स्यभारतादिषु न लोकवचनात्तात न वेदवचनादपि मतिरुत्क्रम

णीयाते प्रयागमरणं प्रतीत्युक्तेः अत एव विष्णुधर्मे रोग्यादिमरणमुक्त्वोक्तं यथायुगानुसारेण संत्यजेदात्मनस्तनुमिति काश्यामयुक्तं मात्स्ये अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः प्रविशंति मुखं ते मे निःसंदिग्धं वरानने हेमाद्रौ विवस्वान् सर्वेन्द्रियविमुक्तस्य स्वव्यापाराक्षमस्य च प्रायश्चित्तमनुज्ञातमग्निपातो महापथः धर्मार्जनासमर्थस्य कर्तुः पापाकितस्य च ब्राह्मणस्याप्यनुज्ञाततीर्थे प्राणविमोक्षणं अपरार्के चैव. सहगमनकलौ भवत्येव कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते इति ब्रह्मवचनात् एतेन मरणान्तिकप्रायश्चित्तं काशीखंडादौ चातुर्वर्ण्यस्य तनुत्यागविधयश्च युगान्तरपरा एव प्रयागेपि त्रिस्थलीसेतौ स्कांदे यथा कथंचित्तीर्थेस्मिन् प्राणत्यागं करोति यः तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपि पाद्मे विष्णुः देहत्यागं तथा धीराः कुर्वन्ति मम सन्निधौ मत्तनुं प्रविशन्त्येव न पुनर्जन्मने नराः कौर्मे व्याधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः गंगायमुनमासाद्य यस्तु प्राणान् परित्यजेत् ईप्सितान् लभते कामान् वदंति मुनिपुंगवाः तथा यां गतिं योगयुक्तस्य सत्त्वस्थस्य मनीषिणः सा गतिस्त्यजतः प्राणान् गंगायमुनसंगमे वाराहे तत्र यो मुंचति प्राणान् वटमूले सुसुंदरि स सर्वलोकानतिक्रम्य मम लोकं प्रपद्यते तथा अकामो वा सकामो वा वटमूले सुसुंदरि शीघ्रं प्राणान् प्रमुंचेत यदीच्छेत्परमां गतिं तथा पंचयोजनविस्तीर्णे प्रयागस्य तु मंडले व्यतीतान् पुरुषान् सप्त भाविनश्च चतुर्दश नरस्तारयते सर्वान् यस्तु प्राणान् परित्यजेत् ब्राह्मे ध्यात्वा विष्णुपदांभोजं प्रयागे विष्णुतत्परः तनुं त्यजति वै माघे तस्य मुक्तिर्न संशयः दुष्कृतोपि दुराचारो ब्रह्महत्यादिपातकी हरिं ध्यात्वा त्यजेद्देहं प्रायशो मुक्तिमान् भवेत् भविष्योत्तरे समाः सहस्राणि तु सप्त वै जले दशैकमग्नौ पतने च षोडश महाहवे षष्टिरशीति गो-

ग्रहेअनाशके भारतेचाक्षयागतिः इतिसामान्यतोपिफलं एवमन्येविधयोज्ञेयाः यत्तुगौडाः प्रयागादिमरणंब्राह्मणभिन्नविषयमित्याहुस्तद्वर्षापितामहचरणैः प्रयागविधौहृतमितिनात्रोच्यते अत्रदशाहमाशौचं त्रिरात्रस्यप्राप्तकालगोचरत्वादिति भट्टाः युक्तंतुत्रिरात्रं दिवोदासीयेप्येवं शुद्धितत्त्वेपिकाश्यपः अनशनमृतानामशनिहतानामग्निजलप्रविष्टानां भृगुसंग्रामदेशान्तरमृतानांजातदंतानांचत्रिरात्रमिति एवंमरणांतप्रायश्चित्तेपि पूर्वोक्तश्चात्सहादेर्दशाहाशौचादिनिषेधस्तदानीमेव वत्सरांतेतुसर्वमौर्ध्वदेहिकंकुर्यात् गोब्राह्मणहतानांचपतितानांतथैवच ऊर्ध्वंसंवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकमिति हेमाद्रौषट्त्रिंशन्मतात् एवंम्लेच्छहतानामपिगयाश्राद्धमपिकार्यं ब्रह्महाचकृतघ्नश्चगोघातीपंचपातकी सर्वेतेनिष्कृतियांति गयायांपिंडपातनादित्यग्निपुराणात् एवंब्राह्मेपि क्रियतेपतितानांतुगतेसंवत्सरे क्वचित् देशधर्मप्रमाणत्वाद्गयाकूपेस्वबंधुभिः मार्तंडपादमूलेवाश्राद्धंहरिहरौस्मरन् सूर्यपदइत्यर्थः तत्रवर्षमध्येकृत्यमुक्तमपरार्केवायुपुराणे शुक्लपक्षेतुद्वादश्यांकुर्यात्श्राद्धंतु वत्सरं द्वादशाहानिवाकुर्याच्छुक्लंत्रयमयमहनि छागलेयः नारायणबलिःकार्योलोकगर्हाभयान्नरैः तथातेषांभवेच्छौचंनान्यथेत्यब्रवीद्यमः व्यासः नारायणंसमुद्दिश्यशिवंवायत्प्रदीयते तस्यशुद्धिकरंकर्मतद्भवेन्नैतदन्यथेति सद्यात्स्वघातादिप्रायश्चित्तंकृत्वाकार्यः तदुक्तंहेमाद्रौषट्त्रिंशन्मते कृत्वाचांद्रायणंपूर्वंक्रियाकार्यायथाविधि नारायणबलिःकार्योलोकगर्हाभयान्नरैः पिंडोदकक्रियाःपश्चाद्वृषोत्सर्गादिकंचयत् एकोद्दिष्टानिकुर्वीतसपिंडीकरणंतथा दिवोदासीयेहन्दुशातातपस्तु पतितेचमृतेशुद्ध्यैप्राजापत्यास्तुषोडश मृतेचापत्यरहितेकृच्छ्राणांनवतिंचरेदित्याह इदंप्रायश्चित्तार्हपित्रादिविषयं इदं

यैरपरित्यक्ता येनमूढाविषादिनः घातयंतिस्वमात्मानंचांडालादिहताश्चये तेषांपुत्राश्चपौत्राश्चदयया सम्भिप्लुताः यथाश्राद्धंमतल्लंलिविष्णुनासम्प्रतिष्ठितं तथातेसंप्रवक्ष्यामिनमस्कृत्यस्वयंभुव इति हेमाद्रौतेनैवोक्तेः तेनैवबौधायनोपि नारायणबलिंव्याख्यास्यामोभिशस्तपतितस्करापात्मत्यागिनांब्राह्मणहतानांच द्वादशवर्षाणित्रीणिवाकुर्वीतेति गृह्यपरिशिष्टेतु चंडालादिहता हुत्वा दग्ध्वाशरीरमेतस्यसंस्थाप्यास्थीनियत्नतः प्रायश्चित्तंतुकर्तव्यंपुत्रैश्चान्द्रायणत्रयमित्युक्तं मदनरत्ने ब्राह्मे प्रमादादौपनिःशंकस्त्वकस्मादिधिनोदितः चांडालैर्ब्राह्मणोम्लेच्छैश्चौरैर्निहतोपन्नकश्चिन् तस्यदाहादिकंकार्यं यस्मान्नपतितस्तुसः चान्द्रायणंतप्तकृच्छ्रं द्वयंतस्याविशुद्धये यद्वाकृच्छ्राब्दपंचदशाकृत्वातुविधिनादहेत् बुद्धिपूर्वंमृतानांतुत्रिंशत्कृच्छ्रंसमाचरेदित्युक्तं स्मृतिरत्नावल्यांतु द्विगुणप्रायश्चित्तंकृत्वार्वागप्यब्दात्सर्वंकार्यमित्युक्तं आत्मनोघातकस्यार्थं चरेच्चान्द्रायणद्वयं तप्तकृच्छ्रन्तुकुर्यात्त्रिंशत्कृच्छ्राणिवापुनः अर्वाक्संवत्सरात्कुर्याद्दहनादिर्यथोदितं कृत्वानारायणबलिमभिशस्तात्तदायुष इति इदमात्मवधनिमित्तंतज्जातिवधप्रायश्चित्तेनसमुच्चितंकार्यं अतएवबौधायनेनोक्तं द्वादशवर्षाणित्रीणिवेति मदनपारिजातस्मृत्यर्थसारेच ब्रह्महादीनांतद्योग्यप्रायश्चित्तंकृत्वानारायणबलिःकार्यइत्युक्तं एवंम्लेच्छीकृतानामपि यत्तुकश्चिदाह पुत्रकृतेनप्रायश्चित्तेनपितुः पापनाशेमानाभावः आत्मघातेतुवचनादस्तु महापातकेतुकथंस्यादिति सःस्वयमेवात्मवधप्रायश्चित्तस्वजातिवधनिमित्तेनसमुच्चयंवदन् हृदयशून्यएव नहिजातिवधनिमित्तं पुत्रैःकार्यमितिवचनमस्ति पुत्रकर्तृकसर्वप्रायश्चित्तादिविप्लवापत्तेः प्रागुक्तबौधायनवचनाच्चेतिदिक् इदंप्रायश्चित्तार्हाणामेवप्रायश्चित्तानर्हाणांतु पतितोदकमात्रंकार्यमितिकेचित्

मदनपारिजातादिस्वरसोप्येवं वस्तुतस्तु तदर्हानर्हयोर्वचनेनुपादानादविशेषात्तत्रापिनारायणबलिः गयाश्राद्धंचेतियुक्तं पतितोदकविधिस्तु पित्राद्यतिरिक्तविषयइत्यपरे तथाहेमाद्रौब्राह्मे पतितस्यतुकारुण्याद्यस्तृप्तिंकर्तुमिच्छति सहिदासींसमाहूयसर्वगां दत्तवेतनां अशूद्रघटहस्तांतां यथावत्तब्रवीत्यपि हेदासिगच्छमूल्येनतिलानानयसत्वर तोयपूर्णंघटंचेमंसतिलंदक्षिणामुखी उपविश्यतुवामेनचरणेनततःक्षिप कीर्तयेःपातकीसंज्ञांत्वंपिबेतिमुहुर्वदेः निशम्यतस्यवाक्यंसालब्धमूल्याकरोतितत् एवंकृते भवेत्तृप्तिःपतितानांचनान्यथेति इदंचमृताहेकार्यं पतितस्यदासीमृतान्हियदाघटमपवर्जयेत्तावतायमुपचरितोभवतीतिमदनरत्नेविष्णूक्तेः इदंचात्मत्यागिविषयं आत्मत्यागिनःपतितास्तेनाशौचोदकभाजःस्युरित्युपक्रम्यविष्णुनाएतस्याभिधानादिति गौडाः यत्तुकश्चिदाह यःपतितोघटस्फोटेनबाधवैर्बहिष्कृतस्तद्विषयाणिक्रियानिषेधवाक्यानि जीवत्येवतस्मिन्नस्यकर्मणःकृतत्वात्तस्यपुनःकरणाभावादिति सबंधुत्यागेनजातवैराग्यस्यकृतप्रायश्चित्तस्याप्यकरणापत्ते मिताक्षरादिविरोधमपश्यन्मूर्खइत्युपेक्षणीयः नचकृतघटस्फोटस्यसंग्रहविधिर्नेतिवाच्यं मनुनाकृतघटस्फोटस्यत्यागमुक्त्वा प्रायश्चित्तेतुचरितेपूर्णंकुंभमपानवं तेनैवसार्धंप्रास्येयुः स्नात्वापुण्येजलाशयइत्युक्तेः अन्यथाप्रायश्चित्तमात्रेणैतत्प्रसंगात् अतोघटस्फोटेनबहिष्कृतस्यापिपित्रादेःकृतेनारायणबलिः निषेधास्तुपितृत्यादिपराइतितत्त्वं केचित्तुनारायणबलौकृतेप्यन्त्यकर्मसपिंडनवर्जंकार्यम् गोब्राह्मणहतानांचपतितानांतथैवच [illegible] नैवकार्यासपिंडतेतिवचनात् ब्राह्मणादिहतेताते पतितेसंगवर्जितेइतिश्राद्धप्रकाशोक्तेश्चेत्याहुः तेहेमाद्रिस्तु पूर्वोक्तपद्मशान्मतविरोधान्निर्मूलत्वाच्छ्राद्धप्रकारस्यवृद्धिश्राद्धविषयत्वादुपेक्ष्याः नारायणब

लिस्तु हेमाद्र्याद्यनुसारेणोच्यते तत्रादौ क्रियानिबंधे गारुडे तर्पणमुक्तं कार्यं पुरुषसूक्तेन मंत्रैर्वा वैष्णवैरपि दक्षिणाभिमुखो मृत्वा प्रेतं
विष्णुमितिस्मरन् अनादिनिधनो देवः शंखचक्रगदाधरः अक्षय्यः पुंडरीकाक्षः प्रेतमोक्षप्रदो भवेदिति शुक्लैकादश्यादेशकालौ
संकीर्त्यामुकगोत्रस्यामुकस्य दुर्मरणात्मघातजदोषनाशार्थं और्ध्वदैहिकसंप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्य इति सं
कल्प्य ब्राह्मणविष्णुशिवयमप्रेतांश्च पंचकुंभेषु विष्णुः स्वर्णमयः कार्यो रुद्रस्ताम्रमयस्तथा ब्रह्मा रौप्यमयस्तत्र यमो लोहमयो भ
वेत् प्रेतो दर्भमयः कार्य इति देवप्रकल्पनेति गारुडोक्ताः सर्वास्तु हेमीषु वा प्रतिमास्तु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्निं प्रतिष्ठा-
प्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेदमिति हुत्वा देवानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयु-
तान् दश पिंडान् यज्ञोपवीत्येवामुकगोत्रामुकशर्मन् प्रेत विष्णुरूपायते पिंड उपतिष्ठतामिति दत्त्वा पुरुषसूक्तेनाभिमंत्र्य तेनैव शंखो
दकेनाभिषिच्याभ्यर्च्यामुकशर्माणममुकगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एकमामन्त्र्य ब्रह्मादिपंचभ्यो
दद्यात् मन्त्रस्तु ब्रह्माविष्णुमहादेवा यमश्चैव सकिंकरः बलिं गृहीत्वा कुर्वंतु प्रेतस्यास्य शुभां गतिमिति मिताक्षरायां तु होमबल्यादि नोक्तं
ततः प्रतिदैवतं त्रिविधं फलशर्करामधुगुडघृतानि च निवेद्य पिंडानभ्यर्च्य नद्यां क्षिप्त्वा रात्रौ नव सप्त पंच वा विप्रान् संभोज्योपोषितो जागरं
कृत्वा श्वोभूते पुनर्विष्णुयमौ संपूज्यैकोद्दिष्टविधिना श्राद्धपंचकं करिष्य इत्युक्त्वा विष्णुयमप्रेतान् स्मरन् विप्रानुपवेश्य प्रेतस्थाने चैकं वि-
ष्णुं स्मरन् पाद्याद्यावाहनार्घ्ययुतं तृप्तिप्रश्नांतं कृत्वोल्लेखनादि कृत्वान्नशेषेण विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय चतुरः पिंडान् द
त्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना पंचमं दत्त्वाभ्यर्च्याचांतेभ्यो दक्षिणां दत्त्वैकं प्रेतं स्मृत्वा विशेषतः संतोष्य विप्रैः प्रेताय दत्तिलोदक

सुपतिष्ठतामितिसति लक्षुदकं दापयित्वा भुंजीतेति ॥ छ ॥ अत्रविशेषांतरं भट्टकृतांत्येष्टिपद्धतौ ज्ञेयं सर्पहते तु वर्ष
पर्यंतं पूर्वेद्युरेकभक्तं पूर्वं शक्त्या पञ्चम्यामुपवासं नक्तं वा कृत्वा पिष्टमयं नागमनंतं वासुकिं शंखं पद्मं कंबलं कर्कोटकाश्वतरधृतराष्ट्रशंखपा
लकालियतक्षककपिलेतिनामभिः प्रतिमासं संपूज्य पायसेन विप्रान् संभोज्य वत्सरांते हैमं नागं गां च दत्वा नारायणबलिं कुर्यात् मूलं तु
हेमाद्रौ ज्ञेयं बौधायनसूत्रे सर्पमृतानां नमोऽस्तु सर्पेभ्य इति तिस्र आहुतीर्हुत्वोदके मृतानां समुद्राय वयुनाय हुत्वेति क्रियां कुर्यादिति शेषः
व्यासः सौवर्णभारनिष्पन्नं नागं कृत्वा तथैव गां व्यासाय दत्वा विधिवत्पितुरानृण्यमाप्तवान् हेमाद्रौ भविष्ये पंचम्यां पन्नगं हैमं स्व
र्णेनैकेन कारयेत् क्षीराज्यपात्रमध्यस्थं पूज्य विप्राय दापयेत् प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शंकरेनेति अपरार्के स्मृत्यंतरेपि न
देवशुश्रूयति प्रेतो नारायणबलौ कृते यो ददाति क्रियापिंडं तस्मै प्रेताय वै स्मृतः तस्यैवाशौचमुद्दिष्टं त्र्यहमेव न संशयः विष्णुस्त्वाह स
मासौ तु त्रयोदश्यां दिनत्रयं आशौचं पिंडदः कुर्यान्न तु तद्बंधुगोत्रजाः यस्य वै मृत्युकाले तु व्युच्छिन्ना संततिर्भवेत् सर्वसेन्नरके
नित्यं पंकमग्नः परीयथेत्युपक्रम्य बलिनारायणं कुर्यात्तस्योद्देशेन भक्तिमानिति गारुडोक्तेः पुत्रस्यापि पत्न्याद्यैः कार्य इत्युक्तं
देवयाज्ञिकेन अथ विधानादाशौचाभावः यथा यतिशूद्रमृतादिषु त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रियाः यतेः किं
चिन्न कर्तव्यं न चान्येषां करोति स इति ब्राह्मात् उशनाः एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा अहन्येकादशे प्राप्ते पार्वणं तु विधीय
ते सपिंडीकरणं तेषां न कर्तव्यं स्मृतादिभिः त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते तत्संस्कारं वक्ष्यामः दत्तात्रेयः एकोद्दिष्टं जलं पिं
डमाशौचं प्रेतसत्क्रिया न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे वार्षिकादिति पूर्वं प्राप्तिमासिकादिनिषेधो न तु दर्शादेः सन्या

सिनोप्याब्दिकादिपुत्रः कुर्याद्यथाविधीति वायवीयोक्तेः स्मृतिचंद्रोदये प्रजापतिः अहन्येकादशेप्राप्ते पार्वणंतुविधीयते सपिंडीकरणंतस्य नकर्तव्यं सुतादिभिः एषु सपिंडनादिनिषेधानुवादेनपार्वणोक्तेः ततस्त्यान्नापन्नस्य पार्वणस्यगम्यते नगिरागिरेतिब्रूयादैरंकृत्वोद्गेयमितिवत् इदंवार्षिकादिविधानंचत्रिदंडिनामेव एकदंडिपरमहंसादीनांतुनकिमपिकार्यं पूर्वोक्तोशनोवाक्ये त्रिदंडिग्रहणादिति शूलपाण्यादयोगौडाः त्रिदंडिशब्देनमनोदंडादिदंडत्रयोक्तेः यस्यैतेनियतादंडाः सत्रिदंडीति चोच्यत इतिस्मृतेः बोधायनः नारायणबलिश्चास्यकर्तव्योद्वादशेहनि अस्यपार्वणेनसमुच्चयोज्ञेयः तंचसएवाह कृत्वाविष्णोर्महापूजांपायसंविनिवेदयेत् अग्नौकृत्वातुतच्छेषंव्याहृतीभिःसमाहितः यतीन्गृहस्थान्साधून्वानिमंत्र्यद्वादशावरान् अभ्यर्च्यगंधपुष्पाद्यैर्मंत्रैर्द्वादशनामभिः संभोज्यहव्येनान्येनदक्षिणांचनिवेदयेत् त्रयोदशंद्विजश्रेष्ठमात्मज्ञंसंयतेन्द्रियं विष्णुंयथातथाभ्यर्च्यपाद्यार्घ्यैश्चविधानतः दद्यात्पुरुषसूक्तेनगंधपुष्पादिकंक्रमात् वस्त्रालंकरणादीनियथाशक्तिप्रदापयेत् उच्छिष्टसन्निधौतस्यदर्भानास्तीर्यभूतले भूर्भुवःस्वः स्वधायुक्तांस्तस्मैदद्याद्बलित्रयं अश्वमेधसहस्रस्यवाजपेयशतस्यच तत्फलंलभतेदेव यःकरोतियतिक्रियां शौनकस्तु शौनकोहंप्रवक्ष्यामिनारायणबलिंपरं चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्चपशुभ्यश्चरज्जुशस्त्रविषाग्निभिः देशांतरमृतानांचमृतानांवान्यसाधनैः जीवच्छ्राद्धमृतानांचकृतनिष्ठानांतथैवच यतीनांयोगिनांपुंसांमत्येषांमोक्षकांक्षिणां पुण्यायायाक्षयायाथ यद्वादशेहनिकारयेत् द्वादश्यांश्रवणाद्वांते पंचम्यांपर्वणोस्तुवस्त्वकृत्वा पूर्वोक्तंसर्वविधिंसुस्नातोदेवेतिषड्भिःपुरुषसूक्तेनमंत्रैश्चपायसंहुत्वाकेशवादिद्वादशनामभिस्तद्रूपिणोविप्रान्द्वादशश्रेष्ठान्

संभोज्यतैरेव द्वादशपिंडान्दद्यादित्यधिकमाह. युद्धमृते तु प्रागुक्तं कृतजीवच्छ्राद्धमृते सपिंडैराशौचादिकार्यं नवा तदुक्तं हेमाद्रौ लैंगे मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयं कालं गतो द्विजः भूमौ खनेद्वापि दहेत्तथा पुत्रः कृत्स्नमशेषंच कृतादोषान्न विद्यते जीवत्यपि विशेषस्तत्रैवोक्तः नित्यं नैमित्तिकं यत्तु कुर्याद्वा सत्यजेत्तथा बांधवेपि मृते तस्य नैवाशौचं विधीयते सूतकं च न संदेहः स्नानमात्रेण शुद्ध्यति एतद्योगिविषयम् योगमार्गरतोपि चेति तस्याप्युक्तेः तथाहिताग्नौ प्रोषितमृते तदस्थिदाहात्पूर्वं पित्रादीनामाशौचसंध्यादिकर्मलोपश्च नास्ति अनग्निमत उत्क्रांते राशौचाद्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थे मृते सतीति स्मृतेः आहिताग्नेर्दाहात्प्रागपि दशाहः संस्कारांगं वाभिन्नो दशाह इति धूर्तस्वामीरामांडारश्च तच्चिंत्यं मूलैक्याद्वचोविरोधाच्च एतत्प्रागुक्तं अत्र देहस्यैव संभवे दाहः आहिताग्नेर्विदेशस्थे मृते सति कलेवरं निधेयनाग्निभिर्यावत्तदीयैरपि दह्यतइति ब्राह्मोक्तेः तदभावे छंदोगपरिशिष्टे विदेशमरणेस्थीनि आहृत्याभ्यज्य सर्पिषा दाहयेद्वर्हिषाच्छाद्य पात्रन्यासादि पूर्ववत् अस्थ्नामलाभे पर्णानि शकलान्युक्तयावृता दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकं हेमाद्रौ षड्विंशन्मते कुर्याद्दर्भमयं प्रेतं दर्भैस्त्रिंशतिषष्टिभिः पलाशिभिः समिद्भिर्वासंख्याचैव प्रकीर्तिता भविष्ये चत्वारिंशच्छिरस्याने ग्रीवायां च दशैव तु बाह्वोश्चैव शतं दद्याद्विंशतिं च तथोरसि — उदरे विंशतिं दद्यात्त्रिंशतं कटिदेशयोः ऊर्वोश्चैव शतं दद्यात्त्रिंशतं जानुजंघयोः पादांगुलीषु दश वै — एषा च प्रेतकल्पना मदनरत्ने यज्ञपार्श्वः शिरस्यशीत्यर्धं दद्याद्ग्रीवायां तु दशैव तु. बाह्वोश्चैकशतं दद्याद्दशनैवांगुलीषु च उरसि त्रिंशतं दद्याद्विंशतिं जठरोदरे द्वादशार्धं वृषणयोरिष्टार्धं शिश्न एव तु ऊर्वोश्चैकशतं दद्यात्त्रिंशतं जंघयोर्द्वयोः पादांगुलीषु दद्याद्देनत

शेनस्यकल्पनम् मस्तकेनारिकेरंतु अलाबुंतालुकेतथा पंचरत्नंमुखेन्यस्यजिह्वायांकदलीफलं चक्षुषोस्तुकपर्दौद्वौनासिकायांतुकालकं कर्णयोर्ब्रह्मपत्राणि केशावटप्ररोहकाः नालकंकमलानांतुअंत्रस्थानेविनिक्षिपेत् मृत्तिकातुवसाधातुर्हरितालकंगंधको मूत्रेतुपारदंदद्यात्पुरीषेपित्तलंतथा संधीषुतिलपिष्टंतुमांसंस्याद्यवपिष्टकं मधुस्याल्लोहितस्थानेत्वचास्थानेमृगत्वचा स्तनयोर्जीजकेदद्यान्नासायांशतपत्रकं कमलंनाभिदेशेस्याद्वृंताकंवृषणाश्रिते लिंगेचरक्तमूलंतु परिधानंदुकूलकं गोमूत्रंगोमयंगंधसर्वौषध्यादिसर्वतइति इदंनिरग्नेरपितत्रैव वृद्धमनुः प्रोषितस्यतथाकालोगतश्चेद्द्वादशाब्दिकः प्राप्तेत्रयोदशेवर्षेप्रेतकार्याणिकारयेत् बृहस्पतिः यस्यनश्रूयतेवार्तायावद्द्वादशवत्सरात् कुशपुत्रकदाहेनतस्यस्यादवधारणा भविष्ये पितरिप्रोषितेयस्यनवार्तानैवचागमः ऊर्ध्वंपंचदशाद्वर्षात्कृत्वातत्प्रतिरूपकं कुर्यात्तस्यतुसंस्कारंयथोक्तविधिनाततः तदादीन्येवसर्वाणि प्रेतकर्माणिकारयेत् द्वादशाब्दप्रतीक्षापितृभिन्नविषयेतिमदनरत्नेउक्तं गृह्यकारिकायांतु तस्यपूर्ववयस्कस्यविंशत्यब्दोर्ध्वतःक्रिया ऊर्ध्वंपंचदशाब्दात्तुमध्यमेवयसिस्मृता द्वादशाद्वत्सरादूर्ध्वमुत्तरेवयसिस्मृता चांद्रायणत्रयंकृत्वात्रिंशत्कृच्छ्राणिवास्कृतेः कुशैःप्रतिकृतिंदग्ध्वाकार्याशौचादिकाःक्रिया इत्युक्तंपराशरः देशांतरगतोनष्टस्तिथिर्नज्ञायतेयदि कृष्णाष्टमीत्वमावास्याकृष्णाचैकादशीचया उदकंपिंडदानंचतत्रश्राद्धंचकारयेत् इदंमासज्ञाने तत्राहिताग्नेःपूर्णाशौचं अनाहिताग्नेस्तु त्रिरात्रं अनाहिताग्नेर्देहस्तुदाह्योगृह्याग्निनास्वयं तदभावेपलाशानांवृंतैःकार्यःपुमानपि वेष्टितव्यस्तथायत्नात्कृष्णसारस्यचर्मणा ऊर्णासूत्रेणबध्यातुमलेसव्योयवैस्तथा स्फापिष्टैर्जलसंमिश्रैर्दग्धव्यश्चतथाग्निना असौस्वर्गायलोकायस्वाहे-

स्कन्धाःसबांधवैः एवंपर्णशरंदग्ध्वात्रिरात्रमशुचिर्भवेदिति ब्राह्मोक्तेः इदंत्रिरात्रंदशाहमध्ये दाहे तत्रप्रोषिते कालशेषःस्यादित्युक्तेः किंतुतदूर्ध्वं तत्रपत्नीपुत्रयोः पूर्वमगृहीताशौचयोर्दशाहाद्येव गृहीताशौचयोस्तुत्रिरात्रं पत्नीमृतौ भर्तुश्चैवं सपत्न्याश्चैवमिति स्मृत्यर्थसारे अन्यसापिंडानांतुसर्वत्रपर्णशरदाहेत्रिरात्रं तद्दाहाङ्गिराः देशांतरमृतस्येहनाशौचंचेत्कथंचन गृहीतमितिशेषः कालात्ययेऽपिकुर्वीत दाहकालेदिनत्रयमिति स्मृत्यर्थसारेतु गृहीताशौचानांस्नानमात्रमुक्तं बह्वृचपरिशिष्टेऽपि अथातीतसंस्कारः सचेद्दशाहस्यान्तर्वृत्तःसर्वं समापयेदूर्ध्वमाहिताग्नेर्दाहात्सर्वमाशौचंकुर्यादन्येषु पत्नीपुत्रयोः पूर्वमगृहीताशौचयोःसर्वमाशौचं गृहीताशौचयोःकर्माङ्गंत्रिरात्रमिति षडशीतावप्येवं विश्वादर्शेतुप्रतिकृतिदहने तच्छुद्धिःस्यात्त्रिरात्रमित्युक्तेः द्वादशवर्षादिप्रतीक्षान्तरदाहेतुपुत्रादीनांसर्वेषांत्रिरात्रमिति कल्पतरुदिवोदासादयः अथप्रेतसंस्कारकालः हेमाद्रौ गार्ग्यः प्रत्यक्षशवसंस्कारे दिनंनैवविशोधयेत् आशौचमध्येसंस्कारे दिनशोध्यंतुसंभवे आशौचविनिवृत्तौचेत्पुनःसंस्क्रियतेमृतः संशोध्यैवदिनंग्राह्यमूर्ध्वंसंवत्सराद्यदि प्रेतकार्याणिकुर्वीतश्रेष्ठंतत्रोत्तरायणं कृष्णपक्षश्चतथापिवर्जयेत्तुदिनत्रयं वाराहे चतुर्थाष्टमगेचन्द्रे द्वादशेचविवर्जयेत् प्रेतकृत्यंव्यतीपाते वैधृतौपरिघेतथा करणेविष्टिसंज्ञेच शनैश्चरदिनेतथा त्रयोदश्यांविशेषेणजन्मतारात्रयेतथा जन्मदशमैकोनविंशानिजन्मताराः भारते नक्षत्रेतुनकुर्वीत यस्मिन्जातोभवेन्नरः नप्रोष्ठपदयोःकार्यं तथाग्नेयेचभारत दारुणेषुचसर्वेषुमत्सरेचविवर्जयेत् काश्यपः भरण्यार्द्रामघाश्लेषामूलाद्यचरणानिच प्रेतकृत्येऽतिदुष्टानि धनिष्ठाद्यंचपंचकं फाल्गुनीद्वितयंरोहिण्यनूराधापुनर्वसू आषाढद्वेविशाखाचभानिद्विचरणानिच

ज्योतिर्नारदः चतुर्दशीतिथिं नंदां भद्रां शुक्रारवासरौ सितेज्ययोरस्तमयं ह्यग्निभं विषमांघ्रिभं शुक्लपक्षं च संत्यज्य पुनर्दहनमुत्तमं वसूत्तरार्धतः पंचनक्षत्रेषु त्रिजन्मसु पौष्णाब्रह्मर्क्षयोश्चैव दहनात्कुलनाशनं अस्यापवादमाह तत्रैव बैजवापः प्रेतस्य साक्षाद्दग्धस्य मासेत्वेकादशेहनि नक्षत्रतिथिवारादि शोधनीयं न किंचन युगमन्वादिसंक्रांतिदर्शे प्रेतक्रिया यदि दैवादापतिता तत्र नक्षत्रादि न शोधयेत् विश्वप्रकाशेपि गुरुभार्गवयोर्मौढ्ये पौषमासे मलिम्लुचे नातीतः पितृमेधः स्याद्दृष्ट्या गोदावरीं विना दानमपि तत्रैवोक्तं भद्रायां भूमिदानं स्यात्त्रिपादर्क्षे हिरण्यदः वारेषु तत्तद्वर्णं तु वासोदानं विधीयते धनिष्ठापंचकमृते पंचरत्नानि दापयेत् एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकं नवषट्त्रिपलं वापि दद्यादित्थं यथाशक्तितः इत्यलं प्रसंगेन हेमाद्रौ वृद्धमनुः अमृतमृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकं प्रायश्चित्तमसौ स्मार्तं कृत्वाग्नीनादधीत च जीवन्यदि समागच्छेद्घृतकुंभे निमज्ज्य तमुद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत् द्वादशाहं व्रतं च स्यात्त्रिरात्रमथवास्य तु स्नात्वोद्वहेत्तां भार्यामन्यां वा तदभावतः अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत् अथैंद्राग्नेन पशुना गिरिं गत्वा च तत्र तु इष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः अनाहिताग्नेस्तु चरुः मृतवार्ताश्रवणेत्वाश्वलायनः स एष य एव यस्मिन् जीवे मृतशब्द इति यस्य तु जीवत एव मृतिवार्ताश्रुत्वास्त्रिया सहगमनं कृतं तदा तद्वैधमेव भर्तुर्मरणज्ञानस्यैव निमित्तत्वात् प्रमात्वस्य गौरवेणायुक्तत्वाच्चेति केचित् तन्न मरणज्ञानस्य निमित्तत्वे तीतानागतयोरपि तत्वापत्तेः भर्तुर्वैधदाहाभावेन तस्याः सहगमनाभावाच्च तस्मादाशौचवज्ज्ञातमरणस्यैव निमित्तत्वं न चात्र तदस्ति परं काम्यमरणमस्तु अत आत्महननदोषोस्तीति तातपादाः तथा सपसंस्कारे कृते त्रिरा

चमाशौचं तद्विधिंचाह शौनकः अथवक्ष्यामिसर्पस्य संस्कारविधिमुत्तमं सिनीवाल्यां पौर्णमास्यां पंचम्यां वापि कारयेत् हतसर्पव
धो विप्रः पूर्वजन्मनि वा यदि वधं स्मृत्वा पयेत्पापी चरेत्कृच्छ्रांश्चतुर्दश विधाय लोहदण्डं च तन्मूल्यं वापि दापयेत् मूल्यमाह निष्कत्र
यं द्विनिष्कं वा निष्कमेकं कनीयसं अनुमूल्यादिकं नूणां निष्कमर्धं तदर्धकं इदं स्वर्णरूप्ययोः शक्त्याङ्गं यं संस्कारमाह मिश्रयु
व्रीहिगोधूमतिलपिष्टेन वा पुनः कृत्वा सर्पाकृतिं शूर्पे निधाय प्रार्थयेदह एहि पूर्वमृतः सर्प अस्मिन्पिष्टे समाविश संस्कारार्थं मह
मत्त्वाज्ञया थ्यामिसमासतः वस्त्रोपवीतगन्धाद्यैः संपूज्यचहरेद्वहिः कुर्यात्संस्कारसंकल्पं प्राणायामपुरःसरं यज्ञोपवीतिनाका
यं सर्पसंस्कारकर्मतु लौकिकाग्निंप्रतिष्ठाप्य समिदाधानमाचरेत् ततोग्नेरग्निदिग्भागे भूमिंसंप्रोक्ष्य वारिभिः चितिं कृत्वाथ्य सं-
स्तीर्य कुशैराग्रैयकाग्रकैः प्रोक्ष्याग्निं परिस्तीर्य परिषिच्य समर्चयेत् कृत्वेध्माधानमाघारौ चक्षुषी च यथाविधि सर्पं गृहीत्वाथ
तेन चितिमारोपयेत्सुधीः स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः सर्पास्ये जुहुयादाज्यं व्याहृत्याच समग्रया आज्यशे
षं स्रुवेणैव सर्पदेहे निषेचयेत् चमसस्थैर्जलैः सर्पं व्याहृत्या प्रोक्ष्य पाणिना अग्ने रक्षाण इत्यनेनास्य सर्पायाग्निं प्रदापयेत् उ
पतिष्ठेद्दह्यमानं नमोस्तु सर्पमन्त्रतः ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया पूर्वजन्मनि वा सर्प तत्त्वं क्षन्तुमर्हसि क्षीराज्येनतत
स्त्वाग्निं प्रोक्ष्य व्याहृतिभिर्जलैः नास्ति संचयनं कुर्यात् स्नात्वाचम्य गृहं व्रजेत् ब्रह्मचर्यादिकं कार्यं त्रिरात्राशौचमिष्यते सचैलं
तु चतुर्थेह्नि स्नात्वा विप्रान्समर्चयेत् सर्पान्नतस्तथा शेषः कपिलो नाग एव च कालिकः शंखपालश्च भूधरश्चेति नामभिः गन्ध
पुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान् घृतपायससमस्त्यैर्द्विजानष्टौ तु भोजयेत् एवं कृते विधानेन सर्पसंस्कारकर्मणि सर्पहिं

साक्षात् पापान्मुच्यते नात्र संशय इति   इति सर्पसंस्कारः   कश्चित्तु जीवतोप्यन्त्यकर्माशौचं च कार्यं यथा   प्रायश्चित्तानिच्छोः पतितस्य घटस्फोटे   पतितस्योदककार्यं सपिंडैर्बांधवैः सह   निंदितेहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ   दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्तदा   अहोरात्रमुपासीरन्नाशौचं बांधवैः सहेति मनूक्तेः   निंदिते रिक्तादौ   अपरार्के वसिष्ठोपि   वेदविप्लावकशूद्रयाजकोत्तमवर्णवर्गपतितास्तेषां पात्रनिनयनमपात्रसंस्कारादूर्ध्वं तत्पात्रमादाय दासोसवर्णपुत्रो वा बंधुरसदृशो वा गुणहीनः सव्येन पादेन प्रहृत्यायान्दर्भान् लोहितान् वोपस्तीर्यापः पूर्णपात्रमस्मै निनयेन्निनेतारश्चास्य प्रकीर्णकेशा ज्ञातयोन्वालभेरन्नपसव्यं कृत्वा गृहेषु स्वैरमापद्येरन्नत ऊर्ध्वं तेन न धर्मयेयुस्तज्जीर्णास्तं धर्मयत इति   उत्तमवर्णा ब्राह्मणादयः   तेषां वर्गः समूहस्तस्मात् पतिता ब्रह्महादयः   अपात्रसंस्कारः कुत्सितपात्रसमूहः प्रवृत्ताग्राः छिन्नाग्राः स्वैरं यथेच्छं धर्मादिकार्यं कुर्युः अस्माद्वचनसामर्थ्यात् पात्रनिनयनात् प्राक् पतितज्ञातीनां धर्मकार्येष्वधिकारो नास्तीत्यपरार्कः   तस्य विद्यागुरून्योनिसंबंधांश्च सन्निपात्य सर्वाण्युदकानि प्रेतकार्याणि कुर्युः   पात्रं चास्य विपर्यस्येयुर्दासः कर्मकरो वावकरादमेध्यं पात्रमानीय दासीघटात्पूरयित्वा दक्षिणामुखः पदा विपर्यस्येदमुमनुदकं करोमीति नामग्राहं सर्वेन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा अप उपस्पृश्य ग्रामं प्रविशेयुरिति गौतमोक्तेश्च उदकादीत्युक्तेर्दोषनिवृत्तिः   प्रेतकार्याण्येकादशाहश्राद्धांतानि दास्याहृतो घटो दासीघटः   तेनोदकेनामेध्यपात्रं पूरयित्वा दासादिस्त्रीं वा प्रपादेन कुर्यादिति हरदत्तः   अत्र नामग्राहवचनमुदकादिप्रेतकार्येतद्वर्जनार्थं तेन न तूष्णीं भवति   एतच्च प्रायश्चित्तानिच्छोः तस्य गुरोर्बांधवानां राज्ञश्च समक्षं दोषानभिख्याप्य तमनुभाष्य पुनः पुनराचारं लभस्वेति स यद्येवमप्यनवस्थितमतिः स्यात्ततो

स्यपात्रंविपर्यस्येदितिशंखोक्तेः जीवंतमेवोद्दिश्यपिंडोदकश्राद्धानि नाम्नादद्यादित्यपरार्के॰ कृतप्रायश्चित्तस्य घटस्फोटे कृतेपि संग्रहविधिमाह गौतमः यस्तुप्रायश्चित्तेन शुद्ध्येत्तस्मिन् शुद्धे शातकुंभमयं पात्रं पुण्यह्रदात् पूरयित्वा स्रवंतीभ्यो वा तत एनमुपस्पर्शयेयुरथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेच्छांता द्यौः शांता पृथिवी शांतंशिवमंतरिक्षं योरोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समंदीभिः कूष्मांडैश्चाज्यं जुहुयाद्धिरण्यं दद्यात् गां वाचार्याय यस्य तु प्राणांतिकं प्रायश्चित्तं स मृतः शुद्ध्येत्सर्वाण्येव तस्मिन्नुदकादीनि प्रेतकर्माणि कुर्युरेतदेव शांत्युदकं सर्वेषूपपातकेष्विति घटस्फोटोत्तरं प्राणांतिकप्रायश्चित्ते कृते तु मृत एव शुद्ध्येन्न तत्र संग्रहविधिः अतस्तेन विनापि प्रेतकर्म कुर्यादित्यर्थः उपपातकेष्वपि घटस्फोटे कृते एवं कार्यमित्यर्थः याज्ञवल्क्यः चरितव्रतआयाते निनयेरन्नवं घटं जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः कृतघटस्फोटस्यैवायं परिग्रहविधिरिति मिताक्षरायामपरार्के च अन्यथा प्रायश्चित्तमात्रे एतत्प्रसंगात् मनुरपि घटस्फोटमुक्त्वा निवर्तेरंस्ततस्तस्मात्संभाषणसहासनैरित्युक्त्वा प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये इति तच्छुद्ध्यप्रयुक्तं अपरार्के वसिष्ठोपि पतितानां चरितव्रतानां प्रत्युद्धारोऽथाप्युदाहरंति अग्नेरभ्युद्धरतां गच्छेत्क्रीडन्निव हसन्निव पश्चात्पातयतां गच्छेच्छोचन्निव रुदन्निवेत्याचार्यमातृपितृहंतारस्तत्प्रसादादपगतपापा एषां तेषां प्रत्यापत्तिः पूर्णह्रदात्प्रवृत्ताद्वा सकांचनपात्रं माहेयं वाद्भिः पूरयित्वापोहिष्ठीयाभिरेनमद्भिरभिषिंचेयुः सर्व एवाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्यात इति प्रत्युद्धारः परिग्रहः तत्रोद्धरतां हसन्निवाग्रेसरः स्यात् पातयतां घटस्फोटं कुर्वतां शोचन्निव पश्चाद्गच्छेत् मातापित्रादिहंतॄणां परिग्रहो न कार्यः तत्प्रसादे सति चीर्णव्र

तानांकार्यः प्रवृत्तंनिर्झरः पुत्रजन्मनेस्याभिषेकोत्तरं जातकर्मादयः संस्काराः पुत्रजन्मवत्कार्याइत्यपरार्कोव्याचख्यौ अतएवबि
ज्ञानेश्वरेशघटेपूर्ववर्जितेज्ञातिमध्यस्थोयवसंगवांदद्यात् प्रथमंगोभिः सनूक्तस्याहिसूनुक्रियेत्यग्रगवांभक्षणाभावेपुनर्ग्रंतंचरे-
दित्येतत्प्रकृतएवंचरितव्रतविधौविशेषोयमितिवदन् घटस्फोटान्तरपरिग्रहएवेतन्नसर्वत्रेत्याह तस्मात्कृतेपिघटस्फोटे
प्रायश्चित्तंपरिग्रहविधिः पुनःसंस्काराभवंतीतिसिद्धं तथाजीवच्छ्राद्धेकृतेहेमाद्रौबोधायनः तत्राशौचंदशाहंस्यादित्यलभ्य-
संगेन एवंसापवादेआशौचेउक्तेप्रतिशाखंभिन्नेप्रेत्यकर्मणिसाधारणंकिंचिदुच्यते तत्राधिकारिणःप्रागुक्ताःसर्वाभावेधर्मपुत्रोवाकार्यः अपुत्रेणास्र
तःकार्योयादृक्तादृक्प्रयत्नतः पिंडोदकक्रियाहेतोर्नामसंकीर्तनायचेतिव्यासवचनात् गृह्यपरिशिष्टेअसगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान्
प्रथमेहनियःकुर्यात्सदशाहंसमापयेत् दद्यात्पिंडमितिशेषः भविष्ये यत्राद्योदीयतेपिंडस्तत्रसर्वंसमापयेत् ब्राह्मेपि प्रथमेहनियोद
द्यात्प्रेतायान्नंसमाहितः अन्नंनवसुचान्येषुसएवप्रददात्यपि विज्ञानेश्वरादयस्तु केचित्तु अग्निंदद्यादितिव्याचक्षते
सगोत्रोवासगोत्रोवायोग्निंदद्यात्सखेनरः सोपिकुर्यान्नवश्राद्धंशुध्येत्तुदशमेहनीतिदिवोदासीयेवचनाच्च तत्रैव दृष्टा-
स्थानस्यमासन्नधर्मोन्मीलितलोचन भूमिष्ठंपितरंपुत्रोयदिदानंप्रदापयेत् तद्विशिष्टंगयाश्राद्धादश्वमेधशतादपि ता
नियथा मोक्षंदेहिहृषीकेश मोक्षंदेहिजनार्दन मोक्षधेनुप्रदानेनमुकुंदःप्रीयतांममेति मोक्षधेनुमंत्रः ऐहिकामुष्मिक
यच्चसप्तजन्मार्जितंऋणं तत्सर्वंशुद्धिमायातुगामेताददतोममेति ऋणधेनोः आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः
तत्सर्वंनाशमायातुगोप्रदानेनकेशवेति पापधेनोः भारते शुक्लपक्षेदिवाभूमौगंगायांचोत्तरायणे धन्यास्तातमरिष्यंतिहृ

दयस्थे जनार्दने हेमाद्रौ वाराहे व्यतीपातोथ संक्रांतिस्तथैव ग्रहणं रवेः पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः व्यासः आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् तदभावे तु गौरेव नरकोत्तारणाय वै तदा यदि न शक्नोति दातुं वैतरणीं तु गां शक्तोन्यो रुकदाद्दत्वा दद्याच्छ्रेयो मृतस्य तु मदनरत्ने जातूकर्ण्यः उत्क्रांत्यादीनि दानानि दश दद्यान्मृतस्य तु गोभूतिलहिरण्याज्यवासो धान्यगुडानि च रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् एतानि दशदानानि नराणां मृत्युजन्मनोः कुर्यादभ्युदयार्थं तु प्रेते पिहि परत्र वै ब्राह्मे ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रं द्विजाय तु सहिरण्यं च यो दद्यात् श्रद्धावित्तानुसारतः सर्वपापविशुद्धात्मा लभते गतिमुत्तमां उत्क्रांतिवैतरिण्यौ च दशदानानि चैव हि प्रेते पि कृत्वा तं प्रेतं सव्यधर्मेण दाहयेत् तत्रैव परिशिष्टे म्रियमाणस्य कर्णे तु पुण्यमंत्रान् जपेत्ततः क्रियानिबंधे गारुडे अष्टौ दानान्युक्तानि तुलसीसन्निधौ कृत्वा शालग्रामशिलां तथा तिलांल्लोहं हिरण्यं च कार्पासं लवणं तथा सप्तधान्यं क्षितिर्गाव एकैकं पावनं स्मृतमिति दशदानवैतरिणीधेनूत्क्रांतधेनुदानादि भट्टकृतांत्येष्टिपद्धतौ ज्ञेयं कर्तांत्यकर्माधिकारार्थं त्रीन्कृच्छ्रान्कुर्यादिति तत्रैवोक्तं अथ देवयाज्ञिकेन मुमूर्षोर्मधुपर्कदानमुक्तं तदुक्तं वाराहे दृष्ट्वा तु विह्वलं दीनं यममार्गानुसारिणं प्रयाणकाले तु नरो मंत्रेण विधिपूर्वकं मधुपर्कं स्वयं गृह्य इमं मंत्रमुदाहरेत् ॐ गृहाण चेमं मधुपर्कमाद्य संसारनाशनकरं त्वमृतेन तुल्यं नारायणेन रचितं भगवत्प्रियाणां दाहं च शांतिकरणं सुरलोकपूज्यं अनेनैव तु मंत्रेण दद्याच्च मधुपर्ककम् नरस्य मृत्युकाले तु परलोकसुखावहं अथ दुर्मरणादि वोदासीये चंडालादिमृतेर्विप्रे त्वनारिस्पृष्टे पिशा कृच्छ्रातिकृच्छ्रचांद्रैस्तु शुद्धिस्तत्र प्रकीर्तिता देवजानीये जाबालिः शूद्रेण दग्धो यो विप्रो न लभेच्छाश्वतीं गतिं प्रायश्चित्तं प्रकु

र्वीति ब्राह्मणः पापकृच्छ्रे चांद्रायणं पराकं च प्राजापत्यं विशोधनं गृह्यकारिकायां उदक्यासूतिका वापि यदि प्रेतं स्पृशंति हि तस्यैष विधिरादिष्टो वात्स्येनैव महात्मना एषः स्मृतिकोक्तः मदनरत्ने स्मृत्यंतरे ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टे तथैव च अस्पृश्यस्पर्शने चैव खड्गादिमरणेऽपि च श्वानक्रव्यादसंस्पर्शे क्रिमिकीटोद्भवेपि च एतद्दोषानुसारेण प्रायश्चित्तं समाचरेत् कृच्छ्रांस्त्रिषट्पंचदश श्वाद्यत्रयस्यथापि वा शकृत्स्थैनं तदानीं संपाद्य शवधर्मेण दाहयेत् गृह्यकारिकायां खड्गाद्यामरणे चैव त्रींस्त्रीन्कृच्छ्रान्प्रकल्पयेत् सप्ताहजैस्तु संस्पृष्टो मृतो दैवात्कथंचन एकत्रिंशत्तु कृच्छ्रास्तु शुद्धिरुक्ता मनीषिभिः कुणपे लब्धे दग्धे तु चितास्थस्थास्थिजातादिभिः तत्स्पर्शने दूषणं च त्रिभिः कृच्छ्रैर्विशुद्ध्यति धर्मप्रदीपे चांडालसूतिकोदक्यास्पृष्टे तत्तथैव च तस्य पापविशुद्ध्यर्थं कृच्छ्रान्पंचदशाचरेदित्युक्तं मनुः अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंपर्कदूषिता अथापि कृच्छ्रत्रयं अस्पृश्यस्पर्शने चैवेत्युक्तेः तत्रैव कर्मप्रदीपे रात्रौ वा रात्रिशेषे वा म्रियंते चेद्द्विजातयः दाहं कृत्वा यथान्यायं ह्नोपिंडो निर्वपेत्कृतः रजस्वलागर्भिण्यादिमृतौ तु वक्ष्यामः निर्णयामृते पारिजाते यमः संध्यायां वा तथा रात्रौ दाहः पार्थिवकर्म च नवश्राद्धं च नो कुर्यात् कृतं निःफलतां व्रजेत् एतद्दिनमृतस्य रात्रिनिषेधार्थं यत्तु स्कांदे यदि रात्रौ दहेत्तस्य समाप्तिर्दहनस्य तु परेहन्युदिते सूर्ये कार्या तस्योदकक्रिया दग्धस्य तु न वै कार्या रात्रौ जातूदकक्रियेति तन्निर्मूलं रात्रिमृतस्य तु तत्रैव संग्रहे रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपनवर्जितं वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रियेति वपनं तु प्रातः तच्च सर्वैः पुत्रैः कार्यं गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ आधाने सोमयागे च वपनं सप्तसु स्मृतमिति मिताक्षरायां स्मृतेः मरणस्यानंगत्वान्नैमित्तिक

मिदम् तदेव संग्रहवचनेन परेद्युरुत्कृष्यते तीर्थवत् तेनकस्यचिद्दाहागलौकिकाग्निंस्या मदनरत्ने गालवः प्रथमेह्नि कर्तव्यं वपनं चानुभाविनां प्रेतस्य केशश्मश्र्वादि वापयित्वा यद्दाहयेत् आशौचांते तु पुनः कार्यं विधिबलात् मदनपारिजातेप्येवं तेनसर्वस्या स्थानिर्मूललौकिकरत्नोक्तिरेव स्मृतिरत्नावल्याम् शवं रात्र्युषितं चेत् त्रीन् कृच्छ्रान् कृत्वा दहेत्ततः मदनरत्नेंगिराः ऊर्ध्वोच्छिष्टाधरोच्छिष्टेस्यतरिक्षस्मृतेपि वा कृच्छ्रत्रयं प्रकुर्वीत आशौचे मरणेपि च अथसाग्नेर्विशेषः कारिकायां कृष्णपक्षे प्रमीयेत यद्यग्निः प्रातराहुतीः शेषास्तु जुहुयाद्दर्शपर्यंताः पक्षहोमवत् प्रतिपत्प्रातर्होमांता इत्यर्थः यद्याहिताग्निरपरपक्षे म्रियेताहुतिभिरेनं पूर्वपक्षे हरेयुरित्याश्वलायनोक्तेः तदानीमेव जुहुयात्सायंकालाहुतीरपि सायं म्रियेत चेत्सायमाहुतीर्जुहुयादथ तदानीमेव जुहुयात्प्रातःकालाहुतीरपि सकृद्गृहीतमंत्रे पृथक्भिन्नतंत्रं च होमयोः दार्शं चापि प्रकुर्वीत स्थालीपाकं तदैवतु छंदोगपरिशिष्टे हुतायां सायमाहुत्यां दुर्बलश्चेत् गृही भवेत् प्रातर्होमस्तदैव स्याज्जीवेच्चेत्पुनर्नवा इदं शुक्लपक्षपरं दुर्बलो मुमूर्षुः त्रिकांडमंडनः दर्शेष्टिं च तदा कुर्याद्दिष्टिर्यद्दिने संभवेत् देवतानामधानानासमेकैकस्य हुनेत् पृथक् पुरोनुवाक्यायाज्याभ्यां चतुरात्तघृताहुतीः तथा अग्रावरपर्याशारूढे प्रमीयेत पतिर्यदि प्रेतं स्पृष्ट्वा मथित्वाग्निं जप्त्वाचोपावरोहणं घृतं च द्वादशोपात्तं तूष्णीं हुत्वा शवक्रिया विच्छिन्नश्रौताग्नेर्मृतौ तु प्रेताधानं तत्रैवोक्तं प्रेतस्वाम्यालये क्षिप्त्वा मथिताग्न्यानलेरणी सन्निधायारणी मथ्येत् यस्येति यजुषा ततः यस्याग्नयो जुह्वतां मासकामाः संकल्पयंते यजमानमासं जायंतु ते हविषस्मादितायस्स्वर्गलोकमिमं प्रेतं नयंत्विति मंत्रतः प्राणीय पावकं तूष्णीं द्वादशोपात्तसर्पिषा तूष्णीं हुत्वा ततः कुर्यात्प्रेतमात्या इति क्रियां नष्टेष्वग्निष्वरण्योर्नाशे स्वामी म्रियेत चेत् आहरेदरणीद्वंद्वं मनोज्योतिरिति च ततः यज्ञपात्रैः यजमाने चितारूढे पात्रन्यासः कृते सति वर्षाद्य

ग्निहतेवन्हौकथंकुर्वंतियाज्ञिकाः तदर्धदग्धकाष्ठेनमंथनंतत्रकारयेत् तच्छेषालाभतोन्येनदग्धशेषेणवापुनः हुत्वाज्यंलौकिकेवन्हौहुतशेषंदहेत्तुवा अत्राग्निषुसत्सुपर्णशरैःशरीरोत्पत्तिः शरीरेवासतिप्रेताधानेनाग्न्युत्पत्तिः उभयाभावेतुप्रेताधानेनाधिकाराद्दाहादिसंस्कारलोपः उदकदानाद्येवकार्यमितिकेशवीकारशतद्वयीप्रभृतयः तन्न निषेकाद्याःश्मशानांतास्तेषांवैमंत्रतःक्रियाइतिविरोधात् क्रियालोपगतायेचेतिनिषेधात्तदभावेपलाशानांवृन्तैःकार्यः पुमानपीत्यभावेविधानस्याग्न्यभावेपिसाम्याच्च तेनप्रेताहुत्यभावेपिस्विष्टकृद्द्रव्यांतरोक्तेरदृष्टार्थत्वात् प्रेताधानंदाहोपिभवत्येव प्रतिकृतेरग्नीनांचप्रेताधानप्रयोजकत्वात्ततः पत्न्याअप्येवं दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिरितियाज्ञवल्क्योक्तेः यत्तु द्वितीयांचैवयोभार्यांदहेद्वैतानिकाग्निभिः जीवंत्यांप्रथमायांतुसुरापानसमंस्मृतमितितदाधानेसहानधिकृताविषयमितिविज्ञानेश्वरः मदनरत्नेब्राह्मेपि आहिताग्न्योश्चदंपत्योर्यस्त्वादौम्रियतेऋषि तस्यदेहःसपिंडैश्चदग्धव्यस्त्रिभिरग्निभिः पश्चान्मृतस्यदेहस्तुदग्धव्योलौकिकाग्निना अनाहिताग्निदेहस्तुदाह्योगृह्याग्निनाद्विजैः त्रिकांडमंडनस्तुविकल्पमाह ज्येष्ठायांविद्यमानायांद्वितीयायैस्त्वयोषितेकास्यनित्याग्निहोत्रंवानकथंचित्प्रयच्छति स्त्रीमात्रमविशेषेणादग्ध्वान्यैर्वैदिकाग्निभिः विवाह्याद्धत्तेयद्वाधानमेवास्तिचेद्धूरिति अत्रेदंतत्त्वं साग्नेःपत्नीमृतौद्वौपक्षौपुनर्विवाहेच्छायांपूर्वाग्निभिर्दहेदित्येकःपक्षः भार्यायैपूर्वमारिण्यैदत्वाग्नीनंत्यकर्मणि पुनर्दारक्रियांकुर्यात्पुनराधानमेवचेतिमनूक्तेः दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिरितियाज्ञवल्क्योक्तेश्च पुनर्विवाहाशक्तौनिर्मथ्येनतांदग्ध्वापूर्वाग्निष्वेवाग्निहोत्रेष्ट्यादिकार्यमित्यर्थः आहार्येणाहिताग्निपत्नीन्चेत्याश्वलायनोक्तेः भरद्वाजो ३०

पिनिर्मंथ्येनपत्नीमिति पूर्वोग्न्येकदेशेनदहेदितियज्ञपार्श्वेदेवयाज्ञिकादयः यानिचतस्मादपत्नीकोप्यग्निहोत्रमाहरेदितिश्रुतिः विष्णुः छंदोगपरिशिष्टेच मृतायामपिभार्यायांलौकिकाग्निंनहित्यजेत् उपाधिनापितत्कर्म यावज्जीवंसमाचरेत् उपाधिर्हेमकुशपत्न्यादिः अन्येकुशमयींपत्नींकृत्वातुगृहमेधिनः अग्निहोत्रमुपासंतेयावज्जीवमनुव्रता इत्यपरार्केस्मृत्यंतरात् कात्यायनोपि रामोपिकृत्वा सौवर्णींसीतांपत्नींयशस्विनीं ईजेबहुविधैर्यज्ञैः सहभ्रातृभिरच्युत इत्यादीनितानि पूर्वाग्निवैवाग्निहोत्रादिपराणि नत्वपत्नीकस्याधानार्थानि क्रतुविधीनामाधानाप्रयोजकत्वात् अपत्नीकस्याधानमप्यस्तीति मानवपरिशिष्टाच्च सोमेनसवत्येव अपत्नीकोप्यसोमप इतिश्रुतेः यत्तु भरद्वाजापस्तंबसूत्रं दारकर्मणियद्यशक्तः आत्मार्थमग्न्याधेयमिति अस्यार्थः पुनर्विवाहाशक्तोयदग्न्याधेयंपूर्वंकृतमस्ति तदात्मार्थमेव नपत्न्यैदद्यादिति ब्राह्मणभाष्यापरार्कशार्करामांडारादितत्त्वमप्येवं त्रिकांडमंडनस्तु पक्षद्वयमाह अन्येप्यपत्नीकस्याधानमाहुस्तदाशयंनविद्मः अत्र याज्ञवल्क्यः आहिताग्निर्यथान्यायंदग्धव्यस्त्रिभिरग्निभिः अनाहिताग्निरेकेन लौकिकेनापरोजनः क्रतुः एववृत्तांसवर्णांस्त्रींद्विजातिःपूर्वमारिणीं दाहयेदग्निहोत्रेणयज्ञपात्रैश्चधर्मवित् कारिकायाम् पत्नीसपिदहेदेवभर्तुःपूर्वंमृतायदि अनग्निकादहेदेवंकपालेनहविर्भुजा आशौचप्रकाशेक्रतुः विधुरंविधवांचैवकपालस्याग्निनादहेत् ब्रह्मचारिणंयतिंचैवदहेदुत्तपनाग्निना तुषाग्निनात्वदग्धव्यःकन्यकाबालएवच अग्निवर्णंकपालंतुकृत्वातत्रविनिक्षिपेत् करीषादि ततोवह्निर्जातोयःसकपालजः अनुपनीतेयद्यपिजातारण्यग्निः केचिदुक्तस्तथापि तस्यकलौनिषिद्धत्वात्करयमेवज्ञेयः स्मृत्यंतरे गृहस्थोब्रह्मचारीचविधुरोविधवास्त्रियः औपासनश्चोत्तपनस्तुषाग्निस्तुकपालजः उत्तपनस्तु दर्भाग्रैरग्निंतुप्रज्वाल्यसुनदे

भैस्तुसंस्तुतः पुनर्दर्भैस्तृतीयेऽग्निरेषउत्तपनस्मृतः यमः यस्यानयतिशूद्रोग्निंतृणकाष्ठहवींषिच प्रेतत्वंचसदातस्यसचाधर्मेणालिप्यते देवलः चण्डालाग्निरमेध्याग्निः सूतिकाग्निश्चकर्हिचित् पतिताग्निश्चिताग्निश्चनशिष्टग्रहणोचितः मनुः दक्षिणेनमृतंशूद्रंपुरद्वारेणनिर्हरेत् पश्चिमोत्तरपूर्वैस्तुयथासंख्यंद्विजातयः अत्रप्रातिलोम्येनक्रमः पूर्वाभिमुखस्तुनेतव्योब्राह्मणोबांधवैर्गृहात् उत्तराभिमुखोराजावैश्यःपश्चान्मुखस्तथा दक्षिणाभिमुखःशूद्रोनिर्हर्तव्यःस्वबांधवैरित्यादिपुराणादित्यपरार्कः तेनाश्वशाखोक्तुक्तोनुलोमक्रमोहेयः आश्वलायनः ज्येष्ठप्रथमाः कनिष्ठजघन्यागच्छेयुः आधानोत्तरंद्वितीयविवाहकृतेयजमानमरणेश्रौतस्मार्ताग्न्योः संसर्गः बोधायनसूत्रे अथयद्याहिताग्निर्द्वेभार्येविंदेतप्राक्संयोगात्स्त्रीयेतोपासनंसपरिस्तीर्याज्यंविलाप्यचतुर्गृहीतंगृहीत्वासमिद्वत्यग्नौजुहोति संमितंसंकल्पयेथामितिमिंदाहुतीव्याहृतीश्चहुत्वाथैतमग्निमयंतेयोनिर्ऋत्वियइतिसमिधिसमारोप्यगार्हपत्येसमिधमभ्यादधातिभवतंनः समनसावितिगार्हपत्यआज्यंविलाप्यचतुर्गृहीतंगार्हपत्येजुहोत्यग्नावग्निश्चरतिप्रविष्टइत्यपरंचतुर्गृहीत्वाचित्तिःस्रुगितिसग्रहंजुहोत्यथगार्हपत्येस्रुवाहुतीर्जुहोति ब्राह्मणएकहोतेतिदशभिरथप्राचीनावीत्यन्वाहार्यपचनेजुहोतियेसमानायेसजाताइतिद्वाभ्यामथतत्रैवस्रुवाहुतिंजुहोत्यग्नयेकव्यवाहनायस्विष्टकृतेस्वधानमःस्वाहेत्यथयज्ञोपवीतीद्वादशगृहीतेनस्रुचंपूरयित्वापुरुषसूक्तेनाहवनीयेजुहोत्यथस्रुवाहुतीर्जुहोत्यग्नयेविविचयेस्वाहाग्नयेव्रतपतयेग्नयेपवमानायाग्नयेपावकायाग्नयेशुचयेस्वाहाग्नयेपथिकृतेस्वाहाग्नयेतंतुमतेग्नयेवैश्वानरायेत्यथचतुर्गृहीतंजुहोतिमनोज्योतिरित्यतऊर्ध्वंपैतृककर्मप्रतिपद्यतेइति आहिताग्नेर्विदेशमृतेपथिकृतीष्टिर्मृताग्निहोत्रंतद्दाहः पात्रयोजनंचकल्पसूत्रादिभ्योस्मत्पितामहकृतपद्धतेश्च

ज्ञेयमिति बहु वक्तव्येष्वुपरम्यते स्मार्ताग्निसूत्रं मदनरत्ने छंदोगपरिशिष्टे च दुर्बलं स्नापयित्वा तु शुद्धचैलाभिसंवृतं दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् घृतेनाभ्यक्तमाप्लाव्य शुद्धवस्त्रोपवीतिनं चंदनोक्षितसर्वांगं सुमनोभिर्विभूषयेत् हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः आमपात्रेग्निमादाय प्रेतसन्निपुरःसरं एकोनुगच्छेत्तस्यार्धमर्धपथ्युत्सृजेद्भुवि ऊर्ध्वमादहनं कार्यमासीनो दक्षिणामुखः सव्यं जान्वाच्य शनकैः सतिलं पिंडदानवत् अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं महत् तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे आज्यपूर्णं स्रुवं दद्याद्दक्षिणाग्रां नसि स्रुचं पादयोरधरां प्राचीमरणीमुरसीतरां पार्श्वयोः शूर्पचमसौ सव्यदक्षिणयोः क्रमात् कुसमेतु न्यसेन्मुशलमंतरूर्वोरुलूखलं चान्त्राविलीढमत्रैव अग्नयेरव्ययंविधिः अपसव्येन कृत्वैतदग्रतः पितृदिङ्मुखः अथाग्निं सव्यमावृत्तो दद्याद्दक्षिणतः शनैः अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः असौ स्वर्गाय लोकाय स्वाहेति परिकीर्तयेत् तथा एवमेवाहिताग्नेश्च पात्रन्यासादिकं भवेत् कृष्णाजिनादिकं चात्र विशेषोऽध्वर्युचोदितः तत्रैव अनयैवावृता नारी दग्धव्या यात्यवस्थिता अग्निप्रदानमंत्रोस्या न प्रयोज्य इति स्थितिः इदं छंदोगानामेव पात्रन्यासोक्तेरुत्तानदेहत्वसाग्निपरं निरग्निस्तु पुमानधोमुखः स्त्री तूत्तानादाह्या सगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः अधोमुखो दक्षिणादिक्चरणस्तु पुमानिति उत्तानदेहा नारी तु सपिंडैरपि बंधुभिरित्यादिपुराणादिति शुद्धितत्त्वहारलतादयः उत्तरशिरस्त्वं सामगेतरपरं वाराहे त्वग्निदानेऽन्योमंत्रः कृत्वा तु दुष्कृतं कर्म जानता वाप्यजानता मृत्युकालवशं प्राप्य नरं पंचत्वमागतं धर्माधर्मसमायुक्तं लोभमोहसमावृतं दहेयं सर्वगात्राणि दिव्याँल्लोकान्स गच्छतु ज्वलमानं महावह्निं शिरःस्थाने प्रदापयेत् चतुर्वर्णेषु संस्थानमेवं भवति पुत्रके अंत्यक्रियानिबंधे गारुडे षट्

पिंडदानमुक्तं मृतस्योत्क्रांतिसमयेषट्पिंडान्क्रमशोददेत् मृतिस्थानेतथाद्वारिचत्वरेतार्क्ष्यकारणात् विश्रामेकाष्ठचयनेतथासंचयने
चषट् तथा आदौदेयास्तुषट्पिंडादशदेयादशाहिकाः स्थानेचार्धपथेतीतेचितायांशवहस्तके श्मशानवासिभूतेभ्यः पृष्ठसंचयनेतथा
ततः त्वंभूतकृज्जगद्योनेत्वंलोकपरिपालकः उक्तःसंहारकस्तस्मादेनंस्वर्गंमृतंनय इत्यग्निंदत्त्वाऽस्मात्त्वमितिमंत्रेणार्धदग्धे आज्याहु-
तिरुक्ता आहिताग्नेःपराशरः शम्याशिश्नेविनिक्षिप्यअरणीमुष्कयोरपि जुहूंचदक्षिणेहस्तेवामेतूपभृतंन्यसेत् शिश्नेतूलूखलंद-
द्यात्पृष्ठेचमुसलंन्यसेत् उरसिक्षिप्यदृषदंतंडुलाज्यतिलान्मुखे श्रोत्रेचप्रोक्षणींदद्यादाज्यस्थालींचचक्षुषोः कर्णनेत्रेमुखेघ्राणे-
हिरण्यशकलंन्यसेत् अग्निहोत्रोपकरणमशेषंतत्रनिक्षिपेत् प्रचेताः स्नानमेतस्यपुत्राद्यैर्वस्त्राद्यैःपूजनंततः नग्नदेहंदहेन्नैव
किंचिद्देयंपरित्यजेत् यमः प्रेतंदहेच्छुभैर्गंधैःस्नापितंस्रग्विभूषितं आश्वलायनसूत्रे संस्थितेप्रेतालंकारान्कुर्वंतिकेशश्मश्रु-
लोमनखानिवापयंतिनलदेनानुलिंपंतिनलदमालांप्रतिमुंचंतीति माधवीयेब्राह्मे दरिद्रोपिनदग्धव्योनग्नःकस्यांचिदापदि तथा
निःशेषस्तुनदग्धव्यःशेषंकिंचित्त्यजेन्नरः दाहकालेग्निनाशेतुमदनरत्नेयज्ञपार्श्वः यजमानेमृतेक्वापिचितादौवाप्रवेशिते वर्षाद्युप-
हतेग्नौतुकथंप्रेतविकल्पना शेषंदग्ध्वाप्रदग्धेषुनिर्मथ्यैवतुकारयेत् अथपर्णशरादिदाहेनाग्निनाशेपश्चात्तद्देहालाभेमदनरत्नेब्राह्मे
अथपर्णशरेदग्धेपात्रन्यासेकृतेसति गतेष्वग्निषुतद्देहोयदूर्ध्वंलभ्यतेक्वचित् तदार्धदग्धकाष्ठानितानिनिर्मथ्यतंदहेत् यद्यर्धदग्ध-
काष्ठंतुतदीयंवैनलभ्यते तदातदस्थिखंडंतुनिक्षिप्तव्यंमहाजले दंपत्योरेकदामृतौविशेषमाहापस्तंबः तथैवमेतेसहैवपितृ-
मेधोर्द्विवचनलिंगान्मंत्रान्संधारयंति पितृमेधोदाहांतकर्म दाहांतमेकतंत्रत्वमितिबोधायनोक्तेः अस्थिसंचयनमप्येकं उद

कपिंडदानादि पृथगेव सहगमनेप्येवं तदाह मदनरत्ने भाष्यार्थसंग्रहकारः एककालमृतौ भार्याभर्त्तारौ च यदि द्वे द्वयोः तंत्रेण दहनं कुर्यात् पिंडश्राद्धं पृथक् पृथक् एककालमृतौ जायापती यदि तदा पितुः विभज्याग्निक्रियां कुर्यादिति यत्तत्सांप्रतं दाहांतमेकतंत्रत्वमिति याज्ञिकसंमतं मृतपतिमनुव्रज्य या नारी ज्वलनं गता अस्थिसंचयनात् तस्या भर्तुः संस्कार एव हि कीकसानां तु संस्कारो न्यायसिद्धोपि यो मतः एककालमृतेष्वेवं कीकसानां विधिः स्मृतः नवश्राद्धं सपिंडांतं भिन्नकालमृतौ यथा कपर्दिकारिकापि मृते भर्तरि तद्दाहात् प्राक् पत्नी म्रियते यदि सत्यां वा प्राक् प्रमीता सा दाहादर्वाक् पतिर्मृतः तत्र तंत्रेण दाहः स्यान्मंत्रेषु द्वित्वमुह्यते कीकसानां तु संस्कारः पृथगेव तयोर्भवेत् एकाहमृत्यौ युगपन्नवश्राद्धादिकं तयोः मृतपतिमनुव्रज्य पत्नी चेदनलं गता तत्रापि दाहस्तंत्रेण पृथगस्थिक्रिया भवेत् अस्थिसंचयने पृथक्त्वे विकल्पः सहगमने सर्वत्र पाकैक्यमाह प्रचेताः एकचित्यां समारूढौ म्रियेते दंपती यदि तंत्रेण श्रपणं कुर्यात् पृथक् पिंडं समाचरेत् अथोदकदाने वसिष्ठः शरीरमग्नौ संयोज्यानवेक्षमाणा अपोभ्यवयंति सव्येतराभ्यां पाणिभ्यामुदकक्रियां कुर्वंत्ययुग्म आपस्तंबः मातुश्च योनिसंबंधेभ्यः पितुश्चासप्तमात् पुरुषाद्यावतां वा संबंधो ज्ञायते तेषां प्रेते उदकक्रियेति याज्ञवल्क्यः सप्तमाद्दशमाद्वापि ज्ञातयोभ्युपयंत्यपः अपनः शोशुचदघमनेन पितृदिङ्मुखाः सकृत्प्रसिंचंत्युदकं नामगोत्रेण वाग्यताः सप्तमाद्दशमाद्वा दिवसादानदंतमिति विज्ञानेश्वरः कातीयास्तु सप्तमाद्दशमाद्वा पुरुषादित्याहुः सप्तमाद्दशमाद्वा पुरुषात् समानग्रामवासे यावत्संबंधमनुस्मरेयुरिति पारस्करो केः मंत्रस्नानागमेवेति हरादिः प्रचेताः प्रेतस्य बांधवा यथावृद्धमुदकमवतीर्य नोद्वर्षयेयुरुदकांते प्रसिंचेयुरपसव्ययज्ञोपवीतवाससो दक्षिणामुखा ब्राह्मणस्योदङ्मुखा प्राङ्मुखाश्च राजन्यवैश्ययोः स एव नदीकूलं ततो गत्वेत्युक्त्वा सचेलस्तु ततः स्नात्वा शुचिः प्रयतमानसः पाषाणं तत आदाय विप्रो दद्या

दशांजलीन् द्वादशक्षत्रियेदद्याद्वैश्ये पंचदशस्मृताः त्रिंशच्छूद्रायदातव्याततस्तुप्रविशेद्गृहं ततः स्नानंपुनः कार्यंगृहशौचंचकारयेत् प्रे
तस्नानेविशेषः शुद्धितत्त्वे आदिपुराणे आदौवस्त्रंचप्रक्षाल्यतेनैवाच्छादितस्ततः कर्तव्यंतैः सचैलंतुस्नानंसर्वमलापहं पूर्वपरि
हितंवस्त्रंप्रक्षाल्यपुनःपरिधायस्नायादित्यर्थः अपनइतिमंत्रेणवामहस्तानामिकयाजलालोडन अवतरणे छन्दपुरः सरस्तोके
यथाबालपुरस्कृत्येति बौधायनीयं जलादुत्थानपरमिति हारलतादयः आश्वलायनः सव्याहृतीव्रजंत्यमीक्षमाणायत्रोदकमव
हमवतिततत्राप्यसकृदुन्मज्ज्यैकांजलिमुत्सृज्य तस्यगोत्रनामगृहीत्वेति प्रचेतसान्वहमंजलित्रयमप्युक्तंत्रिःप्रसेकंकुर्युः प्रेतस्तृ
प्यतामिति तथा दिनेदिनेऽजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात् तावद्वृद्धिश्चकर्तव्यायावत्पिंडःसमाप्यते एक वृद्धिस्त्वेक
वृद्धिर्वेत्यर्थः मदनरत्नेप्रचरद्राजगृह्येतुद्विकवृद्धिरप्युक्ता आशौचांतेप्रदद्यात्तुप्रेतपुत्रस्तिलांजलीन् प्रथमेऽह्निसकृद्दद्यात्पिंड्या
ज्ञाहृतादिवा त्रींश्चदद्याद्द्वितीयेऽह्नितृतीयेपंचएवच चतुर्थेसप्तसंख्यास्तुपंचमेनवचोत्सृजेत् षष्ठेऽह्निचैकादशकाः सप्तमेतुत्रयो
दश अष्टमेपंचदशकानवमेदशसप्तच एकोनविंशतिश्चाथशतांजलिमतंस्मृतं केचिद्दशांजलीन्प्रोचुः केचिदाहुःशतांजलीन् पं
चपंचाशतंचान्येस्वशाखाक्रमव्यवस्थया छंदोगपरिशिष्टे अथानवेक्षयत्पापःसर्वेचैवशवस्पृशः गोत्रनामपदांतेतुतर्पयामी-
त्यनंतरं दक्षिणाग्रान्कुशान्कृत्वासतिलंतुपृथक्पृथक् विष्णुपुराणे सपिंडीकरणाद्यावदृजुदर्भैःपितृक्रिया सपिंडीकरणा-
दूर्ध्वंद्विगुणैर्विधिवद्भवेत्. रामायणे इदंपुरुषशार्दूलविमलंदिव्यमक्षयं पितृलोकेषुपानीयमहत्तमुपतिष्ठतां दानशाक्येविक ३३
ल्पः याज्ञवल्क्यः कामोदकसखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजां कामइच्छाप्रेततृप्तीच्छायांदेयमन्यथानेत्यर्थः शंखपारस्करौ आ

चार्येचैवं मातामहयोश्चस्त्रीणांचाप्रत्तानांकुर्वीरंस्ताश्चतेषामितिद्विवचनात् मातामह्याअपिशंखलिखितौ उदकक्रियाकामंश्वशुरसमातुलयोः शिष्येसहाध्यायिनिराजनिचेति वृद्धमनुः क्लीबाद्यानोदकंकुर्युस्तेनाव्रात्याविधर्मिणः गर्भभर्तृद्रुहश्चैवसुरापाश्चैवयोषितः याज्ञवल्क्यः नब्रह्मचारिणःकुर्युरुदकंपतितास्तथा षडशीतोस्त्रीयाचारादपिपन्नघाः पतितायेचदूषिताः नकुर्युरुदकंतेवै तेभ्योप्यन्येननचैवहि मदनरत्नेहारीतः पतितामप्रव्रज्जानांचरंतीनांचकामतः प्रत्तानांचैवकन्यानांनिर्वर्त्यासलिलक्रिया अपरार्केशंखलिखितौ अपपात्रितस्यरिक्थपिंडोदकानिव्यावर्तेते अपपात्रितःकृतघटस्फोटः तस्यापिसंग्रहविधौकृतेआशौचोदकादिकुर्यादेवेत्याशौचप्रकाशः अथाशौचेनियमाः याज्ञवल्क्यः इतिसंश्रुत्यगच्छेयुर्गृहंबालपुरःसराः विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः आचम्याग्न्यादिसलिलंगोमयंगौरसर्षपान् प्रविशेयुःसमालभ्यकृत्वाश्मनिपदंशनैः प्रवेशनादिकंकर्मप्रेतसंस्पर्शिनामपि क्रीतलब्धाशनाभूमौस्वपेयुस्तेपृथक्क्षितौ इदंचाद्येन्हि वसिष्ठः अधःप्रस्तरेगृहमनश्नंतआसीरन्क्रीतोत्पन्नेनवावर्तेरन् शंखलिखितस्त्वेबैजवपः शमीमालभंतेशमीपापंशमयत्विति अश्मानमभ्येवस्थिरोभूयासमिति अग्निमग्निर्नःशर्मयच्छत्वितिज्योतिस्यंतरागामजसुपस्पृशंतः क्रीतलब्धाशनास्युर्गोहादेकान्नमलवणमेकरात्रं दिवाभुंजीरंस्त्रिरात्रंचकर्मोपरमणं क्रीताद्यशनमुपवासाशक्तस्य आश्वलायनस्तु नैतस्यांरात्र्यामन्नंपचेरंस्त्रिरात्रमक्षारलवणाशिनःस्युर्द्वादशरात्रंचेत्याह अशक्तौरत्नाकरेआपस्तंबः भार्याःपरमगुरुसंस्थायांचाकालभोजनानिकुर्वीरन्यदास्मृतिः परदिनेतावत्कालमित्यर्थः बृहस्पतिः अधःशय्यासनादीनामलिनाभोगवर्जिताः अक्षारलवणान्नास्युर्लब्धक्रीताशनास्तथा भोगोभ्यंगतांबूलादिः क्षाराःपरिभाषायामुक्ताः यत्तुमार्कंडेयपुराणे तैलाभ्यंगोबांधवा

नासंमसंवाहनंचयत् तेनचाप्यापतेज्जंतुर्यत्रावास्मीतिस्त्ववांधवाः प्रथमेन्हितृतीयेचसप्तमेनवमेतथा वस्त्रत्यागंबहिःस्नानंकृत्वादद्यात्तिलोदकमिति तद्दत्यादिनपरं आशौचांतेतिलकल्कैः स्नातागृहंप्रविशेयुरितिविष्णूक्तेः विष्णुपुराणेऽस्थिसंचयोर्ध्वंभोगोस्तुक्तः शय्यासनोपभोगस्तुसपिंडानामपीष्यते अस्थिसंचयनादूर्ध्वंसंयोगस्तुनयोषितां भारते तिलान्ददत्तपानीयंदीपंददतजाग्रतः ज्ञातिभिःसहभोक्तव्यमेतत्प्रेतेषुदुर्लभं मनुः मांसाशनंचनाश्नीयुःशयीरंश्च पृथक्क्षितौ देवजानीयेकाशिकायां लवणक्षीरमाषान्नापूपमांसानिमाषकं वर्जयेदाहृतान्नेषुबालवृद्धातुरैर्विना उपवासोगुरोःप्रेतेपत्न्याःपुत्रस्यवाभवेत् मरीचिः प्रथमेन्हितृतीयेचसप्तमेदशमेतथा ज्ञातिभिःसहभोक्तव्यमेतत्प्रेतेषुदुर्लभं भोजनंचदिवैव दिवान्नैवतुभोक्तव्यममांसमनुजर्षभेति विष्णुपुराणात् क्रीतलब्धाशनादिवान्नमश्नीयुरितिपारस्करोक्तेश्च मदनरत्नेहारीतः पाणिषुमृन्मयेषुपर्णपुटकेषुवाश्नीरन् देवजानीयेब्राह्मे शुद्धितत्त्वेआदिपुराणे आशौचमध्येयत्नेनभोजयेत्स्वस्वगोत्रजान् अंत्यदिनेतुमदनरत्नेब्राह्मे यस्ययस्यतुवर्णस्ययद्यत्स्यात्पश्चिमंत्वहः सतत्रगृहशुद्धिंचवस्त्रशुद्धिंकरोत्यपि अंत्यकर्मकालीनवस्त्रधारस्तु तंत्रेणोक्तं ग्रामाद्बहिस्ततोगत्वाप्रेतस्पृष्टेतुवाससी अंत्यानामाश्रितानांचत्यक्त्वास्नानंकरोत्ययेति शंखः दानंप्रतिग्रहोहोमःस्वाध्यायःपितृकर्मच प्रेतपिंडक्रियावर्ज्यमाशौचेविनिवर्तते काठकगृह्ये यत्रप्राणोत्क्रमस्तत्रान्वहंमहाबलिंकुर्यादितिपारस्करः तदानीमेववस्त्रतंडुलदीपकांस्यभाजनंप्रेतायदद्यात् आशौचप्रकाशेभरद्वाजः वासोन्नंचजलकुंभंप्रदीपंकांस्यभाजनं नग्नप्रच्छादनेश्राद्धेब्राह्मणायनिवेदयेत् ऋशृः तिलोदकंतथापिंडान्नग्नप्रच्छादनादिकं रात्रौनकुर्यात्संध्यायांयदिकुर्यान्निरर्थकं अथप्रेतपिंडः यद्यपिहेमाद्रौपारस्करेण ब्राह्मणे

दशपिंडास्तु क्षत्रिये द्वादशस्मृताः वैश्ये पंचदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिता इत्युक्तं तथापि प्रेतेभ्यः सर्ववर्णेभ्यः पिंडान् दद्याद्दशैव हीति तैत्तिरीयोक्तेः सर्वेषां दशैव ज्ञेयाः मदनरत्नेप्येवं तथाच हेमाद्रौ ब्राह्मपाद्मयोः जात्युक्ताशौचतुल्यास्तु वर्णानां क्वचिदृशाहं देशधर्मानुरक्तत्वमेतत्पिंडाल्पत्वपीत्युक्त्वा विप्रान्येषु दशमपिंडोत्कर्ष उक्तः देयस्तु दशमः पिंडो राज्ञां वै द्वादशेहनि वैश्यानां वै पंचदशे देयस्तु दशमस्तथा शूद्रस्य दशमः पिंडो मासे पूर्णे प्रदीयते इति सुमन्तुस्मृतादेः सद्यःशौचे त्र्यहादौ च तत्तेनैवोक्तं सद्यःशौचे प्रदातव्याः सर्वे पिंडा युगपत्तथा त्र्यहाशौचे प्रदातव्यः प्रथमे त्वेक एव हि द्वितीयेहनि चत्वारस्तृतीये पंचचैव हि त्र्यहे प्रकारांतरमप्युक्तं शातातपः आशौचस्य च ह्रासेपि पिंडान्दद्याद्दशैव तु तत्रैकपात्रे संकल्प्य त्वक्त्वा दशपिंडान्दद्यात् उत्तरीयशिलापात्रकलशादिपर्यये पूर्वदत्तानंजलीन्दद्यात्पूर्वपिंडांस्तथैव चेति गृह्यकारिकायां पात्रादिपर्यये दोषोक्तेः शिलादिपर्यये पदस्फोटादनो हानिः अक्षाभ्यंजनादिपदकर्मणः एकहायनिनयनवदप्रयोजकत्वात् तद्वत्त्वाच्चालौकिकग्रहणं केचित्तु नवान्यादाय भांडानि आरुकंचककं तथेति प्रचेतसोक्तेः पात्रानेकत्वमाहुः क्रियाकर्तुर्नाशेन्येन शेषः समापनीयः एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते तद्बंधुना क्रिया कार्या सर्वैर्वा सहकारिभिरिति शुक्रद्वितत्त्वे बृहस्पतिस्मृतेः पत्न्याः कर्तृत्वे रजोदर्शने तु तदंते कुर्यात् शावाद्गुणमार्तवमित्युक्तेः आशौचांते आर्तवे कर्तुरस्वास्थ्ये वान्येन क्रियासर्वा वर्तनीया कर्तुर्विपर्ययात् कालातिक्रमयोगाच्च वाराहे स्थंडिले प्रेतभागं तु दद्यात्सर्वोपहव्यवत् कृत्वा तु पिंडसंकल्पं नामगोत्रे पास्कंदरि मरीचिः प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितं प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः दर्भवर्जनमनुपनीतपरं असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्रचेतसोक्तेः भिन्नाक्षरायां स्मृत्यंतरे भूमौ माल्यं पिंडपानीयमुपले वा दद्युः

शुनःपुच्छःफलमूलैश्चपयसाशाकेनचगुडेनच तिलमिश्रंतुदर्भेषुपिंडंदक्षिणतोहरेत् तूष्णींप्रसेकंपुष्पंचधूपंदीपंतथैवच शालिनासक्तुभिर्वापिशाकैर्वाप्यथनिर्वपेत् प्रथमेहनियद्द्रव्यंतदेवस्याद्दशाहिकं मदनरत्नेमात्स्ये तैजसंमृन्मयंवाथपात्रंसंशोध्ययत्नतः लौकिकाग्नावधिश्रित्यपचेदन्नंघृतप्लुतं स्नात्वायतिलसंमिश्रंप्रदद्याद्दर्भसंस्तरे शुद्धितत्त्वेदेवजानीयेच ब्राह्मे प्रथमेहनियाद्द्यात्प्रेतायान्नंसमाहितः अन्नंनवस्त्रंचान्येषुसएवप्रददात्यपि मृन्मयंभांडमादायनवंस्नातःक्रसंयुतः तंडुलप्रस्थंतिनत्रिःप्रक्षाल्यपचेत्स्वयं सपवित्रैस्तिलैर्मिश्रंकृमिकेशविवर्जितं द्वारोपांतेततःक्षिप्त्वाशकृद्वावागोरमृत्तिका भूपृष्ठेसंस्तरेदर्भान्याम्याग्रान्देशसंभवान् ततोवनेजनंदद्यात्संस्मरन्गोत्रनामनी तिलसर्पिर्मधुक्षीरैः संसिक्तंतत्समेवहि दद्यात्प्रेतायपिंडंतुदक्षिणाभिमुखःस्थितः अर्घ्यैःपुष्पैस्तथाधूपैर्दीपैस्तोयैश्चशीतलैः ऊर्णातंतुमयैःशुक्लैर्वासोभिःपिंडमर्चयेत् दिवसेदिवसेदेयःपिंडएवंक्रमेणतु सद्यःशौचेप्रदातव्याः सर्वेपियुगपत्तथा त्र्यहशौचेपिदातव्याः त्रयःपिंडाःसमाहितैः द्वितीयेचतुरोदद्यात् अस्थिसंचयनंतथा त्रींस्तुदद्यात्तृतीयेन्हि वस्त्रादिक्षालयेत्ततः दशाहेपिचदातव्यः प्रथमेलेकएवहि एकस्तोयांजलिस्त्वेव पात्रमेकंचदीयते द्वितीयेद्वौतृतीयेत्रीनित्याद्युक्त्वा एवंस्युः पंचपंचाशत्तोयस्यांजलयःक्रमात् तोयपात्राणितावंतिसंयुक्तानितिलादिभिरिति पूर्णकुंभः अत्राहःपदमहोरात्रपरं तेनरात्रावपिदेयइतिगौडाः दिवसपदाक्रांतेनेतिमैथिलाः सएवेत्युक्तेः सपिंडेनदशपिंडप्रक्रांते पुत्रागमेपिसनदद्यात् असगोत्रःसगोत्रोवेतिप्रागुक्तेः दाहकर्तैवदशाहंकुर्यादिति मिताक्षरायां शुद्धितत्त्वेवायवीयेपि असगोत्रः सगोत्रोवायदिस्त्रीयदिवापुमान् यश्चाग्निदाताप्रेतस्यपिंडंदद्यात्सएवहीतितत्रैव पूरकेणतुपिंडेनदेहोनिष्पाद्यतेयतः कृतस्यकारणा

योगात् पुनर्नावर्तते क्रिया शुक्लप्रकाशे वायवीयेपि निवर्तयति यो मोहात् क्रियामन्यनिवर्तिताम् विधिप्रस्तेन भवति पितृहा चोपजायते तस्मात् प्रेतक्रिया येन केनापि च कृता यदि न तां निवर्तयेत् प्राज्ञः सतां धर्ममनुस्मरन्निति आदिपुराणे पितृशब्दस्तथा चैव न प्रयुंजीत कर्हिचित् अनुशब्दं तथा चेह प्रयत्नेन विवर्जयेत् उपतिष्ठतामयं पिंडः प्रेतायेति समुच्चरेत् क्रियानिबंधे व्यासः प्रेताय पिंडदत्वात्तु ततोऽग्नीयाह्निनात्यये भविष्ये ओदनामिषसक्तूनां शाकमूलफलादिषु प्रथमेहनि यद्दद्यात् तद्दद्यादुत्तरेहनि गृहद्वारि श्मशाने वा तीर्थे देवगृहेपि वा यत्राद्यदीयते पिंडस्तत्र सर्वं समापयेत् ब्राह्मे शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रियते सदा द्वितीयेन तु कर्णाक्षीनासिकाश्च समासतः गलांसभुजवक्षांसि तृतीयेन यथाक्रमं चतुर्थेन तु पिंडेन नाभिलिंगगुदानि च जानुजंघे तथा पादौ पंचमेन तु सर्वदा सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः दंतलोमान्यष्टमेन वीर्यं तु नवमेन च दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः इति याज्ञवल्क्येन तु पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयमित्युक्तं अत्र फलतारतम्यं ज्ञेयमिति विज्ञानेश्वरः तेन त्र्यहाशौचपरत्वं दर्वयाज्ञिकोक्तं नित्यं आशौचस्य ह्रासेपि पिंडान् दद्याद्दशैवेति वचनात्तु दिनत्रयावश्यकत्वार्थमिति हारलतादयः शातातपः जलमेकादशाहमाकाशे स्थाप्यं क्षीरं च मृन्मये पारस्करः मृन्मये तां रात्रिं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीत्युदकं पिब चेदमिति क्षीरं इदं रात्रावेवेति गौडाः गारुडे तु अपक्वे मृन्मये पात्रे दुग्धं दद्याद्दिनत्रयमित्युक्तं हेमाद्रौ पाद्मे तु दशाहमुक्तं तस्मान्निधेयमाकाशे दशरात्रं पयो जलं सर्वतापोपशांत्यर्थं मध्वश्रमविनाशनं देवजानीयकारिकायां तत्र प्रेतोपक्लृप्तये दशरात्रमखंडितं कुर्यात् प्रदीपं तैलेन वारिपात्रं च मार्तिकं भोज्यात् भोजनकाले तु भक्तमुष्टिं च निर्वपेत् नामगोत्रे पासंबुध्या धरिण्यां पितृयज्ञवत् शातातपः भूलोकात् प्रेतलोकं तु

गंतुं श्राद्धं समाचरेत् तत्पाथेयं हि भवति मृतस्य मनुजस्य तु अथ दशाहमध्ये दर्शपाते निर्णयः माधवीये मध्ये चाशौचतंत्रस्तु यदि दर्शः प्रपद्यते समाप्य चोदकपिंडान्स्नानमात्रं समाचरेत् ऋष्यशृंगः आशौचमंतरा दर्शो यदि स्यात्सर्ववर्णिनां समाप्तिमेत तंत्रस्य कुर्यादित्याह गौतमः पैठीनसिः आद्ये दाहे एव कर्तव्या प्रेतपिंडोदकक्रिया द्विरेवं तु कुर्वाणः पुनः शावं समश्नुते मातापित्रोस्तु श्लोकगौतमः अंतर्दशाहे दर्शश्चेत्तंत्रं सर्वं समापयेत् पित्रोस्तु यावदाशौचं दद्यात्पिंडजलांजलीन् इदमपि त्र्यहमध्ये दर्शपाते तदूर्ध्वं दर्शे तु पित्रोरपि तंत्रं समाप्यमेव पित्रोराशौचमध्ये तु यदि दर्शः समापतेत् तावदेवोत्तरं तंत्रं पर्यवस्येत्त्र्यहात्परमिति गालवोक्तेः अन्येषां तु त्र्यहमध्येऽपि समाप्तिरिति पराशरमाधवीये निर्णयामृते चोक्तं कालादर्शेऽपि दर्शो दशाहमध्ये स्यादूर्ध्वं तंत्रं समापयेत् त्रिरात्रादुत्तरं पित्रोर्मृतावितिविनिश्चयः मदनपारिजाते तु गालवीयमापदनौरसपुत्रादिविषयं त्र्यहोर्ध्वमपि पित्रोर्न तंत्रसमाप्तिरित्युक्तं मदनरत्नेऽप्येवं ममतु देशाचाराद्व्यवस्थेति प्रतिभाति अथास्थिसंचयः तत्राश्वलायनेन तु कृष्णपक्षे एकादशी त्रयोदशी दर्शे युग्मा आषाढीफाल्गुनीप्रोष्ठपदाभिन्नर्क्षे उक्तं तदाशौचमध्ये संभवे तदूर्ध्वं च भागव्द्यात्करणे ज्ञेयं आशौचमध्ये तु मद[illegible]रत्ने संवर्तः प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह छंदोगपरिशिष्टे तु अपरेद्युस्तृतीये वा अस्थिसंचयनं भवेदिति द्वितीयेऽप्युक्तं विष्णुकात्यायनौ संचयनं चतुर्थ्यामिति माधवीये यमः सोमार्कमंदवारेषु तिथियुग्मे विवर्जयेत् वर्जयेदेकपादर्क्षे द्विपादर्क्षेऽस्थिसंचयं मृतातृजन्मनक्षत्रे त्रिपादर्क्षे विशेषतः ब्राह्मे चतुर्थे ब्राह्मणानां तु पंचमेऽहनि भूभृतां नवमे वैश्यजातीनां शूद्राणां दशमात्परं दशमेऽहनीति वा पाठः शौनकः पलाशेष्वस्थिदाहे च सद्यः संचयनं भवेत् काम्यमरणे तु तस्य त्रिरात्रमाशौचम्

द्वितीये त्वस्थिसंचय इत्युक्तं अंगिराः प्रेतीभूतं तथोद्दिश्य यः शुचिर्न करोति चेत् देवतानां तु यजनं तं शपन्त्यथ देवताः तद्विधिः स्वस्वसूत्रे भट्टकृतो ज्ञेयः हेमाद्रौ नागरखंडे त्रीणि संचयनस्यार्थे तानि वेश्म पुरस्सरं यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ततः संचयनस्यार्थे तृतीये श्राद्धमिष्यते अपरार्के मदनरत्ने च ब्राह्मे सद्यःशौचे त्र्येकाहे सद्यः संचयनं भवेत् त्र्यहाशौचे तृतीयेन्हि कर्तव्यस्त्वस्थिसंचयः तत्रैव श्मशानदेवतायागं चतुर्थे दिवसे चरेत् मृन्मयेषु च भांडेषु कुंभेषु रुचकेषु वा सपके भक्ष्यभोज्यैश्च पायसैः पानकैस्तथा फलैर्मूलैर्विनाद्यैश्च पूज्याः क्रव्याददेवताः धूपदीपस्तथा माल्यमर्घ्यं दपल्लवान्वितैः तत्र पात्राणि पूर्णानि श्मशानाग्रे समंततः निवेदयद्भिर्वक्तव्यं तैः सर्वैरनहूहुतैः नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा ये त्र श्मशाने देवाः स्युर्भगवंतः सनातनाः तेस्मत्सकाशाद्गृह्णंतु बलिमष्टांगमक्षयं प्रेतस्यास्य शुभान् लोकान् प्रयच्छंतु च शाश्वतान् अस्माकमायुरारोग्यं सुखं च ददतां चिरं एवं कृत्वा बलीन् सर्वान् क्षीरेणाभ्युक्ष्य वाग्यतः एवं दत्वा बलिं चैव दद्यात्पिंडत्रयं बुधः एकं श्मशानवासिभ्यः प्रेताय द्वितीयं तु मध्यमं तृतीयं तत्सखिभ्यश्च दक्षिणास्यः समादरात् ततो यज्ञियवृक्षोत्थां शाखामादाय वाग्यतः प्रेतस्यास्थीनि गृह्णाति प्रधानांगोद्भवानि च शिरसो वक्षसोः पाण्योः पार्श्वाभ्यां चैव पादतः पंचगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च प्रक्षिप्य मृन्मये भांडे नवेणाच्छादनं यत्नतः अरण्ये वृक्षमूले वा शकटे संस्थापयत्यपि गृहीत्वास्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ततः संमार्जनं भूमेः कुर्यं गोमयांबुभिः पूजां च पुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमादिति अथ तीर्थेस्थिक्षेपविधिः तत्रैव ततः स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले कश्चित्क्षिपति सत्पुत्रो दौहित्रो वा सहोदरः मातृकुलं पितृकुलं वर्जयित्वा नराधमः अस्थीन्यन्यकुलस्थस्य नी-

स्नाचांद्रायणंचरेत् तत्रैवब्रह्मांडपुराणे अस्थीनिमातापितृपूर्वजानांनयंतिगंगामपियेकथंचित् सद्बांधवस्यापिदयाभिभूतास्ते षांतुतीर्थानिफलप्रदानि स्नात्वाततःपंचगव्येनसिक्त्वाहिरण्यमध्वाज्यतिलैश्चयोज्य ततस्तुमृत्पिंडपुटेनिधायपश्यन्दिशंप्रेतगणोपगूढां नमोस्तुधर्मायवदन्प्रविश्यजलंसमेप्रीतइतिक्षिपेच्च उत्थायभास्वंतमवेक्ष्यसूर्यंसदक्षिणांविप्रमुखायदद्यात् एवंकृते प्रेतपुरस्थितस्यस्वर्गेगतिःस्यात्तुमहेंद्रतुल्या यमः गंगातोयेषुयस्यास्थिप्रक्षिप्यतेशुभकर्मणः नतस्यपुनरावृत्तिर्ब्रह्मलोकात्सनातनात् तथा अस्तगतेगुरौशुक्रे तथामासिमलिम्लुचे गंगायामस्थिनिक्षेपंनकुर्यादितिगौतमः दशाहांतर्नदोषः दशाहस्यांतरेयस्यगंगातोयेस्थिमज्जति गंगायांमरणाद्यादृक्तादृक्फलमवाप्नुयादिति मदनरत्नेह्यनूक्तेः शौनकः शौनकोहंप्रवक्ष्यामि-अस्थिक्षेपविधिंक्रमात् आदौग्रामाद्बहिर्गत्वास्नानंकुर्यात्सचैलकं प्रोक्षयेत्पंचगव्येनभुवंमंत्रैर्विचक्षणः गायत्र्याद्यैःपंचगव्य-मंत्रैर्निखातास्थिभूमिंप्रोक्षेदित्यर्थः उपसर्पादिभिर्मंत्रैःप्रार्थनंखननंतथा मृत्तिकोद्धरणंचास्थ्नांग्रहणंचयथाक्रमं उपसर्पेतिचतुर्भिर्मंत्रैः क्रमेणप्रार्थनादिज्ञेयं स्नातात्वास्थिशुद्धिंकुर्वीत एतोन्विंद्रेतिसूक्ततः स्पृष्ट्वास्पृष्ट्वाततःस्नानंपंचगव्येनशुद्ध्यति दशस्नानानिकुर्वीततत्तन्मंत्रैर्विचक्षणः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं भस्ममृन्मध्ववादीनिमंत्रतस्तानिवैदश कुशैःसंमार्जयेदस्थीन्यतोदेवेतिमंत्रतः एतोन्विंद्रंशुचिर्वेतिनतमंहइतीतिच पावमानीर्प्रमाग्नेचरुद्रसूक्तंयथाक्रमं एतैःकुशैर्मार्जनमूहेमश्मालंततःकुर्यात्पितॄनुद्दिश्ययत्नतः पिंडदानंप्रकुर्वीततंतश्चातिलतर्पणं अस्थिक्षेपागच्छेद अजिनंकंबलादर्भागोकेशाःशाणमेवच भूर्जपत्रंताडपत्रंसप्तधावेष्टनंस्मृतं हेमंचमौक्तिकंरौप्यंप्रवालंनीलकंतथा निक्षिपेदस्थिमध्येतुशुद्धिर्भवतिनान्य

थ्या ततोहोमंप्रकुर्वीततिलाज्येनविचक्षणः उदीरतेतिसूक्तेनहुनेदष्टोत्तरंशतं ततोगत्वाक्षिपेत्तीर्थेस्पर्शदोषोनविद्यते मूत्रंपुरीषाचमनंकुर्वन्नास्थीनिधारयेत् अन्नदशदानंवैतरणीऋणमोक्षपापधेनुदानमुक्तं दिवोदासीयेकाशीखंडे धनंजयोपिधर्मात्मामातृभक्तिपरायणः आदायास्थीन्यथोमातुर्गंगामार्गस्थितोभवत् पंचगव्येनसंस्नाप्यतथापंचामृतेनवै यक्षकर्दमलेपेनाक्षिस्वापुष्पैः प्रपूज्यच आवेष्ट्यनेत्रवस्त्रेण ततःपट्टांबरेणच ततःक्षौरसवस्त्रेणततोमांजिष्ठवाससा नेपालकंबलेनाथमृदाचाथविशुद्धया ताम्रसंपुटकेकृत्वामातुरंगान्यथोवहेत् व्यासः पट्टवस्त्रंचकौशेयंमांजिष्ठंश्वेतवस्त्रकं कंबलंशाणपट्टंच अजिनंचतथोत्तरं एषांविकल्पः अन्यस्त्वात्रविशेषस्त्रिस्थलीसेतौदिवोदासीयेचज्ञेयः संचयनोत्तरंश्राद्धंमाहाश्वलायनः श्राद्धमस्मैदद्युरितिस्मृत्यर्थसारे संचयनेकृतेमनुष्यलोकंगच्छतः पाथेयश्राद्धमामेनकार्यमिति अनुपनीतस्यनसंचयनं अथनवश्राद्धं पृथ्वीचंद्रोदयेगिराः प्रथमेन्हितृतीयेचपंचमेसप्तमेतथा नवमैकादशेचैवतन्नवश्राद्धमुच्यते शिवस्वामी नवश्राद्धानिपंचाहुराश्वलायनशाखिनः आपस्तंबाः षडित्याहुर्विभाषात्वितरेषुहि पंचएकादशाहिकंविनामरणाद्विषमेषुदिनेष्वेकैकंनवश्राद्धंकुर्यादानवमाद्यदिनवमंविच्छिद्येतैकादशेतत्कुर्यादिति मदनरत्ने बौधायनोक्तेः भविष्ये नवसप्तविशाराज्ञानवश्राद्धान्यनुक्रमात् आद्यंतयोर्वर्णयोस्तुषडित्याहुर्महर्षयः हेमाद्रौवृद्धवसिष्ठः अलब्धात्तुनवश्राद्धमेतत्तान्नैवमुच्यते अर्वाक्तुद्वादशाहस्यलब्धातरातिदुष्कृत अतःषडेवएतान्येवविषमश्राद्धानीत्युच्यंते नागरखंडेतु पंचमेसप्तमेतद्वदष्टमेनवमेतथा दशमैकादशेचैवनवश्राद्धानितानिचेत्युक्तं कात्यायनस्तु चतुर्थेपंचमेचैवनवमैकादशेतथा यदन्नदीयतेजंतोस्तन्नवश्राद्धमुच्यते प्रथमेसप्तमेचैवेत्या

यथाहव्यासपाठः बह्वृचानांतुनवश्राद्धंदशाहानिनवभिश्चंतुषड्ऋतूनित्युक्तं नारायणवृत्तौदीपिकायां प्रथमंतुयदाद्यंचतुर्थेदिने श्राद्धंपंचमसप्तमाष्टनवदिग्रुद्रेषुयुग्माद्विजेः प्रथमेह्नितृतीयेह्निपंचसप्तनवस्वपि द्वौद्वौपिंडौप्रदातव्यौशेषेष्वेकंतुविन्यसेत् एकोद्दिष्टसमश्राद्धेयथवपिंडश्चैकइतितद्वदित्यर्थः अत्रशाखाभेदाद्व्यवस्थाअपरार्के भविष्ये नवश्राद्धंत्रिपक्षंच षण्मासमासिकानिच नकरोतिसुतोयस्तुतस्याधःपितरोगताः वाराहे गतोसिदिव्यलोकंत्वंकृतांतविहितात्पथः मनसावायुभूतेनविप्रेत्वाहंनियोजये पूजयिष्यामिभोगैस्त्वामेवंविप्रंनिमंत्रयेत् आवाहनेपितत्रैवइहलोकंपरित्यज्यगतोसिपरमांगतिं मनसावायुभूतेनविप्रेत्वाहंनियोजयइति. तत्रैवबह्वृचपरिशिष्टे अनूदकमधूपंचगंधमाल्यविवर्जितं नवश्राद्धममंत्रंचपिंडोदकविवर्जितं उदकमर्घ्यःपिंडोदकंशुंधंतांपितरइत्यवनेजनादि एकोद्दिष्टेषुसर्वेषुनस्वधानाभिरम्यता नाग्नौकरणमंत्रश्च एकवाथतिलोदकं अनपत्येषुसर्वेषुनस्वधानाभिरम्यतां स्वस्त्यस्तुविसृजेदेवंसूक्तंप्रणववर्जितं एकोद्दिष्टस्यपिंडेतुअनुशब्दोनविद्यते पितृशब्दंनकुर्वीतपितृहाचोपजायते सपिंडनात्प्रागितिहेमाद्रिः तेनस्वधांप्रयुंजीतप्रेतश्राद्धेदशाहिके इतिकृत्यप्रयोगोक्तौ दशाहिकोक्तेरेकादशाहेस्वधाप्रयोगएवेतिहारलतापरास्ता रत्नावल्यां आशिषोद्विगुणाद्दर्भाजयाशीःस्वस्तिवाचनं पितृशब्दःस्वसंबद्धःशर्मशब्दस्तथैवच पात्रालंभोवगाहश्चउल्मुकोल्लेखनादिकं तृप्तिप्रश्नश्चविकिरःशेषप्रश्नस्तथैवच प्रदक्षिणाविसर्गश्चसीमांतगमनंतथा अष्टादशपदार्थांश्चप्रेतश्राद्धेविवर्जयेत् अत्रस्वधापितृनमःशब्दानांतिलोसीतिमंत्रेप्रेतशब्दोहेनतूष्णींवातिलावपनम् तूष्णीमर्घ्यदानं असुष्मैस्वाहेतिप्रेतनाम्नापाणिहोमः नाम्नाएकःपिंडः निनयनमंत्रेऊहः अनुमंत्रणा

३८

दित्तमंत्रकं अभिरम्यतामितिविसर्जनं "एवंनवश्राद्धवर्जंकोद्दिष्टेषु नवश्राद्धेत्वसंत्रकं सर्वमितिनारायणवृत्तिः क्रियानिबंधे उत्तानंस्थापयेत्पात्रमेकोद्दिष्टेसदाबुधः न्युब्जंतुपार्वणेकुर्यात्तस्योपरिकुशान्न्यसेत् नवश्राद्धंगृहेकुर्याद्वार्यायत्रतत्रापिवा सपिंडीकरणात्तानिप्रेतश्राद्धानियानिवै तानिस्युर्लौकिकेवह्नावित्याहत्वाश्वलायनः इदंसंभवेन्नेनकार्यं नवश्राद्धेषुयच्छिष्टंगृहपर्युषितंचयत् दंपत्योर्भुक्तशेषंचनतद्भुंजीतकर्हिचिदित्यंगिरोवचनलिंगात् द्वाभ्यांतदातुकृच्छ्राभ्यांशुद्धिःस्यात्तुविवेकिनामितिब्राह्मेउक्तं विप्रेतुनिर्णयामृतेकण्वः नवश्राद्धंमासिकंचयद्यदंतरितंभवेत् तत्तदुत्तरसातन्त्र्यादनुष्ठेयंप्रचक्षते हेमाद्रौलाघवः शावंतुसूतकेचेत्स्यात्तन्निशायांचमृतोतथा नवश्राद्धानिदेयानियथाकालंयथाक्रमं निशायामाशौचांतेत्र्यहहेद्रौ अन्वारोहणेतु नवश्राद्धानिसर्वाणिसपिंडीकरणंपृथक् एकएववृषोत्सर्गोगौरेकातन्नदीयते आशौचांत्याद्दिनेकार्यमुक्तमूब्राह्मे यस्ययस्यतुवर्णस्ययद्यत्स्यात्पश्चिमंत्विहः सतत्रवस्त्रशुद्धिंचगृहशुद्धिंकरोत्यपि समाप्यदशमंपिंडंप्रेतस्यैतुवाससी अंत्यानामाश्रितानांचत्यक्त्वास्नानंकरोतिच श्मश्रुलोमनखानांचयत्त्याज्यंतज्जहात्यपि गौरसर्षपकल्केनतिलकल्केनसंयुतं शिरःस्नानंततःकृत्वातोयेनाचम्यवाग्यतः वृषभंगांसुवर्णंचस्पृष्ट्वाशुद्धोभवेन्नरः क्रियानिबंधेगृह्यकारिकायां अन्नपिंडत्रयंदद्युस्तत्सखिभ्यस्तथादिमं प्रेतायमध्यमंतद्वत्तृतीयंचयमायवै तथा कर्मांतमार्थिताःसंतोज्ञातिसंबंधिबांधवाः दद्युरभ्यगतःपूर्वंत्रींस्त्रीन्धर्मोदकांजलीन् पूर्ववन्नासगोत्राभ्यांनियमोनेहकश्चन मदनरत्नेविष्णुहारितौ आशौचांतेकृतश्मश्रुकर्माणस्तिलकल्कैःसर्षपकल्कैर्वास्नाताः शुक्लवाससोगृहंप्रविशेयुस्तत्रशांतिकंकृत्वाब्राह्मणपूजनंकुर्युरितिदेवलः

दशमेह्नि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् तत्रत्याज्यानि वासांसि केशश्मश्रुनखानि च अपरार्के बृहस्पतिः नवमे वाससां त्यागो नखरोम्णां तथांतिमे तत्रैव व्यासः आशौचांत्यदिने क्षौरं जनन्याश्च गुरौ मृते एतत् प्रेताल्पवयसामित्याहापस्तंबः अनुभाविनां च परिवपनमिति अनुभाविनः कनिष्ठा इति विज्ञानेश्वररत्नाकरादयः आशौचमनुभवता पुंसा सर्वाशौचेषु मुंडनं आज्ञया नरपतेर्द्विजन्मना दारकर्मसु नूनसूतकेषु च बंधमोक्षमथ दीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोडुषु इति रत्नमालोक्तेजननाशौचेपीति शुद्धितत्त्वादयः अत्र देशाचारतो व्यवस्था परिशिखावर्जं केशश्मश्रुनखलोमानि वापयीत शिखावर्जमिति गोभिलोक्तेः यत्त्वापस्तंबः न समावृत्ता वपेयुरन्यत्र विहारादित्येके विहारो दर्शादियागः तेन विना समावृत्ता गृहस्था न वपेयुरित्यर्थः यच्च श्रुत्या छिनत्ति यः केशान् तमाहुर्ब्रह्मघातिनमिति तत् केशश्मश्रु धारयतामग्र्या भवति संततिरिति दानधर्मोक्तकाम्यपरं अनुभाविनः पुत्रादय इत्येके पुत्रः पत्नी च वपनं कुर्यात् तेयथाविधि पिंडदानोचितोन्योपि कुर्यादित्थं समाहित इत्यपरार्के व्यासोक्तेः यत्तु मिताक्षरायां द्वितीयेहनि कर्तव्यं क्षौरकर्म प्रयत्नतः तृतीये पंचमे वापि दशमे वाप्रदानत इति आप्रदानत इति चतुर्थादीनि तत्प्रथमदिने संभवे ज्ञेयं अलुप्तकेशो यः पूर्वं सोत्र केशान् प्रवापयेत् द्वितीयेह्नि तृतीयेह्नि पंचमे सप्तमेपि वा यावच्छ्राद्धं प्रदीयते तावदित्यपरं मतमिति माधवीये मदनरत्ने च बोधायनोक्तेः मदनपारिजाते तु दशमे प्रथमे च समुच्चय उक्तः यत्तु दशमपिंडस्तुत्सृज्य रात्रिशेषे शुचिर्भवेदिति तदेकादशाहश्राद्धांगविप्रनिमंत्रणार्थं ज्ञेयं अथैकादशाहः मनुः विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधैः वैश्यः प्रतोदरश्मीन् वा यष्टिं शूद्रः कृतक्रियः शुद्धितत्त्वे देवलः आद्याहःसु निवृत्तेषु सुस्नाताः कृतमंगलाः ३९

आशौचाद्विजमुच्यंते ब्राह्मणान् स्वस्ति वाच्य च याज्ञवल्क्यः आद्यमेकादशेहनि क्षत्रियाद्यैराशौचेप्येकादशेह्नि श्राद्धं कार्यम् आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि कर्तुस्तात्कालिकी शुद्धिरशुद्धिः पुनरेव स इति हेमाद्रौ शंखवाक्ये: पैठीनसिः एकादशेह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतं चतुर्णामपि वर्णानां सूतके तु पृथक् पृथक् यत्तु मरीचिः आशौचांते ततः सम्यक्पिंडदानं समाप्यते ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिरिति तत्सर्ववर्णानां दशाहाशौचपरं यत्तु विष्णुः अथाशौचापगमइति गृह्यगौडग्रंथे हारीतः शौचभूत एकोद्दिष्टं कुर्यात् यच्चवैजवापः ऊर्ध्वं दशम्या अपरेद्युरिति तद्विप्रविषयं एतेन दशमपिंडापकर्षपक्षे अवयवपिंडासमाप्तौ कथमेकादशाहे श्राद्धमिति सूरवोक्तिः परास्ता वचनादाशौचमध्य इव तत्राप्यविरोधात् भविष्ये एकादशभ्यो विप्रेभ्यो दद्यादेकादशेह्नि भोजनं तत्र वै कस्मै ब्राह्मणाय महात्मने यत्तु मात्स्ये एकादशेहनि तथा विप्रानेकादशैव तु क्षत्रादिः सूतकांते तु भोजयेदयुजो द्विजानिति तद्वद्गणश्राद्धपरमिति मदनपारिजातः गौडास्तु तस्माद्वचनात् क्षत्रियादेर्नामाशौचांत एवेत्याहुः रामायणेपि समतीते दशाहे तु कृतशौचो यथाविधि चक्रे द्वादशिकं श्राद्धं त्रयोदशिकमेव च द्वादशिकं द्वादशाहेन निवर्त्यत्रयोदशाहे श्राद्धं त्रयोदशिकं चतुर्दशाहविधेयं सपिंडन पाद्मे यादि क्षत्रियाणां द्वादशाहाशौचे त्रयोदशे ह्येकोद्दिष्टं चतुर्दशे सपिंडनम् द्विविधवाक्यादेकादशाहाशौचांतयोर्विकल्प इत्यन्ये सद्यःशौचादौ युद्धहतादेरेकादशाहः अन्यथा आशौचांत इति वयं कौर्मे एकादशेह्नि कुर्वीत प्रेतमुद्दिश्य भावतः द्वादशे वाह्नि कर्तव्यमनिंद्येप्यथवाहनि नित्यं प्रेतक्रियाकालयुक्तं एकादशात्तु न निषेध इत्युक्तं प्राक् बृहस्पतिः वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकं गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्रे तदर्पयेत् श्रोत्रिया

भोजनीयास्तु नवसप्तत्रयोदश जातयोबांधवानिःस्वास्तथान्यातिथयोपरे देवयाज्ञिकनिबंधे एकादशश्राद्धविप्रेषु प्रेतमावाह्य भोजयेत् तत्राद्याय च शय्यादि दद्यादाद्यमिति स्मृतं विष्णुः एकवन्मंत्रानूहेनैकोद्दिष्टे बहुवचनांतानेकवचनांतान्वदेदित्यर्थः एतदहश्चार्थत्वे अस्य विशेषो गौणकालमाह हेमाद्रौ बौधायनः एकोद्दिष्टश्च एवस्याद्वादशाहनिवासुनः अतऊर्ध्वमयुग्मेषु कुर्वीताहः स्वशक्तितः अर्धमासेऽथवा मासि ऋतौ संवत्सरेऽपि वेति तत्रैव लघुहारीतः एकोद्दिष्टं तु कुर्वीत पाकेनैव सदा स्वयं अभावे पाकपात्राणां तदहः समुपोषणम् गोभिलः ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा पुनश्च भोजयेद्विप्रान्द्विरावृत्तिर्भवेदिति एतदाद्यमासिकाद्याब्दिकयोः सिद्ध्यर्थमिति भट्टाः तेन महैकोद्दिष्टं षोडशश्राद्धाद्भिन्नमेव अत एवाद्यं सर्वैकोद्दिष्टप्रकृतिभूतमेकादशाह इति विज्ञानेश्वरः अन्ये त्वाद्यमासिकाब्दिकयोराद्यमेकादशाहनीति नियमाद्भेदमाहुः द्वयोस्तंत्रलबाधार्थं गालवीयमित्यन्ये युक्तं हतादौ तु हेमाद्रौ पृथ्वीचंद्रोदये पैठीनसिः सद्यःशौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि स एव दिवसस्तस्य श्राद्धशय्यासनादिषु एवमेकादशाहादौ अतोऽत्र द्वितीयेऽह्न्येकादशाहं वदन् ढौढूः शूलपाणिः स्मार्तगौडश्च परास्तः एतेनाद्यमेकादशेऽहनीत्याशौचानंतरदिनपरमिति विष्णूक्तेः प्रागुक्तशंखादिवचनानां चानाकरत्वादिति वदंतः कल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबंधविरोधादुपेक्ष्याः उशनाः त्र्यहाशौचेऽपि कर्तव्यमाद्यमेकादशेऽहनि अतीतविषये सद्यस्त्र्यहोर्ध्वं वा तदिष्यते याज्ञवल्क्यः एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितं त्वपसव्यवत् उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने अभिरम्यतामिति वदेयुस्तेऽभिरताः स्मह इति अग्नौकरणनिषेधोऽन्यपरः बह्वृचानां सर्वैकोद्दिष्टेषु तद्भवत्येव स्वकृतभाक् स्वदितमिति तृप्तिप्रश्न इति कात्यायनः प्रथमे पात्रे संस्रवानित्यस्य

तृतीयेणापिधानस्यचवाधान्नपात्रस्युञ्जतेतिशूलपाणिः प्रचेताः नात्रपात्रालंभोनाशिषःप्रार्थयेत् अन्नविशेषोहेमाद्रौवाराहे श्मश्रुकर्मतुकर्तव्यंनखच्छेदस्तथैवच स्नपनाभ्यंजनंदद्याद्विप्रायविधिपूर्वकं तथा उपवेश्यासनेभद्रे छत्रंतत्रप्रकल्पयेत् पश्चादुपानहौदद्यात्सर्वाण्याभरणानिच विष्णुः दक्षिणांतश्राद्धमुक्त्वा दत्ताक्षय्योदकेषुचतुरंगुलपृथ्वीस्तावदंतरालास्ता-वदधःखातावितस्त्यायतास्तिस्रः कर्षूःकुर्यात् कर्षूणांसमीपेग्निमाधायपरिस्तीर्यैकैकस्मिन्नाहुतित्रयंजुहुयात् सोमाय पितृमतेस्वधानमोऽग्नयेकव्यवाहनाययमायांगिरस्वते इतिस्थानत्रये प्राग्वत्पिंडनिर्वपणंदधिमधुघृतमांसैः कर्षूत्रयंपूरयित्वैत-त्तइतिजपेत् शेषंनवश्राद्धवत् अत्रसाग्नेरप्यंतेवैश्वदेवइत्युक्तंप्राक् इदंदशाहकर्त्रापुत्रेणवाकार्यमित्युक्तं क्रियानिबंधपू-त्यकारिकायांतिलोसिप्रेतदेवत्यःप्रेतलोकान्हिनोतकं मंत्रमुक्त्वातिलानेवंप्रक्षिपेदर्घ्यपात्रतः दक्षिणामुदकुंभंच सान्नंदत्वातथै-वगा तस्मैदद्याद्भुक्तशेषंतद्भांडान्यपिभाजनं विप्राभावेग्नावेकोद्दिष्टं अग्नौपायसंश्रपयित्वाज्यभागानंतदग्नंश्यान्दूप्रयोगछुला-ग्नौप्रेतमावाह्यगंधाद्यैःसंपूज्य पृथिवीतेपात्रमित्यादिनान्नसंकल्प्योदीरतामवरइत्यृचाभिश्चतुश्छत्ताभिर्द्वाविंशदाहुतीर्हुत्वापिं-डदानादिश्राद्धंसमापयेदिति याज्ञवल्क्यः एतत्सपिंडीकरणमेकोद्दिष्टंस्त्रियामपि अथवृषोत्सर्गः सचनित्यकाम्यः नक-रोतिवृषोत्सर्गंसुतीर्थेवाजलांजलिम् नददातिसुतोयस्तुपितुरुच्चारएवसः उच्चारःपुरीषं एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् यजेतवाश्वमेधेननीलंवावृषमुत्सृजेदितिमत्स्यकौर्मोक्तेः एकादशाह्निप्रेतस्ययस्यनोत्सृज्यतेवृषः प्रेतत्वंसुस्थिरंतस्यदत्तैःश्रा-द्धशतैरपीति षट्त्रिंशन्मतेनिंदाश्रुतेः एवंकृत्वात्ववाप्नोतिफलंवाजिमखोदितं यमुद्दिश्योत्सृजेन्नीलंसल्लभेतपरांगतिं वृषो-

स्पृष्टः पुनात्येव दशातीतान्दशापरानिति देवीपुराणे भविष्यादौ फलश्रुतेश्च अयं द्वादशाहे उक्तो भविष्ये चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशेऽह्नि वेति विष्णुधर्मे तु सप्तमाहेप्युक्तः विषुवद्वितये चैव मृताहे बांधवस्य चेति अयं गृहे न कार्यः न गृहे मोचयेन्नीलं कामयन्पुष्कलं फलमिति कालिकापुराणात् कामधेनौ वत्सराभ्यंतरे पित्रोर्वृषस्योत्सर्गकर्मणि वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत् तल्लक्षणं तु ब्राह्मे लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते श्वेतवर्णस्य मुखादीनि श्यामानि श्यामस्य वा श्वेतानि यस्य सोपि नील उक्तो मात्स्यादौ देवीपुराणे चतस्रो वत्सिका भद्रा द्वे वा संभवतोऽथवा यत्तु पठंति वृषोत्सर्जनवेलायां वृषाभावे कथंचन पिष्टैः पिष्टैश्च दर्भैर्वा वृषं कृत्वा विमोचयेत् न शक्यते वृषोत्सर्गो ह्यसंपातत्प्रकारयेदिति तन्निर्मूलं तद्विधिर्हेमाद्रौ प्रपंचतो ज्ञेयः अत्र दैवयाज्ञिकेन वृषोत्सर्गात्पूर्वं पुरुषसूक्तेन विष्णुरूपप्रेतोद्देशेन विष्णुतर्पणमुक्तं तत्र मूलं चिंत्यं पारस्करः सव्येन पाणिना पुच्छं समालभ्य वृषस्य तु दक्षिणेनाप आदाय सतिलाः सकुशास्ततः प्रेतगोत्रं समुच्चार्य अमुकस्मै इति ब्रुवन् वृष एव मया दत्तस्तं तारयतु सर्वदा सहेमसतिलं भूमौ विसृजेच्चार्घ्यविनिक्षिपेत् तथा विधारयेन्न तं कश्चित् न च कश्चन वाहयेत् न दोहयेच्च तां धेनूर्न च कश्चन बंधयेत् स्त्रीषु विशेषः संग्रहे पतिपुत्रवती नारी भर्तुरग्रे मृता यदि वृषोत्सर्गं न कुर्वीत गां दद्याच्च पयस्विनीं पतिपुत्रयोः साहित्यं विवक्षितं अन्वारोहणेपि गोदानमेवेत्युक्तं प्राक् आशौचांतरेपि वृषोत्सर्गाद्य मासिकश्राद्धादि दद्यादेवेत्युक्तं क्रियानिबंधे स्मृत्यंतरे सूतके मृतके चैव द्वितीये मृतके यदि पिंडदानं प्रकुर्वीत वृषोत्सर्गं तथैव च न हन्यात्सूतकं कर्म द्वादशैकादशाहिकं शुद्धो वा यदि वाशुद्धः कुर्यादेवाविचारयन्निति अत्र पददानमुक्तं देवजानीये गा

रुडे एकादशाहंप्रक्रम्य तदन्हिदीयतेसर्वंद्वादशाहेविशेषतः पदानिसर्ववस्तूनिवरिष्ठानित्रयोदश योददातिमृतस्येहजीवतोप्यात्महेतवे सुखीभूत्वामहामार्गेवैनतेयसगच्छति तथा आसनोपानहौछत्रंमुद्रिकाचकमंडलुः भाजनंभाजनाधारोवस्त्राण्यष्टविधंपदं तथा भाजनासनदानेनमुद्रिकाभोजनेनच आज्ययज्ञोपवीतेनपदंसंपूर्णतांव्रजेत् महिषीरथगोदानात्सुखीभवतिनिश्चितं सर्वोपस्करसंयुक्तानिपदान्यत्रत्रयोदश योददातिमृतस्येहजीवन्नप्यात्महेतवे सगच्छतिपरंस्थानंमहाकष्टविवर्जितः त्रयोदशपदानीत्थंप्रेतायैकादशेहनि दातव्यानियथाशक्तितेनासौप्रीणितोभवेत् अन्नंचैवोदकंचैवोपानहौचकमंडलुः छत्रंवस्त्रंतथायष्टिर्लोहदंडंतथाष्टमं अग्नीष्टिकांचदीपंचतिलास्ताम्बूलमेवच चंदनंपुष्पदानंचोपदानानिचतुर्दश योश्वंरथंगजंवापिब्राह्मणेप्रतिपादयेत् स्वमहिम्नोनुसारेणतत्तत्सुखमवाप्नुयादिति अन्नमूलमिदं अथशय्यादानं हेमाद्रौभविष्ये तस्माच्छय्यांसमासाद्यसारदारुमयींदृढां दंतपत्रचितांरम्यांहेमपट्टैरलंकृतां हंसतूलीप्रतिच्छन्नांशुभगंडोपधानिकां प्रच्छादनपटीयुक्तांगंधधूपादिवासितां तस्यांसंस्थापयेद्धैमंहरिंलक्ष्म्यासमन्वितं अत्रहरिस्थानेप्रेतं उच्छीर्षकेघृतभृतंकलशंपरिकल्पयेत् ताम्बूलकुंकुमक्षोदकर्पूरागरुचंदनं दीपिकोपानहौछत्रचामरासनभाजनं पार्श्वेषुस्थापयेद्भक्त्यासप्तधान्यानिचैवहि शयनस्थस्यभवतियदन्यदुपकारकं भृंगारकरकाद्यंतुपंचवर्णवितानकं मंत्रस्तु यथानकृष्णशयनंशून्यंसागरजातया शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि यस्मादशून्यंशयनंकेशवस्यशिवस्यच अर्धंतदेवदत्त्वैवतस्यसकलमपिपत्यविसर्जयेत् एकादशाहपितथाविधिरेषप्रकीर्तितः विशेषंचात्रराजेन्द्रकथ्यमानंनिशामय तेनोपस्कृत्यतुकिं

निद्रस्य वाहनभाजनं यच्चादृष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् तमेव पुरुषं हैमं तस्यां संस्थापयेत्तदा पूजयित्वा प्रदातव्या मृतशाय्या यथोदिता पाद्मे मृतकान्ते द्वितीयेऽह्नि शय्यां दद्यात्सलक्षणां काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्वितं संपूज्य द्विजदांपत्यं नानामणिविभूषितं उपवेश्य तु शय्यायां मधुपर्कं ततो वदेत् रजतस्य तु पात्रेण दधिदुग्धसमन्वितं अस्थिलालाटिकं गृह्य सूक्ष्मं कृत्वा सपायसं भोजयेद्द्विजदांपत्यं विधिरेषः सनातन एष एव विधिर्दृष्टः पार्वतीये द्विजोत्तमैः एतत्प्रति ग्रहे तन्त्रे वोक्तम् गृहीता या तु तस्यां वै पुनः संस्कारमर्हति शय्यादानफलं भविष्ये स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा सुखं वसत्यसौ जन्तुः शय्यादानप्रभावतः आभूतसंप्लवं यावत्तिष्ठत्यातंकवर्जितमिति अथोदकुंभः हेमाद्रौ स्मृतिसमुच्चये एकादशाहात्प्रभृति घटस्तोयान्नसंयुक्तः दिने दिने प्रदातव्यो यावत्संवत्सरं सुतैः लौगाक्षिः यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत् मासिकं चोदकुंभं च देयं तस्यापि वत्सरं उत्तरार्धे तस्याप्यन्नं सोदकुंभं दद्यात् संवत्सरं द्विजे इति याज्ञवल्क्यपाठः सपिंडनापकर्षे स्यापकर्षप्राप्ते बाधकमिदमिति शूलपाणिः तन्न प्रकृतिविकाराभावेन तदन्त्यायविषयत्वात् मात्स्ये यावदब्दं च यो दद्यादुदकुंभं विमत्सरः प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् केचित्त्वयोदशाहमारभ्याहुस्तन्निर्मूलं देवयाज्ञिकः सपिंडनापकर्षे संवत्सरं यावदुदकुंभमर्वागेव दद्यान्नोर्ध्वं प्रेतलोकगतस्यान्नं सोदकुंभं प्रयच्छतेति गोविंदराजधृतविष्णूक्तेः अन्नं चैव यथाशक्त्या तु संख्यां कृत्वाब्दिकावधि दातव्यं ब्राह्मणे स्कंद घटादीनि क्रमं तु वा अपि श्राद्धशतैर्दत्तैरुदकुंभं विना नराः दरिद्रा दुःखिनस्तात भ्रमंति च भवार्णवे तेनापकृष्य दातव्यं प्रेतस्याप्युदकुंभकमिति गोभिलभाष्ये स्कांदाच्च सपिंडनात्प्रागेव तस्य विधानादूर्ध्वं निषेधादित्याह तन्न उदकुंभे पार्व-

णविधिनानुपपत्तेरेवं व्याख्यायां मानाभावान्मिताक्षरादिविरोधाच्च वचनं यदि समूलं तदाहृत्त्वावपकर्षविधन्ते प्रेतश्राद्धानि सर्वाणि
सपिंडीकरणं तथेति हेमाद्रौ शाट्यायनोक्तेः तस्याप्यन्नं सोदकुंभमिति याज्ञवल्क्यविरोधाच्च मदनरत्ने गौतमः अदैवं पार्व
णं श्राद्धं सोदकुंभमधर्मकं कुर्यान्मृत्याब्दिकाच्छ्राद्धात्संकल्पविधिनान्वहं अधर्मकं ब्रह्मचर्यादिनियमहीनं एतन्मासिकवदेको
द्दिष्टं पार्वणं कार्यं अपरार्के स्तु सपिंडीकरणे वृत्ते पृथक्त्वेनोपपद्यते पृथक्कृते तु कृते पश्चात्पुनः कार्या सपिंडतेति लघुहारीतोक्ता
वपि तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विज इति याज्ञवल्कीये तस्येत्येकवचनोक्तेः सपिंडनानंतरमप्येकोद्दिष्टमेवेत्याह अन्न-
पिंडदानं कृताकृतं अहरहरन्नमस्मै ब्राह्मणायोदकुंभं च दद्यात् पिंडमप्येके निपृणंतीति हेमाद्रौ पारस्करोक्तेः आद्याशक्तौ पिंडमा
त्रमिति गौडाः तन्न अपिशब्दबाधापत्तेः हारीतः मृते पितरि वै पुत्रः पिंडमब्दं समाचरेत् अन्नकुंभं च विप्राय प्रेतनिर्देशधर्म
तः प्रेतशब्दोच्चारणेनेति हलायुधः तत्राप्येतस्य निर्देशो यत्र तदेकोद्दिष्टतद्धर्मकमित्यर्थः अत्राशौचांतदिनाद्यब्दांतं यावद्वत्स
रापूर्तेः शौचं नाधिकारिविशेषणं तेन मृतिदिनमारभ्यैतत्कार्यमिति केचित् तन्न हेमाद्रिधृतवचोविरोधात् मध्ये आशौचादि-
नाबाधे तु लोप एव दार्शवत् तस्याप्यमाब्दं दीपदानमुक्तं देवजानीये गारुडे प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः यावत्संवत्सरं वा
पि प्रेतस्य स्वर्गलिप्सया आद्युरवादव्रत दीपं देवागारे द्विजालये कुर्याद्धाम्यसुरवीपिन्त्ये अद्भिः संकल्प्य संस्थितं अथ मासिका
नि तानि चक्रत्वेव सपिंडनं कार्यं तथा गोभिलः लौगाक्षी श्राद्धानि षोडशादत्वा नैव कुर्यात्सपिंडनं श्राद्धानि षोडशापाद्य विदधी
त सपिंडनं तानि निर्वाह्यजातु कूपर्यः द्वादश प्रतिमास्यानि आद्यषाण्मासिकं तथा त्रैपक्षिकाब्दिके चाति श्राद्धान्येतानि षोडश श्रा

द्यषाण्मासिकाब्दिकशब्दाः ऊनमासिकोनषष्ठोनाब्दिकपराः हेमाद्रौतुसपिंडीकरणंचैवइत्येतच्छ्राद्धषोडशमित्यनन्तरार्द्धे पाठः तदा आद्यमूनमासिकं द्वादशाहे षाण्मासिकंऊनषष्ठोनाब्दिकेइत्यर्थः कात्यायनस्त्वन्यथाह द्वादशप्रतिमास्यानि आद्यषाण्मासिकेनथा सपिंडीकरणंचैवइत्येतच्छ्राद्धषोडशम् एकाहेनतुषण्मासायदास्युरपिवात्रिभिः न्यूनाःसंवत्सराश्चैवस्यातां षण्मासिकंतदा द्विवचनादूनषष्ठोनाब्दिकेइत्यर्थमाह पृथ्वीचंद्रः व्यासस्त्वन्यथाह द्वादशाहेत्रिपक्षेच षण्मासेमासिकाब्दिके श्राद्धानिषोडशैतानिसंस्मृतानिमनीषिभिः द्वादशाहपदमूनमासिकपरं तस्यद्वादशाहेप्युक्तेरितिकालादर्शः मदनरत्नेश्राद्धेत्वन्यथोक्तं मृतानांतुल्यकर्तृहानांश्राद्धाः षोडशसर्वदा चतुर्थेपंचमेचैवनवमैकादशेतथा ततोद्वादशभिर्मासैःश्राद्धाद्वादशसंख्ययेति चतुर्थादीनिदिनानि भविष्येत्वन्यथोक्तं अस्थिसंचयनंश्राद्धंत्रिपक्षेमासिकानितु रिक्तयोश्चतथातिथ्योःप्रेतश्राद्धानिषोडशेतिरिक्तयोस्तिथ्योरितिन्यूनषष्ठोनाब्दिकपरमितिहेमाद्रिःअत्रदेशकुलशाखाभेदाद्व्यवस्थेतिसर्वनिबंधाः गालवः ऊनषाण्मासिकंषष्ठेमासेवान्यूनमासिकं त्रैपक्षिकंत्रिपक्षेस्यादूनाब्दंद्वादशेतथा ऊनमासिकेतुगोभिलः मरणाद्द्वादशाहेस्यान्मासेन्यूनेचोनमासिकं मदनरत्नेकालादर्शेच श्लोकगौतमः एकद्वित्रिदिनैरूनेत्रिभागेनोनएववा श्राद्धान्यूनाब्दिकादीनिकुर्यादित्याहगौतमः क्रियानिबंधेऋतुस्तु सार्द्धएकादशेमासेसार्द्धेवैपंचमेतथा ऊनाब्दमूनषण्मासमथवात्राऋक्षकर्मणी इत्युक्तंतत्रमूलंचिंत्यम् ऊनेषुवर्ज्यान्याहमरीचिः द्विपुष्करेच नंदासुसिनीवाल्यांभृगोर्दिने चतुर्दश्यांचनोनानिकृत्तिकासुत्रिपुष्करे ज्योतिषे त्रिपादर्क्षतिथिर्भद्राभौमेज्यरविभिःसह तदात्रिपुष्करयोगोद्व्योर्योगेद्विपुष्करः गालवः त्रिभिर्वादिवसैरूनेत्वेकेनद्वितयेनवा आद्यादिषुचमासेषुकुर्यादूनाब्दिकादिकम्

एकन्यूनपक्षे पंचम्यां मृतस्य तृतीयायां त्रिभिर्न्यूने प्रतिपदि द्व्यूने द्वितीयायामिति केचित् माधवस्तु षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेवते मासिकानि स्वकीये तु दिवसे द्वादशेपि चेति पैठीनसिवाक्ये ऊनषाण्मासिकं सप्तममासगतमृताहात् पूर्वेद्युः कार्यं ऊनाब्दिकं तु द्वितीयाब्दे मृताहदिनात् पूर्वेद्युः कार्यमित्यर्थमाह मासिकानि स्वकीये तु दिवसे इत्युक्तेः इदमेव युक्तं मदनरत्नेप्येवं याज्ञवल्क्यः मृतेहनि तु कर्तव्यं प्रति मासं तु वत्सरं प्रतिसंवत्सरं चैवमाद्यमेकादशेहनि अत्राद्यमासिकमाब्दिकं चैकादशेह्नीति निर्णयामृतादयः ब्राह्मणभोजदाद्ये होतव्यमनलेथवा पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति गोभिलीयं च तद्विषयमाहुः अन्ये तु मासपक्षतिथिस्पृष्टे इत्यादिविरोधादाब्दिकं वर्षांतमेव मासिकं तु मासादौ द्विरावृत्तिस्तु एकादशाहिकाद्यमासिकपरा देवयाज्ञिकोप्येवमाह लौगाक्षिरपि मासादौ मासिकं कार्यमाब्दिकं वत्सरे गते आद्यमेकादशे कार्यमधिके त्वधिकं क्षयेतु दीपिकायां तु आद्यं कुर्यान्मृते कंसमितदिने वा स्यादित्युक्तं गौडास्तु मृततिथ्यवधिके एकदिनाधिके माससंवत्सरपदं गौणं पूर्णेब्दे इति ईषदसमाप्तपरत्वमिति शूलपाणिः तेन द्वितीयमासादावाद्यमासिकादीनि तन्मोरस्थं हृतं प्रशक्तोतु हारीतः मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति द्वादशाहेन वा भोज्या एकाहे द्वादशापि वा ऋतुं प्रति द्वे द्वे इत्यर्थः यदा पितुर्मरणात्त्रयोविंशतितमे दिने दर्शो वृद्धिर्वा स्यात्तदा द्वादशादिनेषु द्वादशमासिकानि कार्याणीत्यर्थः त्रैपक्षिकं तु त्रिपक्षे तीते मृताहे कार्यं त्रैपक्षिकं भवेद्धन्ते त्रिपक्षे न तदनंतरमिति भविष्योक्तेरिति मदनरत्ने उक्तं पृथ्वीचंद्रकालादर्शनिर्णयामृतादयस्तु ऊनान्यूनेषु मासेषु विषमाहस्समोपि वा त्रैपक्षिकं त्रिपक्षे स्यान्मृताहस्त्वितराणि त्विति कार्ष्णाजिनिस्मृतेः पूर्वत्रहन्तेत्रहन्ते इत्यर्थमाहुः तेन दनंतरशब्दविरोधात् त्रैपक्षिकद्वितीयमासिकयोः संकरापत्तेरेवंव्या-

ख्यायां मानाभावाच्चोपेक्ष्याः त्रिपक्षसपिंडनेप्येवं शब्दाभावादधिकरणत्वमेवज्ञेयं यत्तु क्रियानिबंधे गारुडे त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते
विषमेदिने मासिकान्यपि चोनानिअष्टाविंशतिमेदिने इति तन्निर्मूलम् स्मृतिरत्नावल्यां द्वादशाहे यदा कुर्यात्पितुः पुत्रः स
पिंडनं एकादशेन्हि कुर्वीत प्रेतश्राद्धानि षोडश पैठीनसिः सपिंडीकरणादर्वाक् कुर्वन्श्राद्धानि षोडश एकोद्दिष्टविधानेन कु
र्यात्सर्वाणि तानि तु सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि मदनरत्ने कात्यायनः श्रा
द्धमग्निमतः कार्यं दाहादेकादशेहनि ऊवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा ऊवाणि त्रैपक्षिकादूर्ध्वानि क्रियानिबंधे गारुडे
त्रिपक्षात्पूर्वतः साग्नेर्भवेत्संस्कारवासरे ऊर्ध्वं मृतदिनेनग्नः सर्वाण्येवमृताहतः एतानि च यदा सपिंडनात्पूर्वं युगपत्कुर्या-
त्तदा देशकालकर्तैक्यतंत्रत्वादेकः पाकइति केचित् पाकभेदइति भट्टचरणाः अत्र केचिदाहुः देशकालदेवतैक्यतंत्रत्वात् श्राद्ध
कालातिक्रमापत्तेर्द्वादशाहेथसर्वाणि संक्षेपेण समापयेत् तान्येव तु पुनः कुर्यात्प्रेतशब्देन कारयेत् इति कात्यायनोक्तेनैकश्राद्धद्व
यं कुर्यात् समानेहनि कुत्रचिदित्यस्य देवतैक्यपरत्वेप्यत्र तत्सवा श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न कारयेदिति जाबाल्युक्तेः षोडशसं
ख्यायामश्ववाजपेये प्राजापत्ययागसप्तदशत्ववत्सान्नाय्यस्यागादित्ववच्च दर्शपातसंक्रांतिश्राद्धवत् युगपदनुष्ठानेप्युपपत्तेराद्यमा
सिकाद्यूनाब्दिकांतेषु षोडशश्राद्धेषु विचक्षणः क्रियतामित्येवं प्रयोगेणैकोविप्रः पिंडोर्घ्यश्चेति विरुद्धविधिविध्वंसेप्येवं तन्मं
दं द्वादशाहे नवा भोज्या एकाहे द्वादशापि वेति हेमाद्रौ हारीतवचोविरोधात् तेनविप्रभेदात्पिंडार्घ्याद्यपिभिन्नमितिसिद्धं ए
तानि द्वादशाहादौ सपिंडनात्पूर्वं कृतान्यपि वृद्धिं विनापकर्षे पुनः स्वकाले कार्याणि यस्य संवत्सरादर्वाक्सपिंडीकरणं कृत मासिकं

चोदकुंभंचदेयंतस्यापिवत्सरमितिमदनरत्नेंगिरसोक्तेः नचेदंमासिकानामपकर्षविधत्तेकिंतुसपिंडनोर्ध्वंस्वकालेनुष्ठानमेवेतिवाच्यं श्राद्धानिषोडशादत्वानतुकुर्यात्सपिंडतामितिविरोधात् यस्यसंवत्सरादर्वाक्विहितातुसपिंडता विधिवत्तानिकुर्वीतपुनःश्राद्धानिषोडशेतिमाधवीयेगोभिलोक्तेश्च अर्वाक्संवत्सराद्यस्यसपिंडीकरणंकृतं षोडशानांद्विरावृत्तिंकुर्यादित्याहगौतमइति तत्रैवगालवोक्तेः षोडशत्वंचैकादशाहसपिंडनपक्षे तत्राद्यमासिकस्यकालसत्वात् अन्यपक्षेषुयथासंभवंज्ञेयं यत्तुदीपिकायाम् अनुमासिकानितुचरेत्तान्येवसापिंड्यतःपश्चात् द्वादशोत्कर्षेकृतानांनपुनःकृतिरित्युक्तं तदुक्ताद्विरोधाच्चिंत्यम् यत्तुगौडाःसपिंडीकरणांतातुज्ञेयाप्रेतक्रियाबुधैरितिशातातपोक्तेर्मासिकानांप्रेतत्वविमोक्षार्थत्वात्सपिंडनापकर्षेतदंतन्यायेनतेषामप्यपकर्षान्मासिकानांनपुनःकृतिः यत्तुमासिकंचोदकुंभंचेतिलौगाक्ष्यादिवचनंतन्निर्मूलं समूलत्वेपिदार्शपरंचेत्याहुः तेउक्तवक्ष्यमाणवचोनिबंधविरोधान्मूर्खाइत्युपेक्ष्याः यत्तुमिताक्षरायांसपिंडनोर्ध्वंस्वकालएवकार्याणि अपकर्षस्त्वनुकल्पइत्युक्तं तदपिपूर्वविरोधाच्चिंत्यं तेनवृद्धिंविनापकर्षेपुनःकृतिः अर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत् प्रेतत्वमिहतस्यापिदेयंसंवत्सरंनृपेत्यग्निपुराणात् वृद्धिनिमित्तापकर्षेत्वस्त्येवतन्निवृत्तिः अन्यथावृद्ध्यसंभवादितिशूलपाणिःकार्ष्णाजिनिः सपिंडीकरणादर्वागपकृष्यकृतान्यपि पुनरप्यपकृष्यंतेवृद्ध्युत्तरनिषेधनात् निषेधंचाहकात्यायनः निर्वर्त्यवृद्धितंत्रंतुमासिकानिनतंत्रयेत् अयातयामंस्मरणान्नभवेत्पुनरस्यामिति द्विरनुष्ठानंचोत्तरेषामेवनपूर्वेषांस्वस्वकालकृतानां तदाहमाधवीयेकार्ष्णाजिनिः अर्वागब्दाद्यत्रयत्रसपिंडीकरणंकृतं तदूर्ध्वंमासिकानांस्याद्यथाकालमनुष्ठितिः हेमाद्रौशाट्यायनिः प्रेतश्राद्धानिशिष्टानिसपिंडीक

रणंतथा अपत्नीकोपिकुर्वीतकर्तुंनांदीमुखंद्विजः वृद्धिंश्राद्धकर्षेद्दोषमाहोशनाः वृद्धिश्राद्धविहीनस्तुप्रेतश्राद्धानियश्चरेत् सश्राद्धीनरकेघोरेपितृभिःसहमज्जतीति आधानेपक्षमाहहेमाद्रावुशनाः पितुःसपिंडीकरणंवार्षिकेमृतिवासरे आधानाद्युपसंप्राप्तावतत्प्रागपिवत्सरात् विशेषस्तूक्तोविवाहनिर्णये कण्वः नवश्राद्धंमासिकंच यद्यदंतरितंभवेत् तत्तदुत्तरसात्कृत्याद हुषेयंममक्षते गारुडेपि आपदाद्यकृतंयत्तुकुर्यादूर्ध्वंमृताहनि अथसपिंडीकरणं माधवीयेहारीतः यस्तुपूर्वममावास्यांमृताहाद्दशमीभवेत् सपिंडीकरणंतस्याकुर्याद्वसुतोग्निमान् मृताहादूर्ध्वंदशमीएकादशीत्यर्थः सपिंडीकरणंकुर्यात्पूर्ववच्चाग्निमान्कृतः परतोदशरात्राच्चेत्कुर्यादब्दपरेतरइतिकार्ष्णाजिनिस्मृतेः आहिताग्नेस्तेनाविनाश्रौतपिंडपितृयज्ञासिद्धेः तदाहगालवः सपिंडीकरणात्प्रेते पैतृकंपदमास्थिते आहिताग्नेःसिनीवाल्यांपितृयज्ञःप्रवर्तते मदनरत्नेप्रजापतिः नासपिंड्याग्निमान्पुत्रःपितृयज्ञंसमाचरेत् अपरार्केकात्यायनः एकादशाहंनिर्वर्त्यपूर्वंदर्शाद्यथाविधि प्रकुर्वीताग्निमान्विप्रोमातापित्रोःसपिंडता आशौचांतप्रथमदर्शयोर्मध्येकस्मिंश्चिदन्हीत्यर्थः पित्रादीनांसपत्नीकानांदेवतात्वेनमातुरपिप्राग्दर्शात्सपिंडनंयुक्तमित्यपरार्के: एवंपितामहादेरपिसपिंडनंप्राक्दर्शात्कार्यं तेनविनापार्वणायोगात् द्वादशाहेवाकार्यंसाग्निकस्तुयदाकर्ताप्रेतश्चानग्निमान्भवेत् द्वादशाहेभवेत्कार्यंसपिंडीकरणंस्कृतेरितिगोभिलोक्तेः साग्नेःप्रेतस्यतुत्रिपक्षे प्रेतश्चेदाहिताग्निःस्यात्कर्तानग्निर्यदाभवेत् सपिंडीकरणंतस्यकुर्यात्पक्षेतृतीयक इतिस्मृत्यंतरोक्तेः मदनरत्नेलघुहारीतोपि अनग्निस्तुयदावीरभवेत्कुर्यात्तदागृही प्रेतश्चेदग्निमांस्तुस्यात्त्रिपक्षेवैसपिंडनं द्वयोःसाग्नित्वेद्वादशाहएव साग्निकस्तुयदाकर्ता

प्रेतोवाप्यग्निमान्भवेत् द्वादशाहेतदाकार्यंसपिंडीकरणंपितुरितितेनैवोक्तेः द्वयोरनग्नित्वेतुभविष्येसपिंडीकरणंकुर्याद्यजमानस्त्वनग्निमान् अनाहिताग्नेःप्रेतस्यपूर्णेब्देभवतएव द्वादशाविषमासेत्रिपक्षेवात्रिमासिवा एकादशेपिवामासिमंगलस्याप्युपस्थितौ कात्यायनगोभिलौ यदहर्वावृद्धिरापद्येतेति तच्चाहोर्वाग्दिनेएवेतिवाचस्पतिः तन्न प्रातर्वृद्धिनिमित्तकमितिनियमात्सपिंडनस्यचापराण्हकालीनत्वेनपूर्वत्वबाधापत्तेः वृद्धिदिनेतत्पूर्वदिनेचेचेतिश्रीदत्तः स्मार्तगौडास्तुवृद्धिपूर्वैः वर्षात्ययक्षणः सपिंडनस्यप्रेतत्वनाशेसहकारी तेनपरेद्युर्विश्याद्वृध्यभावेपितत्कर्तव्यतानिश्चयसहितमेवकालांतरक्रियमाणवृद्धिपूर्वक्षणसहकृतंप्रेतत्वनाशकमित्याह तन्न अकालेकृतस्यफलाजनकत्वात् एतेननिमित्तनिश्चयवतएवाधिकारात् वृध्यभावेपिनक्षतिरितिमिश्रोक्तिः परास्ता वृद्धिपूर्वदिनस्यचकालस्यांगत्वेननिमित्तत्वाभावात् तेनपुनःकार्यमित्यन्ये मदनरत्नेपुलस्त्यः निरग्निकःसपिंडत्वंपितुर्मातुश्चधर्मतः पूर्णेसंवत्सरेकुर्याद्वृद्धिर्वायदहर्भवेत् चतुर्विंशतिमतेसपिंडीकरणंचाब्देसंपूर्णेभ्युदयेपिवा द्वादशाहेतुकेषांचिन्मतंचैकादशेतथा पृथ्वीचंद्रोदयेबौधायनः अथसपिंडीकरणंत्रिपक्षेवातृतीयेवामासिषष्ठेचैकादशेवाद्वादशेवाद्वादशाहेचेति एतत्प्रक्रमेविष्णुः मासिकार्थंद्वादशाहंश्राद्धंकृत्वात्रयोदशेन्हिवाकुर्यान्मंत्रवर्जंहिशूद्राणांद्वादशेन्हिसंवत्सराभ्यंतरेयद्यधिमासोभवेत्तदामासिकार्थंदिनमेकंवर्धयेदिति आशौचांतरद्वादशाहस्त्वहः ऊनमासिकानितत्रैवाद्यषष्ठद्वादशादिनेषुमासिकादीनिकृत्वात्रयोदशेन्हि सपिंडनंकुर्यात् अधिमासेतुचतुर्दशेन्हिकुर्यात् शूद्रस्यत्रयोदशेद्वादशेन्हीत्यस्यमासिकाद्यदिनपरत्वादितिपृथ्वीचंद्रः पैठीनसिः संवत्सरांतेसर्जनंनवमेमासीत्येके अत्रसाग्नेरनग्नेर्वोक्तकालाभावेत्रिपक्षादिसंवत्सरांताअनुकल्पाज्ञेयाः कल्पतरुस्तुग्रहवृद्धिनिश्चयएवसर्वेपकर्षप्रकाराइत्याह तन्न यदहर्वेतिस्वातंत्र्यश्रुतेः यद्यपिवृद्धिनिमित्तोपकर्षोनिरग्नेरेवोक्तस्तथापिसाग्नावपिज्ञेयः

उक्तकालासंभवे वर्षांतादिगौणकालवद्वृद्धेरपिमासेः वक्ष्यमाणगोभिलवचनात् अथातयामंमरणंनभवेत्पुनरस्याःस्थितिदोषस्तुल्यविशेषाच्च अपरार्के पृथ्वीचंद्रादिस्वरसोप्येवं अत्रवृद्धिपदंचूडोपनयनविवाहमात्रपरम् सीमंतादौतुवृद्धिश्राद्धलोपएवेत्याचार्यचूडामणिः पुंसवनाद्यन्नप्राशनान्तेष्वावश्यकेष्वपकर्षइतिश्राद्धविवेकः श्रुतिसागरेपिबृहस्पतिः प्रत्यवायोभवेद्यस्मिन्नकृतेवृद्धिकर्मणि तन्निमित्तंसमाकृष्य पित्रोःकुर्यात्सपिंडनं गर्भाधानस्यान्तरेपिसंभवात् अन्यश्राद्धंपरान्नंचगंधमाल्यंचमैथुनमिति देवलेनप्रथमाब्दे मैथुननिषेधाच्चनतत्रापकर्षइतिश्राद्धकौमुद्यादयः तन्न ऋतुस्नातांतुयोभार्यामितिनिषेधाद्ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेदितिमैथुनेदोषाभावाच्च पितामहमरणेपौत्रस्यवृद्धौनापकर्षः तस्यमहागुरुत्वाभावात् तत्रतदूर्ध्वेष्योर्वृद्धिश्राद्धमितिश्राद्धचंद्रिका तन्न भ्राताचेत्यादौतदभावेप्यपकर्षोक्तेः तेननिर्देशोप्युपलक्षणं व्याघ्रः आनंत्यात्कुलधर्माणांपुंसांचैवायुषःक्षयात् अस्थितेश्चशरीरस्यद्वादशाहःप्रशस्यते एतदाशौचांतोपलक्षणं सर्वेषामेववर्णानामाशौचांतेसपिंडनमितिनिर्णयामृतेकात्यायनोक्तेः सर्वेषामितित्रैवर्णिकपरं शूद्राणांत्वाशौचमध्ये मंत्रवर्जंहिशूद्राणांद्वादशेहनिकीर्तितमितिविष्णूक्तेः एतद्दर्शश्राद्धकारिशूद्रविषयमित्यपरार्केकल्पतरौच वृद्धमनुः द्वादशेहनिविप्राणामाशौचांतेतुभूभुजाम् वैश्यानांतुत्रिपक्षाद्वाथवास्यात्सपिंडनं निर्णयामृतेगोभिलः द्वादशाहादिकालेषुप्रमादादननुष्ठितं सपिंडीकरणंकुर्यात्कालेषूत्तरभाविषु इदंसाग्नेरुक्तकालासंभवेगौणकालविधानार्थमितिमदनपारिजातः मदनरत्नेप्येवं ऋष्यशृंगः सपिंडीकरणंश्राद्धमुक्तकालेनचेत्कृतं रौद्रेहस्तेचरोहिण्यांमैत्रेभेवासमाचरेत् कालादर्शेपि एकादशेद्वादशेह्नित्रिपक्षेवात्रिमासिवा

षष्ठेचैकादशेवाब्देसंपूर्णेवाशक्रमागमे सपिंडीकरणस्येत्थमष्टौकालाःप्रकीर्तिताः साग्नेःकर्तुर्भावाद्योप्रेतेसाग्नौतृतीयकः अनग्नेस्तुद्वितीयाद्याःसप्तकालामुनीरिताः रोहिणीरौद्रहस्तेषुमैत्रभेवापितच्चरेत् नारदसंहितायांतु सपिंडीकरणकार्यंवत्सरेवार्द्धवत्सरे त्रिमासेवात्रिपक्षेवामासिवाद्वादशेन्हिवेत्युक्तं वत्सरेतीतेपिज्ञेयम् ततः सपिंडीकरणंवत्सरात्परतःस्थितमिति भविष्योक्तेः पितुःसपिंडीकरणंवत्सरादूर्ध्वतःस्थितमिति नागरखंडोक्तेः पितुःसपिंडीकरणंवार्षिकेमृतवासरे इत्युशनसोक्तेश्च पूर्णेसंवत्सरेपिंडःषोडशःपरिकीर्तितः नैवचसपिंडत्वंतेनैवाब्दिकमिष्यतइतिहेमाद्रौवचनाच्च अस्मानाकरत्वोक्तिःपूर्ववाक्यैरेव यत्तु पूर्णेसंवत्सरेकुर्यात्सपिंडीकरणंसुतः एकोद्दिष्टंचतत्रैवमृताहनिसमापयेदिति धवलनिबंधेजाबाल्युक्तेः पुत्रःसपिंडनंकृत्वाकुर्यात्स्नानंसचेलकम् एकोद्दिष्टंततःकुर्यात्कुतपेनावेचारयेदिति स्वल्पमात्स्योक्तेश्चाब्दिकंतद्दिनेपुनःकार्यमितिकेचित् तन्निर्मूलत्वाद्धेमाद्रिविरोधाच्चोपेक्ष्याः षोडशत्वंचसपिंडनस्य षोडशश्राद्धांतर्भावपक्षे स्मृत्यर्थसारेतु वर्षांत्यदिनेसंवत्सरविमोक्षश्राद्धं सपिंडनंचकृत्वापरेद्युर्मृताहेवार्षिकंकार्यमित्युक्तं गौडाअप्येवमाहुः तत्पूर्वविरोधाच्चिंत्यम् तच्चपुत्रेसतिनान्यःकुर्यात् श्राद्धानिषोडशादत्वानतुकुर्यात्सपिंडनं प्रोषितावसितेपुत्रः कालादपिचिरादपीति वायवीयोक्तेः षोडशश्राद्धानांवर्षादूर्ध्वकालाभावेपितान्यदत्वानकुर्यात् किंतुदत्वैव तानियदिकनिष्ठःश्राद्धादिनाकृतानितदासपिंडनमेवकुर्यादित्यपरार्कः सपिंडनेतुकनिष्ठानांनैवाधिकारइत्यर्थः तत्रैव अज्ञानादथवामोहात्कृतानचेत्सपिंडता तत्रापिविधिवत्कार्याकालादपिचिरादपि तेष्वपिज्येष्ठस्यैवाधिकारः ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवइतिमनूक्तेः अपरार्केप्रचेताअपि एकादशाद्याःक्रमशोज्येष्ठस्तुविधिवत्क्रियाः कुर्यान्नैकैकशःश्राद्धमाब्दिकंतुपृथक्पृथक् मरीचिः सर्वेषांतुमतंकृत्वाज्येष्ठेनैवतुयत्कृतम् द्रव्येणवा

विभक्तेन सर्वैरेव कृतं भवेत् यत्तु वाचस्पतिशूलपाणिभ्यामुक्तं द्रव्यदानानुमत्यभावे कनिष्ठैः पृथक्कार्यमिति तन्न एवकारस्य तदभावेपि पृथक्करणाभावार्थत्वात् अंधादेरिवज्येष्ठेसति कनिष्ठानामनधिकाराच्च अतस्तेषांश्रत्स्वायमात्रं आहिताग्निः कनिष्ठस्तु कुर्यादेव अन्यथा पितृयज्ञासिद्धेः एवमावश्यकवृद्ध्यावपि कनिष्ठोन्यः सपिंडोवाकुर्यात् भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव च सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते इति मदनरत्ने लघुहारीतवचनात् वृद्ध्यनंतरं प्रथमाब्दमध्येपि काम्यं कुर्यात् वृद्ध्यभावे तु प्रथमाब्दादूर्ध्वमेवेत्यर्थः काम्योक्तेरनावश्यके त्वापूर्तादौ नापकर्षः एतद्भ्रातृपुत्रादिसंस्कारेप्यासाधिकारस्य नांदीश्राद्धाधिकारार्थं अभ्युदयपदं च नांदीश्राद्धं निमित्तकर्ममात्रपरमिति हेमाद्रिः तेन ज्येष्ठे देशांतरस्थे कनिष्ठः सपिंडनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः परास्ता भ्रातृशिष्याद्युक्ते नांदीश्राद्धेज्यदेवताभावान्नपरोपकर्ष इत्यपास्तं अस्यक्रमसमात्रपरत्वाद्वृद्धिकर्तैव सपिंडनं कुर्यादिति न नियम इति गौडाः अत एव कन्यायां मातृमरणे भ्रात्रा सपिंडने कृते पितुर्नाधिकारः शूलपाणिस्तु महागुरौ प्रेतभूते वृद्धिकर्म न युज्यत इति निषेधात् मृतस्य भ्रात्रादिः सपिंडनं कृत्वा तत्पुत्रकन्यादेरभ्युदयं कुर्यान्न तु स्वपुत्रसंस्कारे संस्कार्यपितुः सपिंडनं विना वृद्धौ देवतात्वाभावादित्याह तन्न विदेशस्थेन ज्येष्ठेन पुनः कार्यम् यवीयसा कृतं कर्म प्रेतशब्दं विहाय तु तज्ज्यायसापि कर्तव्यं सपिंडीकरणं पुनरिति स्मृतेः ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते आद्यपादे मातापित्रोः कनिष्ठेनेति वा पाठः देशांतरगतानां च पुत्राणां तु कथं भवेत् श्रुत्वा तु वपनं कार्यं दशाहांतं तिलोदकम् ततः सपिंडीकरणं कुर्यादेकादशेहनि द्वादशाहेन कर्तव्यमिति शातातपोब्रवीदिति वचनाच्चेति भट्टाः सिंगाभट्टीयेप्येवम् पूर्ववचनेत्र मूलं चिंत्यम् स्मृत्यर्थसारे तु विभक्ता वृद्धिकामाश्चेत्पुत्राः पृथक् सपिंडीकरणं कुर्युरित्युक्तम् अत्र दत्तकस्य तत्पुत्रादीनां विशेषः प्रागुक्तः केचित्तु

वृद्धिंविनापिकनिष्ठस्यसपिंडनमाहुः मातापित्रोर्मृतेकालेज्येष्ठेदेशांतरस्थिते कनिष्ठेनप्रकर्तव्यंसपिंडीकरणंतथेतिकार्ष्णाजिनिस्मृतेः गतेवारोधितेज्येष्ठेपित्रावाप्रोषितेसति षण्मासान्ननिवर्तेततदाकार्यंकनीयसा संवर्तः पुनःसपिंडीकरणंश्राद्धंपार्वणवच्चरेत् अर्घ्यसंयोजनंनैवपिंडसंयोजनंनचेतितेषांवचसांनिर्मूलत्वात् प्रोषितावसितेपुत्र इत्यादिविरोधाच्चोपेक्ष्याः व्युत्क्रमप्रमृतौतुहेमाद्रौब्राह्मे मृतेपितरियस्यार्थविद्यतेचपितामहः तेनदेयास्त्रयः पिंडाः प्रपितामहपूर्वकाः तेभ्यश्चपैतृकःपिंडोनियोक्तव्यस्तुपूर्ववत् मातर्यथमृतायांचविद्यतेचपितामही प्रपितामहीपूर्वस्तु कार्यस्तत्राप्ययंविधिः एवंप्रपितामहजीवनेतत्पित्रादिभिर्ज्ञेयम् तदाहसुमंतुः त्रयाणामपिपिंडानामेकेनापिसपिंडने पितृत्वमश्नुतेप्रेत इतिधर्मोव्यवस्थितः यत्तुव्युत्क्रमात्तु प्रमीतानांनैवकार्यासपिंडतेति तन्मातापितृभर्तृभिन्नविषयम् व्युत्क्रमेणमृतानांनसपिंडीकृतिरिष्यते यदिमातायदिपिताभर्तानैषविधिःस्मृत इतिमाधवीयेस्कांदोक्तेः मदनरत्नादौचैवम् अत्रप्रपितामहादिभिः पितुःसपिंडनेकृतेपितामहेमृतेतत्सपिंडनेसतिपुनस्तेनसह पितुःसपिंडनंकार्यमितिहेमाद्रिर्मतमाह अन्येनैवतन्मन्यंते तत्त्वंतुपितुः सपिंडनाभावेपितामहेनसहपुनःकार्यंनतत्सत्वे त्रयाणामपिपिंडानामेकेनापिसपिंडने पितृत्वमश्नुतेप्रेतइतिधर्मोव्यवस्थितइति विष्णुधर्मोक्तेः पितामहेप्रपितामहेवापुत्रांतरैरसंस्कृतेप्यसंस्कृताभ्यामेवपितुःसपिंडनंकुर्यात् असंस्कृतौनसंस्कार्यौपूर्वौपौत्रप्रपौत्रकौ पितरंतत्रसंस्कुर्यादितिकात्यायनोब्रवीदिति छंदोगपरिशिष्टात् असंस्कृतौदाहाद्यैरितिकेचित् असपिंडीकृताविति तुतत्त्वम् अतएवोक्तंतत्रैव पापिष्ठमपिशुद्धेनशुद्धंपापकृतापिवा पितामहेनपितरंसंस्कुर्यादितिनिश्चयः पापिष्ठप्रकृतसपिंडनंनतुपतितादि अभिशस्तपतितभ्रूणघ्नस्त्रियश्चातिचारिणी-

नैसंसृजेदिति बैजवापोक्तेः पापकर्मिणोनसंसृज्येरन्निति गौतमोक्तेश्चेत्युक्तं निर्णयामृते पूर्वयोः पुत्राभावेतुपौत्रःकुर्या देव पितामहः पितुः पश्चात्पंचत्वंयदिगच्छति पौत्रेणैकादशाहादिकर्तव्यंश्राद्धषोडशम् नैतत्पौत्रेणकर्तव्यंपुत्रवांश्चेत्पितामहः पितुः सपिंडतांकृत्वा कुर्यान्मासानुमासिकमिति कात्यायनोक्तेः अपरार्केशूलपाणौचैवम् तेनसपिंडनस्यानित्यत्वादकृतसपिंडनयोरेवपार्वणानुप्रवेशइति सूर्योक्तिः परास्ता कृतेसपिंडीकरणेप्रेतः पार्वणभाग्भवेदिति हारीतविरोधाच्च केचित्पुत्रांतराभावेपितामहश्राद्धिकमप्याहुः तन्न श्राद्धषोडशमितिनियमात् इच्छयाप्रवर्त्येव पितामहस्यचेद्द्यादेकोद्दिष्टंनपार्वणमिति वाचस्पतिधृतगर्गोक्तेः त्रयाणांयौगपद्येतु प्राधान्यात्तुपितुः सपिंडनंकृत्वापूर्वयोः कुर्यात् पितामहेमृतेदशाहांतः पितुर्मृतौपितुःसंस्कारंकृत्वापितामहस्यपुनः सर्वमावर्तयेत् वृत्तेदशाहेनैवम् अशक्त्यापिभ्रातुज्ञातेनपौत्रेणापितामहश्राद्धेप्रक्रांतेपितृमृतौतदाशौचंवहन्नेवपौत्रः पितामहकर्म कुर्यात् प्रक्रांतत्वादिति मदनपारिजातपृथ्वीचंद्रौ यत्तु उत्तरात्रितयरौद्ररोहिणीयाम्यसर्पपितृभेषुत्वाग्निभे श्मश्रुकर्मसकलंचवर्जयेत्प्रेतकार्यमपिबुद्धिमान्नरः इतिसपिंडनप्रकरणेपाठान्मुख्यकालेनिषिद्धर्क्षेसपिंडनापकर्षः सर्वकालेपुनरुद्वृत्तेतदूर्ध्वान्येव पूर्वोक्तशास्त्रोक्तानिषोडशश्राद्धानिकार्याणीति वाचस्पतिमिश्राः

तन्न अस्यपरिभाषात्वेनवाक्यात्सावकाशकर्मपरत्वात् अस्यप्रेतमात्रदैवत्याभावाच्च अथस्त्रीमृच्यते हेमाद्रौबृहस्पतिः भर्तृगोत्रेणनाम्नाचमातुःकुर्यात्सपिंडनम् यत्तुभविष्ये पितृगोत्रंसमुत्सृज्यन-

कुर्याद्भर्तृगोत्रत इति तदासुरादिविवाहोढापरं आसुरादिविवाहेषु पितृगोत्रेण धर्मविदिति वृद्धशातातपोक्तेः नचानेकवचनेषु पितामह्या पत्या मातामहेन वा सहोक्तं तत्र व्यवस्थोक्ता भविष्ये जीवत्पिता पितामह्या मातुः कुर्यात्सपिंडनं प्रमीतपितृकः पित्रा तत्पित्राद्युत्रिकास्ततः तत्पित्रा मातुः पित्रा लौगाक्षिः पितामह्यादिभिः सार्द्धं मातरं तु सपिंडयेत् पितरि ध्रियमाणे तु तेनैवोपरते सति ग्रंतवः मातुः सपिंडीकरणं कथं कार्यं भवेत्सुते पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतं येन केनापि मातुः सपिंड्यं यत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तं तत्र पितामह्या सह कार्यं नांदीमुखेष्टकाश्राद्धे गयायां च मृतेहनि पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेदिति शातातपोक्तेः अपुत्रायां तु पैठीनसिः अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत् यत्तु लघुहारीतः पुत्रेणैव तु कर्तव्यं सपिंडीकरणं स्त्रियाः पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोपि ये इति यच्च मार्कंडेयपुराणे सपिंडीकरणं स्त्रीणां पुत्राभावे न विद्यत इति तत्पुत्रपत्न्यभावे ज्ञेयं अतस्सपत्नीपुत्रोपि ज्ञेयः बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति मनूक्तेरतत्समत्वात् यत्तु शातातपः मृते पितरि मातुस्तु न कार्या सहपिंडता पितुरेव सपिंडत्वे तस्या अपि कृतं भवेदिति तदशक्तपरं केषांचिन्मतमिति हेमाद्रिः अन्वारोहणे तु भर्त्रैव सापिंड्यं मृतायामनुगता नाथं सा तेन सहपिंडतां अर्हति स्वर्गवासं च यावदाभूतसंप्लवमिति शातातपोक्तेः पत्न्याश्चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैरिति यमोक्तेश्च अत्रैकशब्दः पितामह्यादिपक्षनिवृत्त्यर्थः पतिपदं वर्गपरं सपिंडनस्य पार्वणैकोद्दिष्टरूपत्वादिति माधवकल्पतरुमदनरत्नादयः अन्ये तु भर्त्रैवैकेनाहुः स्वेन भर्त्रा सहैवास्याः सपिंडीकरणं भवेदित्येवकारश्रवणात् पृथ्वीचंद्रोदयेपि

विकल्पउक्तः इदंतुतत्वं यदाहेमाद्र्यादिमतेद्वयोरेकःपिंडस्तदावर्गेणसह यदामाधवपृथ्वीचंद्रादिमते पृथक्पिंडस्तदैकेनपत्यैकवचनाद्यैकेनापि अतोमातृपिंडमसपिंडीकृतेनैवपतिपिंडेनसंयोज्यैकीकृतंपिंडद्वयंतत्पित्रादिभिःसंयोजयेत् अंत्यपक्षएवयुक्तः स्मृत्यर्थसारेतु अन्वारोहणेनैकदिनमरणेस्त्रियाः पृथक्सपिंडनंनास्ति भर्तुःकृतेस्त्रियाअपिकृतंभवतीत्युक्तं तन्मतांतरमस्तु इदंब्राह्मादिविवाहेष्वज्ञेयं आसुरादिषुतुशातातपः तन्मात्रातत्पितामह्यातच्छ्वश्र्वावासपिंडनं आसुरादिविवाहेषुविन्नानांयोषितांभवेत् मातामह्यामातुःपितामह्यातत्प्रपितामह्यावेत्यर्थः क्रमंतु पितापितामहेयोज्यःपूर्णेसंवत्सरेसुतैः मातामातामहेतद्वदित्याहभगवान्शिवः इदमासुरादिपरंपुत्रिकापुत्रपरत्वोक्तंप्राक् हेमाद्रिस्तुब्राह्मादिष्वपिसर्वत्रदेशभेदाद्विकल्पमाह अतःगुर्जरेषुकोकिलमतानुसारिणामातृमातामहप्रमातामह्या इतिश्राद्धप्रयोगसपिंडनंचदृश्यते हेमाद्रावापस्तंबोपि कोकिलस्ययथापुत्रा अन्यसंचयजीविनः पुत्रास्तेस्वकुलंयातिएवंनारीमृतासती यदपिविज्ञानेश्वरोमातामहेनमातुःसापिंड्येनपितृश्राद्धवन्मातृश्राद्धंनित्यमित्याह यच्चवृद्धिश्राद्धे छंदोगपरिशिष्टषड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेदितितदेतद्विषयमेव मातुःपृथक्श्राद्धाभावात् अतएवहेमाद्रौभविष्ये मातुःसपिंडनंप्रक्रम्य उदितेनुदितेचैवहोमभेदोयथाभवेत् तथाकुलक्रमायातमाचारंचचरेद्बुधइत्युक्तं अस्यहेमाद्रावपवादमाहतत्रैवव्याघ्रपात् कुर्यान्मातामहश्राद्धंसर्वदामातृपूर्वकं विधिज्ञोविधिमास्थायवृद्धोमातामहादिवत् केचिदेतत्पुत्रिकापुत्रपरमाहुः पत्न्याःसापिंड्यमाहलौगाक्षिः सर्वाभावेस्वयंपत्न्यःस्वभर्तृणाममंत्रकम् सपिंडीकरणंकुर्युस्ततःपार्वणमेवचेति यत्तुवचनं अपुत्रस्यपरेतस्यनैवकुर्यात्सापिंडतामिति यच्चापस्तंबः अपुत्रायेमृताःके-

चित्शूद्रणांवास्त्रियोपिवा तेषांसपिंडनाभावादेकोद्दिष्टंनपार्वणमिति तत्पुत्रोत्सादनविधिप्रशंसार्थमितिमाधवः सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते अपुत्राणांचसर्वेषामपत्नीनांतथैवचेति हेमाद्रौप्रचेतसोक्तेश्च अन्येतुद्विविधवाक्यदर्शनाद्विकल्पमाहुः स्मृत्यर्थसारेपि ब्रह्मचारिणामनपत्यानांचसपिंडनंनास्तितेषांसदैकोद्दिष्टमेव व्युत्क्रममृतानांसापिंड्यंकार्यंनवाकेचित्सर्वत्रसापिंडनमाहुरिति अपुत्रेव्युत्क्रममृतेविशेषोवेणुकारिकायां भ्रातावाभ्रातृपुत्रोवासपिंडःशिष्यएववा सपिंडीकरणंकुर्यात्पुत्रहीनेमृतेसति सर्वबंधुविहीनस्यपत्नीकुर्यात्सपिंडतां ऋत्विजंकारयेद्वापिपुरोहितमथापिवा वक्रकृद्वादितिस्मृतेः कार्यातेषांसपिंडता व्युत्क्रमाच्चप्रमीतानांयतद्दिनाप्रेततताध्रुवं पुनःसपिंडनंतेषांकुर्यात्प्रेतपितामहइति अत्रमूलंमृग्यं यतीनांसपिंडनंनास्तिकिंत्वेकादशेह्निपार्वणंकार्यं तदपित्रिदंडिनः एकदंड्यादीनांतदपिनेत्युक्तंप्राक् दंडग्रहणात्पूर्वंमृतेतुदाहादिसपिंडनांतंसर्वंकार्यमिति भट्टचरणाः सपिंडनविधिमाहबैजवापः समासेसंवत्सरेचत्वार्युदपात्राणिप्रयुनक्त्येकंप्रेतायत्रीणिपितृभ्यः प्रेतपात्रंपितृपात्रेष्वासिंचति येसमानाइतिद्वाभ्यामेवंपिंडोथाभिमृशत्यपयंतुगतः प्रेतःपितरस्तदद्याभिवःशिवंभवतुयोषाणांजायंतांचिरजीविनः समानीवःसंगच्छध्वंसंवदध्वमिति यद्यपितच्चापिदेवरहितमेकार्घ्यैकपवित्रकंनेवाग्नौकरणंतत्रतच्चावाहनवर्जितमितिमार्कंडेयेनोक्तं तथापि सपिंडीकरणश्राद्धंदेवपूर्वंनियोजयेदित्यादिविरोधाद्विकल्पः प्रेतांशेवाज्ञेयम् अत्रकामकालौवैश्वदेवावपीत्युक्तंप्राक् मैत्रायणीयपरिशिष्टे पित्र्यविप्रकरेहोमःसाग्नेरपिभवेदिह यत्तुगोभिलः अनुक्तकालेप्यपितुव्युत्क्रमेणमृतावपि आमेनवापिसापिंड्यंहेम्नावापिप्रकल्पयेदिति तदायदिमातापितृभिन्नपरम् आपन्नोपिनकु

र्वीत श्राद्धमासेन कर्हिचिदिति तेनैवोक्तेः शुद्धितत्वे कामधेनौ च लघुहारीतः सपिंडीकरणं यावत्प्रेतश्राद्धं तु षोडशं पक्वान्नेनैव कर्तव्यं सामिषेण द्विजातिभिः विश्वप्रकाशे प्रेतः सपिंडनादूर्ध्वं पितृलोकेनुगच्छति कुर्यात्तस्य तु पाथेयं द्वितीयेन्हि सपिंडनात् स्मृत्यर्थसारेप्येवं ततो वृद्धिश्राद्धं कुर्यात् एतन्मलमासेपि कार्यं अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा तथैव काम्ययत्कर्म वत्सरात्प्रथमादृत इति हेमाद्रौ हारीतोक्तेः इति भट्टकमलाकरकृते निर्णयसिंधौ सपिंडीकरणं अथ प्रथमाब्दे निषिद्धानि हेमाद्रौ स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणम् प्रथमेब्दे न कुर्वीत महागुरुनिपातने अग्नितर्पणं लक्षहोमादि न त्वाधानम् तत्तु प्रथमाब्दे भवत्येव तदाह हेमाद्रावुशनाः पितुः सपिंडीकरणं वार्षिके मृतवासरे आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् अन्यतर्पणमिति शुद्धितत्वे पाठः आदिपदं वृद्धिनिमित्तनित्यकर्मपरं दिवोदासीये महातीर्थस्य गमनमुपवासव्रतानि च संवत्सरं न कुर्वीत महागुरुनिपातने इदं श्राद्धकौमुद्यां देवीपुराणस्थमुक्तं गौडनिबंधे मात्स्ये सपिंडीकरणादूर्ध्वं प्रेतः पार्वणभाग्भवेत् वृद्धीष्टापूर्तयोग्यश्च गृहस्थश्च सदा भवेत् वर्षांतसपिंडनाभावेनाधिकारीत्यर्थः गृहस्थः सपिंडोपीत्यर्थः अत एव प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां आचतुर्थं ततः पुंसि पंचमे शुभदं भवेदिति ज्योतिषे उक्तं माधवीये देवलः प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः इदं वर्षांतसपिंडनपरं तथैव काम्ययत्कर्म वत्सरात्प्रथमादृत इति लघुहारीताद्येकवाक्यत्वात् वृद्धिनिमित्तापकर्षं तु काम्यादि भवत्येवेति गौडाः पित्र्यसपिंडनम् अत एव लौगाक्षिः अन्येषां प्रेतकार्याणि महागुरुनिपातने कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत् दाहाद्येकादशाहांतकार्यं

तत्राशौचांतरस्याप्रतिबंधकत्वात् आद्यंश्राद्धमशक्तोपिकुर्यादेकादशेहनीत्युक्तेश्च एकंसपिंडनं पत्न्यादेस्त्वपवादमाह माधवीयेऋष्यशृं
गः पत्न्याःपुत्रस्यतत्पुत्रस्यभ्रातुस्तत्तनयेषुच स्नुषास्वस्रोश्चपित्रोश्चसंघातमरणंयदि अर्वागब्दान्मातृपितृपूर्वंसापिंड्यमाचरेत्
लौगाक्षिः पत्नीपुत्रस्तथापौत्रोभ्रातातत्पुत्रकाअपि पितरौचयदैकस्मिन्म्रियेरन्वासरेतदा आद्यमेकादशेकुर्यान्मिश्रपक्षेतुसपिंड
नं धवलनिबंधे महागुरुनिपातेतुप्रेतकार्यंयथाविधि कुर्यात्संवत्सरादर्वागेकोद्दिष्टेनपार्वणं भृगुः माताचैवतथाभ्राताभार्यापु
त्रस्तथास्नुषा एषांमृतौनरश्राद्धमन्यस्यनपुनःपितुः एतदपिसपिंडनपरम् पितुर्मृतावन्यस्यश्राद्धंनचरेदित्यर्थः शुद्धितत्वेदेव
लः अन्यश्राद्धंपरान्नंचगंधमाल्यंचमैथुनं वर्जयेद्गुरुपातेतु यावत्पूर्णोनवत्सरः पारस्करभाष्येबृहस्पतिः पितर्युपरतेपुत्रोमातुःश्रा
द्धान्निवर्तते मातर्यपिचवृत्तायांपितृश्राद्धादृतेसमं समीपतरंविनान्यश्राद्धंनेत्यर्थः शुद्धितत्वेदेवलः महागुरुनिपातेतुकाम्यंकिंचि
न्नचाचरेत् आर्त्विज्यंब्रह्मचर्यंचश्राद्धंदैवक्रियातथा एतत्सपिंडनात्प्रागितिकेचित् तदूर्ध्वमपीत्यन्ये श्राद्धकौमुद्यांकालिकापुरा
णेपूर्वार्धेविशेषतःशिवपूजांप्रमीतपितृकोनरः यावद्वत्सरपर्यंतंमनसापिनचाचरेत् केचित्तु पित्रोरब्दमशौचंस्यात्षण्मासंमातुरेवच त्रै
मासिकंतुभार्यायास्तदर्धंभ्रातृपुत्रयोरितिस्मृतेः सपत्नमातुरब्दार्धमाहुः श्राद्धकौमुदीकारस्तु द्वयोरेवमहागुर्वोरब्दमेकमशौचकं
नान्येषामधिकाशौचंस्वजातिविहितात्कलौ तत्समूलजातूकर्ण्यविरोधान्निर्मूलमाह हेमाद्रौभविष्ये गयाश्राद्धंमृतानांतुपूर्णेब्देप्र
शस्यते त्रिस्थलीसेतौगारुडे तीर्थश्राद्धंगयाश्राद्धंश्राद्धमन्यच्चपैतृकं अब्दमध्येनकुर्वीतमहागुरुविपत्तिषु इदंचवृद्ध्यर्थसपिंडनाभावेवृद्धौ
सपिंडनापकर्षेब्दमध्येपिदर्शादिकार्यमेव पितुःसपिंडनंकृत्वाकुर्यान्मासानुमासिकमितिछंदोगपरिशिष्टात् सपिंडीकरणादूर्ध्वंप्रेतः

पार्वणंस्नुगभर्वेदिनिमाल्स्यात् ततःप्रभृतिवैप्रेतःपितृसामान्यमश्नुते विंदतेपितृलोकंचततःश्राद्धंप्रवर्ततेइतिहारीताच्चेतिशूलपाणिः यत्तुकातीयं सपिंडीकरणादूर्ध्वंनदद्यात्प्रतिमासिकं एकोद्दिष्टविधानेनदद्यादित्याहशौनकइति तत्रैकोद्दिष्टविधिनानदद्यादित्यन्वयः तुर्यपादेनपार्वणोविकल्पउक्तः प्रेतस्यैववर्ते उद्वाहस्योपनयनंप्रथमेब्देसहीपते कृतेसपिंडनेप्यूर्ध्वमस्थ्नांचोद्धरणंत्यजेत् तथापिकर्तुमिच्छंतित्रीणिचैतानियेसुताः मासिकान्यवशिष्टानिचापकृष्यचरेत्पुनः अत्रेदंतत्वं वृद्धिंविनार्वागपि सपिंडनापकर्षेपितृत्वप्राप्तिर्वर्षांतएव कृतेसपिंडीकरणेनरः संवत्सरात्परं प्रेतदेहंपरित्यज्यभोगदेहंप्रपद्यतइतिविष्णुधर्मोक्तेः अर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत् प्रेतत्वमपितस्यापिविज्ञेयंवत्सरंनृपेत्यग्निपुराणाच्च तेनतत्सत्वेपिवृद्धिंदैवपित्र्येष्वनधिकारः वृद्धिनिमित्तत्वनंतरमेव अर्वाक्संवत्सराद्वृद्धौपूर्णेसंवत्सरेपिवा येसपिंडीकृताःप्रेतानतेषांतुपृथक्क्रियेतिशातातपोक्तेः तथैवकार्यमितिहेमाद्रिधृतहारीतादिवशाच्चैवमितितथा अस्थिक्षेपेगयाश्राद्धंश्राद्धंचापरपक्षिकं प्रथमेब्देपिकुर्वीतयदिस्याद्वार्षिकमानुरक्तः भक्त्यासर्वंश्राद्धंतद्वानीतिमदनपारिजातादयः अन्येयथाश्रुतमाहुः तत्वंतुयदिवृद्धिसमूलंतदावृद्धिंविनापकर्षेपूर्वंवृद्ध्यर्थंतुपरमितियोज्यं पतितानांगयायांविशेषोब्राह्मे क्रियतेपतितानांचगतेसंवत्सरेक्वचित् देशधर्मप्रमाणत्वात्कृयाश्राद्धंस्वबंधुभिः अथविधानानि तत्रपंचकमृतेमदनरत्नेगारुडे प्रादौकृत्वाधनिष्ठार्धमेतन्नक्षत्रपंचकं रेवत्यंतंसदादूष्यमत्रशुभंदाहकर्मापि शवस्यतुसमीपेतुक्षेप्तव्याःपुत्तलास्तदा दर्भमयास्तुचत्वारऋक्षमंत्राभिमंत्रिताः ततोदाहःप्रकर्तव्यस्तैश्चपुत्तलकैःसह सूतकांतेततःपुत्रैःकार्यंशांतिकपौष्टिकं पंचकेषुमृतोयोवैनगतिंलभतेनरः तिलांश्चैवहिरण्यंचतमुद्दिश्यघृतंदहेत् क्रियानिबंधे भाजनोपानहौछत्रंहेममुद्रांचवाससी दक्षिणादीयतेविप्रेसर्वपातकमोचनी मदनरत्नेगार्ग्यः यदिभद्रातिथीनांस्याद्भानुभौमशनैश्चरे त्रिपादर्क्षेश्चसंयोगाद्द्वयोर्योगे

द्विपुष्करः द्वित्रिपुष्करयोगेतुमृतिर्मृत्यंतरावहा दहनेमरणेचैवत्रिगुणंस्यात्त्रिपुष्करे खननेप्येवमेवस्याद्तद्दोषोपशांतये तिलपिष्टैर्यवैर्वापिशरीरंकारये त्ततः शूर्पेनिधायालंकृत्यदाहयेत् प्रेतृकोपरि तद्दाहमंत्रमाहबोधायनः अस्मात्त्वमितिमंत्रेणतिलपिष्टमदाहयेत् द्वित्रिपुष्करयोर्दोषस्त्रिभिःकृच्छ्रैर्व्यपो हति वासवेमरणंचेत्स्याद्गृहेवापिपुनर्मृतिः स्वर्णंदक्षिणांदद्यात्कृष्णावस्त्रमथापिवा वासवंधनिष्ठा कुंभमीनस्थितेचंद्रेमरणंयस्यजायते नत-स्योर्ध्वगतिर्दृष्टासंततौनशुभंभवेत् नतस्यदाहःकर्तव्योविनाशास्त्वेषुजंतुषु अथवातद्दिनेकार्योदाहस्तुविधिपूर्वकं धनिष्ठापंचकेजीवोमृतोयदि कथंचन । त्रिपुष्करेयाम्यभेवाकुलजान्मारयेद्ध्रुवं तत्रानिष्टविनाशार्थंविधानंसमुदीर्यते दर्भाणांप्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः यवपिष्टेनानु-लिप्तास्ताभिःसहशवंदहेत् प्रेतवाहःप्रेतसखःप्रेतपःप्रेतभूमिपःप्रेतहर्तापंचमस्तुनामान्येतानिचक्रमात् अत्रप्रतिमागंधपुष्पैःपूजयित्वाप्रथमां शिरसि द्वितीयांनेत्रयोः तृतीयांवामकुक्षौ चतुर्थींनाभौ पंचमींपादयोर्न्यस्यतदुपरिनामभिर्घृतंहुत्वा यमायसोमंत्र्यंबकमिति मंत्राभ्यांप्रत्येक तास्वाज्यहुनेदितिभट्टाः सूतकांतेततःपुत्रःकुर्याच्छांतिकपौष्टिकं कांस्यपात्रस्थितंतैलंवीक्ष्यदद्याद्द्विजन्मने ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतयेततःमाष मुद्गयवव्रीहिप्रियंग्वादिप्रयच्छति स्वर्णदानंरुद्रजाप्यंलक्षहोमोद्विजार्चनं गोभूदानंषडंशेनकुर्याद्दोषोपशांतये अपरार्के धनिष्ठापंचकमृतेपंचर-त्नानितन्मुखे प्रास्याहुतित्रयंतत्रहुनेद्दहवपामिति ततोनिर्हरणंकुर्यादेषसाग्नेर्विधिःस्मृतः इतरंनिखनेद्वाजलेवाप्रतिपादयेत् त्रिपादर्क्षमृतेत द्धिरण्यशकलंमुखे तस्यापिप्रमयंकुर्यात्सुरूपचितयेततःहोमःप्रतिमुखंकुर्यात्तथावहवपामिति काष्ठायसंचकार्पासंकुसुंभंप्रभृतिपाद्यंच निर्या त्यस्माग्निंसंस्कुर्याद्ब्राह्मणोवान्यमुत्सृजेत् तत्रैव कनकंहीरकंनीलंपद्मरागंचमौक्तिकं पंचरत्नमिदंप्रोक्तमृषिभिःपूर्वदर्शिभिः रत्नानांचाप्यभावेतुस्वर्णं कर्षार्धमेवच सुवर्णस्याप्यभावेतुआज्यंज्ञेयंविचक्षणैः मदनरत्नेप्येवं तथा एकाशीतिपलकांस्यंतदर्धंवातदर्धकं नवषट्त्रिपलंवापिदद्याद्विप्रायश्र

Nepal Sanskrit University, Balméeki Campus, Kathmandu

क्तितः तथान्यत्र स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनंततः अन्वाधानंनिर्वपणंदेवतानांतथाहुतिः यमायधर्मराजायमृत्यवेचांतकायच वै
वस्वतायकालायसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैक्रमात् विधिनाग्निपणंकृत्वाएकेका-
माहुतिंहुनेत् कृष्णांगांकृष्णवस्त्रांचहेमनिष्कसमन्वितां दद्याद्विप्रायशांताय प्रीतोभवतुमेयमः त्रिपादर्क्षेष्वेतदेव अपरार्केपुनर्वसूत्तराषाढाकृत्ति-
कोत्तरफाल्गुनी पूर्वाभाद्राविशाखवाच ज्ञेयमेतत्त्रिपादभं मयूरचित्रगर्गाः मृतःस्मशानयोनीतउपजीवतिमानवः गृहेयस्यप्रविष्टोसौतिष्ठेदथक
दाचन अचिरान्मृत्युमायातित्यक्तदारपरिग्रहः तत्रशांतिंप्रवक्ष्यामि धर्मराजमतंयथा सक्षीराणांघृताक्तानामग्नेर्हुत्वास्रुवेबुधः औदुंबरी
पांविधिवत् ततःशांतिःकृताभवेत् सावित्र्यष्टसहस्रेणक्षीरशांतिंचकारयेत् कपिलांतिलकांस्यंचहुतांतेभूरिदक्षिणेति अथब्रह्मचारिमृतौ
शौनकः ब्रह्मचारिमृतौरीतिंकथयामिसमासतः तत्रावकीर्णदोषस्यप्रायश्चित्तंप्रशांतये द्वादशाब्दंषडब्दंवात्र्यब्दंशक्त्याथवाचरेत् स्नातको
ब्रह्मचारीचनिधनंप्राप्नुयाद्यदि संयोज्यचार्कविधिनासंयोज्योतोततःपरं देशकालौस्मृत्वा अमुकगोत्रामुकनाम्नोमृतस्यब्रह्मचारिणोव्रतवि-
सर्गंकरिष्यइत्युक्त्वाहेमान्नांदीश्राद्धंकृत्वाग्निप्रतिष्ठाप्याघारांतेचतसृभिर्व्याहृतिभिरग्नयेव्रतपतयेव्रतानुष्ठानसंपादनायविश्वेभ्योदेवेभ्यश्चा
ज्यंहुत्वास्विष्टकृदादिसमाप्यपुनर्देशकालौस्मृत्वार्कविवाहंकरिष्यइत्युक्त्वाहेमान्नांदीश्राद्धंकृत्वार्कशाखांशवंचहरिद्रयालिप्तंपीतसूत्रेण
वस्त्रयुग्मेनचावेष्ट्याग्निप्रतिष्ठाप्याघारांतेग्नयेबृहस्पतयेविवाहविधियोजकायच यस्मैत्वंकामकामायेतिकामायव्याहृतिभिश्चाज्यंहुत्वा
स्विष्टकृदादिसमाप्यार्कशाखांशवंचदहेत् विधानमालायां येषांकुलेब्रह्मचारीनिधनंप्राप्नुयाद्यदि तत्कुलंक्षयमाप्नोतिसोपिदुर्गतिमाप्नुयात् मृत ५२
स्याम्रियमाणस्यषडब्दंव्रतमादिशेत् त्रिंशद्वोब्रह्मचारिभ्योदद्यात्कौपीनकान्नवान् हस्तमात्राःकर्णमात्राद्दद्यात्कृष्णाजिनानिच पादुकाछत्रमाल्या

निगोपीचंदनसेवच मणिप्रवालमालाश्च भूषणादिसमर्पयेत् एवंकृतेविधानेचविघ्नः कोपिनजायते अत्रमूलंमृग्यम् कुष्ठमृतोंतुयमः मृतस्यकुष्ठिनोदेहंनिखनेत्क्रोष्टभूमिषु वासरत्रितयपश्चाद्दुधृत्यान्यत्रतंदहेत् नगंगाप्लवनंकार्यंनिक्षिपेद्विधिरुच्यते षडब्दव्रतपूर्णेनविधिनात्र्यंकमुच्चरन् नतास्थिसंचयंतस्यगंगायांप्रक्षिपेत्सुधीः मासिमासिततः कुर्यान्मासिश्राद्धानिपार्वणात् इत्येतत्कुष्ठिमरणेकथितंशास्त्रकोविदैः शङ्खिनत्वेभविष्ये श्वेतकुष्ठगणंविप्रउत्तरोत्तरतोगुरुं विचर्चिकातुदुश्चर्मांचर्वरीयस्तृतीयकः विकर्चूर्व्रणताम्रोचकृष्णाश्वेततथाष्टकमित्क्रा मृतेतुप्रापयेत्तीर्थेसथवातरुमूलकं नपिंडनोदककार्यंनचदानक्रियांचरेत् षण्मासीयत्रिमासीयमृतः कुष्ठीकदाचन यदिस्नेहाच्चरेद्दाहं यतिश्चांद्रायणंचरेत् अकृतप्रायश्चित्तकुष्ठ्यादिदाहेइदंप्रायश्चित्तं अतएवकुनख्यादिवत्कुष्ठिनोपिद्वादशरात्रंशूलपाणिनोक्तं अतएवान्यदीयकुष्ठिनोमरणान्नप्राशौचमुक्तंकौर्मे क्रियाहीनस्यमूर्खस्यमहारोगिणएवच यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् महारोगास्तु वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः अर्शांसिग्रहणीत्यष्टौमहारोगाः प्रकीर्तिताइति रजस्वलायास्तुवृद्धशातातपः रजस्वलायाः प्रेतायाः संस्कारादीनिनाचरेत् ऊर्ध्वंत्रिरात्रात्स्नातांतांशवधर्मेणदाहयेत् अतः प्रक्षाल्यकाष्ठवद्दग्ध्वाथ्यर्हंनदहेत संकटेतुमदनरत्नेस्मृत्यंतरे उदक्यासूतिकावापिमृतास्याद्यतितांतदा आशौचत्वननिक्रांतेदाहयेत्तराद्यदि उद्धृतेनतुतोयेनस्नापयित्वातुमंत्रतः आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाश्चतसृभिः पवमानानुवाकेनयदंतीतिचसप्तभिः ततोयज्ञपवित्रेणागोमूत्रेणाथतोद्विजाः स्नापयित्वान्यवसनेनाच्छाद्यशवधर्मतः दाहादिकंततःकुर्यात्प्रजापतिवचोयथा यज्ञपात्रेसमापोऽस्मान्निति मिताक्षरायां पंचभिःस्नापयित्वातुगव्यैः प्रेतांरजस्वलां वस्त्रांतराहृतंकृत्वादाहयेद्विधिपूर्वकं गृह्यकारिकायां अंतर्दशामृतायेचवन्हावणप्रमादतः उदक्यासूतिकानारीश्चरेच्चांद्रायणत्रयं ततोयवपिष्टेनानुलिप्याष्टोत्तरशतशूर्पोदकैः संस्नाप्यभस्मगोमयमृत्कुशोदक पंचग-

व्यशुद्धोदकैरापोहिष्ठापावमानीभिः संस्नाप्यान्यवस्त्रे धृतेदहेदितिभट्टाः अत्रप्रायश्चित्तमाहबौधायनः उदक्यासूतिकासूत्यौचरेच्चांद्रायणत्रयमिति
सूतिकायास्तुमिताक्षरायां सूतिकायांमृतायांतुकथंकुर्वंति याज्ञिकाः कुंभेसलिलमादायपंचगव्यंक्षिपेत्ततः पुण्यर्ग्भिरभिमंत्र्याथोवाचाशुद्धिंल
भेत्ततः तेनैवस्नापयित्वातुदाहंकुर्याद्यथाविधि अब्लिंगाभिर्मंत्रिताभिर्वामदेव्याभिरेवच अन्यैश्चवारुणैर्मंत्रैः संस्नाप्यविधिनादहेत् गृह्यकारि
कायां सूतिकामरणेप्राप्तेसर्वौषध्यनुलेपनं अस्नातकीतुसंस्पृष्टः शूर्पाणांतुशतंक्षिपेत् प्रायश्चित्तेविशेषस्तत्रैव सूतिकातुयदासाध्वीविस्नानामर
णंगता त्रिवर्षंपूर्णपर्यंतंशुध्येत्कृच्छ्रेणसर्वदा इदंचाद्यत्र्यहे सूतिकातुयदानारीरजसातुपरिप्लुता म्रियेतचेत्तुसानारीद्विवर्षंकृच्छ्रमाचरेत् इदं
द्वितीयत्र्यहे सूतिकातुयदासाध्वीविस्नानामरणंगता अर्द्धकृच्छ्रेणशुध्येतव्यासस्यवचनंयथा इदंतृतीयत्र्यहे अत्राशक्तौपक्षांतरमुक्तंतत्रैव
सूतिकातुयदानारीविस्नानामरणंगता त्रिषट्नवदिनादर्वागेकाह्नेनविशुध्यति ऊर्ध्वंतु सूतिकातुयदानारीप्राणांश्चैवपरित्यजेत् मासमेकावधिंया
वत्त्रिभिः कृच्छ्रैर्विशुध्यति गर्भिणीमृतौतुमदनरत्ने शौनकः गर्भिण्युदक्यासंस्कारंशिशुसंस्कारमेवच प्रवक्ष्यामिसमासेनशौनकोहंद्विजन्मनां
गर्भिणीमरणेप्राप्तेगोमूत्रेणजलैःसह आपोहिष्ठादिभिर्मंत्रैः प्रोक्ष्यभर्तासमास्थितः प्रेतंश्मशानेनीत्वाथो लिखेत्सव्योदरंततः पुत्रमादायजीवं
श्चेत्स्तनंदत्वासुतायतु यस्तेस्तनःशशयइत्यृचायाग्रेनिधायच उदरंचाव्रणंकुर्यात्पृषदाज्येनपूर्यच मृद्भस्मकुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः
स्नाप्यचाच्छाद्यवासोभिः शवधर्मेणदाहयेत् तत्रैवषडशीतिमतेगद्यानि गर्भिण्यामृतायांदक्षिणाशिवसंनिधायतस्यानाभिरधःसव्यमुदरंचतु
रंगुलंहिरण्यगर्भःसमवर्ततेतिछित्वागर्भंस्पंदमानंस्तनंप्रक्षाल्यनिखनेत्तस्याद्यदिजीवन्जीवत्सममपुत्रकेत्युक्त्वाक्षेत्रियेत्वेतिपंचभिःस्नापयित्वा
हिरण्यमंतर्धायभूमौनिधायव्याहृतिभिरभिमंत्र्ययस्तेस्तनःशशयइतिस्तनंपाययित्वाशिशुंग्राममाप्रापयेत् गर्भंछेदस्थलेशतासुधार्येतिपंचा-

हुतीर्हुत्वा प्राणायस्वाहा पूष्णेस्वाहेत्यनुवाकाभ्यां व्याहृत्या चाज्यं हुत्वा भिन्नमुदरं सूत्रेण संग्रथ्य घृतेनानुलिप्य ब्राह्मणाय तिलान् गां भूमिं सुवर्णं दद्यादथ यथोक्तेनकल्पेनदहेत् बौधायनेनतुयातासुधायेति पंचहोमानन्तरं प्रयासाययासायवियासायसंयासायोद्यासायशुचेशोकायतप्यतेतपतेब्रह्महत्यायैसर्वस्मैइति स्वाहान्तैराहुतयोऽधिकाउक्ताः गृह्यकारिकायां यदा गर्भवतीनारीसशल्यासंस्थिताभवेत् कुक्षिंभित्वाततः शल्यंनिर्हरेद्यदि जीवति प्रमीतंनिखनेत्तु प्रायश्चित्तमतः परं सार्धयस्त्रिंशताकृच्छ्रैः शुध्यतेशल्यदोषतः सगर्भदहनेतस्यावर्णजंवधपातकं प्रायश्चित्तंचरित्वा तु शुध्यतिपापकारिणः दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत् अथान्वारोहणंस्त्रीणामात्मनोभर्तुरेवच सर्वपापक्षयकरंनिरयोत्तारणायच अनेकस्वर्गफलदंमुक्तिदंचतथैवच जन्मान्तरेचसौभाग्यधनपुत्रादिवृद्धिदं देशकालौस्मृत्वारुंधतीसमाचरत्वस्वर्गलोकमहीयमानत्वमनुष्यलोमसख्याब्दावच्छिन्नस्वर्गवासभर्तृसहितचतुर्दशेन्द्रावच्छिन्नकालिकक्रीडमानत्वमातृपितृश्वशुरकुलत्रयपूतत्वब्रह्मघ्नमित्रघ्नकृतघ्नपतिपूतत्वपत्यवियोगकामाभर्तृज्वलच्चितारोहणंकरिष्ये अनुगमनेतु फलमुल्लिख्यान्वारोहणंकरिष्य इत्युक्त्वा हरिद्राकुंकुमाञ्जनादियुतशूर्पाणिसुवासिनीभ्योदद्यात् मंत्रस्तु लक्ष्मीनारायणोदेवोबलसत्वगुणाश्रयः गाढंसत्वंचमेदद्याद्वायनकैःपरितोषितः सोपस्कराणिशूर्पाणिवायनकैःसंयुतानिच लक्ष्मीनारायणप्रीत्यैसत्वकामाददाम्यहं अग्नेःसमीपमागत्य पंचरत्नानिपल्लवे नीलाञ्जनंतथाबध्वामुखेमुक्ताफलंन्यसेत् ततोऽग्निप्रार्थनंकृत्वामंत्रेणानेनाभिमंत्रितं स्वाहासंश्लेषनिर्विण्णसर्वगोत्रहुताशन सत्यमार्गप्रदानेननयमांभर्तुरंतिकं ततोग्नावाज्येनाग्नयेतेजोधिपतयेविष्णवेसत्वाधिपतयेकालायधर्माधिपतयेपृथिव्यैलोकाधिपतयेऽद्भ्योरसाधिष्ठात्रीभ्यः वायवेबलाधिपतयेआकाशायसर्वाधिपतयेकालायधर्माधिष्ठात्रीभ्यःसर्वसाक्षिणीभ्यः ब्रह्मणेवेदाधिपतयेरुद्रायश्मशानाधिपतयेचहुत्वाग्निंप्रदक्षिणीकृत्य दृषदंमुशलंचसंपूज्यपुष्पांजलिंगृही

स्वाग्निंप्रार्थयेत् त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत् त्वमेवदेवजानीषेनविदुर्यानिमानुषाः अनुगच्छामिभर्तारंवैधव्यभयपीडिता सत्यमार्गप्रदानेननयमांभर्तुरंतिकं मंत्रमुच्चार्यचानेकैः प्रविशेच्चहुताशनं गौडास्तु इमानारीरविधवाइति ॐ इमाःपतिव्रताःपुण्याःस्त्रियोयायाःसुशोभनाः सहभर्तुःशरीरेणसंविशंतुविभावसुं इतिचविप्रः पठेदित्याहुः कातरास्तु प्रेतान्तरस्मादेवरःशिष्योवाउदीर्ष्वेतिद्वाभ्यामुत्थापयेत् एतन्महिमामिताक्षरादौज्ञेयः पृथ्वीचंद्रोदयेस्कांदे अनुव्रजतिभर्तारंगृहात्पितृवनंमुदा पदेपदेश्वमेधस्यफलंप्राप्नोत्यनुत्तमं यत्त्वंगिराः याःस्त्रीब्राह्मणजातीयामृतंपतिमनुव्रजेत् सास्वर्गमात्मघातेननात्मानंनपतिंनयेदिति यच्चव्याघ्रपात् नम्रियेतसमंभर्त्राब्राह्मणीशोककर्शिता नब्रह्मगतिमाप्नोतिमरणादात्मघातिनीति पृथक्चितिपरं पृथक्चितिसमारुह्यनविप्रागंतुमर्हति अन्यासांचैवनारीणांस्त्रीधर्मोयंपरःस्मृतइत्युशनसोक्तेः पृथक्चितिस्तुक्षत्रियादिपरा तद्विधिर्ब्राह्मे देशांतरमृतेपत्यौसाध्वीतत्पादुकाद्वयं निधायोरसिसंशुद्धाप्रविशेज्जातवेदसं ऋग्वेदवादात्साध्वीस्त्रीनभवेदात्मघातिनी त्र्यहाशौचेनिवृत्तेतुश्राद्धंप्राप्नोतिशास्त्रवत् इमानारीरविधवाइतिऋग्वेदवादः त्र्यहाशौचमन्वारोहणपरमितिस्मार्तः निषेधवाक्यानिप्रायश्चित्तार्थंमृतेनपतिनानवासहमरणनिषेधपराणीत्यप्याहुः अस्थिदाहेपलाशदाहेवानपृथक्चितिदोषः अंगत्वेनस्थानापत्त्यावाशरीरतुल्यत्वात् यत्तु ब्रह्मघ्नोवाकृतघ्नोवामित्रघ्नोवाभवेत्पतिः पुनात्यविधवानारीतमादायमृतातुयेति हारितीयं तत्सतितदाहादिनिषेधेनसहगमनस्यदूरतोपास्तत्वादर्थवादमात्रमिति पृथ्वीचंद्रः जन्मांतरीयपापवतांसहमरणेनोद्धारइतिस्मार्तगौडाः शुद्धितत्त्वेव्यासः दिनैकगम्यदेशस्थासाध्वीचेत्कृतनिश्चया नदहेत्स्वामिनंतस्याःयावदागमनंभवेत् तत्रैवभविष्ये तृतीयेऽह्नि उदक्यायास्मृतेभर्तरिवैद्विजाःतस्यानुमरणार्थायस्थापयेदेकरात्रकं एकाचितांसमासाद्यभर्तारंयानुगच्छति तद्भर्तुर्यःक्रियाकर्तासतस्याश्चक्रियांचरेत्

एतद्दशाहांतरस्य यश्चाग्निदाता प्रेतस्य पिंडं दद्यात्स एव हीति वायवीयोक्तेः आपस्तंबः चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत् प्राजापत्येन शुद्ध्येत तस्माद्धि पापकर्मणः तथा अन्वारोहे तु नारीणां पत्युश्चैकोदकक्रियां पिंडदानक्रियां तद्वच्छ्राद्धं प्रत्याब्दिकं तथा अन्वारोहणे पत्न्याः पृथक्पिंडांस्तिलांजलीन् पृथक्कुशिलेन कुर्वीत दद्यादेकशिलेन तथा अन्यत्प्रागुक्तं इदं गर्भिणी बालापत्या सूतिका रजस्वला व्यभिचारिणी भिन्नकार्यं स्वैरिणीनां गर्भिणीनां पतितानां च योषितां नास्ति पत्याग्निसंवेशः पतितो हि तथा उभाविति मदनरत्ने स्मृतिसंग्रहोक्तेः मदनरत्ने बृहस्पतिः बालसंवर्धनं मुक्त्वा बालापत्या न गच्छति व्रतोपवासनियता रक्षेद्गर्भं च गर्भिणी तृतीयपादे रजस्वला सूतिका चेति पृथ्वीचंद्रोदये गौडीयश्राद्धतत्त्वे च पाठः तत्रैव बृहन्नारदीयेपि बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा रजस्वला राजसुते नारोहंति चितां सुते अत्र पतिव्रतानां संदीप्तं प्रविशेद्या हुताशनमिति भारतादृग्वेदवादात्साध्वी स्त्रीति ब्राह्माच्च पतिव्रतानामेवाधिकारो न दुर्वृत्तानां यत्तु अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा वर्तंते याश्च सततं भर्तृणां प्रतिकूलतः तत्रानुमरणं काले याः कुर्वंति तथाविधाः कामात्क्रोधात् भयान्मोहात्सर्वाः पूता भवंत्यत इति भारतं तत् कैमुतिकन्यायेन स्तावकमिति पृथ्वीचंद्रः ब्राह्मण्या एकचितिरेव न पृथक्चितिः क्षत्रियादीनां पृथगेका वेति कल्पतरुरत्नाकरमदनपारिजातादयः शुद्धिचिंतामणौ चैवं तत्रान्वारोहणे भर्तुः शौचमध्ये तदूर्ध्वं वा कृते त्रिरात्रमध्ये एव दशपिंडाः सहगमने तु भर्तुः शौचतुल्यमशौचं पिंडदानं च अन्वितायाः प्रदातव्या दशपिंडारूप्रहेण तु स्वाप्याशौचे व्यतीते तु तस्याः श्राद्धं प्रदीयते इति शुद्धितत्त्वे शूलपाणौ च पैठीनसिस्मृतेः संस्थितं पतिमालिंग्य प्रविशेद्या हुताशनं तस्याः पिंडादिकं देयं क्रमशः पतिपिंडवदिति शूलपाणिशुद्धितत्त्वधृतव्यासोक्तेः अन्यत्प्रागुक्तं यदा तु रजस्वलापि पत्नि मृते पत्यौ देशकालवशात्तदैवानुगच्छति न शुद्धिं प्रतीक्षते तत्र विधिः देवयाज्ञि

कनिबंधे यदास्त्रियामुदक्यायांपतिःप्राणान्समुत्सृजेत् द्रोणमेकंतंडुलानामवहन्याद्विशकृत्त्रये मुसलाघातैस्तदसृक्स्रवतेयोनिमंडलात्
विरजस्कामन्यमानास्त्रैचिन्हेनतदसृक्क्षयं दृष्ट्वाशौचंप्रकुर्वीतपंचमम् त्रिकयापृथक् त्रिंशाद्विंशातिर्दशचगवांदत्वात्र्यहः क्रमात् विप्राणांव-
चनात्तुज्ञा समारोहेद्धुताशनं नारीणांसरजस्कानामियंशुद्धिरुदाहृता अत्रश्राद्धादौनिर्णयःपूर्वमुक्तः इतिश्रीभट्टकमलाकरकृते
निर्णयसिंधावंत्यकर्मनिर्णयः अथाग्निप्रवेशाशक्तौतुविष्णुः मृतेभर्तरिब्रह्मचर्यंतदन्वारोहणंवेतिब्रह्मवैवर्तेसहानुगमनंशस्तंवैध
व्यस्थायपालनं यत्तुतत्रैव कलौनान्यागतिःस्त्रीणांसहानुगमनादृतइति ब्रह्मचर्याशक्यत्वपरं तथाचमनुः ब्रह्मचर्येचरेद्वापि प्रविशे-
द्हुताशनं काशीखंडेपिपत्योमृतेपियायोषिद्वैधव्यपालयेत् क्वचित् सापुनःप्राप्यभर्तारस्वर्गलोकंसमश्नुते अनुयातिनभर्तारय
दिदेशात्कथंचन तत्रापिशीलंसंरक्षेच्छीलभंगात्पतत्यधः तद्वैगुण्यादपिस्वर्गात्पतिःपततिनान्यथा तस्याःपिताचमाताचभ्रातृवर्गस्तथै
वच अथविधवाधर्माः मदनरत्नेस्कांदे विधवाकबरीबंधोभर्तृबंधाययजायते शिरसोवपनंतस्मात्कार्यंविधवयासदा एकाहारःसदाका
र्योनद्वितीयःकदाचन मासोपवासंवाकुर्याच्चांद्रायणमथापिवा पर्यंकशायिनीनारीविधवापातयेत्पतिं नैवांगोद्वर्तनंकार्यंस्त्रियाविधव-
याक्वचित् गंधद्रव्यस्यसंभोगोनैवकार्यस्तयापुनः तर्पणंप्रत्यहंकार्यंभर्तुस्तिलकुशोदकैः तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् इदम
पुत्राभरमितिमदनपारिजातः नाधिरोहेदनड्वाहंप्राणैःकंठगतैरपि कंचुकंनपरीदध्याद्वासोनविकृतंवसेत् वैशाखेकार्तिकेमाघेविशेषनि
यमंचरेत् प्रचेताः तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोजनं यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् श्राद्धादौतुविशेषःप्रागुक्तः यत्तुबोधा
यनः संवत्सरंप्रेतपत्नीमधुमांसंविवर्जयेत् अधःशयीतषण्मासानितिमौद्गल्यभाषितमितितदसवर्णापरमित्यपरार्कः अथसंन्यासः याज्ञव

ल्यः वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणां प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान् शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा एतदाश्रमसमुच्चयपक्षे जाबालश्रुतौ त्वन्येऽपि पक्षा उक्ताः यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वा अथ पुनरव्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति अंगिराः प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेच्च गृहादपि वनाद्वा प्रव्रजेद्विद्वानातुरो वाऽथ दुःखितः आतुरो मुमूर्षुः दुःखितश्चौरव्याघ्रादिभीतः भारते आतुराणां च संन्यासे न विधिर्नैव च क्रिया प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् जाबालश्रुतावपि यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदिति अत्र विप्रस्यैवाधिकारः ब्राह्मणाः प्रव्रजन्तीति जाबालश्रुतेः आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनूक्तेश्चेति विज्ञानेश्वरादयः चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोरिति ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादिति कौर्मोक्तेर्वर्णत्रयस्याप्यधिकारः पूर्ववाक्यं तु काषायदंडादिनिषेधार्थं मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वच इति बोधायनोक्तेरिति पक्षांतरमाह तत्वं तु कुटीचकादिपरमेतदिति योऽपि संन्यासं पलपैतृकमिति कलौ निषेधः सोऽपि त्रिदंडादिपर इत्युक्तं प्राक् स च संन्यासश्चतुर्धेत्याह हारीतः कुटीचको बहूदको हंसश्चैव तृतीयकः चतुर्थः परमो हंसो यो यः पश्चात्स उत्तमः आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन् काषायवासाः शिखोपवीतत्रिदंडवान् बंधुपुत्रगृहे वा भुंजान आत्मज्ञो भवेत् एतदत्यंताशक्तपरम् द्वितीयस्तु बंधून्हित्वा सप्तागाराणि भैक्षं चरन् पूर्वोक्तवेषः स्यात् हंसस्तु पूर्वोक्तवेषोऽप्येकदंडः एकं तु वैणवं दंडं धारयेन्नित्यमादरादिति स्कांदात् विष्णुरपि यज्ञोपवीतं दंडं च वस्त्रं जंतुनिवारणम् तावान्परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः चतुर्थोऽपि स्कांदे परहंस

स्त्रिदंडंचरज्जुंगोवालनिर्मितम् शिखांयज्ञोपवीतंचनित्यंकर्मपरित्यजेत् अयमप्येकदंडएव येतुशिखोपवीतादित्यागनिषेधास्तेकुटीचकादिपराः यत्तुमेधातिथिः यावन्तस्युस्त्रयोदंडास्तावदेकेनवर्तयेदिति तदपितत्परमेव यच्चात्रिः चतुर्धाभिक्षवः प्रोक्ताः सर्वेचैवत्रिदंडिनइति तद्वाक्दंडादिपरंनयष्टिपरम् वाग्दंडोथमनोदंडः कर्मदंडस्तथैवच यस्यैतेनियतादंडाः सत्रिदंडीति चोच्यते इतिमनूक्तेः तस्मात्परमहंसस्यैकदंडएव सोप्यविदुषः विदुषस्तुसोपिनास्ति नदंडंनशिखांनाच्छादनंचरतिपरमहंसइतिमहोपनिषदुक्तेः ज्ञानमेवास्यदंडइतिवाक्यशेषाच्च यत्तुयमः काष्ठदंडोधृतोयेनसर्वाशीज्ञानवर्जितः सयातिनरकान्घोरान्महारौरवसंज्ञितानिति तद्वैराग्यंविनाजीवनार्थसन्यासपरं एकदंडंसमाश्रित्यजीवंतिबहवोनराः नरकेरौरवेघोरेकर्मत्यागात्पतंतितइतिस्मृतेः यच्चाश्वमेधिके एकदंडीत्रिदंडीवाशिखामुंडितएववा काषायमात्रसारोपियतिः पूज्योयुधिष्ठिरेति तस्यापिपूर्वोक्तव्यवस्थाज्ञेया अथतद्विधिः बौधायनः कृत्वाश्राद्धानिसर्वाणिपित्रादिभ्योष्टकंपृथक् वापयित्वाचकेशादीन्मार्जयेन्मातृकाइमाः सर्वाणीत्यस्यनवश्राद्धषोडशश्राद्धादिकृत्वेत्यर्थः स्मृत्यर्थसारेपि एकोद्दिष्टविधानेनकुर्याच्छ्राद्धानिषोडश अग्निमान्पार्वणेनैवविधिनानिर्वपेत्स्वयमितिकात्यायनः कृच्छ्रांस्तुचतुरःकृत्वापावनार्थमनाश्रमी आश्रमीचेन्नतत्कृच्छ्रंतेनासौयोग्यतांव्रजेत् बौधायनः सदैवमार्षकंदिव्यंपित्र्यंमातृकमानुषे भौतिकंचात्मनश्चांते अष्टौश्राद्धानिनिर्वपेत् अत्रक्रममाहहेमाद्रौशौनकः देवश्राद्धेब्रह्मविष्णुमहेश्वरादेवताः आर्षेदेवर्षिब्रह्मर्षिक्षत्रर्षयः देवर्षिक्षत्रर्षिमनुष्यर्षयोवामरीच्यादिऋषय इतिसंन्यासपद्धतौतच्चिंत्यम् दिव्येवसुरुद्रादित्याः

मानुषे सनकसनंदनसनातनाः भूतश्राद्धे पृथिव्यादिभूतानि चक्षुरादिकरणानि चतुर्विधो भूतग्रामश्चेति तिस्रः पित्र्ये पित्रादित्रयो मातामहाश्च मातृके मात्रादयस्तिस्रः आत्मश्राद्धे आत्मपितृपितामहा देवताः आत्मश्राद्धं परमात्मदेवमित्यमिति सन्यासपद्धतौ तच्चिंत्यं सर्वत्र नांदीमुखत्वविशेषणं ज्ञेयं सर्वत्र पिंडदानं युग्मा विप्राः दक्षक्रतू सत्यवसू वा विश्वेदेवौ अन्यन्नांदीश्राद्धवदिति हेमाद्रिः स्मृत्यर्थसारे केशश्मश्रुलोमनखं वापयित्वोपकल्पयेत् दंडं जलपवित्रं च शिक्यं पात्रं कमंडलु आसनं कौपीनमाच्छादनं कंथां पादुके इति दश पञ्च वा एतच्च पूर्वेद्युर्नांदीमुखं कृत्वा परेद्युः पुण्याहवाचनं कृत्वा कार्यमिति शौनकः बौधायनः त्रीन्दंडानंगुलीस्थूलान् वैणवान्मूर्धसंमितान् एकादशनवद्वित्रिचतुःसप्तास्यपर्वकान् वेष्टितान्कृष्णगोवालरज्जुचतुरंगुलान् एको वा तादृशो दंडो गोवालसदृशो भवेत् अनग्निरग्निमुत्पाद्य नित्येन विधिना ततः पृष्ठोदिविविधानेनेत्यर्थः स्वाग्नावेवाग्निमान्कुर्यादपवर्गान्तकर्मादितः आज्यपयोदधीत्येतत्त्रिवृद्वा जलमेव वा ॐ भूरित्यादिना प्राश्य रात्रिं चोपवसेत्ततः अथादित्यास्तमयात्पूर्वमग्नीन्विहृत्य सः आज्यमग्नौ गार्हपत्ये संस्कृत्यैतेन च स्रुचा पूर्णाहवनीये तु जुहुयात् प्रणवेन ततः ब्रह्मान्वाधानमेतस्यादग्निहोत्रे कृते ततः संस्तीर्य गार्हपत्यस्य दर्भानुत्तरतोत्र तु पात्राण्यासाद्य दर्भेषु ब्रह्मायतन एव तु जागृयाद्रात्रिमेतां तु यावद्ब्राह्मो मुहूर्तकः अग्निहोत्रं स्वकाले तु हुत्वा प्रातस्तनं ततः इष्टिं वैश्वानरीं कुर्यात्प्राजापत्यामथापि वा जाबालस्मृतौ तत्रैके प्राजापत्यामेवेष्टिं कुर्वंति न तु तथा न कुर्यादाग्नेयीमेव कुर्यात् पश्चाद्वैश्वानरीयामेव कुर्यादित्युक्तं तेनात्र विकल्पः अत्राहुः त्रेताग्नेः प्राजापत्या तद्वाक्यशेषेग्नीनिति बहुत्वश्रुतेः एकाग्नेस्त्वाग्नेयीति अनाहिताग्नेरिष्टिस्थाने वैश्वानर आग्नेयो वा चरुरिति माधवः कात्यायनः आत्मन्यग्नीन्समारोप्य वेदिमध्यस्थितो हरिं ध्यात्वा हृदि तत्तु ज्ञातो गुरुणा प्रैषमीरयेत् कपिलः विधिवत्प्रैषमुक्त्वाथ त्रिरुपांशुः त्रिरुच्चकैः अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यपो भुवि

निनीयदंडशिक्यादिगृहीत्वाथबहिर्व्रजेत् बौधायनः सखेमेत्यादिनादंडं येनदेवाः पवित्रकं यदस्यपारेशिक्यंतु पात्रंव्याहृतिभिस्तथा सुवासुवासाः कौपीनंगृहीत्वाबांधवांस्त्यजेत् अथक्रमः तत्रसन्यासेधिकारसिध्यर्थं स्वस्यनवश्राद्धं षोडशश्राद्धं सपिंडनानिसाग्निः पार्वणान्यनग्निस्त्वेकोद्दिष्टविधिनाकृत्वानाश्रमीचेत्कृच्छ्रचतुष्टयंसन्यस्तुतप्तकृच्छ्रंकृत्वोदगयने एकादश्यांद्वादश्यांवासाग्निरमावास्यायांपौर्णमास्यांचतुर्दश्यांवा यथापर्वणिप्राजापत्यास्यात् तत्रदेशकालौस्मृत्वापरमहंसादिसन्यासंग्रहणंकरिष्यइतिसंकल्प्यगणेशंसंपूज्यपुण्याहंवाचयित्वामातृकापूजांवृद्धिश्राद्धंचकृत्वास्तमयात्प्रागौपासनंसमिध्याहिताग्निस्तुगार्हपत्यंविधुरोग्निहोत्रीतुत्रिकांडमंडनोक्तदिशाकुशपत्न्यासह पवमानेष्ट्यंतंपूर्णाहुत्यंतंवाधानंकुर्यात् ब्रह्मचारीचेल्लौकिकेविधुरश्चेद्व्याहृतिभिःप्रणवेनवाग्निमादायान्वग्निरुपसामित्यानीयपश्चोद्दीप्तिनिधायतेनैवसमिध्य तत्सवितुस्त्वांसवितुर्विश्वानिनइतिनिस्वः समिधोभ्यादध्यात् एवमग्नौसिद्धे कक्षोपस्थवर्ज्यंवपनंकृत्वा पयोदधिघृतमाज्यमपोवा ॐ भूःसावित्रींप्रविशामि तत्सवितुर्वरेण्यमितिप्राश्याचम्य पुनरादाय ॐ भुवःसावित्रींप्रविशामि भर्गोदेवस्यधीमहीतिद्वितीयं ॐ स्वःसावित्रींप्रविशामि धियोयोनःप्रचोदयादितितृतीयंसमस्तयाचतुर्थं ॐ भूर्भुवःस्वःसावित्रींप्रविशामि॰ तत्सवि॰यात्इतिसन्यासपक्षेतुत्रिदसीतिप्रथमंमहृदसीतिद्वितीयंविष्टदसीतितृतीयंप्राश्यापःपुनंतितिजलंप्राश्यसावित्रीप्रवेशउक्तः तत हवनीयंविहृत्यब्रह्माणमुपवेश्याज्यंसंस्कृत्यचतुर्द्वादशवागृहीत्वा समिन्मूर्ध्नोस्वाहा परमात्मनइदमितिहुत्वोपवसेत् ततःसायंहोमंवैश्वदेवंचकृत्वा अग्नेरुदक्कुशानास्तीर्यदंडादीनिदशपंचवासाद्य ब्रह्मासनेकृष्णाजिनोपविश्यरात्रौजागरंकृत्वाप्रातर्होमानंतरंप्राजापत्यांवैश्वानरींवाकृत्वाकृत्विग्भ्यः सर्वस्वंब्रह्मणेचमधुपूर्णंतैजसपात्रंदत्वादारुपात्राण्याहवनीयेश्ममृन्मयानिचजलेक्षिपेत् कृष्णाजिनंत्वाददीत अनाहिताग्निस्तुवैश्वानरमाग्नेयं वाचरुंहुत्वापात्राण्यग्नौक्षिप्त्वा भूर्भुवःस्वरित्यपःस्पृष्ट्वातरत्समंदीतिजप्त्वाविप्रान्संभोज्यपुण्याहंवाचयित्वात्रवावपनंकृत्वाहेमरूप्यकुश-

जलैः स्नात्वा पुरुषाय चरुं कृत्वा प्राणाय स्वाहेति पंचाहुतीर्हुत्वा पुरुषसूक्तेन प्रत्यृचं चरुं च जुहुयात् अत्र विरजाहोमं केचिदाहुः यथोक्तं शिवगीतासु जुहुयाद्विरजामंत्रैः प्राणापानादिभिस्ततः अनुवाकांतमेकाग्रः समिदाज्यचरून्पृथक् आत्मन्यग्नीन्समारोप्य याते अग्नेति मंत्रतः भस्मादाय भिरित्याद्यैर्विमृज्याङ्गानि संस्पृशेत् पापैर्विमुच्यते सत्यं मुच्यते नात्र संशयः यथा प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा सर्वत्र लिंगोक्तदेवताभ्य इदमिति त्यागः वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिः संकल्पा मे शुध्यंतां ज्योति० त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनि मे शुध्यंतां ज्योति० शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिरहं० उत्तिष्ठ पुरुष हरित पिंगल लोहिताक्षि देहि देहि दापयिता मे शुध्यंतां० पृथिव्यापस्तेजो वायुराकाश मे शुध्यंतां ज्योति० शब्दस्पर्शरूपरसगंधा मे शुध्यंतां ज्योति० मध्यवाक्कायकर्माणि मे शुध्यंतां० आत्मा मे शुध्यंतां० अंतरात्मा मे शुध्यंतां० क्षुधे स्वाहा क्षुत्पिपासाय स्वाहा विविध्यै स्वाहा ऋग्विधानाय स्वाहा कषोत्काय स्वाहा क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मा मे शुध्यंतां ज्योति ततः स्विष्टकृदादि हुत्वा ब्रह्मणे हिरण्यमाज्यपात्रं धेनुं च दत्वा समासिंचन्नित्युपतिष्ठेत अत्र केचिदग्नेः सावित्रीप्रवेशं पूर्णाहुतिं चाहुः ततो याते अग्ने यज्ञियातनूरिति त्रिभिस्त्रिरेकैकं जिघ्रन्नात्मन्यग्नीन्समारोप्य गुरवे सर्वस्वं दत्वा यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इत्युपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्याधीहि भगवो ब्रह्मेति वदेत् ततो गुरुरात्मानं ब्रह्मरूपं ध्यात्वा शंखं द्वादशप्रणवैरभिमंत्र्य तेन शिष्यमभिषिंच्य शंनो मित्र इति शांतिं पठित्वा तच्छिरसि हस्तं दत्वा पुरुषसूक्तं जप्त्वा मम व्रते ते हृदयं ते दधामीति च जप्त्वोदङ्मुखः प्रणवार्थमनुसंदधद्दक्षिणे कर्णे प्रणवमुपदिश्य

तदर्थंचपंचीकरणाद्यवबोध्य अयमात्माब्रह्मतत्वमसिप्रज्ञानंब्रह्मेत्याद्युपदिशेत् तदर्थंचवदेत् ततोनामदद्यात् ततःशिष्यस्तेनोपदिष्टोहरिंस्मरन्पूर्वाबाहुस्तिष्ठन् देवान्साक्षिणःकृत्वा ॐ भूर्भुवःस्वःसन्न्यस्तंमयेतित्रिरुपांशुत्रिरुच्चैःस्थिरत्वकृच्चैश्चोक्त्वाजलसमीपंगत्वास्नात्वा अभयंसर्वभूतेभ्योमत्तःस्वाहेतित्रिरंजलिंक्षिप्त्वायुवासुवासाइतिकाषायंकौपीनंवासश्चपरिधायसखामागोपायेतिमुख्यंवैणवंपालाशंबैल्वमौदुंबरंवादंडंगृण्हीयात् अत्रपुत्रकामोगृहस्थःशंखेनपुरुषसूक्तेनदंडमभिषिच्यदद्यादित्याचारः ततःशिखामुत्साद्य ॐ भूःस्वाहेत्यग्नौजलेवाहुत्वातथैवोपवीतंहुत्वायेनदेवाःपवित्रेणेतिजलेपवित्रंयदस्यपारइतिशिक्यंसावित्र्याकमंडलुंसप्तव्याहृतिभिःभोजनपात्रमिदंविष्णुरित्यासनंबृसींवागृहीत्वा ॐ भूःस्तर्पयामीतिव्यस्तसमस्ताभिर्महर्नमइतितर्पयित्वाभूःस्वधांभुवःस्वधांस्वःस्वधांभूर्भुवःस्वर्महर्नमःस्वधेतिपितॄंस्तर्पयित्वाउदुत्यंचित्रंतच्चक्षुःहंसःशुचिषन्नमोमित्रस्येतिस्नात्वासकृदभिमतीभिरापोहिष्ठेतिहिरण्यवर्णाभिःपावमानीभिर्व्याहृतिभिश्चमार्जयित्वाष्टोत्तरशतवारमघमर्षणंप्राणायामांश्चकृत्वा ॐ भूर्भुवःस्वरितिचपठित्वानमःसवित्रइतिसूर्यंचोपस्थायपुनःस्नात्वाजंघेक्षालयित्वा ॐ मितिब्रह्मोमितीदंसर्वमोमितिब्रह्मवाएषज्योतिर्यएषवेदोयएषतपतिवेद्यमेवैतद्यएषवेदोयदवनमस्तीतिजपित्वाष्टसहस्रंगायत्रींजपेदिति अथयतिधर्माः प्रातरुत्थायब्रह्मणस्पतेइतिजपित्वादंडादीनिमृदंचनिधायमूत्रपुरीषयोर्गृहस्थचतुर्गुणंशौचंकृत्वाचम्यपर्वद्वादशीवर्ज्यंप्रणवेनदंतधावनंकृत्वातेनैवमृदाबहिःकटिंप्रक्षाल्यजलतर्पणवर्ज्यंस्नात्वाजंघेप्रक्षाल्यवस्त्रादीनिगृहीत्वामार्जनांतंकृत्वाकेशवादिनमोंतनामभिस्तर्पयित्वा ॐ भूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीतितर्पयेत् ॐ भूःस्वाहेतिस्वाहाशब्दांतैःस्वधाशब्दांतैश्चैभिरेवपुनस्तर्पयेदितिकेचित् ततआचम्यांजलिनाप्रणवेनजलमादायव्याहृतिभिरुद्धृत्यगायत्र्यात्रिःक्षिप्त्वागायत्रींजपेत् उदितेसूर्येप्रणवेनव्याहृतिभिर्वा

ध्येयंविदित्वा मित्रस्यचर्षणीत्याद्यैः पूर्वोक्तसौरीभिरिदंविष्णुस्त्रिर्देवोब्रह्मजज्ञानमितिचोपस्थायसर्वभूतेभ्योनमइतिप्रदक्षिणमावर्त्तते ततोनत्वा आदित्यायविद्महेसहस्राक्षायधीमहि तन्नः सूर्यः प्रचोदयादितित्रिर्जपेत् एवंत्रिकालंविष्णुपूजांब्रह्मयज्ञंचकुर्यात् अथभिक्षा विधूमेसन्नमुसलेव्यंगारेभुक्तवज्जने कालेपराण्हेभूयिष्ठेनित्यंभिक्षांयतिश्चरेदित्युक्तेकालेउदुत्यमितिचतसृभिरादित्यमुपस्थायतेनैक्यंध्यात्वा आकृष्णेनेतिप्रदक्षिणंकृत्वायेतेपंथानइतिजप्त्वा योसौविष्ण्वाख्यआदित्येपुरुषोन्तर्हृदिस्थितः सोहंनारायणोदेवइतिध्यात्वाप्रणम्यतत् त्रिदंडंदक्षिणेंसंगेततःसंधाय बाहुना पात्रंवामकरेक्षिप्त्वाश्लेषयेद्दक्षिणेनालितिबोधायनोक्तदिशात्रीन्पंचसप्तवागृहान्गत्वाभवन्पूर्वंभिक्षांयाचित्वा पूर्णमसिपूर्णंमेभूयाइत्यागत्यशुचिरन्नंप्रोक्ष्य ॐ भूः स्वधानमइत्यादिव्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्योभूतेभ्यश्चभूमौक्षिप्त्वाभुक्त्वाप्रणवेनषोडशप्राणायामान्कुर्यादितिसंक्षेपः गौतमव्याख्यायांभृगुः यतिहस्तेजलंदत्वाभैक्ष्यंदद्यात्पुनर्जलं भैक्षंपर्वतमात्रंस्यात्तज्जलंसागरोपमं अत्रसर्वत्रमूलमाधवपरार्कमदनरत्नस्मृत्यर्थसारादौज्ञेयम् कण्वः एकरात्रंवसेद्ग्रामेनगरेपंचरात्रकं वर्षाभ्योन्यत्रवर्षासुमासांस्तुचतुरोवसेत् जाबालश्रुतौ शून्यागारेदेवगृहतृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थंडिलेष्वनिकेतनइतिमात्स्ये अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनां एकत्रचतुरोमासान्वार्षिकान्निवसेत्पुनः अविमुक्तप्रविष्टानांविहारस्तुनविद्यते अत्रिः भिक्षाटनंजपस्नानंध्यानंशौचंसुरार्चनं कर्तव्यानिषडेतानिसर्वथानृपदंडवत् मंचकंशुक्लवस्त्रंचस्त्रीकथांलौल्यमेवच दिवास्वापंचयानंचयतीनांपतनानिषट् आसनंपात्रलोपश्चसंचयःशिष्यसंग्रहः दिवास्वापोवृथाजल्पोयतेर्बंधकराणिषट् दक्षः नाध्येतव्यंनवक्तव्यंनश्रोतव्यंकथंचन यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच मदनरत्नेअत्रिः पित्रर्थंकल्पितंपूर्वमन्नंदेवादिकारणात् वर्जयेत्तादृशींभिक्षांपरबाधाकरींतथा बृहस्पतिः नतीर्थवासीनित्यंस्यान्नो

प्रवासपरोयतिः नचाध्ययनशीलःस्यान्नव्याख्यानपरोभवेत् एतद्वेदार्थभिन्नपरम् अत्रिः स्नानंसुरार्चनंध्यानंप्राणायामोबलिस्तुतिः भिक्षाटनंजपःसंध्यांत्यागःकर्मफलस्यच एतेयतिधर्माइत्यर्थः अन्येपिसाधवमिताक्षरादौज्ञेयाः यतिधर्मसमुच्चयेतु नस्नानमाचरेद्भिक्षुःपुत्रादिनिधनेश्रुते पितृमातृक्षयंश्रुत्वास्नात्वाशुध्यतिसांबरः अथयतिसंस्कारःस्मृत्यर्थसारे सर्वसंगनिवृत्तस्यध्यानयोगरतस्यच नतस्यदहनंकार्यंनाशौचंनोदकंक्रिया तथा कुटीचकंतुप्रदहेत्पूरयेत्तुबहूदकम् हंसोजलेतुनिक्षेप्यः परहंसंप्रपूरयेत् पालाशमूलेनदीतीरेन्यत्रवागंधपुष्पालंकृतंशवंवाद्यघोषेणनीत्वादंडमात्रंव्याहृतिभिःस्नात्वासप्तव्याहृतिभिस्त्रिःप्रोक्ष्यदर्भानास्तीर्यनवघटेपंचरत्नोदकंक्षिप्त्वानारायणःपरंब्रह्मेत्यभिमंत्र्य तेनैवसंस्नाप्यप्राक्क्षौरेणवस्त्रगंधपुष्पधूपदीपादीन्दत्वाविष्णोहव्यंरक्षस्वेतिशवंगर्तेनिधायेदंविष्णुरितिदक्षिणहस्तेदंडंयदस्यपारेइतिसव्येशिक्यंयेनदेवाःपवित्रेणेतिसूत्रेवजलपवित्रंसावित्र्योदरेपात्रंभूमिःश्यक्तेतिगुह्येकमंडलुंनिधायचित्तिःस्रुगितिदशहोत्राभिमंत्रयेदितिविश्वादर्शटीकायांस्मृत्यर्थसारेच बृहच्छौनकस्तु यतिंपुरुषसूक्तेनस्नापयित्वावटंततः प्रणवेनाष्टवारंतंप्रोक्षयेदथसर्वतः विष्णोहव्यंरक्षस्वेतियजुषाप्रणवेनच गर्तेप्रेतंविनिक्षिप्य चेदंविष्णुर्विचक्रमइतिमंत्रेणदंडंतुदद्याद्दक्षिणहस्तकेमूर्धानंभूर्भुवःस्वश्चेत्युक्त्वाशंखेनभेदयेत् गर्तंपुरुषसूक्तेनलवणेनप्रपूरयेत् शृगालश्वादिरक्षार्थंसम्यग्गर्तंप्रपूरयेदिति कुटीचकस्यतुदाहःकार्यः यथासर्वंप्रागवत्कृत्वाग्निंप्रज्वाल्यसाग्नेर्दक्षिणकरेउपावरोहेत्यवरोह्यनिर्मथ्यवागर्तेचितिंकृत्वाग्निनाग्निःसमिध्यतइत्यग्निंदत्वासावित्र्याप्रणवेनवादहेत् ततोष्टशतप्रणवंनारायणःपरंब्रह्मेतिजप्त्वासशिरःप्रणवव्याहृत्यागायत्र्यातदस्मास्थीनितीर्थेक्षिप्त्वास्नानात्शुचिः नास्यान्यदौर्ध्वदैहिकम् त्रिदंडग्रहणादेवप्रेतत्वंनैवजायतइतिउशनःस्मृतेः एकादशेऽह्निपार्वणंतदपित्रिदंडिनः हंसपरमहंसादीनांपार्वणादिकमपिनकार्यमितिशूलपाणिः श्राद्धचिंतामणौदत्तात्रेयः एकोद्दिष्टंजलंपिंडमा

शौचंप्रेतसत्क्रियासु नकुर्याद्वार्षिकादन्यद्ब्रह्मीभूतायभिक्षवे प्रेतक्रियायेकोद्दिष्टनिषेधेसिद्धेपुनस्तद्ग्रहणमाब्दिकंपरं तेनतत्पार्वणमेवंत्रिदंडिनां
द्वादशेनारायणबलिः तद्विधिरन्यश्चविशेषः प्रागुक्तइत्यलंबहुना एवंनिरूपितमिदंगहनंतुधर्मतत्वंविचार्यवचनैश्चनयैश्चसम्यक् तद्दोषदृष्टिमपहायविवेचनीयंविद्वद्भिरित्यविरतंप्रणतोस्मितेभ्यः प्रयाससद्भासद्वायदिहगदितंमंदमतिनाकिमेतच्छक्यंवाध्यवसितुमपिस्वल्पमतिना तदेवंयत्किंचि
हृदितमिहविख्यातमहिमामतापोयंसर्वोविकसतुपित्रोश्चरणयोः २ योभाट्टतंत्रगगनार्णवकर्णधारः शास्त्रांतरेषुनिखिलेष्वपिमर्मभेत्ता यो
प्रश्रमःकिलकृतः कमलाकरेणप्रीतोस्तुनास्तुसकृतीबुधरामकृष्णः ३ श्रीभट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसूनोः श्रीरामकृष्णास्यसुतः
कृतीमंव्यधान्निबंधंकमलाकराख्यः ४ नानानिर्णयवत्त्वान्निर्णयसिंधुःप्रोच्यतांविबुधाः निर्णयसरोजवत्त्वान्निर्णयकमलाकरोप्यस्तु ५ वसुऋतुऋतुभूमितेगतेब्देनरपतिविक्रमतोयग्रातिरौद्रे तपसिशिवतिथौसमापितोयंरघुपतिपादसरोरुहेर्पितश्च ६ जगतिसकलविद्यासिंधुसुष्टिं
धयानापरभणितिपरीक्षाप्युज्यतेसज्जनानां तदिहममनिबंधेदूषणंभूषणंवायदिभवतिविदग्धैस्तत्स्वयंवश्यंविमृश्यं ७ इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसूनुविद्वन्मुकुटहीरांकुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृतेनिर्णयसिंधौतृतीयपरिच्छेदः समाप्तः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ हेंपुस्तक, मुंबईंत. महादेवगोपाळशास्त्री अन्नापूरकर, याणीं आपले छापखान्यांत छापिलें. ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ शके १७९० विभवनामसंवत् श्राव० कृ० ३ गु०

॥ इतिनिर्णयसिंधोस्तृतीयपरिच्छेदः समाप्तः ॥

॥अथशान्तिमयूखस्यानुक्रमणिकाप्रारभ्यते·

॥ श्रीगणेशायनमः॥

॥ अथशांतिमयूखानुक्रमणिका प्रारंभोयम्॥

मंगलाचरणम्· १
कविवंशकथनम्· १
शांतिलक्षणम्· २
परिभाषा· २
अथविनायकस्नपनं· ४
प्रयोगः ६
अथग्रहयज्ञः ८
अयुतादिहोमंप्रकृत्यवशिष्टः ९
ग्रहादीनांलक्षणानि १७
अधिदेवताप्रत्यधिदेवतालक्षणानि· १७
विनायकादिलक्षणानि· १८
लोकपालरूपाणि· १८
अथलक्षहोमः १८
अथकोटिहोमः १९
शतमुखकोटिहोमः २१
अथग्रहमखप्रयोगः २३
मंडपकरणम् २३
गणेशपूजादि· २४
आचार्यर्त्विग्वरणं· २४
मंडपप्रवेशादिः २४
वास्तुकर्म· २४
द्वारपूजा· २५
तोरणपूजा· २५
अग्निस्थापनं· २८
मंडलदेवतास्थापनं· २८
ग्रहादिस्थापनंपूजनंच २९
कलशस्थापनं· ३१
वितानबंधनम् ३२
होमः ३२
बलिदानम् ३३
पूर्णाहुतिः ३३
अभिषेकः ३३
आचार्यादिपूजनम्· ३४
अथग्रहयोगशांतिः ३४
ग्रहस्नानानि· ३५
अथादित्यशांतिः ३५
चंद्रशांतिः ३५
मंगलशांतिः ३५
बुधशांतिः ३६
गुरोःशांतिः ३६

गुरुपूजा	३६	गोमुखप्रसवविधिः	४४	मूलाश्लेषाशांत्योः	५३	त्रिकशांतिः	५९
शक्रशांतिः	३७	प्रयोगः	४५	प्रयोगः		प्रसववैकृतशांतिः	६०
प्रतिशक्रादिशांतिः	३७	सदंतोत्पत्तिशांतिः	४५	वैधृतिव्यतीपातसंक्रांति	५६	यमलशांतिः	६०
शन्यादिशांतिः	३७	कृष्णचतुर्दशीजननशांतिः	४५	शांतयः		ग्रहागृहीतबालकविधिः	६०
शनिव्रतम्	३७	सिनीवालीकुहूशांतिः	४६	प्रयोगः	५७	बालकग्रहस्तवः	६१
शनिस्तोत्रम्	३८	प्रयोगः	४७	एकनक्षत्रजन्मशांतिः	५७	पूतनाविधानम्	६२
अर्कविवाहः	३८	दर्शजननशांतिः	४७	प्रयोगः	५७	ज्वराद्युत्पत्तौशांतयः	६५
प्रयोगः	३९	प्रयोगः	४८	ग्रहणोत्पत्तौशांतिः	५८	वारशांतयः	६६
ऋतुशांतिः	४०	ज्येष्ठाशांतिः	४८	विषघटिकाशांतिः	५८	नक्षत्रशांतयः	६६
प्रयोगः	४२	प्रयोगः	४९	भगंडांतशांतिः	५९	तिथिवारर्क्षेषुसाधारणः	६९
उपरागेरजोदर्शनेविशेषः	४४	मूलशांतिः	५०	दिनक्षयादिशांतिः	५९	प्रयोगः	

ग्रहणशांतिः	७०	उत्पातशांतिः	७३	सिंहादौगवादिप्रसूतिशांतिः	७६	गजशांतिः	७९
जलाशयवैकृतशांतिः	७१	पल्लीसरटशांतिः	७३			महाशांतिः	८०
वृष्टिवैकृतशांतिः	७१	ग्राम्यारण्यादिशांतिः	७४	मुसलाद्याकस्मिकस्फुटने शांतिः	७७		
अग्निवैकृतशांतिः	७१	कपोतशांतिः	७४				
प्रतिमादिवैकृतशांतिः	७१	काकवैकृतशांतिः	७४	विद्युत्पातादिशांतिः	७८	इत्यनुक्रमणिकासमाप्ता॰	
आकस्मिकप्रासादपतनशांतिः	७२	काकमैथुनदर्शनशांतिः	७५	मण्याद्येकदेशभेदे शांतिः	७८		
वृक्षविकारशांतिः	७२	काकस्पर्शशांतिः	७५	अश्वशांतिः	७८		

॥ अथ शांतिमयूखः प्रारभ्यते ॥

श्रीगणेशायनमः॥ ॥अथशांतिमयूखः प्रारभ्यते॥ ॥महोमयमुदाराभंलोकत्रयनमस्कृतम्॥ तमहंभास्करंवंदेसतांसर्वार्थसिद्धिदं॥१
॥यज्ञोपितामहतनोःखलुकश्यपोयस्तस्मादजायतमुनिस्तुविभांडकाख्यः॥ तंपुत्रिणांधुरमरोपयदृष्यशृंगस्तस्यान्वयेप्यजनिशृंगिवराभि
धानः॥२॥ तस्मिन्वंशेमहतिविततेसेंगराख्येनृपाणांराजाकर्णःसमजनियथासागरेशीतरश्मिः॥ कीर्त्यायस्यप्रथिततरयाश्रोत्रजातेऽभि
पूर्णकर्णस्यापिप्रविततकथानावकाशंलभंते॥३॥ विशोकाख्यदेवस्ततस्तत्सुतोभूद्विशोकीकृतायेनसर्वाधरित्री॥ ततोप्यासराजास्तशत्रुस्ततोभू
द्रूयाख्योरयेणैवसर्वाहितघ्नः॥४॥ बभूवाथवैराटराजस्ततोभून्नृपोमेदिनीवल्लभोवीढराजः॥ नरब्रह्मदेवस्ततोमन्युदेवस्ततोभून्नृपश्चं
द्रपालाभिधानः॥५॥ शिवगणाख्यनृपःसमजन्यथोशिवगणाख्यपुरंप्रचकारयः॥ शिवगणेनसमःसकलैर्गुणैःशिवशिवप्रथमोगणा-
नासुयः॥६॥ रोळिचन्द्रइतितत्तनयोभूत्कर्मसेननृपतिस्तमथानु॥ लोकपोनरहरिर्नृपराजोरामचंद्रइतितत्तनुजातः॥७॥ यशोदेव
स्ततोजातस्ताराचंद्रनृपस्ततः॥ चक्रसेनस्ततोराजाराजसिंहनृपोयतः॥८॥ ततोप्यभूद्भूपतिसाहिदेवःस्वकीर्तिभिर्निर्जितदुग्धसिंधुः॥ अ
भूत्ततःश्रीभगवंतदेवःसदैवभाग्योदयवान्क्षितीशः॥९॥ यद्दानद्रविणाद्रिनिर्जितवपूरत्नाचलोलज्जयादूरेस्तब्धइलावृतेनिविश
तेनायत्रपुंसांगतिः॥ किंचत्रस्यदरातिवामनयनानेत्रांबुभिर्बद्धितस्तेजोग्निर्वडवामुखोत्थहुतभुक्तुल्यःकथंनोभवेत्॥१०॥ आज्ञप्तस्ते
नराज्ञाविबुधकुलमणिर्दाक्षिणात्यावतंसोभट्टश्रीनीलकंठःस्मृतिषुदृढमतिर्जैमिनीयेद्वितीयः॥ आज्ञामादायमूर्ध्नासविनयममुनातस्यस

र्वान्निबंधान्दृष्ट्वासम्यक् विविच्यप्रविततकिरणास्तन्यतेभास्करोयं ॥ ११ ॥ प्रतारकैराहृतमत्रकिंचिन्मयातुनिर्मूलतत्तयातदुज्झितं ॥ ऊनोक्तितातोनहिकेनकाचित्खपुष्पहीनाऽपचितिर्निह्नीयते ॥ १२ ॥ संस्काराचारकालाः समुचितरचनाः श्राद्धनीतीर्विवादोदानोत्सर्गप्रतिष्ठाजगतिजयकरः संगतार्थानुबद्धाः ॥ प्रायश्चित्तं विशुद्धिस्तदनुनिगदिताशांतिरेवंक्रमेण ख्याताग्रंथेत्रशब्दे बुधजनसुखदाह्लादशैते मयूखाः ॥ १३ ॥ भगवंतभास्कराख्येग्रंथेस्मिन् शिष्टसंमतेचततः ॥ शांतिविवेकमयूखः प्रतन्यतेनीलकंठेन ॥ १४ ॥ अस्यदृष्टपापनिदानकैहिकमात्रानिष्टनिवर्तकंपापाप्रयोजकंवैधंकर्मशांतिकं ॥ क्षयादिहरदानादावतिप्रसंगंवारयितुंनिदानकांतं ॥ आमुष्मिकानिष्टनिवर्तकत्वंवारयितुमैहिकेति ॥ प्रायश्चित्तंवारयितुमात्रपदं ॥ प्रायश्चित्तंत्वामुष्मिकानिष्टनिवर्तकमपि ॥ अभिचारप्रत्यभिचारादौवारयितुंपापाप्रयोजकमिति ॥ तयोः फलतोहिंसात्वेनतदनुष्ठानेप्रायश्चित्तोक्तेश्च पापप्रयोजकत्वात् ॥ अनिष्टनिवर्तकत्वंच शांतिकस्यतन्निदानपापनाशरूपसामग्रीविघटकत्वेनपुष्टिफलकंवैधंकर्मपौष्टिकं ॥ तत्रपरिभाषामार्कंडेयपुराणे ॥ शिरःस्नातश्चकुर्वीतदैवंपित्र्यमथापिवा ॥ प्राङ्मुखोदङ्मुखो वापिश्मश्रुकर्मचकारयेत् ॥ तत्रैव ॥ देवार्चनादिकर्माणितथागुर्वभिवादनं ॥ कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजः ॥ बृहन्मनुः ॥ प्राणानायम्य कुर्वीत सर्वकर्माणिसंयतः ॥ मार्कंडेयः ॥ संकल्प्यविधिवत्कुर्यात्स्नानदानव्रतादिकं ॥ देवलः ॥ मासपक्षतिथीनांचनिमित्तानांचसर्वशः ॥ उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेदिति ॥ मासपक्षतिथयः प्रयोगाधिकरणभूताः सर्वेपि ॥ यत्तुअनेकदिनसाध्येकर्मण्याद्यदिने संकल्पकालीनां तिथिमधिक

रणत्वेनोल्लिख्यज्योतिष्टोमेनाहंयक्ष्ये इत्यादिसंकल्पवाक्यंप्रयुंजतेयायजूकाः॥ तत्तुपदानामन्वयायोगादनादर्त्तव्यं॥ यदपिकेचित्तेनते
नरूपेणप्रयोगांगतयाविहितानामेवमासादीनामुल्लेखइति॥ तदपिनमानाभावात्॥ अविहितमासादिकआधानादौमासपक्षतिथीनांज्यो
तिष्टोमएकादशीव्रतादौचमासपक्षयोरुल्लेखाभावप्रसंगाच्च॥ अतोज्योतिष्टोमादावेकादश्यादिपूर्णिमांतानामुल्लेखः॥ एवमन्यत्रापीतिदिक्
॥अत्रचशूद्राणामप्यधिकारः॥ श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतइत्यादिवाक्येषुश्रावणस्यवृत्यर्थतयारागप्राप्तत्वेनतद्विधौवैयर्थ्यापत्तेर्नि
जविवक्षयाश्रवणविधानात्तेषांपुराणश्रवणेधिकारेणज्ञानसद्भावात्॥ वैदिकमंत्राभावेकथंतद्वत्सुकर्म्मस्वधिकारइतिचेत् शृणुधर्मेप्सवस्तु
धर्मज्ञाःसतांधर्ममनुष्ठिताः॥ मंत्रवर्ज्यंनदुष्यंतिप्रशंसांप्राप्नुवंतिचेतिमनुनामंत्रवर्जनात्॥ यत्तु॥ मेधातिथिर्मंत्रवर्ज्जितेषूपवासादिष्वधिका
रार्थमिदंनतुसमंत्रकेषुमंत्रपर्य्युदासेनाधिकारार्थमितितन्न॥ अमंत्रकोपवासादिषुश्रवणविधिनैवाधिकारसिद्धावेतद्वाक्यानर्थक्या
पत्तेः॥ अतएव॥ मोक्षधर्मेपि॥ मंत्रवर्जंनदुष्यंतिकुर्वाणाःपौष्टिकींक्रियामिति॥ अत्रैतद्वाक्यस्यपौराणत्वेनतत्सामान्योपस्थितपौराणक्रि
योद्देशेनमंत्रवर्जनविधौपौष्टिकीमित्यस्योद्देश्यविशेषणत्वेनाविवक्षितत्वं॥ एवंमनुवाक्यस्यैतस्यचैकैवश्रुतिमूलत्वेनकल्प्यते॥ गृह्यपरि
शिष्टे॥ आदौविनायकःपूज्यअंतेतुकुलदेवताः॥ शौनकः॥ पुण्याहवाचनविधिंवक्ष्यामोथयथाविधि॥ प्रयोक्तुःकर्मणामादावंतेचोद
यसिद्धये॥ कर्मप्रदीपे॥ कर्मादिषुतुसर्वत्रमातरःसगणाधिपाः॥ पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः॥ प्रतिमासुचशुद्धासुलिखि

त्वावापदादिषु ॥ अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः ॥ कुड्यलग्नावसोर्धाराः ससवारंघृतेनतु ॥ कारयेत्संचधारावानातिनीचानचोच्छ्रिताः ॥ आयुष्याणिचशांत्यर्थंजस्वातत्रसमाहितः ॥ षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेदिति ॥ षड्भ्यइतिकातीयछंदोगपरं ॥ अन्येषांतुनवदैवत्यं ॥ अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि ॥ अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासहेतिवचनात् ॥ सर्वत्राचार्योयजमानसमशाखीयएव ॥ अन्यथाचार्यस्ययजमानशाखाध्ययनाभावेतच्छाखीयपदार्थानांनिर्वाहएवनस्यात् ॥ स्वशाखयैवानुष्ठानेतुवैगुण्यं ॥ तथाचपराशरः ॥ यःस्वशाखांपरित्यज्यपरशाखांसमाश्रयेत् ॥ अप्रमाणमृषिंकृत्वासोंधेतमसिमज्जतीति ॥ ऋत्विजस्तुभिन्नशाखीयाअपि ॥ सर्वेष्वाचार्यब्रह्मर्त्विजोमधुपर्केणपूज्याः ॥ ऋत्विजोवृत्वामधुपर्कमाहरेदित्याश्वलायनोक्तेः ॥ संपूज्यमधुपर्केणऋत्विजःकर्मकारयेदिति विश्वामित्रोक्तेश्च ॥ योऋत्विक्यच्छाखीयंकर्मकरोतितच्छाखोक्तेनप्रकारेणकांडानुसमयेनमधुपर्कंकुर्वंतियायजूकाः केचित् ॥ परेयजमानशाखोक्तेन ॥ यजमानेनस्वशाखीयाऋत्विग्भिश्चस्वस्वशाखीयाःपदार्थाअनेकेषुऋत्विक्षुपदार्थानुसमयेनानुष्ठेयाइतितुयुक्तंतत्तच्छाखाध्ययनजन्यज्ञानस्यांगत्वादेकप्रयोगविधिपरिग्रहाच्च ॥ ऋत्विग्भ्योदेयमुक्तंलिंगपुराणे ॥ वस्त्रयुग्मंतथाऽप्पूरं केयूरं कर्णभूषणं ॥ अंगुलीभूषणंचैवमणिबंधस्यभूषणं ॥ कंठाभरणयुक्तानिप्रारंभेधर्मकर्मणः ॥ पुरोहितायदत्वाथऋत्विग्भ्यश्चापिदापयेदिति ॥ आपःपूर्यंतेस्मिन्नित्यप्पूरंजलपात्रं ॥ मत्स्यपुराणे ॥ यजमानःसपत्नीकःपुत्रपौत्रसमन्वितः ॥ पश्चिमद्वारमाश्रित्यप्रविशेद्यागमंडपं ॥ संग्रहे ॥ समंततश्च-

सिद्धार्थान्किरेद्रक्षोघ्नमंत्रतः ॥ प्रतिष्ठासारे ॥ सर्वतःपंचगव्येनप्रोक्षयेद्यागमंडपं ॥ आपोहिष्ठात्र्यृचेनैवततःस्वस्त्ययनंजपेत् ॥ अत्रहेमाद्रौवास्तुपूजाप्युक्ता ॥ समंडपंप्रविश्याथतोरणादिप्रपूज्यच ॥ वास्तुयागंततःकुर्यात्प्रासादेमंडपेऽथवा ॥ वास्तुमंडलेच ॥ नैरृत्यांदिशिवास्त्वीशंब्रह्माद्यांश्चसमर्चयेदितिशारदोक्तेः ॥ वास्तुहोमस्तुभिन्नस्थंडिलेकार्यः ॥ मुख्यायतनेवा ॥ तत्राप्याद्यौपृथक्प्रयोगतयाप्रधानसमतंत्रतयावा ॥ शारदातिलकेतुहोमएवनोक्तः ॥ सर्वंचशांतिकंपौष्टिकंमहादानादिलौकिकाग्नौकार्य्यं ॥ श्रौतस्मार्त्ताग्निप्राप्तौमानाभावात् ॥ यत्तुमनुः ॥ वैवाहिकेग्नौकुर्वीतगार्ह्यंकर्मयथाविधि ॥ पंचयज्ञविधानंचपंक्तिंवाऽन्वाहिकीगृहीतितत्स्पष्टंगृह्योक्तपरं ॥ वैवाहिकइतिचदारदायाद्यकालिकयोरप्युपलक्षकं ॥ तत्सजातीयसंस्कारस्यैवसाधनतावच्छेदकत्वात् ॥ यदपियाज्ञवल्क्यः ॥ स्मार्त्तंकर्मविवाहाग्नौकुर्वीतप्रत्यहंगृही ॥ दायकालाहृतेवापिश्रौतवैतानिकाग्निष्विति ॥ तत्रापिसामान्यंस्मार्त्तपदंगार्ह्यंउपसंह्रियते ॥ एतेनाहवनीयादयोनिरस्ताः ॥ यदाहवनीयेजुहोतीत्यादावश्वप्रतिग्रहेष्टौवैदिकत्वसाम्येनवैदिकाश्वदानप्रतिग्रहोपस्थितिवत्वैदिकहोमापस्थितेश्च ॥ यद्यप्यत्रगार्ह्यस्मार्त्तएवश्रौतंचवैतानिकएवेतिनियमेनस्मृत्युक्तेपिकर्मणिश्रौतस्मार्त्ताग्न्योःप्राप्तिःसंभाव्यते ॥ तथापिनसाहवनीयावसथ्यत्वादिरूपेण ॥ किंतुलौकिकसाधारणज्वलनत्वेनैव ॥ अवैधाहुतिप्रक्षेपेआहवनीयत्वादिविघातापत्तेश्च अतएवसर्वाधानिनऔपासनाभावाद्वैतानिकाप्राप्तेश्चतेनगार्ह्यंलौकिकएवकार्यं ॥ अमुमेवसर्वमर्थंस्मृत्यर्थसारकृदपिसंजग्राह ॥ गार्ह्यमौपासनेकुर्यात्सर्वाधानीतुलौकिके ॥ स्मार्त्तंचलौकिकेकुर्याच्छ्रौतंवैतानिकाग्निष्वि

ति॥ यत्तुनारायणवृत्तौ॥सर्वाधानिनासीमंतोन्नयनादिगार्ह्येकर्मार्थंस्मार्त्ताग्निरुत्पादनीयइति॥तत्रमूलमन्वेष्यं॥ यदपिविज्ञानेश्वरोग्रहयज्ञऔपासनइत्यूचे॥ तत्रापिमूलमन्वेष्यं॥ कातीयपरंवातत्तत्सूत्रेतथाम्नानात्॥अतएवसविनायकशांतौलौकिकाग्निमेवाऽवोचत्॥अतःस्मृत्युक्तंलौकिकएवेतिकृत्यरत्नाकरे॥शुभपात्रंतुकांस्यंस्यात्तेनाग्निंप्रणयेद्बुधः॥तस्याभावेशरावेणनवेनाभिमुखंचतं॥गोभिलीये॥आहुयत्वेवहोतव्योयोयत्रविहितोनलः॥तथा॥लक्षहोमेचवह्निःस्यात्कोटिहोमेहुताशनः॥पूर्णाहुत्यांमृडोनामशांतिकेवरदःसदा॥अन्येषुसंस्कारादिकर्मस्वग्नेर्नामविशेषाः प्रयोगरत्नेज्ञेयाः॥होमेविशेषोगोभिलीये॥नमुक्तकेशोजुहुयान्नातिपातितजानुकः॥उत्तानेनैवहस्तेनअंगुष्ठाग्रेणपीडितं॥संहतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविरिति॥बहुकर्त्तृकेहोमेप्रत्याहुतित्यागाशक्तेर्होमारंभएवसर्वादेवताश्चतुर्थ्यंतेनोद्दिश्यसर्वाणिद्रव्याणित्यजेदितिहेमाद्र्यादयः॥ अथविनायकस्नपनं॥याज्ञवल्क्यः॥ विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोजितः॥गणानामाधिपत्येचरुद्रेणब्रह्मणातथा॥तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधत॥स्वप्नेऽवगाह्यतेत्यर्थंजलंमुंडांश्चपश्यति॥काषायवाससश्चैवक्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्राऽवतिष्ठति॥व्रजन्नपितथात्मानंमन्यतेऽनुगतंपरैः॥उपसृष्टःउपद्रुतः॥स्वप्नेस्रोतसाऽपह्रियतेतत्रमज्जतिवानत्ववगाहनमात्रंविवक्षितंतस्यशुभसूचकत्वात्॥ अंत्यजैश्चांडालैः॥ प्रत्यदनलक्षणान्याह॥विमनाविफलारंभःसंसीदत्यनिमित्तकः॥ तेनोपसृष्टोलभतेनराज्यंराजनंदनः॥कुमारीनैवभर्त्तारमपत्यंगर्भमंगना॥ आचार्यत्वंश्रोत्रियश्चनशिष्योऽध्ययनंतथा॥ वणिक्लाभंचना

प्नोतिकृषिंन्वापिकृषीवलः ॥ संसीदतिकारणंविनादीनमनस्कोभवति ॥ एतदुपलक्षणंयस्ययदिष्टंसचेदिष्टसामग्रीसत्वे तन्नप्राप्नोतितदानदुपद्रुतोबोध्यः ॥ एतदुपद्रवपरिहारार्थंचकर्माह ॥ स्नपनंतस्यकर्तव्यंपुण्येन्हिविधिपूर्वकं ॥ अत्रपुण्येन्हीत्यविशेषेपिविशेषोऽपरार्केभविष्ये ॥ शुक्लपक्षेचतुर्थ्यांचवारेणधिषणस्यच ॥ तिष्येचवीरनक्षत्रेतस्यैवपुरतोनृपेति ॥ अत्रादौदेवतापूजोक्तातत्रैव ॥ व्योमकेशंतुसंपूज्यपार्वतीभामजंतथा ॥ कृष्णस्यपितरंकेतुंअर्कमारंसितंतथा ॥ धिषणंक्लेदपुत्रंचकोणलक्ष्मंच भारत ॥ विधुतुदंवाहुलेयंनंदकस्यचधारिणमिति ॥ व्योमकेशःशिवः ॥ भामजोगणेशः ॥ आरोभौमः ॥ सितःशुक्रः ॥ धिषणोगुरुः ॥ क्लेदपुत्रोबुधः ॥ कोणःशनैश्चरः ॥ लक्ष्मतह्राश्चंद्रः ॥ वाहुलेयःस्कंदः ॥ नंदकधारीकृष्णः ॥ गौरसर्षपकल्केनसाज्येनोत्सादितस्यच ॥ सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा ॥ भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजैःशुभाः ॥ गौरसर्षपविष्टेनगोघृतयुक्तेनोत्सादितस्योद्वर्त्तितस्य ॥ सर्वौषधानिछंदोगपरिशिष्टे ॥ कुष्टंमांसीहरिद्रेद्वेमुराशैलेयचंदनं ॥ वचाकर्चूरमुस्तेचसर्वौषध्यःप्रकीर्तिताःइति ॥ सर्वगंधैश्चंदनकुंकुमागरुकस्तूरिकाजातीफलादिभिः ॥ वेद्यांसितवस्त्रप्रच्छादितश्रीपर्णीपीठभद्रासनंस्वस्तिवाच्याःस्वस्तिवाचनीयाः ॥ ब्राह्मणद्वारास्वस्तिवाचनंकारयेदित्यर्थः ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ मृत्तिकांरोचनांगंधंगुग्गुलुंचाप्सुनिक्षिपेत् ॥ याआहृताएकवर्णैश्चतुर्भिःकलशैर्ह्रदात् ॥ चर्मण्यानडुहेरक्तेस्थाप्यभद्रासनंततः ॥ आनडुहंचर्मचवेद्यांप्राग्ग्रीवमूर्ध्वलोमचस्थाप्यमितिविज्ञानेश्वरः ॥ याआपःतेचत्वारोपिकलशाभद्रासनात्पूर्वादिचतुर्दिक्षुस्थाप्याइतिसांप्रदायिकाः ॥ पूर्वादिदिक्त्रयाव-

स्थितकलशोदकेनाभिषेकक्रमेणमंत्रानाह॥सहस्राक्षंशतधारमृषिभिःपावनंकृतं॥तेनत्वामभिषिंचामिपावमानीःपुनंतुते ॥ भगंतेवरुणोराजा भगंसूर्योबृहस्पतिः ॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः ॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि ॥ ललाटेकेशयोरक्ष्णोरापस्तद्घ्नंतु तेसदा॥सहस्राक्षंबहुशक्तिकं॥पावमानीइत्यनंतरमापइतिशेषः॥ भगंकल्याणं ॥ दौर्भाग्यमकल्याणं॥उदग्दिगवस्थितेनाभिषेकेपूर्वोक्तास्त्रयएवमंत्राः ॥सर्वैश्चतुर्थमितिविज्ञानेश्वरोक्तलिंगात्॥किंच॥ स्नातस्यसार्षपंतैलंस्रुवेणौदुम्बरेणतु॥जुहुयान्मूर्द्धनिकुशान्सव्येनपरिगृह्यच॥सव्यपाणिगृहीतकुशांतर्हितेसार्षपंतैलमुदुम्बरनिर्मितेनस्रुवेणयजमानमूर्द्धनिजुहुयादाचार्यः॥ मितश्चसंमितश्चैवतथाशालकटंकटौ ॥ कूष्मांडोराजपुत्रश्चेत्यंतेस्वाहासमन्वितैः॥नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः॥ नमःस्वस्तिस्वाहेतिचतुर्थ्याएतानिषट्विनायकनामानिइतिविज्ञानेश्वरः॥अपरार्कस्तुशालकटंकटइत्येकवचनांतंपपाठ॥तेनतन्मतेपंचैवाहुतयोभवंति॥अत्रलौकिकेग्नौस्थालीपाकविधिनाचरुंकृत्वातेभ्यएवाहुतिषट्कंहुत्वेंद्रादिदशलोकपालेभ्यस्तत्तन्नाम्नाबलिंदद्यात्॥ इतिमिताक्षरायां॥ तत्रचरुहोमेइन्द्रादिभ्योबलिदानेचमूलंचिंत्यं॥ अंतेस्वाहासमन्वितैर्नामभिर्जुहुयात् ॥नमस्कारसमन्वितैश्चेत्यादिभ्यएवबलिंदद्यादितिवक्ष्यमाणेनसंबध्यतइतितुयुक्तं॥दद्याच्चतुष्पथेसूर्पेकुशानास्तीर्यसर्वशः॥कृताकृतांस्तंडुलांश्चपललौदनमेवच॥मत्स्यान्पक्कांस्तथैवामान्मांसमेतावदेवतु॥पुष्पंचित्रंसुगंधिंचसुरांचत्रिविधामपि॥ मूलकंपूरिकापूपास्तथैवोंडिरकस्रजः ॥ दध्यन्नंपायसंचैवगुडपिष्टंसमोदकं॥ए

तान्सर्वान्समाहृत्यभूमौकृत्वाततःशिरः॥कृताकृतान्सकृदवहतान्॥पललौदनःतिलपिष्टमिश्रओदनइतिमिताक्षरायां॥अपक्वमांसमिश्रओदनइतितुयुक्तं॥पललंक्रव्यमामिषमितिकोशात्॥आमानपक्वान्मांसमेतावदेवतु॥पक्वमपक्वमांसमन्यदित्यर्थः॥त्रिविधासुरागौडीपैष्टीमाध्वीच॥मूलकंकंदाकारोभक्ष्यविशेषइतिमिताक्षरायां॥स्वरूपतएवग्राह्यमितितुयुक्तं॥उभयमपिग्राह्यमितिमहार्णवे॥अपूपाःस्नेहपक्वागोधूमविकाराइतिविज्ञानेश्वरः॥उंडेरकाःपिष्टविकारानानाविधास्तेस्रजइत्युच्यंते॥गुडपिष्टंगुडमिश्रंशाल्यादिपिष्टंअत्रसुरामांसंनाब्राह्मणविषयं॥ब्राह्मणेस्तुमांससुरास्थानेतुसलवणंपायसंदुग्धंचग्राह्यं॥पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत्॥दुग्धंलवणसंमिश्रंसुरास्थानेप्रकल्पयेदितिस्मरणादितिमहार्णवादिषुविनायकांबिकागायत्रीभ्यांविनायकमंबिकांचनमस्कृत्यपूर्वोक्तद्रव्यजातंतयोरग्रतउपहृत्यतच्छेषंशूर्पेनिधायचतुष्पथेशूर्पंसंस्थाप्यबलिंदद्यादेतैर्मंत्रैः॥बलिंगृह्णंत्विमंदेवाआदित्यावसवस्तथा॥मरुतोथाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः॥असुरायातुधानाश्चपिशाचामातरोरगाः॥शाकिन्योयक्षवेतालायोगिन्यःपूतनाशिवाः॥जंभकाःसिद्धगंधर्वानागाविद्याधरानगाः॥दिक्पालालोकपालाश्चयेचविघ्नविनायकाः॥जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः॥माविघ्नंमाचमेपापंमासंतुपरिपंथिनः॥सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः॥दद्यादित्यत्रापिदेहलीदीपवदन्वेति॥विनायकस्यजननीमुपतिष्ठेत्ततोंबिकां॥दूर्वासर्षपपुष्पाणांदत्वार्घंपूर्णमंजलिं॥अनंतरंविनायकमंबिकांचदूर्वाद्यंजलिमर्घंचदत्वोपतिष्ठेत॥उपस्थानमंत्रमाह॥रूपंदेहियशोदेहि भगंभग

वतिदेहि मे॥ पुत्रान्देहि धनंदेहि सर्वान् कामांश्चदेहि मे॥ भगवन्नित्यूत्थ्य विनायकमभ्युपतिष्ठेतेति विज्ञानेश्वरः॥अत्रमदनः॥ विनायकोपस्थानं कृत्वांऽबिकोपस्थानं कार्य्यमित्याह॥ किंच॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मंगुरोरपि॥ गुरोराचार्याय ॥अपिशब्दाद्दक्षिणामपि॥ एवंविधंकर्मकुर्वतः॥ एवंविनायकं पूज्य ग्रहांश्चैवविधानतः॥ कर्मणांफलमाप्नोति श्रियमाप्नोत्यनुत्तमां॥ अस्याः कर्मांगत्वेन पौष्टिकत्वेनचवर्णचतुष्टयस्याप्यत्राधिकारः॥ शूद्रस्यतु मंत्रवर्जं तान्प्रक्रम्य॥ मंत्रवर्ज्यंनदुष्यंतिकुर्वाणाःपौष्टिकींक्रियामितिमोक्षधर्मश्रवणादितिवदंति॥ महार्णवोपि॥ यजमानस्तुशूद्रश्चेदिति वदन् तस्याधिकारमभिप्रैति॥ ॥इतिविनायकशांतिः॥ ॥अथप्रयोगः॥ कर्त्तादेशकालौसंकीर्त्याऽमुककर्मणोनिर्विघ्नतासिद्ध्यर्थमुपसर्गनिवृत्त्यर्थंवा विनायकस्नपनंकरिष्यइतिसंकल्पयेत्॥ ततःपुण्याहवाचननांदीश्राद्धांतंयथोक्तंकुर्यात्॥ अपरेपुण्याहवाचनंनेच्छंति॥ अग्रेतस्यकर्त्तव्यत्वात्॥ अथाचार्यंऋत्विक्चतुष्टयंवृणुयात्॥ ऋत्विजोनसंतीति केचित्॥ तदाचार्यएववक्ष्यमाणमभिषेकंकुर्यात्॥ यजमानः प्रतिमास्वक्षतपुंजेषुवा॥ शिवं॥ पार्वतीं॥ गणेशं॥ वासुदेवं॥ केतुं॥ अर्कं॥ भौमं ॥शुक्रं॥ गुरुं॥ बुधं॥ शनिं॥ चन्द्रं॥ राहुं॥ स्कंदं॥ कृष्णा॥ चावाह्यपूजयेत्॥ तथाचार्यःपंचवर्णैःपूर्वादिचतुर्दिक्षुचत्वारिमध्यस्थवेद्यांचैकमितिस्वस्तिकपंचकमालिख्यमध्यस्थस्वस्तिकोपरि॥ आनडुहंरक्तचर्मप्राचीनग्रीवमूर्ध्वलोमसंस्थाप्यतस्योपरिश्रीपर्णीपीठंसंस्थाप्यसितेनवाससाऽऽछादयेत्॥ एतद्भद्रासनमिति॥ अथचतुर्षुस्वस्तिकेषुपूर्वादिदिक्षुचत्वारोपिऋत्विजः कलशान्संस्थापयेयुः॥ आचार्योवा॥ तत्रायंप्रकारः॥

महीद्यौःपृथिवीचनेतिभूमिंस्पृशन्संप्रार्थ्यओषधयःसमितियवान्क्षिप्त्वाआकलशेष्वितितेषुकलशंसंस्थाप्यइमंमेगंगेतितीर्थोदकेनापूर्य गंधद्वारामितिचंदनागरुकस्तूरीकर्पूरगोरोचनादीन्गंधादीन्गुग्गुलंचनिक्षिपेत्॥याओषधीरितिसर्वौषधीः॥कांडात्कांडादितिदूर्वाः॥अश्वत्थेवइतिपंचपल्लवान्॥स्योनापृथिवीत्यनेन॥उद्धृतासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमित्यनेनपंचमृदःक्षिपेत्॥याःफलिनीरितिफलं॥सहिरत्नानीतिपंचरत्नानि हिरण्यरूपमितिहिरण्यं॥युवासुवासाइत्यनेनवस्त्रेणरक्तसूत्रेणचवेष्टयेत्॥पूर्णादर्वीतिधान्यपूर्णपात्रंकलशोपरिनिदध्यात्॥अत्रवरुणावाहनपूजनेअपिकेचिदाहुः॥ततःकलशेसर्वेसमुद्राइतिगंगाद्यावाहनं॥ततःकुंभाभिमंत्रणं॥कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥मूलेत्वस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताइति॥ततःकुंभप्रार्थना॥देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः॥त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव॥सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति॥ततोऋत्विजआनोभद्रेतिशांतिसूक्तंपठेयुरितिकेचित्॥आनोभद्रेतिशांतिसूक्तस्य राहूगणोविश्वेदेवास्त्रिष्टुप् आद्यासप्तमीचजगत्यःषष्ठीविराट्शेषास्त्रिष्टुभः शांतिसूक्तजपेविनियोगः॥आनोभद्राः॥

शन्नोवातः पवतामित्यादिकांवा ॥ तस्मिन्नेवसमये आचार्यो भद्रासनस्योत्तरईशान्यांवावस्त्राच्छादितपीठादौविनायकप्रतिमाम्बिकाप्रतिमां चाग्न्युत्तारणपूर्वंप्रतिष्ठाप्यषोडशोपचारैःपूजयेदितिनिबंधकृतः॥ तत्रविनायकमंत्रः॥ गणानांत्वागृत्समदोगणपतिर्जगती गणपत्यावाहने विनियोगः॥ ॐ गणानांत्वा॥ ॐ तत्पुरुषायविद्महे वक्रतुंडायधीमहि॥ तन्नोदंतिःप्रचोदयादितिवा॥ गौर्यास्तुगौरीर्मिमायदीर्घतमा उमाजगती गौर्य्यावाहनेविनियोगः॥ गौरीर्मिमायसुभगायै विद्महे काममालिन्यैधीमहि॥ तन्नोगौरीप्रचोदयादिति ॥ अत्रमिताक्षरायांचरुहोमोप्युक्तः॥ शिष्टास्त्वकुर्वन्ति तस्मिन्पक्षे आचार्योगृह्योक्तविधिनाकुण्डेस्थण्डिलेवाऽग्निंप्रतिष्ठाप्य प्रादेशमात्रंसमिद्द्वयमादायास्मिन्होमेदेवतापरिग्रहार्थमन्वाधानंकरिष्य इति संकल्प्य चक्षुषी आज्येनेत्यंतमुक्त्वा अत्रप्रधानंमितंसंमितंशालंकटंकटंकूष्मांडराजपुत्रमेताःप्रधानदेवताएकैकयाचर्वाहुत्यायक्ष्ये॥ शेषेणस्विष्टकृतमित्याद्युक्त्वाग्नावादध्यात्॥ अपरार्कमतेतुपंचैवाहुतयस्तन्मतेत्वाधानेहोमद्वयंच तथैवानुसंधेयं॥ ततः परिसमूहनादिचरुश्रपणांतंकृत्वा गोघृतलोलीकृतेनगौरसर्षपकल्केनोद्वर्त्तितांगं सर्वौषधिचूर्णैः कस्तूरिकागरुचंदनादिभिर्विलिप्तशिरसंयजमानमाचार्योभद्रासनेउपवेशयेत्॥ ततोयजमानःस्वस्तिवाचनंकुर्यात्॥ अनंतरंरूपगुणशालिनीभिःसुवासनीभिर्नीराजनंकारयेत्॥ ततोभद्रासनात्पूर्वदेशावस्थितंकलशमादायाभिषिंचेदाचार्यः॥ मंत्रश्च॥ सहस्राक्षंशतधारमृषिभिःपावनंकृतं॥ तेनत्वामभिषिंचामिपावमानीःपुनंतुते॥ ततोदक्षिणदेशावस्थितंकलशमादाय भगंतेवरुणोराजाभगंसूर्योबृह-

स्यातिः ॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुरि त्यनेनाभिषिंचेत् ॥ ततः पश्चिमदिगवस्थितंकलशमादाययत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि ॥ ललाटेकेशयोरक्ष्णोरापस्तत्घ्नंतुतेसदेति ॥ ततउदक्देशावस्थितंकलशमादायपूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिंचेत् ॥ बृहत्पराशरेणान्येपिमंत्राउक्ताः ॥ एतद्वैपावनंस्नानंसहस्राक्षमृषिस्मृतं । तेनत्वाशतधारेणपावमान्यःपुनंतुमां ॥ शक्रादिदशदिक्पालाब्रह्माद्याकेशवादयः ॥ आपस्तद्घ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा ॥ सुमित्र्यानआपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः ॥ समुद्रागिरयोनद्यो सुनयश्चपतिव्रताः ॥ दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयच्छंतुसर्वदा ॥ पादगुल्फोरुजंघादौनितंबोदरनाभिषु ॥ स्तनोरुबहुहस्ताग्रग्रीवाअंसाघ्रिसंधिषु ॥ नासाललाटकर्णभ्रूकेशांतेषुचयास्थितम् ॥ तदापोघ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा ॥ इत्येतैरप्यभिषिंचेदितिकेचित् ॥ चतुर्थकलशाभिषेचनएवैतेपठनीयाः ॥ अथाचार्योयजमानस्यपश्चिमतस्तिष्ठन् सव्यपाणिगृहीतकुशांतर्हितेयजमानशिरसिऔदुंबरेण स्रुवेणसार्षपंतैलंजुहुयात् ॥ ओंमितायस्वाहा ॥ यजमानोमितायेदंनममेतित्यजेदेवंसर्वत्रापि । ओंसंमितायस्वाहा । ओंशालायस्वा० ॥ ओंकटंकटाय० ॥ ओंकूष्मांडाय० ॥ ओंराजपुत्रायेति ॥ अथाचार्योग्न्यर्चनाद्याज्यभागांतंकृत्वाचरुणामितादिभ्यएवजुहुयाद्यजमानस्तु पूर्ववत्त्यजेत् ॥ आचार्यःस्विष्टकृदादिप्रणीताविमोकांतंकर्मशेषंसमापयेत् ॥ यजमानस्त्वभिषेकशालायामिंद्रादिदशलोकपालेभ्योनाम्नादिक्षुविदिक्षुचबलीन्दद्यात् ॥ एतानिअग्निस्थापनचरुहोमदिक्पालबलिदानानिमिताक्षरामनुरुध्योक्तानि ॥ ततोमितायएष-

बलिर्नममेति पायसेन माषभक्तेन वा बलिं दत्वा विनायकांबिकयोरग्रतः सकृद्वहततंडुलानां मांसेन तिलपिष्टेन वा मिश्रमोदनं मत्स्यमांसं पक्वमपक्वंच गौडी पैष्टी माध्वीति त्रिविधां सुरांच ॥ ब्राह्मणस्य मांसस्थाने सलवणं पायसं सुरास्थाने सलवणं दुग्धं चित्रं पुष्पं सुगंधिद्रव्यं मूलकं पूरिकाः अपूपाः उंडेरकस्रजः दध्यन्नं पायसं गुडमिश्रतंडुलादि पिष्टं मोदकांश्च पात्रे संस्थाप्य तत्पुरुषाय विद्महे इति मंत्रेण विनायकाय सुभगायै विद्महे इति मंत्रेण चांबिकायै निवेदयेत् ॥ अथाचार्यो नूतनशूर्पे सर्वमुपहारशेषं संस्थाप्य चतुष्पथं गत्वा तत्र गोमयेनोपलिप्य कुशानास्तीर्य तत्र शूर्पं प्राङ्मुखं संस्थापयेत् ॥ यजमानस्त्वेतैर्मंत्रैर्बलिं दद्यात् ॥ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा ॥ मरुतो थाऽश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च पिशाचा मातरोरगाः ॥ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ इति ॥ देवादित्यवसुमरुदश्विरुद्रसुपर्णपन्नगग्रहासुरयातुधानपिशाचमातृरगशाकिनीयक्षवेतालयोगिनीपूतनाशिवजंभकसिद्धगंधर्वनागविद्याधरनगदिक्पाललोकपालविघ्नविनायकजगच्छांतिकर्तृब्रह्मादिमहर्षिभूतप्रेतेभ्य इदं न ममेति त्यागः ॥ ततः शिरसा भूमिं गत्वा पुष्पयुतमर्घं तत्पुरुषायेति मंत्रेण विनायकाय सुभगायै इत्यंबिकायै च दद्यात् ॥ ततो दूर्वासर्षपपुष्पाणां पूर्वोक्तविनायकमंत्रेण विनायकायांजलिं दद्यात् ॥ अम्बिकायै तन्मंत्रेण तथैव दद्यात् ॥ ततो विनायकमंबिकां चोपतिष्ठेत्

॥मंत्रस्तु॥ रूपंदेहियशोदेहि भगंभगवतिदेहिमे॥पुत्रान्देहिधनंदेहि सर्वान्कामांश्चदेहिमे॥अस्मिन्मंत्रे भगं भगवन्देहिमइत्यूह्यविनायकमुपतिष्ठेत्॥अनंतरं यजमानः प्राङ्मुखोपविष्टउदङ्मुखानाचार्यादीन्पूजयित्वादक्षिणांदद्यात्॥ततउत्तिष्ठब्रह्मणस्पतइत्यनेनयांतुदेवगणाइत्यनेनचविनायकमंबिकांचोत्थाप्यविसृज्य प्रतिमादिसर्वांसामग्रीमाचार्यायदद्यात्॥ ततोयथाशक्ति भूयसींदक्षिणांदीनानाथेभ्योदत्वायथाशक्तिविनायकप्रीत्यर्थमंबिकाप्रीतयेचब्राह्मणान् भोजयित्वा संकल्प्य वायस्यस्मृत्येत्याद्युक्त्वान्यूनातिरिक्तंसर्वंसंपूर्णमस्त्विति तान्संप्रार्थ्यतैरनुज्ञातःसुहृद्युतोभुंजीत॥ ॥इतिश्रीमच्छंकरभट्टसूरिसूनु भट्टनीलकंठकृते भगवंतभास्करेशांतिमयूखेविनायकशांतिपद्धतिःसमाप्ता॥ ॥अथग्रहयज्ञः॥ ॥स्कांदे॥देवदानवगंधर्वायक्षराक्षसकिन्नराः॥पीड्यंतेग्रहपीडाभिःकिंपुनर्भुविमानवाः॥ शनैश्चरेण सौदासोनरमांसेनियोजितः॥राहुणापीडितोराजा नलोभ्रांतोमहीतले॥अंगारकविरोधेनरामोराष्ट्रान्निवासितः॥अष्टमेनशशांकेन हिरण्यकशिपुर्हतः॥रविणासप्तमस्थेनरावणोविनिपातितः॥गुरुणाजन्मसंस्थेन हतोराजासुयोधनः॥ पांडवाबुधपीडायांविकर्मणिनियोजिताः॥षष्ठेनोशनसायुद्धेहिरण्याक्षोनिपातितः॥एतेचान्येचबहवोग्रहदोषैस्तुपीडितः॥ याज्ञवल्क्यः॥ ग्रहाधीनानरेंद्राणामुच्छ्रायाःपत्तनानिच॥भावाभावौचजगतस्तस्मात्पूज्यतमाग्रहाः॥ प्रयोगपारिजातेउत्पलपरिमले॥कार्यारंभेषुसर्वेषुप्रतिष्ठास्वध्वरेषुच॥नववेश्मप्रवेशेचगर्भाधानादिकर्मसु॥आरोग्यस्नानसमयेसंक्रांतौरोगसंभवे॥अभिचारेचयःकुर्याद्ग्रहपूजांविधानतः ॥ सोभीष्टफलमाप्नोति

निर्विघ्नेननसंशयइति॥ श्रीकामः शांतिकामोवाग्रहयज्ञंसमाचरेत्॥ वृष्ट्यायुःपुष्टिकामोवातथैवाऽभिचरन्नपि॥ मात्स्ये॥ ग्रहयज्ञास्त्रिधाप्रोक्ताःपुराणश्रुतिकोविदैः॥ प्रथमोऽयुतहोमश्चलक्षहोमस्ततःपरः॥ तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः॥ ग्रहस्योत्तरपूर्वेणमंडपंकारयेद्बुधः, रुद्रायतनभूमौवाचतुरस्रमुदक्प्लवम्॥ दशहस्तमथाष्टौवाहस्तान्कुर्याद्विधानतः॥ तस्यद्वाराणिचत्वारिकर्तव्यानिविचक्षणैः॥ स्कांदे॥ नवग्रहमखेकुंडंहस्तमात्रंसमंभवेत्॥ चतुरस्रमधोहस्तंयोनिवक्त्रंसमेखलं॥ योनिरेववक्त्रंयस्यतत्॥ पुत्रादिकामनयातुयोन्याद्याकाराअपिभवंति॥ चतुरंगुलविस्तारामेखलातद्वदुच्छ्रिता॥ अत्रविशेषोपदेशादेकैवमेखला मात्स्ये॥ वितस्तिमात्रायोनिःस्यात्षट्सप्तांगुलविस्तृता॥ कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठसदृशीतद्वदायताच्छिद्रसंयुता॥ मेखलोपरिसर्वत्रअश्वत्थदलसन्निभा॥ एकंकुंडंचमंडपेशानभागेउदीच्यांवेतिहेमाद्रिः॥ अयुतादिहोमंप्रकृत्यवशिष्ठस्तु॥ कुंडंतन्मध्यभागेतुकारयेच्चतुरस्रकम्॥ कुंडस्येशानभागेतु पूजावेदिंप्रकल्पयेदित्याह॥ अत्रचतुरस्रमित्यनेनक्षत्रियादिपुरस्कारेणाविहितानामाकारविशेषाणांस्त्रीपुरस्कारेणविहितस्ययोन्याकारस्यनिवृत्तिर्योनौपुत्राः शुभदलेंद्वाभइत्याद्याःकाम्यास्त्वाकाराभवंत्येव॥ वेद्यांविशेषमाहगोभिलः॥ कुंडस्यप्रागुदीच्यांवाप्राच्यामुत्तरतोपिवा॥ चतुरस्रंचतुर्हस्तंकर्तव्यंग्रहपीठकं॥ श्रीकामःपूर्वतःकुर्यात्पुष्ट्यर्थंदक्षिणेनतु॥ पश्चाद्विजन्मसिद्ध्यर्थंशांत्यर्थंचोत्तरेणतु॥ ऐशान्यांसर्वकामायतत्राग्नेय्यांत्वभिचारके॥ नैऋत्यांपुत्रलाभायपुष्ट्यर्थंवायवेनत्विति॥ ग्रहवेदीतुस्थंडिलपक्षेपिकार्या॥ वशिष्ठः॥ लिखेदष्टदलंपद्मंवेदिकोपरितंडुलैः॥ अत्रै

काग्निब्रह्माचार्य्यपक्षमुक्त्वातेषांनवसंख्याकुंडेषुतत्तद्ग्रहाकारांश्चाह प्रयोगपारिजाते भगवान्॥मनोरमेशुचौदेशेहोमशालामलंकृताम्॥कृत्वातुसंवृतांप्राज्ञोग्रहस्थानंप्रकल्पयेत्॥तन्मध्येभास्करस्थानंभवेत्पूर्वोत्तरेबुधः॥पूर्वस्मिन्भार्गवस्थानंसोमोदक्षिणपूर्वके॥दक्षिणस्यांकुजस्थानंराहोर्दक्षिणपश्चिमे॥शनेस्तुपश्चिमेस्थानंकेतोरुत्तरपश्चिमे॥उत्तरस्यांगुरोःस्थानमेवंच स्थंडिलंभवेत्॥स्थंडिलमग्न्यर्थे॥भास्करस्यचवृत्तंस्याच्चंद्रस्यचतुरस्रकं॥कुजस्यतुत्रिकोणंस्याद्बाणाकारंबुधस्यतु॥गुरोर्दीर्घचतुष्कोणंपंचकोणंसितस्यतु॥चापाकारंशनेराहोःशूर्पंकेतोर्ध्वजाकृतिं॥नवधाविभजेदग्निंश्रौतकर्मविधानतः॥ऋत्विजश्चयथायोगंकुंडेषुब्राह्मणाःपृथक्॥अथस्रुवेणजुहुयात्सूर्यपावकदारुकान्॥ऋत्विजोजुहुयुःसर्वेस्रुवेणैवंपृथक्पृथक्॥अष्टौतुकलशान्गृह्यसमारोपणमग्निषु॥प्रधानाग्नौविधायेमानित्थंहोमसमाचरेदिति॥अत्रैवचस्थंडिलंभवेदित्यनेनस्थंडिलानांकुंडानांचससआकारस्तत्तद्दिक्षुनिवेशश्चोक्तः॥ब्राह्मणाःपृथगित्यनेननवाचार्याब्राह्मणाश्चनवेत्युक्तं॥अत्रार्थसंक्षेपः प्रयोगपारिजाते॥मध्यकुंडेस्मार्त्ताग्निंप्रणीयततोनवाचार्या अष्टसुकुंडेष्वग्निंप्रणीयाज्यभागांतेऽर्कादिसमिद्भिर्गुडोदनादिहविर्भिराज्येनचग्रहादिमंत्रैर्हुत्वाव्यस्तसमस्तव्याहृतिभिश्चतिलान्हुत्वास्विष्टकृदादिहोमशेषंकृत्वापूर्णाहुतीर्जुहुयुरिति॥कुंडमुक्त्वास्कांदे॥तस्यचोत्तरपूर्वेणस्थंडिलंहस्तमात्रकं॥त्रिवप्रंचतुरस्रंचवितस्त्युच्छ्रायसंमितम्॥स्थंडिलंवेदिः॥वप्रोमेखला॥मात्स्ये॥द्व्यंगुलोच्छ्रितोवप्रःप्रथमःसमुदाहृतः॥त्र्यंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि॥द्व्यंगुलस्तत्रविस्तारःसर्वेषांकथितोबुधैः॥तत्रग्रहानाहयाज्ञवल्क्यः॥सूर्यःसोमोमहीपुत्रःसोमपुत्रोबृहस्पतिः॥शुक्रः

शनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृताः॥स्कांदे॥नवग्रहमखंकुर्याद्दृत्विजश्चतुरः शुभान्॥अथवाचैकमभ्यर्च्यविधिनाब्रह्मणासह॥त्रिविधमपिनवग्रहमुपक्रम्यवशिष्ठस्तु॥षोडशब्राह्मणान्शुद्धान्दंभाऽनृतविवर्जितान्॥तेषांमध्येश्रेष्ठतममाचार्यंतंप्रकल्पयेदिति॥अत्रपारिजातेनवाचार्याएकोब्रह्माषडृत्विजः॥आचार्येभ्योनवभ्यश्चग्रहार्चनफलंततइत्युक्तेः॥आचार्यःकर्मएवकुर्यात्॥परेत्वारंभमात्रं॥धेन्वाद्याग्रहदक्षिणाअपितेभ्यएवदेयाइत्याद्युक्तं॥तदयुक्तं॥उपक्रमेएकाचार्यस्यसंस्कार्यत्वेनैकत्वमविवक्षितं॥तथाध्याचार्यस्यभूतभाव्युपयोगाभावात्संस्कार्यत्वानुपपत्तेर्वृतआचार्यःस्वकर्मकुर्यादितिकल्पितेवाक्येउपादेयत्वादाचार्यस्यभवत्येकत्वंविवक्षितम्॥उपपादितंचेदमध्वर्युंवृणीतेहोतारंवृणीतेपुरोहितंवृणीतइत्यत्रमिश्रैः॥जन्मभूर्गोत्रमग्निश्चवर्णस्थानमुखानिच॥योऽज्ञात्वाकुरुतेशांतिंग्रहास्तेनाऽवमानिताः॥तत्रवर्णजन्मनीआहदामोदरीयेवृद्धपराशरः॥रक्तःकश्यपजोभानुःशुक्लोब्रह्मसुतःशशी॥रक्तोरुद्रसुतोभौमःपीतःसोमसुतोबुधः॥पीतोब्राह्मसुराचार्यःशुक्लःशुक्लोभृगूद्वहः॥कृष्णःशनीरवेःपुत्रःकृष्णोराहुःप्रजापतेः॥कृष्णाःकेतुःकृशानूत्थःकृष्णाःपापास्त्रयोप्यमी॥स्कांदे॥उत्पन्नोऽर्क कलिंगेषुयमुनायांचचंद्रमाः॥अंगारकस्त्ववंत्यायांमगधायांहिमांशुजः॥सैंधवेषुगुरुर्जातःशक्रोभोजकटेतथा॥शनैश्चरस्तुसौराष्ट्रेराहुर्वैराठिनापुरे॥अंतर्वेद्यांतथाकेतुरित्येताग्रहभूमयः॥यस्ययस्यचयद्गोत्रंतत्तेवक्ष्याम्यतःपरं॥आदित्यःकश्यपेगोत्रेआत्रेयश्चंद्रमाभवेत्॥भरद्वाजोद्भवोभौमस्तथात्रेयश्चसोमजः॥शुक्रपूज्योंगिरोगोत्रःशुक्रोवैभार्गवस्तथा॥शनिःकाश्यपएवाद्यराहुःपैठीनसिस्तथा॥केतवोजैमिनेयाश्चग्रहाग्निस्तदनंतरम्॥

आदित्यः कपिलोनामपिंगलः सोमउच्यते॥ धूमकेतुस्तथाभौमोजाठराग्निर्बुधः स्मृतः॥ गुरोश्चैवशिखानामशक्रोभवति हाढकः॥ शनैश्चरोम
हातेजाराहुकेतोर्हुताशनः॥ एतानिग्रहविशेषतोग्निनामानि॥ कर्मविशेषतोपिदेवीपुराणे॥ शुभोग्रहविधौत्वग्निर्लक्षहोमेपराजितः॥ कोटिहोमेशिवो
वन्हिः सर्वकामप्रदायकः॥ क्वचित्तु॥ लक्षहोमेतुवन्हिः स्यात्कोटिहोमेहुताशनइति॥ स्कांदे॥ भास्करांगारकौरक्तौश्वेतौशुक्रनिशाकरौ॥ सोमपुत्रो
गुरुश्चैवतावुभौपीतकौस्मृतौ॥ कृष्णंशनैश्चरंविंद्याद्राहुंचित्राश्चकेतवः॥ मध्येतु भास्करंविंद्याच्छशिनंपूर्वदक्षिणे॥ दक्षिणेलोहितंविंद्याद्बुधं
पूर्वोत्तरेणतु॥ उत्तरेणगुरुंविंद्यात्पूर्वेणैवतुभार्गवं॥ पश्चिमेनशनिंविंद्याद्राहुंपश्चिमदक्षिणे॥ पश्चिमोत्तरतः केतुः स्थाप्योवैशुक्लतंडुलैः॥ अ
थवावर्णकैः कार्याः कार्याः स्वर्णादिधातुभिः॥ याज्ञवल्क्यः॥ ताम्रकात्स्पटिकाद्रक्तचंदनात्स्वर्णजादुभौ॥ रजतादयसः सीसात्कांस्यात्कार्याग्रहा
स्तथा॥ वशिष्ठः॥ यथारुचिप्रमाणेनप्रतिमाः कल्पयेत्सुधीः॥ अत्रसर्वग्रहाणांसूर्यादिः क्रमः स्पष्टः॥ बौधायनस्तु॥ सूर्यांगारकशक्रचंद्रबुध
गुरुशनयइत्याह॥ स्कांदे॥ भानुंतुमंडलाकारंसोमंतुचतुरस्रकं॥ अंगारकंत्रिकोणंचबुधंबाणाकृतितथा॥ दीर्घचतुरस्रंगुरुंपंचास्रंभार्गवं
तथा॥ धनुस्तुल्यंशनिंविंद्याद्राहुंशूर्पाकृतिंतथा॥ ध्वजाकाराः केतवश्चगणेशंतत्ररूपिणं॥ रूपिणंहस्तपादाद्यवयवयुक्तं॥ स्थापयेच्छुक्लतंडुले
र्वर्णकैर्लेख्याइत्येतत्पक्षयोर्मंडलाद्याकारतेतिहेमाद्रिः॥ तत्रैव॥ शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ॥ प्रत्यङ्मुखः शनिः सोमः शेषादक्षि
णतोमुखाः॥ इदंचशुक्रादीनांप्राङ्मुखत्वादि आदित्याभिमुखाः सर्वइतिमात्स्योक्तादित्याभिमुखत्वेनविकल्पते॥ यत्तु॥ हेमाद्रिर्विकल्पपरिजि

ह्रीर्षयाप्राङ्मुखावूर्द्धदृष्टीउदङ्मुखौवामदृष्टीप्रत्यङ्मुखोधोदृष्टिर्दक्षिणतोमुखाःदक्षिणदृष्टयइतिव्याचष्ट॥तत्रमूलंचिंत्यं॥विरोधतादवस्थ्यंच॥वर्णरूपगुणैर्युक्तान् व्याहृत्यावाहयेत्तुतान्॥मात्स्ये॥पुण्येन्हिविप्रकथितेकृत्वाब्राह्मणवाचनं॥अग्निप्रणयनंकृत्वावेद्यामावाहयेत्सुरान्॥देवानांतत्रसंस्थाप्याविंशतिर्द्वादशाधिका॥आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः॥विष्णुधर्मोत्तरे॥अतःपरंप्रवक्ष्यामियोदेवोयोग्रहःस्मृतः॥अग्निरर्कःस्मृतःसोमोवरुणःपरिकीर्त्तितः॥अंगारकःकुमारश्चबुधश्चभगवान्हरिः॥बृहस्पतिःस्मृतःशुक्रःशुक्रोदेवीचपार्वती॥प्रजापतिःशनैश्चैवराहुर्ज्ञेयोगणाधिपः॥विश्वकर्मास्मृतःकेतुर्येग्रहास्तेसुराःस्मृताः॥अतएवाग्न्यादिलिंगकामंत्राःसूर्यादिस्थापनेउक्ताः॥स्कांदे॥अग्निंदूतंदिनेशायचंद्रायाप्स्वंतइत्यपि॥स्योनापृथिवीभौमायइदंविष्णुर्बुधायच॥इंद्रआसांसुरेज्यायशुक्रज्योतिःसितायच॥प्रजापतेतिसौरायआयंगौरितिराहवे॥केतवेब्रह्मजज्ञानंस्वैःस्वैर्मंत्रैःप्रतिष्ठिताः॥एतेषांचमंत्राणांव्याहृत्यावाहयेत्तुतानित्युक्त्वाभिर्व्याहृतिभिरावाहनेविकल्पः॥मदनस्त्वावाहनस्थापनयोर्भेदाद्व्याहृतिभिरावाहनं॥एतैर्मंत्रैःस्थापनमित्यूचेपारिजातेवामनस्तु॥प्रणवंत्वादितःकृत्वाभूर्भुवःस्वस्ततःपरम्॥चतुर्थ्यानामसंयुक्तंनमस्कारांतयोजितं॥एषमंत्रःसमाख्यातोग्रहपूजाविधायकः॥अनेनावाहनंकुर्याद्नेनैवविसर्जनमित्यूचे॥अत्रावाहनवाक्येषुविशेषमाहबोधायनः॥किरीटिनंपद्मासनंपद्मकरंपद्मगर्भसमद्युतिंसप्ताश्वंसप्तरज्जुंकलिंगदेशजंकाश्यपगोत्रंविश्वामित्रार्षंत्रिष्टुप्छंदसंरक्ताम्बरधरंरक्ताभरणभूषितंरक्तगंधानुलेपनंरक्तछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रवि

ष्टमधिदेवताग्निसहितंप्रत्यधिदेवतेश्वरसहितंरक्तवृत्तमंडलेपूर्वमुखमादित्यमावाहयामि॥किरीटिनंरक्तमाल्यांबरंरक्तशूलगदाधरंचतुर्भुजंमे
षगमनमवंतिदेशजंवाशिष्ठगोत्रजंजमदग्न्यार्षजगतीछंदसंरक्तांबरधरंरक्ताभरणभूषितंरक्तमाल्यानुलेपनंरक्तछत्रध्वजपताकिनंमुकुटकेयूर
मणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवताभूमिसहितंप्रत्यधिदेवतास्कंदसहितंत्रिकोणरक्तमंडलेदक्षिणामु
खमंगारकमावाहयामि॥किरीटिनंश्वेतवर्णंचतुर्भुजंदंडिनंवरदंकाव्यंसाक्षसूत्रकमंडलुंकीटकदेशजंभार्गवगोत्रजंशौनकार्षंपंक्तिछंदसंश्वेतांब
रधरंश्वेताभरणभूषितंश्वेतगंधानुलेपनंश्वेतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडले
प्रविष्टमधिदेवतेंद्राणीसहितंप्रत्यधिदेवेंद्रसहितंशुक्लपंचकोणमंडलेप्राङ्मुखंभगवंतंशुक्रमावाहयामि॥किरीटिनंश्वेतांबरधरंदशाश्वंश्वेतभू
षणंपाशपाणिंद्विबाहुंवनायुदेशजमत्रिगोत्रमात्रेयार्षमनुष्टुप्छंदसंश्वेतांबरधरंश्वेतगंधानुलेपनंश्वेतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभि
तमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतासहितंप्रत्यधिदेवतोमासहितंचतुरस्रमंडलेप्रत्यङ्मुखंसोममावाहया
मि॥किरीटिनंपीतमाल्यांबरधरंपीतवर्णंकर्णिकारसमद्युतिंखड्गचर्मगदापाणिंसिंहस्थंवरदंमगधदेशजमत्रिगोत्रजंभारद्वाजार्षंबृहती
छंदसंपीतांबरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वा
णंग्रहमंडलेप्रविष्टमधिदेवताविष्णुसहितंप्रत्यधिदेवताविष्णुसहितंपीतवर्णमंडलेउदङ्मुखंबुधमावाहयामि॥किरीटिनंपीतवर्णंचतुर्भुजंदंडि

वरदंसाक्षसूत्रकमंडलुंसिंधुदेशजमांगिरसगोत्रंवाशिष्ठार्षमनुष्टुप्छंदसंपीतांबरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतछत्रध्वजपताकिनंमुकुटकेयूरमणिभूषितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणग्रहमंडलेप्रविष्टंअधिदेवतेंद्रसहितंप्रत्यधिदेवताब्रह्मसहितंपीतदीर्घचतुरस्रमंडले उदङ्मुखंगुरुमावाहयामि॥किरीटिनमिंद्रनीलसमद्युतिंशूलधरंवरदंगृध्रवाहनसबाणशरधरंसौराष्ट्रदेशजंकाश्यपगोत्रजंभृग्वार्षगायत्रीछंदसंकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णागंधानुलेपनंकृष्णछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवताप्रजापतिसहितंप्रत्यधिदेवतायमसहितंकृष्णाधनुर्मंडलेप्रत्यङ्मुखंशनैश्चरमावाहयामि॥किरीटिनंकरालवदनंखड्गचर्मशूलधरंसिंहासनस्थंपूर्वदेशजंपादलिगोत्रमांगिरसार्षमनुष्टुप्छंदसंकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णागंधानुलेपनंकृष्णाछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतासर्पसहितंप्रत्यधिदेवताकालसहितंकृष्णशूर्पमंडलेदक्षिणासुखंराहुमावाहयामि।धूम्रान्द्विबाहून्पाशधरान्विकृताननान्गृध्रवाहनान्किरीटिनोमध्यदेशजान्जैमिनिगोत्रजान्गौतमार्षान्नानाछंदसश्चित्रांबरधरांश्चित्राभरणभूषितांश्चित्रगंधानुलेपनान्कृष्णपिंगलध्वजपताकिनोमुकुटकेयूरमणिशोभितानारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणान्ग्रहमंडलेप्रविष्टानधिदेवताब्रह्मसहितान्प्रत्यधिदेवताचित्रगुप्तसहितान्कृष्णपिंगलध्वजमंडलेदक्षिणामुखान्केतूनावाहयामि॥स्कांदे॥ईश्वरंभास्करेविंद्यादुमांविंद्यान्निशाकरे॥स्कंदमंगारकेविंद्याद्बुधेनारायणंविदुः॥गुरौवेदनिधिंविंद्यात्शुक्रेशक्रोविधीयते॥शनैश्चरेयमं

विंद्याद्राहोकालस्तथैवच॥ चित्रगुप्तोधिपःकेतोरित्येताग्रहदेवताः॥ वेदनिधिर्ब्रह्मा॥ तत्रैव॥ वक्ष्येस्थानानिदेवानामीश्वरादियथाक्रमं॥ सूर्यस्य
चोत्तरेशंभुमुमांसोमस्यदक्षिणे॥ स्कंदमंगारकस्यैवदक्षिणस्यांनिवेशयेत्॥ सौम्यात्पश्चिमतोविष्णुंब्रह्माजीवस्यपूर्वतः॥ इंद्रमैंद्र्यांसिताद्दि
क्षिमंदादाग्नेयतोमयं॥ राहोःपूर्वोत्तरेकालंसर्वभूतभयावहं॥ केतोर्नैर्ऋतदिग्भागेचित्रगुप्तंनिधापयेत्॥ स्कांदे॥ अतःस्थापनमंत्रांश्चकथयाम्यनुपू
र्वशः॥ ईश्वरंत्र्यंबकंचेतिश्रीश्चतेचेतिपार्वतीं॥ यदक्रंदेतिचस्कंदंविष्णुंविष्णोरराडति॥ आब्रह्मन्नितिब्रह्माणंसजोषेंद्रेतिवासवं॥ यमायत्वेतिचय
मंकालंकार्षिरसीतिच॥ चित्रावस्वितिमंत्रेणचित्रगुप्तंनिधापयेत्॥ अग्निरापःक्षितिर्विष्णुरिंद्रश्चैंद्रीप्रजापतिः॥ सर्पाब्रह्माचनिर्दिष्टाअधिदेवायथा
क्रमं॥ अग्निंदूतमितित्वग्नेर्वरुणस्यउदुत्तमम्॥ स्योनापृथिवीमेदिन्याइदंविष्णुस्तुविष्णवे॥ इंद्रायेंद्रोइतींद्रस्योत्तानपर्णेशचीस्थितो॥ प्रजाप
तेप्रजेशस्यएषब्रह्मेतिवैविधेः॥ मंत्रोनमोस्तुसर्पेभ्यःसर्पाणांस्थापनेमतः॥ ग्रहदेवाधिदेवानांनैवेद्यंकुसुमानिच॥ ग्रहवच्चासनंदानंस्थाप
नंचानुपूर्वशः॥ सूर्यादयोग्रहाईश्वरादयोदेवाः॥ अग्न्यादयोधिदेवाः॥ तत्रेश्वरादिदेवानांसूर्यस्यैवोत्तरेशंभुमित्यादिनापूर्वस्थलान्युक्तानि॥
अग्न्यादयोधिदेवास्तुग्रहदेवयोर्मध्येस्थाप्याः॥ तथाचमदनरत्नेगोभिलवशिष्ठौ॥ ग्रहदेवतयोर्मध्येअधिदेवान्निधापयेत्॥ तत्रैवसंग्रहेतु॥ ईश्व
रादयोदेवाअधिदेवतात्वेनव्यवहृताः॥ अग्न्यादयस्तुप्रत्यधिदेवतात्वेन॥ तेषांस्थानांतरंचोक्तं॥ अधिदेवादक्षिणतोवामेप्रत्यधिदेवताः॥ स्थापनी
याःप्रयत्नेनव्याहृतीभिःपृथक्पृथक्॥ तत्रैववाशिष्ठीयेतु॥ देवतानांस्थानांतरंचोक्तं॥ रुद्रंत्र्यंबकमंत्रेणरवेरुत्तरतोन्यसेत्॥ सोमस्याग्नेय

दिग्भागेश्रीश्चतेमेनकात्मजां।।यदक्रंदेति भौमस्य स्कंदंयाम्येप्रदापयेत्।। विष्णुंविष्णोरराटेतियजेत्पूर्वेबुधस्यच।।गुरोरुत्तरतोभ्यर्च्योब्रह्माब्रह्मेतिमंत्रतः।।सजोषेंद्रेतिशक्रस्यप्राच्यांशक्रंनिधापयेत्।। शनेःपश्चिमतःस्थाप्योयमायत्वेत्यृचायमः।।कार्षिरसीतिमंत्रेणराहोःकालंतथोत्तरे।। चित्रगुप्तंतुकेतूनांचित्रायस्वेतिनैर्ऋते।।ग्रहाश्चदेवताःख्याताःशृणुष्वातोधिदेवताः।।अग्निरापोधराविष्णुरिंद्रेंद्राणीप्रजापतिः।।सर्पाब्रह्माचनिर्दिष्टाअधिदेवायथाक्रमं।।ग्रहदेवतयोर्मध्येअधिदेवान्निवेशयेत्।।एतानिचवाशिष्ठीयवचांसिकैश्चिन्नाद्रियंते।।पारिजाते।।पद्मप्राग्दलमारभ्यदलाग्रेषुक्रमान्न्यसेत्।।इंद्रादिलोकपालांश्चतत्तन्मंत्रैःप्रपूजयेत्।।विनायकंतथादुर्गांवायुमाकाशमेवच।।आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ।।एतेत्रविनायकाद्याःपंचग्रहेभ्यउत्तरतःस्थाप्याइतिसांप्रदायिकाः।।दक्षिणपश्चिमवायव्योत्तरपूर्वेषुयथाक्रममित्यन्ये।।राहुमंददिनेशानामुत्तरस्थंयथाक्रमं।।गणेशोदुर्गावायुश्चराहुकेत्वोश्चदक्षिणे।।आकाशमश्विनौचेतिपंचैतान्स्थापयेद्बुधः।।इतिसंग्रहवचनानुसारेणेतिपितामहचरणाःरूपनारायणश्च।।स्कांदे।।उत्तरेशनिसूर्याभ्यांगुरुकेत्वोश्चदक्षिणे।।गणाधिपप्रतिष्ठाप्यसर्वदेवनमस्कृत।। रविशनिकेतुगुरूणांमध्यइतिफलितोर्थः।।विनायकपदमुपलक्षणं।।तेनदुर्गादयोप्यत्रैवस्थाप्याइतिकेचित्।।चंदनादिनियमस्तत्रैव।।दिवाकरकुजाभ्यांहिदापयेद्रक्तचंदनं।। चंद्रेचभार्गवेचैवसितवर्णंप्रदापयेत्।।कुंकुमेनतुसंयुक्तंचंदनंजीवसौम्ययोः।।अगरुंचंदनंदद्याद्राहुकेत्वर्कजेषुच।।ग्रहवर्णानिपुष्पाणिगायत्र्याधूपमादहेत्।।रवेःकुंदुरुकंधूपंशशिनस्तुघृताक्षताः।।भौमेसर्जरसंचैवअगुरुंचबुधेस्मृतम् ।। सिल्हकंगुरवेदद्याच्छुक्रेबिल्वा

गुरुं तथा ॥ गुग्गुलंमंदवारेतुलाक्षाराहोश्चकेतवे ॥ कुंदुरुकः सल्लकीनिर्यासः ॥ सिल्हकंसिल्हाइतिमध्यदेशेप्रसिद्धम् ॥ बिल्वागुरुंबिल्वफलनि
र्याससहितमगुरुं ॥ मंदवारः शनिः ॥ उद्दीप्यस्वेतिमंत्रेणदीपदद्यादतंद्रितः ॥ विहितधूपदीपगंधादीनामसंभवेतुयाज्ञवल्क्यः ॥ यथावर्णंप्रदेया
निवासांसिसुकु मानिच ॥ गंधाश्चवलयःसर्वधूपोदेयश्चगुग्गुलः ॥ स्कांदे ॥ गुडोदनंरवेर्दद्यात्सोमायघृतपायसं ॥ लोहितायहविष्यान्नंबुधा
यक्षीरषाष्ठिकम् ॥ दध्योदनंगुरोर्दद्याच्छुक्रायचघृतोदनं ॥ मिश्रितंतिलमाषैश्चनैवेद्यंतुशनैश्चरे ॥ राहोर्मांसोदनंदद्यात्केतोश्चित्रोदनंतथा ॥
चित्रोदनं ॥ तिलतंडुलमिश्रंस्यादजाक्षीरंचशोणितं ॥ कर्णनासागृहीतंस्यादेतच्चित्रोदनंस्मृतमितिदामोदरः ॥ एतैरेवद्रव्यैर्ब्राह्मणाअपिभो
ज्याः ॥ गुडोदनंपायसंचहविष्यंक्षीरषाष्ठिकं ॥ दध्योदनंहविश्चूर्णंमांसंचित्रान्नमेवच ॥ दद्याद्ग्रहक्रमादेतद्द्विजेभ्योभोजनंबुधः ॥ शक्तितोवायथा
लाभंसत्कृत्यविधिपूर्वकम् ॥ वशिष्ठः ॥ उपचाराणिसर्वेषामपिशुक्लाक्षतैःसदा ॥ गंधाभावेशुक्लगंधंपुष्पाभावेसुगंधकं ॥ धूपाभावेगुग्गुलुःस्याद्द्र
व्याभावेतुमिश्रकं ॥ पंचामृतंगवामेवमिश्रकंनकदाचनेति ॥ मात्स्ये ॥ प्रागुत्तरेणतस्माच्चदध्यक्षतविभूषितम् ॥ चूतपल्लवसंयुक्तंफलवस्त्रयु
गान्वितम् ॥ पंचरत्नसमायुक्तंपंचभंगयुतंतथा ॥ स्थापयेदव्रणंकुंभंवरुणंतत्रविन्यसेत् ॥ गंगाद्याःसरितःसर्वाःसमुद्राश्चसरांसिच ॥ गजा
श्वरथ्यावल्मीकसंगमान्ह्रदगोकुलात् ॥ मृदमानीयविप्रेंद्रसर्वौषधिसमन्विताम् ॥ स्नानार्थंविन्यसेत्तत्रयजमानस्यधर्मवित् ॥ याज्ञवल्क्यः
॥ अर्कःपलाशःखदिरअपामार्गोथपिप्पलः ॥ उदुंबरःशमीदूर्वाकुशाश्चसमिधःक्रमात् ॥ ईश्वरादिदेवानांस्वस्वग्रहसमिद्भिरेवहोमः ॥ हेमा

द्रौदेवीपुराणे ॥ गणाधिपतयेदेयाप्रथमातुवराहुतिः ॥ अन्यथाविफलंविप्रभवतीहनसंशयइति ॥ आश्वलायनः ॥ जुहुयात्समिदन्नाज्येताभिर्ऋग्भिर्यथाक्रममिति । समित्सुविशेषमाह याज्ञवल्क्यः ॥ होतव्यामधुसर्पिर्भ्यांदध्नाक्षीरेणवायुताइतिनचात्रसंप्रतिपन्नदेवताकानेकद्रव्याणामेकैवाहुतिः सान्नाज्यवत्तदितिवाच्यं ॥ आदौतुसमिदन्नाज्यैः पृथगष्टोत्तरंशतमितिवाशिष्ठात् ॥ अन्यत्रापिसंप्रतिपन्नदेवताकेस्मार्त्तेकर्मण्यनेकद्रव्यकेपृथगेवहोमइतिसांप्रदायिकाः ॥ बहुषुकर्मस्वप्रायोवचनान्यप्येवं ॥ स्कांदे ॥ आकृष्णेनसहस्रांशोरिमंदेवातथेंदवे ॥ अग्निर्मूर्द्धेतिभौमायउद्बुध्यस्वबुधायच ॥ बृहस्पतेतिचगुरोः शुक्रायाऽन्नात्परिस्रुतः ॥ शनैश्चरस्यमंत्रोयंशन्नोदेवीरुदाहृतः ॥ कयानइतिराहोश्चकेतुंकृण्वंस्तुकेतवे ॥ मात्स्ये ॥ आवोराजेतिरुद्रस्यबलिंहोमंसमाचरेत् ॥ आपोहिष्ठेत्युमायास्तुस्योनेतिस्वामिनस्तथा ॥ विष्णोरिदंविष्णुरितित्वमित्सेतिस्वयंभुवः ॥ इंद्रमिद्देवतातयइतींद्रस्यप्रकीर्त्तितः ॥ तथायमस्यचायंगौरितिहोमः प्रकीर्त्तितः ॥ कालस्यब्रह्मजज्ञानमितिमंत्रःप्रशस्यते ॥ चित्रगुप्तस्यचाज्ञातमितिपौराणिकाविदुः ॥ अग्निंदूतंवृणीमहइतिविष्णोरुदाहृतः ॥ इंद्रायेंदोमरुत्वतइतिशुक्रस्यशस्यते ॥ उत्तानपर्णिसुभगेइतिशच्याः समाचरेत् ॥ प्रजापतेः पुनर्होमंप्रजापतइतिस्मृतः ॥ नमोस्तुसर्पेभ्यइतिसर्पाणांमंत्रउच्यते ॥ पूषब्रह्मायऋत्विजइतिब्रह्मण्युदाहृतः ॥ विनायकस्यचातूनइतिमंत्रोबुधैःस्मृतः ॥ जातवेदसेसुनवामदुर्गामंत्रोत्रउच्यते ॥ पूर्णाहुतिंचमूर्द्धानंदिवइत्यभिपातयेत् स्कांदे ॥ नैवेद्यशेषंहुत्वाचहोममंत्रादनंतरं ॥ अथव्याहृतिभिर्हुत्वाएकैकस्ययथाक्रमम् ॥ अष्टोत्तरंचसाहस्रंशतमष्टादिकंतथा ॥ अष्टाविंशति

रक्षौवा एकैकस्यतुहोमयेत् ॥होतव्यंचघृतंतत्र चरुर्लक्षादिकंपुनः॥ मंत्रैर्दशाहुतीर्हुत्वाहोमोव्यात्हृतिभिःस्मृतः॥अथेतिअथर्वेत्यर्थः॥गृहीत्वातामथांबिकामितिवत्॥मदनस्त्वथर्वेत्येवपपाठ तत्तन्मंत्राणांव्यात्हृतीनांचपरस्परंविकल्पः॥अथाष्टोत्तरसहस्रादिसंख्यातुपक्षद्वयेपिनैवेद्यशेषहोमस्तुशाखाविशेषपरइत्यपिस एवलक्षादिकःपुनर्व्यात्हृतिभिर्होमोमंत्रैर्दशाहुतीर्हुत्वास्मृतइत्यन्वयः॥मंत्रैर्ग्रहमंत्रैः॥व्यात्हृतिभिर्व्यस्ताभिःसमस्ताभिश्च॥ तातचरणास्तु॥अथव्यात्हृतिभिर्हुत्वेतिपृथग्वाच्यं॥एकैकस्येतितुप्रतिदैवतमष्टादिसंख्यान्वयार्थं॥एकैकस्यतुहोमयेदित्येकैकपदंतुचर्वादिद्रव्यपरं॥नदेवतापरं॥ अस्मिन्नेवहोमेघृतचरुद्रव्यविधिरग्रे॥ लक्षादिकइत्येतत्तु॥अथव्यात्हृतिविहितहोमेलक्षादिसंख्याविध्यर्थं॥मंत्रैरित्यादितुचरुहोमोत्तरंसोमंराजानमितिमंत्रेणयथाप्रकृतिस्विष्टकृन्हुत्वासूर्यादिमंत्रैर्दशदशाहुतीःप्रतिदेवतलक्षहोमादिद्रव्येणहुत्वाव्यात्हृतिभिर्लक्षादिहोमःकार्यइत्याहुः॥यवाद्यन्यतमद्रव्येणग्रहादिभिःप्रत्येकंदशाहुतीस्तत्तन्मंत्रैर्हुत्वातेनैवद्रव्येणव्यस्तसमस्तव्यात्हृतिभिरयुतलक्ष कोट्यन्यतमसंख्ययाजुहुयादितिहेमादिमदनौ॥ तानिचद्रव्याणिदेवीपुराणे॥यवव्रीहिघृतक्षीरतिलकंगुप्रसारिकाः॥पंकजोशीरबिल्वार्कदलाहोमेप्रकीर्त्तिताः॥उदङ्मुखाःप्रत्यङ्मुखावाकुर्युर्ब्राह्मणपुंगवाः॥यंत्रवंतश्चकर्त्तव्याश्चरवःप्रतिदेवतं॥हुत्वाचतांश्चरून्सम्यक्कृतिहोमंसमारभेत्॥ चर्वादिकंचघृताद्यक्तंहोतव्यं॥होतव्यंचघृताद्यक्तंचरुभक्ष्यादिकंपुनरितिमात्स्यात्॥ भक्ष्यंद्राक्षादि॥चरुर्नैवेद्यशिष्टोगुडोदनादिः॥तानिद्रव्याण्युक्त्वाइत्येतानिहवींषिस्युः॥ समित्संख्यासमाहुतीरित्याश्वलायनोक्तेः॥अधिदेवतादिभ्योपिहो

मोहेमाद्रौ॥चरुणाचसमिद्भिश्चसर्पिषाचतिलैःक्रमात्॥तत्तन्मंत्रैश्चहोतव्याःक्रमादत्राधिदेवताः॥गृह्यपरिशिष्टे॥प्रधानदशांशेनपार्श्वदेवतयोरिति॥अधिदेवतादिहोमेसंख्यावाशिष्ठेद्वित्राश्चैवाधिदेवताः॥पंचानांचैवपंचधेति॥द्वित्राःपंच॥पंचानांगणेशादीनांपंचधाप्रत्येकमित्यर्थः॥केचित्तुद्वौत्रयोवाद्वित्राः॥विनायकादीनांपंचधाएकैकामितिकेचित्॥प्रयोगपारिजाते॥इंद्रादिलोकपालांश्चतत्तन्मंत्रैःप्रपूजयेत्॥तत्तन्मंत्रैर्जपंकुर्यात्ततोहोमंसमारभेत्॥नृसिंहपुराणे॥ततोव्याहृतिभिःपश्चाज्जुहुयाच्चतिलादिकं॥यावत्प्रपूज्यतेसंख्यालक्षंवाकोटिरेववा॥वाशब्दादयुतमपि॥ग्रहयज्ञश्चनियतकालीनः॥स्वेच्छायज्ञःसउच्यतइतिभविष्योत्तरात्॥ततोव्याहृतिभिःकुर्यात्तिलहोमंप्रयत्नतः॥प्रथमोऽयुतहोमःस्याल्लक्षहोमोद्वितीयकः॥तृतीयःकोटिहोमःस्यात्त्रिविधोग्रहयज्ञकः॥एकरात्रंत्रिरात्रंवापंचरात्रमथापिवा॥शिवगाथांविष्णुगाथांशांतिब्राह्मणभोजनम्॥समापयेत्प्रतिदिनमेवंभक्तिसमन्वितइतिवा॥शिष्टेष्वेकरात्रादिग्रहणंनियमानादरार्थं॥अत्रसूक्तादिजपोपितुलादानवदितिकेचित्॥वाशिष्ठे॥अथाभिषेकमंत्रेणवाद्यमंगलगीतकैः॥पूर्णकुंभेनतेनैवहोमांतेप्रागुदङ्मुखैः॥अव्यंगावयवैर्ब्रह्मन्हेमस्रग्दामभूषितैः॥यजमानस्यकर्त्तव्यंचतुर्भिःस्नपनंद्विजैः॥अभिषेकमंत्राःप्रयोगेवक्ष्यंते॥वाशिष्ठः॥स्वस्तिकंकल्पयेत्पश्चात्कुंडस्येशानभागतः॥यजमानाभिषेकार्थंतत्रभद्रासनंन्यसेत्॥प्राङ्मुखस्योपविष्टस्ययजमानस्यतत्रच॥अभिषेकंततःकुर्युःसाचार्याःषोडशर्त्विजः॥विविधैर्मंगलैर्घोषैःसूतमागधजैःसहः॥ततस्तस्याभिषिक्तस्यरक्षार्थंबलिमुत्क्षिपेत्॥दिग्विदिक्षुविचित्रान्नैर्दीपैर्नीराजयेत्ततः॥

शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः॥ततोमंडपमागत्य ध्यायेदग्निंसुरान्ग्रहान्॥प्रत्येकंप्रतिमंत्रैश्चदद्यात्पुष्पांजलिंततइति॥वामनः॥ आ
चार्यप्रभृतिभ्यश्चग्रहार्चनफलंततः॥समिदाज्यचरूणांचतिलहोमफलंचयत्॥ब्रह्मत्वेकुंभपूजायांचाऽर्चनस्यफलंचयत्॥गणपक्षेत्रपाश्वी
शदुर्गादेव्यंगदेवताः॥तासांजपफलंसम्यक्गृण्हीयाज्जलपूर्वकम्॥एतानिचवामनवचांसिनिर्मूलानीतिपितामहचरणाः॥वाशिष्ठगोभिलवचसा
मपिकेचिदाहुः॥वशिष्ठः॥ततोजपादीञ्जुहुयात्पूर्णाहुतिमथाचरेत्॥तत्रैव॥मंत्रेणसप्ततेअग्नइति पूर्णाहुतिंचरेत्॥ अग्निपुराणे॥ मूर्द्धानं-
दिवमंत्रेणसंस्रवेणचधारया॥दद्यादुत्थायपूर्णांवैनोपविश्यकदाचनेति॥मात्स्ये॥ पूर्णाहुतेरेकत्वान्मंत्राणांविकल्पः॥उपांशुयाजइवशा
खाभेदभिन्नानांयाज्यानुवाक्यानां॥समुच्चयेनतुपठंति॥वसोर्द्धारात्वयुतहोमेनास्ति॥प्रमाणाभावात्॥ततःशुक्लांबरधरःशुक्लगंधानुलेपनः॥
सर्वौषधैःसर्वगंधैः स्नापितोवेदपुंगवैः॥ यजमानःसपत्नीकऋत्विजस्तान्समाहितः॥दक्षिणाभिः प्रयत्नेनपूजयेद्गतविस्मयः॥सूर्यायकपिलांधेनुंद
द्याच्छंखंतथेंदवे॥रक्तंधुरंधरंदद्याद्भौमायककुदाधिकं॥बुधायजातरूपंतुगुरवेपीतवाससी॥श्वेताश्वंदैत्यगुरवेकृष्णांगामर्कसूनवे॥आय
संराहवेदद्यात्केतवेच्छागमुत्तमं॥सुवर्णेनसमाःकार्यायजमानेनदक्षिणाः॥बुधप्रीत्यर्थदेयहेम्नासहसर्वामूल्यतःसमाइतिकेचित्॥अस्मिन्पक्षे
षोडशमाषविशिष्टहेमवाचिसुवर्णपदाऽसमंजसस्यापत्तेस्तादृशसुवर्णमूल्यंप्रत्येकमितिपरेबह्वल्पमूल्येषुतथाहेमाऽअपिदेयंयथासर्वाःप्रत्ये
कंदशमाषसुवर्णेनसमाभवंतीतितुसम्यक्॥सर्वेषामथवागावोगुरुर्वायेनतुष्यति॥स्वमंत्रेणप्रदातव्याःसर्वाःसर्वत्रदक्षिणाः॥स्कांदे॥केतवे

छागमांसानिसर्वेषामेवकांचनमिति॥ तत्रैव॥ यस्तुपीडाकरोनित्यंस्वल्पवित्तस्यवाग्रहः॥ तमेवपूजयेद्भक्त्यादक्षिणाभिःस्वशक्तितः॥ दानोद्योते आश्वलायनः॥ यथाशक्तिततोविप्रानृत्विजश्चेतरानपि॥ एकमेकाहुतौविप्रंहोमेत्वन्नेनभोजयेत्॥ अत्यर्थेमध्यमश्चापिविप्रमेकंशताहुतौ॥ सहस्रस्याहुतेर्वैकंजघन्योपिप्रभोजयेत्॥ तत्रैव॥ तस्माद्दातुमशक्तोपिदक्षिणांचान्नमेववा॥ जपैःप्रणामैःस्तोत्रैश्चतोषयेत्तर्पयेद्गुरुं॥ स्कांदे॥ यथाग्रहोद्विजस्तद्वद्विज्ञेयोवेदपारगः॥ तोषयन्मृदुवस्त्राद्यैस्तुष्टमेनंविसर्जयेत्॥ अन्नहीनोदहेद्राष्ट्रंमंत्रहीनश्चऋत्विजः॥ यजमानमदक्षिण्योनास्तियज्ञसमोरिपुः॥ तत्रैव॥ यथासमन्वितंयंत्रंयंत्रेणप्रतिहन्यते॥ एवंसमुच्छ्रितंघोरंशीघ्रंशांत्याविनश्यति॥ अहिंसकस्यदांतस्यधर्मार्जितधनस्यच॥ नित्यंचनियमस्थस्यसदासानुग्रहाग्रहाः॥ ग्रहागावोनरेंद्राश्चब्राह्मणाश्चविशेषतः॥ पूजिताःपूजयंत्येतेनिर्दहंत्यपमानिताः॥ ग्रहाणामिदमातिथ्यंकुर्यात्संवत्सरादपि॥ आरोग्यबलसंपन्नोजीवेच्चशरदांशतं॥ मात्स्ये॥ एवंसमग्रान्निष्पाद्यसर्वान्देवान्विसर्जयेत्॥ तत्रमंत्रः॥ यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं॥ इष्टकामप्रदानार्थंपुनरागमनायच॥ भविष्योत्तरे॥ ततःसमासेयज्ञेतुकारयेत्तुमहोत्सवं॥ शंखतूर्यनिनादेनब्रह्मघोषरवेणच॥ मात्स्ये॥ अनेनविधिनायस्तुग्रहपूजांसमारभेत्॥ सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते॥ सदैवायुतहोमोयंनवग्रहमखःस्मृतः॥ विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुकर्मसु॥ निर्विघ्नार्थंमुनिश्रेष्ठतथोद्वेगाद्भुतेषुच॥ वश्यकर्माभिचारादितथैवोच्चाटनादिकं॥ नवग्रहमखंकृत्वाततःकाम्यंसमारभेत्॥ अन्यथाफलदंपुंसांनकाम्यंजायतेक्वचित्॥ तस्मादयुतहोमस्यविधानंतुसमाचरेत्॥ विवाहेत्यादिनाच

विवाहादिषुकाम्येषुकर्मस्वंगत्वमुक्तं॥अत्रग्रहस्वरूपवर्णदेशगोत्राग्निस्थानमुखाकारस्थापनहोममंत्रचंदन धूपदीपनैवेद्यसमिद्दक्षिणाधिदेवताप्रत्यधिदेवतोपदेशकवाक्येषुग्रहाणांस्वरूपनिर्देशस्थापनहोममंत्रोपदेशकवाक्येषुवाधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालानामनेकस्मृतिपुराणभेदेन भूयोविसंवादिभिरनेकैःपर्यायशब्दैरुपस्थितेर्नात्रैकवैधशब्दनियमाः॥नापिमंत्रवर्णेनैकशब्दोपस्थितः॥शब्दविशेषे दैवताअनूद्यतत्स्मारकतयामंत्रविनियोगेनमंत्राणां देवताप्रापकत्वायोगात्॥तेषाम्बाहुल्येनास्पष्टलिङ्गकत्वाच्च अतोद्रव्यत्यागादिषुस्वरूपातिनिर्देशकस्मृतिमंत्रवर्णोपस्थितशब्दानामन्यतमेनशब्देनोद्देशोग्रहादीनामितिशिष्टाचारोप्येवं॥अत्रव्याहृतिकरणकेयुतहोमेऽग्निवायुसूर्यप्रजापतयएवदेवताः॥नवग्रहाः॥ऐंद्रादिवत्तत्प्रकाशकत्वेनविनियोगाभावात्॥ अतएवपारिजाते॥ ओं भूर्भुवः स्वश्चेतितिस्रोव्याहृतयोजपेत्॥आभिश्चहोमेतिसृभिश्चतुर्थीस्यात्समासतइतिसमस्ताभिरेवहोमः सचाग्निवायुसूर्यदैवत्यइतितुमदनः॥सर्वथाव्याहृतिहोमेनग्रहादेवताइति॥प्रधानंचात्रग्रहपूजातद्धोमोयुतहोमादिश्च॥श्रीकामः शांतिकामोवाग्रहयज्ञंसमाचरेदित्यादिनातत्पूजातद्धोमयोःफलसंबंधात्॥ग्रहयज्ञस्त्रिधेत्युक्त्वाप्रथमोऽयुतहोमइत्यादिनाऽयुतलक्षकोटिहोमानांग्रहयज्ञविशेषकत्वेनोपक्रमात्॥तस्मादयुतहोमस्यविधानंतुसमाचरेदित्युपसंहाराच्च॥ग्रहाग्रहदेवत्यकर्मसमूहेप्राणभृतउपदधातीतिवल्लिंगसमवायेनग्रहयज्ञशब्दः॥तातचरणास्त्वयुतहोमादीनामेवप्राधान्यंग्रहहोमस्त्वंगमित्याहुः॥तदाशयंनजानेयोहिकामशब्देनफलसंबंधःश्रीकामः शांतिकामोवाग्रहयज्ञंसमाचरेदित्यादिःसताव

ग्रहपूजाहोमयोरेवोचितः॥ ग्रहसंबंधप्राप्तेर्ग्रहयज्ञशब्दस्यतन्नामत्वात्॥ नचायुतहोमादीनांफलसंबंधेतत्प्रकरणपाठाद्ग्रहपूजाहोमयोरंगतेतिवाच्यं वैपरीत्यस्यापिसुवचत्वात्॥ अयुतहोमादिशब्दानांग्रहयज्ञसामानाधिकरण्येनग्रहयज्ञनामत्वंतुलिंगसमवायेनआर्थवादिकः फलसंबंधस्तु॥ अनेनविधिनायस्तुग्रहपूजांसमाचरेत्॥ सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयत इत्यत्रयजदेवपूजासंगतिकरणदानेष्वित्यनुशिष्टयोः पूजाहोमयोः सदैवायुतहोमोयमित्याद्युपक्रम्य निर्विघ्नार्थंमुनिश्रेष्ठइत्यादिनात्वयुतहोमादीनामपिस्मृतिषुतुप्रायआर्थवादिकमेवफलं। अत्रकामशब्दोपनीतेफलेसत्यार्थवादिकंसंबध्यतेनवेतितुविचारांतरं॥ किंचयाज्ञवल्क्यादिस्मृतिषुनतावदयुतहोमादीनांविधिर्नाप्यनुवादः अतोग्रहपूजाहोमयोःप्राधान्याभावेतत्रत्येतिकर्त्तव्यतासंबंधोनस्यात्॥ अतोग्रहपूजाहोमयोरपिप्राधान्यंभाति॥ अतएवक्वचित्केवलग्रहमखेषुतदंगकेषुचशांतिकादिकर्मस्वेकस्मृत्युक्तांगप्रधानादरेणस्मृत्यंतरोक्तप्रधानभूतायुतादिहोमंविनापिशाखांतरोक्तग्रहयागाभ्यासमात्राणामिवपूजाग्रहदेवत्यहोमयोरेवानुष्ठानंकथंचित्शिष्टानांसंगच्छते॥ ग्रहपूजाहोमयोरंगत्वेत्वंगमात्रानुष्ठानमेवस्यात्॥ अथग्रहादीनालक्षणानि॥ मात्स्ये॥ पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः॥ सप्ताश्वरथसंस्थश्चद्विभुजःस्यात्सदारविः॥ श्वेतः श्वेतांबरधरोदशाश्वः श्वेतभूषणः॥ गदापाणिर्द्विबाहुश्चकर्त्तव्योवरदःशशी॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः॥ चतुर्भुजोमेषगमोवरदःस्याद्धरासुतः॥ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः॥ खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः॥ देवदैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ॥ दंडिनौवरदौकार्यौसा

क्षसूत्रकमंडलू।।इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः।।चापबाणासनधरःकर्त्तव्योऽर्कसुतःसदा।।करालवदनःखड्गचर्मशूलीवरप्रदः।।नीलः सिंहासनस्थश्च राहुरत्रप्रशस्यते।।धूम्रादिबाहवःसर्वेगदिनोविकृताननाः।।गृध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः।।सर्वेकिरीटिनःकार्याग्रहालोकहितावहाः।।अंगुलेनोच्छ्रिताःसर्वेशतमष्टोत्तरंसदेति।।अथाधिदेवताप्रत्यधिदेवतालक्षणानि।।विष्णुधर्मोत्तरे।।पंचवक्त्रोवृषारूढःप्रतिवक्त्रंत्रिलोचनः।।कपालीशूलखट्वांगीचंद्रमौलिःसदाशिवः।।अक्षसूत्रंचकमलंदर्पणंचकमंडलुं।।उमाबिभर्तिहस्तेषुपूजितात्रिदशैरपि।।कुमारःषण्मुखःकार्यःशिखंडकविभूषणः।।रक्तांबरधरोदेवोमयूरवरवाहनः।।कुक्कुटश्चतथाघंटास्तस्यदक्षिणहस्तयोः।।पताकावैजयंतीस्याच्छक्तिःकार्याचवामयोः।।विष्णुःकौमोदकीपद्मशंखचक्रधरःक्रमात्।।प्रदक्षिणदक्षिणाधःकरादारभ्यनित्यशः।।पद्मासनस्थोजटिलोब्रह्माकार्यश्चतुर्भुजः।।अक्षमालांस्रुवंबिभ्रत्पुस्तकंचकमंडलुं।।चतुर्दंतगजारूढोवज्रीकुलिशभृत्करः।।शचीपतिःप्रकर्त्तव्योनानाभरणभूषितः।।ईषन्नीलाभःकार्योदंडहस्तोविजानता।।रक्तदृक्पाशहस्तश्चमहामहिषवाहनः।।कालःकरालवदनोनीलांगश्चविभीषणः।।पाशहस्तोदंडहस्तःकार्योवृश्चिकरोमवान्।।अपीच्यवेषस्वाकारंद्विभुजंसौम्यदर्शनं।।दक्षिणेलेखनींचित्रगुप्तंवामेतुपत्रकं।।पिंगलःश्मश्रुकेशाक्षःपीनांगजठरोरुणः।।छागस्थःसाक्षसूत्रोग्निःसप्तार्चिःशक्तिधारकः।।चिन्हितंचामरेणास्यकरमन्यंप्रकल्पयेत्।।आपःस्त्रीरूपधारिण्यःश्वेतामकरवाहनाः।।दधानाःपाशकलशौमुक्ताभरणभूषिताः।।शुक्लवर्णामहीकार्यादिव्याभरणभूषिता।।चतुर्भुजासौम्यवपुश्चंद्रांशुसदृशांबरा।।रत्नपात्रंस

स्यपात्रं पात्रमोषधिसंयुतं ॥ पद्मं करे च कर्त्तव्यं भुवो यादवनंदन ॥ दिग्नागानां चतुर्णां सा कार्या पृष्ठगता तथा ॥ विष्णोरिंद्रस्य चोक्तं ॥ वामे शच्याः करे कार्या सौम्या संतानमंजरी ॥ वरदा मंडिता कार्या द्विभुजा च तथा शची ॥ यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः ॥ अक्षस्रुवं स्रुचं बिभ्रत्कुंचिकां च प्रजापतिः ॥ अक्षं अक्षमालां ॥ कुंडिकां कमंडलुं ॥ अक्षसूत्रधराः सर्पाः कुंडिकापुच्छभूषणाः ॥ एकभोगास्त्रिभोगा वा सर्वे कार्याश्च भीषणाः ॥ ब्रह्मलक्षणमुक्तं ॥ ग्रहाणां दक्षिणे पार्श्वे स्थापयेदधिदेवताः ॥ ग्रहाणामुत्तरे पार्श्वे न्यसेत्प्रत्यधिदेवताः ॥ अथ विनायकादिलक्षणानि ॥ चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योत्र गजाननः ॥ नागयज्ञोपवीतश्च शशांककृतशेखरः ॥ दक्षे दंतं करे दद्याद्द्वितीये चाक्षसूत्रकं ॥ तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा ॥ शक्तिं बाणं तथा शूलं खड्गं चक्रं च दक्षिणे ॥ चंद्रबिंबमधो वामे खेटं मूर्ध्वे कपालकं ॥ स्फकं कटं च बिभ्राणा सिंहारूढा तु दिग्भुजा ॥ एषा देवी समुद्दिष्टा दुर्गा दुर्गार्त्तिहारिणी ॥ धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः ॥ वरदानकरो धूम्रवर्णः कार्यो विजानता ॥ नीलोत्पलाभ गगनं तद्वर्णांबरधारि च ॥ चंद्रार्कहस्तं कर्त्तव्यं द्विभुज सौम्यखडवत् ॥ द्विभुजौ देवभिषजौ कर्त्तव्यौ रूपसंस्थितौ ॥ तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः ॥ वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विजाः ॥ एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव ॥ नारीयुगं प्रकर्त्तव्यं सरूपं चारुदर्शनं ॥ रत्नभांड करे कार्ये चंद्रशुक्लांबरे तथा ॥ अथ लोकपालरूपाणि ॥ तत्रैंद्राग्नियमरूपाण्यधिप्रत्यधिदेवतोक्तानि ॥ खड्गचर्मधरो बालो निर्ऋतिर्नरवाहनः ॥ ऊर्ध्वकेशो विरूपाक्षः करालः कालिकाप्रियः ॥ नागपाशधरो रक्तभूषणः पद्मिनीप्रियः ॥ वरुणोम्बुपतिः स्वर्णवर्णो मकरवाहनः ॥ वायुविनायका

दिपंचकेउक्तः ॥ सोमोग्रहेषु॥ अनंतःसर्पःसप्रत्यधिदेवतासु॥ इत्ययुतहोमः॥ अथलक्षहोमः॥ तत्रग्रहपीडादीनिनिमित्तान्युक्तान्ययुतहोमारंभे देवीपुराणे॥ लक्षहोमंप्रवक्ष्यामियथाप्रोक्तंतु शंभुना॥ भूमिकंपेदिशादाहेग्रहयुद्धउपस्थिते॥ केतुसंदर्शनेचैवआदित्यस्यचकंपने॥ कृष्णावर्णोथवासूर्येतथाछिद्रसमन्विते। रक्तवृष्टिस्तथानद्योविपरीतंवहंतिच॥ निर्गतंगगनाद्धूमंवारिमध्येचयत्स्थितं॥ उपसर्गास्तथालोकेरक्षंतुक्षयकारकाः॥ यस्यराशौग्रहाःपंचअथसप्तसुराधिप। ग्रहणंचन्द्रसूर्यस्यग्रहैर्वाष्टमसंस्थितैरित्यादि॥ तथा॥ कंपनंस्वेदनंगात्रेअंबुपानार्थजल्पनं॥ देवतानांसुराध्यक्षउत्पाताःक्षयकारकाः॥ लक्षहोमंप्रकुर्वीतकोटिहोममथापिवेति॥ मात्स्ये॥ अस्माद्दशगुणःप्रोक्तोलक्षहोमःस्वयंभुवा॥ आहुतीभिःप्रयत्नेनदक्षिणाभिस्तथैवच॥ द्विहस्तविस्तृतंतद्वच्चतुर्हस्तायतंपुनः॥ लक्षहोमेभवेत्कुंडंयोनिवक्त्रंत्रिमेखलं॥ व्यासतोद्विहस्तंफलंतच्चतुर्हस्तायतंभवतीत्यर्थः॥ तथा॥ तस्यचोत्तरपूर्वेणवितस्तित्रयसंमितं॥ प्रागुदक्प्रवणंतद्वच्चतुरस्रंसमंततः॥ विष्कंभार्द्धोच्छ्रितंप्रोक्तंस्थंडिलंविश्वकर्मणा॥ संस्थापनायदेवानांवप्रत्रयसमावृतं॥ तस्मिंस्त्वावाहयेद्देवान्पूर्ववत्पुष्पतंडुलैः॥ गरुत्मानधिकस्तत्रसपूज्यःश्रियमिच्छता॥ सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः॥ विषपापहरोनित्यमतःशांतिंप्रयच्छमे॥ अयंगरुडावाहनमंत्रः॥ पूर्ववत्कुंभमामंत्र्यतद्वद्धोमंसमाचरेत्॥ सहस्राणांशतंहुत्वासमित्संख्यादिकंपुनः॥ पूर्ववद्देवसमिदाज्यचरुहोमंपूर्वोक्तैरेवमंत्रैःकुर्यात्॥ गुरुत्मतः॥ सुपर्णोसिगरुत्मानितिइंद्रंमित्रमितिवामंत्रः॥ घृतकुंभवसोर्धारांपातयेदनलोपरि॥ उदुंबरीमथार्द्रांचऋज्वाङ्कोटरवर्जिताम्॥ बाहुमात्रांस्रुचंकृत्वाततःस्तंभद्वयोपरि॥ घृतधा-

रांतथासम्यगग्नेरुपरिपातयेत्॥ श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैंदवं॥ महावैश्वानरंसम्यग्ज्येष्ठसामचपाठयेत्॥ स्नानंचयजमानस्यपूर्ववत्स्वस्तिवाचनं॥ दातव्यायजमानेनपूर्ववद्दक्षिणापृथक्॥ कामक्रोधविहीनेनऋत्विग्भ्यःशांतचेतसा॥ तद्वद्द्वादशचाष्टौवालक्षहोमेपिऋत्विजः॥ कर्तव्याःशक्तितस्तद्वच्चतुरोवाविमत्सराः॥ ब्रह्माचार्यसहितानामेवेयंसंख्येतिकेचित्॥ नवग्रहमखात्सर्वंलक्षहोमेदशोत्तरं॥ दद्याच्चमुनिशार्दूलभूषणान्यपिशक्तितः॥ शयनानिचवस्त्राणिहैमानिकटकानिच॥ कर्णांगुलीपवित्राणिकंठसूत्राणिशक्तितः॥ नकुर्याद्दक्षिणाहीनंवित्तशाठ्येनमानवः॥ अदत्वाहोमलोपाद्वाकुलक्षयमवाप्नुयात्॥ अन्नदानंयथाशक्त्याकर्त्तव्यंभूतिमिच्छता॥ मंत्रहीनंकृतोयस्माद्दुर्भिक्षफलदोभवेत्॥ तथा॥ तस्मात्पीडाकरोतीवयएवभवतिग्रहः॥ तमेवपूजयेद्भक्त्याद्वौवात्रीन्वायथाविधि॥ तथा॥ पूज्यतेशिवलोकेचवस्वादित्यमरुद्गणैः॥ यावत्कल्पशतान्यष्टौअथमोक्षमवाप्नुयात्॥ तथा॥ पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं॥ भार्यार्थीलभतेभार्यांकुमारीचशुभपतिम्॥ भ्रष्टराज्यस्तथाराज्यंश्रीकामःश्रियमाप्नुयात्॥ यंयंप्रार्थयतेकामंतंतंप्राप्नोतिपुष्कलम्॥ निष्कामःकुरुतेयस्तुपरंब्रह्मसगच्छति॥ ॥इतिलक्षहोमः॥ ॥अथकोटिहोमः॥ ॥तत्राप्ययुतलक्षहोमप्रकरणएवनिमित्तान्युक्तानि॥ भविष्योत्तरेपि॥ ॥संवरणउवाच॥ ॥भगवन्महदुत्पातसंभवेभूप्रकंपने॥ निर्घातेपांसुवर्षेचग्रहभंगेतथैवच॥ जन्मनक्षत्रपीडासुअनावृष्टिभयेषुच॥ क्रूरासुग्रहपीडासुदुर्भिक्षेराष्ट्रविप्लवे॥ व्याधीनांसंभवेजातेशरीरेवेतिपीडिते॥ क्लेशेमहतिचोत्पन्नेकिंकर्त्तव्यंनरोत्तमैः॥ स्वर्गस्यसाधनंयत्तत्कोत्तिदं

शांति· धनदंतथा॥ प्रब्रूहिमनुजश्रेष्ठतथारोग्यप्रदंनृणां॥ ॥सनत्कुमारउवाच॥ ॥शृणुराजन्प्रवक्ष्यामिशांतिकर्मण्यनुत्तमं॥कोटिहोमाख्यमतुलंसर्व मयू॰
११ कामफलप्रदम्॥ब्रह्महत्यादिपापानियेननश्यतितत्क्षणात्॥उत्पाताःप्रशमंयांतिमहत्संपद्यतेशुभम्॥विधानंतस्यवक्ष्यामिशृणुत्वेकमनाभ
व॥देवागारेचभवनेतीर्थेवाशिवसन्निधौ॥पर्वतेवाथकुर्वीतयइच्छेत्क्षेममात्मनः॥शुभनक्षत्रयोगेचवारेसर्वगुणान्विते॥यजमानस्यानुकूलेको
टिहोमंसमाचरेत्॥पूजयित्वाप्रयत्नेनब्राह्मणंवेदपारगं॥वस्त्रैर्विभूषणैश्चैवगंधमाल्यानुलेपनैः॥प्रणम्यविधिवत्तस्मैचात्मानंविनिवेदयेत्
॥त्वंमेयतःपितामातात्वंगतिस्त्वंपरायणम्॥त्वत्प्रसादेनविप्रर्षेसर्वंमेस्यान्मनोगतम्॥आपद्विमोक्षायचमेकुरुयज्ञमनुत्तमम्॥कोटिहोमा
ख्यमतुलंशांत्यर्थंसार्वकामिकं॥पुरोहितस्ततःप्राज्ञःशुक्लांबरधरःशुचिः॥ब्राह्मणैःसंवृतःपुण्यैःसंयुतःसुसमाहितैः॥भूमिभागेसमेशुद्धेप्राग्
उदक्प्रवणेतथा॥पुण्याहंवाचयेत्पूर्वंकृत्वाविप्रांस्तुपूजयेत्॥ततःसमाहितोविप्रःसूत्रयेन्मंडपंशुभम्॥उत्तमंशतहस्तंतुतदर्धेनतुमध्यमं॥अ
धमंतुतदर्द्धेनशक्तिकालाद्यपेक्षया॥मध्येतुमंडपस्यापिकुंडंकुर्याद्विचक्षणः॥अष्टहस्तप्रमाणेनआयामेनतथैवच॥मेखलात्रितयंतस्यद्वादशां
गुलविस्तृतं॥तत्प्रमाणांतथायोनिंकुर्वीतसुसमाहितः॥कुंडस्यपूर्वभागेतुवेदींकुर्याद्विचक्षणः॥चतुर्हस्तांसमांचैवहस्तमात्रोच्छ्रितांनृप॥
स्थापनंचसदेवानांकुर्याद्यत्नेनबुद्धिमान्॥उपलिप्यततोभूमिंमंडपस्यप्रकल्पयेत्॥स्थापयेद्दिक्षुसर्वासुतोरणानिविचक्षणः॥एवंसंभृतसं ११
भारःपुरोधाःसुसमाहितः॥पुण्याहजयघोषेणहोमकर्मसमाचरेत्॥स्थापयित्वासुरान्वेद्यांवक्ष्यमाणान्नरिंदम॥ब्रह्माणंपूर्वभागेतुमध्येदेवंज

नार्हनम्॥ पश्चिमेतुतथारुद्रंवसूनुत्तरतस्तथा॥ ईशान्यांचग्रहान्सर्वानाग्नेय्यांमरुतस्तथा॥ वायुंभूम्यांतथैशान्यांलोकपालान्क्रमेणतु॥ एवंसंस्थाप्यविबुधान्यथास्थानंनृपोत्तम॥ पूजयेद्विधिवद्वस्त्रैर्गंधमाल्यानुलेपनैः॥ वेदोक्तमंत्रैस्तल्लिंगैःपुराणोक्तैःपृथक्पृथक्॥ आदित्यावसवोरुद्रालोकपालास्तथैवच॥ ब्रह्माजनार्दनश्चैवशूलपाणिर्महेश्वरः॥ अत्रसन्निहिताःसर्वेभवंतुसुखभागिनः॥ पूजांगृह्णंतुसर्वत्रमयाभक्त्योपपादिताम्॥ प्रकुर्वंतुशुभंसर्वेयज्ञकर्त्तुःसमाहिताः॥ एवंतुपूजयित्वातान्देवान्यत्नेनशुद्धधीः॥ नैवेद्यैर्विविधैर्भक्ष्यैःफलैश्चैवसुशोभितैः॥ ततस्तुतैर्द्विजैःसर्वैःकुंडस्यविधिपूर्वकं॥ कुर्यात्संस्कारकरणंयथोक्तवेदवित्तमैः॥ ततःसमाह्वयेद्वह्निंनाम्नाख्यातंघृतार्चितं॥ नियोजयेद्द्विजांस्तत्रशतसंख्यान्नृपोत्तम॥ अलाभेचबहूनांचयथालाभंनियोजयेत्॥ विद्यावित्तवयोवृद्धान्गृहस्थान्संयतेंद्रियान्॥ स्वकर्मनिरतान्बुद्ध्याज्ञानशीलान्प्रयत्नतः॥ चिंतयेत्तत्रदेवेशंपंचास्यंनृपपावकं॥ मुखानितस्यचत्वारिसप्तजिह्वानिपार्थिव॥ एकजिह्वमथैकंतुतत्स्मृतंसार्वकामिकं॥ धूमायमानेनवृथाहोतव्यंज्वलितेनते॥ ऋग्भिःपूर्वमुखैःकार्योयजुर्भिश्चोत्तरामुखैः॥ सामभिःपश्चिमेकार्यःपूर्ववद्दक्षिणामुखैः॥ आघारावाज्यभागौतुपूर्वंहुत्वाविचक्षणाः॥ परितश्चपरिस्तीर्णेकल्पितेचतथासने॥ ब्राह्मणाःपूर्वमेवात्रसर्वंपश्चात्समाचरेत्॥ होमोव्याहृतिभिश्चैवसर्वस्तत्रविधीयते॥ प्रणवादिभिश्चतल्लिंगैःस्वाहाकारांतयोजितैः॥ जुहुयात्सर्वदेवानांवेद्यांयेचावकल्पिताः॥ एवंप्रकल्पयेद्यज्ञंकोटिहोमाख्यमुत्तमं॥ तिलाःकृष्णाघृताभ्यक्ताःकिंचिद्व्रीहिसमन्विताः॥ किंचिद्यवसमायुक्ताइतिक्वचित्पाठः॥ होतव्याःकोटिहोमेतुसमिधश्

सुपलाशजाः।।पूर्णेपूर्णेसहस्रेतुदद्यात्पूर्णाहुतिंशुभां।।पंचमेतन्मुखेराजन्सर्वकामार्थसिद्धये।।पूर्णाहुत्यःसमाख्याताःकोटिहोमेनराधिप
।।सहस्राणिनृपश्रेष्ठदशशास्त्रविशारदैः।।प्रारभदिनमारभ्यब्राह्मणैर्ब्रह्मवादिभिः।।होतव्यंयजमानैश्चअथवासपुरोहितैः।।क्रोधलोभादयोदो
षावर्ज्जनीयाःप्रयत्नतः।।यजमानेनराजेंद्रसर्वकामानभीप्सता।।मात्स्ये।।अस्माच्छतगुणःप्रोक्तःकोटिहोमःस्वयंभुवा।।आहुतीभिःप्रयत्नेनदक्षि
णाभिःफलेनच।।पूर्ववद्ग्रहदेवानामावाहनविसर्ज्जनं।।होममंत्रास्तएवोक्ताःस्नानदानेतथैवच।।कुंडमंडपदेवीनांविशेषोयंनिबोधमे।।कोटिहोमे
चतुर्हस्तंचतुरस्रंचसर्वशः।।योनिवक्त्रद्वयोपेतंतदप्याहुस्त्रिमेखलं।।सर्वशःचतुर्हस्तमितिविस्तारायामखातेष्वित्यर्थः।।योनिवक्त्रद्वयोपेतमि
त्येकायोनिःपश्चिमतोन्यादक्षिणतइतिहेमाद्रिः।।वक्त्रंकंठः।।योनिकंठयुतामितिपितामहचरणाः।।वेदिश्चकोटिहोमेस्याद्वितस्तीनांच
तुष्टयं।।चतुरस्रासंमाकृतात्रिभिर्वप्रैःसमावृता।।वप्रमानंमयाप्रोक्तंवेदिकायास्तथोच्छ्रयः।।उक्तमयुतहोमे।।तथाषोडशहस्तःस्यान्मंडप
श्चचतुर्मुखः।।पूर्वद्वारेचसंस्थाप्यबह्वृचंवेदपारगं।।याजुर्वेदंतथायाम्येपश्चिमेसामवेदिनं।।अथर्ववेदिनतद्वदुत्तरेस्थापयेद्बुधः।।अष्टौतु-
होमकाःकार्यावेदवेदांगवेदिनः।।एवंद्वादशतान्विप्रान्वस्त्रमाल्यानुलेपनैः।।पूर्ववत्पूजयेद्भक्त्यासर्वाभरणभूषितैः।।रात्रिसूक्तंचरौद्रंचपा
वमानंसुमंगलं।।पूर्वतोबह्वृचःशांतिंपठन्नास्तउदङ्मुखः।।शाक्रंरौद्रंचसौम्यंचकौष्मांडंशांतिमेवच।।पठत्तुदक्षिणेद्वारियाजुर्वेदिकसु
त्तमं।।सौपर्णमथवैराजमाग्नेयंरौद्रसंहितां।।ज्येष्ठसामतथाशांतिंछंदोगःपश्चिमेपठेत्।।शांतिसूक्तंचतथातथाशाकुनकंशुभं।।पौष्टिकंच

महाराजन्नुत्तरेणाप्यथर्ववित्।।पंचभिःसप्तभिर्वाथहोमःकार्योत्रपूर्ववत्।।स्नानेदानेचमंत्राःस्युस्तएवमुनिसत्तम।। वसोर्द्धाराविधानंतुलक्ष
होमवदिष्यते।।अनेनविधिनायस्तुकोटिहोमंसमाचरेत्।।सर्वान्कामानवाप्नोतिततोविष्णुपदंव्रजेत्।।यःपठेच्छृणुयाद्वापिग्रहशांतित्रयंनरः।।सर्व
पापविशुद्धात्मापदमिंद्रस्यगच्छति।। अश्वमेधसहस्राणिदशवाष्टौचधर्मवित्।।कृत्वायत्फलमाप्नोतिकोटिहोमात्तदश्नुते।।ब्रह्महत्यास
हस्राणिभ्रूणहत्यार्बुदानिच।।नश्यंतिकोटिहोमेनयथावृहद्वभाषितं।। इतिकोटिहोमः ।।अथशतमुखकोटिहोमः।। संवरणउवाच।।बहुत्वा
त्कर्मणोब्रह्मन्कोटिहोमःसुदुष्करः।।कालेनमहताचैवकर्त्तुंशक्यःकथंचन।।नियमाब्रह्मचर्याद्याद्दुष्कराइतिमेमतिः।।निरोधोब्राह्मणानांचभूश
य्यादिसुदुष्करं।।कार्याणामलघीयस्त्वात्सर्वकालाद्यपेक्षया।।एतद्विज्ञायतंब्रह्मन्सर्वशास्त्रेषुपठ्यते।।कोटिहोमस्यसंक्षेपंवदमेब्रह्मसंभव
सनत्कुमारउवाच।। शताननोदशमुखोद्विमुखैकमुखस्तथा।।चतुर्विधोमहाराजकोटिहोमोविधीयते।।कार्यस्यगुरुतांज्ञात्वानैकत्यमथपर्व
णः।।यथासंक्षेपतःकार्यःकोटिहोमस्तथाशृणु।।कृत्वाकुंडशतंदिव्यंयथोक्तंमानसंमितं।।एकैकस्मिंस्तथाकुंडेदशविप्रान्नियोजयेत्।।सद्यःपक्षेतुविप्रा
णांसहस्रंपरिकीर्त्तितं।।एकस्थानप्रणीतेग्नौसर्वतःपरिभाविते।।एकस्थानात्सर्वतःसर्वतःसर्वस्मिन्कुंडेपरिभावितेसंस्कृतेग्नौप्रणीतइत्यर्थः
।।होमंकुर्युर्द्विजाःसर्वेकुंडेकुंडेयथोदितं।।यथाकुंडबहुत्वेपिराजसूयेमहाक्रतौ।।नचाप्यग्निबहुत्वंस्यान्नचयज्ञादिभिद्यते।।तथाकुंडश
तेप्यत्रघृतार्चिर्विनियोजिते।।एकएवभवेद्यज्ञःकोटिहोमोनसंशयः।।एवंयैःक्रियतेक्षिप्रंव्याकुलैःकार्यगौरवात्।।शताननःसविज्ञेयःकोटिहोमो।

नसंशयः॥स्वल्पैरहोभिःकार्यंस्याद्दीर्घकालादिकेपिवा॥तदादशमुखःकार्यःकोटिहोमःशुभेमते॥ विप्राणांद्विशतेतत्रप्रविभज्यनियोजयेत्॥ तेपिविज्ञातशीलाःस्युर्वृत्तवंतोजितेंद्रियाः॥यत्रकुंडद्वयंकृत्वाविभज्यचविभावसुं॥होमंकुर्युर्द्विजाभूयःसंस्कृत्यविधिपूर्वकम्॥ शतंतत्रनियोज्यंचविप्राणांप्रविभज्यवै॥मासेऽथवाऽर्द्धमासेवाकार्यःकालेह्युपस्थिते॥तदापिद्विमुखःकार्यःकोटिहोमोविचक्षणैः॥ तदनुस्वेच्छयायज्ञंयजमानःसमापयेत्॥कालेनबहुनाराजंस्तदाचैकमुखोभवेत्॥एककुंडस्थितोवन्हिरेकचित्तैःसमाहितैः॥यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्विचक्षणैः॥ नसंख्यानियमश्चात्रब्राह्मणानांनरोत्तम॥नकालनियमश्चैव स्वेच्छायज्ञःसउच्यते॥आवृत्त्याकर्त्तुकामस्यचातुर्मास्यादिकर्मवत्॥तदाप्रसक्तःकर्त्तव्योयज्ञोयंसर्वकामिकः॥अयमेकमुखोराजन् कालेनबहुनाभवेत्॥बहुविघ्नश्चकालोवैतस्मात्संक्षेपमाचरेत्॥यतोवैवित्तमायुश्चवित्तंचैवाऽस्थिरंसदा॥अतःसंक्षेपतःकार्यंधर्मकार्यंप्रशस्यते॥ततःसमासेयज्ञेतुकारयेत्सुमहोत्सवं॥शंखतूर्य्यनिनादेनब्रह्मघोषरवेणच॥ततस्तुपूजयेद्विप्रान्ऋत्विजःश्रद्धयान्वितः॥एकैकंकनकैश्चैवकुंडलैर्विविधैर्नृप॥गोशतंचैवदातव्यमश्वानांचशतंतथा॥सहस्रंतुसुवर्णस्यसर्वेषामपिदापयेत्॥ग्रामैर्गजैरथैरश्वैःपूजयेच्चपुरोहितं॥दीनांधकृपणान्सर्वान्वस्त्रान्नैश्चापिपूजयेत्॥ ततश्चावभृथेस्नायात्तैर्घटैःपूर्वकल्पितैः॥ लक्षहोमोक्तमंत्रेणसदाविजयकारिणा॥ एवंसमापयेद्यस्तुकोटिहोममखंशुभम्॥तस्यारोग्यंप्रियाःपुत्राआयुर्वृद्धिस्तथैवच॥सर्वपापक्षयश्चैवजायतेनृपसत्तम॥अनावृष्टिभयंचैवउत्पातभयमेवच॥दुर्भिक्षग्रहपीडाश्चप्रशमंयांतिभूतले॥एत

त्पुण्यंपापहरंसर्वकामफलप्रदं॥सनत्कुमारमुनिनापार्थिवायनिवेदितं॥सर्वोपसर्गशमनंभवनाशनंवायेकारयंतिमनुजानृपकोटिहोमं॥भोगानवाप्यमनसोभिमतान्प्रकामंतेयांतिशक्रसदनंभुविशक्रतुल्याः॥अथयद्येतेसाहस्राःसाद्यस्काइत्येकसंज्ञयोपक्रांतेषुक्रमान्नातेषुचनिकायिसंज्ञकेषुयागेषुप्रथमस्याम्नातधर्मकस्यधर्माउत्तरेष्वनाम्नातधर्मकेषुनिकायित्वावांतरसामान्यात्साहस्रसाद्यस्काद्येकनामकत्वात्प्रवर्त्ततइत्यष्टमेनिकायिनांतुपूर्वस्योत्तरेषुप्रवृत्तिःस्यादित्यत्रनिरणायि॥तथेहचतुर्विधोमहाराजकोटिहोमइतिचतुर्णांकोटिहोमनामत्वावांतरसामान्येनसधर्मकस्यैकमुखस्यधर्माअनाम्नातधर्मकेषुद्विमुखादिषुप्रवर्त्तंतेतेनतेषांविकृतित्वं॥तत्राद्विमुखेतावत्कुंडद्वयंप्रकृतिप्राप्तेषुशतपंचाशत्पंचविंशतिहस्तमंडपेषुमध्यमनवमांशेकार्यंतस्यैवमध्यमेनवमांशेतुकुंडंकुर्याद्विचक्षणइतिप्रकृतौवचनेनात्रापितथाप्राप्तेः॥तत्रकुंडद्वयेषट्हस्तं॥दशलक्षमितेहोमेषट्करंसंप्रचक्षतइतिभविष्यत्पुराणात्॥पंचहस्तंवा॥कुंडंपंचकरंप्रोक्तंदशलक्षाहुतौक्रमादितितत्वांतरशास्त्रा॥दशलक्षोत्तरमेकोनकोटिपर्यंतंपंचषट्करेइत्यर्थः॥अयुतहोमतःप्राप्तंएकहस्तत्वंप्राकृतंपरिमाणंत्वादृष्टार्थत्वापत्याऽप्राकृतकार्यत्वाद्बाध्यते॥अर्थात्परिमाणमितिकात्यायनोक्तेश्च॥तत्रपंचविंशतिहस्तेमंडपेमध्यनवांशेदक्षिणस्योत्तरयोःकुंडद्वयंनिविशते॥कथंचित्प्रकृतितोद्वादशांगुलमेखलाप्राप्तेः॥इतरयोस्तुमंडपयोःसुगमएवनिवेशः॥एवंदशमुखेपिप्राकृतैकहस्तत्वबाधेनपंचकराणिषट्कराणिवादशकुंडानि॥तेषुप्रत्येकंदशलक्षाआहुतयः॥तत्रपंचविंशतिहस्तेमंडपेमध्यमांशेषुपूर्वादिषुचतुर्षुदिक्षुमध्येसंलग्नानि-

चत्वारिकुंडानि॥प्राकृतमध्यमांशाधिकरणत्वस्ययावत्संभवमनुग्रहस्यान्याय्यत्वात्॥प्राचिनवमांशेतुप्राकृताचतुःकरावेदी॥सप्तस्वंशेषुषट्कुंडानियःकश्चिदेकोंशस्तुरिक्तएव॥कुंडद्वयंमध्यमांशे॥अष्टस्वंशेष्वष्टाविंशतिकेचित्॥शतमुखेपिपंचविंशतिमध्येतावन्मंडपेशतकुंडानिवेशोबाधितएव॥पंचाशद्धस्तेयद्यपिसंभवतितथापिसहस्रविप्राणांसुखेननिवेशोबाधितः॥अतःशतहस्तएवनिवेशउच्यते॥तत्रमध्यमांशेप्राग्भागेउदक्संस्थापंचानामेकापंक्तिः॥तेषांचकुंडानांप्रत्येकमंतरंसार्द्धसप्तहस्ताःसप्तांगुलानिच॥ततःप्रतीच्यामेतादृशमेवान्यत्पंक्तित्रयंकार्यं॥पंक्तीनामंतरंचाष्टौहस्ताः॥सप्तांगुलानिच॥एवंविंशतिकुंडानिमध्यभागेअन्येष्वष्टसुभागेषुमध्येद्वेद्वेऽष्टसुदिक्ष्वष्टावष्टाविति॥प्रत्येकंदशदशेति॥ननुशतकुंडेषुप्रत्येकंलक्षाहुतिप्राप्तिः॥नचैतत्सद्यःकोटिहोमपक्षेसंभवति॥कृत्वाकुंडशतंदिव्यंयथोक्तंहस्तसंमितमितिशतमुखप्रकरणेकुंडानांहस्तपरिमाणोक्तेरितिचेत्तत्रकेचित्हस्तसंमितमित्यत्रहस्ताभ्यांहस्तैर्वासंमितमितिविग्रहेणत्रिचतुर्हस्ततापियुज्यते॥द्विहस्तेपितुलक्षमाहुतयःसंभवंत्येव॥अतएवहेमाद्रौ॥अयुतेत्वथहोतव्येकुंडंस्याद्धस्तमात्रकं॥द्विगुणंलक्षहोमेतुकोटिहोमेचतुर्गुणमिति॥यद्यप्यौत्सर्गिकएकवचनांतेनैवविग्रहस्तथाप्यनुपपत्त्याद्विबहुवचनांतेनापिक्रियते॥यथासप्तदशप्राजापत्यान्पशूनालभतइत्यत्रचोदकप्राप्तेकपशुनिष्पन्नहृदयाद्येकादशावदानगणानुरोधेनप्रजापतिर्देवतायस्यासौप्राजापत्यःप्राजापत्यश्चप्राजापत्यश्चप्राजापत्यइतिकृत्तद्धितानामेकशेषएवयागेनतु अयंवापंचैकइत्येकशेषोत्तरंतद्धितंचोदकबाधापत्तेरित्युक्तं॥एवंद्विचतुर्हस्तकुंडसंपत्यायुज्यंतएकैकस्मिन्कुंडेलक्षमाहुतयइत्याहुः

तातचरणास्तु॥ व्यासतुल्यखातेनषट्पंचचतुस्त्रिशद्व्यंगुलानांपंचमेखलानांविंशत्यंगुलोच्चतयाचमध्यावकाशविहध्या एकैकहस्तेष्वपिशक्त्या एवलक्षमाहुतयः कर्त्तुं॥ अनारभ्याम्नातपंचमेखलापक्षेणप्राकृतमेखलात्रयबाधस्तूपदिष्टैकहस्तत्वानुरोधेनेतियुक्तमाहुः॥ अत्रैकस्मिन्कुंडे आज्यभागांतंकृत्वाऽन्यकुंडेष्वग्निप्रणयनमितिकेचित्॥ तन्न॥ वरुणप्राघासिकदक्षिणोत्तरवेद्योरनुष्ठीयमानायामाहुत्यामाग्नेयाद्यष्टहविष्कुवाघाराज्यभागप्रयाजाद्यंगानांपृथगनुष्ठानवदाज्यभागांतंस्विष्टकृदाद्यंगानुष्ठानवदिहापितिस्रआहुतीतिवत्संख्ययाभिन्नेषुकोटिसंख्याकेषुहोमेषुलक्षशः शतकुंडेष्वनुष्ठीयमानेष्वाज्यभागांतस्विष्टकृदाद्यंगानुष्ठानभेदस्यैवन्याय्यत्वात्॥ किंचअप्रमादार्थेन दीक्षाकालीनजागरणेनदीक्षोपयुक्तसंभारसंरक्षणेपिप्रायणीयाद्यर्थसंभारसंरक्षणार्थातिदेशिकजागरणावृत्तिवदिहाप्यग्निसमिंधनार्थेध्माधानावृत्तिःकथमप्यनिवार्यैव॥ नहिआचार्यकुंडस्थेग्नौसमिन्द्धेकुंडांतरस्थानांसमिंधनंभवति॥ अतएवायुतहोमेपूर्वलिखितंतत्तद्गृह्यकारवन्नकुंडीपक्षेप्रधानायतनादग्निंविभज्य आचार्यकुंडेषुप्रणीयनवाचार्याआज्यभागांतंकृत्वेत्यादिनाहोमशेषसमाप्यपूर्णाहुतीर्हुत्वेत्यंतेनाज्यभागांतानांस्विष्टकृदादीनांचांगानामावृत्तिलिखनप्रयोगपारिजातीयंसंगच्छतेतदेवचकोटिहोमेचोदकात्प्राप्तं॥ प्राकृताष्टसंख्याबाधेननवतिसंख्यामात्रंविधीयते॥ यद्यपिप्रणयनांतरंतथापितद्धर्मकमेवंसर्वथांगानामावृत्तिरेवएतावान्विशेषःशतसंख्ययाकुंडेषुनवसंख्याग्रहाद्याकारास्थलविशेषाश्चनिवर्त्तंते॥ अतोग्निस्थापनोत्तरमेवप्रणयनं॥ यत्तुपारिजातेमध्यकुंडात्प्रणयनमुक्तं॥ तन्नप्रागुद

गपवर्गेप्रचारबाधात्॥ तेनतत्संरक्षणार्थंनैर्ऋत्यकुंडादेवप्रणयनंकार्य्यं॥ अस्तुवाकथंनिद्युतहोमेमध्यकुंडसद्भावात्तस्यचसर्वप्रधानभूतसूर्यदेवत्यत्वात्कथंचित्ततःप्रणयनशतसुखेतुमध्येकुंडनिवेशावान्नततोग्निप्रणयनंमध्यस्थलसमीपवर्त्तिष्वनेककुंडेषुतुविनिगमनाविरहः॥ सर्वोप्ययंकोटिहोमविचारस्तातच्चरणैर्द्वैतनिर्णयेसुविस्तृतइतिनेहविस्तरः॥ अथप्रायोमात्स्यानुसारिणींभट्टकृतांपद्धतिमनुसृत्यग्रहमखप्रयोगः॥ कर्त्ताप्रारंभदिनात्पूर्वंसुदिनेदानमयूखीयास्मदुक्तप्रकाराणामन्यतमप्रकारेणप्राचींसंसाध्यतत्रवितस्त्युच्छ्रायंमंडपनिवेशयोग्यंचतुरस्रंचत्वरंकृत्वापूर्वाण्हेदेशकालौस्मृत्वाऽमुककर्मकर्त्तुंमंडपंकरिष्यइतिसंकल्प्यगणेशंकूर्मंशेषंवास्तुक्षितिंद्विजांश्चसंपूज्य आगच्छसर्वकल्याणिवसुधेलोकधारिणि॥ उद्धृतासिवराहेणसशैलवनकानना॥ मंडपंकारयाम्यद्यत्वदूर्ध्वंशुभलक्षणं॥ गृहाणार्घ्यंमयादत्तप्रसन्नाशुभदाभवेति वसुधायाअर्घ्यंदत्वास्योनापृथिवीतितांप्रार्थ्यमंडपंतदुदीच्यांमध्येवाकुंडंवेदिंचकुर्यात्॥ मंडपश्चायुतहोमेष्टहस्तोदशहस्तोवाकुंडहस्तमितंचतुरंगुलैकमेखलंवेदीमंडपोत्तरभागेहस्तविस्तृतावितस्त्युच्छ्रितावप्रत्रयवतीकार्या॥ तत्रप्रथमोवप्रस्त्र्यंगुलोच्छ्रायः॥ तदुपरितनौप्रत्येकंद्व्यंगुलोच्छ्रितौ॥ विस्तारस्तुसर्वेषामपिप्रत्येकंत्र्यंगुलः॥ लक्षहोमेतुमंडपोद्वादशचतुर्द्दशषोडशहस्तोपिकुंडंक्षेत्रफलतश्चतुःकरं॥ तदेवव्यासतोद्विकरं॥ द्वित्रिचतुरंगुलोच्चत्रिमेखलं॥ तत्रोपरितनीचतुरंगुलविस्तारा अधोगतेद्वे अपिप्रत्येकंद्व्यंगुलविस्तारे॥ कुंडादीशान्यांसार्द्धहस्तविस्तृतातदर्धोच्छ्रितेशानप्रवणापूर्ववत्त्रिवप्रावेदी॥ कोटिहोमेतुशततदर्द्धतदर्द्धषोडशान्यतमहस्तोमंडपःकुंडंतु अष्टहस्तंदशहस्तंषोडश

हस्तंवाफलतः॥तच्चव्याससमत्वात्तंमंडपमध्येतस्यदक्षिणपश्चिमयोर्योनिहूयं॥वेदींचप्राच्यांद्विहस्तविस्तृतेतिविशेषः॥द्विमुखदशमुखशतमुखेषुतुनिर्णयावसरेसन्निवेशउक्तः॥कर्त्तासुदिनेमासपक्षादिसंकीर्त्यश्रीकामादिर्ग्रहपीडानिवारणकामोऽवायुतहोमंलक्षहोमंवाकरिष्यइतिसंकल्प्य॥गणेशपूजास्वस्तिवाचनमातृपूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात्॥तत्रायुतहोमेचत्वारऋत्विजोद्वौवा॥लक्षहोमेद्वादशाष्टौचत्वारोवा॥कोटिहोमेष्टौहोमार्थेचत्वारोद्वारजापकाइतिद्वादश॥अयुतलक्षकोटिहोमेषुत्रिष्वपिषोडशवा॥ब्रह्माचार्योवर्ण्येतन्मध्यएवसर्वत्र॥वरणमंत्रास्तु॥आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः॥तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत॥यथाचतुर्मुखोब्रह्मास्वर्गलोकेपितामहः॥तथास्मिन्ममयज्ञेत्वंब्रह्माभवद्विजोत्तम॥अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया॥सुप्रसन्नाःप्रकुर्वंतुशांतिकंविधिपूर्वकं॥कोटिहोमेतुगुरुप्रार्थना॥त्वंमेयतःपितामातात्वंगतिस्त्वंपरायणं॥त्वत्प्रसादेनविप्रर्षेसर्वंमेस्यान्मनोगतं॥आपद्विमोक्षायत्वमेकुरुयज्ञमनुत्तमं॥कोटिहोमाख्यमतुलंशांत्यर्थंसार्वकामिकमिति॥ततःसर्वानाचार्यादीन्स्वशाखीयानामृत्विक्शाखीयानांचपदार्थानामनुसमयेनमधुपर्केणसंपूज्यस्रक्कमाल्यांबरानुलेपनैःसपत्नीकऋत्विक्सहितोभद्रंकर्णेभिरितिवेदघोषेणमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविशेत्॥ततआचार्योयदत्रसंस्थितंभूतस्थानमाश्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं॥सर्वेषामविरोधेनब्रह्मकर्मसमारभेइतिसर्षपान्विकीर्यशचीवोहव्येतिएतोन्विंद्रमितिचऋचाभ्यांआपोहिष्ठेत्यादिभिस्त्रभुवंप्रोक्ष्यस्वस्य

यनंतार्क्ष्यमितिऋग्द्वयंपठेत्।।ततोमंडपनिर्ऋतिभागेहस्तमितांवेदींकृत्वातस्यांवस्त्रंप्रसार्यतत्रसुवर्णादिशलाकयानवरेखाः प्राक्पश्चिमायतानवचदक्षिणोत्तरायताःकृत्वामध्यकोष्ठचतुष्टयमेकीकृत्यप्रतिकोणंत्रिषुपदेषुसूत्रंदद्यात्।।तथाचतुर्विंशतिरर्द्धपदानिसंपद्यते।।मंडलस्याग्नेयादिषुकोणेषुशंकुचतुष्टयं।।विशंतुभूतलेनागालोकपालाश्चसर्वतः।।मंडपेत्रावतिष्ठंतुआयुर्बलकराःसदेतिमंत्रेणनिखाय।।अग्निभ्योप्यथसर्पेभ्योयेचान्येतान्समाश्रिताः।।तेभ्योवलिंप्रयच्छामिपुण्यमोदनमुत्तमं।।नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यांयेचराक्षसाः।।बलिंतेभ्यःप्रयच्छामिसर्वेगृह्णंतुमंत्रित।।ओंनमोवायुरक्षेभ्योयेचान्येतान्समाश्रिताः।।बलिंतेभ्यःप्रयच्छामिपुणयमोदनमुत्तमं।।रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतान्समाश्रिताः।।बलिंतेभ्यःप्रयच्छामिगृण्हंतुसततोत्सुकाइतिमंत्रैःशंकुपार्श्वेषुयथाक्रमंप्रतिमंत्रंमाषभक्तबलीन्दत्वा।शांतिर्यशोवतीकांतिर्विशालाप्राणवाहिनीसतीसुमनानंदासुभद्राइतिनवप्रागायतरेखादेवताः पूजयित्वाहिरण्यासुप्रभालक्ष्मीर्विभूतिर्विमलाप्रियाजयाकालाविशोकाइतिनवदक्षिणोत्तरायतरेखादेवताश्चसंपूज्यमध्येव्यस्तसमस्तव्याहृतिभिर्वास्तुपुरुषमावाह्यवास्तोष्पतेप्रतीतिसंपूज्यबलिंचदत्वामध्यपदचतुष्टयेवास्तोर्हृदयेब्रह्माणमावाह्यपूजयित्वाओंब्रह्मणेनमोबलिंसमर्पयामीतिपायसादिबलिंदद्यात् ततः पूर्वपदद्वयेदक्षिणस्तनेऽर्यम्णेनमः।।दक्षिणपदद्वयेजठरदक्षिणभागेविवस्वतेनमः।। पश्चिमपदद्वयेवामभागेमित्राय वामस्तनेपृथ्वीधरायनमइत्युदक्पदद्वये।। आग्नेयकोणसूत्रद्विधाकृतपदद्वयोत्तरार्द्धद्वयेदक्षिणहस्तेसावित्राय ।।दक्षिणार्द्धद्वयेसवित्रेच।।एवंनैर्ऋत्य

पदद्वयपूर्वार्द्धद्वयेवृषणयोर्विबुधाधिपाय।।तत्पश्चिमार्द्धद्वयेउरसिअद्भ्यः दक्षिणार्द्धद्वयेमुखेआपवत्साय।।ततोंत्यपंक्तिगतेईशानपददक्षिणार्द्धेशिरसिशिखिने।।तद्दक्षिणबाहौसूर्याय।।यद्दक्षिणयोर्दक्षिणबाह्वावेवसत्याय।।तद्दक्षिणस्यार्द्धेदक्षिणकूर्परेभृशाय।।तद्दक्षिणप्रबाहौआकाशाय।।तत्पश्चिमार्द्धेदक्षिणप्रबाहावेववायवे।। तत्पश्चिमद्वयेदक्षिणोरौयमाय।।तत्पश्चिमयोर्दक्षिणजानौगंधर्वाय ।।तत्पश्चिमेसार्द्धेपदेदक्षिणजंघायां भृंगराजाय।।तत्पश्चिमेनैरृत्यपदार्द्धेदक्षिणस्फिचिमृगाय।। तदुत्तरार्द्धेपादयोःपितृभ्यः ।। तदुत्तरेसार्द्धपदेवामस्फिचिदौवारिकाय।।तदुत्तरयोर्वामजंघायांसुग्रीवाय्।।तदुत्तरयोर्वामजानौपुष्पदंताय।। तदुत्तरयोर्वामोरौवरुणाय।।तदुत्तरयोर्वामपार्श्वेअसुराय।। तदुत्तरेसार्द्धपदेवामपार्श्वेशोषाय।। तदुत्तरे वायव्यार्द्धेवाममणिबंधेपापाय।।तत्प्रागर्द्धेवामप्रबाहौरोगाय।।तत्प्राक्सार्द्धेवामप्रबाहावेवअहये।।तत्प्राक्द्वयेवामकूर्परेमुख्याय।। तत्प्राक्द्वयेवामबाहौभल्लादाय।।तत्प्राक्द्वयेवामबाहावेवसोमाय।।तत्प्राक्द्वयेवामांसेसर्पाय।।तत्प्राक्सार्द्धेवामश्रोत्रेअदित्यै।।तत्प्रागर्द्धेवामनेत्रेदित्यै।। ततउत्तरे वास्तोष्पतइतिवास्तोष्पतये।।ततोमंडलाद्बहिरीशानादिषुचरक्यै विदार्य्यैपूतनायै।।पापराक्षस्यै।।ततःपूर्वादिषुस्कंदायअर्यम्णे।।जृंभकायपिलिपिच्छाय।।पुनःपूर्वादिषुइंद्रादीन्।। ततोमंडलादीशानेकलशंसंस्थाप्य तत्रवरुणतत्त्वायामीत्यावाह्यपूजयेत्।।यथामेरुगिरेःशृंगंदेवानामालयःसदा।।तथाब्रह्मादिदेवानांममयज्ञेस्थिरोभवेतिप्रार्थयेदिति।। ततउदुंबरादिसमित्तिलाज्यैःस्वतंत्रस्थंडिलेष्टाविंशतिरष्टौवाप्रत्येकंतत्तन्नाममंत्रैर्हुत्वा वास्तोष्पतइतिचतुर्भिश्चहुत्वा ओंवास्तोष्पतयेइतिमं

त्रेणपंचबिल्वफलानिहुत्वास्विष्टकृदादिपूर्णाहुत्यंतंकुर्यात्॥ ततोमंडलदेवताभ्यःपायसबलिंदत्वाकृणुष्वपाजइतिसूक्तादिनामंडपंत्रिसूत्र्या
वेष्टयित्वावास्तुकलशेनयजमानमभिषिन्च्यपुनःसंपूज्ययथाशक्तिदक्षिणांदत्वाब्राह्मणान्भोजयेदिति॥ शारदातिलकेतुहोमोनोक्तः॥ तिला-
ज्यादिद्रव्याणांविकल्पइतिग्रंथांतरे॥ इतिवास्तुपूजा ॥मात्स्ये॥ उपोषितास्ततःसर्वेकृत्वैवमधिवासनमिति॥ पाद्मे॥ उपवासीभवेदेवमशक्तोनक्त
मिष्यतइति॥ सद्योधिवासनंचाथकुर्याद्योविकल्पोनरइतितत्रैवोक्तं॥ अधिवासनंचैवंतत्रद्वारपूजा ॥ पूर्वद्वारेद्वारश्रियेनमः॥ ऊर्ध्वेदेहल्यै अ
धः वामदक्षिणस्तंभयोर्गणेशायस्कंदायनमः॥ द्वारस्थितकलशद्वयेगंगायैयमुनायै॥ दक्षिणद्वारेद्वारश्रियैनमः॥ ऊर्ध्वेदेहल्यै॥ अधःस्तंभ
योःपुष्पदंताय॰ कपर्दिने॰॥ कलशद्वयेगोदावर्य्यैकृष्णायैइति॥ पश्चिमेद्वारश्रियै॥ ऊर्ध्वेदेहल्यै॥ अधःस्तंभयोर्नंदिने॥ चंडायनमः॥ कलश
द्वयेरेवायै॥ ताप्त्यै॥ उत्तरेद्वारश्रियै॥ ऊर्ध्वेदेहल्यैअधःस्तंभयोर्महाकालायनमः॥ भृंगिणेनमः॥ कलशद्वयेवाण्यैवेण्यै॥ इतिद्वारपूजा
॥अथतोरणपूजा॥ तत्रपूर्वेबहिर्हस्तमात्रेवटतोरणमाश्वत्थंवासुहृदनामकंसुशोभननामकंवाशंखांकितमग्निमीळेइतिमंत्रेणन्यस्यसं
पूज्यराहुबृहस्पतीतत्रन्यसेत्पूजयेच्च॥ तत्रैकःकलशःस्थाप्यः॥ तत्रमहीद्यौरिति भूप्रार्थना॥ ओषधयःसमितियवप्रक्षेपः॥ आकलशेष्वि
तिकलशनिधानं॥ इमंमेगंगइतिजलपूरणं॥ गंधद्वारामितिगंधंप्रक्षिपेत्॥ या ओषधीरिति सर्वौषधीः॥ ओषधयःसमितियवान्॥ कांडात्कां
डादितिदूर्वाः॥ अश्वत्थेवइतिपंचपल्लवान्॥ स्योनापृथिवीतिपंचमृदः॥ याःफलिनीरितिफलं॥ सहिरत्नानीतिपंचरत्नानि॥ हिरण्यरूपइतिहि

रण्यं॥युवासुवासाइतिवस्त्रादिनावेष्टयेत्॥पूर्णादर्वीतिपूर्णपात्रमुपरिनिदध्यात्॥तत्रध्रुवावाहनंपूजनंच॥ततोदक्षिणेऔदुंबरंप्लाक्षंवासुभद्रंविकटंवाचक्रांकिततोरणमिषेत्वोर्ज्जेत्वेतिनिधाय॥ चंदनादिचर्चितंकृत्वासूर्यंमंगारकंचतत्रन्यसेत्॥ततःपूर्ववत्कलशंस्थापयित्वातत्रधरामावाह्यपूजयेत्॥ततःपश्चिमेप्लाक्षमौदुंबरंवासुकर्मसुभीमंवागदांकितंतोरणमग्नआयाहीतिन्यस्यसपूज्यचंदनादिचर्चितंकृत्वाशुक्रंबुधंचतत्रन्यसेत्॥ततःपूर्ववत्कलशंस्थापयित्वातत्रवाक्पत्यावाहनपूजनादि॥ततउत्तरेन्यग्रोधमाश्वत्थंपालाशंवासुहोत्रंसुप्रभंवापद्मांकिततोरणंशन्नोदेवीरितिनिधायपूजितंकृत्वासोमंकेतुंशनिंचतत्रन्येत्॥ततःकलशंस्थापयित्वातत्रविघ्नेशावाहनपूजनादि॥ततःपूर्वद्वारशाखाद्वयेकलशद्वयंदध्यक्षतादियुक्तंपूर्ववत्स्थापयेत्॥ऐरावतंकलशद्वयेन्यस्यार्चयेत्॥तत्रपूर्वस्मिन्नृग्वेदिनावृत्विजौद्वौ।एकंवाशांतिसूक्तजपार्थंत्वेनत्वामहंवृणइतिप्रत्येकमृग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः॥अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिवृत्वाग्निमीळइतिपूजयेत्॥एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश॥संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते॥भोइंद्रइहागच्छइहतिष्ठेतींद्रंसांगंसपरिवारंसायुधंसशक्तिकंद्वारकलशेआवाह्यत्रातारमिंद्रमितिपूजयित्वाशुःशिशानइतिपीतांपताकांपीतंध्वजंचोच्छ्रयेत्॥ततऐरावतस्थंपीतवर्णंसहस्राक्षंदक्षिणवामहस्तस्थवज्रोत्सलमिंद्रंध्यात्वा॥इंद्रःसुरपतिःश्रेष्ठोवज्रहस्तोमहाबलः॥शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमइतिनत्वाइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥त

तआचम्याग्नेयकोणेपूर्ववत्कलशंस्थापयित्वातत्रपुंडरीकममृतंचसंपूज्यएह्येहिसर्वामरहव्यवाहमुनिप्रवर्य्यैरभितोभिजुष्ट।।तेजोवतालोकग
णेनसार्द्धंममाध्वरंपाहिकवेनमस्ते।।भोअग्नेइहागच्छेहतिष्ठेतिसांगादिकमग्निंकलशेआवाह्यत्वन्नोअग्नेत्यग्निंसंपूज्याग्निंदूतमितिरक्तांपता
कांरक्तंध्वजंचोच्छ्रयेत्।।ततःछागस्थंरक्तंदक्षिणवामकरधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा।।आग्नेयःपुरुषोरक्तःसर्वदेवमयो
व्ययः।।धूमकेतूरजोध्यक्षस्तस्मैनित्यंनमोनमइतिनत्वा।।अग्नयेसांगायएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।।ततःकृताचमनोदक्षिणेग
त्वाप्रतिद्वारेशाखंपूर्ववत्कलशद्वयंस्थापयित्वावामनंदिग्गजंतत्रार्चयेत्।।ततोयजुर्वेदिनोद्वावेकंवादक्षिणद्वारेशांतिसूक्तजपार्थंत्वेनत्वामहंवृणइ
त्युक्त्वा।।कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदैवतः।।काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंसंप्रार्थ्येषेत्वोर्ज्जेत्वेतिपूजयेत्।।ततः।।एह्ये
हिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्त्ते।।शुभाशुभानंदशुचामधीशशिवायनःपाहिमखंनमस्ते।।भोयमइहागच्छेहतिष्ठेतिसांगादिंय
ममावाह्ययमायसोममितिसंपूज्यकृष्णांपताकांकृष्णंध्वजंचायंगौरित्युच्छ्रयेत्।।ततोमहिषारूढंधृतदंडपाशंदक्षिणवामकरमंजनपर्वत
तुल्यरूपमग्निसमलोचनंयमंध्यात्वा।।महामहिषमारूढंदंडहस्तंमहाबलं।।आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिनत्वासांगाययमा
यैतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।।ततआचम्यनैर्ऋत्यांपूर्ववत्कलशंस्थापयित्वाकुमुद्गजंदुर्ज्जयंचसंपूज्य।।एह्येहिरक्षोगणना
यकस्त्वंविशालवेतालपिशाचसंघैः।।ममाध्वरंपाहिपिशाचनाथलोकेश्वरस्त्वंभगवन्नमस्ते।।भोनिर्ऋतेइहागच्छेहतिष्ठेतिसांगमावाह्यासु

न्वंतमितिसंपूज्यनीलांपताकांध्वजंचमोषुणइत्युच्छ्रित्य।। नरारूढखड्गहस्तंनीलवर्णंमहाबलंमहाकायंबहुराक्षससंयुतंनिर्ऋतिंध्यात्वा।। निर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं।। आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिनत्वासांगायनिर्ऋतयेएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।। ततआचम्यपश्चिमेप्रतिद्वारशाखंकलशद्वयंनिधायाजगदिग्गजंन्यस्यार्चयेत्।। ततःसामगाद्वृत्विजाद्वृत्विजंवावृत्वा।। सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः।। भारद्वाजस्तुविप्रेंद्रशांतिपाठमखेकुर्विति प्रार्थ्याऽग्नआयाहीति पूजयित्वातत एह्येहियादोगणवारिधीनांगणेनपर्जन्यसहाप्सरोभिः।। विद्याधरेंद्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते।। इत्युक्त्वाभोवरुणेहागच्छेहतिष्ठेतिसांगंवरुणमावाह्यतत्त्वायामीतिसंपूज्यश्वेतांपताकांध्वजंचेमंमेवरुणेत्युच्छ्रित्य।। मकरस्थंपाशहस्तंकिरीटिनंश्वेतवर्णंवरुणंध्यात्वा।। पाशहस्तंचवरुणमर्णसांपतिमीश्वरं।। आवाहयामियज्ञेस्मिन्वरुणायनमोनमइतिनत्वासांगायवरुणायैतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।। ततोपउपस्पृश्यवायव्यांपूर्ववत्कलशंस्थापयित्वापुष्पदंतंसिद्धार्थंचतत्रपूजयित्वा।। एह्येहियज्ञेममरक्षणायमृगाधिरूढःसहसिद्धसंघैः।। प्राणाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते।। भोवायोइहागच्छेहतिष्ठेतिसांगंवायुमावाह्यतववायवृहस्पतइतिसंपूज्यवायोशतंमितिधूम्रांपताकांध्वजंचोच्छ्रित्यमृगारूढंचित्रांबरधरंयुवानंवरध्वजधरंदक्षिणवामहस्तंवायुंध्यात्वा।। वायुमाकाशगंचैवपवनंवेगवद्गतिं।। आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां।। अनाकारोमहौजाश्चयश्चादृष्टगतिर्दिवि।। तस्मैपूज्यायजगतोवायवेहंनमामितइतिनत्वासांगायवायवेएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।।

ततआचम्योत्तरेप्रतिद्वारशाखंकलशद्वयंसंस्थापयित्वासार्वभौमंदिग्गजंन्यस्यपूजयित्वाऽथर्ववेदात्विजावुत्तरद्वारेशांतिसूक्तजपार्थंत्वेनाहंवृणइत्यु
क्त्वा॥ बृहन्नेत्रोऽथर्ववेदोनुष्टुभोरुद्रदैवतः॥ वैशंपायनविप्रेंद्रशांतिपाठमखेकुर्वितिप्रार्थ्यशन्नोदेवीरितिपूजयेत्॥ एह्येहियज्ञेश्वरयज्ञरक्षांवि
धत्स्वनक्षत्रगणेनसार्द्धं॥ सर्वौषधीभिःपितृभिःसहैवगृहाणपूजांभगवन्नमस्ते॥ भोसोमइहागच्छइहतिष्ठेतिसांगंसोममावाह्यवयंसोमेतिसंपू
ज्यहरितांपताकांध्वजंचाप्यायस्वेतिन्यस्य॥ नरपुष्पकविमानस्थंकुंडलहारकेयूरसंशोभितंवरदगदाधरदक्षिणवामहस्तंमुकुटिनंमहोदरंस्थूलका
यंह्रस्वंपिंगलनेत्रंपीतविग्रहंशिवंसर्वायंसोमंध्यात्वा॥ सर्वनक्षत्रमध्येतुसोमोराजाव्यवस्थितः॥ तस्मैसोमायदेवायनक्षत्रपतयेनमइतिनत्वासांगा
यसोमायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ ततईशान्यांगत्वाचम्यपूर्ववत्कलशंस्थापयित्वासुप्रतीकनामानंदिग्गजंमंगलंचतत्रपूजयित्वाए
ह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगधरेणसार्द्धं॥ लोकेनयज्ञेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते ईशानेहागच्छेहतिष्ठेतितमावाह्य
तमीशानमितिसंपूज्यश्वेतांसर्ववर्णांवापताकांध्वजंचाभित्वादेवसवितरित्युच्छ्रित्यवृषारूढंवरदत्रिशूलयुतदक्षिणवामहस्तद्वयंत्रिनेत्रंस्फटि
कवर्णमीशानंध्यात्वा॥ वृषस्कंधसमारूढंशूलहस्तंत्रिलोचनं॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां॥ सर्वाधिपोमहादेवईशानःशुक्लईश्वरः
॥ शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमइतिनत्वासांगायेशानायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ ततआचम्येशानपूर्वयोर्मध्ये
गत्वा॥ एह्येहिपातालधरामरेंद्रनागांगनाकिंनरगीयमान॥ यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयं॥ भोअनंतइहागच्छेहतिष्ठेतिसां

गमनंतमावाह्यायंगौरिरितिसंपूज्यमेघवर्णांश्वेतांवापताकांध्वजंचायंगौरित्युच्छ्रित्य अनंतंशयनासीनंफणसप्तकमंडितं॥पद्मशंखधरोर्ध्वाधोदक्षिणकरद्वयंचक्रगदाधरोर्ध्वाधोवामकरद्वयंनीलवर्णमनंतंध्यात्वा॥योसावनंतरूपेणब्रह्मांडंसचराचरं॥पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमइतिनत्वासांगायाऽनंतायैतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्यनैऋत्यपश्चिमयोर्मध्येगत्वा एत्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्द्धंपितृदेवताभिः॥सर्वस्यधाताऽस्यऽमितप्रभावोविश्वाध्वरंनःसततंशिवाय॥भोब्रह्मन्निहागच्छेहतिष्ठेतिब्रह्माणमावाह्यब्रह्मजज्ञानमितिसंपूज्यरक्तांपताकांध्वजंचब्रह्मजज्ञानमित्युच्छ्रित्यचतुर्मुखंहंसारूढमक्षमालांकुशमुष्टिधरोर्ध्वाधोदक्षिणकरद्वयंस्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयंश्मश्रुलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्यात्वा॥पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः॥यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमइतिनत्वासांगायब्रह्मणेएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥नैऋत्यपश्चिमांतरालेऽनंतबलिदानमीशानपूर्वांतरालेब्रह्मबलिदानंचेतिरूपनारायणः॥ततआचम्यमंडपमध्येऽसुच्चदंडोदशहस्तदीर्घस्त्रिहस्तविस्तृतःपंचहस्तविस्तारोवामहाध्वजःकिंकिण्यादियुक्तस्सइंद्रस्यवृक्षइतिस्थाप्यः॥तत्रैवब्रह्मपूजनं॥ततोमंडपषोडशस्तंभेषुसर्वेभ्योदेवेभ्योनमः॥वंशेषुकिंनरेभ्योनमः॥पृष्ठेपन्नगेभ्योनमइत्यर्चयेत्॥ततःपूर्वभागेउपलिप्तभूमावुपविश्यत्रैलोक्येयानिभूतानिस्थावराणिचराणिच॥ब्रह्माविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिमे॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेवमातरएवच॥सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः॥ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालगणैःसह॥

रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतइतिपठित्वा त्रैलोक्यस्थेभ्यः स्थावरेभ्योभूतेभ्योनमस्त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्योनमः॥ब्रह्मणेविष्णवे
शिवायदेवेभ्योदानवेभ्योगंधर्वेभ्योराक्षसेभ्यः पन्नगेभ्यऋषिभ्योमनुष्येभ्योगोभ्योदेवमातृभ्योनमइतिप्रत्येकंसंपूज्य भूमौमाषभक्तबलिंदद्या
त्॥ ततोयजमानःसर्वैर्ऋत्विग्भिः सहप्राग्द्वारेणमंडपंप्रविश्य दक्षिणद्वारपश्चिमदेशेउपविश्यगुर्वादयोयथाविहितंकर्मकुरुध्वमितिवदेत्
॥ प्रतिकुंडमेकैकः कलशऋत्विग्भिःस्थाप्यइतिकेचित्॥गुरुणास्थाप्यइत्यन्ये॥ ततोऋग्वेदादिक्रमात्प्रागादिकुंडेषुऋत्विजोऽग्निंस्थापये
युः॥ ततोगुरुर्यजमानान्वितोग्रहवेद्यांसर्वतोभद्रेमंडलदेवताःस्थापयेदितिपितामहचरणाः॥ यथा॥ अद्येहेत्यादिमंडलदेवतास्थापनंकरिष्य
इतिसंकल्प्यस्थापयेत्॥ तत्रमध्येब्रह्माणं॥ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्स्थापनेपूजनेचविनियोगः॥एवमुत्तरत्र॥ ओंब्रह्म
जज्ञानं॥ततउदीचीमारभ्यवायव्यपर्यंतंकुबेरादीन्वाय्वंतानष्टौलोकपालान्तत्राप्यायस्वगौतमःसोमोगायत्री॥ ओंआप्यायस्व२॥अभित्वा
जीगर्त्तःशुनःशेपईशानोगायत्री॥ ओंअभित्वादेवसवितः३॥इंद्रंवोमधुछंदोइंद्रोगायत्री॥ ओंइंद्रंवोपश्यत४॥ अग्निंकाण्वोमेधातिथिरग्नि
र्गायत्री॥ ओंअग्निंदूतंवृणीमहे५॥ यमायसोमंयमोयमोनुष्टुप्॥ ओंयमायसोमं६॥ मोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री॥ ओंमोषुणः
७॥ ओंतत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्॥ओंतत्वायामि८॥ वायोशतंगौतमोवामदेवोवायुरनुष्टुप्॥ओंवायोशतं९॥वायुसोम
मध्येऽष्टौवसून् ज्मयाअत्रमैत्रावरुणोवशिष्ठोवसवस्त्रिष्टुप्॥ओंज्मयाअत्र१०॥सोमेशानमध्येएकादशरुद्रान्॥आरुद्रासःश्यावाश्वएकादश

रुद्राजगती॥ ओंआरुद्रासः॥११॥ ईशानेंद्रमध्येद्वादशादित्यान्॥ त्यान्नुसांमदोमत्स्योद्वादशादित्यागायत्री॥ ओंत्यान्नुक्षत्रियान्॥१२॥ इंद्राग्नि
मध्येश्विनाराहूगणोगोतमोश्विनावुष्णिक्॥ ओंअश्विनावर्त्तिः॥१३॥ अग्नियममध्येविश्वेदेवान्सपेतृकान्॥ ओंमासोमभुछंदांसिविश्वेदेवा
गायत्री॥ ओंमासः॥१४॥ यमनिर्ऋतिमध्येसप्तयक्षान्॥ अभित्यंवामदेवःसप्तयक्षाःप्रकृतिः॥ अभित्यंदेवंसवितारमोण्योःकविक्रतुमर्चाभिसत्य
सवंरत्नधामाभिप्रियंमतिंकविं॥ ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीनसुक्रतुः कृपास्वः॥१५॥ निर्ऋतिवरुणमध्येभू
तनागान्॥ आयंगौःसार्पराज्ञीसर्पागायत्री॥ ओंआयंगौः॥१६॥ वरुणवायुमध्येगंधर्वाप्सरसः॥ अप्सरसामेतसऋष्यशृंगोगंधर्वाप्सरसोनुष्टु
प्॥ ओंअप्सरसांगंधर्वाणां॥१७॥ ब्रह्मसोममध्येस्कंदनंदीश्वरशूलमहाकालान्॥ कुमारस्कंदस्त्रिष्टुप्॥ ओंकुमारंमाता॥१८॥ ऋषभमृ
षभोवैराजोऋषभोनुष्टुप्॥ ओंऋषभंमा॥१९॥ ब्रह्मेशानमध्येदक्षादीन्सप्त॥ अदितिलोक्योबृहस्पतिर्दक्षोनुष्टुप्॥ ओंअदितिर्द्युर्जनिष्टः॥
॥२०॥ कद्रुद्रायघोरःकण्वःशूलोगायत्री॥ शूलावाहनेवि०॥ ओंकद्रुद्रायप्रचे०॥२१॥ ब्रह्मेंद्रमध्येदुर्गांविष्णुंच॥ तामग्निवर्णांसोभरिर्दुर्गात्रिष्टुप्॥
ओंतामग्निवर्णां॥२२॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री॥ ओंइदंविष्णुः॥२३॥ ब्रह्माग्नेयमध्येस्वधां॥ उदीरतांशंखःस्वधात्रिष्टुप्॥ ओंउदी
रतांसूनृताः॥२४॥ ब्रह्मयममध्येमृत्युरोगान्॥ परंमृत्योःसंकुसुकोमृत्युरोगास्त्रिष्टुप्॥ ओंपरंमृत्यो अनु॥२५॥ ब्रह्मनिर्ऋतिमध्येगणपतिं॥ गणानां
त्वागृत्समदोगणपतिर्जगती॥ ओंगणानांत्वा॥२६॥ ब्रह्मवरुणमध्ये अपः॥ शन्नोवरीषासिंधुद्वीप आपोगायत्री॥ ओंशन्नोदेवीः॥२७॥ ब्रह्म

वायुमध्येमरुतः॥मरुतोयस्यराहूगणोगौतमोमरुतोगायत्री॥ओंमरुतोयस्य॥२८॥ब्रह्मणः पादमूले कर्णिकाधः पृथ्वीं॥स्योनामेधातिथिर्भूमि
र्गायत्री॥ओंस्योनापृथिवि॥२९॥ तत्रैवगंगादिनद्यः॥इमंमेसिंधुक्षित्प्रैयमेधोगंगायमुनासरस्वत्योजगती॥ ओंइमंमेगंगे॥३०॥ तत्रैवस
प्तसागरान्॥ धाम्नोधाम्नोराजन्नितो वरुणनोमुंच॥ यदापो अघ्या इतिवरुणेतिशयामहे ततोवरुणनोमुंच॥मयिवायोमोषधीर्हिंसीर
तोश्वन्च्यवाभूस्त्वेतोवरुणनोमुंच॥तदुपरिमेरुनाम॥बाह्येसोमादिसमीपेक्रमेणायुधानि॥गदात्रिशूलंवज्रंशक्तिंदंडंखड्गंपाशंअंकुशं॥
तद्बाह्येउत्तरादितः,गौतमं॥भरद्वाजं॥विश्वामित्रं॥कश्यपं॥जमदग्निं॥वशिष्ठं॥अत्रिं॥अरुंधतीं॥ तद्बाह्येपूर्वादि॥ऐंद्रीं॥कौमारीं॥ब्राह्मीं॥वारा
हीं॥चामुंडां॥वैष्णवीं॥माहेश्वरीं॥विनायकीमित्यष्टौशक्तयःप्रतिष्ठाप्यप्रत्येकंसहचावाह्यपूजयेत्॥ ततस्तस्यामेववेद्यांवस्त्रालिखितवक्ष्य
माणमंडलेष्वादित्यादिदेवताःस्थापयेत्पूजयेच्च॥अस्मिन्कर्मणिग्रहादिस्थापनंपूजनंचकरिष्ये॥प्रणवस्यब्रह्माऋषिःपरमात्माग्निर्देवतादेवी
गायत्रीछंदः व्याहृतीनांक्रमेणजमदग्निभरद्वाजभृगव ऋषयः अग्निवायुसूर्यादेवताःदैवीगायत्रीदैवीउष्णिक्दैवीबृहत्यश्छंदांसि-
सूर्याद्यावाहनेविनियोगः॥केचिन्मंत्रानप्यावाहनेआहुः॥तत्रग्रहपीठमध्येवर्त्तुलेप्राङ्मुखंसूर्यंरक्ताक्षतैः आकृष्णेनहिरण्यस्तूपःसवितात्रि
ष्टुप्॥सूर्यावाहनेविनियोगः॥ ओंआकृष्णेनरजसा ओं भूर्भुवःस्वः कलिंगदेशोद्भवकाश्यपसगोत्रसूर्येहागच्छेत्यावाह्येहतिष्ठेतिस्थापयेत्॥
एवंसर्वत्रमंत्रांतेव्याहृतीरुक्त्वेहगच्छेहतिष्ठेतिस्थापयेत्॥तत आग्नेयेचतुरस्त्रेप्रत्यङ्मुखंसोमंश्वेतपुष्पाक्षतैराप्यायस्वगौतमःसोमोगायत्रीसो

मावाह०॥ यमुनातीरोद्भवआत्रेयसगोत्रसोम॥२॥ ततोदक्षिणेत्रिकोणेदक्षिणामुखंभौमंरक्तपुष्पाक्षतैरग्निर्मूर्द्धाविरूपोंगारकोगायत्री अंगारकावाह०॥अवंतीसमुद्भव भारद्वाजसगोत्रभौम॥३॥ ततईशान्येबाणाकारेउदङ्मुखंबुधंपीतपुष्पाक्षतैरुद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप्मगधदेशोद्भवआत्रेयसगोत्रबुध॥४॥ ततउत्तरतोदीर्घचतुरस्रेउदङ्मुखंबृहस्पतिंपीतपुष्पाक्षतैर्बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्सिंधुदेशोद्भवआंगिरससगोत्रबृहस्पते॥५॥ततःपूर्वेपंचकोणेप्राङ्मुखंशुक्रंशुक्लपुष्पाक्षतैःशुक्रःपराशरःशुक्रोद्विपदाविराट्। भोजकटदेशोद्भवभार्गवसगोत्रशुक्र॥६॥ततःपश्चिमेधनुषिप्रत्यङ्मुखंशनिंकृष्णपुष्पाक्षतैःशमग्निरिरिंबिठिःशनिरुष्णिक्सौराष्ट्रजकाश्यपसगोत्रशनैश्चर॥७॥ततोनैर्ऋत्येशूर्पाकारेदक्षिणामुखंराहुंकृष्णपुष्पाक्षतैःकयानोवामदेवोराहुर्गायत्रीराह्वावाह०॥ राठिनापुरोद्भवपैठीनसिसगोत्रराहो॥८॥ ततोवायव्येध्वजाकारेदक्षिणामुखंकेतुंधूम्रपुष्पाक्षतैःकेतुमधुच्छंदाःकेतवोगायत्रीअंतर्वेदिसमुद्भवाजैमिनिसगोत्राकेतवइहागच्छेहतिष्ठेति॥९॥सर्वेवाआदित्याभिमुखाःअथाधिदेवताःश्वेतपुष्पाक्षतैःक्रमात्सूर्यादीनांदक्षिणतःस्थाप्याः॥त्र्यंबकंवशिष्ठोरुद्रोनुष्टुप्विनियोगःसर्वत्रज्ञेयः॥ त्र्यंबक ओंभूर्भुवःस्वःईश्वरं॥१॥गौरीर्मिमायदीर्घतमाउमाजगती॥सोमदक्षिणे॥२॥यदक्रंदोदीर्घतमाःस्कंदस्त्रिष्टुप्॥३॥विष्णोर्दीर्घतमाविष्णुस्त्रिष्टुप्॥४॥ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्॥५॥इंद्रंवोमधुच्छंदाइंद्रोगायत्री॥६॥यमायसोमंयमोनुष्टुप्॥७॥मोषुणोघोरःकण्वःकालोगायत्री॥८॥उषोवाजंप्रस्कण्वश्चित्रगुप्तोबृहती॥९॥एवमेवशुक्लपुष्पाक्षतैर्ग्रहाणांवामेमंत्रांतेव्याहृतीरि

शांति ह्यागच्छेहतिष्ठेतिचोक्त्वाप्रत्यधिदेवताःस्थापयेत्॥अग्निंकाण्वोमेधातिथिरग्निर्गायत्री॥ओंअग्निंदूतं॥१॥अप्सुमेमेधातिथिरापोनुष्टुप्॥२ मयू॰
३० स्योनामेधातिथिर्भूमिर्गायत्री॥३॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥४॥इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप्॥५॥इंद्राणींवृषाकपिरिंद्राणीपंक्तिः॥
६॥प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥७॥आयंगौःसार्पराज्ञीसर्पागायत्री॥८॥ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्॥९॥ततःशकु
पुष्पाक्षतैर्विनायकादीन्पंचगणानांत्वागृत्समदोगणपतिर्जगती॥राहोरुत्तरतोविनायकं॥जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥शनेरुत्तरतोदुर्गां
॥२॥तववायवृतस्पतेव्यश्वआंगिरसोवायुर्गायत्रीछंदः॥रवेरुत्तरतोवायुं॥एतान्मंत्रान्पठंतिसांप्रदायिकाः॥तत्रकेषुचिन्मंत्रेषुमूलंचिंत्यं
॥३॥आदित्प्रत्नस्यवत्सआकाशोगायत्री॥राहोर्दक्षिणेआकाशं॥४॥एषोउषाप्रस्कण्वोश्विनौगायत्री॥अश्विनाविहागच्छतामिहतिष्ठतामि
तिकेतोर्दक्षिणेश्विनौ॥५॥एतानिविनायकादिस्थानानिचिंतामणौ॥विनायकादीन्पंचउत्तरतएवेतिसंप्रदायः॥एवंद्वात्रिंशद्देवताइतिरूप
नारायणादयः।हेमाद्रौतुलोकपालादीनामपिसूर्याभिमुखानांदिक्षुस्थापनमुक्तं॥तद्यथा॥इंद्रंविश्वाजेतामाधुच्छंदसइंद्रोनुष्टुप्॥इंद्रइहाग
च्छेहतिष्ठेतिपूर्वेइंद्रं॥एवमुत्तरत्र॥१॥अग्निंमेधातिथिरग्निर्गायत्री॥२॥यमायसोमंयमोयमोनुष्टुप्॥३॥मोषुणोघोरःकण्वोनिर्ऋतिर्गा
यत्री॥४॥त्वायामिशुनःशेपोवरुणस्त्रिष्टुप्॥५॥तववायोव्यश्वोवांगिरसोवायुर्गायत्री॥६॥सोमोधेनुंगौतमःसोमास्त्रिष्टुप्॥७॥तमीशा ३०
नंगौतमईशानोजगती॥८॥सहस्रशीर्षानारायणोनंतोनुष्टुप्॥ईशानपूर्वयोर्मध्येऽनंतम्॥९॥ओंब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रि

ष्टुप्॥ नैर्ऋत्यपश्चिमयोर्मध्येब्रह्माणं॥१०॥ ततउत्तरेक्षेत्रस्यवामदेवः क्षेत्रपालोऽनुष्टुप्॥ वास्तोष्पतेवशिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥ ततोलक्षहोम
श्चेदिंद्रंमित्रमित्यनेन॥ सामध्वनिशरीरस्थंवाहनंपरमेष्ठिनः॥ विषपापहरोनित्यमतः शांतिंप्रयच्छमइत्यनेनचोत्तरे॥ गरुत्मंतमावाह्यरवेः पूर्वे
शेषंसोमस्याग्रेवासुकिंभौमाग्रेतक्षकंबुधोत्तरेकर्कोटकं॥ बृहस्पतेरग्रेपद्मंशनिपश्चिमेशंखपालंराहोःपुरः कंबलंकेतोःपुरः कुलिकं॥ पी
ठस्याप्राच्यामश्विन्यादिसप्तनक्षत्राणि॥ विष्कंभादिसप्तयोगान्॥ बवबालवकरणे॥ सप्तद्वीपानृग्वेदंच॥ दक्षिणेपुष्यादिसप्तनक्षत्राणि॥ धृ
त्यादिसप्तयोगान्॥ कौलवतैतिलकरणे॥ सप्तसागरान्॥ यजुर्वेदंचपश्चिमेस्वात्यादिसप्तनक्षत्राणि॥ वज्रादिसप्तयोगान्॥ गरवणिजकरणे॥
सप्तपातालानिसामवेदंच॥ उत्तरे॥ अभिजिदादिसप्तनक्षत्राणिसाध्यादिषट्योगान्विष्टिकरणं॥ भूरादीन्सप्तलोकान्॥ अथर्ववेदंच॥ वायव्ये
ध्रुवंसप्तर्षींश्च॥ अथयथावकाशंगंगादिसप्तसरितः॥ सप्तकुलाचलान्॥ अष्टौवसून्द्वादशादित्यान्॥ एकादशरुद्रान्॥ मरुतः॥ षोडशमा
तृः॥ षडृतून्॥ द्वादशमासान्॥ द्वेअयने॥ पंचदशतिथीन्॥ षष्टिसंवत्सरान्॥ सुपर्णान्॥ नागान्॥ सर्पान्॥ यक्षान्॥ गंधर्वान्॥ विद्याधरान्॥ अ
प्सरसः॥ रक्षांसि॥ भूतानि॥ मनुष्यानिति॥ कोटिहोमेतुवेदः॥ पूर्वेब्रह्माणं॥ मध्येजनार्दनम्॥ पश्चिमेरुद्रं॥ उत्तरेस्कंदमित्येतानप्यावाह
येत्॥ ततोऽस्मिन्कर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्यइतिसंकल्प्यचक्षुषीआज्येनेत्यंतमुक्त्वासूर्यादीन्ग्रहादीन्समिदाज्यनैवेद्यशेषच
रुभिरष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमसंख्ययाऽधिदेवताप्रत्यधिदेवताविनायकादीन्लोकपालांश्चामुकसंख्ययाएतैरेवद्रव्यैःक्षेत्रपा

लादींश्चामुकसंख्ययासूर्याद्याः सर्वादेवतादशसंख्याकतिलाहुतिभिः अग्निंवायुंसूर्यंप्रजापतिंचप्रत्येकंपंचविंशतिशतमिताभिस्तिलाहुतिभिर्यक्ष्ये॥लक्षहोमेपंचविंशतिसहस्रमिताभिः॥कोटिहोमेपंचविंशतिलक्षमिताभिरितिविशेषः॥ततःशेषेणस्विष्टकृतमित्यादियक्ष्यइत्यंतमुक्त्वासमिद्धूयमाधायनिर्वापादिक्रमेणगुडोदनादीन्नवान्यांश्चशक्त्यांस्त्रयोविंशतिमितिद्वात्रिंशत् नवैववाचरून्श्रपयित्वापंचभिःषोडशभिर्वोपचारैःसंपूजयेत्॥तत्रवस्त्राणिग्रहवर्णानि॥रविभौमयोरक्तचंदनं॥चंद्रशुक्रयोःश्वेतचंदनं॥बुधगुर्वोःकुंकुमयुतं॥शनिराहुकेतूनांकृष्णागुरुःपुष्पाणितत्तद्वर्णानि॥धूपास्तु॥सल्लकीनिर्यासं॥घृताक्तयवाः॥शालमगुरुंसिल्हकंबिल्वयुतागुरुंगुग्गुलं॥लाक्षाक्रमाज्ज्ञायत्र्यादत्वाउद्दीप्यस्वेतिसर्वेभ्योदीपान्दत्वागुडोदनंपायसंनीवारोदनंक्षीरयुतषाष्टिकोदनंदध्योदनंघृतोदनंतिलमाषयुतमोदनंमांसोदनंचित्रौदनंचक्रमान्निवेदयेत्॥अधिदेवतादिभ्यस्तुवासोगंधपुष्पाणिश्वेतानि॥गुग्गुलुर्धूपः॥नैवेद्यंपायसादियथालाभं॥सूर्यादिद्वात्रिंशतामन्येषांचसर्वेषांपूजापदार्थानुसमयेनैव॥ततोवेदीशान्यांकलशंसंस्थाप्यतत्रवरुणमावाह्यसंपूज्याभिमंत्रयेत्॥तद्यथा॥कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा॥आयांतुयजमानस्यदुरितक्षयकारकाः॥देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठंतिभूतानि

त्वयिप्राणाःप्रतिष्ठिताः॥शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंतिसर्वेऽपियतःकामफलप्रदाः॥त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव॥सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति॥ततःफलपुष्पमालाशोभितंबृहस्पतिदैवतंसूर्यादिभ्यइदंनममेत्युत्सृज्यग्रहवेद्युपरिबध्नीयात्॥ततश्चर्वासादनाद्याज्यभागांतेयजमानःसर्वाआवाहिताःसूर्यादिदेवताःअग्निवायुसूर्यप्रजापतींश्चोद्दिश्यसमिदाज्यचरुतिलान्होतुमुत्सृजेन्नममेतित्यजेत्॥ततोऋत्विजःसमिदाज्यनैवेद्यशेषचरून्क्रमेणावाहिताभ्योदेवताभ्योऽष्टसहस्राद्यन्यतमसंख्ययासमस्तव्याहृतिभिर्वक्ष्यमाणतत्तन्मंत्रैर्हुत्वाघृताक्ततिलैःताभ्यएवदेवताभ्यःप्रत्येकंदशदशाहुतीर्हुत्वासोमंराजानमितिस्विष्टकृतंहुत्वाव्यस्तसमस्तव्याहृतिभिस्तिलैरयुतंलक्षंकोटिंवाजुहुयुः॥तत्रहोमेऋग्वेदिनस्तावदावाहनोक्तानेवमंत्रान्पठंति॥यजुर्वेदिनांतूच्यंते॥आकृष्णोनहिरण्यस्तूपःसवितात्रिष्टुप्सूर्यप्रीतयेतिलाज्यहोमेविनियोगः॥ओंआकृष्णोन०पश्यन्स्वाहाइदंसूर्याय॥एवंसर्वत्र॥इमंदेवावरुणःसोमोयजुःइमंदेवा०राजा॥२॥अग्निर्मूर्द्धाविरूपांगारकोगायत्री॥३॥उद्बुध्यस्वपरमेष्ठीबुधस्त्रिष्टुप्॥४॥बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्॥५॥अन्नात्प्रजापतिअश्विसरस्वतींद्राःशुक्रोजगती॥६॥शन्नोदध्यङ्ङाथर्वणःशनिर्गायत्री॥७॥कयानोवामदेवोराहुर्गायत्री॥८॥केतुंमधुच्छंदाःकेतवोगायत्री॥९॥अथाधिदेवतानां॥त्र्यंबकंवशिष्ठोरुद्रोनुष्टुप्॥१॥अत्रप्रणीतोदकंस्पृशेत्॥श्रीश्चेत्युत्तरनारायणउमात्रिष्टुप्॥२॥यदक्रंदोभास्करजमदग्निर्दीर्घतमास्कंदस्त्रिष्टुप्॥३॥विष्णोरराटमुतथ्योविष्णुर्यजुः॥विष्णोरराट०वेत्वा॥४॥

आब्रह्मन्प्रजापतिर्ब्रह्मायजुः॥ आब्रह्मन्॰ कल्पतां॥५॥ सजोषाविश्वामित्रइंद्रस्त्रिष्टुप्॥ सजोषाइंद्रः॥ ६॥ असियमोभास्करजमदग्निर्दीर्घ
तमसोयमस्त्रिष्टुप्॥७॥ अत्रप्रणीतोदकंस्पृशेत्॥ कार्षिरसिदध्यङ्ङाथर्वणः कालोनुष्टुप्॥ ८॥ अत्रापिप्रणीतोदकंस्पृशेत्॥ चित्रावसोर्ऋषय
श्चित्रगुप्तोजगती चित्रावसोः॰ शीयः॥ ९॥ अथप्रत्यधिदेवतानां॥ अग्निंदूतंविरूपोग्निर्गायत्री॥ १॥ अप्स्वंतर्बृहस्पतिरापःपुरउष्णिक्॥
२॥ स्योनामेधातिथिःपृथिवीगायत्री॥ ३॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ ४॥ त्रातारंगार्ग्यइंद्रस्त्रिष्टुप्॥ ५॥ अदित्यैदध्यङ्ङाथर्वण
इंद्राणीयजुः॥ अदित्यैरास्नासि॥ ६॥ प्रजापतेवरुणःप्रजापतिस्त्रिष्टुप्॥ ७॥ नमोस्तुदेवाःसर्पाअनुष्टुप्॥ ८॥ ब्रह्मप्रजापतिर्ब्रह्मात्रिष्टुप् ९
॥अथविनायकादिपंचानां॥ गणानांप्रजापतिर्गणपतिर्यजुः॥ गणानांत्वा॰ मम॥ १॥ अंबेप्रजापतिर्दुर्गानुष्टुप्॥ २॥ वातोवागंधर्वावातउष्णिक्
प्रमाणत आवाहनेविनियुक्तानप्येतान्होमेपठंति॥ तत्रग्रहाणांसप्रमाणकाएव॥ अन्येषांतून्यंते॥ आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्॥ आ
पोहिष्ठाआंबरीषःसिंधुद्वीपउमागायत्री॥ स्योनामेधातिथिःस्कंदोगायत्री॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ त्वमित्सप्रथागोतमो
ब्रह्माबृहती॥ इंद्राग्निर्देवतातयउक्तस्कंगिंद्रस्त्रिष्टुप्॥ आयंगोःसार्पराज्ञीयमोगायत्री॥ ब्रह्मजज्ञानंगौतमोवामदेवःकालस्त्रिष्टुप्॥ यदाज्ञातं-
कौशिकःचित्रगुप्तोनुष्टुप्॥ अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री॥ उदुत्तमंगौतमोवामदेवआपस्त्रिष्टुप्॥ पृथिव्यांतरिक्षंविष्णुःपृथिव्युष्णि
क्॥ सहस्रशीर्षानारायणोविष्णुरनुष्टुप्॥ इंद्रायेंदोमरुत्वतउत्तानपर्णसूभगेप्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥ नमोस्तुसर्पे

भ्योदेवाः सर्वानुष्टुप् ॥ एषब्रह्माप्रजापतिर्ब्रह्माद्विपदागायत्री॥आतूनइंद्रः कुसीदः काण्वोगणपतिर्गायत्री॥जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥आ
दिह्वत्सआकाशोगायत्री॥काणात्रितोवायुरुष्णिक्॥आकाशादिभ्यस्तुस्थापनमंत्राएव॥शेषवासुक्यादिभ्यस्तुप्रणवाद्याःस्वाहांतानाममंत्राएव
॥लक्षकोटिहोमयोरिंद्रंमित्रमित्यनेनगरुत्मद्धोमः॥कोटिहोमेतुब्रह्मजनार्द्दनरुद्रस्कंदेभ्योपिनाममंत्रैर्होमः॥ततोयजमानोमंडपप्राग्द्वारकलशसमी
पेत्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप्॥इंद्रप्रीत्यर्थंबलिदानेविनियोगः॥त्रातारमिंद्रंइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायामुंसदीपमाषभक्तब
लिंसमर्पयामिनमइतिसदीपमाषभक्तबलिंदत्वाभोइंद्रदिशंरक्षबलिंभक्षममसकुटुंबस्यायुःकर्त्ताक्षेमकर्त्ताशुभकर्त्ताशांतिकर्त्तापुष्टिकर्त्तातुष्टि
कर्त्ताभवेतिप्रार्थयेत्॥एवमाग्नेय्यादिषुहोमोक्त्याग्न्यादिमंत्रैर्बलिदानंप्रार्थनंच॥एवमधिदेवताप्रत्यधिदेवतासहितेभ्यः सूर्यादिग्रहेभ्योपि
होमोक्तैस्तत्तन्मंत्रैर्विनायकदुर्गावाय्वाकाशाश्विवास्तोष्पतिक्षेत्राधिपतिभ्यश्चतत्तन्मंत्रैर्होमोक्तैरेव॥ततआचार्योयजमानान्वारब्धःस्रुचि
स्रुवेणद्वादशवारंनारिकेलादिफलयुक्ताज्यंगृहीत्वापूर्णाहुतिंजुहुयात्॥तत्रमंत्राः॥समुद्रादूर्मिरितित्र्यृचस्यगौतमोवामदेवोग्निस्त्रिष्टुप्पूर्णाहुतौवि
नियोगः॥एवमग्रेपिविनियोगः॥मूर्द्धानंदिवोभरद्वाजोवैश्वानरस्त्रिष्टुप्॥पुनरग्निर्वसुरुद्रादित्यास्त्रिष्टुप्॥पूर्णादर्विविश्वेदेवाःशतक्रतुरनुष्टुप्॥
सप्ततेअग्नेसप्तवानग्निर्जगती॥धामंतेवामदेवआपोजगती॥धामंते०स्वाहेति॥यजमानस्तुइदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्रतवे
सप्तवतेअग्नयेभ्यश्चनममेतित्यजेत्॥कातीयानांतुमूर्द्धानंदिवइत्येवपूर्णाहुतिमंत्रः॥अग्नयइदंनममेतित्यागः॥सामगानांतुप्रजापतिऋषि

गायत्रीछंदइंद्रोदेवतायशस्कामस्ययजमानस्ययजनीयप्रयोगेविनियोगः।।पूर्णहोमंयशसाजुहोमियोस्मैजुहोतिवरमस्मैददाति।।वरंवृणेयशसा
स्वामिलोकेस्वाहेत्यनेनस्रुवेणैवहोमः।इंद्रायेदंनममेतित्यागः।।ततोवसोर्द्धारयाहोष्यामीतिसंकल्प्ययजमानोवसोर्द्धारांजुहुयात्।।मंत्रास्तु।।अ
ग्निमीळइतिनवानांमधुच्छंदाअग्निर्गायत्रीवसोर्द्धारायांविनियोगः।।विष्णोर्नुकमितिषण्णांदीर्घतमाविष्णुस्त्रिष्टुप्।।आतेपितरितिपंचदशानां
गृत्समदोरुद्रस्त्रिष्टुप्।।स्वादिष्ठयेतिनवानांमधुच्छंदःपवमानसोमोगायत्री।।महावैश्वानरसाम्नोमहावैश्वानरऋषिर्वैश्वानरोदेवतापथ्याबृ
हतीच्छंदः।।ज्येष्ठसाम्नोभरद्वाजऋषिर्वैश्वानरोदेवतात्रिष्टुप्छंदःवसोर्द्धारांजुहोतीत्यनुवाकमपिपठंतिशिष्टाः।।एवंवसोर्द्धारांहुत्वापूर्णपात्र
विमोकादिचयथाशाखंसमाप्याचार्यसहिताऋत्विजःसर्वौषधीभिरनुलिप्तांगंपत्नीपुत्रादिसहितंयजमानंस्वस्वशाखीयैर्मंत्रैर्नवग्रहपीठ
समीपस्थकलशोदकेनसंपातकलशोदकेनवाभिषिंचेयुःपौराणैश्च।।तेच।।सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः।।वासुदेवोजगन्नाथ
स्तथासंकर्षणोविभुः।।प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते।।आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा।।वरुणःपवनश्चैवधनाध्यक्षस्त
थाशिवः।।ब्रह्मणासहिताःसर्वेदिक्पालाःपातुतेसदा।।कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः।।बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिश्चमा
तरः।।एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः।।आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः।।ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः।।दे
वदानवगंधर्वायक्षराक्षसपन्नगाः।।ऋषयोमनवोगावोदेवमातरएवच।।देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः।।अस्त्राणिसर्वशस्त्रा

णिराजानोवाहनानिच।।औषधानिचरत्नानिकालस्यावयवाश्चये।।सरितःसागराःशैलास्तीर्थानिजलदानगाः।।एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धयइति।।तच्छंयोरावृणीमहइति।।ततोयजमानःस्नात्वाशुक्लगंधमाल्यांबरधरआचार्यादीन्संपूज्यतेभ्योदक्षिणांदद्यात्।।तत्राचार्यायधेनुं।।ब्रह्मणेकृष्णामनड्वाहं।।एवंसदस्यर्त्विग्द्वारपालादिभ्योयथाशक्ति।।तथा।।धेनुःशंखस्तथानड्वान्हेमवासोहयःक्रमात्।।कृष्णागौरायसंच्छागं एतावैदक्षिणाःक्रमाद्ग्रहानुद्दिश्यदेयाः।।ततःशक्त्याब्राह्मणान्भोजयेत्संकल्पयेद्वाऽशक्तो।।ततोदीनानाथेभ्योभूयसींदक्षिणांदत्वामंडपदेवतानांचोत्तरपूजांकृत्वायांतुदेवगणाः।।अभ्यारमिदद्रयो।।उत्तिष्ठब्रह्मणस्पतइतिताउत्थाप्यविसृज्यमंडपादीन्प्रतिमादींश्चसर्वान्संभारानाचार्यायप्रतिपाद्ययस्यस्मृत्याचनामोक्त्या।।प्रमादात्कुर्वतामितिपठित्वाकर्मेश्वरार्पणंकृत्वाविप्राशिषोगृहीत्वातान्नमस्कृत्यसुहृद्युतोभुंजीतेतिसर्वंशिवं।।

।।इतिश्रीभट्टशंकरात्मजनीलकंठकृतौशांतिपरिभाषाप्रयोगः।।

।।अथग्रहयोगशांतिः।।

यामले।।दुर्भिक्षादिभयंचैवचतुर्ग्रहसमन्वये।।महारोगभयंराष्ट्रक्षयोवृष्टिविनाशनं।।पंचग्रहसमायोगेदुर्भिक्षंसंकरादिकं।।जनक्षयोनृपवैरंगर्भनाशस्तुजायते।।ग्रहषट्कसमायोगेमंत्रिणोमरणंभवेत्।।परचक्रादिभयंसर्वंसंकरादिजनक्षयः।।पट्टराज्ञीविनाशोवामहाभयमथापिवा।।सप्तग्रहसमायोगेक्षितीशमरणंध्रुवं।।जगत्प्रलयमेवापितदानिर्मानुषंजगत्।।अतऊर्ध्वंमहोत्पातनानादुःखमहाकुलं।।सूर्येऽस्याद्यतिरिक्तश्चेत्तदायोगोमहाद्भुतः।।विनाचन्द्रेणयोगोपिजगत्प्रलयकारणं।।तदृक्षजातजंतूनांमहारोगोमहाभयं।।अर्थनाशःस्थाननाशोमानहानिर्नृपीडनं।।वातपित्तादिसंभूतमहापीडाम

हद्वयं॥समायोगग्रहानृणांदोषान्कुर्वंतिसर्वदा॥षण्मासाभ्यंतरे वापि आयुर्हानिःश्रियस्तथा॥जन्माष्टद्वादशेराशौचतुर्थेपंचमेपिवा॥पूर्वोक्तफलमेवात्रतस्माच्छांतिंप्रयत्नतः॥कुर्याद्दोषानुसारेणवित्तशाठ्यंनकारयेत्॥तत्तद्ग्रहाकृतिंकृत्वासौवर्णेनप्रयत्नतः॥सुवर्णेनतदर्द्धेनपादेनापिकनीयसीं॥वित्तशाठ्यंनकर्त्तव्यंकर्त्तव्यंशक्तितोनरैः॥पूर्वोक्तलक्षणेनैवग्रहमूर्त्तिंचकारयेत्॥ग्रहस्यैकैककलशंग्रहयोगप्रमाणतः॥कारयेत्कुंभमेकंवानिर्व्रणंस्फुटंनवं॥ग्रहस्येशानदिग्भागेशुद्धदेशेसमस्थले॥कुंडेवास्थंडिलेवापिहोमंकुर्याद्विधानतः॥तस्यपूर्वोत्तरेदेशेपूजास्थानंप्रकल्पयेत्॥चतुरस्रंहस्तमात्रंस्थंडिलंतंडुलेनतु॥लिखेद्ग्रहाकृतिंतत्रस्थापयेत्प्रतिमांततः॥अधिप्रत्यधिदेवादीन्दक्षिणोत्तरतःक्षिपेत्॥रक्तगंधैस्तथापुष्पैस्तत्तन्माल्यैःफलैरपि॥तत्तद्ग्रहोक्तमंत्रेणपूर्वोक्तेनैवपूजयेत्॥स्वस्तिवाचनपूर्वेणआचार्यर्त्विजैःसह॥ग्रहपूजादिकंकृत्वानैवेद्यांतंसमर्पयेत्॥ततोहोमंप्रकुर्वीतस्वगृह्योक्तविधानतः॥चतुर्थ्यंतंप्रकुर्वीतकलशस्थापनंततः॥पूर्वोक्तेनविधानेनशुद्धतोयेनपूरयेत्॥पंचामृतंपंचगव्यंपंचत्वक्पंचपल्लवं॥तत्रमंत्रैर्विनिक्षिप्यऔषधानिविनिक्षिपेत्॥तत्तद्ग्रहोक्तविधिनामूलान्यादायनिःक्षिपेत्॥अब्लिंगैर्वारुणैर्वापिकलशंपूजयेद्गुरुः॥तत्तद्ग्रहोक्तविविधैस्तत्तन्मंत्रैर्हुनेद्दश॥चर्वाज्यंजुहुयात्पश्चात्तिलाहुतिमथाचरेत्॥अथस्विष्टकृतंहुत्वाहोमशेषंसमापयेत्॥भद्रासनोपविष्टस्ययजमानस्यऋत्विजैः॥कलशस्थोदकेनैवमभिषेकंसमाचरेत्॥योगग्रहोक्तमंत्रैश्चअधिप्रत्यधिमंत्रतः॥नवग्रहोक्तमंत्रैश्चजातवेदादिपंचकैः॥त्रियंबकेनमंत्रेणक्षेत्रस्यपतिनाअपि॥यतइंद्रद्वयेनैवलोकपालाष्टकैरपि॥सुरास्त्वाइतिमंत्रेणयेनदेवादयः

क्रमात्॥अन्यैश्चपुण्यसूक्तैश्चअभिषेकंसमाचरेत्॥अभिषेकाप्लुतंवस्त्रमाचार्यायनिवेदयेत्॥ततःशुक्लांबरधरःकुर्यादाज्यावलोकनं॥ऋत्विग्भ्योदक्षिणांदद्याद्धेनुंशंखादिकानपि॥तदभावेयथाशक्तिहिरण्यमपिदापयेत्॥ब्राह्मणान्भोजयेत्सम्यग्यथाविभवसारतः॥एवंयःकुरुतेभक्त्याग्रहदोषविवर्जितः॥पूर्वोक्तसर्वदोषैश्चविमुक्तःपुत्रवान्सुखी॥आयुरैश्वर्यसंपन्नोजीवेद्वर्षशतंनरः॥इहलोकेसुखीभूत्वापश्चाच्छिवपुरंव्रजेत्॥ इतिग्रहयोगशांतिः ॥ अथग्रहस्नानानि॥विष्णुधर्मोत्तरे॥मंजिष्ठामदमातंगकुंकुमंरक्तचंदनं॥पूर्णकुंभेकृतताम्रेसूर्यस्नानंविधीयते॥मदमातगगजमदः॥उशीरंचशिरीषंचकुंकुमंरक्तचंदनं॥शंखन्यस्तमिदंस्नानंचंद्रदोषविनाशनं॥खदिरंदेवदारुंचतिलानामलकानिच॥पूर्णकुंभेकृतेरौप्येभौमपीडाविनाशनं॥नदीसंगमतोयानितन्मृदासहितानिच॥न्यस्तानिकुंभेमाहेयेबुधपीडाविनाशनं॥माहेयेमृन्मये॥औदुंबरंतथाबिल्वंवटमामलकंतथा॥न्यस्तंतुकुंभेसौवर्णेजीवपीडाविनाशनं॥गोरोचनानागमदः शतपुष्पाशतावरी॥विन्यस्ताराजतेकुंभेशुक्रपीडाविनाशनं॥तिलान्माषान्प्रियंगुंचगंधपुष्पंतथैवच॥न्यस्तंकार्ष्णायसेकुंभेसौरिपीडाविनाशनं॥गुग्गुलहिंगुलतालकंशुभांचैवमनःशिलां॥शृंगेचमाहिषेन्यस्येद्राहुपीडाविनाशनं॥तालंहरितालं॥वराहनिहतांराजन्पर्वताग्रमृदंतथा॥छागक्षीरंखड्गपात्रेकेतुपीडाविनाशनम्॥वराहनिहतावराहोत्खाता॥खड्गोगंडकः॥उक्तंग्रहस्नानमिदंसर्वपीडाविनाशनं॥इतिग्रहस्नानानि॥ ॥अथादित्यशांतिः॥ भविष्ये ॥ आदित्यवारंहस्तेनपूर्वंगृह्यविचक्षणः॥मंत्रोक्तविधिनासर्वंकुर्यात्पूजादिकंरवेः॥प्रत्यर्कंसप्तनक्तानि

कृत्वाभक्तिपरोनरः॥ ततस्तुसप्तमेप्राप्ते कुर्याद्ब्राह्मणभोजनं॥ भास्करंशुद्धसौवर्णं कृत्वायत्नेनमानवः॥ ताम्रपात्रेस्नापयित्वारक्तपुष्पैः प्रपूजयेत्॥
रक्तवस्त्रयुगच्छन्नंछत्रोपानद्युगान्वितं॥ घृतेनस्नापयित्वाचलड्डुकान्विनिवेद्यच॥ होमंघृततिलैःकुर्याद्रवि नाम्नाचमंत्रवित्॥ समिधोऽष्टो
त्तरशतमष्टाविंशतिरेवच॥ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच॥ मंत्रेणानेनविदुषेब्राह्मणायप्रदापयेत्॥ आदिदेवनमस्तुभ्यंसप्तसप्ते
दिवाकर॥ त्वंरवेतारयस्वाऽस्मास्तस्मात्संसारसागरात्॥ व्रतेनानेनराजेंद्र भवेदारोग्यमुत्तमम्॥ द्रव्यसंपत्सुतप्राप्तिरितिपौराणिका
विदुः॥ अपिसंवादिनीचेयंशांतिःपुष्टिःसदानृणां॥ सूर्यपीडासुघोरासुकृताशांतिःशुभप्रदा॥ अथचंद्रशांतिस्तत्रैव ॥ तद्वच्चित्रासुसंगृह्य
सोमवारंविचक्षणः॥ अनेनैवोक्तविधिनाकुर्यात्पूजादिकंविभोः॥ सप्तमेतुततःप्राप्तेकुर्याद्ब्राह्मणभोजनं॥ कांस्यपात्रेथसंस्थाप्यसोमंर
जतसंभवं॥ श्वेतवस्त्रयुगच्छन्नंश्वेतपुष्पैःप्रपूरितं॥ पादुकोपानहच्छत्र भोजनासनसंयुतं॥ होमंघृततिलैःकुर्यात्सोमनाम्नाचमंत्र
वित्॥ समिधोऽष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच॥ दध्यन्नशिखरेकृत्वाब्राह्मणायनिवेदयेत्॥
मंत्रेणानेनराजेंद्रसम्यग्भक्त्यासमन्वितः॥ महादेवजातिवल्लीपुष्पगोक्षीरपांडुर॥ सोमसौम्योभवाऽस्माकंसर्वदातेनमोनमः॥ अथ
मंगलशांतिः॥ स्वात्यामंगारकंगृह्यक्षमायांनक्तभोजनं॥ क्षमाभूः॥ सप्तमेत्वथसंप्राप्तेहैमंताम्रेनिवेश्यवै॥ रक्तवस्त्रयुगच्छन्नंकुंकु
मेनानुलेपितं॥ निवेद्यभक्तकंसारंपुष्पधूपाक्षतादिभिः॥ होमंघृततिलैःकुर्यात्कुजनाम्नाचमंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंश

तिरेववा॥होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच॥मंत्रेणानेनतंदद्याद्ब्राह्मणायकुटुंबिने॥कुजकुप्रभवोपित्वंमंगलःपरिपठ्यसे॥अमंगलनिहत्याशुसर्वदायच्छमंगलं॥एवंकृतेभौमकृतंदुष्कृतंशांतिमाप्नुयात्॥कर्त्तव्यंभौमपीडासुतस्मात्प्रयतमानसैः॥ अथबुधशांतिः ॥विशाखासुबुधगृह्यससनक्तान्यथाचरेत्॥बुधंहेममयंकृत्वास्थापितंकांस्यभाजने॥शुक्लवस्त्रयुगच्छन्नंशुक्लमाल्यानुलेपनं॥गुडौदनोपसंहारंब्राह्मणायनिवेदयेत्॥बुधत्वंबुद्धिजननोबोधवान्सर्वदानृणां॥तत्त्वाऽवबोधंकुरुमेसोमपुत्रनमोनमः॥होमंघृततिलैःकुर्याद्बुधनाम्नाचमंत्रवित्॥समिधोऽष्टोत्तरशतमष्टाविंशतिरेववा॥होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच॥बुधशांतिरियंप्रोक्ताबुधवैकृतनाशिनी॥बुधदोषेषुकर्तव्यातथाशांतिकपौष्टिके॥ अथगुरोःशांतिः ॥गुरुंचैवानुराधासुपूजयेद्भक्तितोनरः॥पूर्वोक्तविधियोगेनससनक्तान्यथाचरेत्॥हैमंहेममयेपात्रेस्थापयित्वाबृहस्पतिं॥पीतांबरयुगच्छन्नंपीतयज्ञोपवीतिनं॥पादुकोपानहच्छत्रकमंडलुविभूषितं॥पूजयेत्पीतकुसुमैःकुंकुमेनविलेपितं॥धूपदीपादिभिर्दिव्यैःफलैश्चंदनतंडुलैः॥खंडखाद्योपहारैश्चगुरोरग्रेनिवेदयेत्॥धर्मशास्त्रार्थतत्त्वज्ञज्ञानविज्ञानपारग॥विबुधार्त्तिहराचिंत्यदेवाचार्यनमोस्तुते॥होमंघृततिलैःकुर्याद्गुरुनाम्नाचमंत्रवित्॥समिधोऽष्टोत्तरशतमष्टाविंशतिरेववा॥होतव्यामधुसर्पिर्भ्यादध्नाचैवघृतेनच॥समिधोत्राऽश्वत्थस्य॥एतत्कृतंमहापुण्यंसर्वपापहरंशिवं॥तुष्टिपुष्टिकरंनृणांगुरुवैकृतनाशनं॥विषमस्थेगुरौकार्यामहाशांतिरियंनृभिः॥ अथगुरुपूजा ॥स्कांदे॥कन्याविवाहकालेतुशुद्धिर्यस्यानाविद्यते॥ब्राह्मणस्योपनयनेयस्य

स्यादुत्थितोगतः॥ उत्थितः प्रासः॥ एभिः पूजागुरोः कार्याविधिवद्भक्तिभावितैः॥ मदंतीकामपुष्पाणिपात्रंपालाशसर्षपाः॥ मदंतीयूथिका॥ कामोमदनवृक्षाख्यः॥ गुडूचीवात्वपामार्गविडंगशंखिनीवचा॥ सहदेवी विष्णुक्रांतासर्वौषध्यः शतावरी॥ कुष्ठंमांसंहरिद्रेद्वेमुराशैलेयचंदनं॥ वचाकर्चूरमुस्तंचसर्वौषध्यःप्रकीर्त्तिताः॥ तथैवाऽश्वत्थभृंगाचपंचगव्यंजलंतथा॥ नूतनंसोदकुंभंचपीतवस्त्रसमन्वितं॥ पंचरत्नैः समायुक्तमीशान्यांस्थापितेनलात् ॥या ओषधीरितिमंत्रेणसर्वास्त्वास्मिन् विनिक्षिपेत्॥ कुंभस्योपरिभागेतुस्थापयित्वाबृहस्पतिं॥ सुवर्णपात्रेसौवर्णीप्रतिमांतुयुधिष्ठिर॥ कारयेत्तुयथाशक्त्यावित्तशाठ्यविवर्जितः॥ पीतवस्त्रयुगच्छन्नांपीतयज्ञोपवीतिनीं॥ पूजयेद्गंधपुष्पाद्यैस्ततोहोमंसमाचरेत्॥ समिधोऽश्वत्थवृक्षस्यहोतव्याष्टोत्तरंशतं॥ तिलव्रीहियवान्मिश्रंहोतव्यंचयथाक्रमं॥ बृहस्पतेतिमंत्रेणऋषिछंदः समन्वितः॥ मंत्रेणानेनजुहुयाद्धान्यपूगंचयत्नतः॥ ततोहोमावसानेतुपूजयेच्चबृहस्पतिं॥ पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्चभक्तितः॥ दध्योदनंचनैवेद्यंफलतांबूलसंयुतं॥ मंत्रेणानेनकौंतेयसमभ्यर्च्यपुनःपुनः॥ नमस्तेंगिरसांनाथवाक्पतेथबृहस्पते॥ क्रूरग्रहैःपीडितानाममृतायनमोनमः॥ पूजयित्वासुराचार्यंपश्चादर्घंनिवेदयेत्॥ गंभीरदृढरूपांगदेवेज्यसुमतेप्रभो॥ नमस्तेवाक्पतेशांतगृहाणार्घं बृहस्पते॥ अर्घमंत्रः ॥अर्घंदत्वासुरेशस्यजपहोमंसमापयेत्॥ भक्त्यायत्तेसुराचार्यहोमपूजादिसंस्कृतं॥ तत्त्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमः॥ संकल्पमंत्रः॥ मंत्रेणानेनसंकल्प्यपश्चात्संप्रार्थयेन्नृप॥ जीवोबृहस्पतिःसूरिराचार्योगुरुरंगिराः॥ वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदामम॥ प्रार्थनामंत्रः॥ एवंसंप्रा

र्थयेद्देवमाचार्यंचपूजयेत्॥ सर्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिर॥ प्रणम्यचगवायुक्तामाचार्यायनिवेदयेत्॥ अथाचार्यस्तुनियतोवेदवेदांगपारगः॥ यजमानंसपत्नीकंशांतचित्तंजितेंद्रियं॥ कुंभोदकंगृहीत्वातुमंत्रैरेतैःप्रसिंचयेत्॥ इदमापोथमंत्रेणजामदग्निमृचातथा॥ याओषधीरित्यावतीःकूष्मांडैश्चाभिषेचयेत्॥ पश्चात्संभोजयेद्विप्रान्यथाशक्त्यायुधिष्ठिर॥ एवंकृत्वागुरोःपूजांसर्वान्कामानवाप्नुयात्॥ संक्रांतावपिकौंतेयतथास्वाभ्युदयेषुच॥ कुर्वन्बृहस्पतेःपूजामभीष्टंफलमाप्नुयात्॥ संक्रांतौगुरुसंक्रांतौ॥ इतिगुरुपूजा॥ अथशुक्रशांतिर्भविष्ये॥ शुक्रंज्येष्ठासुसंगृह्यक्षमायांनक्तभोजनं॥ क्षमाभूः॥ गुरूक्तक्रममार्गेणद्विजसंतर्पणेनच॥ सप्तमेत्वथसंप्राप्तेरौप्यंशुक्रंतुकारयेत्॥ वंशपात्रेचसंस्थाप्यपूजयेत्सितपंकजैः॥ तदभावेसितैःपुष्पैस्तांबूलैश्चंदनेनवा॥ अग्रेतस्यप्रदातव्यंपायसंघृतसंप्लुतं॥ दद्यादनेनमंत्रेणब्राह्मणायकुटुंबिने॥ भार्गवोगर्भशुक्रस्यशुचिःश्रुतिविशारदः॥ हित्वाग्रहकृतान्दोषानायुरारोग्यदोऽस्तुसः॥ होमंघृततिलैःकुर्याच्छुक्रनाम्नाचमंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥ अथप्रतिशुक्रादिशांतिः॥ तत्रैवमात्स्ये॥ अथातःशृणुभूपालप्रतिशुक्रप्रशांतये॥ यात्रारंभेवसानेचतथाशुक्रोदयेसति॥ शुक्रपूजाप्रकर्त्तव्यातांनिशामयभारत॥ राजतेवाथसौवर्णेकांस्यपात्रेथवापुनः॥ शुक्लपुष्पांबरयुतेश्वेततंडुलपूरिते॥ निधायराजतंशुक्रंशुचिमुक्ताफलान्वितं॥ महाश्वेतसमायुक्तंसामगायनिवेदयेत्॥ नमस्तेसर्वलोकेशनमस्तेभृगुनंदन॥ देवसर्वार्थसिद्ध्यर्थंगृहाणार्घ्यंनमोस्तुते॥ दत्त्वैवमर्घ्यंकौंतेयप्रणिपत्यविसर्ज्जयेत्॥ एवंशुक्रोदयेकुर्याद्यात्रा

दिषुचभारत॥तद्वद्वाचस्पतेःपूजांप्रवक्ष्यामियुधिष्ठिर॥सौवर्णपात्रेसौवर्णममरेशपुरोहितं॥पीतपुष्पांबरधरंकृत्वास्नात्वाथसर्षपैः॥पालाशाश्वत्थभंगेनपंचगव्यतिलेनतु॥भंगःपल्लवः॥पीतागरागवसनोघृतहोमंतुकारयेत्॥प्रणम्यतांगवासार्द्धंब्राह्मणायनिवेदयेत्॥नमस्तेंगिरसांनाथवाक्पतेतेबृहस्पते॥क्रूरग्रहैःपीडितानाममृतायनमोनमः॥संक्रांतावपिकौंतेययात्रास्वभ्युदयेषुच॥कुर्वन्बृहस्पतेःपूजांसर्वान्कामान्समश्नुते॥अथवामौक्तिकान्येवस्फुटवृत्तानिबृहतिच॥भार्गवांगिरसौचिंत्यतान्येवप्रतिपादयेत्॥इतिप्रतिशुक्रादिशांतिः॥ अथशनिराहुकेतुशांतयः॥भविष्ये॥शनैश्चरंराहुकेतूलोहपात्रेषुनिक्षिपेत्॥कृष्णागुरुःस्मृतोधूपोदक्षिणाचस्वशक्तितः॥यथाक्रमंशमीदूर्वाकुशानासमिधःस्मृताः॥सप्तमेल्वथसंप्राप्तेनवर्णान्वाथकारयेत्॥कृष्णावस्त्रयुगच्छन्नमेकैकंकारयेद्बुधः॥मृगनाभ्यासमालभ्यकृसरान्विनिवेद्यच॥होमावसानेतत्सर्वंब्राह्मणायोपपादयेत्॥शनैश्चरनमस्तेस्तुनमस्तेराहवेतथा॥केतवेचनमस्तुभ्यंसर्वेशांतिंप्रयच्छतु॥एवंकृतेभवेद्यत्तुतन्निबोधनृपोत्तम॥यदिभौमोरविसुतोभास्करोराहुणासह॥केतुश्चमूर्त्तौतिष्ठंतिसर्वेपीडाकराग्रहाः॥अनेनकृतमात्रेणसर्वेशाम्यंत्युपद्रवाः॥ इतिशन्यादिशांतिः॥भविष्योत्तरे॥ततोमंदस्यदिवसेस्नानमभ्यंगपूर्वकम्॥कार्यंदेयंचविप्रायतैलमभ्यंगहेतवे॥यस्तुसंवत्सरंयावत्प्राप्तेशनिदिनेरतः॥तैलंददातिविप्राणांस्वशक्त्याभ्यज्यतेपिवा॥ततःसंवत्सरस्यांतेप्राप्तेतस्यदिनेपुनः॥लोहंघटार्पितंसौरिंतैलकुंभेविनिक्षिपेत्॥लोहेवामृन्मयेवाथकृष्णावस्त्रयुगान्वितं॥कृष्णगोदक्षिणायुक्तंकृष्णाकंबलशायितम्॥स्वय

मभ्यंगतःस्नात्वा कृष्णपुष्पैस्तमर्चयेत्॥ सुगंधिगंधपुष्पैश्च कृसरान्नैस्तिलोदनैः॥ पूजयित्वासूर्यपुत्रंक्षमस्वेति पुनःपुनः॥ कृष्णायद्विजमुख्याय तदभावेनरायच॥ देयः शनैश्चरो भक्त्या मंत्रेणानेनवैद्विज॥ क्रूरावलोकनवशाद्भवनंनाप्नोतियोग्रहोरुष्टः॥ तुष्टोधनकनकसुखंददातिसोऽस्मान्नृशनैश्चरः पातु॥ यः पुनर्नष्टराज्यायनरायपरितोषितः॥ स्वप्नेददौनिजंराज्यंसमेसौरिःप्रसीदतु॥ कोणंनीलांजनप्रख्यंमंदचेष्टाप्रसारिणं॥ छायामार्त्तंडसंभूतंनमस्यामिशनैश्चरं॥ नमोऽर्कपुत्रायशनैश्चरायनीहारवर्णांजनमेचकाय॥ श्रुत्वारहस्यंभवकामदस्त्वंफलप्रदोमेभवसूर्यपुत्र॥ नमोस्तुप्रेतराजायकृशदेहायवैनमः॥ शनैश्चरायक्रूरायशुद्धबुद्धिप्रदायिने॥ यएभिर्नामभिःस्तौतितस्यतुष्टिंददात्यसौ॥ तदीयंतु भयंतस्यस्वप्नेपिन भविष्यति॥ इतिशनिव्रतं॥ स्कांदे॥ श्रावणेमासिसंजातेशोभनेशनिवासरे॥ लोहरूपंशनिंकृत्वास्नाप्यपंचामृतैर्नवैः॥ पुष्पैरष्टविधैर्धूपैःफलैश्चैवविशेषतः॥ मंत्रैःप्रपूजयेदेतैःक्रमेणग्रहमुत्तमं॥ कोणस्थःपिंगलोबभ्रुःकृष्णोरौद्रोयमोंतकः॥ सौरिःशनैश्चरोमंदःपिप्पलादेनसंस्तुतः॥ शन्नोदेवीतिसर्वत्रवैदिकेनचपूजयेत्॥ पूजयित्वाचनैवेद्यंततःकुर्यात्क्रमेणतु॥ समाषभक्तंप्रथमेद्वितीयेपायसंशुभं॥ तृतीयेत्वबिलीकार्याचतुर्थेपूरिकाशुभा॥ अंबिलीतक्रतंडुलपिष्टादिनिर्मितोलेह्यविशेषः॥ इतिशनिस्तोत्रं॥ ततःकृतांजलिर्भूत्वास्तुतिंचक्रेसबालकः॥ पिप्पलादोद्विजश्रेष्ठःप्रणिपत्यमुहुर्मुहुः॥ नमस्तेकोणसंस्थायपिंगलायनमोस्तुते॥ नमस्तेबभ्रुरूपायकृष्णायचनमोस्तुते॥ नमस्तेरौद्रदेहायनमस्तेचांतकायच॥ नमस्तेयज्ञसंज्ञायनमस्तेसौरयेविभो॥ नमस्तेमंदसंज्ञायशनैश्चरनमोस्तुते॥ प्रसा

दंकुरुदेवेशदीनस्यप्रणतस्यच॥ शनैश्चरउवाच॥ परितुष्टोस्मितेवत्सस्तोत्रेणानेनसांप्रतं॥वरंवरयभोवत्सयेनयच्छामिवांछितम्॥ पिप्प
लादउवाच॥अद्यप्रभृतिनोपीडाबालानांरविनंदन॥त्वयाकार्यामहाभागनस्वकीयाकथंचन॥यावद्वर्षाऽष्टकंजातंममबाल्येनसूर्यज॥ स्तोत्रे
णानेनयोन्यस्त्वांब्रूयात्प्रातरुपस्थितः॥तस्यपीडानकर्त्तव्यात्वयाभास्करनंदन॥तस्यपीडानकर्त्तव्यादेयोलाभोमहाभुज॥अर्द्धाष्टमिकयायो
गेतावकेसंस्थितेनरः॥सार्द्धसप्तवर्षपर्यंतंद्वादशजन्मद्वितीयराशिभिर्यःशनैश्चरयोगःसोऽर्द्धाऽष्टमिकयायोगइत्युच्यते।तववारेतुसंप्राप्तेयस्ति
लान्होमसंयुतान्॥शक्त्याददातिनोतस्यपीडाकार्यात्वयाविभो॥कृष्णांगांयस्तुविप्रायतवोद्देशेनयच्छति॥अर्द्धाष्टमिकयापीडातस्यकार्या
त्वयानच॥शमीसमिद्भिर्योहोमंतवोद्देशेननिर्वपेत्॥तथाकृष्णतिलैश्चैवकृष्णपुष्पानुलेपनैः॥पूजांकरोतियस्तुभ्यंधूपंवैगुग्गुलंदहेत्॥
कृष्णवस्त्रेणसंवेष्ट्यत्याज्यातस्यत्वयाव्यथा॥सूतउवाच॥एवमुक्तःशनिस्तेनबाढमित्यवजल्प्यच॥नारदंसमनुज्ञायजगामनिजसंश्रयं॥इति
शनैश्चरशांतिः॥ अथार्कविवाहः॥प्रयोगरत्नेमात्स्ये॥तृतीयांमानुषींनैवचतुर्थींयःसमुद्वहेत्॥पुत्रपौत्रादिसंपन्नःकुटुंबीसाग्निकोवरः॥उद्व
हेद्व्रतिसिद्ध्यर्थंतृतीयांनकदाचन॥मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीं॥नश्यत्येवनसंदेहोगर्गस्यवचनंयथेति॥तत्रैवसंग्रहे॥तृतीयांयदि
चोद्वाहेत्तर्हिसाविधवाभवेत्॥चतुर्थादिविवाहार्थंतृतीयेऽर्कंसमुद्वहेत्॥आदित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे॥शुभेदिनेवापूर्वाण्हेकुर्याद
र्कविवाहकं॥व्यासः॥स्नात्वालंकृतवासास्तुरक्तगंधादिभूषितः॥सपुष्पफलशाखेकमर्कगुल्मंसमाश्रयेत्॥सल्लक्षणेनसंयुक्तमर्कंसंस्थाप्यय-

त्ततः॥ अर्ककन्याप्रदानार्थमाचार्यंकल्पयेत्पुरा॥ अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत्॥ नांदीश्राद्धेहिरण्येनअष्टवर्गान्प्रपूजयेत्॥ पूजयेन्मधुपर्केणवरंविप्रस्यहस्ततः॥ यज्ञोपवीतंवस्त्रंचहस्तकर्णादिभूषणं॥ उष्णीषगंधमाल्यादिवरायास्मैप्रदापयेत्॥ स्वशाखोक्तप्रकारेणमधुपर्कंसमाचरेत्॥ ब्राह्मे॥ ग्रामात्प्राच्यामुदीच्यांवासुपुष्पफलसंयुतं॥ परीक्ष्ययत्नतोधस्तात्स्थंडिलादियथाविधि॥ कुर्यादितिशेषः॥ कृत्वार्कपुरतस्तिष्ठन्प्रार्थयेतद्विजोत्तमः॥ त्रिलोकवासिन्सप्ताश्वछाययासहितोरवे॥ तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु॥ तत्राध्यारोप्यदेवेशंछाययासहितंरविं॥ वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणैवपूजयेत्॥ तत्रैवश्वेतवस्त्रेणतथाकार्पासतंतुभिः॥ गंधपुष्पैःसमभ्यर्च्यअब्लिंगैरभिषिच्यच॥ गुडोदनंतुनैवेद्यंतांबूलंचसमर्पयेत्॥ व्यासः॥ अर्कंप्रदक्षिणीकुर्वन्जपेन्मंत्रमिमंबुधः॥ ममप्रीतिकरायेयंमयासृष्टापुरातनी॥ अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षतु॥ पुनःप्रदक्षिणीकुर्यान्मंत्रेणानेनमंत्रवित्॥ नमस्तेमंगलेदेविनमःसवितुरात्मजे॥ त्राहिमांकृपयादेविपत्नीत्वंमेइहागता॥ अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच॥ वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः॥ तृतीयोद्वाहजंपापंमृत्युंचाशुविनाशय॥ ततश्चकन्यावरणंत्रिपुरुषंकुलमुद्धरेत्॥ आदित्यःसविताचार्कपुत्रीपौत्रीचनाम्निका॥ गोत्रंकाश्यपइत्युक्तंलोकेलौकिकमाचरेत्॥ सुमुहूर्त्तेनिरीक्षेतस्वस्तिसूक्तमुदीरयन्॥ आशीर्भिःसहितैःकुर्यादाचार्यप्रमुखैर्द्विजैः॥ अथाचार्यंसमाहूयविधिनातन्मुखाच्चतां॥ प्रतिगृह्यततोहोमंगृह्योक्तविधिनाचरेत्॥ व्यासः॥ अर्ककन्यामिमांविप्रयथाशक्तिविभूषितां॥ गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय॥ अंजल्यक्षतकर्माणिकृत्वाकंकणपूर्वकं॥

यावत्संचवृतासूत्रंतावदर्कंप्रवेष्टयेत्॥स्वशाखोक्तेनमंत्रेणगायत्र्यावाथवाजपेत्॥पंचीकृत्यपुनःसूत्रंस्कंधेबध्नातिमंत्रतः॥बृहत्सामेतिमंत्रेणसूत्ररक्षांप्रकल्पयेत्॥अर्कस्यपुरतःपश्चाद्दक्षिणोत्तरतस्तथा॥कुंभांश्चानिक्षिपेत्सश्चादाग्नेयादिचतुष्टये॥सवस्त्रंप्रतिकुंभंचत्रिसूत्रेणैववेष्टयेत्॥हरिद्रागंधसंयुक्तंपूरयेच्छीतलंजलं॥प्रतिकुंभंमहाविष्णुंसंपूज्यपरमेश्वरं॥पाद्यार्घ्यादिनिवेद्यांतंकुर्यान्नाम्नैवमंत्रवित्॥अत्रशौनकोक्तोहोमप्रकारः॥तृतीयेस्त्रीविवाहेतुसंप्राप्तेपुरुषस्यतु॥अर्कविवाहंवक्ष्यामिशौनकोहंविधानतः॥अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत्॥नांदीश्राद्धंप्रकुर्वीतस्थंडिलंचप्रकल्पयेत्॥अर्कमभ्यर्च्यसौर्याचगंधपुष्पाक्षतादिभिः॥सौर्यासूर्यदैवत्यया॥आकृष्णेनेत्यनया॥स्वयंवालंकृतस्तद्वद्वस्त्रमाल्यादिभिःशुभैः॥अर्कस्योत्तरदेशेतुसमन्वारब्धएतया॥एतयाअर्ककन्यया॥उल्लेखनादिकंकुर्यादाघारांतमतःपरं॥आज्याहुतिंचजुहुयात्संगोभिरनयैकया॥यस्मैत्वाकामकामायेत्येतयर्चाततःपरं॥व्यस्ताभिश्चसमस्ताभिस्ततश्चस्विष्टकृद्भवेत्॥परिषेचनपर्यंतमयाश्चेत्यादिकंक्रमात्॥प्रार्थनामंत्रादिविशेषमाहव्यासः॥पुनःप्रदक्षिणंकृत्वामंत्रमेतमुदीरयेत्॥मयाकृतमिदंकर्मस्थावरेषुजरायुणा॥अर्कापत्यानिनोदेहितत्सर्वंक्षंतुमर्हसि॥इत्युक्त्वाशांतिसूक्तानिजप्त्वातंविसृजेत्पुनः॥गोयुग्मंदक्षिणांदद्यादाचार्यायचभक्तितः॥इतरेभ्योपिविप्रेभ्योदक्षिणांचापिशक्तितः॥तत्सर्वंगुरवेदद्यादंतेपुण्याहमाचरेत्॥अथप्रयोगः॥तृतीयोद्वाहात्प्राग्दिनचतुष्टयाधिकव्यवहितेरविवारेशनिवारेहस्तनक्षत्रेशुभदिनांतरेवाग्रामात्प्राच्यामुदीच्यांवापुष्पफलयुतार्काधस्तात्स्थंडिलंकृत्वाऽर्कपश्चिमतउपविश्यमासपक्षाद्युल्लिख्यममतृतीयमानुषीविवाह

जदोषापनुत्त्यर्थमर्कविवाहं करिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्यवरणानिकुर्यात्॥तत्रवृद्धिश्राद्धं हेम्ना॥अथाचार्येणपूजितोवरः॥त्रिलोकवासिन्सप्ताश्वच्छाययारहितोरवे॥तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु॥इत्यर्कंसंप्रार्थ्योऽर्कं॥आकृष्णेनेति छायासहितंरविमावाह्यश्वेतवस्त्रसूत्राभ्यामावेष्ट्यसंपूज्यापोहिष्ठेत्यादिभिरभिषिच्यगुडोदनतांबूलादिसमर्प्यप्रदक्षिणीकुर्वन्ममप्रीतिकरायेयंमयासृष्टापुरातनी॥अर्कजाब्रह्मणासृष्टा अस्माकंप्रतिरक्षत्विति पठेत्॥द्वितीयप्रदक्षिणायांतु॥नमस्तेमंगलेदेविनमःसवितुरात्मजे॥त्राहिमांकृपयादेविपत्नीत्वंमेइहागता॥अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच॥वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः॥तृतीयोद्वाहजंपापमृत्युंचाशुविनाशयेति॥ ततआचार्येणमासपक्षाद्युल्लिख्यकाश्यपगोत्रामादित्यस्यपुत्रींसवितुःपौत्रीमर्कस्यप्रपौत्रीमिमामर्ककन्यामित्युक्तेवरः स्वस्तिनइंद्रोवृद्धश्रवाइतिसूक्तंपठन्नर्कंनिरीक्षेत॥ततआचार्योविप्रैःसहाशिषोदत्वामुकगोत्रामुकशर्मणेसंप्रददइत्यर्ककन्यांदत्वा॥अर्ककन्यामिमांविप्रयथाशक्तिविभूषितां॥गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रयेतिपठेत्॥वरस्तुयज्ञोमेकामःसमृद्ध्यतामितिप्रथमांधर्मोमेइतिद्वितीयांयशोमेतृतीयामितित्रीनक्षतांजलीनर्कोपरिक्षिप्त्वागायत्र्यापरित्वेत्यादिनावापंचावृतासूत्रेणार्कमावेष्ट्यतत्सूत्रंपुनःपंचगुणंकृत्वार्कस्यस्कंधेबध्वाबृहत्सामेतिरक्षांपरिकल्प्यार्कस्यदिग्विदिक्ष्वष्टौकुंभान्संस्थाप्यवस्त्रेणत्रिसूत्रेणचावेष्ट्यहरिद्रागंधाद्यंतःक्षिप्त्वातेषुनाम्नामहाविष्णुमावाह्यषोडशोपचारैः संपूज्यस्थंडिलेग्निंप्रतिष्ठाप्य आघारावाज्येनेत्यंतमुक्त्वात्रप्रधानंबृहस्पतिमग्निंवायुंसूर्यंप्रजाप

तिंचाज्येनशेषेणेत्याद्युक्त्वाघारांतेसंगोभिरंगिराबृहस्पतिस्त्रिष्टुप्॥ अर्कविवाहहोमेविनियोगः॥ ओंसंगोभिरांगिरसोनक्षमाणोभगइवेदर्यम
णंनिनाय॥जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाजयाशूरि वाजोस्वाहा॥बृहस्पतयइदंनममेतित्यजेत्॥यस्मैत्वावामदेवोग्निस्त्रिष्टुप्विनियोगः॥प्रा
ग्वत्॥ओंयस्मैत्वाकामकामायवयसम्राड्यजामहे॥तमस्मभ्यंकामंददस्वयथेदंत्वंघृतंपिबस्वाहाग्नयइदं॥ततोव्यस्तसमस्तव्याहृतिभिर्हुत्वा
स्विष्टकृदादिकर्मशेषंसमाप्यार्कंप्रदक्षिणीकृत्य॥मयाकृतमिदंकर्मस्थावरेणजरायुणा॥अर्कापत्यानिनोदेहितत्सर्वंक्षंतुमर्हसीतिप्रार्थ्याचा-
र्यायगोयुग्ममन्येभ्यश्चविप्रेभ्योयथाशक्तिदक्षिणांदत्वाशांतिसूक्तंजस्वापूज्योपस्करानाचार्यायदत्वादिनचतुष्टयमग्निंकुंभांश्चरक्षेत्॥कुं
भेषुमहाविष्णुंपूजयेच्च॥पंचमदिनकृत्यंब्राह्मे॥चतुर्थेदिवसेतीतेपूर्ववत्तांप्रपूज्यच॥विसृज्यहोममग्निंचविधिनामानुषींपरां॥उद्वहेदन्यया
नैवपुत्रपौत्रसमृद्धिमान्॥ ॥इतिश्रीभट्टनीलकंठकृतेभगवतभास्करेशांतिमयूखेऽर्कविवाहः॥नारदः॥कुलीरवृषचापांत्यनृयुक्कन्यातुलाघ
टाः॥राशयःशुभदाज्ञेयानारीणांप्रथमार्त्तवे॥कुलीरःकर्कटः॥चापंधनुः॥अंत्योमीनः॥नृयुङ्मिथुनं॥घटःकुंभः॥स्मृतिचंद्रिकायां॥शुक्लपक्षे
सुशीलास्यात्कृष्णेसाकुलटाभवेत्॥कृष्णस्यदशमींयावत्मध्यमंफलमादिशेत्॥तथातत्रैव॥अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि॥प
रिघस्यचपूर्वार्द्धेव्यतीपातेचवैधृतौ॥संध्यासूपप्लवेविष्ट्यामशुभंप्रथमार्त्तवं॥रोगीपतिव्रतादुःखीपुत्रिणीभोगभागिनी॥पतिव्रताक्लेशयु
क्तासूर्यवारादिषुक्रमात्॥कश्यपस्तु॥अष्टमीषष्ठमारिक्ताद्वादशीसंक्रमेपिवा॥वैधृतौव्यतिपातेचग्रहणेचंद्रसूर्ययोः॥विष्ट्यांसंध्यासुनि

द्रायांदुर्भगाप्रथमार्त्तवा। नक्षत्रफलमाहगर्गः॥ सुभगाचैवदुःशीलावंध्यापुत्रसमन्विता॥ धर्मयुक्ताव्रतघ्नीचपरसंतानमोदिनी॥ सुपुत्राचैवदुःपुत्रापितृवेश्मरतासदा। दीनाप्रज्ञावतीचैवपुत्राढ्याचित्रकारिणी॥ साध्वीपतिव्रतानित्यंसुपुत्राकष्टचारिणी॥ स्वकर्मनिरताहिंस्रापुण्यापौत्रादिसंयुता॥ नित्यंधनकथासक्तापुत्रधान्यसमन्विता॥ मूकार्थाढ्याधनवतीदस्रर्क्षादिः क्रमात्फलं॥ स्मृतिरत्ने॥ शुभंचैवतुपूर्वाह्णेमध्याह्नेमध्यमंफलं॥ अपराह्णेतुवैधव्यंपूर्वरात्रेशुभंभवेत्॥ मध्यरात्रेतुमध्यंस्यात्पररात्रेशुभान्विता॥ कश्यपः॥ मलिनामंदवारेतुरात्रावपितथैवचेति॥ स्मृत्यंतरे॥ मध्याह्नेतुभवेद्वेश्यानिशीथेविधवाभवेत्॥ तथा॥ अमासंक्रांतिविष्ट्यांचव्यतीपातेचवैधृतौ॥ परिघस्यतुपूर्वार्द्धेषट्षट्गंडातिगंडयोः॥ व्याघातेनवमूलेतुनाड्यःपञ्चचतुर्दश॥ वैधव्यमर्थहानिंचसुतनाशंमहद्भयं॥ वैधव्यंशत्रुवृद्धिंचदारिद्र्यंक्षीणजीवनं॥ तेजोहानिंसमायातिसदापुष्पवतीक्रमात्॥ स्थलभेदेफलभेदमाहवशिष्ठः॥ ग्रामाद्बहिःपरग्रामेवाचेत्स्याद्व्यभिचारिणी॥ पतिव्रतापतिस्थानेसुशीलागृहमध्यके॥ ग्राममध्येतुवृद्धिःस्वविधवाचदिगंबरा॥ परागारेचदुःशीलाआयुष्यंजलसन्निधौ॥ वनमध्येतुकन्यायाधनधान्यसमृद्धिदा॥ परागारइत्यनेनैवपितृभ्रातृगृहेनिषिद्धं॥ तथाचशिष्टाचारः॥ विशेषनिषेधस्तुनदृश्यते॥ तथा॥ चंद्रेसद्गुणसंयुक्तेदेवरातमताच्छुभं॥ शावाशौचेपिअशुभमितिगुरवः॥ वस्त्रफलमाहवशिष्ठः॥ सुभगाश्वेतवस्त्रास्याद्दृढवस्त्रापतिव्रता॥ क्षौमवस्त्राक्षितीशास्यान्नववस्त्रासुखान्विता॥ दुर्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवाससा॥ नीलांबरधरानारीविधवापुष्पितायदि॥ मलिनांबरतोनारीदरिद्रास्याद्रजस्वला॥ रजोबिंदुफलमाहसएव॥ वस्त्रेस्युर्वि-

षमारक्तबिंदवःपुत्रमाप्नुयात् ॥ समाश्चेत्कन्यकाचेति फलंस्यात्प्रथमार्त्तवे ॥ देवरातः ॥ संमार्ज्जनीकाष्ठतृणाग्निशूर्पान्हस्तेदधानाकुलटातदास्यात् ॥
तल्पोपभोगेतपसिस्थिताचेद्दृष्टंरजोभाग्यवतीतदास्यात् ॥ नारदः ॥ तिथ्यृक्षवारानिंद्याश्चेत्शेषःकर्मनिवारयेत् ॥ दोषाधिकेगुणाल्पत्वेतत्तथापिनकारयेत् ॥
दोषाल्पत्वेगुणाधिक्येशेफः कर्मसमाचरेत् ॥ निंद्यर्क्षतिथिवारेषुयदिपुष्पंप्रदृश्यते ॥ तत्रशांतिंप्रकुर्वीतघृतदूर्वातिलाक्षतैः ॥ प्रत्येकंशतमष्टौचगा
यत्र्याजुहुयात्ततः ॥ स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये ॥ भर्तातत्राभिगमनंवर्ज्जयेच्छुस्तदर्शनात् ॥ वशिष्ठोपि ॥ प्रभूतदोषंयदिदृश्यतेतत्पुष्पंततःशांति
ककर्मकार्यं ॥ विवर्ज्जयेदेवतदेकशय्यांयावद्रजोदर्शनमन्यघस्त्रे ॥ आर्त्तवानांतुनारीणांशांतिंवक्ष्यामिशौनकः ॥ तिथिवारर्क्षयोगेभ्योलग्नेशसनवांशकात्
॥ ग्रहेभ्योदुःस्थितेभ्यश्च तत्तदोषक्षयायच ॥ अत्रपुत्रस्यलाभायदंपत्योरभिवृद्धये ॥ पंचमेन्हिचतुर्थेवाग्रहयज्ञपुरःसरः ॥ तस्मिन्नहनिकर्त्तव्यमृतुहोमं
विधानतः ॥ आचार्यंवरयेत्प्रातर्भुवनेश्वरितुष्टये ॥ होमार्थंचजपार्थंचवरयेदृत्विजोबहून् ॥ यजमानोद्विजैःसार्द्धंशांतिहोमंसमाचरेत् ॥ गृहादीशानदि
ग्भागेदेवतापूजनायच ॥ द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् ॥ कुंभत्रयंन्यसेद्राशौतंतुवस्त्रादिवेष्टितम् ॥ पूरयेत्तीर्थसलिलैःप्रतिकुंभंपृथक्
पृथक् ॥ सूक्तेनाथनवर्चेनप्रसूव आपइत्यथ ॥ ऋचायाःप्रवतस्तदृज्ञायत्र्याचततःक्रमात् ॥ मध्यकुंभेक्षिपेद्धान्यमोषधानिचहेमच ॥ ततश्च
पंचरत्नानिगंधपुष्पाक्षतायुतान् ॥ औषधानिचवक्ष्यंतेमुनिभिःशांतिकारणात् ॥ औदुंबरंकुशादूर्वाराजीवंचंपबिल्वकाः ॥ विष्णुक्रांताथ
तुलसीबर्हिषशंखपुष्पिका ॥ शतावर्यश्वगंधाचनिर्गुंडीसर्षपद्वयम् ॥ अपामार्गःपलाशश्चपनसोजीवनस्तथा ॥ प्रियंगवश्चगोधूमाव्रीह-

योऽश्वत्थएवच।।क्षीरान्नदधिसर्पिश्चपर्णंचैवतथोत्पलान्।।कुरंटकश्चगुंजाचवचामुस्तकभद्रकाइति।।द्वात्रिंशदौषधानीहगायत्र्यासर्वमाहरेत्।।गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्।।राजद्वारप्रवेशाच्चमृदमानीयनिक्षिपेत्।।कुंभस्थापनमित्याहतत्तन्मंत्रेणकारयेत्।।मृत्तिकाऔषधादीनिमंत्रेणप्रक्षिपेत्क्रमात्।।कुंभोपरिन्यसेत्पात्रंकांस्यंवाताम्रमेववा।।मृन्मयंवेणुपात्रंवास्वस्ववित्तानुसारतः।।पात्रोपरिन्यसेद्वस्त्रेप्रतिमांभुवनेश्वरीं।।तन्मूल्यंवान्यसेत्पात्रेइंद्राणींचपुरंदरं।।आचार्यःपूजयेद्देवींगंगाद्यावरणानिच।।अन्योवापूजनकुर्याद्गायत्र्यामंत्रसारया।।इंद्राणींपूजयेद्देवीमिंद्राणीमास्कनारिषु।।क्रमेणपूजयेदिंद्रंइंद्रंवावृषभंवयं।।अनेनविधिनाचाथपूजयेद्देवतात्रयं।।आवाहनादिसकलैरुपचारैःपृथक्पृथक्।।तन्मध्यमंस्पृशन्कुंभंमंत्रेणभुवनेश्वरीं।।जपेदाचार्यआहोमाच्छ्रीसूक्तंचजपेत्ततः।।स्पृशन्वैदक्षिणंकुंभमृत्विगेकोजपेदथ।।चत्वारिरुद्रसूक्तानिचतुर्मंत्रोत्तराणिच।।संपश्यन्नुत्तरंकुंभंश्रीसूक्तंरुद्रसंख्यया।।शन्नइंद्राग्नीसूक्तंचतत्रचैवंस्पृशन्जपेत्।।कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत्।।अन्वाधानंततःकुर्याद्धोमतंत्रंसमाचरेत्।।पूर्णपात्रनिधानांतंकृत्वाकार्यंद्विजैःसह।।दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच।।पायसंश्रपयेत्तत्रसावित्रंचहविश्चतत्।।कृत्वाज्यभागपर्यंतंहविरुद्वासनादिकं।।तिसृभिश्चैवदूर्वाभिरेकैकावाहुतिर्भवेत्।।आभिर्मंत्रप्रयुक्ताभिर्गायत्रीजुहुयात्क्रमात्।।अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा।।तिलमिश्रैश्चगोधूमैर्द्रव्येणाप्याहुतीर्हुनेत्।।जुहुयात्पायसेनैवआज्येनचहुनेत्क्रमात्।।हविश्चतुष्टयेनैवप्रत्येकंशतसंख्यया।।गायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयं।।ततःस्विष्टकृतंहुत्वारज्जुप्रहरणंतथा।।

अयाश्चेत्यादिभिर्हुत्वासमुद्रादुर्मिसूक्ततः॥संततामाज्यधारांतांपूर्णाहुतिमथाचरेत्॥परिषेचनपर्यंतंहोमशेषंसमापयेत्॥सहौषधिस्थितैस्तत्रप्रतिकुंभस्थितोदकैः॥ऋतुमत्याःस्त्रियाःशांतिंदंपतीभ्यांस्करवायन्॥अथाभिषेकमंत्राश्चप्रोच्यंतेशौनकादिभिः॥आपोहिष्ठेतिनवभिःसूक्तेनचततःपरं॥इंद्रोअंगत्यृचेनैवपावमानीःक्रमेणतु॥उभयंशृणुवच्चन्नःस्वस्तिदाविशएकया॥त्र्यंबकेनमंत्रेणजातवेदसएकया॥समुद्रज्येष्ठाइत्यादिचतुर्भिश्चप्रसिद्धकैः॥त्रायंतामितिमंत्रैश्चत्रिभिश्चापियथाक्रमं॥इमाआपस्त्यृचेनैवदेवस्यत्वेतिमंत्रतः॥मंत्रेणाथतमीशानंत्वमग्नेरुद्रइत्यथ॥तमुष्टुहीतिमंत्रेणऋवनस्यपितुस्तथा॥यातेरुद्रेतिमंत्रेणशिवसंकल्पमंत्रतः॥इंद्रत्वावृषभंवयंमंत्रैश्चैवाभिषेचयेत्॥साचवस्त्रांतरंधृत्वापुनश्चैवोपवासिनी॥उपवासोत्रसमीपावस्थानं॥विप्रानभ्यर्च्यविधिवद्गंधपुष्पाक्षतादिभिः॥धेनुंपयस्विनींदद्यादाचार्यायचभूषणैः॥सदक्षिणमनड्वाहंप्रदद्याद्रुद्रजापिने॥ऋत्विग्भ्यश्चाथसर्वेभ्योदद्याद्दक्षिणांततः॥महाशांतिंप्रयच्छाथविप्राशीर्वचनंततः॥ब्राह्मणान्भोजयेच्चैवभुंजीयात्स्वजनैःसह॥स्मृतौ॥ब्राह्मणान्भोजयित्वातुदैवज्ञंभोजयेत्ततः॥एवंयःकुरुतेशांतिंशौनकोक्तप्रकारतः॥तदनिष्टंतुसकलंसर्वंचापिविनश्यतीति॥ इतिशौनकोक्तरजोदर्शनदोषशांतिः॥अथप्रयोगः॥कर्त्तादेशकालौस्मृत्वाममपत्न्याःप्रथमरजोदर्शनेऽमुकदुष्टमासादिसूचितारिष्टनिरसनार्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनस्वस्तिवाचनमातृकापूजनाभ्युदयिकाचार्यर्त्विग्वरणानिकुर्यात्॥अथाचार्योगृहेशान्यांप्रत्येकंमन्त्रावृत्यापदार्थानुसमयेनकुंभत्रयंस्थापयेत्॥तद्यथा॥महीद्यौरितिमध्येतद्दक्षिणोत्तरतश्चस्पृष्ट्वाओषधयइतिस्पर्शक्रमेणतेषुस्थानेषुद्रोणप्रमाणान्राशीकृ

त्यतेनैवक्रमेणराशित्रये आकलशेष्वितिकुंभत्रयंसंस्थाप्यमध्येमस्रुवन्नापइतिनवगर्भि स्तद्दक्षिणेयाप्रवतइत्यृचातदुत्तरेगायत्र्याजलंक्षिप्त्वात्रि
ष्वपिगंधद्वारामितिगंधं॥याओषधीरितिसर्वौषधीरोषधयःसमितियवान्क्षिप्त्वामध्यमएवयवव्रीहितिलमाषकंगुश्यामाकमुद्गान्क्षिप्त्वोदुंबरकु
शदूर्वारक्तोत्पलपंचबिल्वविष्णुक्रांतातुलसीबर्हिषशंखपुष्पीशतावर्यश्वगंधानिर्गुंडीरक्तपीतसर्षपापामार्गपलाशपनसजीवकप्रियंगुगोधूम
व्रीह्यश्वत्थदधिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचाभद्रकमुस्तकाख्यानिद्वात्रिंशदोषधानियथासंभवंवागायत्र्याक्षिप्त्वा
त्रिषुदूर्वापंचपल्लवसप्तमृत्तिकाफलपंचरत्नस्रुवर्णानिक्षिप्त्वायुवासुवासाइतिवाससासूत्रेणवाकुंभकंठान्वेष्टयित्वागंधादिभिरलंकृत्यपूर्णाद्वी
तियवादिपूर्णपात्राणिनिधायतेषुसाष्टदलंश्वेतंवस्त्रत्रयंन्यस्यमध्यमेगायत्र्याविश्वामित्रोभुवनेश्वरीगायत्रीभुवनेश्वर्यावाहनेविनियोगः
॥तत्सवितुरितिभुवनेश्वरींतद्दक्षिणकुंभेइंद्राणींवृषाकपिरिंद्राणीपंक्तिइंद्राण्यावाहनेविनियोगः॥इंद्राणीमास्वितींद्राणीमुत्तरकुंभेइंद्रत्वावि
श्वामित्रइंद्रोगायत्रीइंद्रावाहनेविनियोगः॥इंद्रत्वेतींद्रंप्रतिमासुस्थाप्यषोडशभिःपंचभिर्वोपचारैरभ्यर्च्यमध्यमेष्टसहस्रमष्टशतंवागायत्रीं
श्रीसूक्तंचजपेत्॥ततएकर्त्विक्दक्षिणकुंभेरुद्रसूक्तानिजपेत्॥तानिचकद्रुद्रायेत्येकादशर्चं॥इमारुद्रायतवसइत्येकादशर्चं॥इमारुद्रायस्थि
रधन्वनइतिपंचर्चं॥आतेपितरितिपंचदशर्चं॥तमुष्टुहीत्येका॥भुवनस्यपितरित्येका॥अथान्यश्चर्त्विगुत्तरकुंभेएकादशावृत्तिभीरुद्रंश
न्नइंद्राग्नीतिपंचदशर्चंचजपेत्॥अथाचार्यःकुंभपश्चिमेग्निंप्रणीयतदीशान्यांग्रहस्थापनादिपूजांतंकृत्वातदीशान्यामेकंकुंभंसंस्थाप्यत

त्रवरुणावाहनादिपूजांतंकृत्वाऽन्वादध्यात्॥तत्रास्मिन्नन्वाहितेऽग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाभुवनेश्वरीमिंद्राणीमिंद्रंचप्रत्येकम
मुकसंख्ययादूर्वातिलमिश्रगोधूमपायसाज्यैर्ग्रहांश्चामुकसंख्ययासमिच्चर्वाज्यैः शेषेणस्विष्टकृतमित्यादियक्ष्यइत्यंतमुक्त्वापरिस्तरणाद्याज्य
भागांतकृत्वायजमानेनांगप्रधानदेवताउद्दिश्यैताभ्यइदंनममेत्युक्तेऋत्विग्भिः सहान्वाधानोक्तक्रमेणजुहुयात्॥ अन्येतुगायत्र्यैवतुहोतव्यं
हविरत्रचतुष्टयं॥ततः स्विष्टकृतंहुत्वेत्यत्रेंद्राणींद्रयोर्होमानभिधानान्नतयोर्होमोऽन्वाधानेचाकीर्त्तनमित्याहुः॥ततः स्विष्टकृदादिबलिदानांतं
कृत्वासमुद्रादूर्मिरितित्र्यृचेनपूर्णाहुतिहुत्वाप्रणीताविमोकंकृत्वाऋत्विग्भिः सहसभार्यंयजमानंकुंभोदकैरभिषिंचेत्॥तत्रमंत्राः॥आपोहिष्ठे
ति ९ ऋचः यएकइद्विदंयतइतित्रिभिस्त्वदेवेति॥७॥ऋचः उभयंशृणवच्चनेतिस्वस्तिदाविशोयामिति॥त्र्यंबकमिति॥जातवेदसइति॥
समुद्रज्येष्ठाइति॥४॥ऋचः॥त्रायंतामिति॥३॥ऋचः॥इमाआपइति॥३॥ऋचः॥देवस्यत्वेति॥३॥मंत्रैः॥तमीशानंजगतः॥त्वमग्नेरुद्र
इत्येकंयजुः॥तमुष्टुहीतिभुवनस्यपितरं॥यातेरुद्रेति॥यज्जाग्रतइति॥६॥एतेयाजुषाः॥इंद्रत्वावृषभंवयमिति॥५॥ऋचः॥सुरास्त्वा
मभिषिंचंत्वित्याद्याः॥९॥पौराणाः॥एवमभिषिक्तः सुस्नातोधृतशुक्लवासाः सपत्नीकोयजमानोऽग्निमाचार्यादींश्चसंपूज्याचार्यायधेनुंब्रह्मणे
ऋत्विग्भ्यश्चयथाशक्तिदक्षिणांरुद्रजापिनेसदक्षिणमनड्वाहंभूयसींचदत्वाग्रहपीठदेवतानांभुवनेश्वर्यादीनांचोत्तरपूजांकृत्वायांतुदेवग
णाइतिविसृज्याचार्यायप्रतिपाद्यगच्छगच्छेत्यग्निंविसर्जयेत्॥ततोब्राह्मणाः शांतिंपठेयुः॥तत्रमंत्राः॥आनोभद्राइति॥१०॥ऋचः॥स्व

स्तिनोमिमीतामिति॥१५॥ऋचः॥ त्यमूष्विति॥३॥ऋचः॥ तच्छंयोरितिच॥ ततोयजमानोद्वादशब्राह्मणान् भोजयित्वासंकल्प्यवाविप्राशिषोगृहीत्वासुहृद्युतोभुंजीत॥ अथचंद्रार्कोपरागकालीनाद्यरजोदर्शनेविशेषः॥ कर्त्तोक्तकालेमासपक्षाद्युल्लिख्यममपत्न्याश्चंद्रस्यसूर्यस्यवाउपरागेप्रथमरजोदर्शनसूचितानिष्टनिरासार्थंशांतिंकरिष्यइतिसंकल्प्यप्राग्वत्ऋत्विक्पूजांतंकुर्यात्॥ अथाचार्योगोमयोपलिप्तेदेशेपंचवर्णैरष्टदलंकृत्वातत्रश्वेतवस्त्रमुदग्दशंप्रसार्यतत्रचंद्रोपरागेआप्यायस्वेतिराजत्यांप्रतिमायांचंद्रंसूर्योपरागेतुआकृष्णेनेतिसौवर्ण्यांवासूर्यंप्रतिमायामावाह्यतदुत्तरतःस्वर्भानोइतिसैस्यांप्रतिमायांराहुमावाह्ययस्मिन्नक्षत्रेग्रहणंतन्नक्षत्रदेवतायांसौवर्णप्रतिमायांतत्तन्मंत्रैःप्रणवादिनमोंतैर्नाममंत्रैर्वाऽऽवाह्यकांडानुसमयेनषोडशोपचारैःपूजयेत्॥ तत्रचंद्रायनक्षत्रदेवताभ्यश्चश्वेतानिगंधादीनि॥ सूर्यायरक्तानि॥ राहवेकृष्णानि॥ ततःपश्चिमतोग्निंप्रतिष्ठाप्यपक्षेग्रहावाहनादिपूजांतंकृत्वाऽन्वादध्यात्॥ तत्रचक्षुषीआज्येनेत्यंतमुक्त्वा चंद्रंसूर्यंवाराहुंनक्षत्रदेवतांपक्षेग्रहांश्चामुकसंख्ययासमिदाज्यचरुतिलाहुतिभिःशेषेणेत्यादिसमित्सुविशेषः॥ चंद्रर्क्षदेवतयोःपालाशः सूर्यस्यार्कः॥ राहोर्दूर्वाताश्चतिस्रएकाहुतिः॥ अथाज्यभागांतंकृत्वायजमानेनद्रव्येत्यक्तेन्वाधानक्रमेणलिंगिभिःसहहुत्वास्विष्टकृदादिपूर्णाहुत्यंतंप्राग्वत्कृत्वैकस्मिन्कुंभेजलपंचगव्यरत्नत्वक्पल्लवसर्वौषधिकल्पदूर्वाकुशान्निक्षिप्यसर्त्विक्दंपतीपूर्ववदभिषिंचेत्॥ तत्रमंत्राः॥ आपोहिष्ठेति॥३॥ ऋचः॥ इमंमेगंगेत्येका॥ तत्त्वायामीत्येका॥ अन्येपिसमुद्रज्येष्ठासुरास्त्वामित्यादयश्चशेषंपूर्ववत्॥ इतिदुष्टरजोदर्शनशांतिप्रयोगः॥ ॥गर्गः॥ पित्रोरिष्टेसुतारिष्टेमात्ररिष्टेतथैवच॥ प्रायश्चित्तंतदाकुर्यात्तत्रदोषस्य

शांतये।।तादृशनक्षत्रोसत्यासूचितेपित्राद्यरिष्टेप्रायश्चित्तमित्यत्रापितत्तदित्यन्वेति।।देहलीदीपवत्।।तत्तद्दोषशांत्यै तत्तत्प्रायश्चित्तंकुर्यादित्यर्थः।।पूषाश्विनोर्गुरोसर्पमघाचित्रेंद्रमूलभे।।एषुऋक्षेषुजातस्यकुर्याद्गोजननंतथा।।जन्मर्क्षेवानिजजन्मर्क्षेशुभवारेशुभेदिने।।कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकं।।गोमयेनोपलिप्याथगृहस्यैशानभागके।।पंकजंकर्णिकायुक्तंरजोभिःश्वेतवर्णकैः।।व्रीहींस्तत्रविनिक्षिप्ययथावित्तानुसारतः।।नवशूर्पंतुतन्मध्येरक्तवस्त्रंप्रसारयेत्।।स्थापयित्वाशिशुंतत्रपुनःसूत्रेणवेष्टयेत्।।प्राङ्मुखंतमवाक्पादंतिलगर्भगतंशिशुं।।गोमुखंदर्शयित्वाथंपुनर्जातंतुगोमुखात्।।विष्णुर्योनिमितिसूक्तेनगव्येनस्नपयेच्छिशुं।।गवामंगेतिमंत्रेणगवामंगेषुसंस्पृशेत्।।विष्णोःश्रेष्ठेनमंत्रेणगोप्रसूतंतुबालकं।।आचार्यस्तुसमादायपश्चान्मात्रेददेत्तथा।।माताजघन्यभागस्थाशिशुमानीयतंमुखात्।।ततःपित्रेतदादद्यात्तोमात्रेप्रदापयेत्।।वस्त्रेस्थाप्यपिताऽस्याथपुत्रस्यमुखमीक्षयेत्।।गोमूत्रंगोमयंक्षीरंदधिसर्पिश्चसंयुतं।।आपोहिष्ठादिभिर्मंत्रैरभिषिंचेत्ततःशिशुं।।मूर्ध्निचाघ्रायतत्पुत्रंतन्मंत्रेणतदापिता।।अंगादंगात्संभवसिहृदयादभिजायसे।।आत्मावैपुत्रनामासिसजीवशरदःशतं।।मूर्द्ध्नित्रिरवघ्रायतंशिशुंस्थापयेत्ततः।।पुण्याहंवाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः।।दरिद्रायाथविप्रायतांगामभ्यर्च्यदापयेत्।।गोवस्त्रस्वर्णधान्यानिदद्यादकोदितःक्रमात्।।यथाशक्तिधनंदद्याद्ब्राह्मणेभ्यस्तदापिता।।ततोहोमंप्रकुर्वीतस्वस्वशाखोक्तमार्गतः।।उल्लेखनादिकंकृत्वाचाज्यभागांतमाचरेत्।।होमस्यैशानदिग्भागेधान्योपरिशुभंघटं।।पंचगव्यंघटेस्थाप्यतिलांस्तत्रविनिक्षिपेत्।।क्षीरिद्रुमकषायांश्चपंचरत्नानिनिक्षिपेत्।।वस्त्रयुग्मेनसंछाद्य

गंधादिभिरथार्चयेत्॥विष्णुंवरुणमभ्यर्च्यप्रतिमांचविधानतः॥ प्रतिमांयक्ष्मह्णः अग्रेतद्दैवत्यहोमविधानात्॥चकाराद्व्ययतइंद्रादिभिर्मंत्रैःकुंभंस्पृष्ट्वाभिमंत्रयेत्।दधिमध्वाज्ययुक्तेनहोमंकुर्याद्विधानतः॥आपोहिष्ठेतितिसृभिरप्सुमेसोमइत्यथ॥तद्विष्णोःपरमंपदमक्षीभ्यांतेथसूक्ततः॥ऋग्भिराभिःप्रत्यृचंवाष्टाविंशतिसंख्यया॥अशक्तश्चाष्टसंख्यंवादधिमध्वाज्यसंयुतं॥आदित्यादिग्रहाणांचहोमंकुर्यात्समंत्रकं॥इतिगोमुखप्रसवविधिः॥ अथप्रयोगः ॥मासपक्षाद्युल्लिख्यास्यशिशोरमुकर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थंगोमुखप्रसवंकरिष्यइत्युक्त्वागणेशपूजनाचार्यवरणेकुर्यात्॥अथाचार्यःश्वेताष्टदलेव्रीहिस्थशूर्परक्तवस्त्रंविन्यस्यतिलान्विकीर्यतत्रप्राङ्मुखंशिशुंसंस्थाप्यसूत्रेणावेष्ट्यगोमुखात् प्रसवंविचिंत्यविष्णुर्योनिमितिसूक्तेनपंचगव्येनशिशुंसंस्नाप्यगवामंगेष्वितिगांस्पृष्ट्वाविष्णोःश्रेष्ठेनेतिशिशुंगृहीत्वामात्रेदद्यात्॥मातापित्रेदद्यात्॥पिताचमात्रेदत्वातन्मुखंसमीक्ष्यपंचगव्येनापोहिष्ठेतितिसृभिरभिषिच्यांगादितिमूर्ध्नित्रिरवघ्रायमात्रेदत्वापुण्याहंवाचयित्वागामाचार्यायदत्वाग्रहप्रीत्यर्थंगोवस्त्रस्वर्णधान्यादिदत्वाभूयसींदद्यात्॥अथाचार्योऽग्निंप्रतिष्ठाप्यचक्षुषीआज्येनेत्यंतं अप आपोहिष्ठेतित्र्यृचेन अप्सुमइत्यृचाचविष्णुंतद्विष्णोरित्यृचायक्ष्महणमक्षीभ्यामितिसूक्तेनग्रहांश्चप्रत्येकमष्टादिसंख्ययादधिमध्वाज्यैःशेषेणस्विष्टकृतमित्याद्युक्त्वाज्यभागांतंकृत्वाग्नेरीशान्यांकुंभंसंस्थाप्यतत्रपंचगव्यातिलव्रीहिक्षीरद्रुमकषायान्क्षिप्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रोपरितद्विष्णोरितिविष्णोस्तत्त्वायामीतिवरुणस्याक्षीभ्यामितियक्ष्महणश्चप्रतिमाअभ्यर्च्यइंद्रेतिषडृचोजप्त्वान्वाधानक्रमेण

हुत्वाकर्मशेषंसमापयेदितिगोमुखप्रसवप्रयोगः॥ अथसदंतोत्पत्तिशांतिः ॥विष्णुधर्मोत्तरे॥उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः॥द्विजादं
ताः॥दंतैर्वासहयस्यस्याज्जन्म भार्गवसत्तम॥ मातरंपितरंवाथखादेदात्मानमेववा॥ तत्रशांतिंप्रवक्ष्यामितांमेनिगदतःशृणु॥ गजपृष्ठगतंबा
लंनौस्थंवास्नापयेद्द्विज॥तदभावेचसर्वज्ञकांचनेचवरासने॥सर्वौषधैःसर्वबीजैःसर्वपुष्पैःफलैस्तथा॥पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभार्गव
॥सर्वौषधानिसर्वगंधाश्चविनायकस्नपनविधौदर्शिताः॥स्थालीपाकेनधातारंपूजयेत्तदनंतरं॥सप्ताहंचात्रकर्तव्यंततोब्राह्मणभोजनं॥ अष्ट
मेह्निविप्राणांतथादेयाचदक्षिणा॥कांचनंरजतंगाश्चभुवमागारमेवतु॥दंतजन्मनिसामान्येशृणुस्नानमतःपरं॥ भद्रासनेनिवेश्यैनंमू
द्भिमूलैःफलैस्तथा॥सर्वौषधैःसर्वगंधैःसर्वबीजैस्तथैवच॥स्नापयेत्पूजयेच्चात्रवन्हिंसोमंसमीरणं॥पर्वतांश्चतथाख्यातान्देवदेवंचके
शवं॥एतेषामेवजुहुयाद्धुतमग्नौतथाविधि॥ब्राह्मणानांचदातव्यायथाशक्त्यातुदक्षिणा॥ततस्त्वलंकृतंबालमासनेचोपवेशयेत्॥आसीनसूय
संतानबीजैःस्रुस्नापयेत्ततः॥स्रुविप्रबालकानांचतैश्चकार्यंचपूजनं॥पूज्यश्चविधिनाचार्योब्राह्मणाःसुहृदस्तथा॥ इतिसदंतोत्पत्तिशांतिः॥
अथकृष्णचतुर्दशीजननशांतिः॥गर्गः॥कृष्णपक्षेचतुर्दश्यांप्रसूतेःषड्विधंफलं॥चतुर्दशींचषड्भागांकुर्यादाद्यंशुभंस्मृतं॥द्वितीयेपितरंह
तितृतीयेमातरंस्मृतं॥चतुर्थेमातुलंहंतिपंचमेवंशनाशनं॥षष्ठेतुधनहानिःस्यादात्मनोवंशनाशनं॥तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः॥
आचार्यंवरयेद्धीमान्पुत्रदारसमन्वितं॥स्वकर्मनिरतंशांतंश्रोत्रियंवेदपारगं॥ सर्वालंकारसंयुक्तंसर्वलक्षणसंयुतं॥वृषभेचसमासीनंवर

दाभयपाणिनं॥शङ्खस्फटिकसंकाशंश्वेतमाल्यांबरान्वितं॥त्र्यंबकेणचमंत्रेणपूजांकुर्याद्विधानतः॥स्थापयेच्चतुरःकुंभांश्चतुर्दिक्षुयथाक्रमं॥पुण्यतीर्थजलोपेतान्धान्यस्योपरिविन्यसेत्॥तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितं॥पंचमृत्पंचरत्नानिपंचत्वक्पंचपल्लवान्॥पंचधान्यंसुवर्णंचतत्तन्मंत्रैर्विनिक्षिपेत्॥सर्वौषधानिनिक्षिप्यश्वेतवस्त्रेणवेष्टयेत्॥सुरभीणिचपुष्पाणिश्वेतानिपरिवेष्टयेत्॥सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयांतुयजमानस्यदुरितक्षयकारकाः॥आवाह्यवारुणैर्मंत्रैरनेनचविधानतः॥इमंमेवरुणेत्यनयातत्त्वायामिश्चातथा॥त्वन्नोअग्नइत्यनयासत्वन्नइतिमंत्रतः॥आग्नेयकुंभमारभ्यपूजांकुर्याद्यथाक्रमं॥आनोभद्राख्यसूक्तंचभद्राअग्नेश्चसूक्ततः॥जस्वातुपौरुषंसूक्तंकद्रुद्रंतुक्रमाज्जपेत्॥ईश्वरस्याभिषेकंचग्रहपूजांचकारयेत्॥पूजाकर्मसुनिर्वर्त्यहोमंकुर्याद्विधानतः॥गृहादीशानदिग्भागेकुंडकार्यंविधानतः॥विस्तारायामखातंचअरत्निद्वयसंमितं॥समिदाज्यचरुश्चैवतिलमाषांश्चसर्षपैः॥अश्वत्थप्लक्षपालाशसमिद्भिःखादिरैःशुभैः॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥अष्टाविंशतिमेतैश्चहोमंकुर्यात्पृथक्पृथक्॥त्र्यंबकेणमंत्रेणतिलान्व्याहृतिभिःक्रमात्॥कृत्वाहोमांश्चकर्त्तव्याअस्मदुक्तविधानतः॥एवंक्रमेणकर्त्तव्यंहोमशेषंसमापयेत्॥सर्वालंकारयुक्तानांत्रयाणामभिषेचनं॥त्रयाणांमातापितृशिशूनां॥चतुर्भिःकलशैरद्भिर्द्रहकुंभसमन्वितं॥धौतांबराणिधृत्वाथकुर्यादाज्यावलोकनं॥पूर्णाहुतिंचजुहुयाद्यजमानःसमाहितः॥नत्सर्वंपरयाभक्त्याईश्वरायनिवेदयेत्॥सर्वालंकारसंयुक्तांसवत्सांगांपयस्विनीं॥प्रतिमांवस्त्रयुग्मंचआचार्यायनिवेदयेत्॥अन्येषांचैवस

वैषांकुर्याद्ब्राह्मणवाचनं।।तस्मादेतेनविधिनावित्तशाठ्यविवर्जितः।।एवंयःकुरुतेशांतिंसर्वपापैःप्रमुच्यते।।सर्वान्कामानवाप्नोतिस्थिरजीवीसुखीभवेत्।।इतिकृष्णाचतुर्द्दशीशांतिः।। अथसिनीवालीकुहूशांतिः ।।गार्ग्यः।।सिनीवाल्यांप्रसूतास्याद्यस्यभार्यापशुस्तथा।।गजाश्वामहिषीचैवशक्रस्यापिश्रियंहरेत्।।येसंतिसकलाःपश्चात्तत्प्रसादोपजीविनः।।वर्ज्जयेत्तानशेषांस्तुपशुपक्षिमृगादिकान्।।कुहूप्रसूतिरत्यर्थंसर्वदोषकरीस्मृता।।यस्यप्रसूतिरेतेषांतस्यायुर्धननाशनं।।सर्वगंडसमस्तत्रदोषस्तुप्रबलोभवेत्।।तत्रशांतिविशेषेणपरित्यागोविधीयते।।परित्यागात्तत्रशांतिंकुर्याद्धीमान्विचक्षणः।।परित्यागादितिल्यब्लोपेपंचमी।।परित्यागंकृत्वेत्यर्थः।।तत्कालंतत्क्षणाद्वैनपुनरेवाऽनुलेपनं।।नत्यजेत्पंडितोमोहाद्याद्ज्ञानतोपिवा।।तद्योगंनाशयेत्किंचित्स्वयंवानाशमश्नुते।।कल्पोक्तशांतिःकर्त्तव्याशीघ्रंदोषापनुत्तये।।रुद्रःशक्रश्चपितरःपूज्याःस्युर्द्देवताःक्रमात्।।कर्षमात्रसुवर्णेनतदर्द्धार्द्धेनवापुनः।।अथवाशक्तितःकुर्याद्वित्तशाठ्यविवर्जितः।।प्रतिमांकारयेच्छंभोश्चतुर्भुजसमन्वितां।।त्रिशूलखड्गवरदाभयहस्तांयथाक्रमं।।श्वेतपुष्पांबरधरां श्वेतांबरवृषस्थितां।।त्रियंबकेणमंत्रेणपूजांकुर्याद्यथाविधि।।इंद्रश्चतुर्भुजोवज्रांकुशचापःससायकः।।रक्तवर्णोगजारूढोयतइंद्रेतिमंत्रतः।।पितरःकृष्णवर्णाश्चचतुर्हस्ताविमानगाः।।गदाक्षसूत्रकमंडल्वभयस्यैवधारिणः।।येसत्याइतिमंत्रेणपूजांकुर्यादनंतरं।।आग्नेयींदिशमारभ्यकुंभान्कोणेषुविन्यसेत्।।येसत्यासोहविरदइत्यादिमंत्रऋग्वेदेप्रसिद्धः।।तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितं।।निक्षिपेत्पंचगव्यादींस्तत्तन्मंत्रैश्चनिक्षिपेत्।।कल्पोक्तशांतिःकर्तव्याकुर्याच्छीघ्रंस्वशक्तितः।।गोदानंवस्त्रदानंच

सुवर्णंवोर्वरांशुभां ॥ दशदानानिचोक्तानिक्षीरमाज्यंगुडं तथा॥ आज्यवेक्षणमात्राणितत्तन्मंत्रैश्चकारयेत्॥ सामदाज्यंचहोमंचतिलहोमंचसर्षपैः ॥ अश्वत्थप्लक्षपालाशसमिद्भिः खदिरैः शुभैः॥ अष्टोत्तरशतंमुख्यंप्रत्येकंजुहुयाद्द्विजैः॥ त्रियंबकेणमंत्रेणतिलान्व्याहृतिभिः पुनः॥ चतुर्भिःकलशैर्युक्तंबृहत्कुंभसमन्वितं॥ शांतिवत्सकलंकार्यमभिषेकंचकारयेत्॥ शांतिवत्पूर्वोक्तशांतिवत्॥ मातापितृशिशूनांचअभिषिंचेत्तुवारुणैः॥ शंकरस्याभिषेकंचकुर्याद्ब्राह्मणभोजनं॥ अन्येषांचैवसर्वेषांब्राह्मणानांचतर्पणं॥ यथाशक्त्यनुसारेणद्विजवाचनपूर्वकम्॥ अथप्रयोगः॥ तत्रचतुर्दश्याःषडंशेषुद्वितीयतृतीयषष्ठांशेषुजन्मचेद्गोमुखप्रसवोपिकार्यः॥ कर्त्तामासपक्षाद्युल्लिख्यास्यशिशोश्चतुर्दश्याद्यभागादिषुसिनीवाल्यांकुह्वांवोत्पन्नस्यासूचितस्यानिष्टस्यनिरासार्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृकापूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात्॥ ततआचार्यःसर्षपविकिरणादिकृत्वापीठदेवरदाभयहस्तांवृषस्थांहेमींरुद्रप्रतिमांत्र्यंबकमंत्रेणसंपूजयेत्॥ सिनीवालीकुह्वोस्तुरुद्रेंद्रपितरः॥ तत्ररुद्रईशानोर्ध्वकरक्रमात्त्रिशूलखड्गवरदाभयहस्तोवृषस्थः त्र्यंबकमंत्रेण॥ इंद्रोवज्रांकुशधनुःशरकरोरक्तोगजस्थोयतइंद्रेतिमंत्रेणपितरःकृष्णवर्णागदाक्षसूत्रकमंडल्वभयकराविमानस्थायेसत्याइतिमंत्रेणपूज्याइतिविशेषः॥ ततस्तस्याच्यामीशान्यामुदीच्यांवाग्नेयादिषुचतुरःकुंभान्मध्येचशतच्छिद्रंसंस्थाप्यतेषुपंचमृत्संचरत्नपंचत्वक्पंचपल्लवधान्यानिसुवर्णंसर्वौषधीश्चक्षिप्त्वाश्वेतवस्त्रमालाभिरावेष्ट्यसर्वेसमुद्राइत्यभिमृश्यइमंमेवरुणतत्त्वायामित्वन्नोअग्नेसत्वन्नइतिक्रमेणवरुणमावाह्यसंपूज्यक्रमेणानोभद्राभद्राअग्नेसहस्रशीर्षाकद्रुद्रायेतिसूक्तानिक्रमाज्जप्त्वामहादेवंयथाशक्तिरुद्राध्यायादिनाभिषिच्यग्र

हानावाद्यसंपूज्यग्रहेशान्यामग्निंसंस्थाप्याऽन्वादध्यात्॥तत्रचक्षुषीआज्येनेत्यंतेचतुर्द्दशीशांतौरुद्रमश्वत्थप्लक्षपलाशखदिरसमिद्भिराज्यचरुतिलमाष
सर्षपैःप्रत्येकममुकसंख्ययाव्यस्तसमस्तव्याहृतिभिस्तिलैश्चामुकसंख्ययायक्ष्यइत्यादिसिनीवाल्यांकुह्वांचरुद्रमिंद्रंपितरश्चप्रधानदेवताःत्र्यंबकमंत्रेणचश
क्तितस्तिलहोमोधिकइतिविशेषः॥ततआज्यभागांतेऽन्वाधानोक्तक्रमेणहोमः॥सिनीवालीकुह्वोस्तुगोवस्त्रसुवर्णभूक्षीराज्यगुडान्दत्वागोभूतिलहिरण्या
ऽज्यवस्त्रधान्यगुडरूप्यलवणदानानिचदशकृत्वाहोमःकार्यइतिविशेषः॥ततोबलिदानांतेकलशोदकैःतच्छिद्रेणाऽब्देवत्यमंत्रैःपत्नीशिशुसहि
तोभिषिक्तोयजमानआज्यमवेक्ष्यपूर्णाहुतिंहुत्वागुरवेधेनुंवासोयुग्मंऋत्विग्भ्यश्चदक्षिणांदत्वास्वस्तिवाच्यकर्मेश्वरार्पणंकुर्यादितिकुह्वांचतुर्द्दशीसिनीवा
लीकुहूशांतिप्रयोगः॥अथदर्शजननशांतिः॥नारदः॥अथातोदर्शजातानांमातापित्रोर्दरिद्रता॥तद्दोषपरिहारार्थंशांतिंवक्ष्यामिनारद॥पुण्याहंवाच
यित्वादौक्रतुसंकल्पपूर्वकं॥कुंडंवामंडलंकुर्यात्तद्देशेस्थापयेद्घटं॥मंडलंस्थंडिलं॥तत्कुंभेनिक्षिपेद्द्रव्यंदधिक्षीरघृतादिकं॥न्यग्रोधोदुंबराऽश्वत्थाः
सचूताःप्लक्षकस्तथा॥एतेषांवृक्षमूलानांत्वचादीन्पल्लवांस्तथा॥पंचरत्नानिनिक्षिप्यवस्त्रयुग्मेनवेष्टयेत्॥सर्वेसमुद्राःसरितस्तीर्थानिजलदान
दाः॥आयांतुयजमानस्यदुरितक्षयकारकाः॥आपोहिष्ठेतित्र्यृचेनाथकयानश्चित्रइत्यृचा॥यत्किंचेदमृचाचैवसमुद्रज्येष्ठइत्यृचा॥अभिमंत्रोदकंप
श्चादग्नेःपूर्वप्रदेशके॥हारिद्रंरक्तकंचैवकृष्णांश्वेतंचजीरकं॥एतेषांतंडुलैश्चैवसर्वतोभद्रमुद्धरेत्॥दर्शस्यदेवतायाश्चसोमसूर्यस्वरूपकं॥प्रति
मांस्वर्णजांनित्यंराजतींताम्रजांतथा॥सर्वतोभद्रमध्येतुस्थापयेद्दर्शदेवताः॥ग्रहवर्णवस्त्रयुग्मंतद्वर्णंगंधपुष्पकम्॥आप्यायस्वेतिमंत्रेणस

वितायत्तथैवच ॥ उपचारैःसमाराध्यततोहोमंसमाचरेत् ॥ कृत्वावह्निंप्रतिष्ठाप्यक्रतुसंकल्पमीदृशं ॥ आयुरारोग्यसिध्यर्थंसर्वारिष्टप्रशांतये ॥ पुत्रस्यदर्शजननदोषनिर्हरणायच ॥ मातापित्रोःकुमारस्यसर्वारिष्टप्रशांतये ॥ तेषामायुःश्रियंचैवशांतिहोमंकरोम्यहं ॥ समिधस्यचरुद्रव्यंक्रमेणजुहुयात्कृती ॥ हुनेत्सवितृमंत्रेणसोमोधेनुंचमंत्रतः ॥ एतैर्मंत्रैश्चप्रत्येकंहुनेदष्टोत्तरशतं ॥ दर्शस्यदेवताहोमअष्टाविंशतिसंख्यया ॥ होममेवंतुकृत्वाचकुर्याद्धाराभिषेचनं ॥ श्रीसूक्तमायुसूक्तंचसमुद्रज्येष्ठइत्यृचा ॥ एतैर्मंत्रैरभिषेकंमातापित्रोःशिशोस्तथा ॥ ततःस्विष्टकृतंदद्याद्धोमशेषंसमापयेत् ॥ हिरण्यंरजतंचैवकृष्णांधेनुसदक्षिणां ॥ अन्येभ्योपियथाशक्त्यादातव्यादक्षिणातथा ॥ ब्राह्मणान्भोजयेदत्रकारयेत्स्वस्तिवाचनं ॥ इतिदर्शजननशांतिः ॥ अत्रसिनीवालीकुह्वोर्दर्शेचोक्तयोः शांत्योर्व्यवस्थोक्ताछंदोगपरिशिष्टभाष्ये ॥ चतुर्दश्याअंत्योऽमायाश्चाष्टावितिनवप्रहरश्चंद्रक्षयकालः ॥ चतुर्दश्यष्टमेयामेक्षीणोभवतिचंद्रमाः ॥ अमावास्याष्टमेयामेपुनःकिलभवेदणुरितिवाक्यात् ॥ अत्रेंदुराद्येप्रहरेवतिष्ठते चतुर्थभागेनकलावशिष्टः ॥ तदंतएवक्षयमेतिकृत्स्नाज्योतिर्विदश्चक्रविदोवदंतीतिचवाक्यात् ॥ अत्रचतुर्दश्यंत्याऽमाद्ययामयोरणुश्चंद्रःशास्त्रस्यचक्षुषोर्वागोचरोभवतिसकालोदृष्टचंद्रत्वात्सिनीवाली ॥ अमांत्योपांत्यमाययोःशास्त्रचक्षुषोरगोचरइतिक्षीणश्चंद्रःसकालःकुहूर्मध्यमाः पंचयामादर्शइतिव्यवस्थयाशांतिव्यवस्थेति ॥ परेतुचतुर्दशीमात्रयुक्तेऽहोरात्रेवर्त्तिन्यमासिनीवालीप्रतिपन्मात्रयुतेतिकुहूः ॥ वारत्रयस्पर्शिमध्यमाहोरात्रवर्त्तिन्यमादर्शः ॥ तस्मिन्चतुर्दशीप्रतिपदोरभावेनोभयलक्षणानाक्रांतत्वात् ॥ तथाऽवमवतीचामादर्शः ॥ केवलचतुर्दशीकेवल

प्रतिपद्युक्तत्वाभावात्॥अतस्त्रिस्पर्शिन्यामवमस्यांवासिनीवालीकुहूशांतिप्राप्त्यभावाद्दर्शशांतिप्राप्तिरितियुक्तमाहुः॥अथदर्शजननशांतिप्रयोगः॥कर्त्ताऽस्यकुमारस्यकुमार्यावादर्शजन्मसूचितानिष्टनिवृत्त्यर्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनाचार्यादिवरणानिकुर्यात्॥अथाचार्यःसर्षपविकिरणप्रोक्षणादिकृत्वाशुद्धभूमौजलपूर्णंपंचगव्यपल्लवत्वक्रत्नयुतंवासोयुग्मवेष्टितंकुंभंधान्योपरिसंस्थाप्यसर्वेसमुद्राइतितीर्थान्यावाह्यापोहिष्ठेतित्र्यृचेनकयानश्चित्रइत्यृचायत्किंचेदमित्यृचासमुद्रज्येष्ठाइतित्र्यृचेनचाभिमंत्र्यतन्नैर्ऋत्यदेशेपंचरंगरंजितैस्तंडुलैःसर्वतोभद्रंकृत्वातत्रस्वर्णप्रतिमयोर्येसत्यासइतिपितॄन्तद्दक्षिणेरूप्यप्रतिमायामाप्यायस्वेतिसोमंतदुत्तरेताम्रप्रतिमायांसवितापश्चातादितिसूर्यंचावाह्यसंपूज्यआयुरारोग्यसिद्ध्यर्थंसर्वारिष्टप्रशांतये॥तेषामायुःश्रियेचैवशांतिहोमंकरोम्यहमित्युक्त्वातत्पश्चिमेकुंभेस्थंडिलेवाग्निंप्रतिष्ठाप्यतदीशान्यांग्रहान्संपूज्याऽन्वाधानआधारावाज्येनेत्युक्त्वापितॄन्समिच्चरुभ्यामष्टाविंशतिवारंसोमंसूर्यंवाऽष्टोत्तरशतवारंशेषेणोत्साद्याज्यभागांतेऽन्वाधानक्रमेणपूजामंत्रैर्हुत्वामातापितृशिशून्हिरण्यवर्णामितिपंचदशर्चेनायुष्यंवर्चस्यमितिदशर्चेनसमुद्रज्येष्ठाइत्यृचाचजलधारयाभिषिच्यस्विष्टकृदादिसमापयेत्॥यजमानोबलिदानपूर्णाहुत्यंतेहेमरूप्यकृष्णाधेनूराचार्यायऋत्विग्भ्यश्चयथाशक्तिदक्षिणांदत्वाविप्रान्संभोज्यस्वस्तिवाचनंकुर्यादितिदर्शशांतिः॥घटिकैकाचमत्रांतेज्येष्ठादौघटिकाद्वयं॥तयोःसंधिरितिज्ञेयंशिशुगंडसमीरितं॥प्रथमेचद्वितीयेचज्येष्ठर्क्षेचतृतीयके॥पादत्रयेजातनरोज्येष्ठोप्यत्रप्रजायते॥ज्येष्ठांत्यपादजातस्तुपितुःस्वस्यविनाशकः॥जायतेनात्रसंदेहो

दशाहाभ्यंतरेतथा॥ज्येष्ठर्क्षेकन्यकाजाताहंतिशीघ्रंधवाग्रजं॥तच्छांतिंतस्यवक्ष्यामिगंडदोषप्रशांतये॥सुदिने शुभनक्षत्रे चंद्रताराबलान्विते॥सूतकांतेतथाकुर्याज्ज्येष्ठाशांतिंविधानतः॥वज्रांकुशधरंदेवंऐरावतगजान्वितं॥कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनायकं॥कर्षमात्रसुवर्णेनकर्षार्द्धेनाथपादतः॥तद्विधानंप्रकुर्वीतवित्तशाठ्यंनकारयेत्॥शालितंडुलसंपूर्णंकुंभस्योपरिपूजयेत्॥इंद्रायेंदोमरुत्वतइतिमंत्रेणवाग्यतः॥गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः॥पूजयेद्विधिनाविप्रलोकपालगणान्वितं॥रक्तवस्त्रद्वयोपेतंपूजयेत्सुरनायकं॥तत्रसंस्थापयेत्कुंभांश्चतुर्दिक्षुविशेषतः॥तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितं॥पुण्योदकसमायुक्तान्वस्त्रयुग्मेनवेष्टितान्॥कुंभेषुविन्यसेद्धीमान्पंचगव्यंसमंत्रकं॥पंचामृतपंचरत्नमृत्तिकाःपंचसंख्यकाः॥पंचवृक्षकषायांश्चपंचपल्लवकांस्तथा॥सुवर्णकुशदूर्वाश्चशतौषधीर्विनिक्षिपेत्॥पूजयेद्वारुणैर्मंत्रैःकुंभान्धीमान्प्रयत्नतः॥त्वन्नोअग्नेजपेदादौसत्वन्नोपिद्वितीयकम्॥समुद्रज्येष्ठाइतिचइमंमेगंगेचतुर्थकं॥पूजयेद्वस्त्रयुग्माद्यैश्चतुरःकलशानपि॥जपंकुर्युःप्रयत्नेनमंत्रैरेभिर्द्विजोत्तमाः॥आनोभद्राजपंचादौभद्राअग्नेद्वितीयकं॥इंद्रसूक्तंरुद्रजाप्यंजपमृत्युंजयंततः॥इत्थंसपूज्यदेवेशवरुणकुंभसस्थितम्॥सुसंकल्पविधानेनहोमकर्मततश्चरेत्॥समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंतथा॥सर्पिषाचरुणाचैवमूलमंत्रेणवाग्यतः॥हुनेज्जाप्यंचतेनैवयतइंद्रभयेतिच॥तिलान्व्याहृतिभिर्हुत्वाशतमष्टोत्तरंपृथक्॥भार्याशिशुसमोपेतंयजमानंविशेषतः॥अभिषेकंप्रकुर्वीतसूक्तैर्वारुणसंज्ञितैः॥समुद्रज्येष्ठादिभिर्मंत्रैरिमंमेवरुणस्तथा॥द्यौःशांत्येत्यादिभिर्मंत्रैरभिषेकंसमाचरेत्॥अभिषेकनिवृत्तौतुयजमानः

समाहितः॥ शुक्लांबराणिधृत्वाथकुर्यादाज्यावलोकनं॥ रूपंरूपेतिमंत्रेणाचित्रंतच्चक्षुरेवच॥ देवतापुरतास्थित्वाधूपदीपनिवेदनं॥ दद्याच्चाचमनंसम्यक्
तांबूलार्घ्यंतथैवच॥ नमस्तेसुरनाथायनमस्तुभ्यंशचीपते॥ गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये॥ कार्यंतत्पूजकादीनांकारितंयत्फलंशुभं॥ लब्ध्वा
तुतत्फलंसर्वंदेवेंद्रायसमर्पयेत्॥ आचार्यायचगांदद्यात्सुशीलांचपयस्विनीं॥ रक्तवर्णांवस्त्रयुतांसर्वालंकारभूषितां॥ वस्त्रयुग्माभिधानंचयथाविभ
वसारतः॥ यक्षगंधर्वसिद्धैश्चपूजितोसिशचीपते॥ दानेनानेनदेवेशगंडदोषंविनाशय॥ अष्टोत्तरशतंसंख्यांकुर्याद्ब्राह्मणभोजनं॥ तेभ्योपिदक्षिणांदत्वा
प्रणिपत्यक्षमापयेत्॥ इमांकृत्वाज्येष्ठाशांतिंयथाविध्युक्तमार्गतः॥ गंडदोषंविनिर्जित्यआयुष्मान्जायतेनरः॥ इत्युक्तंवृद्धगार्ग्येणशौनकायवि
शेषतः॥ ज्येष्ठानक्षत्रसंभूतगंडदोषप्रशांतये॥ अज्ञानाद्यथवाज्ञानाद्वैकल्याद्वाधनस्यच॥ यन्न्यूनमतिरिक्तंवातत्सर्वंक्षंतुमर्हसि॥ अथप्रयोगः॥
गोमुखप्रसवंकृत्वाअस्याशिशोर्ज्येष्ठाजननसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंशांतिंकरिष्यइतिसंकल्प्य॥ गणपतिपूजनपुण्याह
वाचननांदीश्राद्धाचार्यर्त्विक्चतुष्टयवरणानिकुर्यात्॥ ततआचार्यःसर्षपविकिरणभूमिप्रोक्षणेकृत्वामहीद्यौरित्यादिविधिनाशालितंडुलपूर्णं
कुंभंसंस्थाप्यपूर्णपात्रोपरिहैमीमिंद्रप्रतिमांइंद्रायेंद्रोमरुत्वतइतिमंत्रेणरक्तवस्त्रद्वयेनगंधादिभिश्चवाग्यतःपूजयेत्॥ ततइंद्राभिन्नान्लोकपा
लान्समंतादावाह्यपूजयेत्॥ ततःपूर्वादिदिक्षुचतुरःकुंभान्मध्येशतच्छिद्रंपुण्योदकवस्त्रमाल्ययुतंसंस्थाप्यदिक्कुंभेषुपंचगव्यपंचामृतपं
चरत्नपंचमृत्तिकापंचत्वक्कषायपंचपल्लवसुवर्णकुशदूर्वाशतौषधीश्चदत्वापूर्वकलशेत्वन्नोअग्नइतिसत्वन्नोअग्नइतिदक्षिणेइमंमेवरुणइतिपश्चि

मेतत्त्वायामीत्युत्तरेचवरुणमावाह्यवस्त्रपुष्पाद्यैः पूजयेत्॥ ततश्चत्वारऋत्विजः॥ आनोभद्रांतेअग्नेपुरुषसूक्तंकद्रुद्रायेतिसूक्तानिजपेयुः॥ आचार्योमूलमंत्रंइंद्रंविश्वा अवीवृधमित्यष्टर्चंइंद्रसूक्तंरुद्रंमृत्युंजयंचजपेत्॥ ततोग्निंग्रहांश्चप्रतिष्ठाप्याऽन्वादध्यात्॥ अत्रप्रधानमिंद्रंपलाशसमिदाज्यचरुद्रव्यैरष्टशतसंख्ययाऽष्टसहस्रसंख्ययावाप्रजापतिंतिलद्रव्येणाष्टशतसंख्ययाव्याहृतिभिः शेषेणस्विष्टकृतमित्यादिबल्यंतेपूर्णाहुतिंपूर्णपात्रविमोकंचकृत्वासभार्यंसशिशुंयजमानंवारुणैःसूक्तैःसमुद्रज्येष्ठाइमंमेवरुणाद्यैः शांतेत्यादिभिरभिषिंचेत्॥ ततोरूपंरूपमित्याज्यमवलोक्यतत्सात्रसदक्षिणंब्राह्मणायदत्वाइंद्रंसंपूज्य नमस्तेसुरनाथायनमस्तुभ्यंशचीपते॥ गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये॥ इत्यर्घं दत्वाचार्य्यर्त्विगादिभ्यः श्रेयोगृहीत्वाइंद्रायसमर्प्याचार्य्यायपयस्विनींगांरक्तवस्त्रद्वयंचदत्वोत्तरपूजांतेइंद्रंविसृज्यप्रतिमां॥ यक्षगंधर्वसिद्धैश्चपूजितोसिशचीपते॥ दानेनानेनदेवेशगंडदोषंविनाशय॥ अज्ञानाद्वाथवाज्ञानाद्वैकल्याद्वाधनस्यच॥ यन्न्यूनमतिरिक्तंवातत्सर्वंक्षंतुमर्हसीतिमंत्रेणाचार्यायचदत्वाऋत्विग्भ्योपियथाशक्तिदत्वाग्निंविसृज्याष्टशतंब्राह्मणान्भोजयेत्॥ अथमूलशांतिः ॥शौनकः॥ अथातः संप्रवक्ष्यामि मूलजातहितायवै॥ मातापित्रोर्धनस्यापिकुलज्ञातिहितायच॥ त्यागोवामूलजातस्यस्यादष्टाब्दात्सदर्शनं॥ अभुक्तमूलजातानांपरित्यागोविधीयते॥ अदर्शनाद्वापिपितुःसतुतिष्ठेत्समाष्टकं॥ एवंदुहितरि प्रोक्तंमूल जायांफलंबुधैः॥ कन्यायांतुविशेषः॥ नबालाहंतिमूलर्क्षेपितरंमातरंतथा॥ मूलजाश्वशुरंहंतिव्यालजाचतदंगनां॥ माहेंद्रजाग्रजंहंति देवरंचद्विदैवजा॥ व्यालआश्लेषा॥ माहेंद्रंज्येष्ठा॥ द्विदैवंविशाखा॥ शांतिर्वापुष्कलाचेत्स्यात्तर्हिदोषोनकश्चनेति॥ मुख्यकालंप्रव

क्ष्यामि शांतिहोमजपंततः॥जातस्यद्वादशाहेचजन्मर्क्षेवाशुभेदिने॥समाष्टकेद्वादशाब्देकुर्याच्छांतिकमादरात्॥यदैवशांतिकंकुर्यात्कर्मतत्रप्रच
क्ष्महे॥संस्कृतेपुण्यदेशेतुमंडपंकारयेद्बुधः॥पुण्याग्भिर्मंत्रितैस्तोयैःप्रोक्षितायांक्षितौततः॥तत्रोदकुंभंसुश्लक्ष्णंरक्तंव्रणविवर्जितं॥सुवर्त्तु
लंचनिर्णिक्तंपूरयेन्निर्मलांभसा॥वस्त्रावगुंठितकुर्यात्पूरयेत्तीर्थवारिणा॥कूर्चंहेमसमायुक्तंचूतपल्लवसंयुतं॥स्वस्तिकोपरिविन्यस्यसक्षीरद्रुम
पल्लवैः॥द्रोणंव्रीहींश्चनिक्षिप्यईशानेचनिधापयेत्॥पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं॥अर्चितंपुष्पगंधाद्यैःश्रीरुद्रंचपृथग्जपेत्॥षडंग
सहितंसम्यक्जपेद्वैरुद्रसंख्यया॥बह्वृचारुद्रसूक्तैर्वाछंदोगारुद्रसामभिः॥सूक्तानिसामानिचत्रीण्येव॥कपिंजलन्यायात्॥एकादशाष्टत्रि
द्व्येकसंख्ययाशक्तितोजपेत्॥तत्राप्रतिरथंसूक्तंशतरुद्रानुवाककं॥रुद्रानुवाकंतथापुण्यंरक्षोघ्नंचस्पृशन्जपेत्॥त्रियंबकंजपेत्सम्यक्
अष्टोत्तरसहस्रकं॥एकवारंतथाचापिपावमानीस्पृशन्जपेत्॥जपस्यपंचकुंभाःस्युर्द्वयंवातदलाभतः॥श्रीरुद्रस्यैककुंभश्चसर्वसूक्तानित
त्रतु॥तथान्यंचशुभंकुंभंपूर्वोक्तैर्लक्षणैर्युतं॥चतुःप्रस्रवणकुर्यात्सचवल्कंतुतद्भवेत्॥अत्रायंसांप्रदायिकोर्थः॥आद्यपक्षेषट्कुंभाः॥
एकोरुद्रस्यतस्मिन्शतरुद्रियरुद्रसूक्तानिसामानिवाजप्यानि॥अभिषेकार्थंपंचकुंभाः॥तत्रपूर्वादिकुंभचतुष्टयेतत्राप्रतिरथमित्यादिनाक्रमा
त्सूक्तचतुष्टयविधिः॥मध्येचत्र्यंबकमंत्रपावमानीजपविधिः॥एवंपंचकुंभाशक्तौचतुःप्रस्रवणएकएव॥द्वयमितिद्वित्वंतुरुद्रकुंभमादाय॥अ
तएवश्रीरुद्रस्येतिश्लोकार्द्धेनरुद्रकुंभएवपूर्वोक्तोद्वित्वसंख्यापूरणायानूद्यते॥चतुःप्रस्रवणएवतुपंचकुंभस्थानेविधीयते॥एवंपंचवल्कं

तुतद्वेदितिपंचवक्रतोक्तिरपिपंचकुंभस्थानापत्यासंगच्छते।वस्त्रावगुंठितंकुर्यात्पूरयेत्तीर्थवारिणा॥पंचरत्नंसमादायताम्रपल्लवसंयुतं॥गजाश्वरथ्यावल्मीकात्संगमाद्ध्रद्गोकुलात्॥राजद्वारप्रदेशाच्चमृद्मानीयनिक्षिपेत्॥कुंभस्यनैर्ऋतेदेशेहोमदेशंप्रकल्पयेत्॥गोमयालेपितेदेशेकुर्यात्स्थंडिलमुत्तमं॥कृत्वाग्निमुखपर्यंतमुल्लेखादिस्वशक्तितः॥पूर्णपात्रनिधानांतंकृत्वापूजांसमाचरेत्॥नक्षत्रदेवतारूपंसुवर्णेनप्रयत्नतः॥निष्कमात्रेणवार्द्धेनपादेनाथस्वशक्तितः॥प्रतिमांलक्षणोपेतांकारयित्वाविचक्षणः॥यद्वामूलंसुवर्णस्यस्थापयित्वाप्रपूजयेत्॥मूलमूलाकारंमूल्यमितिक्वचित्पाठः॥तदाप्रतिमामूल्यमित्यर्थः॥सुवर्णंसर्वदैवत्यंसर्वदेवात्मकोनलः॥सर्वदेवात्मकोविप्रःसर्वदेवमयोहरिः॥संस्मरेन्निर्ऋतिंश्यामंरुक्ममुखंनरवाहनं॥रक्षोधिपंखड्गहस्तंदिव्याभरणभूषितं॥प्रतिमापूजनार्थायवस्त्रयुग्मंप्रकल्पयेत्॥पंकजंकारयेद्भूमौरक्ताभैर्व्रीहितंडुलैः॥चतुर्विंशद्दलोपेतंशुभैर्वाकर्णिकान्वितं॥तस्योपरिन्यसेत्पात्रंस्वर्णंवारौप्यमृन्मयं॥शुद्धवस्त्रेणसंछाद्यतत्रमूलानिनिक्षिपेत्॥मूलानिशतमूलानितानिचवक्ष्यंते॥स्वयमुत्पाटयेत्प्राज्ञोमूलानांचशतपिता॥मंगल्याश्चपवित्राश्चओषध्यःकथयाम्यहं॥लक्ष्मणाशतमूलाचशिरीषोवेतसस्तथा॥सहाकाश्वेतमूलाचविष्णुक्रांतायशस्विनी॥सर्पाक्षीमीननेत्राचपुत्रपारीकृतांजली॥पालाशोबिल्वकश्चैवरोचनाचंदनद्वयं॥कृष्णामांसीमुरोशीरंबालकंचतथामली॥गोजिह्वातुलसीईश्वरीशतपुष्पीसलांगली॥ब्रह्मदंडीद्रोणपुष्पीप्रियंगुःसितसर्षपाः॥पिप्पलीकाकजंघाचत्रायमाणाहुहूस्तथा॥ज्योतिष्मतीचगंधारीनिर्गंधापूर्णकोशिका॥भगक्षमास्कभद्राचगुडूचीसैंद्रवारुणी॥अलंबुकारुदंतीचकदलीकेतकीतथा॥गोक्षुरंशतपर्वाचअरिष्टिकाऽपराजिता॥छिन्नरुद्राशतपर्वानिकुंभाचस्कवचेला॥अश्वगंधाहस्तिकर्णाहरि

द्राह्मितयंतथा॥उष्ट्रवोमधुकारश्चअश्वत्थोबकुलस्तथा॥सर्पक्षीरात्यपामार्गोमंदारश्चातिमुक्तकः॥मालतीस्वर्णपुष्पाचश्रीपर्णीश्रीफलंतथा॥दर्भमूलंकरवीरंमदयंतीविकंकतः॥पाटलासुरदारुश्चअर्द्धसूदनिकस्तथा॥फलंमन्मथवृक्षस्यपलाशस्यनवपल्लवाः॥रास्नानदीवृक्षमूलंसुरदारुर्विदारिक॥श्वेतवीर्याश्वेतपाकानीलोत्पलंतथैवच॥नागकेशरमिंदीरीकुमारीनैवनिक्षिपेत्॥तीर्थांबुपंचगव्यंचसर्वौषध्यश्चकांचनं॥यथासंभवतोवापिग्राह्यंमूलंशतंशुभं॥वीरत्वचासमेतंचशतच्छिद्रघटेन्यसेत्॥शतमूलाशतावरी॥वेतसोवंजुलः॥सहृकासहदेवी॥श्वेतमूलापुनर्नवा॥मीननेत्रामत्स्याक्षी॥पुत्रपारापुत्रजीवा॥कृताजली ओंजलिनीहाथाहोडाइतिप्रसिद्धा॥बिल्वः॥चंदनद्वयंश्वेतंपीतंच॥आमलाभूम्यामलकी॥गोजिह्वागजलिभीतिप्रसिद्धा॥लांगलीकलिहारीतिप्रसिद्धा॥ब्रह्मदंडीअधःपुष्पी॥करंवुकःकाकजघाकाकांगीज्योतिष्मतीकंगुका॥गांधारीदेवगांधारी॥पूर्णकोशिकाकोशातकी॥भगक्षमाशिग्रुः॥सुभद्रासारिवा॥अलंबुकातुंबी॥विशारवपर्वावचा॥अरिष्टकानागबलाछिन्नरुहापिंडगुडूची॥शतपत्राकमलिनी॥निकुंभादंतीभेदः॥सुवर्चलासूर्यभक्ता॥हस्तिकर्णाएरंडः॥उष्ट्रवापीलुः॥मधुकारोमधूकः॥सर्जरावीजकः॥अतिमुक्तकोमाधवीमालतीजाती॥स्वर्णपुष्पाकुशली॥श्रीफलंबिल्वं॥मदयंतीयूथिका॥विकंकतःस्रुववृक्षः॥अर्द्धसूदनिकापालव्या॥मन्मथवृक्षआम्रः॥सुरदारुर्देवदारुः॥विदारिकाभूकूष्मांडी॥श्वेतवीर्यागिरिकर्णी॥श्वेतपाकागुंजा॥शेषाणिस्पष्टानि॥विष्णुक्रांतासहदेवीतुलसीतुशतावरी॥मूलानीमानिगृह्णीयाच्छतालाभेविशेषतः॥स्थापयेत्कर्णिकामध्येवस्त्रगंधाद्यलंकृतं॥कूर्मंहेमजलोपेतंकुंकुमौषधिसंयुतं॥कुंभोपरिन्य-

सेद्विद्वान्मूलनक्षत्रदैवतं ॥ अधिप्रत्यधिदेवौचदक्षिणोत्तरदेशयोः ॥ अधिदेवंजयेदादौज्येष्ठानक्षत्रदैवतं ॥ उत्तराषाढऋक्षादिअनुराधांतमर्चयेत् ॥ ऐंद्रादीशानपर्यंतंपूजयेत्स्वस्वनामतः ॥ स्वलिंगोक्तैश्चमंत्रैश्चप्रधानादीन्प्रपूजयेत् ॥ पंचामृतेनसंस्थाप्यआवाह्याथसमर्चयेत् ॥ उपचारःषोडशभिर्यद्वापंचोपचारकैः ॥ रक्तचंदनगंधाढ्यैःपुष्पैःकृष्णासितादिभिः ॥ मेषशृंगादिधूपैश्चघृतदीपैस्तथैवच ॥ सुरापोलिकमांसाद्यैर्नैवेद्यैरोदनादिभिः ॥ मत्स्यमांससुरादीनिब्राह्मणानांविवर्जयेत् ॥ सुरास्थानेप्रदातव्यंक्षीरंसैंधवमिश्रितं ॥ पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत् ॥ उक्तगंधाद्यलाभेतुयथालाभंसमर्चयेत् ॥ पुष्पांतंतुसमभ्यर्च्यहोमंकुर्याद्यथोदितं ॥ निर्वापप्रोक्षणादीनिचरोःकुर्याद्यथाविधि ॥ हविर्गृहीत्वाविधिवन्नैर्ऋत्यैवकृच्चाहुनेत् ॥ मोषुणःपरापरेतियत्तेदेवीतिवापुनः ॥ पायसंघृतसंमिश्रंहुनेदष्टोत्तरंशतं ॥ समिदाज्यचरून्पश्चाच्छांतितःसंख्ययाहुनेत् ॥ अधिदेवतयोश्चापिजुहुयात्स्वस्वमंत्रतः ॥ चतुर्थ्यंतैर्नमोंतैश्चस्वाहांतैःस्वस्वमंत्रकैः ॥ नक्षत्रदेवताभ्यश्चपायसेनतुहोमयेत् ॥ कृणुष्वेतिपंचदशर्ग्भिर्जुहुयात्कृसरंततः ॥ गायत्र्याजातवेदसेत्र्यंबकमितिक्रमात् ॥ सीरायुंजंतितामग्निंवास्तोष्पत्यग्निमेवच ॥ क्षेत्रस्यपतिनागृणानामग्निंदूतंतथैवच ॥ श्रीसूक्तेनतथाविद्वान्समिदाज्यचरून्क्रमात् ॥ अष्टोत्तरशतैर्वापिअष्टाविंशतिभिःक्रमात् ॥ अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुधः ॥ त्वन्नःसोमेनपायसंजुहुयात्तुत्रयोदश ॥ चतुर्गृहीतमाज्यंचयातेरुद्रेतिमंत्रतः ॥ स्रुवेणजुहुयादाज्यंमहाव्याहृतिभिःक्रमात् ॥ हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुतीर्हुनेत् ॥ आचार्योयजमानोवाअग्नौपूर्णाहुतिंहुनेत् ॥ समुद्रादितिसूक्तेनप्राजापत्यक्र-

चातथा॥ पूर्णादर्विससते एतैः पूर्णाहुतिं हुनेत्॥ होमशेषं समाप्याथ वन्हिमारोपयेद्बुधः॥ कुंभाभिमंत्रणं कुर्याद्दक्षिणेनाभिमर्शयेत्॥ मृत्युप्रशमनार्थाय जपेत्त्र्यंबकं शतं॥ रुद्रकुंभोक्तमार्गेण रुद्रमंत्रं स्पृशन्जपेत्॥ धूपंदीपं च नैवेद्यं कुंभयुग्मे निवेदयेत्॥ प्रसादयेत्ततो देवमभिषेकार्थमादरात्॥ तस्मिन्काले ग्रहातिथ्यं कर्त्तव्यं भूतिमिच्छता॥ पृथक्प्रशस्तं तेनैव नक्षत्रेष्ट्या सहैव च॥ अभिषेकविधिं वक्ष्ये पूर्वाचार्यैरुदाहृतं॥ भद्रासनोपविष्टस्य यजमानस्य ऋत्विजः॥ दारपुत्रसमेतस्य कुर्युः सर्वेभिषेचनं॥ अक्षीभ्यामिति सूक्तेन पावमानीभिरेव च॥ आपोहिष्ठेति नवभिर्यतइंद्रद्वयेन च॥ सहस्राक्षतृचेनापि देवस्यत्वेति मंत्रकैः॥ शिवसंकल्पमंत्रैश्च वक्ष्यमाणैश्च मंत्रकैः॥ योसौ वज्रधरो देवो महेंद्रो गजवाहनः॥ मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु॥ योसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः॥ सप्तजिव्हः स देवोग्निर्मूलदोषं व्यपोहतु॥ योसौ दंडधरो देवो धर्मो महिषवाहनः॥ मूलजातशिशोर्दोषं व्यपोहतु यमस्तथा॥ योसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः॥ प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः॥ योसौ पाशधरो देवो वरुणश्च जलेश्वरः॥ नक्रवाहः प्रचेताव्हो मूलोत्थाघं व्यपोहतु॥ योसौ देवो जगत्प्राणो मारुतो मृगवाहनः॥ प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं॥ योसौ निधिपतिर्देवो गदाभृन्नरवाहनः॥ मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु॥ योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः॥ आश्लेषामूलगंडांतं दोषमाशु व्यपोहतु॥ विघ्नेशः क्षेत्रपो देवो पिनाकी वृषवाहनः॥ आश्लेषामूलगंडांतं दोषमाशु व्यपोहतु॥ सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः॥ तच्छंयोरभिषेकं तु सर्वदोषोपशांतिदं॥ सर्वकामप्र-

दंदिव्यंमंगलानांचमंगलं॥वस्त्रांतरितकुंभाभ्यांपश्चात्तुतर्पयेद्बुधः॥ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥यजमानोदक्षिणाभिस्तोषयेदृत्विगादिकान्॥धेनुंपयस्विनींदद्यादाचार्यायसवत्सकां॥निर्ऋतिप्रतिमांवस्त्रंकुंभंहेमंचदापयेत्॥ग्रहार्थंवस्त्रप्रतिमांतत्तज्ञोभूश्चदापयेत्॥ग्रहहोतृषुदापयेदितिक्वचित्पाठः॥श्रीरुद्रजापिनेदेयःकृष्णोनड्वान्प्रयत्नतः॥तत्कुंभवस्त्रप्रतिमांतस्मैदद्यात्प्रयत्नतः॥इतरेभ्योपिविप्रेभ्यःशक्त्याददद्याच्चदक्षिणां॥उक्तालाभेततोदद्यादाचार्य्यब्रह्मऋत्विजां॥तत्तन्मूल्यंप्रदातव्यंशक्त्यावाथप्रदापयेत्॥आचार्यायचयद्दत्तंतदर्द्धंब्रह्मणोभवेत्॥सदस्यायब्रह्मणोर्द्धंऋत्विग्भ्यश्चतदर्द्धकं॥गृह्णीयादाशिषस्तेभ्यःप्रणम्याथक्षमापयेत्॥दद्यादन्नपायसादिब्राह्मणान्भोजयेच्छतं॥अलाभेसतिपंचाशद्दशकंतदभावतः॥सर्वशांतेश्चपठनंब्राह्मणैराशिषस्तथा॥गृत्वाक्षमापयेद्विप्रान्निर्ऋतिःप्रीयतामिति॥विधानेचरितेऽस्मिंस्तुततोशांतिर्भवेद्ध्रुवं॥गंडांतेष्वेवमेवंस्यात्पुष्याद्येष्वेवमेवतु॥समाष्टकेद्वादशाहेकुर्याद्वैशांतिमादरात्॥ अथमूलाश्लेषाशांत्योःप्रयोगः॥ तत्रकर्त्तोक्तकालेमासपक्षाद्युल्लिख्यममास्यशिशोःकुमार्यावामूलाद्यपादादिष्वाश्लेषायांवाजन्मनासूचितपित्राद्यरिष्टशांत्यर्थंशांतिंकरिष्यइत्युक्त्वागणेशपूजनस्वस्तिवाचनमातृकापूजनाभ्युदयिकानिकृत्वाऽऽचार्यब्रह्मसदस्यानृत्विजश्चाष्टौषट्चतुरोवावृत्वायथाविभवमर्चयेत्॥तथाआचार्यआचार्यकर्मकरिष्यइत्युक्त्वायदत्रसंस्थितमितिसर्षपान्विकीर्यापोहिष्ठेत्यादिभिर्भुवंप्रोक्ष्येशान्यांमहीद्यौरितिस्पृष्ट्वोषधयःसमितिद्रोणपरिमितंव्रीह्यादिक्षिप्त्वाकलशेष्वितिरुद्रकुंभंसंस्थाप्येमंमेगंगेइत्युदकेनापूर्य्यगंधद्वारामितिगंधंयाओषधीरि

स्यौषधीरोषधयः समितियवान् कांडादितिदूर्वा अश्वत्थेवइति पंचपल्लवान् रुवतीभीमइतिपंचत्वचः स्योनापृथिवीतिसप्तमृदोयाः फलिनीरितिफलंसहिरत्नानीतिपंचरत्नानिहिरण्यरूपइतिहिरण्यंगायत्र्यागोमूत्रंपुनर्मनेतिगोमयमाप्यायस्वेतिपयःदधिक्राव्णइतिदधितेजोसीत्याज्यंदेवस्यत्वेतिकौशंकूर्चंमधुवातेतिमधुस्वादुरितिशर्करांक्षिप्त्वायुवासुवासाइतिवस्त्रेणरक्तसूत्रेणवाकुंभकंठमावेष्ट्यपूर्णादर्विरितिपूर्णपात्रेणपिधायततःप्रागुदग्वाचतुर्दिक्षुचतुरःकुंभान्मध्येचैकंकुंभंप्रत्येकंमंत्रावृत्त्यापदार्थानुसमयेनजपार्थंसंस्थाप्यरुद्रकुंभेसौवर्णप्रतिमायांत्र्यंबकंवशिष्ठोरुद्रोऽनुष्टुप्रुद्रावाहनेविनियोगः॥ त्र्यंबकमितिरुद्रमावाह्यपूजयेत्॥ ततोरुद्रकुंभंस्पृष्ट्वैकर्त्विक्यजुषश्चेद्रुद्रैकादशिनींबव्हृचश्चेत्त्रीणिरुद्रसूक्तानिछंदोगश्चेद्रुद्रसामानिजपेत्॥ सूक्तसाम्नामेकद्वित्र्येकादशावृत्तिःशक्तितोज्ञेया॥ कद्रुद्रायघोरःकण्वोरुद्रोगायत्री इमारुद्रायकुत्सरुद्रआद्यानवजगत्यंतेनुष्टुभौ आतेपितर्गृत्समदोरुद्रस्त्रिष्टुप्जपेविनियोगः॥ सामानितिआवोराजानंवामदेवोरुद्रस्त्रिष्टुप्तमुष्टुहिभौमोत्रीरुद्रस्त्रिष्टुप्भुवनस्यपितरमृजिश्वारुद्रस्त्रिष्टुप्जपेविनियोगः॥ ततोन्यऋत्विक्जपार्थकुंभपंचकेप्राक्क्रमेणजपेत्॥ आशुःशिशानेतित्रयोदशर्चस्येंद्रोप्रतिरथऋषिरिंद्रोदेवताचतुर्थ्याबृहस्पतिस्त्रिष्टुप्जपेविनियोगः॥ त्वमग्नेरुद्रइत्यनुवाकस्यहव्यवाट्रुद्रोजगतीजपेवि॰त्वमग्नेवामदेवोग्निस्त्रिष्टुप्जपेविनियोगः॥ रक्षोहणमितिपंचविंशर्चस्यांगिरसःवायुरग्निस्त्रिष्टुप्जपे॰ततोमध्यकुंभेजपेत्॥ त्र्यंबकंवशिष्ठोनुष्टुप्जपे॰॥ ११॥ अत्रैवपवमानमपिसकृज्जपेत्॥ एवंषट्कुंभाशक्तौरुद्रकुंभंचतुःप्रस्रवणंचेतिकुंभद्वयंसंस्थाप्यरुद्रैकादशिन्यादिरुद्रकुंभेजप्त्वाऽप्रतिरथादीनिचत्वारि

प्रस्रवणेषुत्र्यंबकमंत्रंपावमानीश्चमध्यमुखेजपेत्॥ अथाचार्योरुद्रकुंभान्नैर्ऋत्येस्थंडिलेग्निंप्रतिष्ठाप्यतदीशान्यांनवग्रहस्थापनंकृत्वान्वादध्यात्॥ तद्यथा॥ समिद्द्वयमादायास्यांमूलशांतौदेवतापरिग्रहार्थमन्वाधास्येऽस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वानवग्रहानधिदेवताप्रत्यधिदेवतालोकपालान्विनायकादींश्चप्रत्येकममुकसंख्ययासमिच्चर्वाज्यैर्निर्ऋतिंप्रतिद्रव्यमष्टोत्तरशतसंख्ययाइंद्रमपश्चप्रत्येकमष्टाविंशतिसंख्ययाघृताक्तपायससमिदाज्यचरुभिर्विश्वेदेवाद्याश्चतुर्विंशत्यृक्षदेवताअष्टाष्टसंख्ययापायसेनरक्षोहणंकृणुष्वेतिपंचदशभिःकृसरान्नेनसवितारंदुर्गांजातवेदाग्निंरुद्रंऋत्विक्श्रुतिंदुर्गांवास्तोष्पतिमग्निंक्षेत्राधिपतिंमित्रावरुणौअग्निमेताश्चाष्टाष्टसंख्ययाकृसरान्नेनश्रियंतामग्निवर्णामितिपंचदशर्ग्भिःप्रत्यृचमष्टाष्टसंख्ययासमिदाज्यचरुभिःसोमंत्रयोदशवारंपायसेनरुद्रंचतुर्गृहीतेनाज्येनअग्निंवायुंसूर्यंप्रजापतिंबृहस्पतिमिंद्रंविश्वान्देवान्महाव्याहृतिभिराज्येनशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वासमस्तव्याहृतिभिःस मिद्द्वयमग्नावादध्यात्॥

आश्लेषाशांतौतुसर्पप्रधानदेवतामधिदेवतांबृहस्पतिंप्रत्यधिदेवतान्पितॄन् भगाद्यादित्यर्क्षदेवताश्चेतिविशेषः॥ ततःपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वाऽग्नेःप्रागुदग्वारक्तैःशुक्लैर्वातंडुलैश्चतुर्विंशद्दलंपद्मंकृत्वातत्रप्राग्वत्कुंभसंस्थाप्यतस्मिन्‌याओषधीरितिशतमूलानितदलाभेविष्णुक्रांतासहदेवीतुलसीशतावरीकुशमूलानिक्षिप्त्वापूर्णपात्रनिधायतत्रसाष्टदलंवासोवितत्यतत्कर्णिकायांनिष्कंतदर्द्धमितांनिर्ऋतिप्रतिमामग्न्युत्तारणपूर्वकंपंचामृतस्नापितांमोषुणोघोरःकण्वोनिर्ऋतिर्गायत्रीमोषुणइतिसंस्थाप्यसंस्मरेन्निर्ऋतिंश्यामसुमुखंनरवाहनं॥ रक्षोधिपंखड्गहस्त

दिव्याभरणभूषितमितिध्यात्वातद्दक्षिणतइंद्रंवोमधुच्छंदाइंद्रोगायत्रीतींद्रस्यतदुत्तरतश्चाप्सुमेधातिथिरापोनुष्टुबित्यपांचसौवर्णप्रतिमेसंस्था
प्यपदार्थानुसमयेनस्वस्वमंत्रैस्ताःपूजयेत्॥तत्रवस्त्रयुग्मं॥रक्तचंदनं॥कृष्णपुष्पाणि॥मेषशृंगस्यधूपः॥आज्यस्यदीपः॥पोळिकोदनादिनैवेद्यं
ब्राह्मणानांसुरास्थानेसैंधवमिश्रंक्षीरंमांसस्थानेलवणयुक्तपायसं॥क्षत्रियादीनांतुमुख्यमेवततःचतुर्विंशद्दलेषुप्रागादितोविश्वेदेवाः॥विष्णुः॥
वसवः॥वरुणः॥अजैकपात्॥अहिर्बुध्न्यः॥पूषा॥अश्विनौ॥यमः॥अग्निः॥प्रजापतिः॥सोमः॥रुद्रः॥अदितिः॥बृहस्पतिः॥सर्पाः॥पितरः॥भगः॥अर्य
मा॥सविता॥त्वष्टा॥वायुः॥इंद्राग्नीमित्रइत्येताश्चतुर्थ्यंतनमोंतैर्नामभिःक्रमेणावाह्यपूजयेत्॥आश्लेषाशांतौतुसर्पप्रतिमांनमोस्तुसर्पेभ्यइत्या
वाह्य॥सर्पोरक्तस्त्रिनेत्रश्चद्विभुजःपीतवस्त्रकः॥फलकासिधरस्तीक्ष्णोदिव्याभरणभूषितइतिध्यात्वातद्दक्षिणतोबृहस्पतेर्गृत्समदोबृह
स्पतिस्त्रिष्टुबिति॥बृहस्पतिं॥तदुत्तरतश्चोदीरतांशंखःस्वधात्रिष्टुबितिपितॄनावाह्यचतुर्विंशतिदलेषुप्रागादितोभगाद्यादित्यंतर्क्षदेवताआवा
ह्यपूजयेत्॥ततोन्वाधानक्रमेणपायसचरुकृसरान्श्रपयित्वाऽज्यभागांतंकृत्वायजमानेनसर्वदेवतोद्देशेनद्रव्येत्यक्तेसर्वान्वाधानोक्तक्र
मेणर्क्षदेवतांतत्तन्मंत्रैर्हुत्वारक्षोहाद्यान्वक्ष्यमाणाभिर्जुहुयात्॥तास्त्व॥कृणुष्वेतिपंचदशर्चस्यवामदेवोरक्षोहात्रिष्टुप्कृसरहोमेविनियो
गः॥एवंसर्वत्रगायत्र्याविश्वामित्रःसवितागायत्री॥जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥त्र्यंबकंवशिष्ठोरुद्रोनुष्टुप्सीरायुंजंतीबुधक्राविकृश्रुति
र्गायत्री॥तामग्निवर्णांसौभरिर्दुर्गात्रिष्टुप्॥वास्तोष्पतेवशिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥अग्नेनयागस्त्योग्निस्त्रिष्टुप्॥क्षेत्रस्यवामदेवःक्षेत्रपालोनु

ष्टुप्।।गृणानाजमदग्निर्मित्रावरुणौगायत्री।।अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री।।हिरण्यवर्णामितिपंचदशर्चस्यकर्द्मानंदचिक्लितेंदिरासुता ऋषयः श्रीर्देवता आद्यास्तिस्रोनुष्टुभः तुर्याप्रस्तारपंक्तिः पंचमीषष्ठ्यौत्रिष्टुभौततोष्टावनुष्टुभावंत्याप्रस्तारपंक्तिः प्रत्यृचंसमिदाज्यचरुहोमेविनियोगः।। त्वन्नःसोमेतित्रयोदशर्चस्यप्रगाथःसोमस्त्रिष्टुप्पायसहोमेविनियोगः।।यातेरुद्रेतिकश्यपोरुद्रस्वराडनुष्टुप्चतुर्गृहीताज्यहोमेवि०।।सप्तमहाव्याहृतीनांविश्वामित्रादयऋषयोग्न्यादयोदेवताः गायत्र्यादीनिछंदांसि आज्यहोमेवि०।।एवंहुत्वास्विष्टकृदादिप्रायश्चित्ताहुत्यंतंकृत्वालोकपालनवग्रहविनायकादिभ्योनिर्ऋतींद्राण्योरुद्रक्षेत्रपालयोश्चबलीन्दत्वापूर्णाहुतिंजुहुयात्।।तत्रमंत्राः।।समुद्रादूर्मिरित्येकादशर्चस्यवामदेवआपस्त्रिष्टुप् अंत्याजगती प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप्।।पूर्णादर्विविश्वेदेवाः शतक्रतुरनुष्टुप्।।सप्ततेअग्नेसप्तवानग्निर्जगतीपूर्णाहुतिहोमेविनियोगः।।एवंसर्वत्र।।ततोहोमशेषंसमाप्यप्रधानकुंभंदक्षिणतःस्पृष्ट्वाशतवारंत्र्यंबकमंत्रंजस्वा तथैवरुद्रकुंभंचस्पृष्ट्वोक्तरीत्यारुद्रैकादशिन्यादिजस्वागंधादिभिःकुंभद्वयगतनिर्ऋतिरुद्रावभ्यर्च्यसर्त्विगाचार्यःसर्वकुंभोदकैर्भद्रासनोपविष्टंसापत्यकलत्रयजमानमभिषिंचेत्।।तत्रमंत्राः।।अक्षीभ्यामितिषण्णांकाश्यपोयक्ष्मघ्नानुष्टुप् अभिषेकेविनियोगः।।एवमुत्तरत्र।।पवस्वविश्वचर्षणइतित्रिंशर्चस्यशतंवैखानसाःपवमानसोमोगायत्री।। आपोहिष्ठेतिनवर्चस्यांबरीषः सिंधुद्वीप आपोगायत्र्यंत्येद्वेऽनुष्टुभौ पंचमीवर्द्धमानासप्तमीप्रतिष्ठा।।यतइंद्रेतिद्वयोःसप्तर्षयोविश्वेदेवाअनुष्टुप्सहस्राक्षेणेतित्र्यृचस्यप्राजापत्योयक्ष्मनाशनोयक्ष्मघ्नात्रिष्टुप्।।

द्वयोरंत्यानुष्टुप् ॥ देवस्यत्वेतित्रिभिर्यजुर्भिश्चयज्जाग्रतेतिषण्णांशिवसंकल्पमंत्राणांप्रजापतिर्मनस्त्रिष्टुप् ॥ योसौवज्रधरोदेवोमहेंद्रोगजवाहनः ॥ मूलजातशिशोर्दोषंमातापित्रोर्व्यपोहतु ॥ योसौशक्तिधरोदेवोहुतभुक्मेषवाहनः ॥ सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु ॥ योसौदंडधरोदेवोधर्मोमहिषवाहनः ॥ मूलजातशिशोर्दोषंमातापित्रोव्यपोहतु ॥ योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः ॥ प्रशामयतुमूलोत्थंदोषगंडांतसंभवं ॥ योसौपाशधरोदेवोवरुणश्चजलेश्वरः ॥ नक्रवाहःप्रचेताख्योमूलोत्थाघंव्यपोहतु ॥ योसौदेवोजगत्प्राणोमारुतोमृगवाहनः ॥ प्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः ॥ योसौनिधिपतिर्देवःखड्गभृद्वाजिवाहनः ॥ मातापित्रोःशिशोश्चैवमूलदोषंव्यपोहतु ॥ योसौपशुपतिर्देवःपिनाकीवृषवाहनः ॥ आश्लेषामूलगंडांतंदोषमाशुव्यपोहतु ॥ विघ्नेशःक्षेत्रपोदुर्गालोकपालानवग्रहाः ॥ सर्वदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः ॥ आश्लेषाशांतौतु ॥ आश्लेषाऋक्षजातस्यमातापित्रोर्धनस्यच ॥ भ्रातृज्ञातिकुलस्थानांदोषंसर्वंव्यपोहतु ॥ योसौवागीश्वरोनामअधिदेवोबृहस्पतिः ॥ मातापित्रोःशिशोश्चैवगंडांतस्यव्यपोहतु ॥ पितरःसर्वभूतानांरक्षंतुपितरंसदा ॥ सर्पनक्षत्रजातस्यवित्तंचज्ञातिबांधवान् ॥ इतिविशेषः ॥ ततः तच्छंयोः शंयुर्विश्वेदेवाः शक्वरीअभिषे० ततोवस्त्रांतरितनिर्ऋतिरुद्रकुंभोदकेनस्नापितोयजमानोधृतधौतवासाः सापत्यकलत्रःकांस्यपात्रस्थाज्यरूपरूपमित्यवेक्ष्यविप्रायदत्वाचार्यादीनभ्यर्च्याचार्यायगांब्रह्मणेवृषंसदस्यायाश्वंरुद्रजापिनेकृष्णावृषंधेन्वाद्यलाभेतत्तन्मूल्यंवादत्वास्वशक्त्याऋत्विग्भ्योभूयसींचदत्वोत्तरपूजांकृत्वायांत्वितिविसृज्याचार्यायनिर्ऋतिग्रहप्रतिमाकुंभादिरुद्रजापिनेरुद्रप्रतिमाकुंभादिसंकल्पपूर्वकंदत्वाग्निम

भ्यर्च्यगच्छगच्छेतिविसृज्यशतंतदर्द्धंदशवाब्राह्मणान्भोजयित्वाशांत्याशिषोवाचयित्वायस्यस्मृत्येत्याद्युक्त्वासस्वजनोभुंजीत॥ ॥इतिश्रीभट्टनीलकंठकृतेभगवंतभास्करेशांतिमयूखेमूलाश्लेषाशांतिप्रयोगः॥ अथवैधृतिव्यतीपातसंक्रांतिशांतिः॥ शौनकः॥ कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः॥ संक्रमश्चरवेस्तत्रजातोदारिद्र्यकारकः॥ दरिद्राणांमहादुःखंव्याधिपीडासमुद्भवं॥ अश्रियोमृत्युमाप्नोतिनात्रकार्याविचारणा, स्त्रीणांचशोकंदुःखंचसर्वनाशकरोभवेत्॥ शांतिर्वापुष्कलाकार्यातस्यदोषोनकश्चन॥ गोमुखप्रसवंकुर्याच्छांतिंकुर्यात्प्रयत्नतः॥ जपाभिषेकदानैश्चहोमादपिविशेषतः॥ नवग्रहमखंकुर्यात्तस्यदोषोपशांतये॥ प्रथमंगोमुखंजन्मततःशांतिंसमाचरेत्॥ ग्रहस्यपूर्वदिग्भागेगोमयेनानुलिप्यच॥ अलंकृतेसुदेशेतुव्रीहिराशिंप्रकल्पयेत्॥ पंचद्रोणमितंधान्यंतदर्द्धंतंडुलेनच॥ तदर्द्धंतुतिलैःकुर्यादन्योन्योपरिकल्पयेत्॥ द्रव्यत्रितयराशौतुअष्टपत्रंलिखेद्बुधः॥ पुण्याहंवाचयित्वातुआचार्यंवृणुयात्पुरा॥ आचारवंतंधर्मज्ञंकुलीनंचकुटुंबिनं॥ मंत्रतत्वार्थतत्वज्ञंशांतिकर्मणिकोविदं॥ पंचांगभूषणंदद्यात्सद्वस्त्रांगुलीयकं॥ राशौप्रतिष्ठितंकुंभमव्रणंसुमनोहरं॥ तीर्थोदकेनसंगृह्यसमृदोषधिपल्लवं॥ सगव्यगंधरत्नंचवस्त्रयुग्मेनवेष्टयेत्॥ तस्योपरिन्यसेत्पात्रंसूक्ष्ममव्रणसंयुत॥ प्रतिमांस्थापयेद्धीमान्साधिप्रत्यधिदैवतां॥ चंद्रादित्याकृतीपार्श्वेमध्येवैधृतिमर्चयेत्॥ एवमेवव्यतीपातेशांतौसंक्रमणस्यतु॥ भानोरुत्तरतोरुद्रमग्निंदक्षिणतोयजेत्॥ निष्कमात्रेणवार्द्धेनपादेनापिस्वशक्तितः॥ प्रतिमांकारयेद्धीमान्तत्तल्लक्षणलक्षितां॥ प्रतिमापूजनार्थायवस्त्रयुग्मंनिवेदयेत्॥ अधिदेवोभवेत्सूर्यश्चंद्रःप्रत्यधिदे

वतं॥ ततोव्याहृतिपूर्वेणतत्तन्मंत्रेणपूजयेत्॥ त्रैयंबकेणमंत्रेणप्रधानप्रतिमांयजेत्॥ तत्सूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत्॥आप्यायस्वेति
मंत्रेणसोमपूजांसमाचरेत् ॥उपचारैःषोडशभिर्यद्वापंचोपचारकैः॥ अर्चित्वागंधपुष्पाद्यैः फलंनैवेद्यमर्पयेत्॥ मृत्युंजयेणमंत्रेणप्र
धानप्रतिमांस्पृशेत्॥ अष्टोत्तरसहस्रंवा अष्टोत्तरशतंतुवा ॥ अष्टाविंशतिवाचाथपूजायांचस्वशक्तितः॥सर्वसौरंप्रजप्याथसोमोथसोम
मंत्रतः॥आनोभद्रेतिसूक्तंचभद्राअग्नेश्चसूक्तकं॥जपेत्तुपौरुषंसूक्तं त्रैयंबकमतःपरं॥कुंभंस्पृष्ट्वाचतुर्दिक्षुजपंकुर्युस्त्वथर्त्विजः॥ कुंभस्यप
श्चिमेदेशेस्थंडिलेग्निंप्रकल्पयेत्॥ स्वगृह्योक्तविधानेनकारयेत्संस्कृतानलं॥ त्रैयंबकेणमंत्रेणसमिदाज्यचरून्हुनेत्॥अष्टोत्तरसहस्रंवा
अष्टोत्तरशतंतुवा॥अष्टाविंशतिवाकुर्यात्स्वस्यशक्त्यनुसारतः॥ मृत्युंजयेन मंत्रेणतिलहोमंसमाचरेत् ॥ततः स्विष्टकृतंहुत्वाअभिषेकंचकारये
त्॥ समुद्रज्येष्ठासूक्तेन आपोहिष्ठेत्यृचेनच॥अक्षीभ्यामितिसूक्तेनपावमानीभिरेवच॥ त्रैयंबकेण तत्सूर्य आप्यायस्वेतिमंत्रतः॥ सुरास्त्वा
मितिमंत्रेणअभिषेकंसमाचरेत्॥ सुरास्त्वामभिषिंचंत्वित्यादिकोभिषेकमंत्रसमुदायोऽयुतहोमविधानेद्रष्टव्यः॥अभिषेकाप्लुतवस्त्रमाचा
र्यायनिवेदयेत्॥ श्वेतवस्त्रधरोभूत्वाभूषणाद्यैरलंकृतः॥ यजमानस्त्रियायुक्तआज्यावेक्षणमाचरेत्॥ आचार्यंपूजयेत्पश्चाद्वस्त्रहेमांगुलीय
कैः॥गोदानंवस्त्रदानंचस्वर्णदानंविशेषतः॥तद्दोषशमनार्थायआचार्यायप्रदापयेत्॥प्रच्छादनपटंदद्यात्ततःशांतिर्भवेदिति॥जापकेभ्योब्राह्मणेभ्यो
दक्षिणाःप्रतिपादयेत् ॥दीनांधकृपणेभ्यश्चप्रदद्याद्भूरिदक्षिणां॥ब्राह्मणान्शतसंख्याकान्मिष्टान्नैर्भोजयेच्चतान्॥बंधुभिः सह भुं

जीतयथाविभवसारतः॥ एवंयःकुरुतेमर्त्योनैवदुःखमवाप्नुयात्॥ आयुरारोग्यमैश्वर्यंमातापित्रोःशिशोरपि॥ अथप्रयोगः॥ कर्त्तागोमुखप्रसवंकृत्वामासपक्षाद्युल्लिख्यास्यशिशोर्वैधृतौव्यतीपातेसंक्रांतौवोत्पत्त्यासूचितस्यानिष्टस्यनिरासार्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृपूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात्॥ अथाचार्यःसर्षपविकिरणादिकृत्वाप्राच्यांगोमयोपलिप्तभुविपंचद्रोणतदर्द्धमितव्रीहितंडुलतिलानन्योन्योपरिराशीकृत्यतत्राष्टदलंविरच्यतत्कर्णिकायांकुंभंसंस्थाप्यतीर्थोदकेनापूर्यतत्रसप्तमृत्पंचपल्लवरत्नगव्याष्टगंधसर्वौषधीःक्षिप्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रंनिधायतत्रवैधृतिशांतौमध्येत्र्यंबकमितिरुद्रंतद्दक्षिणतउत्सूर्यइतिसूर्यमुत्तरतआप्यायस्वेतिसोमंव्यतीपातसंक्रांतिशांत्योस्तुमध्येसूर्यंतद्दक्षिणतोग्निंदूतमित्यग्निमुत्तरतोरुद्रंतत्तत्प्रतिमास्वावाह्यषोडशभिःपंचभिर्वोपचारैःसंपूज्यरुद्रसूर्यसोमप्रतिमाःस्पृष्ट्वाष्टसहस्राष्टशताष्टाविंशत्यन्यतरसंख्ययामृत्युंजयमंत्रमुद्यन्नद्येत्यादिसर्वसौरमंत्रानाप्यायस्वेतिचक्रमाज्जपेत्॥ व्यतीपातसंक्रांतिशांत्योस्तुपूर्वंसौरजपस्ततोमृत्युंजयजपः॥ ततोऋत्विजःप्रागादिदिक्चतुर्षुक्रमेणानोभद्राभद्राअग्नेसहस्रशीर्षाकद्रुद्रायेतिसूक्तानिजप्त्वा आचार्यस्तुकुंभात्पश्चिमेग्निंप्रतिष्ठाप्यग्रहावाहनादिपूजांतंकृत्वान्वादध्यात्॥ तत्रचक्षुषीआज्येनेत्यंतेरुद्रसूर्यसोमान्समिच्चर्वाज्यैस्तत्तन्मंत्रैर्मृत्युंजयमंत्रेणाच्चतिलाहुतिभिरष्टसहस्राष्टशताष्टाविंशत्यन्यतरसंख्ययाशेषेणस्विष्टकृतमित्यादिव्यतीपातसंक्रांतिशांत्योस्तुसूर्याग्निरुद्रानितिविशेषः॥ ततआज्यभागांतेऽन्वाधानोक्तक्रमेणाहुत्वाबलिदानांतेकलशोदकैःसमुद्रज्येष्ठाइतिसू

क्तेनापोहिष्ठेतित्र्यृचेनाक्षीभ्यामितिसूक्तेनपावमानीभिःप्रधानाधिप्रत्यधिदेवतामंत्रैःसुरास्त्वेत्यादिपौराणैश्चाभिषिक्तोयजमानोभिषेकवस्त्र
माचार्यायनिवेद्याज्यमवेक्ष्यपूर्णाहुतिंहुत्वाचार्यायधेनुंवस्त्रयुग्मांगुलीयकादिऋत्विग्भ्यश्चदक्षिणांदत्वान्येभ्यश्चभूरिदक्षिणांदत्वाशतंश
क्त्यावाब्राह्मणान्भोजयित्वाबंधुभिःसहभुंजीतेतिवैधृतिव्यतीपातसंक्रांतिशांतयः॥अथैकनक्षत्रजन्मशांतिः॥गर्गः॥एकस्मिन्नेवन
क्षत्रेभ्रात्रोर्वापितृपुत्रयोः॥प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्यनिश्चयः॥तद्दोषनाशायतदाप्रशस्तांशांतिंचकुर्यादभिषेचनंच॥संपूज्यऋक्ष
प्रतिमांतदग्रेदानंचकुर्याद्विभवानुरूपं॥तत्रशांतिंप्रवक्ष्यामिसर्वाचार्यमतेनतु॥शुभर्क्षेशुभवारेचचंद्रताराबलान्विते॥रिक्ताविष्टीविवर्ज्येतुआ
रभेद्विभवेसुधीः॥आचार्यंवरयेत्पूर्वंचतुरश्चद्विजोत्तमान्॥पुण्याहंवाचयित्वातुशांतिकर्मसमाचरेत्॥अग्नेरीशानदिग्भागेनक्षत्र
प्रतिमांततः॥ तन्नक्षत्रोक्तमार्गेणअर्चयेत्कलशोपरि॥रक्तवस्त्रेणसंछाद्यवस्त्रयुग्मेनवेष्टयेत्॥ स्वशाखोक्तेनमार्गेणकुर्यादग्नि
मुखंततः॥अनेनैवतुमंत्रेणाहुनेदष्टोत्तरंशतं॥प्रत्येकंसमिदन्नाज्यैःप्रायश्चित्तांतमेवच॥अभिषेकंततःकुर्यादाचार्यःपितृपुत्रयोः॥
वस्त्रालंकारगोदानैराचार्यंपूजयेत्पुनः॥ऋत्विग्भ्योदक्षिणांदद्यान्माषत्रयसुवर्णकं॥देवताप्रतिमादानंधान्यवस्त्रादिभिःसह॥यानश
य्यासनादीनिदद्यात्तद्दोषशांतये॥भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः॥ अथप्रयोगः॥ कर्त्तामासपक्षाद्युल्लिख्यास्यकुमार
स्यपित्राद्येकर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थमेकनक्षत्रशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनस्वस्तिवाचनाभ्युदयिकाचार्यर्त्विग्वरण।

निकुर्यात्॥अथाचार्योग्नेरीशान्यांकुंभंसंस्थाप्यरक्तवस्त्रयुग्मेनाच्छाद्यतस्मिन्पूर्णपात्रोपरितत्तन्नक्षत्रोक्तमंत्रेणप्रतिमायांतन्नक्षत्रंतद्देवतांवा
वाह्यसंपूज्याग्निंप्रतिष्ठाप्यान्वाधायाऽऽज्यभागांतंकृत्वातत्तन्नक्षत्रमंत्रेणसमिच्चर्वाज्यानिप्रत्येकमष्टोत्तरशतंहुत्वाहोमशेषंसमाप्यशिष्टंतत्पि
त्रादींश्चाभिषिंचेत्॥ततःकर्त्तोत्तरपूजांकृत्वाविसृज्यप्रतिमादिकंगवादिंचाचार्यायदत्वाऋत्विग्भ्यश्चप्रत्येकंसौवर्णमाषत्रयात्मिकांयथाशक्ति
दक्षिणांदत्वायथाविभवंयानशय्यासनादीनिचदत्वाब्राह्मणान्भोजयित्वास्वयंभुंजीतेत्येकनक्षत्रशांतिप्रयोगः॥ अथग्रहणोत्पत्तौशांतिः
॥शौनकः॥ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते॥व्याधिपीडातदास्त्रीणामादौतुऋतुदर्शनात्॥इत्थंसंजायतेयस्तुतस्यमृत्युर्नसंशयः॥व्याधि
पीडाचदारिद्र्यंशोकश्चकलहोभवेत्॥शांतिंतेषांप्रवक्ष्यामिनराणांहितकाम्यया॥यस्मिनृक्षेविशेषेणग्रहणंसंप्रजायते॥तदृक्षाधिपतेरूपं
सुवर्णेनप्रकल्पयेत्॥यथाशक्त्यनुसारेणवित्तशाठ्यंनकारयेत्॥सूर्यग्रहेसूर्यरूपंसुवर्णेनविशेषतः॥ चंद्रंचंद्रग्रहेधीमान्रजतेनविशेष
तः॥राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः॥शुचौदेशेप्रयत्नेनगोमयेनप्रलेपयेत्॥नागेनसीसेन॥ तस्योपरिन्यसेद्धीमान्नववस्त्रंसुशो
भनं॥त्रयाणांचैकरूपाणांस्थापनंतत्रकारयेत्॥रक्ताक्षतरक्तगंधंरक्तपुष्पांबराणिच॥सूर्यग्रहेप्रदातव्यंसूर्यप्रीतिकरायच॥श्वेतवस्त्रंश्वे
तमाल्यंश्वेतगंधाक्षतादिभिः॥चंद्रग्रहेप्रदातव्यंचंद्रप्रीतिकरायच॥राहवेचैवदातव्यंकृष्णपुष्पांबराणिच॥दद्यान्नक्षत्रनाथायश्वेतगं
धानुलेपनो॥सूर्यंसंपूजयेद्धीमान्नाकृष्णोनेतिमंत्रतः॥चंद्रग्रहेचपालाशैःसमिद्भिर्जुहुयान्नरः॥ दूर्वाभिर्जुहुयाद्धीमान्राहोःसंप्रीणनायच॥

समिद्भिर्जलवृक्षोत्थैर्भेशायजुहुयाद्बुधः॥ भेशायनक्षत्राधिपतये॥ आज्येनचरुणाचैवतिलैश्चजुहुयात्ततः॥पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः॥जलैरौषधकल्कैश्चसहितैःकलशोदकैः॥औषधकल्कैःसर्वौषधिकल्कैः॥अभिषेकंप्रकुर्वीतयजमानेप्रयत्नतः॥मंत्रैर्वरुणदेवत्यैरापोहिष्ठादिभिस्त्रिभिः॥इमंमेगंगेपितरस्तत्वायामीतिमंत्रकैः॥अभिषेकेनिवृत्तेतुयजमानःसमाहितः॥आचार्यंपूजयेत्सम्यक्सुशांतोनियतेंद्रियः॥तस्मैदद्यात्प्रयत्नेनभक्त्याप्रतिकृतित्रयं॥दक्षिणाभिश्चसंयुक्तंयथाशक्त्यनुसारतः॥ब्राह्मणान्भोजयित्वातुप्रणिपत्यक्षमापयेत्॥तेभ्योपिदक्षिणांदद्याद्यजमानःसमाहितः॥अनेनविधिनाशांतिंकृत्वासम्यग्विशेषतः॥अकालमृत्युशोकंचव्याधिपीडांनचाप्नुयात्॥सौख्यंसौमनसंनित्यंसौभाग्यंलभतेनरः॥इत्थंग्रहणजातानांसर्वारिष्टविनाशनं॥कथितंभार्गवेणेदंशौनकायमहात्मने॥ इतिचंद्रसूर्यग्रहणप्रसूतिशांतिः॥ अथविषघटिकाशांतिविधिः॥ तत्रवृद्धगार्ग्यः॥विषनाडीषुसंजातःपितृभ्रातृधनात्मनां॥नाशकृद्विषशस्त्राद्यैःक्रूरलग्नेष्टमेपिवा॥तद्दोषपरिहारायशांतिकर्मसमारभेत्॥रुद्रोयमोग्निर्मृत्युश्चदेवताःपरिकीर्तिताः॥सुवर्णेनयथाशक्त्यातत्तल्लक्षणसंयुताः॥प्रतिमाःकारयित्वातुआढकव्रीहिभिःस्थले॥स्थंडिलंपरिकल्प्याथकुंभमौषधिसंयुतं॥जलैःसंपूर्यसंस्थाप्यमृदादिप्रक्षिपेत्ततः॥वस्त्रद्वयेनसंवेष्ट्यपंचरत्नानिनिक्षिपेत्॥कुंभोपरितुसंस्थाप्यचतस्रःप्रतिमास्तथा॥तत्तन्मंत्रैश्चसंपूज्यगंधपुष्पोपहारकैः॥कद्रुद्रायेतिमंत्रेणयमायसोममित्यथ॥अग्निर्मूर्द्धेतिमंत्रेणपरंमृत्योइतित्वथ॥एतैश्चतुर्भिर्मंत्रैस्तुक्रमाद्वह्नौहुनेत्तथा॥समिच्चरुघृतद्रव्यैःप्रत्येकंचयथाक्रमं॥ऋत्विग्भ्यश्चसहा

चार्योहुनेदष्टसहस्रकं॥अष्टोत्तरशतंवाथअष्टाविंशतिमेववा॥ततस्तिलैर्हुनेद्देवांस्तत्तन्मंत्रैश्चकल्पवित्॥ततोभिषिंचयेदेनंमंत्रैःपौराणिकैःक्रमात्॥प्रार्थ्यतांभगवानीशःपिनाकीसर्वतोमुखः॥तवमूर्त्तिप्रदानेनसमस्ताभीष्टदोभव॥ईषत्पीनोयमःकालोदंडहस्तःप्रशांतधीः॥रक्तदृक्पाशभृत्कृष्णोमहिषस्थःशिवंकुरु॥पिंगलश्मश्रुकेशाक्षःपिंगाक्षश्चतुरोरुणः॥छागस्थःसाक्षसूत्रश्चसप्तार्चिःशक्तिधारकः॥तवमूर्तिप्रदानेनममपापंविनाशय॥दंष्ट्राकरालवदनोनीलांजनसमाकृतिः॥दृकखड्गगदापाणिर्मृत्युर्मांपातुसर्वदा॥इत्थमेवंविधैर्मंत्रैर्यथाविधिसमाहितः॥गोभूहिरण्यवस्त्रैश्चआचार्यंपूजयेत्सुधीः॥एवंकुर्यात्प्रदानेनविषदोषःप्रशाम्यति॥ इतिविषघटीशांतिः ॥अथगंडांतशांतिः॥ ॥ ॥गर्गः॥ अश्विनीमघमूलादौत्रिवेदनवनाडिका॥रेवतीसर्पशक्रांतेमासरुद्ररसाःक्रमात्॥अश्विनीमघमूलादौनाडिकाद्वितयंतथा॥अश्विनीमघमूलानांपूर्वार्द्धेबाध्यतेपिता॥पूषादिसर्पपश्चार्द्धेजननीबाध्यतेशिशोः॥पितृघ्नश्चदिवाजातोरात्रिजातस्तुमातृहा॥आत्महासंध्ययोर्जातोनास्तिगंडेनिरामयः॥सर्वेषांगंडजातानांपरित्यागोविधीयते॥वर्जयेद्दर्शनंयावद्वर्षंषाण्मासिकंभवेत्॥तस्यशांतिंप्रवक्ष्यामिसोममंत्रेणभक्तिमान्॥कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नवं॥अष्टभिश्चचतुर्भिश्चद्वाभ्यांवाशोभनंतथा॥तन्मध्येपायसंशुभ्रंनवनीतेनपूरितं॥राजतंचंद्रमर्चेतसितपुष्पसहस्रकैः॥दैवज्ञःक्षौमवासाश्चशुक्लमाल्यांबरार्चितः॥सोमोहमितिसंचिंत्यपूजांकुर्यादतंद्रितः॥जपेत्साहस्रकंमंत्रंश्रद्दधानःसमाहितः॥आप्यायस्वेतिमंत्रेणपूजाकुर्यात्समाहितः॥ दद्याद्दक्षि

णामिष्टांगंडदोषप्रशांतये॥ शुक्लंवागीश्वरंचैवताम्रपात्रसमन्वितं॥ गंडदोषोपशांत्यर्थंदद्याद्वेदविदेशुचिः॥ इतिगंडांतशांतिः॥ अथदिनक्षयादिशां
तिः ॥गर्गः॥ दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ॥ मूलेगंडेतिगंडेन्वपरिघेयमघंटके॥ कालदंडेमृत्युयोगेदुष्टयोगेसुदारुणे॥ तस्मिन्गंडदि
नेप्राप्तेप्रसूतिर्यदिजायते॥ अतिदोषकरीप्रोक्तातत्रपापप्रयुतेसति॥ विचार्यतत्रदेवज्ञंशांतिंकृत्वायथाविधि॥ यजमानोदेवतानांग्रहाणांचैवपूज
नं॥ दीपंशिवालयेभक्त्याघृतेनपरिदापयेत्॥ अभिषेकंशंकरस्यअश्वत्थस्यप्रदक्षिणं॥ आयुर्वृद्धिकरंजाप्यंसर्वारिष्टविनाशनं॥ गुरुदेवतवि
प्राणांपूजनंगोश्चवर्द्धनं॥ पुष्ट्यायुस्तुष्टिशांत्यर्थमभीष्टफलसिद्धये॥ सर्वारिष्टहरार्थायग्रहयज्ञंसमाचरेत्॥ शिवायविधिवद्भक्त्यादीप
दानंकरोतियः॥ अखंडेगोघृतेनैवसवैमृत्युंजयेन्नरः॥ विष्णुमूर्तिमहापुण्यमश्वत्थंश्रीकरंसदा॥ प्रदक्षिणंनरोभक्त्याकृत्वामृत्युंजयेन्न
रः॥ सर्वसंपत्समृध्यर्थंनित्यंकल्याणवृद्धये॥ अभीष्टफलसिध्यर्थंकुर्याद्ब्राह्मणभोजनं॥ अभिषेकंशिवेशांतिंकृत्वाभक्त्यानरोत्तमः॥
अकालमृत्युंनिर्जित्यदीर्घायुर्जायतेनरः॥ गाणपत्यंपुरुषसूक्तंसौरंमृत्युंजयंशुभं॥ शांतिजाप्यंरुद्रजाप्यंकृत्वामृत्युंजयोभवेत्॥ मूलेवा
सर्पगंडेवाकुर्यादेतानियत्नतः॥ आयुर्वृद्धिकरार्थायगंडदोषप्रशांतये॥ इतिगर्गोक्तगंडजननशांतिः॥ अथत्रिकशांतिः ॥शांतिसर्वस्वे॥
सुतत्रयेसुताचेत्स्यात्तत्त्रयेवासुतोयदि॥ मातापित्रोःकुलस्यापितदानिष्टंमहद्भवेत्॥ ज्येष्ठनाशोधनेहानिर्दुःखंवासुमहद्भवेत्॥ तत्रशांतिंप्रकुर्वी
तवित्तशाठ्यविवर्जितः॥ जातस्यैकादशाहेवाद्वादशाहेशुभेदिने॥ आचार्यमृत्विजोवृत्वाग्रहयज्ञपुरःसरं॥ सहवाग्रहयज्ञःस्यात्स्वस्यवि

त्तानुसारतः॥ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृताः॥पूजयेद्धान्यराशिस्थकलशोपरिशक्तितः॥पंचमेकलशेरुद्रंपूजयेद्रुद्रसंख्यया॥रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः॥द्विजएकोजपेद्धोमकालेशुचिःसमाहितः॥आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चरुं॥अष्टोत्तरसहस्रंवाशतंवाविंशतिंतुवा॥देवताभ्यश्चतुर्वक्त्रादिभ्योग्रहपुरःसरं॥ब्रह्मादिमंत्रैरिंद्रस्ययतइंद्रभजामहे॥ततःस्विष्टकृतंहुत्वाबलिंपूर्णाहुतिंततः॥अभिषेकंकुटुंबस्यकृत्वाचार्यंप्रपूजयेत्॥हिरण्यंधेनुरेकाचर्त्विजांदक्षिणाततः॥प्रतिमागुरवेदेयाउपस्कारसमन्विताः॥कांस्यास्यवीक्षणदत्वाशांतिपाठंतुकारयेत्॥ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्चतर्पयेत्॥एवंशांतिविधानेनसर्वारिष्टंविलीयते॥इतित्रिकशांतिः॥ अथप्रसववैकृतशांतिविधिरुच्यते ॥अकालप्रसवानार्यःकालातीतप्रजास्तथा॥विकृतप्रसवाश्चैवयुग्मप्रसवनास्तथा॥ अमानुषाअखंडाश्च अजातव्यंजनास्तथा॥हीनांगाअधिकांगाश्चजायंतेयदिवास्त्रियः॥पशवःपक्षिणश्चैवतथैवचसरीसृपाः॥विनाशंतस्यदेहस्यकुलस्यचविनिर्दिशेत्॥निर्वासयेत्तांनृपतिःस्वराष्ट्रात्स्त्रियश्चपूज्याश्चततोद्विजेंद्राः॥चिकित्सनैर्ब्राह्मणतर्पणैश्चततोस्यशांतिंसमुपैतिपापं॥ ॥अथयमलशांतिविधिः॥ ॥अत्रब्राह्मणंतदाहुर्यआहिताग्निर्यस्यभार्यागौर्वायमौजनयेत्कातत्रप्रायश्चित्तिरिति॥सोग्नयेमरुत्वतेत्रयोदशकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येमरुतोयस्यहिक्षयेराइवेदचरमाअहेवेत्याहुतिंवाहवनीयेजुहुयादग्नयेमरुत्वतेस्वाहेतिसातत्रप्रायश्चित्तिरिति॥ कारिका॥ अथयस्यवधूर्गौर्वाजनयेच्चेद्यमौततः॥समरुद्भ्यश्चरुंकुर्यात्पूर्णाहुतिमथापिवेति ॥ अथप्रथम-

दिनादिषुदेवीगृहीतबालकरक्षणं॥ मदनरत्नेयोगसागरे॥ प्रथमेहनिगृह्णातिबालकंबालिनीग्रही॥ पाथिनीग्रहीतिनारायणीयेपाठः॥ गंधिनीतिगुणोत्तरे॥ तयागृहीतमात्रस्यचेष्टितान्युपलक्षयेत्॥ गात्रोद्वेगोनिराहारोलालाग्रीवानिवर्त्तनं॥ लिंपेत्तधातकीलोध्रमंजिष्ठातालचंदनैः॥ धूपयेन्महिषाक्षेणततोमुंचतिसाग्रही॥ लेपनधूपनेबालस्यनारायणीयेबलिदानानुवृत्तौ॥ मत्स्यमांससुराभक्ष्यगंधाऽसृक्धूपदीपकैः॥ बलिंदद्यादितिशेषः॥ बलिमंत्रः॥ प्रयोगसारे॥ ॐ नमश्चामुंडेभगवतिविद्युज्जिव्हेहां२ हीं२ अपसरंतुदुष्टग्रहाहुं॥ तद्यथागच्छंतुयातान्यतः॥ स्थानेरुद्रोज्ञापयतिस्वाहाविद्युज्जिव्हेहांहींहुंहुंमुंचमुंचस्वाहेति॥ बालग्रहाणांविद्येयंशस्ताबलिनिवेदने॥ बलिश्चरवेरुदयेस्तेदिनार्द्धेवादेयः॥ बलिस्थानानिप्रयोगसारे॥ कदंबश्चकरंजश्चविनीतोनिंबएवच॥ अश्वत्थोदुंबरश्चैवश्लेष्मातकबटौतथा॥ मातृवृक्षाःक्रमेणोक्ताःपूर्वादीशांतदिग्गताः॥ तेषामेकंसमाश्रित्यबलिंदद्याद्यथोदितमिति॥ प्रतिस्थूलंप्रत्युदकंप्रतिवृक्षमथापिवा॥ स्थूलंतटं॥ क्वचित्तुकूलमित्येवपाठः॥ अत्राशायामनूक्तायांप्राक्प्रोक्तान्नानुसारतः॥ यत्रवारोचतेतत्रमातृणांबलिमाहरेत्॥ कृत्वानीराजनांतंबलिमितिविधिवद्बालमाहूयसंस्पृश्याङ्घ्रिस्तत्सर्वगात्रंशिरसिसकुसुमैरक्षतैर्भ्रामयित्वा॥ क्षिप्त्वाग्रेदेवतायाविधिवदुपहितैस्तत्रगीतैःस्वमंत्रैःकुर्याद्रक्षांसमीक्ष्यक्षणमिवविलयंयांतिदुष्टग्रहार्त्तिः॥ नीराजनमंत्रोद्धारोनारायणीये॥ ब्रह्माविष्णुश्चरुद्रश्चस्कंदोवैश्रवणस्तथा॥ रक्षंतुत्वरितंबालंमुंचमुंचकुमारकं॥ कालगुणोत्तरे॥ पलाशाश्वत्थकपित्थबिल्वोदुंबरपल्लवाः॥ पंचभृंगाःस्मृताह्येतेबालानांहितकारकाः॥ स्नापितंभूषितं

बालंततोमुंचतिसाग्रही ॥ प्रयोगसारेपि ॥ पलाशोदुंबराश्वत्थबिल्वन्यग्रोधपल्लवाः ॥ क्वथितेनकषायेनपरिषिंचेत्प्रशांतये ॥ परिषिंचेत्स्नापयेदितिमदनः ॥ अत्रमंत्रः ॥ ओंनमश्चामुंडेइत्यादिर्बलिदानेपूर्वमुक्तः ॥ रक्षामंत्रः प्रयोगसारे ॥ रक्षरक्षमहादेवनीलग्रीवजटाधर ॥ ग्रहैस्तुसहितोरक्षमुंचमुंचकुमारकं ॥ अमुंमंत्रंभूर्जपत्रेविलिख्यतत्सत्रभुजेबध्नीयादितिमदनः ॥ बालकशिखास्पर्शपूर्वकंजपेमंत्रउक्तः ॥ प्रयोगसारे ॥ ओंसर्वे मातरइमंग्रहंसंहरंतुहुरोदय ॥२॥ स्फोटय ॥२॥ स्वाहागर्ज्ज २ ॥ सरगृह्ण २ ॥ आमर्द्दय २ ॥ हिम २ ॥ हन ॥ एवंसिद्धिंरुद्रोज्ञापयतिस्वाहा ॥ अत्रहोमोपिप्रयोगसारे ॥ ओंकूष्मांडिभगवतिसुरागिणिसमुंडितेमुंच २ दह २ पच्चसर २ गच्छस्वाहा २ ॥ कृत्वाचतुष्पथेकुंडंमंत्रेणानेनमंत्रवित् ॥ त्रिरात्रंपंचरात्रंवासहस्रंजुहुयात्तिलैः ॥ यांतिदुष्टग्रहाः शांतिंबलिनाचाऽनुमोदिताः ॥ बालरोदनपरिहारार्थंयंत्रमुक्तंप्रयोगसारे ॥ षडस्रमध्येह्रींकारस्तन्मध्येशिशोर्नामविलिख्यषट्सु अस्रेषुओंलुलुवस्वाहेतिमंत्रस्यषडक्षराणिविलिख्यतद्बहिर्नेमिवद्वृत्तयंविलिख्यतद्बहिरधोमुखैरर्द्धचंद्रैरावेष्ट्य पंचोपचारैः संपूज्यबालहस्तेबध्नीयादिति ॥ अथबालग्रहस्तवः प्रयोगसारे ॥ प्रणम्यशिरसाशांतंगणेशानंतमीश्वरं ॥ बालग्रहस्तवंवक्ष्येसमस्ताभ्युदयप्रदं ॥ तपसायशसादीप्त्यावपुषाविक्रमेणच ॥ निर्द्दिष्टोयःसदास्कंदःसनोदेवः प्रसीदतु ॥ रक्तमाल्यांबरधरोरक्तगंधानुलेपनः ॥ रक्तादित्योज्ज्वलः शांतःसनोदेवःप्रसीदतु ॥ योनंदनःपशुपतेर्मातृणांपावकस्यच ॥ गंगोमाकृत्तिकानांचसनोदेवः प्रसीदतु ॥ देवसेनापरिवृतोदेवसेनार्चितःसदा ॥ देवसेनापतिः श्रीमान्सनो० ॥ शक्तिः शक्तिधरारूपः कुमारः शिखिवाहनः ॥ क्रूरारिहामहासेनः सनोदेवः० ॥

प्रकृत्यासुंदरोदांतोदेवैश्वर्योदयान्वितः॥ नानाविनोदसंपन्नः सनो०॥ प्रबोधासुप्रबोधाचबोधनासुप्रबोधना॥ प्रबुद्धाचप्रबोधाचसुप्रीतासुमना
स्तथा॥ मनोन्मनीतिविख्यातायोगिन्यः पांतुबालकं॥ सुव्रतारुक्मिणीचैवमंदवेगाबिभीषणा॥ विद्युज्जिव्हामहानासाशतानंदातथापरा॥ बालदा
प्रमदाचेतियोगिन्यःपांतुबालकं॥ हरिणीचाथवाराहीवानरीक्रोष्टुकीतथा॥ कुबेरीकोटराक्षीचकुंभकर्णाचचंडिनी॥ बलाह्विकारिणीचेतियोगि
न्यःपांतुबालकं॥ शुद्धाविशुद्धाश्रद्धाचयोगासिद्धामितंवदा॥ सुभगासुभदागौरीबलाविकरणीतिच॥ नानाविज्ञानविख्यातायोगिन्यः पांतुबाल
कं॥ लंबाप्रलंबाचतथालंबकर्णाचलंबिका॥ ज्वालाकरालीकालिंदीकालिकेतियथोदिताः॥ स्वच्छंदाचारसंपन्नायोगिन्यः पांतुबालकं॥ प्र
णीतासुप्रणीताचमालिनीविश्वमालिनी॥ विमलाकमलामालीलोलारौद्रीचविश्वदा॥ विचरंत्योयथाकामंयोगिन्यः पांतुबालकं॥ वासु
वेगामहावेगासुवेगावेगवाहिनी॥ शशिनीहंसिनीहृष्टिःपुष्टिःपौष्टिकसिद्धिदा॥ दिव्यानुभावावाह्निन्योयोगिन्यः पांतुबालकं॥ भ्रमिणीभामिनी
निस्यानिर्भिन्नासुभगागुहा॥ क्लेदिनीद्राविणीवामायोगिन्यःपांतुबालकं॥ रुद्रशक्तिविनिष्क्रांतमेकाशीतिक्रमोदितं॥ योगिनीवृंदमेतद्धिसि
द्धविद्याधरार्चितं॥ स्कंदग्रहाधिदैवंतद्बालकंपातुसर्वदा॥ शंकुनीरेवतीदेवीशिखाचमुखमंडिका॥ प्रलंबापूतनाख्याचकटपूतनिकापुनः॥
विजयागोमुखीधूम्रासुंडमालातथापरा॥ अधोलंबाचपद्माचकुमुटाप्यथचांबिका॥ भानिनीचैवकालीचदेवीप्रेतमुखीतथा॥ ऐंद्रीमा-
र्जारिकाभूयःकुरुणीचशुभाकृता॥ कालरात्रिश्चमायाचलोहितापिलिपिंचिका॥ भीतारणीचक्रवादाभीषणादुर्जयापरा॥ तापनीकट

कोलीचमुक्तकेशीमहाबला॥ अहंकारीजयातद्रूदजमेषात्रिदंडिका॥ रोदनीमुकुटाभिख्याललाटापिंगलातथा॥ शीतलाबालिनीचैवतापसीपापराक्षसी॥ मानसाधनदादेवीबलानावर्त्तिनीतथा॥ यमुनाजातवेदाचमानिनीकलहंसिनी॥ वालिकादेवदूतीचवायसीयक्षिणीतथा॥ स्वच्छंदापालिकाचैववासिनीचांबिकेतिच॥ पंचाशत्तुकुलोत्पन्नाश्चतुष्षष्ठिसमीरिताः॥ योगिन्योनित्यसंतुष्टाःस्कंदापस्मारदेवताः॥ नानारक्षाधिकारस्थाबालकंपांतुसर्वदा॥ महालक्ष्मीर्महातंगामहासेनामहाबला॥ महाकंपामहाभीमामहातेजामहोत्सवा॥ महासेनामहाचंडामोहिनीवीरनायका॥ एकवीराविशालाक्षीसुकेशीसुमनास्तथा॥ सुकेशिनीचसंतुष्टादंडिनीचविलंबिनी॥ भ्रामिनीचाथसौवर्णीसिंहवक्त्राकटंकिनी॥ भ्रमराचचलाचंपासिद्धिदाचतथापरा॥ शातोदरीधृतिःस्वाहास्वधाख्याचसनातनी॥ शंबराचतथादेवीनीलग्रीवातथांबिका॥ वितलागंधिनीवामाक्रीडंतीचैववाहिनी॥ कर्षिणीमालतीफुल्लाकालकर्णीचचंडिका॥ चित्राननागुह्याचेतिपार्वतीसंगतिर्गता॥ पंचाशन्नवसंपन्नाशकुनीदेवतप्रिया॥ योगिन्यःकामरूपिण्योबालकंपांतुसर्वदा॥ विध्वंतपाप्रभावज्ञासर्वज्ञासर्वगागुहा॥ दुर्गासरस्वतीज्येष्ठाश्रेष्ठापद्मापरापरा॥ प्रमदारोहिणीशीताप्रह्वीप्रह्लादिनीविभा॥ विभूतिर्विततिःप्रीतिःप्रकृतिःप्रमतिर्यथा॥ एताभगवतासृष्टायोगिन्योयोगसिद्धिदाः॥ पंचविंशतिराख्यातारेवतीशक्तिगोचरा॥ जगदाप्यायनकराबालकंपांतुसर्वदा॥ नंदश्चैवोपनंदश्चगोमतिःसुमतिस्तथा॥ विद्युज्जिह्वोमहाकालःकरालस्तिमिलोचनः॥ तेजहोडाविरूपाक्षोगोमुखोवडवामुखः॥ कालाननःकरालश्चशंकुकर्णोविभीषणः॥ एतेशकुंदनोत्पन्नावीराःषोडशराक्ष

साः॥ पूतनादेवताजुष्टाबालकंपांतुसर्वदा॥ वज्रिणीशक्तिनीचाढ्यादंडिनीखड्गिनीतथा॥ पाशिनीध्वजिनीदेवीगदिनीशूलिनीपरा॥ पविनी
चक्रिणीचेतिसर्वाकाराभयप्रदाः॥ एतादिङ्गिर्मितादेव्योयोगिन्योदेवकीर्तिताः॥ अधिभूतप्रधानायापायात्साशांतपूतना॥ प्रसन्नामातरः
सर्वाबालकंपांतुसर्वदा॥ अर्थकोजलकोभूमाउग्रःस्कंदश्चकीर्त्तितः॥ वीरेशाःपितृभिःसृष्टानैजमेषाधिदेवताः॥ पंचशक्तिप्रधानास्तेबाल
कंपांतुसर्वदा॥ आदित्यावसवोरुद्राःपितरोमरुतस्तथा॥ मुनयोमनवःकालाग्रहयोगाःसनातनाः॥ सिद्धाःसाध्याश्चगंधर्वादिव्यश्चाप्सरसांव
राः॥ विद्याधरामहादेत्याबालकंपातुसर्वदा॥ सहजायोगजाचैववीरजामंत्रजातथा॥ योगिन्योयोगवनितानानाविभवगोचराः॥ भवानीना
मसंतुष्टाबालकंपांतुसर्वदा॥ भूर्लोकेचभुवर्लोकेस्वर्लोकेयाश्चमातरः॥ अधश्चोर्ध्वंचतिर्यक्चक्रीडंत्योऽनंतमूर्त्तयः॥ प्रसन्नयोगसंपन्नादि
व्यैश्वर्यसमन्विताः॥ स्वच्छंदपदसंभूतैर्भैरवैःपरिवारिताः॥ रक्षंतुबालकंप्रीताःशांतिर्नयतुचेतसा॥ दिव्यंस्तोत्रमिदंपुण्यंबालरक्षाधिकारकं॥
जपेत्संतानरक्षार्थंबालद्रोहोपशांतिदं॥ इतिबालस्तवः॥ इदंचस्तवांतंकृत्यमाद्यमासवर्षयोर्द्वितीयादिदिनमासवर्षेष्वपिकार्यंविशेषस्तू
च्यते॥ कुमारतंत्रे॥ प्रथमेदिवसेमासेवर्षेवायोगिनीतदा॥ अथवानंदिनीनाम्नापूतनाक्रमतेशिशुं॥ तद्गृहीतस्यबालस्यज्वरःस्यात्प्रथमंततः
॥ गात्रशोषश्चवैवर्ण्यंनाहारेच्छाभृशंभवेत्॥ छर्दिमूर्च्छाचकंपश्चहीनज्वरयुतस्तथा॥ विधानंतस्यवक्ष्यामियेनमुंचतिपूतना॥ नदीमृत्ति
कयाकुर्याच्छोभनांपुत्रिकांततः॥ शुक्लोदनंशुक्लगंधस्तथाशुक्लानुलेपनं॥ शक्लपुष्पाणिवैपंचध्वजाःपंचप्रदीपकाः॥ स्वस्तिकाःपंचपूर्वाह्णे पूर्व-

स्यांदिशिसंयतः॥ बलिंदद्याद्थोश्वेतसर्षपोशीरमेववा॥ शिवनिर्माल्यमार्जारनृकेशान्निंबपत्रकं॥ गव्यंघृतंचेत्येतेन धूपयेच्चैवबालकं॥ एवंदिनत्रयंकृत्वाचतुर्थेशांतिवारिणा॥ स्नापयेद्बालकंपश्चाद्भोजयेच्चापिभिक्षुकं॥ क्षीरेणभोजयेदेवंसुस्थोभवतिबालकः॥ शांतिवारिणेतिशन्नइंद्राग्नीशन्नोवातइत्यादिकैःस्वस्वशाखापठितैर्मंत्रैरभिमंत्रितंवारिशांतिवारि॥ अथवावक्ष्यमाणमंत्रेणशतकृत्वोभिमंत्रितं वारिशांतिवारि॥ द्वितीयदिवसेमासेहायनेवासुनंदना॥ गृह्णातिपूतनाबालंयोगिनीस्वस्तनापिवा॥ ततोभवेज्ज्वरःपूर्वंसंकोचोहस्तपादयोः॥ दन्तान्खादत्यनिशंनिमीलयतिचक्षुषी॥ आहारंचनगृह्णातिदिवारात्रंचरोदिति॥ अक्षिरोगंछर्दनंचभवेद्भीतिःपुनःपुनः॥ कृशत्वंचप्रजायेतइत्येतच्छिशुलक्षणं॥ तंडुलप्रस्थपिष्टेनविनिर्मायाथपुत्रिकां॥ त्रयोदशध्वजादीपाःस्वस्तिकायवलोदना॥ प्रस्थप्रमाणपिष्टेनसिद्धापूपाश्चमत्स्यकाः॥ मांसंचेत्येतदखिलंपश्चिमायांदिशिक्षिपेत्॥ पश्चिमायांचसंध्यायामेतद्दद्याद्दिनत्रयं॥ धूपशांतिस्नानब्राह्मणभोजनानिपूर्ववत्॥ तृतीयेदिवसेमासेवर्षेवापूतनाभिधा॥ गृण्हीयाद्योगिनीबालंततःपूर्वंज्वरोभवेत्॥ प्रस्थप्रमाणपिष्टेनपुत्रिकांकारयेत्ततः॥ रक्तोदनंध्वजोरक्तःस्वस्तिकोरक्तएवच॥ रक्तपुष्पंरक्तगंधस्तथारक्तानुलेपनं॥ पश्चिमायांचसंध्यायामुदीच्यांनिक्षिपेद्बलिं॥ धूपशांतिस्नानब्राह्मणभोजनानिपूर्ववत्॥ चतुर्थेह्निमासेतुवर्षेगृण्हातिबालकं॥ तुषमंडनिकानामपूतनाचाथयोगिनी॥ भीषणाख्याततस्तस्यजायतेप्रथमंज्वरः॥ गात्रभंगोस्थितिमूर्छोवैवर्ण्यंचाक्षिमीलनं॥ वैकल्यंश्यामताश्वासःकासोरुचिरितोंगितं॥ तिलपिष्टमयैः

कृत्वापुत्रिकांबिल्वकंटकैः॥अष्टांगंरचयेत्पुष्पयुक्तंशुक्लध्वजोर्जुनः॥स्वस्तिकोर्द्धप्रस्थसिद्धंभक्तंतावदपूपकाः॥त्रिसंध्यंपश्चिमाशायांब
लिंदद्यात्प्रयत्नतः॥तावदपूपकाइतिअर्द्धप्रस्थपरिमितेनान्नेनकृताइत्यर्थः॥गोश्रृंगंसर्पनिर्मोकंलशुनंनिंबपत्रकं॥मनुष्यकेशमार्ज्जारलोमान्या
जघृततथा॥एतैश्चधूपयेदेकनिशिसंध्यात्रयेपिच॥एकनिशिएकस्मिन्नेवदिनेबलिरित्यर्थः॥शांतिस्नानमंत्रब्राह्मणभोजनानिचपू०॥पंच
मेदिवसेमासेवर्षेवापूतनाशिशुं॥बिडालिकाख्यागृह्णीयात्प्रथमंजायतेज्वरः॥हिक्काश्वासश्चशूलंचगात्रभंगोरुचिस्तथा॥तंडुलप्रस्थपिष्टे
ननिर्मायाथोरुपुत्रिकां॥शुक्लोदनंध्वजाःपंचस्वस्तिकाःपंचचोज्ज्वलाः॥पंचदोषास्त्रशुक्लानिकुसुमानिचचंदनं॥अपराण्हेवृक्षमूलेपश्चिमा-
यांदिशिक्षिपेत्॥धूपस्तुगोश्रृंगंलशुनमित्यादिकः॥शांतिस्नानमंत्रब्राह्मणभोजनानि॥षष्ठेह्नितथामासेह्यायनेचापिबालकं॥पूतनाश
कुनिर्नामगृण्हीयात्तदनंतरं॥ज्वरउद्वेजनंगात्रेशोषःश्वासोरुचिस्तथा॥काशश्चहस्तपादाक्षिसंकोचश्चेतिलक्षणं॥तंडुलप्रस्थपिष्टेन
विनिर्मायाथपुत्रिकां॥कृष्णोदनंध्वजाःपंचकृष्णाःस्वस्तिकपंचकं॥कृष्णामेवाथमत्स्यांश्चपायसंदुग्धमेवच॥मांसंचापूपकास्त्वर्द्धप्रस्थ
पिष्टविनिर्मिताः॥अपराण्हेपश्चिमायांनिक्षिपेद्बलिपुत्रिकां॥पुत्रिकांपूर्ववत्कृत्वापललंशूलपाचितं॥मत्स्याःपर्पटिकाश्चैवरक्तंचप्रस्थसं
मितं॥उदीच्यांपूर्वसंध्यायांबलिर्देयःप्रशांतये॥अत्रबलिदानयोर्विकल्पः॥तयोरेवकालयोर्बालकस्यधूपोदेयःगोश्रृंगलसुनमित्यादि
कः॥तथाशांतिस्नानंब्राह्मणभोजनंच॥बलिदानपूजायांमंत्रस्तु॥ओंफट्फट्स्वाहा॥सप्तमेदिवसेमासेवर्षेवाशुष्करेवती॥गृण्हातिपूत

नाबालंततःस्यात्प्रथमंज्वरः॥गात्रभंगोथविद्वेषआहारेकंपरोदने॥इत्येतल्लक्षणंतत्रबलिर्देयःप्रशांतये॥प्रस्थसंमितपिष्टेनसम्यक्कृत्वाथपुत्रिकां॥सप्तध्वजाःसप्तदीपाःस्वस्तिकाःसप्तवैतथा॥पुष्पाणिमत्स्यमांसंचभक्तंचेत्सुदगाहरेत्॥धूपस्तुगोशृंगलशुनमित्यादिकः॥शांतिस्नानंब्राह्मणभोजनं॥मंत्रस्तु॥ओंह्रींफट्स्वाहा॥अष्टमेदिवसेमासेवर्षेचाक्रमतेशिशुं॥बिडालिकानामधेयापूतनास्यततोज्वरः॥गात्रभेदोत्ररुदितंरोदनंनेत्रमीलनं॥जिह्वाशोषःशिरस्फोटआहारद्वेषएवच॥अक्षिरोगोभवेदेतादिंगितंतद्ग्रहाच्छिशोः॥तंदुलप्रस्थपिष्टेनपुत्तलींकारयेत्ततः॥पायसंमधुसर्पिश्चक्षीरलाजाश्चशष्कुली॥गुग्गुलंमेषमांसंचतथापर्पटिकाअपि॥ध्वजादीपाश्चचत्वारोगंधानानाविधाअपि॥सुमनांसिचरक्तानीत्येवंमंत्रोदितोबलिः॥अमुंसमाहरेत्पूर्वसंध्यायांदक्षिणादिशि॥कृष्णाष्टम्यांवक्ष्यमाणोमंत्रेणानेनसंयतः॥ओंनमोनारायणायत्रैलोक्यविद्रावणाय॥ओंह्रींफट्स्वाहा॥अनेनैवचमंत्रेणपूजादिबलिहरणांतंकर्मकुर्यात्॥धूपस्तुगोशृंगलशुनमित्यादिकः॥शांतिस्नानंब्राह्मणभोजनंच॥अत्रकृष्णाष्टम्यांबलिहरणमितिननियमार्थं॥किंतुसतिसंभवेप्राशस्त्यार्थं॥अन्यथातत्प्रतीक्षायांशिशुविनाशापत्तेः॥नवमेदिवसेमासेहायनेवापिबालकं॥गृण्हातिमदनानाम्नीपूतनातदनंतरं॥ज्वरश्छर्दिर्व्रणाध्मानंकासश्वासश्चतृष्णता॥गात्रभंगश्चशूलंश्चचिन्हान्येतानिबालके॥प्रस्थमात्रेणपिष्टेनविनिर्मायचपुत्रिकां॥ओदनंमत्स्यमांसंचपर्पटीचेक्षुमूलिकां॥निक्षिपेत्पूर्वसंध्यायामुत्तरस्यांबलिंदिशि॥अत्रमंत्रः॥ओंनमोभगवतेवासुदेवायकृष्णामंडलेबलिमादायहरहुंफट्स्वाहा॥धूपस्तुगोशृंगलशुनमित्यादिकः॥शांतिस्नानंब्रा

ह्मणभोजनंच॥दशमेदिवसेमासे हायनेवाथबालकं॥पूतनारेवतीनाम्नीगृण्हीयाद्बालकंततः॥ज्वरः छर्दिः कासश्वासौम्मूलंन्चेत्येतदीरितं।।यत्रद्वे
षश्चतत्रायंबलिर्देयोविचक्षणैः॥प्रस्थप्रमाणपिष्टेनपुत्रिकांतत्रकल्पयेत्॥अष्टांगंलेखयेत्तत्रबिल्ववृक्षस्यकंटकैः॥गुडोदनंचसर्पिश्चध्वजानां
पंचविंशतिः॥स्वस्तिकानांप्रदीपानांपंचविंशतिरेवच॥चत्वारिरक्तपुष्पाणित्येतद्दक्षिणादिग्गतः॥संध्यात्रयेवक्ष्यमाणमंत्रेणानेननिक्षिपेत्॥ ओं
नमोभगवतेवासुदेवायहन२हुंफट्स्वाहा॥धूपोगोशृंगलशुनमित्यादिकः॥शांतिस्नानंब्राह्मणभोजनंच॥एकादशदिनेमासेहायनेपूतना
चिका॥गृह्णातिबालकंपश्चाज्ज्वरस्तस्यप्रजायते॥अन्नद्वेषोमुखेशोषोगात्रभंगश्चरोदनं॥ऊर्ध्वदृष्टिरपीत्येतल्लक्षणंतद्ग्रहाच्छिशोः॥पुत्रिकां
माषपिष्टेनरचित्वाशुक्लमोदनं॥पुष्पाण्यपिचशुक्लानिध्वजानांपंचविंशतिः॥स्वस्तिकानांप्रदीपानांपंचविंशतिरेवच॥एतत्सर्वंयमाशायांसं
ध्यायांप्रातराहरेत्॥अत्रमंत्रः॥ ओंनमोभगवतेतारायचंद्रहासवज्रहस्तायज्वलदुष्टग्रहाय ओंफट्स्वाहा॥धूपस्तुगोशृंगलशुनमित्यादिकः
॥शांतिस्नानंब्राह्मणभोजनंच॥प्रथमदिवसमासवर्षगृहीतपूतनाहरोक्तंद्रष्टव्यं॥द्वादशेदिवसेमासेवर्षेयापूतनाशिशुं॥अद्भुताख्याप्रगृ
ह्णातिज्वरःस्यात्प्रथमंततः॥रोदनंसर्वदादंतरवादनंरक्तनेत्रता॥रोमांचस्तापइत्येतदखिलंतस्यलक्षणं॥तंडुलप्रस्थपिष्टेनकृत्वातन्नामपु
त्रिकां॥त्रयोदशस्वस्तिकाश्चध्वजादीपास्त्रयोदश॥अपूपामत्स्यमांसंचतथापर्पटिका अपि॥एतत्सर्वंदक्षिणस्यांदिशिमंत्रेणनिक्षिपेत्॥
मंत्रस्तु॥ ओंनमोनारायणायज्वलवज्रहस्तायहरहरशोषय२ मर्दय२ पातय२ हनहनदुष्टसत्वानांहुंफट्स्वाहा॥गोशृंगमित्यादिकोधूपः॥

शांतिस्नानंब्राह्मणभोजनंच॥ अथबौधायनोक्ताज्वराद्युत्पत्तौ शांतयः॥ प्रतिपदिकष्टंसंदेहोवादिनान्यष्टादश॥ अग्निर्देवताअग्निरस्मीतिपूजामंत्रः॥हैमीप्रतिमा॥ घृतधूपोघृतदीपश्च॥यथासंभवनैवेद्यंघृतंहोमद्रव्यंशांतिर्भवति॥अत्रसर्वत्रप्रथमंतत्तत्तिथिदेवतामंत्रजपः॥सहस्रादिसंख्याकःपश्चात्पूजाहोमदानादिहोमसंख्याचाष्टोत्तरशतादिर्व्याधितारतम्येनकल्प्या॥सहस्रंमृत्युनिर्देशोद्वितीयायांदिनानिषोडशब्रह्मादेवता॥ब्रह्मजज्ञानमितिजपपूजाहोममंत्रः॥ अगुरुधूपःघृतदीपःसर्वत्रशर्करानैवेद्यंतिलयवाज्यानिहोमद्रव्यंप्रतिमाचहैमी॥ तृतीयायांदिनानिनवपार्वतीदेवतागौरीर्मिमायेतिमंत्रः॥दूर्वाभिःपूजाकुंकुमधूपः॥गुग्गुलुर्वाधूपोघृतदीपः॥द्राक्षाक्षीराज्यंनैवेद्यं॥पायसंमधुराक्तंदूर्वाश्चहोमद्रव्यंप्रतिमाहैमी॥चतुर्थ्यांदिनानिषोडशगणपतिर्देवतागणानांत्वेतिपूजाहोमादिमंत्रः॥ हैमीप्रतिमाकुंकुमंरक्तचंदनंगंधः करवीरादीनिपुष्पाणिअगुरुधूपोघृतदीपोलड्डुकाइक्षुखंडानिनैवेद्यंनारिकेरशकलानिकदलीफलानिचहोमद्रव्यं॥पंचम्यांदिनान्येकविंशतिर्नागादेवताः॥हैमीप्रतिमानमोस्तुसर्पेभ्य इतिमंत्रः॥चंदनंगंधःसुरभिपुष्पाणिघृतधूपःपयोनैवेद्यंतिलयवाज्यपायसशर्करामधूनियथायोगंहोमद्रव्यं॥षष्ठ्यांदिनानिद्वादशस्कंदोदेवताद्रप्सश्चस्कंदेतिपूजामंत्रः॥पीतंचंदनंरक्तंवागंधःरक्तानिपुष्पाणिजातीपुष्पाणिवा॥जटामांसीधूपः॥लड्डुकादिनैवेद्यफलानिवातिलयवाज्यंहोमद्रव्यहैमीप्रतिमाशांतिर्भवति॥सप्तम्यांदिनान्यष्टौदिननाथोदेवता॥आसत्येनआकृष्णेनेतिवामंत्रः॥हैमीताम्रजावाप्रतिमाकुंकुमंगंधः॥करवीरादीनिपुष्पाणिगुग्गुलोधूपःशर्कराघृतसंयुतपायसंनानाफलानिचनैवेद्यंअर्के

समिधःपायसंहोमद्रव्यं॥अष्टम्यांदिनानित्रयोदशईश्वरोदेवतातमीशानमितिपूजामंत्रः॥राजतीप्रतिमाकर्पूरमिश्रितंचंदनंगंधःबिल्वदलानिअ
र्कपुष्पाणिनीलोत्पलानिचपुष्पाणि॥जटामांसीधूपःपायसंनानाभक्षाश्चनैवेद्यंमधुराक्तास्तिलाहोमद्रव्यंसांगशांतिर्भवति॥नवम्यांदिनान्य
ष्टादशभगवतीदुर्गादेवता॥जातवेदसइतिपूजामंत्रः॥हैमीप्रतिमारक्तचंदनंगंधःकुंकुमादिकंवा॥जपाकुसुमादिकंपुष्पंगुग्गुलुर्धूपःघृतप
क्वंनैवेद्यंत्रिमधुराक्तपायसंहोमद्रव्यंदेव्यैदधिभक्तपात्रदानंतद्भक्तायवा॥दशम्यांदिनानिपंचविंशतिःयमोदेवताहैमीलौहीवाप्रतिमायमायत्वेति
पूजामंत्रः॥चंदनंमृगमदश्चगंधःमधुसर्ज्जरसश्चधूपःतिलतैलदीपः॥बिल्वपत्राणिकृष्णातिलाश्चपूजाद्रव्यंकृसरान्ननैवेद्यंघृतमधुतिलमुद्गा
होमद्रव्यं॥एकादश्यांदिनानिसप्तविश्वेदेवादेवताविश्वेदेवासइतिमंत्रःहैमीप्रतिमाश्वेतचंदनंगंधःकृष्णागुरुधूपःघृतदीपःतुलसीपत्राणि
पूजायांयवमोदकंनैवेद्यंतिलयवमध्वाज्यंहोमद्रव्यं॥द्वादश्यांदिनानिदशरुद्रोदेवतायातेरुद्रेतिमंत्रः॥हैमीप्रतिमाचंदनंश्रीखंडंअगुरुधूपो
घृतदीपःपायसंनैवेद्यंचंपकंपुष्पंकमलंवापूजायांतिलयवाज्यव्रीहिमधूनिहोमद्रव्यंशांतिर्भवति॥त्रयोदश्यांदिनान्यष्टौशशीदेवतारौक्मीरा
जतीवामूर्तिःआप्यायस्वेतिमंत्रः ॥पूजादौश्वेतचंदनंगंधःचंदनधूपःघृतदीपःदधिशर्करानैवेद्यंतिलयवास्त्रिमध्वक्ताहोमद्रव्यंशांतिर्भवति॥चतुर्द
श्यांदिनानिद्वाविंशतिःशंकरदेवताशंभवायेतिमंत्रः॥रौक्मीराजतीवामूर्तिःश्वेतचंदनगंधःअर्कपुष्पंबिल्वदलानिवाअगुरुधूपःपा
यसंनैवेद्यंत्रिमध्वक्तास्तिलाहोमद्रव्यं॥अमायांदिनान्यष्टादशशचीदेवताहोतायक्षदितिमंत्रः॥हैमीप्रतिमाकुंकुमादिगंधःनानासुगंधपुष्पा

णिकृष्णागुरुर्धूपः फेणिकापूरिकादि नैवेद्यं शर्करा घृतपायसं होमद्रव्यं पूर्णिमायां दिनानि षोडश चंद्रो देवता दमनकं पूजार्थमन्यत्सर्वं त्रयोदशीशांतावुक्तं ग्राह्यं।। इति तिथिदोषशांतिः।। अथाश्वलायनोक्ता वारशांतिः।। आदित्यवारस्य रुद्रो देवता या ते रुद्रेति मंत्रः हैमी राजती वा मूर्त्तिश्चंदनं गंधः अगुरुर्धूपः घृतदीपः पायसं नैवेद्यं होमद्रव्यं च।। सोमवारस्य पार्वती देवता गौरीर्मिमायेति मंत्रः हैमी राजती वा मूर्त्तिः कुंकुमगंधः स्रग्गंधिपुष्पं।। अगुरुर्धूपः घृतदीपः नानाभक्ष्याणि नैवेद्यं तिलयवा होमद्रव्यं देवभक्तसंतर्पणं च।। भौमस्य स्कंदो देवतान्यत्सर्वं षष्ठीशांतिवत्।। बुधवारस्य विष्णुर्देवता विष्णोरराटमसीति मंत्रः।। हैमं स्वरूपं पीतचंदनं पीतपुष्पाणि कमलानि च।। अगुरुर्धूपो घृतदीपः यवलड्डुका नैवेद्यं तिलयवाज्यहोमः।। गुरुवासरस्य ब्रह्मा देवता ब्रह्मजज्ञानमिति मंत्रः हैमी प्रतिमा कुंकुमगंधः पर्णपुष्पं गुग्गुलुधूपः शर्कराज्यं नैवेद्यं तिलयवधाना घृतहोमद्रव्यं।। शुक्रवासरस्य इंद्रो देवता त्रातारमिंद्रमिति मंत्रः हैमी राजती वा मूर्त्तिः चंदनं गंधः चंपकं पुष्पं अगुरुर्धूपः घृतपक्वं नैवेद्यं तिलयवाज्यमधूनि होमद्रव्यं।। शनिवासरस्य यमो देवता यमेन दत्तमिति मंत्रः हैमी लोही वा मूर्त्तिः।। ताम्रजेति केचित् चंदनं गंधः पुष्पं कृष्णा मधुधूपः तिलतैलदीपः।। मधुमत्स्याश्च नैवेद्यं तिला मधु च होमद्रव्यं शांतिर्भवति।। इति वारशांतयः।। अथ नक्षत्रशांतयः।। वृद्धवशिष्ठः।। रोगशांतिं प्रवक्ष्यामि रोगार्त्तानां शरीरिणां।। बलिपूजागहोमैश्च जपब्राह्मणभोजनैः।। यस्मिन् धिष्ण्ये यदा नृणां रोगः संजायते तदा।। तद्धिष्ण्यपूजा कर्त्तव्या तत्तदीश्वरतुष्टये।। सुवर्णेन प्रमाणेन तदर्द्धार्द्धेन वा पुनः।। धिष्ण्येशप्रतिमा कल्प्या यथावित्तानुसारतः।। ईशान्यामथवा प्राच्यामुदी

च्यांदिशिसंलिखेत्॥तंडुलोपर्यष्टदलंपद्मंगोमयमंडले॥पंचामृतैःसलेपैश्चतत्तन्मंत्रैःपृथक्पृथक्॥स्नाप्यकल्पोक्तमंत्रेणप्रतिमांस्थापये
त्पुनः॥कर्णिकायांसुसंस्थाप्यध्यात्वादेवंसमर्चयेत्॥तद्वर्णवस्त्रगंधाद्यैरक्तधूपोपहारकैः॥आरक्तवर्णकुंभंचपंचत्वक्पल्लवैर्युतं॥शुक्लवस्त्रस्व
र्णरत्नसर्वौषधिसमन्वितं॥मृत्संचगव्यसद्बीजफलक्षौद्रकुशान्वितं॥देवस्यपूर्वतःस्थाप्यंजलमंत्रैःसमर्चयेत्॥प्रतीच्यांस्थंडिलेवह्निंविधिवत्स्थापये
त्ततः॥मुखांतेजुहुयादुक्तद्रव्येणाष्टसहस्रकं॥तिलहोमंव्याहृतिभिरष्टोत्तरसहस्रकं॥पूर्णाहुतिंचजुहुयात्सम्यक्जपादिपूर्वकं॥ततःशु
द्धोपविष्टस्यरोगिणःप्राङ्मुखस्यच॥मंत्रपूतैःकुंभजलैरब्लिंगैर्वारिमंत्रकैः॥मार्ज्जनंकारयेत्तस्यसम्यक्संकल्पपूर्वकं॥नीराजनंचशुद्धात्मा
पूजास्थानंसमागतः॥देवंहुताशनंभक्त्याप्रणम्यप्रार्थयेदिति॥अमृतोद्भवधिष्ण्येशयतस्त्वंशंकरात्मकः॥रोगादस्मान्ममारक्षतववश्यश्चधिष्ण्य
पः॥इतिप्रार्थ्यततोदद्यात्प्रतिमांवस्त्रसंयुतां॥दक्षिणासहितांभक्त्याआचार्यायकुटुंबिने॥ब्राह्मणाययथाशक्त्याब्राह्मणान्भोजयेत्ततः
॥कृत्वानक्षत्रपूजांतंतिथिवासरयोरपि॥सर्वान्कामानवाप्नोतिरोगीरोगात्प्रमुच्यते॥आश्विन्यामुत्थितोव्याधिर्नवरात्रेणमुंचति॥
देवस्यत्वेतिमंत्रस्यगायत्रीकश्यपोश्विनौ॥श्वेतवर्णौसुधापूर्णकलशांभोजधरौपृथक्॥चंदनोत्पलपुष्पाद्यगुग्गुलौतुगुडप्रियौ॥क्षीरल
ड्डुकभोक्तारौसमिधःक्षीरवृक्षजाः॥गुडोदनबलिंदद्याद्दीपैःसार्द्धनिशामुखे॥भरण्यामुत्थितोव्याधिरचिरान्निधनप्रदः॥मासेनमुंचत्यथवादे
वस्यकुटिलागतिः॥त्रैयंबकस्यमंत्रस्यप्रोक्ताश्छंदर्षिदेवताः॥गंधोगुरुकरवीरपुष्पंधूपश्चगुग्गुलः॥अष्टदीपंचसर्वेषांनैवेद्यंचगुडोदनं॥

पाशदंडधरोरक्तस्त्वाज्यमध्वाक्षतैर्हविः ।। महिषीनायकारूढः कृसरान्नंबलिंहरेत् ।। वक्ष्यमाणेनमंत्रेणबलिंसम्यक्प्रदापयेत् ।। कृत्तिकासूत्थितोव्याधिर्दशरात्रेणमुंचति ।। स्रुक्स्रुवाभयवरदस्वर्णोमेषवाहनः ।। मेधातिथिर्जगत्यग्नीपुनंतुमादित्यस्यच ।। चंदनंयूथिकापुष्पंघृतदीपःसगुग्गुलुः ।। नैवेद्यंतिलमाषान्नंवरकान्नेनसंयुतं ।। गुडोदनंहविस्तत्रपायसेनबलिंहरेत् ।। रोहिण्यामुत्थितोव्याधिर्दशरात्रेणमुंचति ।। नमोब्रह्मणमंत्रस्यगायत्रीविधिरीश्वरः ।। शक्कुःकमंडलुस्त्वक्षसूत्राभयवरप्रदः ।। चंदनंकमलंपुष्पंसदशांगंचगुग्गुलं ।। नैवेद्यपायसंसाज्यसर्वदातैर्हविर्भवेत् ।। दधिक्षीरघृतक्षौद्रशाल्यन्नेनबलिंहरेत् ।। चंद्रभेचोत्थितोव्याधिःपंचरात्रेणमुंचति ।। गदावरदपाणिश्चश्वेतोसोरथवाहनः ।। नवोनवोभवत्यस्यगायत्रीगौतमःशशी ।। चंदनकुमुदंपुष्पंदशांगंपायसोदनं ।। नैवेद्यंमंडकापूपघृतक्षौद्रसमन्वितं ।। शर्करादधिमिश्रेणशक्कान्नेनबलिंहरेत् ।। आर्द्रायामुत्थितोव्याधिरचिरान्निधनप्रदः ।। मासेनमुंचत्यथवादेवस्यकुटिलागतिः ।। शुद्धस्फटिकसंकाशःशूलखड्गाभयेष्टदः ।। नमःशंकरायेत्यस्यबृहतीशोविधीऋषिः ।। चंदनंसौरभंपुष्पंदशांगंपायसोदनं ।। समध्वाज्यंहविस्तत्रदध्योदनबलिंहरेत् ।। पुनर्वसौभवेद्व्याधिर्नवरात्रेणमुंचति ।। कमंडल्वक्षसूत्रेध्मदर्भास्रुक्स्रुवभृत्सदा ।। अदितिर्द्यौश्चमंत्रस्यत्रिष्टुभोद्रुहिणोदितिः ।। हरिद्राकुंकुमंगंधंपुष्पंसेवतिकाह्वयं ।। धूपोमलयजंपिष्टंघृतान्नंपीतवर्णकं ।। घृताक्ततंडुलहविःपीतान्नेनबलिंहरेत् ।। पुष्येसमुत्थितोव्याधिःसप्तरात्रेणमुंचति ।। पीतोदंडकमंडल्वक्षसूत्राभयवरोद्यतः ।। बृहस्पतेपरीत्यस्यत्रिष्टुप्जीवोंगिराऋषिः ।। कुंकुमंवारिजंपुष्पंनैवेद्यंघृतपायसम् ।।

मंडकागुडसंयुक्तमेतदेवहविर्भवेत्॥समंडकघृतान्नेनबलिंतत्रप्रदापयेत्॥आश्लेषासूत्थितोव्याधिः क्लेशान्मासेनमुंचति॥नमोअस्त्वितिमंत्र-
स्यविराडग्निश्चसर्पराट्॥मधुवर्णोभोगयुक्तःखड्गचर्मधरःशुभः॥सकुंकुमागुरुर्गंधःपुष्पंचागस्तिसंभवं॥घृतगुग्गुलधूपोत्रनैवेद्यंक्षीरसर्पिषा
॥हविःसाज्यंसुदध्यन्नंदध्योदनबलिंहरेत्॥मघायांचोत्थितोव्याधिरचिरान्निधनप्रदः॥अथवासार्द्धमासेनधूम्रोदंडपवित्रधृक्॥आयंतुन
स्त्वितिचास्यजगतीपितरोक्षजः॥चंदनंचंपकंपुष्पंधूपःसघृतगुग्गुलः॥नैवेद्यंघृतपिष्टान्नंतिलाज्यंसघृतंहविः॥सतिलान्नंचमुद्गान्नंबलिंचपि
तृतृप्तये॥पूर्वाफाल्गुनभेव्याधिरर्द्धमासेनमुंचति॥भगएवभगवानित्यस्यानुष्टुप्भगोविधिः॥यथाभयकरःपद्मवर्णःसिंहासनोस्थितः
॥चंदनंमालतीपुष्पंबिल्वदीपोघृतोदनं॥नैवेद्यंशर्करायूथलड्डुकाभिश्चसंयुतं॥घृतोदनंहविस्तत्रपायसेनबलिंहरेत्॥अर्यमर्क्षेभवेद्व्या
धिरर्द्धमासेनमुंचति॥पद्मवर्णःपद्मसंस्थःपद्मगर्भसमद्युतिः॥अर्यमायातिमंत्रस्यअर्यमात्रिष्टुवज्वनः॥कर्पूरकुंकुमंगंधःपुष्पंधूपक
संज्ञकं॥घृतगुग्गुलधूपोत्रनैवेद्यंघृतपायसं॥होमद्रव्यंघृतान्नंस्याच्छाल्यन्नेनबलिंहरेत्॥हस्तेसमुत्थितोव्याधिनवरात्रेणमुंचति॥उ
दुत्यमितिहिरण्यस्तूपोगायत्र्यादितिर्जपेत्॥रक्तगंधंकुंकुमंचपुष्पंराजीवसंज्ञकं॥सगंधगुग्गुलोधूपोनैवेद्यंघृतपायसं॥मधुपुष्पं
तिलाज्यान्नंदूर्वाभिःसहितंहविः॥गुडशर्करमध्वाज्यपिष्टान्नेनबलिंहरेत्॥चित्रायामुत्थितोव्याधिर्दशरात्रेणमुंचति॥चित्रंदेवानामि
त्यस्यत्वष्टानुष्टुप्पितामहः॥अक्षसूत्राभयकरश्चित्रवर्णःशिवेरतः॥सकुंकुमागुरुर्गंधःकुसुमंचित्रवर्णकं॥नैवेद्यंमोदकान्नाज्य-

चित्रान्नंसघृतंहविः॥तदन्नेनबलिंदद्यात्सर्वरोगापनुत्तये॥स्वात्यृक्षेचोत्थितोव्याधिःसर्वदानिधनप्रदः॥एकद्वित्रिचतुःपंचमासैर्वापिविमुंचति॥सनःपितेतिमंत्रस्यगायत्रीमरुदंगिराः॥खड्गचर्मधरःकृष्णोगंधःकृष्णागुरुर्भृशं॥पुष्पंदमनकंधूपःचंदनागुरुगुग्गुलुः॥नैवेद्यंपायसंसाज्यंहविस्तेनबलिंहरेत्॥द्विदैवभेभवेद्व्याधिर्मासेनैकेनमुंचति॥इंद्राग्नीआगतमितिगायत्रीवास्यचैवहि॥मधुच्छंदऋषींद्राग्नीतयोर्ध्याननंचपूर्ववत्॥श्रीखंडकुंकुमंगंधंतयोःपुष्पंसरोरुहं॥देवदारुस्तयोर्धूपोनैवेद्यंघृतपायसं॥तदेवान्नंहविस्तत्रचित्रान्नेनबलिंहरेत्॥मित्रभेचोत्थितोव्याधिर्दशरात्रेणमुंचति॥मित्रस्यचर्षणीरितिगायत्रीचास्यचैवहि॥ऋषिर्हिरण्यस्तूपाख्यस्तत्रमित्रोधिदेवता॥द्विभुजःपद्मगर्भाभःपद्मभृत्सद्मसंस्थितः॥कुंकुमंपुंडरीकाख्यंपुष्पंधूपश्चचंदनं॥नैवेद्यंपायसंसाज्यंहविःकंदंचसूरणं॥बलिस्तत्रप्रदातव्योमधुशर्करपायसं॥घृतपूरकमाषान्नंमुद्गगर्भैश्चसंयुतं॥ज्येष्ठायामुत्थितोव्याधिर्मृत्युकरेवनसंशयः॥अथवामासमेकंवामुंचत्येवनसंशयः॥इंद्रंचइतिमंत्रस्यगायत्रींद्रोंगिराऋषिः॥इंद्रायपूर्ववद्गंधंचंदनंकुसुमंशुभं॥कर्पूरधूपोनैवेद्यंचित्रान्नंसुमनोहरं॥हविस्तुसूरणंगंधंमधुकंदंसूपायसं॥विचित्रपुष्पगंधेनदध्यन्नेनबलिंहरेत्॥मूलभेचोत्थितोव्याधिर्मासार्द्धेनविमुंचति॥खड्गचर्मधरःकृष्णःकरालवदनःप्रभुः॥मोषुणोस्यचगायत्रीघोरःकण्वोथनैर्ऋतिः॥गंधःकृष्णागुरुःपुष्पंपद्मंनीलोत्पलंशुभं॥धूपःकृष्णागुरुर्माषमिश्रान्नमुपहारकं॥तदेवान्नंहविस्तत्रमाषान्नेनबलिंहरेत्॥वारिभेचोत्थितोव्याधीरोगिणांनिधनप्रदः॥विमुंचत्यथवामासैर्द्वित्रिषड्नवसप्तभिः॥आ

प्यायस्वेतिमंत्रस्यगायत्रीपद्मजोजलं॥ स्कवर्णोद्विभुजःपद्मपाणिर्गंधस्तुचंदनं॥पद्मंशैलेयधूपोत्रनैवेद्यंघृतपायसं॥हविर्मसूरपिष्टान्नंतदन्नेनबलिंहरेत्॥विश्वभेचोत्थितोव्याधिःसार्द्धमासेनमुंचति॥विश्वेदेवासइत्यस्यगायत्र्याविश्वेदेवता॥कमंडल्वभयांभोजवरदश्चकुशासनः॥ चंदनंकमलंपुष्पंधूपंसघृतगुग्गुलुः॥नैवेद्यंपायसाज्यान्नंहविरप्येतदेवहि॥समिद्भिर्निचुलैःसार्द्धंतदन्नेनबलिंहरेत्॥श्रवणेचोत्थितोव्याधिर्दशरात्रेणमुंचति॥अतोदेवेतिमंत्रस्यगायत्रीपद्मजोहरिः॥पीतांबरःकृष्णवर्णःशंखचक्रगदांबुजः॥ चंदनंमालतीपुष्पंधूपःकर्पूरगुग्गुलः॥शाल्यन्नंषड्रसोपेतंभक्ष्यभोज्यादिभिःसह॥नैवेद्यंहविरप्येतत्पायसेनबलिंहरेत्॥वसुभेचोत्थितोव्याधिर्दशरात्रेणमुंचति॥शंपतामितिमंत्रस्यानुष्टुब्व्यासोवस्कस्ततः॥चापबाणधरःशक्कुगंधकर्पूरचंदनं॥वारितगुग्गुलुर्धूपोनैवेद्यंघृतपायसं॥हविश्चोदुंबरसमिद्गुडपायससंयुतं॥लड्डुकाधूपमध्वाज्यतिलपिष्टबलिंहरेत्॥वारुणेचोत्थितोव्याधिरष्टरात्रेणमुंचति॥इमंमेवरुणइत्यस्यगायत्रीकण्ववारिपः॥नागपाशधरःश्रीमान्वररत्नविभूषितः॥मकरस्थोगुरुर्गंधःपुष्पंचकमलोत्पलं॥कर्पूरंचंदनंधूपोनैवेद्यंघृतपोलिका॥हविरश्वत्थसमिधश्चित्रान्नेनबलिंहरेत्॥अजपाद्भेभवेद्व्याधिःसर्वदानिधनप्रदः॥अथवाबहुभिर्मासैर्दिवसैर्वाविमुंचति॥वामपादकरंभूम्यामाकाशेत्वपरद्वयं॥प्रसार्यप्रांजलिःसाक्षादीश्वरंचिंतयोत्स्थितः॥शमग्निरित्यस्याजपाद्गायत्रीचतुराननः॥कुंकुमंचंदनंगंधंपुष्पंश्वेतार्कसंभवं॥धूपःशतौषधीमिश्रोनैवेद्यंदधिपायसं॥हविःकूष्मांडगंधःस्याद्दध्यन्नेनबलिंहरेत्॥ अहिर्बुध्न्येभवेद्व्याधिःसार्द्धमासे

नमुंचति॥नमस्तेरुद्र इत्यस्य सर्वंतत्रैवसंस्थितं॥गंधचंदनकर्पूरैः पुष्पंपद्मोत्पलंशुभं॥सबिल्वगुग्गुलुर्धूपोनैवेद्यंघृतपायसं॥मुद्गमाषतिलान्नाज्ययवव्रीहियंमंहविः॥पूषान्वदेवताभोजमयंभोजधरंशुभं॥रक्तचंदनगंधोत्रपुष्पंमंदारसंज्ञकं॥धूपस्तुगुग्गुलुःसाज्योनैवेद्यंघृतपायसं॥हविस्तदेवसजलंदध्यन्नेनबलिंहरेत्॥भूतेशानुगतोयस्माद्रोगनाथमहाज्वरः॥रोगादस्मात्क्षमांत्वाहित्वगृहीत्वान्नमंबलिं॥जन्मसंधिषुनक्षत्रराशिलग्नेषुयमघंटेषुप्रत्यरेनैधनतारकेष्टमचंद्रेरोगोत्पत्तौमृत्युः॥रविमघाद्वादशीसोमविशाखैकादशीनांभौमार्द्रापंचमीनांबुधोत्तराषाढातृतीयानांगुरुशतभिषक्षष्ठीनांशुक्राश्विन्यष्टमीनांशनिपूर्वाषाढानवमीनांचयोगेमृत्युः॥ भरण्यनुराधावाचंद्रेआर्द्रोत्तराषाढावासोमेमघाशतभिषग्वाभौमेअश्विनीविशाखावाबुधेज्येष्ठामृगशिरोवागुरौ॥श्रवणआश्लेषावाभृगौपूर्वाभाद्रपदाशनौचेन्मृत्युयोगः॥ अतोत्रोक्तास्तिथिवारनक्षत्रशांतयोविस्तृताः कार्याः॥अथतिथिवारर्क्षेषुसाधारणःप्रयोगः॥मासपक्षाद्युल्लिख्यममोत्पन्नस्यव्याधेर्जीवच्छरीराविरोधेनसमूलनाशार्थममुकनक्षत्रामुकदेवताख्यंजपंकरिष्यइतिसंकल्प्याष्टशताष्टसहस्रायुतान्यतमसंख्ययातत्तद्देवतामंत्रस्यजपंकृत्वान्येनकारयित्वावामासपक्षाद्युल्लिख्यममोत्पन्नव्याधेर्जीवच्छरीराविरोधेनसमूलनिवृत्तयेमुकशांतिंकरिष्यइतिसंकल्प्य॥गणेशपूजाचार्यवरणांतंकृत्वाचार्यंपूजयेत्॥ततआचार्योभूमौतंडुलैश्चतुरस्रंमंडलंकृत्वा तत्रहेमींतत्तन्नक्षत्रदेवतांवस्त्रद्वयपरिवृतांवक्ष्यमाणतत्तद्गंधधूपादिभिःपूजयेत्॥तदीशान्यांधान्येकुंभंसंस्थाप्यजलेनापूर्य्यगंधसर्वौषधिदूर्वापल्लवपंचत्वक्सप्तमृत्क

लंपंचरत्नपंचगव्यहिरण्यानितत्तन्मंत्रैःक्षिप्त्वावस्त्रद्वयेनावेष्ट्यसर्वेसमुद्राइतितत्रतीर्थान्यावाह्यतत्त्वायामीतितत्रवरुणमावाह्यसंपूज्याग्नेंग्रहांश्चप्रतिष्ठाप्याज्यभागांतेतत्तन्नक्षत्रदेवतामंत्रेणतत्तद्द्रव्येणचाष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशत्यन्यतरसंख्ययाहोमंकृत्वाशांतिकलशेनयजमानाभिषेकेविहितेतांप्रतिमांरोगीब्राह्मणायदद्यात्॥उक्तगंधाभावेचंदनंपुष्पाभावेशतपत्रंधूपाभावेगुग्गुलुः॥नैवेद्याभावेघृतोदनंहोमद्रव्याभावेतिलाः॥मंत्राविज्ञानेगायत्रीअष्टोत्तरसहस्रंमृत्युनिर्देशेअष्टोत्तरशतमन्यत्रजुहुयात्॥ततःकुशोदकैर्वरुणसूक्तैःपुराणमंत्रैश्चाभिषेकंकुर्यात्॥पूर्णाहुतिंवसोर्द्धारांचकृत्वाशांतिपाठंकृत्वाआशिषंदद्यात्॥अतःसर्वशांतिर्भवति॥ततआचार्यायसुवर्णप्रतिमांवस्त्रयुग्मेनवेष्टितांसवत्सांगांसालंकारान्दद्यात्इतरेभ्योपिदक्षिणांदद्याद्ब्राह्मणांश्चभोजयेत्॥ ॥इतिरोगोत्पत्तिशांतिप्रयोगः॥मदनरत्ने॥त्रिषुसर्वनक्षत्रशांतिषुगायत्र्यायमोद्देशेनहोमोष्टसंख्यःबलिश्चतत्तन्नक्षत्रदेवतायै॥सोपिहोमावशिष्टद्रव्येणक्वचिदन्येन॥तच्चतत्रवक्ष्यतेअत्ररोहिणीपुष्यआश्लेषापूर्वाहस्तस्वातीविशाखानुराधाज्येष्ठामूलोत्तराषाढापूर्वाभाद्रपदोत्तराभाद्रपदासुघृतमेवहोमद्रव्यंबलिरपितेनैवान्यत्रतुहोमेबलौचविशेषस्तत्रवक्ष्यते॥द्रव्येतुविशेषोश्विन्यादिक्रमेणदुग्धाक्ताःक्षीरवृक्षसमिधोहोमेदध्योदनंबलौमध्वक्तास्तिलाः॥घृतंदध्योदनंचरुक्षीरान्नंबलौ४मुद्गतिलाघृतमधुघृताक्ताअक्षता३होमेगंधंशाल्योदनंबलौ॥७॥गंधमाल्योदनंबलौभिक्षाग्रंबलौ॥९॥घृताक्ताअक्षततिलाहोमे॥अक्षततिलाबलौ॥१०॥गंधपुष्पाणिबलौ॥११॥तिल

माषाः॥१२॥गंधपुष्पंबलौ॥१३॥जलयुतंहोमे॥सघृतासुद्गाबलौ।१४॥गंधपुष्पाणिबलौ।१५॥दुग्धाक्तान्नगंधमाल्यानिबलौ॥१६।१७
गंधमाल्यांबलौ॥१८॥पायसंबलौ॥१९॥शालयोहोमे॥पायसंबलौ॥२०॥होमेपायसंबलौ॥२१॥बीजाक्षताहोमे॥गंधपुष्पाणिबलौ॥२२॥अश्वत्थ
समिधोहोमेघृताक्तसुद्गाबलौ॥२३॥जलपुष्पाणिहोमे॥पायसंबलौ॥२४॥गंधमाल्योदनंबलौ॥२५॥एकविंशतिः२१एकविंशतिः२१नव९
नव९दश१०मृत्यु१०विंशतिःएकविंशतिःएकविंशतिःविकल्पतोमासाब्दोसप्तविंशति२७सप्त७अष्टौ८दश१०अष्टौ८अष्टाविंशतिः२८
एकविंशतिःविंशतिःविंशतिः२१विंशतिःपंचविंशतिः२५विकल्पतःपक्षत्रयोदशदिनमासाःद्वादश१२दश१०दश१०अष्टाविंशतिः २८ दि
नानिक्रमात्पीडाअंतेस्करवंआश्लेषामघापूर्वापूर्वाभाद्रपदास्कपक्षेमृत्युरपिसंभाव्यते॥अथग्रहणशांतिः ॥मत्स्यपुराणे॥ होरायांग्रस्य
तेयस्यनक्षत्रेवानिशाकरः॥प्राणसंदेहमाप्नोतिसवामरणमृच्छति॥यस्यात्रजन्मनक्षत्रेग्रस्येतेशशिभास्करौ॥तज्जनानांभवेत्पीडायेजनाः
शांतिवर्जिताः॥यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः॥तस्यस्नानंप्रवक्ष्यामिमंत्रौषधिसमन्वितं॥चंद्रोपरागेसंप्राप्तेकृत्वाब्राह्मणवा
चनं॥संपूज्यचतुरोविप्रान्शुक्लमाल्यानुलेपनैः॥पूर्वमेवोपरागस्यसमानीयोषधादिकं॥स्थापयेच्चतुरःकुंभानग्रतःसागरानिव॥गजाश्व
रथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत्॥पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवम्॥रोचकंपद्मकंशंखं
कुंकुमंरक्तचंदनं॥शुद्धस्फटिकतीर्थांबुसितसर्षपगोकुलान्॥मधुकंदेवदारुंचविष्णुक्रांतांशतावरीं॥बलांचसहदेवींचनिशाद्वितयमेवच॥एतत्स

वैविनिक्षिप्यकुंभेष्वावाहयेत्सुरान्॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आयांतुयजमानस्यदुरितक्षयकारकाः॥ योसौवज्रधरोदेव
आदित्यानांप्रभुर्मतः॥ सहस्रनयनश्चेंद्रोग्रहपीडांव्यपोहतु॥ मुखंयःसर्वदेवानांसप्तार्चिरमृतद्युतिः॥ चन्द्रोपरागसंभूतांग्रहपीडांव्यपोहतु
॥ यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः॥ यमश्चंद्रोपरागोत्थांग्रह०॥ रक्षोगणाधिपःसाक्षीनीलांजनसमप्रभः॥ खड्गहस्तोऽतिभी
दश्चग्रहपी०॥ नागपाशधरोदेवःसदामकरवाहनः॥ चंद्रोपरागकलुषंवरुणोमेव्यपोहतु॥ प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः॥
वायुश्चंद्रोपरागोत्थांग्रह०॥ योसौनिधिपतिर्देवःखड्गशूलगदाधरः॥ चंद्रोपरागदुरितंधनदोमेव्यपोहतु॥ योसौबिंदुधरोदेवःपिनाकी
वृषवाहनः॥ चंद्रोपरागपापानिनिवारयतुशंकरः॥ त्रैलोक्येयानिभूतानिस्थावराणिचराणिच॥ ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपात
कं॥ एवमावाहयेत्कुंभान्मंत्रैरेभिश्चवारुणैः॥ एतानेवतथामन्त्रान्स्वर्णपट्टेविलेखयेत्॥ ताम्रपट्टेथवालेख्यनव्यवस्त्रेतथैवच॥
मस्तकेयजमानस्यनिदध्युस्तेद्विजोत्तमाः॥ कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्॥ गृहीत्वास्थापयेद्दृढंभद्रपीठोपरिस्थितं॥ पू
र्वोक्तैरेवमंत्रैश्चयजमानंद्विजोत्तमाः॥ अभिषेकंततःकुर्युर्मंत्रैर्वरुणसूक्तकैः॥ ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥ आचार्यंवरयेत्प
श्चात्स्वर्णपट्टंनिवेशयेत्॥ आचार्यदक्षिणांदद्याद्गोदानंचस्वशक्तितः॥ गंधमाल्यैर्धूपदीपैःपूजयेद्देवतुष्टये॥ होमंचैवप्रकुर्वीततिलैर्व्री
हिभिस्तथा॥ निवृत्तेग्रहणेसर्वब्राह्मणेभ्योविशेषतः॥ दानंचशक्तितोदद्याद्यदीच्छेदात्मनोहितं॥ सूर्यग्रहेसूर्यनामयुक्तान्मंत्रां

श्चकीर्त्तयेत्।चंद्रपदस्थानेसर्वत्रसूर्यपदमूहनीयमित्यर्थः॥अनेनविधिनायस्तुग्रहणेस्नानमाचरेत्॥नतस्यग्रहणदोषःकदाचिदपिजायते॥अथजलाशयवैकृतशांतिः।गर्गः॥नगरादुपसर्पंतेसमीपउपयांतिच॥नद्योहृदप्रस्रवणाविरसावैभवंतिच॥विवर्णंकलुषंतसंफेनवज्जतुसंकुलं॥क्षीरंस्नेहंसुरारक्तंवहंतेव्याकुलोदकं॥षण्मासाभ्यंतरेतत्रपरचक्रभयंविदुः॥जलाशयानदंतेचप्रज्वलंतिक्वथंतिच॥विमुंचंतितथाब्रह्मन्ज्वालाधूमंरजांसिच॥अखातेवाजलोत्पत्तिःससत्वावाजलाशयाः॥संगीतिशब्दादृश्यंतेजनमारभयंविदुः॥दिव्यंमहाभयंविद्विमधुमात्रावसेचनं॥जप्तव्यावारुणामंत्रास्तैश्चहोमोजलेभवेत्॥मध्वाज्ययुक्तपरमान्नमत्रदेयंद्विजानामथभोजनार्थं॥गावःश्चदेयाः सितवस्त्रयुक्तास्तथोदकुंभाःसकलाश्चशांत्यै॥इतिजलाशयवैकृतिशांतिः॥अथवृष्टिवैकृतशांतिः॥गर्गः॥अतिवृष्टिरनावृष्टिर्दुर्भिक्षादौभयंमतं॥अनृतौतुदिवानांतावृष्टिर्व्याधिभयायतु॥अनभ्रवैकृतामेघमंतरेगर्ज्जितादयः॥शीतोष्णानांविपर्यासेऋतूनांरिपुजभयं॥शोणितंवर्षतेयत्रतत्रशस्त्रभयंभवेत्॥अंगारपांशुवर्षेणनगरंतद्विनश्यति॥मज्जास्थिस्नेहमांसानांजनमारभयंभवेत्॥फलपुष्पतथाधान्यंपरेणातिभयायतु।पाशजंतूपलानांचवर्षतारोगजंभयं॥छिद्रावान्नप्रवर्षेणसस्यानामीतिवर्द्धनं॥विरजस्केरवौव्यभ्रेयदाछायानदृश्यते॥दृश्यतेतुप्रतीपावातत्रदेशेभयंभवेत्॥प्रतीपाप्रतिकूलाछायाविपरीतछायेत्यर्थः॥निरभ्रेवातथारात्रौश्वेततयास्योत्तरेणतु॥इंद्रायुधंतथादृष्ट्वाउल्कापातंतथैवच॥दिग्दाहोपरिघोषौचगंधर्वनगरंतथा॥परचक्रभयंविद्याद्देशोपद्रवमेवच ॥ सूर्येंदु-

पर्ज्जन्यसमीरणानांयागस्तुकार्योविधिवद्द्विजेंद्र॥ धान्यानिगोकांचनदक्षिणाश्चदेयाद्विजानामघनाशहेतोः॥इतिवृष्टिवैकृतशांतिः॥अ
थाग्निवैकृतशांतिः॥गर्गः॥ अग्निः प्रदीप्यतेयत्रराष्ट्रेभृशमनिंधनः॥नदीप्यतेवेंधनवांस्तद्राष्ट्रंपीड्यतेनृप॥ज्वलेदार्द्रश्चवंशोवातथार्द्रान्नंमृ
दःसुधा॥प्रासादतोरणंद्वारंनृपवेश्मसुरालयं॥एतानियत्रदह्यंतेतत्रराजभयंवदेत्॥विद्युतावाप्रदह्यंतेतत्रापिनृपतेर्भयं॥अनेशानित
मांसिस्युर्विनापांशुरजांसिच॥धूमश्चानग्निजोयत्रतत्रविद्यान्महाभयं॥तडिद्विनाभ्रगगनेभयंस्याद्वृष्टिवर्जिते॥दिवासतारेगगनेतथैवभ
यमादिशेत्॥ग्रहनक्षत्रवैकृत्येताराविकृतिदर्शने॥पुत्रवाहनदारेषुचतुष्पदगृहेषुच॥स्वभावाद्वापिहीयेतधेनुवत्सादिकंचयत्॥लोहायु
धविकारःस्यात्तत्रसंग्राममादिशेत्॥त्रिरात्रोपोषितस्तत्रपुरोधाःसुसमाहितः॥समिद्भिरर्कवृक्षाणांसर्षपैश्चघृतेनच॥होमंकुर्याद
ग्निमंत्रैर्ब्राह्मणांश्चैवभोजयेत्॥दद्यात्सुवर्णचतथाद्विजेभ्योगाश्चैववस्त्राणितथाभुवंच॥एवंकृतेतत्समुपैतिनाशंयदग्निवैकृत्यभयं
द्विजेंद्र॥इत्यग्निवैकृत्यशांतिः॥ ॥अथप्रतिमादिवैकृत्यशांतिः॥गर्गः॥देवताद्याःप्रनृत्यंतिवेपंतेप्रज्वलंतिवा॥आरटंतिचरोदंतिप्रस्वि
द्यंतिहसंतिच॥उत्तिष्ठंतिनिषीदंतिप्रधावंतिरमंतिच॥भजंतिविकृतिंभूम्नामानुषाणांभयावहाः॥अवाङ्मुखावातिष्ठंतिस्थानात्स्थानंभ्र
मंतिच॥वमंत्यग्निंतथाधूमंस्नेहरक्तंतथावसां॥एवमादीनिदृश्यंतेविकाराःसहजोत्थिताः॥लिंगायतनचित्रेषुतत्रवासंनरोचयेत्॥ ७१
राज्ञोवाव्यसनंतत्रसचदेशोविनश्यति॥देवयात्रासुचोत्पातान्दृष्ट्वादेशभयवदेत्॥देवयात्रोत्पातावराहसंहितोक्ताज्ञेयाः॥विनासाहसंध-

मैणतत्रवासंनरोचयेत्॥पशूनांरुद्रजंज्ञेयंनृपाणांलोकपालजं॥रुद्रजंरुद्रप्रतिमासूत्पन्नंवैकृत्यंपशुभयदमित्यर्थः॥एवंसर्वत्रापिज्ञातव्यं॥ज्ञेयंसेनापतीनांचयत्स्यात्स्कंदविशाखजं॥लोकानांविश्ववस्विंद्रविश्वकर्मसमुद्भवं॥विनायकोद्भवंज्ञेयंगणानांसेवकायच॥देवदूतेचयाःप्रेष्याःदेवस्त्रीषुनृपस्त्रियः॥वास्तुदेवेषुविज्ञेयंगृहाणामेवनान्यथा॥देवतानांविकारेषुश्रुतिवेत्तापुरोहितः॥देवतार्चांतुगत्वावैस्नातामाच्छाद्यभूषयेत्॥पूजयेत्तांमहाभागगंधमाल्यान्नसंपदा॥मधुपर्केणविधिवदुपतिष्ठेदनंतरं॥तल्लिंगेनचमंत्रेणस्थालीपाकंयथाविधि॥पुरोधाजुहुयाद्वन्हौसप्तरात्रमतंद्रितः॥विप्राश्चपूज्यामधुरान्नपानैःसदक्षिणैःसप्तदिनंनरेंद्र॥प्रासेष्टमेन्हिक्षितिगोप्रदानैःसकांचनैःशांतिमुपैतिपापं॥इत्यद्भुतशांतिषुदेवताप्रतिमावैकृत्यशांतिः॥अथाकस्मिकप्रासादपतनादिशांतिः॥गर्गः॥प्रासादतोरणाट्टालद्वारप्राकारवेश्मनां॥अनिमित्तंतुपतनंदृढानांराजमृत्यवे॥रजसावाथधूमेनदिशोयत्रसमाकुलाः॥आदित्यश्चंद्रताराश्चविवर्णाभयदृष्टये॥राक्षसायत्रदृश्यंतेब्राह्मणश्चविधर्मिणः॥ऋतवश्चविपर्यस्ताअपूज्यंपूजयेज्जनः॥नक्षत्राणिवियोगीनितन्महद्भयलक्षणं॥केतूदयोपरागौचछिद्रंवाशशिसूर्ययोः॥ग्रहर्क्षविकृतिर्यत्रतत्रापिभयमादिशेत्॥स्त्रियश्चकलहायंतेबालानिघ्नंतिबालकान्॥क्रियाणामुचितानांचविछित्तिर्यत्रदृश्यते॥अग्निर्यत्रनदृश्येतहूयमानोथशाम्यति॥क्रव्यादावायसावाहायांतिचोत्तरतस्तथा॥पूर्णकुंभाःस्रवंतेचवन्हयोवाविलुंपते॥मंगल्यध्वनयोयत्रनश्रूयंतेसमंततः॥क्षवथुर्बाधतेवाथप्रोत्साहेसतिनिंदिताः॥नदेवतेषुवर्त्ततेयथाब्रह्मणेषुच॥मंदघोषा

णिवाद्यानिवाद्यंतेविस्वराणिच॥गुरुमित्रद्विषोयत्रशत्रुषूपारताःसदा॥ब्राह्मणान्सुहृदोमात्यानुजनोयत्रावमन्यते॥शांतिमंगलहोमेषुनास्तिक्यंयत्रमन्यते॥राजावाम्रियतेतत्राथवादेशोविनश्यति॥राज्ञोविनाशेसंप्राप्तेनिमित्तानिनिबोधमे॥ब्राह्मणान्प्रथमंद्वेष्टिब्राह्मणांश्चविनिंदति॥ब्राह्मणस्वानिचादत्तेब्राह्मणांश्चजिघांसति॥नैतान्स्मरतिकृत्येषुयोन्वितश्चात्यसूयति॥रमतेनिंदयाचैषांप्रशंसांनाभिनंदति॥अपूर्वंतुकरंलोभात्तथापातयतेजने॥एतेष्वभ्यर्चयेत्सम्यक्सपत्नीकान्द्विजोत्तमान्॥भोज्यानिचैवकर्त्तव्यासुराणांबलयस्तथा॥गावश्चदेयाद्विजपुंगवेभ्योभुवंतथाकांचनमंबराणि॥होमंचकुर्याद्विजपूजनंचएवंकृतेशांतिमुपैतिपापं॥अद्भुतेतुसमुत्पन्नेयदिवृष्टिःप्रजायते॥सप्ताहाभ्यंतरेज्ञेयमद्भुतंविफलंहितत्॥इत्याकस्मिकप्रासादपतनादिशांतिः॥ ॥अथवृक्षविकारशांतिः॥गर्गः॥रुदतोव्याधिरभ्येतिहसतोदेशविभ्रमः॥शाखाप्रपतनेकुर्यात्संग्रामंयोधपातनं॥बालानांमरणंकुर्याद्बालानांफलपुष्पतः॥स्वराष्ट्रभेदंकुरुतेफलपुष्पमनार्त्तवं॥क्षीरंसर्वत्रगंभीरस्नेहंदुर्भिक्षलक्षणं॥वाहनापचयंमद्येरक्तेसंग्राममादिशेत्॥मधुस्रावेभवेद्व्याधिर्जलस्रावेचवर्षति॥अरोगशोषणंज्ञेयब्रह्मन्दुर्भिक्षलक्षणं॥शुष्केषुसंप्ररोहस्तुवीर्यमंतंचहीयते॥उत्थानेपतितानांचभयभेदकरंभवेत्॥स्थानात्स्थानेतुगमनेदेशभंगंतथादिशेत्॥अन्येषुचैववृक्षेषुवृक्षोत्पातेष्वतंद्रितः॥आच्छादयित्वातंवृक्षंगंधमाल्यैर्विभूषयेत्॥वृक्षोपरितथाछत्रंकुर्यात्पापप्रशांतये॥शिवमभ्यर्च्चयेद्देवपशुंचास्मैनिवेदयेत्॥मूलेभ्यइतिवृक्षेषुहुत्वारुद्रंजपेत्ततः॥मध्वाज्ययुक्तेनतुपायसेनसंपूज्यविप्रांश्च

भुवंचदद्यात्॥गीतेननृत्येनतथार्चयेत्तंदेवंहरंपापविनाशहेतोः॥ इतिवृक्षोत्पातशांतिः॥ ॥अथोत्पातशांतिः॥ ॥नारदसंहितायांचतुस्त्रिंशेध्याये
॥उत्पाताविविधालोकेदिव्यभौमांतरिक्षगाः॥तेषांनामानितांशांतिंसम्यक्वक्ष्येपृथक्पृथक्॥देवताद्याःप्रनृत्यंतिपतंतिप्रज्वलंतिवा॥
मुहुर्गायंतिरोदंतिप्रस्विद्यंतिहसंतिच॥वमंत्यग्निंतथाधूमंस्नेहंरक्तंपयोजलं॥अधोमुखंतुतिष्ठंतिस्थानात्स्थानंव्रजंतिवा॥एवमा-
द्याश्चदृश्यंतेविकाराःप्रतिमादिषु॥गंधर्वनगरंचैवदिवानक्षत्रदर्शनं॥महोल्कापतनंकष्टंनृणांरक्तप्रवर्षणं॥गांधर्वदेहंदिग्दाहंभूमिकं
पंदिवानिशि॥अनग्नौचस्फुलिंगाःस्युर्ज्वलनंचविनेंधनं॥निशींद्रचापंमंडूकशिखरेश्वेतवायसं॥दृश्यंतेविस्फुलिंगायेगोगजाश्वोष्ट्र
गास्ततः॥जंतवोद्वित्रिशिरसोजायंतेचावियोनितु॥प्रतिसूर्याश्चतिसृषुस्युर्दिक्षुयुगपद्रवेः॥जंबूकोग्रामसंवेशःकेतूनांचप्रदर्शनं
॥काकानामाकुलंरात्रौकपोतानांदिवायदि॥एवमेतेमहोत्पाताबहवःस्थाननाशकाः॥केचिन्मृत्युप्रदाःकेचिच्छत्रुभ्यश्चभयप्रदाः॥देवाल
येस्वगेहेवाऐशान्यांपूर्वतोपिवा॥कुंडंलक्षणसंयुक्तंकल्पयेन्मेखलायुतं॥गृह्योक्तविधिनातत्रस्थापयेच्चहुताशनं॥जुहुयादाज्यभागां
तमथवाष्टोत्तरंशतं॥यतइंद्रभयामहेस्वस्तियेनचमंत्रकैः॥समिदाज्यचरुव्रीहितिलैर्व्याहृतिभिस्ततः॥कोटिहोमंतदर्द्धंवालक्षहो
ममथायुतं॥यथावित्तानुसारेणपादहोममथापिवा॥एकविंशतिरात्रंवापक्षपक्षार्द्धमेववा॥त्रिरात्रमेकरात्रंवाहोमकर्मसमाचरेत्
॥गणेशक्षेत्रपालार्कदुर्गाख्याअंगदेवताः॥तासांप्रीत्यैजपःकार्यःशेषपूर्ववदाचरेत्॥ ऋत्विग्भ्योदक्षिणांदद्यात्षोडशेभ्यःस्वशा

क्तितः ॥ इतिनानोत्पातशांतिः ॥ ॥ अथपल्लीसरटशांतिः ॥ ॥ वृद्धगर्गः ॥ पल्ल्याःप्रपातस्यफलंसरटस्यतथैवच ॥ शीर्षेराज्यंशिरःप्राप्तिर्भालेऐ
श्वर्य्यवर्द्धनं ॥ कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बंधुदर्शनं ॥ नासिकायांतुसौभाग्यंवक्त्रेमिष्टान्नभोजनं ॥ कंठेनित्यंप्रियाश्लेषःस्कंधयोर्विजयोध्रुवं
॥ धनलाभोबाहुयुग्मेकरयोरर्थसंक्षयः ॥ जंघयोश्चनिरुद्योगःपादयोर्भ्रमणंभवेत् ॥ एवंपल्ल्याःप्रपातस्यफलंज्ञेयंविचक्षणैः ॥ एतदेवफ
लंविद्यात्सरटस्यप्ररोहणे ॥ पल्ल्याःप्रपतनेचैवसरटस्यप्रपातने ॥ पंचरात्रंभवेत्तस्यव्याधिपीडाविशेषतः ॥ पतनानंतरंतस्यरोहणंयदि
जायते ॥ पतनेफलमुत्कृष्टंरोहणोऽल्पफलंभवेत् ॥ आरोहणंचोर्ध्ववक्त्रेअधोवक्त्रेनिपातनं ॥ भवेद्यदिसुशीघ्रेणतत्फलंजायतेध्रुवं ॥ मृत्युयो
गेदग्धदिनेपातेचयमघंटके ॥ चंद्राष्टमेनैधनेचजन्मर्क्षेविषनाडिके ॥ क्रूरलग्नेक्रूरयुतेक्रूरेणचनिरीक्षिते ॥ अष्टमेतक्रूरयुतेविष्टिवैधृतिसं
युते ॥ दुर्निमित्तेतयोःपातेनिधनंजायतेध्रुवं ॥ तयोःस्पर्शनमात्रेणसचैलस्नानमाचरेत् ॥ गव्यंपंचविधंप्राश्यकुर्यादाज्यावलोकनं ॥ शस्ते
वाप्यथवाशस्तेयदीच्छेदात्मनःशुभं ॥ पुण्याहंवाचयित्वातुशांतिकर्मततश्चरेत् ॥ प्रतिरूपंतयोःकुर्यात्सुवर्णेनस्वशक्तितः ॥ रक्तव
स्त्रेणसंवेष्ट्यगंधपुष्पैःप्रपूजयेत् ॥ कलशेवस्त्रयुग्मेनपूजयेद्विधिनाततः ॥ अग्निसंस्थापनंकृत्वाहोमंकुर्याद्विधानतः ॥ मृत्युंजये
नमंत्रेणसामिद्भिःखादिरैःशुभैः ॥ तिलैर्व्याहृतिहोमंचअष्टोत्तरसहस्रकं ॥ महाव्याहृतिहोमंचसर्पिःक्षीरेणकारयेत् ॥ अभिषेकं
ततःकुर्याद्यजमानस्यमूर्द्धनि ॥ पुण्यैर्वारुणसूक्तैश्चद्यौःशांतादिकमंत्रकैः ॥ इत्थंमंत्रविधानेनयःकुर्याच्छांतिमुत्तमां ॥ तस्यायुर्विजयोल

क्ष्मीःकीर्त्तिःपुष्टिश्चजायते॥इतिपल्ल्यादिपतनशांतिः॥ ॥अथग्राम्यारण्यादिशांतिः॥ ॥गर्गः॥प्रविशांतियदाग्राममारण्यामृगपक्षिणः॥अरण्यंयांतिवाग्राम्याःस्थलंयांतिजलोद्भवाः॥स्थलजावाजलंयांतिघोरंवासंतिनिर्भयाः॥राजद्वारेपुरद्वारेशिवाश्चाप्यशिवप्रदाः॥दिवारात्रिंचरंवापिरात्रौवापिदिवाचराः॥ग्राम्यास्त्यजंतिग्राममंवातज्ज्ञोत्पातस्यनिर्द्दिशेत्॥उत्पातस्यलक्षणमितिशेषः॥दीप्तावासंतिसंध्यासुमंडलानिचकुर्वते॥वासंतेविस्तरंयत्रतदाप्रेतफलंलभेत्॥प्रदोषेकुक्कुटोवासेद्धेमंतेवापिकोकिलः॥अर्कोदयेकाभिमुखस्तदामात्यभयंवदेत्॥गृहंकपोतःप्रविशेक्रव्याद्यनुविलीयते॥मधुवामक्षिकाःकुर्युर्मृत्युर्गृहपतेर्भवेत्॥प्राकारद्वारगेहेषुतोरणापणवीथिषु॥केतुछन्नायुधाग्रेषुक्रव्यात्संश्रयतेयदि॥जायतेवाथवल्मीकोमधुवादृश्यतेयदि॥सदेशोनाशमायातिराजाचम्रियतेतदा॥मूषिकाःशालभान्दृष्ट्वाप्रभूतंक्षुद्भयंवहेत्॥काष्ठोल्मुकास्थिशृंगास्याःश्वानोमरकवेदिनः॥दुर्भिक्षवेदिनोज्ञेयाःकाकाधान्यक्षुपेयदि॥जनानभिभवंतश्चनिर्भयारणवेदिनः॥काकोमैथुनयुक्तश्चेत्श्वेतःसयदिदृश्यते॥राजाचम्रियतेतत्रतदादेशोविनश्यति॥उलूकोवासतेयत्रनिपतेद्वागृहेयदि॥ज्ञेयोगृहपतेर्मृत्युर्धननाशस्तथैवच॥वासतेशब्दंकरोति॥मृगपक्षिविकारेषुकुर्याद्धोमंसदक्षिणं॥देवाःकपोतइतिचजसव्यंपंचभिर्द्दिनैः॥सुदेवइतिवैकेनदेयागावस्तुदक्षिणा॥जपेच्छाकुनसूक्तंचनमोवेदशिरांसिच॥देवाःकपोतइत्याद्यामंत्राऋग्वेदप्रसिद्धाः॥नमोनमोब्रह्मणेनमइति॥वेदशिरासिउपनिषदः॥गावश्चदेयाविधिवद्द्विजानांसकांचनावस्त्रयुगोत्तरीयाः॥एवंकृतेशांतिमुपैतिपा

पंमृगैर्द्विजैर्वापिनिवेदितंयत्॥ इतिग्राम्यारण्यादिशांतिः॥ ॥अथकपोतशांतिः॥ ॥नारदः॥ आरोहयेद्गृहंयस्यकपोतोवाप्रवेशयेत्॥ स्थानहा
निर्भवेत्तस्ययद्वानर्थपरंपरा॥ दोषायधनिनांगेहेदरिद्रायशिवायच॥ तस्यशांतिश्चकर्त्तव्याजपहोमविधानतः॥ ब्राह्मणान्वरयेत्तत्रस्वस्ति
वाचनपूर्वकं॥ षोडशद्वादशाष्टौवाश्रौतस्मार्त्तक्रियापराः॥ देवाःकपोतइत्यादिऋचाभिःपंचभिर्जपं॥ लक्षंकृत्वाप्रयत्नेनस्वगृह्योक्तविधान
तः॥ ऐशान्यास्थापयेद्वह्निंसुरवांतेष्टोत्तरशतं॥ सुरवांतेअभिसुरवांते॥ प्रत्येकंसमिदाज्यान्नैःप्रतिप्रवणपूर्वकं॥ यतइंद्रभयामहेस्वस्ति
देतित्रियंबकैः॥ त्रिभिर्मंत्रैश्चजुहुयात्तिलान्व्याहृतिभिस्तथा॥ जयाहुतीस्ततोहुत्वाकुर्यात्पूर्णाहुतिंस्वयं॥ विप्रेभ्योदक्षिणांदद्यात्तुष्टौः
शांतिंचततोजपेत्॥ ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः॥ एवंयःकुरुतेसम्यक्तस्माद्दोषात्प्रमुच्यते॥ पिंगलायाःस्वरेप्येवं
मधुवल्मीकयोरपि॥ संपूर्णेमंदिरेहानिःशून्यसद्मनिमंगलं॥ प्राकारेचपुरद्वारेरथ्यादिषुचवीथिषु॥ ग्रामस्यतत्फलंचैवगुरुक
ल्पनयाततः॥ शांतिकर्माखिलंकार्यंपूर्वोक्तेनक्रमेणतु॥ इतिकपोतादिशांतिः॥ ॥अथकाकवैकृत्यशांतिः॥ ॥गर्गसंहितायां॥ काकस्य
मैथुनंपश्येत्काकःशिरसिचेद्विशेत्॥ शिरस्युरसिवाकुर्यात्पक्षघातंनरेवस्तथा॥ विदारणंचकुरुतेशयानंचस्पृशेद्यदि॥ तदावदंतुमरणं
महारिष्टमथापिवा॥ मध्यरात्रेयदाकाकोवासतेहेतुनाविना॥ तद्गृहारिष्टमाचष्टेग्रामारिष्टमथापिवा॥ शांतिंतत्रप्रकुर्वीतविधानेनयथो
दितां॥ उद्दिश्यारिष्टशमनंकुर्यात्संकल्पमादितः॥ शुचौदेशेरत्निमात्रेस्थंडिलेग्निंनिधायच॥ तदीशानेष्टदलेकुंभोपरिस्वशक्तितः॥

हिरण्यनिर्मितंत्विंद्रंलोकपालसमन्वितं॥ पूजयित्वास्वशारवोक्तविधिनाश्रपयेच्चरुं॥कृत्वाज्यभागपर्यंतंजुहुयात्क्रमशोहविः॥पालाशीःसमिधोव्रीहीश्चरुमाज्यमितिक्रमात्॥ अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥यतइंद्रेतिमंत्रेणलोकपालेभ्यएवच॥शक्त्याहुत्वास्वशारवोक्तप्रायश्चित्ताहुतीर्हुनेत्॥लोकपालबलिंदत्वाइंद्रायग्रेचरुशेषतः॥वायसेभ्योबलिंदद्यादैंद्रवारुणमंत्रतः॥ऐंद्रवारुणवायव्यांयाम्यांवैनैर्ऋताश्चये॥तेकाकःप्रतिगृण्हंतुभूम्यांपिंडमयार्पितं॥पूर्णाहुतिंततोहुत्वाआचार्यंपूजयेत्ततः॥कुंभोदकेनाभिषेकोयजमानस्यविस्तरात्॥आचार्यायेंद्रप्रतिमांदद्यात्सोपस्करांततः॥शक्त्याचभूयसींदद्याद्द्विजानांभोजनंदिशेत्॥शततदर्द्धमर्द्धंवाशक्त्यभावेदशापिवा॥सर्वशांतिंपाठयित्वागृह्णीयाच्चद्विजाशिषः॥एवंकृतेभवेच्छांतिःकाकारिष्टविनाशिनी॥इतिकाकमैथुनदर्शनादिशांतिः॥प्रकारांतरेणकाकमैथुनदर्शनशांतिः॥नारदः॥दिवावायदिवारात्रौयःपश्येत्काकमैथुनं॥सनरोमृत्युमाप्नोतिद्व्यर्थवास्थाननाशनं॥काकघातव्रतंयद्वाविदधीताथवत्सरं॥पितृवद्धेद्विजान्भक्त्याप्रत्यहंचाभिवादयेत्॥जितेंद्रियोजितक्रोधःसत्यधर्मपरायणः॥तद्दोषशमनार्थायशांतिकर्मसमारभेत्॥गृहस्येशानदिग्भागेहोमस्थानंप्रकल्पयेत्॥गृह्योक्तविधिनातत्रप्रतिष्ठाप्यहुताशनं॥सुरवांतेसमिदाज्यान्नैर्हुनेदष्टोत्तरंशतं॥प्रतिमंत्रंत्र्यंबकेणअथमृत्युंजयेनच॥व्याहृतिभिर्व्रीहितिलैर्जपाद्यंतंप्रकल्पयेत्॥पूर्णाहुतिंचजुहुयात्कर्त्ताशुचिरलंकृतः॥स्वर्णशृंगींरौप्यखुरांकृष्णांधेनुंपयस्विनीं॥वस्त्रालंकारसंयुक्तांनिष्कद्वादशसंयुतां॥तदर्द्धेनतदर्द्धेनदद्याद्दक्षिणयायुतां॥यथावित्तानुसारेणन्यूनाधिक्यस्यकल्पना॥आचार्याय

श्रोत्रियायतांगांदद्यात्कुटुंबिने॥यस्मात्त्वंपृथिवीसर्वाधेनोवैकृष्णासन्निभे॥सर्वमृत्युहरेनित्यमतःशांतिंप्रयच्छमे॥ब्राह्मणेभ्योविशिष्टेभ्यो
यथाशक्त्याचदक्षिणां॥ब्राह्मणान्भोजयेत्पश्चाच्छांतिवाचनपूर्वकं॥एवंयःकुरुतेसम्यक् तस्माद्दोषात्प्रमुच्यते॥इतिकाकमैथुनशांतिः
॥नारदः॥सूर्यास्तमनवेलायांवायसःसंस्पृशेद्यदि॥निःशब्दोवासशब्दोवापुंसोमृत्युप्रदायकः॥अंगनांचस्पृशेत्काकोवैधव्यंतत्रनिर्दिशेत्
॥नदीतीरेगवांगोष्ठेक्षीरवृक्षेसुरालये॥नरोवायससंस्पृष्टोवधबंधनमाप्नुयात्॥प्रतिचंद्रंप्रतिसूर्यंवायसःस्पृशतेयदि॥अर्थहानिंतथा
मृत्युंशस्त्रेणचविनिर्दिशेत्॥मासैःपंचभिरेवास्यनिशाभिःफलमादिशेत्॥तद्दिनादिफलंसद्भिःप्रोक्तमत्रशुभाशुभं॥शांतिंतत्रप्रकुर्वीतशा
स्त्रदृष्टेनकर्मणा॥महानद्यंभसिस्नात्वाशिवलिंगंनिरीक्षयेत्॥नत्वासंपूज्यलिंगंतुस्तुत्वाचदिक्पतीनपि॥आरभ्यतद्दिनादेववायसे
भ्योबलिंक्षिपेत्॥शनैश्चरदिनेप्राप्तेएकांतेशुभमंदिरे॥कृष्णानिनववस्त्राणिअहतानिनवानिच॥पूर्वदिक्क्रमयोगेनस्थापयेच्चपृथक्
पृथक्॥माषप्रस्थप्रमाणेनस्थापयेत्तत्रवायसान्॥पूर्वस्यांकपिलंतत्रस्थापयेन्मंत्रपूर्वकं॥नीलग्रीवमथाग्नेय्यांयाम्यांचविकृतस्वरं
॥नैर्ऋत्यांचन्यसेत्क्रौंचमपमृत्युविनाशनं॥विद्युज्जिह्वंचवारुण्यांवायव्यांकृष्णकर्बुरं॥कौबेर्य्यांकालनामानमीशान्यांश्वेतमेवच॥अ
हतेकृष्णवस्त्रेतुयमंमध्येप्रपूजयेत्॥महिषंकृष्णवर्णंचयमंमाषैश्चपूजयेत्॥रक्तोत्तमांगंसर्वत्रआयुधैश्चसमन्वितं॥लोहदंडंचतुर्बा
हुंपूजयेन्मंत्रपूर्वकं॥यस्मिन्वृक्षेपरेपिवासंसुगंनःपंथानुमेवच॥एतेमंत्राःसमाख्याताःशूद्राणांनाममंत्रतः॥अकालकलशंतत्रस्थापयेत्तस्यस-

न्निधौ।जलपूर्णंरत्नगर्भंपूर्णपात्रसमन्वितं।स्थापयेत्तत्रदेवेशंशूलपाणिंमहेश्वरं।प्रतिष्ठाप्यचतान्सर्वानथमंत्रैःप्रपूजयेत्।।कपिलस्त्वंच
वर्णेनशुभाशुभंनिवेदकः।।गृहाणार्घ्यंमयादत्तंभवाशुभविनाशनः।।नीलग्रीवगृहाणार्घ्यंमयादत्तंखगेश्वर।।अपमृत्युविनाशायददामिबलि
मुत्तमं।।क्रूरस्त्वपापिनांनित्यंसौम्यस्त्वंधार्मिकेजने।।विकृतस्वरगृहाणार्घ्यंमयादत्तंशुभायनः।।क्रूरस्त्वपापिनांनित्यंवधशुभंनक्रच्छसि।।
गृहाणार्घ्यंमयादत्तंक्रौंचसौम्यप्रदोभव।।विद्युज्जिह्वनमस्तेस्तुशोकव्याधिविनाशन।।बलिंपूजांमयादत्तांगृहाणसुखदोभव।।कृष्णकर्बु
रनामात्वंभूतभव्यनिवेदक।।गृहाणार्घ्यंमयादत्तंभववैधव्यनाशन।।काकत्वंकालनामासिदुष्टकालनिवेदक।।गृहाणबलिपूजांमेदत्तांदुःखवि
नाशिनी।।श्वेतस्त्वंसितपर्णोसिमृत्युभावस्यसूचक।।गृहाणार्घ्यंमयादत्तंभवमृत्युविनाशनः।।तन्मध्येपूजयेद्देवंधर्मराजंचतुर्भुजं।।य
मायधर्मराजायमृत्यवेचांतकायच।।वैवस्वतायकालायसर्वभूतक्षयायच।।औदुंबरायदध्नायनीलायपरमेष्ठिने।।वृकोदरायचित्रायचि
त्रगुप्तायवैनमः।।नीलग्रीवायलोकेशदंडहस्तायतेनमः।।पाशहस्तायसायुधायसपरिवारायतेनमः।।चंदनैश्चसुगंधैश्चवासोभिःपूजयेद्य
मं।।आदौत्र्यंबकमंत्रेणईश्वरंचप्रपूजयेत्।।मृत्युविनाशिनींविद्यांकुंभेचैवनियोजयेत्।।शतमष्टोत्तरंचैवआचार्योहृष्टमानसः।।स्व-
गृह्योक्तविधानेनचरुंचयमदैवतं।।संश्रप्यजुहुयाद्वह्नौसमिदाज्यचरूंस्तिलान्।।तद्दैवत्यासमित्कार्याशतमष्टोत्तरंतथा।।समिल्क्रमेणजुहुया
त्सतिद्रव्यंशतहुनेत्।।सुगन्नुपंथामंत्रेणहोतव्यंसर्वमत्रतु।।भद्रासनंप्रकर्त्तव्यंपंचवर्णकसंयुतं।।तस्योपरिन्यसेत्तद्वद्यजमानमथाह्वयेत्।।नि

वेश्यान्च्छादितेपट्टेअभिषेकंचकारयेत्॥ पावमानीभिस्तुतल्लिंगैर्मंत्रैर्वारुणसंभवैः॥तल्लिंगैःस्रुगन्नुपंथामित्यादिभिः॥ तत्रस्नानंप्रकर्त्तव्यंती
र्थानीतेनवारिणा॥ सहस्राक्षादिभिर्मंत्रैःस्नानंकार्यंद्विजोत्तमैः॥ततोन्यद्वस्त्रमादायधर्मराजंतुपूजयेत्॥उक्तैःषोडशभिर्मंत्रैःसुगन्धित्यर्घंप्र
दापयेत्॥ततउत्थायसंप्रार्थ्यभक्तिभावसमन्वितः॥रक्षमांपुत्रपौत्रांश्चरक्षमांपशून्बांधवान्॥रक्षपत्नींपतिंचैवपितरंमातरंधनं॥अग्नितो
मेभयंमास्तुरोगाच्चव्याधिबंधनात्॥शस्त्रतोविषतोयोघाद्भयनाशयमेसदा॥प्रार्थनाचप्रकर्त्तव्यानमस्कारसमन्विता॥काकस्पृष्टंचयद्वस्त्रं-
स्नानक्लिन्नंचयद्भवेत्॥सहिरण्यंचतत्कृत्वाब्राह्मणायनिवेदयेत्॥मंत्रः॥यत्किंचित्स्पर्शदोषोक्तंदुष्कृतंअपिविद्यते॥तत्सर्वंनाशमायातुवस्त्र
दानेनसूर्यज॥वायसास्तान्यमंचैवमाचार्यायनिवेदयेत्॥ माषान्वासांसिकृष्णांतुधेनुंचैवपयस्विनीं॥शनिवारेचतत्कार्यंरविवारेथवा
पुनः॥घृतपात्रेससौवर्णेदर्शयेदात्मनस्तनुं॥ब्राह्मणेभ्योददेदन्नंभूयसींचैवशक्तितः॥यथोक्तांदक्षिणांदद्याद्वित्तशाठ्यंनकारयेत्॥स्थानेयत्रस्पृ
शेत्काकस्तत्स्थानंपूजयेत्तदा॥एवंकुर्यात्प्रदानेनध्वांक्षदोषःप्रशाम्यति॥इतिकाकस्पर्शशांतिः॥ अद्भुतसागरेनारदः॥ भानौसिंहगतेचैव
यस्यगौःसंप्रसूयते॥मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः॥ततःशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभं॥प्रसूतांतत्क्षणादेवतांगांविप्रायदाप
येत्॥ततोहोमप्रकुर्वीतघृताक्तैराजसर्षपैः॥ आहुतीनांघृताक्तानामयुतंजुहुयात्ततः॥सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणां॥वस्त्रयु
ग्मंयवंचैवसमवर्णंप्रदापयेत्॥इष्टदेवतमंत्रेणततःशांतिर्भवेद्द्विज॥गर्गः॥दिवाप्रसूतावडवाश्रावणेचविशेषतः॥माघमासेबुधेचैवप्रसवे-

न्महिषीयदि॥सिंहेगावः प्रसूयंतेस्वामिनोमृत्युदायकाः॥जंगमेस्थावरंजातंस्थावरेवाथजंगमं॥तस्मिन्योनिविपर्यासेपरचक्रागमोभवेत्॥त्या
गोविवासोदानंवाकृत्वाप्याशुशुभंलभेत्॥वडवाहस्तिनीगौर्वायदियुग्मंप्रसूयते॥विजात्यंविकृतंवापिषड्भिर्मासैर्म्रियेतवा॥वियोनिषुच
गच्छंतिमैथुनेदेशनाशनं॥अन्यत्रवैसरोत्पत्तेर्नृणांवाजातिमैथुनात्॥सर्पमूषकमार्जारमत्स्यश्वानर्विवर्ज्जिताः॥ज्ञेयादुर्भिक्षकर्तारःस्व
जातिपिशिताशनाः॥अकालजोमदोघोरश्चतुष्पान्मृगपक्षिणः॥अन्यजातिभयंतस्मात्धेनुःश्वानोविशेषतः॥अथानड्वाननड्वाहंधेनुर्धे
नुंपिबेद्यदि॥शुनीवाधयतेधेनुंशुनींधेनुरथापिवा॥तिर्यग्योनौमानुषीवापरचक्रागमोभवेत्॥अमानुषामानुषाणिजल्पंतिप्राणिनोयदि॥
विकृतंवाप्रसूयंतेपरचक्रागमंवदेत्॥त्यागोविवासोदानवातेषांकार्य्यंविजानता॥तर्पयेद्ब्राह्मणांश्चैवजपहोमांश्चकारयेत्॥मृदंग
वाद्यैःपटहैःसुशोभनैःपूजाचकार्यात्रिदिवौकसानां॥धातुरस्तथेज्याविधिनाचकार्यादेयंतथान्नंबहुचद्विजेभ्यः॥गर्गः॥दृत्तंवामुशलंवापि
स्फुटतेवाप्युलूखलं॥दृत्तदलनयंत्रं॥भूतानांचैवबिभ्येतगृहदेवकुलेथवा॥दृषद्वाभद्रपीठंवाआसनंशयनंतथा॥अकस्मात्स्फुटतेयत्र
कंपतेवावसुधरा॥इत्यादीनिनिमित्तान्युक्ताशांतिरप्युक्तातेनैव॥अश्वत्थसमिधोहुत्वाघृताक्तामधुसंयुताः॥सावित्र्यष्टसहस्रेणप्रा
जापत्यास्तुमंत्रयेत्॥प्राजापत्याःप्रजापतिदेवत्याः॥पायसंभोजयेद्विद्वान्हुतांतेभूरिदक्षिणा॥ततस्तच्छाम्यतेपापंधूम्रराजमृतंय
था॥सएव॥कृष्णाःपिपीलिकायत्रग्रामेषुनगरेषुवा॥अतिमात्रंतुदृश्यंतेऊर्ध्वंवशकृतालयाः॥शांतिगृहेदेवगृहेतथानरपतेर्गृहे॥उपर्युप

रिमात्रंतुदृश्यतेवेश्मवत्तदा॥मक्षिकामशकादंशाअतिमात्रभयावहाः॥ईदृशैर्लक्षणोत्पातैर्महाचौरभयंभवेत्॥द्रव्याणांहरणंब्रूयात्सरच्चक्रस्यचांग
मं॥तत्रशांतिंप्रवक्ष्यामिविश्वामित्रोपदर्शितां॥अश्वत्थसमिधश्चैवहुत्वाचाष्टोत्तरंशतं॥पूर्णपात्राणिदातव्याहुतांतेभूरिदक्षिणा॥दासीदास
समायुक्तंगृहंदद्याद्विजायते॥तिलपात्रंप्रदातव्यंतिलान्जुह्वीतसंयतः॥मृतःस्मशानंयोनीतःपुनर्जीवतिमानवः॥गृहेयस्यप्रतिष्ठोसौतिष्ठेदथ
कदाचन॥अचिराच्छून्यतांयातिहृतदारपरिग्रहः॥तत्रशांतिंप्रवक्ष्यामिधर्मराजमतंयथा॥सक्षीराणांघृताक्तानामग्नौहुत्वासुखंबुधः॥उदुंब
रीणांविधिवत्ततःशांतिःकृताभवेत्॥सावित्र्यष्टसहस्रेणक्षीरशांतिंचकारयेत्॥रक्तानामेकेत्याद्विवक्ष्यमाणाक्षीरशांतिः॥कपिलंचतथाका
स्यंहुतांतेभूरिदक्षिणा॥ततस्तच्छाम्यतेपापंधर्मराजमतंयथा॥सएव॥अनारोग्यमनावृष्टिर्दुर्भिक्षंजनमारकं॥ज्वरःकासस्तथाश्वासःकंडूर्द
द्रूर्विकोचिकाः॥शिरोरोगोक्षिरोगश्चपांडुरोगोगलग्रहः॥व्याधयश्चप्रवर्त्ततेदुर्दृष्टैःस्वल्पलक्षणैः॥तत्रशांतिंप्रवक्ष्यामिबृहस्पतिमतंयथा॥त्रि
रात्रोपोषितोभूत्वाहविष्याशीपुरोहितः॥सक्षीराणांघृताक्तानांसमिधानांशतंदहेत्॥पलाशस्येतिशेषः॥ततस्तच्छाम्यतेपापंबृहस्पति
मतंतथा॥सएव॥वज्रमिंद्राशनिर्वापिज्वलन्नापततेयदि॥पुरेजनपदेवापितत्रविंद्यान्महद्भयं॥संवत्सरेततोघोरेविंद्याच्चैवजनक्षयं॥रा
जामात्यविनाशंचनिर्दिशेन्नात्रसंशयः॥तत्रशांतिंप्रवक्ष्यामिइंद्राग्निवचनंयथा॥अपामार्गस्यसमिधांसहस्राष्टोत्तरंभवेत्॥पायसंभोजये
द्विप्रान्क्षीरशांतिंचकारयेत्॥रक्तानामेकवर्णानांगवांक्षीरंसमादिशेत्॥समादिशेद्धोमार्थंसंपादयेत्॥हुत्वाहुतिशतंविप्रोमहेंद्रेणैवमंत्र

वित्॥ महेंद्रेणमहांइंद्रोयआजसेत्यादिना॥ सुवर्णमणिसंकाशाहुतांतेभूरिदक्षिणा॥ गौरितिशेषः॥ ततस्तच्छाम्यतेपापमिंद्राग्निवचनंयथा॥ शौनकः॥ अथयदास्यमणिककुंभस्थालीदरणमायासोराजकुलविवादोवायान् छत्रशय्यासनावसथध्वजगृहैकदेशप्रभंजने॥ गजवाजिमुख्याः प्रमीयंतेवाहस्तिनोवामाद्यंति॥ इत्येवमादीनि॥ तान्येतानिसर्वाणिइंद्रदेवत्यान्यद्भुतानिप्रायश्चित्तानिभवंतिइंद्रोदेवताकर्त्ताहर्त्ताच येषांतानींद्रदैवत्यानिअद्भुतानितेषुप्रायश्चित्तान्यपींद्रदैवत्यानिभवंति॥ इंद्रंविश्वेतिस्थालीपाकंहुत्वापंचभिराज्याहुतीर्जुहोतिइंद्रायस्वाहा॥ शचीपतयेस्वाहा॥ सर्वपापशमनायस्वाहेतिव्याहृतिभिश्चपृथक्पृथक्॥ सएव॥ गृहद्वारेणवासर्पोगच्छतिकपोतंप्रविशतिशरीरेरोहति कृष्णास्त्रीदर्शनमेवमादीनितान्येतानिसर्वाणियमदैवत्यानिअद्भुतानिप्रायश्चित्तानिभवंति॥ नाकेसुपर्णमितिस्थालीपाकंहुत्वा पंचभिराज्याहुतीर्जुहुयात्॥ यमायस्वाहाप्रेताधिपतयेस्वाहा॥ दंडपाणयेस्वाहा॥ सर्वपापनाशनायस्वाहेतिव्याहृतिभिश्चपृथक्पृथक्जुहोति॥ ॥ सएव॥ दिशोदशदह्यंति॥ केतवश्चोत्तिष्ठंति॥ गवांशृंगाद्रुधिरंस्रवति॥ अत्यर्थंहिमांशुस्तपति॥ इत्येवमादीनिसर्वाणिसोमदैवत्यान्यद्भुतानिप्रायश्चित्तानिभवंति॥ सोमंराजानमितिस्थालीपाकंहुत्वापंचभिराज्याहुतिभिरभिजुहोतिसोमायस्वाहा॥ नक्षत्राणांपतयेस्वाहा॥ सीरपाणयेस्वाहा॥ सर्वपापशमनायस्वाहा॥ व्याहृतिभिश्चपृथक्पृथक्जुहोति॥ अथाश्वशांतिः॥ गर्गः॥ अश्वशांतिंप्रवक्ष्यामिशृणुशौनकयत्नतः॥ अश्वशालासमीपेतुकुंडंकुर्याद्विधानतः॥ उत्खातंहस्तमात्रंचआयामंचतथाभवेत्॥ मेखलात्रयसंयुक्तंयोनिरश्वत्थपत्रवत्॥ कुंडस्यो

नरपूर्वेतु वेदिंकुर्यात्सुशोभनां॥ सार्द्धहस्तंतथायामसुत्सेधंहस्तमात्रकं॥ वर्त्तुलांचतुरस्रांचदेवानांस्थापनायच॥ कुर्यादष्टदलंपद्मंतंडुलैर्वे
दिकोपरि॥ तन्मध्येपूजयेद्देवंसुवर्णेनप्रकल्पितं॥ अश्वारूढंमहातेजःसप्तहस्तमहाबलं॥ अश्वारिष्टहरंसूरंदेवंतंहयवल्लभं॥ देवेंद्रंचधराधीशं
सुवर्णेनप्रकल्पयेत्॥ वरुणंचतथेशानंरजतेनप्रकल्पित॥ यमंचकाललोहेनताम्रेणापितथैवच॥ निर्ऋतिंचतथावायुंनागेनैवप्रकल्पयेत्॥ सोमं
चरजतेनैवकल्पयेत्सुसमाहितः॥ कृत्वेवंलोकपालांश्चस्वस्वेषुस्थानेषुविन्यसेत्॥ आवाहनार्घपाद्याद्यैर्गंधपुष्पादिकैः शुभैः॥ धूपदीपैश्चनै
वेद्यैःपूजयेन्मंत्रपूर्वकं॥ पंचामृतेनस्नपनंकुर्याद्देवस्यमंत्रकैः॥ त्वमूषुवाजिनमितिमंत्रेणावाहनंचरेत्॥ अश्वस्तूपरोगवितिकुर्यात्संस्थापनंबुधः॥
मानस्तोकेतिमंत्रेणस्नानंसम्यक्प्रकल्पयेत्॥ युवंवस्त्राणीतितथावस्त्रंचैवप्रदापयेत्॥ यज्ञोपवीतंदातव्यंदेवस्यत्वेतिमंत्रतः॥ वित्तदा
येतिमंत्रेणअर्चयेत्सुसमाहितः॥ गंधद्वारेतिवैगंधंपुष्पंश्रीश्चतथैवच॥ धूरसीतितथाधूपंदीपंचापिविशेषतः॥ अन्नपतेतिमंत्रेणनैवेद्यं
बहुकल्पयेत्॥ एवंसंपूज्यविप्रेंद्ररविपुत्रंहयाधिपं॥ ततःसंपूजयेद्धीमान्लोकपालान्समंत्रतः॥ इंद्रंवोविश्वतःशक्रंअग्निंदूतेतिपावकं,
यमायसोमेतियमंनिर्ऋतिंमोषुणेतिच॥ त्वन्नोअग्नेतिवरुणंतववायेतिचानिलं॥ सोमोधेनुंतथासोमंकद्रुद्रेतितथाशिवं॥ पूजयेद्गंध
पुष्पाद्यैर्धूपदीपनिवेदनैः॥ क्रमेणपूजयेदित्थंदेवान्संपूजयेत्ततः॥ अश्वारूढमहावीरतुरंगेशमहाबल॥ अश्वारूढंचरेवंतंशक्त्याचाशु
विनाशय॥ आखंडलगजारूढवज्रहस्तसुरेश्वर॥ वज्रेणतुरगारिष्टंभिन्नंकुरुशचीपते॥ मेषारूढमहातेजोज्वलज्ज्वालाविभूषितः॥ तीक्ष्णासि-

नाहुतवह अश्वारिष्टंविनाशय॥कालदंडधरोदेवमहामहिषवाहन॥कालदंडेनदंडोत्थमश्वारिष्टंविनाशय॥खड्गहस्तमहाभीमनिर्ऋतेप्रेतवाहन॥छिन्नंकुरुहयारिष्टंतीक्ष्णखड्गेनशीघ्रतः॥पाशहस्तजलाधीशसदामकरवाहन॥पाशेनचहयारिष्टंभिन्नंकुरुजलाधिप॥ध्वजहस्तमहाकायमृगारूढमहाबल॥ताडयस्वहयारिष्टंध्वजदंडेनवानिल॥शक्तिहस्तमहाराजकुबेर वरवाहन॥अश्वारिष्टंचयक्षेशशक्त्याचाशुविनाशय॥शूलहस्तमहारौद्रपिनाकिन्वृषवाहन॥नाशयाशुहयारिष्टंविशूलेनत्रिलोचन॥एवंसंप्रार्थ्यविप्रेंद्रलोकपालक्रमेणच॥अग्नेःसंस्थापनंकृत्वाकुंडेहोमंचकारयेत्॥तिलव्रीहियवैश्चैवप्रत्येकंचादकादकं॥होमंकुर्यादश्वकामश्चरुणाघृतपूर्वकं॥स्थापयित्वाज्यसंस्थालींतत्स्थेनाज्येनयत्नतः॥इत्थंसर्वैश्चमंत्रैश्चदेवमुद्दिश्यकारयेत्॥अग्नयेस्वाहा॥सोमायस्वाहा॥वायवेस्वाहा॥विष्णवेस्वाहा॥सर्वज्ञायस्वाहा॥सर्वदुरितनाशायस्वाहा॥रेवंतायस्वाहा॥सर्वकामप्रदायस्वाहा॥प्रजापतयेस्वाहा॥सर्वत्रहोमःकार्य्यः॥अग्निरन्नादोन्नपतिरन्नाद्यमस्मिन्यज्ञेयजमानायददातुस्वाहा॥सोमोराजाराजपतिंएवंसर्वत्रहोमविधिः॥इत्थंकृत्वाहोमकर्मआचार्योविधिवत्ततः॥शन्नोभवंतुमंत्रेण अश्वशालांप्रवेशयेत्॥पवित्रंतेतिमंत्रेण अश्वान्संप्रोक्षतेद्विजः॥एषवाजीतिमंत्रेणतथाश्वांश्चविसर्ज्जयेत्॥मानोमित्रेतिमंत्रेणतुरंगान्स्थापयेत्सुधीः॥पूर्णाहुतिंचजुहुयादच्छिन्नघृतधारया॥भूतेभ्यश्चबलिंदद्याच्छिन्नांतंमंत्रपूर्वकं॥असुराःपन्नगायक्षायातुधानाश्चराक्षसाः॥पिशाचाःसिद्धगंधर्वावेतालायोगिनीशिवा॥डाकिनीलाकिनीचैवशाकिन्याजंबुकादयः॥

अश्वारिष्टप्रशांत्यर्थंबलिंगृण्हंत्वमीग्रहाः॥ इत्थंदत्वाबलिंसम्यक्भूतेभ्यश्चविधानतः॥ अश्वंचदक्षिणायुक्तंप्रतिमांवत्ससंयुतां॥उद्दिश्यभास्करदेवमाचार्यायप्रदापयेत्॥आकृतीर्देवतानांचद्विजेभ्योवस्त्रसंयुताः॥दद्यात्तादक्षिणायुक्ताः श्रद्धापूतः समाश्रितः॥आकृतीःप्रतिमाः॥देवानामिंद्रादीनां॥अनेनविधिनाकृत्वाहयानांशांतिकंमहत्॥अश्वानांनीरुजत्वंचबलंपुष्टिबलंतथा॥लक्ष्मीस्थितामनूनांचसंग्रामेविजयोभवेत्॥ब्राह्मणान्भोजयेत्पश्चात्ततः शांतिर्भविष्यति॥इत्यश्वशांतिः॥ अथगजशांतिः॥ सनत्कुमारउवाच॥अथराजाप्रकुर्वीतचतुर्थ्यांगजवाजिनां॥शांतिमामयतप्तानांतदुत्पातोदयेसति॥कवलानिचनादत्तेयदात्वश्रूणिमुंचति॥स्तब्धःप्रशांतोनिर्वेदोस्यान्मदेनविवर्जितः॥विहीनमतिरत्यर्थंपरिक्षीणतनुर्द्विपः॥विमानात्त्रस्तसर्वांगगुप्तोनष्टपराक्रमः॥नष्टशोभःसदाहीनोनष्टसंज्ञोरुषान्वितः॥नानाव्याधिसमुत्थाभिःपीडाभिःपीड्यतेयदा॥अरिष्टोपनिपातेषुतथोत्पातभयेषुच॥तदाशांतिप्रकुर्वीतगजरक्षापरोनृपः॥अरिष्टाद्यशुभंत्वेवंवाजिनांलक्ष्यतेयदा॥युद्धारंभेषुचतथातेषांशांतिंचकारयेत्॥शांत्यर्थंगजवाजीनांमंडपंचतुरस्रकं॥द्वादशारत्निमानेनसंमितंकारयेत्सुधीः॥बाहुप्रमाणंमध्येतुयोनिनाभिसमुज्ज्वलं॥कुंडंत्रिमेखलंकुर्यात्वृत्तंवाचतुरस्रकं॥तत्पुरस्ताद्दक्षिणतःपश्चिमेचोत्तरेतथा॥चतुरस्रंततःकुर्यात्कुंडंहस्तप्रमाणकं॥कोणेषुचतथाकुर्याद्वृत्तंचाष्टत्रिकोणकं॥अर्कखदिरपालाशबिल्वाश्वत्थवटैरपि॥औदुंबरअपामार्गसमिद्भिस्तत्रतत्रच॥मध्येसर्वसमिद्भिर्वापालाशैर्वाज्यबिल्वकैः॥तिलतंडुललाजाभिःसक्तुसिद्धार्थशालिभिः॥ यवैरेभिस्त्रि

मध्वक्तैर्मध्येसर्वमितिस्थितिः॥दत्वाचपयसाचैवघृतेनमधुनापिवा॥कोणेषुचतथाज्येनमध्येतुकलशैरपि॥स्थापयेत्ततःकुंभानष्टावष्टासुदिक्षुच॥वस्त्रयुग्मेनसंछन्नान्सर्वौषधिसमन्वितान्॥सर्वरत्नयुतान्युग्मान्गंधपुष्पोदकैरपि॥हस्तावरप्रमाणंतुबृहत्कुंभंतुमध्यमे॥तीर्थोदकेनसंपूर्णंसर्वरत्नौषधैरपि॥चतुरःकलशांस्तत्रचतुर्थस्यसमंततः॥कोणेषुचयथान्यायंजलवस्त्रादिकैर्युतान्॥स्मरेत्प्रधानकुंभेतुनरसिंहाकृतिंहरिं॥चक्रशंखगदापद्मचर्मासिशरशक्तयः॥पूर्वादिक्रमयोगेनध्यातव्यंकलशेष्वपि॥बहिःशक्रादिदिक्पालांस्तत्रतत्रचसंस्मरेत्॥प्रधानकुंभात्पुरतःकुर्याच्चक्रंतुमंडलं॥तत्रसंपूज्यदेवेशंपश्चाद्धोमादिसाधयेत्॥मंडलाग्रेतदाकुंभंकुंभाग्रेकुंडमेवच॥सर्वत्रानलसंस्कारान्स्वगृह्योक्तेनकर्मणा॥जुहुयादग्निसिद्ध्यर्थमाज्याहुतिसहस्रकं॥आनुष्टुभेनमंत्रेणगुरुर्वास्यपुरोहितः॥आनुष्टुभोनृसिंहमंत्रोदशसाहस्रमिष्यते॥समिद्द्रव्यचरूण्येवंहुत्वामंत्रीसमाहितः॥संपत्याज्याहुतीनांचसहस्रंवाऽयुतंचरेत्॥ततःस्विष्टकृदित्यादिसमापनविधिःक्रमात्॥एवंसमाप्यविधिवद्धोमंतत्रपुरोहितः॥संस्पृशेदुदकुंभंचजपेद्दशसहस्रकं॥पर्यंतकलशान्स्पृष्ट्वाजपेत्तत्रसहस्रकं॥अनंतरेषुकुंडेषुगायत्र्याप्रणवेनवा॥ऋत्विग्भिर्युगपत्कार्यंहोमतंत्रंतुपूर्ववत्॥प्रतिकुंभंसहस्रंचजपेत्तानप्युपस्पृशन्॥पूजयेल्लोकपालादीन्गंधादिभिरलंकृतः॥अथराजानमाकार्यस्वास्तीर्णसिंहविस्तरे॥समाप्यचशुचिस्नानंसर्वालंकारसंयुतं॥कुंभोदकेनदेवाग्रेतन्मंत्रेणाभिषेचयेत्॥पर्य्यंतकलशैश्चापिनृपंपश्चाद्गजादिकं॥अन्यांश्चवाहनान्पूज्यदिव्यलक्षणसंयुतान्॥गजादिनावशिष्टेनतोयेनस्नापयेद्बुधः॥अन्यवाहान्द्विपायातान्सर्वानेवस

माहितः॥ बाह्यकुंभोदकेनैवस्नापयेच्छत्रसाधकः॥ राज्ञोनीराजनंकुर्याद्वाहनेषुचमंत्रवित्॥ अन्येष्वेवंविधिःकार्यःसहिरण्यकरःपरः॥ राजानं
वाहनादींश्चतथान्यांश्चपुरोहितः॥ सर्वालंकारसंयुक्तान्सर्वमंगलसंयुतान्॥ कृत्वातुवाचयेत्सम्यग्ब्राह्मणैराशिषोबहु॥ दक्षिणामप्यलंदत्वाऋत्विग्भ्यो
गुरवेनृपः॥ वाहनंवस्त्रभूषाणामाचार्यायनिवेदयेत्॥ दासदासीषुभृत्येषुग्रामादिषुचसर्वशः॥ सर्वालंकारसंयुक्तंराजवाहोपरिस्थितं॥ मंत्रदीपे
र्हयेश्चैवब्राह्मणैःस्वस्तिवाचनैः॥ सानंदैश्चैवऋत्विग्भिर्वृद्धैर्मंत्रवरैस्तथा॥ आचार्योराजभवनेनृपंसंवेशयेत्स्वयं॥ पूर्वस्नानावशिष्टेनकुंभतोयेनमं
त्रवित्॥ गजशालांचसंप्रोक्ष्यवाजिशालांतथैवच॥ सिद्धार्थतंडुलतिलैःपुष्पैर्वाप्यवकीर्य्यच॥ शालामध्येनृपःसिंहंसुदर्शनमनामयं॥ पूजयेद्गंध
पुष्पाद्यैःसर्वालंकारसंयुतैः॥ सक्तुभिःकृसरान्नेनकुर्याद्भूतबलिंबहिः॥ ततःशालासुसर्वासुब्राह्मणान्भोजयेद्बलिं॥ ततःसंवेशनंकुर्याद्द्वाचार्योरा
जवाजिनां॥ एवंशांतिंप्रकुर्वीतनिमित्तेसतितद्गुरुः॥ सपरिच्छदस्यनृपतेर्मंत्रवित्सुसमाहितः॥ सर्वकल्याणसंपूर्णःसर्वबाधाविवर्जितः॥ स
पुत्रोराजमंत्रस्तुनृपस्तेनमहीयते॥ इतिगजशांतिः॥ अथमहाशांतिः॥ श्रीकृष्णउवाच॥ महाशांतिंप्रवक्ष्यामिमहादेवेनभाषितां॥ पार्थिवानां
हितार्थायमहादुस्तरतारिणीं॥ नृपाभिषेकेसाकार्यायात्राकालेनृपस्यतु॥ दुस्वप्नेदुर्निमित्तेचग्रहवैगुण्यसंभवे॥ विद्युदुल्कानिपातेचजन्म
क्षेग्रहभेदने॥ केतूदयेचनिर्घातेक्षितिकंपस्यसंभवे॥ प्रसूतौमूलगंडांतेयमलस्यचसंभवे॥ छत्राणांचध्वजानांचस्वस्थानात्पतनेभुवि॥ काकोलूक
कपोतानांप्रवेशेवेश्मनस्तथा॥ क्रूरग्रहाणांचक्रेषुजन्मादिषुविशेषतः॥ जन्मनिद्वादशेचैवचतुर्थेवाष्टमेतथा॥ यदास्युर्गुरुमंदाराःसूर्यश्चैवावि

शेषतःमंदः शनिः॥ आरो भौमः॥ युद्धेग्रहाणांसर्वेषांसूर्यशीतांशुकीलके॥ वस्त्रायुधगवाश्वेषुसंस्थितेशयनासने॥ यद्यग्निःपरिदृश्येतरत्राविंद्रधनुस्त
था॥ वेश्मनश्चतुलाभंगेगर्भेष्वश्वतरीषुच॥ रविबिंबद्वयेदृष्टेमहाशांतिःप्रशस्यते॥ सर्वाणिदुर्निमित्तानिप्रशमंयांतिसर्वशः॥ तांकुर्युर्ब्राह्मणाःपंच
कुलशीलसमन्विताः॥ चतुर्वेदास्त्रिवेदाश्चद्विवेदाश्चापिपांडव॥ आथर्वणाविशेषेणबह्वृचास्तुसुसंयताः॥ ऋचयःश्रुतसंपन्नाजपहोमपरायणाः
॥कृच्छ्रोपवासनक्ताद्यैःकृतकायविशोधनाः॥ पूर्वमाराध्यमंत्रांस्तुप्रारभेततततःक्रियाः॥ मंत्रान्विनियोक्ष्यामाणान्॥ दशद्वादशहस्तंवामंडपंकारयेच्छु
भं॥ तन्मध्येवेदिकांकुर्याच्चतुर्हस्तप्रमाणतः॥ आग्नेस्यांकारयेत्कुंडंहस्तमात्रंसुशोभनं॥ मेखलात्रयसंयुक्तंयोन्याचापिसमन्वितं॥ रवींद्वोरुपरागेषुमहो
ल्कापतनेषुच॥ उत्पातेषुतथान्येषुनिमित्तेषुचसर्वशः॥ सर्वारिष्टोपशमनामहाशांतिःप्रशस्यते॥ चारुचंदनमालेचतोरणालंकृतेतथा॥ गोमयेनो
पलिप्तेचमंडपेतेद्विजातयः॥ शुक्लांबरधराःस्नाताःशुक्लमाल्यानुलेपनाः॥ कर्मकुर्युरितिशेषः॥ ततश्चपंचकलशांस्तस्यांवेद्यांनिवेशयेत्॥ आग्ने
यादिषुकोणेषुपंचमंमध्यतस्तथा॥ अष्टपत्रकृतेपद्मेचूतपल्लवधारिणां॥ ब्रह्मकूर्चविधानेनपंचगव्यंतुकारयेत्॥ ब्रह्मकूर्चविधानंगोमूत्रंताम्रवर्णा
याइत्यादिनाब्रह्मकूर्चप्रकरणेचोक्तं॥ औषधीःपंचरत्नानिरोचनांचंदनंतथा॥ सिद्धार्थकान्शमींदूर्वांकुशान्व्रीहियवांस्तथा॥ अपामार्गफलवतीं-
न्यग्रोधोदुंबरौतथा॥ प्लक्षाश्वत्थकपित्थांश्चप्रियंगूंश्चूतपल्लवान्॥ हस्तिदंतमृदंचैवकोणकुंभेषुविन्यसेत्॥ फलवतीगंधप्रियंगुः॥ प्रियंगुःकंगुः॥ पुण्यती
र्थोदकोपेतंपंचगव्यंचमध्यमे॥ कृत्वंवाचमितीदंचवन्हिकुंभाभिमंत्रणं॥ आशुःशिशानंनैरृत्येयद्वावायुगोचरे॥ ईशावास्यंचतुर्थस्यकुंभस्यत्व

भिमंत्रणं॥मध्यमेत्वथजप्तव्यारुद्राःकुंभेयजुर्भवाः॥गंधपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः॥फलैश्चनारिकेराद्यैर्दीपकैःकुंभपूजनं॥स्वस्ति
वाचनकंचैवकारयेत्तदनंतरं॥क्रमेणानेनशनकैरग्निकार्यंचयोजयेत्॥अनेनवक्ष्यमाणेनाग्निंदूतमिहाग्निंचपूर्वमेवनिधापयेत्॥पूर्वंकलशस्थापना
त्॥हिरण्यगर्भःसमितिब्रह्मासननियोजनं॥कयानस्साप्रणीताश्चमंत्रेणविनिवेशयेत्॥कृत्वाचास्तरणंवन्हेराज्यसंस्कारमेवच॥अथवासादयेदन्नंद्रव्यं
यस्यप्रयोजनं॥ततःपुरुषसूक्तेनपायसश्रपणंभवेत्॥अभिघार्याथसंसिद्धंपायसंस्थापयेद्भुवि॥अष्टादशप्रमाणेध्मानृदद्यादथशमीमयान्॥पालाशीः
समिधःसप्तसप्ततेइतिदापयेत्॥आघारावाज्यभागौतुहुत्वापूर्वक्रमेणतु॥जुहुयादाहुतीःसप्तजातवेदसइत्यृचा॥स्थालीपाकस्यजुहुयात्पुनर्वै
जातवेदसे॥तरत्समंदीसूक्तेनचतस्त्रोजुहुयात्ततः॥यमायेतिसप्ताऽन्याःस्वाहांताजुहुयात्ततः॥स्वाहांताइतिसर्वत्रयोज्यं॥इदंविष्णुस्ततःसप्तजुहुया-
दाहुतीर्नृप॥नक्षत्रेभ्यस्ततःस्वाहासप्तविंशतिराहुतीः॥नक्षत्राहुतयश्चकृत्तिकाभ्यः स्वाहे त्यादिभिर्मंत्रैःकार्याः॥तत्ररोहिणीद्वयपुष्यहस्तादित्रयानु
राधादित्रयाभिजिद्द्वयशतभिषक्रेवतीष्वेकवचनं॥पुनर्वसुफाल्युनीद्वयविशाखाश्विनीषुद्विवचनंशेषेषुबहुवचनं॥यत्कर्मणेतिजुहुयात्ततःस्विष्ट
कृतंपुनः॥ग्रहहोमस्ततःकार्यस्तिलैराज्यपरिप्लुतैः॥अत्रतिलविधानं वैकल्पिकायवादिनिवृत्त्यर्थं॥प्रायश्चित्तंततोहुत्वाहोमकर्मसमापयेत्॥ततस्तु
तूर्यनिर्घोषैःकाहलाशंखनिस्वनैः॥यजमानस्यकर्तव्योह्यभिषेकोद्विजोत्तमैः॥काश्मर्यवृक्षसंभूतेसमेभद्रासनेस्थितः॥काश्मर्यवृक्षःश्रीपर्णी॥भद्रा
सनं॥वेदीमध्यगतंकृत्वादुर्निमित्तप्रशांतये॥पंचभिःकलशैःपूर्णैर्मंत्रैरेतैर्यथाक्रमं॥सहस्राक्षेणप्रथमंततश्चैवशतायुषा॥सजोषसाइंद्रइतिचविश्वा

निवरुणेतिच ॥ द्रुपदादिवेदिचततः स्नापयेयुः समाहिताः ॥ ततोदिशांबलिंदद्याद्दिचिन्नान्नसमाश्रितान् ॥ नमोस्तुसर्वरक्षेभ्यइतिमंत्रमुदाहरेत् ॥
स्नातस्यब्राह्मणाःसर्वेपठेयुः शांतिसुक्तमां ॥ शांतितोयेनधारांचपातयित्वासमंततः ॥ पुण्याहवाचनंकृत्वाशांतिकर्मसमापयेत् ॥ तीर्थेदेवालये
वापिगोदोहंकारयेद्बुधः ॥ क्षितिंहिरण्यंवासांसिशयनान्यासनानिच ॥ विप्रेभ्योदक्षिणांदद्याद्यथाशक्त्याविमत्सरः ॥ दीनानाथविशिष्टेभ्योदद्या
न्नैवयुधिष्ठिर ॥ भोजनंचानिशंदत्वाततःसर्वंप्रसिद्ध्यति ॥ आयुश्चलभतेदीर्घंशत्रून्विजयतेक्षणात् ॥ दुर्गाणिचास्यसिद्ध्यंतिपुत्रांश्चलभतेशुभान् ॥ य
थाशस्त्रप्रहाराणांकवचंवारणंभवेत् ॥ तथादैवोपघातानांशांतिर्भवतिवारणं ॥ अहिंसकस्यदांतस्यधर्मार्जितधनस्यच ॥ दयादाक्षिण्ययुक्तस्यस
र्वेसानुग्रहाग्रहाः ॥ अर्थान्समर्द्धयतिवर्द्धयतेचधर्मंकामंप्रसाधयतितस्यपिनष्टिपापं ॥ यःकारयेत्सकलदोषहरींमहार्थांशांतिंप्रशांतहृदयःपुरुषः
सदैव ॥ चर्मण्वतीतरणिजाशुभसंगमस्यसान्निध्यभाजिकृतशालिनिमध्यदेशे ॥ ख्याताभरेहनगरीकिलतत्रराजाराजीवलोचनरतोभगवंतदे
वः ॥ १ ॥ ॥ इतिश्रीसेंगरवंशावतंसमहाराजाधिराजश्रीभगवंतदेवोद्योजितेमीमांसकभट्टशंकरात्मजभट्टनीलकंठकृतेभगवंतभास्करेशां
तिमयूखोद्वादशः समाप्तः ॥ ॥ श्रीरस्तु ॥ ॥ समाप्तोऽयंग्रंथः ॥ ॥ श्रीशंकरप्रसन्नोस्तु ॥ ॥ छ ॥ ॥ छ ॥

हें पुस्तक मुंबईंत महादेव गोपाळ शास्त्री अमरापुरकर यांणीं आपले ज्ञानदर्पण छापखान्यांत छापिलें ॥ शके १८१२ विकृतिनाम संवत्सरे ज्येष्ठ शुक्ल १० गुरुवार.

॥ इति शांतिमयूखः समाप्तः ॥

अथ शांतिसारानुक्रमणिका प्रारंभः

॥ श्रीगणेशायनमः ॥

॥ अथशांतिसारानुक्रमणिकाप्रारभ्यते

१ मंगलाचरणं.
२ नवग्रहमखः
२ अथायुतहोमादिविधिः
३ वेदीलक्षणम्.
३ नवग्रहाः
३ ग्रहाणांवर्णाः
३ ग्रहाणांधूपदीपाः
३ ग्रहाणांनैवेद्यानि.
३ ग्रहकलशस्थापनं.
४ होमद्रव्याणि.
४ ग्रहाणांमंत्राः
४ अभिषेकमंत्राः
४ ग्रहदक्षिणाः
५ दानमंत्राः
५ ग्रहाणांवर्णादिध्यानानि.
५ ग्रहदेशाः
५ ग्रहगोत्राणि.
५ ग्रहमंडलानि.
६ ग्रहधूपाः
६ ग्रहप्रतिमालक्षणम्.
६ अथलक्षहोमविधिः
७ कुंडप्रमाणम्.
७ अथकोटिहोमविधिः
७ कुंडादिलक्षणानि.
८ आचार्यवरणम्.
९ ऋत्विक्भेदाः
९ मधुपर्कादिपूजा.
९ मंडपादिपूजा.
१० सर्वतोभद्रादिमंडलानि.
११ चक्रारविंदकारिका.
१२ लिंगस्वस्तिककारिका.
१२ लतालिंगोद्भवकारिका.
१४ अग्निचक्रं.
१४ अग्निनामानि.
१४ ग्रहस्थापनम्.
१५ बौधायनमतेग्रहध्यानानि.
१८ अथपितामहकृतायुतहोमादिप्रयोगाः
१८ आचार्यादिवरणम्.
१८ वास्तुपूजनम्.
१९ मंडपपूजा.
२० मंडपद्वारदेवताः
२४ मंडलदेवताः
२६ अथकोटिहोमशतमुखादिभेदाः
२७ दशमुखाः
२७ द्विमुखाः
२७ अथग्रहशांतयः
२७ तत्रादित्यशांतिः
२७ अथचंद्रशांतिः
२७ अथांगारकशांतिः
२८ अथबुधशांतिः
२८ अथगुरुशांतिः
२८ अथशुक्रशांतिः
२८ अथशनिशांतिः
२८ अथशनैश्चरव्रतम्.
२८ अथशनैश्चरशांतिः
२९ अथशनैश्चरस्तुतिः
२९ अथनवग्रहस्थानानि.
२९ अथग्रहयोगशांतिः
३० अथगुरुपूजा.
३१ अथप्रतिकूलादिशांतिः
३१ अथप्रतिशुक्रादिशांतिः
३२ अथग्रहणशांतिः
३३ अथविनायकशांतिः
३३ अथसर्वौषधानि.
३५ अथविनायकशांतौमिताक्षरानुसारेणप्रयोगः
३६ अथरुद्रविधिः
३७ अथरुद्रजपादिविधिः
३८ अथरुद्रहोमविधिः
३८ अथतद्विभागाः
३९ अथरुद्रहोमेकुं[illegible]र्णयः
४० अथरुद्रवेदिः
४० अथरुद्रयं[illegible]
४१ अथरुद्रप्रयोगः
४१ अथरुद्रयंत्रेदेवताः
४२ अथरुद्राभिषेकविधिः
४३ अथपंचामृताभिषेकविधिः

४३ अथसहस्रघटस्थापनं.
४४ अथमहास्नानम्.
४४ अथमहापूजा.
४५ अथत्वरितरुद्रविधानम्.
४५ अथषट्न्यासाः
४६ अथपार्थिवपूजा.
४७ अथपार्थिवपूजाप्रयोगः
४७ अथकाम्यप्रयोगः
५० अथकामनाभेदेनसंख्याभेदः
५१ अथकाम्यभेदेनफलभेदः
५१ अथोद्यापनं
५२ अथपंचाक्षरस्य ऋषिन्यासध्यानानि.
५२ अथप्रयोगः
५३ अथनवचंडीशतचंडीसहस्रचंडीविधिः
५३ अथयंत्रोद्धारः
५४ अथमंत्रोद्धारः
५५ अथपूजाहोमविधिः
५८ अथकाम्यप्रयोगः
६३ अथवैदिकंदुर्गाराधनम्.
६४ अथसर्पविधिः
६४ अथवास्तुशांतिः
६४ अथवास्तुकरणेमासाः
६४ अथवास्तुनक्षत्राणि.
६५ अथवास्तुभूमिपरीक्षा.
६५ अथवास्तुमंडलदेवताः
६६ अथवास्तुदेवतानैवेद्यम्.
६८ अथकूपस्थानम्.
६८ अथवास्तुसमीपेवृक्षाः
६८ अथवास्तुप्रयोगः
६९ अथअन्वाधानम्.
७० अथदुष्टरजोदर्शनशांतिः
७२ अथास्मृत्पितृकृतप्रयोगः
७३ अथबोधायनसूत्रोक्त ऋतुशांतिः
७३ अथकन्यायाबालवैधव्ययोगे शांतिः
७३ कुंभविवाहः
७४ अथार्कविवाहः
७५ अथप्रयोगः
७६ गोमुखप्रसवशांतिः
७७ अथप्रयोगः
७७ अथकृष्णचतुर्दशीजातशांतिः
७८ अथप्रयोगः
७८ अथसिनीवालीकुहूशांतिः
७९ अथप्रयोगः
८० दशदानानि.
८० अथदर्शजातशांतिः
८१ अथप्रयोगः
८१ अथमूलशांतिः
८१ मूलजातफलम्.
८२ अभुक्तमूलं.
८२ गंडांतादिविशेषः
८२ गंडांतफलम्.
८३ अथमूलशांतिविधिः
८६ शतमूलानि.
८७ अथतेषांमध्यभाषयानामानि
८७ तत्रप्रयोगः
८८ अथशौनकोक्तमार्गेणमूलशांतिप्रयोगः
९० अथकश्यपसंहितोक्तमूलशां
९१ अथशौनकोक्ताश्लेषाशांतिः
९२ अथप्रयोगः
९५ ज्येष्ठाशांतिविधिः
९६ अथप्रयोगः
९६ अथैकनक्षत्रजननशांतिः
९७ अथप्रयोगः
९७ अथज्योतिर्निबंधोक्त एकनक्षत्रशांतिविधिः
९७ अथशौनकोक्तव्यतीपातादिशांतयः
९८ अथप्रयोगः
९९ अथगर्गोक्तनक्षत्रगंडांतरा
१०० अथप्रयोगः
१०० अथउत्तरादिशांतिः
१०० अथदिनक्षयादिशांतिवि
१०० अथविषघा
१०० तत्रविषन
१०१ अथग्रह

१०२ अथकात्यायनोक्तयमलजननशांतिः
१०२ अथसदंतगमनशांतिः
१०२ पंचदशीशांतिः
१०३ अथत्रिकशांतिः
१०३ अथसिंहादिप्रसूतगवादिशांतिः
१०३ अथबालपीडाशांतिः
१०३ प्रथमादिद्वादशदिनपीडा.
१०४ अथमासेषु.
१०५ अथवर्षेषु.
१०६ अथदिनमासवर्षग्रहहराणि.
१०८ अथत्रयोदशादिवर्षशांतिः
१०८ अथरोगोत्पत्तिशांतिः
१०९ अश्विन्यादिनक्षत्रव्याध्युत्पत्तिः
१११ प्रतिपदादितिथिज्वरोत्पत्तौशां·
११२ अथाश्वलायनोक्तवारशांतिः
११३ अथज्वरशांतयः
११५ अथपंचकमरणादिशांतिः
११५ अथात्रिपुष्करादिशांतिः
११७ अथात्रिपादशांतयः
११७ अथद्वादशाब्दादूर्ध्वमवलोकनविधिः
११८ अथप्रयोगः
११८ अथतडागादौमृतदोषशांतिः
११९ अथगजशांतिः
१२० अथाश्वशांतिः
१२० अथगजनीराजनम्.
१२१ अथाश्वनीराजनम्.
१२१ अथगोशांतिः
१२२ अथकाकमैथुनशांतिः
१२२ वायसगृहप्रवेशेशांतिः
१२३ अथपल्लीसरठशांतिः
१२३ अथकपोतशांतिः
१२४ अथकृत्याशांतिः
१२४ अथशनिदग्धगृहादिशांतिः
१२५ अथाद्भुतशान्तयः
१२४ अथकेतुफलं.
१२६ अथपरिवेषः
१२६ अथेंद्रधनुः
१२६ अथनिर्घातः
१२६ अथरजः
१२६ अथभूकंपः
१२६ अथग्रहयुद्धम्.
१२६ अथप्रतिसूर्यः
१२७ अथरश्मिदंडः
१२७ अथदिग्दाहः
१२७ अथछाया.
१२७ अथमेघगर्भोपघातः
१२७ अथाद्भुतपाककालः
१२७ अथाद्भुतफलस्थानानि.
१२८ अथोत्पातसाधारणशांतयः
१३१ विशेषशांतयः
१३१ देवताविकारे.
१३२ अथाग्निविकारे.
१३२ अथवृक्षोत्पातशांतिः
१३३ अथवृष्टिवैकृतशांतिः
१३३ अथजलाशयवैकृतशांतिः
१३३ अथोपस्करवैकृतशांतिः
१३३ अथमृगपक्षिवैकृतशांतिः
१३४ अथाकस्मिकप्रासादपतनशां·
१३४ अथनानोत्पातशांतिः
१३६ अथजनमारीशांतिः
१३६ अथरविच्छिद्रशांतिः
१३६ अथापवर्गग्रहणशांतिः
१३६ अथहरिणशांतिः
१३७ अथाश्वदग्धकशांतिः
१३७ अथलिंगाक्षानि.
१३७ अथस्वप्नाध्यायः [illegible] नाक्ष
१३७ तत्रशुभस्वप्नाः
१३८ अथदुःस्वप्ना.
१३९ अथदुःस्वप्नशांतिः
१३९ अथपर्जन्यशांतिः
१४० अथराजाभिषेकः
१४१ अथविष्णुधर्मोक्तोराजाभिषेकः
१४३ अथाभिषेकमंत्राः
१४७ अथपुष्याभिषेकः
१४८ अथदुर्गविधिः
१४९ अथ ग्रंथक[illegible]न्त्रोर्नामादि

इतिशांतिसारानुक्रमणिका
समाप्ता.

अथ शांतिसारप्रारंभः

श्रीगणेशायनमः श्रीरामकृष्णपितरंनत्वोमांबांसदाशिवंरामम् दिनकरशर्मातनुतेशांतिकसारंसुखायविबुधानाम् १ ग्रंथेस्मिन्शांतिसाराख्येयेमयार्थानिरूपिताः तेषामादौसुबोधायक्रियतेनुक्रमःस्फुटम् २ कथितोयुतहोमोत्रलक्षहोमस्ततःपरम् कोटिहोमस्तस्यचोक्ताभेदाःशतमुखादयः आदित्यादिग्रहाणांचप्रत्येकंशांतयस्ततः शनिस्तुतिर्ग्रहस्नानंग्रहयोगेचशांतिकं विवाहादौगुरोःशांतिःप्रतिशुक्रादिशांतयः विरुद्धग्रहणेशांतिःशांतिर्वैनायकीततः महारुद्रादिविधयस्तथारुद्राभिषेचनं पंचामृतेनस्नपनंसहस्रघटकंतथा महास्नानविधिस्तद्वन्महापूजातदुत्तरम् त्वरितस्याथरुद्रस्यविधानंसमुदीरितम् लिंगस्यपार्थिवस्याथपूजाचंडीविधिस्ततः दुर्गाकल्पोथसर्पस्यसंस्कारोवास्तुशांतिकम् रजोदर्शनशांतिश्चशांतिर्वैधव्ययोगके उक्तश्चार्कविवाहोथगोमुखप्रसवस्तथा तथाकृष्णचतुर्दश्याःसिनीवाल्याश्चशांतिकम् शांतिःकुह्वाश्चदर्शस्यमूलाश्लेषाविधिस्ततः ज्येष्ठाशांतिस्ततःप्रोक्तानक्षत्रैक्येचशांतिकम् व्यतीपातेचवैधृत्यांसंक्रमेचैवशांतिकम् नक्षत्राणांतिथीनांचगंडांतेशांतिकंततः उत्तरादौदिनस्यापिक्षयेविषघटीषुच शांतिर्ग्रहणजेष्वुक्तायमलोत्पत्तिशांतिकम् शांतिःसदंतजननेत्रिकशांतिस्ततःपरम् सिंहादौचप्रसूतस्यगवादेःशांतिकंततः दिनमासाब्दभेदेनबालशांतिस्ततःपरम् रोगर्क्षतिथिवारादिशांतयोज्वरशांतयः पंचकेचतथाशांतिस्त्रिपुष्करमृतेततः त्रिपादर्क्षमृतेशांतिर्वियोगग्रहशांतिकम् गजाश्वगोपीडनेचकाकमैथुनदर्शने वायसांतःप्रवेशेचपल्लीसरठशांतिकम् कपोतस्यततःशांतिःकृत्याशांतिस्ततःप

रस् विद्युद्धतेतथाशांतिरद्भुतानांचलक्षणम् उत्पातपाककालस्यशांतिःसाधारणीततः देवताग्न्योर्वृक्षवृष्ट्योर्जलानांचविकारके उपस्करविकारेचमृगेपक्षिविकारके अनिमित्तेगृहादेश्चपातेशांतिस्ततःपरम् नानोत्पातेषुशांतिश्चमृतजीवनशांतिकम् उल्काशांतिरकालेचहस्तिनोमद आगते हस्तिन्याश्चतथाधेनोर्मदेशांतिस्ततःपरम् शांतिर्भंगेश्वदंष्ट्राणांभंगेलिंगादिकस्यच दुःस्वप्नदर्शनेशांतिःपर्जन्याभावशांतिकम् आद्योराजाभिषेकश्चप्रतिवर्षाभिषेचनम् सिंहासनच्छत्रविधिर्दुर्गस्यविधिरीरितः तत्रनवग्रहमखस्यधर्मत्वेन सर्वशांतिप्रकृतित्वात्स आदौनिरूप्यतेसद्विविधः अयुतहोमादियुक्तःकेवलश्चेति तत्राद्योमात्स्यादावुक्तः द्वितीयोयाज्ञवल्क्यस्मृत्यादौ द्विविधस्यापिधर्माणांसंकरःप्रयोगपारिजातेउक्तः सकाम्योनैमित्तिकश्च कार्यारंभेषुसर्वेषुप्रतिष्ठास्वध्वरेषुच नववेश्मप्रवेशेचगर्भाधानादिकर्मसु आरोग्यस्नानसमयेसंक्रांतौरोगसंभवे अभिचारेचयःकुर्याद्ग्रहपूजांविधानतः सोभीष्टफलमाप्नोतिनिर्विघ्नेननसंशयइतिप्रयोगपारिजातेउत्पलपरिमलोक्तेः अत्रनिमित्तसप्तम्यानित्यत्वमपीतितत्रैवोक्तम् नित्येमंडपोनास्तीत्यप्युक्तं तत्रैव मात्स्ये नित्यंनैमित्तिकंहित्वासर्वमन्यत्समंडपम् कर्मांगभूतग्रहयज्ञोभ्युदयाद्दिनात्पूर्वंसप्तदिनमध्येकार्यइत्युक्तंपारिजाते सत्रिविधः एकाग्निरनेककर्तृकः एकाग्निरेककर्तृकः अनेकाग्निरनेककर्तृकश्चेति आद्यस्यनिषेधः पारिजातेआश्वलायनोक्तेः एकस्तु बहुकुंडेषुकुर्याद्ग्रहमखंगुरुः बहुष्वहःसुचैकस्मिन्नह्निवातद्विधानवित् एककुंडेतुनवभिर्नैवहोमःप्रशस्यते इदंचनवाचार्यपक्षे

ज्ञेयम् अत्रशूद्राणामप्यधिकारः धर्मेप्सवस्तुधर्मज्ञाःसतांधर्ममनुष्ठिताः मंत्रवर्ज्यंनदुष्यंतिप्रशंसांप्राप्नुवंतिचेतिशूद्रधर्मप्रकरणेमनूक्तेः यत्विदंमेधातिथिर्व्याचख्यौमंत्ररहितोयोब्राह्मणादीनामुपवासादिधर्मउक्तस्तमनुतिष्ठन्तः शूद्रानदुष्यंतिनपुनःसमंत्रकाण्यपिमंत्रवर्जमनुतिष्ठंतोनदुष्यंतीति तदयुक्तंवाक्यवैयर्थ्यापत्तेः नचसमंत्रककर्मविधीनांशूद्रान्प्राप्तप्रवृत्तेः कर्मणिमंत्रवर्जितानिविधातुमशक्येतिवाच्यम् मंत्रराहित्यविशिष्टकर्मविधौबाधकाभावात् तथाच ब्राह्मणादिकर्तृकाधानवदत्रकर्मभेदः यद्वात्रमंत्राभावः सर्वकर्मांगत्वेनविधीयते सचप्रकरणाच्छूद्रविषयः ननुयन्नतुलातडागोत्सर्गादौचतुर्णामपिवर्णानांशूद्रेणापिप्रकर्त्तव्यमित्यादिवचनाच्छूद्राधिकारस्तत्रैवमंत्रवर्जितविधानमस्त्विति चेन्न संकोचेप्रमाणाभावात् नचैवसंध्यावंदनादौशूद्रस्यमंत्रवर्जमधिकारःस्यादितिवाच्यम् द्विजत्वस्यतत्राधिकारतावच्छेदकत्वात् किंचशूद्रस्यसमंत्रकतुलादानादावधिकारोरथकारवत् अतएवमाधवेन दक्षिणार्थंतुयोविप्रः शूद्रस्यजुहुयाद्धविः ब्राह्मणस्तुभवेच्छूद्रः शूद्रस्तुब्राह्मणोभवेदितिपराशरवाक्यंयत्रविप्रःशूद्रस्यदक्षिणामादाय तदीयंहविः शांतिपुष्ट्याद्यर्थंवैदिकैर्मन्त्रैर्जुहोति तत्रब्राह्मणस्यैवदोषः शूद्रस्तुहोमफलंलभेतैवेतिव्याख्यातम् तत्सिद्धोग्रहमखमूलाद्युत्पत्तिवास्तुशांत्यादौशूद्रस्याधिकारः अतएवमोक्षधर्मेशूद्रंप्रकृत्य मंत्रवर्जंनदुष्यंतिकुर्वाणाःपौष्टिकींक्रियामित्युक्तम् कुमारीचशुभंपतिमितिचलक्षहोमे नचशूद्रस्याग्न्यभावादनधिकारः अस्यश्रौतत्वगार्ह्यत्वाभावेनलौकिकाग्न्यधिकरणत्वाच्छूद्रस्यचतत्सत्वात् अतएवमनुः वै

वाहिकेग्नौकुर्वीतगार्ह्यंकर्मयथाविधि पंचयज्ञविधानंचपंक्तिंचान्वाहिकींगृहीतिवैवाहिकपदेनदारकालदायाद्यकालहरणसंस्कृतोग्निरुच्यते स्मार्तकर्मविवाहाग्नौकुर्वीतप्रत्यहंगृही दायकालाहृतेवापिश्रौतंवैतानिकाग्निष्विति याज्ञवल्क्योक्तावपिस्मार्तपरम् मनूक्त्याउपसंहारात् तेनगार्ह्यस्यवैवाहिकाग्न्यधिकरणत्वादेतस्यस्मार्तत्वेनगार्ह्यत्वाभावात् लौकिकाग्न्यधिकरणत्वम् अतएव गार्ह्यमौपासनेकुर्यात्सर्वाधानीतुलौकिके स्मार्तंचलौकिकेकुर्याच्छ्रौतंवैतानिकाग्निष्वितिस्मृत्यर्थसारेस्मार्तगार्ह्ययोर्भेदउक्तः एतेन सर्वाधानिनः स्मार्तकर्मार्थंपुनः स्मार्ताग्न्युत्पादनार्थंवदन्वृत्तिकारः परास्तः स्मार्ताग्नौ नयग्रहमखइतिविज्ञानेश्वरोक्तिस्तु कात्यायनविषयस्तत्सूत्रेतथोक्तेः अतएवविनायकशांतौलौकिकाग्निरेवउक्तः व्रतहेमाद्रौकालिकापुराणमपि स्त्रीबालशूद्रमूर्खैस्तु होतव्यंप्रत्यहंतथा सभ्येथोवावसथ्येवानतुकुंडेकदाचनेति सभायांभवः सभ्योलौकिकइत्यर्थः अवसथइतिगृहनाम गृहसंबन्धीपाकाग्निरित्यर्थः कुंडपदेनश्रौतगार्ह्यौलक्ष्येते तयोर्निषेधोनित्यानुवादस्तस्मादयुतहोमादिकंलौकिकाग्नावेवश्रौतस्मार्ताग्न्योरिति सिद्धम् अथायुतहोमादिविधिः मात्स्ये वैशंपायनमासीनमपृच्छच्छौनकः पुरा सर्वकामाप्तयेनित्यंकथंशांतिकपौष्टिकम् शांतिकमनिष्टशामकम् पौष्टिकमैहिकफलजनकम् वैशंपायनउवाच श्रीकामः शांतिकामोवाग्रहयज्ञंसमाचरेत् वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्पुनः ग्रहशांतिंप्रवक्ष्यामिपुराणश्रुतिचोदिताम् पुण्येह्निविप्रकथितेकृत्वाब्राह्मणवाचनं ग्रहान्ग्रहाधिदेवांश्च स्थाप्यहोमं

समाचरेत् ग्रहयज्ञास्त्रयःप्रोक्ताः पुराणश्रुतिभाषितम् गर्तस्योत्तरपूर्वेणवितस्तिद्वयविस्तृताम् वप्रद्वयवृतांवेदिंवितस्त्युच्छ्रायसंयुताम् संस्थापनायदेवानांचतुरस्रामुदक्प्लवाम् स्कांदेतु तस्माच्चोत्तरपूर्वेणस्थंडिलंहस्तमात्रकम् त्रिवप्रंचतुरस्रंचवितस्त्युच्छ्रायसंमितमिति वेदैः त्रिभिरथवात्वमुक्तम् अग्निप्रणयनंकृत्वातस्यामावाहयेत्सुरान् देवतानांततःस्थाप्याविंशतिर्द्वादशाधिकाः सूर्यःसोमस्तथाभौमोबुधजीवसिताऽर्कजाः राहुःकेतुरितिप्रोक्ताग्रहालोकहितावहाः संस्मरेद्रक्तमादित्यमंगारकसमन्वितम् सोमंशुक्रौतथाश्वेतौबुधजीवौचपिंगलौ मंदोराहुस्तथाकृष्णोधूम्रान्केतुगणान्विदुः ग्रहवर्णानिदेयानिवासांसिकुसुमानिच धूपामोदोऽत्रसुरभिरुपरिष्टाद्वितानकम् शोभनंस्थापयेत्प्राज्ञःफलपुष्पसमन्वितम् गुडौदनंरवेर्दद्यात्सोमायघृतपायसम् अंगारकायसंयावंबुधायक्षीरषाष्टिकम् लोहितायहविष्यान्नमितिस्कान्देपाठः दध्योदनंतुजीवायशुक्रायचघृतौदनम् शनैश्चरायकृसरमाजमांसंचराहवे चित्रौदनंतुकेतुभ्यःसर्वभक्ष्यैरथार्चयेत् स्कांदे मिश्रितंतिलमाषैश्चनैवेद्यंतुशनैश्चरे राहोर्मांसौदनंचैवकेतोश्चित्रौदनंतथेतिपाठः प्रागुत्तरेणतस्माद्दध्यक्षतविभूषितम् चूतपल्लवसंच्छन्नंफलवस्त्रयुगान्वितम् पंचरत्नसमायुक्तंपंचभंगसमन्वितम् स्थापयेदव्रणंकुंभंवरुणंतत्रविन्यसेत् गंगाद्याःसरितःसर्वाःसमुद्राश्चसरांसिच गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् मृदमानीयविप्रेन्द्रसर्वौषधिसमन्वितां स्नानार्थंविन्यसेत्तत्रयजमानस्यधर्मवित् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः एवमावाहयित्वातानमरान्मुनिसत्त-

म होमंसमारभेत्सर्पिर्यवव्रीहितिलादिना अर्कःपलाशःखदिरस्त्वपामार्गोथापिप्पलः उदुंबरःशमीदुर्वाकुशाश्चसमिधस्त्विमाः एकैकस्याष्टशतकमष्टाविंशतिर्वापुनः होतव्यामधुसर्पिर्भ्यांदध्नाचैवसमन्विताः प्रादेशमात्राःसमिधःसरलाअपलाशिनीः समिधःकल्पयेत्प्राज्ञःसर्वकर्मसुसर्वदा देवानामपिसर्वेषामुपांशुपरमार्थवित् स्वेनस्वेनैवमंत्रेणहोतव्याःसमिधःपृथक् होतव्यंचघृताद्युक्तंचरुभक्ष्यादिकंपुनः मंत्रैर्दशाहुतीर्हुत्वाहोमंव्याहृतिभिस्ततः उदङ्मुखाःप्राङ्मुखावाकुर्युर्ब्राह्मणपुंगवाः दशेतिसंख्यादेवतादिविषया मंत्रवंतश्चकर्तव्याश्चरवःप्रतिदैवतं हुत्वौदनंचरुंसम्यक्ततोहोमंसमारभेत् आकृष्णेनेतिसूर्यायहोमःकार्योद्विजन्मना आप्यायस्वेतिसोमायमंत्रेणजुहुयात्पुनः अग्निर्मूर्धादिवोमंत्रमितिभौमायकीर्तयेत् अग्नेविवस्वदुषसइतिसोमसुतायवै बृहस्पतेपरिदीयारथेनेतिगुरोर्मतः शुक्रंते अन्यदितिचशुक्रस्यापिनिगद्यते शनैश्चरायतुपुनःशन्नोदेवीतिहोमयेत् कयानश्चित्रआभुवदितिराहोरुदाहृतः केतुंकृण्वन्नितिब्रूयात्केतूनामपिशांतये आवोराजेतिरुद्रस्यबलिहोमंसमारभेत् आपोहिष्ठेत्युमायास्तुस्योनेतिस्वामिनस्तथा विष्णोरिदंविष्णुरितित्यमित्स्वेतिस्वयंभुवः इंद्रमिद्देवतातयइंद्रायजुहुयात्पुनः तथायमस्यचायंगौरितिहोमःप्रकीर्तितः कालस्यब्रह्मजज्ञानमितिमंत्रःप्रशस्यते चित्रगुप्तस्यवाज्ञातमितिवेदविदोविदुः अग्निंदूतवृणीमहेइतिवह्नेरुदाहृतः उदुत्तमंवरुणइत्यपांमंत्रःप्रकीर्तितः भूमेःपृथिव्यंतरिक्षमितिवेदेषुपठ्यते सहस्रशीर्षापुरुषइतिविष्णोरुदाहृतः इंद्रायेंदोमरुत्वतइतिशुक्रस्यशस्यते उत्तानपर्णेसुभगेइतिदेव्याःसमारभेत् प्रजापतेःपुनर्होमःप्रजापतइतिस्मृतः नमोस्तुस

पैभ्यइतिसर्पाणांमंत्रउच्यते एषब्रह्मायऋत्विजइतिब्रह्मण्युदाहृतः विनायकस्यचातूनइतिमंत्रोबुधैःस्मृतः जातवेदसेसुनवामदुर्गामंत्रोय
मुच्यते आदित्प्रत्नस्यरेतस आकाशस्यउदाहृतः क्षाणाशिश्मूर्महीनांतुतद्वह्वायोः प्रकीर्तितः एषोउषाअपूर्व्येत्याश्विनोर्मंत्रोयमुच्यते पूर्णा
हुतिंतुमूर्धानंदिवइत्याभिपातयेत् अथाभिषेकमंत्रैःपावाद्यमंगलगीतकैः यजमानस्यकर्तव्यंचतुर्भिःस्नपनंद्विजैः सुरास्त्वामभिषिंचंतु ब्रह्म
विष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्त
था वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ब्रह्मणासहिताःसर्वेदिक्पालाःपांतुतेसदा कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः
बुद्धिर्लज्जावपुःशांतिःकांतिस्तुष्टिश्चमातरः एतास्त्वामभिषिंचंतुधर्मपत्न्यःसमागताः आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ग्रहा-
स्त्वामभिषिंचन्तुराहुःकेतुश्चतर्पिताः देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्या
श्चाप्सरसांगणाः अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच औषधानिचरत्नानिकालस्यावयवाश्चये सरितःसागराःशैलास्तीर्थानिज
लदानदाः एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः सर्वौषधैःसर्वगंधैःस्नापितोवेदपुंगवैः यजमा
नःसपत्नीकःसर्त्विजस्तुसमाहितः दक्षिणाभिःप्रयत्नेनपूजयेद्गतविस्मयः सूर्यायकपिलांधेनुंशंखंदद्यात्तथेंदवे रक्तंधुरंधरंदद्याद्भौमायकुदा-
न्वितं बुधायजातरूपंतुगुरवेपीतवाससी श्वेताश्वंगुरवेदद्यात्कृष्णांगामर्कसूनवे आयसंराहवेदद्यात्केतुभ्यश्छागमुत्तमं सुवर्णेनसमाःका

र्यायजमानेनदक्षिणाः सर्वेषामथवागावोदातव्याहेमभूषिताः सुवर्णमथवादद्याद्गुरुर्वायेनतुष्यति स्वमंत्रेणप्रदातव्याः सर्वाःसर्वत्रदक्षिणाः कपिलेसर्वभूतानांपूजनीयासिरोहिणी तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलं विष्णुनाविधृतोनित्यमतःशांतिंप्रयच्छमे धर्मस्त्वंवृषरूपेणजगदानंदकारकः अष्टमूर्तेरधिष्ठानमतःपाहिसनातन हिरण्यगर्भगर्भस्त्वंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभम् प्रदानात्तस्यमेविष्णुरतःशांतिंप्रयच्छमे विष्णुस्त्वमश्वरूपेणयस्मादमृतसंभवः चंद्रार्कवाहनोनित्यमतःशांतिंप्रयच्छमे यस्मात्त्वंपृथिवीसर्वाधेनुःकेशवसन्निभा सर्वपापहरानित्यमतःशांतिंप्रयच्छमे यस्मादायसकार्याणितवाधीनानिसर्वदा लांगलाद्यायुधादीनितस्माच्छांतिंप्रयच्छमे यस्मात्त्वंसर्वयज्ञानामंगत्वेनव्यवस्थिता यानंविभावसोर्नित्यमतःशांतिंप्रयच्छमे गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच यस्मादशून्यंशयनंकेशवस्यशिवस्यच शय्याममाप्यशून्यास्तुदत्ताजन्मनिजन्मनि यथारत्नेषुसर्वेषुसर्वेदेवाःप्रतिष्ठिताः तथाशांतिंप्रयच्छंतुरत्नदानेनमेसुराः यथाभूमिप्रदानस्यकलांनार्हंतिषोडशीम् दानान्यन्यानिमेशांतिर्भूमिदानाद्भवत्विह एवंसंपूजयेद्भक्त्याऽवित्तशाठ्येनवर्जितः वस्त्रकांचनरत्नाद्यैर्धूपमाल्यानुलेपनैः अनेनविधिनायस्तुग्रहपूजांसमाचरेत् सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते यस्तुपीडाकरोनित्यमल्पवित्तस्यचग्रहः सतंयत्नेनसंपूज्यशेषानप्यर्चयेन्नरः स्कांदेतु तमेवपूजयेद्भक्त्यादक्षिणाभिःस्वशक्तितइत्युत्तरार्द्धंपठंति सैवायुतहोमोयंनवग्रहमखस्मृतः विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुकर्मसु निर्विघ्नार्थंमुनिश्रेष्ठतथोद्वेगाद्भुतेषुच वश्य

कर्माभिचारादितथैवोच्चाटनादिकम् नवग्रहमखंकृत्वाततःकाम्यंसमारभेत् अन्यथाफलदंपुंसांनकाम्यंजायतेक्वचित् तस्मादयुतहोमस्यवि
धानंतुसमाचरेत् स्कांदे देवदानवगंधर्वायक्षराक्षसकिन्नराः पीड्यंतेग्रहपीडाभिःकिंपुनर्भुविमानवाः शनैश्चरेणसौदासोनरमांसेनियोजितः राहुणापीडितो
राजानलोभ्रांतोमहीतले अंगारकविरोधेनरामोराष्ट्राद्विवासितः अष्टमेनशशांकेनहिरण्यकशिपुर्हतः रविणासप्तमस्थेनरावणोविनिपातितः गुरुणा
जन्मसंस्थेनहतोराजासुयोधनः पांडवाबुधपीडायांविकर्मणिवियोजिताः षष्ठेनोशनसायुद्धेहिरण्याक्षोनिपातितः एतेचान्येचबहवोग्रहदोषैस्तु
पीडिताः वृष्ट्यायुःपुष्टिकामोवाग्रहयज्ञंसमाचरेत् नवग्रहमखंकुर्यादृत्विजश्चतुरःशुभान् अथवाचैकमभ्यर्च्यविधिनाब्रह्मणासह जन्मभूर्गोत्रम
ग्निश्चवर्णास्थानमुखानिच योऽज्ञात्वाकुरुतेशांतिंग्रहास्तेनावमानिताः उत्पन्नोर्कःकलिंगेषुयमुनायांचचंद्रमाः अंगारकस्त्ववंत्यांचमगधायांहिमांशु
जः सैंधवेषुगुरुर्जातःशुक्रोभोजकटेतथा शनैश्चरस्तुसौराष्ट्रेराहुर्वैराठिनापुरे अंतर्वेद्यांतथाकेतुरित्येताग्रहभूमयः यस्ययस्यचयद्गोत्रंतत्तद्वक्ष्या
म्यतःपरं आदित्यःकाश्यपोगोत्रआत्रेयश्चंद्रमाभवेत् भारद्वाजोभवेद्भौमस्तथात्रेयश्चसोमजः शक्रपूज्योंगिरोगोत्रःशुक्रोवैभार्गवस्तथा शनिःका-
श्यपएवाथराहुःपैठीनसिस्तथा केतवोजैमिनीयाश्चग्रहाग्निस्तदनंतरं आदित्येकपिलोनामपिंगलःसोमउच्यते धूमकेतुस्तथाभौमेजाठराग्निर्बुधेस्मृतः
गुरोश्चैवशिखीनामशुक्रेभवतिपावकः शनैश्चरेमहातेजाराहुकेत्वोर्हुताशनः भास्करांगारकौरक्तौशुक्लौशुक्रनिशाचरौ सोमपुत्रोगुरुश्चैवतावु
भौपीतकौस्मृतौ कृष्णंशनैश्चरंविद्याद्राहुंचित्राश्चकेतवः मध्येतुभास्करंविद्याच्छशिनंपूर्वदक्षिणे दक्षिणेलोहितंविद्याद्बुधःपूर्वोत्तरेणतु

उत्तरेतुगुरुंविंद्यात्पूर्वेणैवतुभार्गवम् पश्चिमेतुशनिंविंद्याद्राहुंदक्षिणपश्चिमे पश्चिमोत्तरतःकेतुःस्थाप्योवैशुक्लतंदुलैः अथवावर्णकैःकार्याः स्वस्ववर्णादिधातुभिः शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ प्रत्यङ्मुखःशनिःसोमःशेषादक्षिणतोमुखाः प्रत्यङ्मुखावूर्ध्वदृष्टीउदङ्मुखौवामदृष्टी प्रत्यङ्मुखावधोदृष्टी दक्षिणतोमुखाःदक्षिणदृष्टयः आदित्याभिमुखाइत्युक्तेरितिहेमाद्रिः वर्णरूपगुणैर्युक्तान्व्याहृत्यावाहयेत्तुतान् वक्ष्येस्थानानिदेवानामीश्वरादियथाक्रमम् सूर्यस्यैवोत्तरंशंभुमुमांसोमस्यदक्षिणे स्कंदमंगारकस्यैवदक्षिणस्यांनिवेशयेत् सौम्यात्पश्चिमतोविष्णुंब्रह्माजीवस्यपूर्वतः इंद्रमैंद्र्यांसिताद्विंद्यान्मंदादाग्नेयतोयमम् राहोःपूर्वोत्तरेकालंसर्वभूतभयावहम् केतोर्नैर्ऋत्यदिग्भागेचित्रगुप्तंनिधापयेत् उत्तरेशनिसूर्याभ्यांगुरुकेत्वोश्चदक्षिणे गणाधिपःप्रतिष्ठाप्यःसर्वदेवनमस्कृतः भानुंतुमंडलाकारंसोमंतुचतुरस्रकं अंगारकंत्रिकोणंचबुधंबाणाकृतिंतथा गुरुंदीर्घचतुरस्रंपंचास्रंभार्गवंतथा धनुस्तुल्यंशनिंविंद्याद्राहुंशूर्पाकृतिंतथा ध्वजाकाराःकेतवश्च गणेशंतद्रूपिणं स्थापयेच्छुक्लतंदुलैरित्येतस्मिन्पक्षेमंडलाकारेणस्थापनमितिहेमाद्रिः दिवाकरकुजाभ्यांहिदापयेद्रक्तचंदनम् चंद्रेचभार्गवेचैवसितवर्णंप्रदापयेत् कुंकुमेनतुसंयुक्तंचंदनंजीवसौम्ययोः अगुरुंचंदनंदद्याद्राहुकेत्वर्कजेषुच ग्रहवर्णानिपुष्पाणिगायत्र्याधूपम्प्रददेत् रवेःकुंदुरकंधूपंशशिनस्तुघृताक्षताः भौमेसर्जरसंचैवअगुरुंचबुधेस्मृतं सिल्हकंगुरवेदद्याच्छुक्रेबिल्वागिरंतथा गुग्गुलंमंदचारेतुलाक्षाराहोश्चकेतवे उद्दीप्यस्वेतिमंत्रेणदीपंदद्यादतंद्रितः अन्नहीनोदहेद्राष्ट्रंमंत्रहीनस्तुऋत्विजः यजमानमदाक्षिण्योनास्तियज्ञसमोरिपुः अहिं-

सकस्यदांतस्यधर्मार्जितधनस्यच नित्यंचनियमस्थस्यसदासानुग्रहाग्रहाः ग्रहागावोनरेंद्राश्चब्राह्मणाश्चविशेषतः पूजिताःपूजयंत्येतेनिर्दहंत्यपमानिताः ग्रहाणामिदमातिथ्यंकुर्यात्संवत्सरादपि आरोग्यबलसंपन्नोजीवेच्चशरदांशतं ग्रहप्रतिमालक्षणं मात्स्ये पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः सप्ताश्वरथसंयुक्तोद्विभुजःस्यात्सदारविः श्वेतःश्वेतांबरधरोदशाश्वःश्वेतवाहनः गदापाणिर्द्विबाहुश्चकर्तव्योवरदःशशी रक्तमाल्यांबरधरःशक्तिशूलगदाधरः चतुर्भुजोमेषगामीवरदःस्याद्धरासुतः पीतमाल्यांबरधरःकर्णिकारसमद्युतिः खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः देवदैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ दंडिनौवरदौकार्यौसाक्षसूत्रकमंडलू इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः बाणबाणासनधरःकर्तव्योर्कसुतःसदा करालवदनःखड्गचर्मशूलीवरप्रदः नीलसिंहासनस्थश्चराहुरत्रप्रशस्यते धूम्राद्विबाहवःसर्वेगदिनोविकृताननाः गृध्रासनगतानित्यंकेतवस्युर्वरप्रदाः सर्वेकिरीटिनःकार्याग्रहलोकहितावहाः अंगुलेनोच्छ्रिताःसर्वेशतमष्टोत्तरंसदा याज्ञवल्क्यः ताम्रकात्स्वर्णकाद्रक्तचंदनात्स्वर्णजाबुभौ रजतादायसःसाक्षात्कांस्यात्कार्यानवग्रहाः ब्रह्मयामलेतु ताम्रात्तुकारयेद्भानुंरजतेननिशाकरम् कुजजीवज्ञरूपाणिसुवर्णेनतुकारयेदितिविशेषः अथलक्षहोमविधिर्मात्स्ये कथितोयुतहोमोयंलक्षहोमममतःशृणु सर्वकामाप्तयेयस्माल्लक्षहोमंविदुर्बुधाः पितॄणांवल्लभःसाक्षाद्भुक्तिमुक्तिफलप्रदः ग्रहताराबलंलब्ध्वाकृत्वाब्राह्मणवाचनम् गृहस्योत्तरपूर्वेणमंडपंकारयेद्बुधः रुद्रायतनभूमौवाचतुरस्रमुदक्प्लवम् दशहस्तानथाष्टौवाहस्तान्कुर्याद्विधानतः प्रागुत्तरप्लवांभूमिंकारयेद्यत्नतोनरः प्रागुत्तरंसमासाद्यप्रदेशंमंडपस्यतु शोभनंकार-

येत्कुंडंयथावल्लक्षणान्वितं नवग्रहमखेकुंडंहस्तमात्रंप्रशस्यते चतुरस्रंसमंतात्तुयोनिवक्त्रंसमेखलं चतुरंगुलविस्तारामेखलातद्वदुच्छ्रिता प्रागुदक्प्रवणाकार्यासर्वतःसमविस्तृता शांत्यर्थंसर्वलोकानांनवग्रहमखेस्मृता मानहीनाधिकंकुंडमनेकभयदंभवेत् यस्मात्तस्मात्तुसंपूर्णशांतिकुंडंविधीयते अस्माद्दशगुणइत्यग्रेदर्शनादेतावत्पर्यंतं अयुतहोमांगविधानम् इदंचकुंडपरिमाणंनलक्षहोमे तत्रपरिमाणांतरविधानात् किंत्वयुतहोमे अस्माद्दशगुणःप्रोक्तोलक्षहोमःस्वयंभुवा आहुतीभिस्तथान्नेनदक्षिणाभिस्तथैवच आहुतीभिरितिनसमिदाद्याहुतिग्रहणं वसिष्ठसंहितायामयुतहोमादित्रयपुरस्कारेण तत्राष्टशतादिसंख्याविधानात् अन्नेनेतिब्राह्मणभोजनेनेत्यर्थः द्विहस्तविस्तृतंतद्वच्चतुर्हस्तायतंपुनः लक्षहोमेभवेत्कुंडंयोनिवक्त्रंत्रिमेखलम् तद्वच्छब्दोविकल्पार्थः वक्त्रंकंठः योनिश्चवक्त्रंचत्रिमेखलाश्चविद्यंतेयस्येत्यर्थः तस्यचोत्तरपूर्वेणवितस्त्युच्छ्रायसंमितम् प्रागुदक्प्रवणंतत्रचतुरस्रंसमंततः विष्कंभार्द्धोच्छ्रितंप्रोक्तंस्थंडिलंविश्वकर्मणा विष्कंभार्द्धमष्टादशांगुलानिवप्रांगुलसहितानि संस्थापनायदेवानांवप्रत्रयसमावृतम् द्विरंगुलोच्छ्रितोवप्रःप्रथमःसमुदाहृतः त्र्यंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि त्र्यंगुलस्यचविस्तारःसर्वेषांकथ्यतेबुधैः दशांगुलोच्छ्रिताभित्तिःस्थंडिलस्यतथोपरि तस्मिन्नावाहयेद्देवान्पूर्ववत्पुण्यतंडुलैः आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः स्थापनीयामुनिश्रेष्ठनोत्तरेणपराङ्मुखाः गरुत्मानधिकस्तत्रसंपूज्योभूतिमिच्छता सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः विषपापहरोनित्यमतःशांतिंप्रयच्छमे पूर्ववत्कुंभमामंत्र्यतद्वद्धोमंसमारभेत्

सहस्राणांशतंहुत्वासमित्संख्याधिकंपुनः घृतकुंभवसोर्धारांपातयेदनलोपरि औदुंबरीमथार्द्रांचसर्वशाखाविवर्जिताम् बहुमात्रां स्रुचंकृत्वाततस्तंभद्वयोपरि घृतधारांतयासम्यगग्नेरुपरिपातयेत् श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैंदवम् महावैश्वानरंसामज्येष्ठंसामच पाठयेत् स्नानंचयजमानस्यपूर्ववन्मंत्रवाचनम् स्नानमभिषेकः पूर्ववत्सुरास्त्वेत्यादिमंत्रैः दातव्यायजमानेनपूर्ववद्दक्षिणाःपृथक् कामक्रोधविहीनेनऋत्विग्भ्यःशांतचेतसा नवग्रहमखेविप्राश्चत्वारोवेदवेदिनः अथवाऋत्विजौशांतौद्वावेवश्रुतिकोविदौ कार्यावयुतहोमेतुनप्रसज्जेतविस्तरे तद्वद्वेदथवाचाष्टौलक्षहोमेतुऋत्विजः कर्तव्याःशक्तितस्तद्वच्चत्वारोवाविमत्सराः नवग्रहमखेसर्वंलक्षहोमेदशोत्तरम् दत्वादद्यान्मुनिश्रेष्ठभूषणान्यपिशक्तितः शयनानिसवस्त्राणिहैमानिकटकानिच कर्णांगुलिपवित्राणिकंठसूत्राणिशक्तिमान् तमेवपूजयेद्भक्त्याद्वौवात्रीन्वायथाविधि एकमप्यर्चयेद्भक्त्याब्राह्मणंवेदपारगम् दक्षिणाभिःप्रयत्नेननबहूनल्पवित्तवान् अनेनैकाचार्यकर्तृकः प्रयोगउक्तः लक्षहोमस्तुकर्तव्योयथावित्तंभवेद्गृह पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनम् भार्यार्थीलभतेभार्यांकुमारीचशुभंपतिं भ्रष्टराज्यस्तथाराज्यंश्रीकामःश्रियमाप्नुयात् यंयंप्रार्थयतेकामंतंतंप्राप्नोतिपुष्कलम् निष्कामःकुरुतेयस्तुसपरंब्रह्मगच्छति अथकोटिहोमविधिर्मात्स्ये तस्माच्छतगुणःप्रोक्तःकोटिहोमःस्वयंभुवा आहुतीभिःप्रयत्नेनदक्षिणाभिःफलेनच पूर्ववद्ग्रहदेवानामावाहनविसर्जने होममंत्रास्तथाचोक्ताःस्नानेदानेतथैवच कुंडमंडपवेदीनांविशेषोयंनिबोधमे चतुर्हस्तंभवेत्कुंडंचतुरस्रंसमंततः योनिवक्त्रद्वयोपेतं

तदाप्याहुस्त्रिमेखलम् द्विरंगुलोच्छ्रिताकार्याप्रथमामेखलाबुधैः त्रिरंगुलोच्छ्रितातद्वद्द्वितीयापरिकीर्तिता उच्छ्रायविस्तराभ्यांचतृतीया चतुरंगुला चतुरंगुलविस्तारःपूर्वयोरपिशस्यते वितस्तिमात्रायोनिःस्यात्षट्सप्तांगुलविस्तृता वितस्तिशब्दःकुंडार्थपरः कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिता गजोष्ठसदृशीतद्वदायताच्छिद्रसंयुता एतत्सर्वेषुकुंडेषुयोनिलक्षणमिष्यते मेखलोपरिसर्वत्रअश्वत्थदलसंनिभा वेदीचकोटिहोमेस्याद्वितस्तीनांचतुष्टयम् चतुरस्रासमातद्वत्त्रिभिर्वप्रैःसमावृता वप्रप्रमाणंपूर्वोक्तंवेदिकायास्तथोच्छ्रयः तथाषोडशहस्तःस्यान्मंडपश्चचतुर्मुखः पूर्वद्वारेषुसंस्थाप्यबह्वृचंवेदपारगं यजुर्वेदंतथासाम्येपश्चिमेसामवेदिनं अथर्ववेदिनंतद्वदुत्तरेस्थापयेद्बुधः अष्टौतुहोमकाःकार्यावेदवेदांगवेदिनः एवंद्वादशतान्विप्रान्वस्त्रमाल्यानुलेपनैः पूर्ववत्पूजयेद्भक्त्यासर्वाभरणभूषणैः रात्रिसूक्तंचरौद्रंचपावमानंसुमंगलम् पूर्वतोबह्वृचःशांतिपठन्नास्तउदङ्मुखः शाक्रंरौद्रंसौम्यंचकूष्मांडंजातवेदसम् पाठयेद्दक्षिणद्वारेयजुर्वेदिनस्तूत्तमं सुपर्णमथवैराजमाग्नेयंरुद्रसंहिताम् ज्येष्ठसामतथाशांतिंछंदोगःपश्चिमेपठेत् शांतिसूक्तंचसौरंचतथाशाकुनकंशुभंपौष्टिकंचमहाराजन्नुत्तरेणाप्यथर्ववित् पंचभिःसप्तभिर्वापिहोमःकार्योत्रपूर्ववत् द्वादशसंख्यैरित्यर्थः वाशब्दश्चपूर्वोक्तापेक्षया स्नानेदानेचमंत्रास्तुतएवमुनिसत्तमाः वसोर्धाराविधानंचलक्षहोमवदिष्यते अनेनविधिनायस्तुकोटिहोमंसमाचरेत् सर्वान्कामानवाप्नोतिततोविष्णुपदंव्रजेत् यःपठेच्छृणुयाद्वापिग्रहयज्ञत्रयंनरः सर्वपापविशुद्धात्मापदमिंद्रस्यगच्छति अग्निकार्यिनांतुपूर्वस्येतिन्यायेनग्रहयज्ञत्रयसा

मान्येनउत्तरोत्तरस्यपूर्वपूर्वविकारत्वं तस्यैवचलक्षहोमवदित्यनुवादः अथपदार्थाः मार्कंडेयः शिरःस्नातस्तुकुर्वीत दैवंपित्र्यमथापिवा प्राङ्मु-
खोदङ्मुखोवापिश्मश्रुकर्मचकारयेत् सएव देवार्चनादिकार्याणितथागुर्वभिवादनं कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजः भृगुमनुः प्राणाना
यम्यकुर्वीतसर्वकर्माणिसंयुतः मार्कण्डेयः संकल्प्यविधिवत्कुर्यात्स्नानदानव्रतादिकम् तत्रादौगणेशपूजा आदौविनायकःपूज्य अंतेचकुलदे
वतेतिगृह्यपरिशिष्टात् नक्रतेत्वाक्रियतेकिंचनेतिमंत्रलिंगाच्चततोनांदीश्राद्धंपुण्याहवाचनमितिगर्भाधनादिसंस्कारेष्विष्टापूर्तक्रतुष्वपि वृ
द्धिश्राद्धंपुराकार्यंकर्मादौस्वस्तिवाचनमितित्रिकांडीस्मरणात् शौनकः पुण्याहवाचनविधिंवक्ष्यामोथयथाविधि प्रयोक्तुःकर्मणामादावन्तेचोद
यसिद्धये गणेशपूजानन्तरत्वंचाचारात् छंदोगपरिशिष्टे कर्मादिषुतुसर्वेषुमातरःसगणाधिपाः पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः प्रतिमा
सुचशुभ्रासुलिखितावापटादिषु अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः कुड्यलग्नांवसोर्धारांसप्तधारांघृतेनतु कारयेत्पंचधारांवानातिनीचां
नचोच्छ्रितां आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेत् अत्रसर्वेष्वितिसर्वत्रानुषज्यते तेनगणे
शमातृपूजावसोर्धारानांदीश्राद्धानांसर्वकर्मांगत्वं मातृशब्देनगौर्यादिदेवमातरोब्राह्म्यादिमनुष्यमातरश्चगृह्यंते शातातपोपि नानिष्ट्वातुपितॄ
न्श्राद्धेकर्मकिंचित्समाचरेत् कन्यापुत्रविवाहेषुप्रवेशेनववेश्मनः नामकर्मणिबालानांचूडाकर्मादिकेतथा सीमंतोन्नयनेचैवपुत्रादिमुखदर्श
ने नांदीमुखान्पितॄनादौतर्पयेत्प्रयतोगृहीत्यस्यकन्यापुत्रेत्यादिवचनैरुपसंहारोक्तं नचनानिष्ट्वापितृयज्ञेनवैदिकंकिंचिदाचरेन्नवग्रहयज्ञादौनां

दीश्राद्धमितिवाच्यं उभयोरेकस्मृतिगतत्वेनोपसंहारयोगात् नाष्टकासुभवेच्छ्राद्धंनश्राद्धेश्राद्धमिष्यते नसोष्यंतीजातकर्मप्रोषितागतकर्मस्विति छंदोगपरिशिष्टस्यवैयर्थ्यापत्तेश्च ततोऋत्विग्वरणंतेचायुतहोमेचत्वारोष्टौवा नवग्रहमखेविप्राश्चत्वारोवेदवादिनः अथवाऋत्विजौशांतौद्वावेकश्रुतिकोविदौ कार्यावयुतहोमेतुनप्रसज्जेतविस्तरइतिमात्स्यात् चतुःपक्षेब्रह्माचार्यौहोताचर्त्विजावितिहेमाद्रिः द्विपक्षेब्रह्माचार्यौअथवाचैकमभ्यर्च्यविधिनाब्रह्मणासहेतिस्कांदात् लक्षहोमेतुमात्स्ये तद्वद्द्वादशवाष्टौवालक्षहोमेपिऋत्विजः कर्तव्याःशक्तितस्तद्वच्चत्वारोवाविमत्सराः आचार्यब्रह्मसहितानामेवेयंसंख्या कोटिहोमेतुमात्स्ये एवंद्वादशवाविप्रान्वस्त्रमाल्यानुलेपनैः वसिष्ठसंहितायांत्वयुतलक्षकोटिहोमानुपक्रम्य षोडशब्राह्मणांश्छुद्धान्दंभानृतविवर्जितान् तेषांमध्येश्रेष्ठतममाचार्यंतंप्रकल्पयेदित्युक्त्वा आचार्येभ्योनवभ्यश्चग्रहार्चनफलंतनइत्युक्तेर्नवाचार्या एकोब्रह्माषट्ऋत्विजइतिपक्षउक्तः अस्मिंश्चपक्षेएकेनाचार्यकर्मकार्यमपरैस्तमन्वारभेरन्नुपक्रमोपसंहारयोर्विरोधादित्युक्तम् प्रयोगपारिजाते अयंचपक्षोयुतहोमादिरहितनवग्रहमखेपिभवतीत्युक्तं तत्रैव अत्रचधेन्वादिनवग्रहदक्षिणानवभ्योदेयाः हेमाद्रिस्तु कोटिहोमेयदिफलकालानुरोधेनसमाप्तिः शीघ्रमिष्टातदाविंशतिचतुर्विंशतिद्वात्रिंशच्चतुःषष्टिशतंवाऋत्विजोवृणुयादित्यूचेभविष्योत्तरेपि नियोजयेद्द्विजांस्तत्रशतसंख्यान्नृपोत्तम अलाभेतुबहूनांचयथालाभंनियोजयेत् नसंख्यानियमश्चात्रब्राह्मणानांनरोत्तम नकालनियमश्चैवस्वेच्छयायज्ञउच्यते जापकद्वारपालाश्चसर्वपक्षेषुभिन्ना इतिहेमाद्रिः ततोमधुपर्कः संपूज्यमधुपर्केणऋत्विजःकर्मकारयेत् अपू-

ज्यकारयेत्कर्मकिल्बिषेणैवयुज्यतेइतिविश्वामित्रोक्तेः पूर्वोक्तमात्स्योक्तेश्च लैंगं वस्त्रयुग्मंतथाप्यूरंकेयूरं कर्णभूषणं अंगुलीभूषणंचैवमणिबंध
स्यभूषणं कंठाभरणयुक्तानिप्रारंभेधर्मकर्मणः पुरोहितायदत्वाथऋत्विग्भ्यश्चापिदापयेत् अप्यूरोजलपात्रंमंत्रवद्वरणंमधुपर्कइतिकेचित् मधुप
र्कस्यवरणांगत्वाद्यत्रवरणंतत्रमधुपर्कइतिवृत्तिकृत् वस्तुतोऋत्विजोवृत्वामधुपर्कमाहरेत् इत्यत्रक्रममात्रविधिनामधुपर्कस्यनवरणांगत्वं किं
तूभयोः ऋत्विगंगत्वं तेनस्मार्तेमंत्रवद्वरणाभावेपिऋत्विजोवृत्वामधुपर्कोभवति तेनात्रवरणोत्तरमाशौचादिपातेऋत्विक्परावृत्तिरित्युक्तं मधु
पर्कोत्तरंकर्तव्यं मात्स्ये यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः पश्चिमद्वारमाश्रित्यप्रविशेद्यागमंडपम् संग्रहे समंततश्चसिद्धार्थान्विकिरेद्र
क्षोघ्नमंत्रतः प्रतिष्ठासारे सर्वतः पंचगव्येनप्रोक्षयेद्यागमंडपं आपोहिष्ठाभ्यृचेनैवततः स्वस्त्ययनंजपेत् शारदातिलके अंगसंकोचयन्नं
तः प्रविशेद्दक्षिणांघ्रिणा नैर्ऋत्यांदिशिवास्त्वीशंब्रह्माद्यांश्चसमर्चयेत् हेमाद्रौतु तोरणपूजोत्तरंवास्तुपूजोक्ता मंडपंसंप्रविश्याथतोरणा-
दिप्रपूज्यच वास्तुयागंततः कुर्यात्प्रासादेमंडपेथवा वास्तुपूजनंसहोमकंवा शारदायां पायसान्नैर्बलीन्हरेदितिबलिमात्रोक्तेः ततस्तुला
पुरुषवन्मंडपपूजा ततोग्निस्थापनं तत्रायुतहोमः एकहस्तंकुंडं लक्षहोमेद्विहस्तं चतुर्हस्तंवा कोटिहोमेषोडशहस्तं मात्स्ये तथो
क्तेः कुंडंचमंडपेशानभागेतदीशानभागेवेदिरिति हेमाद्रिः तथाचवेदीमंडपाद्बहिर्भागेवापीष्टा वसिष्ठसंहितायाम् अयुतादिहोमंप्रकृ
त्यकुंडंतन्मध्यभागेतु कारयेच्चतुरस्रकंम् कुंडस्येशानभागेतु पूजावेदिंप्रकल्पयेदित्युक्तम् भविष्येतुकोटिहोमंप्रकृत्य कुंडस्यपूर्वभागेतुवे

दिंकुर्याद्विचक्षणइत्युक्तं गोभिलेनतु कुंडस्यप्रागुदीच्यांवाप्राच्यामुत्तरतोपिवा चतुरस्रंचतुर्द्वारंकर्तव्यंग्रहपीठकं श्रीकामःपूर्वतःकुर्यात् पुष्ट्यर्थंदक्षिणेनतु पश्चाद्विजन्मासिद्ध्यर्थंशांत्यर्थंचोत्तरेणतु ईशान्यांसर्वकामायचाग्नेय्यांचाभिचारके नैर्ऋत्यांपुत्रलाभायपुष्ट्यर्थंवायवेनत्वित्युक्तं स्थंडिलपक्षेपि वेदिरावश्यकीशिष्टाचारादितिपारिजातः गोद्भवंगौरीतिलकंतिलकंलिंगमाल्यपि लतावितानिकाप्यष्टलिंगोद्भवमिमानिषट् मंडलान्यागमोक्तानिभवंतिधृतयेभृशं कपालोद्दरवस्त्राख्यंमूलमाल्याभिधंतथा शैववैष्णवचक्रंचेत्युदितंमंडलत्रयं हरेर्हरस्यचप्रीत्यैभवेदित्यागमोदितं ग्रहादेर्मंडलंभानोःसर्वतोभद्रमर्चने लक्ष्म्याश्चसर्वतोभद्रंपूजनेमंडलंतथा सिंहोदरप्रकृतिकंपद्मोदरसमाह्वयम् वाग्देव्याःसर्वतोभद्रंमंडलंचधराह्वयं भगवत्यादिकानांचशक्तीनांमंडलंभवेत् पूजनेसर्वतोभद्रमेकलिंगोद्भवंतथा भैरवक्षेत्रपालादिपूजनेमंडलानितु सर्वतोभद्रमुख्यानिशैवोक्तान्यखिलान्यपि यतःस्यात्सर्वतोभद्रंसर्वदेवप्रियप्रदम् सर्वेषांमंडलानांतुप्रकृतित्वेननिश्चितं अतोभिधीयतेतस्यसमुद्धारेयथागमं अन्येषांमंडलानांतुसर्वेषामितिविस्तरात् शैवादिष्वागमग्रन्थेषुद्धारस्यप्रकल्पनम् तत्वसागरसंज्ञायांसंहितायांप्रपंचितम् यथाविधिबृहत्पंचरात्रादिष्वागमेष्वपि निम्नतोत्तुंगताहीनेसुश्लक्ष्णेवेदिकातले ईशानादिपूर्वेनार्द्रैर्विलिप्तेगोमयेनच धत्तूरपल्लवैर्धृष्टैर्वह्लापामार्गपल्लवैः देवाराधनमंत्रेणमंत्रितात्पंचगव्यतः अभ्युक्षितेस्त्रमंत्रेणकृत्वादिक्साधनं ततः खड्डिकामानसूत्रंचगन्धाद्यैरभिपूजयेत् उत्तराख्यंचतुर्भिःस्यान्मंडलंचतुरस्रकम् हस्तैर्हस्तद्वयंचस्यान्मध्यमंहस्तमात्रकम् क

निष्ठमानहस्तंतु पूर्तयोगे प्रशस्यते बिंदुनालांच्छनंतत्रकुर्यान्मंत्रप्रदेशतः तस्योपरिसमंसूत्रंकृत्वापश्चिमपूर्वयोः उदक्दक्षिणयोस्तद्वत्ककुभोस्तदनंतरं बिंदुपूर्वाशयोर्मध्येबिंदुमध्यंविनिक्षिपेत् तस्योपरिक्षिपेत्सूत्रंदक्षिणोत्तरदिग्गतम् मध्यबिंदोःप्रतीच्याश्चमध्यबिंदुंविनिक्षिपेत् उदग्दक्षिणगंसूत्रंवीथीमध्येपृथक्पृथक् एवंसूत्रद्वयंचाल्यात्पूर्वपश्चिमदिग्गतं एवंषोडशसंख्येषुकोष्ठकेषुकृतेषुच पूर्वपश्चिमगंसूत्रंवीथीमध्येपृथक्पृथक् दक्षिणोत्तरगंप्राग्वत्क्षिपेत्सूत्रचतुष्टयम् कोष्ठकानांभवेदेवंचतुःषष्टिश्चमंडले अष्टानामथवीथीनांपूर्वपश्चिमदिग्गतम् सूत्रंविनिक्षिपेद्द्वयोमध्यदेशेपृथक्पृथक् कोष्ठकाना समग्राणामेवंविरचितेसति षट्पंचाशच्छतेद्वेचसंख्याप्रोक्तात्रमंडले वीथ्यांयत्प्रांतवर्तिन्यांकोष्ठकानांचतुष्टयं मध्यंतद्वद्द्वितीयस्यांमध्यस्थंकोष्ठकद्वयं एषामंतररेखासुरंजितोन्मार्जितासुच स्थानंयदेकतांप्राप्तंतद्भवेद्द्वारसंज्ञकं एकमेवयदाद्वारपार्श्वयोः कोष्ठकंभवेत् प्रांतवीथ्यांद्वितीयस्यांवीथ्यांपूर्वव्यवस्थितम् त्रयंत्रयंतुकोष्ठानांमेषांरेखासुमध्यतः उन्मार्जितासुयत्स्थानंद्वारशोभाह्वयंतुतत् द्वारशोभासमीपस्थंप्रांतवीथ्यांव्यवस्थितं कोष्ठत्रितयकंवीथ्यांद्वितीयस्यांतु कोष्ठकम् एवंसंतश्चतुर्थेषुरेखासून्मार्जितासुच स्थानंव्यवस्थितंयस्मादुपशोभाह्वयंतुतत् एवमन्यासुदिक्षुस्याद्द्वारादीनांप्रकल्पना कोणेषुकोष्ठकंस्यात्पार्श्वस्थमुपशोभना तत्रमध्येनिविष्टासुरेखासून्मार्जनेकृते स्थानंयन्मंडलेतत्तुभवेत्कोणसमाह्वयम् एवंद्वाराणिचत्वारि द्वारशोभाष्टकंतथा उपशोभाष्टकंतद्वत्तथाकोणचतुष्टयं तृतीयस्याश्चतुर्थ्याश्चवीथ्यारेखाकदंबके उन्मार्जितेमध्यगतंभवेद्वीथ्यासमंततः

पंचम्या आपिवीथ्याश्चमध्येकोष्ठचतुष्टयं तत्रमध्यस्थरेखानांसर्वतोत्सुंसनेकृते तत्स्थानमेकतांप्राप्तंपीठपद्माह्वयंतुतत् पार्श्वयोःपीठपद्मायाःकोणस्थंकोष्ठकद्वयं प्राग्वत्तत्रैकतांनीतेपीठस्यचरणंतुतत् वीथ्याःषष्ठ्यास्तुसप्तम्या अष्टम्यामध्यवर्तिनीं रेखांत्यक्त्वोपरेखानांप्राग्वदुत्पुंसनेकृते बृहत्कोष्ठचतुष्कंस्यान्मंडलाभ्यंतरस्थितं ईशानकोणादारभ्ययावत्कोणस्तुनैर्ऋतः सूत्रंकोष्ठयुगस्यैकंमध्यबिंदोरथोपरि आग्नेयकोणाद्वायव्यकोणावधितथैवच अन्यत्रकोष्ठयुग्मेपिसूत्रमन्यद्विनिक्षिपेत् मध्यतःपीठपद्मायत्सूत्रंबिंद्ववधिस्थितं दिक्चतुष्केपिचतुरस्तस्यभागान्प्रकल्पयेत् तेषुभागश्चतुर्थोयोमध्यबिंदुसमीपगः तस्यार्द्धेवर्तुलाकारंक्षिपेत्सूत्रंसमंततः तन्मध्येकर्णिकाकार्याबहिस्तद्द्वितीयके भागेतुवर्तुलाकारंसूत्रंप्राग्वद्विनिक्षिपेत् तन्मध्येकेसराणिस्युः केसरेभ्योबहिःस्थिते भागेतृतीयकेप्राग्वद्वृत्तसूत्रंविनिक्षिपेत् तन्मध्येष्टौदलानिस्युस्तेभ्योबाह्येचतुर्थके भागेन्यद्वर्तुलाकारंक्षिपेत्सूत्रंसमंततः अष्टसंख्यानिसूत्रस्यदलाग्राणितुसर्वतः इत्येकंमंडलंप्रोक्तंसर्वतोभद्रसंज्ञकं एतस्माद्दिक्षुसर्वासुबहिर्वीथीप्रमाणतः सूत्रत्रयंसत्वरजस्तमःसंज्ञंविनिक्षिपेत् पंचवर्णेनचूर्णेनमंडलंपूरयेत्ततः हरिद्रारचितंचूर्णंकर्णिकायांविनिक्षिपेत् धातुवर्णंकेसरेषुव्रीहितंडुलसंभवं दलेषुनिक्षिपेदेतत्तेभ्योबाह्यप्रदेशतः शम्यापराजिता चूर्णंव्योमरेखांतरेक्षिपेत् पीठपद्माबहिर्वीथ्यांनिशाचूर्णंविनिक्षिपेत् द्वारेषुश्वेतवर्णंचद्वारशोभासुलोहितम् हरिद्रामुपशोभासुतद्वत्तंडुलसंभवम् कोणेषुनिक्षिपेच्चूर्णंमंडलस्यबहिःपुनः श्वेतंतुसत्ववीथ्याख्येरजःसंज्ञेचलोहितं कृष्णंतमोभिधानंचक्रमाच्चूर्णंविनिक्षिपेत् इदंसे

र्वतोभद्रं चक्रारविंदंवक्ष्यामिपुंडरीकाक्षवल्लभं चतुरस्त्रंपुराप्रोक्तंक्षेत्रमानभ्रमान्वितं कृत्वातद्धस्तमात्रंतुदद्यात्तत्रभ्रमान्बुधः एकादशप्र
माणेननाम्नाचैवब्रवीमितान् अंगुलानांचतुष्केणप्रथमोत्रभ्रमःस्मृतः नाभिक्षेत्रभ्रमश्चात्रद्वितीयस्त्वंगुलेनतु ततोर्धांगुलमानेनकार्यंभ्रम
चतुष्टयं आराश्चतद्वदूर्ध्वंस्यान्नाभ्यामेकांगुलोभ्रमः शोभाक्षेत्रंतदूर्ध्वंस्यात्तदूर्ध्वंस्याद्भ्रमद्वयं क्षेत्रस्यहस्तमात्रस्थंचैतन्मानंप्रकीर्तितं
अनयैवदिशाकार्यंद्विगुणंत्रिगुणस्यतु ततश्चारःप्रकर्तव्यालक्षणंतुसुवच्म्यहं यावत्योराःप्रकर्तव्यास्तावद्भागांस्तुभाजयेत् क्षेत्रंततस्त्व
राभागंप्रत्येकंभाजयेद्बुधः ऊर्ध्वाधोभागषट्केनचतुर्विंशतिकोष्ठकाः भवंतितेतरामूलंचतुर्भिःकारयेद्बुधः चत्वारोमध्यतःस्थाप्याःकोष्ठकास्तुत
दंततः भवंतितेतरामूलेंचतुर्भिःकारयेद्बुधः चतुष्टयंकोष्ठकानांमध्याच्चैवतथाभ्रमः उभयोःपार्श्वयोःकृत्वातद्भ्रमाभ्यांपुनर्भ्रमः संश्लिष्टंकार
येत्प्राज्ञोभ्रमयोरर्धचंद्रवत् एवंतुशेषलोपेनप्रकटाराप्रदृश्यते तथैकातद्वदन्यास्तुकर्तव्यासाधकोत्तमैः अर्धारांवायदाकुर्यात्तदैकंतुभ्रमं
भवेत् मध्येनभागेचारायाभागभक्तेक्रमात्पुनः सूत्रंदद्यादर्धसूत्रंनिलीनंप्रकटंततः अर्धारादृश्यतेतत्रशोभाक्षेत्रंतथाधिया शोभाप्रक
ल्पयेत्प्राज्ञोयथाशोभायुताभवेत् नलिनीवहमत्स्यंवाशृंगारान्वाप्रकल्पयेत् द्वारक्षेत्रद्वयंचात्रत्वारामानेनभाजयेत् कोष्ठकानांचतुष्को-
णंतत्रद्वारंप्रकल्पयेत् द्वाराद्वारांतरंयच्चवीथिकास्ताःप्रकल्पयेत् यावत्योरोभवंत्यत्रतथाद्वारप्रकल्पना अक्षक्षेत्रेतुकर्तव्यंपद्मपत्रंसितं
शुभम् नाभिःकृष्णाप्रकर्तव्यारक्तासर्वास्त्वराःकृताः नेमीपीताथनीलाचरेखाःसर्वाःसितास्तथा रेखाचतुष्टयंकार्यंचतुर्वर्णविभागतः द्वारा

णिश्वेतवर्णानिवीथयोभद्रवत्स्मृताः एवंद्वित्रिचतुःपंचगुणमानेनकल्पयेत् चतुश्चक्रंपंचचक्रमष्टचक्रंतुकारयेत् अनयैवदिशाभूमेर्विस्तारःपरिमाणतः इतिचक्रारर्धिदं चतुर्विंशतिधाक्षेत्रंकृत्वाष्टाभिःसरोरुहं मध्यकोष्ठेषुलिंगानित्वष्टाष्टाभिःप्रकल्पयेत् तत्राष्टाभिर्वरंपद्मंषड्भिः कंठचतुष्टयं षड्भिरुत्तरपद्मंचवेदैःखुरभूदाचरेत् लिंगोत्सेधस्त्रिभिःकोष्ठैर्विस्तारंद्विपदेनच पद्मस्याभिमुखंलिंगंविदध्यान्नपराङ्मुखं विदिक्षुस्वस्तिकानेवमष्टाभिस्तुयथातथा ईशानकोणादारभ्यपंक्तिंत्यक्त्वातुदक्षिणां सपंक्तावेवमुद्दीयात्पदकानित्रयोदश तदग्रेचक्रमेदत्तश्चत्वार्यथपदद्वयं तदग्रात्पुनरेवंचस्वपंक्त्याभिमुखंयथातथाग्निकोणादारभ्यविहायापरपंक्तिकं नैरृतात्तुतथारभ्यविहायोत्तरपंक्तिकां वायव्यकोणादारभ्यत्यक्त्वावैपूर्वपंक्तिकां शेषंपूर्वमितिज्ञेयमितिस्वस्तिकलक्षणं इतिसम्यग्विहायाथरजसैवंप्रपूरयेत् लिंगपीठंचशुक्लेनकंठस्योभयपार्श्वगं चतुष्पदंततोधामात्सुरक्तेनमनोहरं पंचपंचातिरक्तेनलिंगस्योभयपार्श्वतः चत्वारस्तुबहिःपीतनीलरक्तासितेनच पूरयित्वेतिलिंगानिस्वस्तिकानपिपूरयेत् ईशादिवायुपर्यंतंक्रमात्कोणचतुष्टयं सितरक्तपीतकृष्णैःपार्श्वोदरनिभंत्रयं लिंगस्वस्तिकसंयुक्तंलिंगस्वस्तिकमंडलं सर्वकामप्रदंत्वेतदाचार्याःसंप्रचक्षते केवलैःस्वस्तिकैश्चैवस्वस्तिकंपरिगीयते इतिलिंगस्वस्तिकं चतुरस्रीकृतेक्षेत्रेविंशद्भागेसमंततः मध्यषड्भागिकंपद्मंपीठंस्याद्भागिकंततः भागेनवीथिकातुस्यात्पीठंपद्मंचपूर्ववत् तद्बहिर्वीथिकावप्रौभागिकौद्वारमुक्तवत् नवनाभमिदंप्रोक्तंमंडलंनवपंकजम् पद्मस्थानेथवाकुर्यात्तन्मात्रस्वस्तिकान्नव दिक्षुमध्येथवाब्जानांयद्वामध्येविदिक्षुच पद्मस्वस्तिकमित्येवंमंडलंसर्वकामदं चतुर्भिर्मध्यमैःकोष्ठैरसव्यं

भ्रामयेद्भुजां नद्यावर्तवदापीठंकर्णांतिंस्वास्तिकंभवेत् विचित्रेणैवकर्णेनलोकपालाभिधेनवा स्वस्तिकान्रजसाचैवपूरयेच्छेषमुक्तवान् इतिपद्मस्वस्तिकं अथकरणप्रकारस्त्रैविक्रम्यामेव चतुरस्रंक्षेत्रंचतुर्दिक्षुर्विंशत्याभागैर्विभज्यकोष्ठशतचतुष्टययुतंनिष्पाद्यसमंताद्बाह्यपंक्तौवीथींविधाय तदनंतरं पंक्तिचतुष्टयेप्रतिपंक्तिकोष्ठद्वयंमध्येपरिलोप्यचतुर्दिक्षुद्वाराणिकुर्यात् तद्वारानुगतानितत्पार्श्वयोरष्टौलिंगानिविदध्यात् तद्यथा बाह्यवीथ्यनंतरंद्वारसंबंधकोष्ठत्रयेणपीठंतदुपरितनकोष्ठकत्रयेणदक्षिणोत्तरकोष्ठद्वयस्यबाह्यतः एकैकरेखालोपनान्मध्यकोष्ठेनैकेनकंठंतदुपरिचकोष्ठत्रयेणजलपदंतदुपरिकंठंलिंगं एवंसर्वाण्यपिलिंगानिविधायकोणेषुकर्णकोष्ठांश्चतुरोलतार्थंसंलक्ष्यकृतालिंगांतरालेशेषरेखाविलोप्य तदुपरि ततोऽपूरितकोष्ठकेषुवीथीपीठपद्मानिसर्वतोभद्रवत्कुर्यात् इतिलतालिंगोद्भवं सप्तधाविभज्यैकोनपंचाशत्कोष्ठकंसंपाद्यबहिर्विभागेन चतुर्विंशतिकोष्ठकैः समंताद्वीथीनिष्पाद्यउर्वरितपंचविंशतिकोष्ठकेषुपूर्वादिदिक्षुकोष्ठकाष्टकंनवपंचमध्येसंस्थाप्य शेषषोडशकोष्ठलोपेनवीथिकाचतुष्टयांतर्नवपद्मानिअसक्तानिकृत्वावीथ्यनुगान्यष्टद्वाराणिचकुर्यादसंसक्तंनवनाभद्वयं चतुरस्रमष्टधाविभज्यचतुःषष्टिपदंकृत्वामध्यकोष्ठचतुष्टयेपद्मंपीठंचसंपाद्य तदनंतरंपंक्तौपद्मार्धेनवीथींतदनंतरं पंक्तौचतुर्दिक्षुपद्मसमानिचत्वारिद्वाराणिद्वारकोष्ठकमानेनकंठोपकंठकपोलान्कुर्यात् इतिविभज्यब्रह्मस्थानात्सूत्रभ्रमेण अंगुलानिचत्वारिवृत्तानिकृत्वादिक्षुविदिक्षुतत्संधिषुसंध्यंतरेषुच द्वात्रिंशत्सूत्राणिदत्वातृतीयवृत्तेसंध्यंतरसूत्राद्बहिः पार्श्वभ्रमेण षोडशार्धचंद्रान् कृत्वा दिक्षुविदिक्ष्वर्धचंद्रद्वयं मध्येचतुर्थवृत्तेदलाग्राणि तृतीयवृत्तेदलसंधीन्द्वितीयवृत्तेकेसराग्राणि प्रथमवृत्तेत

हृत्प्रमाणांपीतांकर्णिकांतन्मध्येनीलवर्णानिचबीजानिवीथीमूलमध्याग्रेषुशुक्लरक्तपीतकेसरजालदलानिचप्रतिवारणयासह शुक्लवर्णानीनिपद्मंनिष्पादयेत् तत्राभ्युन्नतदलाग्रंमुक्तिकामस्यवीक्ष्याग्रंदिक्पालानांवागोकर्णाग्रंगणानांमंडलाग्रंअश्वत्थदलपत्रकंगौरीसरस्वत्यादीनांविधेयं तत्रशालिपिष्टेनश्वेतहरिद्रयापीतंसिंदूरधात्वादिनारक्तंदग्धयवादिनाकृष्णंशमीपत्रादिनानीलंतद्वर्णकार्य्यविशेषकामोमुक्ताविद्रुमादिना एतदेवरजः कुर्यात्इति कोटिहोमेतुकुंडविशेषः पश्चिमदक्षिणयोर्योनिद्वयंकार्य्यं योनिचक्रद्वयोपेतंतदप्याहुस्त्रिमेखलमितिमात्स्यात् भट्टास्तु योनिवक्रंचैतिद्वयमाहुः अग्निस्थापनंचयजमानशाखयायः स्वशाखांपरित्यज्यपरशाखांसमाश्रयेत् अप्रमाणमृषिंकृत्वासोंधेतमसिमज्जतीतिपराशरोक्तेः सांगकर्मविधेर्यजमानंप्रतिप्रवृत्तेश्च स्वाध्यायोध्येतव्यइत्यध्ययनविधिनाऽनुष्ठानोपयुक्तज्ञानजनकत्वेनाध्ययनस्य दृष्टार्थत्वबोधनाच्च ननुवेदानधीत्यवेदौवेत्यादिना शाखांतरस्याप्यध्ययनंबोधितंतदपिचपूर्ववत् दृष्टार्थमेव अतोनस्वपरशाखास्थयोर्विशेषः अतएवशाखांतराधिकरणोपपादितः सर्वशाखीयांगोपसंहारोपिसंगच्छते अन्यथाशाखांतरविहितपदार्थज्ञानाभावात्तदुपसंहारोसंगतः स्यादितिचेत् नएवंवेदांतरस्थ यच्छाखांतरस्थपदार्थज्ञानेनतदनुष्ठानसंभवेपिनस्ववेदीयशाखांतरस्थंपदार्थानुष्ठानंसंभवति स्वाध्यायोध्येतव्यइत्यत्र स्वाध्यायस्योपादेयत्वेनविवक्षितैकसंख्यत्वादिक्रमापातैकवेदस्थाया एकस्याएवशाखाया अध्ययनस्यविधानात् तदाहुर्भट्टपादाः अत्रस्वाध्यायशब्देनस्वशाखैवगृह्यतइति वेदानधीत्येतिस्मृत्यांतु वेदांतरस्थानामनेकासामपिशाखानामध्ययनंविधीयतइतिकेचि

त् परंतुवेदांतरस्य प्रतिशाखेपर्याप्तत्वाद्वेदांतरस्थाप्येकैवशाखाध्येतव्येत्याहुः अन्येतुस्वाध्यायपदेनस्वपित्रादिपरिगृहीतनानावेदगतैकैकेवशाखागृह्यते तथाचेदमेववेदानधीत्येतिस्मृतेर्मूलमितिलाघवमित्यस्तुविप्रतिपत्तिः सर्वथास्वाध्यायोध्येतव्यइत्येतद्विधिविहिताध्ययनजन्यज्ञानलाभेनसंभवति क्रतुविधिचारितार्थ्ये ऽविहितैच्छिकपाठजन्यज्ञानस्यकर्मण्यनुपयोगः अन्यथाशूद्रस्यापितादृशज्ञानसंभवेन कर्माधिकारःस्यात् एतेनस्त्रीशूद्रौनाधीयेतामितितयोरध्ययनस्यनिषेधात्तज्जन्यज्ञानाभावेनक्रत्वधिकारइतिवदंतः पार्थसारथिमिश्राःपरास्ताः तथाहि यथातप्तपयसिदध्यानयतिसावैश्वदेव्यामिक्षेतिसर्वनाम्नातच्छब्देनतापविशिष्टमेवपयःप्रतिनिर्दिश्यते एवमष्टमेवर्षेब्राह्मणमुपनयीत तमध्यापयीतेत्यत्रापितच्छब्देननपुंस्त्वाष्टवर्षत्वादिविशिष्टउपनीतएवपरामृश्यते विनियुज्यतेचाध्ययनेननच त्रैवर्णिकवच्छूद्रस्योपनयनंविहितम् नचाष्टवर्षत्वादिवद्ब्राह्मणत्वस्यापिपूर्ववाक्यश्रवणाद्ब्राह्मणस्यैवाध्ययनेधिकारःस्यान्नक्षत्रियविशोरितिवाच्यम् इत्यध्ययनदानानि वैश्यस्यक्षत्रियस्येतिस्मृत्यातयोः प्राप्तेः स्मृतेरुक्तमूलब्राह्मणपदाविवक्षया लाघवादियमेवश्रुतिः श्रुत्यंतरंचेत्यन्यदेतत् सर्वथात्रैवर्णिकानामेववेदाध्ययनजन्यज्ञानेनाधिकारो नशूद्रस्याध्ययनविधेरभावात् निषेधरुक्तन्यायबलइत्यस्तुप्रसक्तानुप्रसक्तम् स्ववेदीयस्वशाखांतरस्थपदार्थस्यानुष्ठानंतुवैधज्ञानाभावान्नभवति अतएववाजसनेयितैत्तिरीयादीनामदृष्टार्थानांप्रधानभूतानामपिशाखांतरस्थानामपिकानांग्रहयोगाभ्यासानामदृष्टार्थानांचांगानामनुष्ठानाभावःसंगच्छते अन्यथाप्रधानभावेननित्यस्या

पिज्योतिष्टोमादिप्रयोगसिद्धिः स्यात् स्ववेदीयशाखांतरस्थस्यतुस्वशाखाविरुद्धस्यापिसूत्राद्युपात्तस्यभवति सूत्राध्ययनस्य स्वाध्यायाध्ययनवद्वैधत्वात् स्वशाखीयपदार्थानुष्ठानाशक्तौतुतद्विधिविरुद्धस्याप्यनुद्धरणादिप्रायश्चित्तचातुर्मास्यप्रयोगगतपंचाह्निकैकाहादेरिव भवति अनेनैवाभिप्रायेणाकरणाच्छाखांतरस्थस्यापिश्रैष्ठत्वमाहुर्देवयाज्ञिकाः सूत्राध्ययनस्यवैधत्वादेवऋग्वेदाद्येकशाखाध्यायिनामिदानींतनानां सकलशिष्टानामाधानदर्शपूर्णमासज्योतिष्टोमादिकर्माधिकारोनिर्वहणीयः अन्यथावैधज्ञानाभावेनसुदुर्धरः स्यात् वेदांतरस्थमंत्राणांतु सूत्रप्रतीकोपात्तत्वात् तदध्ययनेनैवाध्ययनसिद्धिः अधीतायांवेदांतरशाखायांसूत्रेवायस्त्वशाखाविरुद्धमागतंतदध्ययनजन्यज्ञानाविशेषेणानुष्ठेयत्वेनप्रसक्तमपिस्मृत्यानिषिध्यते यथा यः स्वशाखांपरित्यज्यपरशाखांसमाश्रयेत् अप्रमाणमृषिंकृत्वासौंधेतमसिमज्जतीति एतेनस्वपरशाखास्थानांसूत्रोपनिबद्धानामंगानांतुल्योविकल्पइतिश्रीमदनंतयाज्ञिकोक्तिः परास्ताशाखांतराधिकरणीयः सर्वांगोपसंहारस्तु वेदांतरीयशाखांतरस्थांगविषयः सूत्रोपात्तस्ववेदीयशाखांतरस्थाविरुद्धांगविषयश्चेतिदिक् विशेषः कश्यपसंहितायाम् नक्षत्रेयत्रभानुः स्यात्तदाद्यंतत्रिकंत्रिके सूर्यज्ञशुक्रसौरीणामिंदुभौमबृहस्पतेः राहोः केतोश्चनिर्दिष्टंवदनादौशुभाशुभं दुष्टेनकुर्याद्धवनमित्याहुर्भार्गवादयइति इदंचकाम्यविषयं संस्कारेषुविचारोस्यनकार्योनापिवैष्णवे नित्येनैमित्तिकेकार्योनचाब्देमुनिभिः स्मृतइतितत्रैवोक्तेः दैवाद्धोमकरणेशांतिर्विष्णुधर्मोत्तरे क्रूरग्रहमुखेचैवसंजातेहवनेशुभे शांतिंविधायगांदद्याद्ब्राह्मणायकुटुंबिने आ

यसींप्रतिमांकृत्वानिक्षिपेत्तामधोमुखीं गोमूत्रमधुगंधाद्यैरर्चितांप्रतिमांततः श्वभ्रेनिधायसंपूज्यतत्रहोमोविधीयतइति अन्यदपिवर्ज्यं कैश्चिदुक्तं अर्कश्चंद्रादष्टमेज्ञाच्चतुर्थेमंदः शुक्रादष्टमेंगारकश्च राहुर्धर्मेजीवतः खेटसुतेहोमेनाशः पुत्रदाराधनानामिति तिथिवारयुतिः सैकावेदभक्तावशेषकात् निवासोग्नेर्व्योम्निरूपेवित्तप्राणविनाशदः पातालेह्निकशेषेणधनसंचयनाशनं गुणवेदावशेषेणभूमौविपुलसौख्यदइति आह्निकेयुगादिनिमित्तहोमे जपाद्यंगहोमेपिनदिनंशोध्यम् तस्यस्वतंत्रकालस्याभावात् अग्निश्चलौकिकः गार्ह्यमौपासनेकुर्यात्सर्वाधानींतुलौकिके स्मार्तंचलौकिकेकार्यंश्रौतंवैतानिकाग्निष्वितिस्मृत्यर्थसारात् कातीयानांतुस्मार्तोपितत्सूत्रेतथोक्तेः गोभिलगृह्ये आहूयचैवहोतव्यंयत्रयोविहितोनलः तथा शुभंपात्रंतुकांस्यंस्यात्तेनाग्निंप्रणयेद्बुधः तस्याभावेशरावेणनवेनाभिमुखंच तम् तथा लक्षहोमेचवन्हिःस्यात्कोटिहोमेहुताशनः पूर्णाहुत्यापिलोनामशांतिकेवरदः स्मृतः देवीपुराणे शुभग्रहविधौह्यग्निर्लक्षहोमेपराजितः कोटिहोमेशिवोवन्हिःसर्वकामप्रदायकः ततोवेद्यांग्रहस्थापनंअग्निप्रणयनंकृत्वा ततस्त्वावाहयेत्सुरानितिमात्स्यात् वसिष्ठसंहितायां लिखेदष्टदलंपद्मंवेदिकोपरितंदुलैः तथा यथारुचिप्रमाणेनप्रतिमाःकल्पयेत्सुधीः ग्रहपूजनेचमात्स्यादादावादित्यक्रमः बौधायनेनतुरविभौमशुक्रसोमबुधगुरुमंदादिक्रमउक्तः आवाहनंचव्याहृतिमंत्रेण आवाहनंव्याहृतिभिस्तथैवाग्निकुमारकावितिमात्स्यात् व्याहृत्यावाहयेत्तुतानितिस्कंदाच्चेतिहेमाद्रिः मदनरत्नेतु आवाहनस्थापनंभिन्नम् अतोव्याहृतिभिरावाह्यतत्तन्मंत्रेणस्थापनंकार्यमित्यु

क्तं प्रयोगपारिजातेतु प्रणवंत्वादितःकृत्वा भूर्भुवःस्वस्ततःपरम् चतुर्थ्यानामसंयुक्तंनमस्कारांतयोजितं एषमंत्रःसमाख्यातोग्रहपूजाविधायकः अनेनावाहनंकुर्यादनेनैवविसर्जयेदितिवामनवचनाद्ग्रहगायत्र्यापूजनमुक्तं बौधायनेत्वावाहनवाक्येविशेषउक्तः किरीटिनंपद्मासनंपद्मकरंपद्मगर्भसमद्युतिं सप्ताश्वंसप्तरज्जुंकलिंगदेशजंकाश्यपगोत्रजंविश्वामित्रर्षिंत्रिष्टुप्छंदसंरक्तांबरधरंरक्ताभरणभूषितंरक्तगंधानुलेपनंरक्तध्वजपताकिनंमुकुटकेयूरशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवताग्निसहितंप्रत्यधिदेवतेश्वरसहितंरक्तवृत्तमंडलेपूर्वाभिमुखमादित्यमावाहयामि किरीटिनंरक्तमाल्यांबरधरंशक्तिशूलगदाधरं चतुर्भुजंमेषगमनमवंतिदेशजं वसिष्ठगोत्रजंजामदग्न्यर्षिंजगतीच्छंदसंरक्तांबरधरंरक्ताभरणभूषितंरक्तगंधानुलेपनंरक्तच्छत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवताभूमिसहितंप्रत्यधिदेवतास्कंदसहितंत्रिकोणरक्तमंडलेदक्षिणाभिमुखमंगारकमावाहयामि किरीटिनंश्वेतवर्णं चतुर्भुजंदंडिनं वरदमक्षसूत्रकमंडलुं भोजकटदेशजंभार्गवगोत्रजंशौनकर्षिंपंक्तिच्छन्दसंश्वेतांबरधरंश्वेताभरणभूषितंश्वेतगंधानुलेपनंश्वेतच्छत्रध्वजपताकिनंमुकुटकेयूरशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतेंद्राणीसहितंप्रत्यधिदेवतेंद्रसहितंशुक्लपंचकोणमंडलेप्राङ्मुखंशुक्रमावाहयामि किरीटिनंश्वेतवर्णंगदापाणिंद्विभुजमाग्नेयभागमत्रिगोत्रमात्रेयर्षिमनुष्टुप्छंदसंश्वेतांबरधरंश्वेताभरणभूषितंश्वेतंश्वेतगंधानुलेपनंश्वेतध्वजपताकिनंमुकुटकेयूरशोभितमारुह्यरथंदिव्यंमेरुंप्रद-

क्षिणीकुर्वाणंग्रहमंडलेप्रविष्टं अधिदेवतांबुसहितंप्रत्यधिदेवतोमासहितं चतुरस्रमंडलेप्रत्यङ्मुखंसोममावाहयामि किरीटिनंपीतमाल्यांब
रधरंपीतवर्णंखड्गगदाचर्मपाणिभूषितंसिंहस्थंवरदंमगधदेशजमत्रिगोत्रजं भरद्वाजर्षिबृहतीच्छंदसंपीतांबरधरंपीताभरणभूषितं पीतगंधानुले
पनंपीतच्छत्रध्वजरथपताकिनंकेयूरशोभितमारुह्यरथंदिव्यमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेउत्तराभिमुखंसौम्यमावाहयामि किरीटिनंपीतांबरंपी
तवर्णंचतुर्भुजंदंडिनंवरदंसाक्षसूत्रकमंडलुंसिंधुदेशजमांगिरसगोत्रजंवसिष्ठर्षिमनुष्टुप्छंदसंपीतांबरधरंपीतमाल्यानुलेपनंपीतच्छत्र-
ध्वजरथपताकिनंमुकुटकेयूरशोभितमारुह्यरथंदिव्यमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतेंद्रसहितं प्रत्यधिदेवता ब्रह्मसहितं
पीतदीर्घचतुरस्रमण्डलेउदङ्मुखंबृहस्पतिमावाहयामि किरीटिनमिन्द्रनीलसमद्युतिंशूलधरंवरदंगृध्रवाहनंसौराष्ट्रदेशजंकाश्यपगोत्र
जंभृग्वर्षिंगायत्रीच्छंदसंकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णगंधानुलेपनंकृष्णछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथं
दिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवताप्रजापतिप्रत्यधिदेवतायमसहितंधनुर्मंडलेप्रत्यङ्मुखंशनैश्चरमावाहयामि किरीटिनंक
रालवदनंखड्गचर्मशूलगदाधरंसिंहासनस्थंपूर्वदेशजंपैठीनसगोत्रजमांगिरसर्षिमनश्छंदसकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णगंधानुले
पनंकृष्णच्छत्रध्वजरथपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतासर्पसहितं प्र
त्यधिदेवतानिर्ऋतिसहितंकृष्णशूर्पमण्डलेप्रदक्षिणाभिमुखंराहुमावाहयामि धूम्रान्द्विबाहून्गदाधरान्विकृताननान्गृध्रवाहनान्गदिनोम

ध्यदेशजान्जैमिनिगोत्रान्गौतमर्षिकान्नानाछंदसान्चित्रांबरधरांश्चित्राभरणभूषितान्विचित्रगंधानुलेपनान्कृष्णध्वजरथपताकिनोमुकुटकेयूरमणिशोभितानारुह्यरथंमेरुंप्रदक्षिणीकुर्वाणान्ग्रहमंडलेप्रविष्टानधिदेवताब्रह्मसहितान्प्रत्यधिदेवताचित्रगुप्तसहितान्कृष्णपिंगलध्वजान् धूममंडलेदक्षिणाभिमुखान्केतूनावाहयामि मात्स्याद्युक्तावाहनप्रकारस्तु प्रयोगेदर्शयिष्यते तत्रसोमादय आदित्याभिमुखाएवस्थाप्यानात्माभिमुखाः लक्षहोमेचगरुडस्थापनवेदीपूर्वस्यामितिमदनरत्ने उत्पलपरिमले ग्रहस्यदक्षिणपार्श्वेस्थापयेदधिदेवतां ग्रहस्योत्तरपार्श्वेतुन्यसेत्प्रत्यधिदेवतां वसिष्ठसंहितायां शनेःपश्चिमतःस्थाप्यविनायकमथार्चयेत् तस्यदक्षिणतोदुर्गांजातवेदसइत्यृचा वायुंचदक्षिणकोणेशिशुंमंत्रेणचार्चयेत् दक्षिणेतस्यचाकाशमादित्यन्तस्यचार्चयेत् अश्विनौदक्षिणेतस्यकार्यावेषोउषाऋचा उत्पलपरिमले ततोविनायकंदुर्गांवायुमंबरमश्विनौ आतूनइंद्रइत्याद्यैर्मंत्रैःप्रागीरितैर्यजेत् प्रयोगपारिजाते पद्मप्राग्दलमारभ्यदलाग्रेषुक्रमान्न्यसेत् इंद्रादिलोकपालांश्चतत्तन्मंत्रैःप्रपूजयेत् वसिष्ठसंहितायामपींद्रादिपूजोक्ता लोकपालक्षेत्रपालादीनांचावाहनमनित्यं द्वात्रिंशादितिमात्स्योक्तेः केवलग्रहमखेतु अधिदेवतादीनामप्यनित्यम् याज्ञवल्क्यादिभिरनुक्तेः कोटिहोमेतुदेवतासुविशेषोभविष्ये ब्रह्माणंपूर्वभागेतुमध्येदेवंजनार्दनम् पश्चिमेचतथारुद्रंसूनुमुत्तरतस्तथा सूनुंस्कन्दम् ततोग्रहानुक्तोपचारैःपूजयेत् वसिष्ठः उपचाराणिसर्वेषामपिशक्त्याक्षतैःसदा गंधाभावेशुक्लगंधंपुष्पाभावेसुगंधकम् धूपाभावेगुग्गुलःस्याद्रव्याभावेतुमिश्रकम् पंचामृतंगवासेवमिश्रकंनकदाचन ततःकलशस्थापनम् तत्रविशेषोवा

सिष्ठे पंचत्वक्पल्लवोपेतंशतोषधिसमन्वितम् एषामभावेतुदशसर्वौषध्यःप्रकीर्तिताः नत आज्यभागांतेहोमः मार्कंडेयः संपूजयेत्त
तोवह्निंदद्याच्चैवाहुतीःक्रमात् पृथ्वीचंद्रोदयेदेवीनंदिपुराणयोः होमेभोजनकालेचसंध्ययोरुभयोरपि आचांतःपुनराचामेदन्यत्रतुसकृत्
सकृत् हेमाद्रौदेवीपुराणे गणाधिपतयेदद्यात्प्रथमातुवराहुतिः अन्यथाविफलंकर्मभवतीहनसंशयः भविष्ये प्रणवादिभिश्चतल्लिंगैःस्वाहा
कारांतयोजितैः जुहुयात्सर्वदेवानांवेद्यांचैवोपकल्पितान् अनेककर्तृकेहोमेप्रत्याहुतित्यागस्यकर्तुमशक्यत्वात्सर्वदेवताउद्दिश्यसर्वद्रव्या
णिनिर्दिश्यसकृत्त्यागःकार्यइतिहेमाद्रिः पारिजातेआश्वलायनः जुहुयात्समिदन्नाज्यैरेताभिर्ऋग्भिर्यथाक्रमं तत्रैवस्कांदे अष्टोत्तर
सहस्रंतुशतमष्टाधिकंतथा अष्टाविंशतिमष्टौवाएकैकस्यतुहोमयेत् वसिष्ठः आदौतुसमिदन्नाज्यैःपृथगष्टोत्तरंशतं इयंचसंख्याद्विविधे
पिग्रहमखेप्रधानदेवतानांविशेषपरत्वेप्रमाणाभावात् चरोत्वेकाहुतिपक्षोपिमात्स्ययाज्ञवल्क्याभ्यामुभयत्रोक्तेः मात्स्ये होतव्यंचघृ
ताद्यन्नंचरुभक्ष्यादिकंततः चरुशब्देनगुडौदनादिरुच्यते तथाचपारिजातेआश्वलायनः गुडौदनंपायसान्नंक्षीरंसंयावषाष्टिकं दध्योदनं
घृतान्नंचकृसरंचसचित्रकं इत्येतानिहवींषिस्युःसमित्संख्यासमाहुतीः भक्ष्यपदेनद्राक्षादिगृह्यते अधिदेवतादिहोमोप्युक्तोहेमाद्रौ चरु
णाचसमिद्भिश्चसर्पिषाचतिलैःक्रमात् तत्तन्मंत्रैश्चहोतव्याःक्रमात्तदधिदेवताः अत्रसंख्यापारिजातेगृह्यपरिशिष्टे प्रधानदशांशेनपा
र्श्वदेवयोरिति वासिष्ठेतु द्वित्राश्चैवाधिदेवत्याःपंचानांचैवपंचधाः द्वित्राःद्वेतिस्रोवेत्यर्थः पंचानांगणेशादीनांपंचधाएकैकेत्यर्थः पंचपंचे

त्यर्थइतिकेचित् ततइंद्रादिहोमः पारिजाते इंद्रादिलोकपालांश्चतत्तन्मंत्रैः प्रपूजयेत् तत्तन्मंत्रैर्जपंकुर्यात्ततोहोमंसमाचरेत् समित्सु विशेषोमात्स्ये होतव्यामधुसर्पिर्भ्यांदध्नाचैवसमन्विताः वासिष्ठेतुहुनेदाज्याक्तसमिधइत्युक्तं ततोयुतादिहोमः वासिष्ठेततोव्याहृतिभिः कुर्यात्तिलहोमंप्रयत्नतः प्रथमोयुतहोमःस्याल्लक्षहोमोद्वितीयकः तृतीयः कोटिहोमःस्यात्त्रिविधोग्रहयज्ञकः एकरात्रंत्रिरात्रंवापंचरात्रमथापिवा शिवगाथांविष्णुगाथांशांतिंब्राह्मणभोजनं समापयेत्प्रतिदिनमेवंभक्त्यासमन्वितः स्वेच्छयायज्ञउच्यतइतिभविष्योत्तरोक्तेः कालनियमोसमिदादिहोमव्यतिरेकेणायुतादिसंख्यापूरणीयेतिहेमाद्रिः नृसिंहपुराणे ततोव्याहृतिभिःपश्चाज्जुहुयात्तुतिलादिकं यावत्सपूर्यतेसंख्यालक्षंवाकोटिरेववा होमद्रव्यंचघृतव्रीहितिलान्यतमात् व्याहृतिभिरयुतादिहोमेचग्रहदेवताग्रहयज्ञइत्युक्तेरितिकेचित् पितामहचरणास्तु अग्निर्वायुःसूर्यःप्रजापतयो देवताइत्याहुः ॐभूर्भुवःस्वश्चेतितिस्रोव्याहृतयोजपे आभिश्चहोमेतिसृभिश्चतुर्थीस्यात्समासतइतिव्यस्तसमस्ताभिर्होमइतिप्रयोगपारिजातेः मदनरत्नेतु समस्ताभिरेवव्याहृतिभिर्होमोग्निर्वायुःसूर्यश्चदेवताइत्युक्तं अयुतादिहोमेचऋत्विजएवकर्तारइतिकेचित् तन्न ऋत्विग्द्वयपक्षेआचार्यस्यहोमकर्तृकत्वात् कोटिहोमेचविशेषोभविष्ये पूर्णेपूर्णसहस्रेतुदद्यात्पूर्णाहुतिंशुभां गोभिलोपि नमुक्तकेशोजुहुयान्नानिपातितजानुकः उत्तानेनैवहस्तेनअंगुष्ठाग्रेणपीडितं संहतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविः तुलादानवद्द्वारपालजपः वसिष्ठः ततोजपादीन्जुहुयात्पूर्णाहुतिमथाचरेत् शौनकः अयाश्चेत्यादिभिर्हुत्वासमुद्रादूर्मिसूक्त

तः संततामाज्यधारांतांपूर्णाहुतिमथाचरेत् अयाश्चेतिस्वस्वशाखाप्रायश्चित्तोपलक्षणं मात्स्ये पूर्णाहुतिंचमूर्द्धानंदिवइत्यभिपातयेत् अग्नि
पुराणे मूर्धानंदिवमंत्रेणसंस्रवेणचधारया दद्यादुत्थायपूर्णांवैनोपविश्यकदाचन वसिष्ठसंहितायां मन्त्रेणसप्ततिअग्निइतिपूर्णाहुतिंहुनेत्
वसोर्धारायांकुंभमूलेयवमात्रंछिद्रंकर्तव्यमित्युक्तंहेमाद्रौ अयुतहोमेनवसोर्द्धारा मात्स्ये लक्षहोमप्रकरणेएवतत्पाठात् वसिष्ठ
संहितायां स्वस्तिकंकल्पयेत्पश्चात्कुंडस्यैशानभागतः यजमानाभिषेकार्थंतत्रभद्रासनंन्यसेत् प्राङ्मुखस्योपविष्टस्ययजमानस्यतत्र
च अभिषेकंततःकुर्युः साचार्याःषोडशर्त्विजः विविधैर्मंगलैर्घोषैःसूतमागधजैःसह ततस्तस्याभिषिक्तस्यरक्षार्थंबलिमुत्क्षिपेत् दि
ग्विदिक्षुविचित्रान्नैर्दीपैर्नीराजयेत्ततः शुक्लमाल्यांबरधरः शुक्लमाल्यानुलेपनः ततोमंगलमागत्यध्यायेदग्निंसुरान्ग्रहान् प्रत्येकंप्रतिमं
त्रैश्चदद्यात्पुष्पांजलिंततः आचार्येभ्योनवभ्यश्चग्रहार्चनफलंततः समिदाज्यचरूणांचातिलहोमफलंचयत् ब्रह्मत्वेकुंभपूजायांचा
र्चनस्यफलंचयत् गणपक्षेत्रपार्केशदुर्गाह्वयांगदेवताः तासांजपफलंसम्यग्गृह्णीयाज्जलपूर्वकं प्रयोगपारिजातेवामनः आचार्यप्रभृति
श्चग्रहार्चनफलंततइत्युक्त्वासमिदाज्येतिश्लोकौपठितवान् सएव ततस्तेभ्योयथाशक्तिदातव्यादक्षिणाततः आचार्यर्त्विग्जापकेभ्योब्रा
ह्मणेचाथतुष्टये आज्यंनिरीक्ष्यदत्वाचब्राह्मणान्भोजयेत्ततः तत्रैवाश्वलायनः एकमेकाहुतौविप्रहोमेत्वन्नेनभोजयेत् अंत्याद्योमध्यम-
श्चापिविप्रमेकंशताहुतौ सहस्रस्याहुतेचैकंजघन्योऽविप्रभोजनात् तस्माद्दातुमशक्तोयोदक्षिणांचान्नमेवच जपैःप्रणामैःस्तोत्रैश्चतोष

येत्तर्पयेद्ग्रहान् भविष्योत्तरे ततःसमासेयज्ञेतुकारयेत्सुमहोत्सवं शंखतूर्यनिनादेनब्रह्मघोषवरेणच अथपितामहकृतोयुतहोमादि प्रयोगः कर्मसंकल्पगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकृत्वाऽचार्यब्रह्मर्त्विग्वरणंकुर्यात् तत्रमंत्राः आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः तथात्वंममयज्ञोस्मिन्नाचार्यत्वंकुरुप्रभो यथाचतुर्मुखोब्रह्मासर्ववेदधरःप्रभुः तथात्वंममयज्ञोस्मिन्ब्रह्माभवद्विजोत्तम अस्ययागस्यनिष्पत्तौभवंतोभ्यर्चितामया सुप्रसन्नाःप्रकुर्वंतुशांतिकंविधिपूर्वकं ततःसर्वान्मधुपर्केणार्चयेत् ततः शुक्लांबरधरःशुक्लमाल्यानुलेपनः साचार्यर्त्विग्यजमानोमंगलघोषेणजलपूर्णकलशहस्तः ॐभद्रंकर्णेभिः० जनित्वामितिमंत्रैर्मण्डपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविश्य यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं सर्वेषामविरोधेनब्रह्मकर्मसमारभेत् इतिगौरसर्षपान्विकीर्य शुचीवोहव्येतिऋचेनापोहिष्ठेतिऋचेनभूमिंप्रोक्ष्य स्वस्त्ययनंतार्क्ष्यमितिमंत्रद्वयंजपेत् ततोमंडपपक्षेतन्नैर्ऋत्येवास्तुवेदिंकृत्वावेदीशानादिकोणचतुष्के विशंतुभूतलेनागालोकपालाश्चसर्वतः अस्मिन्मंडपेवातिष्ठंतुआयुर्बलकराःसदेतिमंत्रेणचतुरःशंकून्रोपयित्वा ततः आग्नेयादिशंकुपार्श्वेमाषभक्तबलीन्दद्यात् अग्निभ्योप्यधसर्पेभ्योयेचान्येतत्समाश्रिताः तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तममिति एवंमंत्रत्रयेणनैर्ऋत्यवायव्येशान्याम् शंकुपार्श्वेमाषभक्तबलीन्दत्वा तेचमंत्राः नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यांयेचराक्षसाः बलिंतेभ्यःप्रयच्छामिसर्वेगृह्णंतुमंत्रितं ॐनमोवायुरक्षोभ्योयेचान्येत-

त्समाहितः बलिंतेभ्यः॰ रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतत्समाश्रिताः बलिंतेभ्यःप्रयच्छामिगृह्णंतुसततोत्सुकाः ततोह्युपरिवस्त्रेसुवर्णादि
शलाकया ॐ शांतायैनमः यशोवत्यैनमः कांतायैनमः विशालायैनमः प्राणवाहिन्यैनमः सत्यैनमः सुमनायैनमः नंदायै॰ भद्रायै॰ इतिपश्चादारभ्य
प्रागंताउदक्संस्थानवरेखाःकृत्वा पुनःहिरण्यायै॰ सुव्रतायै॰ लक्ष्म्यै॰ विभूत्यै॰ विमलायै॰ विप्रायै॰ जयायै॰ कालायै॰ विशोकायै॰ इतिदक्षिणा
रंभाउदगंताः प्राक्संस्थानवरेखाः कृत्वा मध्येकोष्ठचतुष्टयमेकीकृत्य कोणेषुरेखांदत्वातेनार्द्धपदानिसंपद्यंते ततस्तत्रब्रह्मादीनावाहयेत्
वास्तोश्चतुरस्रंशरीरंदेवाअक्रम्यस्थिताइति तत्तद्देवपदेचतत्तद्देवावाहनम् तत्रमध्यपदचतुष्के हृदये ब्रह्मणेन॰ ब्रह्माणं आवाहयामि
पूर्वपदद्वयेदक्षिणस्तने अर्यम्णेन॰ अर्यमणं॰ दक्षिणपदद्वयेजठरदक्षिणेविवस्वते॰ विवस्वतं॰ पश्चिमपदद्वयेजठरवामे मित्राय॰ मित्रं॰ उदक्
पदद्वयेवामस्तने पृथ्वीधरा॰ पृथ्वीधरं॰ तत्रब्रह्मसमीपस्थानेआग्नेयपदार्धयोर्दक्षिणहस्तेसावित्रसवितारौ तत्रपूर्वार्द्धे सावित्रायनमः सा
वित्रं॰ पश्चिमार्द्धे सवित्रे॰ सवितारं॰ नैर्ऋत्यपदार्द्धयोर्वृषणमेंढ्रयोर्विबुधाधिपजयौ तत्रपूर्वार्द्धे विबुधाधिपाय॰ विबुधाधिपं॰ पश्चिमार्द्धेज
याय॰ जयं॰ वायव्यपदार्द्धयोर्वामहस्तेराजयक्ष्मरुद्रौ तत्रपूर्वार्द्धे राजयक्ष्मणे॰ राजयक्ष्माणं॰ पश्चिमार्द्धे रुद्राय॰ रुद्रं॰ ईशानपदार्द्धयो
रूरौसुखयोरापापवत्सौ तत्रपूर्वार्द्धे अद्भ्योन॰ अपः आ॰ पश्चिमार्द्धे आपवत्साय॰ आपवत्सं॰ ईशानपददक्षिणार्द्धे वास्तोः शिरसि शिखि
नेनमः शिखिनं॰ तद्दक्षिणसार्द्धपदेदक्षिणनेत्रे पर्जन्याय॰ पर्जन्यं॰ तद्दक्षिणपदद्वये दक्षिणश्रोत्रे जयंतायनमः जयंतं॰ तद्दक्षिणपदद्वये

दक्षिणांसे कुलिशायुधाय॰ कुलिशायुधं॰ तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्याय॰ सूर्यं॰ तद्दक्षिणपदद्वये दक्षिणबाहौ सत्याय॰ सत्यं॰ तद्दक्षिणसार्द्धपदे दक्षिणकूर्परे भृशाय॰ भृशं॰ तद्दक्षिणाग्नेयपदार्द्धे दक्षिणप्रबाहौ आकाशाय॰ आकाशं॰ तत्पश्चिमार्द्धे दक्षिणप्रबाहौ वायवेन॰ वायुं॰ तत्पश्चिमार्द्धपदे दक्षिणमणिबंधे पूष्णेन॰ पूषणं॰ तत्पश्चिमपदद्वये दक्षिणपार्श्वे वितथाय॰ वितथं॰ तत्पश्चिमपदद्वये दक्षिणपार्श्वे गृहक्षताय॰ गृहक्षतं॰ तत्पश्चिमपदद्वये दक्षिणोरौ यमाय॰ यमं॰ तत्पश्चिमपदद्वये दक्षिणजानौ गंधर्वाय॰ गंधर्वं॰ तत्पश्चिमसार्द्धपदे दक्षिणजंघायां भृंगराजाय॰ भृंगराजं॰ तत्पश्चिमनैर्ऋत्यपदार्द्धे दक्षिणास्फिचि मृगायन॰ मृगं॰ तदुत्तरार्द्धे पादयोः पितृभ्योन॰ पितॄन् आवा॰ तदुत्तरसार्द्धपदे वामस्फिचि दौवारिकाय॰ दौवारिकं॰ तदुत्तरपदद्वये वामजंघायां सुग्रीवाय॰ सुग्रीवं॰ तदुत्तरपदद्वये वामजानौ पुष्पदंताय॰ पुष्पदंतं॰ तदुत्तरपदद्वये वामोरौ वरुणाय॰ वरुणं॰ तदुत्तरपदद्वये वामपार्श्वे असुराय॰ असुरं॰ तदुत्तरस्यार्द्धपदे वामपार्श्वे शेषाय॰ शेषं॰ तदुत्तरवायव्यपदार्द्धे वाममणिबंधे पापाय॰ पापं॰ तत्प्राक्पदार्द्धे वामबाहौ रोगायन॰ रोगं॰ तत्प्राक्सार्द्धपदे वामबाहौ अहये॰ अहिं॰ तत्प्राक्पदद्वये वामकूर्परे मुख्यायन॰ मुख्यं॰ तत्प्राक्पदद्वये वामबाहौ भल्लाटाय॰ भल्लाटं॰ तत्प्राक्पदद्वये वामबाहौ सोमाय॰ सोमं॰ तत्प्राक्पदद्वये वामांसे सर्पेभ्यो॰ सर्पान् आ॰ तत्प्राक्सार्द्धपदे वामश्रोत्रे अदितये॰ अदितिं॰ तत्प्रागर्द्धपदे वामनेत्रे दितये॰ दितिं॰ उत्तरे वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् वास्तोष्पत्यावाहने विनियोगः ॐ वास्तोष्पते॰ सुवर्णमय्यां मूर्तौ वास्तोष्पतये॰ वास्तोष्पतिं आवाहयामि ततः ईशाना

दिविदिक्षु ऐशान्येचरक्यै॰ चरकीं॰ आग्नेयेविदार्यै॰ विदारीं॰ नैर्ऋत्येपूतनायै॰ पूतनां॰ उत्तरे पापराक्षस्यै॰ पापराक्षसीं॰ मंडलपूर्वादिदिक्षु तत्र पूर्वे स्कंदाय॰ स्कंदंआ॰ दक्षिणे अर्यम्णे॰ अर्यमणं॰ पश्चिमे जृंभकाय॰ जृंभकं॰ उत्तरे पिलिपिच्छाय॰ पिलिपिच्छं॰ तदस्तुमित्रा॰ गृह्णावै॰ इतिप्रतिष्ठाप्य ततः सर्वान्संपूज्य मंडलाद्देशाने कुंभंसंस्थाप्य मंडलाग्रे पायसबलीन्दद्यात् तद्यथा ॐ ब्रह्मणेनमः एषपायसबलिर्नमम एवंसर्वत्र ॐ अर्यम्णेनमः पाय॰ विवस्वते॰ मित्राय॰ पृथ्वीधराय॰ सावित्रा॰ सावित्रे॰ विबुधाधिपाय॰ जयाय॰ राजयक्ष्मणे॰ रुद्राय॰ अद्भ्योनमः आपवत्सायन॰ शिखिने॰ पर्जन्याय॰ जयंताय॰ कुलिशायुधाय॰ सूर्याय॰ सत्याय॰ भृशाय॰ आकाशाय॰ वायवेन॰ पूष्णेन॰ वितथाय॰ गृहक्षताय॰ यमाय॰ गंधर्वाय॰ भृंगराजाय॰ मृगाय॰ पितृभ्यो॰ दौवारिकाय॰ सुग्रीवाय॰ पुष्पदंताय॰ वरुणाय॰ असुराय॰ शेषाय॰ पापाय॰ रोगाय॰ अहये॰ मुख्याय॰ भल्लाटाय॰ सोमाय॰ सर्पेभ्यो॰ अदितये॰ दितये॰ एष पायसब॰ ततश्चरक्यादिभ्यः माषभक्तबलीन्दत्वा सयथा चरक्यै॰ एषमाषभक्तब॰ एवमग्रेपि विदार्यै॰ पूतनायै॰ पापराक्षस्यै॰ स्कंदाय॰ अर्यम्णे॰ जृंभकाय॰ पिलिपिच्छाय॰ एषपायसबली॰ इतिबलीन्दत्वा ततः पावमानेनराक्षोघ्नेनचसूक्तेनत्रिसूत्र्यामंडपंवेष्टयेत् अथद्वारपूजा तत्रपूर्वद्वारेऊर्ध्वे श्रियै नमः अधः देहल्यै॰ वामदक्षिणस्तंभयोः गणेशाय॰ स्कंदाय॰ तत्रकलशद्वये गंगायै॰ यमुनायै॰ दक्षिणद्वारे ऊर्ध्वे श्रियैनमः अधः देहल्यै नमः स्तंभयोः पुष्पदंतायनमः कपर्दिने॰ कलशद्वये गोदायै॰ कृष्णायै॰ पश्चिमद्वारे ऊर्ध्वम् श्रियैन॰ अधः देहल्यै॰ स्तंभयोः नंदिने॰ चंडा

य॰ कलशद्वये रेवायै॰ नर्मदायै॰ उत्तरद्वारे ऊर्ध्वं श्रियै॰ अधः देहल्यैनमः स्तंभयोः महाकालाय॰ भृंगिणे॰ कलशद्वये वारुण्यै॰ वेण्यैन॰ इतिद्वारपूजा ततस्तोरणादिपूजांकरिष्येइतिसंकल्प्य तत्रपूर्वस्यांदिशिमंडपाद्बहिर्हस्तमात्रे अश्वत्थंघटंवा सुदृढंशोभननामकंवाशंखचिह्नितंतोरणंन्यस्य ॐ अग्निमीळेपुरोहितं॰ सुदृढतोरणायनमः सुदृढतोरणं आवाहयामि सुदृढतोरणायन॰ गंधंसमर्पयामि पुष्पं धूपंदीपंनैवेद्यतांबूलदक्षिणांतोपचारैः पूजयेत् तत्रराहवेनमः राहुंआ॰ बृहस्पतये॰ बृहस्पतिंआ॰ राहुबृहस्पतिभ्यांगंधाद्युपचारान्समर्पयेत् तत्रैकःकलशःस्थाप्यः तत्रमंत्राः महीद्यौरितिभूमिंस्पृष्ट्वा तत्रओषधयःसंवदंतइतियवान् आकलशेष्वितिकलशंस्थापयित्वा इमंमेगंगेइतिजलेनापूर्य गंधद्वारामितिगंधंक्षिप्त्वा याओषधीरितिसर्वौषधीः क्षिपेत् औषधयःसमितियवान् कांडात्कांडादितिदूर्वाः अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीतिसप्तमृदः याःफलिनीरितिफलं सहिरत्नानीतिपंचरत्नानि हिरण्यरूपइतिहिरण्यं युवासुवासाइतिवस्त्रेणसूत्रेणवासुखवेष्टयेत् पूर्णादर्वीत्युपरिधान्यपूर्णपात्रंन्यसेत् तस्मिन्कलशे ध्रुवाय॰ ध्रुवं॰ ध्रुवायनमः गंधाद्युपचारान्समर्पयामि ततोदक्षिणेगत्वा औदुंबरंप्लाक्षंवासुभद्रधिकटनामकंवाचक्रचिह्नितंतोरणंन्यस्य ॐ इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्मणे सुभद्रतोरणाय॰ सुभद्रतोरणंआवाहयामि सुभद्रतोरणायन॰ गंधाद्युपचारान्समर्पयेत् तत्रसूर्यायन॰ सूर्यंआवा॰ अंगारकाय॰ अंगारकंआ॰ सूर्याङ्गारकाभ्यांनमः गंधाद्युपचारान्समर्पयेत् तत्रैकःकलशःस्थाप्यः तस्मिन्कलशेधरा

येनमः धरांआ० धरायैनमः गंधाद्युपचारान्समर्पयेत् ततःपश्चिमेगत्वाप्लाक्षमौदुंबरंवासुकर्मसुभीमनामकंवागदादिचिह्नितंतोरणंन्यस्य ॐअग्नआयाृ०षि० सुकर्मतोरणायन०सुकर्मतोरणंआ० गंधाद्युपचारान्स० तत्रशुक्राय० शुक्रं०बुधाय०बुधं० शुक्रबुधाभ्यांनमः गंधाद्युपचारान्स० तत्रैकः कलशः स्थाप्यः तस्मिन्कलशेवाचस्पतयेनमः वाचस्पतिं० वाचस्पतये० गंधाद्युपचारान्स० ततउत्तरेगत्वा वटमाश्वत्थंवापलाशंवासुहोत्रं सुप्रभंवापद्माचिह्नितंतोरणंन्यस्य ॐ शन्नोदेवी० नः सुहोत्रतोरणाय० सुहोत्रतोरणंआ० सुहोत्रतोरणायन० गंधाद्युपचारान्स० तत्रसोमायनमः सोमं० केतवेन०केतुं० शनैश्चरायन० शनैश्चरं० सोमकेतुशनैश्चरेभ्योन० गंधाद्युप० तत्रैकः कलशः स्थाप्यः तस्मिन्कलशेविघ्नेशाय० विघ्नेशंआ० विघ्नेशाय० गंधाद्युपचारा० ततः पूर्वेगत्वा पूर्ववन्महीद्यौरित्यादिनाप्रतिद्वारशाखंकलशद्वयंसंस्थाप्य प्रतिकलशंमंत्रावृत्तिः अस्मिन्कलशद्वये ऐरावताख्यदिग्गजाय० ऐरावताख्यदिग्गजं० ऐरावताख्यदिग्गजाय० गंधाद्युपचारान्स० तत्रऋग्वेदिनाहृत्विजो ऋग्वेदः पद्मपत्राक्षोगायत्र्यः सोमदैवतः अत्रिगोत्रस्तुविप्रेंद्र ऋत्विक्त्वंमेमखेभवेति प्रत्येकंवृत्वा ॐ अग्निमीळेइतिमंत्रेण प्रत्येकंगंधाद्युपचारैः पूजयेत् ततः सहस्राक्षंमत्तैरावतसंस्थितम् पीतकिरीटिनंकुंडलधरं दक्षिणवामकरस्थवज्रोत्पलमिंद्रंध्यात्वा ॐ एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते भोइंद्रइहागच्छइहतिष्ठ इंद्रंसांगं सपरिवारंसायुधंसशक्तिकंद्वारकलशेआवाहयामि ॐ आशुःशिशानो० मिंद्रः इतिमंत्रेणपीतांपताकांपीतध्वजंचद्वयमपिदशहस्तदंडंपंच

हस्तदंडंवोच्छ्रयेत् ॐ त्रातारमिंद्रम॰ इंः इंद्राय॰ इंद्रं आ॰ इंद्राय॰ गंधाद्युप॰ इंद्रः सुरपतिः श्रेष्ठोवज्रहस्तोमहाबलः शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमइतिनत्वा इंद्रायसांगायसपरिवारायसायुधायसशक्ति॰ एतंमाषभक्तबलिंसमर्पयामीतिबलिंदत्वाचमेत् ततःआग्नेय्यांगत्वा तत्रपूर्ववत्कलशसंस्थाप्य तत्रपुंडरीकाय॰ पुंडरीकं आ॰ अमृताय॰ अमृतं॰ पुंडरीकामृताभ्यां॰ गंधाद्युप॰ अनंतरं छागस्थंरक्तवर्णंदक्षिणवामकरद्वयधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा एह्येहिसर्वामरहव्यवाहमुनिप्रवर्यैरभितोऽभिजुष्ट तेजोवतालोकगणेनसार्द्धंममाध्वरंपाहिकवेनमस्ते भोअग्नेइहागच्छइहातिष्ठ अग्निंसांगंसपरिवारंसायुधंसशक्तिकं अस्मिन्कलशेआवा॰ॐ अग्निंदूतं॰ तु इति मंत्रेणरक्तांपताकांरक्तंध्वजंचोच्छ्रयेत् ततः त्वंनोअग्नेवरुण॰ त् अग्नये॰ अग्निंआ॰ अग्नये॰ गंधाद्युपचारान्स॰ आग्नेयःपुरुषोरक्तःसर्वदेवमयोऽव्ययः धूम्रकेतूरजोध्यक्षस्तस्मैनित्यंनमोनमइतिनत्वा अग्नयेसांगायसपरिवारायसायुधायसशक्तिकाय एतंमाषभक्तबलिंसमर्पयामीतिबलिंदत्वाचमेत् ततोदक्षिणेगत्वाप्रतिद्वारशाखंकलशद्वयंसंस्थाप्य तत्रकलशद्वयेवामनाख्यदिग्गजाय॰ वामनाख्यदिग्गजं॰ वामनाख्यदिग्गजाय॰ गंधाद्युपचारान्॰ तत्रयजुर्वेदिनाहृत्विजो अस्मिन्दक्षिणद्वारे शांतिसूक्तजपार्थेनत्वामहंवृणे कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदैवतः काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्वा ॐ इषेत्वोर्जेत्वा॰णे इतिप्रत्येकंगंधादिभिरभ्यर्च्य ततोमहिषारूढंधृतदंडपाशदक्षिणवामकरद्वयंकृष्णांजनचयोपमं अग्निसमलोचनंयमंध्यात्वा ॐ एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममू

ते शुभाशुभानंदशुचामधीशाशिवायनःपाहिमखंनमस्ते भोयमइहागच्छ॰ यमंसांगं॰ द्वारकलशे आवाहयामि आयंगौ॰ रस्य इतिमंत्रेण कृष्णांपताकांकृष्णांध्वजंचोच्छ्रयेत् ततोयमायसो॰तः यमाय॰ यमआ॰ यमाय॰ गंधाद्युप॰ महामाहिषमारूढं दंडहस्तंमहाबलं आवाहयामियज्ञेऽस्मिन्पूजेयंप्रतिगृह्यतां यमायनमः एतंमाषभक्तबलिंसमर्पयामीतिबलिंदत्वाचमेत् ततोनैर्ऋत्यांगत्वा तत्रपूर्ववत्कलशंसंस्थाप्य कुमुदायनमः कुमुदंआ॰ दुर्जयाय॰ दुर्जयंआ॰ कुमुददुर्जयाभ्यां॰ गंधाद्यु॰ ततो नरारूढंमहाकायंखड्गहस्तंमहाबलं राक्षसैर्वेष्टितंनीलपीताभरणभूषितं निर्ऋतिंध्यात्वा ॐ एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः ममाध्वरंपाहिपिशाचनाथलोकेश्वरत्वांभगवन्नमस्ते भोनिर्ऋतेइहागच्छ इहतिष्ठ निर्ऋतिं॰ कलशेआवाहयामि ॐ मोषुणः॰सह इतिमंत्रेणनीलांपताकांनीलध्वजंचोच्छ्रयेत् असुन्वंतमयमानमिच्छ॰स्तु निर्ऋतये॰ निर्ऋतिं आ॰ निर्ऋतये॰ गंधाद्युप॰॰ निर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यताम् इतिनत्वा निर्ऋतये सांगाय॰ एतंमाषभक्तबलिंसमर्पयामीति बलिं दत्वाचमेत् ततः पश्चिमेगत्वाकलशद्वयंप्रतिद्वारशाखं पूर्ववत् संस्थाप्य अस्मिन्कलशद्वये अंजनाख्यदिग्गजाय॰ गंधाद्युप॰ तत्रसामवेदिनाद्यृत्विजो अस्मिन्पश्चिमद्वारेशांतिसूक्तजपार्थेनत्वांवृणे सामवेदस्क पिंगाक्षो जाग्रतः शक्रदैवतः भारद्वाजस्तुविप्रेंद्र ऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्वा ॐ अग्नआयाहि॰षि इतिमंत्रेण प्रत्येकं गंधाद्युपचारैः पूजयेत् ततोमकरस्थंपाशहस्तंशंखवर्णंकिरीटधारिणंवरुणंध्यात्वा एह्येहियादोगणवारिधीनांगणेनपर्जन्यसहाप्सरोभिः दि

द्यामहेंद्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते भोवरुणइ॰ वरुणंसांगं॰ द्वारकलशेआवाहयामि इमंमेवरुण॰ राचके इतिमंत्रेणश्वेतांपताकांश्वेतंध्वजंचोच्छ्रयेत् तत्वायामि॰ षीः वरुणाय॰ गंधाद्यु॰ पाशहस्तंचवरुणमर्णसांपतिमीश्वरं आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यताम् इतिनत्वा वरुणायसांगाय॰ एतंमाष॰ इतिबलिंदत्वाचमेत् वायव्यांगत्वा पूर्ववत्कलशंसंस्थाप्य तत्रपुष्पदंताय॰ पुष्पदंतंआवा॰ सिद्धार्थायन॰ सिद्धार्थंआवाहयामि पुष्पदंतसिद्धार्थाभ्यांन॰ गंधाद्युपचारान्॰ ततो मृगाधिरूढंधूम्रवर्णंचित्रांबरधरंयुवानंवरध्वजधरदक्षिणवामहस्तद्वयंवायुंध्यात्वा एह्येहियज्ञेममरक्षणायमृगाधिरूढः सहसिद्धसंघैः प्राणाधिपः कालकवेः सहायगृहाणपूजांभगवन्नमस्ते भोवायोइ॰ वायुंसांगं॰ कलशे आ॰ वायो शतं॰ पाजसाइतिमंत्रेण धूम्रांपताकांधूम्रध्वजंचोच्छ्रयेत् ॐ तववाय॰ हे वायवेन॰ गंधाद्यु॰ वायुमाकाशगंचैवपवनंवेगवद्गतिम् आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यताम् अनाकारोमहोजाश्चयश्चादृष्टगतिर्दिवि तस्मैपूज्यायजगतोवायवेहंनमामिचेतिनत्वा वायवेसांगाय॰ एतंमाष॰ मिइतिबलिंदत्वाचमेत् ततः उत्तरद्वारेकलशद्वयंप्रतिद्वारशाखंसंस्थाप्य तत्रकलशद्वयेसार्वभौमदिग्गजाय॰ सार्वभौमदिग्गजं आ॰ सार्वभौमदिग्गजाय॰ गंधाद्यु॰ तत्र अथर्ववेदिनाऋत्विजो अस्मिन्नुत्तरद्वारेशांतिसूक्तजपार्थंनत्वामहंवृणे बृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः वैशंपायनविप्रेंद्र ऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्वा शन्नोदेवी॰ नः इतिमंत्रेण प्रत्येकंगंधाद्युपचारैः पूजयेत् ततो नरयुतविमानस्थंकुंडलहारकेयूररुचिरवरगदाधरदक्षिणवामभुजद्वयंमुकुटिनंमहोदरंमहाकायंहरितवर्णंकुबेरं ध्यात्वा ॐ ए

ह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धम् सर्वौषधीभिः पितृभिः सहैवगृहाणपूजांभगवन्नमस्ते भोसोमइहा० द्वारकलशद्वये आवाह० ॐ आप्यायस्वे इतिमंत्रेण हरितांपताकांहरितंध्वजंचोच्छ्रयेत् सोमोधेनुं० दस्मैसोमाय० सोमं० सोमाय० गंधाद्यु० सर्वनक्षत्रमध्ये तुसोमोराजाव्यवस्थितः तस्मैसोमायदेवायनक्षत्रपतयेनमः इतिनत्वासोमायसांगाय० एतंमाष० इतिबलिंदत्वाचमेत् ततः ईशान्यांगत्वा तत्रपूर्ववत्कलशंनिधाय तत्रसुप्रतीकाय० सुप्रतीकं० मंगलाय० मंगलंआ० सुप्रतीकमंगलाभ्यां० गंधाद्यु० ततो वृषारूढंदक्षिणवामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रंशुक्लवर्णमीशानंध्यात्वा ॐ एह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगधरेणसार्द्धम् लोकेनयज्ञेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते भोईशानइहागच्छ० कलशेआवाह० अभित्वादेव० महे इतिमंत्रेणश्वेतांपताकांश्वेतंध्वजंचोच्छ्रयेत् प्रतस्तमीशानं० स्वस्तये ईशानाय० गंधाद्युप० वृषस्कंधसमारूढंशूलहस्तंत्रिलोचनं आवाहयामियज्ञेऽस्मिन्पूजयेयंप्रतिगृह्यताम् सर्वाधिपोमहादेवईशानः शुक्लईश्वरः शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमः इतिनत्वा ईशानायसां०मि इतिबलिंदत्वाचमेत् ततः ईशानपूर्वयोर्मध्ये अधः उद्दिश्य अनंतशयनासीनंफणासप्तकमंडितम् पद्मशंखधरोर्ध्वाधोदक्षिणंचकरद्वयं चक्रगदाधरदक्षिणवामकरद्वयंनीलवर्णमनंतंध्यात्वा एह्येहिपातालधरामरेन्द्रनागांगनाकिन्नरगीयमान यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयम् भो अनंत इहा० अनंतंसांगं० आवाहयामि आयंगौः०स्त्वः इतिमंत्रेणश्वेतांपताकां श्वेतंध्वजंचोच्छ्रयेत् ॐ आयंगौः० स्त्वः अनंताय० गंधाद्यु० योसावनंतरूपेणब्रह्माण्डंसचरा

चरम् पुष्पवद्धारयन्मूर्ध्नितस्मैनित्यंनमोनमइतिनत्वा अनंतायसांगायसपरिवाराय० एतंमाष० इतिबलिंदत्वाचमेत् ततोनैर्ऋत्यपश्चिमयोर्मध्येऊर्ध्वमुद्दिश्य अक्षसूत्रकुशमुष्टिधरोर्ध्वाधोदक्षिणकरंस्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयंचतुर्मुखंश्मश्रुजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्यात्वा ॐ एह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्द्धंपितृदेवताभिः सर्वस्यधातास्यमितप्रभावोविशाध्वरंनः सततंशिवाय भोब्रह्मन्निहागच्छइहतिष्ठब्रह्माणंसांगंआ० ॐ ब्रह्मजज्ञानंप्र० विवः इतिमंत्रेणरक्तांपताकांरक्तंध्वजंचोच्छ्रयेत् ॐ ब्रह्मजज्ञानं० विवः ब्रह्मणे० ब्रह्माणं० ब्रह्मणे० गंधाद्यु० पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमइतिनत्वा ब्रह्मणेसांगाय० इतिबलिंदत्वाचमेत् ततोमंडपमध्ये अत्युच्चदंडोदशहस्तदीर्घोत्रिहस्तविस्तृतोविचित्रवर्णः ॐ इंद्रस्यवृष्णो० मुदस्थात् इतिमंत्रेणस्थाप्य ॐ ब्रह्मजज्ञानं० वः ब्रह्मणे० गंधाद्यु० ततोमंडपषोडशस्तंभेषुसर्वेभ्योदेवेभ्योन० वंशेषुकिंनरेभ्योन० पृष्ठेपन्नगेभ्योनमइतिपूजयेत् ततःपूर्वस्यांदिशिमंडपाद्बहिः किंचिद्भूमिमुपलिप्यतत्रोपविश्य त्रैलोक्ययानिभूतानिस्थावराणिचराणिच ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिमे देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालोगणैःसह रक्षंतुमंडपसर्वेघ्नंतुरक्षांसिसर्वतः त्रैलोक्यस्थेभ्यस्स्थावरेभ्योभूतेभ्योनमः त्रैलोक्यस्थानिस्थावराणिभूतान्यावा० त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्योनमः त्रैलोक्यस्थानिचराणिभूतान्या० ॐ ब्रह्मणे० ब्रह्माणं० विष्णवे० विष्णुं० शिवाय० शिवं० ॐ देवेभ्योन० देवान्आ० ॐ दानवेभ्योनमः दानवान्० ॐ गंधर्वे

भ्योन० गंधर्वान्० ॐ यक्षेभ्योन० यक्षान्० ॐ राक्षसेभ्योन० राक्षसान्० ॐ पन्नगेभ्योन० पन्नगान्आ० ॐ गोभ्योन० गाः आ० ॐ ऋषिभ्योन० ऋषीन्आ० ॐ मनुष्येभ्यो० मनुष्यान्० ॐ देवमातृभ्यो० देवमातृः० इत्यावाह्य प्रत्येकंगंधाद्युपचारैः संपूज्य प्रत्येकंमाषभक्तबलीन्दद्यात् ततोयजमानः साचार्यर्त्विक् प्रक्षालितपाणिपाद आचांतः प्राग्द्वारेणमंडपंप्रवेशयेत् यजमानोग्न्यायतनाद्दक्षिणतउपविशेत् आचार्यस्तुकुंडपश्चिमतःउपविश्याचम्यप्राणानायम्यामुककर्मण्यग्निप्रतिष्ठांकरिष्ये तदंगतयासंमार्जनमेखलायोनिदेवतास्थापनंपूजनंचकरिष्ये इतिसंकल्प्याग्न्यायतनंसमृज्यकुशोदकेनकुंडंप्रोक्ष्यउपरिमेखलायांश्वेतवर्णालंकृतायां इदंविष्णुरितिविष्णुमावाह्यसंपूज्यमध्यममेखलायांरक्तवर्णालंकृतायांब्रह्मजज्ञानमितिब्रह्माणंअधोमेखलायां कृष्णवर्णालंकृतायांकद्रुद्रायेति रुद्रंयोन्यांरक्तवर्णालंकृतायांगौरीर्मिमायेतिगौरीमावाह्य संपूज्य ततः स्वशाखोक्तमार्गेणाग्निंप्रतिष्ठाप्यग्रहवेद्यांपूर्वोक्तप्रकारेण सर्वतोभद्रमंडलंकृत्वा तत्तद्देवताआवाहयेत् प्राणानायम्यदेशकालौस्मृत्वासर्वतोभद्रेमंडलदेवतास्थापनमहंकरिष्येइतिसंकल्प्य ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्ब्रह्मावा० ॐ ब्रह्मजज्ञानं० वः मध्येब्रह्मणे० ब्रह्माणंआ० आप्यायस्वगौतमः सोमोगायत्री ॐ आप्यायस्वसमे० थे उत्तरे सोमाय० सोमं० अभित्वाजीगर्तिः शुनःशेपईशानोगायत्री ॐ अभित्वादेव० हे ईशान्यांईशानाय० ईशानंआ० इंद्रंवोमधुच्छंदाइंद्रोगायत्री ॐ इंद्रंवोवि० तः पूर्वेइंद्राय० इंद्रंआ० अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री ॐ अग्निंदूतं० तु आग्नेय्यां अग्नये० अग्निंआ० यमायसोमंयमोयमोनुष्टुप् ॐ यमायसोमं० तः दक्षिणेयमाय० यमंआ० मोषुणोघोरः कण्वोनिर्ऋतिर्गायत्री ॐ मोषु

णः परापरा० हृ नैर्ऋत्यांनिर्ऋतये०निर्ऋतिंआ० तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप् ॐ तत्वायामि० षीः पश्चिमेवरुणाय० वरुणं० तववायाव्यश्वांगिरसोवायुर्गायत्री ॐ तववायदृत० हे वायव्यांवायवेन० वायुं० ज्मया अत्रमैत्रावरुणोवसवस्त्रिष्टुप् ॐ ज्मया अत्र० स्य वायु सोममध्ये अष्टौ वसुभ्योन० अष्टौवसून् आ० आरुद्रासः श्यावाश्वएकादशरुद्राजगती ॐ आरुद्रासः० वे सोमेशानयोर्मध्ये एकादशरुद्रेभ्यो० एकादशरुद्रान्० त्यान्नुसामवेदोमत्स्योद्वादशादित्यागायत्री ॐ त्यान्नुक्षत्रियां० ये ईशानेंद्रयोर्मध्येद्वादशादित्येभ्यो० द्वादशादित्यान् आ० अश्विनावर्तिराहूगणोश्विनावुष्णिक् ॐ अश्विनावर्तिर० तं इंद्राग्नियममध्ये अश्विभ्यांनमः अश्विनौआ० ओमासश्चर्षणीधृतइतिगृत्समदोविश्वेदेवागायत्री ॐ ओमासश्च० तं अग्नियममध्येविश्वेभ्योदेवेभ्यो० विश्वान्देवान् आ० अभित्यंवामदेवसप्तयक्षाअत्यष्टी ॐ अभित्यंदेवं० स्वः यमनिर्ऋतिमध्ये सप्तयक्षेभ्यो० सप्तयक्षान्० आयंगौःसार्पराज्ञीसर्पागायत्री ॐ आयंगौः ० स्वः निर्ऋतिवरुणमध्येभूतनागेभ्यः भूतनागान् आवाहया० अप्सरसामैतसध्यशृंगोगंधर्वाप्सरसोऽनुष्टुप् ॐ अप्सरसांगंधर्वाणां० मः वरुणवायुमध्ये गंधर्वाप्सरोभ्यो० गंधर्वाप्सरसः आ० कुमारंमातास्कंदस्त्रिष्टुप् ॐ कुमारंमाता० तौ ब्रह्मसोममध्ये स्कंदाय० स्कंदंआ० ऋषभमृषभोवैराजोनुष्टुप् ॐ ऋषभंमा० वां ब्रह्मसोममध्येऋषभाय० ऋषभंआ० अदितिर्लोक्योबृहस्पतिः शूलमहाकालोनुष्टुप् ॐ अदितिर्ह्यजि० वः ब्रह्मेशानयोर्मध्ये दक्षादिसप्तगणेभ्यो० दक्षादिसप्तगणान् आ० जातवेदसेकश्यपोदुर्गात्रिष्टुप् ॐ जातवेदसे० ग्निः ब्रह्मेंद्रमध्ये दुर्गायैनमः दुर्गां आ० इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री ॐ इदंवि

ष्णु॰ रे ब्रह्मेंद्रमध्येविष्णवेन॰ विष्णुं आ॰ उदीरतांशंखः स्वधात्रिष्टुप् ॐ उदीरता॰षु ब्रह्माग्निमध्येस्वधायै॰ स्वधां आ॰ परंमृत्योसंकुशिकोमृत्यु
रोगास्त्रिष्टुप् ॐ परंमृत्यो॰न् ब्रह्मयममध्ये मृत्युरोगेभ्यो॰ मृत्युरोगान् आ॰ गणांनात्वागृत्समदोगणपतिर्जगती ॐ गणानांत्वा॰ ब्रह्मनिर्ऋतिमध्ये
गणपतये॰ गणपतिं॰ शन्नोदेवीरांबरीषः सिंधुद्वीप आपोगायत्री ॐ शन्नोदेवी॰ नः ब्रह्मवरुणमध्ये अद्भ्योन॰ अपः आवा॰ मरुतोयस्यराहुग-
णोमरुतोगायत्री ॐ मरुतोयस्य॰ नः ब्रह्मवायुमध्येमरुद्भ्योन॰ मरुतः आ॰ स्योनामेधातिथिर्भूमिर्गायत्री ॐ स्योनापृथिविभवा॰ थः ब्रह्मणोःपा
दमूलेकर्णिकाधः पृथिव्यै॰ पृथिवीं॰ इमंमेगंगेइत्यस्य सिंधुक्षित्प्रैय्यमेधोयमुनासरस्वत्योजगती ॐ इमंमेगंगेय॰ या तत्रैवगंगादिसर्वनदी-
भ्यो॰ गंगादिसर्वनदीः आवा॰ धाम्नोधाम्नोगौतमोवामदेवः सप्तसागरानुष्टुप् ॐ धाम्नोधाम्नोराज॰ च तत्रैवक्षारादिसप्तसागरेभ्यो॰ क्षारादि
सप्तसागरान् आ॰ तदुपरिमेरवेनमः मेरुं आ॰ बाह्यपरिधौसोमादिसमीपे क्रमेणायुधानि अष्टदिक्षु गदायै॰ गदां॰ त्रिशूलाय॰ त्रिशूलं आ॰ व
ज्राय॰ वज्रं आ॰ शक्तये॰ शक्तिं आ॰ दंडाय॰ दंडं आ॰ खड्गाय॰ खड्गं आ॰ पाशाय॰ पाशं आ॰ अंकुशाय॰ अंकुशं आ॰ तद्बाह्येउत्तरादिक्रमेण
गौतमायगौतमं॰ भरद्वाजाय॰ भरद्वाजं॰ विश्वामित्राय॰ विश्वामित्रं॰ कश्यपाय॰ कश्यपं॰ जमदग्नये॰ जमदग्निं आ॰ वसिष्ठाय॰ वसिष्ठं आ॰ अत्रये
न॰ अत्रिं आ॰ अरुंधत्यै॰ अरुंधतीं आ॰ तद्बाह्येपूर्वाद्यष्टदिक्षु ऐंद्र्यैन॰ ऐंद्रीं आ॰ कौमार्यैन॰ कौमारीं आ॰ ब्राह्म्यै॰ ब्राह्मीं॰ वाराह्यै॰ वाराहीं आवा॰
चामुंडायै॰ चामुंडां आ॰ वैष्णव्यै॰ वैष्णवीं आ॰ माहेश्वर्यैन॰ माहेश्वरीं आ॰ वैनायक्यै॰ वैनायकीं आ॰ तत्रमध्येसूर्याय॰ सूर्यं आ॰ बाह्येपूर्वाद्यष्ट

दिक्षु सोमाय॰ सोमं आ॰ भौमाय॰ भौमं आ॰ बुधाय॰ बुधं आ॰ बृहस्पतये॰ बृहस्पतिं आ॰ शुक्राय॰ शुक्रं आ॰ शनैश्चराय॰ शनैश्चरं आ॰ राहवे॰ राहुं आ॰ केतवेनमः केतुं आवाहयामि एतादेवताः प्रतिष्ठाप्य संपूज्य पूर्वोक्तप्रकारेणाष्टगंधैः क्षौमवस्त्रोपरिग्रहयंत्रं विलिख्य तदुपरि यथाक्रमेण संस्थाप्य तत्रकुंकुमाक्षतैः ग्रहान्साधिप्रत्यधिदेवतान्स्थापयेत् तद्यथा मंडले आदित्यादिदेवतास्थापनं करिष्ये इति संकल्प्य पद्मासनः पद्मकरः पद्मगर्भ॰ आकृष्णेनहिरण्यःस्तूपः सवितात्रिष्टुप् सूर्यावाहनेविनियोगः ॐ भूर्भुवः स्वः कलिंगदेशोद्भवकाश्यपसगोत्र सूर्यइहागच्छेति आप्यायस्वगोतमः सोमोगायत्री ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्रसोम इहा॰ अग्निर्मूर्धाविरूपोंगारकोगायत्री ॐ भू॰ अवंतीसमुद्भवभारद्वाजसगोत्रभौमइहागच्छ॰ उद्बुध्यध्वंबुधः सौम्योबुधस्त्रिष्टुप् ॐ भू॰ मगधदेशोद्भव आत्रेयसगोत्र॰ बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप् ॐ भू॰ सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पतेइ॰ शुक्रः पाराशरः शुक्रोद्विपदाविराट् ॐ भू॰ भोजकटदेशोद्भवभार्गवसगोत्रशुक्रइ॰ शमग्निरिरिंबिठिः शनिरुष्णिक् ॐ भू॰ सौराष्ट्रदेशोद्भवकाश्यपसगोत्रशनैश्चरइ॰ कयानोवामदेवोराहुर्गायत्री ॐ भू॰ राठिनापुरोद्भवपैठीनसगोत्रराहोइहागच्छ॰ केतुंमधुच्छंदाः केतुर्गायत्री ॐ भू॰ अंतर्वेदिसमुद्भवजैमिनिसगोत्रकेतो॰ अथाधिदेवताः त्र्यंबकोवसिष्ठोरुद्रोनुष्टुप् गौरीर्मिमादीर्घतमाउमाजगती यदक्रंदोदीर्घतमाः स्कंदस्त्रिष्टुप् विष्णोर्नुकंदीर्घतमानारायणस्त्रिष्टुप् ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप् इंद्रंवोमधुच्छंदाइंद्रोगायत्री यमायसोमंयमोयमोनुष्टुप् मोषुणोघोरःकण्वःकालोगायत्री उषोवाजंप्रस्कण्वश्चित्रगुप्तोबृहती अथप्र

त्यधिदेवताःअग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री अप्सुमेधातिथिरापोनुष्टुप्०स्योनामेधातिथिर्भूमिर्गायत्री इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप् इंद्राणींवृषाकपिरिंद्राणीपंक्तिः प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् आयंगौःसर्पराज्ञीसर्पागायत्री ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप् ततउत्तरतः गणानांत्वागृत्समदोगणाधिपतिर्जगती जातवेदसेकश्यपोदुर्गात्रिष्टुप् तववायोव्यश्वोंगिरसोवायुर्गायत्री आदिद्वत्सआकाशोगायत्री एषांउषःप्रस्कण्वोश्विनौगायत्री यद्वाराहोरुत्तरेविनायकंशनेरुत्तरे वायुंराहोर्दक्षिणे आकाशंकेतोर्दक्षिणेश्विनौ उत्तरेक्षेत्रस्यपतिनावामदेवः क्षेत्राधिपतिरनुष्टुप् वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् ततः लक्षकोटिहोमयोः सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः विषपापहरोनित्यमतःशांतिंप्रयच्छमे इतिमन्त्रेणइंमित्रंवरुणमितिवागरुत्मंतमुत्तरतः आवाह्यदिक्पालानष्टदिक्षुतन्मंत्रैरावाह्य तत्ररवेःपूर्वेशेषं सोमस्याग्नेवासुकिं भौमस्याग्नेतक्षकं बुधोत्तरेकर्कोटकं गुरूत्तरेपद्मं शुक्रोत्तरेमहापद्मंशनिपश्चिमेशंखपालंराहोःपुरतः कंबलंकेतोःपुरतःकुलिशंस्थापयेत् ततःपूर्वे अश्विन्यादिसप्तनक्षत्राणि विष्कंभादिसप्तयोगान् बवबालवकरणेसप्तद्वीपानिऋग्वेदंच दक्षिणेपुष्यादिसप्तनक्षत्राणिधृत्यादिसप्तयोगान् कौलवतैतिलकरणेसप्तसागरान्यजुर्वेदंच पश्चिमेस्वात्यादिसप्तनक्षत्राणिवज्रादिसप्तयोगान्गरवणिजकरणेसप्तपातालानिसामवेदंचउत्तरेभिजिदादिसप्तनक्षत्राणिसाध्यादिषट्योगान्विष्टिकरणंभूरादीन्सप्तलोकान् अथर्ववेदंच वायव्येध्रुवंसप्तर्षींश्च ततोयथावकाशंगंगादिसप्तसरितः सप्तकुलाचलान् अष्टौवसून् द्वादशादित्यान् एकादशरुद्रान् एकोनपंचाशन्मरुतः षोडशमातॄः षडृतून् द्वादशमासान् द्वेअ-

यने पंचदशतिथीः षष्टिसंवत्सरान् सुपर्णान्नागान्सर्पान्यक्षान्गंधर्वान्विद्याधरानप्सरसः रक्षांसि भूतानि मनुष्यान् इति कोटिहोमे तु वेदेः पूर्वे ब्रह्मा मध्ये जनार्दनः पश्चिमे रुद्रः उत्तरे स्कंदः ततो ध्यायेत् तद्वस्तु मित्रावरु० गृहाथे० इत्यावाह्य पुरुषसूक्तेन षोडशोपचारैः संपूज्य प्रार्थयेत् आदित्या वसवो रुद्रा मरुतो लोकपास्तथा ब्रह्मा जनार्दनश्चैव शूलपाणिर्भगाक्षहा अत्र सन्निहिताः सर्वे भवंतु मखभागिनः पूजां गृह्णंतु सर्वत्र मयाभक्त्योपपादितां कुर्वन्तु च शुभं सर्वे यज्ञकर्तुः समीहिता इति ततो वेदीशान्यां कुंभं संस्थाप्य वरुणं संपूज्य देवदानवसंवादे इति संप्रार्थ्याग्न्याधानं कुर्यात् चक्षुषी आज्येनेत्यंतमुक्त्वा नवग्रहानष्टशताष्टाविंशत्यष्टान्यतमसंख्याभिः समिच्चर्वाज्याहुतिभिरधिदेवताद्याः प्रधानदशांशेन द्वित्रिभिर्वा समिच्चर्वाज्याहुतिभिः नवग्रहानयुतलक्षकोट्यान्यतरसंख्याभिर्यवव्रीहिघृततिलान्यतराहुतिभिः शेषेण स्विष्टकृतमित्यादि चर्वाज्याहुतिरेकैव सर्वेषामिति पक्षे तथोल्लेखः लक्षकोटिहोमयोर्गरुत्मंतमष्टशतादिसंख्यया समिदादिभिः कोटिहोमे ब्रह्मादीनां गरुडवत् चर्वैकाहुतिपक्षे नवस्थाल्योवदानधर्मश्च लक्षहोमादेर्बहुदिनसाध्यत्वे चरुस्विष्टकृदाद्यादिन एव कार्यं यावद्धोमसमाप्ति प्रतिदिनं ग्रहपूजा कार्या कोटिहोमे प्रतिसहस्रं पूर्णाहुतिरपि होमसमाप्तावग्निं संपूज्य स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वाग्नेः समंताद्दिक्पालेभ्यो वेदेः समंतान्नवग्रहेभ्यो वेदेरुत्तरतो विनायकादिसप्तभ्यो गरुत्मते च तत्तन्मंत्रैः माषभक्तबलीन्दत्वा क्षेत्रपालबलिं दुर्ब्राह्मणेन शूद्रेण वा चतुष्पथे क्षेपयेत् ततः प्रक्षालितपादो द्वादशगृहीतेन चतुर्गृहीतेन वाज्येन वस्त्रनारिकेरादियुतेन पूर्णाहुतिं जुहुयात् तत्र मंत्राः समुद्रादूर्मिरित्यस्य गौतमो वामदेवोऽग्निस्त्रिष्टुप् मूर्धानं दिवो बार्हस्पत्यो भारद्वा

जोवैश्वानरस्त्रिष्टुप् पुनस्त्वग्निर्वसुरुद्रादित्यास्त्रिष्टुप् पूर्णादर्विविश्वेदेवाः शतक्रतुरनुष्टुप् सप्ततेअग्नेसप्तनवाग्निर्जगती धामंतेगौतमोवामदेव आपोजगती एतैर्हुत्वा इदमग्नये वैश्वानरायवसुरुद्रादित्येभ्यः शतक्रतवेसप्तवतेग्नयेद्भ्यश्चनममेतित्यागः अथवसोर्द्धारांपातयेत् तत्रमंत्राः अग्निमीळइतिनवानांमधुच्छंदाअग्निर्गायत्री विष्णोर्नुकमितिषण्णांदीर्घतमाविष्णुस्त्रिष्टुप् आतेपितरितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप् स्वादिष्ठयेतिदशानांमधुच्छंदाःपवमानसोमोगायत्री महावैश्वानरज्येष्ठसामनीचपूर्णपात्रविमोकादिकर्मशेषंसमाप्यसर्त्विक्श्रेयःसंपादनंकृत्वाकुंडेशानभागेस्वस्तिकोपरि भद्रासनेस्थितंयजमानंग्रहकलशोदकेनसमुद्रज्येष्ठाइत्यादिभिःसुरास्त्वेत्यादिभिश्चाभिषिंचेत् अत्र पत्नीवामे ततोयजमानःसर्वौषधीभिरनुलिप्यस्नात्वाधेन्वादिदक्षिणांपूर्वोक्तमंत्रैर्दद्यात् अयुतहोमेएकैकं लक्षहोमेदशकोटिहोमेशतंन्यूनमूल्यंसुवर्णेनसमंकर्तव्यं मुख्याभावेसुवर्णंदद्यात् ततोद्वारजापकेभ्योन्येभ्यश्चदक्षिणांदत्वा पूर्वस्थापितदेवताःसंपूज्याचार्यायदत्वाग्निंसंपूज्यविभूतिंधृत्वागच्छगच्छेत्यग्निंविसृज्यब्राह्मणान्संभोज्यकर्मसमाप्तिंवाचयित्वाकर्मेश्वरार्पणंकृत्वानृत्याद्युत्सवंकारयेत् इतिदिनकरभट्टकृतेशांतिसारेलक्षहोमादिपद्धतिः अथकोटिहोमेशतमुखादिभेदाः हेमाद्रौभविष्योत्तरे शताननोदशमुखोद्विमुखैकमुखस्तथा चतुर्विधोमहाराजकोटिहोमोविधीयते कृत्वाकुंडशतंदिव्यंयथोक्तंहस्तसंमितं एकैकस्मिंस्ततःकुंडेदशविप्रान्नियोजयेत् एकस्थानप्रणीतेग्नौसर्वतःपरिभ्राधिते होमंकुर्युर्द्विजाःसर्वेकुंडेकुंडेयथोदितं अत्रसर्वेतिकर्तव्यतापूर्ववत् कुंडानांहस्तमात्रताघृतादिशीघ्रदाहिद्रव्यविषयातिलयवादौतु अयुते

त्वथहोतव्येकुंडस्याद्धस्तमात्रकं द्विगुणंलक्षहोमेचकोटिहोमेचतुर्गुणमितिवाक्यात् लक्षार्द्धेत्रिकरंकुंडंलक्षहोमेचतुःकरमितिवाक्याच्च द्विकरंत्रिकरंवाबोद्धव्यं अत्रमंडपपरिमाणंशतहस्तत्वाद्यार्थिकं अर्थात्परिमाणमितिकात्यायनोक्तेः अत्रचाचार्योनैर्ऋत्यकुंडेग्निंप्रतिष्ठापयेत् ततस्तमग्निमन्येषुऋत्विजःप्रणयेयुः सहस्रब्राह्मणसंख्याचऋत्विग्विषया तेनसहस्रं ऋत्विजः इतिशतमुखः यदादशमुखःकार्यःकोटिहोमोमहामते विप्राणांद्विशतिंतत्रसुविभज्यनियोजयेत् अत्रचैकैकस्मिन्कुंडे दशलक्षहोमऋत्विजांविंशतिश्च कुंडंपंचकरंप्रोक्तंदशलक्षाहुतौक्रमात् इतितंत्रांतरोक्तं शेषंपूर्ववत् इतिदशमुखः अथकुंडद्वयंकृत्वाविभज्यचविभावसुं होमंकुर्युर्द्विजाभूयःसंस्कृत्यविधिपूर्वकं शतंतत्रनियोज्यंस्याद्विप्राणांप्रविभज्यवै यद्वामासेर्द्धमासेवाकार्यकालउपस्थिते तदातुद्विमुखःकार्यःकोटिहोमोविचक्षणैः अत्रपंचाशदृत्विजः प्रतिकुंडंअन्यत्साम्यवत् इतिद्विमुखः अत्रमंडपविशेषोभविष्योत्तरे उत्तमंशतहस्तंतु तदर्द्धेनतुमध्यमं जघन्यंतुतदर्द्धेनशक्तिकालाद्यपेक्षया शतमुखेशतहस्तः दशमुखेपंचाशद्धस्तः द्विमुखेपंचविंशतिहस्तः शतहस्तमंडपेदशहस्तान् शतकोष्टकान्कृत्वा तन्मध्येशतंद्विहस्तानिकुंडानिकुर्यात् एवंशतमुखयोरपीति अत्रकोटिहोमानुसृतेःकोटिधर्माएवंभवंति इतिश्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णभट्टात्मजदिनकरकृतशांतिसारेशतमुखादिभेदनिरूपणम् अथग्रहशांतयः तत्रादित्यशांतिः मदनरत्नेभविष्योत्तरे आदित्यवारंहस्तेनपूर्वंगृह्यविचक्षणः मंत्रोक्तविधिनासर्वंकुर्यात्पूजांसमाहितः प्रत्यर्कसप्तनक्तानिकृत्वाभक्तिपरोनरः ततस्तुसप्तमेप्राप्तेकुर्याद्ब्राह्मणभोजनम् भास्करंसुदृढंसौवर्णंकृत्वायत्नेनमानवः

ताम्रपात्रेस्थापयित्वारक्तपुष्पैःप्रपूजयेत् रक्तवस्त्रयुगच्छन्नंछत्रोपानद्युगान्वितं घृतेनस्नापयित्वाचलड्डुकान्विनिवेद्यच होमंतिलघृतैःकुर्यादर्कनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेवच होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच समि धोर्कसमिधः मंत्रेणानेनविदुषेब्राह्मणायप्रदापयेत् आदिदेवनमस्तुभ्यंसप्तसप्तेदिवाकर त्वंरवेतारयस्वास्मानस्मात्संसारसागरात् सूर्यपीडासुघोरासुकृताशांतिःशुभप्रदा इत्यादित्यशांतिः अथचंद्रशांतिः तत्रैव तद्वच्चित्रासुसंगृह्यसोमवारंविचक्षणः अनेनैवोक्तविधिनाकुर्यात्पूजादिकंविधोः सप्तमेतुततःप्रातःकुर्याद्ब्राह्मणभोजनं सप्तमेनक्ते कांस्यपात्रेथसंस्थाप्यसोमंरजतसंभवं श्वेतवस्त्रयुगच्छन्नंश्वेतपुष्पैःप्रपूजितं पादुकोपानहच्छत्रभोजनासनसंयुतं होमंघृततिलैःकुर्यात्सोमनाम्नाचमंत्रवित् समिधोऽष्टोत्तरशतमष्टाविंशतिरेववा होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच समिधःपलाशस्य दध्यन्नशिखरेकृत्वाब्राह्मणायनिवेदयेत् कृत्वासोमंधृत्वेत्यर्थः मंत्रेणानेनराजेंद्रसम्यग्भक्त्यासमन्वितः महादेवजातिवल्लीपुष्पगोक्षीरपांडुर सोमसौम्योभवास्माकंसर्वदातेनमोनमः एवंकृतेमहासौम्यःसोमस्तुष्टिकरोभवेत् इतिचंद्रशांतिः अथांगारकशांतिस्तत्रैव स्वात्यामंगारकंगृह्यक्षमायांनक्तभोजनं क्षमाभूमिः सप्तमेत्वथसंप्राप्तेहैमंताम्रेनिवेशयेत् रक्तवस्त्रयुगच्छन्नंकुंकुमेनानुलेपितं निवेद्यभक्त्याकंसारपुष्पधूपाक्षतादिभिः होमंघृततिलैःकुर्यात्कुजनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेववा होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच समिधःखादिरैः मंत्रेणानेनतंदद्याद्ब्राह्मणायकुटुंबिने कुजकुप्रभवोपित्वंमंगलःपरिगद्यसे अमंगलंनिहत्याशुसर्वदायच्छमंगलम् एवं

कृतेभौमकृतंदुष्कृतंशांतिमाप्नुयात् इत्यंगारकशांतिः अथबुधशांतिः विशाखासुबुधंगृह्यसप्तनक्तान्यथाचरेत् बुधंहेममयंकृत्वास्थापितं कांस्यभाजने शुक्लवस्त्रयुगच्छन्नंशुक्लमाल्यानुलेपितं गुडौदनोपसंहारंब्राह्मणायनिवेदयेत् बुधत्वंबुद्धिजननोबोधवान्सर्वदानृणाम् तत्वावबोधंकुरुमेसोमपुत्रनमोनमः होमंघृततिलैःकुर्याद्बुधनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेवच होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच समिधोपामार्गस्य इतिबुधशांतिः अथगुरुशांतिः तत्रैव गुरुंचैवानुराधासुपूजयेद्भक्तितोनरः पूर्वोक्तविधिनाप्योगेसप्तनक्तान्यथाचरेत् हैमंहेममयेपात्रेस्थापयित्वाबृहस्पतिं पीतांबरयुगच्छन्नंपीतयज्ञोपवीतिनं पादुकोपानहच्छत्रकमंडलुविभूषितम् पूजयेत् पीतकुसुमैः कुंकुमेनविलेपितम् धूपदीपादिभिर्दिव्यैःफलैश्चंदनतंडुलैः खंडखाद्योपहारैश्चगुरोरग्रेनिवेदयेत् धर्मशास्त्रार्थतत्त्वज्ञज्ञानविज्ञानपारग विबुधार्तिहराचिंत्यदेवाचार्यनमोस्तुते होमंघृततिलैःकुर्याद्गुरुनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेवच होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच समिधोश्वत्थस्य विषमस्थेगुरौकार्यामहाशांतिरियंनृभिः इतिगुरुशांतिः अथशुक्रशांतिः शुक्रंज्येष्ठासुसंगृह्यक्षमायांनक्तभोजनम् गुरूक्तक्रममार्गेणद्विजसंतर्पणेनच सप्तमेत्वथसंप्राप्तेरौप्यंशुक्रंतुकारयेत् वंशपात्रेचसंस्थाप्यपूजयेत्सितपंकजैः तदभावेसितैःपुष्पैस्तांबूलैश्चंदनेनच अथैतस्यप्रदातव्यंपायसंघृतसंयुतं दद्यादनेनमंत्रेणब्राह्मणायकुटुंबिने भार्गवोभर्गशुक्रश्चश्रुतिस्मृतिविशारदः हित्वाग्रहकृतान्दोषानायुरारोग्यदोस्तुसः होमंघृततिलैःकुर्याच्छुक्रनाम्नाचमंत्रवित् समिधोष्टोत्तरशत

मष्टाविंशतिरेवच होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच इतिशुक्रशांतिः अथशनैश्चरादिशांतिः तत्रैवशनैश्चरंराहुकेतूलोहपात्रेषुविन्यसेत् कृष्णागरुःस्मृतोधूपोदक्षिणाचस्वशक्तितः यथाक्रमंशमीदूर्वाकुशानांसमिधःस्मृताः सप्तमेत्वथसंप्राप्तेतद्दूर्णानिधकारयेत् कृष्णवस्त्रयुगच्छन्नमेकैकंकारयेद्बुधः मृगनाभ्यासमालभ्यकृसरान्विनिवेद्यच होमावसानेतत्सर्वंब्राह्मणायोपपादयेत् शनैश्चरनमस्तेस्तुनमस्तेराहवेतथा केतवेचनमस्तुभ्यंसर्वशांतिंप्रयच्छमे इतिदिनकरभट्टकृतेशांतिसारेशनैश्चरादिशांतिः अथशनैश्चरव्रतं तत्रैव ततोमंदस्यदिवसे स्नानमभ्यंगपूर्वकम् कार्यंदेयंचविप्रायतैलमभ्यंगहेतवे यस्तुसंवत्सरंयावत्प्राप्तेशनिदिनेनरः तैलंददातिविप्रेभ्योस्वशक्त्यात्यजतेपि· वा· ततः संवत्सरस्यान्तेप्राप्तेतस्यदिनेपुनः लोहंघटार्पितंसौरिंतैलकुंभेविनिक्षिपेत् लोहेताम्रमयेवाथकृष्णवस्त्रयुगान्वितम् कृष्णगोदक्षिणायुक्तंकृष्णाकंबलशायिनम् स्वयमभ्यंगतःस्नात्वाकृष्णपुष्पैस्तमर्चयेत् सुगंधिगंधपुष्पैश्चकृसरान्नैस्तिलोदनैः पूजयित्वा सूर्यपुत्रंक्षमस्वेतिपुनःपुनः कृष्णायद्विजमुख्यायतदभावेतरायच देयःशनैश्चरोभक्त्यामन्त्रेणानेनवैद्विज कोणंनीलांजनप्रख्यंमंदचेष्टाप्रसारिणम् छायामार्तण्डसंभूतंनमस्यामिशनैश्चरम् नमोर्कपुत्रायशनैश्चरायनीहारवर्णांजनमेचकाय श्रुत्वारहस्यंभववकामदस्त्वंफलप्रदोमेभवसूर्यपुत्र नमोस्तुप्रेतराजायकृशदेहायवैनमः शनैश्चरायक्रूरायशद्धबुद्धिप्रदायिने अथशनैश्चरशांतिः तत्रैवस्कान्दे द्वादशाष्टमजन्मस्थेशनौसर्वग्रहेश्वरे श्रावणेमासिसंप्राप्तेप्रथमेशनिवासरे लोहरूपंशनिंकृत्वास्नाप्यपंचामृतैर्नवैः पुष्पैरष्टविधैर्धूपै

फलैश्चैवविशेषतः नामभिः पूजयेदेतैः क्रमेणग्रहसत्तमम् कोणस्थः पिंगलोबभ्रुः कृष्णोरौद्रोयमोंतकः सौरिःशनैश्चरोमंदःपिप्पलादेनसंस्तुतः शन्नोदेवीतिसर्वत्रवैदिकेनचपूजयेत् पूजांतिलार्चनैवेद्यंततःकुर्यात्क्रमेणतु समाषभक्तंप्रथमेद्वितीयेपायसंशुभम् तृतीयेत्वाबिली कार्याचतुर्थेपूरिकाशुभा अबिलीतक्रतंडुलपिष्टादिनिर्मितोलेह्यविशेषः प्रथमादिशब्दाःवासरपराः इतिशनैश्चरशांतिः अथशनैश्चरस्तुतिः मदनरत्ने नारदउवाच ततःकृतांजलिर्भूत्वास्तुतिंचक्रेसबालकः पिप्पलादोद्विजश्रेष्ठप्रणिपत्यमुहुर्मुहुः नमस्तेकोणसंस्थायपिंगलाय नमोस्तुते नमस्तेबभ्रुरूपायकृष्णायचनमोस्तुते नमस्तेरौद्रदेहायनमस्तेचांतकायच नमस्तेयमसंज्ञायनमस्तेसौरयेविभो नमस्तेमंदसंज्ञायशनैश्चरनमोस्तुते प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच शनैश्चरउवाच परितुष्टोऽस्मितेवत्सस्तोत्रेणानेनसांप्रतम् वरंवरयभद्रंवत्सयेनयच्छामिवांछितं पिप्पलादउवाच अद्यप्रभृतिनोपीडाबालानांरविनंदन त्वयाकार्यामहाभागनस्वकीयाकथंचन यावद्वर्षाष्टकंजातंममवाक्येनसूर्यज स्तोत्रेणानेनयोऽन्यस्त्वांब्रूयात्प्रातरुपस्थितः तस्यपीडानकर्तव्यात्वयाभास्करनंदन अर्द्धाष्टमिकयायोगेतावकेसंस्थितेनरे सार्द्धवर्षसप्तपर्यंतंद्वादशजन्मद्वितीयराशिभिर्यःशनैश्चरयोगःसार्द्धाष्टमिका तद्वारेतुसंप्राप्तेयस्तिलान्लोहसंयुतान् भक्त्याददातिनोतस्यपीडाकार्यात्वयाविभो कृष्णांगांयस्तुविप्रायतवोद्देशेनयच्छति अर्द्धाष्टमिकयापीडातस्यकार्यात्वयानच शमीसमिद्भिर्योहोमंतवोद्देशेननिर्वपेत् तथाकृष्णतिलैश्चैवकृष्णपुष्पानुलेपनैः पूजांकरोतियस्तुभ्यंधूपंवैगुग्गुलंदहेत् कृष्णवस्त्रेणसंवेष्ट्यत्याज्यातस्यत्वयाव्यथा सूतउवाच ए

यमुक्तः शनिस्तेनबाढमित्येवजल्प्यच नारदंसमनुज्ञायजगामनिजसंश्रयं इतिशनैश्चरस्तुतिः अथनवग्रहस्नानानि तत्रैवविष्णुधर्मे मंजिष्ठामदमातंगंकुंकुमंरक्तचंदनं पूर्णकुंभेगतंताम्रेसूर्यस्नानंविधीयते मदमातंगगजमदः उशीरंचशिरीषंचकुंकुमंरक्तचंदनं शंखंन्यस्तमिदंस्नानंचंद्रदोषविनाशनम् खदिरंदेवदारुंचतिलान्यामलकानिच पूर्णकुंभेकृतेरौप्येभौमपीडाविनाशनम् नदीसंगमतोयानितन्मृदासहितानिच न्यस्तानिकुंभेमाहेयेबुधपीडाविनाशनं माहेयेमृन्मये औदुंबरंतथाबिल्वंवटमाम्लकंतथा न्यस्तंतुकुंभेसौवर्णेजीवपीडाविनाशनं गोरोचनामृगमदः शतपुष्पशतावरी विन्यस्ताराजतेकुंभेशुक्रपीडाविनाशनम् तिलान्माषान्प्रियंगुंचगंधपुष्पैस्तथैवच न्यस्तंकार्ष्णायसेकुंभेसौरिपीडाविनाशनं गुग्गुलंहिंगुलंतालंशुभांचैवमनःशिलं शृंगेचमाहिषेन्यस्येद्राहुपीडाविनाशनं तालंहरितालं वराहविहितांराजन्पर्वताग्रमृदंतथा छागक्षीरंखड्गपात्रेकेतुपीडाविनाशनं ग्रहस्नानमिदंप्रोक्तंसर्वपीडाविनाशनं इतिग्रहस्नानानि अथग्रहयोगशांतिः मदनरत्नेयामले अथातःसंप्रवक्ष्यामिग्रहयोगाख्यशांतिकं एकर्क्षेतिग्मराशौवाएकराश्यर्क्षभेदने शशिसूर्यसमायुक्तेग्रहत्रयसमन्विते दुर्भिक्षादिभयेचैवचतुर्भयसमन्विते महारोगभयंराष्ट्रक्षयोवृष्टिविनाशनं पंचग्रहसमायोगेदुर्भिक्षंसंकरादिकं नृपवैरंगर्भनाशोजायतेजननाशनम् ग्रहषट्कसमायोगेमंत्रिणांमरणंभवेत् पशवश्वादिभयंसर्वसंकरादिजनक्षयः पट्टराज्ञोविनाशोवामहाभयमथापिवा सप्तग्रहसमायोगेक्षितीशमरणं ध्रुवम् जगत्प्रलयमेवापितदानिर्मानुषंजगत् सूर्यःस्याद्व्यतिरिक्तश्चेत्तदायोगोमहाद्भुतः विनाचंद्रेणयोगोपिजगत्प्रलयकारणम् तदृक्षजातजं

तूनांमहारोगोमहाभयं अर्थनाशःस्थाननाशोमानहानिर्नृपीडनम् षण्मासाभ्यंतरेवापिआयुहानिःप्रियस्तथा जन्माष्टद्वादशेराशौचतुर्थेपंचमेपिवा पूर्वोक्तफलमेवातस्तस्याःशांतिंप्रयत्नतः कुर्याद्दोषानुसारेणवित्तशाठ्यंनकारयेत् तत्तद्ग्रहाकृतिंकृत्वासौवर्णेनप्रयत्नतः सुवर्णस्यतदर्द्धेनपादेनापिकनीयसी ग्रहस्यैकैककलशंग्रहयोगप्रमाणतः कारयेत्कुंभमेकंवानिर्व्रणंसुदृढंनवं ग्रहस्यैशानदिग्भागेशुद्धदेशेसमस्थले कुंडेवास्थंडिलेवापिहोमंकुर्याद्विधानतः तस्यपूर्वोत्तरेदेशेपूर्वांस्थानंप्रकल्पयेत् चतुर्हस्तंहस्तमात्रंस्थंडिलंतंडुलेनतु लिखेद्ग्रहाकृतिंतत्रस्थापयेत्प्रतिमांततः अधिप्रत्यधिदेवादीन्दक्षिणोत्तरतः क्षिपेत् उक्तगंधैस्तथापुष्पैस्तत्तन्माल्यैःफलैरपि तत्तद्ग्रहोक्तमंत्रेणपूर्वोक्तेनैवपूजयेत् ग्रहपूजादिकंकृत्वानैवेद्यांतंसमर्पयेत् ततोहोमंप्रकुर्वीतस्वगृह्योक्तविधानतः चतुर्थ्यंतंप्रकुर्वीतकलशस्थापनंततः पूर्वोक्तविधिनानेनशुद्धतोयेनपूरयेत् पंचामृतंपंचगव्यंपंचत्वक्पंचपल्लवं तत्तन्मंत्रैर्विनिक्षिप्यऔषधानिविनिक्षिपेत् तत्तद्ग्रहोक्तविधिनामूलान्यादायनिक्षिपेत् मूलानिसर्वौषध्यअब्लिंगैर्वारुणैर्वापिकलशंपूरयेद्गुरुः तत्तद्ग्रहोक्तविधिनातत्तन्मंत्रैर्हुनेदथ चर्वाज्यैर्जुहुयात्पश्चात्तिलाहुतिमथाचरेत् अथस्विष्टकृतंहुत्वाहोमशेषंसमापयेत् भद्रासनोपविष्टस्ययजमानस्यऋत्विजः कलशस्थोदकेनैवमभिषेकंसमाचरेत् योगग्रहोक्तमंत्रैश्चअधिप्रत्यधिमंत्रतः नवग्रहोक्तमंत्रैश्चजातवेदादिपंचकैः योगग्रहोक्तमंत्राआकृष्णेत्यादयःनवग्रहोक्तमंत्रास्तत्तद्ग्रहशांतिप्रकरणोक्ताः आदिदेवनमस्तुभ्यमित्यादयः त्र्यंबकेनमंत्रेणक्षेत्रस्यपतिनाअपि यतइंद्रभयेनैवलोकपालाष्टकैरपि सुरास्त्वामितिमंत्रेणयेनदेवादयःक्रमात् अन्यैश्चपुण्यसूक्तैश्चअभिषेकं

समाचरेत् अभिषेकप्लुतंवस्त्रमाचार्यायनिवेदयेत् ततःशुक्लांबरधरःकुर्यादाज्यावलोकनम् ऋत्विग्भ्योदक्षिणांदद्याद्धेनुशंखादिकानपि त
दभावेयथाशक्तिहिरण्यमपिदापयेत् ब्राह्मणान्भोजयेत्पश्चाद्यथाविभवसारतः इतिदिनकरभट्टकृतेशांतिसारेग्रहयोगशांतिः अथगुरुपूजा
मदनरत्नेस्कांदे कन्याविवाहकालेतुशुद्धिर्यस्यानविद्यते ब्राह्मणस्योपनयनेयस्यस्याद्दुःस्थितागतः दुःस्थितंप्राप्तः एभिःपूजागुरोःकार्याविधि
वद्भक्तिभावितैः मदंतीकामपुष्पाणिपत्रंपालाशसर्षपाः मदंतीयूथिकाकामोदमनवृक्षः गुडूचीचाप्यपामार्गविडंगंशंखिनीवचा सहदेवी
विष्णुक्रांतासर्वौषध्यःशतावरी कुष्टंमांसीहरिद्रेद्वेसुराशैलेयचंदनम् वचाकचोरमुस्तंचसर्वौषध्यःप्रकीर्तिताः तथैवाश्वत्थमंगल्यंपंचगव्यं
जलंतथा नूतनंसोदकुंभंचपीतवस्त्रसमन्वितं पंचरत्नैःसमायुक्तमीशान्यांस्थाप्यचानलात् याओषधीतिमंत्रेणसर्वास्त्वस्मिन्विनिक्षिपेत् कुंभ
स्योपरिभागेतुस्थापयित्वाबृहस्पतिं सुवर्णपात्रेसौवर्णींप्रतिमांतुयुधिष्ठिर कारयेत्तुयथाशक्तिवित्तशाठ्यविवर्जितः पीतवस्त्रस्रुगच्छन्नंपीतय
ज्ञोपवीतिनं पूजयेद्गंधपुष्पाद्यैस्ततोहोमंसमाचरेत् समिधोश्वत्थवृक्षस्यहोम्याअष्टोत्तरशतं तिलव्रीहियवाज्यंचहोतव्यंचयथाक्रमम् बृ
हस्पतेतिमंत्रेणऋषिछन्दःसमन्वितम् ततोहोमावसानेतुपूजयेच्चबृहस्पतिम् पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्चभक्तितः दध्योदनंचनैवेद्यंफ
लतांबूलसंयुतम् नमस्तेंगिरसानाथवाक्पतेऽथबृहस्पते क्रूरग्रहेपीडितानाममृतायनमोनमः पूजयित्वासुराचार्यंपश्चादर्घ्यंनिवेदयेत् गंभी
रहटरूपांगदिवेज्यसुमतिप्रभो नमस्तेवाक्पतेशांतगृहाणार्घ्यंबृहस्पते अर्घ्यंदत्वासुरेशायजपहोमंसमर्चयेत् भक्त्यायतेसुराचार्यहोमपू

जादिसत्कृतं तत्त्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमः मंत्रेणानेनसंकल्प्यपश्चात्संप्रार्थयेन्नृप जीवोबृहस्पतिःसूरिराचार्योगुरुरंगिराः वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदामम सर्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिर प्रणम्यचगवायुक्तामाचार्यायनिवेदयेत् अथाचार्यस्तुनियतोवेदवेदांगपारगः यजमानंसपत्नीकंशांतचित्तंजितेंद्रियम् कुंभोदकंगृहीत्वातुमंत्रैरेतैःप्रसिंचयेत् इदमापोथमंत्रेणतामग्निमित्यृचातथा याओषधीरश्वावतीकूष्मांडैश्चाभिषेचयेत् पश्चात्संभोजयेद्विप्रान्यथाशक्तियुधिष्ठिर संक्रांतावपिकौंतेयतथास्वाभ्युदयेषुच कुर्वन्बृहस्पतेःपूजामभीष्टंफलमाप्नुयात् संक्रांतौगुरुसंक्रांतौ इतिगुरुपूजाविधिः अथप्रतिकूलादिशांतिः स्मृतिचंद्रिकायांभृगुः वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदोद्वाहोनैवकार्यःकृतोवैधव्यमाप्नुयात् कुलयोर्वधूवरकुलयोरित्यर्थः शौनकः पितापितामहश्चैवमाताचैवपितामही पितृव्यस्त्रीसुताभ्राताभगिनीचविवाहिता एभिरत्रविपन्नैश्चप्रतिकूलंबुधैःस्मृतम् अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेत् एतच्चत्रिपुरुषोपलक्षणं पुरुषत्रयपर्यन्तप्रतिकूलंस्वगोत्रिणां प्रवेशनिर्गमस्तद्वत्तथामंडनमुंडने प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियाम् आचतुर्थंततःपुंसिपंचमेशुभदंभवेदिति मेधातिथिवाक्येनोपसंहारात् वधूवरयोःपितरमादायपुरुषत्रयपर्यंतमित्यर्थः अन्यथा आचतुर्थादित्यस्यपंचमइत्यस्यचासंगत्यापत्तेः प्रतिकूलकृतश्चदोषोवर्षावधिरेव तथाचमेधातिथिः वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदासंवत्सरादूर्ध्वंविवाहःशुभदोभवेत् संकटेतुसोन्तरंशांतिंकृत्वाविवाहःकार्यः प्रतिकूलेपिकर्तव्योविवाहोमासतःपरः शांतिंविधायगांदत्वावाग्दानादिचरेत्पुनरितिज्योतिःप्रकाशवचनात् वा

ग्दानादीत्यतद्गुणसंविज्ञानोबहुव्रीहिः वाग्दानस्यपूर्वकृतत्वेनावृत्त्ययोगादितिकेचित् पुनःपदेनावृत्त्युक्तेरदृष्टार्थपुनर्वाग्दानमितिगागाभट्टीयःपंथाः शांतिंविनायकेशांतिं संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेदितिमेधातिथ्युक्तेः अथनांदीश्राद्धोत्तरंसंस्कार्यमातूरजोदर्शनेशांतिः माधवीये प्रारंभात्प्राग्विवाहस्यमातायदिरजस्वला निवृत्तिस्तेनकर्तव्यासहत्वंश्रुतिचोदनात् प्रारंभोत्तरंरजोदर्शीनेनकर्मनिषेधइत्यर्थः प्रारंभश्चनांदीश्राद्धम् प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रियेतिवचनात् मेधातिथिः चौलेचव्रतबन्धेचविवाहेयज्ञकर्मणि भार्यारजस्वलायस्यप्रायस्तस्यनशोभनम् वधूवरान्यतरयोर्जननीचेद्रजस्वला तस्याःशुद्धेःपरंकार्यंमांगल्यंमनुरब्रवीत् संकटेत्वशुद्धेः पूर्वमपिश्रियंसंपूज्यमंगलंकार्यम् अलाभेसुमुहूर्तस्यरजोदर्शेह्युपस्थिते श्रियंसंपूज्यविधिवत्ततोमंगलमाचरेत् हैमींपद्मांमाषमितांश्रीसूक्तविधिनार्चयेत् प्रत्यृचंपायसंहुत्वागांचदद्यात्पयस्विनीम् चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेदितिवाक्यसारवचनात् संग्रहेतुप्रकारांतरमुक्तम् संकटेसमनुप्राप्तेसूतकेसमुपागते कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीम् चौलोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् संकटेसूतकेइत्यर्थः इतिशांतिसारेप्रतिकूलादिशांतिः अथप्रतिशक्रादिशांतिः तत्रैवमात्स्ये अथातःशृणुभूपालप्रतिशक्रप्रशांतये यात्रारंभेवसानेचतथाशक्रोदयेसति शक्रपूजाप्रकर्तव्यातांनिशामयभारत राजतेवाथसौवर्णेकांस्यपात्रेथवा पुनः शुक्लपुष्पांबरयुतेश्वेततंडुलपूरिते निधायराजतंशुक्रंशुचिमुक्ताफलान्वितं महाश्वेतंगवायुक्तंसामगायनिवेदयेत् नमस्तेसर्वलोकेशनम

स्तेभृगुनंदन कवेसर्वार्थसिद्ध्यर्थंगृह्णाणार्घ्यंनमोस्तुते दत्वैवमर्घ्यंकौंतेयप्रणिपत्यविसर्जयेत् एवंशुक्रोदयेकुर्याद्यात्रादिषुचभारत तद्वाचस्पतेःपूजांप्रवक्ष्यामियुधिष्ठिर सौवर्णपात्रेसौवर्णंममरेशपुरोहितम् पीलपुष्पांबरधरंकृत्वास्नात्वाथसर्षपैः पालाशाश्वत्थभंगेनपंचगव्यतिलेन तु भंगःपल्लवः पीतांगरागवसनोघृतहोमंतुकारयेत् प्रणम्यचगवासार्द्धंब्राह्मणायनिवेदयेत् नमस्तेंगिरसांनाथवाक्पतेथबृहस्पते क्रूरग्रहैःपीडितानाममृतायनमोनमः संक्रांतावपिकौंतेययात्रास्वभ्युदयेषुच कुर्वन्बृहस्पतेःपूजांसर्वान्कामानुसमश्नुते अथवामौक्तिकान्येवसुरत्नानिह हंतिच भार्गवांगिरसौचिंत्यतान्येवप्रतिपादयेत् इतिशांतिसारेप्रतिशुक्रादिशांतिः अथग्रहणशांतिर्मात्स्ये यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः स्नानंतस्यप्रवक्ष्यामिमंत्रौषधिसमन्वितम् चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनम् संपूज्यचतुरोविप्रान्शुक्लमाल्यानुलेपनैः पूर्वमेवोपरागस्यसमानीयौषधादिकम् स्थापयेच्चतुरःकुंभानग्रतःसागरानिति गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंपंचरत्नंपंचत्वकृपंचपल्लवम् रोचनंपद्मकंशंखंकुंकुमंरक्तचन्दनम् शुद्धस्फटिकतीर्थांबुसितसर्षपगुग्गुलान् मधुकंदेवदारुंचविष्णुक्रांतांशतावरीम् बालांचसहदेवींचनिशाद्वितयमेवच एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरान् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः योसौवज्रधरोदेवआदित्यानांप्रभुर्मतः सहस्रनयनश्चेन्द्रोग्रहपीडांव्यपोहतु यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः ममचंद्रोपरागोत्थांग्रहपीडांव्यपोहतु मुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः चन्द्रो-

परागसंभूतामग्निःपीडांव्यपोहतु रक्षोगणाधिपःसाक्षान्नीलांजनसमःप्रभुः खड्गहस्तोतिभीमश्चग्रहपीडां॰ नागपाशधरोदेवःसदामकरवा
हनः सजलाधिपतिर्देवोग्रह॰ प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः वायुश्चन्द्रोपरागोत्थांग्रह॰ योसौनिधिपतिर्देवःखड्गशूलगदाधरः चंद्रोप
रागकलुषंधनदोत्रव्यपोहतु योसाविन्दुधरोदेवःपीनाकीवृषवाहनः चंद्रोपरागपापानिसनाशयतुशंकरः त्रैलोक्येयानिभूतानिस्थावराणिच
राणिच ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपातकम् एवमावाहयेद्देवान्मंत्रैरभिश्चवारुणैः एतानेवतथामंत्रान्स्वर्णपट्टेविलेखयेत् ताम्रपट्टेथ
वालिख्यनववस्त्रेणतथैवच मस्तकेयजमानस्यनिदध्युस्तेद्विजोत्तमाः कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान् गृहीत्वास्थापयेद्रुद्रं
भद्रपीठोपरिस्थितम् पूर्वैरेवतुमंत्रैश्चयजमानंद्विजोत्तमाः अभिषेकंततःकुर्युर्मन्त्रैर्वारुणसूक्तकैः आचार्यंवरयेत्पश्चात्स्वर्णपट्टंनिवेदये
त् आचार्यदक्षिणांदद्याद्गोदानंचस्वशक्तितः होमंचापिप्रकुर्वीततिलैर्व्याहृतिभिस्तथा दानंचशक्तितोदद्याद्यदीच्छेदात्मनोहितम् सू-
र्यग्रहेसूर्यनामयुक्तान्मंत्रांश्चकीर्तयेत् अनेनविधिनायस्तुग्रहणेस्नानमाचरेत् नतस्यग्रहणेदोषःकदाचिदपिजायते भार्गवार्चनदीपिका-
यांज्योतिःसागरे सौवर्णंकारयेन्नागंपलेनाथपलार्द्धतः तदर्द्धेनतदर्द्धेनफणायांमौक्तिकंन्यसेत् ताम्रपात्रेनिधायाथघृतपूर्णेविशेषतः
कांस्येवाकांतलोहेवान्यस्यदद्यात्सदक्षिणम् चन्द्रग्रहेतुरूप्यस्यबिम्बंदद्यात्सदक्षिणम् नागंरुक्ममयंसूर्यग्रहेबिम्बंचहेमजम् तुरंगरथ
गोभूमितिलसर्पिश्चकांचनम् कालविवेकेऽपि सुवर्णनिर्मितंनागंसतिलंकांस्यभाजनम् सदक्षिणंसवस्त्रंचब्राह्मणायनिवेदयेत् सौवर्णं

राजतंवापिबिंबंकृत्वास्वशक्तितः उपरागभवक्लेशाच्छिदेविप्रायकल्पयेत् मंत्रस्तु तमोमयमहाभीमसोमसूर्यविमर्दन हेमताराप्रदानेनममशांतिप्रदोभव विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत दानेनानेननागस्यरक्षमांवेधजाद्भयात् मदनरत्नेतुस्नानमात्रमुक्तम् दूर्वांकुरोशीरशमीशिलाजित्सर्वार्थसर्वौषधिपंचमृद्भिः स्नानंविदध्याद्ग्रहणेरवीन्द्वोःपीडाकरेशांतिवहंहियस्य अद्भुतसागरेभार्गवः यस्यराज्यस्यनक्षत्रेस्वर्भानुरुपरज्यते राज्यभंगंसुहृन्नाशंमरणंचात्रनिर्दिशेत् इतिदिनकरभट्टकृतेशांतिसारेग्रहणशांतिः 4 अथविनायकशांतिः अत्र ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चसिद्धिकामुकैः कर्मनिर्विघ्नसिद्ध्यर्थंसुपूज्यस्तुगजानन इतिलिंगात् यजमानस्तुशूद्रश्चेद्द्विजैस्तांनियोजयेत् इतिमहार्णवाच्चशूद्रस्याप्यधिकारः याज्ञवल्क्यः विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोजितः गणानामाधिपत्येचरुद्रेणब्रह्मणातथा कर्मणामविघ्नार्थंसिद्ध्यर्थंचेत्यर्थः तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधत स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति काषायवाससश्चैवक्रव्यादांश्चाधिरोहति अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्रावतिष्ठते ब्रजन्नपितथात्मानंमन्यतेनुगतंपरैः स्वप्नइतिसर्वत्रसंबध्यते भविष्ये तैलार्द्रगात्रंविधुरंकरवीरविभूषितम् एवंस्वप्नानुक्त्वाप्रत्यक्षदर्शनान्याह याज्ञवल्क्यः विमनाविफलारंभःसंसीदत्यनिमित्ततः तेनोपसृष्टोलभतेनराज्यंराज्यनंदनः कुमारीनचभर्तारमपत्यंगर्भमंगना आचार्यत्वंश्रोत्रियश्चनशिष्योऽध्ययनंतथा वणिग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः स्नपनंतस्यकर्तव्यंपुण्येह्निविधिपूर्वकम् तस्यविनायकोपसृष्टस्यपुण्येन्हियस्मिन्कस्मिंश्चित् यत्तु शुक्लपक्षेचतुर्थ्यांचवारेणाधिषणस्यच तिष्येचवीरनक्षत्रे

तस्यैवपुरतोनृपेत्यपरार्केभविष्येतच्छ्रीकामस्नपनपरम् धिषणस्यगुरोः तस्यविनायकस्य तत्रादौदेवतापूजोक्तापरार्केभविष्ये व्योमकेशंतु संपूज्यपार्वतींभीमजंतथा कृष्णस्यपितरंतातअर्कमारंसितंतथा धिषणंकुद्रपुत्रंचकोणंलक्ष्मचभारत विधुंतुदंबाहुलेयंनंदकस्यचधारणम् व्योमकेशः शिवः भीमजोगणेशः आरोभौमः सितः शुक्रः कुद्रपुत्रोबुधः कोणःशनैश्चरः लक्ष्मस्तद्वांश्चंद्रः बाहुलेयःस्कंदः याज्ञवल्क्यः गौरसर्षपकल्केनसाज्येनोत्सादितस्यच सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः उत्सादितस्य उद्वर्तितांगस्य सर्वौषधानिमात्स्ये सहदेवीवचाव्याघ्रीबलाचातिबलातथा शंखपुष्पीतथासिंही अष्टमीतुसुवर्चला महौषध्यष्टकंह्येतन्महास्नानेषुयोजयेत् महार्णवेत्वन्यान्युक्तानि मुरामांसीवचाकुष्ठंशैलेयंरजनीद्वयम् शठचंपकमुस्ताश्चसर्वौषधिगणःस्मृतः याज्ञवल्क्यः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् मृत्तिकांरोचनंगंधंगुग्गुलंचविनिक्षिपेत् याआहृताएकवर्णैश्चतुर्भिःकलशैर्ह्रदात् कलशेराहृतास्वप्सुक्षिपेदित्यर्थः अत्रविशेषोवैजवापगृह्ये चतुःप्रस्रवणेभ्यश्चकुंभानाहृत्यतेषुसर्वौषधिसर्वगंधान्हिरण्यव्रीहियवगुग्गुलमृदमाखूत्करमितिप्रक्षिपेदितिशेषः याज्ञवल्क्यः चर्मण्यानडुहेरक्तेस्थाप्यभद्रासनंततः सहस्राक्षंशतधारमृषिभिःपावनंकृतम् तेनत्वामभिषिंचामिपावमान्यःपुनंतुते भगंतेवरुणोराजाभगमिंद्रोबृहस्पतिः भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि ललाटेकेशयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा पूर्वादिकलशत्रयेएकैकोमंत्रश्चतुर्थेमंत्रत्रयमितिविज्ञानेश्वरः सर्वकलशेषुमंत्रत्रयमित्यप

रार्कः युक्तंचैतदेवविधिनिगमकाभावात् स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणतु जुहुयान्मूर्द्धनिकुशान्सव्येनपरिगृह्यच मितश्चसंमितश्चैवतथाशालकटंकटौ कूष्मांडोराजपुत्रश्चेत्यंतैस्स्वाहासमन्वितैः अपरार्केतुशालकटंकटः कूष्मांडोराजपुत्रश्चेतिपाठः मूर्द्धनिहोमः नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः पूर्वोक्तषण्णामभिस्तैलंहुत्वाचरुशेषेणेंद्रादिनामभिर्बलिंदद्यात् इतिविज्ञानेश्वरः अपरार्केतुपूर्वोक्तचतुर्नामभिस्तैलंहुत्वातैरेवनामभिः कृताकृतादिबलिर्देयः चरुहोमस्तुनास्त्येवेत्युक्तं दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः कृताकृतांस्तंडुलांश्चपललौदनमेवच मत्स्यान्पक्वांस्तथाचांगान्मासमेतावदेवतु मांसंमत्स्यभिन्नम् एतावदितिपक्वमपक्वंचेत्यर्थः तिलपिष्टमिश्रओदनः पललौदनः पुष्पंचित्रंसुगंधंचसुरांचत्रिविधामपि मूलकंपूरिकापूपांस्तथैवोंडेरकस्रजः दध्यन्नंपायसंचैवगुडमिश्रंसमोदकम् ब्राह्मणैःकापिसुरानग्राह्या क्षत्रियवैश्याभ्यांतुपैष्टीनग्राह्येत्यत्रमूलंमृग्यम् मूलकंप्रसिद्धं ग्राह्यमितिमहार्णवे तदाकारःपिष्टविकारइतिविज्ञानेश्वरः उंडेरकस्रजः क्षुद्रापूपाइत्यपरार्कः महार्णवेतु वर्तुलैश्चतुरस्रैश्चदीर्घैःपिष्टविकारकैः निर्मिताःस्रजउच्यंतेउंडेरकसमाख्ययेत्युक्तं गुडमिश्रंपिष्टमित्यर्थः मोदकालड्डुकाः बृहत्पराशरेणकुल्माषाःफलानिचेत्यधिकमुक्तम् एतत्सर्वमेकस्मिन्शूर्पेनिधाय सूक्तन्निवेदयेदित्यर्थः एतान्सर्वानुपाहृत्यभूमौकृत्वा ततःशिरः विनायकस्यजननीमुपतिष्ठेत्ततोंबिकाम् दूर्वासर्षपपुष्पाणांदत्वार्घ्यंपूर्णमंजलिम् दूर्वादिपूर्णमंजलिंसजलंविनायकायांबिकायैचार्घ्यंदत्वोपतिष्ठेदित्यर्थः रूपंदेहियशोदेहिभगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे विनायकोपस्थानेभगवन्नि-

स्पृह इतिविज्ञानेश्वरः ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेत्पश्चाद्वस्त्रयुग्मंगुरोरपि एवंविनायकंपूज्यग्रहांश्चैवविधानतः
कर्मणांफलमाप्नोतिश्रियंप्राप्नोत्यनुत्तमाम् आगमेतुविनायकांबिकयोःपीठविशेषउक्तः आदौषट्कोणकंकृत्वापद्ममष्टदलंततः केसरैःशोभि
तंतच्चचतुरस्रंततोभवेत् आसनंकल्पयित्वातुप्रणवेनयथाविधि कर्णिकायांन्यसेद्देवंगणेशंचांबिकांतथा आदित्यंचतथान्यस्यब्रह्मविष्णुम
हेश्वरान् न्यसेत्तत्पीठमध्येचषट्पत्रेषुमितादिकान् मातृश्चकेसराग्रेषुपूर्वादिषुप्रपूजयेत् ततश्चाष्टदलेपद्मेपूजयेद्देवतास्तथा कौमा
रंपूर्वदिग्भागेआग्नेय्यांचकुमारकम् दक्षिणेश्वेतमित्युक्तंनैर्ऋत्येकौशिकंतथा अपस्मारंवारुणेचविशाखंवायुगोचरे कौबेर्यांविन्यसे
त्स्कन्दमीशपत्रेप्रमेयकम् पूर्वादिपद्मपत्रेचसोमादींश्चग्रहान्न्यसेत् ततः इंद्राग्नीपूर्वपत्रेचआग्नेय्यांचकुमारिका ब्रह्माणीदक्षिणेचैववारा
हीनैर्ऋतेतथा वैष्णवीपश्चिमेपूज्याचामुंडावायवेतथा मातरश्चोत्तरेपूज्याईशकोणेमहेश्वरी इंद्राद्यष्टौलोकपालान्पूर्वादिक्रमशोन्यसे
त् शचीस्वाहाचवाराहीखड्गिनीवारुणीतथा मृगारूढाचकौमारीशूलिनीचतथाष्टमी वज्रंशक्तिंदंडखड्गपाशांकुशगदाअपि त्रिशूलंलो
कपालानामायुधानिक्रमाल्लिखेत् ऐरावतंतथामेषंमहिषंप्रेतसंज्ञकम् मकरंचमृगंचैवनरंचवृषभंतथा ऐरावतःपुंडरीकोवामनःकुमुदोंज
नः पुष्पदन्तःसार्वभौमःसुप्रतीकश्चदिग्गजाः ओंकारादिनमोन्तैश्चपूजनीयाःप्रयत्नतः पीतवस्त्रयुगच्छन्नंकलशंजलपूरितम् म
ण्डलात्पूर्वभागेतुसहिरण्यंफलान्वितम् गणानांत्वेतिमंत्रेणसहस्रंचाष्टसंयुतमिति भद्रासनार्थाष्टदलेदेवतावाहनमप्युक्तम् तत्रैव

मध्येकूष्मांडनामानंपूर्वपत्रेप्रमेयकम् दक्षिणस्यांविशाखंचपश्चिमेयक्षभैरवम् उत्तरेराजपुत्रंतुईशानेजृंभकंतथा आग्नेय्यांयज्ञविक्षेपं विरूपाक्षंचनैर्ऋते वायव्येषुचसंस्थाप्यसूर्यकोटरमेवचेति बलिदानेविशेषस्तत्रैव चतुष्पथंगत्वा चतुर्विंशतिदेवेभ्योबलिंदद्याद्यथाविधि विधुरव्यश्चतथाश्येनस्त्र्यंबकोयक्षएवच कूष्मांडोभैरवश्चेतिपूर्वस्यांदिशिसंस्थिताः बलिंगृह्णंतुतेसर्वेमयादत्तंयथाविधि विनायकश्चकूष्मांडोराजपुत्रस्तथैवच यज्ञविक्षेपकश्चैवकुलंगायैनमोनमः अपामारीदक्षिणस्यांपूजनीयाप्रयत्नतः शूर्पकेशीशूर्पक्रोडीहेमपेतश्चकुंभकः विरूपाक्षोलोहिताक्षःपश्चिमस्यांदिशिस्थिताः उत्तरस्यांप्रवक्ष्यामिदेवतामुनिसत्तम विनायकःक्षेत्रपालोवैश्रवणस्ततःपरम् महासेनोमहादेवोमहाराजःसुकीर्तिताः एतेषांपूजनंकृत्वाबलिदानंततःपरमिति अथमिताक्षरानुसारेणप्रयोगः शुभेदिनेविनायकोपसर्गनिवृत्त्यर्थंकर्मफलसिद्ध्यर्थंवा लक्ष्मीप्राप्त्यर्थंविनायकशांतिंकरिष्यइतिसंकल्पयेत् केचिद्वृद्धिश्राद्धमिच्छंति ततः आचार्यंचतुरऋत्विजश्चवृणीत पराशरमतेऽष्टौ ततःआचार्योगोमयोपलिप्तदेशेपंचवर्णैर्भद्रासनार्थमेकंस्वस्तिकंकृत्वा तस्यपूर्वादिदिक्षुचतुरःस्वस्तिकानृत्विग्भिः कारयित्वामध्यस्वस्तिकेरक्तमानडुहंचर्मोत्तरलोमप्राचीनग्रीवंसंस्थाप्यतस्योपरिश्रीपर्णीपीठंसंस्थाप्यश्वेतवस्त्रेणाच्छादयेत् ततोऋत्विग्भिश्चतुर्दिक्षुस्वस्तिकेषुचतुरःकलशांश्चंदनचर्चितान्स्रक्दामसंवेष्टितकंठान्नवाहतवस्त्रभूषितान् धान्यराशौनिधायह्रदोदकेननदीसंगमोदकेनवापूर्यउद्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमितिकुंभेषुपंचमृदःप्रक्षिप्य गंधद्वारामितिचंदनागरुकस्तूरी

कर्पूरादीन्गंधान्गोरोचनांगुग्गुलंचाक्षिप्याश्वत्थेवइति पंचसहकारादिपल्लवान्निक्षिप्यपूर्णपात्रनिधानांते कलशस्यमुखेदेवदानइत्यादि पठित्वा कुं
भेषु त्वन्नोअग्नेवरुणस्येति वरुणमावाह्य षोडशोपचारपूजांपंचोपचारपूजांवा निर्वर्त्यानोभद्राइत्यादिकां शन्नोवातः पवतामित्यादिकांवा अ
न्यावास्वशाखापठितांशांतिंपठेयुः केचित्तु ऐशान्येपंचमोरुद्रकलशः पूर्वकुंभेश्रीसूक्तंदक्षिणेमाहित्रीणामितिसूक्तंपश्चिमेनहितेक्षत्रमितिवारुणं
उत्तरेवामदेव्यंपश्चिमेरुद्रसूक्तानीतिजपमाहुः आचार्योभद्रासनस्योत्तरभागेऐशान्यांवाविनायकं तज्जननीमंबिकांच पीठादिस्थापितप्रतिमयोः
पूजयेत् तत्रमंत्रौ एकदंतायविद्महेवक्रतुंडायधीमहि तन्नोदंतीप्रचोदयात् सुभगायैविद्महेकाममालिन्यैधीमहि तन्नोगौरीप्रचोदयात् तत
स्तत्रैव व्योमकेशम् पार्वतीम् भीमजम् वसुदेवम् अर्कम् मंगलम् शुक्रम् बृहस्पतिम् बुधम् शनैश्चरम् चंद्रम् राहुम् स्कंदम् विष्णुम् एतान्सं
पूज्यगृह्योक्तविधिनाप्रतिष्ठाप्यान्वादध्यात् अन्नप्रधानम् मितम् संमितम् शालं कंटकटम् कूष्मांडम् राजपुत्रंचैकैकयाचर्वाहुत्येत्यादिचरुं
श्रपयेत् यजमानोगवाज्यलोलीकृतेनगोरसर्षपकल्केनोद्वर्तितांगः सर्वौषधचूर्णैश्चंदनागरुकस्तूरिकादिभिश्चालिप्तशिराभद्रासनउपविश्यस्वगृ
ह्योक्तमार्गेणस्वस्तिवाचनंकुर्वीत तत आचार्योजीवत्पतिपुत्राभिः स्त्रीभिःकृतमंगलंयजमानमभिषिंचेत् पूर्वकलशमादाय सहस्राक्षंशत
धारमृषिभिःपावनंकृतम् तेनत्वामभिषिंचामिपावमान्यःपुनंतुतइत्यभिषिंचेत् ततोदक्षिणंकलशमादाय भगंतेवरुणोराजाभगंसूर्योबृह-
स्पतिः भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुरित्यनेन ततःपश्चिमंकलशमादाय यत्तेकेशेषुदौर्भाग्यंसीमंतेयश्चमूर्द्धनि ललाटेकर्णयोरक्ष्णो

रापस्तद्घ्नन्तुसर्वदेत्यनेन ततउत्तरकलशमादाय पूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिच्यबृहत्पाराशरोक्तैरभिषिंचेत् एतद्वैपावमानंस्नानंसहस्राक्षऋषिस्मृतं तेनत्वांशतधारेणपावमान्यःपुनंत्विमाः शक्रादिदशदिक्पालाब्रह्मेशाः केशवादयः आपस्तेघ्नंतुदौर्भाग्यंशांतिंददतुसर्वदा सुमित्र्यानआपओषधयःसंतु दुर्मित्र्यास्तस्मैसंतु योस्मान्द्वेष्टियंचवयंद्विष्मः समुद्रागिरयोनद्योमुनयश्चपतिव्रताः दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयच्छन्तुसर्वदा पादगुल्फोरुजंघाश्वनितंबोदरनाभिषु स्तनोरोबाहुहस्ताग्रग्रीवाअंसांगसंधिषु नासाललाटकर्णभ्रूकेशांतेषुचयत्स्थितं तदापोघ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा एवमभिषिच्ययजमानस्यपश्चात्तिष्ठन्सव्यपाणिगृहीतकुशांतरितेयजमानमूर्द्धनिसार्षपतैलमौदुंबरेणस्रुवेणजुहुयात् ॐमितायस्वाहाॐसंमितायस्वाहा ॐ शालायस्वाहा ॐ कटंकटायस्वाहा ॐ कूष्मांडायस्वाहा ॐ राजपुत्रायस्वाहा यजमानस्त्यागंकुर्यात् इध्माधानादि कृत्वापूर्वोक्तैःषड्भिर्मंत्रैश्चरुंहुत्वाप्रणीताविमोकांतंकृत्वाचरुशेषेणाग्नेरभिषेकशालायांचैंद्र्यादिदिक्षुलोकपालेभ्योबलीन्दद्यात् इंद्रायनमः अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० ब्रह्मणे० अनंताय० अथयजमानःस्नात्वा शुक्लमाल्यांबरधरोगुरुणासहितोविनायकमंबिकांचपूर्वोक्तगायत्रीभ्यांषोडशोपचारैःसंपूज्य कृताकृततंडुलतिलयुक्तोदनंपक्वापक्वमत्स्यपक्वापक्वमांसत्रिविधसुरामूलकापूपपूरिकोंडेरकदध्यन्नपायसगुडमिश्रपिष्टलड्डुककुल्माषफलानिपूर्वोक्तमंत्राभ्यांविनायकायांबिकायैचतमुपहारंददामीतिदत्वाशिरसाभूमिंनत्वासुकुसुमसहितेनोदकेनपूर्वोक्तमंत्राभ्यामर्घ्यंदूर्वासर्षपपुष्पांजलिंचदत्वाविनायकमंबिकांचोपतिष्ठेत् रूपंदेहियशोदेहिभगंभगवन्देहिमे पुत्रान्देहिधनं

देहिसर्वान्कामांश्चदेहिमे इतिविनायकम् रूपंदेहियशोदेहि भगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे इत्यंबिकाम् ततः शूर्पे
कुशानास्तीर्योपहारशेषंतत्रनिधायचतुष्पथंगत्वा तत्रमंत्रैर्बलिंदद्यात् बलिंगृह्णंत्विमेदेवाआदित्यावसवस्तथा मरुतोथाश्विनौरुद्राः सुपर्णाः
पन्नगाग्रहाः असुरायातुधानाश्चपिशाचामातरोरगाः शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः जृंभकाःसिद्धगंधर्वानागाविद्याधरानगाः दि
क्पालालोकपालाश्चयेचविघ्नविनायकाः जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः माविघ्नंमाचमेपापंमासंतुपरिपंथिनः सौम्याभवंतुतृप्ताश्च भू
तप्रेताःसुखावहाः ततःआचम्यगृहंगत्वाऽचार्यायवस्त्रद्वयंऋत्विग्भ्योऽन्येभ्यश्चयथाशक्तिदक्षिणांदत्वा विनायकांबिकयोरुत्तरपूजांकृत्वा
विसृज्याचार्यायप्रतिपाद्यविभूतिंधृत्वाऽग्निंविसृज्यब्राह्मणान्भोजयेत् कर्मेश्वरार्पणंकुर्यात् इतिदिनकरभट्टकृतेशांतिसारेविनायकशांतिः

अथरुद्रविधिः ततःपुरश्चरणाविधिर्हेमाद्रौ कृच्छ्रमाद्यंस्वयंकर्तापराकंचतथापुनः स्नातईशंसमभ्यर्च्यउषित्वासप्तशर्वरीः जपेद्रु
द्रांस्तथाजस्वातदंतेप्राशयेद्घृतम् अपरेहनिसंजातेसमाप्यैवंव्रतंपुनः भास्कराभिमुखोभूत्वातद्दिनेतान्जपेद्बहून् भूयश्चाग्निपरेरुद्रंसंपू-
ज्यविधिवत्ततः घृताक्तैर्बिल्वपत्रैश्चरुद्रहोमंप्रकल्पयेत् एवंसम्यक्कृतेनूनंकृतोसौजायतेद्विजः साक्षाद्रुद्रोमहातेजास्ततःकामांश्चसाध
येत् रुद्रविनियोगस्त्रेधा जपेहोमेऽभिषेकेच रुद्राणांजपहोमार्चनविधिंव्याख्यास्यामइतिमहार्णवेबौधायनोक्तेः किंजप्येनामृतत्वंनो ब्रूहिशतरु
द्रियेणेतिजाबालश्रुतेश्च जपशब्देनकेवलोजपउच्यतेइतिकेचित् अन्येतुमंत्रजपमात्रेदशांशहोमस्यांगत्वाद्दशांशादिहोमविशिष्टोजपोवि

धीयतइत्याहुः एतेनहोमरुद्रेतर्पणादि अभिषेकरुद्रेचब्राह्मणभोजनंसिद्धम् जपादिरुद्रश्चपंचधारूपंरुद्रोरुद्रीमहारुद्रोतिरुद्रश्चेतिएकादशगुणवृद्ध्या तत्ररूपंनामनमकचमकरूपं अन्येषांलक्षणमाहमहार्णवेशातातपः षडङ्गैकादशीरुद्रोरुद्रैकादशरुद्रतः एकादशाभिरेताभिर्महारुद्रश्चकथ्यते एकादशमहारुद्रैरतिरुद्रइतीरितः अस्यार्थः षडंगाषडंगन्याससंहिता एकादशरुद्राणांसमाहारःएकादशीरुद्रइत्युच्यते षडंगेत्युपलक्षणम् पंचांगरुद्राणामितिबौधायनोक्तेः तत्पाठेचप्रकारोबौधायनोक्तेः नमस्तेरुद्रमन्यवइत्येकादशानामनुवाकानामेकंजपेदिति अस्यार्थः सर्वानमकानुवाकान्पठित्वाद्यंचमकानुवाकंपठेत् पुनःसर्वनमकानुवाकान्पठित्वाद्वितीयंचमकानुवाकं एवमेकादशवारामिति तथाचहेमाद्रौ कौशिकः सद्यादिपंचवक्त्रांश्चचमकादिततोजपेत् पुनरेवजपेत्सर्वांद्वितीयंचमकंतथा एवमेकादशगुणंक्रमेणचमकांस्तथा रुद्रैकादशिनीत्वेषासर्वकामफलप्रदा एकादशगुणासैवरुद्रइत्यभिधीयते रुद्रएकादशगुणोमहानित्यभिधीयते महानेकादशगुणस्त्वतिरुद्रइहोच्यते अत्रचमकभेदात्संज्ञाविरोधोनदोषाय अथरुद्रजपादिविधिः हेमाद्रौबौधायनः अथातःपंचांगरुद्राणांन्यासपूर्वकंजपहोमार्चनविधिंव्याख्यास्यामः यातेरुद्रेतिशिखायामस्मिन्महत्यर्णवइतिशिरसि सहस्राणीतिललाटे हंसःशुषदितिभ्रुवोर्मध्ये त्र्यंबकंयजामहइतिनेत्रयोर्नमःस्रुत्यायेतिकर्णयोर्मानस्तोकइतिनासिकायामवतत्येतिमुखेनीलग्रीवइतिकंठेनमस्तेअस्त्वायुधायेतिबाह्वोर्यातेहेतिरित्युपबाह्वोर्येतीर्थानीतिहस्तयोः सद्योजातमितिपंचानुवाकान्पंचस्वंगुलिषुनमोवःकिरिकेभ्यइतिहृदये नमोगणेभ्यइतिपृष्ठे नमोहिरण्यबाहवइतिपार्श्वयोर्विज्यंधनुःकपर्दिनइतिजठरेहिरण्यगर्भइतिना

नोमीढुष्टमइतिकट्यां येभूतानामधिपतयइतिगुह्ये सशिराजातवेदाइति अपानेमानोमहांतमित्यूर्वोरेषतइतिजान्वोः संसृष्टजिदितिजंघयोर्विश्वं
भूतमितिगुल्फयोर्येपथामितिपादयोरध्यवोचदितिकवचं नमोबिल्मिनइत्युपकवचंनमोअस्तुनीलग्रीवायेतितृतीयनेत्रं प्रमुंचधन्वनइत्यस्त्रं यए
तावंतश्चेतिदिग्बंधः ॐनमोभगवतेरुद्रायेतिनमस्कारंन्यसेत् ओंकारंमूर्ध्निविन्यस्यनकारंनासिकाग्रतः मोकारंतुललाटेधेभकारंमुखमध्यतः ग
कारंकंठदेशेतुवकारंहृदिविन्यसेत् तेकारंदक्षिणेहस्तेरुकारंवामतोन्यसेत् द्राकारंनाभिदेशेतुयकारंपादयोर्न्यसेत् सद्यंचपादयोर्न्यस्यवामंन्य-
स्योरुमध्यतः अघोरंहृदिविन्यस्यमुखेतत्पुरुषंन्यसेत् ईशानंमूर्ध्निविन्यस्यहंसोनामसदाशिवः हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवः एवंन्या
सविधिंकृत्वाततःसंपुटमारभेत् त्रातारमिंद्रत्वन्नोअग्नेसुगन्नःपंथामसुन्वंतंतत्वायामि आनोनियुद्भिर्वयंसोमतमीशानमस्तेरुद्रास्योनापृथि
वीत्येतत्संपुटमुद्रादीन्दिक्षुविन्यस्यैवमेवात्मनिरोद्रीकरणंकृत्वा त्वगस्थिगतैःपापैःप्रमुच्यतेसर्वभूतेष्वपराजितोभवति यक्षगंधर्वभूतप्रेतपिशा
चब्रह्मराक्षसयमदूतशाकिनीडाकिनीसर्पश्वापदतस्कराद्युपघाताद्युपद्रवाः सर्वेज्वलंतंपश्यंतुमांरक्षंतुमनोज्योतिरितिबोध्याग्निर्मूर्धनिमर्मा-
णितेजातवेदाइतिगुह्यनाभिहृदयमुखशिरःस्वभिमंत्र्यात्मरक्षाकर्तव्याशिवसंकल्पंहृदयंपुरुषसूक्तंशिरउत्तरनारायणंशिखाअप्रतिरथंकवचंश
तरुद्रियमस्त्रंपंचांगंसकृज्जपेदष्टांगंप्रणम्यहिरण्यगर्भोयःप्राणतोब्रह्मजज्ञानंमहीद्यौरुपश्वासयाग्नेनययाते अग्नेयथावस्वाहेत्यष्टऋचोजपेद-
थात्मानंरुद्ररूपंध्यायेत् शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकम् गंगाधरंदशभुजंसर्वाभरणभूषितम् नीलग्रीवंशशांकांकंनागयज्ञोपवीति

नम् व्याघ्रचर्मोत्तरीयंच वरेण्यमभयप्रदम् कमंडल्वक्षसूत्राभ्यामन्वितंशूलपाणिनम् ज्वलंतांपिंगलजटाशिखामुद्योतकारिणम् अमृतेनाप्लुतं हृष्टमुमादेहार्द्धधारिणम् दिव्यसिंहासनासीनंदिव्यभोगसमन्वितम् दिग्देवतासमायुक्तंसुरासुरनमस्कृतम् नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणम् एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत् हंसइतिईशानंमूर्द्धिविन्यस्यहंसहंसेतिब्रूयात् एवमुक्तो हंसोनामसदाशिवोभवतीत्यर्थः अत्रपंचांगन्यासउक्तः शिखाद्यस्त्रांतमेकत्रिंशदंगन्यासःप्रथमः मूर्धादिपादांतंदशांगन्यासोद्वितीयः पादादिमूर्धांतंपंचांगन्यासस्तृतीयः मस्तकादिगुह्यांतंपंचांगन्यासश्चतुर्थः गुह्यादिमस्तकांतंपंचांगन्यासःपंचमइति पंचांगरुद्राणामित्युपक्रमा द्बौधायनमते पंचैवन्यासाः शातातपेनतुषष्ठोपिन्यासउक्तः षडंगैकादशीरुद्रइत्युक्तेः सचप्रजननादिसर्वांगपर्यंतंषोडशांगेषुकर्तव्यः बौधायनेनाभिषेकप्रकरणेतदुक्तेरितिमहार्णवः हेमाद्रौकौशिकेनसंकल्प्यजपहोमावित्युपक्रम्यन्यासद्वयंप्रकारांतरेणोक्तं न्यासंभवादिभिःकुर्यान्नमोन्तैःप्रणवान्वितैः भवंचपादयोर्न्यस्यशर्वंन्यस्योरुमध्यतः ईशानंगुह्यदेशेतुनाभौपशुपतिंन्यसेत् रुद्रंचहृदयेन्यस्यमुखेचोग्रंतुविन्यसेत् भीमंललाटपट्टेचमहांतंशीर्ष्णिविन्यसेत् तथैवांत्यानुवाकस्यमंत्रैर्द्वादशभिः शुचिः न्यासंकृत्वानुलोम्येनवर्जयित्वाभिचारकं आद्यंतुपादयोर्न्यस्यद्वितीयंजानुदेशतः ऊर्वोस्तृतीयंविन्यस्यचतुर्थंगुह्यदेशतः पंचमंनाभिदेशेतु षष्ठंतुहृदयेन्यसेत् सप्तमंकंठदेशेतुमुखेचाष्टममुत्तमं नवमंनासिकायांतुदशमंनेत्रयोर्द्वयोः एकादशंललाटेतुद्वादशंशीर्ष्णिविन्यसेत् त्रयोदशंकवचंकृत्वास्त्रेतुफट्ततइति अथरुद्रहोमविधिः हेमाद्रौबौधायनः रुद्रैकादशिनीजाप्येत्रयस्त्रिंशदथाहुतीः रुद्रेशतत्रयंप्रोक्तंपक्ष्यात्र्यधिक

यायुतम् रुद्रेलघुरुद्रइत्यर्थः चत्वारश्चमहारुद्रेसहस्राःसप्तवर्जिताः चत्वारिंशत्सहस्राश्चकर्तव्याश्चतुरुत्तराः ऊनाश्चसप्तसप्तत्यास्यातिरुद्रेवि-
निश्चयः होमश्चनमःशंभवेतिमंत्रेणेति हेमाद्रिः तथाचतन्मतेमंत्राविभागोहोमेनास्ति महार्णवस्तुश्रुतिषुनानाविधमंत्रविभागाम्नातं चयेनप्रकर-
पास्थमप्यपेक्षितत्वा द्ग्राह्यामित्याह तत्रहोमस्त्रेधा समग्रहोमोदशांशहोमः शतांशहोमश्चेति तत्राद्यः प्रधानभूतोजपांगभूतश्च उत्तरौत्वंगभू
तावेवेतिमहार्णवः त्रिष्वपिपक्षेषुमंत्रविभागःषोढा एकधात्रेधाषोढाषोडशधाअष्टचत्वारिंशद्धा एकोनसप्तत्युत्तरशतधाचेति तत्रत्रेधाविभाग
स्त्रेधाविभक्तंजुहोतितत्रहृद्येलोकाइतिश्रुत्योक्तः षोढाविभागोपि तिस्रउत्तरा आहुतीर्जुहोतिषट्संपद्यंतेषड्वाऋतवःश्रुत्योक्तः षोडशधाविभागो
पि आपिवाप्रथमादुपक्रम्यनमस्तक्षभ्यइति जानुदघ्नेधारयमाणोजुहोतिरथकारेभ्यश्चवइत्युपक्रम्यनमःस्वायुधायेतिनाभिदघ्नेशेषेणप्राग
वतानेभ्यआस्यदघ्ने हुत्वा सहस्राणिसहस्रशइतिदशावदानान्हुत्वा अन्वारोहान्जुहोति नमोरुद्रेभ्योयेपृथिव्यामिति जानुदघ्नेधारयमाणो
नमोरुद्रेभ्योयेंतरिक्षइतिनाभिदघ्ने नमोरुद्रेभ्योयेदिवीत्यास्यदघ्नेहुत्वेतिबौधायनः एकोनसप्तत्युत्तरशतविभागस्तु अर्थैकत्वादेकंवाक्यमि
तिन्यायेन शाकपूण्याद्युक्तोभयतोनमस्कारत्वादिनावसिद्धः तत्रप्रथमानुवाकः पंचदशर्चइतिपंचदशमंत्राः द्वितीयेत्रयोदशयजूंषीतितावंतः
तृतीयचतुर्थयोः प्रत्येकं सप्तदशयजूंषि पंचमषष्ठमयोः प्रत्येकं पंचदशपंचदशयजूंषि सप्तमेषोडश अष्टमेसप्तदश नवमेएकोनविंशतिः
दशमेद्वादशर्चः एकादशेदशर्चः त्रीणिचयजूंषीति एकोनसप्तत्युत्तरशतमन्त्राः अस्मिंश्चपक्षेद्वितीयानुवाकमारभ्य नवमानुवाकपर्यन्तं

नमस्कारादिनमस्कारांतंयजुरितिशाकपूणिः नमस्काराद्येकंयजुरितियास्कः महार्णवस्तुशाकपूणिविहितमुभयतोनमस्कारत्वंद्वितीयतृतीयचतुर्थानुवाकविषयम् यास्कोक्तंचनमस्कारादित्वंपंचमादिनवमांतंयथाशिष्टाचारादित्याह अस्मिंश्चपक्षे देवानांहृदयेभ्यइति
मंत्रशेषस्तदुत्तरमंत्रचतुष्टयेनुषज्यते जपादौतुविभागाभावान्नानुषंगः अष्टचत्वारिंशद्विभागस्तु अष्टानुवाका अष्टौयजूंषीतिकाशकृत्स्नो
क्तेर्द्वितीयानुवाकप्रभृतिनवमांतैरनुवाकैरष्टौमंत्राः इतरानुवाकेषुत्वनंतरपक्षोक्तोमंत्रविभागइति तत्ररूपजपेदशांशहोमोदशवारंजपाभा
वात् एवमेकादशिनीजपेशतांशहोमोनास्ति एकादशिनीदशांशहोमेएकेनैवरूपेणहोमः अवशिष्टैकरूपस्यदशांशहोमोनास्ति एवंलघुरुद्र
महारुद्रादावप्यवशिष्टरूपस्यनास्तीतिमहार्णवः पितृचरणास्तु रूपाहुतीनांदशांशासंभवादष्टचत्वारिंशत्पक्षेपंचाहुतयः एकोनसप्तत्युत्त
रशतपक्षेसप्तदशांताश्चाद्यैर्मंत्रैःसद्यांतैर्वा एवमेकादशिन्यादिजपेपि अवशिष्टरूपेदशांशःसंभवतीत्याहुः अत्रमूलंनलब्धम् केचित्त्व
वशिष्टरूपेपूर्वोक्तवचनान्नमःशंभवमंत्रेणहोमइत्याहुः एवंमहारुद्रादावपिद्रष्टव्यं अयंचषोढाविभागोनमकेष्वेव चमकेषुतुविभागमाह बोधायनःम
हार्णवे अग्नाविष्णूसजोषसेइतिचतुर्गृहीतंहुत्वा वाजश्चमेप्रसवश्चमइतिसततांवसोर्धारांजुहोत्यामंत्रसमापनादिति आमंत्रसमापनादिति
सर्वचमकानुवाकैरेकाहुतिरित्यर्थः तथाचसर्वेनमकानुवाकहोमांते अग्नाविष्णूचैकाहुतिः अवशिष्टचमकाध्यायेनापरेत्याहुतिद्वयमितिकेचित्तु
अन्येत्वनुवाकभेदादेवद्वितीयाद्यनुवाकेषुभेदसिद्धेः प्रथमानुवाकसमाप्तिरेवात्रोच्यते तथाचाद्यचमकानुवाकेद्वेआहुती द्वितीयादिचमकानुवाकैद्वे

शेत्याहुः तथाचद्वेआहुतीद्वादशवाआहुतयइतिपक्षद्वयंसिद्धं तृतीयोपिपक्षोर्थासिद्धोमहार्णवउक्तः तथाहिनमस्तेरुद्रमन्यवइत्येकादशानामनुवाकानामेकमेवंजपेदितिबौधायनेनद्वितीयादिवदाद्यस्यापिचमकानुवाकस्यसमस्तस्यजपेएकमंत्रत्वंबोधितंजपानुसारीचहोमः अतःसर्वनमकानुवाकहोमांतेसमस्ताद्यचमकानुवाकेनहोमएवमुत्तरेष्वप्यनुवाकेष्वित्येकादशाहुतयइतिअयमेवचपक्षोमुख्यः आहुतिगणनायामस्येवलैंगोक्तेः इदानींतुशिष्टाद्वादशाहुतिपक्षमाश्रित्यदशाहुतिपक्षमेवकुर्वंति अथैकादशिन्यादिहोमेकुंडनिर्णयार्थंचमकद्वादशाहुतिपक्षमाश्रित्यदशांशहोमेचावशिष्टरूपाहुतित्यागमाश्रित्याहुतिसंख्योच्यते एकादशिन्यांसमग्रहोमेप्रतिमंत्रपक्षेआहुतयः एकसप्तत्यधिकाष्टादशशती द्विहस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षेचत्वारिंशदधिकापंचशती एकहस्तंकुंडम् लघुरुद्रेसमग्रहोमेप्रतिमंत्रपक्षेविंशसाहस्त्रीपंचशतानिएकादशीतिश्च त्रिहस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षेपंचसहस्राणिनवशतानिचत्वारिंशच्च द्विहस्तंकुंडम् महारुद्रेसमग्रहोमेप्रतिमंत्रपक्षेलक्षद्वयंषड्विंशतिसहस्राणित्रिशतीएकनवतिश्च षड्ढस्तंकुंड तत्रैवाष्टाचत्वारिंशत्पक्षेपंचषष्टिसहस्राणिशतत्रयंचत्वारिंशत् चतुर्हस्तंकुंडम् अतिरुद्रेसमग्रहोमेप्रतिमंत्रपक्षेचतुर्विंशतिलक्षाणिनवतिसहस्राणिएकाधिकशतत्रयंच अष्टहस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षेसप्तलक्षाणिअष्टादशसहस्राणिसप्तशतीचत्वारिंशच्च षड्ढस्तंकुंडम् एकादशिनीजपदशांशहोमेप्रतिमंत्रपक्षेएकादशीद्व्यधिकशतम् एकहस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षेषष्टिः अरत्निमात्रंकुंडम् लघुरुद्रेजपदशांशहोमेप्रतिमंत्रपक्षेद्वेसहस्रेद्विपंचाशच्च द्विहस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षेषट्शती एकहस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षेषट्सहस्राणिपंचाशतानि च

त्वारिंशच्च द्विहस्तंकुंडम् अतिरुद्रजपेदशांशहोमेप्रतिमंत्रपक्षेलक्षद्वयं एकोनपंचाशत्सहस्राणिचतुर्विंशतिश्च षड्ढस्तंकुंडम् तत्रैवाष्टाचत्वारिंशत्पक्षे
एकसप्ततिसहस्राण्यष्टशती अशीतिश्च चतुर्हस्तंकुंडं त्रिधाविभागादिपक्षास्तुनप्रचरंतीति तद्गुणनानोक्ता एतेषांकरणरज्जुर्वाजपेय्यां विस्तारांगुल
मानमेककरतोयावद्दशस्युर्जिनावेदत्रीणिकुसागराः शरयवोपेताभुजंगांबुधिः निष्पादांबुधिसायकाविषयवमंकेष्वर्धयुग्मामषट्नागांगान्ययवानिदद्दु
मुनियवेनोनाश्चषट्पर्वताः रुद्रेमंडपपरिमाणमाहसएव परशुरामः मंडपोष्टगुणात्कुंडात्कुंडहोमानुसारतः अथरुद्रवेदिः तत्ररुद्रहोमस्यग्रहमखं
विकृतित्वादीशानकोणेवेदिः ग्रहवेदिरपितत्रैवेतिकेचित् कुंडस्यप्रागुदीच्यांवाप्राच्यामुत्तरतोपिवा चतुरस्रंचतुर्द्वारंकर्तव्यंग्रहपीठकमितिगोभिलो
क्तेः प्राच्यामुदीच्यांवेत्यन्ये अपरेतुग्रहवेदिरेवरुद्रवेदिः अतिरिक्ततत्सत्वेप्रमाणाभावादितिवदंति वयंतुरुद्रहोमेमंत्रहोमत्वात्तांत्रिकीवेदिः तथाच
मंडपमध्यनवांशेतुलापुरुषवद्वेदिःकार्या कुंडंचतदीशानेतुलापुरुषवत् ग्रहवेदिस्तुकुंडादीशानादौमंडपांतर्बहिर्वाग्रहमखेतथाविधानात् नचरुद्रहो-
मस्यनियतंशांतिरूपत्वंयेनग्रहमखविकृतित्वंस्यात् काम्यस्यापितस्यसत्वादितिवदामः गुर्जरपरसुरामोपि तत्रैकावेदिकाकार्यायज्ञमण्डपमध्य
तः मध्यस्तंभांतरंयावत्तावन्मानकरोच्छ्रयेत्याह महार्णवस्तुकुंडमंडपऋत्विक्संख्यावसोर्धारादिचायुतहोमवत्कार्यमित्याह अथरुद्रयंत्रेवे
ह्युपरिवस्त्रेशिष्टाःकुर्वन्तीति तदुच्यते स्कान्दे प्रणम्यजगतामीशमुमादेहार्द्धधारिणम् यंत्रोद्धारमहंवक्ष्येरुद्रकल्पानुसारतः मध्येवृत्तंसमालि-
ख्यतन्मध्येचदशाक्षरम् बहिरष्टदलंपद्मंततः षोडशपत्रकम् चतुर्विंशतिपत्राक्षंद्वात्रिंशत्पत्रकंतथा चत्वारिंशत्पत्रकंतुवृत्तंसूर्यसमप्रभम् पं

चपद्मात्मकंवृत्तंचतुरस्रंचभूगृहम् सत्वंरजस्तमश्चेतित्रिगुणैःपरितोवृतम् चतुर्द्वारंद्वारदेशेबहिर्नागसमावृतम् रुद्रपीठमितिख्यातंदेवतास्तत्रविन्यसेत् चत्वारिंशच्छतंचैकंदेवतानामुदाहृतम् कर्णिकामध्यदेशेतुरुद्रंपंचास्यमालिखेत् नमोभगवतेरुद्रायेतितारादिकंन्यसेत् सोयंदशाक्षरोमंत्रःसर्वकामार्थसिद्धिदः प्रणवादिनमोंतानिपंचास्यानिततःपरम् सद्योजातंवामदेवमघोरंतदनंतरम् ततस्तत्पुरुषंप्रोक्तमीशानंपंचकंक्रमात् प्रधानमिदमाख्यातंप्रथमावरणेततः दलेष्वष्टसुनंद्यादीन्पूर्वादिक्रमतोन्यसेत् पूज्यपूजकयोर्मध्येप्राचीस्याद्यंत्रलेखने आदौनंदिमहाकालौगणेशावृषभौक्रमात् अनंतरंभृंगिरिटिस्कंदोमाच्चंडसंज्ञकाः षोडशारेततःपद्मेद्वितीयावरणेयजेत् अनंतंचतथासूक्ष्मंशिवंचैकपदंतथा एकरुद्रंत्रिमूर्तिंचश्रीकंठंवामदेवकं ज्येष्ठंश्रेष्ठंतथारुद्रंकालंकलविकरणम् बलंबलविकरणंबलप्रमथनंतथा तृतीयावरणेपद्मेचतुर्विंशद्दलेतथा अणिमामहिमाचैवलघिमागरिमातथा प्राप्तिःप्राकाम्यमीशित्वंवशित्वंचाष्टसिद्धयः ततःपरंक्रमेणैवन्यसेद्ब्राह्म्यादिदेवताः ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराह्यैंद्रीचचामुंडाचंडिकाचेतिताःक्रमात् ततोष्टस्वसितांगादीन्भैरवान्विन्यसेत्पुनः असितांगोरुरुश्चंडःक्रोधउन्मत्तभैरवः कालभीषणसंहाराभैरवाश्चाष्टकीर्तिताः द्वात्रिंशत्पत्रकेपूर्वंभवाष्टकमुदाहृतम् भवःशर्वेशानपशुपतिरुग्रोग्रभीमकाः महांश्चैवेतिव्याख्याताभवाद्यष्टौप्रकीर्तिताः ततोनंतोवासुकिश्चतक्षकश्चकुलीरकः कर्कोटकःशंखपालःकंबलोश्वतरस्तथा ततोष्टसुन्यसेद्वैन्यंपृथुंहैहयमर्जुनम् शांकुंतलेयभरतंनलंराममितिक्रमात् ततःकुलाचलानष्टौदलेष्वष्टसुविन्यसेत् हिमवान्निषधोविंध्योमाल्यवान्पारियात्रकः मलयोहेमकूटश्चगंधमादन

संज्ञकः चत्वार्यावरणान्येवंपंचमावरणेततः चत्वारिंशद्दलेपद्मेपंचमावरणेन्यसेत् इंद्राद्यष्टौलोकपालानष्टसुक्रमशोलिखेत् इंद्रमग्निंयमंचैवनिर्ऋतिंवरुणंतथा वायुंकुबेरमीशानंदलेष्वष्टसुविन्यसेत् इंद्रादिलोकपालानामष्टौशक्तीस्ततोलिखेत् शचीस्वाहाचवाराहीखड्गिनीवारुणीतथा मृगारूढाचकौबेरीशूलिनीचतथाष्टमी ततोष्टानामायुधानिवज्रादीन्यष्टसुन्यसेत् वज्रंशक्तिंदंडखड्गपाशांकुशगदाअपि त्रिशूलंलोकपालानामायुधानिक्रमाल्लिखेत् ततोष्टौवाहनान्येषामष्टसुक्रमशोलिखेत् ऐरावतंतथामेषंमाहिषंश्वेतसंज्ञितम् मकरंचमृगंचैवनरंचवृषभंतथा ऐरावतादयश्चाष्टदिग्गजास्तदनंतरम् ऐरावतःपुंडरीकोवामनःकुमुदोंजनः पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः भूगृहांतःपुनर्लेख्याःपंचपद्मात्मकाबहिः इंद्रंविन्यस्यपूर्वस्यामाग्नेय्यामग्निमेवच दक्षिणस्यांयमंचैवनैर्ऋत्यांनिर्ऋतिंतथा प्रतीच्यांवरुणंवायुंवायव्यांविन्यसेत्ततः कुबेरंचैवकौबेर्यामीशान्यामीशमालिखेत् विरूपाक्षंतुविन्यस्यआग्नेयामग्नियोगतः नैर्ऋत्यांनैर्ऋतेयोगेविश्वरूपंचविन्यसेत् वायव्यांवायुयोगेचलिखेत्पशुपतिंतथा ईशान्यामूर्ध्वलिंगंचन्यसेदीशानयोगतः प्रागादिक्रमतोलेख्याःशेषाद्याभूगृहाद्बहिः विप्रवर्णंश्वेतरूपंसहस्रफणमंडितम् शेषंविन्यस्यपूर्वस्यांपूजयेदुपचारकैः तक्षकंवैश्यवर्णंचनीलंपंचशतैःफणैः युक्तमुत्तुंगकायंचआग्नेय्यांदिशिविन्यसेत् अनंतंविप्रवर्णंचतथाकुंकुमवर्णकम् सहस्रफणसंयुक्तंदक्षिणस्यांप्रपूजयेत् वासुकिंक्षत्रियंपीतवर्णंसप्तशतैःफणैः युक्तमुत्तुंगकायंचनैर्ऋत्यांदिशिविन्यसेत् शंखपालंक्षत्रियंचपीतंसप्तशतैःफणैः युक्तमावाह्यवारुण्यांपूजयेद्गंधधूपकैः महापद्मंवैश्यवर्णंयुक्तंपञ्चशतैःफणैः युक्तमुत्तुंगकायंच

वायव्यांदिशिपूजयेत् कंबलंभूद्रवर्णंचकृष्णांत्रिंशत्फणैर्युतम् कौबेर्यांदिशिविन्यस्यपूजयेच्चविधानतः कर्कोटकंभूद्रवर्णंश्वेतंत्रिंशत्फणैर्युतं ईशान्यांदिशिविन्यस्यपूजयेद्विधिवत्ततः रुद्रपीठमिदंसर्वरुद्रकृत्येषुविश्रुतम् शंभुनास्वयमाख्यातंभक्तानुग्रहकाम्यया कुंकुमागरुकर्पूरैर्भूर्जपत्रेथवापटे लिखितंपूजितंभक्त्यासर्वकामार्थसिद्धिदम् यंत्रमंत्रमयंप्रोक्तमाख्यातादेवतेतिच पूजनीयंप्रयत्नेनतेनेदंदेवतामयम् नाग्निचोरभयंतत्रनचराजभयंक्वचित् यत्रेदंलिखितंयंत्रंपूज्यतेविधितःसदा अथरुद्रप्रयोगः देशकालौसंकीर्त्यअमुकफलावाप्त्या श्रीपरमेश्वरप्रीत्यर्थंस्वयंब्राह्मणद्वारावाऽमुकरुद्रजपंकरिष्ये इतिसंकल्प्य तदंगतयागणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यब्रह्मर्त्विग्वरणानिकृत्वा देवालयादौजपंसमाप्य भद्रंकर्णेभिरितिमंडपंप्रविश्य कृतस्यामुकजपस्यदशांशेनप्रतिमंत्रपक्षेणाष्टचत्वारिंशत्पक्षेणवातिलद्रव्येणहोमंकरिष्यइतिसंकल्प्यगणेशंसंपूज्यसर्षपविकिरणादिमंडपप्रतिष्ठांतंग्रहमखवत्कृत्वाग्निंप्रतिष्ठाप्यग्रहवेद्यांग्रहान्प्रतिष्ठाप्यरुद्रवेदिस्थवस्त्रेलिखितरुद्रपीठेदेवताःस्थापयेत् तन्मध्येॐनमोभगवतेरुद्राय तत्रैवदिक्षु सद्योजातः वामदेवः अघोरः तत्पुरुषः ईशानः ततः पूर्वादिनंदी महाकालः गणेश्वरः वृषभः भृंगिरिटिः स्कंदःउमा चंडीश्वरःइतिप्रथमावरणम् अनंतः सूक्ष्मः शिवः एकपात् एकरुद्रः त्रिमूर्तिः श्रीकंठः वामदेवः ज्येष्ठः रुद्रः कालः कलविकरणः बलः बलविकरणः बलप्रमथनः इतिद्वितीयावरणम् अणिमा महिमा लघिमा गरिमा प्राप्तिः प्राकाम्यं ईशिता वशिता ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा चंडिकाअसितांगभैरवः चंडभैरवः क्रोधभैरवःउन्मत्तभैरवः कालभैरवः

भीषणाभैरवः संहारभैरवः इतितृतीयं भवः शर्वः ईशानः पशुपतिः रुद्रः उग्रः भीमः महान् अनंतः वासुकिः तक्षकः कुलीरः कर्कोटकः शंखपालः कंबलः अश्वतरः वैन्यः पृथुः हैहयः अर्जुनः शाकुंतलेयः भरतः नलः रामः हिमवान् निषधः विंध्यः माल्यवान् पारियात्रः मलयः हेमकूटः गंधमादनः इतिचतुर्थावरणम् इंद्रः अग्निः यमः निर्ऋतिः वरुणः वायुः कुबेरः ईशानः शची स्वाहा वाराही खड्गिनी वारुणी वायवी कौबेरी ईशानी वज्रः शक्तिः दंडः खड्गः पाशः अंकुशः गदा त्रिशूलं ऐरावतः मेषः महिषः प्रेतः मकरः हरिणः नरः वृषभः ऐरावतः पुंडरीकः वामनः कुमुदः अंजनः पुष्पदंतः सार्वभौमः सुप्रतीकः इतिपंचमावरणम् पूर्वेइंद्रः आग्नेय्यामग्निर्विरूपाक्षश्च दक्षिणेयमः नैर्ऋत्यांनिर्ऋतिर्धिम्ररूपश्च पश्चिमेवरुणः वायव्यांवायुः पशुपतिश्च उत्तरेकुबेरः ईशान्यामीशानऊर्ध्वलिंगंच पूर्वेशेषः तक्षकः अनंतः वासुकिः शंखपालः महापद्मः कंबलः कर्कोटकः नमोंतैर्नाममंत्रैस्तत्स्थाने आवाह्य ततः तदस्तु० गृहावै० प्रतिष्ठाप्यसंपूज्य तदीशान्यांकुंभेवरुणंसंपूज्यरुद्रपूजार्थीविप्रंवृणुयात् ततोग्रहमखवद्ब्रह्मादिभ्यो होमंकृत्वा घृताक्ततिलैः रुद्रहोमंकृत्वारुद्रपीठदेवताभ्य एकैकामाज्याहुतिंहुत्वादिक्पालादिभ्यो रुद्रायक्षेत्रपालायचग्रहमखवद्बलिंदत्वापूर्णाहुतिंवसोर्धारांचकृत्वापूर्णपात्रविमोकादिकर्मशेषंसमाप्याचार्यादिभ्योजपहोमश्चेयोगृहीत्वाऽचार्यादिभ्योदक्षिणांदद्यात् ततआचार्याद्दयो रुद्रयहकलशोदकेनयजमानस्याभिषेकंकुर्युः ततोयजमानोग्रहाणांरुद्रस्यचोत्तरपूजांकृत्वास्वशाखोक्तमंत्रेणाविसृज्याचार्यायदत्वाग्निंसंपूज्य गच्छगच्छेतिविसृज्यमंडपमाचार्यायदत्वाब्राह्मणान्भोजयित्वा यस्यस्मृ० प्रमादा० दितिजपित्वाकर्मसंपूर्णतांवाचयित्वाकर्मेश्वरार्पणंकृत्वासु

हृद्युक्तोभुंजीत इतिरुद्रपद्धतिः अथरुद्राभिषेकविधिः हेमाद्रौमहार्णवेच अथातोरुद्रस्नानार्चनविधिंव्याख्यास्यामः आदितएवतीर्थेस्नात्वोदेत्यशुचिःप्रयतोब्रह्मचारीशुक्लवासास्तस्यदक्षिणाप्रत्यक्देशेतन्मुखःस्थित्वास्मनिदेवताःस्थापयेत् प्रजननेब्रह्मातिष्ठतु पादयोर्विष्णुस्तिष्ठतु हस्तयोर्हरस्तिष्ठतु बाह्वोरिंद्रस्तिष्ठतु जठरेअग्निस्तिष्ठतु हृदयेशिवस्तिष्ठतु कंठेवसवस्तिष्ठंतु वक्त्रेसरस्वतीतिष्ठतु नासिकयोर्वायुस्तिष्ठतु नयनयोःसूर्याचन्द्रमसौतिष्ठेताम् कर्णयोरश्विनौदेवौतिष्ठेताम् ललाटेरुद्रास्तिष्ठन्तु मूर्ध्न्यादित्यास्तिष्ठंतु पृष्ठेपिनाकीतिष्ठतु पुरतःशूलीतिष्ठतु पार्श्वयोःशिवाशंकरौतिष्ठेताम् सर्वतोवायुस्तिष्ठतु ततोबहिः सर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठतु सर्वेष्वंगेषुसर्वादेवतास्तिष्ठंतु मांरक्षंतु अग्निर्वायुःसूर्यश्चंद्रमादिशआपःपृथिव्योषधिवनस्पतयइन्द्रःपर्जन्यईशानआत्मापुनर्नमअग्निर्मेवाचिश्रितइति यथालिंगमंगानिसंमृज्याथैनंगंधाक्षतधूपदीपैरात्मानंप्रत्याराधयेत् आराधितोमनुष्यैस्त्वंसिद्धैर्देवासुरादिभिः आवाहयामिभक्त्यात्वांमांगृहाणमहेश्वर त्र्यंबकंयजामहइत्यथैनमाराधयेत् आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैःसहकेतुमद्भिः वाताजवैर्बलवद्भिर्मनोजवैरायाहिशीघ्रंममहव्यायशर्वोमित्यावाह्य संस्थापितेत्वावाहनम् सद्योजातंप्रपद्यामीत्यावाहनंददाति भवेभवेनातिभवेभवस्वमामितिपाद्यं भवोद्भवायनमइति अब्लिंगाभिःस्नानम् अब्लिंगा आपोहिष्ठेत्याद्याः अथाद्भिस्तर्पयति भवंदेवंतर्पयामि शर्वंदेवंतर्प० ईशानंदेवंतर्प० पशुपतिंदेवंत० रुद्रंदेवंत० उग्रंदेवंत० भीमंदेवंत० महांतंदेवंतर्पयामीतितर्पयित्वाज्येष्ठायनमइत्याचमनीयं श्रेष्ठायनमइतिमधुपर्कम् कलविकरणायइतिपुष्पाणि सर्वभूत

दमनायइतिधूपं मनोन्मनायनमइतिदीपंमनोन्मनायनमइतिकालेनैवेद्यम् अथाष्टभिर्मंत्रैरष्टौपुष्पाणि भवायदेवायनमः पुष्पंसमर्पयामि
शर्वायदेवाय० ईशानाय० पशुपतये० रुद्रायदेवाय० उग्रायदेवाय० भीमायदेवाय० महतेदेवाय० अथास्याघोरतनूरुपतिष्ठते अथैतस्यमूर्ध्निहि
रण्यकलशेनसंततांधारांनिषिंचेन्मधुनासर्पिषापयसावेक्षुरसेननारीकेलोदकेनचाम्ररसेनवातदलाभेउदकेनवा नमस्तेरुद्रमन्यवइत्येका
दशानामनुवाकानामेकंजपेत्सर्वेषांपारे पुनराराधयेत् उत्तमाराधनेनतदेतद्विधानमुक्तम् तेनाभिषिक्तेनोदकेनाक्षीभ्यामित्यनुवाकेनाब्लिंगा
भिश्चापादात्संमृज्यपापक्षयार्थीव्याधिविमोक्षार्थीजीवनार्थीश्रीकामः शांतिकामः पुष्टिकामस्तुष्टिकामोमोक्षार्थीचकुर्यादेवंकुर्वन् सिद्धि
माप्नोति आचार्यायदक्षिणांददातिदशगाः सवत्साः सुवर्णभूषितावृषभैकादशास्तदलाभेएकांगांदद्यादित्याह भगवान्बौधायनः यद्यप्यत्रै
कएवन्यासउक्तस्तथापिपूर्वोक्तन्यासपंचकमपिकार्यम् रुद्राणांजपहोमार्चनविधिंव्याख्यास्यामइत्युक्त्वापंचन्यासोक्तेः अर्चनमभिषेकइति
महार्णवः आत्मानंप्रतीतिस्वशरीरेणमनसापूजयेदित्यर्थः आराधितइतिमंत्रोमनसावाहनेगंधादौतुत्र्यंबकमंत्रः यद्यपिमानसपूजायांनैवेद्यंनोक्तं
तथापिशिष्टाःकुर्वंति संस्थापितइत्यावाह्य पूजायामात्वाहात्वित्यावाह्य सद्योजातमितिपुनरावाहयेदित्यर्थः अघोरतनूः अघोरेभ्यइत्यादिस
दाशिवोमित्यंताः सर्वेषांपंचविधरुद्राणांउत्तमेतिअभिषेकोत्तरंवास्यपूजैवेत्यर्थः तदेतादितियत्ररुद्राभिषेकोविहितस्तत्रैषविधिरित्यर्थस्तेनापिपा
पक्षयव्याधिविमोकाद्यर्थाभिषेकांगसमार्जनमधिकंकुर्यादित्यर्थः त्र्यंबकमंत्रविधिस्तुमत्कृतकर्मविपाकसारेउक्तः इतिदिनकरभट्टकृतशां-

तिसारेरुद्राभिषेचनविधिः अथप्रसंगात्पंचामृताद्यभिषेचनविधिः हेमाद्रौस्कांदे मौनव्रते देवैस्तुवंदिताधेनुःसर्वपापप्रणाशिनी तत्क्षीरस्ना पितोदेवनित्यंमेवरदोभव कामतोऽकामतोवापियन्मयादुष्कृतंकृतम् तत्सर्वंविलयंयातुदधिस्नानेनभोशिव रसानामुत्तमंत्वाज्यंदेवानांचसदाप्रियम् तेनत्वंस्नापितोदेवनिधिकांतिप्रदोभव यस्यधारणमात्रेणतृप्तिंयातिपितामहः मधुनास्नापितोदेवनित्यंशोकहरोभव यमलोकभयत्रस्तःशरणंत्वांगतःशिवः खंडस्नानेनदेवेशमांकुरुष्वसुखान्वितम् यस्यदर्शनमात्रेणशुद्धिःप्राणाश्चजीवनम् तेनचोत्तमतोयेनस्नातोदेहिप्रियंध्रुवं सुगंधंचंदनंदेवंकुंकुमेनसमन्वितं अर्चितोऽसिमयाभक्त्याशिवलोकप्रदोभव अक्षय्यान्बंधुपुत्रार्थान्कायंचैवाक्षिवाङ्मनः अंतेचैवाक्षयंलोकमक्षतैरर्चितःकुरु संतानःपारिजातश्चयेचान्येसुरपादपाः तेषांपुष्पैर्मयादेवपूजितःसुखदोभव धूपोऽयंगृह्यतांदेवसुंदरोगंधवाञ्छुचिः ईप्सितंमेवरंदेहिपरत्रचशुभांगतिं शुद्धाशुक्लांबरावर्तिराज्येनचसमन्विता दीपवर्तिप्रदानेनप्रीतःस्यादीश्वरोभव सर्वमन्नप्रदानंचदेवानांतुसदाप्रियम् तेनचान्नप्रदानेनसुप्रीतोवरदोभव इतिश्रीमन्मीमांसकभट्टदिनकरकृतेशांतिसारेपंचामृताभिषेकविधिः अथसहस्रघटस्नानम् हेमाद्रौलैंगेतुलादाने सहस्रकलशैर्वास्नापयेत्परमेश्वरम् घृतेनकेवलेनापिदेवदेवमुमापतिम् पयसावाथदध्नावासर्वैर्द्रव्यैस्तथापिवा ब्रह्मकूर्चैर्नवादेवंपञ्चगव्येनवापुनः गायत्र्याचैवगोमूत्रंगोमयंप्रणवेनवा आप्यायस्वेतिवाक्षीरंदधिक्राव्णेतिवैदधि तेजोसीत्याज्यमीशानमंत्रेपैवाभिषिंचयेत् देवस्यत्वेतिदेवेशंकुशांबुकलशैर्नवैः रुद्राध्यायेनदेवेशंस्नापयेत्परमेश्वरम् सहस्रकलशैः शंभोर्नाम्नांचैवसहस्रकैः वि-

ष्णुनाकथितैर्वाथनंदिनाकथितैस्तुवा दक्षेणमखमुख्येनकीर्तितेनापिवापुनः महापूजाप्रकर्तव्यामहादेवस्यभक्तितः तद्विधिर्वक्ष्यते शिवार्चकायदातव्यादक्षिणार्द्धंगुरोस्तथा बहिःप्रयोगेपीयम् प्रयोगांगत्वाद्दक्षिणायाः अवेष्टेरिव बहिःप्रयोगेगुरोर्दक्षिणाशतादिनिष्कांता दक्षिणांचशतंचार्द्धंतदर्धंवाप्रदापयेदितितत्रैवोक्तेः क्षीराद्यैःस्नानंसहस्रघटभिन्नम् तदुक्तंकामिके सहस्रकलशाद्यैस्तुसंस्नाप्यपरमेश्वरम् महापूजाप्रकर्तव्याप्रभूतहविषान्विता पंचामृतैःपंचगव्यैःक्षीराद्यैःस्नपनंतथा लक्षघटस्नानेत्विदंशतगुणम् कर्मविपाकेज्वरघ्नसहस्रकलशस्नानेप्ययमेवविधिर्ज्ञेयः इतिदिनकरभट्टकृतशांतिसारे सहस्रघटस्नानम् अथमहास्नानम् हेमाद्रौ शिवधर्मे यःपुमान्तिलतैलेनकरयंत्रोद्भवेनच शिवाभिषेकंकुरुतेसशैवंपदमाप्नुयात् मानंतत्रैवोक्तम् स्नानंपलशतंज्ञेयमभ्यंगःपंचविंशतिः पलानांद्विसहस्रेतु महास्नानंप्रकीर्तितम् इदंतैलंपरम् लैंगे महास्नानंचयःकुर्याद्घृतेनमधुनाततः सयातिममसायुज्यंस्नानेष्वेतेषुसुव्रत स्नाप्यलिंगंमदीयंचगव्येनैवघृतेनवा विशोध्यसर्वद्रव्यैस्तुतोयेनाप्यभिषेचयेत् महास्नानेप्रसक्तेतुस्नानमष्टगुणंस्मृतम् जलेनकेवलेनैवगंधतोयेनभक्तितः अनुलिप्यततस्सर्वंपंचविंशत्पलेनवै शमीपत्रंचविधिनाबिल्वपत्रंचचंपकम् त्याज्यानिचापवित्राणिबिल्वपत्रंतुनत्यजेत् दशद्रोणैस्तुनैवेद्यमष्टद्रोणैरथापिवा शतद्रोणसमंपुण्यमाढकेनविधीयते वित्तहीनस्यमर्त्यस्यनात्रकार्याविचारणा भेरीमृदंगमुरजवादित्रैःपटहादिभिः वादित्रैर्विविधैश्चान्यैर्मंगलैर्विविधैस्तथा जागरंकारयेत्तत्रप्रार्थयेच्चयथाक्रमम् स्वभृत्यैःपुत्रदारैश्चतथासंबंधिबान्धवैः सार्द्धंप्रदक्षिणं

कृत्वाप्रार्थयेल्लिंगमीश्वरम् इत्युक्त्वाचैवरुद्रंचत्वरितंशांतिमेवच मंत्रयित्वामहाबीजंतथापंचाक्षरस्यवै इतिदिनकरभट्टकृतेशांतिसारे
महास्नानम् अथमहापूजा कालिकापुराणे कार्तिक्यामथवैशाख्यामयनादिषुपर्वसु दत्वादीपान्समुद्बोध्यदेवस्याग्रेबलिंततः भूतानांवे
वदेवस्यबाह्यादिषुभवेत्सुधीः सद्वृत्तीदेवमामंत्र्यस्वपेद्भूमौहरिंस्मरेत् उपलिप्यगृहंगत्वानिराहारोनिशिस्वपेत् अपरेह्निमहास्नानंहरायविधि
माशृणु पंचविंशत्पलेनैव अभ्यंगंकारयेदथ अभ्यंगस्तैलेन शिवस्यसर्पिषास्नानंप्रोक्तंपलशतेनवै पलानांद्विसहस्रेणमहास्नानंविधीय
ते तावतामधुनाचैवदध्नाचैवततःपुनः तावतैवहिक्षीरेणगव्येनैवभवेत्ततः भूयःसार्द्धसहस्रेणपलानामैक्षवेणतु रसेनकारयेत्स्नानंभ
क्त्याचोष्णांबुनाततः स्नापयेद्भक्तितोलिंगमापीठांतंचतच्छुभम् नीलोत्पलसहस्रेणमालांबद्धाप्रपूजयेत् अलाभेतुसहस्राणामर्द्धार्द्धं
वापिकारयेत् अलाभेबिल्वपत्रैर्वाश्वेतमंदारजैरपि दमनैर्गुरुपुष्पैर्वाशमीशुक्लार्कनागरैः प्रपूज्यकारयेद्भक्त्यासुगंधपुष्पमंडपम् गुग्गुलं
चाज्यसंयुक्तमगरुंवासितंदहेत् ततोनीराजनंदीपैःषड्विंशत्यातुकारयेत् सर्षपैर्दधियुक्तैश्चदूर्वागोरोचनाक्षतैः गंधपुष्पोदकंदद्या
त्पार्थंचंद्रशेखरम् शतपत्रंततःपद्ममष्टपत्रंसकर्णिकम् कृत्वानिवेदयन्मूर्ध्निलिंगस्यकुसुमैःसह चामरंदर्पणंचैवदीपवर्तिम्प्रदापयेत् धू
पंसर्जरसंचैवसंदद्यात्पूर्वमेवच वितानकध्वजौदद्यात्किंकिणीरवनादितौ अथाष्टभिःक्षितिःपीड्याअंगैर्भक्त्यातुदंडवत् ततउच्चैःपठेत्स्तो
त्रंशंकरंचशिवाप्रियम् प्रदक्षिणांततोगच्छेच्छनैर्निर्माल्यवर्जितः प्रणम्यचपुनःपश्चान्नैवेद्यंचनिवेदयेत् कुर्यादेतन्महास्नानंविधिना

नेनधर्मवित् समुद्धृत्यशतंसाग्रंवसेत्कल्पायुतंदिवि भुवनंब्रह्मलोकांतंभुक्त्वाभोगानशेषतः ततःक्रीडायतेतस्मिन्विमानस्थोऽमरैर्युतः भोगान्यथेप्सितान्भुक्त्वाशिवसायुज्यतांव्रजेत् केवलेनाथवाज्येनदध्नागव्येनवैतथा पयसापंचगव्येनपयसेक्षुरसेनवा यःकारयेन्महास्नानंविधिनानेनमंत्रतः सोऽपितेनैवमार्गेणगमिष्यतिपरंपदम् एवमेवहिशूद्रस्यस्पर्शमंत्रविवर्जितः अन्येमूद्रस्याविशेषा अस्मत्पुत्रकृतशूद्रोद्योतेनुसंधेयाः वास्तुसंहितायाम् पद्ममष्टदलंहैमंनवरत्नैरलंकृतम् कर्णिकाकेसरोपेतमासनंपरिकल्पयेत् राजतंतदभावेतुरक्तंसितमथापिवा तत्पद्मकर्णिकामध्येकृत्वालिंगंकनीयसम् अथवास्फटिकोपेतंपूजयेद्विस्तृतंक्रमात् ततःपंचवक्त्रपूजाहेरंबादिपूजादीन्युक्तानितानिविस्तरान्नोच्यंते इतिदिनकरभट्टकृतेशांतिसारेमहापूजासमाप्ता अथत्वरितरुद्रविधानम् यस्यकुक्षौजगत्सर्वंस्थावरंजंगमंतथा दुःखच्छिदेनमस्तुस्मैब्रह्मविष्णुशिवात्मने अस्यत्वरितरुद्रस्यन्यासरुद्राःक्रमेपातु जपहोमादिकंसर्वंकथ्यतेसर्वसिद्धये छंदोनुष्टुबथर्वाथऋषिस्त्वरितसंज्ञकः देवतात्वरितोरुद्रोबीजशक्तिर्नमोस्त्विति देवागारेनदीतीरेषुचावन्यत्रवाशुचिः उपविश्यनियम्यासून्संकल्प्यहृदिसंस्थितम् करयोस्तलयोश्चैवमूलमंत्रंचविन्यसेत् न्यासंमंत्रपदैःकुर्यात्पंचभिर्हृदयादिकम् अथषड्न्यासाः यःशिरसि रुद्रःललाटे अग्नौनेत्रयोः यःकर्णाभ्याम्अप्सुनासिकायाम् यःमुखे ओषधीषुबाह्वोः यःहृदये रुद्रःनाभौ विश्वागुह्ये भुवनाअपाने विवेशऊर्वोः तस्मैजान्वोः रुद्रायजंघयोः नमःगुल्फाभ्याम्अस्तुचरणयोः योरुद्रोअग्नौहृदिविन्यस्यशीर्षयोस्त्वितिविन्यसेत् यओषधीषुशिखायाम् योरुद्रःकवचंन्यसेत् विश्वाभुवनाविवेशेतिने

त्रनयायवौषट् तस्मैरुद्रायनमोस्त्विति अस्त्रमेवच अनेनैवतुपंचांगन्यासएवमुदाहृतः अंगुल्यग्राणिमूलेतुकृत्वांगुष्ठेनपीडयेत् सामुद्राशुभदाप्रोक्तासैवशान्तिप्रदायिनी एषतेरुद्रभागःसहस्वस्त्रांबिकयातंजुषस्वस्वाहा एषतेरुद्रभागमितिमुद्राप्रदर्शनम् श्रीकामःशीर्ष्णिकुर्वीततेजस्कामस्तुनेत्रयोः मुखेत्वन्नत्वकामस्तुग्रीवायांरोगनाशनम् हृदयेसर्वकामस्तुनाभौज्ञानंप्रदर्शयेत् प्रजाकामस्तुगुह्येस्यात्पशुकामस्तुजंघयोः जान्वोर्वैग्रामकामस्तुराष्ट्रकामस्तुपादयोः वशीकरणकामस्तुवामहस्तेनदर्शयेत् पापक्षयेभिचारेचव्याधेरुपगतावपि बहिःशरीरात् कुर्वीतशिवस्याज्ञेतिवैस्मरन् एवंमुद्रादर्शयित्वाततोध्यानंसमाचरेत् चतुर्बाहुंत्रिनेत्रंचशुद्धस्फटिकसन्निभम् उग्रकर्मणिचैवोग्रमूर्तिंध्यायेदुमापतिम् द्विभुजंनागपाशंचशूलपाणिंजटाधरम् ध्यात्वैवंशंकरंपापान्मुच्यतेमानसोद्भवात् अधःशाय्येकभक्ताशीब्रह्मचारीहविष्यभुक् अयुतेद्वेजपेत्सर्वंप्रत्यहंपूजयेच्छिवम् जुहुयात्तद्दशांशेनतद्दशांशेनतर्पणम् मार्जनंतद्दशांशेनदशांशेनतुभोजयेत् एवंकृतेतुसिद्धिःस्यात्फलार्थंतुततोजपेत् पुरश्चरणमेवंतुकृत्वासंपूज्यशंकरम् जपेत्त्वरितरुद्रंतुसर्वकामसमृद्धये श्रीकामःशांतिकामोवाजपेल्लक्षमतंद्रितः बिल्वसमिद्भिःश्रीकामश्शांतिकामःशमीमयैः जुहुयादाज्यसंमिश्रैस्तर्पणंमार्जनंततः जप्त्वालक्षंतुपुत्रार्थीपायसंजुहुयात्ततः वित्तार्थीश्रीफलैर्होममायुष्कामस्तुदूर्वया तिलैराज्येनसंमिश्रैस्तेजस्कामोघृतेनवै व्रीहिभिःपशुकामस्तुराष्ट्रकामस्तुवैयवैः पायसंसर्वकामेनहोतव्यंशर्करान्वितं मध्वक्तान्याम्रपत्राणितीव्रज्वरविनाशिने हिमभूतज्वरेणैवगुडूचीभिर्हुनेद्ध्रुवं सर्वरोगविनाशायसूर्यस्याभिमुखोजपेत् अयुतेद्वेजपेद्धोमःकार्योर्कसमिधाशुभः औदुंबरैरन्नकामस्ते

जस्कामस्तुखादिरैः अपामार्गसमिद्धोमाद्भूतबाधाविनश्यति ग्रहबाधाविनाशायजपेदश्वत्थसान्निधौ लवणान्वितदध्यक्तास्तीक्ष्णाग्राश्वत्थसंभवाः हूयंतेसमिधःशुष्काःस्वाहांतंमंत्रमुच्चरेत् दशपंचाहुतीर्हुत्वागच्छगच्छेत्युदीरयेत् यावद्धोमोबलिर्देयःपुरुषाहारसंमितः एवंकृतेप्रमुच्येतपुमान्स्त्रीवामहाग्रहात् जुहुयाच्छतपत्राणिसहस्रंजयमाप्नुयात् लाजाहोमेनकन्यार्थीकन्यामाप्नोतिरूपिणीम् लाजाश्चमधुसंमिश्राःश्वेतपुष्पाणिवापुनः हूयंतेहरितेदेशेतस्यविश्वंवशंभवेत् वामांगमुत्तमंकार्यंस्त्रीवशित्वेविचक्षणैः हस्त्यश्वामात्यशांत्यर्थंतिलैश्चाज्येनसंयुतैः होमस्थानेतुसंस्थाप्यकुंभमेकंजलान्वितम् मंत्रंजप्त्वाष्टसाहस्रंकुंभंस्पृश्यप्रयत्नतः अभिषेकस्तुतेषांवैशालांप्रोक्ष्यप्रदक्षिणाम् ग्रहग्रामादिशांतिस्तुसर्वैःकार्यास्तुपूर्ववत् वास्तुपूजाप्रकर्तव्याप्राच्यांदिशिपदेशुभे ईशानायबलिःकार्यःपशूनांपतयेतथा एवंकृतेपशूनांतुप्रजानांशांतिमाप्नुयात् अद्भुतेषुचसर्वेषुपशूनांग्रामबाह्यतः उपविश्यजपेद्रुद्रंत्वरितंबहुभिःसह होमःपलाशसमिधैःकर्तव्योघृतसंयुतैः ईशानायबलिःकार्योयस्यांदिशितदद्भुतम् तदाशापतयेचैवपशूनांपतयेतथा वृष्टिकामोजपेल्लक्षंतिलैर्होमोघृतान्वितैः बलिपूजाप्रकर्तव्याशिवस्यवरुणस्यच सर्वस्मिन्नपिचैवार्थेत्वरितस्यजपोभवेत् अयुतद्वयजाप्यंतुयावल्लक्षंततोधिकम् एवंकृतेतुसिद्धिःस्यान्निष्कामःप्राप्नुयाच्छिवम् ऐहिकामुष्मिकान्भोगान्भुक्त्वासायुज्यमाप्नुयात् इतिदिनकरभट्टकृतेशांतिसारेत्वरितरुद्रविधानम् अथपार्थिवपूजा तिथितत्त्वेभविष्ये मृद्भस्मगोशकृत्पिंडताम्रकांस्यमयंतथा कृत्वालिंगंसकृत्पूज्यवसेत्कल्पायुतंदिवि वार्क्षंवित्तप्रदंलिंगंस्फाटिकंसर्वकामदम् नर्मदागिरिजंश्रेष्ठमन्यद्वापिहिलिंगवत्

लिंगवल्लिंगाकारम् तेननार्मदादेरपिलिंगस्यनाकारस्यनपूज्यतेति हेमाद्रौमात्स्ये रत्नजंहेमजंलिंगंपारदंस्फाटिकंतथा पार्थिवंपिष्टपौष्पंवासर्वाभीष्टप्रदायकम् पौष्पंलिंगंसहायभूतमृदापि केवलपुष्पैस्तदसंभवात् तत्रैवनंदिपुराणे आयुष्मान्धनवान्श्रीमान्पुत्रवान्धान्यवान्सुखी वरमिष्टंलभेल्लिंगंपार्थिवंयः समर्चयेत् तस्मात्तुपार्थिवंलिंगंज्ञेयंसर्वार्थसाधकम् तत्रैवशिवधर्मे वालुकानिचलिंगानिकारयेत्पार्थिवानिच सहस्रपूजनात्सोऽपिलभतेवांछितम्फलम् युगपद्बहुपूजनेविशेषोरुद्रयामले एवमंतंविधायाथपूर्वमृत्पिंडशेषतः अवशिष्टानिरचयेत्प्रतिष्ठांतंचपूर्ववत् कृत्वाथवापृथक्पिंडान्प्रथमंलिंगसंख्यया मंत्रैस्तत्तदीयनिर्माणप्रमुखंतुततश्चरेत् मृदाहरणादिप्राणप्रतिष्ठांतमेकैकस्य कुर्यात् अथवामृदाहरणंसकृत्कृत्वा पूजनीयलिंगसमसंख्ययापिंडान्कृत्वा संघट्टनादिपूजांतंप्रत्येकंकुर्यादित्यर्थः तत्रैवकालकोमुद्याम् अक्षादल्पपरीमाणंनलिंगंकुत्रचिन्नरः कुर्वीतांगुष्ठतोह्रस्वंनकदाचित्समाचरेत् अक्षोशीतिरक्तिकाः तेषोडशाक्षइत्यमरात् इदंचपरिमाणंप्रधानलिंगस्यनवेदिकायाः अंगुष्ठशब्देनांगुष्ठबृहत्पर्वग्रंथिरुच्यते अंगुष्ठांगुलिमानंतुयत्रयत्रोपदिश्यते तत्रतत्रबृहत्पर्वग्रंथिभिर्मानयेत्सदेतिछन्दोगपरिशिष्टात् अंगुष्ठमानमंगुलिमानंवेत्यर्थः तत्रैवगौतमः रात्रावुदङ्मुखंकुर्याद्देवकार्यंसदैवहि शिवार्चनंसदाप्येवंशुचिःकुर्यादुदङ्मुखः सदादिवारात्रौच लैंगे विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः तस्मान्मृदाऽपिकर्तव्यंल्ललाटेवैत्रिपुंड्रकम् ॐ हूंनमइतिरुद्राक्षान्प्रत्यभिमन्त्र्यमालांधारयेदित्युक्तम् तत्रैवपूजाधिकारार्थंपंचाक्षरजपउक्तस्तत्रैवभविष्ये अपवि-

त्रः पवित्रोवासर्वावस्थांगतोपिवा महापातकयुक्तोवामंत्रस्यास्यजपेयथा अधिकारीभवेत्सर्वइतिदेवोब्रवीच्छिवः इतितथार्थोयथापदात् तत्रैवब्राह्मे यावन्नदीयतेचार्घ्यंभास्करायनिवेदितम् तावन्नपूजयेद्विष्णुंशंकरंवासुरेश्वरम् तत्रैवदेवीपुराणे मृदाहरणसंघट्टप्रतिष्ठाह्वानमेवच स्नपनंपूजनंचैवविसर्जनमतःपरम् हरोमहेश्वरश्चैवशूलपाणिःपिनाकधृक् पशुपतिःशिवश्चैवमहादेवइतिस्मृतः नामक्रमेणपूर्वोक्तकर्माणिकार्याणीत्यर्थः पूजनमर्घ्यादि प्रतिष्ठाह्वानयोरदृष्टार्थत्वात्पाठक्रमएव यद्यप्यत्रनामान्येवविनियुक्तानितथापि ध्यात्वाप्रणवपूर्वंतुतत्रनाम्नासमाहितः नमस्कारेणपुष्पादिविन्यसेच्चपृथक्पृथक् इतिसामान्यवाक्यान्नमोंतताज्ञेया पूजनेचयद्यपिशिवनामोक्तं तथातद्युक्तपंचाक्षरोग्राह्यइत्युक्तम् तत्रैवनंदिपुराणे गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ज्ञेयोनमःशिवायेतिमंत्रःसर्वार्थसाधकः पंचाक्षरस्यनमोन्तत्वाभावात्पुनर्नमःशब्दोवाच्यइत्युक्तं तत्रैव नमःशब्दस्यदानार्थत्वात्पूर्वस्थितनमःशब्देनतत्सिद्धेः विसर्जनात्पूर्ववामावर्तेनाष्टमूर्तिपूजोक्ता तत्रैवभविष्ये शर्वायक्षितिमूर्तयेनमः भवायजलमूर्तये॰ रुद्रायाग्निमूर्तये॰ उग्रायवायुमूर्तये॰ भीमायाकाशमूर्तये॰ पशुपतयेयजमानमूर्तये॰ महादेवायसोममूर्तये॰ ईशानायसूर्यमूर्तयेनमः मूर्तयोऽष्टौहरस्यैताःपूर्वादिक्रमयोगतः आग्नेयान्ताःप्रयोज्यास्तुवेद्यांलिंगेशिवंयजेत् एतावेद्यांपूज्याइत्यर्थः अत्रप्रसिद्धप्रागादिग्रहणमित्युक्तम् तत्रैवयुक्तंतुपूज्यपूजकांतरालस्येति अत्रशूद्रस्याप्यधिकारः शूद्रःकर्माणियानित्यंस्त्रीयानिकुरुतेप्रिये तस्याहमर्चांगृह्णामिचंद्रखंडविभूषिते नमोंतेनशिवेनैवस्त्रीणांपूजाविधीयते स्वाहाप्रणवसंयुक्तंशूद्रेमंत्रंद

देहिजः शूद्रोनिरयमाप्नोतिब्राह्मणःशूद्रतामियात् इतिस्कांदात् एवंप्रकारेणप्रणवनिवृत्तिः अथप्रयोगः अमुककामः पार्थिवलिंगपूजांकरिष्यइतिसंकल्प्य विभूतिरुद्राक्षधारणंकृत्वायथाशक्तिपंचाक्षरंजप्त्वापुष्पदूर्वायुतमर्घ्यंसूर्यायेदमर्घ्यंनममेतिदत्वा हरायनमइतिमृदाहरणं महेश्वरायनमइतिसंघट्टनम् शूलपाणयेनमइतिप्रतिष्ठापनं पिनाकधृषेनमइत्यावाहनम् अथशारदोक्तध्यानम् ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नम् पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रम् नमःशिवायेतिपाद्यार्घ्याचमनीयानि पशुपतयेनमइतिस्नानम् नमःशिवायेतिवस्त्रयज्ञोपवीतगंधालंकारपुष्पधूपदीपनैवेद्यफलतांबूलानिदत्वा वेद्यामष्टमूर्तीरक्षतादिनापूजयेत् शर्वायक्षितिमूर्तयेनमः प्राच्याम् भवायजलमूर्तयेनमईशान्याम् रुद्रायाग्निमूर्तयेनमउदीच्याम् उग्रायवायुमूर्तयेनमःवायव्याम् भीमायाकाशमूर्तयेनमःप्रतीच्याम् पशुपतयेयजमानमूर्तयेनमःनैर्ऋत्याम् महादेवायसोममूर्तयेनमःदक्षिणस्याम् ईशानायसोममूर्तयेनमआग्नेय्याम् महादेवायक्षमस्वेतिसंहारमुद्रयाविसर्जनम् इतिदिनकरभट्टकृतेशांतिसारेपार्थिवपूजाप्रयोगः अथकाम्यप्रयोगः कार्तिकेमार्गशीर्षेवामाघेवैशाखसंज्ञके श्रावणेबहुलेपक्षेव्रतस्याचरणंकुरु तद्यथा कृतनित्यक्रियःपूजोपकरणानिसंपाद्यशुच्यवकाशेप्रागुदगुपविश्याचम्यप्राणानायम्यतिथ्यादिस्मृत्वामुककामोऽमुकसंख्ययाएतावंतंकालंपार्थिवलिंगानिपूजयिष्ये तदंगभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासान्विधास्ये इतिसंकल्प्य पृथ्वित्वयेतिमंत्रस्यमेरुपृष्ठऋषिःकूर्मोदेव-

तासुतलंछंदः आसनोपवेशनेविनियोगः पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता त्वंचधारयमांदेविपवित्रंकुरुचासनमितिकुशाजिनचैलनिर्मिते आसनेउपविश्यपृथिव्यैनमः आधारशक्त्यै० विश्वशक्त्यै० चिच्छक्त्यै० मायाशक्त्यैनमइत्यासनंसंपूज्यमूलेनशिखामाबद्ध्यात्मदृष्ट्यावलोकनेनदिव्यं रूपंअस्त्रायफडितिजलप्रक्षेपेणांतरिक्षात् अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशम् सर्वेषामविरोधेनब्रह्मकर्मसमारभेत् इतिमंत्राभ्यांवामपार्ष्णिघातत्रयेणभौमांतरिक्षविघ्नानुत्सार्य सर्वभूतनिवारायशार्ङ्गाय सशरायास्त्रराजायसुदर्शनायहुंफडितिछोटिकाभिस्तालत्रयेणचदिग्बंधंविधायास्त्रेणकरशुद्धिंकृत्वागुरुभ्योनमः परमगुरुभ्योनमः परात्परगुरुभ्योनमः परमेष्ठिगुरुभ्योनमः आचार्यगुरवेनमः नमोमहद्भ्यइतिनत्वाभूतशुद्धिमारभेत् यथाहृदये अदीपकलिकारं जीवकलाहंसमंत्रेणांकुशमुद्रया ब्रह्मांडस्थितसहस्रदलपद्मांतर्गतशिवेनसंयोज्य ॐ ह्रांसद्योजातायनिवृत्तिकलात्मनेहुं फडितिपादादिजान्वोर्वामदेवाय प्रतिष्ठाकलात्मने फडिति हृदयादिवदने तुंहईशानायशांत्यतीतकलात्मने हुंफडिति वदनादिमूर्द्ध्नि न्यसेत् एवंभूतान्युपसंहृत्यजन्मांतेदुःखप्रदंपापपुरुषंदक्षिणकुक्षौविचिंतयेत् ब्रह्महत्याशिरस्कंचस्वर्णकस्तेयकद्वयम् सुरापानहृदायुक्तंगुरुतल्पकटिद्वयम् तत्संयोगिपदद्वंद्वमंगप्रत्यंगपातकम् उपपातकरोमाणंरक्तश्मश्रुविलोचनम् खड्गचर्मधरंपापमंगुष्ठपरिमाणकम् अधोमुखंकृष्णवर्णंदक्षकुक्षौविचिंतयेत् ततोयमितिवायुबीजेपूरकेषोडशवारंजप्त्वापापंविशोध्ययरामितिवह्निबीजेकुंभकेचतुःषष्टिवारंजप्त्वातदर्द्धेनपुनर्वायुबीजेरेचकेद्वात्रिंशद्वारंजप्त्वा नित्यशुद्धबुद्धस्वभावंब्रह्मैवाह

मितिध्यात्वापुनःसिसृक्षएवमितिततोथवीजेनस्वावयवानाप्यवह्नीनविंशतिवारमहमित्याकाशवीजेनदेवाह्वारात्स्वावयवान्भावयित्वा ॐ ह्रौंईशा
नायनमः मूर्द्ध्नि ॐ ह्रौंतत्पुरुषायनमः मुखे ह्रूंअघोरायनमः हृदि ह्रींवामदेवायनमः गुह्ये सद्योजातायनमः पादयोः एवमुत्पन्नेदेवात्मके देहे
ब्रह्माण्डस्थितपरमात्मनः सकाशात्स्त्रीवंरुंहासोहमिति हृदयमानीयप्राणप्रतिष्ठांकुर्यात् अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्राऋ
षयः ऋग्यजुःसामानि छन्दांसि प्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः क्रौंकीलकं स्वशरीरे प्राणप्रतिष्ठापनेविनियोगः ॐ ह्रांआंअंकंखंगंघंङं
अं आकाशवायुतेजोजलपृथिव्यात्मने आंअंगुष्ठाभ्यांनमः ॐ ह्रींईंचंछंजंझंञं ईं शब्दस्पर्शरूपरसगंधात्मनेईंतर्जनीभ्यांनमः ॐ ह्रूंऊंटंठं
डंढंणं ऊं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मनेऊंमध्यमाभ्यांनमः ॐ ह्रैंऐंतंथंदंधंनं ऐंवाक्पाणिपादपायूपस्थात्मनेऐंअनामिकाभ्यां० ॐ ह्रौं औं
पंफंबंभंमं औं खमादानगतिविसर्गानंदात्मने औं कनिष्ठिकाभ्यांनमः ॐ ह्रः अं यं रं लं वं शं षं सं हं ळं क्षं अः मनोबुद्ध्यहंकारात्मने अः अस्त्रा
यफट् एवंहृदयादौ अथध्यानम् रक्ताम्बोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशंकोदंडमिक्षूद्भवगुणमथचाप्यंकुशंपंचबाणा
न् बिभ्राणासृक्कपालंत्रिनयनलसितापीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः ओंआंह्रींक्रौं यंरंलंवंशंषंसंहं
सोहंहंसः क्रौं ह्रींआंअसुप्राणइहप्राणाः ॐ आं ह्रींक्रौं यंरं० क्रौं ह्रीं आं असुंजीवइहस्थिताः ॐ आं ह्रींक्रौं यंरं० क्रौं ह्रींआं असुंसर्वेन्द्रियाणि
ॐ ह्रींक्रौं यंरं० क्रौं ह्रींआंअसुंवाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहेतिमंत्रं हृदिकरंनिधायत्रिवारं

जपेत् तथैवपंचदशप्रणवावृत्तीः कृत्वाक्रमेणममसंस्काराजाताइतिभावयेत् इतिप्राणप्रतिष्ठा अथांतर्मातृकाबहिर्मातृकाः श्रीकंठादिमानश्चान्यत्रोक्तप्रकारेणान्यसेत् ततःपूजांकुर्यात् तत्रादौसूर्यायदेवताभ्यश्चार्घ्यंनिवेदयेत् तदुक्तंब्रह्मांडपुराणे यावन्नदीयतेचार्घ्यंभास्करायनिवेदितम् तावन्नपूजयेद्विष्णुंशंकरंवासुरेश्वरमिति निवेदनप्रकारस्तु भगवन्सूर्यभगवत्योदेवता अद्याऽहंपार्थिवलिंगपूजामाचरिष्यामीत्येकाहपूजनपक्षेदशाहपूजनपक्षे अद्येत्यस्यस्थानेदशाहमित्यूहनीयं एवंचविंशतिरात्रमासत्रिमासषण्मासनवमासवर्षयावज्जीवपक्षेषूहनीयम् उपरितनामष्टांगुलीमृदमुपाकृष्यपृथिव्यैनमः इतिपृथ्वीमंत्रेणपृथ्वीमभिमंत्र्य गंधाद्यैरभ्यर्च्य उद्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेत्वांमगृह्णामिपूजयाचधनेनचेतित्रिः समृद्धृतांमृदंपुनरभिमंत्र्यसंशोध्य शुद्धभांडेस्थापयेत् अतएवान्वहंमृदंशुद्धपात्रेनिक्षिप्याभिमंत्रितेनजलेनाप्लाव्यपिंडयेत् ततोमूलमंत्रस्यन्यासंविधायशंखेतरपात्रेजलमापूर्यमूलेनाभिमंत्र्यतेनात्मानंपूजोपहाराणिच प्रोक्ष्यगंधाद्युपकल्प्यद्वारपूजांविदध्यात् यथा देहल्यैनमः गणेशायनमः दक्षिणे चामुंडायै० वामे भैरवाय० पूर्वे भैरव्यै० पश्चिमे अथार्घ्यस्थापनम् प्रासादमंत्रस्य वामदेवऋषिः शिरसिपंक्तिच्छंदोमुखे सदाशिवोदेवता हृदिहंबीजंऋशक्तिः सकारःकीलकं ह्रांहृदयायनमइतिषडंगः स्वस्वक्रमेणफडित्यर्घ्यपात्रंप्रक्षाल्यभूमौचंदनांबुनाकल्पितेमंडलेमत्स्यमुद्रांप्रदर्श्यदशकलान्यासायसूर्यमंडलायनमइतिजलेचंदनं निक्षिपेत् वषडित्यक्षताः नमइतिपुष्पंवौषडितिनिरीक्ष्यअंकुशमुद्रयागंगेचयमुनेचैवेतितीर्थान्यावाह्य फडितिसंरक्ष्य हुमित्यवगुंठ्यकराभ्या

माच्छाद्यमूलेनदशवारमभिमंत्र्यतेनात्मानंपूजोपकरणानिचप्रोक्ष्यास्त्रेणद्वारदेशंप्रोक्ष्यगुरुभ्योनमः चिच्छक्त्यैनमः नागायै० यमुनायै० धात्रेनमः विधात्रेन० शंखनिधये० पद्मनिधये० द्वारश्रियै० देहल्यै० इतिशिवद्वारेदेवताः संपूज्यान्यपूजांविदध्यात् आधारशक्त्यैनमः कूर्माय० स्कंदाय० नीलाय० पद्माय० ततः पूर्वाद्यष्टदलेषुकर्णिकायांच वातायै० ज्येष्ठायै० रौद्र्यै० काल्यै० कलविकरिण्यै० बलायै० बलप्रमथिन्यै० सर्वभूतदमन्यै० मनोन्मनायैनमइति ॐ नमोभगवतेसकलगुणात्मशक्तियुक्तायानंताययोगपीठात्मनेत्रिनेत्रायनमइतिपीठपुष्पांजलिंदत्वादेशकालौसंकीर्त्यमहेशानुग्रहद्वारामनोवांछितसिद्ध्येपूजयिष्ये पार्थिवानिलिंगान्यमुकसंख्यायाविनियोगंविधायततः पृथ्वीतलान्मृदमादाय ततो गंग्लौ गणपतयेनमः ग्लौंगं ह्रीं मृदमभिमंत्र्यवराभयपाणिंसुगंगणपतिं निसर्यपुनर्मंत्रं पठित्वापीठेस्थापयामीतिप्रतिष्ठाप्य ॐ हूंहरायनमइतितोलकान्मृदंगृहीत्वा ॐ महेश्वरायनमइतिसंघट्टनंविधाय ॐ हं शूलपाणयेनमः स्थापयामीतिताम्रपात्रेनिधायचसाक्षतलिंगंस्थापनमुद्रयास्थापयेत् ततः शिवपंचाक्षरमंत्रस्यवामदेवऋषिः शिरसिपंक्तिश्छंदः मुखे सदाशिवोदेवता हृदये अभीष्टसिद्धये विनियोगः मूलेनव्यापकंन्यासंकृत्वाकरकपिच्छिकांपुष्पगर्भांहृदिस्थांबद्ध्वाध्यायेत् तथा ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नम् पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रम् इतिध्यात्वावहन्नासापुटेक्रमेणहृदयाद्देवस्यतेजःपुष्पेसमानीयतत्पुष्पंमूर्तौसमर्प्य ॐ हुंपिनाकपाणयेन

मइत्यावाहनादिपंचमुद्राः प्रदर्श्य हुमित्यवगुंठ्य वमितिधेनुमुद्रयामृदीकृत्यपरमीकृत्यषडंगेन्यस्यमुकुलीकृत्यशिवेप्राणप्रतिष्ठांकुर्यात् अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिछंदांसिचैतन्यंदेवता देवेप्राणप्रतिष्ठापनेविनियोगः ॐ आंह्रीम् क्रौं यं रं लं वं शं षं सं हं सः सोहंशिवस्यप्राणइहप्राणाः ॐ आं ह्रीं क्रौं यं रं॰ शिवस्यजीवइहस्थितः ॐ आं ह्रीं क्रौं यं रं॰ शिवस्यसर्वेन्द्रियाणि ॐ आं ह्रीं क्रौं यं रं॰ शिवस्यवाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणजिह्वापाणिपादपायूपस्था इहैवागत्यसुखंचिरंतिष्ठंतुस्वाहाइति चत्वारिवागिति मंत्रेणवागुत्पत्तिं विभाव्य पूर्ववत्करकापिच्छिकांकृत्वाध्यायेत् बिभ्रद्दोर्भिःकुठारंमृगमभयवरौसुप्रसन्नोमहेशः सर्वालंकारदीप्तः सरसिजनिलयोव्याघ्रचर्मात्तवासाः ध्येयोमुक्तागरागामृतरसकणिकाद्रिप्रभः पंचवक्त्रस्त्र्यक्षःकोटीरकोट्युद्घाटितहिमरुचिः सर्वदाचंद्रमौलिः इति ध्यात्वानमस्कारंकुर्यान्मंत्रमुदीरयन् नमोस्तुस्थाणुरूपायज्योतिर्लिंगामृतात्मने चतुर्मूर्तेश्वपुंच्छायाभासितांगायशंभवे सर्वज्ञज्ञानविज्ञानप्रदानैकमहात्मने नमस्तेदेवदेवेशासर्वभूतहितेरत अनंतकांतिसंपन्नअनंतासनसंस्थितः अनंतकांतिसंभोगपरकांतनमोस्तुते वज्ररूपमहारूपसर्वरूपोत्तमोत्तम पशुपाशार्णवासीनहृढव्रतनमोस्तुते स्वभावनिर्मलाकारसर्वोपाधिविनाशन योगियोगिन्महायोगयोगीश्वरनमोऽस्तुते प्राणप्रतिष्ठांकृत्वातुइदंस्तोत्रमुदीरयेत् लिंगस्तवंमहापुण्यंयःशृणोतिसदानरः नोत्पद्यतेससंसारेस्थानंप्राप्नोति शाश्वतम् एवमेतंविधायाथपूर्वमृत्पिंडशेषतः अवशिष्टानिरचयेत्प्रतिष्ठांतचपूर्ववत् कृत्वाथवापृथक्पिंडान्प्रथमंलिंगसंख्यया मंत्रैरादाय

निर्माणप्रमुखंतु ततश्चरेत् अवशिष्टमृदाशक्तिनिर्माणंप्रमुखंमनुः ॐ नमो भगवत्यै उमादेव्यै शिवायै शिवप्रियायैनमइतिमंत्रः स्कांदेनमनुनातस्यनिर्माणप्रमुखंचरेत् ॐ ऐं हुं क्षं क्लीं कुमारायनमइतिमंत्रः विधायषण्मुखंशक्तिवराभाकृतिमत्करम् मयूरवाहनंलिंगंपंक्त्यंतेचप्रतिष्ठितम् ततोगणेशप्रमुखान्स्वस्वमंत्रेणपूजयेत् तत्रपूर्वस्थापितमध्येउंहुं शिवायनमः मध्येसमर्पयामीतिनिवेद्यॐ हुं पशुपतयेनमः स्नापयामीतिप्रतिलिंगंस्नानंसमर्प्यपुनःशिवायनमइतिदीपदानांतंकृत्वावरपूजांपूर्वाद्यष्टदिक्षु भवायनमइत्यष्टमूर्तीः संपूज्य नैवेद्यमानीय वह्निवायुचंद्रबीजैर्विभाव्यमंत्रेणापोशनंकृत्वावामेनग्रासमुद्रांप्रदर्श्यदक्षिणेनपंचप्राणाहुतिमुद्राः प्रदर्शयेत् मुद्रालक्षणंगुरुमुखादवगंतव्यं मध्येसुगंधजलमुत्तरापोशनंस्फाटिकांचदत्वा करोद्वर्तनमुत्तरापोशनंफलतांबूलदक्षिणादानादिसमर्प्यनिर्माल्येनचंडीगणेशकुमारशक्तीनां तत्तन्मंत्रैः पंचोपचारैः संपूज्य महादेवायनमइति संहारमुद्रया तत्तेजः स्वहृदयमानीयनिर्माल्यंशिरसिचंदनंललाटेधृत्वायथासुखं विहरेदिति यस्तुपूजयतेभक्त्यालिंगंत्रिभुवनेश्वरम् सस्वर्गराज्यमोक्षाणांक्षिप्रंभवतिभाजनमिति इतिदिनकरभट्टकृतेशांतिसारेकाम्यप्रयोगविशेषानुष्ठाननिरूपणं अथकामनाभेदेनसंख्याभेदः दैशिकात्सकलंज्ञात्वाकुर्याल्लिंगंफलप्रदं विद्यार्थीलिंगसाहस्रंधनार्थीचतदर्द्धकम् पुत्रार्थीसप्तसाहस्रंकन्यार्थीतुशतत्रयम् वंध्यालिंगायुतंकुर्यात्सर्वपापहरंशुभम् राज्यार्थीशतसाहस्रंकांतार्थीशतपंचकम् मोक्षार्थीकोटिगुणितंभूकामश्चसहस्रकम् रूपार्थीतुत्रिसाहस्रंतीर्थार्थीद्विसहस्रकम् सुहृत्कामेसहस्रंस्याद्दुख्यार्थीशतमष्टकम् मा-

रणार्थीसप्तशतंमोहनार्थीशिताष्टकम् उच्चाटनपरश्चैवसहस्रंतुयथोक्तवत् स्तंभनंतुसहस्रेणजारणांचतदर्द्धवत् निगडान्मुक्तिकामस्तुसहस्रंसार्द्धमीरितम् महाराजभयेपंचशतंचोरादिसंकटे शतद्वयंचडाकिन्याभयेपंचशतंपरम् दरिद्रःपंचसाहस्रमयुतंसर्वकामदम् अथ नित्यपूजनेसंख्या एकंपापहरंप्रोक्तंद्विलिंगंचार्थसिद्धिदम् त्रिलिंगंसर्वकामानांकारणंपरमाद्भुतम् उत्तरोत्तरमेवंस्यात्पूर्वोक्तगणनावधि कृत्वायथोक्तविधिनापापंनश्यतितत्क्षणात् अथापरम् लिंगानामयुतंकृत्वानराजभयमावहेत् सहस्राणितथापंचनिगडान्मुच्यतेध्रुवम् कारागृहविमुक्त्यर्थमयुतंकारयेद्बुधः डाकिन्यास्तुभयेप्राप्तेसहस्रंकारयेत्तदा सहस्राणांपंचशतंपुत्रार्थीकारयेत्सुमान् कृत्वानित्यविधानेनसद्गुणंसुतमाप्नुयात् लिंगानामयुतेनैवकन्यकासंततिंमुने एकलिंगार्चनान्नित्यमतुलांश्रियमाप्नुयात् लक्षमेकंतुलिंगानांयःकरोतिनरोभुवि शिवःस्वयंभवेत्क्षिप्रंनात्रकार्याविचारणा कोटिरेकातुलिंगानांमोक्षदासर्वकामदा अर्चापार्थिवलिंगानांकोटियज्ञफलप्रदा अथकाम्यभेदेनफलभेदः मृद्भस्मगोमयैर्देवितथावालुकयापिवा कृत्वालिंगंसकृत्पूज्यवसेत्कल्पायुतंदिवि सर्वेषामेववर्णानांस्फाटिकंसर्वकामदम् सर्वदोषविमुक्त्यर्थमन्यथादोषमावहेत् यत्फलंपाकयज्ञेषुहविर्यज्ञेषुयत्फलम् एकाहात्तदवाप्नोतिलिंगार्चनरतःसदा गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलम् दशाहात्तदवाप्नोतिसम्यक्लिंगार्चनेरतः वाजपेयशतैरिष्ट्वायल्लभंतेद्विजोत्तमाः विप्रोविंशतिरात्रेणरुद्रभक्त्यातदाप्नुयात् अश्वमेधसहस्रस्यसम्यगिष्टस्ययत्फलम् मासेनतदवाप्नोतिरुद्रलिंगार्चनेरतः रा

जसूयसहस्रस्यसम्यगिष्टस्ययत्फलम् मासेनतदवाप्नोतिशिवलिंगार्चनेरतः सर्वतीर्थाभिषेकस्यसर्वदानफलानिच सर्वयज्ञफलंचैव उपवासफलानिच सम्यगिष्टफलः सर्वक्षेमाचारःसमाधिना नवमासात्समासाद्यब्राह्मणोविजितेंद्रियः सर्वमेतदवाप्नोतिलिंगेयोऽर्चयते शिवम् यस्तुसंवत्सरंपूर्णंपूजयेदेकलिंगकम् तस्यतुष्टःप्रयच्छामिगाणपत्यंनसंशयः माघेमासिसमुद्युक्तास्त्रिसंध्यंयोर्चयेच्छिवम् लभेत्षण्मासिकंपुण्यंमासेनैवनसंशयः यथामाघेतथाऽऽषाढेकार्तिकेतुविशेषतः त्रिषुपुण्यंसमंज्ञेयंमासेष्वेतेषुयत्फलम् यस्तु पूजयतेनित्यंलिंगेत्रिभुवनेश्वरम् सस्वर्गराज्यमोक्षाणांक्षिप्रंभवतिभाजनम् अथोद्यापनंलिंगे अथातःसंप्रवक्ष्यामिप्रतिष्ठांलिंगकस्यच येनयस्यविधानेनव्रतंसंपूर्णतामियात् सहस्रंवाथलक्षंवापूजयित्वायथाविधि कोटिंवाथविधानेनकामनातथवानरः समाप्ते तुव्रतेराजन्विनिर्मायमहेश्वरम् स्थापयित्वाशुभेस्थानेसंपूज्यार्घ्यादिभिःक्रमात् गंधमाल्यैस्तथाधूपैर्नैवेद्यैर्विविधैस्तथा हिरण्यं गांचवासांसिशिवायविनिवेदयेत् दण्डवत्प्रणतोभूत्वास्तुत्वाचैवविशेषतः एकाग्रःप्रणतोभूत्वातावन्मंत्रमुदीरयेत् कंटकोपहृतैःपुष्पैरशस्तैर्भावदूषितैः केशकीटापविद्धैश्च पूजितोऽसिमयाप्रभो अन्यथासक्तचित्तेनक्रियाहीनेनवाप्रभो मनोवाक्कायदुष्टेन पूजितोसित्रिलोचन पादोपहृतपात्रेणकृतमर्घ्यादिकंमया तामसेनचभावेनतत्क्षमस्वममप्रभो मंत्रेणाक्षरहीनेनपुष्पेणविकलेनच पूजितोसिमयादेवतत्सर्वंक्षम्यतांमम व्रतंसम्पूर्णतांयातुफलंचाक्षय्यमस्तुमे एवंस्तुत्वामहादेवंनमस्कृत्यविसृज्यच नैवेद्यादित

थावस्त्रंभस्मांगायनिवेदयेत् ब्राह्मणान्भोजयित्वाथदद्यात्तेभ्यश्चदक्षिणाम् यथाशक्त्यनुवित्तेनहिरण्यंव्रतदक्षिणा प्रतिष्ठाउद्यापनमित्यर्थः विनिर्मायसुवर्णादिनाफलादिपरिमाणेनेत्यर्थः शुभइतिकलशस्थापनमर्थीसिद्धम् दक्षिणांयथाशक्तिधेनुवित्तेनहिरण्यंव्रतदक्षिणा अथापरप्रकारोभविष्ये नारदउवाच कथमुद्यापनंचास्यकिंप्रकारंमहाफलम् कथयाशुमहादेवलोकानामुपकारक ईश्वरउवाच येश्चिवंसमुपासाद्यपूज्यप्राप्तमनोरथाः तत्प्रमाणंतुसौवर्णंयथाशक्त्यथवापुनः रौप्यंताम्रमयापिस्यादष्टम्यांचयथोक्ततः चतुर्दश्यामभद्रायांसोमेनाथप्रपूजयेत् उपोष्यप्रथमेह्येवसंपूज्यपरमेश्वरम् चतुर्दश्यष्टमीयुक्ता अमाचनवमीयुता पारणंतत्रकर्तव्यंरौद्रयुक्तेपुनर्वसौ पंचैकादशवाद्वाभ्यामधिकाविंशतिःपरा चत्वारिंशच्चतुर्भिश्चब्राह्मणान्भोजयेत्ततः आचार्यंप्रथमंपूज्यब्रह्माणंचततःपरम् गणेशमृत्विजादींश्चपूजयेद्विधिनाततः वस्त्रैश्चदक्षिणाभिश्चपूजयेच्छिववतत्परान् मृत्युंजयेनमंत्रेणअग्निंहुत्वास्वशक्तितः रुद्रेणाप्यथवाहुत्वानमोमंत्रेणवापुनः नमोमंत्रोनमोभवायचेति संख्याचयदारुद्रेणतदाऽतिरुद्रः प्रतिमंत्रप्रक्षेपणयदामृत्युंजयमंत्रोनमोमंत्रोवा हुतलिंगदशांशेनतत्पूजयायुक्तम् नैवेद्यंदक्षिणास्तोत्रगीतवाद्यसमन्वितं मंत्रेणानेनविधिवद्धाचार्यायनिवेदयेत् यथासुराणांत्रिपुरंचदग्धमेकेषुणालोकहितार्थमीश त्वद्रूपदानादहमप्यशेषैर्दोषैर्विमुक्तोहितथाभवेयम् तथाकुरुत्वंशरणंप्रपन्नेमयिप्रभोदेववरप्रसादम् प्रणिपत्यमहादेवंनमस्कुर्यात्पुनःपुनः सोद्यापनंव्रतंकृत्वाप्राप्नुयात्परमंपदम् अथपंचाक्षरस्यऋषिन्यासध्यानानि अस्यशिवपंचाक्षरमंत्र-

स्य वामदेवऋषिः पंक्तिश्छंदः सदाशिवः परमात्मादेवता इष्टसिद्ध्यर्थजपेविनियोगः मूलेनकरशुद्धिंकृत्वा तत्पुरुषाघोरसद्योजातवामदेवेशानान्पंचब्रह्ममंत्रान्तर्जन्यादिषु अंगुष्ठांतासु पंचस्वंगुलीषुन्यसेत् एवंहृदयादौ ॐ सर्वज्ञशक्तिधाम्ने अंगुष्ठाभ्यांनमः ॐ नंतृप्तिशक्तिधाम्नेतर्जनीभ्यांनमः ॐ मं अनादिबोधशक्तिधाम्नेमध्यमाभ्यां॰ ॐ शिंस्वतंत्रशक्तिधाम्नेअनामिकाभ्यांन॰ ॐ वांनित्यमलुप्तशक्तिधाम्नेकनिष्ठिकाभ्यांन॰ ॐ यं अनंतशक्तिधाम्नेकरतलकरपृष्ठाभ्यांनमः एवंहृदयादौ ॐ नं तत्पुरुषतर्जनीभ्यां॰ ॐ मं अघोरमध्यमाभ्यां॰ ॐ शिं सद्योजातानामिकाभ्यां॰ ॐ वां वामदेवकनिष्ठाकाभ्यां॰ ॐ यं ईशानांगुष्ठाभ्यां॰ एवंहृदयादौ ॐ नं तत्पुरुषायनमः पूर्वमुखे ॐ मं अघोराय॰ दक्षिणमुखे ॐ शिंसद्योजाताय॰ पश्चिममुखे ॐ वांवामनाय॰ उत्तरमुखे ॐ यंईशानायनमः ऊर्ध्वमुखे अथध्यानं विभ्रद्दोर्भिःकुठारंमृगमभयवरौसुप्रसन्नोमहेशःसर्वालंकारदीप्तःसरसिजनिलयोव्याघ्रचर्मोत्तरीयः ध्येयोमुक्तागरागामृतरसकणिकाद्रिप्रभःपंचवक्त्रस्त्र्यक्षःकोटीरकोटीघटिततुहिनरोचिःकलोत्तुंगमौलिः एवंध्यात्वायथाशक्तिजपेत् इतिदिनकरभट्टकृतेशांतिसारेलिंगोद्यापनविधिः अथप्रयोगः अष्टम्यांचचतुर्दश्यांवाभद्रारहितायांपूर्वविद्धायांपुनर्वसुयुक्तार्द्रायांसोमेवा कर्तादेशकालौसंकीर्त्यकृतस्यलक्षादिलिंगपूजाकर्मणः संपूर्णतासिद्ध्यर्थंलिंगोद्यापनंकरिष्ये इतिसंकल्प्यगणेशपूजनादिनांदीश्राद्धांते आचार्यब्रह्मसदस्यान्पंचवाएकादशवाद्वाविंशतिवाचतुश्चत्वारिंशद्वाऋत्विजोवृणुयात् ततःआचार्यः कुंडमंडपपक्षेमंडपेतदभावेन्यत्रवासर्षपविकरणभूमिप्रोक्षणेकृत्वा मं

डपपक्षेमंडपपूजांकृत्वामध्यवेद्यांतदभावेन्यत्रवालिंगतोभद्रेमंडलदेवताआवाह्य तत्ररौप्यंताम्रंमृन्मयंवाकलशंसंस्थाप्यतत्रपलतदर्द्धतदर्द्धेन शक्त्यावासुवर्णरौप्यताम्रान्यतमनिर्मितांउमामहेश्वरप्रतिमामग्न्युत्तारणपूर्वकंसंपूज्यपूजांतेहिरण्यगोवस्त्रत्रयंचाशिवायनिवेद्यप्रदक्षिणानमस्कारौकृत्वाप्रार्थयेत् कंटकोपहतैःपुष्पैरशस्तैर्भावदूषितैः केशकीटापविद्धैश्चपूजितोसिमयाप्रभो अन्यथासक्तचित्तेनक्रियाहीनेनवाप्रभो मनोवाक्कायदुष्टेनपूजितोसित्रिलोचन पाद्योपहृतपात्रेणकृतमर्घ्यादिकंमया तामसेनचभावेनतत्क्षमस्वममप्रभो मंत्रेणाक्षरहीनेनपुष्पेणाविकलेनच पूजितोसिमयादेवतत्सर्वंक्षम्यतांमम व्रतंसंपूर्णतांयातुफलंचाक्षय्यमस्तुमे मंडपपक्षेग्रहवेद्यांग्रहान्संस्थाप्यमध्यवेदीस्थापितकलशोपरिपूर्णपात्रेवस्त्रेलिखितंरुद्रयंत्रंसंस्थाप्य तत्रमध्येउमामहेश्वरप्रतिमांसद्योजातादियंत्रदेवताश्चावाह्यपूजयेत् ततोगीतवाद्यादिभिर्जागरणेननिशामतिवाह्यप्रातः शुचिर्देशकालौस्मृत्वाउद्यापनहोमंकर्तुंस्थंडिलोल्लेखनादिकरिष्ये इतिसंकल्प्य उल्लेखनाद्यग्निस्थापनांतेसमिद्धूममादायचक्षुषीआज्येनेत्यंतेऽत्रप्रधानंरुद्रंमृत्युंजयमंत्रेणनमोभवायेतिमंत्रेणवा अयुतसहस्राष्टशतान्यतमसंख्याभिस्तिलाज्याहुतिभिः रुद्रपक्षे अतिरुद्रेणमहारुद्रेणवाग्रहादीन्यथाशक्तिसंख्याकाभिः समिच्चर्वाज्याहुतिभिः शेषेणस्विष्टकृतमित्यादिबलिपूर्णाहुत्यंतेकलशोदकेनाभिषिक्तोयजमानउमामहेश्वरप्रतिमांसंपूज्यपूर्वोक्तमंत्रैःप्रार्थयित्वा इमांउमामहेश्वरप्रतिमांआचार्याय यथासुराणांत्रिपुरंचदग्धमेकेषुणालोकहितार्थमीश त्वद्रूपदानादहमप्यशेषैर्दोषैर्विमुक्तोहितथाभवेयम् तथाकुरुत्वंशरणंप्रपन्नेमयिप्रभोदेववरप्रसादादितिमंत्रेणदद्यात् ततो

यथाशक्तिदक्षिणांदद्यात् शिवायनिवेदितंवस्त्रंभस्मांगायदद्यात् ततोधेनुंहिरण्यं आचार्याय अन्येभ्यश्चयथाशक्तिदक्षिणांदद्यात् ततोग्रहादीन्विसृज्यभूयसींसंकल्प्याग्निंविसृज्ययथाशक्तिब्राह्मणभोजनंसंकल्प्यकर्मेश्वरार्पणंकुर्यादिति इतिश्रीमन्मीमांसकदिनकरभट्टकृतेशांतिसारे सोद्यापनलिंगपूजाप्रयोगः अथनवचंडीशतचंडीसहस्रचंडीविधिः मार्कण्डेयपुराणेडामरतंत्रेच शृणुराजन्प्रवक्ष्यामिचंडिकाक्रममुत्तमम् आश्विनस्यसितेपक्षेप्रतिपत्सुयथाक्रमम् बहुवचनेननवम्यंतांतिलतैलेनस्नानम् सुस्नातस्तिलतैलेनपूर्वाह्णेचनृपोत्तम पुण्याहवाचनंकृत्वाद्विजांश्चैवप्रपूजयेत् ततश्चकारयेद्वेदिंसप्तधान्ययुतांनृप स्थापयेत्पूर्णकलशंपंचरत्नसमन्वितम् वस्त्रेचारक्तकेचैवसंलिखेद्यंत्रमुत्तमम् गर्भेसंस्थापयेद्देवींचंडिकांहेमरूपिणीम् पंचामृतैश्चसुस्नातांचर्चितांगंधकुंकुमैः तथारक्तेनवस्त्रेणप्रसन्नांभक्तवत्सलाम् गुरूपदिष्टविधिनापूजयित्वाप्रयत्नतः यंत्रोद्धारःप्रयत्नेनज्ञातव्योस्यनृपोत्तम चतुरस्राष्टषट्कंचत्रिकोणंसंलिखेत्ततः कुंकुमागरुकर्पूरैश्चंदनैश्चसितासितैः पंचकैःकालिकाभिश्च तथाकस्तूरिकादिभिः चतुरस्रेपूर्वदिशिन्यसेदुडाणपीठकं नाथमुंडेश्वरंचैवमुंडाख्यापादुकांतथा न्यसेन्मातृकोपपीठमाग्नेय्यांपृथिवीपते मातृकेश्वरोपनाथंचमातृकाख्योपपादुकां पीठंजालंधरंचैवदक्षिणेतुतथैवच नाभंज्वालामुखंचापिज्वालाख्यांपादुकांतथा कोल्लापुरोपपीठंचनैर्ऋत्यांविन्यसेन्नृप कोल्लारेश्वरोपनाथंकोल्लाराख्योपपादुकां पूर्णगिरीशपीठंचपश्चिमेस्थापयेन्नृप नाथंपूर्णेश्वरंवापिपूर्णाख्यांपादुकांतथा संहाराख्योपपीठंचवायव्यांचप्रपूजयेत् संहाराख्योपनाथंचसंहाराख्योपपादुकां उत्तरायांतथादेशे ओणपीठंप्रपूजयेत् ओणकेश्वरनाथंचओणाख्यां

पादुकांतथा कामरूपोपपीठंचईशान्यांपूजयेत्ततः कामेश्वरोपनाथंचकामाख्यांचोपपादुकाम् आग्नेय्यामग्निसुमुखंनैर्ऋत्यांप्रेतवाहनं ज्वालामुखंतुवायव्यांधूम्राक्षंत्वीशतस्तथा कोणेचतुष्टयेवापिवेतालानांचतुष्टयं चक्रेअष्टदलेचैवशक्त्याष्टकमुदाहृतम् भैरवाष्टकंचततोलोकपालाष्टकंतथा ब्राह्मीमाहेश्वरींचैवकौमारींवैष्णवीतथा वाराहीचैवमाहेंद्रीचामुंडाचंडिकातथा असितांगोरुरुश्चैवचंडः क्रोधस्तथैवच उन्मत्तभैरवश्चैवकपालीभीषणस्तथा संहारभैरवश्चेतिभैरवाष्टकमीरितम् इंद्रोग्निश्चयमश्चैवनिर्ऋतिर्वरुणस्तथा वायुःसोमस्तथेशानोलोकपालाःप्रकीर्तिताः गुरुंपरमगुरुंचपरमेष्ठिगुरुंतथा गणेशंहरिहरंचैवषड्दलेचैवपूजयेत् बाह्येत्रिकोणकेचक्रेप्रधानस्यचपृष्ठतः पूजयेच्चमहाकालींरुद्रोगौर्यातथासह महालक्ष्मींहृषीकेशोलक्ष्म्याचसहितस्तथा सरस्वत्यापृष्ठदेशेविरिंचिस्त्वनयासह कालश्चदक्षिणेपूज्योरुद्रश्चापिनृपात्मज सिंहश्चापि तथाभक्त्यापूजनीयाःप्रयत्नतः मृत्युर्वामेचविजयोगणेशोमहिषस्तथा मातृनामततश्चापित्रिकोणेबाह्यतस्तथा मध्येत्रिकोणकेचक्रेप्रधानंचंडिकांनृप अधिदेवींमहाकालींदक्षिणेचैवपूजयेत् प्रत्यधिदेवतांचैववामभागेसरस्वतीम् पूजयेच्चनृपश्रेष्ठवेदगर्भामनिंदिताम् इतियंत्रोद्धारक्रमः जयाचविजयाचैवजयंतीअपराजिता दिव्ययोगीमहायोगीसिद्धयोगीगणेश्वरी प्रेताशीडाकिनीकालीकालरात्रिस्तथैवच टंकाक्षीरौद्रवेतालीहुंकारीऊर्ध्वकेशिनी विरूपाक्षीचशुष्कांगीनरभोजिनिकातथा फट्कारीवीरभद्राचधूम्रांगीकलहप्रिया राक्षसीघोररक्ताक्षी विश्वरूपीभयंकरी चंडमारीचचंडीचवाराहीमुंडधारिणी भैरवीचतथोर्ध्वाक्षीदुर्मुखीप्रेतवाहिनी खट्वांगीचैवलंबोष्ठीमालिनीमंत्रयोगिनी

कालीरक्ताचकंकालीतथाचभुवनेश्वरी त्रोटिकीचमहामारीयमदूतीकरालिनी केशिनीमेदिनीचैवरोमगंगाप्रवाहिनी बिडालीकार्मुकालाक्षीजयाचाधोमुखीतथा मुंडाग्रधारिणीव्याघ्रीकांक्षिणीप्रेतभक्षिणी धूर्जटीविकटीघोरीकपालीविषलंबिनी चतुःषष्टिस्तुयोगिन्यःपूजनीयाःप्रयत्नतः इतियंत्रोद्धारः अथमंत्रोद्धारः तत्रैव राजोवाच पुनस्त्वांपरिपृच्छामिचंडिकापूजनंशुभम् नित्यंचंड्यादिजाप्यस्यविधानंचद्विजोत्तम ऋषिरुवाच परिपृच्छसिभोराजन्चंडिकापूजनादियत् तदहंसंप्रवक्ष्यामियथावदनुपूर्वशः आदौपूज्यामहालक्ष्मीःकर्तृकर्त्रीसदोदिता यन्नमस्कारतोयज्ञाभवंतिसुकृताःसकृत् त्रैलोक्यधामरंमंत्रंशृणुभूपनवाक्षरम् यस्यविज्ञानमात्रेणपरमैश्वर्यवान्नृप ऐंबीजमादौंदुसमानदीप्तिंह्रींसूर्यतेजोद्युमतिंद्वितीयम् क्लींमूर्तिर्वैश्वानरतुल्यरूपंतृतीयमानंत्यसुखायचिंत्यम् चांशुद्धजांबूनदकांतिरूपंमुंपंचमंरक्ततरंप्रकल्प्यम् डांषष्ठमार्त्तिहरंसुनीलंयैंसप्तमंकृष्णतरंरिपुघ्नम् विंपाण्डुरंचाष्टमनादिसिद्ध्यैच्चेंधूम्रवर्णंनवमंविशालम् एतानिबीजानिनवाक्षरस्यजप्तुःप्रदद्युःसकलार्थसिद्धिम् नवबीजनिबद्धोयंमंत्रस्त्रैलोक्यपावनः एतंजपतियोमंत्रीफलंतस्यवदाम्यहम् वश्याभवंतिकामिन्योराजानोऽनुचराइव नहस्तिसर्पदावाग्निचौरशत्रुभयंभवेत् सर्वाःसमृद्धयस्तस्यजायंतेचंडिकाज्ञया नश्यंतिदारुणारोगाःसत्यंसत्यंनसंशयः सहस्रमस्यमंत्रस्यनवबीजस्ययोजले नाभिमात्रेजपेत्सम्यक्कवित्वंलभतेध्रुवम् अयुतंनवतत्वस्यराजबंधनसंकटे जपेत्तदातुमुच्येतयोमंत्रीचंडिकाज्ञया अस्मिन्नवाक्षरेमंत्रेमहालक्ष्मीर्व्यवस्थिता तस्मात्सुसिद्धःसर्वेषांसर्वदिक्षुप्रदीपकः मंत्राणांपल्लवोन्यासोमंत्राणांप्रणवःशिरः शिरःपल्लवसंयुक्तोमंत्रः

कामदुघःफलः न्यासंविनाभवेन्मूकःसुप्तःस्यादासनंविना पल्लवेनविनामंत्रोनग्नःसंपरिकीर्तितः शिरोहीनोमृतःप्रोक्तोवृथामंत्रोगुरुंविना हस्तोदुष्टायदत्तोयोनिर्वीर्यश्चाधिकाक्षरः अनंतरंयेनबीजेनव्यासंकीलिलउच्यते यस्यजाप्यंश्रृणोत्यन्यःसमंत्रःकूटउच्यते ऋषिदैवतच्छंदोभिःपरित्यक्तोभुजंगमः मूकःसुप्तोऽथनग्नोयःशिरोहीनोवृथाहृतः भुजंगःकीलिलःशून्योहृतमंत्रोवृथाफलः पत्नींविसर्जयेन्मंत्रीयदितत्सिद्धिमिच्छति नमोंतःशांतिकेपुष्टौप्रणिधानेनकीर्तितः वश्यकर्षणहोमेषुस्वाहांतःसिद्धिदायकः वौषट्पल्लवसंयुक्तोमंत्रःपुष्ट्यादिसाधकः हुंकारपल्लवोपेतोमारणेब्राह्मणंविना यंत्रंभंजनकार्येषुसुघोरभयनाशने वषडंतोमहाकल्पोग्रहलाभादिनाशनः खंडनोच्चाटनेबंधेमंत्रःफट्पल्लवान्वितः ॐकारमुखरोमंत्रोवेदागमसमुद्भवो पल्लवास्त्वागमेमंत्रेवैदिकेनास्तिपल्लवः पल्लवेनविनाजाप्योमंत्रोवेदसमुद्भवः ननग्नःकीर्त्यतेयस्मान्नैश्वर्यपरिधानवत् नद्यादौविधिवत्स्नात्वानाभिमात्रेऽम्भसिस्थितः दशांजलिभिरात्मानंनवबीजेनपावयेत् कृत्वामाध्याह्निकंसर्वमुदकांतेसमाहितः तर्पणायमहालक्ष्म्याःषडंगंन्यासमारभेत् मायाबीजंचंडिकायैहृदयादिनमोन्तकम् एवंन्यासक्रियांकृत्वाध्यात्वामहिषमर्दिनीम् चंडिकांत्रिजगज्ज्ञात्रींब्रह्माद्यमरवंदिताम् नवबीजस्यमंत्रांतेचंडिकातृप्यतामिति अंजलीनामष्टशतंसुगन्धकुंकुमान्वितम् सेक्तव्यंचतदर्द्धेनतदर्द्धेनाथवा गृहं प्रविश्यदेवतागारंवितानोपरिशोभितम् पुष्पप्रकारशोभाढ्यंपूजाद्रव्यैःप्रपूजितं बहुदीपप्रकाशाढ्यंदिव्यैर्धूपैःसुधूपितम् तत्रोक्तविधिना राजन्पूजयित्वाहरीश्वरी चतुरस्रेसमेशुद्धेसर्वदोषविवर्जिते लिखेदष्टदलंपद्मंचन्दनागरुकुंकुमैः पद्ममध्येलिखेच्चक्रंषट्कोणंचण्डिकाम

यम् षट्कोणचक्रमध्यस्थमाद्यबीजत्रयंन्यसेत् गुदमेंद्रांतरस्थानेपदमूलेनपीडनम् वामपादोपरिस्थाप्यदक्षिणंचरणंदृढम् एतत्पद्मासनंनाम जरामरणवर्जितम् मौनीबद्धासनोमंत्रीज्ञानीनिश्चलविग्रहः अनाहताविशुद्धाज्ञेभेदयित्वायथाक्रमम् स्वशरीराद्विनिर्गत्यसूक्ष्मरूप्पूर्ध्वमागतः नमोनंदीसमुत्तीर्यस्थित्वास्वकरसंपुटे शोधयेत्पंचभूतानिज्ञात्वावर्णक्रमंपृथक् पृथिव्यापोनलोवायुःखंभूतानामयंक्रमः पृथ्वीपितासितंवारि क्तवर्णोहुताशनः तेषांकृष्णतरोवायुराकाशनिर्मलंसदा मनसारोधयेद्बुद्धिंबुद्ध्यासंशोधयेन्मनः तद्द्वयंपरमंशुद्धमात्मानंसम्यगीरितम् स्वदेहं ब्रह्ममार्गेणयोगमुक्त्यासमाविशेत् सुषुम्णायांसमाश्रित्यातिष्ठमानमनाहते आदौसंशोधयेत्पृथ्वींशोषदाहनवामृतैः पुनर्वारिपुनस्तेजःपुनर्वायुंसुपावयेत् बीजैश्चतुर्विधैर्वायोरग्नेर्वरुणशक्रयोः यमिदंशोषकंबीजंरमिदंदाहनंमहत् लमाप्लवनबीजंचवमेंदममृतात्मकम् एवंशुद्धानिभूतानिभवंतिनृपनंदन व्योम्न्येतच्छोधकंनास्तियतस्तंनिर्मलंशिवम् करालयेत्स्वकंदेहंप्रविश्यात्मविशोधनम् कर्तव्यंयोगमाश्रित्यसर्वकामविवर्जितम् भूतशुद्धिमिमांकृत्वायःकुर्याच्चंडिकार्चनम् तस्याचिरेणकालेनमहालक्ष्मीःप्रसीदति निकुंचनादधःशक्तेरूर्ध्वशक्तेर्निपातनात् मध्यशक्तेःप्रबोधाच्चप्राणायामपरोभवेत् इतिमंत्रोद्धारः अथपूजाजपहोमविधिस्तत्रैव ऋषिरुवाच पूजानांजपहोमानांसर्वमंगलकर्मणाम् न्यासंब्रवीमिभूपालसर्वैश्वर्यसुसिद्धये स्थिरासनेस्थिरोभूत्वानिरहंकारनिर्ममः स्वगुरोश्चरणौनत्वामहालक्ष्मींचपूर्ववत् ध्यात्वापूर्णमनःकृत्वाततोन्याससमाचरेत् मातृकान्यासविज्ञानीशिरःप्रथमपल्लवे प्रथमंविन्यसेन्मूर्ध्नि ललाटेतत्परंन्यसेत् नेत्रयोर्द्वितयंभूपद्वयम

न्यत्कपोलयोः श्रुत्यांस्वरद्वयंन्यस्यद्वयंनासापुटद्वये ओष्ठयोर्विन्यसेद्हूंहूंहंहंदशनलेखयोः जिह्वायांविन्यसेदंकंतालुस्थानेचतत्परम् विन्यसेत्प्रथमंवर्गंभूपतेदक्षिणेकरे वामेपरंन्यसेद्वर्गंतृतीयंदक्षिणेन्यसेत् चतुर्थंवामपादेचपंचमंहृदयेन्यसेत् शेषाक्षराणांनवकंविन्यसेत्सर्वधातुषु त्वचिरक्तेचमांसेचस्नायुबास्थिषुपंचमम् मज्जाभेदेषुशुक्रेषुद्वितीयंतत्परेन्यसेत् अयंतुमातृकान्यासः प्रथमःपरिकीर्तितः सांगवेदसमोभाति भूषितोयेनमांत्रिकः अथसारस्वतोन्यासोद्वितीयस्तेप्रकथ्यते उक्तमंत्रस्यसर्वस्यबीजानांदेवतार्चने आद्यबीजत्रयंकृत्वाप्रणवादिनमोन्तकम् कनिष्ठिकादिसर्वासुपंचस्वंगुलिषुन्यसेत् करमध्येचपृष्ठेचस्फारेचमणिबंधने हृदिमूर्ध्निशिखायांचकवचेचक्षुरस्त्रयोः बंधेषुसंप्रयोक्तव्यंसर्वदिक्षुपृथक्पृथक् भृशंसारस्वतोन्यासोमकृन्यस्मिन्कृतेसकृत् त्वरितंविलयंयातिजाड्यमाल्यापसंभवः तृतीयंतेप्रवक्ष्यामिन्यासंमातृगणान्वितम् मायाबीजेनसंयुक्ताब्रह्माणीपातुपूर्वतः एवमीशानपर्यंतमष्टौमातृःप्रयोजयेत् ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीनारसिंहीचैन्द्रीचामुंडाचाष्टमातृकाः ऊर्ध्वंव्योमेश्वरीपातुसप्तद्वीपेश्वरीभुवि नागेश्वरीचपातालेन्यसेत्कर्तासुनिर्भयः जायतेत्रिषुलोकेषुसर्वदेवप्रियोयतः षट्देवीनांपुनर्न्यासंचतुर्थंत्वेवभूमिप पूर्वांगेनंदजायातुकमलांकुशमंडिता खड्गपात्रकरापातुदक्षिणेरक्तदंतिका पुष्पपल्लवमूलादिहस्ताशाकंभरीपरम् धनुर्बाणधरादुर्गावामंदुर्गार्तिहारिणी शिरःपात्रकराभीमामस्तकाच्चरणावधि चरणाच्चशिरोयावद्भ्रामरीचित्रकांतिभृत् अनेनन्यासयोगेनजरामरणवर्जितः निर्भयश्चाग्निवारिभ्योमांत्रिकस्तत्क्षणाद्भवेत् पादाभ्यांनाभिपर्यन्तंब्रह्मापातुसमंततः

नाभेर्विशुद्धिपर्यन्तंपातुनित्यंजनार्दनः विशुद्धेस्तुशिरोयावत्पातुरुद्रस्त्रिलोकगः हंसः पादद्वयंपातुवैनतेयः करद्वयम् चक्षुर्षीवृषभःपातुसर्वांगानिगजाननः परावरंपरेपातुसर्वानन्दमयोहृदि अभेद्यःपंचमोन्यासःकर्तुःकामदुघःस्मृतः मध्यंपातुमहालक्ष्मीरष्टादशभुजासती ऊर्ध्वंसरस्वतीपातुभुजैरष्टभिरूर्जिता अधःपातुमहाकालीत्रिंशल्लोचनमंडिता सिंहोहस्तद्वयंपातुपरहंसोक्षिमंडलम् महिषेणसमायुक्तः प्रेतःपातुपदद्वयम् सर्वांगानिमहेशानश्चंडिकाचपरस्परम् वैकुंठःसुरवक्त्रन्यासःषष्ठस्त्वांप्रवदाम्यहम् ब्रह्मतःपायुपर्यन्तंनवद्वारेषुविन्यसेत् उक्तमन्त्रस्यबीजानिप्रणवाद्यंपृथक्पृथक् पायुतोब्रह्मपर्यंतंविन्यसेत्तानिपूर्वतः न्यासद्वयमिदंप्रोक्तंसुगोप्तंसप्तमाष्टकम् महाभयमहाव्याधिशत्रुचौरविघातकं महारक्षोगणानांचकल्पांतेनियमोभवेत् पूर्वांगंविन्यसेन्मंत्रंमस्तकाच्चरणावधि दक्षिणेपृष्ठतोवामेतथालोमविलोमयोः अस्मिन्न्यासेकृतेराजन्नवमेदेववद्भवेत् हृन्मस्तकशिखास्वेनंकवचेलोचनद्वये अस्त्रेसर्वासुकाष्ठासुपृथङ्मंत्रंविनिक्षिपेत् नमोंतंप्रथमेप्रोक्तंस्वाहांतेतदनंतरं वौषडंतंचहूमंतंवषडंतंफडंतकम् पूज्यस्त्रैलोक्यदेवानांदशमोस्मिन्कृतेकृती दशन्यासप्रविष्टोवैयद्वदेतत्तदाभवेत् यत्पश्यतियथाद्दस्यात्तद्भवेत्ताद्दृशंकिल तेनसार्द्धंमहालक्ष्मीःस्वयंवदतियत्फलं भविष्यमभविष्यंवातंपालयतिपूर्ववत् ब्रह्मविष्णुशिवास्त्वेनंपालयन्त्यात्मवत्सदा त्रिषुलोकेषुपश्यंतिनतस्मादधिकंक्वचित् दशन्यासैःकृतैःपापंदशजन्मार्जितंक्षणात् सुतीव्रंविलयंयातितामिस्रंरविभिर्यथा सन्नद्धोदशभिर्न्यासैश्चंडींसप्तशतींजपेत् असाध्यंसाधयत्याशुकार्यंलोकत्रयेपियत् माधवेमासिमध्याह्नेतपतेनिर्मलंरविः दिवांधा

स्तंनपश्यंतिसर्वदासर्वथायथा चंडीसप्तशतीजाप्येदशन्यासैःसमुज्ज्वलम् त्रैलोक्येसर्वदुष्टास्तंनपश्यंतिसदायथा चंडीसप्तशतीजाप्येसरहस्येनृपोत्तम तत्सर्वंतेप्रवक्ष्यामिब्रह्मविष्णुशिवैःकृतम् अंगेषुसर्वसिद्ध्यर्थंवज्रामृतमनःसुखम् अस्मिन्न्यासेदशश्लोकाब्रह्मविष्णुशिवोदिताः खड्गिनीशूलिनीश्लोकमाद्यंकृष्णतरंन्यसेत् नाभ्यादिचरणांतंतुन्यासंशत्रुविनाशनम् शूलेनपाहिनोदेविपुनःश्लोकचतुष्टयम् बालार्कसदृशंन्यासेचिंतनीयंमहत्तरम् तद्विशुद्ध्यादिपर्यन्तंन्यासंतिमिरनाशनम् सर्वस्वरूपइत्यादिश्लोकानांपंचकंपुनः शुद्धस्फटिकसंकाशंन्यासंत्रैलोक्यकामदम् मौलिर्मुखंतथानेत्रेश्रोत्रेनासाह्वयेतथा लिंगंचैवगुदंचैवदशस्थानंप्रकीर्तितं मूर्ध्नोविशुद्धिपर्यंतंश्लोकानांपंचकंन्यसेत् अयमेकादशोन्यासोदशन्याससमोजपेत् दशन्यासैःकृतंयद्यन्न्यासकर्ताफलंलभेत् तत्फलंलभतेसर्वमस्मिन्नेकादशेकृते नवाक्षरस्यमंत्रस्यजाप्येसर्वफलप्रदे एतेन्यासाःप्रकर्तव्याश्चंडीसप्तशतीजपे एवंन्यासविधिंकृत्वासृष्टिमुद्रांविलोकयेत् तस्याविलोकनेराजन्कृतन्यासःस्थिरोभवेत् परिषिंचातिपूजार्थंद्रव्याणिनवबीजतः तत्पृष्ठेद्रवांमुद्रांकृत्वास्त्रेणावगुंठयेत् अर्घ्यपात्रंप्रतिष्ठाप्यपूरयेच्छुभवारिणा गंधपुष्पाक्षतांस्तत्रविन्यसेन्नृपनंदन ध्यात्वासर्वाणितीर्थानिहस्तोदत्वाभिमंत्रयेत् रक्षार्थंतस्यकर्तव्याचक्रमुद्रास्त्रसंयुता अर्घ्योदकेनसंस्कारंपूजाद्रव्यस्यपूर्ववत् कृत्वालोमविलोमाभ्यामात्मानंसम्यगर्चयेत् प्रत्यर्घ्यंसंप्रतिष्ठाप्यमध्यपीठार्घपात्रयोः षट्कोणेचैवमध्यस्थेमध्यबीजव्यवस्थितम् महाकाल्याःसरस्वत्यालक्ष्म्याश्चदक्षिणान्ययोः संयुक्तांदक्षिणेवामेसिंहेनमहिषेणच अष्टादशभुजांध्यात्वामहालक्ष्मींप्रणम्यच पीठादिपूजनंकुर्यात्स्वबीजेनपृथक्पृथक् ॐ

कारबिंदुमध्यस्थंनामधेयाद्यमक्षरम् देवतानांस्वबीजंचपूजायामृद्धिसिद्धिदम् ओंकारंप्रथमंपीठंपूर्णपीठंततःपरं तृतीयंकामपीठंचपूजयेत्संप्रदायतः पूर्वादिदिक्षुपीठस्यगणेशादिचतुष्टयं गणेशक्षेत्रपालौचपादुकेबटुकस्तथा आग्नेयादिचतुर्दिक्षुपूज्यंदेवीचतुष्टयम् आद्यातत्रजयाप्रोक्ताद्वितीयाविजयास्मृता जयंतीतत्पराभूपचतुर्थीचापराजिता पूज्यानामपदैर्देव्यःपीठपंकजमध्यगाः प्रागादिक्रमयोगेनपंचषट्षट्षडादिकाः प्रथमाविष्णुनामाचद्वितीयाचेतनास्मृता बुद्धिर्निद्राक्षुधाछायाशक्तिस्तृष्णाष्टमीभवेत् क्षांतिजातिस्ततोलज्जांशांतिःसहत्रयोदशी कीर्तिर्लक्ष्मीर्धृतिर्मेधास्मृतिरेवदयातथा तुष्टिःपुष्टिश्चमाताचभ्रांतिरेवंपदक्रमात् त्रयोविंशतिसंख्यंयंब्रह्मणापूजिताततः नालमूलेचसंपूज्यमाधारादिचतुष्टयं आधारकर्मशेषौचचतुर्थीपृथिवीनृप ततोनालंसमभ्यर्च्यपद्मंसंपूज्ययत्नतः ज्ञानामृतसुतृप्तात्मामंडलार्चनमारभेत् अर्घोदकादिरासिच्यमंडलंसौम्यदृष्टिमान् पूर्वयंत्रादितःपूज्यंमातॄणांमंडलंशिवम् रहस्यकथितैर्बीजैःस्वबीजेनाथवानृप आद्यपत्रेसमभ्यर्च्याब्रह्माणीहंसवाहिनी माहेश्वरीवृषारूढापूज्यास्याद्धुतभुग्दले मयूरवाहनापूज्याकौमारीदक्षिणेदले नैर्ऋत्येवैष्णवीपूज्यागरुडोपरिसंस्थिता पश्चिमेयज्ञवाराहीदंष्ट्रोद्धृतवसुंधरा समीरणदलेपूज्यानारसिंहीमहास्वना गजराजसमारूढापूज्यैंद्रीसौम्यदिग्दले गणनाथपरीवारासदारुद्रेणसंयुता ईशपत्रेसमभ्यर्च्याचामुंडामंडितासदा ब्रह्माणीकर्णिकामध्येक्रमात्षट्कोणपूजनम् नन्दजाहेमगर्भासासुरक्तारक्तदंतिका नीलीशाकंभरीदुर्गासतीदुर्गार्तिहारिणी दृष्टार्चितमुखीभीमानीलपत्राशिरोधरा ततोमंडलदुर्धर्षाभ्रामरीवरदार्चिता आद्यबीजेमहाका-

लीं ध्यानपूर्वांसमर्चयेत् द्वितीयेष्टादशभुजांमहालक्ष्मींसमर्चयेत् तृतीयेऽष्टभुजाध्यानंसमभ्यर्च्यसरस्वतीम् ततःपृथक्पृथक्पूजांकृत्वा महिषसिंहयोः मध्यबीजेचिरंध्यात्वामहालक्ष्मींसमर्चयेत् आह्वानंपूजनेदद्यादासनंमणिभूषितम् मंडलस्थातुयादेवीपीठस्यासर्वतस्तदा महालक्ष्म्यासहैक्येनचिंतयेद्योगमुद्रया एकाहारंमहालक्ष्म्यारूपंकृत्वापरावरम् मुद्रासुधाभुजाकाराचंडिकायांप्रदर्शयेत् अष्टादशाक्षमालाद्यंतथापद्मंप्रकल्पयेत् वारिपुष्पाक्षतैर्युक्तंचंदनेनप्रमोदितम् अर्घ्यंदत्वामहालक्ष्म्यैधेनुमुद्रांप्रदर्शयेत् संकल्पाचमनेभूपस्नानंपुण्याभिषेचनम् विदध्याच्छ्रेयसींमुद्रांयथामाताप्रतुष्यति महार्हेचित्रितेवस्त्रेचित्राण्याभरणानिच कस्तूरीकुंकुमोपेतंकस्तूरागरुचंदनम् सुरभीणिच पुष्पाणिबिल्वपत्राक्षतांस्तथा निवेद्यचंडिकांभूपदिव्यधूपैःसुधूपयेत् ज्वलन्मणिशिखाकारैर्दीपैर्नीराजयेच्छुचिः यथावर्णत्रयोपेतैर्नैवेद्यैः पायसादिभिः अनेकरसपक्वान्नैर्महालक्ष्मींप्रतोषयेत् प्रणम्याचमनंदत्वाचंदनंमुखवासने सकर्पूरंचतांबूलंभक्तिभावसमन्वितम् प्राणानायम्यपूर्वोक्तन्यासंसंस्मृत्यचात्मवान् प्रथमंचरितंप्रोक्तंमधुकैटभघातनम् महिषासुरनिर्नाशंचरितंविद्धिमध्यमम् चरितंचोत्तरंविद्धिनिशुंभादिवधाश्रितम् चरितानिजपेत्त्रीणिसरहस्याण्यतंद्रितः चरितंमध्यमंचैषांजपेद्वाचंडिकामयम् जपेन्नवाक्षरंमंत्रमथवाष्टोत्तरंशतम् हुनेज्जपदशांशेनपायसंतिलसर्पिषा नवाक्षरेणमंत्रेणस्मार्तोग्नौनृपनंदन नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् अनेनश्लोकपाठेनजुहुयाद्वाशफभंहविः ऊर्ध्वतःप्रोक्षितोमंत्रैःपात्रानीतःसमुज्ज्वलः संस्कृतायांभुविस्थाप्यः

स्मार्तोग्निःसंप्रकीर्तितः देवतार्चनजाप्यस्यभूमेःसंस्करणंतथा कृत्वासंस्थापयेदग्निंनान्यदासादनंमतम् घृतंहिपायसंहोमेहुनेदार्द्रहुता
शने तदभावेसमित्सर्पिस्तिलानांहवनंभवेत् जुहुयाच्चमहालक्ष्म्यैऋतुकालेसमुद्भवैः सजपंहोममावेद्यमहालक्ष्मींप्रणम्यच मूलेनपाहि-
नोदेवीत्येतैःश्लोकैःप्रदक्षिणाम् कृत्वावैसुस्थितोभूत्वाचंडिकाध्यानतत्परः नमोदेव्यैइतिश्लोकैःपंचभिःपंचवारतः कृत्वापंचनमस्कारानु
पविश्यासनेशुभे सर्वस्वरूपइत्यादिषड्भिःश्लोकैःकृतांजलिः प्रार्थयेज्जगतांधात्रींप्रणतात्मामनोप्सितम् स्वशरीरेसमारोप्यदद्यादस्यैवि-
सर्जनम् अनेनविधिनाभूपयःकुर्याच्चण्डिकार्चनम् तस्यतुष्टामहालक्ष्मीयद्ददातिशृणुष्वतत् एतद्गोप्यतरंसर्ववेदागमसमुद्भवम् ब्रह्म
णागुरवेदत्तंगुरुणाचशिवेर्पितं धर्मार्थकाममोक्षाणांत्रिषुलोकेषुसाधनम् अनेनसदृशंनास्तिसत्यंसत्यंनसंशयः इतिपूजाजपहोमविधिः
अथकाम्यप्रयोगः ऋषिरुवाच नित्यचंड्यादिजाप्यस्यविधानंतेवदाम्यहम् क्रमेणसर्वकार्याणांसिद्धयेसर्वपुण्यदम् पूर्वोक्तविधिना
स्नात्वाचंडिकातर्पणादिकं शुक्लभूतामथाष्टम्यांमासंप्रतिदिनंजपेत् सकृद्रहस्यसंयुक्तचंडिकाचरितत्रयं दशांशहोमसहितंयोऽर्चतेनि-
त्यचंडिकाम् धनपुत्रयशोदात्रीमहाव्याधिविनाशिनी महाभयमहादुःखहंत्रीसौख्यप्रदायिनी शुक्लाष्टमीमथारभ्ययावच्छुक्लचतुर्दशी
नवदुर्गाविधातव्यासर्वकार्यफलार्थिना संपूज्यविधिवद्देवींचंडिकांकृततर्पणैः कलशंपंचरत्नाढ्यंसहकारदलान्वितं सवस्त्रंसंप्रतिष्ठाप्यचंडि
काग्रेम्भसाभृतं समंतात्पूजयेद्दिक्षुदिशापालान्यथाक्रमं चंदनेनविलिप्तांगःस्रग्वीन्यासपरायणः नवाहंभूपएकैकंमौनीबद्धासनीजपेत् प्र

णधादिरहस्यांतंचंडिकाचरितत्रयं चतुरस्रेसमेकुंडेसमंतान्न्यस्तमातृके एकावरणसंयुक्तेयोनिमंडलमंडिते दशांशविधिनाहोममुक्तहव्येनसाधयेत् नवदुर्गामखेकुंडमेवंजानीहिक्ष्मापते नित्यचंडीविधानस्थेकुंडमीदृक्प्रकीर्तितं नवचंडीमखेकुंडमीदृग्लक्षणमुच्यते एतद्द्विगुणितंकुंडंशतचंड्यां प्रकीर्तितं कृष्णाष्टमीमवष्टभ्यनवदुर्गाविधानवित् यद्ययंक्रियतेजाप्यंकालरात्रिर्दुरत्यया महाकालोद्भवंदुःखंकालरात्रिर्व्यपोहति संस्कारैरष्टभिःकुंडैःसंस्कृत्याग्निंप्रतिष्ठयेत् मायाबीजसमायोगंकुर्यात्तन्मंत्रसाधकः कुंडमध्येभुवंदर्भैःपरिमृज्योपलेपयेत् प्रागग्रस्रुवमूलेनरेखास्तिस्रःसमुल्लिखेत् प्रांशुमुद्धृत्यरेखाणामभ्युक्षणमतःपरम् कुंडस्यपूजनंषष्ठंसप्तमंचक्रमुद्रया अस्त्रावगुंठनंकुंडेसंस्कारश्चाष्टमःस्मृतः शतमंगलनामानंकुंडेग्निंसम्प्रतिष्ठयेत् चंडिकापीठसंपूर्णेब्रह्माणंदक्षिणेद्विज ततस्तत्साग्निकंकुंडंनवसूत्रेणवेष्टयेत् कुंडस्यांतरतःस्थाप्याप्रणीतावारिपूरिता प्रणीतापात्रयोर्मध्येउत्तरेवैश्वदेवतः स्थापयेत्प्रोक्षणीपात्रंप्रणीतोदकपूरितम् प्रणीतापात्रतःपूर्वेस्थाप्यःपात्रगणःक्रमात् आज्यस्थालींचरुस्थालींगव्यक्षीरसमन्विताम् स्रुक्स्रुवौचघृतंद्रव्यंतंडुलाःकुशमूलकाः पलाशसमिधस्तिस्रःपूर्णपात्रमतःपरं सप्तद्वीपेश्वरींध्यात्वागृहीत्वाकुशमूलकान् निक्षिपेत्प्रोक्षणीपात्रेवारुणंबीजमुच्चरन् तेनदर्भसमूहेनशतसंख्येनसंस्थितम् क्रमात्पात्रगणंप्रोक्ष्यप्रोक्षणीपात्रवारिणा आज्यपात्रेचरुस्थाल्यांनिक्षिपेद्धुततंडुलान् यथाक्रमेणकर्तव्यंततोग्निश्रपणंतयोः अभ्युक्ष्यपायसंकार्यंपर्यग्निकरणंतयोः सव्यंपलाशकाष्ठेनत्रिविदर्भैश्चसोज्ज्वले स्रुवयोःस्नपनंकार्यंप्रणीतोदकसिंचनैः पुनःप्रतपनंकृत्वादक्षिणेस्थापनंस्मृतम् उद्वास्यप्रथमंपूर्वादानीया-

ग्नेः प्रदक्षिणम् कुंडाचार्यांतरेस्थाप्यंस्वबीजंजपगोरवम् अभिघार्याज्यमार्गेणवायव्येस्थापयेच्चरुम् स्वबीजजपसंस्कारोधेनुमुद्रांतयोर्भवेत्
तिष्ठन्पलाशसमिधोमौनीवैश्वानरेक्षिपेत् कुशमूलकयुक्तानिप्रोक्षण्यद्भिःप्रदक्षिणम् पर्युक्ष्याग्निप्रणीतायांनिक्षिपेत्कुशमूलकम् निधायद-
क्षिणंजानुंभूमावग्निमुखेहुनेत् अन्वारब्धःस्रुवेणाज्यंनिर्धूमेहव्यवाहने प्रजापतिंमहाकालींमहालक्ष्मींसरस्वतीम् एतदग्निमुखंप्रोक्तंमायाबी
जपुरःसरम् संस्रावंप्रोक्षणीपात्रेनिक्षिपेद्यज्ञसाधनात् विदध्यात्कल्पितंहोमंभुक्तेनहविषाशनैः तेनास्विष्टकृतंदद्याद्धविषासोज्ज्वलेनले
मायाबीजंचब्रह्माणीमाहेश्वरीकौमारीवैष्णवीवाराहीनारसिंह्यैऐन्द्र्यैचामुंडायैविच्चेस्विष्टकृतेस्वाहा मंत्रः स्विष्टकृदाहुतेः आज्यस्यनवकंदद्या
न्मायाबीजादिनामभिः तत्रनंदाभगवतीद्वितीयारक्तदंतिका शाकंभरीतृतीयाचदुर्गाभीमाचतत्परम् भ्रामरीकालिकाचैवशिवदूतीप्रजाप-
तिः गंधपुष्पफलोपेतांकृत्वायज्ञात्मकांस्रुचम् ततःपूर्णाहुतिंदद्याद्धुतस्याच्छिन्नधारया नवाक्षरेणमंत्रेणमहालक्ष्मीपरायणः ध्यात्वाव
नपुरोडाशमनन्तंदेवदुर्लभम् प्रोक्षणीपात्रमध्यस्थंमंत्रेणाश्नंतिसंस्रवान् यस्माद्यज्ञरसात्पूतोयज्ञानांब्रह्मरूपिणम् संस्रावतत्पुरोडाशं
प्राश्नातिसुखपुण्यदम् सलिलेनप्रणीतायास्तीर्थध्यानपरायणः करोतिमार्जनंदर्भैःशतेनश्लोकपाठकः याःशिवासक्तयोगाश्चयाभिश्चैवविना
सह याआपःससंदधानास्तामेकृण्वंतुभेषजम् अभिषिंचेद्यदात्मानंचतुर्भिश्चंडिकास्तवैः दानंदद्याद्विधानेनहेमधेन्वंबराणिच नवदुर्गातवा
ख्यातापापतापप्रणाशिनी सर्वैश्वर्यप्रदाभूपकुर्वेनामविलंबितम् नवदुर्गाविधानेऽस्मिन्यत्फलंपरिकीर्तितम् कालरात्रिविधानेऽपितत्फलं

लभतेध्रुवम् एतत्त्रिगुणितंसर्वंनवदुर्गाजपेफलम् कथितंतदवाप्नोतिनित्यंचंडीजपेकृते ऋषिरुवाच शरदृतौविषेमासिशुक्लपक्षेनृपोत्तम प्रतिपत्तिथिमारभ्यनवचंडीसमारभेत् तोरणाढ्येशुभेस्थानेसुवितानेस्वलंकृते पूर्वादिक्रमयोगेनदिग्देवेभ्योबलिंहरेत् गंधपुष्पाक्षतैर्धूपदीपैश्च सुमनोहरैः कादंबरीगजारूढापुनरुक्ताचक्रष्टगा करालीमहिषारूढारक्ताक्षीप्रेतसंस्थिता श्वेतकोभीरगाश्वेताहारितामृगवाहना पक्षिणीसिंहपृष्ठस्थाककालीवृषवाहना हंसपृष्ठासुरज्येष्ठासर्पराजाहिवाहना अनेनविधिनादत्वादिग्देवेभ्योबलिंजपी नवग्रहलोकपालान्दिशापालांश्चपूजयेत् कलशंसर्वरत्नाढ्यंहेमवस्त्रोदकान्वितम् संप्रतिष्ठाप्यसंपूज्यचंडिकार्चनमारभेत् पूर्वोक्तेनविधानेनगंधपुष्पैरनुत्तमैः वस्त्रालंकारकस्तूरीहरिद्राभिश्चकुंकुमैः धूपैर्बहुविधैर्दीपैर्नैवेद्यैर्बहुसंख्यया कृत्वान्यत्पूर्ववत्सर्वंजपेदेकाग्रमानसः सकृद्रहस्यसंयुक्तंचंडिकाचरितत्रयम् कुमारीविप्रमुख्यांश्चभोजयेद्विधिपूर्वकं यदाद्येदिवसेकुर्याच्चंडिकापूजनादिकम् द्विगुणंतद्द्वितीयेह्नित्रिगुणंतत्परेऽहनि नवमीतिथिपर्यंतंवृद्ध्यापूजाजपादिकम् एकाहारंव्रतीकुर्यादहिंसादियमैर्युतः कृत्वाहोमादिकंसर्वंनवदुर्गाविधानवत् वित्तशाठ्यंपरित्यज्यकुर्यादाचार्यतोषणम् वस्त्रांगुलीयभूधेनुवाजिहेमप्रदानतः विदधातिविधानंचयएनांनवचंडिकाम् ऐंद्रब्रह्मादयोभोगास्तमायांतिप्रसेवितुम् अपुत्रोलभतेपुत्रमधनःसधनीभवेत् व्याधयश्चक्षयंयान्तिशत्रवश्चसुदारुणाः नतस्यास्तिभयंकिंचिन्नचोराग्निजवारिजम् ऋषिरुवाच शतचंडीविधानंते यथावत्कथयाम्यहम् सुघोरायामनावृष्ट्यांभूकंपेचसुदारुणे परचक्रागमेगात्रेक्षयेपंचविंशतियोजने देशेसर्वत्रशान्त्यर्थंशतचंडीमखंज

पेत् शिवाभ्यासेसमेदेशेचतुर्द्वारंसतोरणम् पताकासंस्कृतंकुर्यान्मंडपंवेदिभूषितम् तत्रकुंडंप्रकर्तव्यमुक्तलक्षणसंयुतम् सदाचाराःकुलीनायेश्रीमंतःसत्यवादिनः चंडिकापाठसंपूर्णादयावंतोजितेंद्रियाः ईदृग्लक्षणसंपन्नादंभमोहविवर्जिताः दशविप्रान्समभ्यर्च्यमहालक्ष्मीस्वरूपिणः मधुपर्कविधानेनयथावत्तद्वदाम्यहम् श्रीपर्णीद्दशपीठानिहस्तमानानिमानतः अष्टांगुलसमुच्छ्रायसहितानिसमानिच स्रुवःस्रुचासमायुक्तःखादिरोलक्षणान्वितः सप्तविंशतिदर्भाणांवेण्यग्रेग्रंथिभूषितः विष्टरःसर्वयज्ञेषुलक्षणंपरिकीर्तितम् शुद्धोदकेन संपूर्णाःपाद्यार्घ्यार्थंसमाहृताः शंखाअर्घ्यप्रदानायगंधपुष्पयवान्विताः दूर्वोदकसमायुक्ताःस्थापनीयाःपृथक्पृथक् महान्त्यहीणिवस्त्राणिमुद्रिकाद्यंसुभूषणम् मयूरपत्रछत्राणिसोष्णीषाणिसमाहरेत् पादुकाश्चाहरेत्तत्रताम्रभूषणभूषिताः अन्यत्सर्वंयदस्त्युक्तंमधुपर्कस्यपूजनम् शतचंडीमखेकर्ताप्रयत्नेनतथाहरेत् स्मार्तोक्तविधिनासर्वंमधुपर्कस्यपूजनं कृत्वाफलमवाप्नोतिमहायज्ञार्णवोपमी अन्येभ्योमधुपर्कस्यविप्रेभ्यःपूजनंसमं विद्यात्तद्विगुणंदद्यादाचार्यायसुभक्तिमान् अन्यैर्द्विजैःस्वयंमंत्रदेशिकस्यप्रपूजनम् तस्मिन्यज्ञेफलंसत्यमनादृष्टिविनाशनम् अर्चितास्तेद्विजश्रेष्ठाःसन्तुष्टाःपूर्णमानसाः यजमानंसपत्नीकंसुतबंधुसमन्वितम् उपविश्यासनेकुंडकलशाद्यविभूषितम् वेदमंत्राक्षतैःपूर्णंकुर्वंतिस्वस्तिवाचनैः कृनतत्स्नापनोविप्रैर्वेदवादित्रनिस्वनैः चंडिकामंडलंचापिपरिवारविभूषितम् पश्चिमद्वारमार्गेणप्रविश्यक्रतुमंडपम् ददातिपूजनेनुज्ञांदेशिकायकृतांजलिः देशिकःसर्वमंत्रज्ञोनवभिर्ब्राह्मणैःसह दिग्देवताग्रहांश्चैवलोकपालसम-

न्वितान् दिशापालांश्चसंपूज्यकलशांस्थाप्यपूज्यच मंडपस्यचतुर्दिक्षुदत्वाभूतबलिंबहिः मंडपेकलशौद्वौद्वौद्वारेद्वारेनिवेशयेत् मालिनोद कसंपूर्णौवाम्रपल्लवशोभितौ उपस्पृश्योदकंधृत्वाचंडिकांदेवंवंदिताम् उपविश्यासनेवेद्यांबध्वापद्मासनंदृढम् प्राणायामविशुद्धात्मादशैक न्यासभूषितः चण्डिकापूजनंकुर्याद्विशेषेणसमन्वितम् कस्तूरींकुंकुमंजाप्यंसकर्पूरंचचंदनम् फलद्वयसुसंपूर्णमनुलेपनमाहरेत् दिव्य वस्त्रमलंकारंहेमगद्याणकत्रयम् चक्षुपुष्पचतुर्थांशंगुग्गुलस्यपलत्रयम् दीपानांद्विशतंश्रेष्ठंमंडपेजपसाधनम् कुटपौद्वौहविष्यान्नंनैवेद्यंसरसंज्ञकाचि तांबूलानांसकर्पूरंशतद्वयमनुत्तमम् नवचंडीविधानोक्तंमहालक्ष्मीप्रपूजनम् नवभिर्ब्राह्मणैःसार्द्धंकृत्वाचार्योद्विजोत्तमः ददातिनवविप्रेभ्यो आचार्यश्चण्डिकामयः कार्यंजाप्यप्रसिद्ध्यर्थंमतुलंमानपूर्वकम् ततोनुज्ञामनुप्राप्यवेद्यामाचार्यसन्निधौ मृद्वा सनेषुसन्तुष्टाउपविष्टाःसुनिश्चलाः न्यासध्यानसमायुक्तानासाग्रमवलोकिनः सुगन्धपुष्पमालाढ्याश्चंडिकाचरितत्रयम् सरहस्यमृषि च्छंदोदेवताशक्तिसंयुतम् जपेयुःपूर्णमेकंवामौनिनस्त्यक्तमत्सराः समुत्थायततःकुर्युरेकांसर्वेप्रदक्षिणाम् चण्डिकांसुनमस्कारैःपरितोष्यपुनःपुनः उपविश्यासनेसूक्तश्लोकैःसर्वार्थसाधकैः प्रार्थयेयुःप्रार्थ्यफलंमहालक्ष्मींदृढव्रताः कुमार्योदशसंभोज्याभोज्याविप्रा दशोत्तमाः महाकालींमहालक्ष्मींसरस्वतींजपन्जपन् भोजयेत्परयाभक्त्यादेशिकादिदशद्विजान् ततोभक्तिसमायुक्तोभुंजीयाद्यज्ञ क्रतुमान् सत्कथाभिःसुगीतैश्चसर्ववादित्रनिस्वनैः पूजनैःप्रोक्षणीयैश्चवेदपाठैर्निशांनयेत् द्वितीयेदिवसेस्नात्वाविधिवत्तेद्विजाद-

श चंडिकातर्पणंकुर्युः संपूर्णध्यानतत्पराः सर्वंपृथक्पृथक्कृत्वादिग्देवीपूजनादिकम् बहिर्भूतबलिंदत्वाकृत्वावेदिंप्रदक्षिणाम् पुष्पागारे
महारम्येस्वेस्वेच आसनेस्थिताम् जपंतिजयचंडीतियावद्दुर्गाप्रपूजनम् पूर्वस्मात्पूजनात्कुर्याद्द्विगुणंपूजनंक्रमात् आचार्यः सुस्थिरः
शांतश्चंडिकायाःप्रतोषणम् सुकृतेपूजनेविप्राजपेयुर्द्विगुणंजपम् द्विगुणंचप्रकर्तव्यंकुमारीद्विजतोषणम् कार्यंजागरणंरात्रावुक्तैः सर्वैर्महो
त्सवैः चंडिकापूजनंजाप्यःकुमारीद्विजपूजनम् तृतीयेऽहनिकर्तव्यंत्रिगुणंचसजागरम् चतुर्थेदिवसेसर्वंसम्यक्कुर्युश्चतुर्गुणम् महाजाग
रणोपेतंहोमः स्यात्पंचमेऽहनि पायसंसर्पिषायुक्तंतिलैः शुक्लैर्धीमिश्रितम् जुहोत्युक्तविधिंकृत्वादशांशेननृपोत्तम रुद्राध्यायेयथाहोमंमं
त्रेणैकेनसाधयेत् तथास्तोत्रजपेहोमंमंत्रेणैकेनसाधयेत् चंडीसप्तशतीजाप्येहोममंत्रोनवाक्षरः कथितःपूजनाध्यायेतस्माद्धोमेभवे-
दसौ नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् अथवाचभवेद्धोमेश्लोकस्तत्रनिरूपितः जपहोमे
कृसंपूर्णेदिग्देवीनांशतंशतम् होतव्यंनाममंत्रैश्चहविष्यान्नेनसादरम् शतंशतंक्रमाद्देयंसमिदाज्यचरून्तिलान् ग्रहेभ्योवैदिकैर्मन्त्रैः फ
लपुष्पशतंशतम् लोकपालदिशापालहोमेसर्पिश्चरुस्तिलाः आचार्यश्चद्विजाःसर्वेजुहुयुश्चशतंशतम् होमेसम्पूर्णतांप्राप्तेनमस्कृत्वेष्ट-
देवताम् चंडिकांदेवदेवानामृषीणांवंदिताम्पराम् स्तंभहृद्येस्तुचंकृत्वायजमानस्स्वलंकृतः घृतकुंभदशांशेनदद्यात्पूर्णाहुतिंस्वयम्
मूर्द्धनिमन्त्रपाठेननवाक्षरजपेनवा प्राशनंमार्जनाद्यंचनवदुर्गाविधानवित् जपंहुतंसमावेद्यचण्डिकायैमनोरथम् ब्राह्मणोनिष्कषट्का

द्यंदद्याद्गोमिथुनद्वयम् यस्याःप्रभावमतुलंश्लोकमुक्त्वाकृतांजलिः दद्याद्गोमिथुनान्यष्टावाचार्यायसुभक्तिमान् चतुर्विंशतिसंख्याकैर्हैमगद्याणकैः सह एकैकमष्टविप्रेभ्योदद्याद्गोमिथुनंस्वयम् निष्कत्रयसमायुक्तंवस्त्रालंकारभूषितम् सुस्थितंस्वासनेशांतंयजमानंमहोत्सवम् कुंकुमोक्ताक्षतादूर्वासुगन्धिचन्दनंदधि आदायदीयतेविप्र आचार्यादिःसुपूजितः स्तोत्राणांचचतुर्णांचमहालक्ष्मीपरायणः एकैकश्लोकमुच्चार्यदद्युराशिषमुत्तमाः धनाढ्यःससुतःपूर्णोलब्ध्वाशीःकृतमंगलः रक्तपुष्पांजलिंदद्याच्चंडिकायैविसर्जनम् भूरिदानंततःकुर्यात्पुण्यवादित्रनिःस्वनैः प्रविशन्शांतिपाठैश्चतोरणाढ्यंस्वमालयम् शतचंडीविधानस्यकृतेनसुकृतेनहि महालक्ष्मीर्ददात्यस्मैत्रैलोक्यसुखमुत्तमम् यत्तत्कार्यंसमुद्दिश्यक्रियतेशतचंडिकाम् तत्तत्तस्यमहालक्ष्मीःसत्यमाशुप्रयच्छति चरितत्रयजाप्यस्यचंडिकायानरोत्तम सरहस्यस्यनामानिब्रह्मोक्तानिवदाम्यहम् महाविद्यामहामंत्रश्चंडीसप्तशतीतिच मृतसंजीविनीनामचतुर्थस्यापरिकीर्तितम् पंचमंचमहाचंडीचतुःषष्टिपदीपरम् एतानियोविजानातिनामानिनृपनन्दन जपंविनाभवेच्चंडीवरदास्यात्तुसर्वदा शतमादौशतंचान्तेजपेन्मंत्रंनवाक्षरम् चंडीसप्तशतीमध्येसम्पुटोयमुदाहृतः सकामःसम्पुटेजाप्योनिष्कामःसंपुटंविना एतद्गोप्यतरंतत्त्वंचंडिकाजयसिद्धिदम् ऋषिरुवाच सर्वयज्ञोत्तमंभूपकुमारीपूजनंशृणु कृतेयस्मिन्महालक्ष्मीरचिरेणप्रसिद्ध्यति आमंत्रयेद्दिनेपूर्वेकुमारींभक्तिपूर्वकम् पूजादिनेसमाहूयकुमारीमाद्यदेवताम् मंडलेचरणौतस्याःक्षालयेदुक्तवारिणा अर्चयेद्धेमपात्रेणवा-

रिपुष्पाक्षतैःसमम् सुवितानेशुभेस्थानेपंकजोपरिपीठके उपवेश्यकुमारींतांस्वांगंन्यासंसमाचरेत् आत्मानंविधिवत्पूज्य क्रोधदर्पविवर्जितम् अथध्यात्वाकुमारींतांमहालक्ष्मीस्वरूपिणीम् मातुलिंगंगदांखेटंपात्रंपीयूषपूरितम् दक्षिणाधःक्रमाद्धस्तैर्बिभ्रतीसर्वमंगला स्रतप्तहेमसर्वांगीमाधामाधेशपूजितम् नवाक्षरेणमंत्रेणसुसिद्धेनसमर्चयेत् दद्यादाचमनंतस्यैदद्याद्वस्त्रंसकंचुकीम् स्रकंकणांगुलीयानिकर्णालंकरणेशुभे ग्रैवेयकंप्रदर्शंचचन्दनेनाभिलेपयेत् पूजयेत्पुष्पमालाभिर्दिव्यैर्धूपैःसुधूपयेत् कुर्यादारार्तिकंराजन्मुदुल्यंवाच्यतांसुहृः भोजयेद्भक्तिभावेनपायसंशर्कराघृतम् स्रूपक्वान्नानिचान्नानिभगवन्लोभवर्जितः फलैःसुस्वादुचान्नंयद्दद्यादस्यैपुनःपुनः यावत्साभोजनंकुर्यात्तावत्स्तोत्रंजपेत्सुधीः दद्यादाचमनंतस्यैताम्बूलंचसमर्पयेत् तोषयेद्धेमदानेनकुमारींप्रणतोऽसकृत् प्रदक्षिणांनमस्कारान्कृत्वामूर्ध्निकृतांजलिः विसर्जयेत्कुमारींतांस्वगृहंसत्वनिर्भरः अनेनविधिनाभक्त्याकुमारींयोऽभिपूजयेत् सपृथ्वीराज्यमासाद्यशिवसायुज्यतांव्रजेत् यंयंप्रार्थयतेकामंदेवानामपिदुर्लभम् कुमारीपूजनंकृत्वातंतंप्राप्नोत्यसंशयम् ब्रह्माविष्णुमहेशानांकुमारीपरमामता तत्पूजनेनराजेन्द्रत्रैलोक्यंस्यात्सुपूजितम् सम्यक्क्रतुफलंतस्यचतुष्पदफलंभवेत् सर्वतीर्थफलंतस्ययःकुमारीम्प्रपूजयेत् तस्मात्पूजयभूपालकुमारींपूतमानसः स्वंराज्यंप्राप्स्यसेवश्यंमातेभूदत्रसंशयः रुद्रयामलेविशेषः शतचंडीविधानंचप्रोच्यमानंशृणुष्वतत् सर्वोपद्रवनाशार्थंशतचंडींसमारभेत् षोडशस्तंभसंयुक्तंमण्डपंपल्लवोज्ज्वलम् वसुकोण

युतांवेदींमध्येकुर्यात्त्रिभागतः पक्वेष्टरचितांरम्यामुच्छ्रायहस्तसंमिताम् पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभम् पंचवर्णवितानंच
किंकिणीजालमंडितम् आचार्येणसमंविप्रान्वरयेद्दशसुव्रतान् ईशान्यांस्थापयेत्कुंभंपूर्वोक्तविधिनाहरेत् वारुण्यांचप्रकर्तव्यंकुंडंल-
क्षणलक्षितम् मूर्तिंदेव्याःप्रकुर्वीतसुवर्णस्यपलेनवै तदर्द्धेनतदर्द्धेनतदर्द्धेनमहामते अष्टादशभुजांदेवींकुर्याद्वाष्टकरामपि पट्टकूलयुग
च्छन्नांवेदीमध्येनिधापयेत् देवींसंपूज्यविधिवज्जपंकुर्युर्दशद्विजाः शतमादौशतंचांतेजपेन्मंत्रंनवार्णम् चंडीसप्तशतीमध्येसंपुटोय
मुदाहृतः एकंद्वेत्रीणिचत्वारिजपेद्दिनचतुष्टयम् रूपाणिक्रमशस्तद्वत्पूजनादिकमाचरेत् पंचमेदिवसेप्रातर्होमंकुर्याद्विधानतः गुडू
चीपायसंदूर्वातिलान्छुक्लान्यवानपि चंडीपाठस्यहोमेतुप्रतिश्लोकंदशांशतः होमंकुर्याद्गृहादिभ्यश्चवाज्यसमिधैःक्रमात् हुत्वापूर्णाहु-
तिंदद्याद्विप्रेभ्योदक्षिणांक्रमात् कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरम् अभिषेकंततःकुर्युर्यजमानस्यऋत्विजः एवंकृतेमरेशानसर्व
सिद्धिःप्रजायतेइति अथसहस्रचण्डीविधिः तत्रैव सहस्रचंडीविधिंवक्ष्येशृणुविष्णोमहामते राज्यभ्रंशोह्यकस्माद्वेज्जनमारेमहा
भये गजमारेश्वमारेचपरचक्रभयेतथा इत्यादिविविधेदुःखेक्षयरोगादिजेभये सहस्रंचंडिकापाठंकुर्याद्वाकारयेत्तथा जापकास्तुशतं
प्रोक्तात्रिंशद्धस्तश्चमंडपः भोज्याःसहस्रंविप्रेंद्रागोशतंदक्षिणादिशेत् गुरवेद्विगुणंदेयंशय्यादानंतथैवच सप्तधान्यंचभूदानंश्वेताश्वं
चमनोहरम् पंचनिष्कमितामूर्तिःकर्तव्यावर्धमानतः अष्टांदशभुजांदेवींसर्वायुधविभूषिताम् अन्नंवारिचदातव्यंसहस्रंप्रत्यहंविभो श

तंवानियताहारःप्रयोमानेनवर्तयेत् एवंप्रश्चंडिकापाठंसहस्रंतुसमाचरेत् तस्यस्यात्कार्यसिद्धिस्तुनात्रकार्याविचारणेति अन्येपिवि
शेषाः योगिनीभैरवीवाराहीतंत्रेषुदेवीकालिकापुराणयोश्चानुसन्धेयाः तेचप्रयोगेस्पष्टाः वयंतुयामलाद्युक्तंनानुष्ठेयम् यामलस्यमोह
नशास्त्रत्वेनाप्रमाण्यत्वात् तथाचस्मार्तनिबंधेकौर्मेदेवीवाक्यम् यानिशास्त्राणिदृश्यंतेलोकेस्मिन्विविधानिच श्रुतिस्मृतिविरुद्धानितेषां
निष्ठाहितामसी कापालंभैरवंवापियामलंवाममथतम् एवंविधानिचान्यानिमोहनार्थानियानितु मयासृष्टान्यनेकानिमोहायेषांभवार्णवे
तत्रैषपार्थे चकारमोहशास्त्राणिकेशवोपिशिवेरितः अर्हतंयामलंवामंपंचरात्रंतथाव्रतम् इतिश्रीमद्रामकृष्णभट्टात्मजदिनकरभट्टकृते
शांतिसारेनवचंडीशतचंडीवर्धापनचंडीसहस्रचंडीप्रयोगः अथवैदिकंदुर्गाराधनम् शौनकः जातवेदसइत्येतत्सूक्तंसर्वार्थसाधकम् आयु
रारोग्यसुखदंभूमिदंशत्रुनाशनम् यद्यदिच्छतिवाविप्रस्तत्तदाप्नोत्यसंशयम् सूक्तेनानेनजुहुयाच्छुक्लांबरधरःशुचिः जपेद्वानियतोमंत्रंह
विष्याशीजितेंद्रियः पशुपुत्रधनार्थीतुप्रत्येकंलक्षमभ्यसेत् सर्वेषामेवदेवानांविशिष्टंदेवतालयम् तस्माद्देवालयेकुर्वन्विशिष्टफलमश्नु
ते ततःप्राचीप्रशस्तास्यादाग्नेयीचाविशेषतः प्रतीचीवायवीयाचश्रेष्ठासौम्यादिशाऽथवा पैशाचिताऽभिचारेचविजयेपिविशिष्यते कुंडे
वास्थंडिलेवापिहोमंकुर्यादतंद्रितः चतुरस्रंभवेत्कुंडंमेखलात्रयसंयुतम् स्थंडिलाद्याज्यभागांतंयज्ञतंत्रंप्रकल्पयेत् महाद्विजःशुचिर्दांतः
सर्वभूतहितेरतः दुर्गामावाहयेत्कुंभेसायुधामष्टमहाभुजाम् नीलोत्पलदलश्यामांकिरीटाद्यैर्विभूषिताम् ततस्त्वाराध्यतांदेवीतस्मिन्तीर्थी

दधान्विते आवाहनेनहविषास्तमिद्भिश्चपृथक्पृथक् मंत्रेणानेनजुहुयादष्टोत्तरशताहुतीः ततःस्विष्टकृतंचैवहोमशेषंसमापयेत् उत्थाप्याथ जपेन्मंत्रमेतंश्रद्धासमन्वितः यदादुर्गाश्ववरदात्वत्प्रसादाच्चपार्वती इतिदुर्गाकल्पः अथसर्पविधिः शौनकः अथवक्ष्याभिसर्पस्यसंस्कारविधिमुत्तमं सिनीवाल्यांपूर्णमास्यांपंचम्यांकारयेद्व्रतम् कृतसर्पवधोविप्रः पूर्वजन्मनिवायदि स्नात्वागत्यततोब्रह्मदंडंदद्याद्द्विजातये वधंप्रख्यापयेत्पापीचरेत्कृच्छ्रांश्चतुर्दश वधेहंजन्मनिकृतेलोहदंडंद्विजातये दद्यात्पापविशुद्ध्यर्थंश्रोत्रियायकुटुंबिने विप्रायदंडमूल्यंवाह्यभावेप्रतिदापयेत् साक्षाद्वधेकर्मकर्तुमेतदेवप्रदापयेत् निष्कद्वयंत्रिनिष्कंवानिष्कमेकंकनीयसम् अनुमत्यादिकर्तॄणांनिष्कपादार्द्धकं वित्तशाठ्यंनकुर्वीतदद्याद्वित्तानुसारतः अनुज्ञांचगुरोर्लब्ध्वासंस्कुर्यात्तदनंतरम् प्रियंगुव्रीहिगोधूमतिलपिष्टेनवापुनः कृत्वासर्पाकृतिंतेनसर्पभोगसमन्वितम् अनेनवक्ष्यमाणेनप्रार्थयेद्दक्षिणेत्वहिम् एहिपूर्वमृतःसर्पअस्मिन्पिष्टेसमाविश संस्कारार्थमहंभक्त्याप्रार्थयामिसमाहितः वस्त्रोपवीतगंधाद्यैरक्षतैःकुसुमादिभिः कर्तापुष्पांजलिंदत्वाप्रणिपत्यहरेद्बहिः प्रक्षालितांघ्रिपाणिस्तुह्याचम्योपविशेद्भुवि कुर्यात्संस्कारसंकल्पंप्राणायामपुरःसरम् यज्ञोपवीतिनाकार्यंसर्पसंस्कारकर्मतु लौकिकाग्निंप्रतिष्ठाप्यसमिदाधानमाचरेत् ततोग्नेरग्निदिग्भागेभूमिंसंप्रोक्ष्यवारिभिः चितिंकृत्वाथसंस्तीर्यकुशैराग्नेयकाग्रकैः पर्युक्ष्याग्निंपरिस्तीर्यपरिषिच्यसमर्पयेत् कृत्वेध्माधानपर्यन्तंसत्पात्रासादनादिकम् आघारौचक्षुषीहुत्वासर्पिषातुयथाविधि सर्पंगृहीत्वायत्नेनचितिमारोपयेत्सुधीः अपःस्पृष्ट्वास्पृशेच्छ्रोत्रंगत्वाचाग्निस

मीपतः स्रुवेणजुहुयादाज्यमसौव्याहृतिभिस्त्रिभिः सर्पास्येजुहुयादाज्यंव्याहृत्याचसमग्रया आज्यशेषंस्रुवेणैवसर्पदेहेनाधंचपेत् च मसस्थैर्जलैःसर्पंव्याहृत्याप्युक्ष्यपाणिना अग्नेरक्षाणोइत्यनयोसर्पाग्निंप्रदापयेत् उपतिष्ठेद्दह्यमानंनमोस्तुसर्पमंत्रतः ज्ञानतोज्ञानतो वापिकृतःसर्पवधोमया पूर्वजन्मनिवासर्पतत्सर्वंक्षमयस्वमे इतिसंप्रार्थ्यनागेंद्रंस्नात्वागत्यततःपुनः क्षीराज्येनततस्त्वाग्निंप्रोक्ष्यव्याहृ तिभिस्त्रिभिः हुतेसर्पजलेनाग्निमभिषिंचेत्ततःपरम् नास्थिसंचयनंकुर्यात्स्नात्वाचस्वगृहंव्रजेत् ब्रह्मचर्यादिकंकार्यंत्रिरात्राशौचमिष्यते चतुर्थेहनिसंप्राप्तेसचैलंस्नानमाचरेत् घृतपायसभक्तैस्तुद्विजानष्टौतुभोजयेत् कर्तानामपदैर्विप्रानर्चयेद्वक्ष्यमाणकैः सर्पोनंतस्तक्षःशेषः कपिलोनागएवच कालिकःशंखपालश्चभूधरश्चप्रकीर्तितः पादप्रक्षालनंकुर्यादेभिर्नामपदैःपृथक् गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्विजान् एवंकृतेविधानेवैसर्पसंस्कारकर्मणि सर्पहिंसाकृतात्पापान्मुच्यतेनात्रसंशयः कुष्ठव्याध्यभिसंयुक्तंसर्वथाभेषजांतिकम् आयुरारोग्यमैश्वर्यंप्राप्यकामानवाप्नुयात् इतिसर्पसंस्कारः अथवास्तुशांतिः मात्स्ये चैत्रेव्याधिमवाप्नोतियोगृहंकारयेन्नृप वैशाखेधेनुरत्नानिज्येष्ठेमृत्युंतथैवच आषाढेभृत्यरत्नानिपशुवर्गमवाप्नुयात् श्रावणेभृत्यलाभंचहानिंभाद्रपदेतथा पत्नीनाशोऽश्विनेविंद्यात्कार्तिकेधनधान्यकं मार्गशीर्षेतथाधान्यंपौषेतस्करतोभयं लाभंचबहुशोविंद्यादग्निंमाघेविनिर्दिशेत् फाल्गुनेकांचनंपुत्रानितिकालबलंस्मृतं रत्नमालायां कर्कनक्रहरिकुंभगतेऽर्के पूर्वपश्चिममुखानिगृहाणि तौलिमेषवृषवृश्चिकयातेदक्षिणोत्तरमुखानिवदंति अश्विनीरोहिणीमूलउत्तरा-

त्रयमैंद्यम् स्वातीहस्तोनुराधाचगृहारंभेप्रशस्यते आदित्यभौमवर्ज्यंतुसर्वेवाराःशुभावहाः वज्रव्याघातशूलेषुव्यतीपातादिगंडयोः विष्कंभगंडपरिघवज्रयोगेनकारयेत् यथामैत्रेयमाहेंद्रगंधर्वाभिजितरोहिणे तथावैश्वजसावित्रेमुहूर्तेगृहमारभेत् चंद्रादित्यबलंलब्ध्वालग्नेशुभनिरीक्षिते स्तंभोच्छ्रायादिकर्तव्यमन्यत्तुपरिवर्जयेत् प्रासादेचैवमेवंस्यात्कूपवापीषुचैवहि पूर्वंभूमिंपरीक्षेतपश्चाद्वास्तुंप्रकल्पयेत् श्वेतारक्तातथापीताकृष्णाचैवानुपूर्वशः विप्रादेःशस्यतेभूमिरतःकार्यंपरीक्षणं विप्राणांमधुरास्वादाकषायाक्षत्रियस्यतु कषायाकटुकातद्वद्वैश्यशूद्रेषुशस्यते अरत्निमात्रेयेगर्तेस्वनुलिप्तेतुसर्वतः घृतमामशरावस्थंकृत्वावर्तिचतुष्टयम् ज्वालयेद्भूपरीक्षार्थंपूर्णंतत्सर्वदिङ्मुखं दीप्तौपूर्वादिगृह्णीयाद्वर्णनामानुपूर्वशः वास्तुःसामूहिकोनामदीप्यतेसर्वतःस्तुसः शुभदःसर्ववर्णानांप्रासादेषुगृहेषुच अरत्निमात्रंगर्तंतुपरीक्ष्यंखातपूरणे अधिकेश्रियमाप्नोतिन्यूनेहानिःसमेसमम् फलकृष्टेथवादेशेसर्वबीजानिवापयेत् त्रिपंचसप्तरात्रेणयन्नरोहंतितान्यपि ज्येष्ठोत्तमकनिष्ठाभूर्वर्जनीयेतरामता पंचगव्यौषधिजलैःपरिक्षिप्त्वाचसेचयेत् दानहेमाद्रौमात्स्ये एकाशीतिपदंकृत्वारेणुभिःकनकेनतु पश्चात्पिष्टेनानुलिंपेत्सूत्रेणालोड्यसर्वतः दशपूर्वायतारेखादशचैवोत्तरायताः सर्ववास्तुविभागेषुविज्ञेयानवकानव पदस्थान्पूजयेद्देवांस्त्रिंशत्पंचदशैवतु द्वात्रिंशद्वाह्यतःपूज्याःपूज्याश्चांतस्त्रयोदश मध्येनवपदास्त्वेकश्चत्वारस्त्रिपदाःस्मृताः विंशतिस्त्वेकपदकास्तावंतोद्विपदाःस्मृताः नामतस्तान्प्रवक्ष्यामिस्थानानिचनिबोधत ईशानकोणादिसुरान्पूजयेत्क्रमशोनव शिखीचैवाथपर्जन्योजयंतःकुलिशायुधः सूर्यसत्यौभृशश्चैवआकाशो

वायुरेवच पूषाचवितथश्चैवगृहक्षतयमावुभौ गंधर्वोभृंगराजश्चमृगःपितृगणस्तथा दौवारिकोथसुग्रीवःपुष्पदंतोजलाधिपः असुरः शेषपा-
पौचरोगोहिमुख्यएवच भल्लाटःसोमसर्पौचअदितिश्चदितिस्तथा बहिर्द्वात्रिंशदेतेतुतदंतश्चतुरः शृणु ईशानादिचतुष्कोणसंस्थिताःपूज
येद्बुधः आपश्चैवाथसावित्रोजयोरुद्रस्तथैवच मध्येनवपदोब्रह्मातस्यचाष्टौसमीपगाः अर्यमासविताचैवविवस्वान्विबुधाधिपः मित्रोथरा-
जयक्ष्माचतथापृथ्वीधरःस्मृतः अष्टमश्चापवत्सस्तुपरितोब्रह्मणःस्मृताः आपश्चैवापवत्सश्चपर्जन्योग्निर्दितिस्तथा पदिकानांतुवर्गोयमेवंको-
णेष्वशेषतः तन्मध्येतुबहिर्विंशद्विपदास्तेतुसर्वतः अर्यमाचविवस्वांश्चमित्रंपृथ्वीधरस्तथा ब्रह्मणःपरितोदिक्षुत्रिपदास्तेतुसर्वतः मूर्धन्यग्निः
समादिष्टोमुखेचापः समाश्रिताः पृथ्वीधरोर्यमाचैवस्तनस्थानमधिष्ठितौ वक्षःस्थलेचापवत्सःपूजनीयःसदाबुधैः नेत्रयोर्दितिपर्जन्यौश्रोत्रे
दितिजयंतकौ सर्पेंद्रौवंशसंस्थौतुपूजनीयौप्रयत्नतः सत्यरोगादयस्तद्वद्बाह्वोः पंचचपंचच रुद्राश्चराजयक्ष्माचवामहस्तसमास्थितौ सावि
त्रः सवितातद्वद्धस्तंदक्षिणमाश्रितौ विवस्वानथमित्रश्चजठरेसंव्यवस्थितौ पूषाचपापयक्ष्माणौहस्तयोर्मणिबंधने तथैवासुरशेषौचवाम
पार्श्वेसमास्थितौ पार्श्वेतुदक्षिणेतद्वद्वितीयःसगृहक्षतः ऊर्वोर्यमांबुपौज्ञेयौजान्वोर्गंधर्वपुष्पकौ जंघयोर्भृशसुग्रीवौस्फिक्स्थौदौवारिको
मृगः जयशक्रौतथामेंद्रेपादयोःपितरस्तथा मध्येनवपदेब्रह्माहृदयेसतुपूज्यते चतुःषष्टिपदोवास्तुप्रासादेब्रह्मणःस्मृतः ब्रह्माचतु
ष्पदस्तत्रकोणेष्वेकपदस्तथा बहिःकोणेषुचाष्टौतुसार्द्धाश्चोभयसंस्थिताः विंशतिर्द्विपदाश्चैवचतुःषष्टिपदेस्मृताः होमास्त्रिमेखलेका-

र्यैःकुंडेहस्तप्रमाणके यवैःकृष्णतिलैश्चैवसमिद्भिःक्षीरवृक्षजैः पालाशैःखादिरैश्चापामार्गोदुंबरसंभवैः कुशदूर्वाभवैर्वापिमधुसर्पिःसमन्वितैः कार्यस्तुपंचभिर्बिल्वैर्बिल्वबीजैरथापिवा होमांतेभक्ष्यभोज्यैस्तुवास्तुदेशेबलिंहरेत् तद्वद्विशेषनैवेद्यमिदंदद्यात्क्रमेणतु ईशकोणेघृताक्तान्नंशिखिनेविनिवेदयेत् ओदनंसोत्पलंदद्यात्पर्जन्यायघृतान्वितं जयंतायध्वजंपीतंपैष्टंकूर्मंचसंत्यजेत् इंद्रायपंचरत्नानिपैष्टंचकुलिशंतथा वितानकंचसूर्यायापूपंसक्तुंतथैवच सत्यायघृतगोधूमंमत्स्यान्दद्याद्भृशायच शष्कुलीश्चांतरिक्षायदद्यात्सक्तूंश्चवायवे लाजाःपूष्णेतुदातव्यावितथेचणकोदनम् गृहक्षतायमध्वन्नंयमायपिशितोदनं गंधौदनंचगंधर्वेभृंगेमेषस्यजिह्विका मृगाययावकंदद्यात्पितृभ्यःकृसरंतथा दौवारिकेदंतकाष्ठंपैष्टंगृहबलिंतथा सुग्रीवेपूपकान्दद्यात्पुष्पदंतायपायसं कुशस्तंबेनसंयुक्तंतथापद्मंचवारुणे पिष्टंहिरण्मयदद्यादसुरायसुरामता घृतोदनंचशोषायगोधांवैपापयक्ष्मणे घृतलड्डुकांस्तुरोगायनागपुष्पंफलान्वितं भक्ष्यंमुख्यायदातव्यंमुद्गौदनमतःपरं भल्लाटस्थानकेदद्यात्सोमायमधुपायसं नागायशालिजंपिष्टमदित्यैपोलिकास्तथा दितेस्तुपूरिकांदद्यादित्येवंबाह्यतोबलिः क्षीरमापायदातव्यमापवत्सायवैदधि सवित्रेलड्डुकान्दद्यात्समरीचंकुशोदकं सवित्रेगुडपूपांश्चजयायघृतचंदनं विवस्वतेपुनर्दद्याद्रक्तचंदनपायसं हरितालौदनंदद्यादिंद्रायघृतसंयुतम् गुडौदनंतुमित्रायरुद्रायघृतपायसं आमंपक्वंतथामांसंदेयंस्याद्राजयक्ष्मणे पृथ्वीधरायमांसानिकूष्मांडानिचदापयेत् शर्करापायसंदद्यादर्यम्णेपानमेवच पंचगव्यंयवांश्चैवतिलाक्षतहविश्चरुं भक्ष्यंभोज्यंचविविधंब्रह्मणेविनिवेदयेत् एवं

संपूजितादेवाःशांतिंकुर्वंतितेसदा सर्वेषांकांचनंदद्याद्ब्राह्मणेगांपयस्विनीं राक्षसानांबलिर्देयोमांसौदनसमन्वितः मांसौदनंघृतंपद्मकेसरंह्रविषान्वितं ईशानभागमाश्रित्यचरक्यैविनिवेदयेत् मांसौदनंसरुधिरंहरिद्रौदनमेवच आग्नेयींदिशमाश्रित्यविदार्यैविनिवेदयेत् दध्योदनंसरुधिरंमत्स्यखंडैश्चसंयुतम् पीतरक्तबलिंदद्यात्पूतनायातुराक्षसी वायव्येपापराक्षस्यैमत्स्यमांसैःसुरासवं पायसंवापिदातव्यंस्वनाम्ना सर्वतःक्रमात् नमस्कारानुयुक्तेनप्रणवाद्येनसर्वतः ततःसर्वौषधिस्नानंयजमानस्यकारयेत् द्विजांस्तुपूजयेद्भक्त्यायेचान्येगृहमागताः एतद्वास्तूपशमनंकृत्वाकर्मसमाचरेत् प्रासादभवनोद्यानप्रारंभेपरिवर्तने जीर्णोद्धारेतथोत्थानेतथागृहनिवेशने द्वाराभिवर्तनेतद्वत्प्रासादपरिवर्तने पुस्येशप्रवेशेचसर्वदोषोपशांतये वास्तूपशमनंकृत्वाततःसूत्रेणवेष्टयेत् राक्षोघ्नपावमानेनसूक्तेनभवनादिकं नृत्यमंगलवाद्यंच कुर्याद्ब्राह्मणवाचनम् अनेनविधिनायस्तुप्रतिसंवत्सरंबुधः गृहेवायतनेकुर्यान्नसदुःखमवाप्नुयात् गृह्योक्तहोमविधिनाबलिकर्मकुर्यात्प्रासादवास्तुशमनेचविधिर्यउक्तः अत्रपौराणवास्तुशांतेःस्वगृह्योक्तवास्तुशांत्यासमुच्चयोविधीयते संतर्पयेद्द्विजवरानथभक्ष्यभोज्यैः शुक्लांबरःस्वभवनंप्रविशेत्सुरूपं कृत्वाग्रतोद्विजवरानथपूर्णकुंभंदध्यक्षताम्रदलपुष्पफलोपशोभं दत्वाहिरण्यवसनानितथाद्विजेभ्योमांगल्यशांतिनिलयंसगृहंविशेच्च नारदसंहितायाम् अकपाटमनाच्छन्नमनन्नबलिभोजनम् गृहेनप्रविशेद्धीमानापदामाकरोहितत् वसिष्ठः कृत्वाशक्रंपृष्ठतोवामतोर्कं विप्रान्पूज्यानग्रतःपूर्णकुंभं हर्म्यंरम्यंतोरणस्रग्वितानैःस्त्रीभिःस्रग्वीगीतवाद्यैर्विशेच्च ना

रदसंहितायाम् मृत्पेटिकांस्वर्णरत्नधान्यशैवालसंयुतां गृहमध्येहस्तमात्रगर्तेन्यासार्थंविन्यसेत् वसिष्ठसंहितायां निर्माणेमंदिराणांचप्रवेशेत्रिविधेपिवा वास्तुपूजाचकर्तव्यातस्मात्तांकथयाम्यतः गृहमध्येहस्तमात्रंसमंतात्तंडुलोपरि एकाशीतिपदंकार्यंतिलैस्तुल्यंसुशोभनम् एकद्वित्रिपदाःपंचचत्वारिंशत्सुरार्चिताः द्वात्रिंशद्बाह्यतोवक्ष्यमाणाश्चांतस्त्रयोदश तेषांस्थानानिमानानिवक्ष्यामीश्वरकोणतः तत्राग्निश्शंभुकोणस्थस्त्वसौचैकपदेश्वरः तस्माद्द्वितीयःपर्जन्यश्चासावेकपदेश्वरः जयंतेंद्रार्कसत्याख्यभृशाश्चद्विपदेश्वराः आकाशवायूपरतः क्रमादेकपदेश्वरौ एवंप्राच्यांनवज्ञात्वात्वेवमेवान्यदिक्षुच आद्यावंत्यावेकपदौद्विपदाःपंचमध्यगाः पूषाद्याष्टौयमांताःस्युरमरायाम्यभागगाः आद्यौचांत्यावेकपदौद्विपदाःपंचमध्यगाः अष्टौपितृगणाधीशाःपापांताःपश्चिमेसुराः आद्यंतौद्वावेकपदौद्विपदाःपंचमध्यगाः रोगादिदित्यंतसुराःसप्तसौम्यादिशिक्रमात् तत्राधस्ताच्चतुष्कोणेष्वीशानादिषुचक्रमात् आपःसावित्रविजयरुद्राश्चैकपदेश्वराः मध्येनवपदोब्रह्मा तस्येशानादिकोणगाः आपवत्सोपसाविताविबुधाधिपसंज्ञकाः राजयक्ष्माचचत्वारःसुराश्चैकपदेश्वराः ब्रह्मणःपूर्वतोदिक्षुत्रिपदाश्चामराअमी अर्यमाचविवस्वांश्चमित्रःपृथ्वीधरःक्रमात् स्वस्वस्थानेषुदेवेषुस्थापितेष्वीदृशंभवेत् कोणेषुपंचपंचैवचतुर्ष्वेकपदाःसुराः प्रागादिदिक्षुद्विपदाःपंचपंचयथाक्रमम् ब्रह्मणःपूर्वतोवायुःपूषाचवितथस्तथा गृहक्षतःपितृपतिर्गन्धर्वोभृंगराजकः मृगपितृगणाधीशस्तथादौवारिकाह्वयः सुग्रीवःपुष्पदन्तश्चजलाधीशोनिशाचरः शेषःपापश्चरोगोहिर्मुख्योभल्लाटएवच सोमसर्पौदित्यदितिद्वात्रिं

शदमराःस्मृताः आपश्चैवापवत्सश्चजयोरुद्रस्तथैवच मध्येनवपदोब्रह्मातस्यौचाष्टौसमीपगाः प्रागाद्यंतरितादेवाःपरितोब्रह्मणःस्मृताः अर्यमासविताचैवविवस्वान्विबुधाधिपः मित्रोथराजयक्ष्माचतथापृथ्वीधरःक्रमात् आपवत्सोष्टमःपंचचत्वारिंशत्सुरोत्तमाः ज्ञात्वैवंस्थाननामादिब्रह्मणासहितान्न्यसेत् वास्तुज्ञोवास्तुमंत्रेणगंधपुष्पाक्षतादिभिः आदिपदेनपूर्वादि वास्तुमंत्रेणवास्तुज्ञोदूर्वादध्यक्षतादिभिरिति नारदसंहितोक्तेः प्रणवेनार्चयेद्वापिअथवास्वस्वनामभिः शुक्लवस्त्रयुगंदद्याद्धूपदीपफलैःसह अपूपैर्भूरिनैवेद्यैर्वाद्यैःसहसमर्पयेत् तांबूलंचततोदद्याद्देवेभ्यश्चपृथक्पृथक् दत्वापुष्पांजलिंकर्ताप्रार्थयेद्वास्तुपूरुषम् वास्तुपुरुषनमस्तेस्तुभूशय्याभिरतप्रभो मद्गृहेधनधान्यादिसमृद्धंकुरुसर्वदा इतिप्रार्थ्यततोदद्याद्दक्षिणाम्प्रर्चकायच विप्रेभ्योभोजनंदत्वास्वयंभुञ्जीतबंधुभिः एवंयःकुरुतेसम्यग्वास्तुपूजांप्रयत्नतः आरोग्यपुत्रपौत्रादिधनंधान्यंलभेन्नरः वास्तुपूजामकृत्वायःप्रविशेन्नवमंदिरम् रोगान्नानाविधान्क्लेशानश्नुतेसर्वसंकटान् बौधायनः अथातोगृहशांतिकर्मगृहवृद्धिमिच्छन्मासिमास्यृतावृतौसंवत्सरेसंवत्सरे आपूर्यमाणपक्षेपुण्येनक्षत्रेगृहशांतिमारभेदपामार्गपलाशशमीशिरीषोदुम्बरसदाभद्रमुस्तातृणामिन्द्रवल्याचगृहंसंमार्ष्टिमानोमहान्तमानस्तोकइतिपञ्चगव्येनदर्भमुष्टिनासंप्रोक्ष्य यतइंद्रभयामहेस्वस्तिदाविशस्पतिरितिद्वाभ्यां कृणुष्वपाजःप्रसितिंनपृथ्वीमित्येतेनानुवाकेनसिद्धार्थान्प्रकीर्यवास्तुमध्येऽ यदेवयजमानोल्लेखनप्रभृत्यग्निमुखान्कृत्वापक्वाज्जुहोति वास्तोष्पतइतिद्वाभ्यामथाज्याहुतीरुपजुहोति वास्तोष्पतेध्रुवास्थूणांतिषड्भिरनुच्छंदसंसावित्र्यासहस्तंजु

हुयात्स्विष्टकृत्प्रभृतिसिद्धमाधेनुरथप्रदानाद्ब्राह्मणानन्नेनपरिविष्यपुण्याहंस्वस्तिमृद्धिमितिवाचयीतैवंप्रयुंजानस्यबह्व्यःप्रजाभवंतिबाधाप्रहीयंतेग्रहाव्याधयश्चतंनगृह्णंतिनदंष्ट्रिणोनतस्करसर्पराक्षसपिशाचाबाधंतइतिहस्माहबौधायनः नारदसंहितायां स्नानागारंदिशिप्राच्यामाग्नेय्यांपावकालयम् याम्यायांशयनंगेहंनैर्ऋत्यांशस्त्रमंदिरम् प्रतीच्यांभोजनगृहंवायव्यांपशुमंदिरम् भांडागारंतूत्तरस्यामीशान्यांदेवमंदिरम् वसिष्ठसंहितायाम् स्वगृहात्पश्चिमेभागेपितृस्त्वाग्रजमंदिरम् गृहपादागृहस्तंभाःसमाःकार्याश्चनासमाः नात्युच्छ्रितंनातिनीचंकुड्योत्सेधंयथारुचि भित्तिःपक्वेष्टकाकार्यादारुणाप्यथवामृदा कार्याचित्रपटैर्वापितृणैःपत्रैश्चनकचित् गर्गः द्वारंप्रयत्नात्कर्तव्यंसर्वंद्वारप्रतिष्ठितं परकोणैःपरद्वारैःपरस्तंभैःपरद्रुमैः कूपवृक्षादिभिश्चैवहतंद्वारंनिरर्थकम् राजतोभयमत्युच्चैरतिनीचेतुचोरतः विनाशश्चातिविस्तीर्णेसंवृतेचातिचक्षुधा अतिप्रमाणेदारिद्र्यमत्यल्पेव्याधितोभयम् जिह्मेत्वथोविनश्यंतिकुटिलेऋणवद्भवेत् कुब्जेकुक्षिरोगःस्यात्क्षुद्रयंकुक्षिपीडिते कूपस्थानंवसिष्ठसंहितायाम् ऐश्वर्यंपुत्रहानिश्चस्त्रीनाशोनिधनंभवेत् संपच्छत्रुभयंसौख्यंपुष्टिःप्रागादितःक्रमात् कूपेकृतेमध्यमेतुधनहानिश्चवास्तुतः तस्मात्सम्यग्विचार्याथकूपंकुर्याच्चबुद्धिमान् तत्रैवद्वारे पुन्नागशोकतिलकशमीबकुलचंपकाः दाडिमीपिप्पलीद्राक्षापिचुमंदजपामराः बंधूकपूगपनससरोजगृहमल्लिकाः मल्लिकापाटलीजातिनारीकेलस्तृणद्रुमः एतेगृहांगणेवृक्षास्सर्वदामंगलप्रदाः प्लक्षककर्कंधूवृक्षौद्वौगृहस्योत्तरतःशुभौ न्यग्रोधोदुंबराश्वत्थाःप्रागादिषुशुभप्रदाः अगस्तिमातुलिंगाख्यंहरिद्रा

कदलीस्तुषा स्वयंप्रजाताअप्येतेदुःखशोकभयप्रदाः अथास्मत्पितृकृतोमात्स्यानुसारीवास्तुशांतिप्रयोगः गृहप्रवेशेपूर्वेह्निशुभेपूर्वाह्के
गृहारंभादौसद्यः सस्त्रीकः शुचिः प्राङ्मुखः यजमानोदेशकालौस्मृत्वा अस्यवास्तोः शुभतासिद्ध्यर्थंसनवग्रहमखांवास्तुशांतिंकरिष्यइतिसं
कल्प्यतदंगत्वेनगणेशपूजापुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकरिष्येइतिसंकल्प्यतानिकृत्वाचार्यादीन्कुंडलालंकारव
स्त्रादिभिःपूजयेत् ऋत्विजश्चत्वारः ततःआचार्यःआचार्यकर्मकरिष्येतिसंकल्प्यसर्षपान्विकिरेदेभिर्मंत्रैः यदत्रसंस्थितमितिमंत्राभ्यांभूत
प्रेतपिशाचाद्याअपक्रामंतुराक्षसाः स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमामितिचसर्षपान्विकीर्यपंचगव्येनसर्वगृहंप्रोक्ष्यहस्तमितिकुंड
स्थंडिलंवाकृत्वातत्पूर्वतस्तदीशान्यांचहस्तमितवेदिद्वयंकृत्वाईशानवेदिरीशानादिचतुष्कोणेषु विशंतुभूतलेनागालोकपालाश्चसर्वतः अस्मिन्गृहेव
तिष्ठंतुआयुर्बलकराःसदेतिमंत्रेणचतुरःशंकून्रोपयेत् प्रासादादौगृहपदस्थानेतन्निर्देशः ततःशंकुपार्श्वेईशानादि अग्निभ्योप्यथसर्पेभ्योये-
चान्येतत्समाश्रिताः तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तममितिमाषभक्तबलीन्दत्वावेद्युपरिवस्त्रेकुंकुमादिनासुवर्णरजतादिशलाकया शां
तायै॰ यशोवत्यै॰ कांतायै॰ विशालायै॰ प्राणवाहिन्यै॰ सत्यै॰ सुमत्यै॰ नंदायै॰ सुभद्रायै॰ सुरथायै॰ एतेनामभिःपश्चादारंभाःप्रागंताः उदक्सं-
स्थाअंगुलद्वयांतरालादशरेखाःकृत्वा हिरण्यायै॰ सुव्रतायै॰ लक्ष्म्यै॰ विभूत्यै॰ विमलायै॰ प्रियायै॰ जयायै॰ ज्वालायै॰ विशोकायै॰ इडायै॰ एतेर्दक्षि-
णारंभाउदगन्ताःप्राक्संस्थादशरेखाःकृत्वा कुण्डेस्थंडिलेवाग्निंप्रतिष्ठाप्यदक्षिणवेद्यांसांगग्रहान्संस्थाप्यतदीशान्यांकलशंच संस्थाप्य वा-

शिखि १	पर्ज. २	जयं ३	कुलि ४	सूर्य ५	सत्या ६	भृशा ७	आका ८	वायु ९
दिते ३२	आपं ३३		अर्यं ३७	म्णे	नमः	सावि. ३८	सा. ३४	पूष्णो १०
अदि ३१	आपव							वित. ११
सर्पा ३०	धरा		ब्र ४५	ह्म	णे		न्	गृह १२
सोमा २९	थ्वी		न	मः	ब्र.		स्वा	यमा १३
भल्ला २८	पृ		ह्मा	ण	मा.		व	गंधर्व १४
मुख्या २७							वि ४०	भृंग १५
अह २६	रुद्रा ३६	राज ४२	यन:	त्रा	मि ४१		जया ३५	मृगाः १६
रोगा २५	पापा २४	शोषं २३	असुर २२	वरु २१	पुष्प २०	सुग्री १९	दौवा १८	पितृ १७

स्तुमंडलेप्रतिमादौदेवताआवाहयेत् ईशानकोणपदेवास्तोःशिरसिशिखिनेन॰शिखिनमावाहयामि तद्दक्षिणैकपदेदक्षिणनेत्रेपर्जन्यम् तद्दक्षिणपदेतत्पश्चिमेचदक्षिणश्रोत्रेजयंतम् तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधम् तद्दक्षिणपदद्वयेदक्षिणबाहौसूर्यम् तद्दक्षिणपदद्वयेदक्षिणबाहौसत्यम् तद्दक्षिणपदद्वयेदक्षिणकूर्परेभृशम् तद्दक्षिणोपरिस्थितैकपदेदक्षिणप्रबाहावाकाशम् तद्दक्षिणाग्नेयकोणपदेदक्षिणप्रबाहौवायुम् तत्पश्चिमैकपदेदक्षिणमणिबंधेपूषाणम् तत्पश्चिमपदेतदुत्तरपदेचदक्षिणपार्श्वेवितथम् तत्पश्चिमपदद्वयेदक्षिणपार्श्वेएवगृहक्षतम् तत्पश्चिमपदद्वयेदक्षिणोरौयमम् तत्पश्चिमपदद्वयेदक्षिणजानौगंधर्वम् तत्पश्चिमपदद्वयेदक्षिणजंघायांभृंगराजम् तत्पश्चिमोपरिस्थैकपदेदक्षिणस्फिचिमृगम् तत्पश्चिमेनैर्ऋत्यकोणपदेपादयोःपितॄन् तदुत्तरैकपदेवामस्फिचिदौवारिकम् तदुत्तरपदेतत्प्राक्पदेच वामजंघायांसुग्रीवम् तदुत्तरपदद्वयेवामजानौपुष्पदंतम् तदुत्तरपदद्वयेवामोरौवरुणम् तदुत्तरपदद्वयेवामपार्श्वेअसुरम् तदुत्तरपदद्वयेवामपार्श्वेएवशोषम् तदुत्तरोपरिस्थैकपदेवाममणिबन्धेपापम् तदुत्तरवायव्यकोणपदेवामप्रबाहौरोगम् तत्प्रागेकपदेवामप्रबाहावेवअहिम् तत्प्राक्पदेतद्दक्षिणपदेचवामकू

पैरेमुख्यम् तत्प्राक्पदेवामबाहौभल्लाटम् तत्प्राक्पदद्वयेवामबाहौसोमम् तत्प्राक्पदद्वयेवामांसेसर्पम् तत्प्राक्पदद्वयेवामश्रोत्रेअदितिम् तत्प्रागुपरिस्थैकपदेवामनेत्रेदितिम् तद्दक्षिणेशिखिपदाधःकोणपदेस्तुरवेआपं आग्नेयेवायुपदाधःकोणपदेदक्षिणहस्तेसावित्रम् नैरृत्येपितृपदाधःकोणपदेमेंद्रजयम् वायव्येरोगपदाधःकोणपदेवामहस्तेरुद्रम् मध्यपदेष्वीशानकोणपदाद्दक्षिणपदत्रये दक्षिणस्तनेअर्यमणम् तद्दक्षिणाग्नेयैककोणपदे दक्षिणस्तनेसवितारम् तत्पश्चिमपदत्रयेजठरदक्षिणभागेविवस्वंतम् तत्पश्चिमनैरृत्यकोणपदेवृषणयोर्विबुधाधिपम् तदुत्तरपदद्वयेजठरवामभागेमित्रम् तदुत्तरवायव्यकोणपदेवामहस्तेराजयक्ष्माणम् तत्प्राक्पदत्रयेवामहस्तेपृथ्वीधरम् तत्प्रागीशानकोणपदेउरसिआपवत्सम् मध्यनवपदेषुहृन्नाभ्योर्ब्रह्माणम् ततःउत्तरेवृषवास्तुम् वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् वास्तोष्पत्यावाहनेविनियोगः ॐवास्तोष्पतेप्रतिजानीह्यस्मानितिमंत्रेणस्थापयेत् सचसुवर्णस्यरूप्यस्यवा ततोमंडलाद्बहिरीशानादिचतुष्कोणेषुचरकींविदारींपूतनांपापराक्षसींपूर्वादिदिक्षुस्कंदमर्यमणंजृंभकंपिलिपिच्छंचप्रागवन्नाममंत्रैः संस्थाप्य प्रागाद्यष्टदिक्षु इंद्रादींस्तत्तन्मंत्रैर्नामभिर्वासंस्थाप्य तदस्त्वित्यावाह्यासनाद्युपचारैः प्रत्येकं एकत्रवापदार्थानुसमयेनवाभ्यर्च्यमंडलादीशान्यांकलशंस्थाप्यतत्रगंधौषधियवदूर्वापंचपल्लवसप्तमृत्पंचरत्नानि प्रक्षिप्य वस्त्रेणाभिवेष्ट्य यवपूर्णंपूर्णपात्रंनिधायवरुणमावाह्यतीर्थान्यावाहयेत् केचित्तुब्रह्मादिदेवतास्थापनंवदंति ततोन्वाधानंकुर्यात् तत्रचक्षुषीआज्येनेत्यंतमुक्त्वा नवग्रहानष्टशताष्टाविंशत्यष्टान्यतमसंख्याभिः समिद्भिस्तिलाज्याहुतिभिश्च अधिदेवताःप्रत्यधिदेवताविनायकादीन् चतुःसंख्याभिःसमिद्भि

स्तिलाज्याहुतिभिश्चशिखादिपंचचत्वारिंशद्देवता अष्टसहस्राष्टशताष्टाविंशत्यष्टतरसंख्याभिः उदुंबरसमित्तिलपायसाज्याहुतिभिर्वास्तोष्पतइतिचतसृभिर्ऋग्भिः क्रमेण अनंतरोक्तसंख्याभिः समित्तिलपायसाज्याहुतिभिर्वास्तोष्पतिं वास्तोष्पतइतिचतसृभिर्वास्तोष्पते ध्रुवास्थूणामित्यनयाचक्रमेणपंचैकान्यतरसंख्याभिर्बिल्वाहुतिभिस्तद्बीजाहुतिभिर्वाचरक्यादीनष्टचतुरन्यतरसंख्याभिः समित्तिलपायसाज्याहुतिभिः शेषेणास्विष्टकृतमित्यादिनिर्वापपूर्वकमाज्यभागांतंकुर्यात् यजमानोद्रव्यत्यागंकुर्यात् होमांते आचार्यः स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वा दिक्पालनवग्रहक्षेत्रपालेभ्यः सदीपमाषभक्तबलीन्दत्वा मूर्धानमितिपूर्णाहुतिंजुहुयात् वैश्वानरायेदं प्रणीतानयनादिकर्मशेषंसमाप्य वास्तुमंडलपश्चिमदेशे शिखिने एषपायसबलिर्नममेत्येवंशिख्यादिभ्योबलीन्दद्यात् तान्विप्रेघृतयुतपायसेन क्षत्रियादौवक्ष्यमाणैस्तदलाभेपायसेनेति ततश्चरक्यादिभ्यस्तथैवमाषभक्तबलीन्दद्यात् ततः आचार्यादयः समुद्रज्येष्ठाइत्यादिवैदिकैः सुरास्त्वेत्यादिपौराणैश्चमंत्रैर्यजमानंसपत्नीकंशांतिकलशोदकेनाभिषिच्य सर्वौषधिभिरनुलिप्य स्नापयेयुः ततः आचार्यो ब्रह्मस्थाने सुरूपांभूषितांपृथ्वींध्यात्वा ॐ धरायेनमइतिमंत्रेणाप्रपूजयेत् सर्वदेवमयंवास्तुवास्तुदेवमयंपरमिति ततोगृहंप्रागादितस्त्रिसूत्र्यापावमानेनसूक्तेनराक्षोघ्नेनचवेष्टयेत् छिन्नेसूत्रे ऽशुभम् ततोदुग्धपूर्णयाचस्तनकुंभ्यातथैवसूक्तद्वयेनधारामविच्छिन्नांकुर्यात् अथयजमानोगृहस्याग्नेये आकाशपदेजानुदघ्नमवटंखात्वातंगोमयेनोपलिप्यशुक्लचंदनपुष्पाक्षतादिभिरलंकृत्यशाल्यादिसप्तबीजानिदध्योदनंचप्रक्षिप्य नवकुंभंजलपूर्णंशुक्लैकपुष्पयुतगंधादिभिरर्चितंहस्तद्वयेनादायजानुभ्यामवनिंगत्वा ॐ नमोवरुणायेतितज्जलेनगर्तंपू

रयेत् तत्रावर्तेप्रदक्षिणेपुष्पेचोर्ध्वमुखेशुभम् वैपरीत्येत्वशुभम् ततोमृन्निर्मितपेटिकायांसप्तबीजदध्योदनशैवालपुष्पाणिप्रक्षिप्यपूर्वस्थापि
तंदृषवास्तुंतूर्यमंगलघोषेणानीयतस्यांसंस्थाप्य गन्धादिभिः संपूज्यप्रार्थयेद्वाभ्यां पूजितोसिमयावास्तोहोमाद्यैरर्चनैः शुभैः प्रसीदपाहिविश्वेश
देहिमेगृहजंसुखम् वास्तुपुरुषनमस्तेस्तु भूशय्याभिरतप्रभो मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदेति ततः पेटिकामाच्छाद्यतस्मिन्गर्तेशनैर्निक्षिपे
देनेनमंत्रेण सशैलसागरांपृथ्वींयथावहसिमूर्द्धनि तथामांवहकल्याणसंपत्संततिभिःसहेति गर्तेचतथैवमृदापूरितेमृदाधिक्यउत्तमंसाम्ये
मध्यमंन्यूनत्वेत्वधमंफलंविंद्यात् गर्तोपरिभूमिंगोमयेनोपलिप्यशुक्लगंधपुष्पाक्षतैः पूजयेत् ततोग्नेः पश्चिमत आचार्यंसंपूज्यालंकृतांस-
वत्सांगांवासोयुगंचदक्षिणांदत्वा ब्रह्मर्त्विग्भ्योयथाशक्तिदक्षिणांदत्वाग्रहाणांशिख्यादिवास्तुदेवतानांचपूजांकृत्वाक्षमाप्यउत्तिष्ठ० यांतुदेवेतिवि
सृज्याचार्यहस्तेप्रतिपाद्याग्निंसंपूज्यगच्छेतिविसृज्यब्राह्मणैः शांतिंपाठयित्वाग्रहादीनांशिख्यादीनांचप्रीत्यर्थंप्रत्येकंत्रींस्त्रीनेकैकंयथाशक्ति
ब्राह्मणान्संभोज्याशिषोगृहीत्वासुहृद्युतोभुंजीत एवंप्रथमेह्निवास्तुशांतिंविधायद्वितीयेह्निगृहप्रवेशंकुर्यात् सचेत्थं नवजलपूर्णपल्लवोपेतं
दूर्वायुतंसुगंधादिलिप्तंवस्त्रवेष्टितंसंपूर्णपात्रंसफलंकलशमंजलिनागृहीत्वायजमानोब्राह्मणान्वितः सदारपुत्रस्तूर्यघोषेणगृहंप्रविश्य प्रधानगृहम
ध्येधान्योपरितंकलशंस्थापयेत् ततोगृहस्थैर्यार्थंपुण्याहंवाचयित्वाब्राह्मणान्संपूज्यभोजयित्वाशिषोगृहीत्वा सुहृद्युतोभुंजीत इतिदि
नकरभट्टकृतेशांतिसारेवास्तुशांतिप्रयोगः अथदुष्टरजोदर्शनशांतिः प्रथमरजोदर्शनेचैत्रज्येष्ठाषाढभाद्रपदकार्तिकपौषप्रतिपत्षष्ठ्यष्टमी

द्वादश्यमारिक्तापापवारभरण्यार्द्रापुष्याश्लेषापूर्वाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदाख्याघातगंडातिगंडशूलवैधृतिव्यतीपातपरिघपूर्वार्द्धभ
द्राग्निधाधिमक्तादिनांत्यभागरात्रिसंध्यापापलग्नसंक्रांतिदग्धदिनरविचंद्रोपरागाशौचजीर्णारुणनीलवस्त्रापितृपरगृहा अशुभाः अत्रदोषबहुत्वेए
वशांतिकंकार्यं प्रभूतदोषेयदिदृश्यतेतत्पुष्यंततः शांतिककर्मकार्यमितिवसिष्ठसंहितोक्तेः प्रभूतदोषेवैधव्यनिःसंततित्वापादकेइतिकेचिदर्थ
माहुः ग्रहणेतुरजोदर्शनदोषेकस्यापिशांतिः ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते व्याधिःपीडातदास्त्रीणामादौऋतुदर्शनादितिशौनकेननिरपे-
क्षस्यनिमित्तत्वोक्तेः तत्रशांतिर्वक्ष्यते कृतेपिशांतिकेशुद्धकालीनरजोदर्शनाबाधिसंयोगःकार्यः विवर्जयेद्दैवतदेकशय्यांयावद्रजोदर्शनमुत्तमेह्नी
तिवसिष्ठोक्तेः शांतिरुक्तातेनैव चेद्दुष्टेह्निनवोदकुंभसलिलैः सन्मंत्रितैरौषधैः स्नानंपापनुदंसपंचकलशैःकार्यंसमृद्धीजकैः ऐशानतोगोमयमंडले
चपरिस्तृतेऽग्नौजुहुयाच्चदूर्वाम् युग्माघृताक्ताश्चसमित्क्षमाणांगायत्रिसंज्ञाष्टसहस्रसंख्या शतप्रमाणामथवाथहुत्वा शुभायवैर्व्याहृति
भिस्तिलैश्च ततःसुरान्भूमिसुरान्पितॄंश्चसंतर्पयेदन्नसुवर्णवस्त्रैः प्रयोगपारिजातेशौनकः सार्त्तवानांतुनारीणांशांतिंवक्ष्यामिशौनक. पं
चमेह्निचतुर्थेवागृहातिथ्यपुरःसराम् द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् कुंभत्रयंन्यसेद्राशौतंतुवस्त्रादिवेष्टितम् पूरयेत्तीर्थसलिलैः
प्रतिकुंभंपृथक्पृथक् सूक्तेनाथत्र्यृचेनप्रसुवआपइत्यथ ऋचायाःप्रवचस्तद्गायत्र्याचाततः क्रमात् मध्यकुंभेक्षिपेद्धान्यमौषधानिचहेम
च उदुंबरःकुशादूर्वाराजीवंवटबिल्वकाः विष्णुक्रांताचतुलसीबर्हिषंशंखपुष्पिका शतावर्यश्वगंधाचनिर्गुंडीसर्षपद्वयम् अपामार्गःपला

श्चपनसोजीवकस्तथा प्रियंगवश्चगोधूमाव्रीहयोश्वत्थएवच क्षीरंदधिचसर्पिश्चपद्मपत्रंतथोत्पलम् कुरंटकन्नयंगुंजावचाभद्रकमुस्तकाः द्वात्रिंशदौषधानीहयथासंभवमाहरेत् मृत्तिकाश्चौषधादीनितन्मंत्रेणक्षिपेत्क्रमात् कुंभोपरिन्यसेत्पात्रंकांस्यंमृद्वेणुताम्रजम् भुवनेश्वरींन्यसेत्तत्रइंद्राणींचपुरंदरम् आचार्यःपूजयेद्वान्योगायत्र्यामंत्रसारया इंद्राणींपूजयेद्देवीमिंद्राणीमासुनारिषु क्रमेणपूजयेदिंद्रमिंद्रत्वावृषभंवयम् आवाहनादिसकलैरुपचारैःप्रपूजयेत् तन्मध्येसंस्पृशन्कुंभंमंत्रेणभुवनेश्वरीम् जपेद्गायत्रीमाहोमाच्छ्रीसूक्तंचजपेत्ततः स्पृशन्वैदक्षिणंकुंभंमृत्विगेकोजपेदथ चत्वारिरुद्रसूक्तानिचतुर्मंत्रोत्तराणिच संस्पृशन्नुत्तरंकुंभंश्चीरुद्ररुद्रसंख्यया शन्नइंद्राग्निसूक्तंचतत्रैवसंस्पृशन्जपेत् कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत् दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच तिसृभिश्चैवदूर्वाभिरेकैकाचाहुतिर्भवेत् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा गायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयम् एवकारादिंद्राणींद्रयोर्होमोनास्तीतिकेचित् ततःस्विष्टकृतंहुत्वासमुद्रादूर्मिसूक्ततः संततामाज्यधारांतांपूर्णाहुतिमथाचरेत् अथाभिषेकंकुर्वीतप्रतिकुंभस्थितोदकैः आपोहिष्ठेतिनवभिःसूक्तेनचततःपरम् इंद्राअंगत्र्यृचेनैवपावमानैःक्रमेणतु उभयंशृणवच्चनस्वस्तिदाविशएकया त्र्यंबकेनचमंत्रेणजातवेदसइत्यृचा समुद्रज्येष्ठाइत्यादिश्चायंतांचत्रिभिःक्रमात् इमाआपत्र्यृचेनैवदेवस्येवेतिमंत्रतः मंत्रेणायतमीशानंत्वमग्नेरुद्रइत्यथ तमुष्टुहीतिमंत्रेणभुवनस्यपितरंतथा यातेरुद्रेतिमंत्रेणशिवसंकल्पमंत्रतः इंद्रत्वावृषभंपंचमंत्रैश्चैवाभिषिंचयेत् धेनुंपयस्विनींदद्यादाचार्यायचभूषणैः सदक्षिणमनड्वाहंप्रदद्याद्रुद्रजापिने महाशांतिंप्रजप्याथब्राह्मणा-

न्भोजयेत्ततः अथास्मत्पितृकृतप्रयोगः देशकालौसंकीर्त्यममपत्न्याः प्रथमरजोदर्शनेऽमुकदुष्टमासादिसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंसनवग्रहमखांशौनकोक्तांशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनमातृकापूजननांदीश्राद्धाचार्यब्रह्मर्त्विग्वरणानिकुर्यात् ऋत्विजश्चाष्टौषट्चत्वारोवा ततः आचार्योगृहेशानदेशेतद्दक्षिणोत्तरयोश्चमहीद्यौरितिभूमिंस्पृष्ट्वा ओषधयः संवदंतइतिद्रोणप्रमाणव्रीहीणांराशित्रयंकृत्वा तत्रकुंभत्रयमाकलशेष्वितिस्थापयेत् सर्वत्रमंत्रावृत्तिः ततः प्रसुवआपइतिनवर्चस्यसूक्तस्यसिंधुक्षित्प्रैयमेधोनद्योजगती कलशेषूदकपूरणेविनियोगः प्रसुवआपइत्यादि याःप्रवतइत्यस्यवासिष्ठोनद्यःशाक्वरी विनियोगःप्राग्वत् गंधद्वारामितित्रिष्वपिगंधम् याओषधीरितिसर्वौषधीः ओषधयःसमितियवान् ततोमध्यकुंभेव्रीहियवमाषतिलकंगुश्यामाकमुद्गान्क्षिप्त्वा गायत्र्याउदुंबरकुशदूर्वारक्तोत्पलचंपकबिल्वविष्णुक्रांतातुलसीबर्हिषशंखपुष्पिणीशतावर्यश्वगंधानिर्गुंडीरक्तपीतसर्षपापामार्गपलाशपनसजीवकप्रियंगुगोधूममर्ब्राह्म्यश्वत्थदधिदुग्धमधुघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरंटकत्रयगुंजावचाभद्रकमुस्ताख्यानिद्वात्रिंशदोषधानिसर्वाणियथासंभवंवाक्षिपेत् ततस्त्रिषुकांडात्कांडादितिदूर्वाः अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीतिसप्तमृदः याःफलिनीरितिफलानि सहिरत्नानीतिपंचरत्नानि हिरण्यरूपइतिहिरण्यंचक्षिपेत् युवासुवासाइतिसूत्रेणवाससावाकलशकंठान्वेष्टयित्वा गंधाक्षतादिभिःकलशान्भूषयेत् ततःकलशत्रयोपरितेनैवक्रमेणसौवर्णराजतंकांस्यमयंताम्रमयंमृन्मयंवायवादिपूरितंपात्रत्रयं पूर्णादर्वीतिमंत्रेणनिधायतदुपरिश्वेतवस्त्रत्रयंन्यस्य तत्रचंदनादिनाष्टदलानि कु

र्यात् तत्रमध्येगायत्र्याविश्वामित्रोभुवनेश्वरीगायत्री भुवनेश्वर्यावाहनेविनियोगः ॐ तत्सवितु० भुवनेश्वरीमावाहयामीतियथाशक्तिसुवर्णनिर्मितांभुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वकंस्थापयेत् तद्दक्षिणकुंभोपरिवस्त्रे इंद्राणीह्वृषाकपिरिंद्राणीपंक्तिः इंद्राण्यावाहनेविनियोगः उत्तरकलशोपरिइंद्रंत्वाविश्वामित्रइंद्रोगायत्री इंद्रावाहनेविनियोगः ततः सूक्तमंत्रैः पूजांकुर्यात् ततोमध्यकुंभेआचार्योष्टसहस्रमष्टशतंवा गायत्रींजप्त्वा श्रीसूक्तंजपेत् ततः एकोऋत्विक्दक्षिणकुंभेरुद्रसूक्तानिजपेत् तानिच कद्रुद्रायेतिनवइमारुद्रायतवसइत्येकादशातेपितरितिपंचदश इमारुद्रायस्थिरधन्वनइतिचतस्रः आवोराजानमित्येकातमुष्टुहीत्येका भुवनस्यपितरंत्र्यंबकमिति अथान्योऋत्विगुत्तरकुंभेएकादशावृत्तिभीरुद्रंशांनइंद्राग्नीइतिसूक्तंजपेत् ततः आचार्यः कुंभपश्चिमेग्निंसंस्थाप्यतदीशान्यांनवग्रहादींस्तत्तन्मंत्रैरावाह्यषोडशोपचारैः संपूज्य तदीशान्यांप्राग्वत्कुंभंसंस्थाप्यतत्रवरुणमावाह्यान्वाधानंकुर्यात् चक्षुषीचआज्येनेत्यंतमुक्त्वानवग्रहान्प्रत्येकंप्रतिद्रव्यमष्टसंख्याभिः समित्तिलाज्याहुतिभिः अधिदेवताः प्रत्यातिदेवताश्चप्रत्येकंप्रतिद्रव्यंचतुःसंख्याभिः समित्तिलाज्याहुतिभिः भुवनेश्वरीमष्टसहस्राष्टशताष्टोत्तरशतान्यतरसंख्याभिर्दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिरिंद्राणीमिंद्रंचप्रतिद्रव्यमष्टाविंशतिसंख्याभिर्दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिः शेषेणस्विष्टकृतपूर्णपात्रनिधानांतंकृत्वा गोदुग्धपायसंश्रपयित्वाज्यभागांतंकुर्यात् ततोयजमानोदक्षिणतउपविश्यत्यागंकुर्यात् आचार्योहोमानंतरंस्विष्टकृदादिप्रायश्चित्तहोमांतंकृत्वादिक्पालनवग्रहभुवनेश्वरींद्राणींद्रक्षेत्रपालेभ्योमाषभक्तबलींस्तत्तन्मंत्रैर्दत्वासमुद्रादूर्मिरित्यृचेनपूर्णा

हुतिंहुत्वाप्रणीताविमोकादिकर्मशेषंसमाप्यसर्वकलशोदकेनधृतनववस्त्रंयजमानंतादृशींचभार्यांसलिंगभिषिंचेदेतैर्मंत्रैः आपोहिष्ठेतिनवचएकाहिदयतइत्येकाग्निमिष्टुंदेवेतिसप्तउभयंशृणवच्चनः स्वस्तिदाविशस्त्र्यंबकंजातवेदसेसमुद्रज्येष्ठाइतिचतस्त्रः आयंतामितितिस्त्र इमा आपइतितिस्त्रः देवस्यत्वेत्यापस्तंबशाखागतास्त्रयः तमीशानंत्वमग्नेरुद्रः तमुष्टुहिभुवनस्यपितरंयातेरुद्रयज्ञायतइतिषट् इंद्रत्वावृषभंवयमितिपंचसुरास्त्वामभिषिंचंत्वित्यादयश्चपौराणाः यजमानोग्निमाचार्यादींश्चसंपूज्याचार्यायधेनुंरुद्रजापिनेसदक्षिणमनड्वाहं यथाशक्तिभूयसींदक्षिणांदद्यात् ततोभुवनेश्वर्यादीनांग्रहाणांचोत्तरपूजांकृत्वोत्तिष्ठ॰ यांतुदेवेतिविसृज्याचार्यायप्रतिपाद्याग्निंसंपूज्यगच्छगच्छेतिविसृज्य शांतीः पाठयित्वा भुवनेश्वर्यादीनांग्रहाणांचप्रीतयेत्रींस्त्रीन्ब्राह्मणान्भोजयित्वासुहृद्युतोभुंजीत इतिदुष्टरजोदर्शनशांतिः बौधायनसूत्रेऋतुशांतिंव्याख्यास्यामस्तिथिवारनक्षत्रलग्नदोषशांत्यर्थंचतुर्थेह्निपंचमेह्निवाशांतिस्नानंप्रकुर्वीत देवालयेगृहेवाप्रस्थाष्टाभिर्धान्यैस्तदर्धैस्तंदुलैस्तदर्धैस्तिलैश्चारत्निमात्रंचतुरस्त्रंकृत्वामध्येनलिनमुल्लिख्यकुशैर्दूर्वाभिःप्रच्छाद्यतस्मिन्तन्तुवेष्टितंकुंभंनिधायापोवाइदं॰ सर्वमित्येतेनानुवाकेनाब्लिंगाभिश्चकुंभमुदकैः पूरयित्वाकूर्चमंतर्धायपंचपल्लवान्पंचत्वचोनिक्षिप्यकपित्थाश्वत्थपालाशबिल्वोदुंबरंचनवरत्नंचनिक्षिप्य नववस्त्रयुग्मेनाच्छाद्यनारीकेरफलेनापिधायबिल्वपल्लवैर्मृतपल्लवैश्चावकीर्यपुरुषंपुंडरीकाक्षंध्यात्वा गंधपुष्पधूपदीपैः कुंभमभ्यर्च्याथश्रोत्रियांश्चबहुश्रुतानष्टचतुरोवाऋत्विजोवरणपूर्वमभ्यर्च्याचार्यंचतंकुंभमन्वारभ्यवैष्णवींगायत्रींसहस्त्राष्टकंशताष्टकंवावदत्तोगायत्रींचवेदादीनापोहिष्ठा-

मयोभुवइतितिसृभिर्हिरण्यवर्णाः शुचयः पावकाइत्येतमनुवाकं पवमानः सुवर्जनइत्येतमनुवाकंपुरुषसूक्तंऋचांप्राचीमित्यनेनानुवाकेनाथालं
कृतांपत्नीमुरुविष्टरेतृण आसीनामापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाः शुचयः पावकाइति चतसृभिः पवमानः सुवर्जनइत्येतेनानुवाके
नऋत्विजः प्रत्येकमाशीर्वादपुरःसरं स्नापयेयुस्ततोनारी पंचगव्यंप्राशयित्वा यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके प्राशनात्पंचगव्यस्य दहत्व
ग्निरिवेंधनमितिशम्रचोदेशेस्थंडिलंकल्पयित्वालौकिकाग्निंप्रतिष्ठाप्यस्वगृह्योक्तविधिनाग्निमुखांतंकृत्वाविष्णुसूक्तेनशताष्टकसंख्यया पलाशस-
मिधोहुत्वैवंब्रह्मसूक्तेनान्नंरुद्रसूक्तेनाज्यंतेषामष्टादशकृत्वोथायुष्यहोमंघृतसूक्तेनहुत्वा ततोनक्षत्रहोमंतत्तन्मंत्रेण तस्य चतुर्दश कृत्वः पूर्व
वत्समिदन्नाज्यैस्त्र्यंबकंयजामहइति तिलहोमंशताष्टकाहुतीरुपजुहुयात्स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानाद्दक्षिणांदद्यादाचार्यायविशेष-
तस्ततः पुण्याहवाचनंकृत्वा ततोनारीपापात्प्रमुच्येतेत्याहभगवान्बौधायनः अथकन्यायाबालवैधव्यहेतुलक्षणग्रहयोगशान्तिः
मार्कण्डेयः बालवैधव्ययोगेतुकुंभद्रुप्रतिमादिभिः कृत्वालग्नंततः पश्चात्कन्योद्वाह्येतिचापरे तत्रपुनर्भूदोषाभावउक्तोविधानखंडे स्वर्णद्रुपि
प्पलानांचप्रतिमाविष्णुरूपिणी तयासहविवाहेतुपुनर्भूत्वंनजायते सूर्योऽरुणसंवादे विवाहात्पूर्वकालेचचंद्रताराबलान्विते विवाहोक्तेनमंत्रेणकुं
भेनसहचोद्वहेत् सूत्रेणवेष्टयेत्पश्चाद्दशतंतुविधानतः कुंकुमालंकृतंदेहंतयोरेकांतमंदिरे ततःकुंभंचनिःसार्यप्रभज्यसलिलाशये ततोभिषेचनंकु
र्यात्पंचपल्लववारिभिः कुंभप्रार्थनातत्रैव वरुणांगस्वरूपाय जीवनानांसमाश्रय पतिंजीवयकन्यायाश्चिरंपुत्रसुखंकुरु देहिविष्णोवरंदेवकन्यापाल-

यदुःखसः सालंकारवस्त्राढ्यांवरायप्रतिपादयेत् इतिकुंभविवाहः मूर्तिदानमपितत्रैवोक्तं ब्राह्मणंसाधुमामंत्र्यसंपूज्याविधिवार्हणैः तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजां शुद्धवर्णसुवर्णेनवित्तशक्त्याथवापुनः निर्मितांरुचिरांशंखगदाचक्राब्जसंयुतां दधानांवाससीपीतेकुमुदोत्पलमालिनीं सदक्षिणांचतांदद्यान्मंत्रमेतमुदीरयेत् यन्मयाप्राग्जनुषिघ्नंत्यापतिसमागमं विषोपविषशस्त्राद्यैर्हतोवातिविरक्तया प्राप्यमानंमहाघोरंयशःसौख्यधनापहं वैधव्याद्यतिदुःखौघनाशायसुखलब्धये बहुसौभाग्यलब्ध्यैचमहाविष्णोरिमांतनुं सौवर्णींनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज अनघाअहमस्मीतित्रिवारंप्रजपेदिति एवमस्त्वितितस्योक्तंगृहीत्वास्वगृहंविशेत् ततोवैवाहिकंकुर्याद्विधिंदातामृगीदृशः अथार्कविवाहः अथतृतीयमानुषीविवाहनिषेधात्तदर्थमर्कविवाहउच्यते मात्स्येकश्यपः उद्वहेद्व्रतिसिद्ध्यर्थंतृतीयांनकदाचन मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीं नश्यत्येवनसंदेहोगर्गस्यवचनंयथा संग्रहे तृतीयायदिचोद्वाहेत्तर्हिसाविधवाभवेत् चतुर्थादिविवाहार्थंतृतीयेर्कंसमुद्वहेत् आदित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे शुभेदिनेवापूर्वाह्णेकुर्यादर्कविवाहकं ब्राह्मे ग्रामात्प्राच्यामुदीच्यांवासपुष्पफलसंयुतं परीक्ष्ययत्नतोहस्तात्स्थंडिलादियथाविधि कृत्वार्कंपुरतस्तिष्ठन्प्रार्थयेतद्विजोत्तमाः त्रिलोकवासिसप्ताश्वछाययासहितोरवे तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु तत्राध्यारोप्यदेवेशंछाययासहितंरविम् वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणैवपूजयेत् तन्मंत्र आकृष्णेनेति चतुर्थेदिवसेऽतीतेपूर्ववत्तांप्रपूजयेत् विसृज्यहोममग्निंचउद्वहेन्मानुषींपरां व्यासः सपुष्पफलशाखैकमर्कगुल्मंसमाश्रयेत् अर्ककन्याप्रदानार्थमाचार्यंकल्पयेत्पुरा अर्कसन्निधिमागत्यतत्रस्व

स्त्यादिवाचरेत् नांदीश्राद्धेहिरण्येनअष्टवर्गान्प्रपूजयेत् पूजयेन्मधुपर्केणवरंविप्रस्यहस्ततः यज्ञोपवीतंवस्त्रंचहस्तकर्णादिभूषणं उष्णीषगंधमाल्यादिवरायास्मैप्रदापयेत् अर्कंप्रदक्षिणंकुर्वन्नूजपेन्मंत्रमिमंबुधः ममप्रीतिकरायेयंमयासृष्टापुरातनी अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षतु पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेनमंत्रवित् नमस्तेमंगलेदेविनमः सवितुरात्मने त्राहिमांकृपयादेविपत्नीत्वंमेइहागता अर्कत्वंब्रह्मणासृष्टः सर्वप्राणिहिताय च वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः तृतीयोद्वाहजंपापंमृत्युंचाशुविनाशय ततश्चकन्यावरणंत्रिपुरुषंकुलमुच्चरेत् आदित्यःसविताचार्यः पुत्रीपौत्रीचनप्त्रिका गोत्रंकाश्यपमित्युक्तंलोकेलौकिकमाचरेत् मुहूर्तेर्कंनिरीक्षेतस्वस्तिसूक्तमुदीरयेत् आशीर्भिःसहितःकुर्यादाचार्यप्रमुखैर्द्विजैः अथाचार्यंसमाहूयविधिनातन्मुखाच्चताम् प्रतिगृह्यततोहोमंगृह्योक्तविधिनाचरेत् अर्ककन्यामिमांविप्रयथाशक्तिविभूषिताम् गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय इतिदानमंत्रः अंजल्यक्षतकर्माणिकृत्वाकंकणपूर्वकम् यावत्पंचाहृतंसूत्रंतावदर्कंप्रवेष्टयेत् स्वशाखोक्तेन मंत्रेणगायत्र्यावाऽथवाजपेत् पंचीकृत्यपुनःसूत्रंस्कंदेबध्नातिमंत्रतः बृहत्सामेतिमंत्रेणसूत्ररक्षांप्रकल्पयेत् अर्कस्यपुरतःपश्चाद्दक्षिणोत्तरतस्तथा कुंभांश्चनिक्षिपेत्पश्चादाग्नेयादिचतुष्टये सवस्त्रंप्रतिकुंभंचत्रिःसूत्रेणैववेष्टयेत् हरिद्रागंधसंयुक्तंपूजयेच्छीतलंजलम् प्रतिकुंभंमहाविष्णुंसंपूज्यपरमेश्वरम् पाद्यार्घ्यादिनिवेद्यांतंकुर्यान्नाम्नैवमंत्रवित् पुनःप्रदक्षिणंकृत्वामंत्रमेतमुदीरयेत् मयाकृतमिदंकर्मस्थावरेषुजरायुणा अर्कापत्यानिनोदेहितत्सर्वंक्षंतुमर्हसि इत्युक्त्वाशांतिसूक्तानिजप्त्वातंविसृजेत्पुनः गोयुग्मंदक्षिणांदद्यादाचार्यायचभक्तितः इतरे-

भ्योपिविप्रेभ्योदक्षिणांचापिशक्तितः तत्सर्वंगुरवेदद्यादंतेपुण्याहमाचरेत् शौनकः तृतीयेस्त्रीविवाहेतुसंप्राप्तेपुरुषस्यतु अर्कविवाहंवक्ष्यामिशौनकोक्तविधानतः अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत् नांदीश्राद्धंप्रकुर्वीतस्थंडिलंचप्रकल्पयेत् अर्कमभ्यर्च्यसौर्याचगंधपुष्पाक्षतादिभिः सौरीआकृष्णेनेति स्वयंचालंकृतस्तद्वद्वस्त्रमाल्यादिभिःशुभैः अर्कस्योत्तरदेशेतुसमन्वारब्धएतया एलयाअर्ककन्यया उल्लेखनादिकंकुर्यादाधारांतमतःपरम् आज्याहुतिंचजुहुयात्संगोभिरनयैकया यस्मैत्वाकामकामायेत्येतयर्चाततःपरम् व्यस्ताभिश्चसमस्ताभिस्ततस्त्रस्विष्टकृद्धयेत् परिषेचनपर्यंतमयाश्चेत्यादिकक्रमात् अथप्रयोगः शुभदिनेग्रामात्प्राच्यामुदीच्यांवार्कसमीपंगत्वा देशकालौसंकीर्त्यममभावितृतीयमानुषीपरिणयनस्यशुभतासिद्ध्यर्थमर्कविवाहंकरिष्यइतिसंकल्प्यगणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यवरणानिकुर्यात् ततोवरोर्कपुरतस्तिष्ठन्सूर्यंप्रार्थयेत् त्रिलोकवासिन्सप्ताश्वछायायासहितोरवे तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु ततोर्कवृक्षेछायासहितंसूर्यं आकृष्णेनेतिमंत्रेणषोडशोपचारैःपूजयेत् तत्रवस्त्रदानकालेवस्त्रेणतंतुभिश्चार्कमावेष्टयेत् अभिषेकेआपोहिष्ठेत्यादयोमंत्राः ततआचार्योवरंमधुपर्कयज्ञोपवीतवस्त्रभूषणोष्णीषगंधमाल्यैःपूजयेत् ततोवरोर्कंप्रदक्षिणीकुर्वन् ममप्रीतिकरायेयंमयासृष्टा पुरातनी अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षतुइतिजपेत् पुनःप्रदक्षिणंकुर्वन् नमस्तेमंगलेदेविनमःसवितुरात्मजे त्राहिमांकृपयादेविपत्नी त्वंमेइहागता अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः तृतीयोद्वाहजंदोषंमृत्युंचाशुविनाशयेतिजपेत् ततः

कन्यांप्रयच्छेत्याचार्यंप्रार्थयेत् ततआचार्यः काश्यपावत्सारनैध्रुवेतित्रिप्रवरान्वितकाश्यपगोत्रोत्पन्नां आदित्यस्यप्रपौत्रीं सवितुः पौत्रीं ममाऽमुकशर्मणः पुत्रीं अर्कनाम्नीं कन्यां अमुकप्रवरान्वितामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकनाम्नेवरायदास्येइतिवाग्दानंकुर्यात् ततोवरः सुमुहूर्तेर्ककन्यांनिरीक्ष्य स्वस्तिनोमिमीतेतिसूक्तंपठेत् ततः आचार्योवाग्दानवद्गोत्राद्युच्चार्यइमामर्ककन्यांतुभ्यमहंसंप्रददेनममेति वरहस्ते जलंदत्वा अर्ककन्यामिमांविप्रयथाशक्तिविभूषिताम् गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रयेतिमंत्रंपठेत् ततआचार्योवरस्यकंकणबंधं सूत्रेणकृत्वार्ककन्याप्रतिनिधित्वेनाक्षतारोपणंतदुक्तमंत्रैः कुर्यात् वरोप्यर्केतदुक्तमंत्रैरक्षतारोपणंकुर्यात् ततोवरोगायत्र्यार्कंसूत्रेणपंचकृत्व आवेष्ट्यतेनसूत्रेणबृहत्सामेतिमंत्रेणस्कंधेबध्नीयात् ततोवरआचार्योवार्कस्याष्टदिक्षु अष्टौकलशान्संस्थाप्यकलशकंठान्वस्त्रेणसूत्रेणवावेष्ट्य हरिद्रां निक्षिप्य सर्वत्र इदं विष्णुरितिविष्णुंसंपूज्यार्कोत्तरेग्निंप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानंबृहस्पतिमाग्निमग्निंवायुंसूर्यंप्रजापतिंचाज्येनेत्युक्त्वाशेषेणस्विष्टकृतमित्याद्युक्त्वाज्यभागांते संगोभिरांगिरसइतिबृहस्पतयेहुत्वा यस्मैत्वाकामकामायवयंसम्राड्यजामहे तमस्मभ्यंकामंदत्वात्थेदंत्वंघृतंपिबेत्यग्नयेव्यस्तसमस्तव्याहृतिभिर्हुत्वाकर्मशेषंसमापयेत् ततोवरोममप्रीतिकरेतिमंत्रेणार्कंत्रिःप्रदक्षिणीकृत्यमयाकृतमिदंकर्मस्थावरेषुजरायुणा अर्कापत्याग्निनोदेहितत्सर्वंक्षंतुमर्हसीतिप्रार्थयेत् ततःशांतिसूक्तानिपठित्वाऽर्कस्थसूर्यंविसृज्याचार्याय गोयुग्मं यथाशक्तिभूयसींचदत्वा विष्णुप्रतिमामाचार्यायप्रतिपाद्यपुण्याहवाचनंकुर्यात् ततः पंचमेऽह्निपुनरर्केसूर्यंपूर्ववत्संपूज्य विसृज्यमानुषींपरिण

येत् इतिदिनकरभट्टकृतेशांतिसारेर्के विवाहप्रयोगः इदानींजन्मनक्षत्रातिथिदोषादिशांतिकं मूलव्याख्याप्रयोगाभ्यांब्रूतेदिनकरः सुधीः तत्रादौबहुशांत्यंगत्वाद्गोमुखप्रसवोभिधीयते प्रयोगपारिजातेगर्गः प्रणिपत्यरविंवक्ष्येप्रायश्चित्तमनुस्मरन् सर्वारिष्टविनाशाययदुक्तंज्योतिरर्णवे पित्रोरिष्टेसुतारिष्टेमात्ररिष्टेतथैवच पित्ररिष्टेपित्ररिष्टसूचकनक्षत्राद्युत्पत्तौ एवमग्रेपिप्रायश्चित्तंतदाकुर्यात्तत्तद्दोषस्यशांतये पूषाश्विनोगुरौसार्पमघाचित्रेंद्रमूलभे एषुऋक्षेषुजातस्यकुर्याद्गोजननंतथा अत्रप्रायश्चित्तंमूलादिशांतिकंगोजननंचकुर्यादितिसमुच्चयोविधीयते अन्यथा गोजननस्यानिष्टनिरासार्थत्वेनशांत्याविकल्पः स्यात् नचादृष्टार्थत्वात्समुच्चयः एकप्रकरणाधीतत्वाभावात् अन्यथादिनक्षयादिनिरसनार्थकदलीदानादेरपिसमुच्चयापत्तेः तत्रापिशांतिकांतरात्पूर्वंपश्चाद्वागोजननंकार्यम् जन्मर्क्षेवाद्विजन्मर्क्षेसुभवारेशुभेदिने कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकम् गोमयेनोपलिप्याथगृहस्येशानभागके पंकजंकर्णिकायुक्तंरजोभिः श्वेतवर्णकैः व्रीहींस्तत्रविनिक्षिप्ययथावित्तानुसारतः नवमूर्पंचतन्मध्येरक्तवस्त्रंप्रसारयेत् स्थापयित्वाशिशुंतत्रपुनः सूत्रेणवेष्टयेत् प्राङ्मुखंतमवाक्पादंतिलगर्भगतंशिशुं गोमुखंदर्शयित्वाथपुनर्जातंतुगोमुखात् शिशुमभिगोमुखंदर्शयित्वेत्यर्थः विष्णुर्योनीतिसूक्तेनगव्येनस्नापयेच्छिशुम् गव्येनपंचगव्येन गवामंगेषुमंत्रेणगवामंगेषु संस्पृशेत् गोवामांगेषुसंस्पृशेदितिवापाठः विष्णोः श्रेष्ठेतिमंत्रेणगोप्रसूतंतुबालकम् आचार्यस्तुसमादायपश्चान्मात्रेददेत्तदाज्योतिर्निबंधेतु साचार्यस्तुसमादायपश्चान्मात्रेददेऽसितेतिपाठः माताजघन्यभागस्थाशिशुमानीयतन्मुखात् तन्मुखाद्गोमुखात् ततः पित्रेतदादद्यात्ततोमा

त्रेप्रदापयेत् वस्त्रंस्थाप्यपितायास्यपुत्रस्यमुखमीक्षयेत् स्थाप्यनिष्काश्य गोमूत्रंगोमयंक्षीरंदधिसर्पिश्चसंयुतम् आपोहिष्ठादिभिर्मंत्रैरभिषिंच
ततःशिशुम् मूर्ध्निचाघ्रायतंपुत्रंतन्मंत्रेणतदापिता अंगादंगात्संभवसिहृदयादधिजायसे आत्मावैपुत्रनामासिसजीवशरदःशतम् तन्मंत्रेणांगादं
गादित्यनेन मूर्द्धनिभिरवघ्रायतंशिशुंस्थापयेत्ततः पुण्याहंवाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः अत्रस्वशाखोक्तमार्गेणपुण्याहवाचनंकुर्यादितिकं
चित् पुण्याहशब्दमात्रंवाचयेदित्यपरे दरिद्रायायविप्रायतांगामभ्यर्च्यदापयेत् गोवस्त्रस्वर्णधान्यानिदद्यादर्कादितःक्रमात् यथाशक्तिधनंदद्या
द्ब्राह्मणेभ्यस्तदापिता ततोहोमंप्रकुर्वीतस्वस्वशाखोक्तमार्गतः होमंहोमसंबंध्युल्लेखनादिहोमस्यवक्ष्यमाणत्वात् उल्लेखनादिकंकृत्वाआज्य
भागांतमाचरेत् होमस्यैशानदिग्भागेधान्योपरिशुभंघटम् होमस्यहोमदेशस्य पंचगव्यंघटेस्थाप्यतिलांस्तत्रविनिक्षिपेत् क्षीरद्रुमकषायांश्चपं
चरत्नानिनिक्षिपेत् कषायोनिर्यासः वस्त्रयुग्मेनसंछाद्यगंधादिभिरथार्चयेत् विष्णुंवरुणमभ्यर्च्यप्रतिमांचविधानतः प्रतिमांरूपम् यत
इंद्रादिभिर्मंत्रैःकुंभंस्पृश्याभिमंत्रयेत् यतइंद्रेतिषडृचस्यसूक्तस्यग्रहणम् आश्वलायनेनयतइंद्रभयामहइतिसूक्तशेषमितिभयनिरसना-
र्थत्वेनषडृचस्योक्तत्वात् दधिमध्वाज्ययुक्तेनहोमंकुर्यात्प्रयत्नतः युक्तेनेतिभावेक्तः दधिमध्वाज्यानांयोगेनेत्यर्थः आपोहिष्ठेतितिसृभिर
प्सुमेसोमइत्यथ तद्विष्णोःपरमंपदमर्स्यीभ्यामितिसूक्ततः ऋग्भिराशिःप्रत्यृचंचाऽष्टाविंशतिसंख्यया अशक्तावष्टसंख्यंवादधिमध्वाज्यसंयु
तं आदित्यादिग्रहाणांचहोमंकुर्यात्समंत्रकं ग्रहाणांचहोमंदधिमध्वाज्येनेत्यन्वयः अन्यथापुनर्दध्यादिग्रहणस्यवैयर्थ्यापत्तेः इतिगोमुखप्रस

वविधिः अथप्रयोगः देशकालौसंकीर्त्यास्यबालकस्यामुकनक्षत्रोत्पत्तिसूचितारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंगोमुखप्रसवंकरिष्ये गणेशंसंपूज्याचार्यंवृणुयात् आचार्यःश्वेतपंकजमध्येयथाशक्तिव्रीहीन्निक्षिप्यतेषुशूर्पंनिधायशूर्पेरक्तवस्त्रंप्रसार्यतिलान्विकीर्यप्राङ्मुखंशिशुंनिधायसूत्रेणशूर्पंवेष्टयित्वाशिशुसमीपेगोमुखमानीयप्रसवंभावयित्वाविष्णुर्योनिमितिसूक्तेनमीलितेनपञ्चगव्येनशिशुंस्नापयित्वागवामंगेष्वितिमंत्रेणगोवामांगेषुसर्वांगेषुचास्पृशेत् ततोविष्णोश्रेष्ठेनेतिमंत्रेणाचार्यःशिशुमादायमात्रेदद्यात् मातापित्रेपितामात्रेदत्वावस्त्रंसंमार्यपुत्रमीक्षेत ततःआचार्यःशिशुंपंचगव्येन आपोहिष्ठेतितिसृभिरभिषिंचेत् ततःपिताअंगादंगादितिशिशुंमूर्द्ध्नि त्रिरवघ्रायमात्रेदत्वास्यगोमुखप्रसवकर्मणःपुण्याहंभवंतोब्रुवंत्वित्युक्त्वातान्वाचयित्वागामाचार्यायदत्वाग्रहप्रीत्यर्थंप्रत्येकंगोवस्त्रस्वर्णधान्यानिदत्वायथाशक्तिभूयसींदक्षिणांदद्यात् ततःआचार्योग्निंग्रहांश्चप्रतिष्ठाप्यान्वाधानंकुर्यात् तत्रप्रधानं आपोहिष्ठेतितिसृभिरप्सुमेइत्यनयाचप्रत्यृचमष्टशताष्टाविंशत्यष्टसंख्याभिःविष्णुंतद्विष्णोरित्यृचातावतीभिर्यक्ष्मग्रहणमक्षीभ्यामितिसूक्तेनप्रत्यृचंतावतीभिर्ग्रहांश्चतावतीभिर्दधिमध्वाज्याहुतिभिःशेषेणस्विष्टकृतमित्याद्याज्यभागांतंकृत्वाग्नेरीशान्यांकुंभंसंस्थाप्यपूर्णपात्रोपरितद्विष्णोरितिविष्णुप्रतिमांतत्वायामीतिवरुणंचाभ्यर्च्यकुंभंस्पृष्ट्वावक्ष्यमाणमंत्रान्जपेत् यतइंद्रेतिषण्णांकण्वपुत्रःप्रतिरथइंद्रोबृहतीछंदः जपेविनि॰ ततोमीलितैर्दधिमध्वाज्यैर्होमंकुर्यात् तत्रआपोहिष्ठेतितिसृणांसिंधुद्वीपअंबरीषआपोगायत्री अप्सुमेमेधातिथिरापोनुष्टुप् तद्विष्णोर्मेधातिथिर्विष्णुर्गायत्री अक्षीभ्यामितिषण्णांविवृहायक्ष्महानुष्टुप् एभिर्मंत्रैर्नवग्रहमंत्रै

श्चहुत्वास्विष्टकृदादिकर्मशेषंसमाप्यब्राह्मणान्भोजयेत् इतिगोमुखप्रसवप्रयोगः अथकृष्णाचतुर्दशीजातशांतिः पारिजातेमदनरत्नेगर्गः मंदरेतुसुखासीनंगर्गंमुनिवरंप्रभुम् नमस्कृत्यतुपप्रच्छशौनकोमुनिपुंगवः शांतिकर्माणिसर्वाणिततोजानाम्यहंपुरा अधुनाश्रोतुमिच्छामिकृष्णपक्षचतुर्दशीं दिवावायदिवारात्रौप्रसूतेःकिंफलंवद कृष्णपक्षचतुर्दशीमभिलक्षीकृत्यप्रसूतेःफलंवदेत्यर्थः कृष्णपक्षेचतुर्दश्यांप्रसूतेःषड्विधंफलं चतुर्दशींचषड्भागांकुर्यादादौशुभंस्मृतं द्वितीयेपितरंहंतितृतीयेमातरंतथा चतुर्थेमातुलंहंतिपंचमेवंशनाशनं षष्ठेतुधनहानिःस्यादात्मनोवंशनाशनं तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानत आचार्यंवरयेद्धीमान्पुत्रदारसमन्वितं सर्वालंकारसंयुक्तंसर्वलक्षणसंयुतं ब्रह्माणमृत्विजश्चैवस्वस्तिवाचनपूर्वकं रुद्राधिदेवतातस्याःकर्षमात्रसुवर्णतः तदर्द्धार्द्धेनवाकुर्याद्वित्तशाठ्यविवर्जितः तस्याश्चतुर्दश्याःप्रतिमामाह प्रतिमांकारयेच्छक्त्यासर्वलक्षणसंयुताम् वृषभेचसमासीनंवरदाभयपाणिनम् शुद्धस्फटिकसंकाशंश्वेतमाल्यांबरावृतम् त्र्यंबकेनतुमंत्रेणपूजांकुर्याद्विधानतः स्थापयेच्चतुरःकुंभांश्चतुर्दिक्षुयथाविधि आग्नेयीमारभ्यस्थापनं आग्नेयकुंभमारभ्येत्यग्रेदर्शनात् पुण्यतीर्थजलोपेतान्धान्यस्योपरिविन्यसेत् तन्मध्येस्थापयेत्कुंभंशतछिद्रसमन्वितं पंचमृत्पंचरत्नानिपंचत्वक्पंचपल्लवान् पंचधान्यंसुवर्णंचतत्तन्मंत्रैर्विनिक्षिपेत् शतौषधानिनिक्षिप्यश्वेतवस्त्रैश्चवेष्टयेत् सुरभीणिचपुष्पाणिश्वेतानिपरिवेष्टयेत् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः आवाह्यवारुणैर्मंत्रैरनेनचविधानतः वक्ष्यमाणैर्वारुणैर्मंत्रैर्वरुणम् अनेनोक्तेनसमुद्रादींश्चेत्यर्थः इमंमेवरुणेत्यनयातत्वायामीत्यृचातथा त्वन्नोअ

ग्नेत्यनयासत्वन्नइतिमंत्रतः आग्नेयकुंभमारभ्यपूजांकुर्याद्यथाक्रमम् आनोभद्राख्यसूक्तंचभद्राअग्नेश्चसूक्तकं जस्त्वापुरुषसूक्तंचकद्रुद्रंचक्रमाज्जपेत् ईश्वरस्याभिषेकंचग्रहपूजांचकारयेत् ईश्वरस्यपूर्वस्थापितेश्वरप्रतिमायाइत्यर्थः पूजाकर्मसुनिर्वर्त्यहोमंकुर्याद्विधानतः कुर्याद्वाधारपर्यंतंस्वगृह्योक्तविधानतः आघारांतत्वोक्त्याचक्षुषीनइतिकेचित् समिदाज्यचरूंश्चैवतिलमाषांश्चसर्षपैः सर्षपैःसहितोक्त्यासर्षपाणांपृथक्द्रव्यत्वं समिधोविशिनष्टि अश्वत्थप्लक्षपालाशसमिद्भिःखादिरैःशुभैः अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा अष्टाविंशतिमेतैश्चहोमंकुर्यात्पृथक्पृथक् त्र्यंबकेनैवमंत्रेणतिलान्व्याहृतिभिः क्रमात् ग्रहाएवंचहोतव्याअस्मदुक्तविधानतः एवंक्रमेणहोतव्यंहोमशेषंसमापयेत् सर्वालंकारयुक्तानांत्रयाणामभिषेचनं त्रयाणांमातापितृबालानां चतुर्भिःकलशैरद्भिर्दृढकुंभसमान्वितैः दृढकुंभःशताच्छिद्रः धौतांबराणिधृत्वाथकुर्यादाज्यावलोकनं पूर्णाहुतिंचजुहुयाद्यजमानःसमाहितः तत्सर्वंपरयाभक्त्याईश्वरायनिवेदयेत् सर्वालंकारसंयुक्तांसवत्सांगांपयस्विनीं प्रतिमांवस्त्रयुगमंचआचार्यायनिवेदयेत् ईश्वरप्रीतयेभक्त्याकुर्याद्ब्राह्मणभोजनं एवंयःकुरुतेशांतिंसर्वपापैःप्रमुच्यते सर्वान्कामानवाप्नोतिचिरंजीवीसुखीभवेत् इतिचतुर्दशीशांतिविधिः अथप्रयोगः नामकरणात्पूर्वंशुभेह्नि अस्यबालकस्यकृष्णचतुर्दशीजन्मसूचितारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंकृष्णचतुर्दशीजननशांतिंकरिष्येइतिसंकल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् षड्भागचतुर्दश्याद्वितीयतृतीयांशयोरुत्पत्तौगोमुखप्रसवोपि ततःआचार्यः सर्षपान्विकीर्यभूमिंप्रोक्ष्याग्नेयीमारभ्यविदिक्षुचतुरःकुंभान्मध्येशताच्छिद्रंचसं-

स्थाप्यतस्मिन्पंचमृदः पंचपल्लवान् पंचरत्नानिपंचत्वचः पंचधान्यानिसुवर्णशतौषधानिचप्रक्षिप्यत्रिभिर्वस्त्रैर्माल्यादिभिश्चवेष्टयित्वापूर्णपात्रोपरिकर्षंतद्वर्णार्द्धकृतांरुद्रप्रतिमांत्र्यंबकमितिमंत्रेणसंपूज्यसर्वेसमुद्राइतिकुंभमभिमंत्र्याग्नेयकलशेइमंमेवरुणेतिनैर्ऋततत्त्वायामीतिवायव्येत्वन्नोअग्नेईशानेसत्वंनइतिवरुणंसंपूज्याग्नेयादिकलशेष्वानोभद्राअग्नेसहस्रशीर्षाकद्रुद्रायेतिसूक्तानिक्रमेणजपेत् ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानं त्र्यंबकंअश्वत्थप्लक्षपलाशखादिरसमिदाज्यचरुसर्षपयुततिलमाषैः प्रत्येकमष्टसहस्राष्टशताष्टाविंशत्यन्यतरसंख्ययात्र्यंबकमितिमंत्रेणप्रजापतिंसमस्तव्याहृतिभिस्तिलद्रव्येणतथैवसंख्ययाशेषेणास्विष्टकृतमित्यादिबलिदानांतेशतच्छिद्रगतैश्चतुष्कलशोदकैर्ग्रहकलशोदकेनसाचार्यत्विजोयजमानमभिषिंचेयुः यजमानोधौतवाससीपरिधायसपरिवारोरूपंरूपमित्याज्यमवलोक्यतत्पात्रंसदक्षिणंविप्रायदत्वापूर्णाहुतिंहुत्वाकृतंहोमादिकर्मरुद्रायसमर्प्याचार्यायसोपस्करांगांवस्त्रयुग्मंचदत्वाकृत्विग्भ्योदक्षिणांदत्वाब्राह्मणान्भोजयेत् इतिदिनकरभट्टकृतेशांतिसारेकृष्णचतुर्दशीशांतिप्रयोगः अथसिनीवालीकुहूशांतिः कुह्वादिशांतेर्दर्शशांत्यासमुच्चयः यापूर्वामावास्यासासिनीवालीयोत्तरासाकुहूर्यापर्यस्तमियादभ्युदयादितिसातिथिरितिबह्वृचब्राह्मणभेदोक्तेः अथसिनीवालीकुह्वोर्दर्शेचोक्तयोःशांत्योर्व्यवस्थाछंदोगपरिशिष्टभाष्येचतुर्दश्यंतेअमायाश्चाष्टावितिनवप्रहरश्चंद्रस्यक्षयकालःचतुर्दश्यष्टमेयामेक्षीणोभवतिचंद्रमाः अमावास्याष्टमेयामेपुनःकिलभवेदणुरितिवाक्यात् अत्रेंदुराद्येप्रहरेवतिष्ठतेचतुर्थभागोनकलावशिष्टः तदंतमेवक्षयमेतिकृष्णमेवंज्योतिश्चक्रविदोवदंतीतिवाक्यात् एवंचतुर्दश्यंत्यामाद्ययाम

योरणुश्चंद्रः शास्त्रस्यचक्षुषोगोचरोभवति सकालोदृष्टचंद्रत्वात्सासिनीवाली अमांत्ययोर्यामयोः शास्त्रस्यचक्षुषोगोचरइतिक्षणश्चंद्रः सकालः कुहूः मध्यमाःपंचयामादर्शाइतिव्यवस्थयाशांतिव्यवस्थेति परेतुचतुर्दशीमात्रयुक्तेह्नोरात्रेवर्तिन्यमासिनीवाली प्रतिपन्मात्रयुतेतिकुहूः यामत्रयस्पर्शिमध्यमाह्नोरात्रवर्तिन्यमादर्शः तस्मिंश्चतुर्दशीप्रतिपदोःस्पर्शात्तेनोभयलक्षणेनाक्रांतत्वात् तथाचभवतांवामदर्शः केवलचतुर्दशीकेवलप्रतिपद्युक्तत्वाभावात्तुदर्शशांतिप्राप्तिरितियुक्तमाहुः प्रयोगपारिजातेउत्तरगार्ग्यः सिनीवाल्यांप्रसूतास्यात्तस्यभार्यापशुस्तथा गजाश्वमहिषीचैवशक्रस्यापिश्रियंहरेत् येसंतिसकलाश्चान्येस्वप्रसादोपजीविनः वर्जयेत्तानशेषांस्तुपशुपक्षिमृगादिकान् सिनीवालीकुहूत्पन्नानितिशेषः कुहूप्रसूतिरत्यर्थंसर्वदोषकरीस्मृता यस्यप्रसूतिरेतेषांतस्यायुर्धननाशनं कुह्वामपिपश्वादिप्रसवोनिषिद्धः सर्वगंडसमस्तत्रदोषस्तुप्रबलोभवेत् शांतिंविनाविशेषेणपरित्यागोविधीयते विशेषेणउत्तमपक्षेणशांतिकरणविनापरित्यागः यदितूत्तमपक्षेनशक्तिस्तदाकियत्कालंत्यागंकृत्वाशांतिःकर्तव्येत्याह परित्यागात्तत्रशांतिंकुर्याद्धीमान्विचक्षणः रुद्रःशक्रश्चपितरःपूज्याःस्युर्देवताःक्रमात् कर्षमात्रसुवर्णेनतदर्द्धार्द्धेनवापुनः अथवाशक्तितःकुर्याद्वित्तशाठ्यविवर्जितः प्रतिमांकारयेच्छंभोश्चतुर्भुजसमन्वितां त्रिशूलखड्गवरदाभयहस्तांयथाक्रमात् श्वेतवर्णांश्वेतपुष्पांश्वेतांबरवृषस्थितां त्र्यंबकेनचमंत्रेणपूजांकुर्याद्यथाविधि इंद्रश्चतुर्भुजोवज्रांकुशचापससायकः वज्रांकुशचापैःसहितः सायकोस्येतिविग्रहः रक्तवर्णोगजारूढोयतइंद्रेतिमंत्रतः पितरःकृष्णवर्णाश्चचतुर्हस्ताविमानगाः यष्ट्यक्षसूत्रकमंडल्वभयस्यैवधारिणः गदाक्षसूत्रेतिवापाठः येचेहइतिमंत्रेण

पूजांकुर्यादनंतरम् मदनरत्नेतुयेसत्याइतिमंत्रेणेतिपाठः तस्मिन्पक्षेयेसत्यासोहविरदइतिमंत्रः आग्नेयींदिशमारभ्यकुंभान्कोणेषुविन्यसेत् तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितम् तेष्वेवपंचगव्यादींस्तत्तन्मंत्रैश्चनिक्षिपेत् चतुर्ष्वित्यर्थः गोदानंवस्त्रदानंचसुवर्णंचोर्वरांस्तुभाम् दशदानानिचोक्तानिक्षीरमाज्यंगुडस्तथा गोदानादेर्दशदानांतर्गतत्वाद्द्वारद्वयमनुष्ठानम् आज्यावेक्षणमेतानितत्तन्मंत्रैश्चकारयेत् समिदाज्यचरोर्होमंतिलमाषैश्चसर्षपैः तिलमाषामेकद्रव्यत्वम् समिधआह अश्वत्थप्लक्षपालाशसमिद्भिःखादिरैः शुभैः अष्टोत्तरशतंमुख्यंप्रत्येकंजुहुयाद्द्विजः त्र्यंबकेनमंत्रेणतिलान्व्याहृतिभिःपुनः मुख्यमित्युक्तेरधिदेवतादेः अष्टाविंशत्यादिन्यूनसंख्ययाहोमः चतुर्भिःकलशैर्युक्तंरुद्रकुंभसमन्वितं शांतिवत्सकलंकार्यमभिषेकंचकारयेत् कार्यंकर्तव्यमभिषेकंचतुर्दशीशांतिवत्कुर्यादित्यर्थः पितृमातृशिशूनांचअभिषिंचेत्तुवारुणैः षष्ठीद्वितीयायां शंकरस्याभिषेकंचकुर्याद्ब्राह्मणभोजनम् ब्राह्मणांस्तर्पयिष्यइतिमध्येवाकर्मसंपूर्णतावाचनंकृत्वेत्यर्थः इत्युत्तरगार्ग्योक्तसिनीवालीकुहूशांतिविधिः अथप्रयोगः देशकालौसंकीर्त्यास्यबालकस्यसिनीवालीजन्मसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंसिनीवालीजननशांतिंकरिष्यइतिसंकल्प्यगणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् कुह्वांतुकुहूपदेनसंकल्पोगोमुखप्रसवश्च ततः आचार्यः सर्षपान्विकीर्यभूमिंप्रोक्ष्य आग्नेयीमारभ्यविदिक्षुचतुरः कुंभान्मध्येशतच्छिद्रंसंस्थाप्यचतुर्षुपंचगव्यंपंचमृत्पंचपल्लवपंचरत्नपंचत्वक्चधान्यसुवर्णानिनिक्षिप्यशतच्छिद्रेपूर्णपात्रोपरिकर्षतदर्द्धार्द्धकल्पितांरुद्रप्रतिमांसंपू

ज्यतद्दक्षिणतोयतइंद्रेतींद्रप्रतिमामुत्तरतश्चयेचेहेतिमंत्रेणपितृप्रतिमांसंपूज्यचतुर्षुकुंभेषुवरुणंपूजयित्वाशांतीः पठेत् ततोयजमानोदानानि कुर्यात् गवामंगेष्वितिगां शरण्यंसर्वलोकानांलज्जायारक्षणंपरं सुवेषधारिवस्त्रत्वमतःशांतिंप्रयच्छमे वासःहिरण्यगर्भेतिहिरण्यं सर्वसस्याश्रयाभूमिर्वराहेणसमुद्धृता अनंतसस्यफलदाअतः शांतिंप्रयच्छमे भूमिं ततोदशदानानिकुर्यात् तानिच गोभूतिलहिरण्याज्यंवासोधान्यंगुडानिच रौप्यंलवणमित्याहुर्दशदानानिपंडिताः चतुर्णांमंत्राउक्ताः महर्षेर्गोत्रसंभूताःकश्यपस्यतिलाःस्मृताः तस्मादेषांप्रदानेनममपापंव्यपोहतु तिलान् कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थितम् देवानामाज्यमाहारमतःशांतिंप्रयच्छमे आज्यं सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत् प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमे धान्यम् यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः सामवेदस्तुवेदानांमहादेवस्तुयोगिनाम् प्रणवः सर्वमंत्राणांनारीणांपार्वतीयथा तथारसानांप्रवरःसदैवेक्षुरसोमतः ममतस्मात्परांलक्ष्मींददस्वगुड सर्वदा गुडम् प्रीतिर्यतःपितृणांचविष्णुशंकरयोः सदा शिवनेत्रोद्भवंरूप्यमतःशांतिंप्रयच्छमे रूप्यम् यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना शंभोःप्रीतिकरंनित्यमतःशांतिंप्रयच्छमे लवणम् इतिदशदानानि क्षीरजातास्तथाशंखाःक्षीरादमृतसंभवः क्षीरात्क्षीरोदवत्कीर्तिःक्षीरेप्राणस्यसंभवः क्षीरं पूर्वोक्तमंत्राभ्यां पुनराज्यंगडंचदत्वाकांस्यपात्रेरूपंरूपमितिमंत्रेणसकुटुंबःप्रतिस्वरूपंवीक्ष्यआज्यंतेजःसमुद्दिष्टमाज्यंपापहरंस्मृतम् आज्यंसुराणामाहारमाज्येदेवाःप्रतिष्ठिताः इत्याज्यपात्रं ततःआचार्योग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानं त्र्यंबकमश्वत्थप्लक्षपलाशखदिरसमिदाज्यचरु

तिलसहितमाषसर्षपद्रव्यैः प्रत्येकमष्टशतसंख्ययाइंद्रंपितॄंश्चतैरेवद्रव्यैरष्टाविंशतिसंख्ययाप्रजापतिंचव्याहृतिभिरष्टाविंशतिसंख्ययाशेषेण स्विष्टकृतमित्यादिबलिदानांतेपूर्णाहुतिंहुत्वाशतच्छिद्रगतैश्चतुःकलशोदकैर्ग्रहकुंभोदकेनचतत्वायामीत्यादिभिर्वारुणमंत्रैरभिषिच्यरुद्रप्रतिमायांत्र्यंबकमित्यभिषेकंकृत्वोत्तरपूजांकृत्वाविसृज्याचार्यहस्तेप्रतिपाद्याग्निंविसृज्यब्राह्मणांस्तर्पयिष्यइतिपृष्ट्वायथाशक्तिब्राह्मणान्भोजयेत् इतिदिनकरभट्टकृतेशांतिसारेसिनीवालीकुहूशांतिप्रयोगः अथदर्शजातशांतिः नारदः अथातोदर्शजातानांमातापित्रोर्दरिद्रता तद्दोषपरिहारार्थेशांतिंवक्ष्यामितेसदा पुण्याहंवाचयित्वादौक्रतुसंकल्पपूर्वकं कुंडंवास्थंडिलंकुर्यात्तद्देशेस्थापयेद्घटम् तद्देशेतत्समीपे तत्कुंभेनिक्षिपेद्द्रव्यंदधिक्षीरघृतादिकं आदिशब्दाद्गोमूत्रगोमये न्यग्रोधोदुंबरोश्वत्थाः सचूतानिंबकरत्तथा एतेषांवृक्षमूलानांत्वगादीन्पल्लवांस्तथा पंचरत्नानिनिक्षिप्यवस्त्रयुग्मेनवेष्टयेत् सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः आपोहिष्ठात्र्यृचेनाथकयानश्चित्रइत्यृचा यत्किंचेदमृचाचैवसमुद्रज्येष्ठइत्यृचा अभिमंत्र्योदकंपश्चादग्नेः पूर्वप्रदेशके हरिद्रंरक्तकंचैवकृष्णंश्वेतंचनीलकम् एतेषांतंडुलैश्चैवसर्वतोभद्रमुद्धरेत् कुंभतः पश्चादग्नेश्चपूर्वतोहरिद्रारंगरक्तैस्तंडुलैः सर्वतोभद्रमुद्धरेदित्यर्थः दर्शस्यदेवतायाश्चसोमसूर्यस्वरूपकम् प्रतिमांस्वर्णजांनित्यंराजतींताम्रजांतथा पितृरूपायादर्शदेवतायाः सोमसूर्ययोश्चस्वरूपंप्रतिमारूपंस्थापयेदित्यर्थः इतिप्रयोगपारिजातः सर्वतोभद्रमध्येचस्थापयेद्दर्शदेवतां ग्रहवर्णवस्त्रयुग्मंतद्वर्णगंधपुष्पकम् आप्यायस्वेतिमंत्रेणसवितापश्चात्तथैवच उपचारैः समाराध्यततो

होमंचरेत्सुधीः कृत्वावह्निंप्रतिष्ठाप्यक्रतुसंकल्पमीदृशं आयुरारोग्यसिध्यर्थंसर्वारिष्टप्रशांतये पुत्रस्यदर्शजननंतस्यदोषनिबर्हणं मातापित्रोःकुमारस्यसर्वारिष्टप्रशांतये तेषामायुःश्रियेचैवशांतिहोमंकरोम्यहम् आयुरारोग्येतिश्लोकद्वयेनक्रतुसंकल्पंकृत्वेत्यर्थः समिधश्चचरुद्रव्यंक्रमेण जुहुयाद्गृही जुहुनेत्सवितृमंत्रेणसोमोधेनुंचमंत्रतः एतैर्मंत्रैश्चप्रत्येकंहुनेदष्टोत्तरंशतं एतैरितिबहुवचनात्पितृहोमोप्यष्टोत्तरशतमितिप्रयोगपारिजातः दर्शस्यदेवताहोम अष्टाविंशतिसंख्यया होममेवंतुकृत्वाथविदध्यात्स्वाभिषेचनम् श्रीसूक्तमायुष्यसूक्तंसमुद्रज्येष्ठइत्यृचा एतैर्मंत्रैरभिषेकंमातापित्रोःशिशोस्तथा ततःस्विष्टकृदादिस्यात्होमशेषंसमापयेत् हिरण्यंरजतंचैवकृष्णांधेनुंसदक्षिणाम् अन्येभ्योपियथाशक्तिदातव्यादक्षिणातथा ब्राह्मणान्भोजयेत्तत्रकारयेत्स्वस्तिवाचनं इतिनारदोक्तदर्शशांतिविधिः अथप्रयोगः देशकालौसंकीर्त्यास्यबालकस्यदर्शजननसूचितसकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंदर्शजननशांतिंकरिष्यइतिसंकल्प्यगणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् ततःआचार्यःसर्षपान्विकीर्यभूमिंप्रोक्ष्यकुंडात्स्थंडिलाद्वापूर्वप्रदेशेकुंभंसंस्थाप्यतत्रपंचगव्यंन्यग्रोधोदुंबराश्वत्थचूतनिंबवृक्षाणांमूलत्वचः पल्लवांश्चपंचरत्नानिनिक्षिप्यवस्त्रयुग्मेनसंवेष्ट्य सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः इतिआपोहिष्ठेतितृचेनकयानश्चित्रइतियत्किंचेदमितिसमुद्रज्येष्ठाइतिचोदकमभिमंत्र्यपूर्णपात्रंनिधायवरुणंपूजयेत् ततःकुंभात्पश्चिमेअग्नेःपुरतोहरिद्रारक्तैःस्ताम्रैःकृष्णैश्चतंडुलैर्यथाशोभंसर्वतोभद्रंविरच्यतन्मध्येयेचेहेतिपितृनावाह्यदक्षिणतआप्यायस्वेतिसोममुत्तरतश्चसवितापश्चादि

तिसूर्यमाद्यान्ग्रहान्सर्वान्पूजयेत् ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानम् ग्रहान्ग्रहयज्ञोक्तद्रव्येणपितॄन्सोमंसूर्यंचाष्टोत्तरशताष्टाविंश
त्यन्यतमसंख्याभिः शेषेणस्विष्टकृतमित्याद्याज्यभागांते आयुरारोग्येतिमंत्राभ्यांहोमसंकल्पंकृत्वाहिरण्यवर्णामितिसूक्तेन आयुष्यंवर्चस्य
मितिसूक्तेनसमुद्रज्येष्ठाइत्यनयाचमातापितृशिशूनभिषिंच्यस्विष्टकृदादिबलिदानांतेपूर्णाहुतिंहुत्वाशेषंसमाप्याचार्याययथाशक्तिरजतंहिर
ण्यंकृष्णांधेनुंवस्त्रदक्षिणांदत्वाऋत्विग्भ्यश्चयथाशक्तिदत्वापित्रादीनामुत्तरपूजांकृत्वाविसृज्याचार्यायप्रतिपाद्याग्निंविसृज्यब्राह्मणान्भो
जयित्वाशांतीःपाठयित्वास्वस्तिवाचनंकुर्यादिति इतिश्रीनारायणभट्टसुतरामकृष्णभट्टसुतदिनकरभट्टकृतेशांतिसारेदर्शजातशांतिप्रयोगः
अथमूलशांतिः तत्रमूलवृक्षोजपार्णवे मूलस्तंभत्वचाशाखापत्रपुष्पफलंशिखा वेदाश्चमुनयश्चैवदिशश्चवसवस्तथा नंदाबाणारसारुद्रामूल
भेदाःप्रकीर्तिताः मूलेमूलविनाशःस्यात्स्तंभेहानिर्धनक्षयः त्वचिभ्रातृविनाशायशाखामातुर्विनाशकृत् पत्रेसपरिवारस्यपुष्पेतुनृपवल्लभः फ
लेषुलभतेराज्यंशाखायामल्पजीवितम् अन्यत्रत्वन्ययोक्तं मूलेसप्तघटीषुमूलहननंस्तंभेष्टसौख्यंक्षयंत्वग्दिग्बंधुविनाशनंचविटपेरुद्रैर्हतो
मातुलः पत्रैकेसुकृतीतुबाणकुसुमेमंत्रीफलेसागरैराज्यंवह्निशिखाल्पमायुरितिसन्मूलांघ्रिपेस्यात्फलम् पत्रादिघटिकानामुत्वमत्वेपि
चरणदोषोस्त्येव मूलस्यस्वर्गादिस्थितत्वम् फलंचभूपालवल्लभे वृषालिसिंहेषुघटेषुमूलंदिविस्थितंयुग्मतुलांगनासु पातालगंमेषधनुःकुली
रनक्रेषुमर्त्येष्वितिसंस्मरंति अत्रवृषादौसूर्येसतिइत्यध्याहार्यम् स्वर्गेमूलेभवेद्राज्यंपातालेचधनागमः मृत्युलोकेयदामूलंतदाशून्यंसमादि

शेत् स्वर्गादिस्थितेपिचरणदोषोस्ति मर्त्यादिस्थितेपिशुभंपत्र्यादिफलमस्ति वसिष्ठः नैर्ऋत्यभोद्भूतसुतःसुतावाक्षिप्रादवश्यंस्वशुरंनिहंति तदंत्यपादेजनितोनिहंतितस्योत्क्रमेणाभिभवेत्कलत्रम् उत्क्रमेणवैपरीत्येनतस्यकलत्रमित्यन्वयः सुरेशताराजनिताधवाग्रजंहृदैवताराजनितातुदेवरम् पुरंदरर्क्षेजनितःसुतस्तथास्वस्याग्रजंहंतिनपुत्रिकायदि नृसिंहप्रसादे धवाग्रजंहंतिसुरेंद्रजातातथैवपत्न्याभगिनीपुमांश्च हृदैवजादेवरमाशुहन्याद्भार्यानुजामाशुनिहंतिसूनुः पत्न्यग्रजामग्रजंवाहंतिज्येष्ठर्क्षजःपुमान् तथापत्नीस्वसारंवाशालकंचाहृदैवजः कन्यकादेवरंहंतिविशाखांत्यसमुद्भवा आद्यपादत्रयेनैवआद्यभेतुपुमान्भवेत् आद्यपादत्रयेदेवरंहन्यात्पुमांस्तु आद्यपादत्रयएवपत्नीकनिष्ठंहन्यादित्यर्थः नहन्याद्देवरंकन्यातुलामिश्राहृदैवजा तद्दक्षांत्योद्भवावर्ज्यादुष्टावृश्चिकपुच्छवत् भल्लादः अभुक्तमूलसंभवंपरित्यजेत्तुबालकंसमाष्टकंपिताथवानतन्मुखंविलोकयेत् तदाद्यपादकेपिताविपद्यतेजनन्यथ तृतीयकेधनक्षयश्चतुर्थकःशुभावहः तदीयमंत्यपादतःफलंतथैवसार्पभे चतुर्थःशुभः बालाभिप्रायं मूलाद्यपादजोहंतिपितरंचद्वितीयजः मातरंचतृतीयोर्थान्सुहृदंचतुरीयजः फलंतदेवसार्पर्क्षेप्रतीपंत्वंत्यपादतइतिकश्यपसंहितोक्तेः प्रथमेपितुर्नेष्टोद्वितीयेमातुस्तृतीयेधनधान्यस्यचतुर्थेकुलशोकावहःस्वयंपुण्यभागीस्यादिति कातीयपरिशिष्टाच्च यत्तुवसिष्ठेन तुरीयजःशुभकरःफलमेतदेववैलोमतोभुजगधिष्ण्यभवस्यसर्वमित्युक्तंतदपिबालपरं अभुक्तमूलमाहवसिष्ठः ज्येष्ठांतेघटिकाचैकामूलादौघटिकाद्वयम् अभुक्तमूलमित्याहुर्जातंतत्रविवर्जयेत् बृहन्मनुनात्वन्यथोक्तं ज्येष्ठांतंघटिकार्धंतुमूलादौ

घटिकार्धकम् तयोरंतर्गतानाडीअभुक्तंमूलमुच्यते बृहन्नारदेनाप्यन्यथोक्तम् अभुक्तमूलगंडांतंनाडिकानांचतुष्टयम् तत्रैकांत्यघटीद्वंद्वंमूलाद्यंद्वंद्वमेवच गंडांतस्तु गंडांतस्त्रिविधोज्ञेयोनक्षत्रतिथिलग्नगः नवपंचचतुर्थांत्येष्वेकार्द्धात्परतोग्रगाः अस्यार्थः अश्विनीतोनवमंआश्लेषा ततोज्येष्ठारेवतीतदंत्येघटिकेपरतोदशमंमघाततोमूलंततोश्विनीतदादौघटिके एवंचतुर्घट्योगंडांतः एवंप्रातिपत्प्रभृतिपंचमांते षष्ठादौचैकघटिकातिथिगंडांतः एवंमेषप्रभृतिचतुर्थांतिपंचमादौचअर्द्धार्द्धघटिकालग्नगंडांतः तदुक्तंरत्नमालायाम् पौष्णाश्विन्योःसार्पपित्र्यर्क्षयोश्चयच्चज्येष्ठामूलयोरंतरालम् तद्गंडांतंस्याच्चतुर्नाडिकंहियात्राजन्मोद्वाहकालेप्यनिष्टम् ज्योतिर्निबंधे पूर्णानंदाख्ययोस्तिथ्योः संधिनाडीद्वयंतथा गंडांतंमृत्युदंजन्मयात्रोद्वाहव्रतादिषु कुलीरसिंहयोःकीटचापयोमीनमेषयोः गंडांतमंतरालंस्याद्घटिकार्द्धंमृतिप्रदम् ज्योतिर्निबंधेतु नक्षत्रगंडांतमन्यथोक्तम् सार्पेन्द्रपौष्णभेष्वंत्यषडंशांशाभसंधयः तदग्रभत्वाद्यपादाभानागंडांतसंज्ञकाः उत्तरगार्ग्येणाप्यन्यथोक्तम् अश्विनीमघमूलादौद्विषट्कनवनाडिकाः रेवतीसार्पशाक्रांतेमासाश्वऋतुसायकाः सांप्रदायिकास्तुचतुर्नाडिक एवगंडांते गंडांतशांतिकंकुर्वंति गंडांतफलमुक्तंरत्नसंग्रहे सर्वेषांगंडजातानांपरित्यागोविधीयते वर्जयेद्दर्शनंतेषांतच्चषाण्मासिकंभवेत् तिथ्यर्क्षगंडेपितृमातृनाशोलग्नेतुसंधौतनयस्यनाशः सर्वेषुनोजीवतिहंतिबंधून्जीवेत्पुनःस्याद्बहुवारणाश्वः अत्रकेचिदभुक्तमूलजातस्याजन्मपरित्यागोवासमाष्टकादर्शनंवाशांत्यकरणएव तत्करणेतुनोभयमित्याहुः अन्येतु त्यागोवामूलजातस्यषस्यादष्टाब्दात्प्रदर्शनमिति शौनकोक्तेर

भुक्तमूलजातस्याष्टाब्दादर्वाक्नशांतिकरणेपिदर्शनम् शांतिश्चत्यागपक्षेपिसिंहप्रसूतगोशांतिवदित्याहुः निष्कर्षस्तुनशांतिस्त्यागपक्षेदर्शनासंभवेनगोमुखप्रसवासंभवात् अत्रगंडांतोत्पत्तौगंडांतशांतेस्तत्तन्नक्षत्रशांतेर्गंडांतसामान्यविहितशिवाभिषेकादेस्तिथिगंडेत्वनड्वाहंनक्षत्रे धेनुरुच्यतइत्येतद्विहितगोदानादेश्चसमुच्चयः अत्रत्यागविधानेस्वत्वस्यापायात्पातकिनंत्यजतीत्यादौत्यजतेर्दानार्थत्वाभावाच्च सिंह्यादिप्रसूतिवन्मूलप्रसूतिस्यापिपीडनंनभवतीतिकेचित् तन्नत्यागविधानेपिस्वत्वापायेप्रमाणाभावात् अतश्चात्रत्यजतिनाजन्मदर्शनाभावोवाजन्मत्यागपक्षेसमाष्टकेदर्शनेवान्यद्वाराजातकर्मादिकरणंमध्येचाकस्मिकदर्शनेशांतिपूर्वंस्वयंतत्करणं अतस्त्यागपक्षे पीडनादिभवत्येवेति एतेनसिंह्याद्युत्पन्नगवादीनामपिदानंसिद्धम् पुण्यंत्वल्पम् अवश्यत्याज्यत्वात् मूलोत्पन्नप्रतिगृहीतुश्चनत्यागशांतिकादिनप्रत्युत्पत्तिकालेस्वत्वाभावेनमूलोत्पन्नपुत्रत्वाभावात् मूलमध्येप्रतिग्रहेपिनशांतिकंतत्रानुत्पत्तेरिति आश्लेषाफलमुक्तम् मूर्द्धास्यनेत्रगलकर्णयुतंचबाहूहृज्जानुगुह्यपदमित्यहिदेहभागाः बाणाद्रिनेत्रहुतभुक्श्रुतिनागरुद्रषण्नंदपंचशिरसः क्रमशस्तुनाड्यः राज्यंचपितृक्षयोमातृनाशः कामत्रपारातिपितृभक्ताबलप्रत्यागीभोगीधनीक्रमात् पादफलंपूर्वमुक्तम् ज्येष्ठाफलमुक्तम् ब्रह्मयामले ज्येष्ठादौजननीमाता द्वितीयेजननीपिता तृतीयेजननीभ्रातास्वस्यमाताचतुर्थके आत्मानंपंचमेहंतिषष्ठेगोत्रक्षयोभवेत् सप्तमेचोभयकुलंज्येष्ठभ्रातरमष्टमे नवमेश्वशुरंहंतिसर्वस्वंदशमेंशके नक्षत्रविशेषेणापिफलमुक्तम् नृसिंहप्रसादे चित्राद्यार्द्धेपुष्यमध्येद्विपादेपूर्वाषाढाधिष्ण्यपादेतृतीयेजातः

पुत्रश्चोत्तरामातृपित्रोर्व्यतिरंबालनाशंसर्वनक्षत्रेषुफलमवधिस्तत्रैव हिमासंचोत्तरादोषःपुष्येचैवत्रिमासिकः पूर्वाषाढाष्टमेमासिचित्राषाण्मासिकंफलम् नवमासंतथाश्लेषामूलेचैवाष्टवर्षकम् ज्येष्ठापंचदशेमासिपुत्रदर्शनिवर्जिता यत्रतुपादजातादौदोषमात्रंश्रूयतेनशांतिकं तत्रग्रहमखःकर्तव्यः तथाचवसिष्ठः व्यतीपातेंगहानिःस्यात्परिघेमृत्युमादिशेत् वैधृतौपितृहानिःस्यान्नष्टेंदौवंधतांव्रजेत् मूलेसमूलनाशःस्यात्कुलनाशोधृतौभवेत् विकृतांगेचहीनेचसंध्ययोरुभयोरपि पर्वण्यपिप्रसूतौचसर्वारिष्टभयप्रदः तद्वत्सदंतजातश्चपादजातस्तथैवच तस्माच्छांतिंप्रकुर्वीतग्रहाणांक्रूरचेतसामिति व्यतीपातादौतन्निमित्तकशांतिग्रहमखयोःसमुच्चयः तत्रापिस्वतंत्रप्रयोगतावा यत्तुतत्तत्प्रकरणेपुनर्ग्रहमखविधानंतदेकप्रयोगतानियमार्थमितिकेचित् अन्येत्वंगस्यैकप्रयोगतापिन्यायादेवसिद्धेत्यंगभूतग्रहमखाद्भिन्नंग्रहमखांतरं विधीयतइत्याहुः ग्रहमखस्यचसर्वशांतिषुपूर्वांगत्वात्सहप्रयोगेपिपूर्वंग्रहहोमःपश्चात्तत्प्रधानहोमइति अथमूलशांतिविधिः शौनकः अथातःसंप्रवक्ष्यामिमूलजातहितायच शांतिमितिशेषः मातापित्रोर्धनस्यापिकुलज्ञातिहितायच त्यागोवामूलजातस्यस्यादष्टाब्दात्प्रदर्शनम् अभुक्तमूलजातानांपरित्यागोविधीयतइति अदर्शनाद्वापिपितुःसतुतिष्ठेत्समाष्टकम् एवंचदुहितुर्ज्ञेयंमूलजातफलंबुधैः जातस्यद्वादशाहेतुजन्मर्क्षेवाशुभेदिने अत्रकेचिच्छुभदिनपदंद्वादशाहादिविशेषणमितिनस्वतंत्रकालविधानमितिवदन्ति अन्येतुदिनपदस्यद्वादशाहपर्यंतगतस्यवाहः पदस्यपौनरुक्त्यापत्तेः स्वतंत्रकालविधानमपीत्याहुः समाष्टकेद्वादशाहेकुर्याद्वाशांतिमादरात् अभुक्तमूलोत्पत्तौसमाष्ट-

कादर्शनपक्षेसमाष्टकानंतरंतच्छिन्नमूलोत्पत्तौद्वादशाहेएवेत्यर्थः मदनरत्नेतुद्वादशाब्देइतिपाठः अन्यथापौनरुक्त्यापत्तेः यदैवशांतिकंकुर्यात्कर्मतंत्रंप्रचक्षते सुसमेपुण्यदेशेतुमंडपंकारयेद्बुधः पुण्यगर्भिमंत्रितैस्तोयैःप्रोक्षितायांक्षितौततः ऋत्विजस्तुकश्यपेनोक्ताः ब्राह्मणाःश्रोत्रियाश्चाष्टौद्वादशत्वथषोडश तत्रोदकुंभंसुश्लक्ष्णंरक्तंव्रणविवर्जितम् अकृष्णमूलंनिर्णिक्तंपूरयेन्निर्मलांभसा निर्णिक्तंप्रक्षालितं वस्त्रावगुंठितंकुर्यात्पूरयेत्तीर्थवारिणा कूर्चंहेमसमायुक्तंचूतपल्लवसंयुतम् स्वस्तिकोपरिविन्यस्य क्षीरद्रुमसपल्लवैः द्रोणव्रीहींश्चनिक्षिप्यईशान्यांचनिधापयेत् पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितम् अर्चितंगंधपुष्पाद्यैःश्रीरुद्रंचस्पृशन्जपेत् कुंभंस्पृशन्रुद्रंजपेदित्यन्वयः अत्रचपूर्णपात्रोपरिरुद्रप्रतिमांपूजयित्वाजपःकर्तव्यः तत्कुंभवस्त्रप्रतिमांतस्मैदद्यात्प्रयत्नतइति अग्रेदर्शनात् अत्रकेचित्सर्वौषधिसमन्वितमित्युक्तेः सर्वौषधीनामपिपूज्यत्वमाहुस्तन्निर्मूलम् षडंगसहितंसम्यक्तंजपेद्रुद्रसंख्यया बह्वृचारुद्रसूक्तैर्वाछंदोगारुद्रसामभिः एकादशाष्टत्रिद्व्येकशक्तितःसंख्ययाजपेत् इयंसंख्यासूक्तेषुसामसुच तत्राप्रतिरथंसूक्तंशतरुद्रानुवाककम् अप्रतिरथमाशुःशिशानइति शतरुद्रानुवाकस्त्वमग्नेरुद्रइति रक्षामंत्रंतथापुण्यंराक्षोघ्नंचस्पृशन्जपेत् एतेषामप्येकादशवारंजपः त्र्यंबकंतुजपेत्सम्यगष्टोत्तरसहस्रकम् एकवारंतथाजापीपावमानीःस्पृशन्जपेत् जपस्यपंचकुंभास्त्वहूसंघातद्लाभतः पूर्वोक्तएकःकुंभोवावक्ष्यमाणोद्वितीयकः एतेपंचेत्येवंसप्तकुंभाइतिकेचित् अन्येतुपूर्वोक्तकुंभमध्येईशानादिकोणचतुष्केचत्वारइतिपंचवक्ष्यमाणःषष्ठइत्याहुः कश्यपसंहितायांतु शतच्छिद्रस्यसहितंकुंभपंचकमुक्तकं

ईशानादिचतुष्कोणेष्वव्रणान्जलपूरितान् पूर्वोक्तद्रव्यसंयुक्तान्स्थापयेद्रक्तवर्णकान् शतच्छिद्रं दृढं कुंभंस्थापयेत्तंडुलोपरि कात्यायन
परिशिष्टेतुकुंभद्वयमुक्तम् द्वितीयोदकुंभंकृत्वाचतुःप्रस्रवणसंयुक्तमिति कुंभद्वयपक्षेपिचतुर्विंशतिदलस्थः कुंभोभिन्नएवनिर्ऋतिस्थापनंच
तत्रैव चतुःप्रस्रवणेनपूर्णपात्रोपरिशतमूलानिनिधायसामान्यप्रासंवरुणंपूजयेत् तदुक्तंकात्यायनेन द्वितीयोदकुंभंकृत्वा चतुःप्रस्रवणसंयु-
क्तंतदुपरिष्टान्मूलानिधारयेत् वंशपात्रेकृतवस्त्रेबध्वेति पंचकुंभपक्षेपिमध्यकुंभोपरिशतमूलानि तस्यकुंभचतुष्टयसहितस्यचतुःप्रस्रवण
स्थानापन्नत्वात् रुद्रकुंभातिरेकेषुवरुणपूजानिर्ऋतिश्चतुर्विंशद्दलएवपूज्यः जपस्यपंचकुंभाइत्युक्तेः सर्वेषुपूर्वोक्तमंत्रजपोवाशांतिजपोवाका-
र्यः कुंभद्वयव्यवस्थामाह श्रीरुद्रश्चैवकुंभश्चसर्वसूक्तानितत्रतु तथान्यंचमुखंकुंभंपूर्वोक्तैर्लक्षणैर्युतम् चतुःप्रस्रवणंकुर्यात्पंचवक्त्रंतथैवच
वस्त्रावगुंठितंकुर्यात्पूरयेत्तीर्थवारिणा। पंचरत्नसमायुक्तताम्रपल्लवसंयुतम् गजाश्वरथ्यवल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्चमृदमा
नीयनिक्षिपेत् कुंभस्यनैर्ऋतेदेशेहोमस्थानंप्रकल्पयेत् गोमयालेपितेदेशेकुर्यात्स्थंडिलमुत्तमम् मंडपपक्षेपिस्थंडिलमेवमंडपमुपक्रम्यैवस्थंडि
लविधानात् कृत्वाग्निमुखपर्यंतमुल्लिख्यादिस्वशाखतः अग्निमुखमग्निस्थापनम् पूर्णपात्रनिधानांतंकृत्वापूजांसमारभेत् पूजांतत्सामर्थ्यांत-
स्यावक्ष्यमाणत्वात् नक्षत्रदेवतारूपंसुवर्णेनप्रयत्नतः निष्कमानेनवार्द्धेनपादेनाथस्वशक्तितः प्रतिमांलक्षणोपेतांकारयित्वाविचक्षणः यद्वा
मूल्यंसुवर्णस्यस्थापयित्वाप्रपूजयेत् संस्मरेन्निर्ऋतिंश्यामंसुमुखंनरवाहनम् रक्षोधिपंखड्गहस्तंदिव्याभरणभूषितम् ज्योतिर्निबंधे मूल्यं

तरमुक्तम् मूलरूपंविधातव्यंश्वेतंकुणपवाहनम् खड्गखेटधरंचोग्रंद्विभुजंचवृकाननमितिप्रतिमापूजनार्थायवस्त्रयुग्मंप्रकल्पयेत् पंकजंकारयेद्रुमैरक्ताभैर्व्रीहितंदुलैः चतुर्विंशद्दलोपेतंशुक्लैर्वाकर्णिकान्वितम् तस्योपरिन्यसेत्पात्रस्वर्णवारौप्यमृन्मयं पात्रंकलशं शुद्धवस्त्रेणसंछादयेतत्रमूलानिनिक्षिपेत् मूलानिशतमूलानि विष्णुक्रांतासहदेवी तुलसीतुशतावरी मूलानीमानिगृह्णीयात्सर्वलाभेविशेषतः तस्योपरिन्यसेत्पात्रमितियदुक्तंतत्रविशेषमाह स्थापयेत्कर्णिकामध्येवस्त्रगंधाद्यलंकृतम् कूर्चहोमजलोपेतंकुंकुमौषधिसंयुतम् कूर्चोदर्भस्तंभः कुंभोपरिन्यसेद्विद्वान्मूलनक्षत्रदेवताम् अधिप्रत्यधिदेवौचदक्षिणोत्तरयोः क्रमात् अधिदेवंयजेदादौज्येष्ठानक्षत्रदैवतम् तथाप्रत्यधिपादाश्चपूजयेद्देवतांशुभाम् उत्तराषाढऋक्षाद्या अनुराधांतमर्चयेत् ऐंद्र्यादीशानपर्यंतंपूजयेत्स्वस्वनामतः भूमिस्थचतुर्विंशतिदलेषुपूर्वदलमारभ्य चतुर्विंशतिनक्षत्राणिस्थाप्यानीत्यर्थः नक्षत्रदेवताःस्थाप्याइतिकेचित् लिंगोक्तैश्चैवमंत्रैश्चप्रधानादींश्चपूजयेत् कश्यपेनतु सुवर्णेनप्रमाणेनतदर्द्धार्द्धेनवापुनः यथावित्तानुसारेणप्रतिमांनिर्ऋतेःसुधीः उदुंबरवटाश्वत्थप्लक्षाम्रत्वक्सपल्लवान् शतौषधीमूलशंखनवरत्नानिमृत्तिकाः पंचामृतांबुसद्बीजंकुंकुमंरोचनंफलम् कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनम् वचाकचोरकंमुस्तासर्वौषध्योदशस्मृताः गजाश्वरथ्यावल्मीकसंभवस्थानसंभवाः ह्रदगोराजनगरद्वारतश्चाष्टमृत्तिकाः तिलमाषव्रीहियवगोधूमाणिप्रियंगवाः चणकैःसहिताश्चाष्टौसद्बीजाख्यानिसर्वदा दधिमध्वक्षतैः कुंभान्वस्त्रैस्तल्लिंगमंत्रकैः प्रधानमंत्रश्च मोषुणश्चेतिमंत्रेणनिर्ऋतिंचार्चयेत्ततः इतिकश्यपसंहितोक्तेः पंचामृतेनसंस्नाप्य आवाह्यायसमर्चयेत्

उपचारैःषोडशभिर्यद्वापंचोपचारकैः रक्तचंदनगंधाद्यैःपुष्पैःकृष्णासितादिभिः मेषशृंगादिभिर्धूपैर्घृतदीपैस्तथैवच सुरापोलिकमांसाद्यैर्नैवेद्यैश्चोदनादिभिः
मत्स्यमांससुरादीनिब्राह्मणानांविवर्जयेत् सुरास्थानेप्रदातव्यंक्षीरंसैंधवमिश्रितम् पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत् उक्त
महार्घलाभेतुयथालाभंसमर्पयेत् पुष्पांतंतुसमभ्यर्च्यहोमंकुर्याद्यथोदितम् पुष्पांजल्यंतमित्यर्थः निर्वापप्रोक्षणादीनिचरोःकुर्याद्यथाविधि हु
विर्गृहीत्वाविधिवन्मंत्रैरित्येवऋचाहुनेत् मोषुणःपरापरेतियन्तेदेवीतिवापुनः पायसंघृतसंमिश्रंहुनेदष्टोत्तरंशतम् समिदाज्यचरून्पश्चाच्छक्तितः
संख्ययाहुनेत् अधिदेवतयोश्चैवजुहुयात्स्वस्वमंत्रतः चतुर्थ्यंतैर्नमोंतैश्चस्वाहांतैःस्वस्वमंत्रकैः नक्षत्रदेवताभ्यश्चपायसेनतुहोमयेत् स्वस्वमंत्रके
नमिमंत्रैरित्यर्थः कृणुष्वेतिपंचदशर्ग्भिर्जुहुयात्कृसरंततः अत्रऋग्भिरितिग्रहणात्प्रत्यृचंहोमः यत्रतु अमुकसूक्तेनहोमःकर्तव्यइत्याम्नातम् तथा
तत्रैवश्रीसूक्तेनेतितत्रसूक्तेनैवहोमःकर्तव्यइतियुक्तम् संप्रदायस्तुप्रत्यृचंहोमइति गायत्र्याजातवेदसेत्र्यंबकंइतिक्रमात् अत्रक्रमादित्युक्तेरेतत्प
र्यन्तंकृसरान्वयः उत्तरत्रवक्ष्यमाणसमिदाज्यचर्वन्वयः मंत्रद्वयस्यपाठादेवसिद्धेरितिकेचित् सीरायुंजंतितामग्निंवास्तोष्पत्यग्निमेवच तामग्निवर्णांतपसाज्वलंतींवैरोचनीमिति
क्षेत्रस्यपतिनागृणानामभिंदूतंतथैवच एतत्पर्यंतंकृसरान्नंइत्यपरे संख्यातुवक्ष्यमाणा श्रीसूक्तेनतथाविद्वान्समिदा
ज्यचरून्क्रमात् अष्टोत्तरशतैर्वापिअष्टाविंशतिभिःक्रमात् अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुधः त्वन्नःसोमेनजुहुयात्पायसंतुत्रयो
दश चतुर्गृहीतमाज्यंचयातेरुद्रेतिमंत्रतः स्रुवेणजुहुयादाज्यंमहाव्याहृतिभिःक्रमात् महाव्याहृतीराहपराशरःसंक्षेपायासृजद्ब्रह्मासप्त

माव्याहृतीःपुरा भूर्भुवःस्वर्महर्जनस्तपः सत्यंतथैवच आद्यास्तिस्रोमहाप्रोक्ताःसुवस्तुप्रतियोजयेत् शंखस्तु भूर्भुवःसुवर्महोजनस्तपःसत्यमितिमहाव्याहृतयइत्याह बौधायनेनतु भूरग्नयेचेतिमंत्रचतुष्टयंमहाव्याहृतयइत्युक्तं चतुर्गृहीतादौसकृदेवहोमः हुत्वास्विष्टकृतपश्चात्प्रायश्चित्ताहुतीर्हुनेत् आचार्योयजमानोवाअग्नौपूर्णाहुतिंहुनेत् समुद्रादूर्मीतिसूक्तेनप्राजापत्यऋचावातथा पूर्णादर्विपरापतेतिमंत्रैःपूर्णाहुतिंहुनेत् होमशेषंसमाप्याथवह्निमारोपयेद्बुधः जातारण्यग्निपक्षेनवग्रहविकृतित्वाद्वास्मार्ताग्निपक्षेत्ववह्निसमारोपः लौकिकाग्निपक्षेनसमारोपः कुम्भाभिमंत्रणंकुर्याद्दक्षिणेनाभिमर्शयेत् मृत्यूपशमनार्थायजपेत्त्र्यम्बकंशतम् रुद्रकुंभोक्तमार्गेणरुद्रमंत्रंस्पृशन्जपेत् रुद्रकुंभंस्पृशन्पूर्वोक्तंरुद्रादिमंत्रंजपेदित्यर्थः तत्रायंनियमस्त्र्यंबकस्यशतवारमेवनसाहस्रवारम् धूपंदीपंचनैवेद्यंकुंभयुग्मेनिवेदयेत् कुंभयुग्मेरुद्रकुंभेनिर्ऋतिकुंभेच प्रसादयेत्ततोदेवमभिषेकार्थमादरात् निर्ऋतिंरुद्रंच तस्मिन्कालेग्रहातिथ्यंकर्तव्यंभूतिमिच्छता पृथक्प्रशस्तंतेनैवनक्षत्रेष्ट्यासहैववा ग्रहातिथ्यंग्रहमखः तेनमूलशांत्यग्निनानक्षत्रेष्टिमूलशांतिः अभिषेकविधिंवक्ष्येसर्वाचार्यैरुदीरितम् भद्रासनोपविष्टस्ययजमानस्यऋत्विजः दारपुत्रसमेतस्य कुर्युःसर्वेभिषेचनम् अक्षीभ्यामितिसूक्तेनपावमानीभिरेवच आपोहिष्ठेतिनवभिरापइद्वाद्वयेनच मदनरत्नेतु यतइंद्रद्वयेनचेतिपाठः सहस्राक्षस्तृचेनापिदेवस्यत्वेतिमंत्रकैः शिवसंकल्पमंत्रेणवक्ष्यमाणैश्चमंत्रकैः वक्ष्यमाणमंत्राश्चप्रयोगेवक्तव्या तच्छंयोरभिषेकंतुसर्वदोषोपशांतिदम् सर्वकामप्रदंदिव्यंमंगलानांचमंगलम् वस्त्रांतरितकुंभाभ्यांपश्चात्तुस्नापयेद्बुधः ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः यजमानो

दक्षिणाभिस्तोषयेदृत्विकादिकान् धेनुंपयस्विनींदद्यादाचार्यायसवत्सकाम् निर्ऋतिप्रतिमांवस्त्रंकुंभंहेमञ्चदापयेत् वस्त्रकुंभौनिर्ऋतिसंबं
धिनौ हेमस्वतंत्रंयथाशक्ति ग्रहार्थवस्त्रप्रतिमास्तत्तदुक्ताचदक्षिणा श्रीरुद्रजापिनेदेयः कृष्णोनड्वान्प्रयत्नतः तत्कुंभवस्त्रप्रतिमांतस्मैदद्या
त्प्रयत्नतः इतरेभ्योपिविप्रेभ्यः शक्त्यादद्याच्चदक्षिणाम् ऋत्विग्भ्यइत्यर्थः उक्तालाभेततोदद्यादाचार्यब्रह्मऋत्विजाम् तत्तन्मूल्यंप्रदातव्यंशक्त्या
वाथप्रदापयेत् उत्तमपक्षेणमूल्यंदातव्यंतदशक्तावधमपक्षेणेत्यर्थः आचार्यायचयद्दत्तंतदर्द्धं ब्रह्मणेभवेत् सदस्यायब्रह्मणोर्द्धंमृत्विग्भ्यश्च
तदर्धकम् मुख्यदक्षिणाया अभावे अर्द्धादिकल्पना ज्योतिर्निबंधेत्वत्रसर्वमूलहोमोप्याम्नातः प्रच्छादनोर्णवस्त्रादिदद्याद्धेनुंचकांचनम् दानंत
होमयेद्विप्रः सर्वमूलानितत्रैवेइति देवताचात्रमूलमेव आशीश्चतेभ्योगृह्णीयात्प्रणम्याथक्षमापयेत् दद्यादन्नंपायसादिब्राह्मणान्भोजयेच्छ
तम् अलाभेसतिपंचाशद्दशकंतदलाभतः सर्वशांतेश्चपठनंब्राह्मणैराशिषस्तथा गृहीक्षमापयोद्विमान्निर्ऋतिःप्रीयतामिति विधानेचरितेस्मिं
स्तुततःशांतिर्भवेद्ध्रुवं गंडांतेप्येवंकर्तव्यंपुष्यार्द्धेतद्देवतु पुष्यार्द्धेपुष्यस्नानमंत्रैःस्नपनमित्यर्थः अतएवज्योतिर्निबंधे पुष्यस्नानोक्तमंत्रैश्च
स्नापयेद्दंपतीशिशुमित्युक्तम् मदनरत्नेतु पुष्यार्द्धेएवमेवार्चितिपाठः इतिशौनकीयमूलशांतिविधिः शतमूलानिदैवज्ञमनोहरेपुराणसमुच्चये व
र्हिःशिखा१ हरिक्रांता२ सहदेवी३ पुनर्नवा४ शरपुंखा५ वराहीच६ काकजंघा७ सुलक्षणा८ तुंबिकाचैव९ कर्कंधुः१० कर्पूरी११ कालवल्लिका१२ क
कौंटिकाच१३ चक्रांका१४ श्वेतार्को१५ व्याघ्रपत्रिका१६ रुदंती१७ चाश्वगंधाच१८ मुसली१९ गिरिकर्णिका२० इंद्रवारुण्य२१ पामार्ग२२ शंख

पुष्पी २३ कुमारीका २४ झल्लकी २५ चाथगंधारी २६ निर्गुंडी २७ देवदालिका २८ वटः २९ शमी ३० तथाप्लुक्षः ३१ पालाशो ३२ श्वत्थएवच ३३ चूत ३४ श्चोदुंबरो
३५ जंबू ३६ र्नदीवृक्षोथ ३७ वेतसः ३८ पुन्नागो ३९ थार्जुनो ४० शोको ४१ बकुलो ४२ श्मंतकस्तथा ४३ शाल ४४ स्ताल ४५ स्तमालश्च ४६ पाटलः ४७
शतपत्रिका ४८ मधूकश्च ४९ शिरीषश्च ५० श्रीवृक्षो ५१ बृहतीद्वयं ५२ ५३ बला ५४ चातिबलाचैव ५५ पाठा ५६ नागबलातथा ५७ जातीच ५८ बकुलश्चैव
५९ केतकी ६० कदलीतथा ६१ मातुलिंगी ६२ जयंतीच ६३ यवानी ६४ पुंड्रिकातथा ६५ द्रोणपुष्पा ६६ तथाकुंभी ६७ श्रीपर्णी ६८ मदनस्तथा ६९ चंपकं ७० पद्मकंचैव
७१ तथाकांचनपुष्पिका ७२ सिद्धेश्वरीच ७३ बदरी ७४ राजवृक्षो ७५ धवस्तथा ७६ कुंदश्च ७७ मुचकुंदश्च ७८ गोजिह्वा ७९ क्षरकंदुका ८० दाडिमी ८१ बीजपुरीच
८२ ब्राह्मी ८३ चामलकीतथा ८४ भृंगराज ८५ अधोपुष्पी ८६ मत्स्याक्षी ८७ चाटरूषकं ८८ तरंगिणी ८९ गुडूचीच ९० निशाह्वा ९१ शतमूलिका ९२ बाकुची ९३ काकजंघाच
९४ बर्बरी ९५ तुलसीतथा ९६ कुशः ९७ काशश्चे ९८ क्षुमूलं ९९ तथासर्षपमूलकं १०० अलाभेचोक्तमूलानांसद्वृक्षाणांसमाहरेत् सर्वेषामलाभेयथालाभमाहरेदित्यर्थः
अथतेषांमध्यदेशभाषयानामानि मयूरशिखा १ विष्णुकांता २ गदहस्थ ३ पुनर्नवा ४ सरकोका ५ वराहिकंद ६ मसी ७ लक्ष्मणा ८ लौकी ९ वैरी
१० कर्पूरी ११ करेंबु १२ स्वरवसी १३ चाकवड १४ श्वेतार्क १५ हैंसी १६ रुद्रंती १७ असगंधा १८ मूसरी १९ कोरैया २० ईसारुनी २१ चिटचिरा २२ शंखपुष्पी २३
घिउकुवारी २४ झाले २५ गंधप्रसादनी २६ मेउडी २७ देवदाली २८ वट २९ शमी ३० पाकरी ३१ परास ३२ पीपर ३३ आंब ३४ गुलरी ३५ जामुनी ३६ धनवहेरा ३७ वेतसा ३८
नागकेशर ३९ कोह ४० अशोक ४१ बौलसरी ४२ पाषाणभेद ४३ शाल ४४ तमाल ४५ ताल ४६ पाडंडी ४७ सेवंती ४८ महुया ४९ सिरीसा ५० बेल ५१ कराई ५२

वडीकटाई ५३ वरियारी ५४ ककही ५५ पाठी ५६ गुरसकरी ५७ चवेळी ५८ बकुळ ५९ कवडा ६० विजउदर ६१ मातुलिंग ६२ जैती ६३ अजवाइनी ६४ पुंड्रिका
६५ गूम ६६ जलकुंभी ६७ कमारी ६८ दौना ६९ चंपा ७० पद्मकाष्ठ ७१ पीतकठसरया ७२ भुईचांफा ७३ वडीवेरी ७४ सिरौजी ७५ धव ७६ कुंद ७७ मुचकुंद
७८ गौमी ७९ मुंडुई ८० अनार ८१ आम्लवेतस ८२ ब्राह्मी ८३ औरर ८४ भोंगरिया ८५ अधहुली ८६ गंडिनी ८७ अररुस ८८ सेवार ८९ गुरीवी ९० हरद ९१ शतावरी ९२ बकुची ९३ कोवाठोठी ९४ ममरी ९५ तुलसी ९६ कुश ९७ काश ९८ ऊरव ९९ सारिसौ १०० सर्वौषधिगणश्चतत्रैवोक्तः मुरामांसीवचाकुष्ठंशैलेयं
रजनीद्वयम् सठीचंपकमुस्ताच्चसर्वौषधिगणः स्मृतः एकांगी १ जटामांसी २ वेखंड ३ कोष्ठ ४ मनझील ५ हळद ६ दारुहळद ७ कचोरा ८ चंपा ९ मोथ १० कात्यायनेनशतमूलमध्येद्वात्रिंशन्मूलान्युक्तान्यप्रतिषिद्धानि यानिकानिचिद्ग्राह्याणीत्युक्तं प्रतिषिद्धानिचतेनैवोक्तानि अथातोमूलविधिं
व्याख्यास्यामइत्युपक्रम्यप्रधानानिमूलानिवक्ष्याम्यष्टादशमाहिरण्मयमूलसप्तधान्याप्रथमाकश्मर्यासहदेव्यपराजिताबालापाठाशंखपुष्पायोपुष्पीमधुयष्टिकाचक्रांकितामयूरशिखाकाकजंघाकुमारिकाद्वयंजीवंत्यपामार्गभृंगराजलक्ष्मणासुलक्ष्मणाजातिव्याघ्रपत्रश्चक्रमर्दकसिद्धेश्वराश्वत्थोदुंबर
पलाशप्लक्षवटार्कदूर्वारोहितकशतावरीशमीत्यादिमूलशतंपूरयित्वा तस्मिन्निषिद्धानिमूलानिवक्ष्यामि बैल्वधवनिंबकदंबराजवृक्षाक्षशालप्रियाल
दधिकपित्थकोविदारश्लेष्मातकबिभीतकशाल्मलीसरलसर्वकंटकिवर्ज्यंतत्राभिषेकंकुर्यात् पितुःशिशोर्जनन्यादेवस्यत्वेति औदुंबर्यासंदीमुदगग्रा
मास्तृणातितत्रासीनासंपातेनाभिषिंचतिशिरसोध्यनुलोमशिरोमेश्रीर्यशइतियथालिंगमंगानिसंस्पृशतिस्नानादूर्ध्वंनैर्ऋतंपायसंश्रपयित्वाप्रमर्यम

यंस्तुक्रतुवंमताप्यसमृज्यान्वारब्धआघारावाज्यभागौहुत्वासत्वन्नमितिचतस्रःस्थालीपाकेनजुहुयात्कृणुष्वपाजइतिपंचदशाज्याहुतीश्चतुर्गृहीतेनजुहुयान्मानस्तोकइतिद्वाभ्यांयातेरुद्रशिवातनूरितिषट् अग्नेरक्षांसिसेधतिशुक्रशोचिरमर्त्यः शुचिःपावकईड्यइतित्वन्नःसोमविश्वतोरक्षाराजन्नघायतःनरिष्येत्वावतःसखेतिस्विष्टकृदादिप्राशनांतंकृष्णागोःकृष्णाश्वतिलाहेममयमूलंसप्तधान्यसंयुक्तमाचार्यायदद्यात्कृष्णोनड्वान्ब्राह्मणेदद्यान्नक्षत्रसूचकेभ्योवासोदद्यादन्येभ्योब्राह्मणेभ्यःसुवर्णंदद्यात्कृष्णागोःपायसेनब्राह्मणान्भोजयेत् सार्पदैवतेगंडजातेएषविधिः कात्यायनेनोक्तः कृतेशांतिर्भवतीति अष्टादशमाषंतत्परिमितंसुवर्णकृतमूलम् केचित्तु अष्टादशमाषमितिनपठंति यानितुपुराणसमुच्चयविहितान्यपिबैल्वादीन्यत्रप्रतिषिद्धानि तेषुविकल्पः अथशौनकोक्तमार्गेणमूलशांतिप्रयोगः उक्तकालेगोमुखप्रसवंकृत्वादेशकालौसंकीर्त्यममास्यकुमारस्यकुमार्यावामूलप्रथमचरणादिजन्मसूचितपित्राद्यरिष्टादिशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसनवग्रहमखांमूलजननशांतिंकरिष्यइतिसंकल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानिकृत्वाचार्यब्रह्मसदस्यानृत्विजश्चाष्टौचतुरोवावृत्वामधुपर्कवस्त्रालंकारादिभिर्यथाविभवमर्चयेत् ततः आचार्यः प्राणानायम्यास्मिन्कर्मणिआचार्यकर्मकरिष्यइतिसंकल्प्ययदत्रसंस्थितमितिसर्षपान्विकीर्यापोहिष्ठादिमंत्रैः कर्मभूमिंप्रोक्ष्यमंडपपक्षेमंडपदेवतापूजांकृत्वाईशानदेशेवर्णकैः स्वस्तिकंविरच्य तत्रमहीद्यौरितिभूमिंस्पृष्ट्वा ओषधयः समितिद्रोणप्रमाणव्रीहीन्निक्षिप्यतत्राकलशेष्वितिकुंभंनिधायेमंगंगेइतिवारिणाऽऽपूर्यगंधद्वारामितिगंधंयाओषधीरितिओषधीः ओषधयः समितियवान् कांडात्कांडादितिदूर्वाः अश्वत्थेवइतिपंचपल्लवान् चूतपल्लवांश्च स्यो

नापृथिवीतिसप्तमृदः याःफलिनीरितिफलम् सहिरत्नानीतिपंचरत्नानि आपोहिष्ठेतित्र्यृचेनपंचगव्यम् हिरण्यवर्णइतिसूवर्णंचप्रक्षिप्य युवासुवासाइतिकलशंवाससासंवेष्ट्यपूर्णादिर्वीतितदुपरिताम्रादिमयंपूर्णपात्रंनिदध्यात् कुंभस्थापनादौयथाशाखंमंत्रपाठः ततोरुद्रकलशाच्चतुर्दिक्षुचतुरःकलशान्स्थापयित्वापूर्णपात्रनिधानांतंकुर्यात् प्रतिकलशंमंत्रावृत्तिः मध्यकुंभेसुवर्णनिर्मितांरुद्रप्रतिमांत्र्यंबकमितिमंत्रेणावाह्यपूजयेत् अस्यवासिष्ठोरुद्रोनुष्टुप् ततएकऋत्विक्कुंभंस्पृष्ट्वारुद्रैकादशनींजपेत् यदियाजुषोयजमानः बह्वृचश्चेच्चत्वारिरुद्रसूक्तानि छंदोगस्तुरुद्रसामानि अत्रशक्तितएकादशाष्टत्रिद्व्येकसंख्याग्राह्या केचित्तुरुद्रःसर्वसाधारणोबह्वृचच्छंदोगयोस्तुसूक्तसाम्नोर्व्यवस्थितविकल्पइत्याहुः कद्रुद्रायेतिनवर्चस्यसूक्तस्यघोरःकण्वोरुद्रोगायत्रीजपेविनि० इमारुद्रायतवसइत्येकादशर्चस्यकुत्सरुद्रआद्यानवजगत्योंत्येद्वेत्रिष्टुभौ जपेविनि० आतेपितारितिपंचदशर्चस्यगृत्समदोरुद्रस्त्रिष्टुप्जपेविनि० इमारुद्रायस्थिरधन्वनइतिचतुर्ऋचस्यवसिष्ठोरुद्रस्तिस्रोजगत्योंत्यात्रिष्टुप् जपेविनि० आवोराजानंवामदेवोरुद्रस्त्रिष्टुप् जपेविनि० तमुष्टुहिभौमोत्रिरुद्रस्त्रिष्टुप्जपेविनि० भुवनस्यपितरंऋजिश्वारुद्रस्त्रिष्टुप् जपेवि० एकादशानांरुद्रसाम्नांवामदेवोरुद्रआद्यस्यत्रिष्टुप् ततश्चतुर्णांगायत्री ततस्त्रयाणामुत्कृतिश्छंदः जपेवि० ततएकऋत्विङ्मध्यकुंभेत्र्यंबकमित्यष्टसहस्रंजपेत् अन्येषुतुक्रमेण आशुःशिशानइतित्रयोदशर्चस्यइंद्रोप्रतिरथऋषिःइंद्रोदेवताचतुर्थ्याबृहस्पतिस्त्रिष्टुप्छंदः अंत्यानुष्टुप् जपेवि० त्वमग्नेरुद्रइत्यनुवाकस्यहव्यवाड्ऋषिःअग्न्यात्मारुद्रोजगतीज० त्वमग्नइत्य०ज० रक्षोहणमितिपंचविंशर्चस्यांगिरसःपायुरग्निस्त्रिष्टुप् चतुस्रोन्त्यानुष्टुभः जपेविनि०

अत्रसंख्यापूर्वोक्ता शक्त्याग्राह्याचतुर्थेतुपवमानमपिसकृत् यद्वाएतेषामपिरुद्रकुंभएवजपः चतुर्षुतुशांतिजपइति पंचकुंभासंभवेकुंभद्वयंवा अस्मिन्पक्षेरुद्रकुंभेरुद्रादिजपः अन्यस्मिंस्तुवरुणमावाह्यशांतिजपइति अथवापंचकुंभस्थानेएकएवचतुःप्रस्रवणः तत्रमध्यमकुंभकार्यंमध्यकुंभेकुंभचतुष्टयकार्याणिचतुर्षुप्रस्रवणेषु इतिविवेकः ततः पूर्वस्थापितकुंभोत्तरतश्चतुर्विंशद्दलंपंकजंपंचवर्णैः शुक्लतंदुलपिष्टेनवाकृत्वा कर्णिकायांमंत्रवत्कुंभंसंस्थाप्यगंधद्वारामित्यंतंकृत्वा शतमूलानितदलाभेविष्णुक्रांतासहदेवीतुलसीशतावरीकुशान्कुंकुमंचप्रक्षिप्य याओषधीरित्यादिपूर्णपात्रनिधानांतंकृत्वोपरिवस्त्रमष्टदलंकृत्वाकर्णिकायांमोषुणइतिनिष्कतदर्धतदर्द्धनिर्मितांनिर्ऋतिप्रतिमांपंचामृतस्नापितांस्थाप्यतद्दक्षिणतइंद्रंवोमधुच्छंदाइंद्रोगायत्रीलींद्रं तदुत्तरतश्च अप्सुमेमेधातिथिरापोनुष्टुप्इत्यपःस्थापयेत् ततःप्रागादितश्चतुर्विंशतिषुभूमिस्थदलेषुउत्तराषाढाद्यनुराधांतानिनक्षत्राणितद्देवताश्चस्थापयेत् ताश्चविश्वेदेवाः विष्णुः वसवः वरुणः अजैकपात् अहिर्बुध्न्यः पूषा अश्विनौ यमः अग्निः प्रजापतिः सोमः रुद्रः अदितिः बृहस्पतिः सर्पाः पितरः भगः अर्यमा सविता त्वष्टावायुः इंद्राग्नी मित्रइति ततोलोकपालानावाह्य नैर्ऋतेग्निस्थापनंकृत्वातदीशान्येनवग्रहांस्तत्तन्मंत्रैरावाह्यान्वादध्यात् चक्षुषीआज्येनेत्यंतमुक्त्वानवग्रहानमुकसंख्याभिः समिच्चर्वाज्याहुतिभिः अधिदेवताः प्रत्यधिदेवताः लोकपालान्विनायकादींश्च प्रत्येकममुकसंख्याभिः समिच्चर्वाज्याहुतिभिः निर्ऋतिंप्रतिद्रव्यमष्टोत्तरशतसंख्याभिर्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः इंद्रमपश्चप्रतिद्रव्यमष्टाविंशतिसंख्याभिर्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः विश्वेदेवाद्यांश्चतुर्विंशतिदेवता अष्टाष्टसंख्याभिःपायसाहु

तिभिः रक्षोहणंकृणुष्वेतिपंचदशार्ग्भिः प्रत्यृचमष्टाष्टाभिः कृसराहुतिभिः सवितारंदुर्गांत्र्यंबकंऋत्विकृस्तुतिंदुर्गांवास्तोष्पतिंअग्निंक्षेत्राधिपतिंमित्राव
रुणौअग्निंएताअष्टाष्टसंख्याभिःकृसराहुतिभिः श्रियंहिरण्यवर्णामितिपंचदशार्ग्भिः प्रतिमंत्रमष्टसंख्याभिः समिदाज्यचर्वाहुतिभिः सोमंत्रयोदशवारंपा
यसाहुतिभिः रुद्रंचतुर्गृहीतेनाज्येनअग्निंवायुंसूर्यंप्रजापतिंचाज्येनशेषेणस्विष्टकृतमित्यादिपूर्णपात्रनिधानांतंकृत्वास्वस्वमंत्रैर्निर्ऋत्यादिपूजांकुर्यात्
तत्रवस्त्रयुग्मं रक्तचंदनंकृष्णासुरभीणिपुष्पाणि मेषशृंगस्यधूपः नैवेद्यंपुरुषाहारान्नंपोलिकाश्च ब्राह्मणस्यसुरास्थानेसैंधवमिश्रंक्षीरं मांसस्थानेल-
वणयुक्तंपायसं क्षत्रियादीनांतुसतिसंभवेसुरव्यमेव एतावन्नैवेद्यं पूजांसमाप्यअन्वाधानक्रमेणपायसकृसरचरूनश्रपयित्वाज्यभागांतंकुर्यात् त
तोयजमानः सर्वदेवताउद्दिश्यत्यागंकुर्यात् ततोऋत्विक्सहितआचार्योजुहुयात् तद्यथा नवग्रहादिदेवताधिप्रत्यधिदेवताविनायकादीनांतत्तन्मंत्रैः सामि
दाज्यचरूभिर्दिश्यसंख्ययाहुत्वानिर्ऋतेरिंद्रस्यापांचमंत्रैः क्रमेणद्रव्यचतुष्टयंहुत्वावक्ष्यमाणाग्भिर्जुहुयात् कृणुष्वेतिपंचदशर्चस्यगौतमोवामदेवोरक्षो
हाग्निस्त्रिष्टुप् कृसरहोमेवि० प्रत्यृचमष्टसंख्ययासर्वत्रजुहुयात् गायत्र्याकृसरंजातवेदसेकश्यपोदुर्गात्रिष्टुप्कृसरहोमेवि० त्र्यंबकं० सिराधुंजंतीत्यस्यबुधऋत्विकृ
स्तुतिर्गायत्री कृसरहोमेवि० तामग्निवर्णांसौभरिर्दुर्गात्रिष्टुप् वास्तोष्पतोवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् अग्निंमेधातिथिरग्निर्गायत्री क्षेत्रस्यवामदेवः क्षेत्रपालो
नुष्टुप् गृणानाजमदग्निर्मित्रावरुणौगायत्री अग्निंदूतंपुरोदधइत्यस्य आंगिरसोविरूपोग्निर्गायत्री सर्वत्रकृसरहोमेविनियोगः हिरण्यवर्णामितिपंचदशा-
र्चस्य आनंदकर्दमचिक्लीतेंदिरासुताऋषयः श्रीर्देवता आद्यास्तिस्रोनुष्टुभः चतुर्थीप्रस्तारपंक्तिः पंचमीषष्ठ्यौत्रिष्टुभौ ततोष्टावनुष्टुभः अंत्याप्रस्तार

पंक्तिः प्रत्यृचंसमिदाज्यचरूनष्टशताष्टाविंशत्यष्टान्यतरसंख्ययाहोमेविनि० त्वन्नःसोमविश्वतइत्यस्यप्रगाथःसोमस्त्रिष्टुप्पायसहोमेवि० त्वन्नःसोमविश्वतोगोपाइतिवामंत्रः त्वन्नःसोमसुक्रतुरितिवा अनयोरैंद्रोविमदःसोमःप्रस्तारपंक्तिः ततश्चतुर्गृहीताज्यं यातेरुद्रेतिकश्यपोरुद्रःस्वराडनुष्टुप् ततःस्रुवेणव्यस्तसमस्तव्याहृतिभिराज्यंहुत्वास्विष्टकृदादिप्रायश्चित्तहोमांतंकुर्यात् ततोदिक्पालेभ्योनवग्रहेभ्योविनायकादिभ्योनिर्ऋतयेइंद्रायाग्नयेरुद्रायक्षेत्रपालायसदीपमाषभक्तबलीन्दद्यात् ततआचार्योयजमानोवापूर्णाहुतिंजुहुयात् तत्रमंत्राः समुद्रादूर्मिरित्येकादशर्चस्यवामदेवोग्निस्त्रिष्टुप् अंत्याजगतीपूर्णाहुतिहोमेवि० प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् पूर्णा० पूर्णादर्वीतिविश्वेदेवाःशतक्रतुरनुष्टुप् पूर्णाहुति० सप्ततेअग्नेसप्तवानग्निर्जगती पूर्णाहुति० ततःप्रणीताविनयनादिकर्मशेषंसमाप्यचतुःकुंभमध्यवर्तिनंकुंभंदक्षिणतःस्पृष्ट्वात्र्यंबकमितिशतवारंजपेत् याजुषश्चेद्यजमानस्तदारुद्रैकादशिनीमपि बह्वृचश्चेद्रुद्रसूक्तानि सामगश्चेद्रुद्रसामानि आथर्वणश्चेत्त्र्यंबकमंत्रमात्रं अथवाएकादशाष्टत्रिद्व्येकसंख्ययारुद्रजपः शतंत्र्यंबकजपश्च सर्वेषां ततोरुद्रंनिर्ऋतिंचपंचोपचारैःसंपूज्य त्र्यंबकंमोषुणइत्युपस्थायसर्वकलशोदकंपात्रांतरेगृहीत्वासर्त्विगाचार्योयजमानंसर्वौषधीभिरनुलिप्तांगंधृतनववस्त्रंतद्वामतोधृतनववस्त्रांसपुत्रांतत्पत्नीसुपवेश्य वक्ष्यमाणैर्मंत्रैरभिषिंचेत् तेच अक्षीभ्यामितिषण्णांकश्यपोविवृहायक्ष्मनाशनोनुष्टुप् अभिषेकेवि० त्रिभिष्ट्वंदेवेतिसप्तानांवसिष्ठऋषिः आद्यानांत्रयाणामग्निर्देवता ततश्चतुर्णांविश्वेदेवाआद्यागायत्री द्वितीयानुष्टुप् ततस्तिस्रोगायत्र्योंत्येद्वेअनुष्टुभौ अभिषेकेविनि० आपोहिष्ठेतिनवर्चस्यांबरीषःसिंधुद्वीपआपोगायत्री अंत्येद्वेअनुष्टुभौ पंचमीवर्द्धमानासप्तमीप्रतिष्ठा अभिषेके

विनियोगः आपइद्वेतिहृयस्य समर्षयोविश्वेदेवाअनुष्टुप् अभिषेकेवि० सहस्राक्षेणेतिप्राजापत्योयक्ष्मनाशनोयक्ष्मह्नात्रिष्टुप् अभिषेकेवि० देवस्यत्वेत्यापस्तंबशारवागतैस्त्रिभिर्मंत्रैः यज्जाग्रतइतिषण्णां प्रजापतिर्मनस्त्रिष्टुप् अभिषेके० योसौवज्रधरोदेवोमहेंद्रोगजवाहनः मूलजातशिशोर्दोषंमातृपित्रोर्व्यपोहतु १ योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु २ योसौदंडधरोदेवोधर्मोमाहिषवाहनः मूलजातशिशोर्दोषंव्यपोहतुयमोमम ३ योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः प्रशामयतुमूलोत्थंदोषंगंडांतसंभवम् ४ योसौपाशधरोदेवोवरुणश्चजलेश्वरः नक्रवाहःप्रचेतानोमूलोत्थाघंव्यपोहतु ५ योसौदेवोजगत्प्राणोमारुतोमृगवाहनः प्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः ६ योसौनिधिपतिर्देवः खड्गभृद्वाजिवाहनः मातापित्रोःशिशोश्चैवमूलदोषंव्यपोहतु ७ योसौपशुपतिर्देवः पिनाकीवृषवाहनः आश्लेषामूलगंडांतदोषमाशुव्यपोहतु ८ विघ्नेशः क्षेत्रपोदुर्गालोकपालानवग्रहाः सर्वदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः ९ सुरास्त्वामभिषिंचंत्वित्यादिभिश्चाभिषिच्य तच्छंयोःशंभुर्विश्वेदेवाःशक्वरी अभिषेके० ततोरुद्रनिर्ऋतिकलशोदकेनान्येनचशताच्छिद्रमंतर्धायाभिषिक्तोयजमानोधौतेवाससीधृत्वातिलकंकृत्वाचार्यादीन्संपूज्याचार्यायसवत्सांधेनुंब्रह्मणेवृषभंरुद्रजापिनेकृष्णमनड्वाहं ऋत्विग्भ्योयथाशक्तिदक्षिणांभूयसींचदत्वानिर्ऋत्यादीनामुत्तरपूजांविधायउत्तिष्ठ० अभ्यारमि० यांतुदेवगणाइतिविसृज्यसंकल्पपूर्वकमाचार्यहस्तेप्रतिपाद्याग्निंसंपूज्यगच्छगच्छेत्यग्निंविसृज्यशततदर्द्धदशान्यतरब्राह्मणभोजनंसंकल्प्यशांतिसूक्तजपंकारयित्वायस्यस्मृत्येतिजपित्वाकर्मसंपूर्णतांवाचयित्वाकर्मेश्वरार्पणंकृत्वासुहृद्युतोभुंजीतेति इतिमूलशांतिप्रयोगः अथकश्यपसंहितो

क्तोमूलजननशांतिविधिः ईशानभागेपूर्वेवाउत्तरेवास्वसद्मतः मंडपंचतुरस्रंचचतुर्हस्तंप्रमाणतः चतुर्द्वारसमायुक्तंतोरणाद्यैरलंकृतं गोमयेनानुलिप्ते तुचतुरस्रेचमंडले पूर्वोक्तलक्षणोपेतंकुंडमीशानतोबहिः सुवर्णेनप्रमाणेनतदर्धार्धेनवापुनः यथावित्तानुसारेणप्रतिमांनिर्ऋतेः सुधीः उदुंबरवटाश्वत्थप्लक्षाम्रकसपल्लवं शतौषधीमूलशाखनवरत्नानिमृत्तिकां पंचामृतांबुसद्बीजंकुंकुमंरोचनंफलं कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाकच्चोरकंमुस्तासर्वौषध्योदशैवहि गजाश्वरथ्यावल्मीकसंगमस्थानसंभवां ह्रदगोराजनगरद्वारतश्चाष्टमृत्तिकां तिलमाषव्रीहियवगोधूमानिप्रियंगवः चणकैःसहिताश्चाष्टौसद्बीजाख्यानिसर्वदा ब्राह्मणाःश्रोत्रियाश्चाष्टौद्वादशत्वथषोडश ततस्तान्वरयेत्कर्तास्वस्तिवाचनपूर्वकं ईशानादिचतुष्कोणेष्वव्रणान्जलपूरितान् पूर्वोक्तद्रव्यसंयुक्तान्स्थापयेद्रक्तवर्णकान् शताच्छिद्रंभवेत्कुंभंस्थापयेत्तंदुलोपरि स्थापयेन्मंडपेमध्येखड्गचर्मोग्रदंष्ट्रिणम् मोषुणश्चेतिमंत्रेणनिर्ऋतिंचार्चयेत्ततः शुक्लाक्षतांबरैःषोडशोपचारांश्चकारयेत् दधिमध्वक्षतैःकुंभान्वरुणैस्तल्लिंगमंत्रकैः गंधपुष्पैःसधूपाद्यैरर्चयेत्कुशदूर्वकैः रुद्रेणक्रमशोभद्राअग्नेःसूक्तेनभक्तितः आनोभद्राअनेनैवपुरुषसूक्तेनचार्चयेत् मूलंप्रजामित्यष्टौवावाक्यान्याचार्यकोजपेत् दुर्गान्ग्रहदिगीशलोकपालांश्चपूजयेत् स्वगृह्योक्तविधानेनकुंडेग्निंस्थापयेत्ततः प्रजापतयेस्वाहेतिमुखांतंजुहुयाद्यमं मूलायस्वाहाप्रजापतयेस्वाहेत्युपहोममंत्रौ पलाशसमिदाज्येनत्वनेनाष्टसहस्रकं अथवाष्टोत्तरशतंप्रत्येकंजुहुयात्ततः मूलंप्रजामित्यष्टाभिर्वाक्यैर्मंत्रद्वयेनच सावित्रसौम्यनैर्ऋत्यमंत्रैस्त्वत्यसंभवैः समिद्भिश्चतिलव्रीहीन्हुत्वाव्याहृतिभिस्ततः पूर्णाहुतिंचजुहुयाज्जपादीनांचपूर्वकं ततोमंगलघोषैश्चस्नानकर्मसमाचरेत् आद्यपा

देपितुर्गंडेत्रयाणामभिषेचनं इतरत्रशिशोर्मातुरभिषेकंचकारयेत् धारयित्वाबृहत्कुंभंशताच्छिद्रंसमाहितः ततःकुर्यादनेनैवतुकर्मणानिर्ऋतिःप्री
यतामितिवाचयेत् आचार्यायवृषंलोहंपिंडंदद्यात्सदक्षिणं आचार्यान्यब्राह्मणेभ्योदद्याच्छक्त्याचदक्षिणां श्रोत्रियायविशिष्टायब्राह्मणायकुटुंबि
ने वस्त्रालंकारसंयुक्तांधेनुंदद्यात्पयस्विनीम् ब्राह्मणान्भोजयेत्पश्चाद्दंभलोभविवर्जितः कुरुतेशांतिकंयस्तुगंडदोषात्प्रमुच्यते एतत्सर्वंसार्पभे
पिसमानंकिंचिदुच्यते सर्पेभ्यःस्वाहेतिमंत्रंमुखांतेजुहुयात्ततः आश्लेषाभ्यःस्वाहादंदशूकेभ्यःस्वाहेत्युपहोममंत्रौ इदंसर्पेभ्यइत्यष्टौवाक्यैः
कार्यंतुपूर्ववत् तेषामास्तीकऋषिएषुसर्पाश्चदेवताः नमोअस्तुसर्पेभ्यइत्युपचारांश्चकारयेत् अयंचविधिस्तैत्तिरीयपरः तदीयमंत्राग्निमुखयुक्त
त्वात् इतिकश्यपोक्तोमूलाश्लेषाशांतिविधिः अथशौनकोक्तआश्लेषाशांतिविधिः आश्लेषायांतुजातानांशांतिंवक्ष्याम्यतःपरं जातस्यद्वादशाहेचशां
तिहोमंसमाचरेत् असंभवेतुजन्मर्क्षेअन्यस्मिन्वाशुभेदिने स्नातोभ्यंगादिभिस्तस्मिन्वरयेत्तुद्विजोत्तमान् ऋत्विक्संख्यामूलवत् विभवेपंचकुंभा
स्तुद्वयंवातदलाभतः कुंभद्वयस्यमूलव्यवस्थातोवैलक्षण्यमाह देवतास्थापनेचैकमेकंरुद्राभिमंत्रणे चतुर्विंशद्दलोपरिप्रधानदेवतास्थापनार्थमेकोद्वि
तीयश्चतुःप्रस्रवणः मूलर्क्षोक्तप्रकारेणकुंभेनिक्षिप्यपूजयेत् चतुःप्रस्रवणेपंचरत्नादिचतुर्विंशद्दलस्थेचशतमूलानीत्यर्थः गोमयालेपितेदेशेधात्वाद्युः
परिशोभिते पंकजंकारयेत्तत्रचतुर्विंशद्दलान्वितं तंडुलैःकारयेद्यद्वारक्तपीतासितासितैः कर्णिकायांन्यसेद्व्रीहींस्थापयेत्तेषुकुंभकम् आकलशेष्वित्य
नयाकलशस्थापनंशुभम् इमंमेगंगेमंत्रेणपूरयेत्तीर्थवारिणा कुंभंचवस्त्रगंधाद्यैस्तत्तन्मंत्रैःप्रपूजयेत् याःफलिनीरित्यनयाक्षिपेद्वलौषधादिकान्

कुंभोपरिस्थपात्रेतुआश्लेषाप्रतिमांयजेत् निष्कनिष्कार्धपादैर्वाकारयित्वास्वशक्तितः तत्पूर्वोत्तरनक्षत्रेदक्षिणोत्तरयोर्यजेत् ऐंद्रादीशानपर्यंतमितरर्क्षापिपूजयेत् नक्षत्रदेवताइतिकेचित् मूलोक्तेनविधानेनकुंभयोरभिमंत्रणं रुद्रार्चारुद्रकुंभेतुपूर्ववच्छेषमाचरेत् पंचामृतस्नानादिस्तुशादिनैवेद्यांतमित्यर्थः नमोअस्तुसर्पेभ्यःपूजामंत्रइतीरितः सर्पोरक्तस्त्रिनेत्रश्चद्विभुजःपीतवस्त्रकः फलकासिधरस्तीक्ष्णोदिव्याभरणभूषितः एवंध्यात्वाततोभ्यर्च्यहोमकर्मसमाचरेत् कर्तुःशाखोक्तमार्गेण आचार्यस्याथवाचरेत् मुखान्तंकर्मनिर्मायहविरादायशास्त्रतः इदंसर्पेभ्योजुहुयात्साधिप्रत्यधिदेवतम् इदंहवि अष्टोत्तरशतंवाथअष्टाविंशतिमेवच मूलनक्षत्रवच्छेषंहोमकर्मसमाचरेत् पूर्णाहुत्यंतकर्माणि कृत्वासम्पातकंतथा पूर्णाहुत्यंतमित्यत्र रक्षारुद्रकुंभादौ पुनःरुद्रादिजपोनास्ति कुम्भेजलंचप्रक्षिप्यअभिषेकमथाचरेत् दारपुत्रसमेतस्ययजमानस्यपूर्ववत् अभिषिंचेत्तथाऽऽचार्योऋत्विग्भिःसहितस्तथा अभिमंत्रितकुंभाद्भिरभिषेचनमाचरेत् तथापौराणमंत्रैश्चपल्लवैरभिषेचयेत् आश्लेषाऋक्षजातस्यमातापित्रोर्धनस्यच भ्रातृज्ञातिकुलस्थानांदोषंसर्वंव्यपोहतु १ योऽसौवागीश्वरोनाम अधिदेवोबृहस्पतिः मातापित्रोःशिशोश्चैवगण्डान्तंच व्यपोहतु २ पितरःसर्वभूतानांरक्षन्तुपितरःसदा सर्पनक्षत्रजातस्यवित्तंचज्ञातिबान्धवान् एवंकृतेऽभिषेकेतुसर्पशान्तिर्भवेद्ध्रुवम् ततः शुक्लाम्बरधरोयजमानःसुभूषितः दक्षिणाभिस्ततोविप्रान्मूलवच्चप्रतोषयेत् भुक्तवद्भ्यश्चविप्रेभ्यःस्वीकुर्यादाशिषंगृही इत्युक्तेनविधानेनसर्वारिष्टंव्यपोहति उत्तरपूजायामर्घ्यमाह सर्पाधीशनमस्तुभ्यंनागानांचगणाधिप गृहाणार्घ्यंमयादत्तंसर्वाऽरिष्टप्रशान्तये मूलनक्ष

अथत्कुर्यात्सार्पगंडेस्वनामतः आश्लेषामूलगंडांतदोषमाशुव्यपोहित्वित्येवमूहः यद्वामूलगंडांतेयथागंडांतशांतिर्भिन्नाएवमत्रापि इतिशौनकोक्तःआश्लेषाशांतिविधिः ज्योतिर्निबंधेतुविशेषउक्तः नागप्रतिकृतिंकुर्यात्सौवर्णींपलमानतः अथयथाशक्तितःकुर्याद्वित्तशाठ्यंविवर्जयेत् कद्रुद्रायप्रचेतसइतिमंत्रविशेषतः नैवेद्यंद्व्यामिषंचास्तिपूजादानकृतिःसमा अयुतंहवनंस्यात्तिलैःसाज्यैःप्रधानकैः ब्रह्मवृक्षस्यसमिधःशतमष्टोत्तरंशुभाइति अथप्रयोगः द्वादशाहेजन्मर्क्षेन्यस्मिन्वाशुभेहनिगोमुखप्रसवंकृत्वायजमानःकृताभ्यंगोदेशकालौस्मृत्वा अस्यबालकस्य आश्लेषाजन्मर्क्षसूचितपित्राद्यरिष्टादिशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थमाश्लेषाजननशांतिंकरिष्येइतिसंकल्प्यतदंगतयागणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यवरणानिकुर्यात् ततऋत्विजश्चाष्टौचत्वारोवा ततःआचार्योऽस्मिन्कर्मणिआचार्यकर्मकरिष्ये इतिसंकल्प्य यदत्रसंस्थितमितिसर्षपान्विकीर्य आपोहिष्ठेतिमंत्रैःकर्मभूमिंप्रोक्ष्यईशानदेशेपंचवर्णैःस्वस्तिकंविरच्यतत्रैकंकलशंस्थापयेत् व्रीहयोद्रोणप्रमाणाः आपोहिष्ठेतित्र्यृचेनपंचगव्यंतत्रनिक्षिपेत् ततोविभवेतस्मात्कलशाच्चतुर्दिक्षुचतुरःकलशान्स्थापयेत् ततःपूर्णपात्रोपरिस्थवस्त्रेसौवर्णींरुद्रप्रतिमांत्र्यंबकमितिमंत्रेणावाह्यपूजयेत् अस्यवसिष्ठोरुद्रोनुष्टुप् ततःएकऋत्विक्कुंभंस्पृष्ट्वारुद्रैकादशिनींजपेत् यदियाजुषोयजमानः बह्वृचश्चेच्चत्वारिरुद्रसूक्तानि छंदोगश्चेद्रुद्रसामानि रुद्रसाम्नोःएकादशाष्टत्रिद्व्येकसंख्याग्राह्या केचित्तुरुद्रःसर्वसाधारणोबह्वृचच्छंदोगयोस्तुसूक्तसाम्नोरुद्रेणसहविकल्पइत्याहुः इदमेवशिष्टाःकुर्वन्ति रुद्रसूक्तानितु कद्रुद्रायेतिघोरःकण्वोरुद्रोगायत्री इमारुद्रायतवसइत्येकादशर्चस्यसूक्तस्यकुत्सो

रुद्रोनवजगत्योंत्येद्वे अनुष्टुभौ आतेपितरितिपंचदशर्चस्यसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप् इमारुद्रायस्थिरधन्वनइतिचतसृणांवसिष्ठस्तिस्त्रोजगत्योंत्यात्रिष्टुप् आवोराजानंवामदेवोरुद्रस्त्रिष्टुप् तमुष्टुहिभौमोत्रिरुद्रस्त्रिष्टुप् भुवनस्यपितरंऋजिश्वारुद्रस्त्रिष्टुप् त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् ततस्त्र्यंबकमितिमन्त्रमष्टोत्तरशतंपावमानीश्चमध्यकुम्भेजपेत् ततःप्राक्कुंभेआशुःशिशानइतित्रयोदशर्चस्यसूक्तस्यइंद्रोप्रतिरथऋषिः इंद्रोदेवता बृहस्पतिस्त्रिष्टुप्छंदोंत्यानुष्टुप् दक्षिणकुंभेत्वमग्नेरुद्रइत्यनुवाकस्यहव्यवाड्ऋषिःअग्न्यात्मारुद्रोदेवताजगतीच्छंदः पश्चिमकुंभेरक्षणोइत्यस्यवामदेवोग्निस्त्रिष्टुप् उत्तरकुम्भेरक्षोहणमितिपंचविंशर्चस्यसूक्तस्य आंगिरसःपायुस्त्रिष्टुप् अंत्याश्चतस्त्रोनुष्टुभः अत्रापिपूर्वोक्तसंख्याशक्त्याग्राह्या पंचकुंभासंभवेचतुःप्रस्रवणंपंचवल्कंकुंभंस्थापयित्वा सर्वंतत्रैवकुर्यात् ततःकुंभोत्तरतश्चतुर्विंशद्दलपंकजंपंचवर्णैःकृत्वा कर्णिकायांकलशंस्थापयेत् तत्रयाःफलिनीरितिरत्नौषधीःक्षिपेत् ततःपूर्णपात्रोपरिसर्पप्रतिमामाश्लेषाप्रतिमांनमोअस्तुसर्पेभ्यइत्यावाहयेत् ततःसर्पोरक्तस्त्रिनेत्रश्चवह्निभुजःपीतवर्णकः फलकासिधरस्तीक्ष्णोदिव्याभरणभूषितइतिसर्पंध्यात्वा तद्दक्षिणेबृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप् इतिमंत्रेणप्रतिमायांबृहस्पतिमावाह्य उत्तरतश्चउदीरतांशंखःस्वधास्त्रिष्टुप् अनेनप्रतिमायांपितॄनावाह्यप्रागादितश्चतुर्विंशतिपंकजदलेषु पूर्वामारभ्य पुनर्वसुपर्यन्तंनक्षत्राणितद्देवताआवाहयेत् यथा भगः १ अर्यमा २ सविता ३ त्वष्टा ४ वायु ५ इंद्राग्नी ६ मित्रः ७ इंद्रः ८ निर्ऋतिः ९ आपः १० विश्वेदेवाः ११ विष्णुः १२ वसवः १३ वरुणः १४ अजैकपात् १५ अहिर्बुध्न्यः १६ पूषा १७ अश्विनौ १८ यमः १९ अग्निः २० प्रजापतिः २१ सोमः २२ रुद्रः २३

अदितिः २४ इतिततोलोकपालानावाह्य पदार्थानुसमयेनकांडानुसमयेनवापूजयेत् ततःआचार्योऽग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानम् नवग्रहान्प्रत्येकममुकसंख्याभिः समिच्चर्वाज्याहुतिभिः अधिदेवताःप्रत्यधिदेवताश्चामुकसंख्याभिः समिच्चर्वाज्याहुतिभिर्विनायकादीन् लोकपालांश्चप्रत्येकं अमुकसंख्याभिः समिच्चर्वाज्याहुतिभिः प्रधानदेवतांसर्पान्प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः पायसाहुतिभिः रक्षोहणंकृणुष्वेतिपंचदशार्ग्भिः प्रत्यृचमष्टसंख्याभिः कृसराहुतिभिः सवितारंदुर्गांत्र्यंबकं ऋत्विक्स्तुतिं दुर्गांवास्तोष्पतिं अग्निंक्षेत्राधिपतिंमित्रावरुणौ अग्निं एताः अष्टाष्टसंख्याभिः कृसराहुतिभिः श्रियंहिरण्यवर्णामितिपंचदशर्ग्भिः प्रतिमंत्रमष्टसंख्याभिः समिदाज्यचर्वाहुतिभिः सोमंत्रयोदशसंख्याभिःपायसाहुतिभिः रुद्रंचतुर्गृहीतेनाज्येन अग्निंवायुंसूर्यंचाज्येनशेषेणास्विष्टकृतमित्यादिपूर्णपात्रनिधानांतंकृत्वापायसकृसरचरून्श्रपयित्वाज्यभागांतंकुर्यात् ततोयजमानोदक्षिणतः सर्वादेवताउद्दिश्यत्यागंकुर्यात् ततोऋत्विक्सहितआचार्योहोमंकुर्यात् तद्यथा नवग्रहानधिदेवताः प्रत्यधिदेवताः विनायकाद्याः लोकपालांश्चतत्तन्मंत्रैर्हुत्वासर्पेभ्योबृहस्पतयेपितृभ्यश्चतत्तन्मंत्रैर्द्रव्यचतुष्टयंहुत्वाभागादिचतुर्विंशतिदेवताभ्योऽष्टाष्टसंख्ययापायसंजुहुयात् कृणुष्वेतिपंचदशर्चस्यगौतमोवामदेवोरक्षोहात्रिष्टुप् कृसरहोमेविनियोगः गायत्र्याकृसरं जातवेदसेकश्यपोदुर्गात्रिष्टुप् कृसरहोमेवि० त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् कृसरहो० सीरायुंजंतीत्यस्यबुधःसौम्यऋषिः ऋत्विक्स्तुतिर्देवता गायत्रीच्छन्दः कृसरहोमेवि० तामग्निवर्णांसौभरिर्दुर्गात्रिष्टुप् कृसरहोमे० वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् कृसरहोमे० अग्निंकाण्वोमेधातिथिरग्निर्गायत्री कृसरहो० क्षेत्रस्य

पतिनावामदेवः क्षेत्रपालोनुष्टुप् कृसरहोमेवि० गृणानाभार्गवोजमदग्निर्मित्रावरुणौगायत्री कृसरहो० अग्निंदूतंपुरोदधइत्यस्य आंगिरसोविरूपोग्निर्गायत्री कृसरहो० हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुताऋषयः श्रीर्देवता आद्यास्तिस्रोनुष्टुभः चतुर्थीप्रस्तारपंक्तिः पंचमीषष्ठ्यौत्रिष्टुभौततोष्टावनुष्टुभः अंत्याप्रस्तारपंक्तिः होमेविनियोगः प्रत्यृचंसमिदाज्यचरूनष्टशताष्टाविंशत्यन्यतमसंख्यया जुहुयात् त्वन्नःसोमविश्वतइत्यस्यप्रगाथः सोमस्त्रिष्टुप् पायसहोमे० १३ त्वन्नःसोमविश्वतोगोपाइतिवामंत्रः त्वन्नःसोमसुक्रतुरितिवा अनयोरैन्द्रोविमदःसोमः प्रस्तारपंक्तिः यातेरुद्रेतिकश्यपोरुद्रः स्वराडनुष्टुप् चतुर्गृहीतमाज्यहोमेविनियोगः ततःस्रुवेणव्यस्तसमस्तव्याहृतिभिराज्यंहुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांतेदिक्पालेभ्यो नवग्रहेभ्योविनायकादिभ्यः सर्पेभ्योबृहस्पतयेपितृभ्योरुद्रायक्षेत्रपालायसदीपमाषभक्तबलीन्दद्यात् ततः आचार्योयजमानोवाचतुर्गृहीतेनद्वादशगृहीतेनवापूर्णाहुतिंजुहुयात् तत्रमंत्राः समुद्रादूर्मिरित्येकादशर्चस्यसूक्तस्य गौतमोवामदेवोग्निस्त्रिष्टुप् पूर्णाहुतिहोमे० प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् पूर्णादर्विविश्वेदेवाः शतक्रतुरनुष्टुप् सप्ततेअग्नेसप्तनवाग्निर्जगती पूर्णाहुतिहोमे० एतैर्मन्त्रैः पूर्णाहुतिंहुत्वाप्रणीतानिनयनादिकर्मशेषंसमाप्यरुद्रंसर्पांश्चपंचोपचारैः सम्पूज्य त्र्यंबकंमोषुणइत्युपस्थायसर्वकलशोदकंपात्रांतरेगृहीत्वासर्त्विगाचार्योयजमानं सर्वौषधीभिरनुलिप्तांगंधृतनववस्त्रंधृतनववस्त्रांसपुत्रांतत्पत्नींचाभिषिंचेत् अक्षीभ्यामितिषण्णांकश्यपोविवृहायक्ष्मनाशोनुष्टुप् त्रिभिष्ट्वंदेवेतिसप्तानां वसिष्ठऋषिः आद्यानांत्रयाणामग्निर्देवता ततश्चतुर्णांविश्वेदेवाः आद्यागायत्रीद्वितीयानुष्टुप् ततस्ति-

स्त्रोगायत्र्योंत्येद्वे अनुष्टुभौ आपइद्वेतिसप्तर्षयोविश्वेदेवा अनुष्टुप् आपोहिष्ठेतिनवर्चस्यांबरिषःसिंधुद्वीप आपोगायत्री पंचमीवर्द्धमानासप्त
मीप्रतिष्ठाअंत्येद्वे अनुष्टुभौ सहस्त्राक्षेणेतिप्राजापत्योयक्ष्मनाशनोयक्ष्महात्रिष्टुप् अभिषेकेविनियोगः ततः योसौवज्रधरोदेवोमहेंद्रोगजवाह
नः सार्पजातशिशोर्दोषंमातापित्रोर्व्यपोहतु योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः सप्तजिह्वश्चदेवोग्निः सार्पदोषंव्यपोहतु योसौदंडधरोदे
वोधर्मोमहिषवाहनः सार्पजातशिशोर्दोषंव्यपोहतुयमोमम योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः प्रशामयतुसार्पोत्थंदोषंगंडांतसंभव
म् योऽसौपाशधरोदेवोवरुणश्चजलेश्वरः नक्रवाहःप्रचेतानोसार्पोत्थाघंव्यपोहतु योसौदेवोजगत्प्राणोमारुतोमृगवाहनः प्रशामय-
तुसार्पोत्थंदोषंबालस्यशान्तये योसौनिधिपतिर्देवः खड्गभृद्वाजिवाहनः मातापित्रोःशिशोश्चैवसार्पदोषंव्यपोहतु योसौपशुपतिर्देवःपि
नाकीवृषवाहनः आश्लेषामूलगंडांतदोषमाशुव्यपोहतु विघ्नेशोक्षेत्रपोदुर्गालोकपालानवग्रहाः सर्वदोषप्रशमनंसर्वंकुर्वन्तुशांतिदाः आ-
श्लेषाऋक्षजातस्यमातापित्रोर्धनस्यच भ्रातृज्ञातिकुलस्थानांदोषंसर्वंव्यपोहतु योसौवागीश्वरोनामअधिदेवोबृहस्पतिः मातापित्रोःशिशो
श्चैवगंडांतंसंव्यपोहतु पितरःसर्वभूतानांरक्षन्तुपितरःसदा सर्पनक्षत्रजातस्यवित्तंचज्ञातिबांधवान् सुरास्त्वेत्यादिभिश्चाभिषिच्यतच्छं
योःशंयुर्विश्वेदेवाःशक्करी अभिषेकेविनियोगः ततःसर्वकलशोदकेनान्येनचशताच्छिद्रमंतर्धायाभिषिक्तोयजमानः आचार्यायधेनुं ब्रह्म-
णेवृषभंरुद्रजापिनेकृष्णमनड्वाहंरुद्रप्रतिमांच ऋत्विग्भ्योयथाशक्तिदक्षिणांदत्वासर्पाणामुत्तरपूजनंविधायताम्रपात्रेफलपुष्पादियुक्त

मर्घ्यंगृहीत्वा सर्पाधीशनमस्तुभ्यंनागानांचगणाधिप गृहाणार्घ्यंमयादत्तंसर्वारिष्टप्रशांतयेइत्यर्घ्यंदत्वाउत्तिष्ठेतिविसृज्यसंकल्पपूर्वकमाचार्यहस्तेप्रतिपाद्याग्निंसंपूज्यगच्छगच्छेतिविसृज्ययथाशक्तिब्राह्मणान्भोजयित्वाशांतिजपंकारयित्वासुहृद्युतोभुंजीत इतिदिनकरभट्टकृतेशांतिसारे आश्लेषाशांतिप्रयोगः अथज्येष्ठाशांतिविधिः गर्गः घटिकैकाचमात्रांतेज्येष्ठादौघटिकाद्वयं तयोःसंधिरितिज्ञेयंशिशुगंडंसमीरितम् प्रथमेचद्वितीयेचज्येष्ठायांचतृतीयके पादत्रयेजातनरोज्येष्ठायत्रप्रजायते ज्येष्ठांत्यपादजातस्तुपितुःस्वस्यचनाशनः जायतेनात्रसंदेहोदशाहाभ्यंतरेयथा ज्येष्ठर्क्षेचपुमान्जातःस्वाग्रजस्यविनाशनः ज्येष्ठर्क्षेकन्यकाजाताहंतिशीघ्रंधवाग्रजम् तस्माच्छांतिंप्रवक्ष्यामिगंडदोषप्रशांतये सुदिनेशुभनक्षत्रेचंद्रताराबलान्विते सूतकांतेतथाकुर्याज्ज्येष्ठाशांतिंविधानतः वज्रांकुशधरंदेवमैरावतगजान्वितम् कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनायकम् कर्षमात्रसुवर्णेनकषार्द्धेनाथपादतः तद्विधानंप्रकुर्वीतवित्तशाठ्यंनकारयेत् शालितंदुलसंपूर्णकुंभस्योपरिपूजयेत् इंद्रायेन्द्रोमरुत्वेतइतिमंत्रेणवाग्यतः गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः पूजयेद्विधिनाविप्रलोकपालगणान्वितम् रक्तवस्त्रद्वयोपेतंपूजयेत्सुरनायकम् तत्रसंस्थापयेत्कुंभांश्चतुर्दिक्षुविशेषतः तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितम् पुण्योदकसमायुक्तंवस्त्रयुग्मेनवेष्टितम् कुंभेषुविन्यसेद्धीमान्पंचगव्यंसमंत्रकम् पंचामृतंपंचरत्नंमृत्तिकाःपंचसंख्यकाः पंचवृक्षकषायांश्चपंचपल्लवकांस्तथा सुवर्णंकुशदूर्वाश्चशतौषधिविनिक्षिपेत् पूरयेद्वारुणैर्मन्त्रैःपंचकुंभान्प्रयत्नतः त्वन्नोअग्नेजपेदादौसत्वन्नोपिद्वितीयकम् समुद्रज्येष्ठाइतिच इमंमेगंगेचतु-

र्थकम् पूजयेयुर्वस्त्रयुग्मैश्चतुरः कलशानपि पूजयेयुरितिबहुवचनादृत्विक्कर्तृकापूजा जपंकुर्युःप्रयत्नेनमंत्रैरेभिर्द्विजोत्तमाः आनोभद्राजपंचादौभद्रा अग्नेद्वितीयकं तृतीयंपुरुषसूक्तं कद्रुद्रायचतुर्थकम् आचार्योमूलमंत्रेणजपंकुर्याद्विशेषतः इंद्रसूक्तंरुद्रजाप्यंजपेन्मृत्युंजयंततः इंद्रंसंपूज्यदेवेंद्रंवरुणंकुंभसंस्थितम् सुसंकल्पविधानेनहोमकर्मततश्चरेत् समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंतथा अष्टोत्तरसहस्रकमितिक्वचित्पाठः सर्पिषाचरुणाचैवमूलमंत्रेणवाग्यतः हुनेज्जाप्यंचतेनैवयतइंद्रभयेतिच तिलान्व्याहृतिभिर्हुत्वाशतमष्टोत्तरंपृथक् भार्याशिशुसमोपेतंयजमानंविशेषतः अभिषेकंप्रकुर्वीतसूक्तैर्वारुणसंज्ञितैः समुद्रज्येष्ठादिभिर्मंत्रैरिमंमेवरुणस्तथा द्यौःशांत्येत्यादिभिर्मंत्रैरभिषेकंसमाचरेत् ज्योतिर्निबंधे द्योषशीत्यादिभिर्मंत्रैरितिपाठः तन्मंत्रास्तुमहार्णवेप्रसिद्धाः अभिषेकनिवृत्तौतुयजमानःसमाहितः शुक्लांबराणिधृत्वाथकुर्यादाज्यावलोकनम् रूपंरूपेतिमंत्रेणचित्रंतच्चक्षुरेववा देवतापुरतःस्थित्वाधूपदीपनैवेद्यकम् दद्याद्वास्वमनंसम्यक्तांबूलार्घ्यंतथैवच नमस्तेसुरनाथायनमस्तुभ्यंशचीपते गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये आचार्यऋत्विगादीनांकारितंयत्फलंशुभम् लब्ध्वातुतत्फलंसम्यक्देवेन्द्रायनिवेदयेत् आचार्यादिभिःकारितंयत्कर्मतज्जन्यंशुभमाचार्यादिभ्यःप्रतिगृह्येंद्रायसमर्पयेत् आचार्यायचगांदद्यात्सुशीलांचपयस्विनीम् रक्तवर्णांवस्त्रयुतांसर्वालंकारभूषिताम् वस्त्रयुग्मपिधानांचयथाविभवसारतः यक्षगंधर्वसिद्धैश्चपूजितोऽसिशचीपते दानेनानेनदेवेशगंडदोषंविनाशय अनेनगांदद्यादित्यर्थः अष्टोत्तरशतंसंख्यंकुर्याद्ब्राह्मणभोजनम् तेभ्योपिद-

क्षिणांदत्वाप्रणिपत्यक्षमापयेत् अज्ञानाद्वाथवाज्ञानाद्वैकल्याद्वाधनस्यच यन्न्यूनमतिरिक्तंचतत्सर्वंसंतुमर्हसि अथप्रयोगः गोमुखप्रसवंकृत्वादेशकालौसंकीर्त्य अस्याशिशोर्ज्येष्ठाजननसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंज्येष्ठाजननशांतिंकरिष्येइतिसंकल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् ततःआचार्यः सर्षपविकिरणादिभूमिप्रोक्षणंकृत्वामहीद्यौरितिभूमिं स्पृष्ट्वा ओषधयः समितियवान्भूमौनिक्षिप्य आकलशेष्वितिकलशंसंस्थाप्यशालितंडुलैःकलशंपूरयित्वापूर्णादर्वीतिपूर्णपात्रंनिधायतदुपरि कर्षतदर्द्धंकल्पितामिंद्रप्रतिमामिंद्रायेंद्रोमरुत्वतइतिमंत्रेणवाग्यतःपूजयेत् पूजायांचवस्त्रद्वयंदद्यात् इंद्रभिन्नान्लोकपालान्समंतादावाह्यपूजयेत् ततःपूर्वादिदिक्षुचतुरःकुंभान्मध्येशतच्छिद्रंसंस्थाप्यदिक्कुंभेषुपंचगव्यंपंचामृतपंचरत्नपंचमृत्तिकापंचवृक्षकषायपंचपल्लवसुवर्णकुशदूर्वाः शतौषधीश्चक्षिप्त्वावस्त्रयुग्मेनवेष्टयित्वावरुणमावाह्यपूजयेत् पूजायांचवस्त्रद्वयंदद्यात् ततःपूर्वकलशेत्वन्नोअग्नइतिमंत्रेणदक्षिणंसत्वनोअग्नइतिपश्चात्समुद्रज्येष्ठेत्युत्तरंइमंमेगंगेइत्यभिमंत्रयेत् ततोऋत्विजश्चतुर्षुकुंभेषु आनोभद्राइतिसूक्तंभद्राअग्नेरितिसूक्तंपुरुषसूक्तंकद्रुद्रायेतिचसूक्तानिरुद्रंमृत्युंजयंचजपेयुः ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानं इंद्रंपलाशसमिदाज्यचरुद्रव्यैरष्टशतसंख्यया इंद्रायेंदोमरुत्वतइतिमंत्रेण प्रजापतिंतिलद्रव्येणाष्टशतसंख्ययाव्याहृतिभिः शेषेणस्विष्टकृतमित्यादिहोमकालेइंद्रायेंदोमरुत्वतयतइंद्रभयामहइति चमंत्रंजपेत् जपांतेबलिंपूर्णाहुतिंपूर्णपात्रविमोकंचकृत्वावरुणसूक्तैः समुद्रज्येष्ठेतिचतुर्भिरिमंमेवरुणेत्यनयाद्यौः शांतेतिवाभिषिंचेत्

यजमानोरूपंरूपमित्याज्यमवलोक्यतत्पात्रंसदक्षिणंब्राह्मणायदत्वेंद्रंसंपूज्य नमस्तेसुरनाथायनमस्तुभ्यंशचीपते गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये इत्यर्घ्यंदद्यात् आचार्यादिभ्योजपहोमादिभ्येयोगृहीत्वातामिंद्रायसमर्प्याचार्यायरक्तवर्णावस्त्रद्वययुतांसवत्सांगां यक्षगंधर्वसिद्धैश्च पूजितोसिशचीपते दानेनानेनदेवेशगंडदोषंविनाशयेतिमंत्रेणदद्यात् ततःउत्तरपूजांविधायविसृज्यप्रतिमांदत्वाग्निंविसृज्यशतंब्राह्मणान्भोजयित्वा तेभ्योयथाशक्तिदक्षिणांदत्वेन्द्रंप्रार्थयेत् अज्ञानादथवाज्ञानाद्वैकल्याद्वाधनस्यच यन्न्यूनमतिरिक्तंवातत्सर्वंक्षंतुमर्हसिइति इतिनारायणभट्टसुतश्रीमद्रामकृष्णभट्टसुतदिनकरभट्टकृते शांतिसारेज्येष्ठाशांतिप्रयोगः अथवृद्धगर्गोक्तैकनक्षत्रजननशांतिविधिः एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्यनिश्चयः भ्रात्रोर्भ्रातृभगिन्योरित्यर्थः पितृपुत्रयोःपित्रोर्नक्षत्रेपुत्रदुहित्रोरित्यर्थः तत्रशांतिंप्रवक्ष्यामिसर्वाचार्यमतेनतु शुभर्क्षेशुभवारेचचंद्रताराबलान्विते रिष्टविष्टिविवर्जेतुप्रारभेद्दिवसेसुधीः आचार्यंवरयेत्पूर्वंचतुरोऽथद्विजोत्तमान् पुण्याहंवाचयित्वातुशांतिकर्मसमाचरेत् अग्नेरीशानदिग्भागेनक्षत्रप्रतिमांततः तत्तदृक्षोक्तमंत्रेणपूजयेत्कलशोपरि नक्षत्रमंत्रावसिष्ठप्रोक्तेकात्यायनपरिशिष्टेउक्ताः अत्रनक्षत्रंतद्दैवतांचपूजयेत् वक्ष्यमाणज्योतिर्निबंधवचनात् रक्तवस्त्रेणसंच्छाद्यवस्त्रयुग्मेनवेष्टयेत् स्वशाखोक्तेनमार्गेणकुर्यादग्निमुखंततः अनेनैवतुमंत्रेणहुनेदष्टोत्तरंशतम् तत्तदृक्षोक्तेनेत्यर्थः प्रत्येकंसमिदन्नाज्यैःप्रायश्चित्तांतमेवच अभिषेकंततःकुर्यादाचार्यःपितृपुत्रयोः इत्यत्रपितृग्रहणमुपलक्षणम् यन्नक्षत्रेजन्मतेनसह बालस्याभिषेकइत्यर्थः

वस्त्रालंकारगोदानैराचार्यम्पूजयेत्पुनः ऋत्विजांदक्षिणांदद्यान्माषत्रयसुवर्णकम् देवताप्रतिमादानंधान्यवस्त्रादिभिः सह यानशय्यासनादीनि दद्याद्दोषप्रशांतये भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः इत्येकनक्षत्रजननशांतिविधिः अथप्रयोगः मातापितृनक्षत्रोत्पत्तौगोमुखप्रसवं कृत्वा भ्रातृनक्षत्रोत्पत्तौ तमकृत्वादेशकालौसंकीर्त्याऽस्यशिशोः पित्रादिनक्षत्रोत्पत्तिसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं पित्रादिनक्षत्रजननशांतिंकरिष्येइतिसंकल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् ऋत्विजश्चत्वारः ततः आचार्यः सर्षपान्विकीर्यभूमिंप्रोक्ष्याग्न्यायतनादीशान्यांकलशंसंस्थाप्य पूर्णपात्रोपरिजन्मर्क्षप्रतिमांतदृक्षमंत्रेणपूजयेत् पूजायांचैकंरक्तवस्त्रंश्वेतंचवस्त्रयुग्मंदद्यात् ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् अत्रप्रधानंअमुकनक्षत्रंतद्देवतांवा समिच्चर्वाज्यैः प्रत्येकमष्टशतसंख्ययाशेषेण स्विष्टकृतमित्यादिबलिदानांतेपूर्णाहुतिंप्रणीताविमोकादिचकृत्वा कलशजलेनाभिषिच्याचार्यायवस्त्रालंकारगाः ऋत्विग्भ्यश्चमाषत्रयपरिमितंसुवर्णंदत्वाउत्तरपूजांकृत्वाप्रतिमांविसृज्याचार्यहस्ते प्रतिपाद्याचार्याययथाशक्तिधान्यवस्त्रयानशय्यासनानिदत्वाचार्यर्त्विजोभोजयेदिति इतिश्रीमद्दिनकरभट्टकृतेशांतिसारेएकनक्षत्रजननशांतिप्रयोगः अथज्योतिर्निबंधोक्तएकनक्षत्रशांतिविधिः समानभेयदादेविपितापुत्रौन सोदरौ भगिन्यौवास्वबंधूवातदापूर्वस्यनाशनम् एकस्मिन्नेवनक्षत्रेपुत्रयोःपितृपुत्रयोः प्रसूतयोस्तयोर्मृत्युर्भवेदेकस्यनिश्चयः विधानंतत्र कर्तव्यंजन्मनक्षत्रपूजनम् नक्षत्रदेवतापूज्यात्वधिप्रत्यधिपूर्वकम् यस्यऋक्षस्ययद्द्रव्यंदक्षिणाविधिमंत्रणम् तत्तत्त्वाविधातव्यमृक्षदै

वततुष्टये स्वगृह्योक्तविधानेनहवनंतत्रकारयेत् भक्त्याहरिहरौदेवौस्वर्णरूप्यमयौशुभौ ततोमूर्तिदानमंत्रः विविधस्यास्यविश्वस्यपितरौविश्वतोमुखौ प्रीयेतांमूर्तिदानेनदेवौहरिहरावुभौ दानंहोमविधिःपश्चान्नादेनचाभिषेचनम् अभिषेचनपूर्वाचविप्रपूजास्मृताशिवे ततोभिगम्यगोविंदशूलिनोश्चनिकेतनम् तूर्याणांचनिनादेनजयघोषेणपार्वति पूजाविधिंसमाप्यैवंसर्वोपस्करसंयुतम् प्रार्थयेद्देवदेवेशौलक्ष्मीशैलसुतेश्वरौ दंडवत्प्रणिपातेनवंदनीयौपुनःपुनः ततःस्वगृहमागत्यब्राह्मणान्भोजयेत्सुधीः तोषयेद्दक्षिणादानैर्यथाशक्त्यावरानने एवं कृतविधानेतुविघ्ननाशोभवेद्ध्रुवं अथशौनकोक्तव्यतीपातादिशांतयः अथातःसंप्रवक्ष्यामिशौनकःशांतिमुत्तमाम् कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः संक्रमश्चरवेस्तत्रजातोदारिद्र्यकारकः संक्रमशब्देनसंक्रमकालात्पूर्वाःपराश्चषोडशघटिकागृह्यन्ते द्वात्रिंशद्दंडैःसंपूर्णसूर्यमंडलस्यराश्यंतरप्रवेशात् दरिद्रंचमहादुःखंव्याधिपीडामहद्भयं अप्रियंमृत्युमाप्नोतिनात्रकार्याविचारणा स्त्रीणांचदुःखंशोकंचसर्वनाशकरोभवेत् शांतिश्चपुष्कलाकार्यातत्रदोषोनकश्चन गोमुखप्रसवंकुर्याच्छांतिंकुर्यात्प्रयत्नतः जपाभिषेकदानैश्चहोमाद्यपिविशेषतः नवग्रहमुखंकुर्यात्तस्यदोषोपशांतये प्रथमंगोमुखाज्जन्मततःशांतिंसमारभेत् अनेनपाठादेवप्राथम्येसिद्धेपुनःप्राथम्यविधानंइतरशांतिषुप्राथम्यंनियतमित्येतदर्थः गृहस्यपूर्वदिग्भागेगोमयेनोपलिप्यच अलंकृतेचदेशेतुव्रीहिराशिंप्रकल्पयेत् पंचद्रोणमितंधान्यंतदर्द्धंतंडुलेनतु तदर्द्धंतुतिलैःकुर्यादन्योन्योपरिकल्पयेत् द्रव्यत्रितयराशौतुअष्टपत्रंलिखेद्बुधः पुण्याहंवाचयित्वातुआचार्यंवरयेत्पुरा राशिकल्पनात्पूर्वं आचारवंतंधर्मज्ञंकुलीनंचकुटुंबिनं मंत्रमंत्रार्थ

तत्त्वज्ञंशांतिकर्माणिकोविदम् पंचांगभूषणंदद्यात्पट्टवस्त्रांगुलीयकं राशौप्रतिष्ठितंकुंभमव्रणंसुमनोहरम् तीर्थोदकेनसंपूर्यसमृद्दोषाधिपल्लवं सग
व्यगंधरलंनवस्त्रयुग्मेनवेष्टयेत् तस्योपरिन्यसेत्पात्रंसूक्ष्मवस्त्रेणसंयुतम् प्रतिमांस्थापयेद्धीमान्साधिप्रत्यधिदेवताम् चंद्रादित्याकृतीपार्श्वेमध्येवै
धृतिमर्चयेत् वैधृतिंतद्देवतांरुद्रंइदंवैधृतिशांतौ मध्येरुद्रस्तद्दक्षिणोत्तरयोः सूर्यचंद्रावित्यर्थः व्यतीपातसंक्रमशांतौतुमध्येसूर्यस्तद्दक्षिणोत्तरयो
श्चाग्निरुद्रावित्याह एवमेवव्यतीपातेशांतौसंक्रमणस्यच भानोरुत्तरतोरुद्रमग्निंदक्षिणतोयजेत् निष्कमात्रेणवार्द्धेनपादेनापिस्वशक्तितः प्रतिमां
कारयेद्धीमांस्तत्तल्लक्षणलक्षितां रुद्रसूर्यौलक्षणयुक्तौ केचित्तुअंगप्रतिमास्वप्येतन्मानं प्रतिमापूजनार्थायवस्त्रयुग्मंनिवेदयेत् अधिदेवंभवेत्सू-
र्यश्चंद्रःप्रत्यधिदैवतम् इदंवैधृतिशांतौ तत्तद्व्याहृतिपूर्वेणतत्तन्मंत्रेणपूजयेत् त्र्यंबकेनमंत्रेणप्रधानप्रतिमांयजेत् अंगत्वेप्यनेनैवपूजा उत्सूर्य
इतिमंत्रेणसूर्यपूजांसमाचरेत् प्रधानत्वेंगत्वेच आप्यायस्वेतिमंत्रेणसोमपूजांसमाचरेत् उपचारैः षोडशभिर्यद्वापंचोपचारकैः अर्चितंगंधपुष्पाद्यैः
फलंनैवेद्यमर्पयेत् मृत्युंजयेनमंत्रेणप्रधानप्रतिमांस्पृशन् अष्टोत्तरसहस्रंवा अष्टोत्तरशतंतुवा अष्टाविंशतिनावाथप्रजप्यस्वस्वशक्तितः सर्वसौरं
प्रजप्याथसोमार्थेसोममंत्रतः आनोभद्रेतिसूक्तंचभद्राअग्नेश्चसूक्तकम् जपेच्चपौरुषंसूक्तंत्र्यंबकमतःपरम् कुंभंस्पृष्ट्वाचतुर्दिक्षुजपंकुर्युस्तथा
र्त्विजः चतुर्दिक्षुचत्वारिसूक्तानीत्यर्थः केचित्तुएकैकस्यजपमाहुः कुंभस्यपश्चिमेदेशेस्थंडिलेग्निंप्रकल्पयेत् स्वगृह्योक्तविधानेनकारयेत्संस्कृतान
लम् त्र्यंबकेयमंत्रेणसमिदाज्यचरून्हुनेत् अष्टोत्तरसहस्रंवा अष्टोत्तरशतंतुवा अष्टाविंशतिवाकुर्यात्स्वस्वस्यवित्तानुसारतः सूर्यचंद्रयोःप्रधानतां

ल्पसंख्या मृत्युंजयेनमंत्रेणातिलहोमंसमाचरेत् सर्वशांतिष्वयंहोमः ततःस्विष्टकृतंहुत्वा अभिषेकंचकारयेत् समुद्रज्येष्ठासूक्तेनआपोहिष्ठा त्र्यृचेनच अक्षीभ्यामितिसूक्तेनपावमानीभिरेवच त्र्यंबकेनउत्सूर्यआप्यायस्वेतिमंत्रतः सुरास्त्वामितिमंत्रेणअभिषेकंसमाचरेत् आचार्यंपूजयेत्पश्चाद्वस्त्रहेमांगुलीयकैः गोदानंवस्त्रदानंचहेमदानंविशेषतः तद्दोषशमनार्थायआचार्यायनिवेदयेत् श्वेतवस्त्रधरोभूत्वाभूषणाद्यैरलंकृतः यजमानस्त्रियायुक्तो आज्यावेक्षणमाचरेत् मच्छादनपटंदद्यात्ततःशांतिर्भविष्यति जापकेभ्योब्राह्मणेभ्योदक्षिणाभिश्चतोषयेत् जापकेभ्योऋत्विग्भ्यः दीनांधकृपणेभ्यश्चप्रदद्याद्भूरिदक्षिणाम् ब्राह्मणान्च्छतसंख्याकान्मिष्टान्नैर्भोजयेच्चतान् तान्नृत्विजश्चेत्यर्थः बंधुभिः सहभुंजीतयथाविभवसारतः एवंयःकुरुतेमर्त्योनैवदुःखमवाप्नुयात् आयुरारोग्यमैश्वर्यंमातापित्रोःशिशोरपि सर्वदुःखनिवृत्तिश्चपुत्रपौत्रप्रवर्द्धनं सर्वान्कामानवाप्नोतिसुखीभूत्वाचिरंवसेत् इतिशौनकोक्तव्यतीपातादिशांतिविधिः अथप्रयोगः गोमुखप्रसवंकृत्वादेशकालौसंकीर्त्यास्यशिशोर्वैधृतिजननसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंवैधृतिजननशांतिंकरिष्येइतिसंकल्प्य व्यतीपातादौतुतत्संकल्पः व्यतीपातवैधृत्योःसंक्रमदिनपातेशांतिद्वयं एकत्ररुद्रप्राधान्यादपरत्रसूर्यप्राधान्यात् यदातुव्यतीपातेसंक्रमस्तदाव्यतीपातामावास्याश्राद्धवत्तंत्रं ततोगणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यर्त्विग्वरणानिकुर्यात् ततःआचार्यःसर्षपान्विकीर्यभूमिंप्रोक्ष्यपूर्वस्यांगोमयेनोपलिप्यतत्रपंचद्रोणमितव्रीहिराशिंकृत्वा तदुपरिसार्द्धद्रोणद्वयमिततंडुलराशिंकृत्वातदुपरिसपादद्रोणमिततिलराशिंकृत्वा राशिमस्तकंसमंकृत्वा तत्रपंचरंगैरष्टदलं-

कृत्वातत्कर्णिकायांकुंभंप्रतिष्ठाप्यतीर्थजलेनापूर्यतत्रसप्तमृत्तिकासर्वौषधिपंचपल्लवपंचगव्याष्टगंधपंचरत्नानिप्रक्षिप्यवस्त्रयुग्मेनावेष्ट्यपूर्णपात्रंनिधायतदुपरिसूक्ष्मवस्त्रेणदेवताःस्थापयेत् तत्रवैधृतिशांतौत्र्यंबकमितिमंत्रेणमध्येरुद्रम् तद्दक्षिणतउत्सूर्यइतिमंत्रेणसूर्यमुत्तरस्यामाप्यायस्वेतिसोमम् व्यतीपातसंक्रमशांतौतुउत्सूर्यइतिमध्येसूर्यंतद्दक्षिणतोग्निंदूतमित्यग्निमुत्तरस्यांत्र्यंबकमितिरुद्रम् सर्वत्रमंत्राः व्याहृतिपूर्वकंपूजांविधायरुद्रप्रतिमांस्पृशन्मृत्युंजयमंत्रंसबीजमष्टसहस्राष्टशताष्टाविंशतिसंख्ययायथाशक्तिवाजपेत् ततः सूर्यप्रतिमांस्पृशन्ऋग्वेदस्यसर्वसौरमंत्रान्जपेत् तेच उदुत्यमितित्रयोदशर्चस्यसूक्तस्यकण्वपुत्रःप्रस्कण्वोनवाद्यागायत्र्योंत्याश्चतस्रोनुष्टुभः चित्रंदेवानामितिषडर्चस्यांगिरसःकुत्सःसूर्यस्त्रिष्टुप् इंद्रंमित्रमितिद्वयोरौचथ्योदीर्घतमास्त्रिष्टुप् हंसःशुचिषदित्येकस्यगौतमपुत्रोवामदेवोजगती यत्वासूर्येत्येकस्याभूमिपुत्रोत्रिरनुष्टुप् यदद्यसूर्येत्येकस्याउत्सूर्यइतितिसृणांउद्वेतिसार्द्धर्चेतसृणांमैत्रावरुणिर्वसिष्ठस्त्रिष्टुप् उदुत्यद्दर्शतमितिबृहती शीर्षइतिसतोबृहती तच्चक्षुरितिपुरउष्णिक् बण्महाँअसीतिद्वयोर्भृगुपुत्रोजमदग्निःपूर्वाबृहती उत्तरासतोबृहती नमोमित्रस्येतिद्वादशर्चस्यसूक्तस्य सूर्योभितपाःसूर्योजगती शन्नोभवेतित्रिष्टुप् सूर्योनोदिवइतिपंचर्चस्यसूर्यपुत्रश्चक्षुर्गायत्री विभ्राड्बृहदितिचतसृणांसूर्यपुत्रोविभ्राड्जगती विभ्राजमित्यस्तारपंक्तिः आयंगौरितित्र्यृचस्यस्वयंभूःसार्पराज्ञीःसपोगायत्री सर्वेषांसूर्योदेवता ततःसोमप्रतिमांस्पृशन्नाप्यायस्वेतिजपेत् व्यतीपातसंक्रमशांतौपूर्वंसूर्यजपस्ततोमृत्युंजयजपः अग्निजपोनास्ति ततश्चतुर्दिक्षुऋत्विजःकुंभंस्पृष्ट्वाआनोभद्राइतिसूक्तंपुरुषसूक्तंत्र्यंबकमंत्रंचजपे

युः केचित्तु एकैकस्यां दिशि एकैकसूक्तमिति वदंति ततः आचार्योग्निंग्रहांश्च प्रतिष्ठाप्य अन्वादध्यात् रुद्रं अष्टसहस्राष्टशतान्यतरसंख्यया समि
दाज्यचरुद्रव्येण व्यतीपातसंक्रमयोस्तु सूर्यं रुद्रसंख्यया ग्निरुद्रौ चाष्टाविंशतिसंख्यया मृत्युंजयं तिलद्रव्येण अष्टसहस्राष्टशताष्टाविंशत्यन्यतरसं
ख्यया शेषेणास्विष्टकृतमित्यादि मृत्युंजयहोमो व्यतीपातादावपि बलिदानांते पूर्णाहुतिं हुत्वा समुद्रज्येष्ठा इति सूक्तेन आपोहिष्ठेति त्र्यृचेन अक्षीभ्यां
मिति सूक्तेन पावमानीभिः प्रधानदेवतामंत्रैः सुरास्त्वेत्यादि पौराणैश्चाभिषिंचेयुः ततो यजमानोभिषेकवस्त्रमाचार्याय दत्वा स्त्रीबालयुक्तो रूपं
पमित्याज्यमवेक्ष्य तत्पात्रं सदक्षिणं ब्राह्मणाय दत्वाचार्याय वस्त्रद्वयं गां हेमांगुलीयकं यथाशक्ति सुवर्णमच्छादनपटं च दत्वा ऋत्विग्भ्यश्च यथाश
क्ति पारितोषिकीमन्येभ्यश्च भूरिदक्षिणां दत्वोत्तरपूजां कृत्वा विसृज्याचार्यहस्ते प्रतिपाद्याग्निं विसृज्य शतं ब्राह्मणानृत्विजश्च भोजयेदिति इति दिनक
रभट्टकृते शांतिसारे व्यतीपातादिशांतिप्रयोगः अथ गर्गोक्तनक्षत्रगंडांतशांतिविधिः अश्विनीमघमूलादौ त्रिषट्कनवनाडिकाः रेवतीसार्पशाक्रांते भा
साश्चक्रतुसायकाः प्रकारांतरेण गंडांतमाह अश्विनीमघमूलादौ नाडिकाद्वितयं तथा रेवतीसार्पशाक्रांते नाडिकाद्वितयं तथा अश्विनीमघमूला
नां पूर्वार्द्धे बाध्यते पिता पूषाहिशक्रपश्चार्द्धे जननी बाध्यते शिशोः पितृघ्नश्च दिवाजातो रात्रिजातस्तु मातृहा दिवाजातो दिवा पतितगंडांतजात इ
त्यर्थः एवं रात्रिजातः आत्मघ्नः संध्ययोर्जातो नास्ति गंडे निरामयः सर्वेषां गंडजातानां परित्यागो विधीयते वर्जयेद्दर्शनं यावत्तस्य षाण्मासि
कं भवेत् तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्तितः कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवम् अष्टाभिर्वा चतुर्भिर्वा द्वाभ्यां वा शोभनं तया तन्मध्ये

पायसंशंखेननवनीतेनपूरिते राजतंचंद्रमर्चयेत्तुसितपुष्पसहस्रकैः दैवज्ञः क्षौमवासास्तुशुक्लमाल्यांबरार्चितः सोमोयमितिसंचिंत्यआप्यायस्वेति पूजयेत् जपेत्साहस्रकंमंत्रंश्रद्दधानः समाहितः दद्याद्दक्षिणामिष्टांगंडदोषप्रशांतये शुक्लवागीश्वरंचैवताम्रपात्रसमन्वितं गंडदोषोपशांत्यर्थंदद्याद्वेदविदेशुचिः इतिगंडांतशांतिविधिः ज्योतिर्निबंधेतु ब्रह्मपुराणोक्तत्वेनैतानेवश्लोकान्पठित्वा कुंकुमंचंदनंकुष्टंगोरोचनमथापिवा घृतपूर्णेषु कुंभेषुचतुर्षुप्रक्षिपेत्क्रमात् सहस्राक्षेणमंत्रेणबालकंस्नापयेत्क्रमात् पितृयुक्तंदिवाजातंमातृयुक्तंतुरात्रिजम् स्नापयेत्पितृमातृभ्यांसंध्ययोरुभयोरपि कांस्यपात्रंघृतैःपूर्णंगंडदोषोपशांतये सक्षीरमौक्तिकंशंखंश्वेतवस्त्रयुगंशुभं यजुर्वेदविदेदद्याद्गंडदोषापनुत्तये दद्याद्धेनुंहिरण्यंचमहांश्चापिप्रपूजयेत् आयुर्वृद्धिकरंजस्याकुर्याद्ब्राह्मणतर्पणं तिथिगंडादौतुगर्गः तिथिगंडेत्वनड्वाहंनक्षत्रेधेनुरुच्यते कांचनंलग्नगंडेतुगंडदोषोविनश्यति इतिनक्षत्रगंडांतशांतिविधिः अथप्रयोगः गोमुखप्रसवंकृत्वादेशकालौसंकीर्त्यास्यशिशोरमुकनक्षत्रगंडांतोत्पत्तिसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंनक्षत्रगंडांतशांतिंकरिष्ये इतिसंकल्प्यतदंगतयागणपतिपूजनपुण्याहवाचननांदीश्राद्धानिकृत्वाऽऽचार्यंवृत्वातंसुक्लैः क्षौमवस्त्रमाल्यैरर्चयेत् ततः आचार्यः सर्षपविकिरणभूमिप्रोक्षणेकृत्वाषोडशभिरष्टाभिश्चतुर्भिर्वा द्वाभ्यांवापलैः कांस्यपात्रंकृत्वातत्पायसेनपूरयित्वातत्रनवनीतपूरितशंखंपूर्वाग्रंनिधायतन्मुखेराजतींचंद्रप्रतिमां आप्यायस्वेतिमंत्रेणषोडशोपचारैःसंपूज्यसितपुष्पसहस्रत्रयेण ३००० पुष्पांजलिंदत्वातदुत्तरतस्ताम्रपात्रेबृहस्पतिप्रतिमांतन्मंत्रेणार्चयेत् ततोयजमानः प्रतिमामाचार्यायदत्वायथाशक्ति

दक्षिणांचदद्यात् इतिदिनकरभट्टकृतेशांतिसारेनक्षत्रगंडांतशांतिप्रयोगः अथोत्तरादिशांतिविधिः उत्तरातिष्यचित्रासुपूर्वाषाढोद्भवस्यच कु
र्याच्छांतिंप्रयत्नेननक्षत्राकारजांबुधः सुवर्णेनतदर्द्धेनयथावित्तानुसारतः नक्षत्राधिपतेरूपंकृत्वावस्त्रद्वयान्वितम् वरुणस्यार्चनंकार्यंस्वस्तिवाच
नपूर्वकं कुंभेवरुणमभ्यर्च्यपूर्णपात्रोपरिनक्षत्राधिपतिंपूजयेदित्यर्थः शतौषधानिनिक्षिप्यमृत्त्वक्पल्लवसंयुतं पूजांतेसमिदन्नाज्यैर्होमंतिल
यवैस्तथा ततःपूर्णाहुतिंहुत्वावेदाध्यायिकुटुंबिने उत्तराप्रथमेपादेतिलपात्रंतथैवच तिष्येतुगांसवत्सांचसुशीलांचपयस्विनीम् अजांचित्रा
सुवैदद्यात्पूर्वाषाढेतुकांचनम् यवांश्चव्रीहिमाषांश्चतिलमुद्गान्प्रदापयेत् यथावित्तानुसारेणकुर्याद्ब्राह्मणभोजनम् पितुरायुष्यवृद्ध्यर्थंशां
तिरत्रविधीयते अथदिनक्षयादिशांतिविधिः दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ शूलेगंडेतिगंडेचपरिघेयमघंटके कालदंडेमृत्युयोगेदग्ध
योगेसुदारुणे तस्मिन्गंडदिनेप्राप्तेप्रसूतिर्यदिजायते विचार्यतत्रदैवज्ञःशांतिंकुर्याद्यथाविधि यजनंदेवतानांचग्रहाणांचैवपूजनम् यजनंवक्ष्यमा-
णं दीपंशिवालयेभक्त्याघृतेनपरिदापयेत् अभिषेकंशंकरस्यअश्वत्थस्यप्रदक्षिणम् आयुर्वृद्धिकरंजाप्यंसर्वारिष्टविनाशनम् गुरुदैवतावि
प्राणांपूजनंगोत्रवर्द्धनम् गाणपत्यंपुरुषसूक्तंसौरंमृत्युंजयंशुभम् शांतिजाप्यंरुद्रजाप्यंकृत्वामृत्युंजयीभवेत् मूलेवासर्पगंडेवाकुर्यादेता
नियत्नतः एतेषांमूलव्यतीपातादिशांत्यासमुच्चयः अथविषघटिकाशांतिविधिः विषनाड्योज्योतिर्निबंधे तिथीषुनागाद्रिगिरीशवारिधि
र्गजाद्रिदिक्पावकदिक्कभास्कराः मुनीशसंख्याप्रथमातिथेःक्रमात्परंविषाख्यंघटिकाचतुष्टयम् विंशच्चतुर्द्वादशदिक्चशैलाबाणाश्च

तस्यानियथाक्रमेण २० ४ १२ १० ७ ५ २५ सूर्यादिवारेषुभवंत्यनंतरंनाड्योविषाख्यंघटिकाचतुष्टयं नारदः खमार्गणा ५० वेदपक्षाः २४ खरामा ३० व्योमसागराः ४० वार्धिचंद्रा १४ रूपदस्राः २१ खरामा ३० व्योमबाहवः २० द्विरामाः ३२ खाग्नयः ३० शून्यदस्राः २० कुंजरभूमयः १८ रूपपक्षा २१ व्योमदस्रा २० वेदचंद्रा १४ श्चतुर्दश १४ शून्यचंद्रा २० वेदचंद्राः १४ षडक्षा ५६ वेदबाहवः २४ शून्यदस्रा २० शून्यचंद्राः १० पूर्णचंद्रा १० गजेंदवः १८ तर्कचंद्रा १६ वेदपक्षाः २४ खरामा ३० श्चाश्विभात्क्रमात् आभ्यः पराः स्युर्घटिकाश्चतस्रोविषसंज्ञिताः वृद्धगर्गः विषनाडीषुसंजातः सर्वारिष्टभयप्रदः पितृमातुलमात्मानंघातयेन्नात्रसंशयः मातुश्चविषशस्त्रास्त्रैः क्रूरेलग्नेशकेपिवा तद्दोषपरिहारायशांतिकर्मसमारभेत् रुद्रोयमोग्निर्मृत्युश्चदेवताःपरिकीर्तिताः सुवर्णेनयथाशक्त्यातत्तल्लक्षणलक्षिताः प्रतिमाःकारयित्वातुआढक्यव्रीहिभिःस्थले स्थंडिलंपरिकल्प्याथकुंभमौषधिसंयुतम् जलैःसंपूर्यसंस्थाप्यमृदादिप्रक्षिपेत्ततः आढक्यव्रीहिभिःकुंभस्थलंपरिकल्पयेदित्यन्वयः वस्त्रद्वयेनसंवेष्ट्यपंचरत्नानिनिक्षिपेत् कुंभोपरितुसंस्थाप्यचततः प्रतिमास्तथा तत्तत्तंत्रैश्चमंत्रैश्चक्रमादर्चेद्धुनेत्तथा समिच्चरुघृतद्रव्यैः प्रत्येकंचयथाक्रमात् ऋत्विग्भिश्चसहाचार्योहुनेदष्टसहस्रकम् अष्टोत्तरशतंवाथअष्टाविंशतिमेववा ततस्तिलैर्हुनेद्देवांस्तत्तन्मंत्रैश्चकृत्यवित् ततोऽभिषिंचयेद्दानंमंत्रैः पौराणिकैःक्रमात् वक्ष्यमाणमंत्रैर्दानंकुर्यादित्यर्थः प्रीयतांभगवानीशः पिनाकीसर्वतोमुखः तवमूर्तिप्रदानेनममपापंव्यपोहतु दंष्ट्राकरालवदनोनीलांजनसमाकृतिः रक्तसिक्तगदापाणिर्मृत्योर्मांपातुसर्वदा दानमेवंविधैर्मंत्रैर्यथाविधिसमाहितः गोभूहिरण्यवस्त्रैश्चआचार्यंपूजयेत्सुधीः

एवंकुर्याद्विधानेनविषदोषःप्रशाम्यति इतिविषघटिकाशांतिविधिः अथग्रहणजननशांतिः शौनकः ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिदृश्यते व्या
धिपीडातदास्त्रीणामादौतुऋतुदर्शनात् इत्थंसंजायतेयस्तुतस्यमृत्युर्नसंशयः व्याधिःपीडाचदारिद्र्यंशोकश्चकलहोभवेत् शांतिंतेषांप्रवक्ष्या
मिनराणांहितकाम्यया यस्मिन्नृक्षेविशेषेणग्रहणंयदिजायते तन्नक्षत्राधिपंरूपंसुवर्णेनप्रकल्पयेत् ऋक्षाधिपस्यरूपमित्यर्थः यथाश-
क्त्यानुसारेणवित्तशाठ्यंनकारयेत् सूर्यग्रहेसूर्यरूपंहिरण्येनस्वशक्तितः चंद्रंचंद्रग्रहेधीमान्रजतेनविशेषतः राहोरूपंप्रकुर्वीतनागेनैवबि
चक्षणः नागेनसीसेन शुचौदेशेप्रयत्नेनगोमयेनोपलेपयेत् तस्योपरिन्यसेद्धीमान्नववस्त्रंसुशोभनम् त्रयाणांचैवरूपाणांस्थापनंतत्र
कारयेत् रक्ताक्षतंरक्तगंधंरक्तपुष्पांबराणिच सूर्यग्रहेप्रदातव्यंसूर्यप्रीतिकरायच प्रीतिकरणायेत्यर्थः श्वेतवस्त्रंश्वेतमाल्यंश्वेतगंधानु
लेपनम् चंद्रग्रहेप्रदातव्यंचंद्रप्रीतिकरायच राहवेचैवदातव्यंकृष्णपुष्पांबराणिच दद्यान्नक्षत्रनाथायराहुप्रीतिकरायच सूर्यंसंपूजयेद्धी
मानाकृष्णेनेतिमंत्रतः चंद्रग्रहेतथासम्यगाप्यायस्वेतिमंत्रतः स्वर्भानोरितिमंत्रेणराहुंयत्नेनपूजयेत् एवंसंपूजयेद्धीमान्समिद्भिश्चार्कसं-
भवैः सूर्यग्रहइत्यर्थः चंद्रग्रहेचपालाशसमिद्भिर्जुहुयात्ततः दूर्वाभिर्जुहुयाद्धीमान्राहोःसंप्रीणनायच समिद्भिर्ब्रह्मवृक्षस्यप्रशायजुहु
याद्बुधः आज्येनचरुणाचैवतिलैश्चजुहुयात्ततः त्रिभ्यइत्यर्थः पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः जलैरौषधकल्कैश्चसहितैःकलशोदकैः
अभिषेकंप्रकुर्वीतयजमानेप्रयत्नतः मंत्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः इमंमेगंगइत्यादितत्वायामीतिमंत्रकैः अभिषेकेनिवृत्तेतुय

जमानःसमाहितः आचार्यंपूजयेत्पश्चात्सुशांतोविजितेंद्रियः तस्मैदद्यात्प्रयत्नेनभक्त्याप्रतिकृतित्रयम् गांचैवदक्षिणांदद्याद्यजमानःसमाहितः इत्थंग्रहणजातानांसर्वारिष्टविनाशनम् कथितंभार्गवेणेदंशौनकायमहात्मने इतिग्रहणप्रसूतशांतिः अथकात्यायनोक्तयमलजननशांतिः अथातोयमलजननेप्रायश्चित्तविधिंव्याख्यास्यामोनार्यागौर्दासीमहिषीवडवावाविकृतिंप्रसवेत्प्रायश्चित्तीभवेत्पूर्णेदशाहेचतुर्णांक्षीरवृक्षाणांकषायमुपसंहरेत्प्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौरसर्षपास्तेषांमिश्रमपोहिरण्यदूर्वांकुराम्रपल्लवैरष्टौकलशान्प्रपूर्यसर्वौषधीनांदंपती स्नापयित्वाआपोहिष्ठेतितिसृभिः कयानश्चित्रइतिद्वाभ्यांपंचैवंद्रोणपंचवारुणेनेदमापःप्रवहतेत्यपाधमितिस्नापयित्वालंकृत्यतोदर्भेषूपवेश्यतत्रमारुतंस्थालीपाकंश्रपयित्वाज्यभागाविष्ट्वाज्याहुतीःपूर्वोक्तैःस्नपनमंत्रैःस्थालीपाकस्यजुहोति अग्नयेस्वाहासोमायस्वाहा पवमानायस्वाहापावकायस्वाहामारुतायस्वाहामरुद्भ्यःस्वाहायमायस्वाहातकायस्वाहामृत्यवेस्वाहाब्रह्मणेस्वाहा अग्नयेस्विष्टकृतेस्वाहेति एतदेवग्रहोत्पातेषूलूकगृध्रकपोताःश्येनोवागृहंप्रविशेत्स्तंभेवाप्ररोहेद्वल्मीकंमधुजालंवास्त्रवेदुदकुंभप्रज्वलनेआसनशयनयानभंगेगृहकपोतिकाकृकलासशरीरसर्पणेच्छत्रध्वजविनाशेऽन्येषूत्पातेषुभूकंपोल्कापातकाकसर्पसंगमप्रेक्षणादिष्वेतदेवग्रहशांतिंचोक्तविधिनाकृत्वा आचार्यायवरंदत्वाब्राह्मणान्भोजयित्वास्वस्तिवाचयित्वाशिषःप्रतिगृह्यशांतिर्भवतीति अत्रविकृतिंप्रसवेदित्यस्ययमलौजनयेदित्यर्थः तथायंक्रमात् इदंचकुलनाशाद्यरिष्टनिवारणार्थत्वाच्छ्रौतेनमारुतत्रयोदशकपालेनप्रत्यवायपरिहारार्थेनसमुच्चीयते इतियमलजननशांतिः अथसदंतजननशांतिः पाद्मेहेमाद्रौविष्णुधर्मोत्तरेच

दंतजन्मनिबालानांलक्षणंतंनिबोधमे उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः दंतैर्वासहयस्यस्याज्जन्मभार्गवसत्तम द्वितीयेचतृतीयेचचतुर्थे
पंचमेतथा यदादंताश्चजायंतेमासेचैवमहद्भयं मातरंपितरंवाथखादेद्वात्मानमेववा तत्रशांतिंप्रवक्ष्यामितांमेनिगदतःशृणु गजपृष्ठगतंबालंनोस्थंवास्थापयेद्द्विजः तदभावेतुसर्वज्ञकांचनेचवरानने सर्वौषधैःसर्वगंधैर्बीजैःपुष्पैःफलैस्तथा पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभार्गव स्नापये
दित्यन्वयः स्थालीपाकेनधातारंपूजयेत्तदनंतरम् चतुर्थ्यंतनाम्नासकृदाहुतिः सप्ताहंचात्रकर्तव्यंतथाब्राह्मणभोजनम् अष्टमेऽह्निविप्राणांतथादेयाश्चदक्षिणा स्थालीपाकोत्रसप्ताहंकर्तव्यइतिकेचित् कांचनंराजतंगांचभुवंवाधान्यमेवच दद्यादितिशेषः इतिसदंतजननशांतिः
अद्भुतसागरेत्वत्रपंचदशीशांतिरुक्ता तत्रैवबृहस्पतिः बालानामष्टमेमासिषष्ठेमासिततःपुनः दंतायस्यचजायंतेमातावाम्रियतेपिता बाल
कःपीड्यतेतत्रस्वयमेवनसंशयः दधिक्षौद्रघृताक्तानामश्वत्थसमिधांततः जुहुयादष्टशतंप्राज्ञःसमंत्रेणतुमंत्रवित् धेनुंचदक्षिणांदद्यात्ततः सं
पद्यतेशुभं यत्तुज्योतिर्निबंधे अष्टमादिषुमासेषुदंतोत्थानंशुभावहमित्युक्तंतद्गुणसंविज्ञानबहुव्रीहिणानवमादिपरम् इतिषष्ठाष्टममासयोर्दंतो
त्पत्तिशांतिः साधारणेनप्रकारांतरमुक्तंपद्मपुराणे दंतजन्मनिसामान्यंशृणुस्नानमतःपरं सामान्योनिषिद्धे भद्रासनेनिवेश्यैभमूर्ध्निमूलफलै
स्तथा सर्वौषधैःसर्वबीजैःपंचगव्यैस्तथैवच स्नापयेत्पूजयेच्चाथवह्निसोमसमीरणं समीरणोवायुः पर्वतांश्चतथाख्यातान्देवदेवंचकेशवं ए
तेषामेवजुहुयाद्धुतमग्नौयथाविधि ब्राह्मणानांतुदातव्यायथाशक्त्याचदक्षिणा ततस्त्वलंकृतंबालमासनेतूपवेशयेत् पूज्याश्चाविधवानार्यो

ब्राह्मणाःसुहृदस्तथा अथत्रिकशांतिः शांतिसर्वस्वे सुतत्रयेसुताचेत्स्यात्तत्रयेवासुतोयदि मातापित्रोःकुलस्यापितदाऽनिष्टंमहद्भवेत् ज्येष्ठनाशो धनेहानिर्दुःखंवासुमहद्भवेत् जातस्यैकादशाहेवाद्वादशाहेशुभेदिने आचार्यमृत्विजोवृत्वाग्रहयज्ञपुरःसरम् ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृताः पूजयेद्धान्यराशिस्थकलशोपरिशक्तितः पंचमेकलशेरुद्रंपूजयेद्रुद्रसंख्यया रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः रुद्रसंख्ययारुद्रसूक्तानिजपेदित्यर्थः आचार्योजुहुयात्तत्रसमिदाज्यतिलैश्चरुं अष्टोत्तरसहस्रंवाशतंवाविंशतंतुवा देवताभ्यश्चतुर्वक्त्रादिभ्योग्रहपुरःसरम् ब्रह्मादिमंत्रैरिंद्रस्ययतइंद्रभयामहे ततःस्विष्टकृतंहुत्वाबलिंपूर्णाहुतिंततः अभिषेकंकुटुंबस्यकृत्वाचार्यंप्रपूजयेत् हिरण्यंधेनुरेकाचऋत्विजांदक्षिणांततः आज्यस्यवीक्षणंकृत्वाशांतिपाठंतुकारयेत् इतित्रिकशांतिः अथसिंहादिप्रसूतगवादिशांतयः अद्भुतसागरेनारदः भानौसिंहगते चैवयस्यगौःसंप्रसूतये मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः प्रसूतांतत्क्षणादेवतांगांविप्रायदापयेत् ततोहोमंप्रकुर्वीतघृताक्तमधुसर्षपैः आहुतीनांघृताक्तानामयुतंजुहुयात्ततः व्याहृतिभिर्होमैः सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणां वस्त्रयुग्मंचगांचैवसुवर्णंचप्रदापयेत् इष्टदैवतमंत्रेणततःशांतिर्भविष्यति अथर्ववेदपरिशिष्टे माघेबुधेचमहिषीश्रावणेवडवादिवा सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाः विधानंतत्रकर्तव्यंनरेणहितमिच्छता सौरैःसूक्तैःप्रकर्तव्योहोमःसूर्यस्यतुष्टये प्रधानंतिलसर्पिश्चपायसंशर्करायुतं सहस्रंहवनंप्रोक्तंदानान्यष्टौयथाविधि मत्यृंचपायसंहुत्वा तांगांविप्रायदापयेत् ततोष्टौदानानिदापयेत् तिलंलोहंहिरण्यंचकार्पासंलवणंतथा सप्तधान्यंक्षितिर्गावएकैकंपावनंस्मृतं इतिसिंहादिप्रसूतगवादिशांति

इतिदिनकरभट्टकृतेशांतिसारेजननशांतयः अथबालपीडाशांतयः सारसंग्रहेक्रियाकालगुणोत्तरे ग्रहोधनवतीनामगृह्णतेजातिमात्रकं क्रियाकाल
गुणोत्तरेतु प्रथमेह्निगृह्णातिबालकंबालिनीग्रहीत्युक्तं नारायणीयेतुपापिनीग्रहीतिपाठः ग्रीवायांपृष्ठभागेचललाटेश्रवणेमुखे उद्वेजयतिगात्रा
णिआहारंचनगृह्णते मांजिष्ठाधातकीलोध्रहरितालंचचंदनम् एतैःप्रलेपयेद्बालंततोमुंचतिसाग्रही भोगंदद्यात्तुमातृणांसर्वकालंविचक्षणः
गंधंमाल्यंचक्षसरंसुरामांसंयथेच्छया भोगंबलिंसर्वकालंसंध्यात्रयेनिमित्तानंतरंचेतिमदनरत्ने तत्रैवनारायणीये मत्स्यमांससुराभक्ष्यगंधस्र-
ग्धूपदीपकैः बलिंहरेदित्यर्थः तत्रैवक्रियाकालोत्तरे लेपनंधातकीलोध्रमंजिष्ठातालचंदनैः धूपयेन्माहिषाक्षेणततोमुंचतिसाग्रही बलिदानेविशे
षस्तत्रैवप्रयोगसागरे कदंबश्चकरंजश्चविभीतोनिंबएवच अश्वत्थोदुंबरौचैवश्लेष्मातकवटौतथा मातृवृक्षाःक्रमेणोक्ताःपूर्वादीशांतदिग्गताः ते
षामेकंसमाश्रित्यबलिंदद्याद्यथोदितं प्रतिस्थूलंप्रत्युदकंप्रतिवृक्षमथापिवा स्थूलमुच्चप्रदेशः बल्याशायामनुक्तायांप्राक्प्रोक्तानानुसारतः
यत्रवारोचतेतत्रमातृणांबलिमाहरेत् कृत्वानीराजनांतंबलिमितिविधिवद्बालमाहूयतत्रसंस्पृश्याद्भिःसमंत्रंशिरसिसुकुसुमैरक्षतैर्भ्रामयित्वा
क्षिप्त्वाग्रेदेवतायाविधिवदुपहितैस्तत्रगीतैःसुमंत्रैःकुर्याद्रक्षांसमीक्ष्यक्षणमिवविलयंयातिदुष्टग्रहार्तिः नीराजनमंत्रोनारायणीये ब्रह्माविष्णुश्च
रुद्रश्चस्कंदोवैश्रवणस्तथा रक्षंतुत्वरितंबालंमुंचमुंचकुमारकं तत्रैवकालगुणोत्तरे पलाशाश्वत्थकापित्थबिल्वोदुंबरपल्लवाः पंचभंगःस्मृतोह्येष
बालानांहितकारकः प्रयोगसागरेतु पलाशोदुंबराश्वत्थबिल्वन्यग्रोधपल्लवाः क्वथितेनकषायेणपरिषिंचेत्प्रशांतये परिषेचनमभिषेकः पूर्वोक्तबलि

दानानुलेपनादिकर्मसुमंत्रस्तत्रैवनारायणीये चंडोसकर्णाबानिलोत्रिनिष्ठो ढांतिंसनारसार्धशशीचचंडः हुंफट्शिरोंतोमनुरेषहन्याद्बालग्रहंक्षूस्तजपादिक र्मॐ रकुरखुदर्परवंहुंफट् स्वाहा सारसंग्रहेक्रियाकालगुणोत्तरे ग्रहीतुमाहिषीनामगृह्णतेतुद्विरात्रकं कासश्वासातिमान्बालोगात्रंसंकोचतेतदा अपामार्गी मुशीरंचपिप्पलीबीजकंतथा अजाक्षीरेणसंपिष्यततोबालंप्रलेपयेत् गवांशृंगैश्चकेशैश्चनखैश्चधूपयेच्छिशुं भोगंदद्याच्चमातॄणांततोमुंचतिसाग्रही भोगोगंधादिःपूर्वोक्तः१ एवमग्रेपि घंटालीसाग्रहीनामगृह्णतेचत्रिरात्रकम् जृंभतेश्वसतेबालोरोदित्येवमुहुर्मुहुः नोन्मीलयतिगात्राणिआहारं चनगृह्णते गोदंतंगजदंतंचतथाचैकैकराजिनं अजाक्षीरेणनिष्पिष्यततोबालंप्रलेपयेत् धूपयेन्निंबपत्रैश्चसितसर्षपसंयुतैः लेपितंधूपितंबालंततोमुंचतिसाग्रही ३ काकोलीसाग्रहीनामगृह्णतेचतुरात्रकम् फेनमुद्वमतेबालोदिशश्चैवनिरीक्षते उद्वेजयतिगात्राणिरोदित्येवमुहुर्मुहुः गजदंताहि निर्मोकसर्षपैःसमभागकैः गोमूत्रेणतुपिष्टानिततोबालंप्रलेपयेत् भोगंदद्याच्चमातॄणांकुल्माषैःसममासवम् ४ हंसनीसाग्रहीनामगृह्णतेपंचरात्रकं जृंभतेश्वसतेबालआकाशंचानिरीक्ष्यते मेषशृंगंवचांलोध्रंहारितालंमनःशिलम् अजामूत्रेणसंपिष्यततोबालंप्रलेपयेत् भोगंदद्याच्चमातॄणांततोमुंचतिसाग्रही ५ फत्कारीसाग्रहीनामगृह्णतेषट्चरात्रिकं हस्तौपादौचक्षिपतिहसतेचपुनःपुनः मुह्यतेरोदतेबालआहारंचनगृह्णते गजदंतंगुग्गुलंचराजसर्षपसंयुतम् पिच्छाचघृतसंयुक्तंततोबालंप्रलेपयेत् भोगंदद्याच्चमातॄणांध्रुवंमुंचतिबालकं ६ मुक्तकेशीग्रहीनामगृह्णतेसप्तरात्रकम् मुंचत्येवधृतोनादंकाकवद्रुदतेसदा जायतेपूतिगंधश्चबालकोनात्रसंशयः कुष्ठंवचावचाचैवच्छागमूत्रेणपेषयेत् एतैःप्रलेपयेद्बालंधूपोव्याघ्र

नरवस्यच भोगंदद्यात्तुमातॄणांततोमुंचतिसाग्रही ७ गृह्णतेचाष्टरात्रंतुग्रहीनामात्रिदंडिका अतीवश्वसतेबालोगृह्यमाणस्तुरोदिति निरीक्षतेदिशश्चैवजिह्वालालायतेसदा लेपनंतुवचाहिंगुलशुनैःसहसर्षपैः भोगंदद्याच्चमातॄणांततोमुंचतिसाग्रही ८ सातुमेषाग्रहीनामगृह्णतेनवरात्रकं मुहुर्मुहुस्त्रसतेबालऊर्ध्वंनिःश्वसतेसदा रोदित्येवाप्यविश्रांतमुभौमुष्टीदशत्यपि चंदनंचवचाकुष्ठंतगरंसितसर्षपाः उदकेनैवपिष्टानिततोबालंप्रलेपयेत् धूपंनरनखैःसार्द्धंतथावानररोमभिः मातॄणांभोगनैवेद्यैःशिशुंमुंचतिसाग्रही ९ रोदनीसाग्रहीनामगृह्णतेदशरात्रकम् नीलोत्पलसवर्णाश्चोबालोभवतिवर्णतः दिवारोदितिरात्रौचगृध्रगन्धश्चजायते रक्तंतुजायतेमूत्रंसुदुष्टगंधसमन्वितम् कुष्ठंसर्जरसंचैववचासर्षपसंयुतम् उदकेनचसंपिष्य ततोबालंप्रलेपयेत् धूपयेन्निंबपत्रैश्चसमंमांस्याचलाक्षया भोगंदद्यात्तुमातॄणामासवंकोद्रवौदनम् दिनत्रयंबलिंदद्यात्तूचाचैवप्रलेपयेत् अथ मासेषु पूतनाशिखिनीनामगृह्णतेमासजातकं तयागृहीतमात्रस्तुकाकारावंप्रमुंचति दिवारात्रौचश्वसतेगृध्रगंधश्चजायते सरक्तंस्रवतेमूत्रंचक्षुभ्यांनैवपश्यति तेनसारमतेनित्यंकुमारीबलिकांक्षिणी पायसंत्रिविधंदद्यान्मांसंचैवचतुर्विधं रक्तपुष्पंततोगंधंवस्त्रंदद्याच्चपीतकम् मत्स्यमांसंसुरांचैवदिशमाश्रित्यदक्षिणां अधःकरंजवृक्षस्यमध्याह्नेबलिमाहरेत् पायसादियुक्तंबलिंदद्यादित्यर्थः धूपंगोदंतनखजंदद्याच्छृंगसमन्वितम् दीपकंतिलतैलेनसप्तरात्रंबलिंहरेत् स्नापितंधूपितंबालंततोमुंचतिसाग्रही १ पूतनाकुलटानामगृह्णतेचद्विमासिकं तयागृहीतमात्रस्तुबालोसौकंपतेसदा शीतलानिचगात्राणिस्विद्यंतेचापिनित्यशः ग्रीवाचपृष्ठतोवक्रामुखंचपरिशुष्यति क्षीरंपिबतिविस्रब्धंतत्क्षणादेवछर्दति तंदुलैःपंचवर्णै

स्तुबलिंदद्यात्समाहितः पुष्पंगंधांश्चवस्त्राणिकृष्णान्येवप्रदापयेत् धूपयेन्निंबपत्रैश्चकुसुंभलशुनेनच दीपंहितिलतैलेनबलिंपूर्वेणदापयेत् एवंकृते तुसादेवीबालंमुंचतितत्क्षणात् २ पूतनागोतमीनामगृह्णतेसात्रिमासिकम् तयागृहीतमात्रस्तुबालोरोदितिनिश्चितम् स्रवन्मूत्रंपुरीषंचनिद्रामोहयुतोभवेत् मधुगंधश्चभवतिगोगंधश्चक्वचित् क्वचित् ओदनंक्षीरशाकंचयवान्नंसोष्णमेवच सक्तवस्तिलचूर्णस्यपिंडिकांचैवदापयेत् धूपयेत्सर्षपैः श्वेतैः स्नापयेच्चविशेषतः स्नपनंपंचगव्येनतिलतैलेनदीपकम् पूर्वांतुदिशमाश्रित्यमध्याह्नेबलिमाहरेत् एतेनबलिदानेनततोमुंचतिसाग्रही ३ पूतनापिंगलानामचतुर्थेमासिगृह्णते तयागृहीतमात्रस्तुकंपतेदक्षिणेकरे क्षीरंपिबतिविश्रब्धंरावंमुंचतिदारुणम् श्वेतवर्णशरीरंच मुखंचपरिशुष्यति पूतिगंधंभवेत्तस्यगात्रेवैबालकस्यतु नमंत्रानौषधंतस्यबलिंतत्रनकारयेत् धार्तव्यंत्वाग्निस्नेहंयदिजीवतिमानवः ४ पूतनाकुंचनीनामगृह्णतेपंचमासकम् तयागृहीतमात्रस्तुजायतेकांचनप्रभः सीदंतिसर्वगात्राणिमुखंचपरिशुष्यति क्षीरंपिबतिविस्रब्धंरोदित्येवमुहुर्मुहुः ओदनेपोलिकाशाकमत्स्यमांसानिकारयेत् पक्वान्नंपोलिकांचैवस्वस्तिकान्श्यामकांस्तथा दक्षिणांदिशमाश्रित्यमध्याह्नेबलिमाहरेत् एतेनबलिदानेनततोमुंचतिसाग्रही ५ पूतनापंकजानामषण्मासंगृह्णतेशिशुं तयागृहीतमात्रस्तुरोदित्येवमुहुर्मुहुः ज्वरश्चाविविधस्तस्यकुक्षिशूलश्चजायते मांसौदनंसुरामांसंबलिंविविधमेवच पुष्पैर्गंधैस्तथादीपैर्बलिंतस्याःप्रकल्पयेत् एवंबलिविधानेनततोमुंचतिसाग्रही ६ पूतनाशीतलानामगृह्णतेसप्तमासिकं आस्फोटयतिगात्राणितदाऽऽहारंनगृह्णते मांसौदनंसुराशाकंकुल्माषंचतिलास्तथा चक्रकाणिचापि

शानिकुसुमंविविधंतथा एकरात्रंबलिंदद्यात्ततोमुंचतिसाग्रही ७ पूतनारजनीनामगृह्णतेचाष्टमासिकं तयागृहीतमात्रस्तुबालोमुह्यतितत्क्षणात्
स्फोटकाःसर्षपाकाराजायंतेतत्कलेवरे स्वनतेकंपतेचैवमुखंचपरिशुष्यति एवंहिलक्षणंज्ञात्वाबलिंतत्रनकारयेत् नमंत्रंनौषधंतस्यबालकस्यसमा
चरेत् जीवितेतस्यसंदेहोविनाशोनास्तिसंशयः ८ शिसुंमासेचनवमेगृह्णतेकुंभकर्णिका तयागृहीतमात्रस्तुतत्क्षणादेवछर्दति दुर्गन्धकृ
च्छरीरेचज्वरोभवतिदारुणः क्षीरंपिबतिविस्रब्धंततोभवतिनिस्वनः कृसरंमत्स्यमांसंचक्षीरमोदनमेवच कुल्माषतिलचूर्णंचपुष्पगंधा-
दिशोभितं पूर्वादिशांसमाश्रित्यमध्याह्नेबलिमाहरेत् एवंकृतेतुविधिनाततोमुंचतिसाग्रही ९ पूतनापंकजानामगृह्णतेदशमासिकम् तयागृही
तमात्रस्तुचक्षुष्यंनैवपश्यति उद्वेजयतिगात्राणि आहारंचनरोचते ओदनंकृसरारक्तंमत्स्यमांसंसुरासवम् घंटांचैवपताकांचसक्तुपिष्टंच
कारयेत् उत्तरादिशमाश्रित्यमध्याह्नेबलिमाहरेत् १० गृह्णात्येकादशेमासिराक्षसीनामपूतना तयागृहीतमात्रस्तुदृग्भ्यांकिंचिन्नपश्यति नमं
त्रोनौषधंतस्यनबलिःकार्यतेबुधैः तयागृहीतोजीवेच्चेत्ततोमेविस्मयोमहान् ११ पूतनाचपलानाममासेद्वादकेभवेत् तयागृहीतमात्रस्तुरोदित्येवमुहु
मुहुः ओदनंदधिकुल्माषंतिलचूर्णंतथैवच लाजाश्चापूपकाश्चैवसर्वयत्नेनकारयेत् पूर्वादिशमथाश्रित्यमध्याह्नेबलिमाहरेत् १२ अथवर्षेषु गृह्णाति
वार्षिकंबालंपूतनापापकारिणी तयागृहीतमात्रस्तुधरण्यांपततेध्रुवम् नोन्मीलयतिगात्राणिरोदित्येवमुहुर्मुहुः दह्यंतेचैवगात्राणिआहारश्चन
रोचते गुडोदनसुरामांसंकुल्माषंपोलिकादधि तिलपिंडंचलाजाश्चगंधमाल्यंसुगंधवत् धूपयेच्चापिगोदन्तैःकेशैश्चनरवसंयुतैः स्नपनंपंच

भंगेनातिलतैलेनदीपकं पूर्वांदिशमथासाद्यएकरात्रंबलिंहरेत् एवंकृतेविधानेतुततोमुंचतिसाग्रही १ कुमारीरोदनीनामगृह्णतेचद्विवार्षिकं तयागृहीतमात्रस्तुज्वरेणपरिपीड्यते स्रवतेशोणितंविष्ठांमूत्रंरक्तंचजायते स्फुरतेदक्षिणोहस्तोरोदित्येवपुनःपुनः पद्मकेसरसंकाशगात्रंतत्रप्रजायते तेनसारमतेनित्यंकुमारीबलिकांक्षिणी गुडाक्तंकृसरंमांसंसिंदुवारंचपोलिकां कुल्माषंदधिसंयुक्तंतिलचूर्णंतथैवच पिष्टमूर्तिंबलिंकृत्वापूर्वस्यांदिशिचाहरेत् धूपयेत्सर्षपैःश्वेतैर्दोषघ्नैर्बालकंततः पालाशाश्वत्थकापित्थबिल्वोदुंबरपल्लवाः पंचभंगःस्मृतस्त्वेषबालानांहितकारकः स्नापितंधूपितंबालंततोमुंचतिसाग्रही २ कुमारीधनदानामगृह्णतेचत्रिवार्षिकं तयागृहीतमात्रस्तुचक्षुर्भ्यांनैवपश्यति सीदंतिसर्वगात्राणिज्वरःशोषश्चजायते कंपते वामहस्तश्चआहारश्चनरोचते ओदनंकृसरंमांसंमत्स्यानांचसुरासवम् कुल्माषंदधिमाषाश्चफलानिकुसुमानिच फलेतुमतिमांकृत्वाबलिंतत्र प्रदापयेत् धूपंमयूरपिष्टैश्चमृगरोमनखैस्तथा स्नपनंपंचभंगेनरात्रौचैवबलिंहरेत् उत्तरांचदिशंगत्वाशुचिर्भूत्वासमाहितः सन्नद्धःकवचीभूत्वा बलिकर्मसमारभेत् विधानमेतत्कृत्वातुततोमुंचतिसाग्रही ३ चतुर्वार्षिकबालंतुचपलानामगृह्णते तयागृहीतमात्रस्तुज्वरेणपरितप्यते सीदंति सर्वगात्राणिश्वसतेकंपतेपुनः कारयेत्सर्पकृष्णेनगंधमाल्यबलिंतथा स्नपनंपंचभंगेनमेषशृंगेनधूपनम् यथासिद्धंबलिंकृत्वापूर्वस्यांदिशिदापयेत् बलिदानमिदंकृत्वाततोमुंचतिसाग्रही ४ कुमारीवर्तनीनामगृह्णतेपंचवार्षिकं तयागृहीतमात्रस्तुअंधोभवतिबालकः सीदंतिसर्वगात्राणिमुखंचपरिशुष्यति मूत्रंप्रस्रवतेनित्यंत्रसत्येवमुहुर्मुहुः पायसंशर्कराक्षीरंतिलपिष्टंसुरासवम् पक्वाउपक्वानिमांसानिदधिमूलंफलंतथा

धूपयेल्लशुनैः केशैः सर्षपैश्चसमन्वितैः स्नपनंपंचभंगेनतिलतैलेनदीपकम् सप्तरात्रंबलिंदद्यात्ततोमुंचातिसाग्रही ५ कुमारीयमुनानामगृह्णतेषष्ठ
वार्षिके तयागृहीतमात्रस्तुरोदितिस्वरदारुणम् हसतेचदिवारात्रौ आहारश्चनरोचते मत्स्यमांसंसुरामांसंपायसंकृसरंदधि पूपकान्पोलिकाश्चैव
गंधमाल्यानुलेपनम् स्नपनंपंचभंगेनतिलतैलेनदीपकम् गवांशृंगेणधूपंचगोरोचननखैस्तथा चतुःपंचस्तुचिर्भूत्वाधिरात्रंवाबलिंहरेत् एवं
कृत्वाविधानेनबालंमुंचेन्नसंशयः ६ कुमारीजातवेदाश्चगृह्णतेसप्तवार्षिकम् तयागृहीतबालंतुरूपेणैवोपलक्षयेत् मुह्यतेचदिवारात्रौ आहारश्चनरोचते कृसरामत्स्यमांसानिपायसंघृतमिश्रितम् दधिक्षीरंमधुतथापूपकांश्चविशेषतः कुशैरास्तरणंकृत्वातिलहोमंचकारयेत् ॐ
कूष्मांडीनिभगवतीराजनीसंजुह्वतबालकंमुंचरश्रोसर ॐ सरदोषंहरदोषहरस्वाहा सर्वग्रहाणांदुष्टानांहोतव्यंसविधानवत् धूपंसर्षपधूपेन
पञ्चरात्रंतुहोमयेत् ततोमुंचतिसाबालंसर्वदोषेभ्यएवच ७ कुमारीललितानामगृह्णतेचाष्टवर्षकम् तयागृहीतमात्रस्तुबालोरोदितिगर्जति आस्फोटयतिबाहुभ्यांत्रसतेचपुनःपुनः पायसंकृसराभ्यक्तंकुल्माषंस्वास्तिकांतथा रक्तंपूपान्मत्स्यमांसंदधिगंधांश्चदीपकम् दद्यात्तुवटवृक्षस्यमूलेगत्वास्वयंशुचिः धूपेचकुष्टंमांसीस्यादेवंमुंचतिसाग्रही ८ अथदिनमानवर्षग्रहहराणि रावणः संभेदकूलद्वयमृत्तिका
यामूर्तिंविधायैककरप्रमाणाम् त्रिलोचनांशूलकपालपाणिंजटाधरारूढतनुंदधानाम् भुजंगभूषांभासितोज्ज्वलांगीमंगीकृताशेषललामलीलाम् अत्रमूर्तौसमावाह्यरुद्रंसर्वग्रहाधिपम् स्कंदादिपूतनायुक्तंपूजयेच्चंदनादिभिः विरच्यतंदुलैश्चूर्णैश्चतुरस्रंकरद्वयम् तत्रसंस्थाप्यपूर्वं

स्यांतावदर्चाविधिंचरेत् तत्तन्मंत्रैर्विचित्रैश्चनानोपकरणादिभिः ततःसोपस्करांतांतुनिक्षिपेच्चचतुष्पथे कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिंडांतकत्वङ्मासीविषदंशविट्तुषवचाकेशाहिनिर्मोककैः नागेंद्रद्विजहिंगुशृंगमरिचैस्तुल्यैश्च धूपाकृतः स्कंदोन्मादपिशाचराक्षससुरावेशज्वरघ्नः स्मृतः मदनरत्नेकुमारतंत्रे द्वितीयेदिवसेमासेहायनेवासुनंदन गृह्णातिपूतनाबालंयोगिनीस्वस्तनापिवा ततोऽभवेज्ज्वरःपूर्वः संकोचोहस्तपादयोः दंताप्रखादत्यनिशंनिमीलयतिचक्षुषी आहारंचनगृह्णातिदिवारात्रंचरोदिति अक्षिरागच्छर्दनंचभवेद्भीतिःपुनःपुनः कृशत्वंचप्रजायेतइत्येतच्छिह्नलक्षणम् तंदुलप्रस्थपिष्टेनविनिर्मायाथपुत्तिकाम् त्रयोदशध्वजादीपाःस्वस्तिकायबलोदनाः प्रस्थप्रमाणपिष्टेनासिद्धापूपाश्चमत्स्यकाः मासंचेत्येतदखिलंपश्चिमायांदिशिक्षिपेत् पश्चिमायांचसंध्यायामेतद्दद्याद्दिनत्रयम् द्वितीयदिनादिग्रहगृहीतेपि प्रथमदिनादिगृहीतवत् धूपस्नानब्राह्मणभोजनादिकार्यमितिमदनरत्ने २ तृतीयदिवसेमासेवर्षेवापूतनाभिधा गृह्णीयाद्योगिनीबालं ततःपूर्वंज्वरोऽभवेत् प्रस्थप्रमाणपिष्टेनपुत्तिकांकारयेत्तदा रक्तौदनंध्वजोरक्तः स्वस्तिकोरक्तएवच रक्तपुष्पंरक्तगंधस्तथागंधानुलेपनम् पश्चिमायांचसंध्यायामुदीच्यांनिक्षिपेद्बलिम् ३ चतुर्थेऽह्निमासेतुवर्षेगृह्णातिबालकम् तुषमंडनिकानामपूतनावाथयोगिनी भीषणाख्याततस्तस्यजायतेप्रथमंज्वरः गात्रभंगोस्थितिर्मूर्छावैवर्ण्यंचाक्षिमीलनम् वैकल्यंश्यामताश्वासःकंपोरुचिरितीरितम् तिलपिष्टमयींकृत्वा पुत्तिकांबिल्वकंटकैः अष्टांगैरर्चयेत्पुष्पयुक्तशुक्लध्वजोर्जुनः स्वस्तिकोर्द्धप्रस्थसिद्धंभक्तंतावदपूपकाः त्रिसंध्यंपश्चिमाशायांबलिंदद्यात्प्र

यत्नतः तावत्‌अर्धप्रस्थम्‌ गोशृंकंसर्पनिर्मोकंलशुनंनिंबपत्रकम्‌ मनुष्यकेशमार्जारलोमान्याजघृतंतथा एकैकश्चधूपयेदेकनिशिसंध्यात्र
येपिच एकस्मिन्नेवदिनेबलिः ४ पंचमेदिवसेमासेवर्षेवापूतनाशिशुं विडालिकाख्यागृह्णीयात्प्रथमंजायतेज्वरः हिक्काश्वासश्चशूलश्चगात्र
भंगोरुचिस्तथा तंदुलप्रस्थपिष्टेनविनिर्मायतुपुत्तिकाम्‌ शुक्लौदनंध्वजाःपंचस्वस्तिकाःपंचचोज्ज्वलाः पंचदोपाश्शुक्लानिकुसुमानिचचंदन
म्‌ अपराह्णेवृक्षमूलेपश्चिमायांदिशिक्षिपेत्‌ पंचमदिनात्प्रभृतिचतुर्थदिनाद्युक्तोधूपोपिकर्तव्यइतिमदनरत्ने ५ षष्ठेहनितथामासे
हायनेचापिबालकम्‌ पूतनाशकुनीनामगृह्णीयात्तदनंतरं ज्वरउद्वेजनंगात्रेशोषःश्वासोरुचिस्तथा कासश्चहस्तपादाक्षिसंकोचश्चेतिलक्षणम्‌
तंडुलप्रस्थपिष्टेनविनिर्मायाथपुत्तिकां कृष्णौदनंध्वजाःपंचकृष्णाःस्वस्तिकपंचकम्‌ कृष्णएवाथमत्स्यश्चपायसंदुग्धमेवच मांसंचापूपका
स्त्वर्द्धप्रस्थपिष्टविनिर्मिताः अपराह्णेपश्चिमायांनिक्षिपेद्वलिपुत्तिकां पुत्तिकांपूर्ववत्कृत्वापललंशुनपाचितं मत्स्याःपर्पटिकाश्चैवरक्तंचप्रस्थ-
संमितं उदीच्यांपूर्वसंध्यायांबलिर्देयःप्रशांतये अत्रबलिदानयोर्विकल्पः ६ सप्तमेदिवसेमासेवर्षेवाशुष्करेवती गृह्णातिपूतनाबालंततःस्या
त्प्रथमंज्वरः गात्रभंगोथविद्वेषआहारेकंपरोदने प्रस्थसंमितपिष्टेनसम्यक्कृत्वाथपुत्तिकां सप्तध्वजाःसप्तदीपाःस्वस्तिकाःसप्तवैतथा पुष्पाणि
मत्स्यमांसंचभक्तंचेत्युदगाहरेत्‌ ७ अष्टमेदिवसेमासेवर्षेवाक्रमतेशिशुम्‌ विडालिकानामधेयापूतनास्यततोज्वरः गात्रभेदोथरुदितंरोदनंनेत्र
मीलनं जिह्वाशोषशिरःस्फोटआहारद्वेषएवच तंदुलप्रस्थपिष्टेनपुत्तलींकारयेत्ततः पायसंमधुसर्पिश्चक्षीरलाजाश्चशष्कुलीःगुग्गुलंमेषमांसं

चतथापर्पटिकाअपि ध्वजादीपाश्चचत्वारोगंधानानाविधाअपि सुमनांसिचरक्तानीत्येवमंत्रोदितोबलिः अमुंसप्ताहरेत्पूर्वसंध्यायांदक्षिणादिशि कृष्णाष्टम्यांवक्ष्यमाणमंत्रेणानेनसंयतः पूजापितथैवच अष्टमीग्रहणमुपलक्षणं नवमेदिवसेवर्षेहायनेवापिबालकं गृह्णातिमदनानाम्नीपूतनातदनंतरं ज्वरश्छर्दिर्घृणाध्मानंकासःश्वासश्चतृष्णता गात्रभंगश्चशूलश्चचिह्नान्येतानिबालके प्रस्थमात्रेणपिष्टेनविनिर्मायचपुत्तिकाम् ओदनंमत्स्यमांसंचपर्पटिंचेक्षुमूलकं निक्षिपेत्पूर्वसंध्यायामुत्तरस्यांबलिंदिशि मंत्रस्तु ॐनमोभगवतेवासुदेवायहुंफट्स्वाहा ९ दशमेदिवसेमासेहायनेवाथबालकं पूतनारेवतीनामगृह्णीयाद्बालकंततः ज्वरश्छर्दिःश्वासकासौशूलंचेत्येतदीरितं प्रस्थप्रमाणपिष्टेनपुत्तिकांतत्रकल्पयेत् अष्टांगंलेपयेत्तत्रबिल्वपत्रस्यकंटकैः गुडौदनंचसर्पिश्चध्वजानांपंचविंशतिः स्वस्तिकानांप्रदीपानांपंचविंशतिरेवच चत्वारिरक्तपुष्पाणीत्येतद्दक्षिणदिग्गतं संध्यात्रयेवक्ष्यमाणमंत्रेणानेननिक्षिपेत् ॐ नमोभगवतेवासुदेवायहुंफट्स्वाहा १० एकादशदिनेमासेहायनेपूतनार्चिका गृह्णातिबालकंपश्चाज्ज्वरस्तस्यप्रजायते अन्नद्वेषोमुखेशोषोगात्रभंगश्चरोदनं ऊर्ध्वदृष्टिरपीत्येतल्लक्षणंतद्ग्रहाच्छिशोः पुत्तिकामाषपिष्टेनरचिताशुक्लमोदनम् पुष्पाण्यपिचशुक्लानिध्वजानांपंचविंशतिः स्वस्तिकानांप्रदीपानांपंचविंशतिरेवच एतत्सर्वंयमाशायांसंध्यायांप्रातराहरेत् ॐ नमोभगवतेवज्रहस्ताय ॐ फट्स्वाहा ११ द्वादशेदिवसेमासेवर्षेवापूतनाशिशुं अद्भुताख्याप्रगृह्णातिज्वरःस्यात्प्रथमंततः रोदनंसर्वदादंतखादनंरक्तनेत्रता त्रयोदशस्वस्तिकाश्चध्वजादीपास्त्रयोदश अपूपामत्स्यमांसंचतथापर्पटिकाअपि एतत्सर्वंदक्षिणस्यांदिशिमंत्रेणनिक्षि-

येत् ॐ नमोनारायणायहनदुष्टसत्वानांफट्स्वाहा १२ अथत्रयोदशादिवर्षशांतिः मदनरत्नेप्रयोगसागरे वर्षेत्रयोदशेबालंग्रहीगृह्णातिपक्षिणी तच्चेष्टाकिलहृच्छूलज्वररोदनहासनं शाल्योदनसुरामांसमत्स्यकुल्माषपायसैः दद्यात्सकृसरंप्रोक्तैर्मध्याह्नेत्रिदिनंबलिं पिबेच्चाभ्यंजयेत्सर्पिस्ततोमुंचतिसाग्रही १३ वर्षेचतुर्दशेबालंस्वच्छंदानामतोग्रही गृह्णातिचेष्टतत्रस्याच्छोणितस्रवणंतथा शूलंचनाभिदेशेस्यात्तत्रनास्तिप्रतिक्रिया १४ वर्षेपंचदशेबालंग्रहीगृह्णातिवारुणी तत्रेदंचेष्टितंविद्याज्ज्वरोनिद्राविहस्तता कुल्माषकृसरापूपपोलिकापायसासवैः सपूगकैर्बलिंदद्यात्त्रिरात्रंचापिधूपयेत् चंदनेनाज्यसंयुक्तंततोमुंचतिसाग्रही १५ षोडशेवत्सरेबालंग्रहीगृह्णातिदुर्जया तच्चेष्टाहासनंकोपोयास्यामीतिवचोमुहुः कुल्माषकृसरापूपतिलपिष्टान्नफल्गुकैः दध्नासहबलिंदद्यात्प्राच्यांदिशिदिनत्रयम् १६ वर्षेसप्तदशेबालंग्रहीगृह्णातिबालकी कासश्वासौचविज्ञेयौ तत्रनास्तिप्रतिक्रिया संवत्सरगृहाह्येतेकुमारीपदपूर्वकाइति इतिबालपीडाशांतयः अथरोगोत्पत्तिशांतिर्वसिष्ठसंहितायां रोगशांतिंप्रवक्ष्यामिरोगार्तानांशरीरिणां बलिपूजांगहोमैश्चजपब्राह्मणभोजनैः यस्मिन्धिष्ण्येयदानृणांरोगःसंजायतेतदा तद्धिष्ण्यपूजाकर्तव्यातदीश्वरसुतुष्टये सुवर्णेनप्रमाणेनतदर्धार्द्धेनवापुनः धिष्ण्येशप्रतिमा कल्प्यायथावित्तानुसारतः ईशान्यामथवाप्राच्यामुदीच्यांदिशिसंलिखेत् तंदुलोपर्यष्टदलंपद्मंगोमयमंडले पंचामृतैश्चसलिलैस्तत्तन्मंत्रैःपृथक्पृथक् स्नाप्यकल्पोक्तमंत्रेणप्रतिमांस्थापयेत्ततः कर्णिकायांतुसंस्थाप्यध्यात्वा देवंसमर्चयेत् तद्वर्णवस्त्रगंधाद्यैरुक्तधूपोपहारकैः आरक्तवर्णकुंभंचपंचाभिःपल्लवैर्युतम् शुक्लवस्त्रस्वर्णरत्नशतौषधिसमन्वितम् देवस्यपूर्व-

तः स्थाप्यजलमंत्रैः समर्चयेत् तस्माच्यांस्थंडिले वह्निंविधिवत्स्थापयेत्ततः मुखांतेजुहुयादुक्तद्रव्येणाष्टसहस्रकं उक्तद्रव्येणतन्नक्षत्रशांतौवक्ष्यमाणेनतिलहोमंव्याहृतिभिरष्टोत्तरसहस्रकं पूर्णाहुतिंचजुहुयात्सम्यक्जपतिपूर्वकम् ततः शुद्धोपविष्टस्यरोगिणः प्राङ्मुखस्यच मंत्रपूतैः कुंभजलैरब्लिंगैर्वारिमंत्रकैः मार्जनंकारयेत्तस्यसम्यक्संकल्पपूर्वकं नीराजनंविशुद्धात्मापूजास्थानंसमागतः देवंहुताशनंभक्त्याप्रणम्यप्रार्थयेदिति अमृतोद्भवधिष्ण्येशयज्ञस्त्वंशंकरात्मकः रोगादस्माच्चमांरक्षतववश्याश्चधिष्ण्यपाः इतिप्रार्थ्यततोदद्यात्प्रतिमांवस्त्रसंयुताम् दक्षिणासहितांगांचआचार्यायकुटंबिने ब्राह्मणेचयथाशक्त्याब्राह्मणान्भोजयेत्ततः कृत्वानक्षत्रपूजांचतिथिवासरयोरपि सर्वान्कामानवाप्नोतिरोगीरोगात्प्रमुच्यते अत्रजपः आपस्तंबशाखीयानामष्टौवाक्यानां एतद्विधियुतांवक्ष्यमाणांनक्षत्रशांतिं कृत्वातिथिशांतिंवारशांतिंचकुर्यादित्यर्थः अश्विन्यामुत्थितोव्याधिर्नवरात्रेणमुंचति देवस्यत्वेतिमंत्रस्यगायत्रीकाश्यपोश्विनौ श्वेतवर्णौसुधापूर्णौकुंभांभोजधरौपृथक् चंदनोत्पलपुष्पाज्यगुग्गुलूचगुडप्रियौ क्षीरलड्डुकभोक्तारौसमिधः क्षीरवृक्षजाः आज्यंगुग्गुलुश्चधूपइत्यर्थः गुडःक्षीरलड्डुकंचनैवेद्यं समिधोहोमद्रव्यमित्यर्थः एवमग्रेपिद्रष्टव्यं गुडौदनंबलिंदद्याद्दीपैःसार्द्धंनिशामुखे १ भरण्यामुत्थिताव्याधिरचिरान्निधनप्रदः ३ मासेनमुंचत्यथवादेवस्यकुटिलागतिः त्र्यंबकस्यतुमंत्रस्यचोक्ताश्छंदर्षिदेवताः गंधोगरुः करवीरपुष्पंधूपश्चगुग्गुलः आज्यदीपंचसर्वेषांनैवेद्यंचगुडौदनम् पाशदंडधरोरक्तस्त्वाज्यमध्वाक्षतैर्हविः महिषीनायकारूढाकृसरान्नबलिंहरेत् वक्ष्यमाणेनमंत्रेणबलिंसम्यक्प्रदापयेत् २ कृत्तिकासूत्थितोव्याधिर्दश

रात्रेणमुंचति स्रुक्स्रुवाभयवरदःसुवर्चामेषवाहनः मेधातिथिर्जगत्यग्निःपुनंतुमामित्यस्यच चंदनंयूथिकापुष्पंघृतधूपःसगुग्गुलः नैवेद्यंतिल-
माषान्नंवटकाद्येनसंयुतम् गुडौदनंहविस्तत्रपायसेनबलिंहरेत् ३ रोहिण्यामुत्थितोव्याधिर्दशरात्रेणमुंचति नमोब्रह्मणमंत्रस्यगायत्रीविधिरी
श्वरः शुष्कःकमंडलुस्त्वक्षसूत्राभयवरप्रदः चंदनंकमलंपुष्पंसदशांगंचगुग्गुलं नैवेद्यंपायसंसाज्यंसर्वदानैर्हविर्भवेत् दधिक्षीरघृतक्षौद्रशाल्यन्नेनब
लिंहरेत् ४ चंद्रभेचोत्थितोव्याधिःपंचरात्रेणमुंचति गदावरदपाणिश्चश्वेतोसौरथवाहनः नवोनवोभवत्यस्यगायत्रीगौतमः शशी चंदनंकुमुदंपुष्पंद
शांगंपायसौदनं नैवेद्यंमंडकापूपघृतक्षौद्रसमन्वितं शर्करादधिमिश्रेणशुक्लान्नेनबलिंहरेत् ५ आर्द्रायामुत्थितोव्याधिरचिराग्निधनप्रदः मासेनमुं
चत्यथवादेवस्यकुटिलागतिः शुद्धस्फटिकसंकाशःशूलखड्गभयेष्टदः नमःशंकरायेत्यस्यबृहतीशोविधिर्ऋषिः चंदनंसौभरंपुष्पंदशांगंपायसौदनम्
समध्वाज्यंहविस्तत्रदध्योदनबलिंहरेत् ६ पुनर्वसौभवेद्व्याधिर्नवरात्रेणमुंचति कमंडल्वक्षसूत्रेध्मदर्भस्रुक्स्रुवभृत्सदा अदितिर्द्यौश्चमंत्रस्य
त्रिष्टुपोद्रुहिणोदितिः हरिद्राकुंकुमंगंधः पुष्पंसेवंतिकादयः धूपोमलयजंपिष्टंघृतान्नंपीतवर्णकं घृताक्ततंदुलहविःपीतान्नेनबलिंहरेत् ७ पुष्येस
मुत्थितोव्याधिः सप्तरात्रेणमुंचति पीतोदंडकमंडल्वक्षसूत्राभयोद्यतः बृहस्पते अतीत्यस्यत्रिष्टुप्जीवांगिराऋषिः कुंकुमंवारिजंपुष्पंनैवेद्यं
घृतपायसं मंडकागुडसंयुक्तमेतदेवहविर्भवेत् समंडकघृतान्नेनबलिंतत्रसदापयेत् ८ आश्लेषासमुत्थितोव्याधिःक्लेशान्मासेनमुंचति नमोअ-
स्त्वितिमंत्रस्यहविराड्गानिसर्पराट् मधुवर्णोभोगयुक्तः खड्गचर्मधरःशुभः सकुंकुमागरुर्गंधःपुष्पंचागस्तिसंभवं घृतंगुग्गुलधूपोन्ननैवेद्यंक्षीरसर्पि

पा हविःसाज्यंसुदध्यन्नंदध्योदनबलिंहरेत् ९ पितृभेचोत्थितोव्याधिरचिराभिधनप्रदः अथवासार्द्धमासेनधूम्रोदंडपवित्रधृक् आयंतुनस्त्वितिचास्यजगतीपितरोब्जजः चंदनंचंपकंपुष्पंधूपः सघृतगुग्गुलुः नैवेद्यंघृतपिष्टान्नंतिलान्नंसघृतंहविः सतिलाज्यंचमुद्गान्नंबलिंचापितृतृप्तये १० पूर्वाफाल्गुनभेव्याधिरर्द्धमासेनमुंचति भगएवभगवानित्यस्यत्रिष्टुब्भागोधिपः पद्माभयकरः पद्मवर्णःसिंहासनेस्थितः चंदनंमालतीपुष्पंबिल्वधूपोघृतौदनं नैवेद्यंशर्करापूपलड्डुकाद्यैश्चसंयुतं घृतौदनंहविस्तत्रपायसेनबलिंहरेत् ११ अर्यमर्क्षेभवेद्व्याधिरर्द्धमासेनमुंचति पद्मवर्णःपद्मसंस्थःपद्मगर्भसमद्युतिः अर्यमायातिमंत्रस्य उ अर्यमात्रिष्टुबब्जजः कर्पूरःकुंकुमंगंधः पुष्पंबंधूकसंज्ञकं घृतगुग्गुलधूपोत्रनैवेद्यंघृतपायसं होमद्रव्यंघृतान्नंस्याच्छाल्यन्नेनबलिंहरेत् १२ हस्तेसमुत्थितोव्याधिर्नवरात्रेणमुंचति उदुत्यमितिहिरण्यस्तुपोगायत्र्यादितिर्यजेत् रक्तगंधंकुंकुमंचपुष्पंराजीवसंज्ञकं गंधगुग्गुलधूपोत्रनैवेद्यंघृतपायसं मधुपुष्पंतिलाज्यान्नंदूर्वाभिःसहितंहविः गुडशर्करमध्वाज्यपिष्टान्नेनबलिंहरेत् १३ चित्रायामुत्थितोव्याधिर्दशरात्रेणमुंचति चित्रंदेवानामित्यस्यत्वष्टात्रिष्टुप्पितामहः अक्षसूत्राभयकरश्चित्रवर्णःशिवेतरः सकुंकुमागरुर्गंधःकुसुमंचित्रवर्णकं नैवेद्यंमोदकाज्यान्नंचित्रान्नंसघृतंहविः तदन्नेनबलिंदद्यात्सर्वरोगापनुत्तये १४ स्वात्यर्क्षेचोत्थितोव्याधिःसर्वदानिधनप्रदः एकद्वित्रिचतुष्पंचषण्मासैर्वापिमुंचति सनःपितेतिमंत्रस्यगायत्रीमरुदंगिराः खड्गचर्मधरःकृष्णोगंधःकृष्णागरुर्भृशं पुष्पंदमनकंधूपंचंदनागरुगुग्गुलुः नैवेद्यंपायसंसाज्यंहविस्तेनबलिंहरेत् १५ द्विदैवभेभवेद्व्याधिर्मासेनैकेनमुंचति इंद्राग्नीआगतमितिगायत्रीवास्यचैवहि मधुच्छंदाऋषींद्राग्नीतयोर्ध्यानंचपूर्ववत् श्रीखंडंकुंकुमंगंधंतयोःपुष्पंसरोरुहम् देवदारुस्तयोर्धूपोनैवेद्यंघृतपाय

सम् तदेवान्नंहविस्तत्रचित्रान्नेनबलिंहरेत् १६ मित्रभेचोत्थितोव्याधिर्दशरात्रेणमुंचति मित्रस्यचर्षणीधृतिगायत्रीचास्यचैवहि ऋषिर्हिरण्यस्तूपा
ख्यस्तत्रमित्रोधिदेवता द्विभुजःपद्मगर्भाभःपद्मभूतपद्मसंस्थितः कुंकुमंपुंडरीकाख्यंपुष्पंधूपंचचंदनं नैवेद्यंपायसंसाज्यंहविःकंदचसूरणं बलिस्तत्र
प्रदातव्योमधुशर्करपायसं घृतपूरकमाषान्नमुद्गगर्भैश्चसंयुतं १७ ज्येष्ठायामुत्थितोव्याधिर्मृत्युरेवनसंशयः अथवामासमेकंवामुंचत्येवनसंशयः इंद्रंवइ
तिमंत्रस्यगायत्रीद्वांगिराऋषिः इंद्रस्तुपूर्ववद्गंधचंदनंकुसुमंशुभं कर्पूरधूपोनैवेद्यंचित्रान्नंसुमनोहरं हविस्तुसूरणंकंदंमधुकंदंसुपायसं विचित्रपुष्पगंधो
नदध्यन्नेनबलिंहरेत् १८ मूलभेचोत्थितोव्याधिर्मासार्धेनविमुंचति खड्गचर्मधरःकृष्णःकरालवदनःप्रभुः मोषुणस्यत्वगायत्रीघोरःकण्वोथनिर्ऋतिः
गंधःकृष्णागरुःपुष्पंपद्मनीलोत्पलंशुभं धूपःकृष्णागरुर्माषमिश्रान्नमुपहारकं तदेवान्नंहविस्तत्रमाषान्नेनबलिंहरेत् १९ वारिभेचोत्थितोव्याधिरोगिणो
निधनप्रदः विमुंचत्यथवामासैर्द्वित्रिषड्भिश्चसप्तभिः आप्यायस्वेतिमंत्रस्यगायत्रीपद्मपोजलं सुवर्णोद्विभुजःपद्मपाणिर्गंधश्चचंदनं पद्मशैलेय
धूपोत्रनैवेद्यंघृतपायसं हविर्मसूरपिष्टान्नंतदन्नेनबलिंहरेत् २० विश्वभेचोत्थितोव्याधिःसार्धमासेनमुंचति विश्वेदेवासइत्यस्यगायत्रीविश्वदेवता कमंड-
लुभयांभोजवरदस्रुक्कुशासनः चंदनंकमंडलुंपुष्पंधूपःसघृतगुग्गुलुः नैवेद्यंपायसंसाज्यान्नंहविरप्येतदेवहि समिद्भिर्नितुलैःसार्द्धंतदन्नेनबलिंहरेत् २१ श्रव
णेचोत्थितोव्याधिर्दशरात्रेणमुंचति अतोदेवेतिमंत्रस्यगायत्रीपद्मजोहरिः पीतांबरःकृष्णवर्णःशंखचक्रगदाब्जजः चंदनंमालतीपुष्पंधूपःकर्पूरगुग्गुलुः
शाल्यन्नंषड्रसोपेतंभक्ष्यभोज्यादिभिःसह नैवेद्यंहविरप्येतत्पायसेनबलिंहरेत् २२ वसुभेचोत्थितोव्याधिर्दशरात्रेणमुंचति त्रायंतामिहमंत्रस्यानुष्टु

पृथ्व्यासोवसुस्ततः चापबाणधरः शुक्लोगंधः कर्पूरश्चंदनं वारिजंगुग्गुलुधूपोनैवेद्यंघृतपायसं हविश्चौदुंबरसमिद्गुडपायससंयुतं लड्डुकापूपमध्वाज्यतिलपिष्टबलिंहरेत् २३ वारुणेचोत्थितोव्याधिरष्टरात्रेणमुंचति इमंमेवरुणइत्यस्यगायत्रीकण्ववारिपः नागपाशधरःश्रीमान्नवरत्नविभूषितः मकरस्थोगुरुर्गन्धःपुष्पंचकमलोत्पलं कर्पूरंचंदनंधूपोनैवेद्यंघृतपोलिका हविरश्वत्थसमिधश्चित्रान्नेनबलिंहरेत् २४ अजैकपाद्भवोव्याधिः सर्वदानिधनप्रदः अथवाबहुभिर्मासैर्दिवसैर्वाविमुंचति वामपादकरंभूम्यामाकाशेत्वपरद्वयं प्रसार्यप्रांजलिःसाक्षादीश्वरंचिंतयन्स्थितः शमग्निरित्यस्याजपाद्गायत्रीचतुराननः कुंकुमंचंदनंगंधंपुष्पंश्वेतार्कसंभवं धूपःशतौषधीमिश्रोनैवेद्यंदधिपायसं हविःकूष्मांडखंडःस्याद्दध्यन्नेनबलिंहरेत् २५ अहिर्बुध्न्येभवेद्व्याधिःसार्धमासेनमुंचति नमस्तेरुद्रइत्यस्यसर्वंतत्रैवसंस्थितं गंधंचंदनकर्पूरैःपुष्पंपद्मोत्पलंशुभं सबिल्वगुग्गुलुधूपोनैवेद्यंघृतपायसं मुद्गमाषतिलान्नाज्ययवव्रीहिर्भवेद्धविः २६ रेवत्यामुत्थितोव्याधिरष्टरात्रेणमुंचति हंसःशुचिषदित्यस्यजगतीवामदेवकः पूषाचदेवतांभोजवर्णोंभोजधरःशुभः रक्तचंदनगंधोत्रपुष्पंमंदारसंज्ञकम् धूपस्तुगुग्गुलुःसाज्यंनैवेद्यंघृतपायसं हविस्तदेवसजलंदध्यन्नेनबलिंहरेत् भूतेशानुस्मृतोयस्माद्रोगनाथोमहाज्वरः रोगादस्मात्त्वमांत्राहित्वंगृहीत्वोत्तमंबलिं २७ इतिनक्षत्रपीडाशांतयः अथबौधायनोक्तज्वराद्युत्पत्तौशांतयः प्रतिपदिकष्टंसंदेहोदिनानिदश अग्निर्देवताअग्निरस्मीतिपूजामंत्रः हैमीप्रतिमाघृतधूपोघृतदीपश्चयथासंभवंनैवेद्यंघृतंहोमद्रव्यंशांतिर्भवति अत्रसर्वत्रप्रथमंतत्तद्देवतामंत्रजपः सहस्रादिसंख्याकः पश्चात्पूजाहोमदानादिसंख्याचाष्टोत्तरशतादिर्व्याधितारतम्येनकल्प्यासहस्रमृत्युर्दिनेशः १ द्वितीयायांदि

नानिषोडशब्रह्मादेवता ब्रह्मजज्ञानमितिजपपूजाहोममंत्रःअगरुर्धूपः घृतदीपः सर्वत्रशर्करानैवेद्यंतिलयवाज्यानिहोमद्रव्याणिप्रतिमाहैमी २ तृतीया
यांदिनानि नवपार्वती देवतागौरीर्मिमायेतिमंत्रः दूर्वाभिः पूजांकुंकुमगंधः गुग्गुलुः सर्वधूपो घृतदीपः द्राक्षाक्षीराज्यनैवेद्यंपायसंत्रिमधुराक्तं दूर्वाश्च प्रति
माहैमी ३ चतुर्थ्यांदिनानिषोडशगणपतिर्देवतागणानांत्वेतिपूजाहोमादिमंत्रः हैमीप्रतिमाकुंकुमंरक्तचंदनंगंधः करवीरादीनिपुष्पाणिअगरुधूपोलड्डुकेक्षुखंडा
निनैवेद्यंनारीकेलशकलानिकदलीफलानिचहोमद्रव्यं ४ पंचम्यांदिनान्येकविंशतिर्नागोदेवताहैमीप्रतिमानमोअस्तुसर्पेभ्यइतिमंत्रः चंदनंगंधः सुरभिपु
ष्पाणिघृतधूपः पयोनैवेद्यंतिलयवाज्यपायसशर्करामधूनियथाहोमद्रव्यं ५ षष्ठ्यांदिनानिद्वादशस्कंदोदेवताक्रन्दसश्चस्कंदेतिपूजामंत्रः पीतचंदनम् रक्तं
वागंधः रक्तानिपुष्पाणिजातीपुष्पाणिवाजटामांसीधूपः लड्डुकादिनैवेद्यंफलानिवातिलयवाज्यशर्करामधूनियथाहोमद्रव्यंहैमीप्रतिमाशांतिर्भवति ६ स
सम्यांदिनान्यष्टौदिननाथोदेवता आसत्येनआकृष्णेनेतिवामन्त्रः हैमीताम्रजावाप्रतिमाकुंकुमंगंधः करवीरादीनिपुष्पाणिगुग्गुलुर्धूपः शर्कराघृतसंयुक्तं
पायसंनानाफलनैवेद्यंअर्कसमिधः पायसंहोमद्रव्यं ७ अष्टम्यांदिनानित्रयोदशईश्वरोदेवतातमीशानमितिपूजामंत्रः राजतीप्रतिमाकर्पूरमिश्रंचंदनंगं
धः बिल्वदलान्यर्कपुष्पाणिनीलोत्पलानिचपुष्पाणिजटामांसीधूपः पायसंनानाभक्ष्याश्चनैवेद्यंत्रिमध्वक्तास्तिलाहोमद्रव्यंरोगशांतिर्भवति ८ नवम्यां
दिनान्यष्टादशभगवतीदुर्गादेवताजातवेदसइतिपूजामंत्रः हैमीप्रतिमारक्तचंदनगंधः कुंकुमादिकंवानैवेद्यंहोमद्रव्यंओदनं ९ दशम्यांदिनानिपंचविंश-
तिः यमोदेवताहैमीलोहीवाप्रतिमायमायत्वेतिपूजामंत्रः चंदनंमृगमदश्चगंधः मधुसर्जरसश्चधूपः तिलतैलदीपः बिल्वपत्राणिकृष्णातिलाश्चहोमद्रव्यम्

कृसरान्नंनैवेद्यंघृतमधुतिलमुद्गाहोमद्रव्यं १० एकादश्यांदिनानिसप्तविश्वेदेवादेवताविश्वेदेवासइतिमंत्रः हैमीप्रतिमाश्वेतचंदनगंधः कृष्णागरुधूपः घृतदीपः तुलसीपत्राणिपूजायांयवमोदकंनैवेद्यंतिलयवमध्वाज्यंहोमद्रव्यं ११ द्वादश्यांद्वादशदिनानिरुद्रोदेवतायातेरुद्रेतिमंत्रः हैमीप्रतिमाचंदनंश्रीखंडं अगरुधूपः घृतदीपः पायसंनैवेद्यंचंपकपुष्पंकमलंचपूजायांतिलयवाज्यमधूनिहोमद्रव्यंशांतिर्भवति १२ त्रयोदश्यांदिनान्यष्टौशमीदेवतारौक्मीराजतीवामूर्तिः आप्यायस्वेतिमंत्रः पूजायांश्वेतचंदनगंधः चंदनधूपः घृतदीपः दधिशर्करानैवेद्यंतिलयवास्त्रिमध्वक्ताहोमद्रव्यंशांतिर्भवति १३ चतुर्दश्यांदिनानिद्वाविंशतिः नमः शंभवेचेतिमंत्रः रौक्मीराजतीवामूर्तिः श्वेतचंदनगंधः अर्कपुष्पंबिल्वदलानिवापूजायां अगरुधूपः पायसंनैवेद्यंत्रिमध्वक्तास्तिलाहोमद्रव्यं १४ अमायांदिनान्यष्टादशशचीदेवताहोतायक्षदितिमंत्रः हैमीप्रतिमाकुंकुमादिगंधः नानासुगंधपुष्पाणिकृष्णागरुधूपः फेणिकापूरिकानैवेद्यंघृतपायसंहोमद्रव्यं १५ पूर्णिमायांदिनानिषोडशचंद्रोदेवतादमनकपूजायामन्यत्सर्वंत्रयोदशीशांतिवदुक्तंग्राह्यं १६ इतिदिनकरभट्टकृतेशांतिसारेतिथिदोषशांतिः

अथाश्वलायनोक्तवारशांतिः आदित्यवासरस्यरुद्रोदेवतायातेरुद्रेतिमंत्रः हैमीराजतीवामूर्तिः चंदनगंधः अगरुधूपः घृतदीपः पायसंनैवेद्यंहोमद्रव्यंच १ सोमवासरस्यपार्वतीदेवतागौरीर्मिमायेतिमंत्रः हैमीराजतीवाप्रतिमाकुंकुमगंधः सुगंधिपुष्पंअगरुधूपः घृतदीपः नानाभक्ष्याणिनैवेद्यंतिलयवाहोमद्रव्यंदेवभक्तसंतर्पणंच २ भौमस्यस्कंदोदेवता अन्यत्सर्वंषष्ठीशांतिवत् ३ बुधवासरस्यविष्णुर्देवताविष्णोरराटमसीतिमंत्रः हैमंस्वरूपम् पीतचंदनंपीतपुष्पाणिकमलानिच अगरुधूपः घृतदीपः यवलड्डुकनैवेद्यंतिलयवाज्यहोमः ४ गुरुवारस्यब्रह्मादेवता ब्रह्मजज्ञानमितिमंत्रः हैमीप्रति-

माकुंकुमगंधः पर्णपुष्पंगुग्गुलु धूपः शर्कराज्यंनैवेद्यंतिलयवधानाघृतंहोमद्रव्यं ५ शुक्रवासरस्यइंद्रोदेवतात्रातारमिंद्रमितिमंत्रः हैमीमूर्त्तिः चंदनगं
धः चंपकंपुष्पं अगरुर्धूपः घृतपक्वनैवेद्यंतिलयवाज्यमधूनिहोमद्रव्यं ६ शनिवारस्ययमोदेवता यमेनदत्तमितिमंत्रः हैमीलौहीवाप्रतिमाताम्रजेतिके
नित् चंदनगंधः पुष्पंकृष्णमधुधूपः तिलतैलेनदीपः मधुमत्स्याश्चनैवेद्यंतिलामधुचहोमद्रव्यं शांतिर्भवति ७ इतिवारशांतिः प्रतिपद्युत्थितोव्या
धिर्द्वादशाहेनमुंचति अग्निस्तुदेवतातत्रकृसरान्नबलिंहरेत् १ द्वितीयायांभवेद्व्याधिः पंचरात्रेणमुंचति ब्रह्मातुदेवतातत्रपायसेनबलिंहरेत् २ तृ
तीयायांभवेद्व्याधिःसप्तरात्रेणमुंचति कामस्तुदेवतातत्रघृतान्नेनबलिंहरेत् ३ चतुर्थ्यामुत्थितोव्याधिर्दशरात्रेणमुंचति चंद्रस्तुदेवतातत्रमुद्गान्नेनब-
लिंहरेत् ४ पंचम्यामुत्थितोव्याधिर्नवरात्रेणमुंचति नागस्तुदेवतातत्रदुग्धान्नेनबलिंहरेत् ५ षष्ठ्यांसमुत्थितोव्याधिश्चतूरात्रेणमुंचति स्कंदस्तुदेवतातत्रमु
द्गान्नेनबलिंहरेत् ६ सप्तम्यामुत्थितोव्याधिरष्टरात्रेणमुंचतिअर्यमादेवतातत्रगुडान्नेनबलिंहरेत् ७ अष्टम्यामुत्थितोव्याधिर्दशरात्रेणमुंचति बृहस्पति
र्देवतात्रपायसान्नंबलिंहरेत् ८ नवम्यामुत्थितोव्याधिर्मरणंनिश्चितंभवेत् यमस्तुदेवतातत्रमाषान्नेनबलिंहरेत् ९ दशम्यामुत्थितोव्याधिःपंचरात्रेणमुंच
ति सवितादेवतातत्रघृतान्नेनबलिंहरेत् १० एकादश्युत्थितोव्याधिस्त्रिरात्रेणचमुंचति महाविष्णुर्देवतात्रपूपान्नेनबलिंहरेत् ११ द्वादश्यामुत्थितोव्या
धिर्मरणंनिश्चितंभवेत् रोगिणोनविनिर्मुक्तिर्यमलोकंसगच्छति १२ त्रयोदश्युत्थितोव्याधिःसप्तरात्रेणमुंचति वरुणोदेवतातत्रलड्डुकान्नंबलिंहरेत् १३ च
तुर्दश्यांभवेद्व्याधिर्मृत्युदोयाद्विमासकः मुंचंतिदेवताःसर्वाःपिष्टान्नेनबलिंहरेत् १४ पूर्णिमायांभवेद्व्याधिस्त्रिरात्रेणप्रमुंचति चंद्रस्तुदेवतातत्र

दध्योदनबलिंहरेत् १५ अमावास्यांभवेद्व्याधिर्मासेनैकेनमुंचति अथवाष्टाचत्वारिंशाद्दिनान्निदाहपीडितः ३० महामृत्युर्भवेत्तेनयमलोकंसगच्छति तत्रशांतिंप्रवक्ष्यामिसर्वदोषोपशांतये पितॄणांप्रतिमाकार्यासौवर्णाकर्षसंमिता येचेहपितरइतिपूजामंत्रउदीरितः कृष्णागरुश्चंदनंच कृष्णपुष्पैस्तुपूजयेत् समिदाज्यतिलैर्माषचर्वाज्येनचहोमयेत् अष्टोत्तरशतंवापिअष्टाविंशतिरेववा कृष्णागौश्चप्रदातव्याआचार्यायसदक्षिणा ब्राह्मणान्भोजयेत्पश्चादेकादशस्वशक्तितः सर्वारिष्टप्रशांत्यर्थंदीर्घायुश्चसुखीभवेत् रविवारेभवेद्व्याधिर्ज्वरदाहेनपीडितः सवितादेवतातत्रपायसान्नबलिंहरेत् १ इंदुवारेभवेद्व्याधिःसप्तरात्रेणमुंचति सोमस्तुदेवतातत्र घृतान्नेनबलिंहरेत् २ भौमवारेभवेद्व्याधिःक्लेशायमरणायच कुजस्तुदेवतातत्रहरिद्रान्नबलिंहरेत् ३ बुधवारेभवेद्व्याधिःक्लेशायमरणायच बुधस्तुदेवतातत्रमुद्गान्नेनबलिंहरेत् ४ गुरुवारेभवेद्व्याधिःपंचरात्रेणमुंचति गुरुस्तुदेवतातत्रहरिद्रान्नबलिंहरेत् ५ भृगुवारेभवेद्व्याधिःसप्तरात्रेणमुंचति भृगुश्चदेवतातत्रहरिद्रान्नब० ६ शनिवारेभवेद्व्याधिर्मासार्द्धेनविमुंचति शनिस्तुदेवतातत्रमाषान्नेनब० ७ पंचराश्यादिषड्वर्गाद्बलिंदद्यात्तदीश्वरे योबलिंकुरुतेसम्यग्रोगीरोगात्प्रमुच्यते आधाननिधनप्रत्यक्जन्माह्वयविपत्करे नक्षत्रेजनितेव्याधौक्लेशायमरणायच आश्लेषार्द्राविपूर्वायमवरुणमरुच्छुक्रतारानलाः स्युर्द्वादश्यांस्कंभरिक्तातिथिषुचरविजारार्कवारेषुयेषाम् रोगःसंजायतेतेयमपुरमचिरात्प्राप्नुवंत्येवचंद्रेजन्मन्यष्टारव्ययंसुखव्ययभवनगतेमृत्युलग्नेचराशौ इतिदिनकरभट्टकृतेशांतिसारेव्याधिनक्षत्रादिशांतयः अथज्वरशांतयः मदनरत्नेआत्रेयप्रोक्तनक्षत्रपरिशिष्टे अश्विन्यांज्वरोत्पत्तिश्चेद्दशदिनानिपीडा नीलोत्पलपुष्पैःपूजागुग्गुलुर्धूपः क्षीरलड्डुकंनैवेद्यं देवस्यत्वेतिपूजामंत्रः क्षीरवृ

क्षसमित्प्रधानद्रव्यं गायत्र्याष्टशतंहुत्वादध्योदनबलिंहरेत् एकादशदिनादारभ्यपंचविंशतिदिनांतेसुखीस्यात् १ भरण्यांज्वरोत्पत्तिश्चेन्मृत्युः संदेहोवा गुडापूपंनैवेद्यं कृष्णसुरभिपुष्पं महिषाक्षोधूपः त्र्यंबकमितिपूजामंत्रः घृतमधुतिलाहोमद्रव्यंगायत्र्याष्टोत्तरशतंयमायहुत्वाएकविंशतिदिनांतेसुखीस्यात् २ कृत्तिकायांज्वरश्चेन्नवदिनानिपीडा घृतौदनंनैवेद्यं यूथिकापुष्पपूजा सर्पिर्धूपः पुनंतुमांदेवजनाइतिपूजामंत्रः सावित्र्याष्टोत्तरशतंदध्योदनंचहुत्वाहुतशेषेणबलिंहरेत् पंचदिनादारभ्यएकविंशतिदिनांतेसुखीस्यात् ३ रोहिण्यांज्वरश्चेन्नवदशत्रीणिदिनानिपीडा क्षीरान्ननैवेद्यंकमलपुष्पपूजा सर्जरसोधूपः नमोब्रह्मणइतिपूजामंत्रः घृतंसर्वधान्यानिचहोमद्रव्यं सावित्र्याष्टोत्तरशतंहुत्वाक्षीरान्नेनप्रजापतयेबलिंदद्यात् त्रिदिनादारभ्यनवदिनांतेसुखीस्यात् ४ मृगशिरसिज्वरश्चेत्पंचदिनानिपीडा पायसंनैवेद्यंकुमुदोत्पलपुष्पपूजा दशांगोधूपः नवोनवइतिपूजामंत्रः मुद्गतिलपंचगव्यंहोमद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वामुद्गतिलैस्त्र्यंबकायबलिंदद्यात्पंचदिनादारभ्यनवदिनांतेसुखीस्यात् ५ आर्द्रायांज्वरश्चेन्मृत्युर्दिनान्येकविंशत्पीडावासोहालकंनैवेद्यं धत्तूरपुष्पपूजा अगरुधूपः नमःशंभवेतिपूजामंत्रः मध्वाज्यंहोमद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वापायसान्नेनरुद्रायबलिंदद्यात् पंचदिनादारभ्यदशदिनांतेसुखीस्यात् ६ पुनर्वसौज्वरश्चेत्सप्तदिनानिपीडा गुडौदनंनैवेद्यंमल्लिकापुष्पपूजामलयजोधूपः अदितिर्द्यौरितिपूजामंत्रः घृततंडुलाःप्रधानद्रव्यंगायत्र्याष्टोत्तरशतंहुत्वाअदितयेगंधमाल्यौदनैर्बलिंदद्यात्सप्तदिनादारभ्यसप्तविंशद्दिनांतेसुखीस्यात् ७ पुष्येज्वरश्चेत्सप्तदिनानिपीडा खंडमंडकानैवेद्यं मल्लिकासरोरुहंचपुष्पंगुग्गुलुधूपः बृहस्पतेअतीतिपूजामंत्रः घृतपायसंद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वागंधमाल्यौदनैर्बृहस्पतयेबलिंदद्यात् दिनत्रयादारभ्य

सप्तदिनांतेसुखीस्यात् ८ आश्लेषायांज्वरश्चेन्नवदिनानिपीडापायसंनैवेद्यंअतसीपुष्पपूजाघृतमंडोधूपःमधुवातेतिपूजामंत्रः दधिमध्वक्तकेसरान्नंद्रव्यंगाय
त्र्याष्टोत्तरशतंहुत्वासक्त्वन्नेननागायबलिंदद्यान्नशांतिश्चेदष्टदिनांतेमरणंस्यात् ९ मघायांज्वरश्चेन्मृत्युः एकविंशतिदिनानिपीडावाघृतपूरकंनैवेद्यंचंपकपुष्पपू-
जागुग्गुलुर्धूपः पितुंनुस्तोषमितिपूजामंत्रः घृतमधुमिश्रतिलाक्षतवटपत्राणिद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वातिलैः पितृभ्योबलिंदद्यान्नशांतिश्चेद्दशदिनांतेमृ
त्युः १० पूजायांज्वरश्चेद्दशदिनानिषष्टिपंचदशवापीडारक्तमाल्योदनंनैवेद्यंबिल्वफलधूपः अर्यमणंनुदेवमितिमंत्रः घृतप्रियंगवः द्रव्यंसावित्र्याष्टोत्तरशतंहुत्वागं
धपुष्पेणसूर्यायबलिंदद्यात्षट्दिनादारभ्यषष्टिदिनांतेसुखीस्यात् ११ उत्तरायांज्वरश्चेदेकविंशतिदिनानिपीडाकृसरंनैवेद्यंश्वेतकरवीरपूजाबिल्वफलधूपः यन्मे
तिमंत्रः तिलमाषसर्पिर्व्रीहियवद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वातैरेवार्यम्णेबलिंदद्यादष्टादशदिनादारभ्यएकविंशतिदिनांतेज्वरमोक्षः १२ हस्तेज्वरश्चेन्मृत्युः संदे
होवादिनानिपंचदशपीडाअपूपंनैवेद्यंरक्तकरवीरपूजादशांशोधूपः उदुत्यमितिमंत्रः दधिघृतंद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वागंधपुष्पेणबलिंदद्यात् पंचादिना
दारभ्यएकविंशतिदिनांतेसुखीस्यात् १३ चित्रायांज्वरश्चेद्दिनानिपंचपीडामोदकंनैवेद्यंजपापुष्पपूजा दशांगोधूपः चित्रंदेवानामितिमंत्रः जलमिश्रघृतंचि
त्रौदनंद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वा त्वष्ट्रेघृतमिश्रमुद्गैर्बलिंदद्यात्सप्तदिनादारभ्यपंचविंशतिदिनांतेसुखीस्यात् १४ स्वात्यांज्वरश्चेत्षष्टिदिनानिपीडाद
ध्योदनंनैवेद्यंदमनकपुष्पपूजाश्वेतागरुर्धूपः सनः पितेवेतिमंत्रः घृताक्तयवाद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वागंधपुष्पेणवायवेबलिंदद्याद्दशदिनादारभ्य
चत्वारिंशद्दिनांतेसुखीस्यात् १५ विशाखायांज्वरश्चेद्विंशतिदिनानिपीडागुडकंनैवेद्यंबंधूकपुष्पपूजादेवदारुर्धूपः शंनइंद्राग्नीइतिपूजामंत्रः दुग्धौदनघृतं

द्रव्यंसावित्र्योष्टोत्तरंशतंहुत्वापयोमिश्रितैर्गंधमाल्यैरिंद्राग्निभ्यांबलिंदद्याद्दशदिनादारभ्यविंशतिदिनांतेसुखीस्यात् १६ अनुराधायांज्वरोत्पत्तिर्दशदिनानिपीडापायसाज्यंनैवेद्यं आरक्तपुष्पंचंदनंधूपः कर्पूरदीपः मित्रस्यचर्षणीधृतइतिपूजामंत्रः घृताक्तसूरणकंदंद्रव्यं सावित्र्याष्टोत्तरशतंहुत्वामधुशर्करापायसघृताक्तमाषान्नमुद्गगंधपुष्पसहितंमित्रायबलिंदद्यात् पंचदिनादारभ्यदशदिनांतेसुखीस्यात् १७ ज्येष्ठायांज्वरश्चेन्मृत्युः संदेहोवापंचदिनानिपीडाचित्रौदनंनैवेद्यंपटोलीपुष्पपूजाकर्पूरागरुर्धूपः इंद्रंवोइतिपूजामंत्रः घृताक्तसूरणकंदंद्रव्यंसावित्र्याअष्टोत्तरशतंहुत्वागंधपुष्पेणेंद्रायबलिंदद्यान्नशांतिश्चेदन्यतरांगतिंगच्छतीत्याश्वलायनोमांडव्यश्च १८ मूलेज्वरश्चेन्मृत्युः संदेहोवादशदिनानिपीडामत्स्यमांससुरापोलिकानैवेद्यं रक्ताशोकपुष्पपूजामेषशृंगोधूपः मोषुणाः पराइतिपूजामंत्रः सघृतकंदमूलंद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वानिर्ऋतयेपायसान्नेनबलिंदद्यात् १९ पूर्वाषाढायांज्वरश्चेत्पंचविंशतिदिनानिपीडामंडकानैवेद्यंकल्हारपुष्पपूजामनःशिलाधूपः आपोहिष्ठेतिमंत्रः रक्तशालिद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वावरुणायपायसान्नेनबलिंदद्याच्चतुर्दिनादारभ्यविंशतिदिनांतेसुखीस्यात् २० उत्तराषाढायांज्वरश्चेद्विंशतिदिनानिपीडापंचभक्ष्यंनैवेद्यंपंचवर्णपुष्पैःपूजालाक्षाधूपः विश्वेदेवासआगतइतिमंत्रः घृतसक्तुक्षीरखंडानिद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वाविश्वेभ्योदेवेभ्यःपायसान्नेनबलिंदद्यादेकादशदिनादारभ्यविंशतिदिनांतेसुखीस्यात् २१ श्रवणेज्वरश्चेन्मासद्वयंपीडासंदेहोवाक्षीरशर्कराघृतमंडकानैवेद्यंजातीपुष्पपूजादशांगोधूपः अतोदेवाइतिमंत्रः रक्ततंदुलाद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वागंधपुष्पेणविष्णवेबलिंदद्यान्मासांतेवत्सरांतेवासुखीस्यात् २२ धनिष्ठायांज्वरश्चेत्पंचदशदिनानिपीडा =

पायसंनैवेद्यंशतपत्रपुष्पपूजागुग्गुलुर्धूपः त्रायंतामिहदेवाइतिमंत्रः बिल्वोदुंबराश्वत्थसमिधोद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वाघृतमिश्रमुद्गैर्वसुभ्योबलिं
दद्याद्दशदिनादारभ्यपंचदशदिनांतेसुखीस्यात् २३ शततारायांज्वरश्चेद्दशदिनानिपीडा घृतमंडकांनैवेद्यंजलोद्भवपूजाकर्पूरागरुधूपः इमंमेवरुणेतिमं
त्रः अश्वत्थसमिधः द्रव्यंसावित्र्याष्टोत्तरशतहुत्वावरुणायपायसेनबलिंदद्यात्षष्ठदिनादारभ्यद्वादशदिनांतेसुखीस्यात् २४ पूर्वाभाद्रपदायांज्वरश्चे
न्मृत्युः संदेहोवाद्वाविंशतिदिनानिपीडादधिघृतंनैवेद्यंअर्कपुष्पपूजासर्वौषधिर्धूपः शंनोअजएकपादितिमंत्रः घृतकूष्मांडखंडंद्रव्यंसावित्र्याष्टोत्तर
शतंहुत्वागंधमाल्योदनैरजैकपादेबलिंदद्याद्दशदिनांतेशांतिर्मृतिर्वा २५ उत्तराभाद्रपदायांज्वरश्चेत्पंचदशदिनानिपीडागुडसहितौदनंनैवेद्यंपंकजपत्रा
णिपुष्पंघृतधूपः विष्णोर्योनिमितिपूजामंत्रः घृतप्लुतमाषमुद्गाद्रव्यंसावित्र्याष्टोत्तरशतंहुत्वागंधपुष्पेणाहिर्बुध्न्यायबलिंदद्यात् २६ रेवत्यांज्वरश्चेद्द
शदिनानिपीडातिलतंडुलपिष्टंनैवेद्यंमंदारपुष्पपूजागुग्गुलुर्धूपः हंसः शुचिषदितिमंत्रः घृताम्भजलसहितकदलीफलानिचद्रव्यं सावित्र्याष्टोत्तरशतं
हुत्वागंधपुष्पादिभिः पूष्णोबलिंदद्यात् पंचदिनादारभ्यविंशतिदिनांतेसुखीस्यात् २७ इतिदिनकरभट्टकृतेशांतिसारेनक्षत्रशांतयः अथांशविभा-
गेनरोगदिनसंख्या दैवज्ञमनोहरेगर्गः कृत्तिकासुज्वरस्तीव्रोव्याधिर्भवतिपैत्तिकः दशाहंप्रथमेपादेएवंज्ञात्वाविनिर्दिशेत् दशाहद्वितीयेभागेचतृतीये
दिनपंचकं रोहिण्यांप्रथमेपादेनवरात्रंप्रकीर्तितम् द्वितीयेद्विगुणंप्रोक्तंतृतीयेदशरात्रकम् नक्षत्रेचंद्रदैवत्येसप्ताहंप्रथमेऽशके मध्यमांशेतथाविं
शाहंव्याधिर्द्वादशरात्रिकम् तृतीयेमुनिभिःप्रोक्तोदिनानांपंचविंशतिः नक्षत्रेरुद्रदैवत्येपक्षःस्यात्प्रथमेंशके द्वादशाहंद्वितीयेचतृतीयांशेनजीवति

पुनर्वसौज्वरंविंद्यात्प्रथमेंशेत्रिपक्षकं मध्यमेदिवसान्सप्ततृतीयेपंचविंशतिः पुष्येस्यात्प्रथमेसप्ताहिकेविंशतिवासरान् तृतीयांशेभवेद्व्याधिर्दिवसानेकविंशतिः आश्लेषायांचनक्षत्रेयस्यसंभवतिज्वरः मासत्रयेणप्रागंशेकष्टेर्जीवतिमानवः द्वितीयेचतृतीयेचमृत्युरेवनसंशयः नक्षत्रेपितृदेवत्येरोगोयत्रप्रकीर्तितः प्रथमेसप्तरात्रंस्याद्द्वितीयेद्वादशाहतः तृतीयेपंचदशाभिरंतेविंशतिसंख्यया नक्षत्रेभगदैवत्येयस्यसंजायतेज्वरः प्रथमेपंचरात्रंस्यान्मध्येद्वादशवासरान् तृतीयेंऽशेतथाज्ञेयोमृत्युरेवनसंशयः उत्तराप्रथमेंशेतुवासराणिचतुर्दश द्वितीयेसप्तरात्रंतु तृतीयेदिवसानव यदिहस्तेभवेद्रोगः प्रथमेसप्तरात्रकम् चत्वार्यहानिद्वितीयेतृतीयेदिनपंचकम् मृत्युर्विन्द्यात्तथापूर्वेत्वाष्ट्रेयस्यभवेज्ज्वरः त्रिमासात्तुद्वितीयेंशेरोगोभवतिदारुणः तृतीयेंशेतथाज्ञेयोवासराणित्रयोदश वायव्येप्राक्सप्तदशाद्वितीयेचैकविंशतिः अंत्येचैवतृतीयेंशेमृत्युमेवविनिर्दिशेत् प्रथमेंशेविशाखायास्त्रिगुणाःषोडशस्मृताः द्वितीयेद्वादशप्रोक्तास्तृतीयेतुतथैवच मैत्रस्यादौषोडशाहाद्वितीयेपक्षमादिशेत् तृतीयेंशेचतुःषष्टिवासराणांमहामुने त्रिपक्षंप्रथमेज्येष्ठाद्वितीयेस्यात्तुषोडश तृतीयेंशेपुनर्मृत्युरतिसारात्प्रजायते मूलांशेप्रथमेपक्षाद्वितीयेद्वादशैवतु तृतीयेनवरात्रेणक्लेशान्मुक्तोभवेन्नरः जलर्क्षादौत्रयोमासामध्यमेहानिषोडश तृतीयेमृत्युरेवस्याद्रोगिणांतुमहामुने विश्वर्क्षेप्रथमेपक्षंमध्येद्वादशरात्रकं दिनानांविंशतिःप्रोक्तातृतीयेंशेमहामुने सप्ताहमादौश्रवणेविंशतिर्मध्यमांशके षोडशाहंतृतीयेंशेसत्यमेतद्ब्रवीम्यहम् धनिष्ठादौचविंशत्यामध्यमेमासयुग्मकम् मासस्तृतीयेविज्ञेयोदैवज्ञैश्चनिवेदितम् वारुणेदारुणोयोगस्त्रिपक्षंप्रथमेंशके द्वितीयेमासषट्कंचषोडशाहं

तृतीयके पूर्वाभाद्रपदायांचदिनाष्टादशकंपुनः मध्येमरणकंविंद्यादंतेष्टाऽहात्सुखीभवेत् अहिर्बुध्येपक्षमादौमध्येषोडशरात्रकं अंतेऽष्टाविंशति ज्ञेयापीडास्यात्पापकर्मभिः रेवत्यांप्रथमेंशेष्टौद्वित्रिभागेचषोडश दस्त्रेदशाहंपूर्वांशेमध्येसप्तदशाहतः अंतेत्रिंशद्दिनानीतिकथितंपूर्वसूरिभिः भरण्यांप्रथमेंशेचसप्तवासरमेववा मध्येमृत्युस्तथांत्येंशेरोगोमासत्रयावधिः एवंज्ञात्वासुधीः सम्यक्शांतिंकुर्वीतयत्नतः इतिदिनकरभट्टकृतेशांतिसारेनक्षत्रांशवशेनरोगदिनविवेकः अथपंचकमरणादिशांतिः पंचकंनक्षत्रपंचकंसार्द्धचतुष्टयंवा कुर्यान्नदारुतृणसंग्रहमंतकाशायानंमृतस्यदहनंच गृहगोपनंच शय्याविताननमिहवासवपंचकंचेत्केचिद्वदंतिपरतोवसुदेवतार्धादितिदैवज्ञमनोहरोक्तेः अत्रचमरणमात्रस्यानिष्टावहं त्रिपुष्करेपिमरणदाहावनिष्टौत्रिपादभेमरणमात्रं तत्तन्निमित्तशांतिविधिषुतथानिर्देशात् त्रिपुष्करमाहभूपालवल्लभः रविभौममंदवारेभद्रातिथिषुत्रिपादकेधिष्ण्ये योगस्त्रिपुष्कराख्योद्विपादकेयमलनामास्यात् रत्नकोशेतु गुरुभौममंदवारेभद्रायांविषमपादर्क्षे योगस्त्रिपुष्करोयंत्रिगुणफलोयमलभोद्विगुणम् गर्गः पंचकेपंचगुणितंत्रिगुणंचत्रिपुष्करे यमलेद्विगुणंसर्वंहानिवृद्ध्यादिकंभवेत् तत्रपंचकमरणेतदुत्तरंतदेववादाहःकार्यः कुंभ मीनस्थितेचंद्रेमरणंयस्यजायते पंचकानंतरंकार्यंतस्यदाहादिकंखलु अथवातद्दिनेकार्योदाहस्तुविधिपूर्वकमितिमदनरत्नेब्राह्मात् पंचकाभ्यंतरेनैवकार्यादाहादिकाक्रिया पुनर्मृत्युभयात्तस्मात्संचकानंतरंस्मृतेतिदैवज्ञमनोहरेगारुडाच्च तत्रैवकारिकायां सद्योदाहादिकंकार्यंपंचकर्क्षमृतस्यच वक्ष्यमाणविधानेनप्रायश्चित्तपुरःसरम् चत्वारःपुरुषाद्दर्भमयाःशवसमीपतः तन्मंत्रैर्मंत्रितास्स्थाप्यास्ततोदाहस्तुतैःसह सूतकांतेतुपुत्राद्यैःकार्यंशांतिकमुक्तवत् कांस्यपात्रघृतंदद्यात्कुर्याद्ब्रा

ह्मणभोजनं मदनरत्नेगारुडे आदौकृत्वाधनिष्ठार्धमेतन्नक्षत्रपंचकं रेवत्यंतंसदादूष्यमशुभंदाहकर्मणि शवस्यचसमीपेतुक्षेप्तव्याःपुत्तलास्तदा द
र्भमयास्तुचत्वारऋक्षमंत्राभिमंत्रिताः ततोदाहःप्रकर्तव्यस्तैश्चपुत्तलकैःसह सूतकांतेतथापुत्रैः कार्यंशांतिकपुष्टिकं पंचकेषुमृतोयोवैनगतिंलभतेन
रः तिलांश्चैवहिरण्यंचतमुद्दिश्यघृतंदहेत् तत्रैवब्राह्मे धनिष्ठापंचकेजीवोमृतोयदिकथंचन त्रिपुष्करेयाम्यभेवाकुलजान्मारयेद्ध्रुवम् तदानिष्टविनाशा
र्थंविधानंसमुदीर्यते दर्भाणांप्रतिमाकार्याःपंचोर्णासूत्रवेष्टिताः यवपिष्टेनानुलिप्तास्ताभिःसहशवंदहेत् प्रेतवाहःप्रेतसखःप्रेतपःप्रेतभूमिपः प्रे
तहर्तापंचमस्तुनामान्येतानिचक्रमात् अत्रप्रतिमागंधमाल्याद्यैरलंकृत्यप्रथमांशवस्यशिरसिद्वितीयांनेत्रयोस्तृतीयांवामकुक्षौचतुर्थींनाभौपंचमींपा
दयोर्न्यस्यतदुपरितन्नामभिर्घृतंहुत्वापुनर्यमायसोमंत्र्यंबकमितिमंत्राभ्यांप्रत्येकंतास्वाज्यंहुत्वादहेदितिभट्टाः सूतकांतेततःपुत्रःकुर्याच्छांतिकपौष्टिकम्
कांस्यपात्रस्थितंतैलंवीक्ष्यदद्याद्द्विजन्मने ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतयेततः माषमुद्गयवव्रीहिप्रियंग्वादिप्रयच्छयति स्वर्णदानंरुद्रजाप्यंलक्षहो
मोद्विजार्चनं गोभूदानंषडंशेनकुर्याद्दोषोपशांतये अपरार्केपि धनिष्ठापंचकमृतेपंचरत्नानितन्मुखे प्रास्याहुतित्रयंतत्रहुनेद्दहवपामिति ततोनि
र्हरणंकुर्यादेषसाध्वोर्विधिःस्मृतः इतरंनिखनेद्वजलेवाप्रतिपादयेत्तत्रैव नीलकंहीरकंनीलंपद्मरागंचमौक्तिकं पंचरत्नमिदंप्रोक्तमृषिभिःपूर्वदर्शिभिः रत्ना
नांवाप्यभावेतुस्वर्णंकर्षार्धमेववा सुवर्णस्याप्यभावेतुआज्यंज्ञेयंविचक्षणैः धनिष्ठायांविशेषमाहबौधायनः वासवेमरणंचेत्स्याद्दहेवापिपुनर्मृतिः सु
वर्णंदक्षिणांदद्यात्कृष्णावत्समथापिवा अथत्रिपुष्करादिशांतिःमदनरत्नेगर्गः द्वित्रिपुष्करयोगेतुमृतिर्मृत्यंतरावहा दहनेमरणेचैवत्रिगुण्यस्यात्त्रिपुष्करे

खननेप्येवमेवस्याद्देहाद्दोषोपशांतये तिलपिष्टैर्यवैर्वापिशरीरंतस्यकारयेत् शूर्पेनिधायालंकृत्यदाहयेत्पैतृकोपरि दाहमंत्रमाहबौधायनः अष्टात्वा
मितिमंत्रेणातिलपिष्टप्रदापयेत् द्वित्रिपुष्करयोर्दोषंत्रिभिः कृच्छ्रैर्व्यपोहति दैवज्ञमनोहरेगारुडे त्रिपुष्करेत्रयःकार्याः पुत्तलाद्वौद्विपुष्करे मृतस्यचसमीपे
तुस्थाप्याःपिष्टमयास्ततः कार्योदाहस्तुतत्सार्धंसूतकांतेतुशांतिकं कृत्वागाश्चहिरण्यंचदद्याद्वित्तंचशक्तितः तत्रैवप्रेतखंडे त्रिपुष्करमृतेदद्याद्गोत्रयंमू-
ल्यमेववा त्रिपुष्करेचगोयुग्मंततोदाहोनदोषकृत् अथत्रिपादशांतिः अपरार्के पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी पूर्वाभाद्राविशाखाचज्ञेयमेत
त्त्रिपादभं त्रिपादर्क्षमृतौतद्वद्धिरण्यशकलंमुखे तस्यपिष्टमयंकुर्यात्पुरुषंत्रितयंयतः होमंप्रतिमुखंकुर्यात्तयावहवपामिति कर्णायसंचकार्पासं
कुसुंभंप्रतिपाद्यच निर्मात्यसाग्निंसंस्कुर्यात्क्रव्यग्नौवान्यमुत्सृजेत् मरणपद्धतौभट्टाः स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंततः अन्वाधानंनिर्वपणं
देवतानांतथाहुतीः यमायधर्मराजायमृत्यवेचांतकायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैक्रमात् विधिनाश्रपणं
कृत्वाएकैकामाहुतिंहुनेत् कृष्णांगांकृष्णवस्त्रांचहेमनिष्कसमन्वितां दद्याद्द्विजायशांतायप्रीतोभवतुमेयमइति इयंशांतिः पंचकादिसाधारणी वि
धानमालायां धनिष्ठापंचकेयाश्चदेवताश्चत्रिपुष्करे ताःपूज्यास्तुप्रयत्नेनमंत्रैस्तल्लिंगसंज्ञकैः तिथिवारौचनक्षत्रंत्रिपुष्करइतिस्मृतः सर्वेषामपितेषां
तुत्रयोदेवाःप्रकीर्तिताः यमोरुद्रश्चमघवासंपूज्योविधिवद्बुधैः कुबेरस्यपृथक्पूजाविधातव्यामनीषिभिः होमंचविधिवत्कुर्यान्नक्षत्रशमनोचितं सामान्यं
चहविस्तेषांसाज्यंपायसमुत्तमं मंत्राभावेचगायत्रीपालाश्यःसमिधस्तथा होमांतेयजमानस्यविदध्यादभिषेचनं लक्ष्मीसूक्तंजपेत्पश्चाद्दद्याद्दानानिभूरि

शः लक्ष्मीनारायणप्रीत्यैमंचकंचसतूलिकं वृषंगजंचमाहिषंलोहंताम्रंचराजतं एतन्निर्मूलमितिशिष्टाः इतिशांतिसारेपंचकादिमरणशांतिः अथद्वादशाब्दादूर्ध्वमवलोकनविधिः स्मृत्यंतरे दंपतीपितृपुत्रौचस्वसारौभ्रातरौतथा पितृव्यमातुलौचैवदौहित्रौभागिनेयकौ पुत्रिकापितरौचैवभगिनीपितरौतथा द्वादशाब्देव्यतीतेतुदूरदेशंगतोयदि एतेषामेकमेकोपिनान्योन्यमवलोकयेत् इच्छंतिकेचिदाचार्या अन्योन्यमवलोकनं शिवालयेयथातीर्थैस्नात्वाप्रज्वाल्यदीपकौ शिवंसंपूज्यविधिवद्गुप्तौतोदेवमध्यतः धृत्वाकांस्यमयंपात्रंसजलंरत्नपूरितं शांतिकैर्मंत्रघोषैश्चद्विजैःसहविलोकयेत् आननंचैकमेकस्यदृष्ट्वासम्यक्शिवंनमेत् ब्राह्मणेभ्योयथाशक्त्यादद्यात्पात्रंसदक्षिणं अन्येभ्यश्चाथविप्रेभ्योयथावित्तानुसारतः तेभ्योपिदक्षिणांदत्वापूजयेच्चपुनःपुनः नत्वादेवंद्विजान्सूर्यमागच्छेत्स्वस्यमंदिरं ततोव्याहृतिभिर्होमंशतमष्टोत्तरंतिलैः कृत्वाथभोजयेद्विप्रान्यथावित्तानुसारतः बांधवैःसहभुंजीतसर्वारिष्टप्रशांतये इत्थंयः कुरुतेमर्त्यस्तस्यारिष्टंनविद्यते आयुष्कामोनरश्चैवमकृत्वानावलोकयेत् पूर्वंविलोकितानांतुविधिरेषउदाहृतः नचैवापूर्वदृष्टानामितिप्राहुर्मनीषिणः पारिजाते द्वादशाब्देव्यतीतेतुनकुर्याद्भ्रातृदर्शनं पित्रोःपुत्रस्यनैवाहुमहाहानिकरंभवेत् दर्शनंतुप्रकुर्वीतशिवंपूज्यशिवालये कांस्यपात्रंस्फोटयित्वा अंतःपटविधानतः मुखावलोकनंपश्चात्समालिंग्यविपर्ययात् एवंकृतेविधानेतुदोषशांतिर्भविष्यति सूर्यारुणसंवादेतु गणेशमृत्युंजयविष्णुलक्ष्मीमघोरसंज्ञंचगृहंघटेषु आवाह्यसंपूज्यचधान्यराशौहोमंचकुर्याद्दिक्देवमंत्रैः शिवपूजांप्रकुर्वीतप्रतिमापूजनंततः अघोरप्रतिमांदद्याद्ब्राह्मणायसदक्षिणा अनेनसहगच्छत्वंक्रीडस्वचसुखंचिरं मांतथैवाधुनामुंचक्षमांकुरुममोपरि शिवाग्रेतुसमागत्यकृत्वाचैवांतरेपटं उभाभ्यांनारिकेलंचभङ्क्त्वाभूयोधि

गम्यतां निवर्तसूक्तंजस्त्वाद्यघोरद्विजपुंगवं अघोरमतिग्राहिणंब्राह्मणमित्यर्थः विसर्जयेत्पुनस्तंचनैवपश्येत्कदाचन कांस्यपात्रेघृतंकृत्वादृष्ट्वात्रूपं-
स्वकंस्त्यकम् तत्पात्रंब्रह्मणेदद्याद्दक्षिणासंयुतंततः पादप्रक्षालनंकृत्वा आचम्यचयथाविधि शांतिमंत्रान्पठेत्पश्चात्पूजांगृह्यशिवंव्रजेत् धूपदीपा
दिनैवेद्यतांबूलैर्दक्षिणादिभिः वस्त्रैराभरणैर्दिव्यैस्तोषयेच्छंकरंततः शिवस्यप्रार्थनांकृत्वाजपेत्सूक्तंकनिक्रदत् प्रदक्षिणीभद्रंचेति पठेत्सूक्तंशिवोप
रि पुष्पांजलिंचयुगपद्दद्याद्वैधांतरपटं पुनःपुनर्नमस्कृत्यपश्चात्तंचविलोकयेत् प्रणामालिंगनंकुर्यात्स्वागतंक्षेमपृच्छनम् ततोद्विजवराःसर्वेसूक्तानिस्व
स्तिकानिच पठित्वाहोमदेशंचगच्छेयुश्चमुदान्विताः प्रतिमापूजनंकृत्वावह्नेश्चापियथाक्रमं होमशेषंसमाप्यैवंब्रह्माचार्यादिकान्यजेत् अभिषेकंततः
कुर्युरुभयोर्मंगलंवदेत् स्वस्तिशब्दंतथाब्रूयुर्गांचदद्यात्पयस्विनीं देवान्वह्निंविसृज्याथकुंभेलक्ष्मींनिधायच आचार्यब्रह्मऋत्विग्भिर्वाद्यघोषपुरःस
रम् स्वगृहंचशनैर्गच्छेत्सार्द्धंतेनप्रवासिना देवानांचैवतृप्त्यर्थंकर्तव्यंद्विजभोजनं एवंकृतेविधानेतुनस्याद्विघ्नंकदाचन देवद्विजप्रसादेनकल्या-
णंस्यान्नसंशयः आयुष्यंक्षेममारोग्यंपुत्रपौत्रप्रवर्द्धनं सौभाग्यमतुलंचैवलभेदस्यप्रसादतः आरामेपुण्यतीर्थेवादेवागारेऽथसंगमे सुपवित्रनदीती
रेविधानंक्षेमदंभवेत् अथप्रयोगः सुमुहूर्तेचंद्रताराबलान्वितेपुण्याहंवाचयित्वाचार्यब्रह्मर्त्विगादीन्कृत्वा देशकालौसंकीर्त्यास्माकंसकुटुंबानां क्षे
मायुरारोग्यैश्वर्याभिवृद्ध्यर्थंसर्वत्रमंगलाभ्युदयार्थमात्मनोबंध्वादीनांद्वादशाब्दाधिकप्रवासस्थितिजनितपापग्रहपीडापरिहारार्थंवियोगग्रहशां-
तिंकरिष्येइतिसंकल्प्य तदंगस्थंडिलोल्लेपनकलशस्थापनेकरिष्यइतिसंकल्प्यदधिदूर्वामृत्पंचगव्यसर्वौषधीहिरण्यरत्नफलपुष्पपंचपल्लवाद्यलं

कृतेषुपंचधान्यपुंजस्थितपंचकलशेषुतीर्थवारिणापूर्णेषुस्थापितवंशपात्रोपरि अष्टदलालंकृतवस्त्रेषुगणेशमृत्युंजयविष्णुलक्ष्म्यघोरप्रतिमाना
मग्न्युत्तारणंकृत्वातत्तन्मंत्रैः कलशावाहनपूजनस्थापनादिपूर्वकंतत्तन्मंत्रैस्तत्तद्देवतानामावाहनादिपूजांकुर्यात् ततोन्वाधानंकृत्वातत्तदुद्देशेनप्रतिदैवतंदू
र्वातिलाज्यचरुशर्कराभिरष्टसहस्रमष्टशतमष्टाविंशतिंवाहुतीर्हुत्वा अघोरमंत्रेणाघोरायहुत्वारुद्राभिषेकंकृत्वाशिवालयेंतःपटंधृत्वोभावपियुगप
च्छिवस्यपुरतोनारीकेलफलंप्रत्येकंभङ्क्त्वाहोमदेशंगत्वानिवर्तध्वमितिसूक्तंजपेतां ततोघोरंप्रार्थयेतां अघोरत्वंमहाकायनृणांविश्लेषकारक त्व
त्क्षोभजनितंघोरंनृणांविश्लेषजंफलम् वियोगविषमास्त्रस्त्वंविषमांघ्रिकरायुध विबुद्धिर्विगतस्थायीविलापीविगताश्रयः योगभ्रष्टोयोगध्वंसीयो
गीयोगविघातकः नृनार्योर्योगहंताचबंधुयोगवियोगकृत् गच्छत्यनुदिनंचोर्वीम्प्राणिनांक्लेशहेतवे योगविश्लेषकार्यत्वाद्वियोगंत्वांप्रचक्षते भा
वियोगमहाघोरप्राणिनांक्लेशदायक शरणागतमापन्नंत्राहिमांशोकसागरात् द्विजंसमभ्यर्च्याघोरप्रतिमांदद्यादाज्यावेक्षणंकृत्वाशांतिमंत्रान्
जपित्वापादौप्रक्षाल्यशिवंगंधपुष्पैस्तोषयित्वास्वस्तिनो आनोभद्राकनिक्रदत्प्रदक्षिणीभद्रंवदेतिसूक्तानिपठन् अंतःपटंनिष्काश्ययुगपच्छिवो
परिपुष्पांजलिंदत्वामुहुः शिवंनमस्कृत्यसंप्रार्थ्यबंधुंविलोकयेत् तौप्रणामक्षेमालिंगनेकृत्वास्वागतंपृष्ट्वाथयज्ञेनेत्याशिषोदत्वाहोमशेषंस-
माप्याभिषेकंकृत्वाग्न्युद्वासनंकृत्वाकुंभेलक्ष्मीप्रतिमांनिधायवाद्यघोषपुरःसरंब्राह्मणैःसहप्रवासिनाचसहगृहंप्रविशेत् ततोब्राह्मणान्संभोज्यद्वि
जान्वस्त्रालंकारदक्षिणाभिःसंतोष्यस्वस्तिभवंतोब्रुवंत्विति ब्रूयात्तेचस्वस्तिरस्त्वितिप्रत्यूचुः इतिप्रवासादागतग्रहविधानं अथतडागादौमृतदोषशां

तिः नदीनदसमुद्रेषुमृतदोषोनविद्यते वापीकूपतडागेषुमृतस्यशुद्धिरिष्यते सूतकानंतरंशुद्धिःशौनकेनह्युदीरिता उद्धरेच्छतसाहस्रंतदर्धार्द्धमथापि वा अष्टोत्तरसहस्रंवाकलशैर्जलमुद्धरेत् मृततारतम्येनब्राह्मणादिवर्णभेदेनगवादिपशुभेदेनकलशोद्धारणंप्रयोगंविधिवत्कृत्वाजातदोषपुरःसरं जलदेवार्चनंकार्यंमंडलेभद्रसंज्ञके जलदेवतावरुणः सदीपंचबलिंदद्याद्देवताभ्योयथाविधि एवंपूजाविधातव्याततोहोमंसमारभेत् लोकपालग्रहादिभ्यो जलाधिपतयेतथा अष्टोत्तरशतंचैवप्रत्येकंतिलसर्पिषा जलशुद्धिंततःकुर्याद्ब्रह्मकूर्चपुरःसरं मृत्तिकाभिश्चतोयैश्चतिलामलकभस्मभिः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् राजद्वाराच्चतुष्पथादितिमृदः जलानिनदीनदसमुद्रगंगादिजीर्णकूपप्रस्रवणोदकैः यज्ञकुंडभस्मतिलामलकशंखोदकविष्णुपादोदकैर्जलावगाहनं पावमानीभिःप्रायश्चित्तसूक्तैः पौरुषंपावमानंचनतमंहइतीतिच ह्रस्वसूक्तंजपेत् अन्यान्यपिवारुणानिजप्त्वाजलमवगाह्यशांतिंपठेत् कस्यनूनमित्यादीनि स्वस्तिवाचनपूर्वंतुहोमशेषंसमापयेत् अभिषेकंततःकृत्वाब्राह्मणान्भोजयेद्य दक्षिणाभिश्च संतोष्यतेभ्यआशिषोगृहीत्वाजलशुद्धिर्भवेद्ध्रुवंइतिजलशुद्धिः अथगजशांतिः वसिष्ठसंहितायाम् यस्यराज्ञोगजाः संतितदधीनाखिलाधरा तस्माद्गजाःकल्पनीयाःपोषणीयाश्चसर्वदा कल्पनंपोषणंतेषांगजवक्त्रप्रसादतः तस्माद्गजाननोराज्ञापूजनीयःप्रयत्नतः गजाननोगजपतिर्गजसूक्तंजपेत्सदा असावेवप्रभुस्तेषांपोषणेशोषणेसदा पुरामहेश्वरोदेवउक्तवानस्यजन्मनि यदायदागजानांचजायंतेव्याधयस्तदा तदाशांतिंप्रकुर्वीतपूजाहोमजपादिभिः भानुवारेचसंक्रांतौग्रहणेचंद्रसूर्ययोः विषुवत्ययनेचैवव्यतीपाते दिनक्षये अन्यस्मिन्पुण्यदिवसेचंद्रताराबलेष्वपि दिग्बंधनंसमेभूमोईशान्येचसु

रालये मध्याह्निनिर्गतैः सूत्रैश्चतुरस्रंतुकारयेत् मंडपंत्वष्टभिर्हस्तैः सूत्रमार्गेणकारयेत् चतुःषष्टिदलंकृत्वामंडपांतः क्ष्मातले मध्येचतुःपदंव्योममंडलं
वेदिकास्थलं द्वादशांशात्मकंवायुमंडलंव्योमवेष्टितं विंशांशकात्मकंवह्निमंडलंव्योमवेष्टितं निखिलान्मंडलान्वेष्ट्यामहीमंडलमास्थितं ज्ञात्वाग्निमंडलं
तत्रदिक्षुकुंडचतुष्टयं प्रागग्रेखामध्यमंकुंडद्वारं चैकांशमानतः तथैवकुंडद्वारं चशेषदिक्षुप्रकल्पयेत् पूर्वोक्तलक्षणोपेतंमेखलायमसंयुतं तोरणाद्यैरलंकृ
त्यवितानंवेदिकोपरि आशिषोवाचनंकुर्यात्सम्यक्संकल्पपूर्वकं ऋत्विजोवरयेत्पश्चाच्चतुर्विंशतिसंख्यकान् तेषांमध्येशिष्टतममाचार्यंतंप्रकल्पयेत् म
धुपर्कादिकंकृत्वातत्तत्कार्येनियोजयेत् ब्राह्मणांश्चतुरोहोतॄन्कुंडेषुविनियोजयेत् द्वारेषुजापकानष्टौषट्संख्यानंगजापकान् गंधपुष्पादिकंकृत्वातत्र
कार्येप्रयोजयेत् ब्रह्मणःपंचविप्रांश्चयोजयेच्चयथाविधि कारयेच्चसुवर्णेनगजवक्त्रंचतुर्भुजम् अक्षमालापरश्वधबीजदंतधरंक्रमात् वाहनायुधवर्णादि सर्वं
पांकथितंपुरा तत्पुरुषायविद्महेवक्रतुंडायधीमहि तन्नोदंतीप्रचोदयात् वामदेवऋषिः छंदोसौतत्रगायत्रीगजवक्त्रोस्यदेवताकुंभाष्टकंचतुर्द्वारेपूर्वो
क्तंद्रव्यसंयुतं लिखेदष्टदलंपद्मंवेदिकातंदुलोपरि गजवक्त्रंकर्णिकायांलोकपालान्दलेषुच गणेशशक्रयोर्मध्येपद्ममष्टदलंलिखेत् आदित्यादिग्रहांस्त
त्रपूजयेत्पूर्ववत्क्रमात् गणेशयमयोर्मध्येपंचकोणंप्रकल्पयेत् तत्रपंचमहाभूतानर्चयेत्पूर्ववत्तदा गणेशांबुपयोर्मध्येत्रिकोणंमंडलंलिखेत् तत्रार्चये
दष्टभुजांमहिषासुरमर्दिनीम् गणेशसोमयोर्मध्येवर्तुलंमंडलंलिखेत् तत्रार्चयेत्प्रयत्नेनचाश्विनीदेवताद्वयम् ऐशान्यामर्चयेद्रुद्रंमंडलेतेजसांनिधिं
आग्नेय्यामर्चयेद्विष्णुमंडलंहाटकात्मकम् वेदात्मकंचनैरृत्यामर्चयेद्ब्रह्ममंडलम् वायव्यामर्चयेत्सम्यग्मंडलंप्रणवात्मकं रुद्रेणपुरुषसूक्तेन चतुर्वे

दादिमंत्रकैः प्रणवस्यऋषिश्छंदोदेवताकथितापुरा तत्तद्वर्णैर्गन्धपुष्पैर्वस्त्रधूपैश्चदीपकैः सम्यक्कृत्वोपचाराणिरक्तवस्त्रैर्गजाननं प्राक्कुंडंगजवक्त्रस्यपंचभूतात्मकंततः दुर्गाकुंडंप्रतीच्यांचउदक्कुंडंग्रहात्मकं तदेवाश्विनकुंडंचग्रहहोमादितःपरं दिक्कुंडेदिक्षुदिग्घोमः कर्तव्यस्स्वस्वमंत्रकैः स्वगृह्यविधिनाकुंडेस्थापयेच्चहुताशनं मुखांतेस्वस्वकुंडेचजुहुयात्तन्मुखाहुतिम् पालाशसमिदाज्यान्नैःपृथगष्टोत्तरंशतम् ग्रहमंत्रैःसमिद्भिश्चहोमंपूर्ववदाचरेत् चतुर्दिक्षुचतुर्वेदपारायणपराद्विजाः अब्लिंगैर्वारुणैःसूक्तैःकलशार्चापराश्चते नैवेद्यंविविधान्नेनबहुवाद्यैःसमर्पयेत् तांबूलानिततोदद्याच्छांतिवाचनपूर्वकम् एकरात्रंत्रिरात्रंचनवरात्रमथापिवा अनेनविधिनाकुर्यादेकभक्तोजितेंद्रियः तिलहोमंव्याहृतिभिःसहस्रंचाष्टसंयुतम् एवंप्रतिदिनंसम्यग्व्रीहिभिश्चयथापुरा संपूर्णेदिवसेकर्ताकुर्यात्पूर्णाहुतिंततः मंत्रपूतोदकैःकर्तागजानांमार्जयेत्ततः अलंकृत्यपुनःसम्यग्गंधपुष्पादिभिस्तथा हुतशेषंततोदद्याद्दीपनायनिकंगजे दोषशांत्यैपंचदुर्गारुद्रंपुरुषसूक्तकम् पंचब्रह्मादिभिर्मंत्रैर्गजशालासुमार्जयेत् गृहीत्वासुकृतंतेभ्योदक्षिणांचसमर्पयेत् आचार्यायततोदद्याद्भिक्षाणामेकविंशतिम् तदर्धमितरेभ्यश्चयजेच्छेषान्स्वशक्तितः ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः एवंयःकुरुतेसम्यग्गजशांतिंनृपोत्तमः सर्वान्कामानवाप्नोतिगजवृद्धिंलभेत्तुसः इतिगजशांतिः अथाश्वशांतिः तत्रैवबभ्रूपतेर्यस्यसन्त्यश्वाःसएवविजयीरणे श्रीमान्सएवतत्तस्मात्कार्यमश्वाभिरक्षणं सूर्यःस्वात्यृक्षसंपातेजायंतेबहवोरुजः यदायदारुजननमश्वानामथवातदा सलोकपालरेवंतपूजांहोमंचकारयेत् भानुवारेचसंक्रांतावयनेविषुवद्द्वये दिनक्षयेव्यतीपातेद्वादश्यामश्वभेपिवा ऐशान्यामष्टभिर्हस्तैश्चतुर्भिर्वापिमंडपं चतुर्द्वारंवितान

स्रक्तोरणाद्यैरलंकृतं तन्मध्येवेदिकांतस्यपंचविंशतिमानतः मंडपस्यबहिः कुंडंप्राच्यांपूर्वोक्तलक्षणं वरयेत्पूर्ववद्विप्रान्स्वस्तिवाचनपूर्वकं सूर्यपुत्रंहृ
यारूढंपंचवक्त्रंदशांबकं रक्तवर्णकशाखड्गरेवंतंद्विभुजंस्मरेत् सूर्यपुत्रनमस्तेस्तुनमस्तेपंचवक्त्रक नमोगंधर्वदेवायरेवंतायनमोनमः मंत्रेणानेनरे
वंतंगंधवस्त्राक्षतादिभिः विधिवद्वेदिकामध्येतंडुलोपरिपूजयेत् परितःस्वस्वमंत्रैस्तान्लोकपालांश्चपूजयेत् प्राग्वदेवकशांखड्गरेवंतस्यसमीपतःऋ
ग्वेदादिचतुर्वेदान्जपेद्द्वारेषुपूर्ववत् पूर्णकुंभान्रक्तवर्णान्गंधवस्त्राद्यलंकृतान् पंचत्वक्पल्लवोपेतानष्टमृद्भिःसुसंयुतान् द्वारेषुस्थाप्यत्वाल्लिंगमंत्रैःका
र्यंसमर्चनं रेवंतपूजामाचार्यःकृत्वागृह्यविधानतः स्थापयेच्चव्याहृतिभिस्तस्मिन्कुंडेहुताशनं ततस्तत्राज्यभागांतेसुखाहुतिमतंद्रितः अग्नयेस्वाहे-
तिहुत्वाघृतेनादौप्रयत्नतः रेवंतपूजामंत्रेणआद्यंतप्रणवेनच पलाशसमिदन्नाज्यैःपृथगष्टोत्तरंशतं आचार्योजुहुयाद्व्रीहींस्तिलान्व्याहृतिभिस्ततः
एकरात्रंत्रिरात्रंवानवरात्रमथापिवा अनेनविधिनाकुर्यादेकभक्तोजितेंद्रियः जपादिपूर्वकंसम्यक्कृत्वापूर्णाहुतिंहुनेत् ततोमंगलघोषैश्चनैवेद्यंचसमर्पये
त् ततस्तद्धुतशेषेणसहकुंभोदकेनच प्रदक्षिणंव्रजन्नश्वान्सुप्रीतोबलिमुत्तमं जीमूतस्येत्यनूवाकांश्चतुरोदिक्षुनिक्षिपेत् आचार्यायततोदद्याद्दक्षिणांगो
चतुष्टयं तदर्द्धंवातदर्द्धंवायथावित्तानुसारतः ब्राह्मणेभ्योजापकेभ्यस्त्वाचार्यार्द्धंप्रदापयेत् ब्राह्मणान्भोजयेत्पश्चाच्छांतिवाचनपूर्वकं एवंयःकु
रुतेसम्यगश्वशांतिमनुत्तमाम् मुच्यतेसर्वरोगेभ्योवर्द्धतेनात्रसंशयः इत्यश्वशांतिः अथगजनीराजनंउत्पलपरिमलेशौनकः नवम्यामाश्वयुजः
मासिकार्तिक्यामथवापिवा हस्तिनीराजनंकुर्याद्राजागजसमृद्धये प्रागुदक्प्रवणेदेशेविशालेसुमनोहरे पूर्वस्यामुत्तरस्यांवानगरस्यबहिर्दिशि

पंचाशद्धस्तनिर्माणंदेशंसंप्रोक्ष्यवारिणा तन्मध्येतोरणंकुर्याद्वनस्पतिमयंशुभं स्योनापृथिवीत्यनयास्थापितंसुदृढंसमं षोडशारत्निमुत्सेधाद्विस्तारेणतदर्द्धकं ऋजुनिरीक्षणंस्निग्धंवस्त्रयुग्मविभूषितं उच्छ्रयस्वेति मन्त्रेणसंप्रोक्ष्यपरितोजनैः अन्यैश्चैवाब्लिंगमंत्रैर्गन्धपुष्पैस्तथार्चयेत् कोणस्तंभद्वयेवेदिंद्विहस्तेकारयेदथ फलपुष्पैस्तवककिसलयैर्भूषयेत्ततः होमंतद्दक्षिणेकुर्यात्समाहितमनागुरुः कुंडेवास्थंडिलेवाथयज्ञतंत्रंप्रकल्प्यच पूर्णकुंभानष्टदिक्षुविन्यसेद्धान्यराशिषु तेष्वावाह्यदिशापालान्पूजयेद्वस्त्रमाल्यकैः योजातइतिसूक्तेनप्रत्यृचंजुहुयाद्घृतं मधुच्छंदसआज्येनसूक्तेनाज्यंयजेत्ततः आचिदित्यादिसूक्तेनयाम्यहोममतःपरं एवंकृत्वातुविधिवद्वन्हिंहुत्तेजुहुयाद्घृतं यश्चिद्धितेतिसूक्तेनजुहुयाद्वरुणायच आवायाधितिसूक्तेनयजेद्वायुंसमाहितः त्वंसोमप्रतिसूक्तेनसोमायजुहुयाद्धविः पश्चाद्रौद्रेणकौत्सेनरुद्रमिष्ट्वायथाक्रमं आनोभद्रेति सूक्तेनहोमशेषंसमापयेत् वरुणायैवमिष्ट्वाथमधुनापयसातथा पश्चात्स्विष्टकृतंहुत्वाबलिंतेभ्यःसमाहरेत् दुर्गामाराध्यविधिवदग्नेःपूर्वोत्तरे स्वयं क्रान्तिकाश्वसमभ्यर्च्यवस्त्राभरणमाल्यकैः हिरण्यकुसुमंसिंहीममृतांचापराजितां पृश्निपत्रींततोव्याघ्रींदूर्वांमुसलमालिनीं कुष्ठचंदनपद्मानिनलदान्यगरूणिच प्रक्षिप्यकुंभेसौवर्णेतीर्थतोयैःप्रपूर्यच गजाधिपंगजांश्चैवप्रोक्षयेत्तेनवारिणा आपोहिष्ठेतिसूक्तेनस्वस्तिवाच्ययथाविधि गजमारोप्यराजानंतोरणाभ्यंतरेगुरुः स्वस्त्यात्रेयंजपेन्मंत्रंत्रिःकृत्वातुप्रदक्षिणं प्रस्थापयेत्प्रभुंतेनगजेंद्रेणद्विजोत्तमः पार्श्वतोदीप्यमानासुदीपिकासुचदीपकैः सारोहाःसादिनःसर्वेगच्छेयुस्तस्यपृष्ठतः उपलिप्तासुशालासुस्थास्तृतासुविसृज्यतान् सामात्योभृत्यसहितःप्रविशेन्मंदि

रंनृपः ब्राह्मणान्भोजयित्वातुगुरवेदक्षिणांततः हस्तिनंगांहिरण्यंचवस्त्रंमाल्यानुलेपनं दद्यान्नृपःस्वयंतस्मैसम्यगाभरणानिच एवंनीराजना
द्राजासर्वान्कामानवाप्नुयात् निरातंकाद्विजाःसर्वेभविष्यंतिनसंशयः इतिगजनीराजनं अथाश्वनीराजनंतत्रैवोक्तं अश्वनीराजनंवक्ष्ये अश्वा
नांहितकाम्यया तद्वच्चैवाश्वयुज्यासिपूर्वपक्षेनृपोत्तमः कारयित्वाश्वशालासुहोमशालामलंकृतां प्रत्यूषेस्नापयित्वाश्वान्सम्यक्तीर्थेजलाश
ये सप्ताहंकारयेद्धोमंरक्षांबध्वातुरंगमान्, स्थंडिलाद्याज्यभागांतंयज्ञतंत्रंप्रकल्पयेत् ब्राह्मणःसोदकान्कुंभांश्चतुर्दिक्षुसहोषधीन् विन्यस्य
धान्यपुंजेषुदिक्पालांस्तत्रपूजयेत् अश्वमारोप्यराजानंतोरणाभ्यंतरेगुरुः गजस्यनीराजनवत्सर्वंकुर्याद्तंद्रितः एवंनीराजनाद्राजासर्वान्कामानवा
प्नुयात् इतिअश्वनीराजनं अथगोशांतिः मदनरत्नेविष्णुधर्मे अतःपरंप्रवक्ष्यामिकर्मनैमित्तिकंतव धेनूनांमारकेप्राप्तेतथारोगाद्युपद्रवे क्षीरक्षयेत
थान्यस्मिन्प्रकृतेस्तुविपर्यये त्रिरात्रोपोषितोविद्वानेकरात्रोषितोपिच गवांमध्येशुभेदेशेस्थंडिलेग्निंप्रकल्पयेत् अष्टपत्रंन्यसेत्पद्मंकर्णिकाकेसरा
न्वितं पूजयेत्कर्णिकामध्येवासुदेवंश्रियासह केसरेपूजनंकार्यंदेवतानांयथाक्रमं यासांतासांतुवक्ष्यामितवनामानिभार्गव सुभद्रांनामदेवींतुपूर्वभागे
समर्चयेत् पूजनीयस्ततोब्रह्मासुरभिस्तदनंतरं ततःसूर्यस्ततोधेनुर्बहुरूपाद्विजोत्तम ततस्तुपृथिवींदेवींततोनंतंतुपूजयेत् ततःखंविश्वरूपाख्यंदि
ग्धेनुंतदनंतरं ततःसिद्धिंततोऋद्धिंततःशांतिंसमर्चयेत् गोह्निनीनामदिग्धेनुस्ततःपूज्याद्विजोत्तम ततश्चंद्रमसंदेवंमहादेववृषंततः महादेवंततोदेवींपू
जयेत्तदनंतरं इत्येतादेवताःप्रोक्ताःकेसरेष्वेवषोडश पत्रेषुपूजनीयास्तुदिक्पालास्तुयथादिशं गंधमाल्यादिवस्त्रंचधूपदीपान्नसंपदः प्रत्येकंपूजयेद्रामदेव

ताःप्रयतोद्विजः पूर्णकुंभांश्चसर्वासांप्रत्येकंविनिवेदयेत् भक्तश्चगीतवस्त्राणिवर्धमानैःसुतंदुलैः सहिरण्यैर्यथाशक्तिततोहोमंसमाचरेत् वेदिंकृत्वा यथाशास्त्रंसमिध्यचहुताशनं एकैकांदेवतारामसमुद्दिश्ययथाविधि चतुर्थ्यंतेननाम्नातुधर्मज्ञोजुहुयात्क्रमात् ततोरक्षोहणैर्मंत्रैर्जुहुयाद्गौरसर्षपान् ततःसमापयेद्विद्वानग्निकर्मयथाविधि सुवर्णंचतथाकांस्यंधेनुंवस्त्रयुगंतथा कत्रीदेयमुपद्रष्ट्रेवस्त्रयुग्मंशुभंतथा भोजनंगोरसप्रायंब्राह्मणांश्चात्र भोजयेत् स्वस्तिवाच्यंततःपश्चादन्नमादायवैद्विजः रक्षोहणंतथामंत्रैःकुर्युस्तेउक्षणंगवां गवांचपूजाकर्तव्यागंधमाल्यानुलेपनैः कर्तव्याश्चतथावत्सायथाकामंद्विजोत्तम शांतिकर्मगवामेतत्सर्वोत्पातप्रशांतये इतिगोशांतिः अथकाकमैथुनशांतिः श्वेतकाकमैथुनदर्शनमेवानिष्टावहम् काकोमैथुनयुक्तश्चेच्छ्वेतःसयदिदृश्यतइतिहेमाद्रौगर्गोक्तेः नारदसंहितायाम् दिवावायदिवारात्रौयःपश्येत्काकमैथुनं सनरोमृत्युमाप्नोतिह्यथवा स्थाननाशनं तद्दोषशमनायेत्थंशांतिकर्मसमाचरेत् गृहस्यैशानभागेतुहोमस्थानंप्रकल्पयेत् स्वगृह्योक्तविधानेनतत्रस्थाप्यहुताशनं मुखांतेसर्पिराज्यैर्हुनेदष्टोत्तरंशतं प्रतिमंत्रंत्र्यंबकेनअपमृत्युद्वयेनच व्याहृतिभिर्व्रीहितिलैर्जपाद्यंतंप्रकल्पयेत् पूर्णाहुतिंचजुहुयात्कृतांसुचिरलंकृतः स्वर्णशृंगीरौप्यखुरांकृष्णांधेनुंपयस्विनीं वस्त्रालंकारसहितांनिष्कद्वादशसंयुतां तदर्द्धेनतदर्द्धेनतदर्द्धार्द्धेनवायुतां यथावित्तानुसारेणतन्न्यूनाधिककल्पना आचार्यायश्रोत्रियायतांगांदद्यात्कुटुंबिने ब्राह्मणेभ्योविशिष्टेभ्योयथाशक्त्याचदक्षिणां ब्राह्मणान्भोजयेत्पश्चात्स्वस्तिवाचनपूर्वकं एवंयःकुरुतेसम्यक्सतद्दोषात्प्रमुच्यते अद्भुतसारेगर्गः काकस्यमैथुनंपश्येत्काकःशिरसिचेद्विशेत् शिरस्युरसिवाकुर्यात्पक्षाघातंनरस्तथा विदारणंच

कुरुतेशयानंचस्पृशेद्यदि तदावदेत्तुमरणंमहारिष्टमथापिवा महारात्रेयथाकाकोवासतेहेतुनाविना तद्गृहारिष्टमाचष्टेग्रामारिष्टमथापिवा शांतिंतत्रप्रकुर्वीतविधानेनयथोदिता उद्दिश्यारिष्टशमनंकुर्यात्संकल्पमादितः शुचौदेशेरत्निमात्रेस्थंडिलेग्निंनिधायच तदीशानेचाष्टदलेकलशोपरिशक्तितः हिरण्यनिर्मितंत्विंद्रंलोकपालसमन्वितं पूजयित्वास्वशाखोक्तविधिनाश्रपयेच्चरुं कृत्वाज्यभागपर्यंतंजुहुयात्क्रमशोहविः पालाशीःसमिधोव्रीहींश्चरुमाज्यमितिक्रमात् अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा यतइंद्रेतिमंत्रेणलोकपालेभ्यएवच शक्त्याहुत्वास्वशाखोक्तप्रायश्चित्ताहुतीर्हुनेत् लोकपालबलिंदत्वाइंद्राग्नेचरुशेषतः वायसेभ्योबलिंदद्यादेंद्रवारुणमंत्रतः पूर्णाहुतिंततोदत्वाआचार्यंपूजयेत्ततः कुंभोदकेनाभिषेकोयजमानस्यविस्तरात् आचार्यायेंद्रप्रतिमांदद्यात्सोपस्करांततः शक्त्याचभूयसींदद्याद्द्विजानांभोजनंदिशेत् शतंतदर्द्धमर्द्धंवाशक्त्याभावेदशापिवा सर्वशांतिंपाठयित्वागृह्णीयाच्चद्विजाशिषः एवंकृतेभवेच्छांतिःकाकारिष्टविनाशिनी मानवसंहितायां अथातःसंप्रवक्ष्यामिवायसःप्रविशेद्गृहं प्रवेशद्वारतागच्छेन्मासमेकंविवर्जयेत् द्वारांतरेयदागच्छेत्षण्मासांस्तद्विवर्जयेत् देवालयंविशेच्चेवशीघ्रमृत्युकरोभवेत् देवालयेनृपाणांतुग्रामनाशोभविष्यति गृहप्रवेशनेकाकोगृहाशेषक्षयंकरः श्वानमार्जारतोगच्छेद्वायसःप्रविशेद्गृहं गृहस्थमरणंविद्यात्सर्वनाशोगृहेभवेत् एतेषांदोषजातानांशांतिंवक्ष्येसमासतः प्रवेशस्थानदेशेतुदक्षिणेवागृहात्ततः गोमयेनोपलिप्तेचस्थंडिलेसमलंकृते आचार्यंवरयेत्पश्चाद्ब्राह्मणंवेदपारगम् व्रीहिद्रोणेचसुश्लक्ष्णंस्थापयेदव्रणंघटं पंचपल्लवसंयुक्तंपंचगव्यसमन्वितं पंचरत्नसमायुक्तंपूजयेत्तीर्थवारिणा तस्योपरिन्यसेत्पात्रंकाकरूपंशचीपतिं कर्षमात्रसुवर्णेनपादेनार्ध

स्वशक्तितः प्रतिमांपूजयेत्पश्चाद्वस्त्रयुग्मंनिवेदयेत् यतइंद्रेतिमंत्रेणअर्चयित्वातुदैववित् इंद्राग्नीशानपर्यंतमर्चयेल्लोकपान्क्रमात् कुंभाभिमंत्रणंकुर्यान्छ्रीरुद्रंचस्पृशन्जपेत् स्वगृह्योक्तेनविधिनाहोमकर्मसमाचरेत् यतइंद्रेतिमंत्राभ्यांसमिदाज्यचरून्हुनेत् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा त्र्यंबकेनचमंत्रेणतिलानष्टशतंहुनेत् इदंविष्णुस्तुमंत्रेणलाजहोमंसमाचरेत् उपहोमंततःकृत्वामहाव्याहृतिभिर्हुनेत् ततःस्विष्टकृतंहुत्वाहोमशेषं समापयेत् संपातैरभिषिक्तस्तुगोयुग्मंदक्षिणांदिशेत् आज्यावलोकनंकृत्वामहाशांतिंपठेत्ततः इतिवायसशांतिः अथपल्लीसरठशांतिः वसिष्ठसंहितायां कुड्यगेमस्तकाद्यंगेपतितेफलमुच्यते मस्तकेराज्यलाभःस्याद्भालेकर्णेचभूषणम् नेत्रयोर्मित्रलाभःस्यात्सुगंधंनासिकोपरि वक्त्रे सुभोजनंकंठेस्त्रीलाभःस्कंधयोर्जयः अंसेतेजोविवृद्धिःस्यादर्थवृद्धिःकरद्वये वक्षःस्थलेतुसौभाग्यंहृदिप्रीतिविवर्द्धनं पुत्रलाभस्तुकुक्षौस्यान्नाभौ कीर्तिविवर्द्धनम् अर्थलाभस्तुपृष्ठेस्यात्पार्श्वयोः सुहृदागमः कटिस्थानेवस्त्रलाभोगुह्यस्थानेसमागमः गुददेशेविनाशःस्यादूरुजान्वोश्चवाहनम् जंघयोःपादयोश्चैवसदागमनमादिशेत् पादतश्चोर्ध्वगमनंकुर्यादामस्तकाद्यदि गात्रेप्रदक्षिणेचापिराज्यलाभोभवेत्तदा मस्तकात्पादपर्यंतंयदिगच्छेदधोपिवा भवेयुश्चतदातस्यकुटुंबकलहामयाः सरठीपतनादेवसचैलंस्नानमाचरेत् नारदसंहितायाम् पल्याःप्रपतनेचैवसरठस्यप्ररोहणे शुभाशुभंविजानीयात्तत्तत्स्थानविशेषतः पल्याःप्रपतनेपूर्वैः फलमुक्तंशुभाशुभम् शीर्षेराज्यश्रियोवाप्तिर्भालेत्वैश्वर्यवर्द्धनम् सव्येभुजेजयःप्रोक्तोह्यपसव्येमहद्भयम् कुक्षौदक्षिणभागेतुधनलाभस्तथैवच वामकुक्षौतुनिधनंगदितंपूर्वसूरिभिः सव्यहस्तेमित्रलाभो

वामहस्तेतुनिःस्वता उदरेसव्यभागेतुसुपुत्रावाप्तिरुच्यते वामभागेमहारोगः कट्यांसव्येमहद्यशः वामकट्यांतुनिधनंमुनिभिस्तत्त्वदर्शिभिः आन्वोरेवंविजानीयात्सव्यपादेशुभावहं वामपादेतुगमनंस्त्रीणांव्यक्तंफलंवदेत् फलंप्ररोहणेचैवसरठस्यप्रचारतः सर्वांगेप्यशुभंविंद्याच्छांतिंकुर्यात्स्वशक्तितः शुभस्थानेशुभावाप्तिरशुभेदोषशांतये तत्स्वरूपंसुवर्णेनरुद्ररूपंतथैवच मृत्युंजयेनमंत्रेणवस्त्रादिभिरथार्चयेत् अग्निंतत्रप्रतिष्ठाप्यजुहुयात्तिलपायसैः आचार्योवारुणैःसूक्तैःकुर्यात्तत्राभिषेचनं आज्यावलोकनंकृत्वाशक्त्याब्राह्मणभोजनं गणेशक्षेत्रपालार्कदुर्गाक्षोपयंगदेवताः तासांप्रीत्यैजपःकार्यःशेषंपूर्ववदाचरेत् ऋत्विग्भ्योदक्षिणांदद्यात्षोडशेभ्यःस्वशक्तितः इतिदिनकरभट्टकृतेशांतिसारेपल्लीसरठशांतिः अथकपोतशांतिः तत्रैव आरोहेत्तुगृहंयस्यकपोतोवाप्रवेशयेत् स्थानहानिर्भवेत्तस्ययद्वाऽनर्थपरंपरा दोषायधनिनांगेहेदरिद्राणांशिवायच तच्छांतिस्तुप्रकर्तव्याजपहोमविधानतः ब्राह्मणान्वरयेत्तत्रस्वस्तिवाचनपूर्वकम् षोडशद्वादशाष्टौवाश्रौतस्मार्तक्रियापरान् देवाःकपोतइत्यादिऋग्भिःस्यात्पंचभिर्जपः कुंडंकृत्वाप्रयत्नेनस्वगृह्योक्तविधानतः ईशान्यांस्थापयेद्वह्निंमुखांतेष्टोत्तरंशतम् प्रत्येकंसमिदाज्यान्नैःप्रतिप्रणवपूर्वकम् यतइंद्रभयामहेस्वस्तिदेतित्र्यंबकैः त्रिभिर्मंत्रैश्चजुहुयात्तिलान्व्याहृतिभिःसह जपादींश्चततोभक्त्याकर्तापूर्णाहुतिंस्वयम् विप्रेभ्योदक्षिणांदद्याद्धोमशांतिंततोजपेत् ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः एवंयःकुरुतेभक्त्यातस्माद्दोषात्प्रमुच्यते पिंगलस्यस्वरेप्येवंमधुवल्मीकयोरपि सम्पूर्णमंदिरेहानिःशून्यसद्मनिमंगलम् प्राकारेषुपुरद्वारेप्रासादाद्येषुवीथि

षु तत्फलंग्रामपस्यैवसीम्निसीमाधिपस्यच शांतिकर्माऽखिलंकार्यंपूर्वोक्तेनक्रमेणतु इतिकपोतपिंगलादिशांतिः अथकृत्याशांतिः शौनकोहं प्रवक्ष्यामिकृत्याशांतिंद्विजन्मनाम् कुर्यात्स्वजन्मनक्षत्रेमासेमासेसमाहितः सुसंस्नातोनवंवस्त्रमाच्छाद्यसमलंकृतः द्विजाग्र्यैःस्वस्तिवाच्योच्चैराशीर्भिर्वेदपारगैः सुसंस्कृतेसुप्रदेशेपरेणानवलोकिते अथाज्यभागपर्यंतंयज्ञतंत्रंप्रकल्पयेत् उपलेपनप्रभृतिजुहुयात्पायसंचरुम् यांकल्पयतिसूक्तेनऋचोद्वादशभिःपुनः इदंरत्तदेतिसूक्तेनजुहुयाच्चघृताहुतिम् ततःस्विष्टकृत्प्रभृतिहोमशेषंसमापयेत् शांत्यर्थंदक्षिणादेया ब्राह्मणांश्चैवभोजयेत् जपेदेतानिसूक्तानियतात्मासुसमाहितः प्रत्यंगिरसकल्पेनसद्यस्तांप्रतिबाधते इतिकृत्याशांतिः अथाशनिदग्धगृहादिशांतिः वेश्मक्षेत्रादिदग्धेषुवैद्युतेनाग्निनायदि तेषांशांतिंप्रवक्ष्यामिशौनकोहंद्विजन्मनां तस्मिन्देशेजानुमात्रंगर्तंकृत्वावासिनतुशीपालमवकांचैवनिधायस्वस्तिवाचयेत् कर्तास्यपश्चिमेदेशेहोमंकुर्याद्विचक्षणः इध्माधानादिपर्यंतंयज्ञतंत्रंप्रकल्पयेत् उपलेपादिकंसर्वमिध्माधानाज्यभागयोः आज्याहुतीःशंवतीभिर्जुहुयादग्निमध्यतः सप्रत्नथेतिसूक्तेनजुहुयाच्चचरुंततः ततःस्विष्टकृत्प्रभृतिहोमशेषंसमापयेत् अग्नेरुत्तरतःस्विष्टात्स्वस्त्यात्रेयंजपेत्ततः ब्राह्मणान्भोजयेत्तत्रयथाशक्तिचदक्षिणा तदग्निदग्धवपुषेप्रदद्याद्ब्राह्मणायच प्राणदग्धेषुसर्वेषुहिरण्यंदक्षिणाभवेत् इत्यशनिदग्धगृहादिशांतिः अथाद्भुतशांतयः उत्पातउपसर्गअद्भुतंचेतिपर्यायाः तल्लक्षणंवसिष्ठसंहितायाम् अन्यत्वंप्रकृतेर्यत्तदसावुत्पातसंज्ञकः अधर्मतस्त्वसत्याच्चनास्तिक्यादतिलोभतः अनाचारान्नृणांनित्यमुपसर्गःप्रजायते तद्भेदस्त्रैव दिव्यांतरिक्ष

क्षितिजाविकाराघोररूपिणः ग्रहर्क्षजाः केतवश्चउत्पातादिव्यसंज्ञकाः निर्घातापरिवेषोल्कापुरंदरधनुर्ध्वजाः एवमाद्यामहोत्पाताअंतरिक्षाद्भयाः स्मृताः उत्पद्यंतेक्षितौयच्चस्थावरंवाथजंगमं तदेकदेशिकंभौमउत्पातःपरिकीर्तितः भौमाःस्युस्तुच्छफलदाआंतरिक्षास्तुमध्यमाः संपूर्णफलदादिव्यावर्षादर्धान्तदर्धतः अथकेतुफलंवसिष्ठसंहितायां केतोरुदयास्तमयंज्ञातुंगणितान्नशक्यतेयस्मात् दिव्यांतरिक्षभौमास्तस्मात्रिविधाश्चकेतवोजगति १ एकोत्तरशतभेदादृश्यंतेवासहस्रभेदास्ते औत्पादिकरूपत्वाद्भवंतिबहवस्तथैकोवा २ दिविऋक्षग्रहजास्तेदिव्याख्याःकेतवोमहाफलदाः परिवेषेंद्रधनुरुल्कागंधर्वनगराणिनिर्घाताः ३ गगनाधिकारजमेतन्मध्यमफलदंतथांतरिक्षंच भूमिभवाभौमास्स्युश्चरस्थिरावस्तुसंभवायेच ४ तेधमफलदास्तेषांकथयामिफलानिरूपाणि वर्षैर्मासैःपक्षैः क्रमशःपरिपाकमुपयांति ५ स्निग्धःप्रसन्नरूपःशुक्लनिभोन्हस्वदंडवत्सौम्यः उदयास्तमयेत्वेवंसुभिक्षसौख्यावहःकेतुः ६ धूमनिभोधूमाख्यःकेतुर्दोषप्रदोभवति इंद्रशरासनरूपः स्थूलनिभोवर्षणीतिदः सम्यक् ७ बहुभिःशिखिभीरतुलाविद्युन्मणिहारहेमनिभाः अपरेंद्रदिशोर्दिश्यान्महाहवंतद्दिगीशानां ८ शुकमुखबंधुनिभावाह्निसुराक्षतजसन्निभारुक्षाः दृश्यंतेयद्यनलदिशितावंतस्तापिशिखिभयदाः ९ मृत्युसुतावक्रशिखाः कृष्णारूक्षाःप्रहरणाकाराः दृश्यंतेयाम्यायांजनमारकभयप्रदास्ते १० क्षितितनयाद्वात्रिंशद्दर्पणसदृशाः सरश्मयोविशिखाः क्षुद्भयदाः सशिरस्कायमतनयामृत्युदाश्चशैलनिभाः ११ शशितनयाःकुसुमनिभाः कुंदेंदुक्षीररजतनिभाः उत्तरभागेशिखिनोजंतूनांतेसुभिक्षकराः १२ त्रिशिखीत्रिवर्णयुक्तोब्रह्मसुतोब्रह्मदंडनिभः अनियतदिक्प्रभवोसौ

शांतिकरोब्रह्मदंडाख्यः १३ शनितनयास्तारास्थाःशुक्लऋजवश्चषट्संख्याः दृश्यंतेह्नित्रिदिनैःशुभदामासैश्चरुग्भयदाः १४ जीवसुताविचकाख्याः शुक्लास्ताराश्रिताः स्निग्धाः याम्यायांदिशिसंस्थाबहवस्तेतापदाःसततं १५ बुधतनयाश्चोराख्याःशुक्लाःसूक्ष्मायथेष्टदिक्प्रभवाः आमयभयदाःसततंजंतूनांपंचपंचाशत् १६ कुजतनयाःकैकेयाः क्षतजानलसन्निभास्त्रिशूलधराः याम्यायांदिशिसंस्थाः क्षुद्भयदाःषष्टिसंख्याकाः १७ तामसकीलकसंज्ञाराहुसुताःसूर्यमंडलेदृष्टाः तेषांतन्निखिलफलंसम्यक्कथितंचसूर्यचारेपि १८ अग्निसुतास्त्वाग्नेय्यांविंशत्यधिकाश्चशतसंख्याकाः मलयानलसदृशाभानुवह्निभयप्रदास्तेपि १९ अरुणाख्याःश्यामनिभाःशुक्रसुताविविधरूपसंकीर्णाः शस्त्रक्षुद्भयदास्तेसमोत्तरसप्ततिश्चसंख्याकाः २० दंडकसंज्ञाश्चाष्टौतारासदृशाःप्रजापतेस्तनयाः द्वाचत्वारिंशोत्तरशताधिकाःपापदाविधातृसुताः २१ वरुणभवार्ककाख्याद्वित्रिंशद्वंशगुल्मध्वाष्टिनिभाः शशिवत्प्रभासमेताराज्ञोन्यत्वंप्रकुर्वंति २२ कालभवाःषण्नवतिसंख्यास्तेषांकबंधनिभाः तन्नामानःशिखिनःपुंड्रामयभीतिदाजगतः २३ विमलास्ताराकारादशदिक्षुसमुद्भवाःशिखिनः एवंसहस्रभेदाःपापाश्चैषांविशेषमभिधास्ये २४ पश्चिमदिशिसंभूतश्चोत्तरनम्रश्चसौम्यकेतुःसःकुरुतेसुभिक्षमतुलंसितवर्णोसौमहास्निग्धः २५ दक्षिणनम्रःप्राच्यांतथाविधोयाम्यकेतुःसः रूक्षःक्षुद्भयदायीमरकभयंवाकरोत्येव २६ धूमनिभोयाम्यायांकपालकेतुर्बृहत्तनुःस्निग्धः दिक्षुविदिक्षुप्रभवःक्षुन्मरकादृष्टिरोगकरः २७ प्राच्यांदिशिसंभूतःप्रदक्षिणंभ्रमतिचक्रवद्रूक्षः सचचक्रकेतुरनिशंकपालकेतोश्चतुल्यफलः २८ पश्चिमतःसंभूतोयाम्यांदिशंभ्रमतिचप्रदक्षिण्यं धूमनिभोविषमाख्यः केतुर्भूभारमपनयति २९ कतिपयदिवसंगत्वागमननिरु-

तिकरोधूमनिभः नरपतिकलहाज्जगतः करोतिविलयंसचक्रकाख्यः ३० गगनत्रिभागदीर्घः श्यामनिभोसोमहासदाकारः ऋतुवक्रगतिंकुरुते
क्रमशोजगतस्त्रिभागहरः ३१ गतिरहितोध्रुवकेतुः प्रमाणवर्णाकृतिर्नभवेत् ग्रहनक्षत्रोपगतेदृष्टोनैवाशुभप्रदःकेतुः ३२ उपकरणेषुचराज्ञांसु
रम्यगृहतरुपर्वतेषुसदनेषु दर्शनमुपैतिपतितंविनाशिनामेवनियमेन ३३ कुमुदनिभःकुमुदाख्योदिवसैःषड्भिस्तुपश्चिमेदृष्टः प्रागुत्तरदिशियदि-
वासुभिक्षमतुलंकरोत्येव ३४ तारोपरिमणिकेतुर्याम्यायांदिशिसकृद्दृष्टः उदयास्तमयसमयेशुभदोसौ क्षीरदारेव ३५ जलधारेवहिऋज्वी
नतयाशिखयापरेणदृष्टःसः जलकेतुर्जलसदृशःसुभिक्षकरस्तुसर्वजंतूनाम् ३६ हरिलांगूलनिभोभवकेतुः क्रकचसन्निभोवापि बहुरोगभयंकुरु
तेसर्पाकारस्तुसर्वदाभवति ३७ अपरोपिपद्मकेतुःपद्मनिभःपद्मगर्भसंकाशः क्षेमकरोनृपतीनांसुभिक्षदःसर्वजंतूनाम् ३८ आवर्तकेतुरयंप्राद
क्षिण्येनदीप्तिमान्शुक्लः शुभदोव्यत्ययकेतुस्त्वतुलामयभीतिरीतिकरः ३९ आक्रम्यगगनमखिलंसंवर्ताख्यासधूमनिभः मूलाग्रस्थितरेखासके
तुरसकृद्भयप्रदोजगतः ४० शुभदाःशुक्लनिभायेकृष्णास्त्वशुभप्रदाजगतः केतूनांफलमुक्तावक्ष्येदस्रादिभेषुजातानाम् ४१ अश्विन्यांयदिकेतु
र्जातस्तदश्वजीविनांहन्यात् याम्येम्लेंछाधिपतिंबहुलायांकलिंगाधिपतिम् ४२ रोहिण्यामतुलबलंनिहंतिकेतुश्चशूरसेनेशम् औशीनरमुख्यपती
न्सौम्येरौद्रेचजलजंतून् ४३ अश्मकदेशाधिपतिंत्वादित्येपुष्यभेचमगधपतिम् आर्याधिपतिंसार्पेपांड्याधिपतिंचापितृधिष्ण्ये ४४ भा-
ग्यर्क्षेतूज्जयिनंचोत्तरदण्डनायकांस्त्वखिलान् हस्तर्क्षेधनिकवरांश्चित्रायांकुरुभवांस्त्वखिलान् ४५ कांबोजनृपतिमुख्यंप्रभंजनेजातकेतुरपि

इक्ष्वाकुवंशनाशंहिद्वैवभेचगौडेशं ४६ ज्येष्ठायांयदिजातःसहन्यतेसर्वमंडलाधीशं मूलेमद्राधिपतिंजलदैवेकलिंगदेशपतिम् ४७ गूंजरिकायेदे
शास्ताहन्याद्वैस्वधिष्ण्यजःसोपि केकयनाथंहन्याच्छ्रवणर्क्षेवसुभवोखिलान्द्रविडान् ४८ नैमिषंनृपतिंहन्याच्छतभिषजस्त्वजांघ्रिजश्चपां-
चालान् आहिर्बुध्न्यर्क्षभवःसंकारिकान्किरातकोणभवान् ४९ पौष्णर्क्षभवःकेतुर्द्विजसज्जनधर्ममार्गस्थान् अभिजिन्नक्षत्रभवःकौंकणदेशं-
चनिशिचरांश्चापि ५० येकेतवश्चाश्विमुखर्क्षजातास्ताराग्रहादिष्वपिसंभवाश्च कुर्वंतुतेतीक्ष्णफलंजनानामन्येपिसामान्यफलप्रदाःस्युः ५१
उल्कादिलक्षणंतत्फलंचनारदीये स्वर्गच्युतानांरूपाणियान्युल्कास्तानिवैभुवि धिष्ण्योविद्युदशनितारा:पंचविधाःस्मृताः पीडाश्चोष्ट्राहिगोमा
युखरगोगजदंष्ट्रिकाः कपिगोधाधूमनिभाविविधाःपापदानृणां उदयास्तमयेकेंद्वोःपतितोल्काशुभप्रदा सितरक्तापीतासितासोल्काहंतिद्विजाति
नः राजराष्ट्रविनाशायप्रासादप्रतिमासुच गृहेषुस्वामिनांपीडानृपाणांपर्वतेषुच दिक्षुतत्तद्दिगीशानांकर्षकाणांस्थलेषुच गोष्ठेगोस्वामिनांपीडा
शिल्पिकानांजलेषुच वर्तुलोल्कापुरंहंतिछत्राकारापुरोहितम् वंशगुल्मलताकाराराष्ट्रविद्राविणीतथा इतिकेतुफलम् अथपरिवेषः किरणा
वायुनिहताउच्छ्रितामंडलीकृताः नानावर्णाकृतयःखेपरिवेषाःशशीनयोः मुहुर्मुहुःप्रलीयंतेनसंपूर्णफलप्रदाः अनेकवृत्तवर्णश्चपरिवेषोनृपां
तकृत् द्विमंडलश्चमूनाथंनृपघ्नोथत्रिमंडलः द्वौग्रहौपरिवेषस्थौक्षितीशकलहप्रदौ कुर्वंतिकलहानर्थम्परिवेषगतास्त्रयः चत्वारःपरिवेषस्थानृप
स्यमरणप्रदाः परिवेषगताःपंचजगत्प्रलयदाग्रहाः नृपहानिःकुजादीनांपरिवेषेपृथक्पृथक् प्रावृट्तौतुशरदिपरिवेषोजलप्रदः प्रायेणान्येषुकृ

तुषुतदुक्तफलदायिनः अन्यत्रापि रविशशिपरिवेषेपूर्वयामेचपीडारविशशिपरिवेषेमध्यमेचातिवृष्टिः रविशशिपरिवेषेधान्यनाशस्तृतीयेरविशशिपरिवेषेराज्यनाशश्चतुर्थे इतिपरिवेषः अथेंद्रधनुः नानावर्णांशवोभानोःसाभ्रवायुनिघट्टिताः यद्व्योम्निचैवसंस्थानमिंद्रचापंप्रदृश्यते अथवाशेषनागेंद्रदीर्घनिश्वाससंभवं विदिक्षुजंदिक्षुजंचतद्दिक्भूपविनाशनं अदृष्टौवृष्टिदंत्वैंद्र्यांदिशिदृश्यामवृष्टिदं अवनीगाढमच्छिन्नंप्रतिकूलंधनुर्द्वयम् नृपांतकृद्यदिभवेदानुकूलेतुतच्छुभम् इतींद्रधनुः अथनिर्घातः वायुनानिहतोवायुर्गगनात्पततिक्षितौ तदादीप्तःखगरुतःसनिर्घातोतिदोषकृत् इतिनिर्घातः अथरजः सितेनरजसाछन्नादिग्ग्रामवनपर्वताः यदातदाभवंत्येतेनिधनंयांतिभूमिपाः भूमोद्भवस्तुयस्यांवैतस्यांदिशिविनाशनम् ऋतावन्यत्रशिशिरात्संपूर्णफलदंरजः इतिरजः अथभूकंपः भूभारखिन्ननागेंद्रशेषविश्रामसंभवः भूकंपःसोपिजगतामशुभायभवेत्सदा यामक्रमेणभूकंपाद्द्विजादीनामनिष्टदाः अनिष्टदाःक्षितीशानांसंध्ययोरुभयोरपि प्रायेणनिखिलोत्पाताःक्षितीशानामनिष्टदाः षड्भिर्मासैश्चभूकंपोद्वाभ्यांदाहःफलप्रदः अनुक्ताःपंचभिर्मासैस्तदानींफलदंरजः इतिभूकंपः अथग्रहयुद्धम् अद्भुतसागरेगर्गः छादनंरोधनंचैवरश्मिरोधंतथैवच अपसव्यंग्रहाणांचचतुर्द्धायुद्धमुच्यते इदंचभौमादीनामेवनसूर्यचंद्रयोः ताराग्रहाणांपंचानांयुद्धान्युक्तानियोगतइत्युपसंहारात् पराजयलक्षणंचतत्रैव ग्रहोग्रहंसमागम्ययश्यामोभवतियोभृशं हानिंप्राप्नोतिवक्तव्यंस्पंदतेचमुहुर्मुहुः तत्फलंविस्तरभीतेर्नोच्यते अत्रसामान्यशांतिरेवविशेषानुक्तेः इतिग्रहयुद्धम् अथप्रतिसूर्यः तत्रैवमयूरचित्रे उदीयमानःसूर्योवैदृश्यतेप्रतिरूपकः त्रीण्यब्दानिभवेन्नाशो

मासार्द्धेननसंशयः अत्रापिसाधारणशांतिः इतिप्रतिसूर्यः अथरश्मिदंडः वाराहसंहितायाम् रविकिरणजलदमरुतांसंघातोदंडवत्स्थितोदंडः सविदिक्षुरवोनृपाणांमशुभोदिक्षुद्विजानांच इतिरश्मिदंडः अथदिग्दाहः अद्भुतसागरेबार्हस्पत्ये यदास्तमितआदित्येवह्निज्वालाप्रदृश्यते दिशांदाहंतुतंविन्द्यादितिभार्गवभाषितम् नारदसंहितायाम् दिग्दाहःपीतवर्णश्चेत्क्षितीशानांभयप्रदः इतिदिग्दाहः अथछाया तत्रैवमात्स्ये विरजस्केरवौचैवयदाछायानदृश्यते दृश्यतेचप्रतीपावातदादेशभयंवदेत् अत्रमासिकःफलपाकः अनुक्तफलकालत्वात् इतिछाया अथमेघगर्भोपघातः तत्रैववटकनिकायाम् गर्भोपघातलिंगान्युल्काशनिभूमिकंपनिर्घातः ग्रहयुद्धराहुशशिनांभ्रंशपुरोवारजोवापि तत्रैवबृहत्संहितायाम् रुधिरादिवृष्टिवैकृतमथवेंद्रधनुर्निर्दर्शनंराहोः इत्युपपातैरेतैर्विविधैश्चान्यैर्हतोगर्भः इतिमेघगर्भोपघातः अथाद्भुतपाककालः अद्भुतसागरेबृहत्पाराशरः तत्रोत्पातफलंदिव्यंपूर्णेवर्षेविपच्यते आंतरिक्षंतथाभौमंमासैःषड्भिस्तथर्तुभिः निर्घातस्तुत्रिभिर्मासैर्गंधर्वनगराणिच अग्निनासप्तरात्रेणमासेनोल्काविपच्यते पुरचैत्यादिभंगेषुपुरसंक्रमणेषुच नरेंद्रध्वजभंगेषुफलंमासाद्विपच्यते शांतिःस्वरूपजातानांपाकःषण्मासिकोभवेत् अरिष्टंपच्यतेषट्सुमासेषुफलदंत्रिषु अतिहर्षातिशोकश्चसद्यएवविपच्यते कीटमूषकसर्पाणांमक्षिकादिषुयत्फलम् पच्यतेतद्विमासेनमधुसक्षसुपच्यते हयानांहस्तिनांचैवशकुनंचशुनस्तथा सद्यस्त्र्यहाद्वानियतमुलूकस्यतथैवच विदेहवाक्संश्रवणंदर्शनंयक्षरक्षसां पशूनांविकृतंयच्चषष्ठमासिविपच्यते मांसतैलविकारेषुदेहांगस्पंदनेषुच वस्त्रजातिविकारेषुफलंस्यात्सप्तमेऽहनि चित्रकर्मणिमासाभ्यांशयनेषष्ठमा

सिकम् वल्मीकेषट्सुमासेषुक्षयेवृद्धेतथात्रिषु जयोच्छ्रायेषुभग्नेषुयज्ञकर्मणिवैकृते सोमध्वजविकारेचविकाराःसप्तमासिकाः तंतुबीजेधिकारेषुराज्ञःशस्त्रेवजृंभणे पद्मोत्पलफलादीनांफलंषाण्मासिकंभवेत् विनाशेनिष्फलंतेषांपाककालेनिवर्तते तत्रैवगर्गः पक्षाद्विपाकःसूर्यस्यपाकः सोमस्यमासिकः मासद्वयेस्मृतोराहोर्विपाकोनात्रसंशयः त्रिभिर्मासैर्विपाकस्तुनियतंधूमकेतवः संवत्सरविपाकौतुज्ञेयौसूर्यबृहस्पती षण्मासिकश्चौशनसः सूर्यजस्यतुपंचभिः त्रिभिर्मासैस्तुभौमस्यउल्कापातस्तुमासिकः अष्टभिर्भूमिकंपस्तुनिर्घातःपच्यतेत्रिभिः अनार्तवंपुष्पफलंषड्भिर्मासैर्विपच्यते पक्षिकीटपतंगानांदशाहात्फलमादिशेत् घृततैलवसावर्षेसद्यःफलमुदाहृतम् अरिष्टेषट्सुमासेषुपञ्चा[illegible]कलहंत्रिषु हिरण्यविक्रियायांतुफलंमासाद्विपच्यते कलहार्थविपर्यासउत्सवक्रिययासह अचलानांचचलनेषण्मासात्फलमादिशेत् कीटमूषकसर्पाणांमक्षिकाणांतथैवच दर्शनेत्वतिमात्रेणफलंत्रैमासिकंभवेत् रात्राविंद्रधनुर्दृष्ट्वाराज्ञःशीलविपर्ययम् वानराणांनराणांचतथैवगजवाजिनाम् नानावादित्रशब्दानांफलंमासाद्विपच्यते गृध्रगोमायुसिंहानांफलंमासाद्विपच्यते बिडालनकुलानांचवराहव्याघ्रयोस्तथा श्रुत्वांतरिक्षेशब्दंतुफलंमासाद्विपच्यते मात्स्येविष्णुधर्मोत्तरेच अद्भुतेतुसमुत्पन्नेयदिदृष्टिःशिवाभवेत् सप्ताहाभ्यंतरेज्ञेयमद्भुतंनिष्फलंभवेत् शिवानिर्विकाराइतिअद्भुतपाककालः अथाद्भुतफलस्थानानि अद्भुतसागरेपाराशरः राज्ञःशरीरेलोकेचपुरदारपुरोहिते पाकआयातिपुत्रेषुतथाकोशेचवाहने तत्रैवगर्गः पुरेजनपदेकोशेवाहनेचपुरोहिते पुत्रेस्वामिनिभृत्येचपच्यतेदैवमष्टधा वसिष्ठसंहितायां भौमंशांत्याशमंयातिमादैवंत्वंतरिक्षजं दिव्यंहेमान्न-

गोभूमिदानैस्तत्कोटिहोमतः महोपहाराद्रुद्रस्यगोदोहान्तत्पुरःसरं अलंकृतोक्षितितलेयावत्क्षारपूर्वंभवेत् अपिदिव्यंशमंयातिकिंपुनस्त्वितरद्वयम्
अत्राधिकारीतत्रैव अकृत्वाशांतिकंराजा दुःखांभोधौनिमज्जति अम्बरोमथाष्टवर्गादि रजोदर्शनादौतुतत्स्वामिनोधिकारः केचित्त्वत्रापिराज्ञोधिका
रमाहुः अथवासर्वाद्भुतशांतिषुसर्वेषामधिकारः अद्भुतसागरे येतेषुशांतिंकुर्वंतिनतेयांतिपराभवं येतुनप्रतिकुर्वंतिक्रियामश्रद्धयान्विताः ना
स्तिक्याद्वाविमोहाद्वाविनश्यंत्यवतेचिरादितिगर्गोक्तेः अश्वादिकंचदत्वाशांतिःकार्या वृक्षोत्पातेछेदनमाहनारदः अकालेपुष्पितावृक्षादृश्यंते
फलितायदि कार्यंतच्छेदनंतत्रततःशांतिर्मनीषिभिः अथोत्पातसाधारणशांतयः अथाद्भुतानांसर्वेषांशांतिंवक्ष्यामिशौनकः आश्चर्यमद्भुतंप
श्येल्लक्षणेनसमन्वितं दिव्यानिचांतरिक्षाणिभौमानीतित्रिधाभवेत् रश्मिहीनंरविंपश्येद्रवौछिद्रंचभेदनं नक्षत्रचंद्रसूर्याणांमहोल्कापतनंतथा अ
मेघेविद्युतंपश्येन्नचमेघेत्रविद्युतं अतिसूर्यंचतुर्दिक्षुपरिवेषंतथात्रयं त्रिकोणंचतुरस्रंवाविपरीताकृतितथा प्रतिचंद्रंतथारात्रौचंद्रस्याप्येवमेवतु
अभ्रमृत्स्नासुरक्तानांवर्षणंजलकाष्ठयोः अनग्निधूममाकाशेपतंतींदीपिकांतथा गंधर्वनगरंदृष्ट्वादिवानक्षत्रदर्शनम् एवमादीनिदिव्यानि अशुभा
न्यद्भुतानिच अथान्यान्यंतरिक्षाणि ह्यद्भुतानिनिबोधमे गगनंलोहितंपश्येत्पश्येद्वाकाकमैथुनं काकदुर्गंधिवक्रोधोयद्वाशिरसिजायते शिरस्युपविशे
त्काकस्ताडयेद्वाप्यकारणात् देवालयानिकंपंतेदृश्यंतेप्रतिरूपकं कलशोविकलेकिंचित्ध्वजप्रपतनंतथा भिदंतेदेवताःसर्वाःस्विद्यंतेचाप्यकारणा
त् उन्मीलंत्यपिरोदंतिनिमीलंतिहसंतिच गायंत्यकस्मान्नृत्यंतितिष्ठंतिनिजपीठतः पीठदेशेप्रजायंतेमधुच्छत्रंपिपीलिकाः रात्राविंद्रधनुर्दृष्ट्वादिवा

श्वेतंचवायसं एवमादीन्यसंख्यानिआकाशप्रभवानिच भूमेः कंपनभेदोच्चनिर्घातः कंपनंस्फुटम् पूयनंतदनंवापिज्वलंतंचनिरिंधनं छत्राकंमधुव
ल्मीकंगृहेयत्रप्रजायते तृणानिचैवदारूणिप्ररोहंतिगृहोन्तरे शुष्कवृक्षाः प्ररोहंतिक्षीयतेतैलभांडकम् जायंतेचोद्भिदः सर्वेप्राणिनोबहुधामताः
अरण्यस्थामृगाः सर्वेअतीताश्चाप्यकारणात् प्रविशंतिगृहेयत्रगृहमारोहयेद्यदि सर्वेमृगाश्चगावोवाअश्वोष्ट्रमहिषादयः निर्गच्छंतिगृहद्वारात्स
पैर्वैस्त्वयमेवहि मंडुकसर्पनकुलैर्मुखाद्योप्रविशेद्यदि सौवीरभांडान्मंडूको निर्गच्छन्प्रविशेत्तथा तृणगुल्मलतावृक्षाविपरीतफलाअपि कदली
पूगवृक्षादिकाष्ठगर्भेफलद्वयं उद्यानस्थापितारंभादक्षिणाभिमुखेफले देवोद्यानेनरोद्यानेविलीयंतेमधूनिच गवाश्वमहिषीभार्यायुगुलप्रसवे
सति गवानित्रीणिविप्रेभ्योदानंकुर्याद्विशेषतः मनुष्यादंतसहिताजायंतेपिनचांगकाः अजाश्वमहिषीगावः खरोष्ट्राद्याविशेषतः विरुपायत्रजा
यंतेकंटकांगास्तथैवच हीनांगानिचसूयंते अधिकांगास्तथैवच स्थूलायांसुकुलंभार्यास्वस्तनंगौः पिबेद्यदि शुनकोगृहमारोहेत्प्रविशेद्वाशिवापुरमृशु
नकानांकपोतानांदृश्यतेमैथुनंयदि दृश्यतेमर्कटस्कंधोगोदुग्धेरुधिरंयदि एवमादीन्यसंख्यानिपार्थिवान्यद्भुतानिच कर्तुः श्रोतुश्चमंतुश्चद्रष्टुरादिष्टुर
वच उपदेष्टुश्चसर्वेषामुत्पातानांफलंसमं गृहोद्यानेस्थितोत्पातस्तद्गृहस्यैवबाधकं होमकुंडेस्थितोत्पातंतत्कर्तुश्चैवबाधकं त्रेताग्निकुंडजोत्पाते
तद्राज्ञश्चैवबाधकं सभातलेस्थितोत्पातंपश्चाद्द्वारेचसंस्थितं गोनिवासस्थितोत्पातंतद्ग्रामस्यैवबाधकं स्वयंभूस्थानजोत्पातंतद्राज्ञश्चैवबाधकं त
द्राष्ट्रस्यैवराजस्यबाधकंपरिचक्षते गृहेपक्षिप्रवेशेचमृगश्चप्रविशेत्तथा तद्गृहान्निर्गतेसर्पेमासात्तत्प्रविशेन्नरः मासेतीतेततःपश्चाद्गृहशुद्धिंचका

रयेत् शांतिहोमंततःकुर्यात्प्रविशेन्मंदिरंततः एतेषांचफलंवक्ष्येसुयुक्तंशास्त्रनोदितं आत्मनोनिधनंयातिक्षिप्रमेवनसंशयः वियोगःपुत्रपत्न्याचक्षेत्रद्रव्यादिनाशनं तद्ग्रामेचैवतद्देशे अनावृष्टिर्भविष्यति तत्स्थानचलनंवापिबंधनंशोकमाप्नुयात् एतेषांशमनार्थायहोमःकार्योद्विजातिभिः तस्मिन्नह्निकर्तव्यःशांतिहोमोयथाविधि तदैवमुख्यकालत्वाद्दिनत्र्यादूर्ध्वमतःपरम् अद्भुताहःसमारभ्यतत्पक्षेहोममाचरेत् चंद्रानुकूल्येदिवसेसुनक्षत्रे समारभेत् अद्भुतेसतिदेशेचदक्षिणेवागृहोत्तरे दशाद्वादशहस्तंवामंडपंकारयेच्छुभम् कुंडेवास्थंडिलेवापिगोमयेनसवारिणा उपलिप्यस्थंडिलं तद्रंगमालिकमाचरेत् उत्तमेनवकुंभांश्चपंचकुंभांश्चमध्यमे द्विकुंभंतुकनिष्ठेवैजपकुंभांश्चकल्पयेत् होमस्यैशानदिग्भागेशांतिकुंभमथापरेदेवतास्थापनार्थायकुंभमेकमथापरं स्वर्णराजतताम्रैश्चकारयेन्मृन्मयेनवा सुस्निग्धानिचकुंभानिअभिन्नान्यव्रणानिच धवलीकृतकुंभानिवेष्टयेत्सिततंतुभिः कुंभानिवेष्टयेत्पश्चान्नवशुक्लांबरैःशुभैः गंधपुष्पाक्षतैरत्नैःकुंभानिक्रमशोर्चयेत् पल्लवैश्छादयेच्चूतैर्यद्वाजंब्वादिकोमलैः प्रतिमांकारयेद्धीमान्जातरूपमयेनच माषविंशतिमानेनसुवर्णेनोत्तमेनच अष्टमासेनवाकुर्याच्चतुर्माषेणवातथा मासद्वयप्रमाणेनमासमात्रेणशक्तितः शुर्निमित्तेसूर्यरूपमाकाशेवायुमूर्तिजं भूनिमित्तेअग्निरूपंलक्षणेनैवकारयेत् तदभावेतुतन्मौल्यंनिधायाथप्रपूजयेत् आहूयमंत्रान्संपूज्यस्वस्तिवाचनपूर्वकम् आचार्यंवरयेत्पश्चाद्ब्राह्मणंवेदपारगम् सर्वावयवसंपूर्णंकुलीनंचकुटुंबिनम् आचारवंतंधर्मज्ञंसर्वलोकहितैषिणम् शीललक्षणसंपूर्णंरूपौदार्यगुणान्वितम् सदासंतुष्टमनसंरागद्वेषादिवर्जितम् उत्पातशांतावेतस्यांत्वमाचार्योभवेतिच एवंकृत्वातथाचार्यंब्राह्मणंचतथाविधम्

आचार्यवत्सदस्यंचसर्वज्ञंवरयेत्ततः ऋत्विजोवरयेत्पश्चात्षोडशाष्टौचभक्तितः वित्तानुरूपंवरयेद्द्वौवालक्षणलक्षितौ अन्यांश्चकर्मकार्यार्थंवरयेद्ब्राह्मणोत्तमान् देवतास्थापनार्थायहोमस्यैशानदेशके पद्ममष्टदलंकुर्यादक्षतैर्व्रीहितंडुलैः कर्णिकाकेसरोपेतंसर्वशोभासमन्वितं देवतास्थापनकुंभंपद्ममध्येनिधायच सजलौषधिसंयुक्तंवस्त्रगंधाद्यलंकृतम् वस्त्रंदेवासनार्थायकुंभवस्त्रेनिधायच सलिलौषधिसंयुक्तंकुंभंवस्त्रादिभिर्यजेत् अन्वाधानाज्यभागांतंकुर्यात्तंत्रंयथाविधि होमंकुर्यात्ततःपश्चादाचार्योब्राह्मणैःसह सदस्योदेवतापूजांकुर्यान्मंत्रेणभक्तितः पंचामृतेनसंस्नाप्यस्थापयेत्कुंभमंतिके छादयेद्देवतारूपंनवशुक्लांबरेणच उद्यन्नद्येतिमंत्रेणतस्मिन्वायुंप्रपूजयेत् यस्मैत्वंसुकृतेत्येनपूजयेज्जातवेदसं रक्तगंधाक्षतैःपुष्पैर्धूपदीपोपहारकैः तांबूलंकल्पयेत्तस्मैस्नानवस्त्रादिभिर्यजेत् तन्मंत्रेणैवतंदेवंयजेदष्टोपचारकैः देवपूजोत्तरकालेततःकुंभाभिमंत्रणं ऋत्विग्भिरादिशावृत्याकुंभंस्पृष्ट्वाभिमंत्रयेत् अपनःशोशुचदघमष्टाभिश्चयथाक्रमं यदंतियच्चदूरकइत्यृचांसप्तकंतथा यत्रब्रह्मापवमानेतिऋग्भिःषड्भिर्यथाक्रमं उद्वयंतमसस्पर्यादित्प्रत्नस्यरेतसः देवाःकपोतसूक्तेनकपोतादिप्रवेशनं त्र्यंबकंजातवेदसेश्रीसूक्तेनाभिमंत्रयेत् उत्तमेचाष्टसाहस्त्रमध्यमेशतसंख्यया अष्टाविंशतिसंख्यावातृतीयेतदनंतरं पलाशीयैःसमिद्भिश्चघृताक्तैर्जुहुयाद्दश मृत्युंजयेनमंत्रेणहस्तेनाग्नौक्रमेणच तावतोजुहुयादाज्यंजातवेदसइत्यृचा रक्तचंदनसंयुक्तंपायसंघृतसंयुतं पायसंजुहुयादग्नौसमिदाज्यप्रमाणतः ऋगादौप्रणवंचोक्त्वास्वाहाकारमृगंततः अपनःशोशुचदितिनवविंशतिभिर्हुनेत् कुंभाभिमंत्रणोक्तैश्चऋग्भिराभिश्चपायसं शांत्यर्थंतिलहोमंचहुनेद्व्याहृतिभिस्त्रिभिः सोथिष्टकृतमारभ्यहोमशे

ध्वंसमापद्येत् समुद्रादूर्मिसूक्तेन हुनेत्पूर्णाहुतिंततः पश्चिमेवोत्तरेपूर्वमग्नेरीशानदेशके यजमानाभिषेकार्थमासनंचनिधायच दारपुत्रसमेतस्य यजमानस्यऋत्विजः नादेयैःशांतिकुंभस्थैश्चान्यकुंभस्थितोदकैः अभिषिंचेत्ततःपश्चात्पल्लवैःकलशस्थितैः समुद्रज्येष्ठाइत्याद्यैस्त्वायंताइत्यृचेनच इमाआपस्तृचेनैव देवस्यत्वेतिमंत्रतः भद्रंदशाक्षरेणैव धामंतेनाभिषेचयेत् अभिषिक्तोहतंवस्त्रंपरिधायसभूषितः सशुक्लवस्त्रैः प्रत्येकमंगुलीयककुंडलैः गंधाक्षतैःपुष्पमाल्यैर्धूपदीपोपहारकैः आचार्यंपूजयेदादौब्रह्माणंतदनन्तरं सदस्यमृत्विजादींश्चयजमानःप्रपूजयेत् सुवर्णयत्समाख्यातंयजमानेनदक्षिणा आचार्यायचयद्दत्तंब्रह्मणेतुतदर्धकम् ब्रह्मवच्चसदस्यायथावित्तानुसारतः अभिषिक्तोभ्योविप्रेभ्योदक्षिणांचप्रदापयेत् सर्वेभ्यश्चैवविप्रेभ्यस्तदानीमेवदापयेत् सहिरण्यांसवस्त्रांचसर्वाभरणभूषिताम् धेनुंपयस्विनींदद्यादाचार्यायसवत्सकाम् तत्तत्कुंभंचऋत्विग्भ्यः सहिरण्यंसवस्त्रकम् तत्रस्थेभ्यश्चविप्रेभ्योहेमवित्तानुसारतः यद्युक्तदक्षिणाभावेप्यनुक्तेहोमकर्मणि हिरण्यंदक्षिणांदद्यात्तदानीमल्पिकामपि ग्राह्याशीर्वचनंतेषांप्रणिपत्यक्षमापयेत् सहस्रंभोजयेद्विप्रांश्चशतंवादशकंतथा घृतान्नैर्भक्ष्यभोज्यैश्चअभावेत्रिवृतान्नकैः बंधुभिःसहभुंजीततथापुत्रादिभिःस्वयं एवंयःकुरुतेशांतिंतस्यायुर्वर्द्धतेसदा अद्भुतोद्भवदोषाश्चनाशंयांतिनसंशयः दृष्टादृष्टाहिदोषाश्चनश्यंतेहिचसर्वदा आयुरारोग्यमैश्वर्यंप्राप्यकीर्तिंचविंदति स्त्रीणांचपुत्रपौत्राणांवर्द्धतेकल्पमायुषा सर्वान्कामानवाप्नोतिशौनकस्यवचोयथा। वसिष्ठसंहितायाम् हस्तैःषोडशभिःकार्यंचतुरस्रंसमंततः मंडपंयज्ञियैर्वृक्षैरयवानवदारुभिः हस्तैश्चतुर्भिस्तन्मध्येकुंडंकार्यंसमंततः समंततश्चतुर्भिरित्यन्वयः तथाचक्षेत्रफलेनषोडशहस्तंकुडम् खातंह-

सैश्चतुर्भिश्चवप्रत्रयसमन्वितं षडंगुलोन्नतस्त्वाद्योद्वादशांगुलविस्तृतः दशांगुलोन्नतोमध्येअष्टांगुलसविस्तृतः चतुर्दशांगुलोत्सेधश्चतुरंगुलविस्तृतः
तृतीयवप्रः कर्तव्योयोनिश्चैकातुपश्चिमे चतुर्दशांगुलैर्दीर्घाचोन्नताषोडशांगुलैः हीनाधिकानकर्तव्याविस्तारःषड्भिरंगुलैः कुंडस्यलक्षणंत्वेकंकोटि
होमेतुसर्वदा ईशान्यांवेदिकाकार्यासार्द्धहस्तप्रमाणतः उन्नताविस्तृताकार्याप्रागुदक्प्रवणाशुभा सर्वदैवमयीत्वाद्याशिवपूजापुरःसरम् ग्रहांस्ता
नर्चयेत्तत्रपूर्वोक्तविधिनाततः पालाशसमिदाज्यान्नैर्मुखांतेपृशतंपृथक् अघोरमंत्रेणततोग्रहहोमंचकारयेत् तिलहोमंव्याहृतिभिर्घृताक्तंजुहु-
यात्ततः हारेपुजापकैः स्वस्ववेदपारायणक्रमात् चमकंनमकंसूक्तंपुरुषोक्तांगजापकैः होमंनवभिराचार्यैःकारयेद्ब्राह्मणैःसह नैवेद्यांतंततःपश्चा
च्छांतिवाचनपूर्वकं ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः शिवविष्णुकथालापैर्दिनशेषंनयेत्ततः एवंयावत्कोटिहोमस्तावत्कार्यमतंद्रितैः तद
र्द्धंवातदर्द्धंवालक्षहोममथापिवा कार्यंदोषानुसारेणवित्तशाठ्यविवर्जितः होमांतेदक्षिणांदद्याच्चतुर्विंशतिऋत्विजः प्रतिद्विजमलंकारंसार्धनिष्कशत
द्वयम् तदर्धंवातदर्धंवादोषवित्तानुसारतः उक्तासाधारणीशांतिरुत्पातानामतःपरम् उत्पाताश्चैवतच्छांतिर्वक्ष्यतेत्रपृथक्पृथक् नारदसंहितायां
देवालयेस्वगृहेवाईशान्यांपूर्वतोपिवा कुंडंलक्षणसंयुक्तंकल्पयेन्मेखलायुतम् गृह्योक्तविधिनातत्रस्थापयेच्चहुताशनम् जुहुयादाज्यभागांतेपृ
थगष्टोत्तरंशतम् यतइंद्रभयामहेस्वस्तिदाघोरमंत्रकैः समिदाज्यचरुव्रीहितिलैर्व्याहृतिभिस्तथा कोटिहोमंतदर्द्धंवालक्षहोममथापिवा यथावित्ता
नुसारेणतन्न्यूनाधिककल्पना एकविंशतिरात्रंवापक्षंपक्षार्द्धमेववा पंचरात्रंत्रिरात्रंवाहोमकर्मसमाचरेत् दक्षिणांचततोदद्यादाचार्यायकुटुंबिने गणे

शक्षेत्रपालार्कदुर्गाक्षोण्यंगदेवताः तासांप्रीत्यैजपःकार्यःशेषंपूर्ववदाचरेत् ऋत्विग्भ्योदक्षिणांदद्यात्षोडशेभ्यः स्वशक्तितः अद्भुतसागरेगर्गः सावित्र्यालक्षहोमंचशुभैरवविशारदः गांभूमिंचहिरण्यंचधान्यंवस्त्रंतथैवच दद्याच्चगुरवेग्रामंधेनुंवासोयुगंतथा अलंकारैश्चविविधैःप्रीतयेप्रीतमानसः अनेनविधिनाभौममद्भुतंशमयेद्गुरुः एषएवविधिर्ज्ञेयअंतरिक्षाद्भुतेषुच विशेषोत्रतुसावित्र्यादशलक्षंतुहोमयेत् होमंसमाहितमनाः कुर्याच्चघृतकंबलम् धेनूनांद्वादशंदेयंशतनिष्कसमायुतम् गुरवेदीयमानंतुशमयेद्वराद्भुतम् दिव्याद्भुतेषुकर्तव्यः कोटिहोमःसमाहितैः गोसहस्रंचदातव्यंगुरवेदक्षिणाविधौ एषःप्रोक्तोविधिःसम्यग्दिव्यारिष्टविपत्करः कोटिहोमाशक्तौच अल्पफलादिव्योत्पाते अमृताख्या महाशांतिःकर्तव्या अद्भुतसागरे प्रयतस्तेषुसर्वेषुदिव्येष्वद्भुतकेष्वपि महाशांतिंबुधःकुर्यादमृतांविश्वभेषजामिति गर्गोक्तेः अथर्वमुनिश्च अद्भुतेष्वपिसर्वेषुत्रिविधेषुनसंशयः दिव्यांतरिक्षभौमेषु अमृतासंस्मृताबुधैः विष्णुधर्मोत्तरे सर्वोत्पातप्रशमनीअमृताचाभयास्मृता इतिश्रीदिनकरभट्टकृतेशांतिसारेउत्पातशांतयः मदनरत्नेमात्स्ये दिव्यांतरिक्षभौमेषुशांतिरत्राभिधीयते विशेषेणतुभौमेषुशांतिःकार्यातथाभवेत् अभयाचांतरिक्षेषुसौम्यादिव्येषुपार्थिव विजिगीषुःपरान्राजन्भूतिकामश्चयोभवेत् विजिहीर्षुःपरानेवमभियुक्तस्तथापरैः तथाभिचारशंकायांशत्रूणामपिनाशने भयेमहतिवाप्राप्तेअभयाशांतिरिष्यते राजयक्ष्माभिभूतस्यक्षयक्षीणस्यचाप्यथ सौम्यप्रशस्यतेशांतिर्यज्ञकामस्यचाप्यथ अतिवृष्ट्यामनावृष्ट्यांशलभाखुभयेतथा प्रसक्तेषुचचौरेषुवैष्णवीशांतिरिष्यते पशूनांमारकेप्राप्तेनराणामपिदारुणे भूतेषुदृश्यमानेषुरौद्रीशां-

तिस्तत्रेष्यते वेदनाशेसमुत्पन्नेजननाशेचनास्तिके अपूज्यपूजनेजातेब्राह्मीशांतिस्तत्रेष्यते भविष्यत्यभिषेकेच्चपरचक्रभयेषुच स्वराष्ट्रभंगे
भेदेचरौद्रीशांतिःप्रशस्यते त्र्यहातिरिक्तपवनेरूक्षेसर्वदिगुत्थिते वैकृतेष्याधिवातेचवायव्याशांतिरिष्यते अभिशापेभयेप्राप्तेभार्गवीस्यात्त
थैवच जातप्रसववैकृत्येप्राजापत्यामहाभुज उपस्कराणांवैकृत्येत्वाष्ट्रीपार्थिवनंदन अश्वानांशांतिकामस्यतद्विकारेतथोत्थिते अश्वान्कामय-
मानस्यगांधर्वीशांतिरिष्यते गजानांशांतिकामस्यशांतिरांगिरसीमता पिशाचादिभयेजातेनैर्ऋतेनैर्ऋतीस्मृता अपमृत्युभयेजातेदुःस्वप्नेपिम
हाभुज याम्यांतुकारयेच्छांतिंसंप्राप्तेमारकेतथा धननाशेसमुत्पन्नेकौबेरीशांतिरिष्यते वृक्षाणांतुतथार्चानांवैकृतेसमुपस्थिते भूमिकंपे
तथाशांतिंपार्थिवींसंप्रयोजयेत् प्रथमेदिनयामेतुरात्र्यांवामनुजोत्तम प्रथमेयामइतिरात्र्यापिसंबध्यते एवमुत्तरत्रापि हस्तेस्वात्यांचचित्रा-
यामादित्येचाश्विभेतथा आर्यम्णसौम्यजातेषुवायव्येत्वद्भुतेषुच द्वितीयेदिनयामेतुरात्रौचरविनंदन पुष्याग्नेयविशाखासुपित्र्याजभरणीषुच
आजंपूर्वाभाद्रपदाउत्पातायेतथाभाग्येआग्नेयीतेषुकारयेत् भाग्यपूर्वासु तृतीयेदिनयामेतुरात्रौचरविनंदन रोहिण्यांवैष्णवीब्राह्मेवासववैश्वदे
वते ज्येष्ठायांचतथामैत्रेयेभवंत्यद्भुताः क्वचित् ऐंद्रीतेषुप्रयोक्तव्याशांतीरविकुलोद्वह चतुर्थेदिनयामेचरात्रौचरविनंदन सार्पपौष्णेतथार्द्रीया
माहिर्बुध्न्येचवारुणे मूलेचजलदैवत्येयेभवंत्यद्भुतास्तथा वारुणीतेषुकर्तव्यामहाशांतिर्महीक्षिता मित्रमंडलवेलासुयेभवंत्यद्भुताःक्वचित् त
त्रशांतिद्वयंकार्यंनिमित्तेसतिनान्यथा एताःशांतयआथर्वणेप्रसिद्धाः अथविशेषशांतयः तत्रदेवताधिकारेहेमाद्रौगर्गः देवतार्चाःप्रनृत्यंतिवे

पंतिप्रज्वलंतिच आरटंतिचरोदंतिप्रस्विदंतिहसंतिच उत्तिष्ठंतिनिषीदंतिप्रधावंतिधमंतिच भजंतिविकृताश्चेष्टामानुषाणांभयावहाः अवाङ्मुखावातिष्ठंतिस्थानात्स्थानंभ्रमंतिच वमंत्यग्नितथाधूमंस्नेहरक्तेतथावसाम् एवमादीनिदृश्यंतेविकाराःसहजोत्थिताः लिंगायतनचित्रेषुतत्रवासंनरोचयेत् राज्ञोवाव्यसनंतत्रसचदेशोविनश्यति देवयात्रासुचोत्पातान्दृष्ट्वादेशभयंवदेत् देवतार्चाविकारेषुअंतेष्वेवपुरोहितः देवतार्चांतुगत्वावैस्नात्वाह्याच्छाद्यभूषयेत् पूजयेत्तांमहाभागगंधमाल्यान्नसंपदा मधुपर्केणविधिवदुपतिष्ठेदनंतरं तल्लिंगेनचमंत्रेणस्थालीपाकेयथाविधि पुरोधाज्जुहुयाद्धोमसप्तरात्रमतंद्रितः विप्राश्चपूज्यामधुरान्नपानैःसदक्षिणंसप्तदिनंनरेंद्र प्राप्तेष्टमेह्निक्षितिगोप्रदानैःसकांचनैः शांतिमुपैतिपापम् अथाग्निविकारेगर्गः अग्निःप्रदीप्यतेयत्रराष्ट्रेभृशमनिंधनः नदीप्यतेचेंधनवांस्तद्राष्ट्रंपीडयतेनृप प्रासादतोरणद्वारनृपवेश्मसुरालयाः एतेचयत्रदह्यंते तत्रराजभयंवदेत् विद्युतावाप्रदह्यंतेतत्रापिनृपतेर्भयम् अनैशानितमांसिस्युर्धनापांसुरजांसिच धूमश्चानग्निजोयत्रतत्रविंद्यान्महद्भयम् तडिद्विनाभ्रंगगनेभयंस्याद्वृष्टिवर्जिते दिवासतारेगगनेतथैवभयमादिशेत् ग्रहनक्षत्रवैकृत्येताराविकृतिदर्शने पुत्रवाहनदारेषुचतुष्पदगृहेषुच स्वभावाद्वापिहीयेतधेनुवत्सादिकंचयत् लोहायुधविकारःस्यात्तत्रसंग्राममादिशेत् त्रिरात्रोपोषितस्तत्रपुरोधाःसुसमाहितः समिद्भिःक्षीरवृक्षाणांसर्षपैश्चघृतेनच होमंकुर्यादग्निमंत्रैर्ब्राह्मणांश्चैवभोजयेत् दद्यात्सुवर्णंचतथाद्विजेभ्योगांचैववस्त्राणितथाभुवंच एवंकृतेतत्समुपैतिनाशंयदग्निवैकृत्यमघंद्विजेंद्र अथवृक्षोत्पातशांतिः गर्गः पुरेषुयेषुदृश्यंतेपादपादैवचोदिताः रुदंतोवाहसंतोवावमंतोवारसान्भुवि अरोगोवाससरोगो

वानित्यमेवविचारयेत् अरोगोवाविनावातंशाखांमुंचंतिपादपाः पुष्पंजलंतथाकाष्ठंदर्शयंतेचपादपाः पूर्वावस्थांदर्शयंतिफलंपुष्पमनार्तवे क्षीरं स्नेहंसुरांरक्तंमधुतोयंस्रवंतिवा शुष्यंत्यरोगाःसहसाशुष्काःरोहंतिवापुनः उत्तिष्ठंतीहपतिताःपतंतिचतथोत्थिताः तत्रवक्ष्यामितेब्रह्मन्विपाकेफलमेव च रोदनेव्याधिरल्पेतिहसनेदेशविभ्रमः शाखाप्रपतनेकुर्यात्संग्रामंयोधपातनं बालानांमरणंकुर्याद्बालानांफलपुष्पतः स्वरूपभेदंकुरुतेफलपुष्पमनार्तवं क्षीरंसर्वक्षयंगंभीरंस्नेहंदुर्भिक्षलक्षणं वाहनापचयंमद्येरक्तेसंग्राममादिशेत् मधुस्रावेभवेद्व्याधिर्जलस्रावेपावर्षति अरोगशोषणंज्ञेयंब्रह्मन् दुर्भिक्षलक्षणं शुष्केषुसप्ररोहत्सुवीर्यमन्नंमहीपते उत्थानेपतितानांचभयंभेदकरंभवेत् स्थानात्स्थानेतुगमनेदेशभंगंतथादिशेत् जल्पतस्त्वपि चवृक्षेषुत्वनलस्त्वपिधनक्षयं एतत्पूजितवृक्षेषुसर्वराजोपिपच्यते पुष्पैःफलैर्वाविकृतेराज्ञोमृत्युंतथादिशेत् अन्येषुचैववृक्षेषुवृक्षोत्पातेष्वतंद्रितः आच्छादयित्वातंवृक्षंगंधमाल्यैर्विभूषयेत् वृक्षोपरितथाछत्रंकुर्यात्पापप्रशांतये शिवमभ्यर्चयेद्देवंपशुंचास्मैनिवेदयेत् मूलेभ्यइतिवृक्षेषुहुत्वा रुद्रं जपेत्ततः मध्वाज्ययुक्तेनतुपायसेनसंपूज्यविप्रांश्चपशुंचदद्यात् गीतेननृत्येनतथार्चयेत्तंदेवंहरंपापविनाशहेतोः इतिवृक्षोत्पातशांतिः अद्भुतसागरे औशनसे अश्वत्थेपुष्पितेक्षिप्रंब्राह्मणास्तुह्युदुंबरे प्लक्षेवैश्यास्तुपीड्यंतेन्यग्रोधेदस्यवस्तथा कदंबकुसुवंशोवाफुल्लितश्चेत्कथंचन वसंतेपुष्पितेयत्रमापजंबूर्ध्ववस्तथा शृंगवेरोथवायत्रमासैःषड्भिजनक्षयः कुसुमेकुसुमोत्पत्तिःपरचक्रागमंवदेत् औदुम्बराणांसमिधोजुहुयाद्युतंततः महाव्याहृतिभिर्विप्रभोजयेद्दे सदक्षिणां कदलीगर्भसूर्ध्वन्यःप्ररोहंतिगृहेयदि अरण्यंसप्रभवेद्देशोगर्गस्यवचनंयथा सहिरण्यंवृषंदद्याद्द्विजायोदुम्बरीसमित् -

इमारुद्रेतिमंत्रेणहोतव्याचसहस्रधा अथवृष्टिवैकृतशांतिः गर्गः अतिवृष्टिरनावृष्टिदुर्भिक्षायो भयंमतं अनृतौतुदिवानंतावृष्टिर्व्याधिभयायतु अनभ्रवैकृताश्चैवविज्ञेयाराजमृत्यवे अनभ्रवैकृतामेधमंतरेणजातगर्जितादयः शीतोष्णानांविपर्यासेऋतूनांरिपुजंभयम् शोणितंवर्षतेयत्रतत्रशस्त्रभयंभवेत् फलंपुष्पंतथाधान्यंपरिणातिभयायतु पांसुजंतुफलानांचवर्षणेरोगजंभयम् छिद्रंवान्नप्रवर्षेणसस्यानामीतिवर्धनम् विरजस्केरवौव्यभ्रेयदाछायानदृश्यते दृश्यतेतुप्रतीपावातत्रदेशेभयंभवेत् प्रतीपाप्रतिकूलाछायाविपरीतछायेत्यर्थः निरभ्रेवातथारात्रौश्वेतंयाम्योत्तरेणतु इंद्रायुधंतथादृश्याउल्कापाततथैवच दिग्दाहपरिवेषौचगन्धर्वनगरंतथा परचक्रभयंविंद्याद्देशोपद्रवमेवच सूर्येन्दुपर्जन्यसमीरणानां यागस्तुकार्योविधिवद्विजेंद्रैः धान्यानिगोकांचनदक्षिणाश्चदेयाद्विजानामघनाशहेतोः इतिवृष्टिवैकृतशांतिः अथजलाशयवैकृतशांतिः गर्गः नगरादपसर्पन्तेसमीपउपयांतिच नद्योनदप्रस्रवणानिरक्तावैभवंतिवा विवर्णकलुषंतप्तफेनावर्ततुसंकुलम् क्षीरंस्नेहंसुरांरक्तंवहंते व्याकुलोदकं षण्मासाभ्यंतरेतत्रपरचक्रभयंविदुः जलाशयानदंतेचप्रज्वलंतिकथंचन विमुंचंतितथाब्रह्मन्ज्वालाधूमंरजांसिच अरवातेवा जलोत्पत्तिः ससत्वावाजलाशयाः संगीतशब्दादृश्यंतेजनमारभयंविदुः दिव्यंमहाभयंविद्धिमधुमात्रावसेचनं जप्तव्यावारुणामंत्रास्तैश्चहोमोजलंभवेत् मध्वाज्ययुक्तंपरमान्नमत्रदेयंद्विजानामथभोजनार्थम् गावश्चदेयाःसितवस्त्रयुक्तास्तथोदकुंभाःसकलाघशांत्यै इतिजलाशवैकृतशांतिः अथोपस्करवैकृतशांतिः गर्गः यांतियानान्ययुक्तानियुक्तान्यपिनयांतिचेत् चोद्यमानानितत्रस्यान्महद्भयमुपस्थितम् वाद्यमा

नानवाद्यंतेवाद्यंतेवाप्यनाहताः अचलाश्चचलंत्येवनचलाश्चचलतिच आकाशतूर्यनादश्चगीतगंधर्वनिस्वनः काष्ठदर्वीकुठारादिविकारंकुरुतेयदि गपलंमूलसंघाश्चस्त्रियस्त्रीवापिधातये उपकारादिर्वैकृतौघोरशस्त्रभयंभवेत् वायोस्तुपूजांद्विजसक्तुभिश्चकृत्वानियुक्तांश्चजपेच्चमंत्रान् दद्यात्मभूतंपरमान्नमत्रसदक्षिणंतेनशमोऽस्यभूयात् इत्युपस्करवैकृतिशांतिः अथमृगपक्षिवैकृतशांतिः गर्गः प्रविशंतियदाग्रामानारण्यामृगपक्षिणः अरण्यंयांतिवाग्राम्याः स्थलंयांतिजलोद्भवाः स्थलजावाजलंयांतिघोरावाशांतिनिर्भयाः राजद्वारेपुरद्वारेशिवाश्चाप्यशिवप्रदाः दिवारात्रिचरावापिरात्रौवापिदिवाचराः ग्रामांस्त्यजंतिग्रामंवाशून्यतांतस्यानर्दिशेत् दीप्तंवासंतिसंध्यासुमंडलानिचकुर्वते वासंतेविस्वरंयत्रतदाप्येतत्फलंलभेत् प्रदोषेकुक्कुटोवासेद्धूमंतेवापिकोकिलः अर्कोदयेकोभिमुखीशिवावापिभयंदिशेत् गृहेकपोतःप्रविशेत्क्रव्यादोमूर्ध्निलीयते मधुवामक्षिकाकुर्यान्मृत्युर्गृहपतेर्भवेत् क्रव्यादोगृध्रकाकादिः प्राकारद्वारगेहेषुतोरणापणवीथिषु केचिच्छत्रायुधाद्येषुक्रव्यादःसंश्रयेद्यदि जायतेवाथवल्मीकोमधुवादृश्यतेयदि सदेशोनाशमायातिराजावाम्रियतेतदा मूषिकाःशलभान्दृष्ट्वाप्रभूतक्षुद्भयंवदेत् काष्ठान्मूकास्थिभृंगाःस्याश्वानेमरकवेदना दुर्भिक्षवेदिनोज्ञेयाःकाकाधान्यमुषोयदि जनानभिभवंतश्चनिर्भयारण्यवेदनाः काकोमैथुनयुक्तश्चेच्छ्रुतःसयदिदृश्यते राजावाम्रियतेतत्रसदेशोवाविनश्यति उलूकोवासतेयत्रनिपतेद्वातथागृहे क्षयोगृहपतेर्मृत्युर्धननाशस्तथैवच वासतेकुशब्दंकरोति मृगपक्षिविकारेषुकुर्याद्धोमंप्रदक्षिणम् देवाःकपोतइतिचजसव्यंपंचभिर्द्विजैः वसुदेवान्निवेकेतद्दयागावश्चदक्षिणाः जपेच्छकुंतसूक्तंचसनोवेदशिरांसिच गावश्चदेयाविधिवद्द्वि

जानांसकांचनावस्त्रसुगोत्तरीयाः एवंकृतेशांतिमुपैतिपापंमृगैर्द्विजैर्वाविनिवेदितंयत् इतिमृगपक्षिवैकृतशांतिः अद्भुतसागरेनारदः मध्याह्नेचार्द्धरात्रेचउदयेऽस्तमयेऽथवा ग्राममध्येयदाविप्रफत्कारंकुरुतेसदा ग्रामोत्सादोभवेत्तत्रराज्ञोमरणमादिशेत् जुहुयात्पंचसाहस्रंजातवेदसमंत्रवित् धेनुंचदक्षिणांदद्यात्सुवर्णंधान्यमेववा अस्मिन्नाशुकृतेशांतिः शुभंग्रामस्यवैभवेत् अथाकस्मिकप्रासादपतनशांतिः गर्गः प्रासादतोरणाट्टालद्वारप्राकारवेश्मनाम् अनिमित्तंतुपतनंदृढानांराजमृत्यवे रजसावाथधूमेनदिशोयत्रसमाकुलाः आदित्यचंद्रताराश्चविवर्णाभयवृद्धये राक्षसायत्रदृश्यंतेब्राह्मणाश्चविधर्मिणः ऋतवश्चविपर्यस्ताअपूज्यंपूजयेज्जनः नक्षत्राणिवियोगानितन्महद्भयलक्षणम् केतूदयोपरागौचच्छिद्रंवाशशिसूर्ययोः ग्रहर्क्षविकृतिर्यत्रतत्रापिभयमादिशेत् स्त्रियश्चकलहायंतेबालान्निघ्नंतिबालकान् क्रियाणामुचितानांचविच्छित्तिर्यत्रदृश्यते अग्निर्यत्रनदृश्येतधूमयानोऽथशाम्यति क्रव्यादावायसावाहायांतिचोत्तरतस्तथा पूर्णकुंभाःस्रवंतेचवह्निर्वाविप्रलुप्यते मंगल्यध्वनयोयत्रनश्रूयंतेसमंततः क्षवथुर्वाधतेवाथप्रोत्साहेसतिनार्दितः नैदैवतेषुवर्तन्तेयथावद्ब्राह्मणेषुच मंदघोषाणिवाद्यानिवाद्यंतेविस्वराणिच गुरुमित्रद्विषोयत्रशत्रुपूजारताजनाः ब्राह्मणान्सुहृदोमान्यान्जनोयत्रावमन्यते शांतिमंगलहोमेषुनास्तिक्यंयत्रमन्यते राजावाम्रियतेतत्राथवादेशोविनश्यति राज्ञोविनाशेसंप्राप्तेनिमित्तानिनिबोधमे ब्राह्मणान्प्रथमंद्वेष्टिब्राह्मणांश्चविनिंदति ब्राह्मणस्वानिवादत्तेब्राह्मणांश्चजिघांसति नतान्स्मरतिकृत्येषुयाचिताश्चान्वसूयति रमतेनिंदयावैषांप्रशंसांनाभिनंदति अपूर्वंतुकरंलोभात्तथापातयतेजने एतेष्वभ्यर्चयेत्सम्यक्सपत्नीकान्द्विजोत्तमान् भोज्यानिचैवकार्याणि

सुराणांबलयस्तथा गावश्चदेयाद्द्विजपुंगवेभ्योभुवंतथाकांचनमंबराणि होमश्चकार्योद्विजपूजनंचएवंकृतेशांतिमुपैतिपापम् मयूरचित्रे य
दाकटकटायंतेभवनान्यायुधानिच मासाभ्यंतरमात्रेणतदासंग्राममादिशेत् दिव्यावैकादशीशांतिःकरणीयाविपश्चिता अथनानोत्पातशांति गर्गः
औत्पातिकींमहाशांतिंतत्त्वतःशृणुमेऽधुना यत्रव्याधिरनावृष्टिःपरचक्रमुपस्थितम् दुर्भिक्षंजनमारोवाराज्ञोमरणमेववा तत्रशांतिक्रमःप्रोक्तोम
हाक्रतुमिहारभेत् पुनर्होमश्चकर्तव्योबृहस्पतिमतंयथा गावस्तथैवदातव्यास्तथैवायुर्विवर्धनीः राज्ञोभिषेकंकुर्वीतथैवचसऋत्विजः त्रिरा
त्रसप्तरात्रंवाउपोष्यचपुरोहितः औदुंबरीणांविधिवत्समिधांचशतंदहेत् सावित्र्याकारयेत्कर्मततःपापंप्रशाम्यति अत्युष्णमतिशीतंच अतिवर्षम
नूदकम् आनर्तवंपुष्पफलमतिमात्रंचमारुतः भैरवंचातिमात्रंचरुदंतिमृगपक्षिणा विद्युत्स्तनितनिर्घोषमनभ्रेवातिवर्षणम् सिंहव्याघ्रस्येतराणां
दर्शनंचचतुष्पथे ईदृशैर्लक्षणोत्पातैर्विनाशमभिलक्षयेत् अन्योत्रजायतेराजातथाचान्यःपुरोहितः तत्रशांतिंप्रवक्ष्यामिपापप्रशमनींशुभाम्
औदुंबरीणांसमिधांशतमष्टोत्तरंदहेत् सहक्षीरघृताक्तानांमहत्सूक्तगणैःशुभैः हुत्वाशतसहस्त्रंतुपरांशांतिमवाप्नुयात् यमलानिचजायंतेशुभा
निनीचवाहनाः मुंडवक्रमुखश्चैवकुटाश्चकुणपास्तथा अमानुषामानुषाणांगजानांमृगपक्षिणाम् जायंतेउपरिदंतावैअश्वाश्चाविकृताननाः ब
हुशीर्षमशीर्षंवाबहुवर्णमवर्णकम् एकशृंगमशृंगंवाचतुर्भुजमथाभुजं दीर्घकर्णमकर्णंवागजकर्णमुखंतथा व्यालव्याघ्रमुखाकारंबिडालमुखमु
न्नतम् ईदृशानिस्वरूपाणिदृश्यंतेयत्रगौतम तत्रसंग्रामतोभूयाद्भयंक्षयकरंमहत् जनक्षयंचपौराणांराज्ञःश्रेणिवधंतथा तत्रशांतिंप्रवक्ष्यामिसर्व

पापप्रणाशिनीं खदिराश्वत्थसमिधांसहस्राष्टोत्तरं दहेत् विरूपाक्षेणमंत्रेणविधिवत्सुसमाहितः विरूपाक्षेण अग्निर्मूर्द्धेत्यादिना तत्रहिविरूपाक्षऋ
षिः दद्याच्चकपिलांधेनुंहुतांतेशांतिमिच्छता ततस्तच्छाम्यतेपापंजातवेदोवचोयथा यत्राकार्याणिकार्यान्तेअदंड्येदंडपातनं अपूज्याश्चैवपूज्यंते
मान्यांश्चैवावमन्यते अनड्वांश्चपिबेद्धेनुंचानड्वाहंपिबेद्यदि विधुनोतिचगौर्वत्सं प्रजातंनाभिनंदति प्रजातंवत्संगौरितिशेषः मैथुनंविपरीतंच अकालेमृ
गपक्षिणाम् ब्राह्मणाभिन्नमर्यादानतिष्ठंतिस्वकर्मसु ईदृशैर्लक्षणोत्पातैर्विन्द्याद्देशस्यविभ्रमम् कलहंजायतेघोरंदुर्भिक्षंजनमारकम् राजामात्य
विनाशंचपौराणांचमहद्भयम् तत्रशांतिंप्रवक्ष्यामिसर्वपापप्रणाशिनीम् प्रज्वाल्यश्वत्थसमिधःकृत्वासस्तरणंमहत् औदुंबरीणांसमिधांसहस्राष्टो
त्तरंबुधः जुहुयाद्विधिवद्वह्नौपरांशांतिमभीप्सता दासीदाससमायुक्तंगृहंदद्याद्द्विजातये ततःप्रशाम्यतेपापंवसिष्ठस्यवचोयथा कृष्णपिपीलिका
यत्रग्रामेषुनगरेषुच दृश्यंतेह्यतिमात्रचेदूर्ध्वंशकृतालयाः शांतिगृहेदेवगृहेतथाचनृपतेर्गृहे उपर्युपरिमात्रंतुदृश्यंतेवेश्मनस्तदा मक्षिकाम
शकादंशाअतिमात्रभयावहाः ईदृशैर्लक्षणोत्पातैर्महाचोरभयंभवेत् द्रव्याणांहरणंब्रूयात्परचक्रस्यचागमं तत्रशांतिंप्रवक्ष्यामिविश्वामित्रोपद
र्शिताम् अश्वत्थसमिधश्चैवहुत्वाचाष्टोत्तरंशतम् पूर्णपात्राणिवैदद्याद्धुतांतेभूरिदक्षिणाम् दासीदाससमायुक्तंगृहंदद्याद्द्विजातये तिल
पात्रंप्रदातव्यंतिलान्जुह्वीतसंयतः अनग्निर्ज्वलतेयत्रविधूमेधूमदर्शनं अलयुक्तमयुक्तंवापुरंप्रविशतेतदा बालैःसहकुमारश्चकलहंयत्रकु
र्वते कलहंब्राह्मणानांचसेनापतिपरिग्रहं गवाद्यानांभवेन्नित्यंयथाघोषनिवासिनां श्रेष्ठिनांसार्थवाहानांकलहोयत्रजायते राजामात्यविना-

शंचपौराणांचमहद्भयं तत्रशांतिंप्रवक्ष्यामिपितामहवचोयथा पालाशसमिधश्चाग्नौसहस्राष्टोत्तरंदहेत् ब्राह्मणान्भोजयेत्तत्रपरमान्नेनशांतये प्राकारेनगरेद्वारगोपुराट्टालकेषुच रथ्याचतुष्पथेचैवदेवतायतनेषुच निवासंयत्रकुर्वंतिवकाःकाकाश्चकौशिकाः गृध्राःपरभृतश्चैवआरण्यामृगपक्षिणः निरूहेत्कलहंघोरंसिद्धानांवचनंयथा निरूहेत्तर्कयेत् तत्रशांतिंप्रवक्ष्यामिनारदेनोपलक्षितां अश्वत्थसमिधानांतुघृताक्तानांविभावसौ वायव्येनहमंत्रेणनिवेद्यंचसुशोभितम् ततस्तुशाम्यतेपापंनारदस्यवचोयथा मृतःश्मशानंयोनीतउपजीवतिमानवः गृहेयस्यप्रविष्टोसौतिष्ठेदथकदाचन अचिरान्मृत्युमायातिहृतमन्त्रपरिग्रहः सावित्र्याष्टसहस्रेणक्षीरशांतिंचकारयेत् क्षीरशांतिश्चरक्तानामेकवर्णानामित्यादिनावक्ष्यमाणा कापिलांतिलकांस्यचहुतांतेभूरिदक्षिणाम् ततस्तच्छाम्यतेपापंधर्मराजमतंयथा श्वाशृगालोथवागृध्रः काकोवायदिमानुषः श्मशानान्मांसमादायपुरमध्येप्रवेशयेत् नगरंपत्तनंवापिग्रामंवायदिवागृहम् अचिरेणैवकालेनतत्श्मशानंभविष्यति चौरमंडलपातंतुपरचक्रस्यचागमम् अनारोग्यमनावृष्टिदुर्भिक्षंजनमारकम् संग्रामशस्त्रसंघातंक्षिप्रमेवविनिर्दिशेत् तत्रशांतिंप्रवक्ष्यामियथापापंप्रशाम्यति अश्वत्थसमिधोगृह्यतिलांश्चमधुसंयुतान् विरूपाक्षेणमंत्रेणविरूपाक्षान्सशोणितान् तिलपात्रोपहारंचक्षीरशांतिंचकारयेत् ततश्चशाम्यतेपापंप्रजापतिमतंयथा सौत्रामणीपाकयज्ञःपशुबंधस्तथैवच क्रतवश्चप्रवर्तन्तेअनधीत्यक्रतोदयाः यस्मिंस्तथाप्रवर्त्तंतेक्रोधलोभभयादपि अदत्वादक्षिणांसम्यङ्महदुत्पातलक्षणम् अनारोग्यमनावृष्टिदुर्भिक्षंजनमारकम् ज्वरःकासस्तथाश्वासकच्छूदद्रुविकोष्ठिकाः शिरोरोगोक्षिरोगाश्चपांडुरोगो

गलग्रहः आधयश्चप्रवर्त्तन्तेदुर्दृष्टैः स्वल्पलक्षणैः तत्रशांतिंप्रवक्ष्यामिबृहस्पतिमतंयथा त्रिरात्रोपोषितोभूत्वाहविष्याशीःपुरोहितः सक्षीराणांघृताक्तानांसमिधानांशतंदहेत् पलाशस्योक्तिविशेषः ततस्तच्छाम्यतेपापंबृहस्पतिमतंयथा इतिनानोत्पातशांतिः अथजनमारीशांतिः हेमाद्रौगर्गः रुद्रप्रकोपजोयस्माज्जनमारःप्रवर्तते तस्मात्प्रसादयेद्यत्नाद्देवदेवंमहेश्वरम् गाणपत्येनविधिनाअथर्वशिरसातथा यामलेनविधानेनकुर्याद्देवप्रसाधनम् शिवसूक्तमुमासूक्तंजपेच्चशतरुद्रियम् बल्योपहारान्विविधाश्चत्वरेषुनिवेदयेत् आवाहयित्वासगणंरुद्रंरात्रावहस्सुच ब्राह्मणान्भक्ष्यभोज्यैश्चदक्षिणाभिश्चतोषयेत् प्रसादितेततोरुद्रेजनमारोनिवर्तते उपोषितोनृपःस्नातः शुक्लवस्त्रःसमाहितः आत्मरक्षांस्वयंकृत्वाततःशांतिंप्रयोजयेत् इतिजनमारीशांतिः हेमाद्रौमदनरत्नेनृसिंहपुराणे अनावृष्टिमहामारीज्वररोगभयेतथा नरसिंहं समाराध्यब्राह्मणैर्वेदपारगैः कारयेल्लक्षहोमंतुग्रामेयश्चनराधिपः नृसिंहमंत्रेणहोमः सुश्रुते स्थानत्यागाज्जपाद्धोमान्महामारीप्रशाम्यति आथर्वणेतुरौद्रीशांतिरुक्ता अथरविच्छिद्रशांतिः अद्भुतसागरेमयूरचित्रे तिलैर्दूर्वादिभिश्चैवपत्रैश्चैवयवैस्तथा धान्यैरौदुंबरीभिश्चश्रीफलैराहुतिक्रिया समासोभोजनंकृत्वानटप्रेक्षणमादिशेत् व्योममध्यगतंपश्येद्यदिसूर्यद्वयंनरः दधिक्षौद्रघृताक्तानांजुहुयादयुतंशुचिः उपोष्यार्कस्यसमिधोधेनुंदद्याद्द्विजातये अथापर्वग्रहणेशांतिः तत्रैव अपर्वणिशशांकार्कौक्लिष्टोनाममहाग्रहः आवृणोतितमःश्यामःसर्वलोकविपत्तये औदुंबरीःसहस्राणिचाष्टौचजुहुयाद्बुधः मध्वक्तानिचतान्यत्रजातवेदसमंत्रवित् विप्रायदक्षिणांदद्याद्धेनुंचवृषभंतथा अथ

हस्तिनोकालमदेशांतिः ऊर्ध्वंविंशतिवर्षात्तुमदोभवतिवारणे तदर्वाग्यदिमाद्येतस्वामिनोमरणंदिशेत् अद्भुतसागरे कारयेत्तत्रशांतिंचब्रा
ह्मणांश्चापितर्पयेत् स्नानंपूर्वंनरेंद्राणांयथावदभिधीयते एकरात्रोषितःस्नात्वाप्रियःप्रयतमानसः अष्टोत्तरसहस्रंतुमंत्रस्यापिजपेच्छुचिः त
तोजपितमंत्रैस्तुसलिलंचाभिमंत्रयेत् गजानांगजतत्त्वज्ञः सर्वदोषहरंशुभं गजस्नानंप्रकुर्वीततद्दिनेतूर्यनिःस्वनैः पूर्वाह्णेचाग्निकार्यंतुकृत्वाकुंभ
शतेनहि ततोहोमंप्रकुर्वीतविधिदृष्टेनहोमवित् अग्नयेस्वाहा रुद्रायस्वाहा गणपतयेस्वाहा वरुणायस्वाहा बृहस्पतयेस्वाहा शुक्राय० इंद्राय०
ततःस्नानंप्रकुर्वीतमंत्रेणानेनचारभेत् स्नानंकुंभशतेनेहसर्वोपद्रवनाशनम् अमदोमदेनसहितोवर्धितजातश्चभवतिजातः द्विजभोजनपूर्वं
स्यारपललंगुडमिश्रितंततःकृत्वा यवयावकसंयुक्तंपिंडंमधुनाथपूजयेद्बहुशः कृतपूजासंस्कारंगणाधिपंवंदयेत्तूर्णम् नैवेद्यमंत्रः ईश्वर-
स्यमहासंध्यमम्ललालाटसंभवम् इदंकृतोपनीतंतुनैवेद्यंभक्षयस्वनः अथहस्तिनीधेनुमदशांतिः अद्भुतसागरेराजपुत्रः मदंयदातुसु
रभीविसृजेत्सूतिमेवच औत्पातिकंतदाविंद्याद्भूपैरेतैर्महीपते पुरेराष्ट्रेवनेवापिगृहेवाहस्तिनीयदि मत्तामूत्रपुरीषाणियदासंघ्रायतिष्ठति त
दापुरेचराष्ट्रेचभवेद्घोरंमहद्भयं मत्तयाभज्यतेयुद्धेहस्तिन्यायदिवारणः महद्भयंतत्रभवेद्देशस्यनगरस्यच संघ्रायनिपतेन्नागंमत्तायत्रचधे-
नुका तदानाशंविजानीयाद्धान्यस्यचधनस्यच अस्मिन्नौत्पातिकेशांतिमिमांकुर्यान्नराधिपः उपोष्यबांधवैस्तत्रसामात्यःसपुरोहितः ततोपिवि-
धिवच्चैवधेनुकांतांनवर्तयेत् हस्तिवत्कल्पितांतांतुविषाणाभ्यांचयोजितां नीराजयित्वातांरात्रौधेनुकांकृतकौतुकाः अथैनांहस्तिनींनी-

त्वाशत्रुराष्ट्रेविमोक्षयेत् इत्येवमेनांकुर्वीतिरात्रौवननिवासिनीम् तांविशिष्टबलिंहोमानुपचारांश्चकारयेत् अन्यैश्चपेशलैर्विप्रान्दक्षिणाभिश्चतोषयेत् अथवापूर्ववत्कृत्वाशांतिंकृत्याकदृव्यम् सुवर्णेनसुतस्तेनवनमेवप्रधावयेत् नागदंतभंगफलंविस्तरभीतेनोच्यते अथाश्वदंष्ट्रभंगादिशांतिः मदनरत्नेशालिहोत्रे दंष्ट्राश्चतस्योभज्यंतेयुगपद्यस्यवाजिनः सामान्यस्यसराष्ट्रस्यराज्ञस्तत्रभयंदिशेत् पतनेत्वेषएवंस्याद्दोषःस्पष्टतरस्ततः सुवर्णगोप्रदानैश्चद्विजानांतर्पणेनच शांतिपुण्याहघोषैश्चशमयेदशुभंतथा अथलिंगादिभंगे अद्भुतसागरेनारदः अत्रदेवकुलेवज्रंपतेद्भूयोथवापुनः कंकोथपततेचैवचूडायामग्निदर्शनम् लिंगंवाभिद्यतेयत्रकंपतेचानिमित्ततः चूडाभंगोभवेद्यत्रप्रतिमाभिद्यतेयदा ग्रामोत्सादोभवेत्तत्रस्वामिनोमरणंदिशेत् तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभम् कुंडंकृत्वाविधानेनततोहोमंसमाचरेत् चरुंचयमदैवत्यंसाधयित्वाविधानतः सुसुवर्णेनहस्तेनततःकर्मसमारभेत् अष्टोत्तरशतंजुहुयाद्धृताक्तसमिधांततः माषैर्मुद्गैस्तिलैश्चैवघृतेनमधुनासह एभिःपंचसहस्राणिशक्तिबीजेनहोमयेत् होमांतेतर्पयेद्विप्रान्दक्षिणाभोजनादिभिः भूमिंधेनुमनड्वाहं स्वर्णंधान्यंसदक्षिणम् पंचगव्यंततःकृत्वास्नायाद्देवालयेद्विजः बलिंदत्वाविधानेनकृसरैःपायसैस्तथा ईशानंस्थापयेत्तत्रबलिंदत्वाविधानतः एवंकृत्वाविधानंतुकृतकृत्योभवेन्नरः मंडपस्यतथाभित्तिश्चूडादेवकुलस्यच अकस्मान्निपतेद्यत्रकंपतेवानिमित्ततः दधिक्षौद्रघृताक्तानामश्वत्थसमिधांततः जुहुयादष्टशतंप्राज्ञइमारुद्रेतिमंत्रवित् धेनुंचदक्षिणांदद्यात्तिलपात्रंसकांचनं इतिलिंगादिभंगेशान्तिः

अथदुःस्वप्नशांतिंवक्तुंस्वप्नदर्शनविधिस्तत्फलानिचोच्यंते अद्भुतसागरेपराशरः दुकूलमुक्तामणिभिर्नरेन्द्रः सामंतदैवज्ञपुरोहिताश्च तद्देवतागारमनुप्रविश्यप्रवेशतस्तत्रदिगीश्वरंच अभ्यर्च्यमंत्रैस्तुपुरोहितस्तुसंयम्यतस्यांभुविसंयतात्मा ब्राह्मीशपूर्वामयभागपुष्पंकृत्वोपधानं शिरसिक्षितीशः तथैकभुग्दक्षिणपार्श्वशायीस्वप्नंपरीक्षेतयथोपदेशं नमःशंभोत्रिनेत्रायरुद्रायवरदायच वामनायविरूपायस्वप्नाधिपतयेनमः भगवन्देवदेवेशशूलभृद्वृषवाहन इष्टानिष्टेममाचक्ष्वस्वप्नेसुप्तस्यशाश्वतः एकवस्त्रःकुशास्तीर्णेसुप्तःप्रयतमानसः निशांतेपश्यतेस्वप्नंशुभंवायदिवाऽशुभं सत्याचार्यः आयुस्तृतीयभागेशेषपतितःप्रकीर्तितःस्वप्नः पित्ताधिकेकांचनरत्नमाल्यदिवाकराग्निज्वलनानिपश्येत् श्लेष्माधिकश्चंद्रभशुक्लपुष्पसरित्सरोंभोनिधिलंघनानि यदन्यमध्यप्रथमेनिशांतेप्रावृट्शरन्माधवसंज्ञितेवा कालेमरुत्पित्तकफप्रकोपःसाधारणंस्याद्बहलसन्निपातात् दृष्टश्रुतानुभूतंचप्रार्थितंकथितंतथा भावितंदोषजंचैवस्वप्नंसप्तविधंविदुः तत्रपंचविधंपूर्वमफलंभिषगादिशेत् तत्रशुभस्वप्नमाहपराशरः स्वांगप्रज्वलनंपरोपशमनंशक्रध्वजालिंगनंछत्रसंयुक्तोपिनरैर्विपत्यचविपत्प्रक्षेपणादिस्तुच बुद्धोवाभिगडैर्यसेच्चदहनंनारीक्षितोबाहुनाछत्रंवाहिरदादिरोहणविधौदिव्योपिचब्राह्मणः १ दिनकरशशिताराभक्षणस्पर्शनानिविशरणमपिमूर्ध्नःसप्तपंचत्रिधावा वृषभगृहनरेंद्रश्वेतसिंहाधिरोहाग्र्यसनमुदधिभूमौभूमिराज्यप्रदानि २ विपुलरणविमर्दद्यूतवादेजयश्चपशुमृगमनुजानांलब्धिरध्यासनंवा विवसनपरिलोपोगम्यनारीगमोवास्वमरणशिखिलाभः सस्यसंदर्शनंच ३ सितसुरभिमनोज्ञालेपमाल्यांबराणांद्विजसुरगुरुराज्ञांदर्शनं

स्याशिषश्च मणिसुजतसुवर्णभोजपात्रेषु भुंक्ते घृतदधिपरमान्नंसर्वमेतच्छुभंच ४ योगयात्रायांवराहः वृश्चिकादिदशनमणिरत्नकांचनप्रदीपकिशोरवत्सहंसशशादयोर्भकलाभः पुत्रलाभाय पराशरः श्वेतसूक्ष्मविरक्तप्रशस्ताहतवसनस्रृंगारव्यजनासितचामरध्वजाभयाद्दिरदपायसद्दधिप्राशस्तासितकुसुमनवसस्यलाभोर्थलाभाय वृहद्यात्रायांवराहः शैलप्रासादनागाश्ववृषभारोहणंहितं चंद्रतारार्कग्रसनंपरिस्मार्गणाएवन. भूम्यंबुधीनांग्रसनंशत्रूणांचवधक्रिया जयोविवाहद्यूतेषुसंग्रामेषुतथाजयः भक्षणंचैवमांसानांमत्स्यानांपयसस्तथा दर्शनंरुधिरस्यापिस्नानंवारुधिरस्यच सुरारुधिरमद्यानांपानंक्षीरस्यपायसः अन्त्रैववेष्टितभूमौनिर्मलंगगनंतथा प्रुखेनदोहनंशस्तंमहिषीणांतथागवाम् सिंहीनांहस्तिनीनांचवडवानांतथैवच प्रसादोदेवविप्रेभ्योगुरुभ्यश्चतथाशुभः अंभसात्वभिषेकश्चज्ञेयंराज्यप्रदंहितत् राष्ट्रेभिषेकश्चतथा छेदनंशिरसोपिच मरणंवह्निलाभश्चवह्निदाहोगृहादिषु तथोदकानांतरणंतथाविषमलंघनं हस्तिनीवडवानांचगवांचप्रसवोगृहे आरोहणंगजेंद्राणांरोदनंचतथाशुभम् परस्त्रीणांतथालाभस्तथालिंगनमेवच निगडैर्बन्धनंचैवतथाविष्टानुलेपनं जीवानांभूमिपालानांसुहृदामपिदर्शनम् शुभान्येतानिप्रोक्तानिराज्यलाभकराणिच विष्णुधर्मोत्तरे एकस्यांयदिवारात्रौशुभंवायदिवाशुभम् पश्चाद्दृश्येतयत्तच्चतस्यपाकंविनिर्दिशेत् तस्माच्छुशोभनःस्वप्नोपश्चाज्ज्ञेयोनसंशयः अथदुःस्वप्नम् विष्णुपुराणेमत्स्यपुराणेच मलिनांबरधारित्वमभ्यंगंपंकदिग्धता उच्चात्प्रपनंचैवदोलारोहणमेवच शक्रध्वजस्यपतनंपतनंशशिसूर्ययोः देवद्विजादिभूपानांप्रजानांक्रोधएवच आलिंगनंकुमारीणांप्राणिनां-

चैवमैथुनं हानिश्चैवस्वगात्राणांवीरकंठमनप्रिया दक्षिणाशाभिगमनंव्याधिर्नाभिभवस्तथा फलापहारश्चतथाशाड्वलानांविशोधनं ग्रहाणां चैवभंगश्चग्रहसंमार्जनंतथा क्रीडापिशाचकव्याद्वानराश्चतरैरपि काषायवस्त्रधारित्वंतद्वत्क्रीडनकेतथा स्नेहपानावगाहौचरक्तंमाल्यानुलेपनम् एवमादीनिचान्यानिदुःस्वप्नानिविनिर्दिशेत् पाराशरः कायस्यालेपनंवाकलुषजलमसीगोमयस्नेहपंकैर्हृग्जिह्वादंतबाहुप्रपतनमथवानर्थशोकप्रदानि गीतक्रीडितभूषितप्रहसितप्रेताः पिशाचास्तथावार्केन्द्रध्वजतारकानिपतनंविघ्नस्यहेतोस्ततः बृहद्यात्रायांवराहः हरिणारोहेभ्रमणंमृत्युर्नचिरेणसूकरारोहे उष्ट्रारोहेव्याधिर्वृद्धिःस्यात्कुंजरारोहे मार्कण्डेयः वात्यांमूत्रपुरीषंतुसुवर्णंरजतंतथा प्रत्यक्षमथवास्वप्नेजीवेतदशमासिकम् पराशरः रक्तगंधप्रलिप्तांगोरक्तमाल्योपशोभितः तैलाभ्यक्तोतिपीतश्चमुंडितोरक्तवस्त्रधृक् खरमारुह्यवेगेनदक्षिणांदिशमाव्रजेत् स्वात्माचदृश्यतेस्वप्नेसयातियममंदिरम् मार्कण्डेयः करालैर्विकटैःकृष्णैःपुरुषैरुद्यतायुधैः पाषाणैस्ताड्यतेस्वप्नेसद्योमृत्युर्भवेन्नरः कलावत्याम् लोहदंडयुतंकृष्णंनरंकृष्णपरिच्छदं स्वप्नेचपार्श्वतोदृष्ट्वात्रिरात्रान्मृत्युमादिशेत् देवलः रक्तगंधांबरस्रग्वीगच्छेद्वादक्षिणामुखः खरोष्ट्रमहिषारोहेत्रिमासान्नाभिजीवति मार्कण्डेयः केशांगारंतथाभस्मउरगंनिजलांनदीम् दृष्ट्वास्वप्नेदशाहात्तुमृत्युरेकादशेदिने वायुलिंगपुराणयोः मुक्तकेशोहसंश्चैवगायंतंनृत्यतेनरः याम्यांदिशमथोगच्छेत्तदंतंतस्यजीवितं मार्कंडेयः रक्तकृष्णांबरधरागायंतीचहसंतिच दक्षिणाशांनयेन्नारीस्वप्नेसोपिनजीवति यस्तुप्रावरणंशुक्लंस्वप्नेपश्यतिमानवः कृष्णरक्त

मपिस्वप्नेतस्यमृत्युरुपस्थितः देवलः श्वभ्रेयोनिपतेत्स्वप्नेद्वारंचास्यपिधीयते नचोत्तिष्ठतियत्तस्मात्तदंतंतस्यजीवितम् अयोध्याकांडेभरतः
दृष्टोमयाद्यस्वप्नेवैचंद्रमाःपतितःक्षितौ सीदंतंचतयाद्राक्षंपंकेमग्नंमहागजं विशीर्यमाणःशैलेंद्रोभग्नश्चात्रमहाद्रुमा स्वप्नेचाद्यमयादृष्टोनिपतं
श्चमहाध्वजाः सुंदरकांडेत्रिजटास्वप्नाः कंठेबद्ध्वादशग्रीवंप्रमदारक्तवासिनी कालीकमलपत्राक्षीदिशंयाम्यांप्रकर्षति लंकाचेयंपुरीकृत्स्नास-
वाजिरथकुंजरा सागरेपतितादृष्टामयासपुरतोरणा नंदिपुराणेत्रिपु[illegible] प्रया[illegible]हृष्टः स्वप्नांतेपिनाकीक्रोधमूर्च्छितः उदरेउस्यपुरीकृत्स्नावि
वेशयतिवेगतः पराशरः शुभाशुभस्वप्नविचारमुक्तमावदा[illegible]तंकंच[illegible]ष्टेकाम[illegible] देशादिवर्णाकृतिसंपदश्चतत्तत्फलंसंपरिकल्पयेच्च पाद-
द्विपादोत्तरपादवृद्ध्यावर्षार्धमासत्रयमासकालाः निशाविभागेषुच[illegible]न्यशां[illegible] अनिष्टेष्टफलप्रदाःस्युः वराहः आद्येवर्षाद्वत्सरार्धाद्द्विती
येपाकोवर्षार्धार्धभागेतृतीये मासात्पाकःशर्वरीपश्चिमांतेदुष्टादुष्टस्येत्युक्त[illegible]सः मात्स्यविष्णुधर्मोत्तरयोः स्वप्नस्तुप्रथमेयामेसंवत्स
रफलोभवेत् षड्भिर्मासैर्द्वितीयामेचत्रिभिर्मासैस्त्रियामकः चतुर्थेमास[illegible]फलंभवतिनान्यथा अथदुःस्वप्नशांतिः मात्स्ये स्तुतिश्चवासुदेव
स्यतथातस्यचपूजनम् नागेंद्रमोक्षश्रवणंज्ञेयंदुःस्वप्ननाशनम् पराशरः देवद्विजाग्निप्रतिपूजनानिमंत्रोपवासादिपवित्रमेव तिलैश्चगोभूमि
हिरण्यदानंदुःस्वप्नसंदर्शननाशनानि अथांबुसंस्पर्शनमंत्रहोमतिलप्रदानंतपनंचभूयः शांतिर्जपोहोमतथान्नदानंदुःस्वप्नहंतृणिपयश्चगांगम्
तिलानामघृतंतत्रजुहुयात्तुसमाहितः तिलोसीतीतिमंत्रेणधेनुंदद्यात्सदक्षिणां ब्राह्मणांस्तर्पयेत्तत्रदक्षिणाभोजनादिना दानंचविविधंदेयमस्तु

भानांविनाशनम् षड्भिर्मासैस्तुसंपूर्णैरन्यथामरणंभवेत् अत्रलक्षहोमश्चंडिकापाठादिशांतिरपिकार्या शौनकः यदानिष्टफलंस्वप्नंपश्येत्तस्यो
च्यतेविधिः स्नात्वाप्रभातेसंध्यांचउपास्यतदनंतरं अद्यानोदेवसाधित[illegible]त्यृचापूर्वमेकया ततःपरंपरंयच्चगोषुदुःस्वप्नंपंचभिः ऋग्भिःपरंयोमेरा-
जन्युद्यइत्याद्यृचातथा ऋग्भिःसर्वाभिरेताभिरुपतिष्ठेतभास्करम् [illegible]वंकृतेतुदुःस्वप्नदर्शनंनिष्फलंभवेत् तत्रैव अधःस्वप्नस्येति[illegible]पन्प्रातःप्रा
तर्दिनेदिने दुःस्वप्नंनुदतेकृत्स्नंनतस्माद्विंदतेभयं पारिजातेशौनकः स[illegible]त्पातेषुचैतेषुकालरात्र्यधिदेवता पूजाविधानंपूर्वोक्तंकुर्याद्दत्रापिय-
त्नतः रात्रिसूक्तकल्पवदित्यर्थः होमंकुर्यात्प्रयत्नेनरात्रावेवद्विजोत्तमः [illegible]युचंपायसंहुत्वारात्रीव्यख्यदितिक्रमात् अष्टोत्तरशतंहुत्वासूक्तेनाने
नयत्नतः स्वप्नाधिपतिमंत्रेणहुनेदष्टोत्तरशतं कालरात्रेनमिमंत्रेणत्व गोरत्न दक्षिणांदद्याद्वस्त्रहेमपशूनपि यद्युक्तदक्षिणादानेप्यशक्तोहोमक
र्माणि हिरण्यंदक्षिणांदद्यात्तदानीमेववाबुधः वस्त्रकुंभ[illegible]कलतद् ातियम [illegible]दयेत् याम्याशांतिश्चात्रोक्ताबह्वृचस्मृतौ सपद्येतेषांकिंचित्प-
श्येद्दुपोष्यपायसंस्थालीपाकंश्रपयित्वारात्रिसूक्तेनप्रत्यृचंहुत्वान्येन कृष्णं नर कृष्ण [illegible]न्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्राश्नीयादिति इतिदिनकरभट्टकृतेशांति
सारेदुःस्वप्नशांतिः अथपर्जन्यशांतिः अथातःपर्जन्यसूक्तविधिंव्याख्यास्यामोब्राह्मणान्वेदपारगान्वरणपूर्वकमभ्यर्च्यवरुणप्रतिमांपूजयित्वोद-
कमध्येस्थित्वावरुणंध्यात्वातत्सवितुरितिपच्छोर्धर्चशोनवानंवेदादीञ्जपति इमंमेवरुणेतिपंचर्चमुदुत्तममितिषडृचंमापउंदंतूदायुषामहांइंद्रोयओ
जसावाचामैंद्रियेणयोवैसप्तदशंमैत्रावरुणीमसोसोरिंवरुणंप्रजापतिर्वरुणायययावामेतहेहिरण्यवर्णापवमानोहृषासोअरंङ्गुःसिंङ्हेसर्वेषुयोसो

योपामादिसर्वान्नुवाकानसुवर्णस्सहस्रशीर्षाद्य· आदित्योवैपृथिवी[illegible]मामिदित्यनुवाकान्जापित्वाजलाद्बहिर्गत्वाचम्यपश्चिमाभिमुखोभूत्वापी
वोअन्नामित्यनुवाकमेकादशवारंजपित्वाशुष्कवस्त्राणिधारयेत्ततोह[illegible]मंकरिष्यइतिसंकल्प्यविधिवदग्निंप्रतिष्ठाप्याज्यभागांते क्षीराज्यवेतसमिद्धि
राज्यमिश्रचरुभिःप्रत्येकमष्टोत्तरशतमष्टाविंशतिर्वापुरोवातोवर्षन्निति जुहुयाद्वर्षायपुरोवातायेत्युद्देशत्यागस्ततोजपादीन्प्रायश्चित्ताहुतीर्जुहुयात्पू
र्णाहुतिंहुत्वाशांतिपाठंकुर्याद्यावद्दीक्षादिनानितावद्ब्रह्मचर्यंचरेद्वेदविदे कुटुंबिने शांतायाचार्यायवस्त्रादिभिरलंकृत्यवरुणप्रतिमांदद्यादृत्विग्भ्यो
दक्षिणांदद्यादित्याहभगवान्बौधायनः ऋग्विधाने अच्छावदेतिसूक्तं[illegible]ष्टिकामः प्रयोजयेत् निराहारः क्लिन्नवसाअचिरेणप्रवर्षति हुत्वायुतंवैत
सीनांक्षीराक्तानांहुताशने महद्वर्षमवाप्नोतिसूक्तेनाच्छावदेनहि इ[illegible]न्यशांतिः अथराजाभिषेकः सद्विधा प्रथमाभिषेकः सांवत्सरिकश्चे-
ति तत्राद्यपुरोहिताद्दिनापितृकृतं राजप्रथमाभिषेकेरथ्यसिंहासनासियछत्रचामरध्वजगजवाजिवस्त्रालंकारसांवत्सरचिकित्सकपुरोहितादीन्यु
पयुक्तानिनोपयोजयेदितिगोपथब्राह्मणात् तत्रादौपुरोहितवरणं तस्माद्गुरुंवेदरहस्ययुक्तं चतुर्विधेकर्मणिचाप्रमत्तं शांतंचदांतंचजितेंद्रियंचकु
र्यान्नरेंद्रःप्रियदर्शनंचेतिगोपथब्राह्मणात् वरणोत्तरंकर्तव्यंचतत्रैवोक्तं मधुपर्काद्येनसर्वार्थंसंपाद्यदक्षिणांदद्यात्कोटिमध्यात्तृतीयंभागंयथाभू-
मिप्रमाणेनवाहस्त्यश्वनरयानंदिव्यमाभरणमातपत्रंहिरण्यंक्षितिगोधनधान्यरत्नादिकंचगुरवेदद्याद्येनवातुष्येतेति ततोविनायकशांतिंकृत्वामं
डपंकुंडंचविधायग्रहमखवऐंद्रीशांतिश्चकार्येत्याथर्वणसूत्रेउक्तं विष्णुधर्मोत्तरेतुविनायकशांतिर्नोक्ता राजाभिषेकेकालोविधिश्चवसिष्ठसंहितायां

आधानजन्मेशृदशाधिनाथरवींदुभौमेज्यसितैर्बलिष्ठैः उत्पातदोषादिविवर्जितेषु धराधिपानामभिषेकइष्टः मूलत्रिकोणस्थगृहोच्चमित्रगृहास्थितै र्वापितदंशासंस्थैः शुभैर्विलग्नेसततंग्रहेंद्रादिशांतिलक्ष्मींविपुलांचकीर्ति स्वनीचवैरिगृहगैस्तदंशैरस्तंगतैर्वक्रमुपागतैर्वा पापादयेशोकभयंत्वकीर्ति दिशांतिराज्ञांभृशमंबराटाः शीर्षोदयेचोपचयेग्रहोवास्वजन्मलग्नादथलग्नगोपि शुभग्रहैर्युक्तनिरीक्षितेवापदंस्थिरंस्यात्सततंचराज्ञां रिक्तावमायां बुधभौमवारवर्ज्येषुवारेषुदिनेषुचैव बलेर्दिनेऋक्षनिशेशयोश्चलग्नेधने भेत्वाभिषेकइष्टः पापग्रहैःस्वांत्यगतैश्चनिःस्वोरोगीविलग्नोपगतैर्भवेत्सः पद च्युतः सप्तचतुर्थगस्तैःपुत्रास्थितैःसर्वसुखैर्विहीनः भ्रष्टोद्यमः कर्मगतैः नायुर्मृत्युस्थितैर्वीर्ययुतैश्चपापैः लग्नव्ययाष्टारिगतःशशांकःक्षितीश्वरंहं तितदाबलोचेत् केंद्रत्रिकोणत्रिधनायसौम्यैस्त्रिषष्ठलाभोपगतैर्जगत्स्थैः षष्ठाष्टलग्नव्ययवर्जितेनचंद्रेणराज्ञांसुभदोभिषेकः यस्याभिषेकेपुरु हूतमंत्रीलग्नेत्रिकोणेयदिवाभवेत्सः षष्ठेकुजःकर्मगतश्चशुक्रः समेति विक्रमराजलक्ष्म्या दुश्चिक्यलाभारिगताविनार्कीखस्थेमरेज्येयदिवांबुगे ज्ञे यस्मात्रयोगेक्रियतेभिषेकश्चिरायुषस्तस्यपदंस्थिरंस्यात् शुभेषुचंद्रयोगेषुस्वयोगेषुसुभेषुच राजयोगेषुयोराजात्वभिषिक्तःक्षितीश्वरः प्राग् भागेमंदिरस्याथगोमयेनतुकारयेत् मंडलंचतुरस्त्रंतद्वर्णकैःसमलंकृतं तत्रभद्रासनंसम्यग्रचयेत्सुमनोहरं गंगातोयसुसंपूर्णपूर्णकुंभोदकैःसह दि ग्विदिक्षुस्थितैःशुक्लगंधमाल्यांबरान्वितैः शतौषधीमूलहेमरत्नसहीजाम्रपल्लवैः मृत्तिकावृषशृंगंचगजदंतंचरोचनं उत्पलंपद्मकंपद्मंसुरारेणुककुंकुमं राजसर्षपमुस्तंचदेवदारुसमन्वितैः देवस्यत्वेतिमंत्रेणआयुःपुष्टियशस्करैः अब्लिंगैर्वेदमंत्रैश्चशुभलग्नेशुभान्विते भद्रासनेसनृपतिरभिषे

कंचकारयेत् नीराजनंचकर्तव्यंशंखवादित्रनिःस्वनैः आशिषोवाचनंकृत्वापूजयेच्चसुरान्पितॄन् आयुधानिचपट्टंचविप्रान्गंधादिनार्चयेत् शुक्लमाल्यांबरधृतःप्राङ्मुखस्यमहीपतेः पट्टंशिरसिबध्नीयात्सिंहासनगतस्यच विप्रेभ्योदक्षिणांदद्यान्मानयेन्मंत्रपूर्वकम् भूयात्प्रत्यङ्मुखोराजानमामित्वांधरेतिच प्राच्यांमामभिषिंचंतुवसवस्तेजसेश्रिये याम्यायामभिषिंचंतुमांरुद्राविजयायच आदित्यास्त्वभिषिंचंतुप्रतीच्यांदिशिवृद्धये विश्वेदेवास्तथोदीच्यामभिषिंचंतुपुष्टये दिगीशास्त्व[illegible]विजयायच साम्राज्यमितिमंत्रेणराजानंसम्यगर्चयेत् व्याघ्रचर्मण्यथासीनंनवालंकारभूषितं छत्रचामरसंयुक्तंराजा[illegible]संस्थाप्य[illegible]पुरोहितश्चजुहु[illegible]त्सावित्र्याचप्रयत्नतः उदुंबरसमिद्भिश्च आज्येनाष्टोत्तरंशतम् विद्वत्पुरोहितामात्यवृद्धबंधुसमन्वितः भैषज्यांहोमकु[illegible]सप्तांग[illegible]प्रजाधर्मेणपालयेत् एवंयःकुरुतेसम्यक्सराजावर्द्धतेचिरम् इतिविष्णुधर्मोक्तोराज्ञाभिषेकः हेमाद्रौ अथसं[illegible]दियंवर्धयक्षत्रियमङ्गा[illegible]सरस्ततः कालेभिषेचनंकुर्यात्तंकालंकथयाम्यहं मृतेराजनिकालस्यनियमोत्रविधीयते तत्रास्यस्नपनंकार्यंविधिवत्तिः प्राप्नोतिभुंक्तेधराजि[illegible]यंचास्यसांवत्सरपुरोहितौ अन्यासनोपविष्टस्यदर्शयेत्तुजनंशनैः ससांतयित्वातुजनंमुक्त्वाबंधनगांस्ततः अभयं[illegible]श्चैरंयशासितिष्ठ[illegible]किाक्षीततोभवेत् नाभिषिंच्योनृपश्चैत्रेनाधिमासेचभार्गव नप्रसुप्तेतथाविष्णोविशेषात्प्रावृषिद्विज नचक्षौमदिनेराम[illegible]ध्यांचतथैवच नवम्यांचाभिषेक्तव्यश्चतुर्दश्यांचभार्गव ध्रुवाणिवैष्णवंशाक्रंहस्तपुष्योतथैवच नक्षत्राणिप्रशस्यंतेभूमिपालाभिषेचने नागंचतुष्पदंविष्टिंकिंस्तुघ्नंशकुनंतथा करणानिनशस्यंतेव्यतीपातदिनंतथा नक्षत्र

मुल्काभिहतमुत्पाताभिहतंचयत् सोमसूर्यकुजाक्रांतंपरिविष्टंचभार्गव मुहूर्तास्वोक्तनक्षत्रसमाभानाहितमदाः कुजहोरातथानेष्टास
वेत्रकुलिकस्वाहि वृषोथकीटःसिंहस्तुकुंभोलग्नंप्रश यतेषांजन्मलग्नेशास्स्यादप्युपचयेस्थितं ताराद्वितीयाःषष्ठीचचतुर्थीचाष्टमीतथा
नवमीचतथाशस्ता अनुकूलश्चचन्द्रमाः पापाश्चोप यजन्मलग्ने। ८८ स्तथोदिवाकरः सौम्याःकेंद्रगतालग्नाच्छुभाश्चैवत्रिकोणयोः लग्नेनवांशोक्षि
तिजस्यवर्ज्योवर्ज्यस्तथातस्यमहानुभावः सूर्यस्यवर्गः शायोश्चनने धने भल्वा। भिषेकेसनृपोग्रहाणां कार्यापौरन्दरीशांतिःप्रागेवास्यपुरोधसा सो
ष्णीषःश्वेतवसनःसितचंदनभूषितः सितमाल्योपवी ष्टोद्यमः कर्मगे नायु तः वेदिमुल्लिख्यंयंत्रेण कृत्वाचविधिवत्ततः जुहुयाद्वैष्णवान्मंत्रांस्त
थाशाक्तान्विशेषतः सावित्रीवैश्वदेवाद्यान्सौम्यांश्चापि भोपगतैजस्य शः शर्म गंचैवतथास्वस्त्ययनंगणं आयुष्यमभयंचैवतथाचैवापराजित
म् आशुः आशुःशिशानइतिसूक्तं शर्मवर्मगणइत्य स्वशुक्रः स्वम ः तथास्वस्त्ययने पामयापराजितागणाः संपातवंतंकलशंतथाकुर्याच्च
कांचनं स्नानंसमारभेद्राज्ञोहोमकाले पुरोहितः आदौ स्यात् शुभप्रद स्मात्तः पुरोक्तऋग्भिःसमाचरेत् पर्वताग्रमृदातावन्मूर्धानंशोधयेन्नृपः वल्मी-
काग्रमृदाकर्णौवदनंवैशिवालयात् चंद्रालयमृदाग्रीवांहृदयंतुनृपाजिरात् करिदंतोद्धृतमृदादक्षिणंतुतथाभुजम् सरोमृदातथापृष्ठमुदरंसंगमा
न्मृदा नदीकूलद्वयमृदापार्श्वौसंशोधयेत्तदा वेश्याद्वारमृदाराज्ञःकटिशौचंविधीयते गजस्थानमृदाचैवशोधयेज्जानुनीतथा अश्वस्थानात्त
थाजंघेराज्ञःसंशोधयेद्बुधः रथचक्रोद्धृतमृदातथैवचरणद्वयम् मृत्सूतःस्नापनीयःस्यात्पंचगव्यजलेनतु ततोभद्रासनगतंमुख्यामात्यच

तुष्टयम् बलिप्रदानंभूपालमभिषिंचेद्यथाविधि पूर्वतोहेमकुंभेनघृतपूर्णेनवाडवः वाडवोब्राह्मणः दक्षिणेक्षीरपूर्णेनरौप्यकुंभेनबाहुजः दध्ना
चताम्रकुंभेनवैश्यःपश्चिमतोद्विजः नादेयेनजलेनोदक्शूद्रामाल्योभिषेचयेत् ततोभिषेकंनृपतेर्बह्वृचप्रवरोद्विजः कुर्वीतमधुनाराम्सछंदोग-
श्चकुशोदकैः संपातवंतंकलशंततोगत्वापुरोहितः विधायवह्निरक्षांतुसदस्येषुयथाविधि राज्ञःसूर्याभिषेकेतुयेमंत्राःपरिकीर्तिताः तैस्तुदद्या
न्महाभागब्राह्मणानांस्वरेणतु ततःपुरोहितोगच्छेद्वेदिम[illegible]त विभूषितंतुराजानंसर्वतोभद्रआसने शतच्छिद्रेणपात्रेणसौवर्णेनयथावि-
धि अभिषिंचेतधर्मज्ञः सम्यग्वेदविशारदः याओष र्वबीजानितः तुताभिः सुसम[illegible]ः रथोतिष्ठेतिगंधैश्च आब्रह्मन्ब्राह्मणस्तथा बीजैःपु-
ष्पैस्तथाचैनंरामपुष्पवतीतिच तेनैवचैवमंत्रेणफलैस् संस्थाप्यविद् आशुः[illegible]शानमित्येवसर्वमंत्रैश्चभार्गव यदेवाःपुरःसदेतिकुशोदैःपरिमा
र्जयेत् ऋग्वेदवित्तथाराज्ञश्चंदनेनयथाविधि मूर्द्धनि षज्यांहोमसुत्वेस्तो[illegible] संस्पृशेत् ततोब्राह्मणमुख्याश्चक्षत्रियाश्चविशस्तथा शूद्राश्च
वारमुख्याश्चनानातीर्थसमुद्भवैः नादेयैःसारसैःकौपै देयंवर्धय क्षाश्रियंमइति चतुःसागरजैर्लाभादलाभाद्विजकल्पितैः गंगायमुनयोश्चैववनि-
र्झरैश्चतटोद्भवैः छत्रपाणिर्भवेत्कश्चित्केचिच्चामरपा प्राप्नोतिभुंक्तेधरांश्रि[illegible]धुर्यास्तत्कालंकेचिच्छत्रधरास्तथा शंखभेरीनिनादेनबंदिनादस्वनेनच गी
तवादित्रघोषेणद्विजकोलाहलेनच राजानमभिषिंचेयुः श्रियंयशा[illegible]त्यसहिताजनाः सर्वलोकाभिषिक्तस्यसंमिश्रजलसंयुतम् मंत्रौषधियुतंपुण्यंस
र्वगन्धयुतंतथा रत्नबीजसमायुक्तंचंदनैःकुंकुमैस्तथा रक्तबीजसमायुक्तंफलबीजयुतंतथा पूजितंसितवस्त्रेणवेष्टितग्रीवमेवच श्वेत

वस्त्रावकांतैश्चसंवीतंसुचिभूषितम् क्षीरवृक्षलताछन्नंसुदृढंकांचनंनवम् आदायकलशंराज्ञःस्वयंसांवत्सरस्तदा मंत्रावसानेस्नपनंकुर्या
भृगुकुलोद्वह ततःपश्येन्मुखंराजादर्पणेचाथसर्पिषि चोष्णीषंसितवस्त्रंचमंगलालंभनंचरेत् ततःसंपूजयेद्विष्णुंब्रह्माणंशंकरंतथा लोकपा
लान्ग्रहांश्चैवनक्षत्राणिचभार्गवम् ततःस्वपूजांकुर्या जन्मलग्नादि [illegible] त व्याघ्रचर्मोत्तरंरम्यं सितवस्त्रोत्तरच्छदम् पुरोधामधुपर्केणतत्रस्थंतं
समर्चयेत् राजाचैवार्चयेत्तत्रसांवत्सरपुरोहितौ मधुप शायोश्चनन्नेधनेभृत्या. सदैवधित् पट्टबंधंप्रकुर्वीतततोमुकुटबंधनम् ततःसंबद्धमुकुटंका
लेपूर्वंमयोदिते परार्ध्यास्तरणोपेतेपंचवर्मोत्तरच्छदे ष्टोद्यमः कर्मगं [illegible] नायु पवेश्यःपुरोधसा वृषस्यवृषदंशस्यद्वीपिनश्चमृगोत्तम तेषामुपरि
सिंहस्यव्याघ्रस्यचततः परम् तत्रोपविष्टस्यतदाप्रद भोपगतैर्जत्यै येत् अम [illegible] यांश्चतथापौरान्नैगमांश्चापणेश्वरान् तथाप्रकृतयश्चान्याय-
थावदनुपूर्वशः ततोथहारवस्त्रैश्चतुरंगकनकोत्तमैः गो श्चशुक्रः स्वम श्चसांवत्सरपुरो [illegible] पूजयित्वाततःपश्चात्पूजयेद्ब्राह्मणत्रयं अनेनैववि-
धानेनयेनराजाभिषेचितः ततःसदस्यान्संपूज्यसांवत्स यात् शुभेषु पसः ततोब्राह्मणमुख्यानांपूजनंतुसमारभेत् गोरौप्यतिलवस्त्रान्नफलकांच
नगोरसैः मोदकैःश्वेतपुष्पैश्चमहादानैश्चसुव्रत मंगलालंभनंकृत्वागृहीत्वासशरंधनुः वह्निंप्रदक्षिणंकृत्वाप्रणिपत्यतथागुरून् पृष्ठतोवृषभमा
लभ्यगांसवत्सांचपार्थिव पूजयित्वाचतुरगंमंत्रितंचाभिषेचितम् मंत्रितंदक्षिणेकर्णेस्वयंदैवविदाततः आरुह्यराजमार्गेणस्वपुरंचपरिक्रमे-
त् मुख्यामात्यैःसमंमंत्रैः सांवत्सरपुरोहितैः सहितःकुंजरारूढोअभिगच्छेच्चदेवताः तासांसंपूजनंकृत्वानगरंयोभिवेष्टितः प्रविश्यांतर्गृ

हंराजाप्रविष्टनरवाहनः दानमानादिसत्कारैर्गृह्णीयात्प्रकृतिंततः संपूजितास्ताविसृजेद्द्वितीयःस्वकेगृहेस्थान्मुदितोमहात्मा विधानमेतत्समवाप्यराजाकृत्स्नांचधात्रींवशगांविदध्यात् इतिविष्णुधर्मोत्तरेराजाभिषेकविधिः वौधायनेनाभिषेकांतेविशेषउक्तः अथरथमारुह्यग्रामंप्रदक्षिणीकृत्यदुंदुभिशब्देनस्वस्तिसूक्तेनेतिहेमाद्रावाथर्वणगोपथब्राह्मणे अथराज्ञामभिषेकविधिंव्याख्यास्यामोबिल्वप्रभृतीन्संभृत्यषोडशकलशान्षोडशबिल्वानिवल्मीकस्यचमृत्तिकाः सर्वान्नंसर्वरसान्सर्वबीजानितत्रचत्वारः सौवर्णाश्चत्वारोराजताश्चत्वारस्ताम्राश्चत्वारोमृन्मयास्तान्हृदेसरसिवाह्रौस्तुतौवनांत एताआपइत्युदकेनपूरयित्वावेदिपृष्ठेसंस्थाप्यबिल्वमेकैकंदद्यात्सर्वान्नंसर्वरसान्सर्वबीजानिचप्रभावैरपराजितैरापुण्यैःस्वस्त्ययनैः सौवर्णेषुसंपातान्संस्राव्यसोमाग्नीयैश्चराजतेषुभैषज्यांहोमसुच्चैस्ताम्रेषु मंवेत्ससंसर्गत्यांशांततीयैः प्राणसूक्तेनचमृन्मयेषु ततस्तान्कलशान्श्रोत्रियैः पवित्रैरभियसन्मुखमभिषेचयेत् भूमिमिंदियंवर्धयक्षत्रियंमइतिसिंहासनमभिमंत्रयेत् एवमभिषिक्तस्तुरसान्प्राश्नीयात् विप्रेभ्यश्चदद्यात्सहस्रंसदस्येभ्यः क्षेत्रंग्रामंचविपुलांपृथ्वींयशःप्राप्नोतिभुंक्तेधरांजितशत्रुःसदाभवेदिति अथाभिषेकमंत्राः हेमाद्रौविष्णुधर्मोत्तरे शृणुष्वावहितोमंत्रंरामकल्मषनाशनम् येनाभिषिक्तोनृपतिश्चिरंयशासितिष्ठति राज्ञोभिषिक्तशब्दांतेदैवविकुशवारिणा कुंभादभ्युक्षणंकुर्यान्मंत्रांतेकलशंन्यसेत् सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ब्रह्मणासहिताःसर्वेदिक्पालाःपांतुतेसदा रुद्रोधर्मोमरुद्दक्षोरु

चि:श्रद्धाचपार्थिव भृगुरत्रिर्वसिष्ठश्चसनकश्चसनंदनः सनत्कुमारश्चतथाभगवानपिचांगिराः पुलहश्चपुलस्त्यश्चमरीचिः कश्यपः प्रभुः एते
त्वामभिषिंचंतुप्रजाध्यक्षाःसमागताः प्रभाकरावर्हिषदोअग्निष्वात्तास्तथैवच क्रव्यादाश्चोपहूताश्चआज्यपाश्चसुकालिनः एतेत्वामभिषिं
चंतुपितरश्चाग्निभिःसह लक्ष्मीर्वेदीसतीक्षांतिरनुसूयातथास्मृतिः संभूतिःसंततिश्चैवक्षमाप्रीतिस्तथैवच स्वाहास्वधाचतेराजन्नभिषिंचं
तुमातरः कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः बुद्धिर्लज्जावपुःशांतिस्तुष्टिःसिद्धिश्चपार्थिव एतास्त्वामभिषिंचंतुधर्मपत्न्यः समा
गताः अरुंधतीवसुर्यामीलंबाभानुर्मरुत्वती संकल्पाचमुहूर्ताचसाध्याविश्वातथैवच धर्मपत्न्योदशान्यास्त्वामभिषिंचंतुपार्थिव अदितिर्दि
तिर्दनुस्ताम्रा ह्यरिष्टानायुषामुनिः कद्रूः क्रोधवशाप्राचीविततासुरभिस्तथा एतास्त्वामभिषिंचंतुकश्यपस्यप्रियाःस्त्रियः कृत्तिकारोहिणीदे
वीइलारौद्रीतथैवच पुनर्वसुश्चपुष्यश्चतथाश्लेषाचपार्थिव मघाचफाल्गुनीपूर्वातथैवोत्तरफाल्गुनी हस्तश्चित्रातथास्वातीविशाखाचतथानृप
अनुराधातथाज्येष्ठामूलंचवसुधाधिप आषाढाचतथापूर्वातथाचान्योत्तराह्वया अभिजिच्चश्रुतिश्चैवधनिष्ठाचतथैवच तथाशताभिषक्चैवपू
र्वभाद्रपदाचया उत्तरारेवतीराजन्नश्विनीभरणीतथा एतास्त्वामभिषिंचंतुसोमपत्न्यःसमागताः महाकल्पश्चकल्पश्चमन्वंतरयुगानिच संवत्स
राणिसर्वाणितथाचैवायनद्वयं ऋतवश्चतथामासाःपक्षरात्र्यहनीतिथी संध्याश्चतिथयश्चैवमुहूर्ताःकरणानिच एतेत्वामभिषिंचंतुकालस्यावय
वाःशुभाः आदित्यश्चंद्रमाभौमोबुधोजीवःसितार्कजौ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चपार्थिव स्वायंभुवोमनोःपुत्रोमनुःस्वारोचिषस्तथा वैवस्व

तोथसावर्णिर्दक्षब्रह्मसुतावुभौ धर्मपुत्रोरुद्रपुत्रोरौत्योभौत्यश्चयोमनुः एतेत्वामभिषिंचंतुमनवश्चचतुर्दश नासत्यौदेवभिषजौस्वेतांविजयायते धरोध्रुवश्चसोमश्चआपश्चैवानिलोनलो प्रत्यूषश्चप्रभासश्चवसवोष्टौमहाप्रभाः एतेत्वामभिषिंचंतुदेवमुख्याः समागताः धातामित्रोर्यमापूषाशक्रेशोवरुणोभगः त्वष्टाविवस्वान्सवितादिष्णुर्द्वादशमस्तथा एतेत्वामभिषिंचंतुकश्यपादितिसंभवाः एकज्योतिर्द्विज्योतिश्चत्रिचतुर्ज्योतिरेवच एकशक्रोद्विशक्रश्चत्रिशक्रश्चमहाबलाः इंद्रश्चगत्याहृश्यंतेततःप्रकृतिसत्तथा मितश्चसंमितश्चैवअमितश्चमहाबलः ऋतजित्सत्यजिच्चैवसुषेणःश्येनजित्तथा अतिमित्रोह्यमित्रश्चपुरुजिच्चपराजितः ऋतश्चऋतवान्धातावरुणोविधृतोध्रुवः विधारणोमहातेजावासवस्यपरःसखा ईदृशाश्चान्यादृशाश्चएतादृगमिताशनाः क्रीडनश्चतथाशक्तीसरभश्चमहायशाः धातुरुग्रोमुनिर्भौमअतिमुक्तःक्षिपःसहः द्युतिर्वसुरनाधृष्टोवासःकामोजयोविराट् एतेत्वामभिषिंचंतुमरुतश्चसमागताः देवाह्येकोनपंचाशन्महाबलपराक्रमाः चित्रांगदश्चित्ररथश्चित्रसेनश्चवीर्यवान् पूर्णायुरनघश्चैवउग्रसेनश्चवीर्यवान् धृतराष्ट्रस्यसोमश्चसूर्यवर्णस्तथैवच उराधस्तृपणःकार्ष्णिर्नंदश्चित्रस्तथैवच कलिश्चासिगिरराजन्यजर्न्योनारदस्तथा वृषपर्वात्रिहंसश्चतथाचैवहाहाहूहूः विश्वावसुस्ताम्रकश्चतथावसुरुपश्रियः एतेत्वामभिषिंचंतुगंधर्वाःपृथिवीपते अनवद्यामत्तकामामनूनामरुणीत्रिया अनुत्तमासुकेशीचसुरूपाचमनोवती मेनकासहजन्याचपूर्णाशापुंजिकस्थली ऋतुस्थलाघृताचीचविश्वाचीपूर्वचित्यपि प्रम्लोचाचायमुम्लोचारंभाचैवोर्वशीतथा पंचचूडासामनतीचित्रलेखाचपार्थिव मिश्रकेशीसुगंधिश्चविद्युत्प

र्णात्रिलोचनी आरूकालक्ष्मणाक्षेमा असिकारुचिकातथा सुव्रताचसुबाहूश्चसुबोधासुवपुस्तथा पुंडरीकासुधाराचसुराधासुरसातथा हेमासरस्वतीचैवकमलासूनृतालवा सुमुखीहंसपादीचवारुणीलतिलालसा एतास्त्वामभिषिंचंतुराजन्नप्सरसस्तथा प्रल्हादश्चमहातेजास्तथाराजन्विरोचनः धन्वीबाणस्तथान्येचदितिपुत्राः समागताः अभिषिंचंतुदैत्याश्चदिव्येनाप्यंभसास्वयम् विप्रचित्तिमुखाः सर्वेदानवास्त्वांसमागताः अभिषिंचंतुराजानंराज्यंकर्तुंसुसत्वराः हेत्यश्चैवप्रहेत्यश्चसालिलेंद्रस्तथैवच सुकेशीपौरुषेयश्चयज्ञहापुरुषादरः विद्युत्सूर्यस्तथाव्यासोवधश्चरसनास्तथा एतेत्वामभिषिंचंतुसमागम्याद्यराक्षसाः सिद्धोथोमाणिभद्रश्चसुमनोनंदनस्तथा कद्रूतिःपंचमश्चैवमणिमान्वसुजस्तथा सर्वानुभूतः शंखश्चपिंगाक्षश्चतुरस्तथा यमोनंदरसोभीमः पद्मश्चंद्रः प्रभाकरः मेघवर्णश्चभव्यश्चप्रद्योतश्चमहायशाः भूतिमान्केतुमांश्चैवमौलिनिश्चसुदर्शनः श्वेतश्चाविपुलश्चैवप्रद्युम्नश्चजयावहः पद्माक्षोपिंगलाक्षश्चकुमुदश्चबलाहकः पद्मनाभः सुगंधश्चसुवीरोविजयाकृतिः पूर्णमासोहिरण्याक्षः सितजिह्वश्चवीर्यवान् एतेत्वामभिषिंचंतुराजन्यक्षाश्चसत्तमाः शंखःपद्मश्चराजेंद्रमकरःकश्यपस्तथा महापद्मश्चनीलश्चवर्चःकुंदोमुकुंदकः एतेत्वामभिषिंचंतुनिधयस्तुसमागताः छागलाश्चैववक्राश्चयेचसूरीमुखानृप दुःपूरणाविशादाश्चज्वलनांगारकस्तथा कुंभमात्रः प्रभुंजश्चउपवीताउलूखलाः अकर्णाश्चवक्रतुंडाश्चतथायेपात्रपाणयः पांसवश्चवितुंडाश्चनिपुणाःस्कंदनास्तथा एतास्त्वामभिषिंचंतुपिशाचानांचजातयः ब्रह्मचर्येस्थितादांताःसर्वज्ञाःसर्वदर्शिनः नानाप्रकाररचनानानाबाहुशिरोधराः चातुःपथस्फुरादालं

शून्यालयनिकेतनाः त्रिपुरारिंभवेदेवंयेगतामनुजेश्वर एतेत्वामभिषिंचंतुगणाभूतपतेःस्वयम् महाकालंपुरस्कृत्यनरसिंहंचमातरः सर्वास्त्वामभिषिंचंतुराजराज्ञेनराधिप ग्रहःस्कंदोविषादश्चनैगमेषस्तथैवच अभिषिंचंतुराजंस्त्वांसर्वेस्कंदग्रहाःशुभाः डाकिन्योयाश्चयोगिन्यः खेचर्योभिदरीस्तथा सर्वास्त्वामभिषिंचंतुसमेत्यमनुजेश्वर गरुडश्चारुणश्चैव आरुणिश्चमहाखगः संपातिर्विनयश्चैवविष्णुगंधकुमारकाः एतेत्वामभिषिंचंतुसुपर्णाःपृथिवीपते अनंतश्चमहानागोवासुकिःशेषतक्षकौ स्कपर्णारिश्चकुंभश्चवामनोथांजनोत्तमः ऐरावतोमहापद्मः कंबलाश्वतरावुभौ पद्मपत्रश्चशंखश्चकर्कोटकधनंजयौ महाकर्णोमहानीलोधृतराष्ट्रबलाहकौ कुमारःपुष्पदंतश्चगन्धर्वश्च मनस्विकः नहुषःखररोमाचशंखपालस्तथैवच पद्मश्चकुलिकश्चैवपाणिरित्येवमादयः नागास्त्वामभिषिंचंतुराजराज्येचपार्थिव कुमुदैरावतोपद्मः पुष्पदंतोथवामनः सुप्रतीकोंजनोनीलः पातुत्वांसर्वतोनृप पैतामहस्तथाहंसोवृषभःशांकरस्तथा उच्चैःश्रवाश्चाश्वपतिस्तथाधन्वंतरिर्नृप कौस्तुभःशंखराजश्चपातुत्वांसर्वतःसदा चक्रंत्रिशूलंवज्रश्चनंदकोस्त्राणिचाप्यथ सर्वाभिषेकंदत्वाचदिशंतुविजयंध्रुवम् धर्मश्चवृद्धशाखश्चसत्यंदानंतपस्तथा यशोयज्ञास्तथैवायुर्ब्रह्मचर्यंदमःशमः एतेत्वामभिषिंचंतुचित्रगुप्तश्चपार्थिव दंडःपिंगलकश्चैवमृत्युकालावुभौतथा वालखिल्यास्तथासर्वेभवंतुविजयायते दिग्धेनवश्चतस्रस्त्वांसुरभिश्चतथानृप अभिषिंचंतुसर्वाभिर्गोभिःसार्द्धंनरेश्वर वेदव्यासश्चवाल्मीकिःशंबरोथपराशरः देवलःपर्वतश्चैवदुर्वासाभागुरिःशुचिः याज्ञवल्क्यःसजाबालिर्जमद

ग्निःशुचिश्रवाः विश्वामित्रःशूलकच्छुर्वर्धनोत्रिर्विदूरथः एकलश्चाहृदश्चैववसितोगौतमगालवौ शांडिल्यश्चभरद्वाजोमौद्गल्योवेद्वाहनः
दृढदस्युःकुटिमठोजपजानुर्घटोदरः यवक्रीतोर्थरैभ्यश्च आत्मधामश्चजैमिनिः ऋषिःसारंगवश्चैवतथागस्त्योमहातपाः अदुर्मृदोमृदु-
श्चैवइध्मवाहुर्महोदयः कात्यायनश्चकण्वश्चबलाकःश्वेतनंदनः एतेत्वामभिषिंचंतुमुनयःपार्थिवोत्तम पृथुर्दिलीपोभरतोदुष्यंतःश
त्रुजिद्बली मनुःककुत्स्थश्चानेनायुवनाश्वोजयद्रथः मांधातामुचकुंदश्चतथाराजापुरूरवाः इक्ष्वाकुश्चयदुःश्वेतःपूरुर्भूरिश्रवास्तथा
अंबरीषश्चनाभागोबृहदश्वोमहाहनुः प्रद्युम्नश्चाप्रसुम्नश्चसंजयश्चतथार्जुनः एतेचान्येचराजानस्तवराजन्दिवंगताः समायांत्वभि
षेकायविजयायतथाश्रिये पुरुषश्चाप्रमेयात्मामहाभूतानियानिवा पृथिवीवायुराकाशमापोज्योतिस्तथैवच मनोबुद्धिस्तथैवात्मा
अव्यक्तश्चमहीपते एतेत्वामभिषिंचंतुसमेतावसुधाधिप भूर्लोकोथभुवर्लोकःस्वर्लोकोथमहाजनः तपःसत्यश्चराजेंद्रविजयाय-
भवंतुते जंबूःशाकःकुशःक्रौंचःशाल्मलीद्वीपएवच गोमेदःपुष्करश्चैवस्वसाम्यंप्रदिशंतुते उत्तराःकुरवःपुण्यारम्याहैरण्मयास्तथा
भद्राश्वःकेतुमालश्चवर्षश्चैवइलावृतः हरिवर्षःकिंपुरुषोवर्षोभारतसंज्ञकः एतेत्वामभिषिंचंतुसमेत्यवसुधाधिप इक्षुद्वीपःकुसेरुश्च
ताम्रपर्णोगभस्तिमान् नागद्वीपस्तथासौम्योगंधर्वोवरुणस्तथा अयंचनवमस्तेषांस्वसाम्यंप्रदिशंतुते हिमवान्हेमकूटश्चनिषधोनील १४५
एवच श्वेतशृंगस्तथामेरुर्माल्यवद्गंधमादनौ महेंद्रोमलयःसह्यःशक्तिमानृक्षवांस्तथा विंध्यश्चपारियात्रश्चसर्वएवमहीधराःसमाग

स्याभिषिंचंतुत्वामद्यवसुधाधिप ऋग्वेदोथयजुर्वेदःसामवेदस्तथैवच अथर्ववेदोवेदास्त्वामभिषिंचंतुपार्थिव इतिहासोधनुर्वेदोगांधर्वश्चायुसंज्ञितः सप्तोपवेदाश्चतथाविजयायभवंतुते शिक्षाकल्पोव्याकरणंनिरुक्तंछंदसांगतिः छंदोविचृतिषष्ठानिविजयंप्रदिशंतुते अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः धर्मशास्त्रंपुराणंचविद्याह्येषाश्चतुर्दश सांख्ययोगःपंचरात्रंवेदाःपाशुपतंतथा कृतांतपंचकंचैवशास्त्राणिविविधानिच गायत्रीपापशमनीदुर्गादेवीमहाशिवा गांधारीचतथाविद्याविजयंप्रदिशंतुते देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमनवोगावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच औषधानिचरत्नानिकालस्यावयवाःशुभाः स्थानानिचसमस्तानिपुण्यान्यायतनानिच जीमूतानिचसर्वाणितद्विकाराश्चसर्वतः उक्तानिचाप्यनुक्तानिविजयायभवंतुते लवणक्षीरतोयौचघृतमंडोदकस्तथा दधिमंडोदकश्चैवसुरोदश्चनराधिप तथैवेक्षुरसोदश्चतथास्वादूदकश्चयः गर्भोदकश्चतोयैस्त्वामभिषिंचंतुपार्थिव चत्वारःसागराश्चैवश्वेततोयेनपार्थिव त्वामागम्याभिषिंचंतुविजयंप्रदिशंतुते पुष्करश्चप्रयागश्चप्रभासोनैमिषस्तथा तथाब्रह्मसरःपुण्योगयाशीर्षश्चपार्थिव कालोदकोनंदिकुंडस्तथैवोत्तरमानसः स्वर्गमार्गनदश्चैवतथापंचनदश्चयः भृगुतीर्थंप्रभासश्चतथैवामरकंटकः आश्रमःकालिकायाश्चनारायणसरस्तथा तृणविंदोस्तथातीर्थंतीर्थंचावंतिखंडके महासरस्तथागस्त्यःकुमारीतीर्थमेवच गंगाद्वारंकुशावर्त्तोविल्वकोनीलपर्वतः वाराहपर्वतश्चैवतीर्थंकनखलंतथा कालिंजरःसकेदारोरुद्रकोटिस्तथैवच महालयश्चराजे

द्वदर्याश्रमएवच नंदाचसूर्यतीर्थंचसोमतीर्थंशतक्रतोः अश्विनोर्वरुणस्याथवायोर्वैश्रवणस्यच ब्रह्मणश्चैवशर्वस्ययमस्यव्ययनस्यच विरूपाक्षस्यधर्मस्यतथाचाप्सरसांनृप ऋषीणांचवसूनांचसाध्यानांमरुतांतथा आदित्यानांचरुद्राणांतथाचांगिरसांनृप ऋषीणांचवसूनांचतथान्येषांचमानद प्लक्षमस्त्रवणंचैवसुषुम्णंचनराधिप शालग्रामसरश्चैववाराहोमानवस्तथा कामाश्रमस्त्रिकूटश्चचित्रकूटस्तथैवच सपूर्वःक्रतुसारश्चतथाविष्णुपदंसरः कपिलस्यतथातीर्थंवासुकेस्तीर्थमेवच सिंधूत्तमस्तपोद्वाराध्यथसूर्यारकुंभकः पौंडरीकश्चराजेंद्रगंगासागरसंगमः सिंधुसागरयोश्चैवसंगमःसुमनोहरः तथाकुंभाचसुधश्चमःनसंचतथासरः तथाबिंदुसरःपुण्यंसरस्वच्छोदकंतथा धर्मारण्यंफल्गुतीर्थमविमुक्तंतथैवच लोहितश्चतथापुण्योबदरीपावनंशिवः तीर्थंसप्तऋषीणांचवाह्लितीर्थंचपार्थिव एतेचान्येचबहवःपुण्यसंकीर्तनाःशुभाः तीर्थैस्त्वामभिषिंचंतुसर्वपातकनाशनैः गंगानदीमहापुण्याह्लादिनीह्लादिनीतथा पावनीचतथाशीताचक्षुःसिंधुः सनर्मदा सुप्रभाकांचनाक्षीचविशालामानसीह्रदा सरस्वतीधनोदाचसुवंशाविमलोदका क्षिप्राशोणश्चतर्पश्चशरयूर्गण्डकीतथा अच्छोदाचविभागाचचंद्रभागाइरावती वितस्तादेविकारंभाकौशीदेवह्रदाशिवा तथाचेक्षुमतीपुण्याकौशिकीयमुनातथा गोमतीधूतपापाचबाहुदाचसरस्वती निर्विन्ध्याचतृतीयाचलौहित्यश्चमहानदः वेदस्मृतिर्वेदमातावेदयुर्वरदातदा गोवर्णाचंदनाचैवसदानीराकुमुद्वती पिताचर्मण्वतीधूपाविदर्भावेणुमत्यपि अवंतीचतथाकुंतीसुरसाचपलाशिनी मंदाकिनीदशार्णाचसिंधूरेवाकुमुद्वती तपनीपिप्पलाश्येनीकरतोयापिशाचिका

ववेश्मभवेद्दृढम् वीथ्यग्रेचद्वितीयेचराजवेश्मविधीयते धर्माधि
यतंचतुरस्रंवावृत्तंवाकारयेत्पुरम् अर्द्धचंद्रप्रकारंचवज्राकारंतुका
नविजानता राज्ञःशोकगृहंकार्यंदक्षिणोराजवेश्मनः तस्यापिद
वाङ्मुखी आग्नेयेचतथाभागेआयुधागारमिष्यते महानसंच
श्ववेदविदोश्चैवचिकित्साकर्तुरेवच तस्यैवचतथाभागेकोष्ठागारं
तुरंगाणांविधीयते दक्षिणाभिमुखीवायपरिशेषाद्विगर्हिता त
नराधिपः धारयेदश्वशालासुसवत्सांधेनुमेवच अ
अस्तंगतेनकर्तव्योदेवदेवोदिवाकरे योगिनांशिल्पिनांचैवसव
द्यांश्चराजवैद्यांस्तथैवच आहरेतभृशंराजादुर्गेहिप्रबलारुजः
मायुक्तान्वातायनसमन्वितान् मत्तवारणदेवाद्यान्ध्वजकैरुप
महिषासुरघातिनीम् द्वारस्थंगजवक्त्रंचधनदंवायपद्मजम् शि

करणंकार्यंवीथ्यग्रेत्ततृतीयके चतुर्थेचैववीथ्यग्रेगोपुरंतुविधीयते आ
येत् अर्धचंद्रंप्रशंसंतिनदीतीरेचतद्भवेत् अन्यत्रतुनकर्तव्यंप्रयत्ने
क्षिणेभागेराजस्थानंविधीयते गजानांप्राङ्मुखीशालाकर्तव्यावाप्य
[illegible] लातथापरा गृहंपुरोधसःकार्यंवामतोराजवेश्मनः मं
[illegible] रस्थानंतथैवान्नतुरंगाणांतथैवच उत्तराभिमुखाश्रेणी
[illegible] र्गाः प्रदीपैःसार्वरात्रिकैः कुक्कुटान्वानरांश्चैवमर्कटांश्च
नंतुरंगाणांहि[illegible]षिणा गोगजाश्वादिशालासुतत्पुरीषस्यनिर्गमः
मपिशेषतः दद्याद्दावसथंदुर्गेमंत्रकालविदांशुभम् गोवैद्यानश्ववे-
र्वीपुराणे पूर्वादीन्कारयेद्द्वारान्महापद्मेषुचोत्तमान् राजस्थानस
शोभितान् गजव्यालकृतापीडान्पद्मपत्रमनोहरान् दुर्गेषुकारयेद्दुर्गां
लान्यासेबलिःकार्यःप्रासादोक्तोयथाविधि अथचाग्निपुराणेउक्तः हे

मकूर्मं सरत्नं च शाखाधः सन्निवेशयेत् पूतनाशकुनीतन्नजंभादी
न्सूत्रधारांश्च वसुहेमस्रगादिभिः ब्राह्मणान्स्वस्तिवाच्याथपूशं न्पूजयेद्ग्रहान् देवान्यक्षान्ग्रहान्नागान्पूजयित्वाथयथाविधि दैवज्ञा-
धाकार्यं छत्रं श्वेतपताकिनम् एवं समुच्छ्रयेच्छाखासर्वद्वारेषु शांत्यै निपातयेत् कारयेत्सर्वदानानि उत्सवं विविधं पुरे शाखोच्छ्रयंत
धानेन बलिं दत्वा पुरं कुरु इति श्रीदिनकरभट्टकृते शान्तिसारे एवं बुद्धिमान् पूजयित्वा हरं दुर्गां ग्रहान् मातृविनायकान् प्रासादोक्तवि
मानखंडनजयः श्रीरामकृष्णस्ततः मीमांसानयतत्त्वचसुधर्मा र्गविधिः श्रीरामेश्वरसूरिसूनुरुदभूद्यो भट्टनारायणः क्षोणीपंडित
इति श्रीमद्रामेश्वरभट्टसूरिसूनुश्रीमन्नारायणभट्टसुतश्रीमद्रामकृ स्तस्मादभूत्तत्कृतिः सेयं शांतिकतंत्रसारविषया रामाय दद्यान्मुदम्
पुण्याह्नदिनी दिनकरभट्टकृतः शांतिसारः समाप्तः छ श्रीरस्तु छ

स्वदेशहितनिष्ठेन भट्टगोपालसूनुना आग्रापुरोपाभिधेन महादेवेन शास्त्रिणा शोदका क्षिप्रा
चेद् स्वच्छ पुण्य शांत्यर्थं याज्ञिकानां हिताय च मोहमय्यां राजधान्यां ज्ञानदर्पणसंज्ञके

हें पुस्तक मुंबईंत महादेव गोपाळ शास्त्री अमरापुरकर यांनीं आपले ज्ञानदर्पणछापखान्यांत छापिलें. शके १८१३ आश्विनकृ० २ रविः ता० १९ अकटोंबर. १८९१.

[illegible]

इति शांति तीर्थंसस्मरूपी तः

याह्लादिनी

प्रमा

अथदानचन्द्रीकानुक्रमणीकाप्रारंभः योदेवताकोआवाहरमंत्रयेसपश्चामाछमनीजनायाकोहेः

अथदानचन्द्रिकानुक्रमणिकालिख्यते

१ मंगलाचरणश्लोक
१ दानशब्दार्थः
१ सात्विकादिदानानि
१ पात्रलक्षणम्
१ ब्रह्मलक्षणम्
१ ब्राह्मणगुणलक्षणम्
१ द्रव्यविभागः
१ ग्राह्याग्राह्यविचारः
२ अथदानकालः
२ अथपुण्यदेशः
२ तीर्थप्रतिग्रहनिषेधः
२ अथदानकल्पे
२ प्रतिग्रहीतृकृत्यम्
२ द्रव्यमानम्
३ धान्यमानम्
३ अथदानदक्षिणापरिमाणं
३ जपाभिषेकमृद्दह्यालिंगपुराणे
गुर्वादीनांदक्षिणानियमः
३ अथद्रव्यदेवता
३ प्रतिग्रहस्थानानि
३ हेमाद्रौदानखंडे
४ तुलापुरुषदानंफलं
४ कुंडमंडपादि
४ तुलावेदीपरिमाणं
४ तुलालक्षणम्
४ हेमाद्रौमात्स्येस्तंभमानंस्तंभवृक्षाश्च
४ तुलाबंधदेवता
४ अथवेद्यांषोडशारचक्रलिखनं
५ मध्यहस्तपरिमाणं
५ इदमेववारुणमंडलंजलाशयोत्सर्गादौ
५ घृतादितुलाफलानि
६ अथदानारोगनिरासार्थद्रव्यविशेषतुला
दानानि
६ अथपूजार्थंतत्तद्व्याधिदेवताः
६ कालविशेषः
७ तुलापुरुषदानविधिः
७ तुलापुरुषदानसंकल्पः
७ इतितुलापुरुषदानविधिः
७ तुलापुरुषदानप्रयोगः
८ अथगोसहस्रमहादानप्रयोगः
९ सवत्सगोशतदानसंकल्पः
९ तत्रमंत्राः
१० वृषादिकदशगोदानसंकल्पः
१० अथदशमहादानानि
१० स्वर्णदानम्
१० अश्वदानम्
११ श्वेताश्वदानं
११ अथशिवायाश्वदानम्
११ अथतिलदानम्
११ तिलद्रोणदानम्
११ तिलद्रोणदानम्
११ तिलपात्रदानम्
११ महातिलपात्रदानम्
१२ तिलपूर्णकांस्यपात्रदानम्
१२ अथास्यप्रयोगः
१२ तिलपूर्णकरकदानम्
१२ अथगजदानम्
१३ गजदानसंकल्पेः
१३ गजप्रार्थनामंत्रः
१३ दासीदानम्
१३ अथदानम्
१३ अथपंगंत्ररथदानम
१३ अथप्रसंगाच्छिबिकादानम्
१३ महीदानम्
१४ अथगृहदानम्
१४ वास्तुशांतिप्रयोगः
१७ पौराणवास्तुशांतिः
१७ सूत्रोक्तवास्तुशांतिप्रयोगः
१७ गृह्योक्तवास्तुशांतिप्रयोगः
१८ गृहदानप्रयोगः
१९ गृहदानफलं
१९ अथमठदानं
१९ धर्मशालादानं
१९ कन्यादानम्
१९ अथकन्यादानप्रयोग
२० अथकन्यागृहेभोजननिषेधः
२० अथकपिलादानप्रयोगः
२० इतिमहादशदानानी
२० अथदशधेनुदानानि
२१ अथगुडादिधेनुदानसंकल्पः
२१ तिलधेनुदानम्
२१ घृतधेनुदानम्
२२ जलधेनुदानम्
२२ क्षीरधेनुदानम्
२२ मधुधेनुदानम्
२२ शर्कराधेनुदानम्
२२ दधिधेनुदानम्
२३ रसधेनुदानम्
२३ अथस्वरूपतोगोदानप्रयोगः
२३ अथश्वेतवर्णादीगोदानम्
२३ समानवर्णगोवत्सदानम्
२४ कृष्णधेनुदानम्
२४ हेमशृंगीदानम्
२४ कर्पासधेनुदानम्
२४ लवणधेनुदानम्
२४ स्वर्णधेनुदानम्
२५ वंध्यात्वहरंस्वर्णधेनुदानम्
२५ धेनुरूपविशेष

२५ उभयतोमुखीदानम्
२५ उभयतोमुखीदानप्रयोगः
२७ उभयतोमुखीप्रतिग्रहप्रायश्चि
२७ अथदशदानानि
२७ गोदानम्
२७ भूमिदानम्
२७ तिलदानम्
२७ हिरण्यदानम्
२७ आज्यदानम्
२७ वस्त्रदानम्
२७ धान्यदानम्
२७ गुडदानम्
२७ अरजतदानम्
२८ अथलवणदानम्
इतिदशदानानि
२८ अथपंचधेनुदानानि
२८ पापनोदधेनुदानम्
२८ ऋणापनोदधेनुदानम्
२८ प्रायश्चीतधेनुदानम्
२८ वैतरणीधेनुदानम्
२८ उत्क्रांतिधेनुदानम्
२९ मोक्षधेनुदानम्
२९ महिषिदानम्
२९ मेषिदानम्
२९ अजादानम्
३० अथमंदाग्निहरमेषदानम्
३० अथास्यप्रयोगः
३० दशाचलदानानि
३१ धान्यमेरुसाधारणप्रयोगः
३२ लवणाचलदानम्
३२ गुडाचलदानम्
३२ स्वर्णाचलदानम्
३३ तिलाचलदानम्
३३ अथोदयेतिलपर्वतदानम्
३३ अथास्यप्रयोगः
३४ तिलाचलांगत्वेनकांस्यपात्रदानम्
३४ कर्पासाचलदानम्
३४ घृताचलदानम्
३४ रत्नाचलदानम्
३४ रौप्याचलदानम्
३४ शर्कराचलदानम्
३५ अथशिखरदानानि
३५ अथास्यदानप्रयोगः
३५ गुडशिखरदानम्
३५ इतिनानाशिखरदानानि
३६ त्रिशूलदानम्
३६ अथदारिद्र्यहरकुबेरमूर्तिदानं
३६ उमामहेश्वरमूर्तिदानम्
३६ लक्ष्मिनारायणमूर्तिदानम्
३६ हरिहरमूर्तिदानम्
३६ सूर्यमूर्तिदानम्
३६ अथगणपतिमूर्तिदानम्
३६ अथजगदंबामूर्तिदानम्
३६ सरस्वतीमूर्तिदानम्
३६ शालग्रामदानम्
३७ शिवनाभिदानम्
३७ लिंगदानम्
३७ घंटादानम्
३७ शंखदानम्
३७ अथका[illegible]दानम्
३७ अथमृत्युहरयममूर्तिदानम्
३७ कालपुरुषदानम्
३८ अथसर्वसंपत्करदानम्
३८ अथकृष्णाजिनदानम्
३८ अथास्यदानप्रयोगः
३९ अथशय्यादानम्
३९ अथशयनदानम्
३९ अथकपिलदानम्
३९ अथवस्त्रदानानि
३९ श्वेतवस्त्रदानम्
३९ पीतवस्त्रदानम्
३९ रक्तवस्त्रदानम्
४० नीलवस्त्रदानम्
४० चित्रवस्त्रदानम्
४० कृष्णवस्त्रदानम्
४० अथपट्टकूलदानम्
४० मतकर्पटदानम्
४० ऊर्णावस्त्रदानम्
४० कंबलदानम्
४० चित्रकंबलदानम्
४० अथताम्रपात्रदानं
४० कांस्यपात्रदानम्
४० लोहपात्रदानम्
४० रौप्यदानम्
४० स्वर्णदानम्
४१ स्थालिदानम्
४१ अथवेदपुस्तकदानं
४१ प्रसंगात्[illegible]देशविधाः
४१ अथास्यप्रयोगः
४१ पुस्तकदानम्
४१ नवरत्नदानम्
४१ मौक्तिकदानम्
४१ प्रवालदानम्
४१ कर्णभूषणदानम्
४१ मांगल्यमणिदानं
४१ हरिद्रादानम्
४१ कुंकुमदानम्
४१ सिंदूरदानम्
४१ कस्तुरिदानम्
४१ कर्पूरदानम्
४१ इतिनाडुपदानम्
४१ अथदेवेगलंतिकादानम्
४२ प्रपादानम्
४२ अथहेमंतिकमग्निदानम्
४२ अदिपदानम्
४२ अथपांथपरिचर्या
४२ गोपरिचर्या
४२ गोग्रासदानमंत्रः
४२ धर्मघटदानम्
४३ कलशदानम्
४३ जलपात्रदानम्
४३ यज्ञोपवितदानम्
४३ हेमाद्रौमाघेतिलदानात्पापनाशः
४३ मासपरत्वेदानफलश्लोकाः
४३ इतिमासपक्षदानानि
४३ अथाधिमासेदानं
४३ अधिमासदानद्रव्यसंख्याकदेवतानामानि
४३ अपूपदानम्

४४ अथप्रातर्नित्यंघृतपात्रछायादानं
४४ अथसंक्रांतिदानम्
४४ नानाधान्यमंत्रः
४४ तंडुलदानमंत्रः
४४ व्रीहिदानम्
४४ यवदानम्
४४ गोधूमदानम्
४४ मुद्गदानम्
४४ माषपदानम्
४४ चणकस्यदानं
४४ कुलित्थदानम्
४४ तिलदानम्
४४ स्वर्णदानम्
४४ सामान्यतःसर्वधान्यमंत्र
४४ सकृवर्णतिलपात्रदानम्
४४ निष्पावदानमंत्रः
४४ प्रियंगुदानम्
४४ [illegible]कदानम्
४४ यावनालदानं
४४ मसूरिकादानं
४५ अथान्नदानमंत्रः
४५ तैलदानम्
४५ नवनीतदानं
४५ क्षीरदानम्
४५ दधिदानम्
४५ गंधदानम्
४५ पुष्पदानम्
४५ फलदानम्
४५ तांबूलदानम्
४५ पादुकादानम्
४५ उपानदानम्
४५ छत्रदानम्
४५ चामरदानम्
४५ कमंडलुदानम्
४५ ओदनदानम्
४५ इंधनदानम्
४५ कृसरान्नदानं
४५ नानाभक्ष्यदानं
४५ सर्वान्नदानम्
४५ सक्तुदानम्
४५ शर्करादानम्
४५ गुडदानम्
४५ इक्षुदंडदानम्
४५ मधुदानम्
४५ घृतदानम्
४५ पत्रीकादानम्
४५ व्यजनदानम्
४५ दर्पणदानम्
४५ अथकूष्मांडादिदानम्
४६ सौभाग्यवतीनांदानविशेषः
४६ वर्धितफलदानम्
४६ सपिष्टगुडग्रासदानं
४६ भांडदानम्
४६ गोधूमपिष्टदानम्
४६ शूर्पस्यार्द्रतंडुलदानं
४६ पायसपूरितकांस्यपात्रदानम्
४६ फलपुष्पसहितकदलीसंपदा
४६ सौभाग्यद्रव्यपुनशूदानम्
४६ शूर्पपंचकदानम्
४६ षोडशफलदानम्
४६ व्यतीपातेस्वर्णदानं
४६ अश्वत्थसेचनमंत्र
४७ अथाथर्वणीयेअश्वत्थाभिमंत्र
४७ पौराणंअश्वत्थाभिमंत्रणं
४७ सूर्यादीनांदानानि
४७ चंद्रेदानानि
४७ भौमेदानानि
४७ बुधेदाना[illegible]
४७ गुरवेदानानि
४७ शुक्रेदानानि
४७ शनौदानानि
४७ राहवेदानानि
४७ केतौदानानि.
४७ अथग्रहणादिदानं
४७ कालः
४७ ग्रहपार्थनामंत्रः
४७ वाहेषापनोदनानि
४७ सहस्रभोजनेविधिः
४९ सर्वस्वदानसंकल्पः
४९ युगानुसारेणव्यासोक्ताधर्माः
५० दानग्रहीतुःप्रायश्चित्तानि
५१ षोडशमहादानग्रहीतुःप्रायश्चित्तानि
५२ राजप्रतिग्रहप्रायश्चित्तं
५२ साधारणप्रायश्चित्तानि
५३ प्रतिपदोक्तप्रायश्चित्तानि
५३ रहस्यप्रायश्चित्तानि

इतिदानचंद्रीकानुक्रमणिकासमाप्ता ॥

देविरमणपाध्याको पुस्तकहो

अथदानचंद्रिकाप्रारंभः

श्रीगणेशायनमः॥ श्रीरमाव्यंकटेशाभ्यांनमः॥ प्रणम्यमातरंगंगांभैरवंवनशंकरीम्॥ महादेवाख्यंपितरंश्रौतस्मार्तविशारदम्॥१॥ दिवाकरेणसु
धियासारमुद्धृत्यशास्त्रतः॥ शिष्टाचारान्यतेतुष्ट्यैदानसंक्षेपचंद्रिका॥२॥ तत्रपरस्वत्वोत्पत्त्यर्थोद्रव्यत्यागोदानम्॥ ॥देवलः॥ ॥अर्थानामु
दितेपात्रेश्रद्धयाप्रतिपादनं॥ दानमित्यभिनिर्दिष्टंव्याख्यानंतस्यकथ्यते॥३॥ तच्चदानंत्रिविधोक्तंगीतासु॥ दातव्यमितियद्दानंदीयतेनुपकारिणे॥
देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतम्॥४॥ यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः॥ दीयतेचपरिक्लिष्टंतद्राजससुदाहृतम्॥ अदेशकालेयद्दान
मपात्रेभ्यश्चदीयते॥ असत्कृतमवज्ञातंतत्तामससुदाहृतम्॥ ॥गारुडे॥ ॥अर्हतेयत्सुवर्णादिदानंतत्कायिकंस्मृतम्॥ तुलादानादि॥ आर्ताना
मभयंयद्दत्तंतद्वाचिकंस्मृतम्॥ विद्यामादाययज्जप्येतद्दानंमानसंद्विजाइति॥ ॥अथपात्रंयाज्ञवल्क्यः॥ ॥नविद्ययाकेवलयातपसावा
पिपात्रता॥ यत्रदानमिमेचोभेतद्धिपात्रंप्रचक्षतइतिभविष्ये॥ किंचिद्वेदमयंपात्रंकिंचित्पात्रंतपोमयम्॥ पात्राणामुत्तमंपात्रंशूद्रान्नंयस्यनोदरइ
ति॥ ॥व्यासः॥ ॥प्रथमंतुगुरोर्दानंदत्वाश्रेष्ठमनुक्रमात्॥ ततोन्येषांचविप्राणांदद्यात्पात्रानुसारतइति॥ ॥भविष्यपुराणे॥ ॥संनिधानस्थिता
न्विप्रान्दौहित्रंविट्पतिंतथा॥ भागिनेयंविशेषेणतथाबंधून्गृहागतान्॥ नातिक्रमेन्नरस्त्वेतान्सुमूर्खानपिगोपते॥ अतिक्रम्यमहारौद्रंरौरवंनरकं
व्रजेत्॥ ॥दक्षः॥ ॥सममब्राम्हणेदानंद्विगुणंब्राम्हणब्रुवे॥ सहस्रगुणमाचार्येत्वनंतंवेदपारगे॥ ॥अब्राम्हणलक्षणमाहव्यासः॥ ॥ब्रम्ह
बीजसमुत्पन्नोमंत्रसंस्कारवर्जितः॥ जातिमात्रोपजीवीचभवेदब्राम्हणःसतु॥ ब्राम्हणब्रुवलक्षणमाहतत्रैव॥ ॥गर्भाधानादिभिर्युक्तस्तथोपनय
नेनच॥ नकर्मकृन्नचाधीतोसभवेद्ब्राम्हणब्रुवः॥ ॥अथद्रव्यविभागःशिवधर्मे॥ ॥तस्मात्त्रिभागंवित्तस्यजीवनायप्रकल्पयेत्॥ भागद्वयंतुधर्मार्थंस

नित्यंजीवितंयतः ॥ वित्तस्यभागपंचकंकृत्वाभागत्रयंजीवनार्थंभागद्वयंदानार्थमितिहेमाद्रिः ॥ ॥अथअग्राह्यदानानितुस्कांदे॥ ॥ अजिनंमृतशय्यांचमेषींचोभयतोमुखीम् ॥ कुरुक्षेत्रेचगृण्हानोनभूयःपुरुषोभवेत्॥ ॥मनुः॥ ॥हिरण्यंभूमिमश्वंगामन्नंवासस्तिलान्घृतम्॥ अविद्वान्प्रतिगृण्हानोभस्मीभवतिकाष्ठवत्॥ अविद्वान्नामविद्यातपोभ्यांहीनेननग्राह्यमिति॥ ॥अथदानकालःवाराहे॥ ॥ दर्शेशतगुणंदानंतच्छतघ्नंदिनक्षये॥ शतघ्नंतच्चसंक्रांतौशतघ्नंविषुवेततः॥ युगादौतच्छतगुणंअयनेतच्छताहतं॥ सोमग्रहेतच्छतघ्नंतच्छतघ्नंरवेर्ग्रहे॥ तच्छतघ्नंव्यतीपातेदानंवेदविदोविदुः॥ विष्णुधर्मोत्तरे॥ ॥ वैशाखीकार्तिकीमाघीपौर्णिमातुमहाफला॥ पौर्णमासीषुसर्वासुमासर्क्षसहितासुच॥ दत्तानामिहदानानांफलंशतगुणंभवेदिति॥ अपुण्यदेशः॥ यत्तुमनुः॥ दृषद्वतीसरस्वत्योर्देवनद्योर्यदंतरम्॥ तंदेवनिर्मितंदेशंब्रम्हावर्तंप्रचक्षते॥ नारदः॥ पुण्यदेशेषुसर्वेषुगृहेदेवालयादिषु॥ यत्रसाधनसंपत्तिस्तत्रदानंसमाचरेत्॥ ॥भविष्यपुराणे॥ ॥वाराणसीकुरुक्षेत्रप्रयागपुष्करंतथा॥ गोकर्णंनैमिषारण्यंसेतुंश्रीपर्वतंतथा॥ महाकालंतथागंगाप्रेतान्पुण्यतमान्विदुः॥ पाद्मे लिंगंवाप्रतिमांवापिदृश्यतेयत्रकुत्रचित्॥ तत्सर्वंपुण्यतांयातिदानेषुचमहाफलमिति॥ एषुदानंप्रतिप्रशस्तमितिहेमाद्रिः॥ अथतीर्थेप्रतिग्रहनिषेधःपाद्मे॥ नतीर्थेप्रतिगृण्हीयात्प्राणैःकंठगतैरपिइति॥ तीर्थेनीरेक्षेत्रेच॥ गंगाकृष्णागोदावर्योस्तीरमाहविष्णुः॥ गंगागोदावरीकृष्णातीरमाहुर्महर्षयः॥ उत्तरेनवगव्यूतिर्दक्षिणेयोजनत्रयमिति॥ भविष्ये ॥ तीराद्गव्यूतिमात्रंतुपरितःक्षेत्रमुच्यतेइति॥ गंगायांतुतीरेपिनग्राह्यमित्यर्थः॥ ब्राम्हे॥ प्रवाहमवधिंकृत्वायावद्धस्तचतुष्टयं॥ तत्रनप्रतिगृण्हीयात्प्राणैःकंठगतैरपीति॥ प्रवाहोगर्भःदानधर्मे॥ भाद्रस्यकृष्णचतुर्दश्यांयावदाक्रमतेजलं॥ तावद्गर्भंविजानीयात्तदूर्ध्वंतीरमुच्यतेइति॥ गर्भप्रतिग्रहनिषेधःप्रसिद्धनदीषु॥ गंडक्यादिषुतुतीरेनिषेधः॥ तदु

कंदानधर्मे॥गंडक्यादिषुतीरेपिनग्राह्यंभूतिमिच्छतेतिवचनात्॥अत्यंतापदितीर्थेपिग्राह्यं॥अथचेत्प्रतिगृण्हीयाद्ब्राह्मणोवृत्तिकर्शितः॥दशांशमर्जि
तंदद्यादेवंधर्मोनहीयतइतिपाद्मात्॥ अथदानकृत्यंवाराहे॥ ॥कृतस्नातःसम्यगाचांतःकृतसंध्यादिकक्रियः॥कामक्रोधविहीनश्चपाखंडस्पर्शव
र्जितः॥ दद्यादितिशेषः॥ ॥कात्यायनः॥ ॥कुशोपरिनिविष्टेनतथायज्ञोपवीतिना॥देयंप्रतिगृहीतव्यमन्यथाविफलंभवेदिति॥ ॥गौतमः॥ ॥
अंतर्जानुकरंकृत्वासकुशंसतिलोदकं॥फलान्यपिचसंधायप्रदद्याच्छ्रद्धयान्वितः॥नामगोत्रेसमुच्चार्यप्राङ्मुखोदेयकीर्तनात्॥उदङ्मुखा
यविप्रायदत्वातत्स्वस्तिकीर्तयेत्॥सदेवताकदेयकीर्तनानंतरंदत्वेत्यर्थः॥ ॥अथप्रतिगृहीतृकृत्यंतत्रैव॥ ॥ॐकारमुच्चरन्प्राज्ञोद्रविणं
सकुशोदकं॥गृण्हीयाद्दक्षिणेहस्तेतद्दत्तेस्वस्तिकीर्तयेत्॥प्रतिगृहीतासावित्रंसर्वत्रैवानुकीर्तयेत्॥सावित्रंदेवस्यत्वेति॥ततस्तत्कीर्तयेत्सार्धं
द्रव्यंचद्रव्यदेवतां॥संप्रापयेत्ततःपश्चात्कामस्तुत्याप्रतिग्रहं॥यथाशास्त्रंकइदंकस्माअदादितिमंत्रंपठित्वेत्यर्थः॥ ॥आदित्यपुराणे॥ ॥
प्रतिग्रहंपठेदुच्चैःप्रतिगृह्यद्विजोत्तमात्॥मंदंपठेत्तुराजन्यादुपांशुंचतथाविशि॥मनसाचतथाशूद्रेस्वस्तिवाचनमेवच॥ॐकारंब्राम्हणेकुर्या
न्निराकारंमहीपतौ॥उपांशुचतथावैश्येमनसाशूद्रजेतथेतिकौर्मात्॥पुनस्तत्रैव॥प्रतिग्रहस्यधर्मंचनजानातिद्विजोविधिं॥द्रव्यस्यान्यस्यसम
घुत्तोनरकंप्रतिपद्यतइति॥ तथा॥ विधिंतुधर्मंविज्ञायब्राम्हणस्तुप्रतिग्रहे॥दात्रासहतरत्येवमहादुर्गाण्यसौध्रुवमितियाज्ञवल्क्योक्तेश्च
॥अथद्रव्यमानं॥ ॥याज्ञवल्क्यः॥ ॥जालसूर्यमरीचिस्थंत्रसरेणुस्ततःस्मृतम्॥तेष्टौलिक्षास्तुतास्तिस्रोराजसर्षपउच्यते॥गौरस्तुते
त्रयःषट्तेयवोमध्यश्चतेत्रयः॥कृष्णलःपंचतेमाषास्तेसुवर्णस्तुषोडश॥पलंसुवर्णश्चत्वारःपंचवापरिकीर्तितम्॥द्वेकृष्णलेरूप्यमाषो

धरणंषोडशैर्वते।। शतमानंतुदशभिर्धरणैःपलमेवतु।। निष्कःसुवर्णाश्चत्वारइतिहेमाद्रिः।। अथधान्यमानंभविष्ये।। पलद्वयंतुप्रसृतिंकुडवोद्विगुणंमतम्।। चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः।। आढकैस्तैश्चतुर्भिश्चद्रोणस्तुकथितोबुधैः।। द्रोणैःषोडशभिःखारीविंशत्याकुंभउच्यते।।कुंभैस्तैर्दशभिर्वाहोधान्यमानंप्रकीर्तितमिति।।अथदानेप्रदक्षिणापरिमाणमाहव्यासः।।सुवर्णंपरमंदानंसुवर्णंदक्षिणापरा।।सर्वेषामेवदानानांसुवर्णंदक्षिणोच्यते।। अदक्षिणंतुयद्दानंतत्सर्वंनिष्फलंभवेदिति।।परेत्युक्तेः।।पुरुषाहारोपयिकतंदुलादिकमपिदक्षिणेतिहेमाद्रिः।।तथा।।देयद्रव्यतृतीयांशंदक्षिणांपरिकल्पयेत्।।अनुक्तदक्षिणादानेदशांशंवापिशक्तितः।। भविष्ये।। ज्ञेयंनिष्कशतंपार्थदानेषुविधिरुत्तमः।। मध्यमस्तत्तदर्धेनतदर्धेनाधमःस्मृतः।।मेध्यांचकालपुरुषेतथान्येषुमहत्सुच।। एवंवृक्षेरथेभेचधेनोःकृष्णाजिनस्यच।।अशक्तस्यापिक्लृप्तोयंपंचसौवर्णिकोविधिरिति।।जपाभिषेकमुदाहृत्यलिंगपुराणे।। अष्टषष्टिपलोन्मानंदद्याद्वैदक्षिणांगुरोः।।होतॄणांचैवसर्वेषांत्रिंशत्पलमुदाहृतं।।तदर्धंजापकानांचद्वारपालास्तदर्धतः।।एतेनसर्वत्रगुरोरर्धमृत्विजानांतदर्धंजापकानांतदर्धंद्वारपालानामितिहेमाद्रौदक्षिणाविभागोऽवगंतव्यः।। अथद्रव्यदेवताविष्णुधर्मोत्तरे।। अभयंसर्वदैवत्यंभूमेर्वैविष्णुदेवता।। कन्यादानंतथादासीप्राजापत्याःप्रकीर्तिताः।।प्राजापत्योगजःप्रोक्तस्तुरगोयमदैवतः।।तथाचैकशफंसर्वंकथितंयमदैवतं।। महिषश्चतथायाम्यउष्ट्रोवैनैर्ऋतोभवेत्।। रौद्रीधेनुर्विनिर्दिष्टाछागमाग्नेयमादिशेत्।।मेषंतुवारुणंविद्याद्वाराहंवैष्णवंतथा।।अरण्याःपशवःसर्वेकथितावायुदेवताः।।जलाशयानिसर्वाणिवारिधानीकमंडलुम्।।कुंभंचकरकंचैववारुणानिनिबोधत।।सामुद्राणिचरत्नानिवारुणानिद्विजोत्तमाः।। आग्नेयंकनकंप्रोक्तंसर्वलोहानिचाप्यथ।।प्राजापत्यानिसस्यानिपक्वान्नमपिचद्विज।।संज्ञेयाःसर्वगंधाश्चगांधर्वावैविचक्षणैः।।विद्याब्राह्मी

विनिर्दिष्टाविद्योपकरणानिच॥ सारस्वतानिज्ञेयानिपुस्तकादीनिपंडितैः॥ सर्वेषांशिल्पभांडानांविश्वकर्मातुदेवता॥ द्रुमाणामथपुष्पाणांशाकेहरितकेस्त
था॥ फलानामथसर्वेषांतथाज्ञेयोवनस्पतिः॥ मत्स्यमांसेविनिर्दिष्टंप्राजापत्यंतथैवच॥ छत्रंकृष्णाजिनंशय्यारथमासनमेवच॥ उपानहौतथापात्रंयच्चा
न्यत्प्राणवर्जितम्॥ सर्वंचांगिरसत्वेनप्रतिगृण्हीतमानवः॥ भूपोपयोगियत्सर्वंशस्त्रचर्मध्वजादिकं॥ नृपोपकरणंसर्वंविज्ञेयंसर्वदैवतं॥ गृहंतुशक्रदैवत्यं
यदनुक्तंद्विजोत्तमाः॥ विज्ञेयंविष्णुदैवत्यंसर्वदाद्विजसत्तमाइति॥ प्रतिग्रहस्थानानितुगृह्यपरिशिष्टे॥ प्रतिगृण्हीतगांपुच्छेकर्णेवाहस्तिनंकरे॥ भूमिं
दासींमजंचैवपृष्टेश्वतरगर्दभौ॥ अश्वंकर्णेसटायांवाअन्नमुद्दिश्यधारयेत्॥ शय्यासनगृहंक्षेत्रंसंस्पृश्यादायकांचनं॥ उष्ट्रंचककुदेस्पृष्ट्वामृगांश्चम
हिषादिकान्॥ गोधामश्वविधानेनपक्षेसंस्पृश्यपक्षिणः॥ छत्रंदंडंतरुंमूलेफलंसंगृह्यगौरवात्॥ प्रगृह्योपानहौमंत्रंवायसेत्प्रतिमुच्यते॥ अमत्रंपा
त्रं॥ वासस्तथासमादायकन्यांशीर्षेथवाकरे॥ कन्यायादक्षिणांसमभिस्पृशेदित्यर्थः॥ रतिभार्योपरपूर्वांप्रतिगृण्हीतचाक्षतां॥ पुत्रमुत्संगमारोप्यप्र
तिगृण्हीतदत्तकं॥ रथंरथमुखेस्पृष्ट्वाप्रतिगृण्हीतकूबरे॥ कूबरोयुगाधारकाष्ठं॥ तथा॥ ॥हेमाद्रौदानखंडे॥ ॥भूमेःप्रतिग्रहंकुर्यात्भूमिंकृत्वा
प्रदक्षिणां॥ करेगृहीत्वाकन्यांतुदासदास्यौद्विजोत्तमाः॥ आरुह्यचगजस्योक्तंकर्णेवाश्वस्यकीर्तितः॥ तथाचैकशफानांतुसर्वेषांचविशेषतः॥ प्रति
गृण्हीताजांशृंगेपुच्छेकृष्णाजिनंतथा॥ येचैकशफाःशृंगिणस्तान्विशेषतःशृंगेप्रतिगृण्हीयादित्यर्थः॥ कर्णेचपशवःसर्वेग्राह्याःपुच्छेविचक्षणैः
॥ गृण्हीयान्महिषंशृंगेखरं वैपृष्ठदेशतः॥ प्रतिग्रहमथोष्ट्रस्ययानानांचाधिरोहणात्॥ बीजानांमुष्टिमादायरत्नान्यादायसर्वतः॥ वस्त्रंदशांतादादद्या
त्परिधायापिवापुनः॥ आरुह्योपानहौमंचमारुह्यैवचपादुके॥ धर्मध्वजौतुसंस्पृश्यगृण्हीयात्॥ अवतीर्यचसर्वाणिजलस्थानानिवैद्विजाः॥ आयुधा

निसमादायतथामुच्यविभूषणं।। आमुच्यबध्वेत्यर्थः।। इतिप्रतिगृह्यस्थानानि।। ।।अथादौतुलापुरुषदानं।। ।।हेमाद्रौमात्स्ये।। अनेनविधिनायस्तुतुलापुरुषमाचरेत्।। प्रतिलोकाधिपस्थानेप्रतिमन्वंतरंवसेत्।।विमानेनार्कवर्णेनकिंकिणीजालमालिना।।पूज्यमानोप्सरोभिश्चततोविष्णुपुरंव्रजेत्।। कल्पकोटिशतंयावत्तस्मिन्लोकेमहीयते।।कर्मक्षयादिहपुनर्भुविराजराजोभूपालमौलिमणिरंजितपादपीठः।। श्रद्धान्वितोभवतियज्ञसहस्रयाजीदीप्तप्रतापजितसर्वमहीपलोकः।।योदीयमानमपिपश्यतिभूतियुक्तःकालांतरंस्मरतिवाचयतीहलोके।।योवाशृणोतिपठतीद्रसमानरूपःप्राप्नोतिधामसपुरंदरदेवजुष्टमिति।। ।।तत्रैववान्हिपुराणे।। ।।एवंदत्वासुवर्णतुब्रम्हहत्यादिकंचयत्।।पापंनिहत्यपुरुषःस्वर्गलोकंसगच्छति।।तत्रस्थित्वाचिरंराजन्यदायातिमहीतले।।राजराजेश्वरःश्रीमान्वीतशोकोनिरामयः।।रूपसौभाग्यसंपन्नोनित्यंविष्णुपरायणः।।पुनर्विष्णुपदंयातियत्रगत्वानशोचति।। इतिसुवर्णादितुलापुरुषदानफलं।। ।।अथकुंडमंडपादि।। ।।तच्चसुवर्णतुलायामेवावश्यकमितिहेमाद्र्यादयः।।रत्नरजततुलायांतुकृताकृतमित्युक्तंतत्रैव।।होमाद्यशक्तौतुमंडपादिरहितमेवकुर्यात्।।नतत्रमंत्रहोमोवाएवमेवप्रदीयतइतिमात्स्योक्तेः।। ग्रहमंत्रोच्चारजापमंत्राश्चनेत्यर्थः।।अथतुलावेदीपरिमाणंचाहतत्रैव।।तत्रादौशुभेन्हिशोभार्थंकुंडमंडपमात्रंवाकृत्वासप्तहस्तांवापंचहस्तांवातृतीयांशेनचतुर्थांशेनवोच्चांवेदींकृत्वातदुपरिपूर्वपश्चिमयोःस्तंभद्वयंनिखेयं।।हेमाद्रौमात्स्ये।।शाकंगुदींचंदनदेवदारुश्रीपर्णिबिल्वप्रियकांचनोत्थं।।स्तंभद्वयंहस्तयुगावखातंकृत्वादृढंपंचकराच्छ्रितंतत्।। तदंतरंहस्तचतुष्टयंस्याद्दृढोत्तरांगंचतुरस्रमेवेति।। शाकोवृक्षविशेषोमहासारइतिप्रसिद्धः।।श्रीपर्णीभद्रतरुः।।प्रियकोजीवकः।।सारमतेकदंबः।। अंजनःकांचनतुल्यपर्णोवृक्षविशेषः।।स्तंभद्वयंचचतुरस्रीकृत्यवेदिमध्येपूर्वपश्चिमभागयोर्निखेयं।।उत्तरांगंस्तंभयोरुपरितिर्यक्काष्ठं।।तच्चपंचकरयो

स्तंभयोर्हस्तचतुष्टयोपरिनिधेयंचतुरस्रं॥ अथोत्तरांगंचतदंगमेवेतिपाठेनदीर्घमितिस्तंभसजातीयकाष्ठमित्यर्थः॥ समानजातिश्चतुलावलंब्याहैमेनम
ध्येपुरुषेणयुक्ता॥ दैर्घ्येणसाहस्तचतुष्टयंस्यात्पृथुत्वमस्याश्चदशांगुलानि॥ सुवर्णपट्टाभरणाचकार्यासलोहपाशद्वयशृंखलाभिः॥ युतासुवर्णेनचरत्न
मालाविभूषितामाल्यविभूषणाढ्या॥ समानजातिस्तोरणसमानजातिः॥ तुलोत्तरांगमध्येद्वादशभिरंगुलैरधस्तादुदगग्रा॥ अवलंब्यापुरुषेणविष्णु-
नाम्शृंखलावलिं॥ चितयासुवर्णनिर्मितयानस्मातिमालक्षद्वयंन्यस्तयोर्बहिःस्थितमंगुलषट्कंविहायविज्ञेयं॥ समतुलायाःअष्टोत्तरशतांगुलमित-
त्वात्॥ पृथुत्वंचास्याद्दशांगुलपरिमितेनवलयाकृतिसूत्रेणसंमितं॥ विधेयमित्यर्थः॥ सलोहपाशद्वयशृंखलाभियुक्ताकार्येत्यर्थः॥ तत्रैववन्हिपुराणे
॥ आश्वत्थींखादिरींचापिपालाशींवासुप्लक्षजां॥ चतुर्हस्तप्रमाणेनसुश्लक्ष्णांसुदृढांनवां॥ सुवर्तुलांसमांतद्वत्स्निग्धांछिद्रत्रयान्वितां॥ मौंजशिक्य
द्वयोपेतांबद्धांस्तंभेषुयाज्ञियइत्याहनारदः॥ चतुरस्रातुलाकार्यापादोचापितथाविधौ॥ चतुर्ष्वपिचपार्श्वेषुमानंस्याच्चतुरंगुलं॥ मुक्तातांचतुकरकावंत
योर्विन्यसेद्बुधः॥ चतुर्हस्ताधटतुलामध्येशृंखलयान्विता॥ शिक्यंहस्तत्रयंकुर्यात्कुटकंचतुरंगुलमिति॥ यदाहतत्रैवविश्वकर्मा॥ विशेषदानक
थितंतुलादितस्मात्तुलालक्षणमुच्यतेप्राक्॥ तुलाप्रमाणंस्मृतमंगुलानिदैर्घ्येगुलैःषट्नवतिप्रमाणैः॥ प्रतिद्वयेध्यंगुलषट्कपंक्तिशतांगुला
ष्टोत्तरमंगुलानां॥ स्युर्विंशतिःपंचचधातुबंधाबंधेष्वधिष्ठानसुरानिवेश्याः॥ ईशःशशीमारुतरुद्रसूर्याःस्याद्विश्वकर्मागुरुरंगिराग्नी॥ प्रजा
पतिर्विश्वजगद्विधातापर्जन्यशंभूपितृदेवताश्च॥ सौम्यश्चधर्मामरराजमश्विनौजलेशमित्रावरुणौमरुद्गणाः॥ धनेशगंधर्वजलेशविष्णुर्दंडे
चतुर्विंशतिरेवदेवताः॥ ॥अत्रसौम्योबुधः॥ स्यात्पंचविंशःपुरुषःसएकोयस्तोल्यमानस्तुलयामहात्मा॥ एताविधेयास्तपनीयमय्योरत्ना

र्त्तिनादेवतमूर्त्तयस्ताः॥षडंगुलःस्याच्चतुरस्रपिंडःप्रांतद्वयेविष्णुरनंतनामा॥पार्श्वद्वयंतच्चतुरंगुलंस्याद्वंशमयानेकथितंप्रमाणं॥मध्यांकुटेसंकुलिकांगुलानि पंचाधिकाविंशतिरेवदैर्घ्ये॥एकांगुलःस्याद्ववर्तीहिपिंडस्तत्राधिदेवःकिलवासुकिःस्यात्॥ ॥एकैकरज्जुर्लगतेंगुलानित्रिंःसप्ततिःपिंडगतांगुलाच ॥तच्चैलकद्वंद्वसथांगुलानिविंशस्तथापंचदशाधिकास्यात्॥तन्द्वातुबद्धंसुभकाष्ठपीठंपिंडंतथाद्वंद्वमर्थाविधेयम्॥ ॥अथोघटीभूम्यधिदेवतास्यात्तुला तरेभूमिपार्तेनिवेश्यइति॥हेमाद्रौमात्स्योक्तेः॥वेद्यादितुलाद्यंगलक्षणंच॥ ॥अथवेद्यांषोडशारचक्रलिखनप्रकारउक्तोमदनरत्ने॥ ॥तत्राचार्यो वेद्यांमध्येत्रिहस्तव्यासंचतुरस्रंप्रसाध्यप्रागपरदक्षिणोत्तरनवरेखाभिश्चतुःषष्टिकोष्ठकंकुर्यात्॥ ॥तत्रकोष्ठानिप्रत्येकंनवनवांगुलानिसंपद्यंते ॥ततोबाह्यांत्यपंक्तिषुचतुर्दिक्षुमध्यकोष्ठानिचत्वारिचत्वारिमार्जयित्वा तदुपर्युपांत्यपंक्तिषुपार्श्वयोस्तत्रत्रयंत्रयंत्यक्त्वाप्रतिदिशंप्रतिमध्यकोष्ठद्वयंद्वयंमार्जयेत्॥ ॥तच्चतुर्दिक्षुषट्षट्कोष्ठानिचत्वारिद्वाराणिसिध्यंति॥ ॥ततोमध्यस्थितषोडशकोष्ठानिमार्जयेत्॥ ॥ततोबाह्यएकैककोणकोष्ठं विहायकोणकोष्ठद्वारपीठांतरालवर्तीन्यवशिष्टानिपंचपंचकोष्ठानिमार्जयेत्॥ ॥तथाचमध्यचतुरस्रपीठपादाःसिध्यंति॥ ॥ततोमध्याच्चत्वारिवृत्तानिकुर्यात्॥ ॥तत्राद्येचत्वार्यंगुलानिव्यासः॥ ॥द्वितीयेष्टौ॥ तृतीयेचतुर्विंशतिः॥ चतुर्थेषड्विंशतिरिति॥ ॥तच्चतुरंगुलवृत्तंकर्णिकारूपंपीतेनरजसापूरयित्वाकर्णिकावधिरेखांसितेनरजसानिर्माप्यतद्बहिरष्टांगुलात्मकेवृत्तेपीतरक्तसितरजोभिःसंपादितमूलमध्याग्राणिषोडशकेसराणिसंपाद्यतत्केसरावधिरेखांसितेनैवरजसांगुलान्तरांसंपाद्यचतुर्विंशांगुलात्मकेतद्बहिर्वृत्तेसितेनरजसाष्टदिक्ष्वष्टौपत्राणिरक्ताग्राणिकुर्यात्॥ततोदलांतरेरेखांसितेनरजसाविधायदलांतराणिकृष्णेनरजसापूरयित्वातद्बहिरेकांगुलांतराबाह्यवृत्तरेखांसितेनैवरजसासंपाद्यवृत्तद्वयांतरपरितोष्टदलाग्रत

न्मध्यचिन्हैःषोडशधाविभज्यमतिभागंपवाकारान्षोडशारान्श्यामपीतारुणश्वेतरजोभिःकल्पयित्वातदंतरेणयथायोगंरजोभिःपूरयित्वातद्बहिःसितपी
तारुणश्यामहरिताःपंचरेखालिखेत्॥तद्बहिःपीठक्षेत्रंचतुरस्रंयथाशोभंरजोभिःरक्तकृष्णपीठावधिरेखांसितेनरजसाचतुरस्रांरचयेत्॥द्वारक्षेत्राणि
पूर्वादितःपीतश्यामसितहरितरजोभिःपूरयेत्॥आग्नेयादिकोणकोष्ठचतुष्टयंलोहितहरितश्यामधवलैःपूरयेत॥आग्नेयादिपीठपादचतुष्टयंपंचको
ष्ठात्मकंतुक्रमात्सितरक्तपीतकृष्णरजोभिःपूरयेत्॥ततःसितेनरजसांगुलान्तेनबहिश्चतुरस्रेरेखांकुर्यादितिमदनरत्नादयः॥ठक्कुरमतेतुचतुरस्रं
चतुर्हस्तंतत्रप्रत्येकंद्वादशांगुलानिनवकोष्ठानि॥वृत्तानितुपंच॥तत्राद्यवृत्तेचत्वार्यंगुलानिव्यासः॥द्वितीयेष्टौ॥तृतीयेविंशतिः॥चतुर्थेचतुर्विंशतिः॥पंचमेतच्चतुरस्रं
बहिस्ततोष्टत्रिंशदिति॥पंचकोष्ठात्मकंपीठपादचतुष्टयं॥आग्नेयादिक्रमेणरक्तहरितश्यामसितैःपूरणीयंकोणकोष्ठचतुष्टयंप्रत्येकंत्रिभिस्त्रिभिर्वर्णैरितिविशेषः
॥इदमेववारुणमंडलंजलाशयोत्सर्गादौज्ञेयं॥ पुनस्तत्रैव ॥वज्रंप्रागुत्तमेभागेआग्नेय्यांशक्तिमुज्वलां॥आलिखेद्दक्षिणेदंडंनैऋत्यांखड्गमालिखेत्
॥पाशंतुवारुणेलेख्यंध्वजंवायुगोचरे॥कौबेर्यांतुगदांलिख्यईशान्यांशूलमालिखेत्॥शूलस्यवामदेशेतुचक्रंपद्मंचदक्षिणे॥ततोमंडलंबहु
परिपंचवर्णफलपुष्पोपशोभितंवितानंकुंडमंडपबध्नीयादिति॥ ॥इतिवह्युपरिषोडशारचक्रं॥ ॥अथघृतादितुलाफलमुक्तंहेमाद्रौविष्णुधर्मो
त्तरे॥ पयसातुघृतस्योक्तातेजोवृद्धिकरीशुभा॥ माक्षिकेणतुसौभाग्यंतैलेनबहुलाःप्रजाः॥वस्त्रेणदिव्यवस्त्राणिप्राप्नोतितुलयाध्रुवं॥लवणेनतु
लावण्यमरोगित्वंगुडेनच॥असपत्नःशर्करयासुरूपंचंदनेनतु॥अवियोगोभवेद्भर्त्रातुलयाकुंकुमस्यच॥नसंतापोहृदिभवेत्क्षीरस्यतुलयातथा
॥सर्वकामप्रदाःसर्वाःसर्वपापक्षयंकराः॥यःकरोतितुलाःसर्वाःसगौर्यालयमाप्नुयात्॥मंत्रेणदद्यादभिमंत्रितांतुसकृत्तुलामेकतमांद्विजेभ्यः॥सया

तिगौर्याःसदनंसुपुण्यंनशोकदौर्भाग्यमुपाप्नुतेपुमान्॥ त्वंतुलेसर्वभूतानांप्रमाणमिहकीर्तिता॥ मांतोलयंतीसंसारादुद्धरस्वनमोस्तुते॥ इत्यारुह्य॥
गादाहकालंतत्रासीत्स्थितयित्वाहरिप्रिया॥ अवरुह्यततोदद्यादर्घ्यपाद्यमथापिवा॥ गुरुस्संपूज्यविधिवद्वस्त्रालंकारभूषणैः॥ विसर्जयेन्नमस्कृत्य
भाजयेद्द्विजपुंगवान्॥ शेषंद्विजेभ्योदातव्यंस्त्रीभ्योन्येभ्यस्तथैवच॥ कदलीदलसंस्थांश्चपंचपिंडान्हिमाद्रिजा॥ कर्पूरस्यतुलांपूज्यकुंकुमस्यमेत्तुतां
विधिनाननयादद्यात्तुलादानंविमत्सरः॥ सलोकमेतिपार्वत्याःसेव्यमानोप्सरोगणैः॥ तत्रापिकालंसुचिरमिहलोकेनृपोभवेत्॥ आस्यंतुल्यंसुवर्णंवा
रजतंरत्नमेववा॥ योददातिद्विजाग्र्येभ्यस्तस्याप्येतत्फलंलभेत्॥ ॥एतद्भूमिदानजन्यम्॥ ॥ब्रम्हहत्यादिपापाद्यैर्मुक्तःशिवपुरंव्रजेत्॥ सचतत्पाप
निर्मुक्तःमोक्षंविष्णुपुरंव्रजेत्॥ तुलापुरुषभूपोचदीयमानेतुपर्वराः॥ पश्यंतितेपिवायांतियेवास्युरनुमोदकाः॥ गुडंवायादवाखंडंलवणंवापितोलितं॥
योदद्यादात्मनातुल्यंनारीवापुरुषोपिवा॥ पुमान्महेश्वरस्स्यात्तुनारीस्यात्पार्वतीसमा॥ सुभगोरूपसंपन्नोभुंजीतांतेत्रिविष्टपं॥ हिरण्यदक्षिणायुक्तं
सुवस्त्रंभूषणान्वितं॥ अलंकृत्वाद्विजाग्र्यंतंपरिधाप्यचवाससी॥ खंडादितोलितंपश्चाद्गुरवेप्रतिपादयेत्॥ सर्वकामसमृद्धात्मानंतकालंवसेद्दिवीति
॥ ॥इतिघृतादितुलादानफलं॥ ॥ अथनानारोगनिरासार्थंद्रव्यविशेषतुलादानान्युक्तानिगारुडे॥ ॥तुलापुरुषदानंतुश्रृणुमृत्युंजयाद्भव॥ अ-
थलोहंप्रदातव्यंसर्वरोगोपशांतये॥ कांस्यंचयक्ष्मणेदेयंत्रपुचार्शोविकारके॥ अपस्मारेतुसीसंस्यात्ताम्रंकुष्ठेचदारुणे॥ पित्तलंरक्तपित्तेचरूप्यंप्रदर
मेहयोः॥ सुवर्णंसर्वरोगेषुप्रदद्यान्मृत्युनाशनं॥ फलोद्भवंतथादेयंग्राहिण्यादौर्धवाहिणे॥ गौडंभस्मकरोगेचपोगंस्याद्गुडमालके॥ ॥पोगंपूगीफलं॥
काष्ठजंचाग्निमांद्येस्याद्रोगोत्पत्तौतुपेष्टकं॥ मधूद्भवंतथादेयंकासश्वासजलोदरे॥ घृतोद्भवंतथादेयंछर्दिरोगोपशांतये॥ क्षीरंपित्तविनाशायदधिस्याद्ग

गदारणे॥ लवणंवेपनाशायपेष्टंदद्रुविनाशने॥ ॥धान्यंचसर्वरोगस्यनाशनेमुनिभिःस्मृतमिति॥ अन्नायंसंक्षेपोदानोद्योतेपि॥ रूप्यतुलायांसुवर्णतुलाफलमेव॥पितृतृप्तिःप्रदरमेहनाशश्च॥ रत्नतुलायांस्वर्णफलमेव॥ ताम्रेणकुष्ठनाशः॥ लोहेनसर्वरोगविनाशः॥ घृतेनतेजोवृद्धिःछर्दिनाशश्च॥ गुडेनारोगित्वंसौभाग्यवृद्धिश्च॥ लवणेनलावण्यंसौभाग्यंच॥मधुनासौभाग्यंकासश्वासजलोदरनाशश्च॥ तैलेनप्रजावान्भवति॥ क्षीरेणपित्तनाशःसंतापनिवृत्तिश्च॥ दध्नाभगंदरनाशः॥ शर्करयासपत्नबाधानिवृत्तिः॥ अन्नेनारोगित्वं॥ पिष्टेनदद्रुनाशः॥ फलैःसंग्रहणीनाशः॥ क्रमुकैर्गंडमालानाशः॥ क्रमुकंपूगीफलं॥ मुखदुर्गंधिनाशनं दद्रुनाशश्च॥ चंदनेनसौंदर्यवान्॥गंधेनसौभाग्यं॥वस्त्रैर्दिव्यवस्त्रावाप्तिः॥ काष्ठैरग्निमांद्यनाशः विष्णुप्रीतिर्वासर्वद्रव्यैरपीति॥ इतिनानारोगनिरासद्रव्यविशेषतुलाः॥ ॥अथपूजार्थंतत्तद्द्रव्याधिदेवतामाह॥ ॥गारुडे॥ ॥अधिदैवंतुलोहेवेमहाभैरवउच्यते॥ कांस्येत्रपावशिवेनोचवायुश्चसीसकेस्मृतः॥ ताम्रेसूर्यस्तथाप्रोक्तःपैत्तलेचकुहूस्तथा॥ रौप्येचपितरोज्ञेयाःसौवर्णेसर्वदेवताः॥ फलेसोमोगुडेचापस्तांबूलेचविनायकः॥गंधर्वाःकुसुमेष्वेवजांगलेग्निस्तथास्मृतः॥ ॥जांगलेकाष्ठे॥ मधौयक्षंप्रयत्नेनघृतेमृत्युंजयस्तथा॥ क्षीरेनागगणाःसर्वेदध्निसर्पाःप्रकीर्तिताः॥लवणेपार्वतीदेवीसमुद्रेष्वाधिदेवता॥पिष्टेप्रजापतिर्देवो अन्नेसर्वाश्चदेवताः॥ आर्तिर्यदास्यात्पात्राणामभ्युपात्तुण्यदेशतः॥ नित्यंमृत्युंजयप्रीत्यैविधिनायत्प्रदीयते॥तदेवसर्वशांत्यर्थंभवतीतिनसंशयः॥तुलापुरुषदानेनमृत्युंजयंतिमानवः॥ आगमोक्तमृत्युंजयमंत्रेणपूजयित्वेत्यर्थः॥ नाममंत्रेणवायथाधिकारंयोज्यम्॥ ॥इतिद्रव्याधिदेवताः॥ ॥अथकालविशेषः॥ ॥दानोद्योतेविश्वामित्रः॥ ॥आदित्येराहुणाग्रस्तेसुवर्णैस्तोलयेत्तनुं॥ सोमग्रहेतुरौप्येणमहादानंतथाशृणु॥ प्रवर्ग्यस्समुखेजातउत्पन्नःपितृदेहतः॥ सर्वपापहरायेनहृदानिर्मायतांविधुः॥

इत्युच्चार्यजलंतस्यकरेनिक्षिपेद्द्विजसत्तमेति॥ ॥अथतुलापुरुषदानविधिः॥ ॥हेमाद्रौविष्णुधर्मोत्तरे॥ तुलादानंप्रवक्ष्यामिसर्वपापप्रणाशनं॥यच्छौर्याच
रितंपूर्वंलक्ष्मीनारायणेनतु॥पुण्यंदिनमथासाद्यतृतीयायांविशेषतः॥गोमयेनानुलिप्तायांभूमौकृत्वाघटंशुभं॥दारवंशुभवृक्षस्यचतुर्हस्तप्रमाणतः॥
सुवर्णेनत्रबध्नीयाच्चशक्त्याघटितंघटे॥सौवर्णंस्थापयेत्तत्रवासुदेवंचतुर्भुजं॥शिक्यद्वयंचबध्नीयात्स्थापयेत्पीठदेततः॥तत्रारोहेत्सवस्त्रस्तुःसर्वालंकार
भूषितः॥अभीष्टदेवतांगृह्यस्नापयित्वाघृतादिभिः॥तुलापुरुषदानस्यविधिरेषःप्रकीर्तितः॥ अत्रविधिरेषप्रकीर्तितइतिएतावत्येवकर्तव्यतेत्युक्तं॥भवती
तिदामोदरः॥नान्यदितितुलादानमधिकृत्यलिंगपुराणे॥दक्षिणाचशतंसार्द्धंतदर्धंवापिदापयेत्॥ ॥गुरोरितिशेषः॥ ॥ऋत्विजांचैवसर्वेषांदद्यात्प्रत्य
ग्भदापयेदिति॥ ॥तथा॥ ॥यजमानः॥अयनग्रहणसंक्रमादिपुण्यकालमासाद्यपूर्वेद्युरेकभक्ताचरितप्रायश्चित्तःकृतनित्यक्रियोदर्भेष्वासीनोदर्भान्धार-
यमाणः शुक्लाम्बराचम्यदेशकालौसंकीर्त्यममामुककामनासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंअमुकद्रव्यतुलापुरुषदानंकरिष्ये इतिसंकल्प्यअथारोगनिरासार्थं
तु ममामुकरोगनिरासेनममास्यशिशोर्वामुकरोगनिरासेनक्षिप्रारोग्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थमिति॥तथा॥ यदातुशिष्टाचारवशात्प्राप्यादितुलारू
अष्टमांशंचतुर्थांशंवासुवर्णरजतादिप्रक्षिप्यतेचेत्तदासुवर्णादितुलयाचतुर्थांशाष्टमांशादितुलाविशेषफलप्राप्तिद्वाराइत्युल्लेखःकार्यः॥ ॥तदंगतयाग
णपतिपूजनंपुण्याहवाचनमाचार्यवरणमंगदेवतापूजनमहंकरिष्ये॥इतिसंकल्प्य॥गणपतिंसंपूज्यपुण्याहंस्वस्तिऋद्धिःश्रीःकल्याणमितिशब्दपंचात्म
कंबोधयेनोक्तं॥ब्राह्मणांस्त्रिस्त्रिर्वाचयित्वाचार्यंवृत्वानार्यस्तकलशायांगौरीविष्ण्वादितुलांगदेवताश्चपूजयित्वारोगनिरासार्थंतुमहामृत्युंजयमंत्रेणप्रति
मायांमृत्युंजयताम्रादितोलनीयद्रव्यादिदेवताश्चपूजयेदिति॥इतितुलापुरुषदानविधिविशेषः॥ ॥अथतुलादानप्रयोगः॥ ॥यजमानःशुक्लाम्बर

स्यशाणानामस्य देशकालौ संकीर्त्य एकैकमन्वंतरकालावच्छिन्नप्रतिलोकपालस्थाननिवासपूर्वकार्कवर्णकिंकिणीजालमालिविमानकरणकाप्सरःपूजामहितशिवपुरगमनपूर्वककल्पकोटिशतावच्छिन्नविष्णुपुराधिकरणकनिवासकामः सुवर्णरत्नरौप्यतुलापुरुषमहादानमहं करिष्ये॥ यद्वा॥ ब्रह्महत्यादिसकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सुवर्णरत्नरौप्यतुलापुरुषमहादानं करिष्ये॥ ॥तत्रादौ गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धाचार्यवरणादि कुर्यात्॥ ताम्रादितुलायां तु संकल्पानंतरं गणपतिपूजनपूर्वोक्तपुण्याहवाचनमात्रं कृत्वाचार्यं वृत्वा यथाविभवं वस्त्रालंकारादिभिः पूजयेत्॥ तत आचार्यो गोमयोपलिप्तवेद्यादौ सर्षपविकिरणपंचगव्यप्रोक्षणे कृत्वा वेद्यां वारुणमंडलं विलिख्य उपरि कुंडमंडपें । र्णवितानं फलपुष्पोपशोभितं संध्वजं बध्वा वेद्यादौ धटमाबध्य तत्र दक्षिणोदक्शिक्यां तुलां बध्नीयात्॥ गौरीप्रीत्यर्थं तुलायां कर्पूरकृतपंचपिंडिकारूपाः॥२॥ कुंकुमेनानुपूजयेत्॥ ततो धर्मराजसूर्यविष्णुप्रतिमाः तिस्रो माषमात्रसुवर्णनिर्मिता अग्न्युत्तारणादिपूर्वकं संपूज्य इष्टदेवतां च पंचामृतेनाभिषिच्याभ्यर्च्य विष्णुप्रतिमां तुलामध्ये बध्वा ततः पूर्वोक्ततोलनीयद्रव्यादिदेवतां संपूज्य तुलायै नमः इति तुलां च तुलाप्रांतकूटयोर्विष्णुमनंतं मध्यकूटे वासुकिं फलकद्वये भूमिं च संपूज्य रक्तवस्त्रेण तुलां संवेष्टयेत् ततः शक्तौ सत्यां तुलादंडे सुवर्णनिर्मिताश्चतुर्विंशतिप्रतिमाः उदक्संस्थां देवतामावाहयेत्॥ ॥पूजयेच्च॥ ॥तदित्थं॥ ॐ ईशानाय नमः॥ ईशानं आवाहयामि॥१॥ एवं सर्वत्र॥ ॐ शशिने नमः॥ शशिनं आवाहयामि॥२॥ ॐ मारुताय० ३॥ ॐ रुद्राय०॥४॥ ॐ सूर्याय न०॥५॥ ॐ विश्वकर्मणे०॥६॥ ॐ गुरवे नमः॥७॥ ॐ अंगिरोग्निभ्यां न०॥८॥ ॐ प्रजापतये०॥९॥ ॐ विश्वेभ्यो देवेभ्यो०॥१० ॐ धात्रे नमः॥११॥ ॐ पर्जन्यशार्ङ्गिभ्यां०॥१२॥ ॐ पितृभ्यो न०॥१३॥ ॐ सोम्याय०॥१४॥ ॐ धर्माय०॥१५॥ ॐ अमरराजाय०॥१६॥ ॐ अश्विभ्यां न०॥१७॥ ॐ जलेशाय०॥१८॥ ॐ मित्रावरुणाभ्यां०॥१९॥

ॐमरुद्गणेभ्यो०॥२०॥ॐधनेशाय०॥२१॥ॐगंधर्वाय०॥२२॥ॐजलेशाय०॥२३॥ॐविष्णवे०॥२४॥इत्यावाह्यसंपूज्य॥ततोयजमानोवस्त्राभरणगंधमाल्याद्यलंकृतःकुसुमांजलिंगृहीत्वातुलांत्रिःप्रदक्षिणीकृत्यप्राङ्मुखउपविश्यप्रार्थयेत्॥ॐनमस्तेसर्वदेवानांशक्तिस्त्वंसत्यमाश्रिता॥साक्षिभूताजगद्धात्रीनिर्मिताविश्वयोनिना॥एकतःसर्वसत्यानितथानृतशतानिच॥धर्माधर्मकृतांमध्येस्थापितासिजगद्धिते॥त्वंतुलेसर्वभूतानांप्रमाणमिहकीर्तिता॥मांतोलयंतीसंसाराद्धुद्धरस्वनमोस्तुते॥योसौतत्वाधिपोदेवःपुरुषःपंचविंशकः॥सएषोधिष्ठितोदेवित्वयितस्मान्नमोनमः॥ नमोनमस्तेगोविंदतुलापुरुषसंज्ञक॥त्वंहरेतारयस्वास्मानस्मात्संसारसागरादिति॥इतिपठित्वातुलोपरिपुष्पांजलिंक्षिपेत्॥पुनस्तुलांत्रिःप्रदक्षिणीकृत्यवामहस्तेधर्मराजंदक्षिणेसूर्यमंकेस्वाभीष्टदेवतांपंचामृताभिषिक्तार्चितांचादायप्राङ्मुखस्तुलायामुत्तरफलकमारुहेत्॥दक्षिणेनसुवर्णंस्यादुत्तरेणनराधिपइतिमात्स्यवचनात्॥ ॥नराधिपइत्युपलक्षणं॥ ॥ततःआचार्योदक्षिणफलकेतोलनीयद्रव्यमारोपयेत्॥सुवर्णाद्यावत्समधिकंस्यात्॥पुष्टिकामेनभूयिष्ठमधिकंकार्यम्॥ततोयजमानस्तुलामध्यदंडस्थितदृष्टिर्हरेर्मुखंपश्यन्मंत्रौपठेत्॥ॐनमस्तेसर्वभूतानांसाक्षिभूतेसनातनि॥पितामहेनदेवित्वंनिर्मितापरमेष्ठिना॥त्वयाधृतंजगत्सर्वंसहस्थावरजंगमम्॥सर्वभूतात्मभूतस्थेनमस्तेविश्वधारिणि॥इतिगोदोहकालंतत्रस्थित्वाततस्तुलामवतीर्यतोलितद्रव्येतुलसीपत्रंनिधायदेशकालौसंकीर्त्यामुककामइदममुकद्रव्यमात्मसमतोलितमाचार्याद्यन्येभ्योब्राह्मणेभ्यःसमस्ताश्रितबंधुवर्गेभ्योदीनानाथेभ्यश्चदातुमहमुत्सृज्येनममेत्युत्सृज्यततःकृतस्यामुकतुलापुरुषदानकर्मणःसांगतासिद्ध्यर्थमाचार्यायइदंसुवर्णमग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददे॥नममेतिदद्यात्॥पुनःकृतस्यामुकतुलापुरुषदानकर्मणःइत्यादिसांगतासिद्ध्यर्थंनानानामगोत्रेभ्योब्राह्मणेभ्योयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृज्ये॥तथाकृतस्या

मुकतुलापुरुषदानकर्मणःसांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान्यथाकालंयथोत्पन्नेनान्नेनभोजयेदितिसंकल्प्य॥ततःआचार्यस्त्वावाहितदेवताःसर्वाःअर्चनपूर्वकंविसृज्याचार्यायतुलार्धंपादंवाप्रतिमावस्त्रादिभरणादिसर्वंतुभ्यमहंसंप्रददे॥नममइतिदत्वासदस्याद्यादावेनदर्धंदत्वातुलाशेषंचसद्यएवयथादृशंदत्वा॥ ॥प्रमादात्कुर्वतां०॥यस्यस्मृत्येतिजपित्वाकर्मेश्वरार्पणंकृत्वासुहृद्युतोभुंजीतेति ॥ केचित्तु॥अत्रतुलापूजानन्तरमाग्निंसंस्थाप्यईशानादितुलास्थदेवताभ्योऽष्टाष्टाज्याहुतयश्चेच्छंतीतितुलाप्रतिग्रहप्रायश्चित्तंत्वाचार्यश्चांद्रायणमेकंकुर्यात्॥प्रतिग्रहानुसारेणेत्युक्तं॥दानोद्योतरहस्येषु॥ ॥हेमाद्रौमात्स्ये॥ ॥नचिरंधारयेद्गेहेस्वर्णंतोलितंबुधः॥तिष्ठद्भयावहंयस्माच्छोकव्याधिकरंनृणां॥शीघ्रंपरस्वीकरणाच्छ्रेयःप्राप्नोतिपुष्कलमितिस्वर्णादिसर्वद्रव्यतुलास्वेवंकैमुतिकन्यायात्॥अत्रत्यःस्वर्णशब्दोरजतादिसर्वद्रव्यतुलोपलक्षकोबोध्यः॥मीमांसैकधुरंधरःश्रुतिधरान्यायेपिवागीश्वरःसाहित्येमृतसागरःस्वजनतावल्लीरसालद्रुमः॥यद्विद्वन्मणिशेखरोदिनकरःप्रासूतविश्वेश्वरं तेनाकारिघृतादितोलनविधौसत्प्रीतयेपद्धतिः॥ ॥

इतिश्रीदानोद्योतदानरत्नमयूखाद्यनुसारेणकालोपनामकभट्टदिवाकरकृतदानसंक्षेपचंद्रिकायांताम्रघृतादितुलापुरुषदानप्रयोगः॥ ॥

अथगोसहस्रमहादानप्रयोगः॥ ॥हेमाद्रौमात्स्ये॥ ॥गोसहस्रदानंचिकीर्षुरधिवासनदिनात्प्राकृत्रिरात्रमेकरात्रंवाशक्तितःपयोव्रतोधिवासनदिनेशक्तश्चेद्यजमानोदेशकालौसंकीर्त्यममसमस्तपापक्षयोत्तरसिद्धचारणसेवितार्कवर्णकिंकिणीजालमालिविमानारोहणोत्तरानेकमन्वंतरावच्छिन्नेंद्रादिसकललोकपाललोकाधिकरणकपुत्रपौत्रसमन्वितशिवालयगमनैकोत्तरसंख्यासंख्येयपितृमातामहकुलतारणाकल्पशतावच्छिन्नशिवपुरनिवासानंतरराजराजीभवनाश्वमेधशतकर्तृत्वशिवध्यानपरत्वविष्णुसादृश्यापन्नयोगस्थानेकसंसारमोचनकामःश्वोगोसहस्रमहादानंप्रतिपादयिष्ये॥इतिसंकल्पयेत्॥

ततोपवासगुर्वादिनियोगांतंतुलापुरुषमहादानवत्कुर्यात्॥ ॥अथाचार्यएकंलक्षणपयंनंदिकेश्वरंवृषंसवत्सदशोत्तरगोसहस्रात्सवत्सधेनुदशकंचस्वर्णघंटास्वर्णपट्टकौशेयवस्त्रमाल्यहेमरत्नयुतंशृंगरौप्यखुरंचामरोपशोभितंसताम्रदोहनंपादुकोपानच्छत्राद्यनेकोपस्करयुतंवेदीपरितःस्थापयेत्॥मंडपाद्बहिस्तोयप्रागवकाशेगोसहस्रंवस्त्रमाल्यस्वर्णशृंगरौप्यखुराद्यैरलंकृत्याधिवासयेत्॥ ॥अथासादितसगोवृषदशकमध्येचक्रोपरिस्थापितलवणद्रोणोपरिपूर्वोक्तलक्षणंकौशेयसंवीतंनानाभरणभूषितंमाल्याक्षतफलसंयुक्तंनंदिकेश्वरंस्थापयेत्॥वेद्युपरिफलपुष्पादिशोभितंपंचवर्णवितानंकूटेबध्नीयात्॥ततःआचार्यादयःस्वस्वकुंडसन्निधौसर्वौषध्यादियुतकलशचतुष्टयस्थापनादियजमानाभिषेकांतंतुलामहादानवत्कुर्युः॥ ॥ततःशुक्लमाल्यांबरधरःसकुसुमांजलिनासवृषगोदशकंतमामंत्रयेत्॥ ॥तत्रमंत्रः॥ ॥नमोवोविश्वमूर्तिभ्योविश्वमातृभ्यएवच॥लोकाधिवासिनीभ्यश्चरोहिणीभ्योनमोनमः॥गवामंगेषुतिष्ठंतिभुवनान्येकविंशतिः॥ब्रह्मादयस्तथादेवारोहिण्यःपांतुमातरः॥गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः॥गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥यस्मात्त्वंवृषरूपेणधर्मएवसनातनः॥अष्टमूर्तेरधिष्ठानमतःपाहिसदाममेति॥पुष्पांजलिनासंपूज्यवेदीपश्चिमेप्राङ्मुखउपविश्यपूर्ववद्देशकालौस्मृत्वाममसमस्तपापक्षयादिसंसारमोचनकामइत्यंतेइदंवृषइमाःसवत्सधेनुदशकसहिताःसहस्रंगाःसांगोपांगाःअमुकामुकगोत्राभ्यामुकामुकवेदाध्यापकामुकामुकशर्मभ्योगुर्वृत्विकादिभ्यश्चसंप्रददेनममेतिगुर्वादिहस्तेषुजलंदद्यात्॥तेचदेवस्यत्वेतियजुषागामित्युक्त्वापुच्छेषुप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिकइदंकस्माअदादितिपठेयुः॥ततोयजमानःकृतस्यगोसहस्रमहादानकर्मणःसांगतासिद्ध्यर्थंग्रामंभूमिंवादत्वासुवर्णंदक्षिणात्वेनतुभ्यमहंसंप्रददे॥नममेतिप्रत्येकंतेभ्योदक्षिणांदद्यात्॥ ॥ततःकृतस्यगोसहस्रमहादानइत्यादि०॥सांगतासिद्ध्यर्थंनानानामगोत्रेभ्योब्राह्मणे

भ्योयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृज्येनममेति॥तथापुनः कृतस्यइ०॥सांगतासिध्यर्थंयथाशक्तिब्राम्हणान्यथाकालंयथोपपन्नेनान्नेनभोजयिष्ये
इतिसंकल्पयेत्॥ ॥ततःआचार्यःपुण्याहवाचनाद्यावाहितदेवताःसंपूज्यउत्तिष्ठब्रम्हणस्पतइतिदेवान्विसृज्यतद्दिनेपयोव्रतमथवाशक्तोयजमानोनक्ताशी
ब्रम्हचारीभवेत्॥ ॥ततःप्रमादात्कु॰ यस्यस्मृत्या॰ कर्मेश्वरार्पणंकुर्यादिति॥ ॥इतिदानसंक्षेपचन्द्रिकायांगोसहस्रमहादानप्रयोगः॥ ॥भविष्यपु
राणे॥ ॥शतंगावःसवृषभाधेनूपस्करसंयुताः॥दत्वातुब्राम्हणेभ्यस्तुविशुद्धेनांतरात्मना॥शिवादिसर्वलोकेषुयथेष्टंमोदतेतुसः॥पुण्यकालेकृतचिरान
स्यमाणानायस्यदेशकालौसंकीर्त्यममसमस्तपापक्षयपूर्वकमिन्दूच्चारणासेवितार्ककवर्णकिंकिणीजालमालैर्विमानारोहणोत्तरानंतकमन्वंतरावछिन्नेंद्रादिस
कललोकपालाधिकरणकपुत्रपौत्रसमन्वितशिवपुरादिसर्वलोकनिवासानंतरसंतैविष्णुसायुज्यावाप्तिकामोवृषाधिकसालंकृतगोशतदानंकरिष्यइ
तिसंकल्प्यगणपतिपूजनंसंक्षिप्तपुण्याहवाचनमात्रंकृत्वागोभ्योनमइतिसवृषभागाःसंपूज्यब्रम्हणेनमइतिब्राम्हणांश्चयथाशक्तिवस्त्रालंकारादिभिः
संपूज्यप्रार्थयेत्॥ ॥तत्रमंत्राः॥ गावःसुरभयोनित्यंगावोगुग्गुलुगंधिकाः॥गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत्॥अन्नमेवपरंगावोदेवानांहविरु
त्तमम्॥पावनंसर्वभूतानांरक्षंतिचवहंतिच॥हविषांमंत्रपूतेनतर्पयंत्यमरानपि॥महर्षीणांचहोतृणांगावोहोमेप्रतिष्ठिताः॥सर्वेषामेवभूतानांगावः
शरणमुत्तमम्॥गावःपवित्रंपरमंगावोमंगलमुत्तमं॥गावःसर्वस्यलोकस्यगावोधन्याःसवाहनाः॥नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच॥नमो
ब्रम्हसुताभ्यश्चपवित्राभ्योनमोनमः॥घृतक्षीरप्रदागावोघृतयोन्योघृतोद्भवाः॥घृतनद्योघृतावर्तास्तामेसंतुसदागृहे॥ इतिगावःसंप्रार्थ्यवृषभंप्रार्थये
त्॥धर्मस्त्वंवृषरूपेणजगदानंदकारक॥अष्टमूर्तेरधिष्ठानमतःपाहिसनातनेतिवृषभंप्रार्थयेत्॥ततःसहिरण्यतिलकुशानादाय अद्येत्यादिममस

मस्तपापक्षयेत्यादिविष्णुसायुज्यावाप्तिकामोवृषाधिकशतंगाः धेनूपस्कराः सहिरण्यदक्षिणायुताः रुद्रदेवताकास्तन्मूल्योपकल्पितनिष्क्रयरजतमुद्रावानानानामगोत्रेभ्योब्राम्हणेभ्योदातुमहमुत्सृज्येनममेतितेनभगवान्परमात्माश्रीपरमेश्वरःप्रीयताम्॥ तत्सद्ब्रह्मार्पणमस्तु॥ कृतस्यसवृषगोशतदानकर्मणः सांगतासिध्यर्थंब्राम्हणभोजनंभूयसींदक्षिणांचदद्यात्॥ ॥अथवाअद्येत्यादि० सवृषरुद्रदैवतसहिरण्यदक्षिणाययाशक्त्यलंकृतगोशतमूल्योपकल्पितनिष्क्रयरजतमुद्राःनानानामगोत्रेभ्योब्राम्हणेभ्योदातुमहमुत्सृज्येनममेति॥ ततोब्राम्हणभोजनसंकल्पंभूयसींचदद्यात्॥ ॥इतिसवृषगोशतदानप्रयोगः॥ ॥अथसवृषगोदानप्रयोगः॥ ॥भविष्ये॥ दशगावःसवृषभावृषभैकादशाःस्मृताः॥ दत्वातुब्राम्हणेभ्यश्चसयातिपरमांगतिं॥ शिवादिसर्वलोकेषुयथेष्टंरमतेनरइति॥ पुण्यकालेकृताचम्यदेशकालौसंकीर्त्यममसमस्तपापक्षयपूर्वकशिवादिसर्वलोकनिवासांतेविष्णुसान्निध्यकामोवृषाधिकदशगोदानंकरिष्यइतिसंकल्प्य॥ ॥गणपतिपूजनंपुण्याहवाचनमाचंकृत्वागोभ्योनमइतिसवृषगाःसंपूज्यब्राम्हणेभ्योनमइतिब्राह्मणांश्चयथाशक्तिवस्त्रालंकारादिभिःसंपूज्यगाःप्रार्थयेदेतैर्मंत्रैः॥ गावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुचः॥ सुरभ्यःसौरभेयाश्चसरितःसागरास्तथा॥ गावःपश्याम्यहंनित्यंगावःपश्यंतुमांसदा॥ गावोस्माकंवयंतासांयतोगावस्ततोवयं॥ गावोमेअग्रतोनित्यंगावःपृष्ठत एवच॥ गावोमेसर्वतश्चैवगवांमध्येवसाम्यहं॥ ॥इतिगाःसंप्रार्थ्यवृषभंप्रार्थयेत्॥ धर्मस्त्वंवृषरूपेणजगदानंदकारक॥ अष्टमूर्तेरधिष्ठानमतःपाहिसनातनेति॥ वृषमंत्रंप्रार्थयेत्॥ ॥ ततःसकुशतिलजलमादाय अद्येत्यादिममसमस्तपापक्षयपूर्वकशिवविष्णुसान्निध्यावाप्तिकामोवृषाधिकदशगाधेनूपस्काराःसहिरण्यदक्षिणायुतारुद्रदेवतास्तन्मूल्योपकल्पितरजतमुद्रावानानानामगोत्रेभ्योब्राम्हणेभ्योदातुमहमुत्सृज्ये॥ नममेतिसंकल्पंकुर्यात्॥ ततोब्राम्हणभोजनसंकल्पः

भूयसींचदद्यात्॥ अथवावृषाधिकधेनूपस्करसहिरण्यदक्षिणायुतदशगारुद्रदैवतास्तन्मूल्योपकल्पितरजतमुद्राःनानानामगोत्रेभ्योब्राम्हणेभ्योदातुमहमुत्सृज्ये।।नममेत्युक्तादद्यात्॥ब्राम्हणभोजनसंकल्पंकृत्वाभूयसींचदद्यादितिसंक्षेपः।। ।।इतिसवृषदशगोदानप्रयोगः।। अथदशमहादानानि।।कौर्मे।। कनकाश्वतिलानागादासीरथमहीगृहाः।।कन्याचकपिलाधेनुर्महादानानिवैदश।। तत्रप्रथमंतावत्सुवर्णदानं।। मूले।। दत्वासुवर्णस्यशतंविप्रेभ्यःश्रद्धयान्वितः।।ब्रम्हलोकमनुप्राप्यब्रह्मणासहमोदते।। गव्येनभूमिंशुकृताजलेनआलिप्यमध्येसिततंदुलैश्च।।सरोरुहंकेसरभूषणाढ्यंसकर्णिकंचाष्टदलंविलिख्य।। मध्ये।। तस्मिन्हिरण्यंशतमानमात्रंनिधायतस्योपरितंविचिंत्यति।। ।।तत्रब्राम्हणंकमलासनस्थंसंपूज्य।।विप्रंवृत्वायथाविभवंवस्त्रालंकारादिभिःसंपूज्यदद्यात्।। ।।हेमाद्रौदानकांडे।। ।।देयंतद्योजयेत्पूर्वंततोविप्रंचपूजयेत्।।तत्तन्मंत्रैःप्रदद्यात्तुसर्वदानेष्वयंविधिरिति।। ।।अद्येत्यादिममसमस्तपापक्षयपूर्वकमेरुदानसमफलावाप्तयेदेयद्रव्यतृतीयांशदक्षिणासहितंइदंसुवर्णंअग्निदैवतंअमुकगोत्रायामुकशर्मणेब्राम्हणायतुभ्यमहंसंप्रददेनममेतिदद्यात्।।हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः।।अनंतपुण्यफलदमतःशांतिंप्रयच्छमे।। इतिकनकदानम्।। ।।अथाश्वदानंमहाभारते।। ।।सर्वोपकरणोपेतंसुवानंदोषवर्जितं।।योश्वंददातिविप्रायस्वर्गलोकेमहीयते।।तथा।। यावंतिरोमाणिहयेभवंतिहिनरेश्वर।।तावतोवाजिदाल्लोकान्प्राप्नुवंतीहपुष्कलानिति।।वाजिदान्सूर्यलोकान्।। कौर्मे।।शतैःपंचपलैरौप्यैःसुवर्णालंकृतिंक्रमात्।।सदक्षिणंसवस्त्रंचब्राम्हणायनिवेदयेत्।।ब्राम्हणंवृत्वावस्त्रालंकरणगंधपुष्पादिभिरभ्यर्च्यदद्यात्।। अद्येत्यादि० समस्तपापक्षयपूर्वकाश्वरोमसमसंख्याकाब्दसूर्यलोकनिवासावाप्तिकामइममश्वंसर्वोपस्करहिरण्यदक्षिणायुतयमदैवतंगोत्रायशर्मणेतुभ्यमहंसंप्रददेनममेतिअश्वकर्णधृत्वादद्यात्।।दानमंत्रस्तु।।उच्चैःश्रवास्त्वमश्वानांराज्ञांवि

जयकारक ॥ सूर्यवाहनमस्तुभ्यमतःशांतिंप्रयच्छमे॥ अथश्वेताश्वदानं॥ गारुडे ॥ अश्वमेधमखंयस्तुकलौकर्तुमनीश्वरः॥ अश्वदानंतुतेनेहकर्तव्यं विधिपूर्वकं॥ विधिंतस्यप्रवक्ष्यामिब्रम्हणानिर्मितंपुरा॥ श्वेतमश्वंशुभंतानहेमपल्याणभूषितं॥ रूप्यैस्तुकटकैःशुद्धैःकरिदंतोपशोभितं॥ वज्रनेत्रंखुरैस्ताम्रैःक्षौमपुच्छंसुवाससम्॥ घुघ्रेणपदकेनैवसंयुतंस्वायुधान्वितं॥ धान्यरत्नोपरिस्थंतुबद्धपक्षंसुभद्रकं॥ एवंकृतेजसंचाश्वंब्राम्हणायनिवेदयेत॥ मन्वादिषुगाद्ययनेविषुवोपरागादिपुण्यकालेदानंकार्यम्॥ ब्राम्हणंवृत्वावस्त्रालंकारादिभिःसंपूज्याश्वंचसंपूज्यवदेत्॥ मार्तंडायसुवेगायकाश्यपायाग्निमूर्तये॥ जगद्दीपायसूर्यायत्रिवेदायनमोस्तुते॥ एवंतुसुस्वरंमंत्रंकर्णेदद्यात्तिलोदकम्॥ ॥दानवाक्यंतु॥ ॥अद्येत्यादिगोत्रायशर्मणेब्राम्हणायेमंश्वेताश्वंसुवर्णतिलकालंकारयुतंललाटग्रैवेयकपूर्वोक्तालंकारैर्युक्तंगंधपुष्पाद्यर्चितंसूर्यपदैवतंसकलब्रम्हहत्यादिपापनाशकामोहयरोमसमसंख्याकाब्दंसूर्यलोकनिवास कामश्वंसालंकृतायतुभ्यमहंसंप्रददेनममेति॥ ॥ततोश्वप्रार्थना॥ महार्णवेसमुत्पन्नउच्चैःश्रवसपुत्रकः॥ मयात्वंविप्रसुख्यायदत्तोहयस्त्वंसुखीभवेति॥ ततोविप्रप्रार्थना॥ इमंविप्रनमस्तुभ्यमश्वंतेप्रतिपादितं॥ प्रतिगृण्हीष्वविप्रेंद्र मयादत्तंसुशोभनमिति॥ इतिदानमंत्रमुच्चार्यकर्णेसमर्पणंकृत्वाविप्रहस्तेजलंक्षिपेत्॥ ततःसुवर्णंदक्षिणांदद्यात्॥ विप्रोदेवस्यत्वेतिगृहीत्वायथाशाखंकामस्तुतिंपठित्वास्वस्तीत्युक्त्वाश्वमारुह्यगच्छेत्दाताचाश्वपुरोगच्छेत्पदानांसप्तसप्ततिम्॥ भास्करंमनसिध्यात्वाआलोक्यस्वगृहंव्रजेत्॥ श्वेतमश्वंतुयोदद्यात्फलंदशगुणंभवेत्॥ एवंकृतेनरव्याघ्रसूर्यलोकंव्रजेन्नरइति॥ ॥इतिश्वेताश्वदानं॥ ॥अथशिवायाश्वदानं॥ ॥गारुडे॥ शिवायाश्वमलंकृत्ययःपर्वणिनिवेदयेत॥ सोश्वमेधस्ययज्ञस्यफलमष्टगुणंलभेदिति॥ शिवधर्मेपिशिवायाश्वदानम्॥ अथतिलदानं॥ आदित्यपु॰ वैशाख्यांपौर्णमास्यांवातिलान्क्षौद्रेणसंयुतान्॥ पञ्चयछेद्विजाति

भ्यःसर्वपापैःप्रमुच्यते॥ ॥तथा॥ ज्येष्ठेमासितिलान्दद्यात्पौर्णमास्यांविशेषतः॥ अश्वमेधस्ययज्ञस्यफलमाप्नोतिमानवः॥ ॥तथा॥ माघेमासितिलान्य
स्तुब्राम्हणेभ्यःप्रयच्छति ॥सर्वसत्वसमाकीर्णंनरकंनसपश्यति॥ ॥विष्णुधर्मोत्तरे॥ ॥तिलागावोहिरण्यंच अलंकन्यावसुंधरा॥दत्तान्येतानिविधिवत्तार
यंतिमहाभयात्॥ तथा ॥ तिलस्नायीतिलोद्वर्त्तीतिलहोमीतिलोदकी॥तिलभुक्तिलदाताचषट्तिलाःपापनाशनाः॥ ॥इदंतुमाघमासपरम्॥ अन्य
त्रतुदानमेव॥ कौर्मे ॥ कृष्णाजिनेतिलान्कृत्वासुवर्णंमधुसर्पिषी॥द्रोणैकंवाससाछन्नंत्रिधातद्दत्तदक्षिणं॥ ब्राम्हणायचतंदत्वासर्वंतरतिदुष्कृतमिति॥
अद्येत्यादि अमुकगोत्रायामुकशर्मणेब्राम्हणायसुपूजितायकृष्णाजिनस्थसुवर्णमधुसर्पियुतवस्त्राच्छिन्नंतिलद्रोणंसोमदैवतंसर्वपापक्षयकामस्तुभ्यमहं
संप्रददेनममेति॥दद्यात्॥ कृतैतत्तिलद्रोणस्यसांगतासिद्ध्यर्थमिदंसुवर्णमग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेति दद्यात्॥ प्रतिगृहीतातुदेवस्यत्वे
तितांगृह्ययथाशास्त्रंकामस्तुतिंपठित्वासमापयेत्॥ ॥इतितिलद्रोणदानविधिः॥ ॥अथतिलपात्रदानं॥ ॥ब्राम्हे॥ ताम्रपात्रंतिलैःपूर्णंप्रस्थमात्रं
द्विजायच॥सहिरण्यंचयोदद्यात्प्रत्यहंश्रद्धयान्वितः॥सर्वपापविशुद्धात्मासलभतेपरांगतिमिति॥ अद्येत्यादि॰इदंतिलपूरितताम्रपात्रंसोमदैवतंससुवर्णम
मुकगोत्रायामुकशर्मणेब्राम्हणायाशेषपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति॥मंत्रस्तु॥तिलाःस्वर्णयुतास्तुभ्यंप्रदत्ताह्यघनाशनाः॥विष्णुप्रीतिकरानि
त्यं अतःशांतिंप्रयच्छमे॥ प्रतिग्रहःप्राग्वत्॥ इतिमाघेनित्यंतिलपात्रदानं॥ ॥अथमहातिलपात्रं॥ ॥कौर्मे॥ ताम्रपात्रेतिलान्कृत्वापलषोडशकल्पिते
॥ ससुवर्णेनशक्त्यावाविप्रायप्रतिपादयेत्॥नाशयेत्त्रिविधंपापंवाङ्मनःकायसंभवं॥तिलपूर्णंताम्रपात्रंसहिरण्यंद्विजायवै॥प्रातर्दत्वातुविधिवद्दुःस्व
प्नंविनिहंतिसः॥ तिलपात्रंत्रिधाप्रोक्तंकनिष्ठोत्तममध्यमं॥ताम्रपात्रंदशपलंजघन्यंपरिकीर्तितं॥द्विगुणंमध्यमंप्रोक्तंत्रिगुणंचोत्तमंस्मृतं॥स्वर्णमेकं

जघन्यंतुद्विगुणंमध्यमंमतम् ॥त्रिगुणंचोत्तमंतद्वत्स्वर्णपरिकीर्त्तितं॥ पलसंख्यानिष्कद्वयमिता॥सपादनिष्कद्वयमित्यन्ये॥ अत्रदेशाचारतोव्यवस्था ॥दानवाक्यंतुनित्यतिलपात्रदानवत् ॥ मंत्रस्तु॥ यानिकानिचपापानिब्रम्हहत्यासमानिच॥तिलपात्रप्रदानेन तानिनश्यंतुमेसदेति ॥ ॥इतिमहातिलपात्रदानं॥ कौर्मे ॥ अथमातुरानृण्यत्वतिलपूर्णकांस्यपात्रदानं॥आदित्यपुराणे॥ यज्ञंसौत्रामणिंकर्तुंयदिशक्तिर्नविद्यते॥महासरस्तथावापीकूपंकर्तुंचदीर्घिकं एवंकृतेमातृऋणान्मुक्तोभवतिमानवः सदक्षिणंकांस्यपात्रंदत्वाचैवप्रमुच्यते॥शुद्धकांस्यपात्रस्यप्रमाणंपंचविंशतिःपलानि॥तिलानामत्रनिर्दिष्टंप्रस्थानांसप्तकंतथा॥सुवर्णमाषाश्चत्वारःपात्रस्योपरिधारयेत् ॥वस्त्रेणवेष्टयेत्पात्रंविधायचस्वभक्तितः॥स्नानंकृत्वानिम्नगायांपितृदेवांश्चतर्पयेत्॥ततोभिपूजयेदेकंशंकरंहरिमेवच॥गोमयेनाथसंलिप्यगृहमध्यंतुसर्वतः॥लिखेत्पद्मंद्वादशारंकुंकुमेनाथशोभनं॥ततोवन्हिंसुसंस्थाप्यहोमंकुर्याद्घृतैस्तिलैः॥पद्मेपात्रंप्रतिष्ठाप्यपूजयेद्भक्तिभावतः॥ततोब्राम्हणमाहूयबहुपुत्रंसुसंभृतम्॥पादौप्रक्षाल्यविधिवन्मातुःश्राद्धंसमाचरेत्॥ अथकृत्यम्॥ यथाशक्तिमाघ्यांवामृतवासरे॥ग्रहणेरविसोमाख्या संक्रांतिषुयुगादिषु॥तथान्यदपियद्दत्तंमाघ्यामुद्दिश्यमातरं॥तदक्षय्यफलंसर्वंपुराप्राहमहेश्वरः॥जीवंतिभूषयेद्वस्त्रैर्माल्यैरपिविभूषणैः॥दत्वाविप्रस्यतत्पात्रंहोमंकुर्यात्प्रयत्नतः॥सोपस्करंसताम्बूलंक्षमाप्यचविसृज्यच॥अन्येषामपिविप्राणांभोजनानिप्रदापयेत्॥ अथास्यप्रयोगः॥ माघ्यांपूर्वोक्तपुण्यकालेवायजमानः कृतनित्यक्रियःपूर्वोक्तद्वादशारपद्मेकांस्यपात्रंप्रस्थसप्ततिलैःपूरितंस्थापयित्वाहरंहरिंचसंपूज्यतत्पुरतोग्नौविष्णुंविष्णुमंत्रेण शिवंशिवमंत्रेणवाष्टोत्तरशतंघृताक्ततिलैःयवैश्चहुत्वाब्राम्हणमाहूयोदङ्मुखमुपवेश्यादौपादप्रक्षालनादिमातृश्राद्धंसमाप्याचम्यप्राणानायम्य॥अद्येत्यादिगोत्रायशर्मणेब्राम्हणायउक्तोपस्करसंयुतंममातुःगर्भधारणपोषणमलमूत्रादिनानादुःखोद्भवाद्यानृण्यत्वकामःइदंपंचविंशतिपलात्म

कंकांस्यपात्रंप्रस्थसप्तमिततिलैःपरिपूरितंमाषचतुष्टयसुवर्णयुतंवस्त्रसंवेष्टितंसर्वोपस्करयुतंतुभ्यमहंसंप्रददेनममेतिदद्यात्॥मंत्रास्तु॥कांस्य
पात्रंमयादत्तंमातुरानृण्यकाम्यया॥भगवन्वचनात्तुभ्यंयथाशक्तिस्तथावद॥दशमासांश्चउदरेजनन्याःसंस्थितस्यमे॥क्लेशितावालभावेनस्तनपाना
द्द्विजोत्तम॥मलमूत्रादिसंक्लेपलिप्तायाचकृतामया॥भवतोवचनादद्यममसुक्तिर्भवेदृणात्॥तिलसंख्याकृतंदुःखंजनन्याममसेवितम्॥कांस्यपात्रप्र
दानेनकृतकृत्योभवाम्यहम्॥ततःशक्त्याहिरण्यंदद्यात्॥पात्रदानेनजननीसंभवादृणात्त्वंमुक्तोभव॥पुनःव्याहृतिभिराज्यहोमंकृत्वाविसृज्यय
थाशक्तिब्राम्हणान्भोजयित्वासुहृद्युतोभुंजीतेति॥ ॥इतिमातुरानृण्यकृत्तिलपूर्णकांस्यपात्रदानप्रयोगः॥ ॥अथतिलपूर्णकरकदानम्॥ ॥
वायवीये॥ करकंतिलसंपूर्णमंडलेवन्हिदैवते॥शिवंवन्हिवदाराध्यपूजयेत्करवीरकैः पूजातुरक्तचंदनेननिर्यास सर्जरसधूपेनधूपयेत्॥वान्हिमंड
लंत्रिकोणमंडलं॥शिवंवान्हिवदितिवन्हिस्वरूपंशिवं॥ ॥ब्रम्हांडपुराणे॥ ॥आदर्शंचततोदद्याद्दीपानांचचतुष्टयं॥वन्हिरूपीयतःशंभुर्वन्हिरूपा
स्तिलाश्रये ॥तेजोरूपंकृतपापंचाक्षुषंचव्यपोहतु॥इतिदत्तेस्यनश्यंतिपापान्यग्रेकृतानिच॥परदारपरद्रव्यपुत्रदर्शनजानिच॥शिवादिदर्शनोत्था
निनेत्रदोषकृतानिच॥यएवंकुरुतेदानंशिवभक्त्यायतव्रतः॥शिवलोकेवसेद्भूयःकल्पत्रयमशंकितः॥ ॥इतितिलपूर्णकरकदानं॥ ॥अथगजदा
नं॥ कौर्मे॥दद्याद्गजंपुराणोक्तमूल्यंपंचशतानिवा॥वित्तानुसारात्तत्रापिकनिष्ठोत्तममध्यमम्॥तत्रापिस्वरूपतोगजदानमुत्तमम्॥तन्मूल्यंहेममा
षशतपंचकदानंमध्यमम्॥शतत्रयंहेममाषदानंकनिष्ठमिति॥रूप्यस्थूणालंकरणंस्वर्णताराविभूषणम्॥सदक्षिणंवित्तनाथस्यादत्वाशिवपुरंव्रजेत्
॥स्थूणारज्जुः॥तारामौक्तिकजालीगजालंकारः॥कौर्मे॥यथालाभोपपन्नंवायःप्रयच्छतिदंतिन॥ब्राम्हणायदरिद्रायस्वर्गलोकेमहीयतइति॥ततो

गजदानांगंशिवंद्विजंचसंपूज्यदद्यात्॥ दानवाक्यंतु॥ अद्येत्यादिममसर्वपापक्षयोत्तरसिद्धचारणसेवितार्ककिंकिणीजालमालिविमानारोहणोत्तरानेकसत्वंतरावच्छिन्नाक्षय्यदेवराजत्वांतेविष्णुपुरावाप्तिकामस्तत्प्रीतिकामश्चसालंकृतायामुकगोत्रायामुकशर्मणेब्राम्हणायेमंगजंकक्षारज्जुस्थिरासनसहितंकांचनमालादिकीर्णंचामरगंधपुष्पाद्यलंकृतंप्रजापतिदैवतंतुभ्यमहंसंप्रददेनममेतिकरंधृत्वादद्यात्॥करःशुंडादंडः॥ ॥कृतेनद्विजदानकर्मणःसांगतासिद्ध्यर्थंइदंसुवर्णंअग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ततोद्विजोगजमारुह्यदेवस्यत्वायथाशाखंकाम स्तुतिंपठित्वाप्रतिगृण्हामीतिस्वस्तीतिवदेत्॥यजमानोगजंप्रार्थयेदेतैर्मंत्रैः॥ ॥ऐरावतस्त्वतुर्दंतोगजानांनायकस्तथा॥द्विपदंतिनांपूज्यतमःपापंक्षयतुनःप्रभुः॥सुप्रतीकगजेंद्रस्त्वंसरस्वत्याभिषेचकं॥इंद्रस्यवाहनश्रेष्ठसर्वदेवैस्तुपूजित॥गजेंद्रपत्तपालंगदैत्यसैन्यविनाशक॥तवदानेनमेशांतिःसर्वदास्तुमहत्सुखमिति॥ब्राम्हणोस्तथास्तुइत्युक्तोभूपसोदद्यादिति॥ ॥इतिगजदानप्रयोगः॥ अथदासीदानं॥ ॥वन्हिपुराणे॥ ॥स्थिरनक्षत्रसंयुक्तेसौम्येसौम्यग्रहान्विते॥दानकालंप्रशंसंतिसंतःपर्वणिवापुनः॥अलंकृत्ययथाशक्त्यावासोभिर्भूषणैस्तथा॥ब्राम्हणायप्रदातव्यायजमानेनशक्तितः॥पंचवर्षाधिकासातुचत्वारिंशत्समावधि॥दासीद्विजायदातव्यादासदानेत्वयंविधिरिति॥ ॥दानवाक्यंतु॥ अद्येत्यादिगोत्रायशर्मणेसालंकृतायसुवर्णालंकारवतींगंधपुष्पाद्यर्चितांप्रजापतिदैवत्यांअक्षय्यसुखावाप्तिकामस्तुभ्यमहंसंप्रददेनममेतिशिरसिधृत्वादद्यात्॥ द्विजप्रार्थनामंत्रस्तु॥ वन्हिपुराणे॥ इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता॥सर्वकामकरीभोग्यायथेष्टंभद्रमस्तुमे॥ततःसुवर्णंदक्षिणांदत्वानमस्कुर्यात्॥अनुगत्वातुसीमायांद्विजंचैवविसर्जयेदिति॥ ॥इतिदासीदानं॥ ॥अथरथदानं॥ कौर्मे॥ रथंतुबलीवर्दैरूढंधान्यावृतंतथा॥वित्तानुसारात्सर्वैश्चरथोपकरणैर्युतं॥सदक्षिणंचविप्रायदत्वा

शिवपुरंव्रजेत्॥ धान्याचूतं अष्टादशधान्याचूतम्॥रथोपकरणानियुगयोक्त्रतोत्रवरत्रादीनि॥दक्षिणाचत्रिशतमाषमितसुवर्णमुत्तमा॥ द्वेशतेमध्यमा॥ अधमाशतैकमिति॥त्रैविध्यमाह॥ ॥हेमाद्रिः॥ ॥दानवाक्यंतु॥ ॥अद्येत्यादिगोत्रायशर्मणेसालंकृतायचतुर्बलीवर्दयुक्तंसोपस्करंधान्याष्टादशाभियुतंविश्वकर्मदैवतं अक्षय्यस्वर्गादिसुखावाप्तिकामस्तुभ्यमहंसंप्रददेनममेतिमंत्रस्तु॥रथायरथनाथायनमस्तेविश्वकर्मणे॥विश्वरूपप्रदेवाय अरुणायनमोस्तुते॥ सुवर्णदक्षिणांदद्यात्॥ ॥इतिरथदानं॥ ॥अथगंत्रीरथदानं॥ गारुडे॥ गंत्रीतुरगसंयुक्तांयोददातिद्विजायते॥ सर्वकामसमृद्धास्मासराजाजायतेभुवीति॥गंत्रीरथविशेषः॥साचतुर्भिर्गजैरश्वैर्वृषैर्वोपेताद्वाभ्यांवोपेता॥ दानवाक्यंतुपूर्ववत्॥ मंत्रस्तु॥ गंत्रीमिमांप्रयच्छामिविश्वकर्माधिदैवतां॥दानेनानेनभगवान्प्रीयतांमेपरःपुमान्॥इति ततःसुवर्णदक्षिणांदद्यात्॥ ॥इतिगंत्रीसहितरथदानं॥ ॥अथप्रसंगाच्छिबिकादानं॥ ॥हेमाद्रौमात्स्ये॥ मार्गशुक्लैकादश्यांमाघफाल्गुनयोर्वैशाखेवाहिरण्मयंहरिमभ्यर्च्यरात्रौजागरणंकृत्वाप्रातःकृतनित्यक्रियः॥ ॥अद्येत्यादिगोत्रायशर्मणेसुपूजितायइमांशिबिकांसुक्तोपस्करां अंगिरोदैवतांइष्टलोकावाप्तयेतुभ्यमहंसंप्रददेनममेति॥ततःसुवर्णदक्षिणांदद्यात्॥ ॥तत्रैववन्हिपुराणे॥ ॥देवलोकेविपुलभोगानंतरमंतेविष्णुसायुज्यावाप्तिकामोविप्रस्यवर्षाशनंशिबिकावाहकानांचवर्षपर्याप्तमन्नंदद्यादितिहेमाद्रिः॥ ॥द्विजप्रार्थनामंत्रस्तु॥शिबिकातेमयादत्तायथाशक्त्याविभूषिता॥द्विजत्वंप्रतिगृण्हीष्ववांछितंतेनमेभवदिति॥ इतिशिबिकादानं॥ ॥अथमहीदानं॥ कौर्मे॥ गोचर्ममात्रंभूखंडमधिकंवास्वशक्तितः॥विधीन्सदक्षिणान्कृत्वादत्वाचशिवपुरंव्रजेदिति॥त्रिद्धकसुवर्णदक्षिणेत्यर्थः॥अपिगोचर्ममात्रेणसम्यक्दत्तेनमानवः॥धौतपापोविशुध्धात्मास्वर्गलोकेमहीयतइति॥तथादशहस्तेनदंडेनत्रिंशाद्दंडानिव

र्तनं ॥त्रिभागहीनंगोचर्मप्रमानमाहप्रजापतिः॥ तथा॥गवांशतंवृषश्चैको यत्रतिष्ठेदयंत्रितः॥तद्धिगोचर्ममात्रंतुप्राहुर्वेदविदोजनाः॥ तथा॥ षष्टिवर्षसहस्राणिस्वर्गेवसतिभूमिदः॥ आच्छेत्ताचानुमंताचतावंतिनरकेवसेत्॥ भूमिंयःप्रतिगृण्हातिभूमिंयश्चप्रयच्छति॥ तावुभौपुरुषौलोकेसूर्यमंडलभेदिनौ॥ तथा॥ भूमिप्रदानपुण्यस्यकलांनार्हंतिषोडशीम्॥ दानान्यन्यानिमेशांतिर्भूमिदानाद्भवत्विहेति॥ ॥दानवाक्यंतु॥ अद्येत्यादिगोत्रायशर्मणेसालंकृतायषष्टिवर्षसहस्रमितस्वर्गेशिवपुरनिवासकामःसर्वपापक्षयकामोवाइमांभूमिंसस्योद्भवांसवृक्षफलपुष्पाद्युपेतांविष्णुदेवतांतुभ्यमहंसंप्रददेनममेतिसाक्षतकुशतिलोदकंद्विजहस्तेदद्यात्॥ ब्राम्हणस्तुभूमिप्रदक्षिणांकुर्वन्प्रतिगृण्हीयात्॥ देवस्यत्वेतियथाशाखंकामस्तुतिंपठित्वास्वस्तीतिवदेत्॥ मांडव्यवचनादत्रसुवर्णंदक्षिणामता॥ मंत्रस्तु॥ सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता॥अनंतसस्यफलदा अतःशांतिंप्रयच्छमे॥ तथा॥ यस्यांरोहंतिबीजानिवर्षाकालेमहीतले॥ भूमेःप्रदानात्सकलाममसंतुमनोरथाइति॥ ॥शिवधर्मे विश्वामित्रः॥ ग्रामंवानगरंवापिविप्रेभ्योयःप्रयच्छति॥क्षेत्रंवासस्यसंपन्नसर्वपापैःप्रमुच्यतइति॥ ॥भूमिहरणेतुविश्वामित्रः॥ ॥स्वदत्तांपरदत्तांवायोहरेच्चवसुंधराम्॥ षष्टिवर्षसहस्राणिविष्टायांजायतेकृमिरिति॥ सविष्ठायांकृमिर्भूत्वापितृभिःसहपच्यतीतिवा॥ ॥इतिशिवधर्मोक्तभूदानं॥ ॥अथगृहदानं॥ कौर्मे॥ शक्तितःसर्ववित्तेनपूर्णंगृहमपित्रिधा॥ सदक्षिणंद्विजेदत्वाब्रम्हलोकंव्रजेन्नरइति॥ गारुडे॥ ऐष्टिकंदारुकंवापिमृन्मयंवापिशक्तितः॥ सर्वोपकरणोपेतंयोदद्याद्विपुलंगृहम्॥ ब्राम्हणायदरिद्रायविदुषेचकुटुंबिने॥ सर्वकामसमायुक्तोब्रम्हसायुज्यमाप्नुयादिति॥ ब्रम्हवैवर्ते॥ नगार्हस्थ्यात्परोधर्मोनैवदानंपरंगृहात्॥ नानृतादधिकंपापंनपूज्योब्राम्हणात्परइति॥ गृहनिर्माणप्रकारमाहनारदः॥ ॥स्नानागारंदिशिप्राच्यामाग्नेय्यांपचनालयं॥ याम्यांशयनगेहंचनैरृत्यांशस्त्रमंदिरं॥ प्रतीच्यां

भोजनागारं वायव्यां पशुमंदिरं ।। भांडागारं तूत्तरस्यामैशान्यां देवमंदिरमिति ।। कुर्यादिति शेषः ।। तत्र कूपे दिक्विशेषफलं देवीपुराणे ।। पूर्वस्याम्भिस्यकर्तव्यः कूपः स्याद्निलेपि वा ।। न पूर्वव्यत्ययं कुर्यान्मध्ये देवालयाद्गृहादिति ।। कृतं भयप्रदं लोके तथा चास्याग्निजं भयम् ।। वायव्यां चापि देवस्य भयदं जायते कृतमिति ।। ।। वराहमिहिरः ।। पुष्टिभूतिपुत्रहानिपुरंध्रीनाशंमृत्युसंपदंशस्त्रबाधा ।। किंचित्सौख्यं दिक्षु पूर्वादि कुर्यात्कूपो मध्ये गेहमर्थक्षयं चेत्यादि ।। ।। मत्स्यपुराणे ।। ।। देवतापंचकं तत्र चत्वारिंशत्समाहृतम् ।। पूजयित्वा यथान्यायं ततो दद्याद्गृहं गृही ।। पूजयित्वा स्वयं वास्तुशांतिं कृत्वा दद्यादित्यर्थः ।। अथ प्रसंगात्संक्षेपेण वास्तुशांतिप्रयोगः ।। ।। कर्ता शुभदिने आचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्य वास्तोः शुभतासिद्ध्यर्थं वास्तुशांतिं करिष्ये इति संकल्प्य ।। तदंगतया गणेशपूजा स्वस्तिवाचन मातृकापूजाभ्युदयिकश्राद्धं चाचार्यब्रह्मर्त्विग्वरणानि कृत्वा यथाविभवं वस्त्रालंकारादिभिः पूजयेत् ततः आचार्यो यदत्र संस्थितं भू० ।। अपक्रामंतु० ।। भूतप्रेतपिशाचाद्या अपक्रामंतु राक्षसाः ।। स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमि भुवं त्विमामिति ।। अनेन सर्षपान्विकीर्य पंचगव्येन शुचीवोहव्या इत्यृचेन पुनंतु मा देवजना इत्यृचेन गृहमाविशेत एतोन्विंद्रमित्यृचेन गृहं संप्रोक्ष्य गृहमध्ये प्राच्यामैशान्यां वा चतुरस्रं चतुरंगुलोच्चं हस्तमितं स्थंडिलं कृत्वा तस्य ईशानादिकोणचतुष्टये चतुरो लोहकीलानारोपयेत् ।। विशंतु भूतले नागा लोकपालाश्च सर्वशः ।। अस्मिन्गृहेवतिष्ठंतु आयुर्बलकराः सदेति मंत्रेण निखनेत् ।। ।। प्रतिकीलं मंत्रावृत्तिः ।। ।। ततः ईशानकोणादिक्रमेण चतुर्षु कोणेषु ।। अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः ।। तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति मंत्रेण मंत्रावृत्त्या माषभक्तबलीन्दत्वा ।। स्थंडिलोपरि कुंकुमादिना हेमरूप्यशलाकया वा प्राक्पश्चायताः ।। प्रागंता उदक्संस्था द्व्यंगुलांतराः प्रणवादिनमोंतैर्दशभिर्नामभिर्दशरेखाः कुर्यात् ।। ॐ ईशानायै नमः ॐ यशोवत्यै० ।। ॐ कांतायै० ।। ॐ विशा

लायै० ॐ प्राणवाहिन्यै० ॐ सत्यै० ॐ सुमत्यै० ॐ नंदायै० ॐ सुभद्रायै० ॐ सुरथायै॥१०॥इतिदशरेखाःकृत्वा॥तथा॥ॐ हिरण्यायै० ॐ सुव्रतायै० ॐ लक्ष्म्यै० ॐ विभूत्यै० ॐ विमलायै० ॐ प्रियायै० ॐ विजयायै० ॐ बालायै० ॐ विशोकायै० ॐ इडायै०॥१०॥इतिदक्षिणोत्तरायताःउदगंताःप्राक्संस्था दशरेखाःकुर्यात्॥एवमेकादशीतिपदंमंडलंसंपद्यतेतत्रमध्यस्थनवकोष्ठानिरेखामार्जनेनैकीकुर्यात्॥एतन्नवपदंब्रह्मस्थानंतस्यचतुर्दिक्षुचत्वारिपदानिर्विदिक्षुशृंखलाकाराणिद्वादशकोणचतुष्टयेभयतश्चाष्टाविति विंशत्येकपदानि अशिष्टानिषतिदशपंचपंचेतिविंशतिद्विपदानि॥तेषुमणवाद्येश्वतुष्पतेनमोतैर्वक्ष्यमाणनामभिर्देवता आवाह्यस्थापयेत्॥तत्रैशानकोणपदेवास्तोःशिरसि॥ॐ शिखिनेनमः॥शिखिनंआवा०॥तद्दक्षिणेकपदेदक्षिणनेत्रे॥ॐ पर्जन्या०आवाहयामीतिसर्वत्र॥तद्दक्षिणेततोपिपश्चिमतइतिपदद्वयेदक्षिणश्रोत्रे ॐ जयंतायनमः॥तद्दक्षिणपदद्वयेदक्षिणांसे० ॐ कुलिशायुधायनमः॥४॥तद्दक्षिणपदद्वयेदक्षिणबाहौ ॐ सूर्यायनमः॥५॥तद्दक्षिणपदद्वयेदक्षिणबाहौ ॐ सत्याय ना॥६॥तद्दक्षिणपदद्वयेदक्षिणकूर्परे ॐ भृशाय॥७॥तद्दक्षिणेअसपंक्तिगतैकपदेदक्षिणप्रबाहौ ॐ आकाशाय०८ आग्नेयकोणपदेदक्षिणबाहुचे ॐ अग्नयेनमः९ तत्पश्चिमैकपदेदक्षिणमणिबंधे ॐ पूष्णे०१०तत्पश्चिमततोप्युत्तरइतिपदद्वयेदक्षिणपार्श्वे० ॐ वितथाय०११तत्पश्चिमपदद्वयेदक्षिणपार्श्वेएव ॐ गृहक्षताय१२तत्पश्चिमपदद्वयेदक्षिणोरौ ॐ यमाय०१३तत्पश्चिमपदद्वयेदक्षिणजानौ ॐ गंधर्वाय०१४तत्पश्चिमपदद्वयेदक्षिणजंघायां ॐ भृंगराजाय०तत्पश्चिमबाह्यपंक्तिगतैकपदेदक्षिणस्फिजि ॐ मृगाय०नैर्ऋत्यकोणपदैकपदेपादयोः ॐ पितृभ्यो०तदुत्तरैकपदेवामस्फिजि ॐ दौवारिकाय०१९तदुत्तरेततोपिप्रागितिपदद्वयेवामजंघायां ॐ सुग्रीवाय०तदुत्तरपदद्वयेवामजानौ ॐ पुष्पदंताय०तदुत्तरपदद्वयेवामोरौ० ॐ जलाधिपाय०तदुत्तरपदद्वयेवामपार्श्वे ॐ असुराय०तदुत्तरपदद्वयेवामपार्श्वेएव ॐ शोषाय०

तदुत्तरेबाह्यपंक्तिगतैकपदेवामभणिबंधे ॐ पापाय॰ वायव्यकोणपदेवामप्रबाहौ ॐ रोगाय॰ तस्मागैकपदेवामप्रबाहौ ॐ अहिर्बुध्न्याय॰ तस्मात्क्ततोपिदक्षिणेचेतिपदद्वयेवामकूर्परे ॐ मु-
ख्याय॰ तस्मात्पदद्वयेवामबाहौ ॐ भल्लादाय॰ तस्मात्पदद्वयेवामबाहौ ॐ सोमाय॰ तस्मात्पदद्वयेवामांसे ॐ सर्पभ्योन॰ तस्मात्पदद्वयवामश्रोत्र ॐ दि-
तयेनमः तस्मात्बाह्यपंक्तिगतैकपदेवामनेत्र ॐ अदितयन॰ ततआग्नेय्यकोणपदादधःकोणपदेवामहस्ते ॐ आपायन॰ नैर्ऋत्यपदादधःकोणपदैक-
पदे ॐ सावित्राय॰ वायव्यकोणाधःकोणपदेवामहस्ते ॐ जयाय॰ ईशानकोणपदाधःकोणपदेसेंद्रे ॐ रुद्राय॰ मध्यगतनवकोष्टकब्रम्हपदसंलग्नमा-
गादिपदत्रयेदक्षिणस्तने अर्यम्णे॰ त द्दक्षिणैकपदेदक्षिणहस्ते ॐ सवित्रेन॰ तत्पश्चिमेब्रम्हसंलग्नपदत्रयेजठरदक्षिणभागे ॐ विवस्वतेन॰ ५० तत्प-
श्चिमैकपदेवृषणयोः ॐ विबुधाधिपाय॰ तदुत्तरब्रम्हसंलग्नपदत्रयेवामजठरभागे ॐ मित्राय॰ तदुत्तरैकपदेवामहस्ते ॐ राजयक्ष्मणे॰ तस्मात्पदत्रये
वामस्तने ॐ पृथ्वीधरायन॰ तस्मागैकपदेउरसि ॐ आपवत्साय॰ ततोमध्यनवपदेहृत्नाभ्यो ॐ ब्रम्हणे॰ तदुत्तरेवास्तोष्पतेवसिष्ठोवास्तोषातिस्त्रिष्टुप्
छंदःवास्तुप्रतिष्ठापनेविनियोगः ॐ वास्तोष्पतेप्रतिजानी॰ इतिस्वर्णादिप्रतिमामग्न्युत्तारणपूर्वकंसंस्थाप्य मंडलाद्बहिरीशानादिकोणचतुष्टयेषु ॐ चर-
कैय॰ ॐ विदार्येन॰ ॐ पूतनायेन॰ ॐ पापराक्षस्ये॰ ॥ ॥ ततःपूर्वादिचतुर्दिक्षु॥ ॐ स्कंदायन॰ ॐ अर्यम्णोनमः ॐ जृंभकाय॰ ॐ पिलिपिच्छाय॰ ततःपू-
र्वाद्यष्टदिक्षु ॐ इंद्राय॰ ॐ अग्नयेन॰ ॐ यमाय॰ ॐ निर्ऋतये ॐ वरुणाय॰ ॐ वायवे॰ ॐ कुबेराय॰ ॐ ईशानाय॰ ॥ ६२॥ ॥ इत्यावाह्य॥ वास्तुपीठ
देवताभ्योनमइतिसंपूज्यमंडलादीशान्यांकलशंसंस्थाप्य तत्रवरुणाय॰ इतिवरुणंसंपूज्य प्रार्थयेत्॥ यथामेरुगिरेःशृंगंदेवानामालयःसदा॥ तथाब्रम्हा-
दिदेवानांगृहेसमस्थिरोभवइतिसंप्रार्थ्य॥ ततःस्वतंत्रस्थंडिलेग्निस्थापनादिचक्षुष्यंतेउदुंबरादिसमित्तिलाज्यैर्वास्तुमंडलदेवताभ्योनाममंत्रैर्वास्तुमंत्रे

पाच हुत्वास्विष्टकृदादि पूर्णाहुत्यंतंकुर्यात् ।। ततोमंडलदेवताभ्यःशिखिनेएषपायसबलिर्नममइत्यादिबलीन्दत्वाकृणुषपाजइति सूक्तादिनामंडलंत्रिसूत्र्यावेष्टयित्वाकलशोदकेनयजमानमभिषिच्य पुनःसंपूज्ययथाशक्ति दक्षिणांदत्वाब्राम्हणान्भोजयेदितिकेचित् ।। शारदातिलकेतुहोमोनोक्तः ।। तिलादिद्रव्याणांविकल्पइति मयूखकारः ।। इदानींतुनवग्रहसंकलितमेवप्रयोगंकुर्वंति सांप्रदायिकाः ।। तद्यथा ।। यथामेरुगिरेःशृंगमितिप्रार्थनोत्तरं वास्तुमंडलान्नैर्ऋत्यांपश्चिमायांवाकुंडेस्थंडिलेवावरदनामानमग्निंप्रतिष्ठाप्याग्नेरीशान्यांग्रहान् ग्रहकलशांश्चसंस्थाप्यतत्रवरुणंसंपूज्य देवदानवसंवादइत्याद्यैःसंप्रार्थ्यान्वादध्यात् ।। अस्मिन्वास्तुशांतिकर्मण्यन्वाधानंकरिष्ये ।। अस्मिन्नन्वाहितेत्सादिंचक्षुष्यंतमुक्त्वात्रप्रधानं आदित्यं· सोमं· भौमं· बुधं · बृहस्पतिं· शुक्रं· शनिं· राहुं· केतुं· एताःप्रधानदेवताःप्रत्येकं-अष्टोत्तरशताष्टाविंशतिरष्टाष्टसंख्याकाभिर्वाअर्कादिसमिच्चर्वाज्याहुतिभिः तथा ईश्वरंउमां· स्कंदं· विष्णुं· ब्रम्हाणं· इंद्रं· यमं· कालं· चित्रगुप्तं· अग्निं अपः भूमिंविष्णुं इंद्रं इंद्राणीं प्रजापतिं सर्पान् ब्रम्हाणं विनायकं दुर्गां वायुं आकाशं· अश्विनौ वास्तोष्पतिं क्षेत्रपालं इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरं ईशानं एताःप्रधानदशांशेनतत्तत्समिच्चर्वाज्याहुतिभिः तथा शिखिनंपर्जन्यंजयंतंकुलिशायुधंसूर्यंसत्यंभृशं आकाशं वायुं पूषणं वितथं ग्रहक्षतं यमं गंधर्वं भृंगराजं मृगं पितॄन् दौवारिकं सुग्रीवं पुष्पदंतं जलाधिपं असुरं शोषं पापं रोगं अहिर्बुध्यं मुख्यं भल्लाटं

हें ग्रह मंडल अनुक्र
मणिकेच्येशेवटीं
पहावें ।।

सोमं सर्पं दितिं अदितिं आपं सावित्रं जयं रुद्रं अर्यमणं सवितारं विवस्वंतं विबुधाधिपं मित्रं राजयक्ष्माणं पृथ्वीधरं आपवत्सं ब्रह्माणंचरकीं विदारीं पूतनां पापराक्षसीं स्कंदं अर्यमणं जृंभकं पिलिपिच्छं एताः प्रधानदेवताः प्रतिद्रव्यं अष्टोत्तरशतसंख्यया समित्तिलपायसाज्याहुतिभिश्चतसृभिर्ऋग्भिः अष्टोत्तरं० समित्तिलचतुर्वारं वृषवास्तोष्पति चतुर्वारं वृषवास्तोष्पतिं पंचवारं पंचभिर्बिल्वफलैस्तद्धुतिर्वाचार्यस्य शेषेण स्विष्टकृतमित्याद्याज्यभागांते यजमान इदं उपकल्पितं हवनीयद्रव्य अन्वाधानोक्तदेवताभ्यः मया त्यक्तं न ममेत्युक्त्वोत्सृजेत्।। तत आचार्यादयः ग्रहेभ्यो होमं कृत्वा तिलसमिदाज्यपायसैः-शिख्यादिपिलिपिच्छांताभ्यः त्रिपंचाशद्देवताभ्यो नाममंत्रैः प्रत्येकमष्टाविंशत्यष्टाष्टसंख्याकाभिराहुतिभिर्वा हुत्वा वास्तोष्पतिमंत्रैरेव ऋग्भिर्विवक्षितसंख्यया हुत्वाश्वलायनोक्तवास्तोष्पतेतिचतसृभिः प्रत्यृचमृगंते स्वाहाकारं पठन्जुहुयात्।। नात्रस्वाहाकारांते होमः।। पर्वादिहोमे तु वास्तोष्पते इति चत्वारो मंत्राः।। एकैकेन च मंत्रेण सप्तविंशतिराहुतयः।। इत्यष्टोत्तरशतं।। तत एतैश्चतुर्भिर्वास्तोष्पते ध्रुवास्थूणामित्येकया च।। एवं पंचभिः पंच बिल्वफलानि तद्बीजानि वा जुहुयात्।। तत आचार्यः स्विष्टकृदादिप्रायश्चित्तहोमांते यजमानो लोकपालेभ्यो ग्रहपीठदेवताभ्यश्च बलिं दत्वा पूर्णाहुतिं हुत्वा शिख्यादिपंचचत्वारिंशद्देवताभ्यः।। शिखिने एष पायसबलिर्न ममेति।। इत्याद्युक्तिपूर्वकं सर्वेभ्योऽपि बलिं दत्वा।। शिख्यादिप्रीतये कांचनं द्विजेभ्यो ब्रह्मप्रीतये धेनुं च दद्यात्।। ततो ग्रहकलशवास्तुकलशोदकेन ऋत्विग्भिरभिषिक्तो यजमानः।। ऋत्विग्भ्यो दक्षिणां दत्वा वाद्यादितूर्यघोषपूर्वकं आचार्यऋत्विग्भिः सकुटुंबो यजमानः राक्षोघ्नपावमानमंत्रैर्गृहं त्रिसूत्र्या वेष्टयित्वा समंताद्व्रीहियवमतीभिरद्भिर्हिरण्यमवधाय शंतातीयेन शंन इंद्राग्नी इति पंचदशऋग्भिरिति नारायणवृत्तिः शंतातीयेन ईळे द्यावापृथिवी इति पंचविंशति ऋग्भिः समुक्षयेदित्यन्ये।। तेननवांशकानचोत्तरं।। त्रिःप्रदक्षिणं परिव्रजन् मोक्ष्यत्यविच्छिन्नयाचोदकधा

रयापोहिष्ठामयोभुवइतितृचेनततोविछिन्नक्षीरधारांचपरितोदत्वावास्तुपीठमध्यनवपदेसुरूपांपृथ्वींध्यात्वापृथिव्यैनमः।। ।।इतिसंपूज्य।। सर्वदेवमयंवा
स्तुसर्वदेवमयंपरइतिपठित्वाततोगृहस्याग्नेयकोणेआकाशपदेयजमानपदेनजानुमात्रंगर्तंखात्वातमध्येगोमयेनोपलिप्यसुगन्धचंदनपुष्पाक्षतैरलंकृत्यस
र्वधान्यबीजानिदध्योदनंचक्षिप्त्वानवजलपूर्णकलशंशतैकपुष्पयुतंगंधाद्यर्चितमादायजानुभ्यामवनिंगत्वातज्जलंगर्ते ॐनमोवरुणायेतिमंत्रेणाक्षिपेत्
।।जलेप्रदक्षिणावर्तेपुष्पेचोर्ध्वेसुखेशुभम्।।ततोऽपक्वमृत्पेटिकायांशाल्यादिसप्तधान्यबीजानिदध्योदनंशैवालंफलपुष्पाणिचक्षिप्त्वातूर्यघोषेणपूर्व
स्थापितवृक्षवास्तुप्रतिमामानीयपेटिकायांसंस्थाप्यपेटिकांपिधायपठेत्।।पूजितोसिमयावास्तोहोमाद्यैरर्चनैःशुभैः प्रसीदपाहिविश्वेशदेहिमेगृहजं
सुखम्।।वास्तुमूर्तेनमस्तेस्तुभूशय्याभिरतप्रभो।। मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदेति।।ततोमृत्पेटिकांगर्तेस्थाप्य।। सशैलसागरापृथ्वीयथावह
तिमूर्द्धनि।।तथामांवहकल्याणसंपत्संततिभिःसहेति।। इतिसंप्रार्थ्यतयैवमृदागर्तंपूरयेत्।। मृदआधिक्येऽधिकंफलं।।साम्येसमं।।न्यूनत्वेन्यूनम्।।ग
र्तोपरिगोमयेनोपलिप्यगंधपुष्पाक्षतादीन्निक्षिपेत्।।ततआचार्यब्रह्मऋत्विजश्चसंपूज्यतेभ्योदक्षिणांदत्वा।।ग्रहपीठदेवतावास्तुपीठदेवताश्चसंपू-
ज्य उत्तिष्ठब्रह्मणस्पतेदेव।। ।।अभ्याराभिदद्रयो०।।यांतुदेवगणाइतिविसृज्यग्रहपीठवास्तुपीठाद्याचार्यायदद्यात्।।ततःआचार्यःप्रणीताविमोको
दिशिष्टंकर्मसमाप्याग्निंविसर्जयेत्।। ततोयजमानोब्रह्मशिरव्याद्युद्देशेनशतंशक्त्यावाब्राह्मणान्भोजयिष्ये इतिसंकल्प्य विप्रान्संपूज्य भूयसींदत्वा
।।प्रमादात्कुर्वतांकर्म०।।यस्यस्मृत्येत्युक्त्वा कर्मेश्वरार्पणंकृत्वा।।ब्राह्मणान्भोजयित्वातेभ्यःशिवंवास्त्वितित्रिरुक्त्वाशिवंवास्त्विइतिविप्रास्त्रिर्ब्रूयुः।।त
तोयथासुखंवसेद्गृहस्थुतोभुजीतेति।। एवंविधिनाप्रतिसंवत्सरंवास्तुपूजनंकार्यम्।।तेनग्रहसंबंधिदुःखंनाभुयादित्युक्तंदानविवेके।। ।।महादेवलग्नेन

श्रीदिवाकरसूरिणा ॥ रचितावास्तुशांतेस्तु पद्धतिर्बुधतोषदा ॥ ॥ इतिपौराणवास्तुशांतिप्रयोगः ॥ ॥ इदानींसूत्रोक्ताशांतिरभिधीयते ॥ साचद्वि
जातीनां पूर्वोक्तया समुच्चीयते ॥ पूर्वोक्तायांत्वशक्तौ स्वगृह्योक्तैव कर्तव्या ॥ तथापिसिद्धिः ॥ बह्वल्पंवा स्वगृह्योक्तं यस्यकर्मप्रकीर्तितम् ॥ तस्यतावतिशास्त्रा
र्थेकृते सर्वःकृतोभवेदितिवचनात् ॥ येषांगृह्यंनास्ति तेषांशूद्राणांच पूर्वोक्तैव ॥ तस्याः सर्वसाधारण्येनविधानात् ॥ अतश्चनशूद्रमात्रविषयत्वम् ॥ तस्मात्गृ
ह्योक्तापूर्वयासमुच्चीयतेसांप्रदायिकैः ॥ ॥ अथाश्वलायनगृह्योक्तवास्तुशांतिप्रयोगः ॥ तद्यथा ॥ काष्ठादिभिर्निर्मितंसंपन्नंधान्यादिसर्वोपस्करयुतंशोभ
ने मुहूर्ते ब्राह्मणैः सहतूर्यघोषेणगृहंप्रविश्यागारमध्येप्राङ्मुखउपविश्यदर्भेषुदर्भान्धारयमाणः ॥ पत्न्यासह आचम्यप्राणानायम्यदेशकालौसंकीर्त्य म
मास्यवास्तोः शुभतासिद्ध्यर्थंवास्तुशांतिंकरिष्येइतिसंकल्प्यतदंगत्वेनगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकृत्वापूर्वोक्तवास्तुपीठदेवता
स्थापनार्चनहोमबलिदानत्रिसूत्र्यागृहवेष्टनाभिषेचनब्राह्मणभोजनसंकल्पांतंकृत्वा आश्वलायनगृह्योक्तांवास्तुशांतिंकुर्यात् ॥ शुचिदेशेचतस्रः शि
लाः संस्थाप्य तासुदूर्वांनिधायतत्रमणिकसंज्ञंमृद्भांडंसंस्थाप्यएतैर्मंत्रैः ॥ पृथिव्याअधिसंभवेति ॥ अरंगरोवावदीति ॥ त्रेधाबद्धोवरत्रया ॥ इरामुहप्रश
सति ॥ अनिरामपबाधतामितिवा ॥ ततोमणिकेजलमासिंचेदनेनमंत्रेण ॥ ऐतुराजावरुणोरेवतीभिरस्मिन्स्थानेतिष्ठतुमोदमानः ॥ इरांवहतोघृतमुक्षमा
णामित्रेणसाकंसहसंविशंत्विति ॥ ततस्तज्जलपात्रांतर आदायतस्मिन्दूर्वाशमीशाखाउदुंबरशाखाव्रीहियवान् फलंहिरण्यंचक्षिप्त्वादूर्वाभिःशाखाभ्यांच
सर्वगृहभागादितः प्रदक्षिणंपरिव्रजन्प्रोक्षेदनेनसूक्तेनशंनइंद्राग्नीतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् ॥ गृहप्रोक्षणेवि० ॥ सकृत्सूक्तपाठः
॥ इतिनारायणवृत्त्यनुरोधात् ॥ वस्तुतस्तु ॥ शंतातीयेनेति ॥ इळेद्यावेतिवर्गपंचकेरित्यन्ये ॥ एवंसतिसमुच्चयेनकोपिविरोधः ॥ तद्यथा ॥ ईळेद्यावेतिपंचवि

शर्चसूक्तस्याम्नसत आश्वीनमाद्यौपादौलिंगोक्तदेवताजगत्यौत्यंत्रिष्टुभौगृहप्रोक्षणेविनि०॥ ईळेद्यावापृथिवी॥ वर्ग ५॥ अत्रापिसकृदेवसूक्तपाठः ततःप्रागादितोस्त्विराविच्छिन्नामुदकधारांदद्यादनेनापोहिष्ठेतितृचस्याम्बरीषःसिंधुद्वीपआपोगायत्री॥ गृहस्यसमंताद्धारायांविनि०॥ आपोहिष्ठामयोभु० ३ अत्रापिसकृदेवमंत्रपाठः॥ ततोवास्तुपीठान्नैर्ऋत्यपश्चिमायांवाकुंडेस्थंडिलेवागृह्याग्निंवरदनामकंसंस्थाप्यचत्वारिश्रृंगेतिध्यात्वास्मिन्वास्तोष्पतिस्थालीपाकेअन्वाधानंकरिष्ये॥ अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाअत्रप्रधानवास्तोष्पतिंचतुर्वारंचरुणाशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वान्वाधायइध्माबर्हिषीसन्नह्यपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वावास्तोष्पतयेचतुःकृत्वातूष्णींनिरूप्यतत्संख्ययातथैवप्रोक्ष्यावघाताद्याज्यभागांतंकृत्वावदानधर्मेणचरुमवदायवास्तोष्पतइतिचतसृणांवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥ अंत्यागायत्री वास्तोष्पतिप्रधानचरुहोमेविनियोगः॥ ॐवास्तोष्पते०देस्वाहा॥ अत्रऋगंतेस्वाहाकारंपठन्जुहुयात्॥ नस्वाहाकारांतेहोमःगृह्येतुप्रत्यृचंहुत्वेत्युक्तेः॥ एवंसर्वत्रवास्तोष्पतयइदंनमम॥ १॥ पुनःचरुमवदाय ॐवास्तोष्पतेप्रति०वास्तोष्पतयइदं॥ २॥ वास्तोष्पतेशग्म०वास्तोष्पतयइ०॥ ॐअमीवहावास्तो०वास्तोष्पतयइ०॥ ४॥ सर्वत्रत्यागः॥ ततःस्विष्टकृदादिहोमशेषंसमाप्यशिष्टेनचरुणान्येनस्वादुव्यंजनपायसादियुतेनशृतंतदर्धंवाशक्त्यावाभोजयेत्॥ होमात्पूर्वमन्यःपाकोनकार्यः॥ ततःशिवंवास्तुशिवंवास्तुशिवंवास्त्वितित्रिःप्रत्युक्तःसुहृद्युतोभुंजीतेति॥ विशीर्णगृहसज्जीकरणेपीष्यतेवास्तोष्पतिस्थालीपाकःसाधारणशांतिवत्॥ ॥ इत्याश्वलायनगृह्योक्तवास्तुशांतिः॥ ॥ अथगृहदानप्रयोगः॥ ॥ यजमानःकृतनित्यक्रियःपुण्यकालेगृहमध्येदक्षिणभागेचंदनेनाष्टदलंपद्मंविलिख्यतदुपरिप्रस्थपात्रंतिलान्निक्षिप्यतदुपरिशय्यांसोपस्करांस्थापयित्वाशय्योपरिसौवर्णमयींलक्ष्मीनारायणप्रतिमांअग्न्युत्तारण

पूर्वकंपंचामृतादिनाअभिषिच्यसंपूज्यप्रतिगृहीतारंचसपत्नीकंवृत्वातंकरेगृहीत्वामंगलतूर्यघोषेणवक्ष्यमाणमंत्रैर्गृहंप्रवेशयेत्॥ तेचमंत्राः॥ ॥एह्येहिनारायणादिव्यरूपसर्वामरैर्वंदितपादपद्म॥शुभाशुभानंदमुत्वामधीशंलक्ष्मीसुनरस्त्वंचगृहंगृहाण॥नमःकौस्तुभनाथायहिरण्यकवचायच॥क्षीरोदार्णवसंस्थायजगद्धात्रेनमोस्तुते॥नमोहिरण्यगर्भायविश्वगर्भायवैनमः॥चराचरस्यजगतोगृहभूतायवैनमः॥भूर्लोकप्रमुखालोकास्त्वद्देहेव्यवस्थिता॥नंदंतियावत्कल्पांतंतथास्मिन्भवनेगृही॥त्वत्प्रसादेनदेवेशपुत्रपौत्रावृतोगृहे॥पंचयज्ञक्रियायुक्तोवसेदाचंद्रतारकमिति॥ततस्तंपूर्वस्यांपतशय्यायांसुदङ्मुखसुपवेश्यसपत्नीकंयथाविभवंवस्त्रालंकारादिभिःसंपूज्यस्वयमासनेप्राङ्मुखोदर्भेष्वासीनोदर्भान्धारयमाणःपत्न्यासहप्राणानायम्यदेशकालौसंकीर्त्यममसमस्तपापक्षयपूर्वककल्पकोटिशतावधिब्रह्मलोकमहीयमानकामःशिलाकाष्ठपक्वेष्टिकादिनिर्मितयथोपपत्तिसंपादितताम्रादिभाजनसर्वधान्यलवणघृततैलगुडशर्करागोमहिषीबलीवर्ददासदासीमंचकतूलिकाद्युपवितानादर्शतांबूलायतनेलालवंगादिवर्षपर्याप्तसर्वोपकरणान्वितंसदीपिकाप्रद्योतितंविश्वकर्मदैवतंशुक्रदैवतंवेदंगृहंगोत्रायशर्मणेअमुकशाखाध्यायिनेसपत्नीकायसालंकृतायसंपूजितायलक्ष्मीनारायणप्रतिमासहितंतुभ्यमहंसंप्रददेनममेतिदत्वापठेत्तुमंत्रोत्तु॥इदंगृहंगृहाणत्वंसर्वोपस्करसंयुतं॥तवविप्रप्रसादेनममसंतुमनोरथाः॥गृहंममाविभूत्यर्थंगृहाणत्वंद्विजोत्तम॥प्रीयतांमेजगद्धोनिवास्तस्वरूपीजनार्दनः॥ ॥ततःप्रतिगृहीतागृहमध्यस्तंभंबहिर्द्वारदेहलींवासंस्पृश्यदेवस्यत्वेतियजुषाप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंपठेत्॥ततःसुवर्णसहस्रमारभ्यएकसुवर्णपर्यंतंयथाशक्त्यावित्तशाठ्यविवर्जितांदक्षिणांदद्यात्॥ततःपादुकोपानहछत्रचामरादिकंदत्वासंपन्नंगृहोपस्करदीत्युक्त्वासर्वसुसंपन्नंसंपूर्णमेवास्त्वितिप्रतिवचनंदद्यात्॥ततोब्राम्हणान्संपूज्यभूयसींदक्षिणांदत्वाशिषोगृह्णीयात्॥प्रमादा-

त्कुर्वतां०॥ यस्यस्मृत्येतिकर्मेश्वरार्पणंकुर्यात्॥ ॥गृहदानफलंउक्तंमात्स्ये॥ ॥यएवंसर्वसंपन्नंपक्केष्टंविनिवेदयेत्॥कल्पकोटिशतंयावद्ब्रम्हलोकेमहीयते।।शैलजंदारुजंवापियोदद्यात्विधिपूर्वकं॥वसोक्षीरार्णवेरम्येनारायणसमीपतः॥मृन्मयंवापियोदद्यात्गृहंसोपस्करान्वितम्॥परेषुलोकपालानांप्रतिमन्वंतरंवसेदिति॥अत्रप्रविश्यसंस्पृश्यवाप्रतिगृण्हीयात्इत्युक्तेः॥प्रविश्यगृहद्वारदेहलींप्रविश्यदेहल्यांप्रतिगृहःकर्तव्यः॥तथैवसंस्पृश्यस्थूणांद्वारदेहलींवासंस्पृश्यप्रतिगृण्हीयादितिसांप्रदायिकाः॥ ॥इतिगृहदानप्रयोगः॥ ॥अथमठदानंस्कांदे॥ ॥कृत्वामठंप्रयत्नेनशयनाशनसंयुतं॥वेदिकान्तृणादि॥पुण्यकालेद्विजेभ्योथयतिभ्योवानिवेदयेत्॥सर्वान्कामानवाप्नोतिनिष्कामोमोक्षमाप्नुयादिति॥ ॥इतिमठदानं॥ ॥अथधर्मशालादानं॥ ॥मार्कंडेयपुराणे॥ ॥कुर्यात्प्रतिश्रयगृहंपथिकानांहितावहम्॥निजगेहैकदेशंवासाधूनांयोनिवेदयेत्॥प्रतिश्रयोधर्मशाला॥तथा॥अक्षय्यंपुण्यमुद्दिष्टंतस्यस्वर्गापवर्गदं॥सर्वकामसमृद्धोसौदेववद्दिविमोदते॥ ॥भविष्ये॥प्रतिश्रयेसुविस्तीर्णेकारितेसजलेंधने॥दीनानाथजलार्थायवदकिन्नकृतंभवेदिति॥ ॥इतिधर्मशालादानं॥ ॥अथकन्यादानंहेमाद्रौ॥ ॥सहस्रमेवधेनूनांशतंवानडुहांसमम्॥दशानडुत्समंयानंदशयानसमोहयः॥दशवाजिसमाकन्याभूमिदानंचतत्समम्॥तस्मात्सर्वेषुदानेषुकन्यादानंविशिष्यतइति॥ ॥अग्निपुराणे॥ ॥श्रुत्वाकन्याप्रदानंचपितरश्चपितामहाः॥विमुक्ताःसर्वपापेभ्योब्रम्हलोकंव्रजंतितेइति॥देवलः॥निस्वःकन्यायथान्यायंपालयित्वानिवेद्यच॥नपितानरकंयातिनारीवास्त्रीप्रसूयिनीति॥वसिष्ठः॥ ॥हाटकक्षितिगौरीणांसप्तजन्मानुगंफलं॥धर्मेणविधिनादातुमसगोत्रेणायुज्यतइति॥ ऋष्यशृंगः॥वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकं॥नामसंकीर्तयेद्विद्वान्कन्यायाश्चैवमेवहि॥तिष्ठेदुदङ्मुखोदातातिष्ठेत्पूर्वमुखोवरः॥मधुपर्कार्चितायैनांतस्मैदद्यात्सदक्षिणाम्॥उदपात्रंततादायमंत्रेणानेनदापयेदिति॥तिष्ठेदिति अनुपविष्टइत्यर्थः॥ ॥गौरींकन्यामिमामित्यादिपुत्रपौत्रप्रवर्धिनीमित्यंतं

प्रयोगंवक्ष्यामः॥ भूमिंगावश्चदासींश्चवासांसिचस्वशक्तितः॥महिषीर्वाजिनश्चैवदद्यात्स्वर्णमणीनपीति॥ततःस्वगृह्यविधिनाहोमाद्यंकर्मकारयेत्॥यथाचारंविधर्यानिमांगल्यकुतुकानिचेति॥ ॥अथकन्यादानप्रयोगः॥ ॥तत्रादौयथाशास्त्रंमधुपर्केणसंपूज्यवरंप्राङ्मुखंवधूंप्रत्यङ्मुखींउपवेश्यपित्रादिकोवधूवरस्यदक्षिणतःस्वदक्षिणस्थपत्नीसहितःउदङ्मुखोदर्भेष्वासीनोदर्भान्धारयमाणोदेशकालौसंकीर्त्यममसमस्तपितॄणांनिरतिशयसानंदब्रम्हलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तयेअनेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसंतत्याद्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुंआत्मनश्चश्रीलक्ष्मीनारायणप्रीतयेब्राम्हविवाहविधिनाकन्यादानमहंकरिष्येइतिसकुशाक्षतजलेनसंकल्प्यसपत्नीकउत्थायोदङ्मुखएवकन्यांसंप्रगृह्यपठेत्॥कन्यांकनकसंपन्नांकनकाभरणैर्युताम्॥दास्यामिविष्णवेतुभ्यंब्रम्हलोकजिगीषया॥विश्वंभरःसर्वभूताःसाक्षिण्यःसर्वदेवताः॥इमांकन्यांप्रदास्यामिपितॄणांतारणायच॥ ॥इतिमंत्रंपठित्वास्वदक्षिणस्थभार्यादत्तपूर्वकल्पितजलधारामवच्छिन्नांनवकांस्यपात्रोपरिधृतकन्यांजल्युपरिस्थवरांजलिदक्षिणहस्तेक्षिपन्वदेत्॥कन्यातारयतुपुण्यंवर्धतां॥शिवाआपःसंतु-सौमनस्यमस्तु॥अक्षतंचारिष्टंचास्तु॥दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु॥यच्छ्रेयस्तदस्तु॥यत्पापंतत्प्रतिहतमस्तु॥पुण्याहंभवंतोब्रुवंतु॥स्वस्तिभवंतोब्रुवंतु॥ऋद्धिंभवंतोब्रुवंतु॥श्रीरस्त्वितिभवंतोब्रुवंतु॥अस्तुश्रीरितिप्रतिवचनंसर्वत्रज्ञेयं॥अमुकामुकप्रवरोपेतामुकगोत्रोत्पन्नोमुकशर्माहंममसमस्तपितॄणामित्यादि॥श्रीलक्ष्मीनारायणप्रीतयेइत्यंतपूर्वोक्तमुक्त्वाअमुकप्रवरोपेतायामुकगोत्रायामुकपुत्रायामुकशर्मणेवरायश्रीधररूपिणेकन्यार्थिनेअमुकामुकप्रवरोपेताममुकगोत्राममुकप्रपौत्रीममुकपौत्रीममुकस्यममपुत्रीममुकदेवीनाम्नींकन्यांश्रीरूपिणींवरार्थिनींयथाशक्त्यलंकृतांप्रजापतिदैवत्यांधर्मप्रजासहत्वकर्मभ्यस्तुभ्यमहंसंप्रददेकन्यांप्रतिगृण्हातुभवानितिवरहस्तेसकुशाक्षतजलंक्षिपेत्॥प्रजापतिःप्रीयतामितिमनसास्मरेत्नममेतिनवदेदितिकेचित्॥ततोदाना॥

॰मुकप्रपौत्रायामुकपौत्राया॰३

गौरींकन्यामिमांविप्रयथाशक्तिविभूषिताम्॥गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय॥कन्येममाग्रतोभूयाःकन्येमेदेविपार्श्वयोः॥कन्येमेपृष्ठतोभूयास्त्वद्दानान्मोक्षमाप्नुयाम्॥ममवंशकुलेजातापालितावत्सराष्टकम्॥तुभ्यंविप्रमयादत्तापुत्रपौत्रप्रवर्धिनी॥ धर्मेच॥अर्थेच॥ कामेच॥नातिचरितव्यात्वयेयम्॥ नातिचरामीतिवरः॥एवंसमस्तेत्यादिनातिचरामीत्यंतंकन्यादानंत्रिवारंकार्यमितिशौनकः॥ततोवरःदेवस्यत्वा॰भ्यांप्रतिगृह्णामि॥ॐस्वस्तीत्युक्त्वाकन्यायादक्षिणांसमभिमृश्यकइदंकस्माअदादितियथाशाखंकामस्तुतिंपठित्वापृथ्वीप्रतिगृह्णात्वितिजपित्वागृहस्थाश्रमांतर्गतश्रौतस्मार्तकर्मानुष्ठानसिद्धये धर्मप्रजासहत्वसिध्यर्थंचकन्यांप्रतिगृह्णामीतिवदेत्॥ततोदातादेशकालौसंकीर्त्यकृतस्यकन्यादानकर्मणःसांगतासिध्यर्थंइदंसुवर्णंअग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिवरहस्तेदद्यात्॥ॐस्वस्तीतिवरः॥ततोदाता एवमेवजलपात्रभाजनभोजनानिगोमहिष्यश्वगजदासीदासभूवाहनालंकारादियथाविभवंसंकल्प्यदद्यात्॥ततोब्राम्हणभोजनंसंकल्प्यभूयसींचदद्यात्॥कर्मेश्वरार्पणंकुर्यादन्यदपियथाचारंकार्यं॥ ॥विस्तरस्तुप्रयोगरत्नादौज्ञेयः॥ ॥कन्यागृहेभोजननिषेधोमदनरत्नेवन्हिपुराणे॥ ॥ अप्रजायांतुकन्यायांनभुंजीतकदाचन॥दौहित्रस्यमुखंदृष्ट्वाकिमर्थमनुशोचतीतिकन्यादानप्रयोगः॥ ॥अथकपिलादानं॥ ॥साचदशधोक्तावाराहे॥ सुवर्णकपिलापूर्वाद्वितीयागौरपिंगला॥तृतीयाचैवरक्ताक्षीचतुर्थीगुडपिंगला॥पंचमीबहुवर्णास्यात्षष्ठीचश्वेतपिंगला॥सप्तमीश्वेतपिंगाक्षीअष्टमीकृष्णपिंगला॥नवमीपाटलाप्रोक्तादशमीपुच्छपिंगला॥एतादशविधाख्याताःकपिलास्तेमहामुने॥सर्वाह्येतामहाभागास्तारयंतिनसंशयइति॥ ॥आदित्यपुराणे॥ सहस्रंयोगवांदद्यात्कपिलात्वेकएवहि॥सममेवपुराप्राहब्रम्हाब्रम्हविदांवरइति॥तथा॥रौप्यशृंगीरौप्यखुराःसवत्सायाभवंतिहि॥सुरभीलोकमासाद्यरमतेतावतीःसमाइति॥ ॥महाभारते॥समानवत्सांकपिलांधेनुंदद्यात्पयस्विनीं॥सुश्वेतवस्त्रसंवीतांब्रम्हलोकेमहीयतइति॥ ॥अथकपिलादानप्रयोगः॥

॥पुण्यकालेकृतनित्यक्रियोद्येत्यादि॥ममगोसहस्रदानफलावाप्तिसवत्सकपिलायाःरोमपरिमितवत्सरपर्यंतकामधेनुलोकनिवासकामइमांकपिलांसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठींकांस्योपदोहांघंटाभरणांश्वेतवस्त्रयुगछन्नांचंदनस्रग्विभूषितांसोपस्करांरुद्रदेवत्यांगोत्रायशर्मणेसुपूजितायब्राह्मणायतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ ॥मंत्रस्तुमात्स्ये॥ ॥कपिलासर्वदेवानांपूजनीयासिरोहिणी॥तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे॥ ॥इतिमंत्रांतेप्रदक्षिणंकुर्यात्॥ ॥ततःसुवर्णदक्षिणांदद्यात्॥उक्तोपस्करकपिलादानफलंमात्स्ये॥ ॥वस्त्रंचतुर्गुणंदत्वादक्षिणांचचतुर्गुणां॥एतैरलंकृतांधेनुंघंटाभरणभूषिताम्॥कपिलांविप्रमुख्यायदत्वामोक्षमवाप्नुयादिति॥ तथा ॥द्विगुणोपस्करोपेतामहतीकपिलास्मृता॥उपस्कराःसुवर्णशृंगवस्त्रदोहनपात्राद्याःसामान्यगोदानेवक्ष्यमाणाः॥दत्तासाविप्रमुख्यायस्वर्गमोक्षफलप्रदा॥सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः॥यान्यानर्थयतेकामांस्तांस्तान्प्राप्नोतिमानवइति॥ ॥महाकपिलादानप्रयोगस्तु॥ ॥अद्येत्यादिममसमस्तजन्मकृतपापनाशपूर्वकंपुत्रपौत्रादिसहितायशर्मणेसालंकृतांइमांमहाकपिलांद्विगुणोपस्करोपेतांरुद्रदेवत्यांतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ततःसुवर्णदक्षिणांदत्वाक्षमापयेत्॥मंत्रस्तुपूर्वमेवोक्तः॥ ॥इतिमहाकपिलादानप्रयोगः॥ ॥इतिमहादशदानानि॥ ॥अथदशधेनुदानानि॥ ॥यास्तुपापविनाशिन्यःकथितादशधेनवः॥तासांस्वरूपंवक्ष्यामिनामानिचनराधिप॥प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा॥तिलधेनुस्तृतीयातुचतुर्थीजलधेनुका॥क्षीरधेनुस्तुविख्यातामधुधेनुस्तथापरा॥सप्तमीशर्कराधेनुर्दधिधेनुस्तथाष्टमी॥रसधेनुस्तुनवमीदशमीस्यात्स्वरूपतः॥कुंभान्घृतादिधातूनामितरासांतुराशयः॥सुवर्णधेनुमप्यत्रकेचिदिच्छंतिमानवाः॥नवमींतिलतैलेनतथान्येपिमहर्षयः॥रसधेनुस्थानेसुवर्णधेनुंजलधेनुवत्पूजयेत्॥ ॥एतद्विधानमपिमात्स्ये॥ ॥अजिनंतुचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि॥गो

मयेनोपलिप्तायांदर्भानास्तीर्यसर्वतः॥तत्रैणंवाजिनंतद्वद्वत्सस्यपरिकल्पयेत्॥ ॥लघुकृष्णाजिनं॥ ॥प्राङ्मुखींकल्पयेद्धेनुमुदक्पादांसवत्सकाम्
॥प्राङ्मुखींप्राक्शिरसं॥सवत्सांउत्तरभागस्थितवत्ससहिताम्॥उत्तमागुडधेनुःस्यात्सदाभारचतुष्टया॥वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता॥अर्ध-
भारेणवत्सःस्यात्कनिष्ठाभारकेणतु॥चतुर्थांशेनवत्सःस्याद्गृहवित्तानुसारतः॥तुलापलशतंप्राहुर्भारःस्याद्विंशतिस्तुलाइतिभारःपलसहस्रात्मकोभवतीत्युक्तं
परिभाषायां॥धेनुवत्सौघृतस्यैतौसितसूक्ष्मांबरावृतौ॥शुक्तिकर्णाविक्षुपादौशुचिमुक्ताफलेक्षणौ॥सितसूत्रशिरालौतौसितकंबलकंबलौ॥ताम्रगुडक
पृष्ठौतौसितचामररोमकौ॥ ॥ककुद्देशेगुडकः॥विद्रुमभ्रूयुगोपेतौनवनीतस्तनान्वितौ॥क्षौमपुच्छौकांस्यदोहाविंद्रनीलकतारकौ॥सुवर्णशृंगाभर
णौराजतक्षुरसंयुतौ॥नानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ॥गंधकरंडकःकर्पूरादिपात्रविशेषः॥एवंरचित्वाधूपदीपादिभिरभ्यर्चयेद्वस्त्रमुक्तादीनिभारतो
मानाधिक्यंफलाधिक्यम्॥ ॥अथास्यप्रयोगः॥ ॥यजमानःकृतनित्यक्रियःपुण्यकालेशुचिरद्येत्यादिममसमस्तपापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंगु
डधेन्वादिदानंकरिष्येइतिसंकल्प्यविप्रंवस्त्राभरणादिभिःसंपूज्यप्रदक्षिणीकृत्यसर्वपापक्षयकामइमाममुकधेनुंगोत्रायशर्मणेब्राम्हणायसुपूजितायतु
भ्यमहंसंप्रददेनममेतितद्धस्तेसकुशतिलजलंगोपुच्छंदद्यात्॥विप्रस्तुदेवस्यत्वेतिप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंपठेत्॥ ॥ततःसुवर्णद
क्षिणांदद्यात्॥प्रार्थनामंत्रास्तु॥ ॥यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता॥धेनुरूपेणसादेवीवांछितंमेप्रयच्छतु॥देहस्थायाचरुद्राणीशंकरस्यसदा
प्रिया॥धेनुरूपेणसादेवीममपापंव्यपोहतु॥विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसोः॥चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तुसाश्रिये॥चतुर्मुखस्ययालक्ष्मी यालक्ष्मी
धनदस्यच॥यालक्ष्मीर्लोकपालानांसाधेनुर्वरदास्तुमे॥स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांतथा॥सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमेद्युते॥एवमामंत्र्य

ब्राम्हणायतांधेनुंनिवेदयेत्।। एतदेवविधानंसर्वधेनूनां।। प्रत्यक्षधेनुव्यतिरिक्तानामित्यर्थः।।उक्तरचनायास्तत्रानुपयोगात्।।ततोभूयसींदत्वाब्राम्हणान्भोजयेदिति।। ।।एतदेवविधानंस्यात्तएवोपस्कराःस्मृताः।।अयनेविषुवेपुण्येव्यतीपातेतथापुनः।।गुडधेन्वादयःसर्वाउपरागादिपर्वसु।।यथाशक्तिप्रदातव्याभुक्तिमुक्तिफलप्रदाइति।।अत्रद्रोणपरिमाणातिलधेनुरुक्ताकल्पतरौ।।तत्प्रकारंतुविष्णुधर्मोत्तरे।।अनुलिप्तेमहीपृष्ठेवस्त्राजिनकुशावृते।।धेनुंतिलमयींकृत्वासर्वरत्नैरलंकृतां।।धेनुंद्रोणेनकुर्वीतआढकेनतुवत्सकम्।।स्वर्णशृंगींरौप्यखुरांगंधघ्राणवतींतथा।।कुर्याच्चशर्कराजिह्वांगुडास्यामाविकंबलाम्।।इक्षुपादांताम्रपृष्ठींशुचिमुक्ताफलेक्षणां।।प्रशस्तपत्रश्रवणांफलदंतमयींशुभाम्।।स्रग्दामपुच्छांकुर्वीतनवनीतस्तनान्वितां।।सितवस्त्रयुगच्छन्नांघंटाभरणभूषिताम्।।इक्षुसंस्थानसंपन्नांकृत्वाश्रद्धासमन्वितः।।कांस्योपदोहनांदद्यात्केशवःप्रीयतामिति।। ।।इतिकर्तव्यता।। ।।मंत्रास्तुगुडधेनूक्ताएव।। ।।प्रार्थनामंत्रोस्तु।।वन्हिपुराणे।।तिलाश्चपितृदेवत्यानिर्मिताश्चह्वगोसवे।।ब्रह्मणातन्मयीधेनुर्दत्ताप्रीणातुकेशव इति मंत्रांतरमुक्तम्।।प्रतिमातिलधेन्वादीनांविक्रयाद्युक्तंहेमाद्रौब्रह्मवैवर्ते।।दानकालेतुदेवत्वंप्रतिमानांप्रकीर्तितम्।।धेनूनामपिधेनुत्वंश्रुत्युक्तंदानयोगतः।।दातुर्वैदानकालेतुधेनवःपरिकीर्तिताः।।विप्रस्यव्ययकालेतुद्रव्यंतदितिनिश्चयः।।दानसंबंधिविप्रेणद्रव्यमागच्छतागृहं।।तत्सर्वंविदुषातेनविक्रेयंस्वेच्छयाविभो।।कुटुंबभरणंकार्यंधर्मकार्यंचसर्वशः।।अन्यथानरकंयातीत्येवमाहपितामहइति।। ।।इतितिलधेनुदानं।। ।।अथघृतधेनुदानंविष्णुधर्मोत्तरे।। ।।तिलाभावेतथादद्याद्घृतधेनुंप्रयत्नतः।।वासुदेवंजगन्नाथंघृतस्रीगाभिषेर्जितं।।संपूज्यपूर्ववत्पुष्पैर्धूपदीपादिभिर्नरैः।। ।।तत्रैवविधानमाह।। ।।गव्यस्यसर्पिषःकुंभंपुष्पमाल्यादिभूषितम्।।कांस्यापिधानसंयुक्तंसितवस्त्रयुगेनच।।हिरण्यसहितंतद्वन्मणिविद्रुममौक्तिकैः।। ।।अत्रपलसहस्रपरिमाणंकुंभः।। ।।द्वादशपलाधिकपञ्चशतपलाधिकोवा।।इक्षुयष्टिमयान्पादान्खु

रान्नोष्यमयांस्तथा।। सौवर्णेचाक्षिणीकुर्यान्छृंगेचारारुकाष्ठजे।। सप्तधान्यमयेपार्श्वेपत्तोर्णेनचकंबले।। पत्तोर्णंधौतकौशेयं।। कर्पूरंघ्राणं।। फलमयान्स्तनान्
शर्करायाजिव्हा।। गुडक्षीरमयंसुखं।। क्षौमंपुच्छं।। रोमाणिसितसर्षपैः।। ताम्रपृष्ठीं।। एतादृशींकृत्वाविधिनासंपूज्य।। तथाब्राह्मणंयथाविभवंवस्त्रालंकारा
दिभिःसंपूज्यदद्यात्।। विधिस्तुभार्गवत्।। मंत्रस्तुस्कांदे।। घृतंगावःप्रसूयंतेघृतंभूम्यांप्रतिष्ठितं।। घृतमग्निश्चदेवाश्च घृतंमेसंप्रदीयतामिति।। ।।दानफल
मपितत्रैव।। घृतक्षीरवहानद्यापत्रपायसकर्दमाः।। तेषुलोकेषुसर्वेषुसपुण्येषुप्रजायते।। सकामानामियंव्युष्टिःकथितानृपसत्तम।। व्युष्टिःफलं।। विष्णुलो
कंनरायांतिनिष्कामाधेनुदानतइति।। दक्षिणातुहिरण्यमेवहेमाद्रिः।। सुवर्णप्रभृतिशक्त्यावेत्युक्तंमदनरत्ने।। ।।इतिघृतधेनुदानं।। ।।अथजलधेनुदानं।।
स्कांदे।। जलकुंभंनरव्याघ्रसुवर्णरजतान्वितम्।। सुवर्णशृंगरजतखुरान्वितमिति।। रत्नगर्भमयीषैस्तुग्राम्यैर्धान्यैःसमन्वितं।। सितवस्त्रयुगच्छन्नांदूर्वापल्लव
शोभिताम्।। कुष्टमांसीसुरोशीरबालकामलकैर्युतां।। प्रियंगुपत्रसहितसितवस्त्रोपवीतिनम्।। सच्छत्रंसदुपानत्कंदर्भविष्टरसंज्ञितं।। चतुर्भिःसंभृतभूप
तिलपात्रैश्चतुर्दिशं।। स्थगितंदधिपात्रेणघृतक्षीरवतासुखे।। तिलपात्राणिताम्रमयानि।। ।।दधिपात्रंकांस्यमयं।। उपोषितोवासुदेवंजलशायंअभ्यर्च्य
संकल्प्यजलधेनुंविप्रंचवस्त्रादिभिःसंपूज्यसवत्सांजलधेनुंगुडधेनुंचदद्यात्।। ततोयालक्ष्मीरित्यादिपूर्वोक्तमंत्रैःप्रार्थयेत्।। ।।इतिजलधेनुदानं।। ।।
अथक्षीरधेनुदानं।। ।।स्कांदे।। क्षीरधेनुंप्रवक्ष्यामितांनिबोधनराधिप।। अनुलिप्तेमहीपृष्ठेगोमयेननराधिप।। गोचर्ममानमात्रेणकुशानास्तीर्यसर्व
तः।। तस्योपरिमहाराजन्यसेत्कृष्णाजिनंततः।। तत्रगोमयेनकुंडलिकांकृत्वाक्षीरकुंभंतत्रस्थाप्यचतुर्थांशेनवत्सकं।। शृंगाणिचंदनागरुकाणि
।।प्रशस्तपत्रश्रवणा तिलपात्रोपरिन्यस्ता।। मुखंगुडमयंरूपवत्।। जिव्हाशर्करयाफलैर्दंताः।। मुक्ताफलेक्षणा।। इक्षुपादा।। दर्भरोमा-

सितकंबलकंबला॥एतांदृशींसवत्सामभ्यर्च्यद्विजंचवस्त्रालंकारादिभिःसंपूज्य अद्येत्यादिगोत्रायशर्मणेसालंकृतायइमांक्षीरधेनुंपूर्वोक्तसोपस्करयुतांसमस्तपा
पक्षयकामस्तुभ्यमहंसंप्रददेनममेतिवदेत्॥देवस्यत्वास्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंपठेत्॥ततोयालक्ष्मीरित्यादिमंत्रैःप्रार्थयेत्॥ ॥इतिक्षीरधेनुदानं॥
॥ अथमधुधेनुदानंस्कांदे॥ ॥मधुधेनुंप्रवक्ष्यामिसर्वपापप्रणाशिनीं॥अनुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्तरे॥कल्पयेत्॥धेनुंद्विजंचपूर्ववदभ्यर्च्य अद्येत्या
दिगोत्रायशर्मणेसालंकृतायसौवर्णमुखींअगरुचंदनशृंगींताम्रपृष्ठींसूत्रपुच्छांइक्षुपादांसितकंबलकंबलांगुडमुखींशर्कराजिव्हांमौक्तिकनेत्रांफलदंतांद
र्भरोमांप्रशस्तपत्रश्रवणांनवनीतस्तनींसप्तधान्योपेतांततश्चत्वारिपात्राणिचतुर्दिक्षुविन्यसेत्॥वस्त्रयुग्मेनाच्छाद्यघंटाभरणभूषितां॥कांस्यदोहांस्रक्पूजितां
पुच्छदेशोपविष्टायमधुवाताऋतायतइतिमंत्रमुक्त्वाइमांमधुधेनुंसर्वपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति॥ ॥ततःसुवर्णदक्षिणांदत्वा॥ यालक्ष्मी
रित्यादिपूर्वोक्तमंत्रैःप्रार्थयेत्॥ ॥इतिमधुधेनुदानं॥ ॥अथशर्कराधेनुदानं॥ स्कांदे॥ तद्वच्चशर्कराधेनुंशृणुराजन्यथार्थतः॥अनुलिप्तेमहीपृष्ठेकृष्णा
जिनकुशोत्तरे॥भारचतुष्टयपरिमितांतच्चतुर्थांशोवत्सः॥भारद्वयअष्टमांशइति॥स्वशक्त्यावाकार्या॥सर्वधान्यानिचतुर्दिक्षुसंस्थाप्य अद्येत्यादि॰गोत्रायश-
र्मणेसालंकृतायइमांशर्कराधेनुंसुवर्णशृंगींमौक्तिकनयनांगुडमुखींपिष्टमयीजिव्हांकंबलपट्टसूत्रेणवेष्टितांकंठाभरणभूषितांइक्षुपादांरौप्यखुरींनवनी
तस्तनींप्रशस्तपर्णश्रवणांसितचामरभूषितांपंचरत्नसमायुक्तांदर्भरोमांकांस्यदोहनांगंधपुष्पाद्यर्चितांसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेतिसु
वर्णदक्षिणांदद्यात्॥ततोयालक्ष्मीरित्यादिमंत्रैःसंप्रार्थ्यभूयसींदद्यात्॥ ॥विप्रमुखंनेक्षेदिति॥ ॥पंचरत्नानित्वपरार्के॥कनकंहीरकंनीलंपद्मरागंच
मौक्तिकं॥पंचरत्नमिदंप्रोक्तमृषिभिःपूर्वदर्शिभिरिति॥ ॥इतिशर्कराधेनुदानं॥ ॥अथदधिधेनुदानं॥ ॥स्कांदे॥ तत्रभूलेपनेकुशाकृष्णाजिनेआस्ती

र्णसमथान्योपरिदधिकुंभंसंस्थाप्यचतुर्थांशेनवत्संकृत्वागोत्रायशर्मणेसालंकृतायसौवर्णसुखींप्रशस्तपत्रश्रवणांमुक्ताफलेक्षणांचंदनागरुशृंगींसुखेविशेषगंधद्रव्यैर्युक्तांशर्करयाकृतजिव्हांश्रीखंडेनकृतघ्राणांफलमयदंतांसितकंबलछन्नांदर्भरोमांसूत्रमयपुच्छांरौप्यसुखींवानवनीतस्तनींमिक्षुपादांसर्वाभरणभूषितांवस्त्रयुग्मेनाच्छादितांगंधपुष्पाद्यर्चितांइमांदधिधेनुंसर्वपापक्षयकामोदधिक्राव्णाइतिमंत्रंपठित्वातुभ्यमहंसंप्रददेनममेति॥गुडधेनूक्तमंत्रेणवादद्यात्॥ततःसुवर्णदक्षिणांदत्वायालक्ष्मीरित्यादिमंत्रैःप्रार्थयेत्॥ ॥इतिदधिधेनुदानं॥ ॥अथरसधेनुदानम्॥ ॥स्कांदे॥ रसधेनुंमहाराजकथयामिसमासतः॥अनुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्तरे॥इक्षुरसस्यघटंपूरयित्वातच्चतुर्थांशेनवत्संसंपाद्य॥अद्येत्यादिगोत्रायशर्मणेसालंकृतायइमांरसधेनुंसुवर्णशृंगाभरणयुतांरौप्यखुरांवस्त्रपुच्छांइक्षुपादांपुष्पकंबलांताम्रपृष्ठींपुष्परोमांव्रीहियुतांचतुर्दिक्षदीपसमायुक्तांसर्वगंधविभूषितांपूर्वादिदिक्षुतिलपात्रचतुष्टयावृतांसुपूजितायसर्वपापक्षयपूर्वकैकविंशत्कुलोद्धरणकामस्तुभ्यमहंसंप्रददेनममेति॥सुवर्णदक्षिणांदद्यात्॥मंत्रास्तु॥गुडधेनूक्ताएवशेषोपस्कराश्च॥एवमुच्चारयित्वातुदीयतेवैद्विजन्मने॥दशपूर्वान्परांश्चैवआत्मानंचैकविंशतिरिति॥ ॥इतिरसधेनुदानं॥ ॥अथस्वरूपतोगोदानं॥अंगिराः॥ ॥गोरेकस्यैकदातव्याश्रोत्रियायकुटुंबिने॥साहितारयतेपूर्वान्सप्तसप्तचसप्तचेति देवलः॥सुशीलांलक्षणवतींयुवतींवत्ससंयुतां॥बहुदुग्धवतींस्निग्धांधेनुंदद्याद्विचक्षणे॥१॥ ॥अथगोदानप्रयोगः॥ ॥कर्ताकृतनित्यक्रियःपुण्यकाले अद्येत्यादियथाशक्तियथाज्ञानंगोदानमहंकरिष्येइतिसंकल्प्यसवत्सांधेनुंद्विजंचयथाविभवंवस्त्रालंकारादिभिःसंपूज्यगोशृंगमूलादिस्तनांतस्थानादिषुदेवताःपूजयेत्॥तद्यथा॥शृंगमूलेब्रम्हविष्णुभ्यांनमः॥ब्रम्हविष्णूपूजया०॥शृंगाग्रेसर्वतीर्थेभ्योनमःसर्वतीर्थानिपूजयामि॥एवंसर्वत्र॥शिरोमध्येशिवाय०॥ललाटेदेव्यैन०॥नासिकायांषण्मुखाय०॥नासापुटयोःकंबलाश्वतरनागाभ्यां०॥

कर्णयोरश्विभ्यां॰ चक्षुषोः शशिभास्कराभ्यां॰॥ दंतेषुवायवे॰॥ जिह्वायांवरुणा॰॥ हुंकारेसरस्वत्यै॰॥ गंडयोःपक्षमासाभ्यां॰॥ ओष्ठयोःसंध्याद्वया॰॥ ग्रीवायांरुद्राय॰॥ कुक्षिदेशेरक्षोभ्यो॰ उरसिसाध्येभ्यो॰॥ पादेषुधर्माय॰॥ जंघासु अधर्माय॰॥ खुरमध्येगंधर्वेभ्यो॰॥ खुराग्रेपन्नगेभ्योन॰॥ खुरपश्चिमाग्रे अप्सरोभ्यो॰॥ पृष्ठे एकादशरुद्रेभ्यो॰॥ सर्वसंधिषुवसुभ्योन॰॥ श्रोणितटेपितृभ्यो॰॥ लांगुलेसोमाय॰॥ गुह्ये आदित्यरश्मिभ्यो॰॥ गोमूत्रेगंगायै॰॥ गोमयेयमुनायै॰॥ क्षीरेसरस्वत्यै॰॥ दध्निनर्मदायै॰॥ घृते अग्नये॰ रोमस्वष्टाविंशतिदेवकोटिभ्योन॰॥ उदरेपृथिव्यै॰॥ पयोधरेषुचतुःसमुद्रेभ्यो॰॥ चतुरःसमुद्रान्पूजयामि॥ एतादेवता अंगेषु संपूज्य अद्येत्यादिगोत्रायशर्मणेसु पूजितायपृथ्वीदानसमफलकामः सर्वपापक्षयकामोविष्णुप्रीतिकामोवाइमांप्रत्यक्षधेनुसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठींघंटाग्रैवेयांमुक्तालांगूलांकांस्योपदोहनींसितवस्त्रद्वयोपेतांसर्वाभरणभूषितांसोपस्करांरुद्रदेवत्यांतुभ्यमहंसंप्रददेनममेति॥ तिलपात्रेघृताक्तंगोपुच्छंकृत्वाविप्रहस्तेसतिलकुशोदकंदद्यात्॥ मंत्रस्तु॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी॥ विश्वरूपधरोदेवःप्रीयतामनयागवा॥ ततोदातादानप्रतिष्ठासिध्यर्थंसुवर्णदक्षिणांदत्वाप्रार्थयेत्॥ नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच॥ नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः॥ पूजितासिवसिष्ठेनविश्वामित्रेणधीमता॥ सुरभिहरमेपापंयन्मयादुष्कृतंकृतमिति॥ गावोमे अग्रतःसंतुगावोमेसंतुपृष्ठतः॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहमिति॥ पठित्वाधेनुंद्विजंचप्रदक्षिणीकृत्यकिंचिदनुव्रजेदिति॥

॥ इतिगोदानप्रयोगः॥ ॥ अथश्वेतवर्णादिगोदानफलमुक्तंपाद्मे॥ ॥ श्वेतासुतंप्रदाप्रोक्ताचंद्रलोकप्रदायिनी॥ कृष्णास्वर्गप्रदाज्ञेयागौरीस्यात्कुलवर्धिनी॥ कपिलासर्वपापघ्नीनानावर्णाचमोक्षदेति॥ ॥ अथसमानवर्णगोवत्सदानफलं॥ महाभारते॥ ॥ रोहिणींतुल्यवर्णांतुसवत्सांचपयस्विनीं॥ प्रदत्वावस्त्रसंवीतांसूर्यलोकेमहीयते॥ समानवत्सांकृष्णांतुधेनुं॰ सुव्रतांवस्त्रसंवीतांपरस्मिन्लोकेमहीयते॥ वातरेणुसवर्णांतुसवत्सांकांस्यदोहनीं॥ प्रदायवस्त्रसंवीतांवारुणंलो

कमश्नुते॥हिरण्यवर्णांपिंगाक्षींसवत्सांदक्षिणायुतां॥प्रदद्याद्वस्त्रसंवीतांकौबेरंलोकमाप्नुयात्॥पलालधूम्रवर्णांतुसवत्सांप्रदद्यात्पितृलोकेमहीयते॥सवत्सांपीव
रांदत्वाशितिकंठमलंकृतां॥विश्वेदेवमसंबादंस्थानश्रेष्ठंप्रपद्यते॥समानवत्सांगौरींतुधेनुं॰सवत्सांकांस्यदोहांतुवसूनांलोकमाप्नुयात्॥वत्सोपपन्नांनीलांगींसर्वर
त्नसमन्विताम्॥गंधर्वाप्सरसांलोकान्दत्वाप्राप्नोतिमानवइति॥संकल्पेतुतत्फलंसंकीर्त्यदद्यात्॥ ॥इतिसमानवर्णगोवत्सदानफलं॥ ॥अथकृष्णधेनुदानं॥ ॥
मात्स्ये॥ ॥अद्येत्यादिसंकल्पादिपूर्ववत्॥ मंत्रस्तु ॥कृष्णधेनोनमस्तुभ्यंब्रम्हविष्णुशिवात्मके॥त्रिजन्मार्जितपापानिभुवंदानात्प्रणाशयेति॥ ॥अथहेमशृं
गीदानं॥ मात्स्ये ॥दशसौवर्णिकंशृंगंखुराःपंचपलान्विताः॥पंचाशत्पलिकंकांस्यंताम्रंचापितथैवच॥वस्त्रंचत्रिगुणंधेन्वादक्षिणाच्चचतुर्गुणेति॥ ॥एवंविधिव
द्दातुःफलमुक्तंनंदिपुराणे॥ ॥विधिनातुयदादत्तापात्रेधेनुःसदक्षिणा॥दातातारयतेजंतून्कुलानामयुतंशतमिति॥ ॥महाभारतेपि॥ ॥प्रासादायत्रसौव
र्णाःशय्यारत्नोज्ज्वलास्तथा॥वराश्चाप्सरसोयत्रतत्रगच्छंतिगोप्रदाः॥ तथा॥ यावंतिरोमाणिभवंतिधेन्वास्तावंतिवर्षाणिमहीयतेसः॥स्वर्गाच्च्युतश्चापिततो
नृलोकेकुलेसमुत्पत्स्यतिगोमतांतथा॥सालंकृतांसवत्सांचधेनुंसंपूज्यभक्तितः॥सरत्नपूर्णापृथिवीदेनदत्तानसंशयइति॥ ॥इतिस्वरूपतोगोदानं॥ ॥
अथकार्पासधेनुदानं॥ मात्स्ये ॥ अतःपरंप्रवक्ष्यामिधेनुंकार्पासिकींशुभां॥सर्वविश्वस्यतुष्ट्यर्थंब्रम्हणाचांबुकंकृतं॥साचकार्पासभारेणश्रेष्ठाधेनुःप्रकी
र्तिता॥मध्यमाचतदर्धेनतदर्धेनकनीयसी॥पूर्ववस्त्रंचधान्यंचहिरण्यंचतथैवच॥वत्सकंतुचतुर्थांशान्मानमात्राभिधीयते॥कुर्वीतपूर्ववद्धस्तवस्त्रधान्यादु
पस्कृतमिति॥ ॥ततोवराहोक्ततिलधेनुदानवत्॥ ॥क्रियाकलापादिसंकल्पादारभ्यदानांतंकृत्वाप्रार्थयेत्॥ मंत्रस्तु॥ हेमकुंदेंदुसदृशेक्षीरार्णवसमु
द्भवे॥सोमप्रियेसुधेन्वाख्येसौरभेयिनमोस्तुते॥दत्तेयमिंदुनाथायशशांकायामृतायच॥अग्निनेत्रप्रजातायसोमराजायवैनमः॥यस्त्वेवंपरयाभक्त्याब्रा

Nepal Saṇskrit University, Balmeeki Campus, Kathmandu

ह्मणायप्रयच्छति॥ सयातिचंद्रलोकंतुसोमेनसहमोदतइति॥ ॥इतिकार्पासधेनुदानं॥ ॥अथलवणधेनुदानं॥ ॥भविष्ये युधिष्ठिरंप्रतिकृष्णः॥ शृणुराजन्प्रवक्ष्यामिलवणस्येहकल्पितां॥ गोमयेनानुलिप्तेतुदर्भसंस्तरसंस्थितं॥ आविकंचर्मविन्यस्यपूर्वाशाभिमुखस्थितं॥ वस्त्रेणाछादितांकृत्वाधेनुंकुर्वीतबुद्धिमान्॥ आढकेनैवकुर्वीतबहुवित्तोपकल्पितां॥ गांविप्रंचयथाविभववस्त्रालंकारादिभिःसंपूज्य॥ अद्येत्यादिगोत्रायशर्मणेसुपूजितायइमांलवणधेनुंफलस्तनींसिंधुशुक्तिवर्णांसक्तुपिंडकपोलांयवास्यांकंबलपट्टसूत्रग्रैवेयकांताम्रपृष्ठींगुडपानांकंबलल्लांगूलांमधुयोनिकांसर्वाभरणभूषितांसर्वपापक्षयकामोविष्णुप्रीतिकामोवातुभ्यमहंसंप्रददेनममेतिपुत्रभार्यादियुतःप्रदक्षिणीकृत्यदद्यात्॥ शेषंमधुधेनुवत्॥ मंत्रस्तु॥ लवणेवैरसाःसर्वेतिष्ठंतिसर्वनताः॥ सर्वदेवमयेदेविलवणाख्येनमोस्तुतेइति॥ पुराणांतरेषुषोडशप्रस्थमितां॥ चतुर्थांशेनवत्सइत्युक्तं॥ ॥इतिलवणधेनुदानं॥ ॥अथसुवर्णधेनुदानं॥ ॥वन्हिपुराणे॥ ॥सुवर्णधेनुंवक्ष्यामिसुवर्णस्यचतुर्दश॥ सुनिर्णिक्तसुवर्णैश्वसप्तभिर्मध्यमामता॥ त्रिभिश्चकनिष्ठास्याच्चतुर्थांशेनवत्सकः॥ गुडधेनुविधानेनदत्तासर्वफलप्रदा॥ ॥अत्रविशेषोरौप्येपादवत्सइतिकेचित्॥ तथा ॥अद्येत्यादिप्रवालशृंगींघृतपात्रस्तनवतींपद्मरागांकपूर्णागरुनासिकांमिष्टान्नरसवासितांशंखशृंगांतरांशुक्तिललाटस्थांनारिकेलश्रवणांगुडजानुकांपंचगव्यापानवतींकांस्यपृष्ठांपट्टसूत्रलांगूलांसप्तधान्यसमायुक्तांफलपुष्पोपेतांछत्रोपानत्समन्वितांसुवर्णधेनुंरुद्रदेवत्यांसहस्राश्वमेधफलावाप्तिकामःकुलसहस्रस्यस्वर्गनिवासकामश्चगोत्रायशर्मणेसुपूजितायतुभ्यमहंसंप्रददेनममेति॥ मंत्रस्तु॥ सुवर्णधेनुंविप्रायप्रतिपाद्येदृशींनरः॥ हिरण्यरेताःपुरुषःपुराणःकृष्णपिंगलः॥ नमहेमच्छविःस्रष्टाविश्वात्माप्रीयतांममेति॥ अनेनैवतुमंत्रेणधेनुदानंप्रकीर्तितं॥ अश्वमेधसहस्रस्यफलमाप्नोत्यसंशयं॥ कुलानांचसहस्रस्यस्वर्गंनयतिगोप्रदइति॥ ॥इतिसुवर्णधेनुदानं॥

॥ अथवंध्यात्वहरंसुवर्णधेनुदानं॥ वायुपुराणे॥ ॥चतुर्विधाचयावंध्याप्रवेद्बहूत्सवियोजनात्॥वक्षेतस्याःप्रतीकारंतत्स्वरूपंनिबोधमे॥वंध्याचतुर्विधाप्रोक्तावंध्या॥काकवंध्यास्त्रीप्रसूः॥मृतप्रजाइति॥काकवंध्यातुकाकवदेकापत्या शेषास्पष्टाएव॥धेनुरूपविशेषमाह॥ ॥हेमाद्रौकर्मविपाके॥ ॥हिरण्येनयथाशक्त्यासवत्सांकारयेद्दृढां॥धेनुंपलेनवत्संचपादेनगुरुरब्रवीत्॥यथाशक्त्येति॥पलेनवातदर्धेनतदर्धार्धेनवापुनरिति॥कर्मविपाकोक्तपरिभाषाप्रकारेण॥धेनुंरौप्यखुरांरत्नंपुच्छेनियोज्यघंटांसुभयोरपिगलेबध्वारत्नमयतिलकंललाटेबध्नीयात्॥एतादृशींसमभ्यर्च्यपायसनैवेद्यंदत्वामोदकानपूपान्गुडलवणजीरकंसुवर्णंदक्षिणांकंचुकंचनववेणुमयशूर्पेनिधायएकंवायनकंधेनवेअन्याभ्योपतिपुत्रवतीभ्योब्राम्हणीभ्यःषडष्टौवादद्यात्॥ततोवेदपारगमलोलुपंब्राम्हणंऋणग्रस्तंदरिद्रंकुटुंबिनमाहूयदत्वायथाविभववस्त्रालंकारादिभिःसंपूज्यततोधेनुंसोमोधेनुमितिमंत्रेणसवत्सांचसंपूज्यअग्निमुपसमाधायसमिदाज्यचरुद्रव्यैःसोमोधेनुमितिमंत्रेणप्रत्येकमष्टोत्तरशतसंख्ययाहुत्वास्वयमुदङ्मुखःप्राङ्मुखायोपविष्टायगोपुच्छंतद्धस्तेनिधायदद्यात्॥ अद्येत्यादिगोत्रायशर्मणेसुपूजितायद्रमासालंकृतांसुवर्णधेनुंसवत्सांरौप्यखुरांरत्नपुच्छांघंटासुतकंठारत्नतिलकांवायनोपेतांवस्त्रयुगच्छन्नांमुक्तालांगूलांममपत्नीवत्पुत्रसंतानप्रतिबंधकीभूतसकलदुरितनिरासनपूर्वकंआयुष्मत्सुपुत्रावाप्तिकामावंध्यात्वहरामिमांसुवर्णधेनुंयथाशक्तिसोपस्करांरुद्रदेवत्यांतुभ्यमहंसंप्रददेनममेतिसकुशतिलोदकंदद्यात्॥ मंत्रस्तुवायवीये॥ धेनुरंगिरसःसत्रेवसिष्ठेसुरभिस्तथा॥दुहिताचसुताभानोरम्भश्चवरुणस्यच॥याश्चगावःप्रवर्तंतेवनेषूपवनेषुच॥प्रीणंतुताममसदापुत्रपौत्रप्रवर्धनाः॥प्रयच्छंतुदिवारात्रमविच्छेदंचसंततेः॥ततोदेवस्यत्वास्वस्तीत्युक्त्वायथाशास्त्रंकामस्तुतिंपठेत्॥ततःसुवर्णदक्षिणांदत्वा॥प्रार्थयेत्मंत्रस्तु॥वंध्यात्वंकाकवंध्यात्वंकन्याप्रसवएवच॥तथैवमृतवंध्यात्वंदोषंमेपन्नचतुर्विधं॥दानेनानेनहरतुयासाकामदुघाममे ति॥इतिगोप्रार्थयित्वाप्रदक्षिणीकृत्य

धिसृज्यभूयसींदक्षिणांदत्वायथाशक्तिब्राम्हणान्भोजयित्वाजीवत्पुंसंतानावाभिरस्त्वितितान्संप्रार्थ्यजीवत्पुंसंतानावाभिरस्त्वितितेब्रूयुः॥ततःसुहृद्युतोभुं
जीतेति॥ ॥इतिवंध्यात्वहरंसुवर्णधेनुदानं॥ ॥अथोभयतोमुखीदानं॥ मात्स्ये॥रुक्मशृंगींरौप्यखुरांमुक्तालांगूलभूषितां॥कांस्योपदोहनांराजन्सवत्सां
द्विजपुंगवे॥प्रसूयमानांयोदद्याद्धेनुंद्रविणसंयुतां॥यावद्वत्सोयोनिगतोयावद्गर्भंनमुंचति॥तावद्गौःपृथिवीज्ञेयासशैलवनकानना॥ देवलः॥ अलंकृत्यो
क्तविधिनासुवर्णत्रिफलान्विता॥देयाचद्विपलामध्याफलैकादक्षिणाधमा॥ वाराहेतु॥ सुवर्णसाहस्रंतदर्धार्धंमुख्यमुक्तं॥सुवर्णस्यसहस्रेणतदर्धेनापि
वापुनः॥तस्याप्यर्धशतंवापिपंचाशच्चततोधिकं॥यथाशक्त्यापिदातव्यावित्तशाठ्यविवर्जितेति॥ हेमाद्रौ॥ उभयतोमुखींस्वर्णनिष्कांदत्वासद्यःशुध्येत्पातके
भ्यश्चमर्त्यइति॥सुवर्णनिष्कदक्षिणायुतेनापिअत्रनिष्कश्चत्वारिंशन्माषकएवग्राह्यः॥अल्पशक्तौविंशतिमाषकोवादद्यादित्यर्थः॥दरिद्रेण॥ ॥अथदा
नप्रयोगः॥ ॥शुचिरद्येत्यादिउभयतोमुखीदानंकर्तुंगोब्राम्हणपूजांचकरिष्ये॥इतिसंकल्प्य॥द्विजंकुटुंबिनंदरिद्रंवेदपारगंसुशीलंवृत्वायथाविभवंवस्त्राल
कारादिभिःसंपूज्यॐत्वंमहीमवनिंविश्वधेनांतुर्वीतयेवेय्यायक्षरंतीं॥अरमयोनमसैजदर्णःसुतरणा अकृणोरिंद्रसिंधून्॥इतिगामनुमंत्र्यप्रदक्षिणीकृत्य
अद्येत्यादिगोत्रायशर्मणेअमुकशाखाध्यायिनेइमांधेनूपस्करांउभयतोमुखींससमुद्रशैलवनोपेतपृथ्वीदानसमफलावाप्तयेधेनुवत्सरोमसंख्ययुगदेवलोकम-
हीमत्वपितृपितामहप्रपितामहकुलशतनरकोत्तारणपूर्वकघृतक्षीरवहबहुकुल्याकदधिपायसकर्दमदेशाधिकरणकोत्तारकेप्सितकामोब्रम्हलोकावाप्तिकामो
रुद्रदैवत्यांइमांतुभ्यमहंसंप्रददेनममेतिसघृततिलपूर्णकांस्यपात्रयुतगोपुच्छंतद्धस्तेसकुशजलंदत्वाप्रार्थयेत्॥मंत्रस्तु॥इमांगृहाणोभयमुखींमयादत्तामम
मास्तुवै॥ममवंशविशुद्धिश्चसदास्वस्तिकराभवेदितिविप्रोदेवस्यत्वेतिप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंपठेत्॥ततःसुवर्णसहस्रमारभ्यपंचविंश

तिचतुर्द्दिरूवर्णमितांदक्षिणांदद्यात् ॥ ततोनन्यूनामिति ॥ ततोविमस्तु ॥ ॐ इरावतीधेनुमतीहिभूतंसूयवसिनीमनुषेदशस्या ॥ व्यस्तभ्नारोदसीविष्णवेते-
दाधर्थपृथिवीमभितोमयूखेः ॥१॥ ॐ स्योनापृथिवीभवानृक्षारानिवेशनी ॥ यच्छानःशर्मसप्रथः ॥ ॥इतिमन्त्रद्वयंपठित्वावदेत् ॥ ॥प्रतिगृह्णामिमांधेनुंकुटुम्बा
र्थेविशेषतः ॥ स्वस्तिर्भवतुमेनित्यंरुद्रमातर्नमोस्तुते ॥ इतिनत्वागृहीतायाःदक्षिणेनपाणिनावत्समाकृष्यपठेत् ॥ ॐ गर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमा
निविश्वा ॥ शतंमापुरआयसीररक्षन्नधश्येनोजवसानीरदीयमितिमंत्रेणवत्समाकृष्येत् ॥ निष्कासितेसतिकृत्यांतरमाह ॥ ततोयजमानःप्राणानायम्यअद्येत्या
दि० कृतस्योभयतोमुखीदानकर्मणःसांगतासिद्ध्यर्थंदेवादिमंत्रैस्तर्पणंहोमंचकरिष्ये ॥ इतिसंकल्प्य ॥ स्थंडिलेग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ अस्मिन्नन्वाहिते-
ग्नावित्यादिचक्षुषीआज्येनेत्यन्तमुक्त्वात्रप्रधानंपृथिवींत्रिःगौरींसकृदाज्येनप्रजापतिंचतुरशीत्याआज्येनशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्येइत्यन्तमुक्त्वासमि
द्द्वयमग्नावाधायइध्माबर्हिषीपरिसन्नह्यपरिसमूहनादिचक्षुष्यंतंकृत्वाकुशास्तृतभूमौअग्नेःपश्चाद्देवसाक्षताभिरद्भिर्वक्ष्यमाणमंत्रैर्देवादींस्तर्पयेत् ॥ तेचमं
त्राः ॥ ॐ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ ॥ अप्सुक्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमंजुषध्वम् ॥ देवांस्तर्पयामि ॥ ॐ उशंतस्त्वानिधी
मह्युशंतःसमिधीमहि ॥ उशन्नुशतआवहपितॄन्हविषेअत्तवे ॥ पितॄंस्तर्पयामि ॥ ॐ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्याम
रुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ सरितस्तर्पयामि ॥ ॐ अद्रिभिःसुतोमतिभिश्चनोहितःप्ररोचयन्रोदसीमातराशुचिः ॥ रोमाण्यव्यासमयावि
धावतिमधोर्धारापिन्वमानादिवेदिवे ॥ पर्वतांस्तर्पयामि ॥ ॐ वनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयंरुहेम ॥ यंत्वामयंस्वधितिस्तेजमानःप्रणिनायमह
तेसौभगाय ॥ वनस्पतींस्तर्पयामि ॥ ॐ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः ॥ इंद्रोयावज्रीवृषभोरराद ताआपोदेवीरिहमामवन्तु ॥ समु

द्रांस्तर्पया०॥ॐम् अहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः॥हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः॥नागांस्तर्पया०॥ॐ
मधुवाताऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नःसंत्वोषधीः॥ओषधीस्तर्पया०॥इत्यष्टाभिस्तर्पयित्वाचतस्रआज्याहुतीर्जुहुयात्॥ॐईळेद्यावापृथिवीपू
र्वचित्तयेग्निंघर्मंसुरुचंयामन्निष्टये॥याभिर्भरेकारमंशायजिन्वसस्ताभिरूषुऊतिभिरश्विनागतम् स्वाहा॥पृथिव्याइदंनमम॥ॐमहीद्यौःपृथिवीचन
इमंयज्ञंमिमिक्षतां॥पिपृतान्नोभरीमभिःस्वाहा॥पृथिव्याइदंनमम॥२॥ॐउर्वीपृथ्वीबहुलेदूरेअंतेउपब्रुवेनमसायज्ञेअस्मिन्॥दधातेयेसुभगेसुप्रतू
र्तीद्यावारक्षतंपृथिवीनोअभ्वात्स्वाहा॥पृथिव्याइदं०॥ॐगौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी॥अष्टापदीनवपदीबभूवुषीसहस्राक्ष
रापरमेव्योमन्स्वाहा॥गौर्याइदं०॥४इतिचतस्रआज्याहुतीर्हुत्वाततःसमस्तव्याहृतिभिश्चतुरशीत्याज्याहुतीर्हुत्वाप्रजापतयइदंनममेतित्यजेत्॥ततः
स्विष्टकृदादिहोमशेषंसमाप्यभूयसींदक्षिणांदत्वागामनुव्रज्यगोमतींजपेत्॥ ॥महाभारते॥ गावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुचः॥सुरभ्यःसौरभे
यश्चसरितःसागरंयथा॥गावःपश्याम्यहंनित्यंगावःपश्यंतुमांसदा॥गावोस्माकंवयंतासांयतोगावस्ततोवयम्॥घृतक्षीरप्रदागावोघृतयोन्योघृतावहाः॥
घृतनद्योघृतावर्तास्तामेसंतुसदागृहे॥घृतंमेहृदयेनित्यंघृतंनाभ्यांप्रतिष्ठितं॥घृतंमेसर्वतश्चैवघृतमध्येवसाम्यहं॥गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः
॥गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥गावःसुरभयोनित्यंगावोगुग्गुलसन्निभाः॥गावःप्रतिष्ठाभूतानांगावस्स्वस्त्ययनंमहत्॥अन्नमेवपरंगावोदेवानां
हविरुत्तमं॥पावनंसर्वभूतानांरक्षंतिचवहंतिच॥हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि॥ऋषीणामपिहोतॄणांगावोहोमेप्रतिष्ठिताः॥सर्वेषामेव
भूतानांगावःशरणमुत्तमं॥गावःपवित्रंपरमंगावोमंगलमुत्तमं॥गावःसर्वस्यलोकस्यगावोधन्याःसनातनाः॥नमोगोभ्यःश्रीमतीभ्यःसौरभेयी

स्यएवच॥ नमोब्रम्हसुताभ्यश्चपवित्राभ्योनमोनमः॥ पुनःप्रदक्षिणांकृत्वाधेनुंद्विजवरंचतंइतिजपित्वानमस्कृत्यविसृज्यपायसादिनासम्यक्कृत्वादशब्राम्हणान्भोजयित्वातेभ्योदक्षिणांदत्वास्वस्त्ययनंवाचयित्वासुहृद्युतोभुंजीतेति॥ ॥इत्युभयतोमुखीदानप्रयोगः॥ ॥अथप्रसंगादुभयतोमुखीप्रतिग्रहप्रायश्चित्तं॥ ॥ममोभयतोमुखीप्रतिग्रहदोषपरिहारार्थंकृच्छ्रत्रयप्रायश्चित्तंयथाप्रत्याम्नायेनकरिष्ये॥इतिसंकल्प्यकृच्छ्रत्रयप्रायश्चित्तंकुर्यादित्युक्तंदानोद्योतेरुपस्मृतौरहस्यप्रायश्चित्तेप्यशक्तस्य॥ ॥इत्युभयतोमुखीप्रतिग्रहेप्रायश्चित्तं॥ ॥इत्युभयतोमुखीगोदाननिरूपणं॥ अथदशदानानिमदनरत्ने॥ जातूकर्ण्यः॥ ॥उल्कात्यादीनिदानानिदशदद्यान्मृतस्यतु॥गोभूतिलहिरण्याज्यंवासोधान्यगुडानिच॥रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमादिति॥ एतानिदशदानानिनराणांमृत्युजन्मनोः॥कुर्यादभ्युदयार्थंचप्रेतायापिहिपरत्रचेति॥ ॥हेमाद्रिः॥ ॥तत्रादौगोदानं॥ दानविधिस्तुपूर्वोक्तएवममसर्वपापक्षयार्थंइमांगांधेनूपस्करांरुद्रदैवत्यांसुवर्णादिदक्षिणायुतांगोत्रायशर्मणेसुपूजितायतुभ्यमहंसंप्रददेनममेति॥ मंत्रस्तु॥ यज्ञसाधनभूतायाविश्वस्यान्नप्रदायिनी॥विश्वरूपधरोदेवःप्रीयतामनयागवा॥गवासंगोष्वितिप्रार्थयेत्अपि॥ ॥इतिगोदानं॥ ॥अथभूमिदानं॥ मात्स्ये॥ निवर्तनमिताभूमिर्देया॥दशहस्तेनदंडेनत्रिंशद्दंडानिवर्तनमितिस्मरणात्॥दानान्यन्यानिसर्वाणिकनकादीनियानिच॥तानिभूमिप्रदानस्यकलांनार्हंतिषोडशीमिति॥ ॥अद्येत्यादिगोत्रायशर्मणेसुपूजितायषष्टिवर्षसहस्रपरिमितस्वर्गशिवपुरनिवासकामःसर्वपापक्षयकामइमांभूमिंबहुसस्यप्रदांविष्णुदैवत्यांतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ मंत्रस्तु॥ सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता॥अनंतसस्यफलदाअतःशांतिंप्रयच्छमे॥यस्यांरोहंतिबीजानिकालेचैवमहीतले॥त्वत्प्रसादाच्चसकलाममसंतुमनोरथाइति॥ इतिभूमिदानं॥ ॥अथतिलदानं॥ ॥तिलास्तुद्रोणत्रयमितादेयाः॥पंचमणपरिमिताभवंति॥ अद्येत्यादिगोत्रायशर्मणेइमेतिलाःसोमदेवतावि

ष्णुदेवतावासर्वपापक्षयकामरस्तुभ्यमहंसंप्रददेनममेति।।मंत्रस्तु।।महर्षेर्गोत्रसंभूताःकश्यपस्यतिलाःस्मृताः।।तस्मादेषांप्रदानेनममपापंव्यपोहतु।। ।।इतितिलदानं।। ।।अथहिरण्यदानं।। तच्चनिष्कत्रयमितंकनिष्ठं।।द्वादशमाषकोनिष्कः।।अद्येत्यादिगोत्रायशर्मणेइदंहिरण्यंअग्निदैवतंसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति।। मंत्रस्तु ।।हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः।।अनंतपुण्यफलदमतःशांतिंप्रयच्छमे।। ।।इतिहिरण्यदानं।। ।।अथाज्यदानं।। घृतंतुप्रस्थमितंदद्यात्।। विंशतिशेरकमितंभवति।।अद्येत्यादिगोत्रायशर्मणेइदमाज्यंविष्णुदैवतंसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति।। मंत्रस्तु।।कामधेनोःसमुद्भूतंसर्वक्रतुषुसंस्थितं।।देवानामाज्यमाहारअतःशांतिंप्रयच्छमे।। ।।इत्याज्यदानं।। अथवस्त्रदानं।।सूक्ष्मवस्त्रद्वयंबहुमूल्यंसप्तहस्तमितंदद्यात्।। ।।गोत्रायशर्मणेसमस्तपापक्षयकामः इमेबार्हस्पत्यदैवतेवाससीतुभ्यमहंसंप्रददेनममेति।। मंत्रस्तु।। शीतवातोष्णसंत्राणंलज्जायारक्षणंपरं।।देहालंकरणंवस्त्रमतःशांतिंप्रयच्छमे।। ।।इतिवस्त्रदानं।। ।।अथधान्यदानं।। ।।सार्द्धखारीद्वयंव्रीहयोदेयाः।।तच्चसार्द्धशतद्वयमणपरिमितंमणषट्कंचेति।। गोत्रायशर्मणेइदंसमुकसंख्यकंप्रजापतिदैवत्यंसमस्तपापक्षयपूर्वकैहिकामुष्मिकशिवफलावाप्तिकामस्तुभ्यमहंसंप्रददेनममेति।। मंत्रस्तु ।।सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत्।।प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमे ।।इतिधान्यदानं।। अथगुडदानं।।गुडपलषष्टिमितंदद्यात्।।अद्येत्यादिममसमस्तपापक्षयपूर्वकंगृहेलक्ष्म्याःस्थैर्य सिद्धिकामोगोत्रायशर्मणेस्तुपूजितायायंगुडोरसवर्यःसोमदैवतःसदक्षिणस्तुभ्यमहंसंप्रददेनममेति।। मंत्रस्तु।। गुडमिक्षुरसोद्भूतंमंत्राणांप्रणवंयथा।।दानेनानेनमेतत्स्यात्परालक्ष्मीःस्थिरागृहे।। ।।इतिगुडदानं।। ।।अथरजतदानं।। ।।पलत्रयमितंरौप्यंदद्यात्।। अद्येत्यादिममेसमस्तपापक्षयपूर्वकशिवविष्णुपितृप्रीतिकामोगोत्रायशर्मणेस्तुपूजितायइदंरजतंविष्णुदैव

तंसदक्षिणंतुभ्यमहंसंप्रददेनममेति।।मंत्रस्तु।।प्रीतिर्यतःपितृणांचविष्णुशंकरयोःसदा।।शिवनेत्रोद्भवंरूप्यमतःशांतिंप्रयच्छमे।। ।।इतिरजतदानं।। ।।अथलवणदानं।।लवणंसार्द्धखारिकंदद्यात्।।अद्येत्यादिममसमस्तपापक्षयपूर्वकशिवप्रीतिकामोगोत्रायशर्मणेसुपूजितायइदंलवणंसर्वरसोत्कृष्टंसोमदैवत्यंसदक्षिणंतुभ्यमहंसंप्रददेनममेति।।मंत्रस्तु।।यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना।।शंभोःप्रीतिकरंयस्मादतःशांतिंप्रयच्छमे।। ।।इतिलवणदानं।।इतिदशदानानि।। ।।अथपंचधेनुदानानि।।तत्रादौपापापनोदधेनुदानं।।ब्राम्हे।।दानोपस्करास्तुगोदानोक्ताएव।।अद्येत्यादिममात्मनोमनोवाक्कायकर्मभिराजन्मोपार्जितपापापनोदकामोगोत्रायशर्मणेसुपूजितायइमांकृष्णांपापापनोदधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति।।मंत्रस्तु।।आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः।।तत्सर्वंनाशमायातुपापधेनुप्रदानतः।।ततःसुवर्णंदक्षिणांदद्यात्।।इतिपापापनोदधेनुदानं।। अथऋणापनोदधेनुदानं।।ब्राम्हे।।अद्येत्या०ममआजन्मोपार्जितैहिकामुष्मिकसमस्तऋणपातकछेदकामोगोत्रायशर्मणेसुपूजितायइमांसमस्तऋणापनोदरूपांधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति।।ततःसुवर्णंदक्षिणांदद्यात्।।इतिऋणापनोदधेनुदानं।। अथप्रायश्चित्तधेनुदानं।।ब्राम्हे।।अद्येत्या०ममाजन्मप्रभृतिअद्ययावदाचरितसमस्तपातकस्याकृतप्रायश्चित्तस्यामरणांतपापापनोदकामोगोत्रायशर्मणेसुपूजितायप्रायश्चित्तत्वेनइमांकपिलांधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति।।मंत्रस्तु।।प्रायश्चित्तेसमुत्पन्नेनिष्कृतिर्नकृताक्वचित्।।तस्यपापस्यशुध्यर्थंधेनुमेनांददामिते।।ततःसुवर्णंदक्षिणांदद्यात्।। इतिप्रायश्चित्तधेनुदानं।।अथवैतरणीधेनुदानंब्रम्हवैवर्ते।।यासौवैतरणीनामयमद्वारेमहानदी।।शतयोजनविस्तीर्णापृथुत्वेसामहासरित्।।अगाधानंतरूपाच दृष्टमात्राभयप्रदा।।पतंतितत्रवैमर्त्याःक्रंदमानाःसुदारुणं।।उष्णोवर्षातिशीतेचमारुतेवातिवाभृशम्।।दातारंतारयेद्यस्मात्तस्माद्वैतरणीस्मृतेति।।दानकालोपितत्रैवमदनरत्ने।। ।।अयनेविषुवेपु

पयेव्यतीपातेदिनक्षये॥अन्येषुपुण्यकालेषुदीयतेदानमादरात्॥ पाटलामथवाकृष्णांदद्याद्वैतरणींतुगां॥स्वर्णशृंगींरौप्यखुरांकांस्यपात्रोपदोहनां॥कृष्णवस्त्रयुगच्छन्नांसप्तधान्यसमन्वितां॥कार्पासद्रोणशिखरेआसीनांहैमींयमप्रतिमांलोहदंडयुतांमहिषारूढांपाशहस्तांकृत्वाइक्षुदंडमयमुडुपंपट्टसूत्रेणबध्वाउडुपेधेनुंकृत्वाछत्रोपानत्समायुक्तांवैतरणींगांमृत्युकालेवादद्यात्॥ तद्यथा॥ ममयमद्वारस्थितवैतरण्याख्यनद्युत्तरणार्थंगोत्रायशर्मणेसंपूजितायइमांकृष्णांगांसवत्सांयमप्रतिमायुक्तांकृष्णवस्त्रयुगच्छन्नांसप्तधान्ययुतांरक्तमाल्याद्यलंकृतांस्वर्णशृंगाद्युपस्करोपेतांकार्पासद्रोणशिखरांसच्छत्रोपानत्कांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति॥ इतितिलजलघृतयुतंगोपुच्छंद्विजहस्तेदद्यात्॥ मंत्रस्तु॥ यमद्वारपथेघोरेघोरावैतरणीनदी॥तांतर्त्तुकामोदत्तातेकृष्णांवैतरणींतुगामिति॥ततःसुवर्णदक्षिणांदत्वाप्रार्थयेत्॥ ॥विष्णुरूपद्विजश्रेष्ठभूदेवगतिपावन॥तर्त्तुंवैतरणीमेनांदत्तांकृष्णांतुगामिमां॥ततःपुच्छंस्वकरेधृत्वानुव्रजेत्सप्तपदानि॥ ॥धेनुप्रार्थनामंत्रस्तु॥धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहापथे॥उत्तितीर्षुरहंदेविवैतरण्यैनमोस्तुतेइतिप्रणम्यभूयसींदक्षिणांदद्यात्॥कृष्णायाअभावेअन्यवर्णापिदेयागोरभावेद्रव्यंदेयं॥पित्रादेरशक्तौपुत्रादिर्दद्यात्॥ ॥तत्राद्यमंत्रे॥ ॥उत्तितीर्षुरयंमातःपठन्॥तर्त्तुंवैतरणीमस्त्यैति॥पतंतियेतांतुतमस्यैति॥ ॥इतिवैतरणीदानम्॥ ॥अथउत्क्रांतिधेनुदानप्रारम्भे॥ ॥उत्क्रांतिवैतरिण्योश्चदशदानानिचैवहि॥प्रेतेपिकृत्वातंप्रेतंशवधर्मेणदाहयेदिति॥यथा॥योमुमूर्षुःपुरुषः स्वयंचेतनवेलायांश्रोत्रियंवेदपारगंब्राम्हणमाहूय॥ अद्येत्यादिममसुखेनप्राणोत्क्रमणप्रतिबंधकोक्तानिष्कृत्यनुक्तनिष्कृतिजनितसकलपापक्षयद्वारासुखेनप्राणोत्क्रमणसिद्ध्यर्थमिमामुत्क्रांतिसंज्ञकांधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांगोत्रायशर्मणेसंपूजितायतुभ्यमहंसंप्रददेनममेति॥ मंत्रस्तु॥असूत्क्रांतौप्रवृत्तस्यसुखेनोत्क्रमणसिद्धये॥तुभ्यमेनांसंप्रददेधेनुमुत्क्रांतसंज्ञकामिति॥ततःसुवर्णदक्षिणांद

द्यात्।।गोरभावेतुनत्स्वरूपभूतंगोमूल्यंवादद्यात्।।पित्रादेरशक्तौनुपुत्रादिर्दद्यात्।।तत्रममेतिपदस्थानेपित्रादेरितिवदेत्।। ।।इत्युत्क्रांतिधेनुदानं।। ।।
इयमेवमोक्षधेनुरितिकेचित्।। तद्यथा ।। मोक्षदांवास्तुदेवस्त्ववेदशास्त्रेषुगीयते।।तत्प्रीतयेद्विजाग्र्यायमोक्षधेनुंददाम्यहं।।इत्युक्त्वा अद्येत्यादिममसम
स्तपापक्षयपूर्वकसंसारमोक्षावाप्तिकामःश्रीपापहारमहाविष्णुप्रीतिकामश्चइमांमोक्षधेनुंयथाशक्तिसोपस्करांरुद्रदेवत्यांगोत्रायशर्मणेसंपूजितायतु
भ्यमहंसंप्रददेनममेति।।मंत्रस्तु।।मोक्षंदेहिहृषीकेशमोक्षदोसिजनार्दन।।मोक्षधेनुप्रदानेनमममोक्षोस्तुवैगतइति।।ततःसुवर्णदक्षिणांदद्यात्।।गोर
भावेतुपूर्वोक्तमनुसंधेयम्।। ।।इतिमोक्षधेनुदानं।। अथमहिषीदानं।। ।।हेमाद्रौभविष्ये।। महिषीदानमाहात्म्यंकथयामियुधिष्ठिर।।पुण्यंपवित्रमा
युष्यंसर्वकामप्रदंतथा।।दानकालोपितत्रैव।।चंद्रसूर्यग्रहेकार्तिक्यांअयनेसितचतुर्दश्यांसंक्रांतौसर्वारिष्टनाशायचित्तप्राशस्त्येदेया।।प्रथमप्रसूतांदोष
वर्जितांदद्यात्।।तत्रादौयमस्वरूपायैमहिष्यैनमइतिनत्वाप्रार्थयेत्।।महिषीब्रह्मसूताचलक्ष्मीरूपेणसंस्थिता।।प्रार्थितासिमयादेवियममार्गेनिवा
रयेति।। तथा ।।महिषीयमरूपात्वंविश्वामित्रविनिर्मिते।।पूजिताहरमेपापंसर्वदानफलप्रदे।।इंद्रस्याप्सरसोदेविमहिषीरूपधिष्णुना।।सर्वभाग्यप्रदेदे
विदीर्घशृंगिनमोस्तुतइति।।अद्येत्यादि०ममदीर्घायुष्यैहिकामुष्मिकयज्ञयाजित्वपितृतारणात्मशुभ्रभविंशतिधेनुदानसमफलावाप्तिसर्वदानसमफलपुत्र
पौत्रबहुलसूर्यलोकनिवासमहाराज्यावाप्तिकामश्चममसर्वारिष्टनिवारणार्थंशनैश्चरजनितपीडाशांत्यर्थंगोत्रायशर्मणेसंपूजितायइमांमहिषींसाल
कृतांरक्तमाल्यवस्त्रावृतांस्वर्णशृंगींरौप्यखुरांताम्रदोहांहेमतिलकांसप्तधान्ययुतांघंटाभरणांधेनूपस्करांयमदेवत्यांतुभ्यमहंसंप्रददेनममेति
सकुशतिलजलंतद्धस्तेदद्यात्।।विप्रोदेवस्यत्वेतिपठन्।।पृष्ठदेशंस्पृष्ट्वास्वस्तीतिप्रतिगृह्ययथाशाखंकामस्तुतीतिपठेत्।। दातातु ।।इंद्रादि

लोकपालानांयाराज्यसौहिषीशुभा।।महिषीदानमाहात्म्यात्सास्तुमेसर्वकामदा।।धर्मराजस्यसाहाय्यंयस्याःपुत्रःप्रतिष्ठितः।।महिषासुरस्यजननीयासास्तुवर दाममेतिदत्वाप्रदक्षिणीकृत्यब्रम्हणेतांपयस्विनीमिति।।दक्षिणांतुदशपञ्चत्रिकांवासुवर्णः अतोभिकृष्टोज्ञेयः।।ततोभूयसींदक्षिणांदद्यात्याकमेश्वरार्पणंकुर्यात्।। ।।हेमाद्रौभविष्यपुराणे।। ।।अनेनविधिनादत्वामहिषींद्विजपुंगव।।सर्वान्कामानवाप्नोतिइहलोकेपरत्रचेति।।ब्राम्हणःसर्वकामस्तुक्षत्रियोजयकाम्यया।।धनकामस्तुवैश्योवैशूद्रोभिलषितामियात्।।महिषदानमप्येवमेवज्ञेयं।। ।।इतिमहिषीदानं।। ।।अथमेषीदानं ।।भविष्ये।। शृणुपार्थपरंदानंसर्वकल्मषनाशनं।।यद्दत्वाविविधंपापंसद्योविलयमृच्छति।।अयनेविषुवेग्रहणाद्येदुःस्वप्नदर्शने।।वित्तवित्तानुसारेकालेतीर्थेगृहेवाकार्यम्।।शंकरंब्रम्हाणंविष्णुंगौरींगायत्रींश्रीसहितांयथाशक्तिसुवर्णप्रतिमांकृत्वाशच्यासहेंद्रंग्रहान्लोकपालांश्चकृत्वासंपूज्यतत्पश्चिमतः स्वगृह्येनाग्निंप्रतिष्ठाप्यस्थापितदेवतामंत्रैस्तिलाज्यैरष्टोत्तरशताष्टाविंशतिरष्टाष्टसंख्याकाहुतीर्हुत्वाततोमेषींद्विजंचवस्त्रालंकारादिभिर्यथाविभवंसंपूज्य।।अद्येत्यादिसर्वपापक्षयदुःस्वप्नसूचितारिष्टविनाशपुत्रपौत्रधनकीर्तियशःकामइमांमेषींसुवर्णतिलकाद्यंकितांकौशेयपरिधानांसप्तधान्यसमायुक्तांपुष्पोपहारांसन्मुखस्थापितलवणांब्रम्हविष्णुशिवादिप्रतिमायुक्तांसुक्तोपस्करांगोत्रायशर्मणेसुपूजितायइमांतुभ्यमहंसंप्रददेनममेतिदत्वासुवर्णंदक्षिणांदद्यात्।।मंत्रस्तु।।वाङ्मनःकायजनितंयत्किंचिन्ममदुष्कृतम्।।तत्सर्वंविलयंयातुत्वद्दानेनोपसंचितमिति।।प्रतिमास्थापनंतिलकुंभे।।मेषीमन्यक्षांसुवर्णनिर्मितांवा।।विप्रोदेवस्यत्वेतिशृंगेप्रतिगृह्ययथाशाखंकामस्तुतिंपठेत्।।प्रतिगृहीतविप्रसंभाषणंमुखावलोकनंचवर्जयेत्।।भविष्ये।।शतेनकारयेत्तांतुसुवर्णस्यप्रयत्नतः।।यथाशक्त्याथवाकुर्याद्वित्तशाठ्यंनकारयेत्।। ।।इतिमेषीदानं।। ।।अथअजादानं।। सुमंतुः।। ।।अजाप

लोमहीपालोह्यजादानैर्दिवंगतः॥अयनेविषुवेचैवयुगादौग्रहणेषुच॥अमावास्यामजादानंपौर्णमास्यांचशस्यते॥विधिंतस्यप्रवक्ष्यामिविश्वामित्रेणभिभाषितं॥अजांविप्रंचयथाविभवंवस्त्रालंकारादिभिःसंपूज्य॥अद्येत्यादि०गोत्रायशर्मणेइमांअजांसप्तधान्योपरिस्थितांवस्त्रमाल्योपशोभितांवज्रनेत्रांहेमशृंगींताम्रपृष्ठींरौप्यपादांसदोहनपात्रांसपुत्रांत्वाष्ट्रदेवतांतुभ्यमहंसंप्रददेनममेति॥कुशौतिलोदकंदत्वादद्यात्॥मंत्रस्तु॥मंत्रवासेअजेश्लक्ष्णेयज्ञसंपत्करेशुभे॥स्रष्टात्वंदहमेपापंजन्मांतरशतैःकृतमिति॥तथा॥त्वंपूर्वंब्रह्मणासृष्टापवित्रंभवतीपरम्॥त्वत्प्रसूतौस्थितायज्ञास्तस्माच्छांतिंप्रयच्छमे॥देवस्यत्वेतिशृंगेप्रतिग्रहः॥ततःसुवर्णंदक्षिणांदद्यात्॥इत्यजादानं॥ ॥अथमंदाग्निहरंमेषदानं॥बौधायनः॥ ॥अग्नेर्माद्यंभवेत्तस्ययस्त्वेताग्नेर्विनाशकः॥वक्ष्यामितत्प्रतीकारंयथोक्तंब्रह्मणापुरा॥पलार्धेनतदर्धेनतदर्धार्धेनवापुनः॥राजतंकारयेत्सौम्यंअग्नेर्वाहनमुत्तमम्॥सौवर्णाश्चखुराःकार्याःश्वेतवस्त्रेणवेष्टयेत्॥तत्रश्वेतपुष्पंश्वेतगंधमधूत्कटंधूपंदद्यात्॥द्रोणद्वयतंडुलराशौस्थितंपूजयेत्॥मेषादाग्नेय्यांदिशिसमिदाज्यतिलैर्होमःकार्यः॥ ॥अथास्यप्रयोगः॥ ॥पुण्यकालेअद्येत्यादि०ममपूर्वकर्मविपाकोत्थित्रेताग्निनाशजनिताग्निमांद्यत्वनिरासपूर्वकप्रजाठराग्निप्रबलत्वसिध्द्यायुरारोग्यतासिद्ध्यर्थंमेषदानंकरिष्येइतिसंकल्प्यमेषप्रतिमांमेषंवाप्रत्यक्षंसंस्थाप्यआग्नेय्यांस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यान्वाधायत्रिरग्निक्रमणसमिदाज्यतिलैरष्टोत्तरशताष्टाविंशत्यष्टसंख्ययावाजुहुयात्॥एतैर्मंत्रैः॥समिदाज्यघृताक्ततिलाहुतिभिः ॐ अग्निर्मूर्धादि०भिस्वाहा॥अग्नयइ०॥ॐअग्नेनयसुपथाराये०स्वाहा॥अग्नयइ०॥२॥ॐअग्निनाग्निःसं०स्यःस्वाहा॥अग्नयइ०॥३॥इतित्रिभिर्मंत्रैर्विवक्षितसंख्ययासमिदाज्यतिलैर्हुत्वास्विष्टकृदादिप्रणीताविमोकांतंकृत्वाकुंभोदकैर्यजमानोभिषिंचेदेतैर्मंत्रैः॥बौधायनः॥आपोहिष्ठेत्यपितृचा

हिरण्येतितृचेन ॥ पवमानानुवाके न मार्जयेत्रोगिणंततः ॥ शन्नोवातानुवाकेनशांतिंचापिप्रकल्पयेत् ॥ तस्मैहुतवतेरोगीप्राङ्मुखायह्युदङ्मुखः ॥ सदक्षिणंपूजितायदत्वावाहनमुत्तममिति ॥ गोत्रायशर्मणेइदंसोपस्करमेषंप्रत्यक्षंराजतंवावरुणदैवतं संकल्पोक्तफलकामस्तुभ्यमहंसंप्रददेनममेति दत्वाप्रार्थयेत् ॥ बौधायनः ॥ देवानांयोमुख्यंहव्यवाहनःसर्वपूजितः ॥ तस्यत्वंवाहनंपूज्यंदेवशाद्यैर्महर्षिभिः ॥ अग्निमांद्यंपूर्वकर्मविपाकोत्थंतुयन्मम ॥ तत्सर्वंनाशयक्षिप्रंजाठराग्निंप्रवर्द्धयेति ॥ विप्रस्तु ॥ शृंगेदेवस्यत्वेतिप्रतिगृह्ययथाशाखंकामस्तुतिंपठेत् ॥ ततःस्वर्णदक्षिणांदत्वायथाशक्तिभूयसीदक्षिणांदत्वाब्राह्मणांश्चभोजयित्वासुहृद्युक्तोभुंजीतेति ॥ ॥ इतिमंदाग्निहरमेषदानं ॥ अथदशाचलदानानि ॥ मात्स्ये ॥ ॥ प्रथमोधान्यशैलःस्याद्द्वितीयोलवणाचलः ॥ गुडाचलस्तृतीयःस्याच्चतुर्थोहेमपर्वतः ॥ तिलशैलःपंचमःस्यात्षष्ठःकार्पासपर्वतः ॥ सप्तमोघृतशैलःस्यादष्टमोरत्नपर्वतः ॥ नवमोराजतःशैलोदशमःशर्कराचलइति ॥ ॥ कालमाहमात्स्ये ॥ अयनेविषुवेचैवव्यतीपातेदिनक्षये ॥ शुक्लपक्षेतृतीयायामुपरागेशशिक्षये ॥ विवाहोत्सवयज्ञेषुद्वादश्यामथवापुनः ॥ शुक्लायांपंचदश्यांवापुण्यर्क्षेवाविधानतः ॥ धान्यशैलादयोदेयायथाश्रद्धंविधानतः ॥ तीर्थेवायतनेवापिगोष्ठेवाथगवांगणे ॥ तत्रचतुरस्रंद्वादशहस्तंमंडपंउदङ्मुखंप्राङ्मुखंवाप्राच्यामुदीच्यांवाएकमेवद्वारंनचत्वारि ॥ तोरणमप्येकमेव ॥ मंडलंगोमयेनोपलिप्यकुशानास्तीर्य ॥ तन्मध्येपर्वतंकुर्यात्विष्कंभैःपर्वतैर्युतं ॥ धान्यद्रोणसहस्रेणभवेद्गिरिरिहोत्तमः ॥ मध्यमःपंचशतिकःकनिष्ठःस्यात्त्रिभिःशतैः ॥ मेरुर्व्रीहिमयोमहान्मध्येतदुपरिमंदारपारिजातककल्पवृक्षादयोहेममयास्त्रयः ॥ मध्येकल्पतरुर्मंदारपारिजातौदक्षिणोत्तरयोः ॥ पूर्वपश्चिमयोर्हरिचंदनसंतानौमुक्ताफलवज्रगोमेदकपुष्परागगारुत्मतनीलरत्नवैडूर्यसरोजरागरत्नानिद्वंद्वशःपूर्वादिदिगवस्थितरजतशृंगेषुनिवेश्यानि ॥ ॥ मंदारःक्षीरखंडरवं

डैरभितः प्रवालल्लतान्वितः शक्तिशिलातलः स्यात् ।। शर्कराचले तु हरिचंदनसंतानौ आवश्यकौ ।। तत्र पूर्वादिदिक्षु ब्रह्मविष्णुरुद्रसूर्यप्रतिमाः पक्षिसंघान्मुनिसंघां श्च हैमान्प्रागादिदिक्चतुष्टये क्रमेण मुक्ताफलहीरके गोमेदपुष्परागे मरकतनीले वैडूर्यपद्मरागैः समसंख्याकैर्भूषितं रौप्यशृंगचतुष्कं तद्बहिर्दिगष्टके रौप्यामिंद्रादिलोकपालप्रतिमाष्टकं समंतान्श्रीखंडैर्लतानां स्थाने प्रवालानि शिलानां शुक्तीः ।। प्रागादिषु मेघानां श्वेतपीतकर्बुररक्तवस्त्राणि ।। वंशानामिक्षून् ।। जलस्य घृतं गंधपुष्पनानाफलानि च परितः संस्थाप्य पंचवर्णवितानकं चोपरि बध्नीयात् ।। ततो यवैर्मेरोः षोडशांशेन प्राच्यां मंदारं तदुपरि नररूपगणत्रयं कदंबं च सौवर्णं कदंबमूले हैमः कामदेवः अरुणोदसरः स्थाने दुग्धपूर्णं रौप्यपात्रं ।। रौप्यं चैत्ररथाख्यं वनं गंधपुष्पफलवस्त्राणि च स्थापयेत् ।। याम्ये मेरुषोडशांशेन गोधूममयं गंधमादनं तदुपरि सौवर्णजंबूवृक्षं - - - - - - - - मूले सौवर्णमृदङ्कुरं धनदं मानससरः स्थाने सघृतं रौप्यपात्रं रौप्यं गंधर्वाख्यं वनं नानाफलवस्त्रमाल्यानि च स्थापयेत् ।। पश्चिमे मेरुषोडशांशांशतिलमयं विपुलाख्यं पर्वतं तदुपरि सौवर्णपिप्पलं तन्मूले प्राङ्मुखं सौवर्णहंसप्रतिमां सितोदसरः स्थाने दधिपूर्णं रौप्यपात्रं रौप्यं वैभ्राजं वनं वस्त्रफलमाल्यानि च स्थापयेत् ।। उत्तरे मेरुषोडशांशांशमितमाषैः सुपार्श्वं पर्वतं तदुपरि सौवर्णवटं तन्मूले दक्षिणाभिमुखीं सवत्सां सुवर्णधेनुं भद्रसरः स्थाने मधुपूर्णं रौप्यपात्रं रौप्यं सावित्रं वनं वस्त्रफलमाल्यानि च स्थापयेत् ।। एवं वक्ष्यमाणपर्वतेष्वपि मेरुद्रव्यचतुर्थांशेन लवणादिद्रव्येण प्रागादिषु विष्कंभपर्वता ज्ञेयाः तत्राचार्यस्त्वेकः ।। ऋत्विजश्चत्वारः ।। प्राच्यामेकमेव कुंडमिति तत्रैव जुहुयुः ।। ।। अथ यजमानः-कृतनित्यक्रियः पुण्यकाले अद्येत्यादि० अप्सरोगंधर्वयुतविमानकरणस्वर्गलोकगमनसाग्रमन्वंतरकालदेवलोकनिवासोत्तरभूलोकराजराजन्यकामईश्वरप्रीतिकामो वा श्वो धान्यपर्वतदानं करिष्ये इति संकल्प्य तदंगत्वेन गणेशपूजनं नांदीश्राद्धानि च कृत्वा आचार्यमृत्विजश्च वृत्वा मधुपर्कादिना संपूज्य मंडपपू

जनाद्याचार्यनियोगांतंकुर्यात् ॥ ततआचार्योनवग्रहस्थापनादिकुंडसमीपस्थितकलशस्थापनांतंकुर्यात् ॥ अथऋत्विजःप्राक्कुंडेग्रहादिद्वात्रिंशद्देवताभ्य
स्तत्तन्मंत्रैर्घृताक्ततिलैःपृथक्यवघृताभ्यांमिलिताभ्यांकुशैश्चर्वातोभिःसाधनैःप्रत्येकमष्टवारंहुत्वादशलोकपालेभ्योष्टवसुभ्यएकादशरुद्रेभ्योद्वादशादि
त्येभ्यश्चप्रत्येकमष्टाष्टसंख्ययासमिच्चर्वाज्याहुतिभिर्जुहुयुः ॥ ततपुरुषसूक्तेनब्रह्मविष्णुरुद्रेभ्यःसामात्तिलैर्वासूर्यकामदेवधर्मदक्षसकामधेनुभ्यस्ति-
लैर्घृतेनवाअष्टोत्तरशतंजुहुयुः ॥ ततश्चतुःपंचाशद्देवताभ्यस्तिलैर्घृतेनचेति ॥ ततोयजमानोमेरुमधिरुह्यपूजयेत् ॥ तत्रमंत्रः ॥ त्वंसर्वदेवगणधामनिधि
र्विरुद्धमस्मद्गृहेष्वमरपर्वतनाशयाशु ॥ क्षेमंविधत्स्वकुरुशांतिमनुत्तमांनःसंपूजितःपरमपावनसनातनस्त्वं ॥ त्वमेवभगवानीशोब्रह्माविष्णुर्दिवाकरः ॥ मूर्ता
मूर्तपरबीजमतःशांतिंकुरुप्रभो ॥ यस्मात्त्वंलोकपालानांविश्वमूर्तेश्चमंदिरं ॥ रुद्रादित्यवसूनांचततःशांतिंप्रयच्छमे ॥ यस्मादशून्यममरैर्नारीभिश्चशिरस्तव
॥ तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥ मंदरस्यतु ॥ यस्माच्चैत्ररथेनत्वंभद्राश्वप्रसुवेनच ॥ शोभसेमंदरक्षिप्रमतःपुष्टिकरोभव ॥ गंधमादनस्यतु ॥ ॥
यस्माच्चूडामणिर्जंबुद्वीपेत्वंगंधमादन ॥ गंधर्ववनशोभावानतःकीर्तिर्दृढास्तुमे ॥ ॥ विपुलस्यतु ॥ ॥ यस्मात्त्वंकेतुमालेनवैभ्राजेनवनेनच ॥ हिरण्मयाश्व
त्थशिरास्तथापुष्टिर्दृढास्तुमे ॥ सुपार्श्वस्यतु ॥ उत्तरैःकुरुभिर्यस्मात्सावित्रेणवनेनच ॥ सुपार्श्वशोभसेनित्यमतःश्रीरक्षयास्तुमे ॥ ततःसर्वेजागरणंकृत्वाप्रा-
तःस्नात्वाकृतनित्यक्रियाःकुंडसमीपस्थकलशजलेनसपरिवारंयजमानमभिषिंचेयुः ॥ ततोयजमानोगृहीतकुसुमोमेरुंप्रदक्षिणीकृत्योपतिष्ठेत ॥ अन्नं
ब्रह्मरसःप्रोक्तःअन्नेप्राणाःप्रतिष्ठिताः ॥ अन्नाद्भवंतिभूतानिजगदन्नेनवर्द्धते ॥ अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः ॥ धान्यपर्वतरूपेणपाहितस्मान्नमोन
मइत्युपस्थायपुष्पांजलिंप्रक्षिप्यनमस्कृत्यप्राङ्मुखोपविश्योदङ्मुखेभ्योगुर्वादिभ्यःक्रमेणगिरीन्दद्यात् ॥ अद्येत्यादि॰ गोत्रायशर्मणेसालंकृतायगुरवे

अप्सरोगंधर्वयुतविमानकरणकस्वर्गलोकगमनानंतरंसाग्रमन्वंतरंशतावधिसमयदेवलोकनिवासोत्तरंभूलोकराजराजत्वप्राप्तिकामइमंधान्यमयमेरुसौवर्णमंदरादिवृक्षपंचकसौवर्णब्रम्हविष्णुरुद्रार्कादिप्रतिमायुक्तंमुक्ताहारकादिभूषितंरौप्यश्रृंगचतुष्कशोभितंरूप्यमयेंद्रादिदशलोकपालप्रतिमायुतंरौप्यमयानितंबान्वितंइक्षुवंशशोभितकंदरादिकचतुष्टयस्थापितरौप्यपात्रस्थितंघृतोदकमत्स्यवर्णादिकचतुष्टयस्थापितकर्पूररक्तवस्त्राबुदधरंनानाफलमाल्यधितानाद्युपकरणसहितंतुभ्यमहंसंप्रददेनममेतिदद्यात्।।चतुर्विंशतिधेनुपक्षेगावोष्टौगुरवे।।चतस्रश्चतुर्ऋत्विग्भ्यः।।दशपक्षेतुगुरवेषट्ऋत्विग्भ्यःएकैका।।एकधेनुपक्षेगुरवेएकामेवकपिलां।।ऋत्विग्भ्यःसुवर्णदक्षिणांदद्यादितिमदनरत्नादयः।।एवंपूर्वस्थितमंदराख्यंविष्कंभंसमर्तिंसोपस्करंगोत्रायशर्मणेऋत्विजेतुभ्यमहंसंप्रददेनममेतिदद्यात्।।एवमेवदक्षिणस्थगोधूममयंगंधमादनपर्वतं।।तथापश्चिमस्थंतिलमयंविपुलाख्यंपर्वतं।।ततउत्तरदिक्स्थंमाषमयंसुपार्श्वनामाख्यंपर्वतंऋत्विग्भ्योदद्यात्।।लवणाचलादिदानप्रयोगेषुधान्यपदस्थानेलवणादिपदंप्रक्षेप्यम्।।तत्तत्फलानितुतत्रतत्रवक्ष्यामः।।ततोग्रहवेद्यांयजमानोदेवताःसंपूज्याहृतदेवताश्चसंपूज्यनमस्कुर्यात्।।गुरुस्तासांदेवतानांविसर्जनंकुर्यात्।।ततोयजमानोमंडपग्रहपीठप्रतिमोपस्करादिसर्वंगुरवेप्रपाद्यभूयसींदत्वा।।प्रमादात्कु०यस्यस्मृत्येतिचविष्णुंस्मृत्वाकर्मेश्वरार्पणंकृत्वाब्राम्हणान्भोजयित्वाशिषोगृहीत्वास्वयंसुहृद्युक्तोभुंजीतेति।। ।।इतिधान्यमेरुपर्वतसाधारणप्रयोगः।। ।।अथलवणाचलदानं।।पाद्मे।।उत्तमःषोडशद्रोणःकर्तव्योलवणाचलः।।मध्यमःस्यात्तदर्द्धेनचतुर्भिरधमःस्मृतः।।वित्तहीनोयथाशक्त्याद्रोणादूर्ध्वंतुकारयेत्।।चतुर्थांशेनविष्कंभपर्वतान्कारयेत्पृथक्।।अयंन्यायःसर्वविष्कंभपर्वतेषुज्ञेयः इतिमदनः।।विधानंतुपूर्ववत्।।हेमतरूंल्लोकपालान्कामदेवादीन्पूर्ववत्।।तथैवसंपूज्यप्रार्थयेत्।।मंत्रास्तु।।सौभाग्यरससंभूतोयतोयंलवणोरसः।।तदात्मकत्वेनचमांपाहिपापान्नमो

नमः॥ यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना॥ प्रियंचशिवयोर्नित्यंतस्माच्छांतिंप्रयच्छमे॥ विष्णुदेहसमुद्भूतंयस्मादारोग्यवर्धनं॥ तस्मात्पर्वतरूपेणपाहि
संसारसागरात्॥ अद्येत्यादि॰कल्पपर्यंतंउमालोकप्राप्त्यनंतरंपरमगतिप्राप्तिकामईश्वरप्राप्तिकामोवालवणाचलदानंकरिष्येइतिसंकल्पः॥ अयमेवविधि-
शेषोन्यत्सर्वंपूर्ववत्॥ इतिलवणाचलदानं॥ अथगुडाचलदानंपाद्मे॥ अथातःसंप्रवक्ष्यामिगुडपर्वतमुत्तमं॥ यत्प्रदानान्नरःस्वर्गंप्राप्नोतिसुरपूजितं
॥उत्तमोदशभिर्भारैर्मध्यमःपंचभिर्मतः॥ त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्प वित्तवान्॥ तुलास्त्रियांपलशतंभारःस्याद्विंशतिस्तुलाइत्यमरः॥ वि
धिस्तुपूर्ववत्॥ प्रार्थनामंत्रास्तु॥ यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः॥ सामवेदस्तुवेदानांमहादेवस्तुयोगिनां॥ प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा
॥तथारसानांप्रवरःसदैवेक्षुरसोमतः॥ ममतस्मात्परांलक्ष्मींददस्वगुडसर्वदा॥ यस्मात्सौभाग्यदायिन्याभ्रातात्वंगुडपर्वत॥ निवासश्चापिपार्वत्यास्त-
स्मान्मांपाहिसर्वदा॥ दानवाक्यंतु॥ ॥अद्येत्यादि॰॥ सकलपापक्षयोत्तरगंधर्वपूज्यमानत्वपूर्वककल्पशतावधिगौरीलोकप्राप्त्यनंतरंसपत्नापराजितासु-
तायुरारोग्यपूर्वकसप्तद्वीपाधिपतित्वकामईश्वरप्रीतिकामोवेतिसंकल्प्यदानेचविशेषोन्यत्सर्वंपूर्ववदिति॥ ॥इतिगुडाचलदानं॥ ॥अथसुवर्णाचलदानं
॥पाद्मे॥ उत्तमःपलसाहस्रोमध्यमःपंचभिःशतैः॥ तदर्धेनाधमस्तद्वदल्पवित्तोपिशक्तितः॥ अल्पवित्तःपलादूर्ध्वंकुर्यादिति॥ धान्यपर्वतवद्विधानं॥ पर्वतं
संपूज्यप्रार्थयेत्॥ मंत्रोतु॥ नमस्तेब्रम्हगर्भायब्रम्हबीजायवैनमः॥ यस्मादनंतफलदःतस्मात्पाहिशिलोच्चय॥ यस्मादग्नेरपत्यंत्वंयस्मात्तेजोजगत्पतेः॥ हेम
पर्वतरूपेणतस्मात्पाहिसदाममेति॥ ॥दानवाक्यं॥ ॥अद्येत्यादि॰सकलपापक्षयोत्तरशतकल्पावधिआनंदकारकब्रम्हलोकभोगानंतरंपरमपदप्राप्ति
कामइतिसंकल्प्यदानवाक्येचविशेषः॥ अन्नसर्वंगुर्वादिभ्यएवदेयं॥ तदल्पद्रव्यविषयं॥ बहुद्रव्येषुतुलापुरुषदानवदर्धंचतुर्थांशंवागुरवेदत्वाऽन्याद्वि

ष्टेभ्योदेयमितिहेमाद्रिः॥ इतिस्वर्णाचलदानं॥ ॥अथतिलाचलदानं॥ पाद्मे॥ उत्तमोदशभिर्द्रोणैः पंचभिर्मध्यमोमतः॥ त्रिभिःकनिष्ठोराजेंद्रतिलशैलःप्रकीर्तितइति॥ वृक्षादिष्कंभादितुसर्वंपूर्ववत्॥ मंत्रास्तु॥ यस्मान्मधुवनेविष्णोर्देहस्वेदसमुद्भवाः॥ तिलाःकुशाश्चमाषाश्चतस्माच्छन्नोभवत्विह॥ हव्यकव्येषुयस्माच्चतिलैरेवाभिरक्षणं॥ भवादुद्धरशैलेंद्रतिलाचलनमोस्तुते॥ दानवाक्यंतु॥ अद्येत्यादि॰ सकलपापक्षयदीर्घायुष्यपुत्रपौत्रसमन्वितानंतरपितृदेवगंधर्वपूर्वकपूज्यमानत्वपूर्वकद्युलोकगमनानंतरमक्षय्यवैष्णवपदप्राप्तिकामइतिसंकल्पेदानवाक्येच विशेषोन्यत्सर्वंपूर्ववत्॥ ॥इतितिलाचलदानं॥ ॥

अथाल्हादयव्रतेतिलपर्वतदानं॥ स्कांदे॥ पूर्वाण्हेसंगमेस्नात्वाशुचिर्भूत्वासमाहितः॥ सर्वपापविमुक्त्यर्थंनियमस्थोभवेन्नरः॥ नियममंत्रस्तु॥ त्रिदैवत्यव्रतंदेवाःकरिष्येभुक्तिमुक्तिदं॥ भवंतुसंनिधौमेद्यत्रयोदेवास्त्रयोग्नयइति॥ तथा॥ ब्रम्हाविष्णुमहेशानांसौवर्णीःपलसंख्यया॥ प्रतिमास्तुप्रकर्तव्यास्तदर्धेनद्विजोत्तम॥ साग्रंशतत्रयंशुभ्रोद्रोणानांतिलपर्वतः॥ कर्तव्यःपर्वतोविष्णोर्ब्रम्हणःपूर्वसंख्यया॥ शय्यात्रयंततःकुर्यादुपस्करसमन्वितं॥ संपूज्यविप्रवर्येभ्योदत्वेप्सितमवाप्नुयादिति॥ ॥अथास्यदानप्रयोगः॥ यजमानःकृतनित्यक्रियःपुण्यकालेतीर्थादौस्नात्वाचम्य अद्येत्यादि॰ ममेप्सितफलावाप्तयेमेरुदानसमफलावाप्तयेवाल्हादयेतिलपर्वतदानंकरिष्येइतिसंकल्प्यवेदपारगान्ब्राम्हणान्वृत्वायथाविभवंवस्त्रालंकारादिभिःसंपूज्यततस्तिलपर्वतेब्रम्हादीनांप्रतिमाःस्वर्णमयाःसंस्थाप्यषोडशोपचारैःसंपूज्यब्रम्हादीनामंगपूजांकुर्यात्॥ तद्यथा॥ नमोविश्वसृजेतुभ्यंसत्यायपरमात्मने॥ देवायदेवपतयेयज्ञानांपतयेनमः॥ ॥ ॐब्रम्हणेनमः॥ पादौपूजयामि॥ इत्यक्षतगंधपुष्पाणिचप्रक्षिपेत्॥ ॐहिरण्यगर्भाय॰ ऊरू॰ ॐपरमात्मने॰ जानुनीपूज॰ ॐवेधसेन॰ जंघेपू॰ ॐपद्मोद्भवाय॰ गुह्यंपू॰ ॐहंसवाहना॰ कटीपू॰ ॐशतानंदाय॰ वक्षःपू॰ ॐसावित्रीपतयेन॰ बाहूपू॰ ॐऋग्वेदाय॰ पूर्ववक्त्रंपूज॰ ॐयजुर्वेदाय॰ दक्षिणवक्त्रंपू॰

ॐसामवेदाय॰पश्चिमवक्त्रंपू॰ ॐअथर्वणवेदाय॰उत्तरवक्त्रंपूजया॰ ॐचतुर्वक्त्राय॰ वक्त्राणिपू॰ ॐहंसायन॰ नेत्राणिपू॰ ॐकमलासनाय॰शिरांसि॰ॐ
लोकेशा॰सर्वांगंपूज॰॥ ॥ततोल्लोकपालान्परितस्तत्तन्मंत्रैः पूजयेत्॥ ततोविष्णवंगपूजा॥ हिरण्यरूपपुरुषप्रधानाव्यक्तरूपधृक्॥ प्रसीदसुमुखानंतपूजां
गृहाणमत्कृतांइतिसंप्रार्थ्यपूजयेत्॥ ॐअनंतायन॰पादौपूज॰ॐविश्वरूपधृते॰ऊरू॰ ॐमुकुंदाय॰जानुनीपू॰ॐगोविंदाय॰ जंघेपू॰ ॐप्रद्युम्नाय॰गुह्यंपू॰
ॐपद्मनाभाय॰नाभिंपू॰ ॐलंबोदराय॰उदरंपू॰ॐकौस्तुभवक्षसेन॰वक्षःपूजया॰ॐचतुर्भुजाय॰बाहूपू॰ॐविश्वमुखाय॰मुखंपूज॰ॐसहस्रशिरसे॰शि
रांसिपू॰ॐसर्वेश्वराय॰सर्वांगंपू॰॥ ॥ततःशिवांगपूजा॥ ॥आदित्यचंद्रनयनदिग्वासोदैत्यसूदन॥ पूजांदत्तांमयाभक्त्यागृहाणकरुणाकरेति॥ तथा॥ महे
श्वरमहेशाननमस्तेत्रिपुरांतक॥ जीमूतकेशायनमोनमस्तेवृषभध्वजेति॥ आद्यमंत्रेणसंप्रार्थ्यद्वितीयेननत्वापूजयेत्॥ ॐईशानायनमः॥ पादौपूज॰ॐशंक
राय॰ऊरूपू॰ॐउमाकांताय॰गुह्यंपू॰ॐनीललोहिताय॰नाभिंपू॰ॐकृत्तिवाससे॰उदरंपू॰ॐनागयज्ञोपवीतिने॰बाहूपूज॰ॐपंचवक्त्राय॰वक्त्राणिपू॰
ॐत्रिलोचनाय॰नेत्राणिपूज॰ॐरुद्राय॰शिरःपू॰ॐविश्वेश्वराय॰सर्वांगंपूजयामि॥ ॥ततःपञ्चामृताद्युपचाराः॥ पीठत्रयंकमंडलुश्चलवस्त्रयुगंब्रह्मणे
पीतांबरद्वयंविष्णवेलोहितवस्त्रयुगंशंकराय॥ कमलैस्तुलसीपत्रैर्बिल्वपत्रैश्चक्रमेणसंपूज्यततोब्रह्मविष्णुशिवानांनाममंत्रेणाष्टोत्तरशतंतिलैर्घृताक्तैर्हुत्वा
गामेकांदद्यात्॥ ततस्तिलपर्वतंप्रतिपात्रत्रयंशय्यात्रयंचदद्यात्॥ संकल्पोक्तफलसंकाल्पगोत्रायशर्मणेऽमुकपूजितायतुभ्यमहंसंप्रददेनममेति॥ मंत्रोनु॥ य
स्मान्मधुवनेर्विष्णोर्देहस्वेदसमुद्भवाः॥ तिलाःकुशाश्चमाषाश्चतस्माच्छन्नोभवत्विह॥ हव्यकव्येषुयस्माच्चतिलैरेवाभिरक्षणं॥ भवादुद्धरशैलेंद्रतिलाच
लनमोस्तुते॥ अन्यत्सर्वंतिलाचलदानवत्कुर्यात्॥ यत्किंचिद्दीयतेदानंमेरुतुल्यंतुतद्भवेदिति॥ तथाचान्नदानविशेषोनिर्णयामृतेस्कांदे॥ चतुःषष्टिपलं मु-

ख्यमपमंत्रंतत्रकारयेत्।।तत्रअर्घ्योदये।।चत्वारिंशत्पलंवापिपंचविंशतिमेववा।।तत्तुकांस्यमयंयुक्तंतत्रैव।।एवंसंघटितंकार्यंकांस्यभाजनमुत्तममिति।।स्कांदे।।निधायपायसंतत्रपद्ममष्टदलंलिखेत्।।पद्मस्यकर्णिकायांतुकर्षमात्रंसुवर्णकं।।तदभावेतदर्धंवातदर्धंवापिकारयेत्।।कृत्वातुतंदुलैःशुक्लैःपद्ममष्टदलंभुवि।।अमत्रंस्थापयेत्तत्रब्रम्हविष्णुशिवात्मकं।। ।।तेषांपूजाततःकार्याश्वेतमाल्यैःसुशोभनैः।।वस्त्रादिभिरलंकृत्यब्राम्हणायनिवेदयेदिति।। ।।अद्येत्यादि० ससमुद्रसग्रामसस्यकपृथ्वीदानसमफलावाप्तिकामोगोत्रायशर्मणेसालंकृतायइदंपायसपूरितकांस्यपात्रअष्टदलपद्मास्थितंससुवर्णवस्त्रादिभिरलंकृतंब्रम्हविष्णुशिवात्मकंविष्णुदैवत्यंतुभ्यमहंसंप्रददेनममेति।। मंत्रस्तु।। सुवर्णपायसामत्रंयस्मादेतत्त्रयीमयम्।। आवयोस्तारकंयस्मात्तद्गृहाणद्विजोत्तमेति।।कांस्यपात्रदानफलमुक्तंस्कांदे।। ।।समुद्रमेखलापृथ्वीसस्यकृद्दातुश्चयत्फलं।।तत्फलंलभतेमर्त्यःकृत्वादानममत्रकमिति।।अमत्रंपात्रं।।इत्यर्धोदयेतिलाचलदानंकांस्यपात्रदानंच।। ।।अथकार्पासाचलदानं।। ।।कार्पासपर्वतस्तद्वद्विंशद्भारैरिहोदितः।।दशभिर्मध्यमःप्रोक्तःकनिष्ठःपंचभिःस्मृतः।।अल्पधनोभारेकेणवाकुर्यात्।।विधिस्तुधान्यपर्वतवत्।।दानंतुप्रभातायांशर्वर्य्यांअरुणोदयेसूर्योदयात्प्राक्नाडिकाचतुष्टयमध्येइत्यर्थः।।अद्येत्यादि० सकलपापक्षयोत्तराकल्पावधिरुद्रलोकनिवासानंतरंभूलोकराज्यकामइतिसंकल्पेदानवाक्येचवदेत्।।मंत्रस्तु।।त्वमेवावरणंयस्माल्लोकानामिहसर्वदा।।कार्पासाचलतस्मात्त्वमघौघध्वंसनोभवेति।। ।।इतिकार्पासाचलदानं।। ।।अथघृताचलदानं।।पाद्मे।।विंशत्याघृतकुंभानामुत्तमःस्याद्घृताचलः।।मध्यमस्तुतदर्धेनतदर्धेनाधमःस्मृतइति।।अल्पवित्तस्तुद्वाभ्यांवापिकुर्वीतेतिविष्कंभादिपर्वताश्चतुर्थांशेनकार्याः।।कुंभःपलसहस्रात्मकइत्युक्तंदानविवेके।।घृतकुंभःपात्रएव।।शालितंडुलपूर्णपात्राणिकुंभानामुपरिनिवेशयेत्।।अहतशुक्लवस्त्रैरावेष्टयेत्।।इक्षुदंडफलान्वितः।।अन्यत्सर्वंधान्यपर्वतवद्वा

ध्यम्॥उदपात्राकृघटिकाचतुष्टयमध्येदद्यात्॥अद्येत्यादि॰सकलपापक्षयपूर्वकहंससारसयुक्तकिंकिणीजालमाल्यर्कवर्णविमानकरणशंकरलोकगमनपूर्वकसिद्धचारणविद्याधरार्चितत्वविशिष्टपितृसहिताभूतसंप्लवावधिकविचरपाकामइतिसंकल्प्यदानवाक्यंचवक्तव्यं॥मंत्रोतु॥संयोगाद्घृतमुत्पन्नंयस्मादमृततेजसः॥तस्माद्घृताञ्चविश्वात्माप्रीयतांममशंकरः॥यच्चतेजोमयंब्रह्मघृतेनचप्रतिष्ठितं॥घृतपर्वतरूपेणतस्मान्नःपाहिभूधरेति॥ ॥इतिघृताचलदानं॥ ॥अथरत्नाचलदानं॥पाद्मे॥अथातःसंप्रवक्ष्यामिरत्नाचलमनुत्तमं॥मुक्ताफलसहस्रेणपर्वतःस्यादिहोत्तमः॥मध्यमःपंचशतिकस्त्रिशतावाधमःस्मृतः॥चतुर्थांशेनविष्कंभादयः॥वज्रगोमेदैःपूर्वेमंदरःइंद्रनीलैःपद्मरागयुतैःदक्षिणेगंधमादनः॥वैडूर्यविद्रुमैःपश्चाद्विपुलाचलः॥ससौवर्णैःपद्मरागैःसुपार्श्वउत्तरइति॥दानवाक्यंतु॥अद्येत्यादि॰अनेकजन्मकृतब्रह्महत्यादिपापक्षयोत्तरऽमरेश्वरपूजितत्वपूर्वकसाग्रकल्पशतावधिविष्णुलोकनिवासानंतरंआयुरारोग्यरूपगुणोपेतसप्तद्वीपाधिपत्यकामइतिसंकल्प्यदानवाक्यंचवक्तव्यं॥मंत्रोतु॥यथादेवगणाःसर्वेरत्नेष्वेवव्यवस्थिताः॥त्वंचरत्नमयोनित्यमतःपाहिसदाचल॥यस्माद्रत्नप्रसादेनवृष्टिंप्रकुरुतेहरिः॥रत्नाचलप्रदानेनतस्मान्नःपाहिपर्वतइति॥अन्यत्सर्वंधान्यपर्वतवत्॥ ॥इतिरत्नाचलदानं॥ ॥अथरौप्याचलदानं॥पाद्मे॥दशभिःपलसाहस्रैरुत्तमोरजताचलः॥पंचभिर्मध्यमःप्रोक्तस्तदर्धेनाधमःस्मृतः॥अत्यशक्तोविंशतिपलादूर्ध्वंकुर्यात्॥विष्कंभादयस्तुतुरीयांशेनेति॥अन्यत्सर्वंधान्यपर्वतवत्॥दानवाक्यंतु॥अद्येत्यादि॰सकलपापक्षयपूर्वकदशसाहस्रगोदानसमफलावाप्तिपूर्वकगंधर्वाप्सरोगणपूज्यमानत्वविशिष्टवैभवेनयावदाभूतसंप्लवसोमलोकनिवासकामइतिसंकल्प्यदानवाक्यंचवक्तव्यं॥मंत्रस्तु॥पितॄणांवल्लभंयस्माद्धरीन्द्वोःशंकरस्यतु॥रजतंपातुतस्मान्नःशोकसंसारसागरादिति॥ ॥इतिरौप्याचलदानं॥ ॥अथशर्कराचलदानं॥पाद्मे॥अष्टभिःशर्कराभा

रैरुत्तमःस्यान्महाचलः॥ चतुर्भिर्मध्यमःप्रोक्तस्तदर्धेनाधमःस्मृतः॥ भारेणाल्पवित्तोपिभारार्द्धेनापिवापुनः॥ चतुर्थांशेनविष्कंभादयः॥ मंदारपारिजातकल्पवृक्षादयोहैमाएवपूर्ववत्॥ पूर्वपश्चिमेहरिचंदनसंतानो॥ प्रत्यङ्मुखोकामदेवोमंदरे॥ धनदउदङ्मुखोगंधमादने॥ प्राङ्मुखोवेदमूर्तिर्विपुलाचले॥ हैमीरूपार्श्वेदक्षिणासुरवीसुरभी॥ अन्यत्सर्वंधान्यपर्वतवत्॥ अद्येत्यादि॰ सकलपापक्षयानंतरंकल्पशतावधिविष्णुलोकनिवासानंतरंसप्तद्वीपाधिपत्योत्तरंजन्मायुतयावदच्छिन्नायुरारोग्यकामइतिसंकल्पेदानवाक्येचवक्तव्यं॥ मंत्रस्तु॥ आरोग्यामृतसारोयंपरमःशर्कराचलः॥ तन्ममानंदकारीत्वंभवशैलेंद्रसर्वदा॥ अमृतंपिबतांयेतुनिपेतुर्भुविशीकराः॥ देवानांतत्समुत्थोयंपाहिनःशर्कराचलः॥ मनोभवधनुर्मध्यादुद्भूताशर्करायतः॥ तन्मयोसिमहाशैलपाहिसंसारसागरादिति॥ सर्वत्रब्राह्मणभोजनंशक्त्याकार्यमेव॥ तदापूर्वेद्युःकृतोपवासःपरेद्युर्दानानंतरमक्षारलवणंभुंजीत॥ एवंप्रसन्नचित्तोदानंदद्यादिति॥ ॥इतिशर्कराचलदानं॥ ॥इतिदशाचलदानानि॥ ॥अथशिखरदानानि॥ ॥विष्णुधर्मे॥ ॥गुडेक्षुवस्त्रलवणधान्यकाजाजिशर्करा॥ खर्जूरतंडुलद्राक्षाक्षौद्रंमलयजेनच॥ फलैर्मनोहरैरम्यैःशिखराणिप्रदापयेत्॥ माघमार्गशीर्षवैशाखेरोहिणीयुतायांतृतीयायांप्रोष्ठपदशुक्लतृतीयायांचदद्यात्॥ शिखरप्रमाणंतुआत्मसमप्रमाणंप्रादेशाभ्यधिकंशरीरार्धप्रमाणंसप्रादेशंशरीरप्रमाणंवा॥ ॥अथास्यदानप्रयोगः॥ ॥उक्तकालेयजमानःकृतनित्यक्रियःपूर्वाण्हे॥ अद्येत्यादि॰ दुःखदौर्भाग्यत्वाभावपूर्वककल्पकोटिशतप्रयावच्छिन्नगौरीभवननिवासानंतरंपृथ्वीपतित्वकामःश्वोगुडशिखरदानमहंकरिष्यइतिसंकल्प्यगणेशपूजनादिनांदीश्राद्धांतंकृत्वा आचार्यवरणादियथाविभववस्त्रालंकारादिभिर्मधुपर्कपूजांतंकृत्वागोमयेनोपलिप्तायांभुविइक्षुपत्राण्यास्तीर्यमूलेद्विहस्तविस्तारंउपरिहस्तमात्रविस्तारंइक्षुदलमयकुशूलंकृत्वातदभ्यंतरेरक्तवस्त्रेणावेष्ट्यगुडादिहृद्यद्रव्येणापूर्यउपरिइक्षुपत्रकदंबास्ती

र्यंतन्नक्षौमादिवस्त्रोपरिन्यस्येंदुवर्णाभांचंद्रमौलिंपद्मासनाक्षसूत्रकमंडलुवरदाऽभयकरांहैमींगौरींसशिखरांसूत्रेणावेष्ट्यकुंकुमादिनापूजयेत् ॥ ॥
अथांगपूजा ॥ ॥ॐभवान्यैनमःपादौपूजयामि॥ॐकामिन्यैन॰जानुनीपूज॰ॐकामदेव्यैन॰ऊरूपू॰ॐजगद्धियै॰नाभिंपू॰ॐआनंदायैन॰हृदयंपू॰
ॐनंदायैन॰स्तनौपू॰ॐशस्त्रास्त्रधारिण्यै॰बाहूपू॰ॐशितिकंठायै॰कंठंपू॰ॐसुमुखायै॰मुखंपूज॰ॐललितायै॰शिरःपू॰ॐत्रिलोचनायैन॰नेत्राणि
पू॰ॐचंद्रशेखरायै॰भालंपू॰ॐसर्वात्मिकायै॰सर्वांगंपूजया॰॥ ॥इत्यंगपूजा॥ ततोंजलिनापुष्पाण्यादायप्रदक्षिणीकृत्यपठेत्॥यस्मान्निवासःपार्वत्याः-
शिखरस्त्वंसकोर्हितः॥तस्मान्मांपाहिभगवन्त्वंगौरीशिखरःसदेति॥पुष्पांजलिंसमर्प्यनमस्कृत्यगीतवाद्यनिर्घोषैर्जागरंकुर्यात्॥ततःप्रभातेस्नानादिकृतनि
त्यक्रियःशिखरपश्चिमभागेप्राङ्मुखउपविश्य॥अद्येत्यादि॰संकल्पोक्तफलंसंकीर्त्यगोत्रायशर्मणेइदंगुडशिखरंगौरीप्रतिमासहितंसोपस्करंतुभ्यमहंसंप्रद
देनममेतिदद्यात्॥ततःस्वर्णंदक्षिणांदद्यात्॥भूयसींचदत्वाब्राह्मणान्संभोज्यतद्दिनेक्षीरंघृतंवावाग्यतोमुक्तकेशःकृष्णोंप्राश्नीयात्॥इक्षवल्लादिशि
खरदानेतुतत्तद्द्रव्येणकुसूलपूरणंसंकल्पादौतत्तत्पदंतत्रतत्रवक्तव्यमितिशेषः॥ ॥अन्यत्सर्वंपूर्ववदिति॥ ॥इतिगुडशिखरदानं॥इतिनानाशिखरदाना-
नि॥ अथसमस्तपापक्षयकरंत्रिशूलदानंकर्मविपाकसारे॥श्रुताध्ययनसंपन्नंपावितारमकिंचनं॥ब्राह्मणंदानमाहूयदानार्थंप्रददातियः॥मनुष्याणांहिस
कम्प्रजठरेशूलवान्भवेत्॥ ॥वायुपुराणे॥ ॥कृष्णपक्षेचतुर्दश्यामष्टम्यांवासितेतरे॥कुर्याद्द्वादशनिष्केणत्रिशूलंलक्षणान्वितं॥सुवर्णमानंतु॥निष्क
चतुष्कःसौवर्णिकःषट्पंचाशदधिकशतद्वयपलमूल्योवा॥नाभौनिधायसंपूर्णांतिलानांताम्रनिर्मितं॥पात्रमाढकमात्रंस्यात्तत्रशूलंन्यसेत्पुनः॥ततःशैवपं
चाक्षरेणरुद्रप्रकाशवैदिकमंत्रेणत्रिशूलायनमइतिनाममंत्रेणत्रिशूलंसंपूज्यहेमविरूपाक्षकमलोपरिसंपूज्य॥अघोरेभ्योइ॰मंत्रेणपूजांतेप्रणिपत्य॥ततोविप्रंवृत्वायथाविभवंच

स्त्रालंकारादिभिः संपूज्य॥ अद्येत्यादि० ममबुद्ध्यबुद्धिपूर्वककायवाङ्मनःकृतकर्माद्याजन्मार्जितान्यजन्मोपार्जितमनुष्यहिंसनदानार्थाहूतब्राम्हणनिराकरणजन्योदरशूलजनितपीडापनोदकामइमंस्वर्णमयत्रिशूलंविरूपाक्षप्रतिमायुतंसोपस्करंगोत्रायशर्मणेऽस्मैपूजितायतुभ्यमहंसंप्रददेनममेति॥ मन्त्रास्तु॥ भगवन् भगनेत्रघ्न दक्षयज्ञप्रमर्दन॥ तवायुधप्रदानेनपापंनश्यतुशंकर॥ युगांतेयेनलोकानांत्वमंतकविनाशनः॥ विदग्धंयत्त्वपापेनपापौघंचव्यपोहय॥ येनदग्धंक्षणार्धेनत्रिपुरंस्मरदुर्जयं॥ तेनपाशुपतेनाशुममशूलंविनाशय॥ यदाबुद्धिकृतंपापंमनोवाक्कायमानसं॥ तत्सर्वंक्षयमेवाशुशूलदानप्रभावतइति॥ ततःसुवर्णपरिमितांदक्षिणांदत्वाद्विजभोजनसंकल्पंविधायभूयसींदत्वाकर्मेश्वरार्पणंकुर्यात्॥ ॥त्रिशूलदानं॥ ॥अथदारिद्र्यहरंकुबेरमूर्तिदानं॥ ॥वायवीये॥ दरिद्रोजायतेमर्त्योदानविघ्नंकरोतियः॥ ऐश्वर्यंजायतेयेनकर्मणातच्छृणुष्वमे॥ पलार्द्धेनतदर्द्धेनचतुर्थांशेनवापुनः अत्रसार्द्धमाषद्वयादारभ्यपंचाशन्माषावधिवावित्तशाठ्यराहित्येनपुष्पकविमानस्थांकुबेरमूर्तिंपार्श्वयोःपद्मशंखाकारयुतांकृत्वाशुभेन्हि अद्येत्यादि० ममेहजन्मनिपूर्वजन्मनिवादानविघ्नजनितदारिद्र्यविनाशपूर्वकयथेप्सितधनप्राप्त्यर्थंकुबेरमूर्तिदानंकरिष्येइतिसंकल्प्यगोमयोपलिप्तमहीतलेरक्तद्रोणतंदुलराशौकुबेरप्रतिमांराजाधिराजेतिसंपूज्यततआग्नेय्यांस्वगृह्यविधिनाग्निंप्रतिष्ठाप्यसमिदाज्यचरुभिःप्रत्येकमष्टोत्तरशतंराजाधिराजायेतिमंत्रेणहुत्वातत्संख्ययाघृताक्ततिलैर्व्याहृतिभिश्चहुत्वाकुबेरमूर्तिंदद्यात्॥ अद्येत्यादि० ममेहजन्मनिजन्मांतरेवाकृतदानविघ्नजनिततीव्रदारिद्र्यविनाशपूर्वकंयथेप्सितधनप्राप्त्यर्थंचइमांकुबेरमूर्तिंपुष्पकविमानस्थांपार्श्वयोःपद्मशंखाकारयुतांसोपस्करांगोत्रायशर्मणेऽस्मैपूजितायतुभ्यमहंसंप्रददेनममेति॥ मंत्रस्तु॥ उत्तराशापतेदेवकुबेरनरवाहन॥ पद्मशंखनिधीनांत्वंपतिःश्रीकंठवल्लभः॥ दानविघ्नान्मयाप्राप्तंदारिद्र्यंमसदुःखदं॥ तत्सर्वंनवदा

नेनपापमाशुविनाशयेति ॥ इतिदारिद्र्यहरंकुबेरमूर्तिदानं ॥ ॥अथउमामहेश्वरमूर्तिदानं ॥ भविष्ये ॥ अद्येत्यादि॰ सशैलवनकाननससप्तसागरपृथ्वीदा
नसमफलप्राप्तयेइमामुमामहेश्वरमूर्तिंसालंकृतांसोपस्करांसोपकरणांगोत्रायशर्मणेतुभ्यमहंसंप्रददेनममेति ॥ मंत्रस्तु ॥ शिवशक्त्यात्मकंयस्माज्जगदे
तच्चराचरम् ॥ तवदानेनमेवश्यापृथिवीस्यात्सुनिश्चला ॥ सुवर्णदक्षिणांदद्यात् ॥ ॥इतिउमामहेश्वरमूर्तिदानं ॥ ॥अथलक्ष्मीनारायणमूर्तिदानं
॥स्कांदे ॥ संकल्पादिपूर्ववत् ॥ मंत्रस्तु ॥ लक्ष्मीनिवासदेवेशशंखचक्रगदाधर ॥ तवदानात्स्थिरालक्ष्मीर्मद्गृहेस्यात्सदाध्रुवं ॥ ॥सुवर्णदक्षिणांदद्या
त् ॥ ॥इतिलक्ष्मीनारायणमूर्तिदानं ॥ ॥अथहरिहरमूर्तिदानं ॥ संकल्पादिपूर्ववत् ॥ मंत्रस्तु ॥ शिवोनामशिवःसाक्षात्तथानारायणोपिच ॥अस्य
दानाद्धरिहरौप्रसन्नौस्तांसदामम ॥ इतिहरिहरमूर्तिदानं ॥ ॥अथसूर्यमूर्तिदानं ॥ सूर्यारुणसंवादे ॥ ॥ संकल्पादिपूर्ववत् ॥ मंत्रस्तु ॥ ग्रहाणाम
धिपःसूर्यःपद्महस्तःप्रभाकरः ॥ दानेनास्यरविर्वायुःशांतिश्रीदःसदामम ॥ सुवर्णदक्षिणांदद्यात् ॥ ॥इतिसूर्यमूर्तिदानं ॥ ॥अथगणपतिमूर्ति
दानं ॥ स्कांदे ॥ यमानमंतिईशाद्याविश्वनाथमुपासतं ॥ विघ्नेशरक्षप्रचुरंतुभ्यंदास्याम्यभीष्टद ॥ इतिसंप्रार्थ्यसंकल्पादिकृत्वादद्यात् ॥ मंत्रस्तु ॥
गणनाथोविघ्नहरोगौरीसूनुरभीष्टदः ॥ अस्यदानेनमेशांतिःप्रसन्नोस्तुविनायकइति ॥ ॥इतिगणेशमूर्तिदानं ॥ अथजगदंबिकादानं ॥ ॥
देवीपुराणे ॥ संकल्पादिपूर्ववत् ॥ मंत्रस्तु ॥ आदिमायामहाशक्तिर्विश्वमाताजगन्मयी ॥ दानेनास्याःप्रसन्नास्तुसर्वदाममशांभवीति ॥ ॥इतिज
गदंबिकादानं ॥ ॥अथसरस्वतीमूर्तिदानं ॥ वायवीये ॥ संकल्पादिपूर्ववत् ॥ मंत्रस्तु ॥ वीणापुस्तकसंयुक्तावाङ्मूर्तिःसमलंकृता ॥ गृहाणत्वंद्विज
श्रेष्ठवाक्सिद्धिस्तुकुलेममेति ॥ ॥इतिसरस्वतीमूर्तिदानं ॥ ॥अथशालग्रामदानं ॥ हेमाद्रौपाद्मे ॥ शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमम् ॥ ॥

भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं इति ॥ अद्येत्यादि० सशैलवनकाननभूचक्रदानसमफलकाम इमं शालग्रामं घंटाशंखादिसोपस्करं तुलसीपत्राद्यर्चितं सवत्सफलताम्रादिपात्रे स्थितं यथाशक्तिसोपस्करं सालंकृतं गोत्राय शर्मणे सालंकृताय तुभ्यमहं संप्रददे न मम इति ॥ मंत्रस्तु ॥ महाकोशनिवासेन चक्राद्यैरूपशोभितः ॥ शालग्रामप्रदानेन मम संतु मनोरथा इति ॥ सुवर्णदक्षिणा सर्वत्र नराजतं ॥ एवं संकल्पादि सर्वदेवमूर्तिशिलादानेष्वपि योजनीयम् ॥ मणिः शालग्रामपद्मौ तु हेमाद्रिणा व्याख्यातम् ॥ घोरप्रतिग्रहेषु च गणितमिति ॥ इति शालग्रामप्रदानं ॥ ॥ अथ शिवनाभिदानं ॥ लैंगे ॥ संकल्पादि पूर्ववत् ॥ मंत्रस्तु ॥ शालग्रामशिलापुण्या भुक्तिमुक्तिप्रदायिनी ॥ शिवनाभेः प्रदानेन पूर्णाः संतु मनोरथा इति ॥ तथा ॥ महाकोशनिवासत्वं शालग्राम महेश्वर ॥ प्रीयंतां तव दानेन ब्रह्मविष्णुमहेश्वराः ॥ इति शिवनाभिदानं ॥ ॥ अथ लिंगदानं लैंगे ॥ संकल्पादि पूर्ववत् ॥ मंत्रस्तु ॥ सालंकार महालिंग निवासत्वं वृषध्वज ॥ प्रीयतां तव दानेन शिवो गौर्या युतस्त्वम इति तथा ॥ कैलासवासो गौरीशो भगवान् भगनेत्रभित् ॥ चराचरात्मको लिंगरूपी दिशतु वांछितमिति ॥ रुद्राक्षमालासहितं लिंगं दद्यात् ॥ कोटिगुणं पुण्यं भवति ॥ ॥ अथ मारकतलिंगदानं ॥ मंत्रस्तु ॥ इदं मारकतं लिंगं रौप्यपीठसमन्वितं ॥ धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम् ॥ संप्रदद्याद्विधानेन पृथ्वीदानफलं लभेत् इति ॥ रुद्राक्षमालायुक्तं संकल्पाद्युक्तमेव ॥ काश्मीरलिंगदाने तु मारकतपदस्थाने काश्मीरपदं वदेत् ॥ मंत्रस्तु ॥ मृत्युंजयेश गौरीश मृत्युस्यांवृषवाहन ॥ संप्रदानेन मे शंभो मम संतु मनोरथा इति ॥ ॥ इति लिंगदानं ॥ अथ घंटादानं ॥ पाद्मे ॥ अद्येत्यादि ममाकल्पघंटानादश्रवणलोकनिवासावाप्तिकामो गोत्राय शर्मणे सुपूजिताय इमां घंटां विष्णुदैवत्यां तुभ्यमहं संप्रददे न मम इति ॥ मंत्रस्तु ॥ घंटा देवप्रिया नित्यं दैत्यत्रासकरी सदा ॥ संप्रदानेन चैतस्या विजयास्तु सदा मम इति ॥ सुवर्णदक्षिणां दद्यात् ॥ इति घंटादानं ॥ ॥ अथ शंखदानं पाद्मे ॥ अद्येत्यादि० गोत्राय शर्मणे इमं शंखं सुपूजिताय विष्णुदैवत्यं

तुभ्यमहंसंप्रददे न ममेति ॥ मंत्रस्तु ॥ शंखः शुभकरो नित्यं सर्वमंगलदायकः ॥ तस्मादस्य प्रदानेन शांतिरस्तु सदा ममेति ॥ सुवर्णं दक्षिणा ॥ इति शंखदानं ॥ ॥
अथ कालचक्रदानं ॥ मृत्युंजयकल्पे ॥ अद्येत्यादि महामृत्युनिवारणार्थं कालचक्रदानमत्मशक्तितो रौप्यकृतं चंद्राकारमनेकमुक्तामालात्मकरश्मियुक्तं कालचक्रं विप्रं गंधालंकारादिभिः संपूजितं महामृत्युनिवारणकामः तुभ्यमहं संप्रददे न ममेति ॥ मंत्रस्तु ॥ इदं मे राजतं चक्रं इंदुरश्मिसमाकुलं ॥ अपमृत्युविनाशाय दत्तमायुर्विवृद्धय इति ॥ ततः सुवर्णदक्षिणां दत्वा अग्निं प्रतिष्ठाप्य ॐ कालचक्राय नमः स्वाहेत्यनेन मंत्रेणाष्टोत्तरशतघृताक्ततिलैर्हुत्वा पायसादिना द्वादशब्राह्मणान्भोजयित्वा स्वयमक्षारलवणं सकृद्भुंजीतेति ॥ इति कालचक्रदानं ॥ अथापरं अपमृत्युहरं यममूर्तिदानं मृत्युंजयकल्पे लोहपात्रे स्थितं कांस्यतत्र पद्मं तु राजतं ॥ तस्मिन्कालेश्वरः स्वर्णैः पुरुषाकारतां गतः ॥ तद्रूपं तु ॥ ईषत्पीतो दंडहस्तो रक्ताद्रिकृपाशहस्तकः ॥ क्रुद्धो वस्त्रालंकृतः स्याद्भागिणाममंगप्रदः ॥ अलंकृतः स्वर्णालंकारैः त्रिलोहाकारदूतैर्वृतः ॥ त्रिलोहं कांस्यताम्रं पित्तलाख्यं ॥ पुरुषाकारैर्दूतैर्दंडहस्तैः कृत्वा यमं महिषपृष्ठे अष्टम्यां चतुर्दश्यां वा दद्यात् ॥ दक्षिणा तु घृतपूर्णाघटः सुवर्णं वा ॥ एवं कृत्वा दानेन नाशान्मुच्यते ॥ नाशोपमृत्युः ॥ इत्यपमृत्युहरं यममूर्तिदानं ॥ ॥ अथ कालपुरुषदानं ॥ ॥
भविष्ये ॥ ज्ञेयो निष्कशतं पार्थ दानेयं विधिरुत्तमः ॥ मध्यमस्तु तदर्धेन तदर्धेनाधमः स्मृत इति ॥ अत्यशक्तो पंचसौवर्णिको वा ॥ ततोल्पेन तु प्रतिगृहीता दुःखशोकावहः स्यात् ॥ चतुर्थ्यां च चतुर्दश्यां भद्रायां करणे वा कुर्यात् ॥ कालपुरुषस्वरूपमाह ॥ रौप्यदशनं स्ववर्णनेत्रं खड्गोद्यतकरं मांसपिंडयुतवामकरं जपाकुसुमकुंडलं रक्तवस्त्रं स्रग्विणं शंखमालाधरं छुरिकायुतकटिदेशं अतिदीर्घकृष्णाजिनयुतं निर्माय ॥ अद्येत्यादि ॥ अपमृत्युव्याधिसर्वबाधानिवारणाव्याहतैश्वर्यप्राप्तिधर्मश्रीपुत्रपौत्रादिकंतृत्वराज्यांते परमपदावाप्तिकामः कालपुरुषदानमहं करिष्ये इति ॥ कालपुरुषं संपूज्य विभूष्य द्विजं वृत्वा यथाविभवं

वस्त्रालंकारादिभिःसंपूज्यपुष्पांजलिंगृहीत्वापठेत्॥ सर्वंकलयसेयस्मात्कालस्त्वंतेनचोच्यते॥ ब्रम्हविष्णुशिवादीनांत्वमसाध्योसिसुव्रत॥ पूजितस्त्वंय
थाभक्त्याप्रार्थितश्चयथासुखम्॥ यद्बुध्यतेतवविभोतत्कुरुष्वनमोस्तुते॥ इतिसंप्रार्थ्य॥ अद्येत्यादि॰अपमृत्युव्याधि॰इत्यादि॰राज्यपरमपदावाप्तिकामांतं
संकल्पोक्तवत्फलंसंकीर्त्यगोत्रायशर्मणेसुपूजितायइमंकालपुरुषंसालंकृतंउक्तोपस्करंविष्णुदैवतंतुभ्यमहंसंप्रददेनममेतिदत्वापंचसुवर्णादूर्ध्वयानिष्क
शतंदक्षिणांदत्वातंविसृज्यतन्मुखंनेक्षेन्नस्पृशेच्चततःशांतापृथिवीशिवमंतरिक्षंइतिजपित्वा॥ हस्तौपादौप्रक्षाल्यआचम्यभूयसींदक्षिणांदत्वा॥ विप्रान्संभो
ज्यसुहृद्युतोभुंजीतेति अनेनविधिनायस्तुदानमेतत्प्रयच्छति॥ नापमृत्युभयंतस्यनचव्याधिकृतंभयं॥ भवत्यव्याहतैश्वर्यःसर्वबाधाविवर्जितः॥ इतिहेमा
द्रौकालपुरुषदानं॥ ॥अथसर्वसंपत्करदानं॥ ब्रम्हांडपुराणे॥ सूर्योपरागादिपुण्यकालेदेवालयादिपुण्यदेशेगृहेवाकार्यम्॥ प्रातस्तिलकुशमिश्रोदकेन
स्नात्वाकृतनित्यक्रियः॥ आचम्यप्राणानायम्याद्येत्यादिसर्वसंपदायुरारोग्यसमस्तपापनाशपुत्रपौत्रादिकुलवृद्धिस्वर्गनिवासमोक्षेष्टसिद्धिकामोमित्रादिप्र
तिमादानमहंकरिष्ये॥ गुरुंवृत्वायथाविभवंवस्त्रालंकारादिभिःपूजयेत्॥ ततोविशुद्धस्तांचतुरस्रांभुवंगोमयेनोपलिप्यतत्रप्रागायताश्चतस्राउदगायताश्च
तस्रोलेखालिखित्वातेषुनवकोष्ठेषुद्रोणमिततंडुलान्निक्षिप्यतेषुनवकुंभान्संस्थाप्यवस्त्रैरावेष्ट्यतेषुसुवर्णत्रयादूर्ध्वंपलावधिसुवर्णनिर्मितान्नवप्रतिमाः
संस्थाप्यपूजयेत्॥ तत्रपश्चिमपंक्तौउदक्संस्थंमित्रंवरुणंसोमंमध्यपंक्तौब्रम्हाणंचतुर्भुजंविष्णुंउमापतिंचात्यपंक्तौदिवाकरं॥ ग्रहणंवन्हिंचततोष्टौविप्रा
न्संपूज्यैकैकस्मै॥ अद्येत्यादि॰संपदादिकामांतंसंकल्पोक्तफलसुद्धिस्यगोत्रायशर्मणेसुपूजितायइमांमित्रप्रतिमांसुपूजितांतुभ्यमहंसंप्रददेनममेतिद
त्वाततोवरुणप्रतिमांगुरवेदत्वादेयद्रव्यसमंसुवर्णंदक्षिणांवस्त्रयुगंचदद्यात्॥ ततःसोमब्रम्हविष्णुशिवदिवाकरग्रहवन्हिप्रतिमाश्चब्राम्हणेभ्योदत्वासुवर्ण

वन्हिं९	रुद्रहणं८	दिवाकरं७
उमापतिं६	विष्णुंचतुर्भुजं५	ब्रम्हाणं४
सोमं३	वरुणं२	मित्रं१

दक्षिणांचतेभ्योदत्वाब्राम्हणांश्चभोजयित्वाभूयसींचदत्वासुहृद्युतोभुंजीतेति॥ इतिसर्वसंपत्करदानं॥ ॥अथकृष्णाजिनदानं॥ सौरपुराणे॥ कृष्णाजिनंचमाहिषीमेषीचदशधेनवः॥ ब्रम्हलोकप्रदायीस्यात्तुलापुरुषएवचेतिमात्स्ये॥ वैशाखीपौर्णमासीचग्रहणे शशिसूर्ययोः॥ पौर्णमासीतुयामाघेआषाढीकार्तिकीतथा॥ उत्तरायणंद्वादशीवातस्यांदत्तंमहाफलमिति॥ अथास्यदानप्रयोगः पूर्वोक्तकालेगोमयेनोपलिप्तदेशेआविकंकंबलंतदुपरिसशृंगंसखुरंप्राग्ग्रीवंकृष्णाजिनमास्तीर्यसुवर्णखुरंरौप्यदंतंमौक्तिक पुच्छंसुवर्णनाभंकृत्वातदुपर्यरत्निप्रमाणांस्तिलान्संस्थाप्यवाससाछाद्यसगंधरत्नानिचत्वारिपात्राणिकांस्यघृतदुग्धदधिम धुयुतानिचत्वारोमृदश्वमार्गादिदिक्षुदानदेशाद्बहिश्चपंचशाखामव्रणकुंभंचसंस्थाप्यदेशकालौसंकीर्त्यममसप्तजन्मोपात्तपा पनाशकामात्मपितृपुत्रापमृत्युपरिहारभार्याधनदेशाद्यवियोगकामःसंकल्पेष्टफलावाप्तिब्रम्हलोकावाप्तिकामश्चकृष्णाजिनप्र दानमहंकु॰ इतिसं॰ जीर्णपीनवाससास्वांगानिसंमृज्ययानिकानि चपापानिभयाल्लोभात्कृतानिच॥ लोहपात्रप्रदानेनप्रणश्यंतुममाशुवै॥ इतिमंत्रेण सतिलंलोहपात्रंकृष्णाजिनस्यवामपादेनिवेशयेत्॥ यानिकानिचपापानिकर्णोत्थानिकृतानिच॥ कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा॥ इतिमंत्रेणमधु मयंकांस्यपात्रंकृष्णाजिनस्यदक्षिणपादेनिवेश्य॥ परापवादपैशून्यादभक्ष्यस्यचभक्षणात्॥ तदुत्थितंतुमेपापंताम्रपात्रात्प्रणश्यतु॥ इतिमंत्रेणसतिलं ताम्रपात्रंवामहस्ते॥ कन्यानृतंगवांचैवपरदारप्रमर्शनं॥ रौप्यपात्रप्रदानेनक्षिप्रंनाशंप्रयातुमे॥ इतिमंत्रेणमधुमयंरौप्यपात्रंदक्षिणहस्ते॥ जन्मजन्मसह स्रेषुकृतंपापंकुबुद्धिना॥ सुवर्णपात्रदानात्तन्नाशयाशुजनार्दन॥ इतिमंत्रेणसाक्षतंहेमपात्रंमध्येतयाहेमसुक्ताविद्रुमदाडिमपमातुलिंगानिनिधायप्रास्त

पत्रेकर्णयोःसंस्थाप्यद्विजंवृत्वायथाविभवंवस्त्रालंकारादिभिःसंपूज्यपुनर्देश०त्वामुकगोत्रोमुकशर्मा अहंममसमस्तजन्मोपात्तादिब्रम्हलोकावास्त्यंतमुक्तागोत्रायशर्मणेस्रक्पूजितायवृतायइदंकृष्णाजिनंयथाशक्तिसोपस्करंवृषभध्वजप्रीतयेतुभ्यमहंसंप्रददेनममेति॥ एतद्दक्षिणापरिमाणंतुगारुडे॥ सुवर्णनिष्कशतंतदर्धंतदर्धंवा॥ ततोन्यूनत्वेनाधिकफलं॥ अस्पृश्यःसद्विजोराजन्नचितिरूपसमोहिसः॥ दानेचश्राद्धकृत्येचदूरतःपरिवर्जयेतइति गारुडेउक्तं॥ स्वगृहान्प्राप्यतंविप्रंमंगलस्नानमाचरेदितितद्गृहस्थंकुंभजलसहितंनीत्वाक्षेप्यंचतुष्पथइति॥ ततोभूयसींदक्षिणांदत्वाशिषोगृह्णीयात्॥ दानेनानेनसकलारिष्टपापनाशोभूमिदानफलंचेतिहेमाद्रिः हेमाद्रिविशेषस्तुग्रंथांतरादवगंतव्यः इतिकृष्णाजिनदानं॥ ॥अथशय्यादानंमहाभारते॥ यजमानःपुण्यकालेअष्टदलेतिलप्रस्थंनिक्षिप्यतस्मिन्शय्यामास्तीर्यतस्याःसमंतादीशानादिकोणचतुष्टयेशिरोभागेचपंचकुंभान्न्यसेत्॥ घृतकुंकुमगोधूमजलपूर्णकुंभसुच्छीर्षघृतपूर्णकलशंसप्तधान्यानिचसंस्थाप्य॥ अद्येत्यादि० ममसमस्तपापक्षयपूर्वकाप्सरोगणसेव्यसुतविमानकरणकेंद्रपुरगमनोत्तरषष्टिसहस्रवर्षाधिकरणकक्रीडनस्त्रीसंघसमावृतस्वर्गलोकमहिमत्वतदुत्तरषष्टियोजनमंडलराज्यभोगानंतरशिवसायुज्यतावाप्तिकामःशय्यादानमहंकरिष्ये॥ इतिसंकल्प्य॥ द्विजंसपत्नीकंवृत्वायथाविभवंवस्त्रालंकारादिभिःसंपूज्य शय्यायांलक्ष्मीनारायणप्रतिमांस्वर्णमयींसंस्थाप्यसंपूज्यसपत्नीकद्विप्रेणसहशय्यांप्रदक्षिणीकृत्यनमःप्रभापंथेदेव्यैइतिचतुर्दिक्षुक्रमेणप्रणम्यतिथ्यादिसंकीर्त्यममसर्वपापक्षयेत्यादिशिवसायुज्यतावाप्तिकामोगोत्रायशर्मणेस्रक्पूजितायइमांशय्यांईशानादिकोणचतुष्टयस्थापनक्रमेणघृतकुंकुमगोधूमजलघृतपूर्णकुंभसमेतांहंसतूलीप्रच्छन्नांशुभ्रगंडोपधानिकांप्रच्छादनपटास्तृतांसप्तधान्ययुतांतांबूलायतनादर्शैलालवंगकर्पूरयुतांस्रग्गंधपरिमलभोग्यवस्त्रचंदनागरुदीपिकोपानच्छत्रचामरासनयुतांभोजनभाजनजलपात्रपंचवर्णवितानां

केशप्रसाधिन्यंजनशलाकापुष्पमाल्यादियुतांलक्ष्मीनारायणप्रतिमासहितांयुक्तोपस्करांसंगिरोदैवतांगोत्रायशर्मणेसंपूजितायसालंकृतायसपत्नीकायतुभ्यमहंसंप्रददेनममेति॥ शय्योपवेशितविप्रहस्तेसाक्षतकुशोदकंक्षिपेत्।मंत्रस्तु॥यथानकृष्णशयनंशून्यंसागरजातया॥तथाशय्याममाप्यस्तुशून्याजन्मनिजन्मनिइति॥ततःसुवर्णमेवदक्षिणांदद्यात्॥ततोभूयसींदत्वाब्राम्हणांश्चभोजयेदिति॥ ॥इतिशय्यादानं॥ ॥अथशयनदानंभविष्ये॥अद्येत्यादि॰गोत्रायशर्मणेइदंशयनंसुखस्पर्शंश्रीविष्णुप्रीतिकामस्तुभ्यमहंसंप्रददेनममेति॥मंत्रस्तु॥ मृदुशयनंसुखदंकेशवस्यप्रियंसदा॥दानेनानेनसौभाग्यंसर्वदास्तुगृहेममेति॥ततःसुवर्णंदक्षिणाइतिशयनदानं॥ ॥अथकशिपुदानं॥ भविष्ये॥ अद्येत्यादि॰गोत्रायशर्मणेकशिपुयावज्जीवंशीतवातोष्णनिवारणकायस्तुभ्यमहंसंप्रददेनममेति॥मंत्रस्तु॥मृदुस्यबीजकार्पाससपूरितंसुखदंनृणां॥तस्मादस्यप्रदानेनसुखंस्यात्सर्वदाममेति॥ इतिकशिपुदानं॥ अथवस्त्रदानानि॥नंदिपुराणे॥वस्त्रंयथार्थिनेदद्याच्छुभंवापियदृच्छया॥सप्रकेह्नवान्श्रीमान्बृहस्पतिपुरेवसेदिति॥विष्णुधर्मोत्तरे॥वासोहिसर्वदैवत्यंसर्वप्रायोऽयमुच्यते॥वस्त्रदानात्सुवेषःस्याद्रूपद्रविणसंयुतः॥युक्तोलावण्यसौभाग्यैर्विरोगीचतथाद्विजः॥ दत्वाकार्पासिकंवस्त्रंस्वर्गलोकेमहीयते॥ दत्वोर्णजंचतथापिफलंदशगुणंभवेदिति॥अद्येत्यादि॰गोत्रायशर्मणेइदंश्वेतवस्त्रंसूक्ष्मंशिवप्रियंदेहालंकरणंबार्हस्पत्यदैवतंतुभ्यमहंसंप्रददेनममेति॥मंत्रस्तु॥सितसूक्ष्मंसुखस्पर्शंईशानादेःप्रियंसदा॥देहालंकरणंयस्मादतःशांतिंप्रयच्छमेइति॥इतिश्वेतवस्त्रदानं॥ ॥अथपीतस्य॥संकल्पादिसमस्तपापक्षयकामः मंत्रस्तु पीतवासःसुमंगल्यंदेवानांप्रीतिवर्द्धनं दानेनानेनमेपापंहरत्वाशुजनार्दनः॥ इतिपीतवस्त्रदानं॥ ॥अथरक्तवस्त्रदानं॥भविष्ये॥संकल्पादि आदित्यप्रीतिकामः मंत्रस्तु रक्तवस्त्रंसदारम्यंआदित्यस्यप्रियंसदा श्रीकारंरूपदंनित्यमतःशांतिंप्रयच्छमे

॥इतिरक्तवस्त्रदानं॥ ॥अथनीलवस्त्रदानं भविष्ये संकल्पादि॰ बलायुःश्रीवृद्धिकामः॥मंत्रस्तु॥ मनोहरंनीलवस्त्रंबलरामप्रियंसदा॥आयुर्विवर्धनंश्री
दमतःशांतिंप्रयच्छमे॥ इतिनीलवस्त्रदानं॥ ॥अथचित्रवस्त्रदानंभविष्ये॥संकल्पादि॰षण्मुखप्रीतिकामः॥मंत्रस्तु॥ षण्मुखस्यप्रियंनित्यंचित्रव
स्त्रंमनोरमं॥तस्मादस्यप्रदानेनशांतिरस्तुसदाममेति॥इतिचित्रवस्त्रदानं॥ ॥अथकृष्णवस्त्रदानं॥ ॥भविष्ये॥संकल्पादि॰सर्वारिष्टभयपीडाप
मृत्युपरिहारायमृत्योःप्रीतिकामश्च॥मंत्रस्तु॥कृष्णंवासःप्रियंमृत्योःसर्वारिष्टविनाशनं॥भयपीडामृतिहरमतःशांतिंप्रयच्छमे॥इतिकृष्णवस्त्रदानं॥
अथपट्टकूलदानं॥भविष्ये॥संकल्पादि॰कीर्तिकांतिसर्वदेवप्रीतिकामश्च॥मंत्रस्तु॥पट्टकूलंसदारम्यंपवित्रंकामदंनृणां॥विष्ण्वादीनांप्रीतिकरमतःशां
तिंप्रयच्छमे॥इतिपट्टकूलदानं॥ ॥अथमृतकर्पटदानं॥भविष्ये॥संकल्पादि॰पितृतृप्तिकामः॥मंत्रस्तु॥कीटजंटसरंपुण्यंमृतकर्पटसंज्ञकम्॥पितृणां
प्रीतिदंयस्मादतःशांतिंप्रयच्छमे॥इतिमृतकर्पटदानं॥ ॥अथऊर्णावस्त्रदानं॥भविष्ये॥संकल्पादि॰सर्वदेवप्रीतिकामः॥मंत्रस्तु॥ऊर्णावस्त्रंचारुचि
त्रंदेवानांप्रीतिवर्द्धनं॥सुखस्पर्शकरंयस्मादतःशांतिंप्रयच्छमे॥सकला निधिरमादीनामप्ययमेवमंत्रः॥इत्यूर्णावस्त्रदानं॥ ॥अथकंबलदानं॥स्कांदे॥
कंबलःपट्टगर्भश्चेन्महाशीतविनाशकः॥सएवविपरीतश्चेन्महावृष्टिविनाशकः॥संकल्पादि॥श्रीविष्णुप्रीतिकामः॥मंत्रस्तु॥शीतवर्षाहरःपुण्योदृष्टोबल
विवर्धनः॥कंबलस्यप्रदानेनशांतिरस्तुसदाममेति॥इतिकंबलदानं॥ ॥अथचित्रकंबलदानं॥भविष्ये॥संकल्पादि॰श्रीलक्ष्मीनारायणप्रीतिमः॥मं
त्रस्तु॥ऊर्णाषट्श्वाविकादिःसर्वदेवप्रियःशुचिः॥चित्रकंबलदानेनममसंतुमनोरथाः॥इतिचित्रकंबलदानं॥ ॥अथताम्रपात्रदानं॥वराहपुराणे॥अथा
तःसंप्रवक्ष्यामिपात्रदानमनुत्तमम्॥कृत्वाताम्रमयंपात्रंयथाविभवविस्तरं॥तत्पात्रेहैमींलक्ष्मीनारायणप्रतिमांउमामहेश्वरप्रतिमांचसंपूज्यद्विजमपिपूजयि

त्वा॥शरीरोत्थसकलपापनाशकामोगोत्रायशर्मणेसंपूजितायइदंताम्रपात्रंउमामहेश्वरलक्ष्मीनारायणप्रतिमासहितंचतुभ्यमहंसंप्रददेनममेति॥मंत्रस्तु॥परापवादपैशून्यादभक्षस्यचभक्षणात्॥पापंगात्रोत्थितंताम्रपात्रदानात्प्रणश्यत्विति॥एवंसंकल्पवाक्यंप्रतिमादिसर्वपात्रदानेषुबोध्यम्॥इतिताम्रपात्रदानं॥ ॥अथप्रसंगात्ताम्रदानमपिभविष्ये॥संकल्पः आरोग्यबलवृद्धिसूर्यप्रीतिकामः॥मंत्रस्तु॥सूर्यप्रीतिकरंताम्रमारोग्यबलवर्धनम्॥तस्मादस्यप्रदानेनशांतिरस्तुसदाममेति॥इतिताम्रदानं॥ अथकांस्यपात्रदानं॥वाराहे॥संकल्पादि॰कामकृतपापनाशकामः॥मंत्रस्तु॥यानिपापान्यनेकानिकामाकामकृतानिच॥कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदेति॥ इतिकांस्यपात्रदानं॥ ॥अथप्रसंगात्कांस्यदानमपि॥भविष्ये॥संकल्पादि॰ब्रह्मविष्णुशिवप्रीतिकामः॥मंत्रस्तु॥कांस्येब्रह्मशिवौसाक्षात्कांस्यमेतद्विभावसुः॥कांस्यंविष्णुमयंयस्मादतःशांतिंप्रयच्छमे॥ इतिकांस्यदानं॥ ॥अथलोहपात्रदानं॥भविष्ये॥संकल्पादि॰लोभाज्ज्ञानाज्ञानकृतपापक्षयकामः॥मंत्रस्तु॥ज्ञानाज्ञानकृतंपापंमयालोभात्कृतंचिरात्॥लोहपात्रप्रदानेनममपीडांव्यपोहतु॥इतिलोहपात्रदानं॥ ॥अथरौप्यपात्रदानं॥ विष्णुधर्मे॥संकल्पादि॰कन्यादूषणपरदाराभिमर्शनादिपापक्षयकामः॥मंत्रस्तु॥कन्यादूषणतःपापपरदाराभिमर्शनात्॥रौप्यपात्रप्रदानेनतानिनश्यंतुमेसदेति॥ इतिरौप्यपात्रदानं॥ ॥अथसुवर्णपात्रदानं॥वाराहे॥संकल्पादि॰जन्मांतरसहस्रोत्थदुष्कृतनाशकामः॥मंत्रस्तु॥जन्मांतरसहस्रेषुयत्कृतंदुष्कृतंमया॥तत्सर्वंनाशमायातुस्वर्णपात्रप्रदानतइति॥इतिसुवर्णपात्रदानं॥ ॥अथस्थालीदानं॥भविष्ये॥कृत्वाताम्रमयींस्थालींपलानांपंचभिःशतैः॥अशक्तस्तदर्धेनतदर्धार्धेनवापुनः॥अत्यशक्तोमृन्मयींपायसेनपूर्णांघृतशर्कराशाकजलपात्रयुतांचसवस्त्रांमंडलेसंस्थाप्यगंधमाल्यादिनालंकृत्य॥आदित्येहनिसंक्रांतौचतुर्दश्यष्टमीषुच॥एकादश्यांतृतीयायांविप्रायप्रति

पादयेत्॥ अद्येत्यादि० यावज्जीवंसकुटुंबस्ययथेष्टमन्नमक्षय्यभोज्यादिलाभकामः इमांस्थालींपायसपूर्णांघृतशर्कराशाकजलपात्रवस्त्रावृतांमंडलस्थां सालंकृतांगोत्रायशर्मणेतुभ्यमहंसंप्रददेनममेति॥ मंत्रस्तु॥ इमांपायसपूर्णांतुस्थालींघृतजलादिभिः॥ दानात्संपत्तिपात्रःस्यादतःपाहिमहेश्वरेति॥ सुवर्णंदक्षिणां॥ ॥इतिस्थालीदानं॥ ॥अथवेदपुरुषदानानि॥ वायवीये॥ अष्टादशपुराणानिसहिरण्यानिपर्वणि॥ लिखित्वायःप्रयच्छेत्तुसविद्यापारगोभवेत्॥ रामायणंभारतंचदत्वास्वर्गेमहीयते॥ धर्मशास्त्रंनरोदत्वास्वर्गलोकेमहीयतइतिभविष्ये॥ धेनुदानसहस्रेणसम्यग्दत्तेनयत्फलं॥ तत्फलंसमवाप्नोतिपुस्तकैकप्रदानतइति॥ अथप्रसंगाच्चतुर्दशविद्याउक्तामदनरत्नेनंदिपुराणे॥ विद्याश्चतुर्दशप्रोक्ताःक्रमेणचयथास्थिताः॥ षडंगाश्चतुरोवेदाधर्मशास्त्रंपुरातनं॥ मीमांसातर्कशास्त्रंचएताविद्याश्चतुर्दश॥ आसामेवानरोत्पन्नाःपराविद्याःसहस्रशइति॥ पुरातनंपुराणम्॥ तत्रैवकालमाह॥ चंद्रसूर्योपरागेवासंक्रांत्ययनवासरे॥ शुभेऽह्निशुभनक्षत्रेकृत्वामंडलमुत्तमम्॥ चतुरस्रंवितानंचबध्वापुष्पोपशोभितम्॥ तत्रान्यस्यासनंदिव्यंदिव्यगंधादिवासितं॥ तत्रसंस्थापयेद्ग्रंथंनागदंतमयंशुभं॥ संस्थाप्यपुस्तकंतत्रनैगमंभारतादिकं॥ नैगमंवेदपुस्तकं॥ पुण्यंपवित्रंसंपूज्यवस्त्रालंकारभूषणैः॥ पूजयेच्चदिशापालाल्लोकपालान्यथाक्रमं॥ कन्यास्त्रिपंचसंपूज्यामातरःकल्पयेच्छ्रुताः॥ शास्त्रंतज्ज्ञायविदुषेदद्यात्पुस्तकमुत्तममिति॥ अथास्यदानप्रयोगः॥ यजमानःकृतनित्यक्रियःशुचिःपुण्यकालेदेशकालौसंकीर्त्यगोसहस्रदानसमफलप्राप्तिस्वर्गलोकमहिमत्वसकलचतुर्दशविद्यावेदवेदांगपारगत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंअमुकपुस्तकदानमहंकरिष्यइतिसंकल्प्यपूर्वोक्तमंडपादेयथाशक्त्याकल्पयित्वानागमयपत्रवस्त्रद्वयबद्धऊर्णापट्टसूत्रवेष्टितपुस्तकंसंस्थाप्यहंसीसरस्वतींप्रतिमांसिंहविघ्नेशंचतत्रावाह्यपरितोलोकपालांश्चावाह्यतत्रसुवासिनीःकुमारीश्चाया

ह्य॥ यागुंगुर्यासिनीवाली याराकायासरस्वती॥ इंद्राणीमह्वऊतयेवरुणानींस्वस्तयेइतिमंत्रेण॥ यद्वा॥ देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवो वदंति
॥ सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु॥ इतिमंत्रेणावाहितदेवताःषोडशोपचारैरभ्यर्च्यद्विजंवृत्वायथाविभवंवस्त्रालंकारादिभिःपूजयेत्॥
अद्येत्यादि॰गोत्रायशर्मणेस्मपूजितायसंकल्पोक्तफलसंकीर्त्यइदंपुस्तकंप्रतिमायुतंससिंहऊर्णापट्टबद्धं दृढसूत्रवेष्टितंनागमययंत्रेस्थितंयथाशक्ति
सोपस्करंसारस्वतंदैवतंतुभ्यमहंसंप्रददेनममेति॥ मंत्रोतु॥ सर्वविद्याश्रयायज्ञाःकरणांलिखिताक्षरं॥ पुस्तकस्यप्रदानेनप्रीणातुममभारती॥ नरस्व
तिज्ञान्मानःशब्दब्रह्माधिदेवते॥ अस्याःप्रदानाद्वागीशाप्रसन्नाजन्मजन्मनि॥ ततःसुवर्णदक्षिणांदद्यात्॥ इतिपुस्तकदानं॥ ॥अथरत्नदानं॥
भविष्ये॥ माणिक्यंपद्मरागंचवैडूर्यंपद्ममेवच॥ मारकतंचगोमेदंपुष्परागंचमौक्तिकं॥ हरितंचनवैतानिरत्नान्युक्तानिसूरिभिरिति॥ रत्नदानाद्ध
रिर्लक्ष्मीःस्वपदंचप्रयच्छतीति॥ अद्येत्यादि॰लक्ष्मीनारायणपदावाप्तिकामः॥ मंत्रस्तु॥ यस्माद्रत्नेषुसर्वेषुसर्वदेवाव्यवस्थिताः॥ तस्माद्रत्नप्रदानेनवांछि
तंफलमश्नुते॥ इतिनवरत्नदानानि॥ मौक्तिकमंत्रस्तु॥ मौक्तिकंभूषणंविष्णोःश्रियोगौर्याःशिवस्यच॥ दानेनास्यसुखंचास्तुऐहिकामुष्मिकंममेति॥ प्रवा
लदानमंत्रस्तु॥ प्रवालंपुष्टिदंश्रीदंकांतिदंसुप्रदंतथा॥ दानेनास्यमहत्सौख्यंशांतिरस्तुसदाममेति॥ कर्णभूषणदानमंत्रस्तु॥ भूषणंकर्णयोःस्त्रीणांस्वर्ण
रत्नादिसंयुतं॥ ताटंकस्यप्रदानेनसौभाग्यंवर्धतांममेति॥ मांगल्यमणिदानमंत्रस्तु॥ मांगल्यमणयोलक्ष्म्याःगौर्याःप्रीतिकराःसदा॥ तस्मादेषांप्रदानेनशांति
रस्तुसदाममेति॥ हरिद्रामंत्रस्तु॥ गौर्याःप्रीतिकरानित्यंहरिद्रासर्वकामदा॥ तस्मादस्याःप्रदानेनसौभाग्यंजन्मजन्मनीति॥ कुंकुमदानमंत्रस्तु॥ कुंकुमंशोभ
नंरम्यंसर्वदामंगलप्रदं॥ दानेनास्यमहत्सौख्यंसौभाग्यंस्यात्सदाममेति॥ सिंदूरदानमंत्रस्तु॥ सिंदूरंशोभनंरम्यंगणेशस्यप्रियंपरं॥ दानेनास्यपरालक्ष्मीः

स्थिरामेचास्तुसंततिरिति।।कस्तूरीदानमंत्रः कस्तूरीभाग्यदाभव्यादेवमर्त्यजनप्रिया।।दानेनास्याःसुखंभोगःशांतिरस्तुसदाममेति।।कर्पूरदानमंत्रः कर्पूरंशीतलंचारुदेवर्षिगुरुसेवितं।।तस्मादस्यप्रदानेनलक्ष्मीःप्रीतिकराममेति।।तथा।।कर्पूरंरुचिरंविप्रगृहाणेमंसुपूजितं।।पुण्यगंधस्थितासासंकमलाप्रीयतामिति।।नानासुगंधद्रव्यदानमंत्रस्तु।।गंधोमनोहरोदिव्यःशांतिदःसुखदस्तथा।।तस्मादस्यप्रदानेनसुगंधःस्यात्सदाममेति।।इतिभविष्यपुराणोक्तनानाद्रव्यदानमंत्राः।। ।।अथदेवगलंतिकादानं।।भविष्यपुराणे।।वसंतसमयंज्ञात्वागत्वादेवालयंशुभं।।शिवस्यविष्णोरर्कस्यइष्टदेवस्यवापुनः।।स्रवंतंकारयेत्कुंभंसच्छिद्रंदेवमस्तके।।दिवारात्रौस्रवेद्देवेजलंमासचतुष्टयं।।स्रवत्तद्बिंदुसंख्याकान्स्वर्गलोकेमहीयते।।अत्रप्रयोगस्तु।।वसंतेशुभदिनेस्थिरलग्नादौकृतनित्यक्रियःआचम्यप्राणानायम्य।।अद्येत्यादि०देवशिरसिस्रवज्जलबिंदुसमसंख्याकाब्दशिवपुरादिनिवासकामोमासचतुष्टयंदिवारात्रौचदेवगलंतिकादानंकरिष्येइतिसंकल्प्यप्रासादंसम्यक्प्रक्षाल्यदेवंपंचामृताद्युपचारैरभ्यर्च्यदेवगलंतिकांबध्नीयात्।।मंत्रस्तु।।स्कांदे।।ॐनमःशंकरःशंभुभवोधाताशिवोहरः।।प्रीयतांमेमहारुद्रोजलसेकप्रदानतइति।।एवंमासचतुष्टयंदेवगलंतिकादानंकृत्वाअंतेप्येवंपंचामृतादिपूजांकृत्वायथाशक्तिब्राह्मणान्भोजयित्वातेभ्योदक्षिणांदद्यादिति।।त्रयाणा मपिलोकानामुदकंजीवनंस्मृतं।।पवित्रममृतंयस्मात्तद्देयंपुण्यमिच्छतेति।।इतिस्कांदोक्तंदेवगलंतिकादानं।। ।।अथप्रपादानं।।भविष्ये।।अतीतेफाल्गुनेमासिप्राप्तेचैत्रेमहोत्सवे।।पुण्येऽह्निविप्रकथितेमंडपंकारयेत्ततइति।।पुरमध्येचतुष्पथेजलरहितमार्गवृक्षमूलेप्रपामंडपंकारयित्वातन्मध्येसुगंधकान्जलकुंभान्संस्थाप्यप्रपापालकंबटुपुत्रंसंस्थाप्यप्रार्थयेत्।।प्रपेयंसर्वसामान्याभूतेभ्यःप्रतिपादिता।।अस्याःप्रदानात्सकलाममसंतुमनोरथाइति।।ततोनिवारितंदेयंतोयंमासचतुष्टयम्।।त्रिपक्षंवामहाराजन्जीवानांजीवनंपरं।।प्रत्य

हंकारयेत्तस्यांभोजयेच्छक्तितोद्विजान्॥अनेनविधिनायस्तुग्रीष्मेतापप्रणाशनं॥पानीयमुत्तमंदद्यात्तस्यपुण्यफलंशृणु॥कपिलाशतदानस्यसम्यक्दत्तस्ययत्फलं॥तत्फलंसमवाप्नोतिसर्वदेवैःसुपूजितइति॥ इतिप्रपादानं॥ ॥अथहेमंतिकेग्निदानं॥भविष्ये॥अग्निंहेमंतशिशिरऋतौतीर्थेसुरालये॥मठेदेवालयेचैव अग्निंप्रज्वालयेत्तुयः॥षष्टिवर्षसहस्राणिस्वर्गलोकेमहीयतइति॥तथाप्रज्वालयेद्वह्निंसेवनार्थंद्विजन्मनां॥दातव्योदीपकोखंडोदेवमुद्दिश्यमाधवमितिमाधवोक्तेश्च॥इतिहेमंतशिशिरऋतावग्निदानं॥ ॥अथदीपदानं॥संवर्तः॥देवागारेद्विजागारेदीपंदत्वाचतुष्पथे॥मेधावीज्ञानसंपन्नश्चक्षुष्मांश्चसदाभवेदिति॥तथोत्तरायणेदीपदानमतिप्रशस्तं॥मंत्रस्तु॥दीपोज्ञानप्रदोनित्यंदेवतानांप्रियःसदा॥दानेनास्यभवत्सौख्यंशांतिर्मेवांछितंफलं॥सज्योतिस्तैलपात्रंचदीपंबाहुसमुन्नतः॥सुखंस्यादस्यदानेनशांतिरस्तुसदाममेति॥ दीपदानं॥ ॥अथपांथपरिचर्या॥भविष्ये॥पांथंपरिचरेद्यस्तुशयनासनभोजनैः॥सस्वस्थेनप्रयासेनजयतिक्रतुयाजिनमिति॥तथा॥अप्रणोद्योतिथिःसायमपिवाभूतृणोदकैरितियाज्ञवल्क्यः॥प्रचेताअपि॥यःप्रातर्वैश्वदेवांतेसायंवाग्रहमागतः॥देववत्पूजनीयोसौसूर्योढः सोतिथिःस्मृतइति॥तथा॥दिवातिथौतुविमुखेगतेयत्पातकंनृणां॥तदेवाष्टगुणंपुंसांसूर्योढेविमुखेगते॥तस्मात्स्वशक्त्याराजेंद्रसूर्योढमतिथिंनरः॥पूजयेत्पूजितेतस्मिन्पूजिताःसर्वदेवताइति॥ इतिपांथपरिचर्या॥ ॥अथगोपरिचर्या॥विष्णुः॥गवांकंडूयनंचैवसर्वकल्मषनाशनं॥गवांग्रासप्रदानेनस्वर्गलोकेमहीयतइति॥ग्रासप्रदानमंत्रस्तुपरार्के॥सुरभित्वंजगन्मातर्नित्यंविष्णुपदेस्थिता॥सर्वदेवमयेग्रासंमयादत्तमिमंग्रस॥प्रार्थनामंत्रस्तु॥ततः॥सर्वदेवमयेदेविसर्वदेवैरलंकृते॥मातर्ममाभिलषितंसफलंकुरुनंदिनीतिप्रार्थयेत्॥इतिगोपरिचर्या॥ ॥अथधर्मघटदानं॥विष्णुः॥शीतलेनसुगंधेनवारिणापूरितंघटं॥शुक्लचंदनलिप्तांगंपुष्पदामोपशोभितं॥

दध्योदनघृतंकुर्याच्छरावंतस्यचोपरि॥उपानच्छत्रसंयुक्तंधर्माख्यंकल्पयेत्घटम्॥पुष्पाक्षतान्गृहीत्वातुइमंमंत्रमुदीरयेत्॥नमोस्तुविष्णुरूपायनमःसागर
संभव॥अपांपूर्णोद्धरास्मात्त्वंदुःखसंसारसागरादिति॥प्रार्थनामंत्रस्तु॥उदकुंभोमयादत्तोग्रीष्मकालेदिनेदिने॥शीतोदकप्रदानेनप्रीयतांमधुसूदनइति॥
॥भविष्ये॥प्रत्यहंधर्मघटकोवस्त्रसंवेष्टितोनवः॥ब्राम्हणस्यगृहेदेयःशीतामलजलैःसुचिः॥वसंतग्रीष्मयोर्मध्येपानीयंयःप्रयच्छति॥पलेपलेसुवर्णस्यफ
लंप्राप्नोतिमानवः॥मार्गशीर्षात्समारभ्यउदकुंभंतुयःक्षिपेत्॥दिनेदिनेसहस्रस्यगवांदानफलंलभेत्॥इति॥उद्यापनंतुमासिमासिकार्यं॥भविष्ये॥मंडका
वेष्टिकाभिश्चपक्वान्नैःसार्वकामिकैः॥उद्दिश्यशंकरंविष्णुंब्रम्हाणमथवापितॄन्॥ततःसतिलंप्रोक्ष्यानेनमंत्रेणदद्यात्॥एषधर्मघटोदत्तोब्रम्हविष्णुशिवा
त्मकः॥अस्यप्रदानात्सकलाममसंतुमनोरथाःइति॥अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति॥वसंतग्रीष्मसमयेगोप्रदानफलंलभेदिति॥इतिधर्मघटदा
नं॥कलशदानमंत्रस्तु॥कलशंशुभदंभव्यंजलेनपरिपूरितं॥दानेनास्यमहत्सौख्यंशांतिरस्तुसदाममेति॥जलपात्रदानमंत्रोपि॥वारिणापूरितंपात्रंतापत्र
यहरंशुभं॥देवर्षिपितृतृप्त्यर्थंगृहाणसुरसत्तमेति॥ ॥अथयज्ञोपवीतदानं॥बौधायनः॥यज्ञोपवीतदानेनजायतेब्रम्हवर्चसी॥तस्मात्तानिप्रदेयानिब्राम्हणे
भ्योविपश्चितेति॥इत्युपवीतदानं॥ ॥हेमाद्रौमाघेतिलदानात्तापनाशः॥याम्यलोकजयकामश्च॥फाल्गुनेप्रियंगुदानाल्लक्ष्मीवान्भवति॥चैत्रेचित्रवस्त्रदा-
नात्सौभाग्यवान्॥वैशाखेअपूपदानात्स्वर्गलोकावाप्तिः॥ज्येष्ठेछत्रदानात्सर्वान्कामानवाप्नोति॥आषाढेचंदनकर्पूरदानात्फलातिशयः॥श्रावणेवस्त्र-
दानान्महाफलं॥भाद्रेफाणितदानात्फलातिशयः॥आश्विनेघृतदानेनरूपवान्॥कार्तिकेदीपान्नदानात्चानर्घफलं॥मार्गशीर्षेलवणदानाद्रूपवान्॥
पौषेस्वर्णदानात्तुष्टिमान्॥सर्वमासशुक्लपक्षेषुपुष्पदानान्महालक्ष्मीमवाप्नुयात्॥कृष्णपक्षेषुफलदानात्फलातिशयः॥इतिमासपक्षदानानि॥ ॥

अथाधिमासेदानं॥ हेमाद्रौपाद्मे॥ अधिमासेतुसंप्राप्तेगुडसर्पिर्युतानिच॥ चंद्रवद्वर्तुलान्यंगब्रीहिपिष्टकृतानिच॥ साज्यानिदधिमिश्राणि अधिमासेनृपोत्तम॥ त्रयस्त्रिंशदपूपानिदातव्यानिदिनेदिने॥ व्यतीपातदिनेषष्ठ्यांद्वादश्यामथवानृप॥ पौर्णमास्याममायांवानवम्यांवानृपोत्तम॥ अष्टम्यामथपंचम्यां कुर्याद्व्रतमनुत्तमं॥ अधिमासेतुसंप्राप्तेत्रयस्त्रिंशत्तुदेवताः॥ उद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत्॥ देवतानामानितुभविष्ये॥ विष्णुं१ जिष्णुं२ महाविष्णुं३ हरिं४ कृष्णं५ मधोक्षजं६॥ केशवं७ माधवं८ रामं९ मच्युतं१० पुरुषोत्तमं११ गोविंदं१२ वामनं१३ श्रीशं१४ श्रीकंठं१५ विश्वसाक्षिणं१६ नारायणं१७ मधुरिपुं१८ मनिरुद्धं१९ त्रिविक्रमं२० वासुदेवं२१ जगद्योनिं२२ मनंतं२३ शेषशायिनं२४ संकर्षणंच२५ प्रद्युम्नं२६ दैत्यारिं२७ विश्वतोमुखं२८ जनार्दनं२९ धरावासं३० श्रीपतिं३१ प्रतिनामभिः॥ त्रयस्त्रिंशदपूपानिकांस्यपात्रेनिधायच॥ सघृतंसहिरण्यंचब्राम्हणायनिवेदयेत्॥ अद्येत्यादि॰ ममफलावाप्तिविष्ण्वादिश्रीपर्यंताः त्रयस्त्रिंशद्देवताउद्दिश्यश्रीपुरुषोत्तमभास्करप्रीतिकामःस्वगोत्रायशर्मणेसुपूजितायइदंवायनकंत्रयस्त्रिंशदपूपोपेतकांस्यपात्रंससुवर्णघृततांबूलदक्षिणादिसोपस्करंश्रीविष्णुरूपायब्राम्हणायतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ दानमंत्रस्तु॥ विष्णुरूपीसहस्रांशुःसर्वपापप्रणाशनः॥ अपूपान्नप्रदानेनममपापंव्यपोहतु॥ नारायणजगद्बीजभास्करप्रतिरूपक॥ दानेनानेनपुत्रांश्चसंपदंचाभिवर्धय॥ यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनं॥ शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु॥ कलाकाष्ठादिरूपेणनिमेषघटिकादिना॥ योवंचयतिभूतानितस्मैकालात्मनेनमः॥ कुरुक्षेत्रसमोदेशःसूर्यपर्वद्विजोहरिः॥ पृथ्वीसममिदंदानंगृहाणपुरुषोत्तम॥ मलानांचविशुद्ध्यर्थंपापप्रशमनायच॥ पुत्रपौत्राभिवृद्ध्यर्थंप्रदत्तंतवभास्कर॥ मंत्रैरेतेस्त्रयोदद्यात्त्रयस्त्रिंशदपूपकान्॥ प्राप्नोतिविपुलांलक्ष्मींपुत्रपौत्रादिसंपदमित्युक्तंमहाभारते॥ एतन्मलमासव्रतंतुदानरूपंसर्वेषांनित्यंमलमासेयदा-

प्राप्यसंध्योपासनतर्पणं॥श्राद्धादिनियमंजाप्यंनिष्फलंतद्व्रतंविनेतिभविष्येःकरणेप्रत्यवायोक्तेश्च॥इत्यधिमासेदानरूपव्रतं॥ ॥अथप्रातर्नित्यंघृतपात्रच्छायादानं॥भविष्ये॥कांस्यपात्रेस्थिताज्यंचआत्मरूपंनिरीक्ष्यतु॥ससुवर्णंतुयोदद्यात्सर्वविघ्नोपशांतये॥अद्येत्यादि०ममेतच्छरीरावच्छिन्नसमस्तपापक्षयसर्वग्रहपीडाशांतिशरीरारोग्यार्तिनाशममःप्रसादवांछायुरारोग्यादिसर्वसौभाग्यकामोसौख्यकामोवागोत्रअथशर्मणोइदंस्वदेहच्छायावीक्षिताज्यपूरितकांस्यपात्रंससुवर्णंविष्णुदैवतंतुभ्यमहंसंप्रददेनममेति॥मंत्रोतु॥यालक्ष्मीर्यच्चमेदौस्थ्यंसर्वांगसमुपस्थितं॥तत्सर्वंनाशयाज्यत्वंश्रियमायुश्चवर्धय॥आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंपरम्॥आज्यंसुराणामाहारःसर्वमाज्येप्रतिष्ठितम्॥आज्यपात्रप्रदानेनशांतिरस्तुसदाममेति॥इतिनित्यच्छायादानं॥ ॥अथसंक्रांतिदानं॥विश्वामित्रः॥मेषसंक्रमणेभानोर्मेषदानंमहाफलं॥वृषसंक्रमणेदानंगवांप्रोक्तंतथैवच॥वस्त्रान्नपानदानानिमिथुनेविहितानितु॥घृतधेनुप्रदानंतुकर्कटेचविशिष्यते॥पात्रंदद्यात्ससुवर्णंसिंहेचविहितंतथा॥कन्याप्रवेशेवस्त्राणांसुरभीणांतथैवच॥तुलाप्रवेशेधान्यानांबहुबीजफलान्यपि॥कीटप्रवेशेवस्त्राणांवेश्मनांदानमेवच॥कीटोवृश्चिकः॥धनुःप्रवेशेवस्त्राणांयानानांदानमुच्यते॥झषप्रवेशेदारूणांदानमग्नेस्तथैवच॥झषोमकरः॥कुंभप्रवेशेदानंतुगवामंबुतृणस्यच॥मीनप्रवेशेह्यम्लानांमालानामपिचोत्तमम्॥दानान्येतानिमयाद्विजेंद्राःप्रोक्तानिकालेतुनरश्चदत्वा॥प्राप्नोतिकामंमनसिस्वभीष्टंतस्मात्प्रशंसंतिहिकालदानमिति॥अत्रकालःसमयः॥इतिसंक्रांतिदानानि॥ ॥अथनानाधान्यदानमंत्राः॥ ॥हेमाद्रौदानकांडे॥देयंतद्योजयेत्पूर्वंततोविप्रंप्रपूजयेत्॥तत्तन्मंत्रैःप्रदद्याद्वैसर्वदानेष्वयंविधिरिति॥तत्रादौतंडुलदानमंत्रः॥पावनाःसर्वयज्ञेषुप्रशस्ताह्यपकर्मणि॥तंडुलानांप्रदानेनप्रीयतामग्निदेवताः॥तथा॥व्रीहिजास्तंडुलाःशुद्धाःपितृदेवद्विजप्रियाः॥तस्मादेषांप्रदानेनसर्वकामाश्चमेसदा॥व्रीहि-

दानमंत्रस्तु॥ब्रह्मणानिर्मिताःपूर्वंव्रीहयोयज्ञसाधनाः॥अनेनव्रीहिदानेनममसंतुमनोरथाइति॥यवदानमंत्रस्तु॥धान्यराजाश्चमांगल्येद्विजप्रीतिकरा
यवाः॥तस्मादेषांप्रदानेनममास्त्वभिमतंफलंतथा॥पूर्वमेवहियज्ञार्थंनिर्मिताब्रह्मणायवाः॥अनेनयवदानेनशांतिरस्तुसदाममेति॥गोधूमदानमंत्रस्तु॥
धान्यचूडामणिर्जंबुद्वीपेगोधूमसंभवाः॥गंधर्वसौख्यतृप्तिःस्यादतःशांतिंप्रयच्छतु॥मुद्गस्यमुद्गधान्यंप्रियंचैवमनुष्याणांद्विजांस्तथा॥तस्मादेषांप्रदानेनशांति-
रस्तुधनंममेति॥माषस्य॥यस्मान्मधुवधेकालेविष्णुदेहसमुद्भवाः॥पितृणांतृप्तिदामाषाअतः०॥चणकस्य॥पुरागोवर्धनोद्धारसमयेकृष्णभक्षि-
ताः॥चणकाःसर्वपापघ्नाअतःशांतिंप्रयच्छमे॥कुलित्थस्य॥अग्निगर्भोद्भवाःसौम्याबलारोग्ययशःप्रदाः॥कुलित्थानांप्रदानेनशांतिरस्तुसदाममेति॥ति
लदाने॥तिलाःपापहरानित्यंविष्णुदेहसमुद्भवाः॥तस्मादेषांप्रदानेनपापनाशनमुच्यतेइति॥स्वर्णतिलदानं॥तिलाःस्वर्णमयादेवदुरितक्षयकारकाः॥विष्णु
प्रीतिकरानित्यमतः०॥सामान्यतःसर्वधान्यमंत्रस्तु॥धान्यंकरोतिदातारमिहलोकेपरत्रच॥तस्मादस्यप्रदानेनममसंतुमनोरथाइति॥सस्वर्णतिलपात्रदा
नमंत्रस्तु॥तिलाःपुण्याःपवित्राश्चसर्वपापहराःशुभाः॥शुक्लाश्चैवतथाकृष्णाविष्णुगात्रसमुद्भवाः॥यानिकानिचपापानिब्रह्महत्यासमानिच॥तिलपा
त्रप्रदानेनतानिनश्यंतुमेसदेति॥निष्पावदानमंत्रस्तु॥निष्पावानिर्मिताःपूर्वंलोकानांहितकाम्यया॥तस्मादेषांप्रदानेनममपापंव्यपोहत्विति॥प्रियंगुदानम्॥
प्रियंगवःप्रियायस्मादग्नेश्चहव्यसाधनाः॥तस्मादेषांप्रदानेनप्रीणातुपुरुषोत्तमइति॥लंकदाने॥वातप्रवर्द्धकालंकाबलदाःपुष्टिकारकाः॥प्राणिप्रीतिकरानित्य
मतःशांतिंप्रयच्छमे॥यावनालदाने॥यावनालाःप्रीतिकराःकांतिपुष्टिबलप्रदाः॥तस्मादेषांप्रदानेनविष्णुःप्रीतिकरोममेति॥अथमसूरिकादानं॥सवल्क
लामसूरास्तुदुरितक्षयकारकाः॥तस्मादेषांप्रदानेनविष्णुःप्रीतिकरोममेति॥सामान्यधान्यमंत्रस्तत्रबोध्यः॥ ॥इतिहेमाद्रौनानाधान्यमंत्राः॥ ॥

अथान्नदानमंत्रा अपितत्रैव॥ आदौपायसदानमंत्रस्तु॥पायसंशर्करायुक्तंसघृतंकांस्यभाजनं॥प्रदानान्मफलंचास्तुऐहिकामुष्मिकंचयदिति॥कमंडलुदानमंत्रस्तु॥ सूर्यमंडलसंभूतागोत्थदुग्धयुताःप्रियाः॥जनार्दनादिदेवानांपतःपाहिसनातनेति॥ओदनमंत्रः॥अन्नंब्रम्हमयंसाक्षात्प्राणाजीवरक्षणं ओदनस्यप्रदानेनममसंतुमनोरथाइति॥दध्यन्नदानम्॥चंद्रमंडलमध्यस्थंचंद्रांबुदसमप्रभं॥दध्यन्नस्यप्रदानेनप्रीयतांवामनोममेति॥कृसरान्नदानं॥कृसरान्नंस्वादुवर्यंदेवानांप्रीतिवर्धनम्॥घृतव्यंजनसंयुक्तंदत्वारोगैर्विमुच्यतइति॥नानाभक्ष्यदानं॥केशवस्यप्रियाभक्ष्याःशंभुब्रम्हादितुष्टिदाः॥पृथग्विधापूपकाद्यापच्छंतुबलमोरसमिति॥सर्वान्नदानं॥अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः॥अन्नंब्रम्हाखिलत्राणमस्तुमेसर्वजन्मनीति॥इतिहेमाद्युक्तान्नदानमंत्राः॥अन्येपिकेचनमंत्रास्तत्रत्याएव॥सक्तुदानं॥प्राजापत्यायतःप्रोक्ताःसक्तवोयज्ञकर्मणि॥तस्मादेषांप्रदानेनप्रीयतांमेप्रजापतिरिति॥शर्करादानं॥अमृतस्यकुलोत्पन्नाइक्षवोप्यनुशर्करा॥सूर्यप्रीतिकरानित्यमतःशांतिंप्रयच्छमे॥तथा॥शर्करेक्षुरसोद्भूतासदास्वादुकराप्रिया॥दानेनास्यास्तुमेनित्यंतुष्टास्युर्द्विजदेवताइति॥गुडदानं॥प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा॥तथारसानांप्रवरःसदैवेक्षुरसोमतः॥ममतस्मात्परांशांतिंददस्वगुडसर्वदेति॥ इक्षुदंडदानं॥इक्षुदंडगुरुतरंरसालंसर्वकामदं॥तुभ्यंदानेनतेनास्तुप्रीयतांपरमेश्वरइति॥मधुदानं॥यस्मात्पितॄणांश्राद्धेषुपीतंमध्वमृतोद्भवं॥सदातस्यप्रदानेनमोक्षःस्याद्दुःखसागरात्॥घृतदानमंत्रः॥कामधेनोःसमुद्भूतंदेवानामुत्तमंहविः॥आयुर्विवर्धनंदातूराज्यंपातुसदैवमामिति॥तैलदानमंत्रः॥तैलंपुष्टिकरंनित्यमायुर्वृध्यघनाशनं॥अपांगत्यहरंश्रीप्रदतःशांतिंप्रयच्छमेइति॥नवनीतदानमंत्रः॥कामधेनोःसमुद्भूतंविष्णोःप्रीतिकरंपरं॥नवनीतप्रदानेनबलंपुष्टिंचमेच्युतेति॥तथा॥क्षीरार्णवसमुद्भूतंविष्णोस्तुष्टिकरंसदा॥नवनीतप्रदानेनवांछितंचास्तुमेसदेति॥

क्षीरदानमंत्रः॥अलक्ष्मीहरणंनित्यंसौभाग्यबलवर्धनं॥क्षीरंमंगलमायुष्यमतःशांतिंप्रयच्छमे॥तथा॥शिशूनांजीवनंक्षीरंपितृदेवप्रियंसदा॥कांति
दंपुष्टिदंनित्यमतःशांतिंप्रयच्छमेइति॥ दधिदानं॥क्षीरमाम्लसमुद्भूतंदेवर्षिपितृतृप्तिदं॥दधिस्यान्मेघृतंनित्यमतःशांतिंप्रयच्छमेइति॥तक्रदान
मंत्रः॥तक्रंदधिसमुद्भूतंप्राणिनांतृप्तिदंपरम्॥अतस्त्वस्यप्रदानेनशांतिरस्तुसदाममेति॥पुष्पदानं॥मनोहराणिपुष्पाणिसदादेवप्रियाणिच॥अनस्ते
षांप्रदानेनममसंतुष्टाःप्रियाइति॥ फलदानमंत्रः॥मनोहराणिरम्याणिनित्यंस्वादुकराणिच॥फलानांसंप्रदानेनसंततिस्त्वस्तुममेति॥तथा॥फला
निमधुराणीहसुनिदेवप्रियाणिच॥तस्मात्तेषांप्रदानेनसफलाःसंतुमनोरथाइति॥ तांबूलदानमंत्रः॥सोपस्करंचतांबूलंसर्वदामंगलप्रियम्॥प्रियंचैवचलु
देवानांसौगंध्यंवदनेस्तुमेइति॥ पादुकादानमंत्रः॥कंटकोच्छिष्टपाषाणवृश्चिकादिनिवारणे॥पादुकेसंप्रदत्तेमेद्विजप्रीत्याप्रगृह्यतामिति॥उपान
हदानं॥उपानहौप्रदत्तेमेकंटकादिनिवारणे॥सर्वमार्गेषुसुखदेअतःशांतिंप्रयच्छमे॥ छत्रदानमंत्रः॥इहामुत्रातपत्राणांकुरुमेकेशवप्रभो॥छत्रंत्व
त्प्रीतयेदत्तंममास्तुचसदाशुभमिति॥ चामरदानं॥शशांककरसंकाशंहिमडिंडिरपांडुर॥प्रोत्सारयाशुदुरितंचामरामरवल्लभेति॥ पत्रिकादानमंत्रः
॥पत्रिकासर्वजंतूनांशैत्यानंदकरीशुभा॥देवद्रप्रीतयेदत्ताअतःशांतिंप्रयच्छमेइति॥ व्यजनदानमंत्रः॥व्यजनंवासुदेवस्यग्रीष्मकालेसुखप्रदम्॥
अस्यप्रदानात्सकलाममसंतुमनोरथाः॥ दर्पणदानमंत्रः॥दर्शनेनत्वमादर्शनृणांमंगलदायकः॥सर्वसौभाग्यसत्कीर्तिनिर्मलंज्ञानमस्तुमे॥ अथ
कूष्मांडादिदानंभविष्ये॥ब्रम्हहत्यादिपापघ्नंकूष्मांडंसुखसौख्यदम्॥कार्तिकेरथसप्तम्यांदद्यात्पुण्यदिनेष्वपीति॥अद्येत्यादिममब्रम्हहननादिसमस्त
पापक्षयपूर्वकबहुपुत्रपौत्रश्रीसौभाग्यादिसकलमनोरथावाप्तिकूष्मांडबीजसमसहस्रसंख्याकाब्दब्रम्हलोकनिवासकामोगोत्रायशर्मणेसुपूजितायइ

दंकूष्मांडफलंबहुबीजाढ्यंघृतप्लुतंतिललिप्तंमुक्ताप्रवालरत्नैर्हेमफलतांबूलवस्त्रादियुतंगोधूमराशिस्थितंवनस्पतिदैवतंसुवर्णदक्षिणायुतंतुभ्यमहंसंप्रददेनम
मेतिद्विजहस्तेफलंदद्यात्॥दानमंत्रस्तुतत्रैव॥ब्रम्हहत्यादिपापघ्नंब्रम्हणानिर्मितंपुरा॥कूष्मांडंबहुबीजाढ्यंपुत्रपौत्रादिवृद्धिदं॥मुक्ताप्रवालहेमादि
युक्तंदत्तंतवद्विज॥अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥ इतिकूष्मांडदानं॥ ॥अथदेशविशेषेणमकरसंक्रांतौसौभाग्यवतीनांदानविशेषउक्तोहे
माद्रौव्यासेन॥सौभाग्यद्रव्यदानंचस्त्रीभिःकार्यंप्रयत्नतः॥सभर्तृकाभिःसंक्रांतौफलादीनांमृगेरवौ॥दानंषोडशसंख्याकमेकैकस्यफलस्यच॥हैम
राजतकांस्यानांभाजनानियथाभवेत्॥ ॥वर्धिलफलदानमंत्रः॥सतिलंगुडसंयुक्तंरसप्रीतिकरंनृणां॥वर्धितंसंगृहाणेदमतःशांतिंप्रयच्छमेति॥स
तिलगुडपिष्टग्रासदानमंत्रः॥मकरेर्केतुसंप्राप्तेग्रासास्तिलगुडोद्विजे॥दानेनपुत्रसौभाग्यंधनधान्यंसदास्तुमे॥ भांडदानमंत्रः॥हिरण्यादीनिभां
डानिपात्राणिमृन्मयानिच॥गृहाणेमानिवैयस्माद्भास्करःप्रीयतांमम॥गोधूमपिष्टदानमंत्रः॥गोधूमजनितंपिष्टंशर्कराघृतसंयुतं॥द्विजवर्यगृहाण
त्वमतःशांतिंप्रयच्छमे॥ शूर्पस्थार्द्रतंदुलदानमंत्रः॥तंडुलाःशालिजाःशुक्लाःसार्द्राःशूर्पेव्यवस्थिताः॥संप्रदानेनचैतेषांशांतिरस्तुसदामम॥पायस
पूरितकांस्यपात्रदानमंत्रः॥सौभाग्यभाजनंकांस्यपायसान्नेनपूरितम्॥दानेनानेनसौभाग्यंशांतिरस्तुसदाममेति॥फलपुष्पसहितकदलीस्तंभदा
नमंत्रः॥कदलीसर्वदोषघ्नाहेमवर्णांबरावृता॥दानेनास्याःपुत्रपौत्रसौभाग्यंचास्तुमेसदेति॥ ॥सौभाग्यद्रव्ययुतशूर्पदानमंत्रः॥सकंचुकंवस्त्रयुग्मे
स्तथाकर्णावतंसकैः कंठसूत्रादि शूर्पस्यदानात्प्रीतातुशिवामम॥ जानकीप्रीतयेशूर्पपंचकदानमंत्रः॥ रामपत्नीमहाभागेसौभाग्यद्रव्यसंस्थिते॥गृहाणे
मानिशूर्पाणिसोपस्काराणिजानकि॥सौभाग्यभाग्यमारोग्यसुतसौख्यंसदास्तुमेइति॥ ॥अथषोडशविप्रेभ्यःसांगषोडशषोडशफलदानानि॥

भविष्यपुराणे॥ दानंषोडशसंख्याकमेकैकस्य फलस्यच॥ एवंषोडशविप्रेभ्योदत्वेप्सितमवाप्नुयात्इति॥ अद्येत्यादि॰ममसमस्तपापक्षयपूर्वकसकलसौभाग्यस्त्रीपुत्रपौत्रादीप्सिताऽनंतफलावाप्तयेदीयमानफलसमसंख्यवर्षसहस्रावच्छिन्नदेवांगनाभिःसहभोगोत्तरानेकसुखावाप्तिकामश्वनानानामृगोत्रेभ्यःषोडशसंख्याकेभ्यःसुपूजितेभ्यःइमानिषोडशषोडशसंख्याकान्यमुकफलान्येकैकस्मैसगोधूमतांबूलफलदक्षिणायुतानिवनस्पतिदेवतानिदातुमहमुत्सृज्येनममेतिदत्वाप्रणमेदिति॥ दानमंत्रः॥ फलैःषोडशसंयुक्तंस्वर्णधान्यादिसंयुतं॥ द्विजवर्यगृहाणत्वंममसंतुमनोरथाइति॥ इतिषोडशिकाफलदानं॥ ॥अथव्यतीपातेसुवर्णदानमाह॥ हेमाद्रौ॥ शंकुकर्णप्रलंबोष्ठलंबभ्रूदीर्घनासिक॥ अष्टनेत्रचतुर्वक्त्राधिस्तीर्णशतयोजन॥ व्यतीपातनमस्तेस्तुसोमसूर्यसुतप्रभो॥ यत्किंचिद्दीयतेस्वर्णंमेरुतुल्यंतुतद्भवेदिति॥ अद्येत्यादि॰ममसमस्तपापक्षयपूर्वकहेममयहिमाचलदानसमफलावाप्त्यक्षय्यसुखश्रीसूर्यजनार्दनप्रीतिकामश्वगोत्रायशर्मणेसुपूजितायइदंसुवर्णंअग्निदैवतंसदक्षिणंतुभ्यमहंसंप्रददेनममेति॥ दानमंत्रः॥ गुंजामात्रमिदंस्वल्पंहेमविप्रकरेर्पितं॥ हिमाचलमितंभूत्वाप्रीयतांमेजनार्दनइति॥ हिरण्यगर्भगर्भस्थमितिवा॥ इतिव्यतीपातेसुवर्णदानमंत्रः॥ ॥अथाश्वत्थसेवनंभविष्यपुराणे॥ उदकुंभप्रदानेतुअशक्तोयःपुमान्भवेत्॥ तेनाश्वत्थतरोर्मूलंसेव्यंनित्यंजितात्मना॥ सर्वपापप्रशमनंसर्वदुःखविनाशनं॥ सर्वरोगापहंनित्यंध्रुवंसंततिवर्धनं॥ सेचनमंत्रः॥ सिंचामितेश्वत्थमूलंममसंततिवृद्धये॥ अश्वत्थरूपीभगवान्प्रीयतांमेजनार्दनः॥ अनेनमंत्रवर्येणासिंचेदश्वत्थमूलकं॥ नमस्कुर्यात्ततःसम्यक्प्रार्थयेच्चपुनःपुनरिति॥ सेचनफलमपितत्रैव॥ यःकरोतितरोर्मूलेसेकंमासचतुष्टयं॥ मनोरथास्तुसिध्यंतिश्रुतिरेषासनातनी॥ मासचतुष्टयंचैत्रादौ॥ वैशाखधर्मेपि॥ अश्वत्थमूलमासिंचेत्तोयेनबहुनासदा॥ कुलानामयुतंतेनतारितंस्यान्नसंशय-

इति॥इत्यश्वत्थसेचनं॥ ॥अथाथर्वणीयेअश्वत्थाभिमंत्रणं॥आरात्तेइत्यस्याग्निकांडांतोमोनिस्त्वमग्निऋषिः॥वनस्पतिर्देवता॥अनुष्टुप्छंदः॥अश्वत्थाभिमंत्रणेविनियोगः॥ॐआरात्तेअग्निरस्त्वारात्परस्मुरस्तते॥निर्वातेत्वाभिवर्षंतुस्वस्तितेस्तुवनस्पतेइति॥तेकारस्थानेमेकारःस्वयंवक्तव्यः॥पौराणमंत्रस्तु॥अक्षिस्पंदंभुजस्पंदंदुःस्वप्नंदुर्विचिंतितं॥शत्रुतश्चसमुत्पन्नमश्वत्थशमयस्वमे॥पुराणांतरेमंत्रांतरमुक्तं॥मूलतोब्रम्हरूपायमध्यतोविष्णुरूपिणे॥अग्रतःशिवरूपायअश्वत्थायनमोनमःइति॥अश्वत्थस्पर्शस्तुमंदवासरएवकुर्यात्॥अन्यवासरेष्वर्चनंसेचनंसेवनंचदूरतएवकुर्यादित्युक्तं॥पाद्मे॥इत्यश्वत्थसेचनविधिः॥अथसूर्यादीनांवैषम्येदानान्युक्तानिज्योतिःसागरे॥कौसुंभवस्त्रंगुडहेमताम्रंमाणिक्यगोधूमसुवर्णपद्मं॥सवत्सगोदानमितिप्रणीतंदुष्टायसूर्यायमसूरिकाश्चेतिसूर्ये॥१॥घृतकलशंसितवस्त्रंदधिशंखमौक्तिकंसुवर्णंच॥रजतंचप्रदद्याच्चंद्रारिष्टे चशांतयेच॥इतिचंद्रे॥२॥प्रवालगोधूममसूरिकाश्ववृषःसताम्रःकरवीरपुष्पं॥आरक्तवस्त्रंगुडहेमताम्रंदुष्टायभौमायप्रचरक्तचंदनम्॥इतिभौमे॥३॥नीलंवस्त्रंसुद्गहेमबुधायसरलंपाचीदोसिकाहेमसर्पिः॥कांस्यंदंतंकुंजरस्याथमणोरोप्यसस्यपुष्पजात्यादिकंच॥इतिबुधे॥४॥अश्वःसुवर्णंमधुपीतवस्त्रंसपीतधान्यंलवणंसुपुष्पं॥सशर्करंतद्रजनीप्रयुक्तंदुष्टायशांत्यैगुरवेप्रणीतम्॥इतिगुरवे॥५॥चित्रवस्त्रमपिदानवार्चितेदुष्टगेसुनिवरैःप्रणीतम्॥तंडुलंघृतसुवर्णरूप्यकंवज्रकंपरिमलोधवलागौः॥इतिशुक्रे॥६॥नीलकंमाहिषंवस्त्रंकृष्णलोहंसदक्षिणं॥विश्वामित्र्यासुतंदद्यात्सौरिदुष्टप्रशांतये॥इतिशनौ॥७॥राहोर्दानंकृष्णामेषोगोमेदोलोहकंबलौ॥सुवर्णनागरूपंचसतिलंताम्रभाजनं॥इतिराहवे॥८॥केतोर्वैडूर्यमप्यलंतैलंमृगमदस्तथा॥ऊर्णातिलैस्तुसंयुक्तंदद्यात्क्लेशापनुत्तये॥इतिकेतौ॥९॥इतिनवग्रहाणांदानद्रव्याण्युक्तानि॥ ॥अथग्रहाणांदानानि॥ब्राम्हे॥ग्रहदानक्रमंवक्ष्येसर्वसिद्धिकरंपरम्॥सर्वं

शांतिकरंनृणांसर्वपापप्रणाशनमिति।।दानकालमपितत्रैव।।अयनेविषुवेचंद्रसूर्योपरागेजन्मर्क्षेभानुवासरे।।पंचदश्यांप्रातिकूल्येपुण्यकालेपुण्यदेशेविवाहादौचदानंकार्यम्।।तत्रायंप्रकारः।।हस्तमात्रांद्विहस्तांवावेदिंकृत्वागोमयेनोपलिप्य।।तत्रसर्वतोभद्रंपंचरंगैर्विलिख्य।।वस्त्रंतत्रप्रसार्यतंडुलैस्तत्रनवकोष्ठात्मकंपद्मंकृत्वाकोष्ठेषुतंडुलैःपद्मानिकृत्वातेषुनिष्कत्रयेणयथाशक्त्यावासुवर्णप्रतिमाआदित्यादिग्रहाणांकृत्वाःदौआदित्यंमध्यमेकोष्ठे-आग्नेयेचंद्रंदक्षिणेभौममैशान्यांबुधमुत्तरेगुरुंपूर्वेशुक्रंपश्चिमेशनैश्चरंनैर्ऋत्येराहुंवायव्येकेतुंतत्तन्मंत्रैस्तत्तत्पुष्पैस्तत्तद्गंधधूपदीपनैवेद्यादिभिःसंपूज्यप्रार्थयेत्।।प्रार्थनामंत्राः।।पद्मासनःपद्मकरोद्विबाहुःपद्मद्युतिःसप्ततुरंगवाहः।।दिवाकरोल्लोकगुरुःकिरीटीमयिप्रसादंविदधातुदेवः।।१।।श्वेतांबरःश्वेतविभूषणश्चश्वेतद्युतिर्दंडकरोद्विबाहुः।।चंद्रोमृतात्मावरदःकिरीटीश्रेयांसिमह्यंविदधातुदेवः।।२।।रक्तांबरोरक्तवपुःकिरीटीचतुर्भुजोमेषगतोगदाभृत्।।धरासुतःशक्तिधरश्चशूलीसदाममस्याद्वरदःप्रशांतः।।३पीतांबरःपीतवपुःकिरीटीचतुर्भुजोदंडधरश्चहारी।।चर्मासिधृक्सोमसुतःसदामेसिंहाधिरूढोवरदोबुधश्च।।४पीतांबरःपीतवपुःकिरीटीचतुर्भुजोदेवगुरुःप्रशांतः।।दधातिदंडंचकमंडलुंचतथाक्षसूत्रंवरदोस्तुमह्यं५श्वेतांबरःश्वेतवपुःकिरीटीचतुर्भुजोदैत्यगुरुःप्रशांतः।।तथाक्षसूत्रंचकमंडलुंचदंडंचबिभ्रद्वरदोस्तुमह्यं।।६नीलद्युतिःशूलधरःकिरीटीगृध्रस्थितस्त्रासकरोधनुष्मान्।।चतुर्भुजःसूर्यसुतःप्रशांतःसदास्तुमह्यंवरमंदगामी।।७।।नीलांबरोनीलवपुःकिरीटीकरालवक्त्रःकरवालशूली।।चतुर्भुजश्चर्मधरश्चराहुःसिंहासनस्थोवरदोस्तुमह्यं।।८।।धूम्रोद्विबाहुर्वरदोगदाभृत्गृध्रासनस्थोविकृताननश्च।।किरीटकेयूरविभूषितांबरःसदास्तुमेकेतुगणःप्रशांतः।।इतिसंप्रार्थ्यदद्यात्।।९।।इतिप्रार्थनामंत्राः।।दानमंत्राश्च।। ।।अथवासरदोषापनोदनानि।।संहिताप्रदीपे।।भानुस्तांबूलदानादपहरतिनृणांवैकृतंवासरोत्थंसोमःश्रीखंडदानादवनिवरसुतोरक्तपुष्पप्रदानात्।।सौम्यःशक्रस्यमंत्रीहरिहरनमनाद्भार्गवः

शुभ्रवस्त्रात्तैलस्नानात्प्रभातेदिनकृत्तनयोब्रम्हनत्यापरेन्वेति॥१॥ इतिचारदोषापनोदनानि॥ ॥अथसहस्रभोजनविधिः॥ भविष्यपुराणे॥ सहस्रभोजनस्येहविधिंनारायणोमुनिः॥ सर्वेषांचैवपुण्यानामब्रवीत्पुण्यमुत्तमं॥ यदाचित्तंचवित्तंचभक्तिरात्मनिजायते॥ तदानीमेवकर्तव्यंप्रीतयेपरमात्मनः॥ आषाढंचैवपौषंचमलमासंतथैवच॥ गुरुभार्गवयोरस्तंहित्वान्यस्मिन्शुभेदिने॥ कृत्वादौमंगलस्नानंशुद्धःसन्भार्ययासह॥ कृत्वादौद्रव्यशुध्यर्थंप्रायश्चित्तंयथाधि॥ दशांशद्रव्यमादायविप्रेभ्योविनिवेदयेत्॥ द्रव्यंसंप्रोक्षयेत्पश्चात्संपादितंतदाज्ञया॥ गणेशंपूजयेत्पूर्वंमातृणांपूजनंततः॥ कृत्वाभ्युदयिकंश्राद्धंस्वस्तिवाचनपूर्वकं॥ आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः॥ ऋत्विजोवरयेदष्टौवस्त्रगंधैश्चपूजयेत्॥ पुष्पमंडपिकांकृत्वाचतुरस्रांसुशोभनां॥ कृत्वेशस्यसुवर्णेनप्रतिमांकर्षनिर्मितां॥ सशक्तिकस्यदेवस्यभवानीशंकरस्यच॥ तस्याधिदेवताविष्णुर्ब्रम्हाप्रत्यधिदेवता॥ कृत्वातुप्रतिमाशुद्धिमग्न्युत्तारणपूर्वकम्षोडशैरुपचारैश्चतत्तन्मंत्रैःप्रपूजयेत्॥ ऋग्भिश्चपावमानीभिरभिषिच्ययथाविधि॥ पुष्पमंडपिकामध्येस्थापनंतंडुलोपरि॥ प्रतिमांतत्रसंस्थाप्यकलशेचांबरावृते॥ समंताद्देवदेवस्यक्रमेणैवतुपूर्वतः॥ तत्तन्मंत्रेणनाम्नावापूजयेदंगदेवताः॥ कर्णिकायांभवानीशोह्यधिप्रत्यधिसंयुतः॥ तद्बहिश्चैवचत्वारस्तद्बहिःषोडशक्रमात्॥ एकत्रिंशद्बहिश्चाष्टचत्वारिंशत्तथाक्रमात्॥ पद्मस्यदलवच्छस्ताःकर्णिकाशलसंग्रहाः॥ दिग्देवा१० ऋषयःसप्त७सागरा४भुवनत्रयं॥ नद्यःसप्त७गुणा३श्चैववेदा४श्चात्मेत्यनुक्रमात्॥ अत्रपीठयंत्रस्थापनदेवताक्रमप्रयोगंचाह॥ आदौपद्मकर्णिकायांमध्येअधिदेवताविष्णुब्रम्हप्रत्यधिदेवतासहितभवानीशंकरस्थापयेत्॥ तद्बहिश्चतुर्दलपद्मेप्रादक्षिण्येनगणेशः१ दुर्गा२क्षेत्रपाला३। भयंकराः४स्थाप्याः॥ तद्बहिस्तृतीयेषोडशदलेषोडशमातरः॥ गौरी१पद्मा२शची३मेधा४सावित्री५विजया६जया७देवसेनास्वधा९स्वाहा१०मातरो११लोकमातरः॥१२॥ धृतिः१३पुष्टि१४स्तथा

तुष्टि१५रात्मनः कुलदेवताः१६॥तद्बहिरेकत्रिंशद्दलेवसुरुद्रादित्याः॥अष्टौवसवस्तु॥ध्रुवो१ः ध्वरश्च२सोमश्च३आपश्चै४वाऽनिलो५नलः६॥प्रत्यूषश्च७प्रभासश्च८वसवोष्टौप्रकीर्तिताइति॥एकादशरुद्रास्तु॥वीरभद्रश्च१शंभुश्च२योगीशो३जैकपात्तथा४॥अहिर्बुध्न्यः पिनाकीच६भुवनाधीश्वरस्तथा७कपाली८विट्पतिः९स्थाणु१०र्भर्गाख्यो११रुद्रसंज्ञकाइति॥द्वादशादित्यास्तु॥धाता१र्यमाच२मित्रश्च३वरुणो४ंशो५भगस्तथा६॥इंद्रो७विवस्वान्८पूषाच९पर्जन्यो१०दशमस्तथा॥त्वष्टा११विष्णु१२रितिप्रोक्ता आदित्याद्वादशक्रमात्॥पंचमेष्टाचत्वारिंशद्दलआदौक्रमेणनवग्रहाः॥सूर्यः१सोमो२महीसुतः३सोमपुत्रो४बृहस्पतिः५॥शुक्रः६शनैश्चरो७राहुः८केतवश्च९नवग्रहाइति॥दशलोकपालास्तु॥इंद्रो१ग्नि२र्यमो३निर्ऋति४र्वरुणो५वायु६रेवच॥कुबेरो७ब्रम्ह८ईशान९अनंतो१०दशदिक्पतिरिति॥सप्तर्षयस्तु॥कश्यपो१त्रि२र्भरद्वाजो३विश्वामित्रो४थगोतमः५जमदग्नि६र्वसिष्ठश्च७सप्तेतेऋषयःक्रमात्॥समुद्रास्तु॥पूर्व१दक्षिण२पश्चिमो३त्तरा४श्चत्वारःसमुद्राइति॥भुवनत्रयं॥भूर्लोक१भुवर्लोक२स्वर्लोका३इति॥सप्तसरितश्च॥गंगाच१यमुना२चैवगोदावरी३सरस्वती४तापी५पयोष्णी६रेवाच७सप्तनद्योयथाक्रममिति॥त्रिगुणास्तु॥सत्वं१रज२स्तमो३गुणाइति॥चत्वारोवेदास्तु॥ऋग्वेदो१थयजुर्वेदः२सामवेदो३ह्यथर्वणः४॥इति॥आत्माच॥इत्येतास्तत्रावाह्यपूजयेदिति॥इतिपीठयंत्रेदेवतास्थापनक्रमः॥गंधपुष्पादिभिश्चैवसमभ्यर्च्ययथाविधि॥यथाशक्तिकृतंसर्वमर्चनं विनिवेदयेत्॥देवदेवजगन्नाथविश्वसाक्षिन्नमोस्तुते॥गृहाणेमांकृतांपूजांप्रसीदभगवन्गुरो॥ग्रहयज्ञविधानेनग्रहपूजांसमाप्यच॥ऋत्विग्भिःसहैवहोमंततःकुर्याद्यथाविधि॥कुंडेवास्थंडिलेवापिस्वगृह्यविधिनाद्विजः॥कृत्वाज्यभागपर्यंतमुपलेपादिकंततः॥ततः॥समिदाज्येनचरुणायवैस्तिलसमन्वितैः॥सहस्रंचाहुतीस्तत्रव्याहृतीभिस्ततःक्रमात्॥जुहुयाद्दलिगेकैकश्चतुर्थ्यंशोत्तरंशतं॥प्रणवे

नाहुतिर्नैवैकांमंत्रेणैवपृथक्पृथक् ।।देवतानांचसर्वेषांनामभिर्जुहुयाद्धृतं।।देवतानांअंगदेवतानां।।ततःस्विष्टकृतंहुत्वाहोमशेषंसमापयेत्।।आचार्यादीन्समभ्यर्च्य गंधपुष्पाक्षतादिभिः।।दद्याद्विभवसारेणदक्षिणांचयथोचितां।।लेह्यपेयंतथाचोष्यंखाद्यंचैवचषड्रसान्।।देवायाद्यौनिवेद्यंतुद्विजवर्यान्समर्चयेत्।।भक्ष्यभोज्यादिकंदद्यात्तृप्तिर्यस्ययथाभवेत्।।दक्षिणांचयथाशक्त्यासर्वेषांचसमांशतः।।ततश्चभोजयेद्विप्रान्सहस्रंसम्यगेवहि।।एकस्मिन्नेवकालेवाभवेद्वापि दिनेदिने।।भवेद्यावत्सहस्रंतुतावद्दवहिभोजयेत्।।तेभ्योपिदक्षिणांदद्याद्भुंजानेभ्यःस्वशक्तितः।।दीनांधकृपणादींश्चभोजयित्वास्वयंततः।।समाहितमनाःकर्ताभुंजीयात्सहबंधुभिः।।एवंयःकुरुतेसम्यक्सहस्रद्विजभोजनं।।समाप्तेतुपुनर्होमःकर्तव्योमुनिरब्रवीत्।।ब्रम्हहाचसुरापीचपरद्रव्यापहारकः।।मातृगामीचगोघ्नश्चपरदाररतःसदा।।ज्ञानतोज्ञानतोवापिपापकारीयथेच्छया।।सदाचारविहीनस्तुदमदानविवर्जितः।।ईदृशोपिद्विजोयःस्यात्सहस्रद्विजभोजनम्।।कुरुतेसद्यएवहिसपुनातिनसंशयः।।ब्रम्हानंदपदंगच्छेत्तेनपुण्येनचैवहि।।सहस्रभोजनाच्चैवनानाविधमनोरथान्।।भुंक्तेसकामान्सकलान्भोगानपिचपुष्कलानिति।।तत्रसंकल्पमाह।।ममपंचमहापातकनिवृत्तिगोवधपरदारपरद्रव्यापहारकायिकवाचिकमानसिकैतच्छरीरावच्छिन्नसमस्तपापक्षयपूर्वकनानाविधमनोरथसिद्ध्यंतेषष्टिसहस्रवर्षविष्णुलोकनिवासांतेब्रम्हानंदावाप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसहस्रंब्राम्हणान्यथाशक्त्यायथोपपन्नेनान्नेनयथाकालंयथादेशंसदक्षिणंभोजयिष्ये इतिसंकल्प्य।।तदादौगणेशपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंआचार्यऋत्विग्वरणहोमादिचकरिष्यइतिसंकल्प्यगणेशपूजनादियथोक्तक्रमेणकुर्यादिति।। ।।अथसर्वस्वदानसंकल्पवाक्यंमात्स्ये।।अद्येत्यादि०ममैतच्छरीरावच्छिन्नसमस्तपापक्षयपूर्वकसकलमनोरथसिद्धियज्ञयाजित्वसर्वद्रव्यदानजन्यसर्वतीर्थस्नानजन्यसर्वदेवपूजाजन्यसमफलयमलोकादर्शनदारिद्र्यानुत्पत्तिसर्व

कालस्त्रीपुत्रपौत्रधनधान्यसौख्याद्याक्षीवमाधियोगैहिकामुष्मिकाणैश्वर्यत्वबहुगंधर्वोपजेगीयमानदिव्याप्सरोगणसेवितो दिव्यांगनासमाकीर्णहंससारसविहगादिपरिवृतहेमकिंकिणीजालमालिकामंडिततरुणादित्यसंकाशविमानारोहणशक्रादिसुरगणब्रम्हविष्णुरुद्रलोकेंद्रलोकादिस्वेच्छया विचरणयावदाभूतसंप्लवाक्षय्यस्वर्गलोकावास्यंतेविष्णुसायुज्यत्वकामइदंसकलयमाश्रमीयसकलवस्तुसर्वस्वंसर्वविष्णुदेवतंतत्रैवकल्पितसुवर्णं वहुदक्षिणं॥ ॐसर्वस्वायनमइतिनाममंत्रेणसंपूजितायतुभ्यमहंसंप्रददेनममेत्येकस्मैदद्यात्॥ यद्वा॥ नानानामगोत्रेभ्योब्राम्हणेभ्यःसंपूजितेभ्यःसदक्षिणंदातुमहमुत्सृज्येनममेतितेनश्रीपरमेश्वरःप्रीयतां॥ तत्सद्ब्रम्हार्पणमस्तु॥ प्रार्थनामंत्रास्तु॥ हरिश्चंद्रोयथाराजासर्वंदत्वादिवंगतः॥ तथाहमाश्रमंदत्वायास्यामिश्रीदयालय॥ दिविभुव्यंतरिक्षेचहस्त्यश्वरथसंकुला॥ हरिश्चंद्रस्यनृपतेःशोभतेनगरीयथा॥ तथाममाश्रमंसर्वंदिविसर्वत्रगच्छतु॥ सर्वस्वंमुनयेदत्वायांगतिंनृपतिर्गतः॥ सर्वस्वदानेनानेनतांगतिंमाप्नुयामहं॥ सर्वस्वतवदानेनहरिश्चंद्रोयथाभवत्॥ दुःखहीनःसुखमयस्तथामांकुरुसर्वदा॥ सर्वस्वदानात्सकलाममसंतुमनोरथाः॥ इतिसर्वस्वदानप्रयोगः॥ ॥अथयुगप्राधान्येनव्यासोक्ताधर्माउच्यंते॥ तपःपरंकृतयुगेत्रेतायांज्ञानमुत्तमं॥ द्वापरेयज्ञमित्याहुर्दानमेवकलौस्मृतमितिस्कांदे॥ श्रांतस्ययानंतृषितस्यपानमन्नंक्षुधार्तस्यनरोनरेंद्रः॥ दत्वाद्विमानेनसुरांगनाभिःसंस्तूयमानस्त्रिदिवंप्रयाति॥ यतीनांसाह्वयमः॥ यतीनांपरमोधर्मस्त्वनाहारोवनौकसां॥ दानमेवगृहस्थानांशुश्रूषाब्रम्हचारिणामिति॥ दानमावश्यकंकेषामित्याहव्यासः॥ मातापित्रोश्चयद्दत्तंभ्रातृस्वसृसुतासुच॥ सोदर्येपिचयद्दत्तंसोतिथिःस्वर्गसंक्रमः॥ पितुःशतगुणंदानंसहस्रंमातुरुच्यते॥ अनंतंदुहितुर्दानंसोदर्येदत्तमक्षयम्॥ भविष्योत्तरेपि॥ नकेवलंब्राम्हणानांदानंसर्वत्रशस्यते॥ भगिनीभागिनेयानांमातुलानांपितृष्वसुः॥ दरिद्राणांचबंधूनांदानंकोटिगु

णंभवेत्॥मातुर्गोत्रेशतगुणंस्वगोत्रेदत्तमक्षयं॥दातुर्लक्षणमपितत्रैव॥अपाप्मारोगीधर्मात्मादित्सुरव्यसनःशुचिः॥अनिंद्याजीवकर्माचषड्भिर्दाताप्रशस्यते॥प्रतिगृहीतृलक्षणमपितत्रैव॥त्रिःशुक्लःक्षीणवृत्तिश्चघृणालुःसकलेंद्रियः॥विमुक्तोयोनिदोषेभ्योब्राम्हणःपात्रमुच्यते॥॥तथा॥सोमुख्यमभिसंप्रीतिरर्थिनांदर्शनेसदा॥सत्कृतिश्चानुसूयाचतदाभक्तेतिकीर्त्यते॥देवलः॥यद्ददातियदश्नातितदेवधनिनांधनम्॥अन्यमृतस्यक्रीडंतिदारैरपिधनैरपि॥ ॥व्यासः॥आयासशतलब्धस्यप्राणेभ्योपिगरीयसः॥गतिरेकैववित्तस्यदानमन्याविपत्तयः॥ग्रासादर्धमपिग्रासमर्थिभ्यःकिन्नदीयते॥इच्छानुरूपोविभवःकदाकस्यभविष्यति॥मात्स्ये॥न्यायेनार्जनमर्थस्यवर्धनंचाभिरक्षणं॥सत्पात्रेप्रतिपत्तिश्चसर्वशास्त्रेषुगीयते॥पुनस्तत्रैव॥अदातायत्रयत्रैतितत्रतत्रसदुःखितः॥दानात्सर्वमवाप्नोतिपरत्रापिचनिर्वृतइति॥याज्ञवल्क्यः॥अक्षरद्वयमभ्यस्तंनास्तिनास्तीतियत्पुरा॥तदिदंदेहिदेहीतिविपरीतमुपस्थितमिति॥तथा॥द्वारंद्वारमटंतीहभिक्षुकाःपात्रपाणयः॥दर्शयंत्येवलोकानामदातुःफलमीदृशं॥बृहस्पतिः॥द्वावेवाप्सुप्रवेष्टव्यौगलेबध्वादृढांशिलां॥धनवंतमदातारंदरिद्रंचातपस्विनमिति॥दरिद्रस्यैवदद्यादित्याह॥बृहस्पतिः॥वृष्टिर्यथासमुद्रापांतृप्तानामशनंयथा॥तथादानंसमृद्धानांदत्तंभवतिनिष्फलमिति॥अतःपरंषोडशमहादानादीनांबहुत्वादुपरम्यतइति॥कालोपनामरामेशभट्टसूनोःसुधीमतः॥महादेवाह्वजार्यस्यसूनुनाप्रभविष्णुना॥दिवाकरेणरचितादानसंक्षेपचंद्रिका॥गिरिजाजानितुष्ट्यर्थंसुदंवितनुयात्सतामिति॥२॥विद्वत्प्रार्थना॥अदृष्टदोषान्मतिविभ्रमाद्वायदर्थहीनंलिखितंमयात्र॥तत्सर्वमार्यैःपरिशोधनीयंकोपंनकुर्यात्खलुतस्यकस्य॥३॥किंच॥शास्त्रकर्ताभवेद्व्यासोलेखकोगणनायकः॥तयोर्वैचलिताबुद्धिर्मनुष्याणांतुकाकथा॥४॥लिखनपरिश्रमवेत्ताभुवनेविद्वज्जनोनान्यः॥सागरलंघनखेदंहनुमानेकःपरंवेत्ति

।। इतिकाश्यांश्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूनुनाबालंभट्टानुजदिवाकरेणविरचितादानचंद्रिकासमाप्ता।। ।।दानानिसर्वा
ण्यभिधायतेषांप्रतिग्रहेशुद्धिप्रतोभिधास्ये।।यथाधियाभावितयाप्रवृत्तिःप्रतिग्रहेसाधुजनस्यनस्यात्।।तत्रप्रेषीदानप्रकरणे।।दुष्टप्रतिग्रहहतोविप्रोभवति
पातकी।।नाभिभाषेत्ततोदत्वातन्मुखंनावलोकयेदित्यादिभविष्योत्तरे।।दुष्प्रतिग्रहदग्धस्यविप्रस्यकिलभारत।।नपश्येद्वदनंपश्चान्नचैनमभिभाषयेदि
ति।।महाभारतेच।।पूजकोगणकोव्यासोघोरग्राहीतथैवच।।परास्थिवाहकोवैद्योग्रामयाजीतथैवच।।एतेचांत्यसमालोकेनस्पृष्टव्याःकदाचन।।कदाचिन्मो
हनःस्पृष्टःसवासाआप्लुतःशुचिरिति।।पराशरस्मृतौ।।मंत्रेणानेनदत्वातंप्रणिपत्यक्षमाप्यच।।आसीमांतमनुव्रज्यतन्मुखंनावलोकयेदिति।।महार्णवे
चदुष्टप्रतिग्रहःस्पष्टः।।प्रतिग्रहदुष्टत्वंचतुर्धा।।दातृकालदेशप्रतिग्राह्यदोषभेदात्।।चांडालत्वपतित्वादयोदातृदोषाः।।कुरुक्षेत्रत्वादयोदेशदोषाः।।चंद्र
सूर्योपरागादयःकालदोषाः।।उभयतोमुखीत्वमेषीत्यादयोदेयदोषाः।।तिलधेनुर्गजोवाजीमाहिषाजिनमूर्तयः।।स्फरभिःसूयमानाचघोराःसप्तप्रतिग्रहा
इति।निषेधात्।।प्रेतान्नमजिनंमणिरितिपाठेप्रेतान्नमेकादशाहिकश्राद्धान्नभोजनम्।।मणिःशालिग्रामइतिहेमाद्रिः।।तत्रैवतन्निषेधोऽरुणस्मृतौ।।पर
मापद्गतेनापिअंत्यजातिप्रतिग्रहः।।नकार्योब्राम्हणेनेहआत्मनःश्रेयइच्छया।।प्रतिग्रहाच्चांत्यजातेःपतितत्वंप्रजायतेइति।।अंत्यजानाह।।मनुः।।रजकश्च
र्मकश्चैवनटोबुरुडएवच।।कैवर्तमेदभिल्लाश्चसप्तैतेअंत्यजाःस्मृताः।।चांडालानाह।।व्यासः।।ब्राम्हण्यांशूद्रजातश्चचांडालस्त्रिविधःस्मृतइति।।तथा।।कुरु
क्षेत्रेप्रतिग्राहीनभूयःपुरुषोभवेत्।।गायत्रीमनुजाप्येनसप्तलक्षंभवेच्छुचिरिति।।कालदोषभिन्नोसत्प्रतिग्रहनिषेधःतत्प्रतिग्रहप्रायश्चित्तकथनेनस्पष्टः।।सर्वासत्प्रतिग्रहेप्राय
श्चित्तंषट्त्रिंशन्मते।।देव्यालक्षजपेनैवमुच्यतेसत्प्रतिग्रहादिति।। ।।जपित्वात्रीणिसावित्र्याःसहस्राणिसमाहितइति।।मनूक्तंतुद्विप्रकारेणप्रतिग्र

ह्रस्यासत्वविषयं।।तेनपतितनाद्धिर्यादुष्टदेशकालयोरदुष्टद्रव्यप्रतिग्रहेषट्त्रिंशन्मतोक्तं।।दशप्राजापत्यरूपंपतितादिभ्योमहिष्यादिप्रतिग्रहेयाज्ञवल्क्योक्तमि
तिविज्ञानेश्वरः।।स्मृत्यर्थसारे।।सर्वत्रानुक्तौदानदेयकालद्रव्येष्वदुष्टेपिद्वादशनिष्कप्रमाणंद्रव्यप्रतिग्रहेकार्यं।।एवंसर्वत्र।।द्रव्यानुसारप्रायश्चित्तवृद्धिह्रासौक
ल्प्यौ।।दातृदेशकालद्रव्येष्वन्यतरदोषेएकैकगुणवृद्धिः।।मणिवासोगवादीनामन्यतरप्रतिग्रहेगायत्र्यष्टसहस्रजपः।।भिक्षादिप्रतिग्रहेपुण्यमन्त्रोच्चारण
।।नचप्रतिग्रहनिषेधत्वात्कथंप्रायश्चित्तविधिरितिवाच्यं।।प्रतिग्रहेणविप्राणांब्राह्म्यंतेजःप्रतिग्रहइत्यरुणस्मृत्याप्रायश्चित्ताम्नानेनचतत्कल्पनात्।।प्रतिग्र
हसमर्थोपिप्रसंगंतत्रवर्जयेदितिस्पष्टमतानिषेधसत्वाच्च।।प्रायश्चित्तंचप्रतिगृहीतसर्वद्रव्यंत्यक्त्वैवकार्यम्।।सतिद्रव्येप्रायश्चित्ताधिकाराभावादितिस्मृ
त्यर्थसारादयः।।अरुणस्मृतौतु।।षष्ठांशद्वादशांशपरित्यागौवैकल्पिकावुक्तौ।।तथा।।प्रतिग्रहाच्चषष्ठांशंवापिज्याच्चतृतीयकं।।कृषेर्विंशतिमंभागंत्यज
तोनास्तिपातकं।।प्रतिग्रहःकुत्सितानांत्रिभिःकृच्छ्रैर्विशुध्यति।।रथ्यावाजीचमहिषीतिलधेनुर्गजोजिनं।।सूयमानाचसुरभिर्घोराःसप्तप्रतिग्रहाइति।।ए
तेषांप्रतिग्रहेआहिताग्नेःप्राजापत्येष्टिः।।स्मार्ताग्निमतश्चरुस्तद्देवताकः।।अनग्नेःअन्येषांचकृच्छ्रत्रयं।।अरुणस्मृतौ।।गुडधेन्वादिधेनूनांप्रायश्चित्तंतथो
च्यते।।प्रतिग्रहेचरेद्विप्रःप्राजापत्यमतंद्रितः।।जपेच्चपौरुषसूक्तमप्सुचैवाघमर्षणं।।अहोरात्रस्थितश्चैवमुच्यतेतेनकिल्बिषात्।।अयुतंजपसंख्या।।गृ
हदानंमहादानंनास्तिदानंगृहात्परं।।येनदत्तेनवैतेनसर्वंदत्तंभवेन्नृणां।।गृहोपस्करणंसर्वंगोमहिष्यादिभूषणं।।कंडणीपेषणीचुल्लीह्युदकुंभस्तुमार्जनी
शय्याविभाजनंछत्रंवितानंरथगोवृषम्।।तत्रकृच्छ्रंचरेद्विप्रोमहासान्तपनंतथा।।शतंवाभोजयेद्विप्रान्गायत्रीलक्षमेवच।।प्रायश्चित्तेकृतेविप्रोमुच्यतेतत्प्र
तिग्रहात्।।प्रायश्चित्तस्याकरणेपुत्रैर्वाम्रियतेतुसः।।अश्वप्रतिग्रहंकृत्वाचरेच्चान्द्रायणत्रयं।।अश्वस्यविक्रयंकृत्वाह्यैन्दवव्रतंचरेत्।।कपिलाविक्रयंकृत्वाचरेच्चां

द्रायणत्रयं॥गोशतंगोसहस्रंचकृष्णांवैतरणींतथा॥चतस्रश्चैवगावश्चवर्जनीयाःप्रयत्नतः॥चतस्रउत्क्रांतिऋणपापमोक्षधेनवः॥गृहीत्वावैतरणींलोहपमदं
डंभयावहं॥प्राजापत्यत्रयंकुर्यात्भोजयेच्चशतंद्विजान्॥जपेद्वावामदेव्यंचशिवसंकल्पमेवच॥रथंतरंवामदेव्यंजपेन्मुच्येतकिल्बिषात्॥यज्ञकर्मणियाधेनुव्रत
धेनुस्तथैवच॥मधुपर्केचयाधेनुर्याधेनुःकर्मसिद्धये॥एतत्प्रतिग्रहेविप्रप्रायश्चित्तंनविद्यते॥पर्वतायेदशप्रोक्तास्तथैव द्विमुखीचगौः॥उभयप्रतिग्रहेविप्रःक्ष
पेन्मासचतुष्टयं॥प्राजापत्येनकृच्छ्रेणषष्ठांशंतुपरित्यजेत्॥विप्रेभ्योदद्यात्॥जपेद्द्वादशलक्षंवागायत्र्याःसायभोजनः॥शतेनमुच्यतेपापाद्विप्राणांभोजनेन
च॥शतंब्रह्मकूर्चसमन्वितं॥रथप्रतिग्रहेलक्षंगायत्रीजपमाचरेत्॥अयुतंवाथगायत्र्याःसंगमेस्नानमाचरेत्॥षष्ठांशंतुपरित्यज्यब्राह्मणान्भोजयेच्छुचिः॥
प्रतिगृह्यान्यदानानिप्रायश्चित्तंयथोदितं॥जपेन्निरंतरंदेवींवैष्णवंव्रतमाचरेत्॥जपसंख्याअयुतादि॥विद्यादानंगृहीत्वापियत्किंचित्पुस्तकादिकं॥ब्रा
ह्मणान्भोजयेद्भक्त्याकृच्छ्रमेकंसमाचरेत्॥पृथिवींप्रतिगृह्याथसशैलवनकाननां॥अपिधातुमयींगृह्यनतप्तकृच्छ्रत्रयंतथा॥भूत्वात्रिषवणस्नायीक्षपेन्मास
चतुष्टयं॥एवंशुद्धिमवाप्नोतिद्विजःषष्ठांशमुत्सृजेत्॥इदंचसदक्षिणप्रतिग्रहे॥तद्रहितप्रतिग्रहेतुनदोषः॥भूमिंयःप्रतिगृह्णातियस्तुभूमिंप्रयच्छति॥ता
वुभौपुण्यकर्माणौनियतंस्वर्गगामिनावित्युक्तेः॥अथषोडशमहादानेषुतत्रचारुणस्मृतौ॥तुलापुरुषभागंचगृहीत्वाचांद्रकंचरेत्॥हिरण्यगर्भंचतथाब्रह्मांडे
कल्पपादपे॥जलेत्रिषवणस्नायीचरेत्सांतपनद्वयं॥गोसहस्रप्रतिग्राहीयदाविप्रोह्यकामतः॥गोमूत्रयावकाहारोमासेनैकेनशुध्यति॥हिरण्यकामधेन्वादिदा
नमत्रयथोदितं॥महाभूतघटांतेषुप्रायश्चित्तमथोच्यते॥गायत्र्यादशलक्षैश्चप्राणायामसहस्रकैः॥नश्यंतिपापसंघाश्चकाकथादुष्प्रतिग्रहे॥पावमानंच
सूक्तंवैसर्वपातकनाशनं॥अत्रायमभिसंधिः॥आयुष्यमितिसूक्तेनमणिंकंठेप्रतिमुच्येत्यादिसूक्तेषुअखिलानामपिविनियोगदर्शनात्॥तेषामपिप्रायण्यव

लात्।।पावमानीजपस्याखिलेषुविधानात्तत्तत्फलापेक्षायांगोघ्नान्मातृपितृवधादित्यादिमंत्रवर्णेनतत्तत्पातकनाशस्यफलत्वावगत्यातत्तत्पापेषुपावमानीजपस्य
प्रायश्चित्तत्वंपापानुरोधेनचजपसंख्याकल्पनीयेतिदिक्।। ।।अथराजप्रतिग्रहप्रायश्चित्तं।।अनापदिराजप्रतिग्रहंनिंदतियाज्ञवल्क्यः नराज्ञःप्रतिगृण्हीयाल्लु
ब्धस्योच्छास्त्रवर्तिनः।।प्रतिग्रहेसूनीचक्रीध्वजीवेश्यानराधिपाः।।दुष्टादशगुणंपूर्वंपूर्वादेतेयथोत्तरमिति।।संवर्तः।।राजप्रतिग्रहोघोरोमध्वास्वादोविषोपमः।।पुत्रमां
संवरंभोक्तुंनतुराजप्रतिग्रहइति।।स्कांदे।।मरुदेशेनिरुदकेब्रम्हरक्षस्त्वमागतः।।राजप्रतिग्रहात्पुष्टः पुनर्जन्मनविंदति।।ब्राम्हण्यंयःपरित्यज्यद्रव्यलोभेनमोहितः
।।विषयामिषलुब्धस्तुकुर्याद्राजप्रतिग्रहं।।नरकेरौरवेघोरेतस्यैवपतनंध्रुवं।।वृक्षादावाग्निनादग्धाःप्ररोहंतिघनागमे।।राजप्रतिग्रहाद्दग्धानप्ररोहंतिकेनचिदितिविष्णु
धर्मोत्तरे।।दशसूनासमश्चक्रीदशचक्रसमोध्वजी।।दशध्वजीसमावेश्यादशवेश्यासमोनृपः।।दशसूनासहस्राणियोवाहयतिसौनिकः।।तेनतुल्यःस्मृतोराजातस्माद्घोरःप्र
तिग्रहइति।।इत्यधार्मिकराजविषयेनिंदा।।तथाचतत्रैवलिखितं।।येषांनविषयेप्रीतिर्यज्ञैर्यज्ञपतेर्हरेः।।यत्रयेभूभुजांतेषामेतत्सूनादितंफलं।।येषांपाषंडिसंकीर्णराष्ट्रंन
ब्राम्हणोत्कटं।।एतेसूनासहस्राणांदशानांभोगिनोनृपाः।।येषांनयज्ञपुरुषःकारणंपुरुषोत्तमः।।तेनृपापसमाचाराःसूनापापौघभागिनइति।।अदुष्टात्तुराज्ञःप्रतिग्रहोन
निंदितः।। अतएवोक्तंछंदोगशाखायां।।प्राचीनशालादीन्महामुनीन्राजप्रतिग्रहेप्रवर्तनइतिअश्वपतिनामकेनराज्ञादोषाभावउपन्यस्तः।।नमेस्तेनोजनपदेनकदर्योनमद्य
पः।।नाहिताग्निर्नाविद्वान्स्वैरिणी।।कुतइतियाज्ञवल्क्यवचनेपिराजप्रतिग्रहनिंदायांलुब्धस्योच्छास्त्रवर्तिनइतिराजविशेषणाददुष्टराजप्रतिग्रहोननिंदितइतिगम्यते।।
तथा।।नारदोपि।।श्रेयान्प्रतिग्रहोराज्ञांनान्येषांब्राम्हणादृते।।ब्राम्हणश्चैवराजाचद्वावप्येतौधृतव्रतौ।।नैतयोरंतरंकिंचित्प्रजाधर्माभिरक्षणे।।शुचीनामशुचीनांचसन्नि
वेशोयथांभसां।।समुद्रंसमतांयातितद्वद्राज्ञांधनागमः।।यथाग्नौसंस्थितंचैवशुद्धिमायातिकांचनं।।एवंधनागमःसर्वःशुद्धिमायातिराजनीति।।राजप्रतिग्रहेप्रायश्चित्त

प्रा·तं·
५२

याह।।वृद्धहारीतः।।राज्ञःप्रतिग्रहंकृत्वामासमप्सुसदावसेत्।।षष्ठेकालेपयोभक्षःपूर्णेमासेप्रमुच्यते।।तर्पयित्वाद्विजान्कामैःसततंनियतव्रतइति।।तदसत्प्रतिग्रहविषय-
मितिमाधवः।।अथरहस्यप्रायश्चित्तानि।।याज्ञवल्क्यः।।अनभिख्यातदोषस्तुरहस्यंव्रतमाचरेदिति।।कर्तृव्यतिरिक्तैर्यदीयोदोषोनज्ञायतइत्यर्थः।।अतस्त्वपारदार्यादेरपि
स्त्रीप्रशंसाभ्यामितरेणज्ञानस्यरहस्यतास्त्येव।।नस्यप्रायश्चित्तमपिरहस्यमेवकर्तव्यं।।तथाचहारीतः।।रहस्येरहस्यंप्रकाशेप्रकाशमितितत्ररहस्यानांसाधारणप्रायश्चित्तं
मनुराह।।वेदाभ्यासोन्वहंशक्त्यामहायज्ञक्रियाक्षमाः।।नाशयंत्याशुपापानिमहापातकजान्यपि।।यथैधस्तेजसावन्हिःप्राप्तंनिर्दहतिक्षणात्।।तथाज्ञानकृतंपापंकृत्स्नंद
हतिवेदवित्।।सव्याहृतिकप्रणवाःप्राणायामास्तुषोडश।।अपिभ्रूणहतंमासंपुनंत्यहरहःकृताइति।।वसिष्ठः।।यच्चकार्यकृतंसाग्रंशतंवेदेश्चधार्यते।।तत्सर्वंत
स्यवेदाग्निर्दहत्यग्निरिवेंधनं।।यमः।।सहस्रपरमांदेवींशतमध्यांदशावरां।।गायत्रींसंजपेन्नित्यंमहापातकनाशिनीमिति।।मूलेशौनकः।।ऋग्वेदमभ्यसेद्यस्तुयजुःस
माथवापिवा।।सूक्तानिसरहस्यानिअथर्वांगिरसस्तथा।।ब्राम्हणानिचकल्पांश्चषडंगानितथैवच।।इतिहासपुराणानिदेवतास्तवनानिच।।अस्त्वापापैःप्रमुच्येत्धर्म
स्थानेतथापरैरिति।।कौर्मे।।जपस्तपस्तीर्थसेवादेवब्राम्हणपूजनं।।ग्रहणादिषुकालेषुमहापातकशोधनं।।पुण्यक्षेत्राभिगमनंसर्वपापप्रणाशनं।।देवताभ्यर्चनंनृ
णांसर्वपापप्रणाशनं।।अमावास्यातिथिंप्राप्ययःसमाराधयेच्छिवं।।ब्राम्हणान्भोजयित्वातुसर्वपापैःप्रमुच्यते।।कृष्णाष्टम्यांमहादेवंतथाकृष्णचतुर्दशीं।।संपूज्यब्रा
म्हणमुखेसर्वपापैःप्रमुच्यते।।त्रयोदश्यांतथारात्रौसोपहारंत्रिलोचनं।।दृष्ट्वेशंप्रथमेयामेमुच्यतेसर्वपातकैः।।एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनं।।द्वादश्यांशुक्ल
पक्षस्यसर्वपापैःप्रमुच्यते।।उपोषितश्चतुर्दश्यांकृष्णपक्षेसमाहितः।।यमायधर्मराजायमृत्यवेचांतकायच।।वैवस्वतायकालायसर्वभूतक्षयायच।।औदुंबरायदध्नाय-
नीलायपरमेष्ठिने।।वृकोदरायचित्रायचित्रगुप्तायवैक्रमात्।।चतुर्दशैतेमंत्राःस्युश्चतुर्थ्यंतानमोन्विताः।।प्रत्येकंतिलसंमिश्रान्दद्यात्सप्तोदकांजलीन्।।स्नात्वानद्यां

५२

तुपूर्वाण्हेमुच्यतेसर्वपातकैरिति।।तथातत्रैवाध्यायांतरे।।अस्मिन्कलियुगेघोरेलोकाःपापानुवर्तिनः।।भविष्यंतिमहाबाहोवर्णाश्रमविवर्जिताः।।नान्यत्पश्यामिजंतूनां
मुक्त्वावाराणसींपुरीं।।सर्वपापप्रशमनंप्रायश्चित्तंकलौयुगइति।।इतिरहस्येषुसाधारणप्रायश्चित्तानि।। ।।अथप्रतिपदोक्तप्रायश्चित्तानि।।याज्ञवल्क्यः।।त्रिरात्रोपो
षितोजप्त्वाब्रम्हहात्वघमर्षणं।।अंतर्जलेविशुध्येच्चगांचदद्यात्पयस्विनीमिति।।मनुः।।हविष्यांतीयमभ्यस्यनतमंहइतीतिच।।जप्त्वाचपौरुषंसूक्तंमुच्यतेगुरुतल्प
गइति।।हविष्पांतमजरंस्वर्विदीत्येकोनविंशर्चं।।नतमंहोनदुरितंसप्तर्चं।।इतिवाइतिमेमनत्रयोदशर्चं।।सहस्त्रशीर्षेतिषोडशर्चं।।एतेषांचतुर्णांसूक्तानांअन्यतमंप्रत्यहंषोड
शकृत्वोमासंजपित्वा।।अकामतोगुरुतल्पगःशुध्यतीतिविज्ञानेश्वरादिसंमतोर्थः।।मूलेशौनकः।।अतोदेवाजपेत्सूक्तमग्नआयूंषिवातृचां।।अघमर्षंचवाजप्त्वामुच्यतेब्रम्ह
हत्ययेति।।इतिश्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवह्निभवर्यसूनुभट्टदिवाकरविरचितदानसंक्षेपचंद्रिकायांसदसत्प्रतिग्रहप्रायश्चित्तानिकार्य्यानिरूपि
तानि।।इतिस्मृत्यर्थसारोक्तरहस्यप्रायश्चित्तानिनिरूपितानि।। ।।अथस्मृत्यर्थसारोक्तरहस्यप्रायश्चित्तानिकर्तृव्यतिरिक्तेतरदोषेरहस्यंप्रायश्चित्तंचरेत्।।अविद्वांस्तुमु
खांतरेणरहस्यप्रायश्चित्तंज्ञात्वारहस्यंचरेत्।।स्त्रीशूद्राश्चैवंजपहोमवर्ज्यं।।तत्राहारविशेषानुक्तौपयःप्रभृतयः।।कालविशेषानुक्तौवत्सरादयोमासांताः।।देशविशेषानु
क्तौशिलोच्चयादयोगौतमोक्ताः।।जपेतुऋषिदेवतछंदोविनियोगाविज्ञेयाः।।अमत्याब्राम्हणवधेतस्त्रिरात्रमंतर्जलेनिमज्ज्यऋतंचसत्यंचेत्यघमर्षणसूक्तमावर्त्यत्रि
रात्रांतेपयस्विनींगांदत्वाशुध्येत्।।दानाशक्तौ।।सव्याहृतिकाःषोडशप्राणायामाः।।प्रतिदिनंमासमावर्त्य।।अभ्यासेतुत्रिंशद्रात्रंव्रतस्थः।।प्राणायामैश्चांतेघमर्षणंज
पेत्।।महापापैःशुध्येत्।।मत्यान्वित्याग्वानिष्क्रम्यस्नायादिति।।इतिसंक्षेपदानचंद्रिकासमाप्ता।। ।। ।।श्रीसद्गुरवेनमः।। ।। ।।

इतिदानचंद्रिकासमाप्तः